This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M- 2830

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
श्रीमद्भागवत		धर्मशास्त्र	पूर्ण	मुकुंद भट्ट	6/14	3000	संस्कृत	कागद	15	51		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2830

प्रथमस्कंदप्रारंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ नमो भगवते श्रीवरदमूर्तये गजाननाय। ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवा
साय श्रीरामचंद्राय॥ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि। यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे॥१॥ विश्वसर्गविसर्गा
म१ दिनवलक्षणलक्षितं। श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्॥२॥ माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ। वंदे परस्प
रात्मानौ परस्परनतिप्रियौ॥३॥ संप्रदायानुरोधेन पौर्वापर्यानुसारतः। श्रीभागवतभावार्थदीपिकेयं प्रतन्यते॥४॥ क्वा
हं मंदमतिः क्वेदं मंथनं क्षीरवारिधेः। किं तत्र परमाणुर्वै यत्र मज्जति मंदरः॥५॥ मूकं करोति वाचालं पंगुं लंघयते
त६ गिरिं। यत्कृपा तमहं वंदे परमानंदमाधवं॥६॥ श्रीमद्भागवताभिधः सुरतरुस्ताराङ्कुरः सज्जनिः स्कंधैर्द्वादशभि
स्ततः प्रविलसद्भक्त्यालवालोदयः। द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः सहस्राण्यलं पर्णान्यष्टदशेष्टदो
ऽतिसुलभो वर्वर्ति सर्वोपरि॥७॥ अथ नानाशास्त्रप्रबंधैश्चित्तप्रशांतिमलभमानस्तत्र तत्रापरितुष्यन्नारदोप
देशतः श्रीमद्भगवद्गुणानुवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्यपरदेवतानुस्मरण
लक्षणं मंगलमाचरति। जन्माद्यस्येति। परं धीमहीति ध्यायेते लिंङि छांदसं ध्यायेमेत्यर्थः। बहुवचनं च
१ शिष्याभिप्रायं। तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति। तत्र स्वरूपलक्षणं सत्यमिति। सत्यत्वे हे
तुः। यत्र यस्मिन् त्रयाणां मायागुणानां तमोरजःसत्वानां सर्गो भूतेंद्रियदेवतारूपः अमृषा सत्यः। यत्स
त्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः। अत्र दृष्टांतः। तेजोवारिमृदां यथा विनिमया
व्यत्ययः अन्यस्मिन्नन्यावभासः। स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः। तत्र तेजसि वारिबुद्धिः मरी
चितोये प्रसिद्धा मृदादिकाचादौ वारिबुद्धिरित्यादि यथायथमूह्यं। यद्वा। तस्यैव परमार्थसत्यत्वप्रतिपाद १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ नापन्हवितरस्य मिथ्यात्वमुक्तं। यत्र मृषैवार्थं त्रिसर्गो न वस्तुतः सन्निति। यत्रेत्यनेनप्रतीतेरुपाधिसंबंधं वारयति। स्वेनैव
धाम्नामहसा निरस्तं कुहकं कपटं यस्मिन्नं तं। तटस्थलक्षणमाह जन्मादीति। अस्य विश्वस्य जन्मस्थितिभंगं यतो भव
तितं धीमहीति। तत्र हेतुः अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् कार्येभ्यश्च खपुष्पादिभ्यश्च व्य
तिरेकात्। यद्वा अन्वयशब्देनानुवृत्तिरितरशब्देन व्यावृत्तिः। अनुवृत्तत्वात् सद्रूपं ब्रह्मकारणं मृत्सुवर्णादिवत्। व्या
वृत्तत्वात् विश्वं कार्यं घटकुंडलादिवदित्यर्थः। यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तत् यतो
भवतीति संबंधः। तथा च श्रुतिः यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंती
त्याद्याः। स्मृतिश्च यतः सर्वाणि भूतानि भवंत्यादियुगागमे। यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये इत्याद्याः। त
र्हि किं प्रधानं जगत्कारणत्वात् ध्येयमभिप्रेतं नेत्याह अभिज्ञ इति। स ऐक्षत लोकान्नु सृजा इति स इमांल्लोका
नसृजतेति श्रुतेः। ईक्षतेर्नाशब्दमिति न्यायाच्च। तर्हि जीवः स्यात् नेत्याह स्वराट् स्वेनैव राजते यः तं स्वतःसि
द्धज्ञानमित्यर्थः। तर्हि किं ब्रह्मा। हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदिति श्रुतेः। नेत्याह ते
न इति। आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यः तेने प्रकाशितवान्। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्र
हिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः। ननु ब्रह्मणोऽन्यतो वेदा
मः ध्ययनं प्रसिद्धं सत्यं तत्तु हृदा मनसैव तत्तेने। अनेन बुद्धिवृत्तिप्रवर्तकत्वेन गायत्र्यर्थो दर्शितः। वक्ष्यति
हि। प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि। स्वलक्षणा प्रादुरभूत् किलास्य
तः स मे ऋषीणामृषभः प्रसीदतामिति। ननु ब्रह्मा स्वयमेव सुप्तप्रतिबुद्धन्यायेन वेदमुपलभतां।

४ अस्यायमर्थः किं न हि प्रधानं कारणं॥ तत्राह इदं सिद्धांतस्वतंत्रं ईक्षतेर्नाशब्दं न सांख्यादिपरिकल्पितं प्रधाना
दि वेदांतेषु प्रतिपाद्यते कुतः अशब्दं हि तत् वेदान्तप्रतिपाद्यत्वात् कथं ... तेः चेतनश्रवणात् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रा१

भा० प्र० १ नेत्याह। यद्यस्मिन्ब्रह्मणि सूरयोऽपि मुह्यंतीति तस्माद्ब्रह्मणोऽपि पराधीनत्वात् स्वतः सिद्धज्ञानः परमेश्वर
एव जगत्कारणं अत एव सत्यः असतः सत्ताप्रदत्वाच्च परमार्थसत्यः सर्वज्ञत्वेन च निरस्तकुहकं तं
धीमहीति। गायत्र्याः प्रारंभेन च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पु राणमिति निदर्शितं यथोक्तं मत्स्यपुरा
णे पुराणदानप्रस्तावे। यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमिष्यते। लिखित्वा तच्च यो
दद्याद्धेमसिंहसमन्वितं। प्रोष्ठपद्यां पौर्णमास्यां स याति परमं पदं। अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितं। पुराणांत

पु:

॥श्रीगणेशाय नमः॥ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यं
तियत्सूरयः। तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धी
२ महि॥१॥ धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवं वस्तु शिवदं तापत्रयोन्मूलनं॥ श्री वे२
मद्भागवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥२॥

त्र मत्र २

रे च। ग्रंथोऽष्टादशसाहस्रो द्वादशस्कंधसंमितः। हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्या च समारंभस्तद्वै भागवतं वि
दुः। पद्मपुराणे अंबरीषं प्रति गौतमवचनं। अंबरीष शुकप्रोक्तं नित्यं भागवतं शृणु। पठस्व स्वमुखेनापि यदीच्छसि भवक्ष राम
यमिति। अत एव भागवतं नामान्यदित्यपि न शंकनीयं॥ १ इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य कांडत्रयविष २
येभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शयति। धर्म इति। अत्र श्रीमति सुंदरे भागवते परमो धर्मो निरूप्यते। परमत्वे हेतुः प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकर्षेण उज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन् सः प्रशब्देन मोक्षाभिसंधिरपि निरस्तः केवलमीश्वराराधन
लक्षणो धर्मो निरूप्यत इति अधिकारिणोऽपि धर्मस्य परमत्वमाह निर्मत्सराणां परस्योत्कर्षाऽसहनं मत्सरः तद्रहि
तानां सतां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्त्वा ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमाह वे
द्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकाणामिव द्रव्यगुणादिरूपं यद्वा वास्तवशब्देन वस्तुनोंऽ
शो जीवः वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथक् इति वेद्यं अयत्नेनै
व ज्ञातुं शक्यमित्यर्थः ततः किमत आह शिवदं परमसुखदं किंच आध्यात्मिकादितापत्रयोन्मूलनं
अनेन ज्ञानकांडविषयेभ्यः श्रैष्ठ्यं दर्शितं कर्तृतोपि श्रैष्ठ्यमाह महामुनिः श्रीनारायणः तेन प्रथमं संक्षि
प्य कृते देवताकांडविषयगतं श्रैष्ठ्यमाह परैः शास्त्रैस्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरु
ध्यते स्थिरीक्रियते वा शब्दः कटाक्षे किंतु विलंबेन अत्र तु शुश्रूषुभिः श्रोतुमिच्छद्भिरेव तत्क्षणा
देवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वंति तत्राह कृतिभिरिति श्रवणेच्छा तु पुण्यैर्विना नो
त्पद्यत इत्यर्थः तस्मादत्र कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं ॥
अतो नित्यमेतदेव श्रोतव्यमिति भावः ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींतुनकेवलंसर्वशास्त्रेभ्यः श्रेष्ठत्वादस्यश्रवणंविधीयते अपितुसर्वशास्त्रफलरूपमिदं अतःपरमादरेणसेव्यमित्याह निगमेति ॥
निगमोवेदः सएवकल्पतरुः सर्वपुरुषार्थोपायत्वात् तस्यफलमिदंभागवतंनाम ननुवैकुंठगतेनारदेनानीयमह्यंदत्तंमयाचशुकस्य
मुखेनिहितंतेनचतन्मुखाद्भुविगलितंशिष्यादिरूपपल्लवपरंपरयाशनैरखंडमेवावतीर्णं नतूच्चनिपातेनस्फुटितमित्यर्थः एत
च्चभविष्यदपिभूतवन्निर्दिष्टं अनागतार्थानेनेवास्यशास्त्रस्यप्रवृत्तेः अतएवामृतरूपेणद्रवेणसंयुतं लोकेहिशुकमुखस्पृष्टं
फलममृतमिवस्वादुभवतीतिप्रसिद्धं अत्रशुकोमुनिः अमृतंपरमानंदः सएवद्रवोरसः रसोवैसः रसंह्येवायंलब्ध्वानं
दीभवतीतिश्रुतेः अतोहेरसिकाः हेरसज्ञाः तत्रापिभावुकाः हेरसविशेषभावनाचतुराः अहोभुविगलितमित्यलभ्यला
भोक्तिः इदंभागवतंनामफलंमुहुःपिबत ननुत्वगस्थ्यादिकंविहायफलाद्रसःपीयतेकथंफलमेवपातव्यंतत्राह रसंरस॰

२ ॥ निगमकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतं पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः ३

पं अतः त्वगस्थ्यादिहेयांशस्याभावात् फलमेवरसात्मकंपिबत अत्रचरसतादात्म्यविवक्षयारसवत्त्वस्याविवक्षितत्वाद्गुणवच
नेः परिसशब्दान्मतुपः प्राप्त्यभावात्तेनविनैवरसंफलमितिसामानाधिकरण्यं तत्रफलमित्युक्तेपानासंभवाद्यथाप्रसक्तिप्र
भवेदितितन्निरस्त्यर्थंरसमित्युक्तं रसमित्युक्तेऽपिगलितस्यरसस्यपातुमशक्यत्वात् फलमित्युक्तमिति सामानाधिकरण्यंद्रष्टव्यं
नचभागवतामृतपानेमोक्षेऽपित्याज्यमित्याह आलयंलयोमोक्षः अभिविधावाकारः लयमभिव्याप्य नहीदंस्वर्गादिसुखवन्मु रामः
क्तैरुपेक्ष्यते किंतुसेव्यतएववक्ष्यतिहि आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमेकुर्वंत्यहैतुकींभक्तिमित्थंभूतगु २
णोहरिरिति ३

अभिव्यापकं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच यानीत्यादि विदांविदुषां मध्ये श्रेष्ठः व्यासः यानि वेद परावरे सगुणनिर्गुणे ब्रह्मणी विदंतीति तथा ७ वेत्थ जानासि सौम्येह
साधो तेषामनुग्रहात् तत्त्वतो ज्ञाने हेतुमाहुः ब्रूयुरिति स्निग्धस्य प्रेमवतः उत एव रहस्यमपि ब्रूयुरेव ८ अंजसा ग्रंथार्जवेन ॥
एकांततः श्रेयः अव्यभिचारि श्रेयः साधनं ९ अन्येपि बहुनाकालेन बहुशास्त्रश्रवणादिभिर्विनिश्चिन्वंतु तत्याहुः प्राय
णेति हे सभ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनाः तत्रापि मंदाः अलसाः तत्रापि सुमंदमतयः तत्रापि मंदभाग्याः विघ्ना
कुलाः तत्रापि उपद्रुता रागादिभिः १० न च बहुशास्त्रश्रवणं विनापि न तेन फलसिद्धिरित्याहुः भूरीणि कर्माण्यनुष्ठेयानि ये

य२

यानि वेद विदां श्रेष्ठो भगवान्बादरायणः अन्ये च मुनयः सूत परावरविदो विदुः ७ वेत्थ त्वं सौम्य तत्सर्वं तत्त्वत
स्तदनुग्रहात् ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ८ तत्र तत्रांजसायुष्मन्भवता यद्विनिश्चितं पुंसामे
४ कांततः श्रेयस्तन्नः शंसितुमर्हसि ९ प्रायेणाल्पायुषः सभ्य कलावस्मिन्युगे जनाः मंदाः सुमंदमतयो
मंदभाग्या ह्युपद्रुताः १० भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः अतः साधोऽत्र यत्सारं समुद्धृत्य
मनीषया ११ ब्रूहि नः श्रद्दधानानां येनात्मा संप्रसीदति सूत जानासि भद्रं ते भगवान्सात्वतां पतिः १२

श्रुतानि समुद्धृत्य यथावदुद्धृत्य येन उद्धृतवचनेन न आत्मा बुद्धिः संप्रसीदति सम्यगुपशाम्यति ११ प्रश्नांतरं सूत जानासीति
पंचभिः भद्रं ते इत्यौत्सुक्येनाशीर्वादः भगवान्निरतिशयैश्वर्यादिगुणः सात्वतां सच्छब्देन सत्त्वमूर्तिर्भगवान्स तमुपास्यत
याविद्यते येषामिति सात्वता भक्ताः स्वार्थे अण् राक्षसवायसादिवत् तस्य चाश्रवणमार्षं तदेवं सात्वत इति भवति तेषां राम ४
पतिः पालकः यस्यार्थे विशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां जातः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमनेन श्लोकत्रयेण विशिष्टदेवतानुस्मरणपूर्वकं प्रारिप्सितस्य शास्त्रस्य विषयप्रयोजनादिसंबंधाधिकारिणं वैशिष्ट्येन सुखसे
२ व्यत्वेन च श्रोतॄनभिमुखीकर्तुं शास्त्रमारभते नैमिश इति ब्रह्मणा विसृष्टस्य चक्रस्य मनोमयस्य नेमिः शीर्यते कुंठीभवति यत्र तन्नैमि
शं तथा च वायवीये एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः इत्युक्त्वा सूर्यसंकाशं च
क्रं सृष्ट्वा मनोमयं प्रणिपत्य महादेवं विससर्ज पितामहः तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्य
शीर्यत तद्वनं तेन विख्यातं नैमिशं मुनिपूजितमिति नैमिष इति पाठे वाराहपुराणाद्द्रष्टव्यं तथा हि गौरमुखं महर्षिं प्रति भगव

तु

श्रीव्यास उवाच ॐ नैमिशे निमिषक्षेत्रे ऋषयः शौनकादयः सत्रं स्वर्गाय लोकाय सहस्रसममासत ४ त एकदा तु
मुनयः प्रातर्हुतहुताग्नयः सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ५ त्वया खलु पुराणानि सेतिहासानि चानघ आ
ख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ६

दाक्यं एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा उवाच निमिषेणेदं निहतं दानवं बलं अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं भविष्यति
यथार्थं वै ब्राह्मणानां विशेषकमिति अनिमिषः श्रीविष्णुः अस्तु सदृष्टित्वात्तस्य क्षेत्रे तथा चोक्तिर्वा शौनकादिवचनं क्षेत्रेऽस्मिन्नैमिषे वय
मिति स्वर्गाय तद् इति स्वः स्वर्गे स्वर्गायो हरिः स एव लोकः भक्तानां निवासस्थानं तस्मै तत्प्राप्त्यर्थ इत्यर्थः सहस्रं समाः संवत्सरा अनु
ष्ठानकालो यस्य तत्सत्रं सत्रसंज्ञकं कर्मोद्दिश्य आसत उपविविशुः यद्वा आसत अकुर्वतेत्यर्थः आलभेत निर्वपति उपयंती
त्यादिवत् प्रत्ययोच्चारणमात्रार्थत्वेन आसधात्वर्थस्याविवक्षितत्वात् ४ प्रातः कृतहुता एव हुता अग्नयो यैस्ते अनेन नित्यं नैमित्ति
कहोमस्याकल्पदर्शितं इदं वक्ष्यमाणं आदरात्पप्रच्छुः ५ विविदिषितामर्थान्प्रष्टुं सूतस्य सर्वशास्त्रज्ञानातिशयमाहुः त्वयेति त्रिभिः श्लोकैः य २
इतिहासो महाभारतादिः तत्सहितानि न केवलमधीतानि अपि तु आख्यातान्यपि व्याख्यातानि च उत अपि यानि धर्मशास्त्राणि
वायव्यं श्वेतमालभेत आग्नेयं च रुं निर्वपति शिघ्रति तिष्ठंति हवाए तेय एता रात्रीरुपयंति इत्यादिवत् तान्यपि ६
रात्रिसत्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगहे सूत तन्नोवर्णयितुमर्हसि सामान्यतस्तावद्यस्यावतारो भूतानां क्षेमाय भवाय च समुद्दिश्य १२ तत्र भावमनु वर्णयेत्युक्तम् यतः श्रवणोत्सुक्यमाविष्कुर्वंति आपन्न इति त्रिभिः संसृतिमापन्नः प्राप्तः विवशोपि तन्नः संसृतेः अत्र हेतुः यद्यतोनाम्नः भयमपि स्वयं बिभेति किंच यस्य पादः संश्रयो येषां ते एव प्रशमो यं तत्त्वे आश्रयो येषां ते मुनयः उपस्पृष्टाः संनिधिमात्रेण सेविताः सद्यः पुनंति स्वर्धुनी गंगा तस्या आपस्तु तत्पादाश्रितस्तताः ननु तेन त्रैवर्तिंस्तति अत एव स्वयं पुनंत्यः पितुरनुसेवया पुनंति ननु सद्य इति मुनीनामुत्कर्षोक्तिः पुण्यश्लोकैः ईड्यानि कर्माणि यस्य तस्य यशः संसार दुःखापनाशनं १५ प्रश्नांतरं तस्येति उदाराणि महांति विश्वस्य सृष्ट्यादीनि १५ सूरिभिः नारदादिभिः कल्याः प्रसन्नाः दादि भृतो १६

देवक्यां वसुदेवस्य जातो यस्य चिकीर्षया तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं १२ यस्यावतारो भूतानां क्षेमाय च भवाय च आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् १४ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं यत्पादसंश्रयाः सूत मुनयः प्रशमायनाः १५ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया को वा भगवतस्तस्य पुण्यश्लोकेड्यकर्मणः शुद्धिकामो नशृणुयाद्यशः कलिमलापहं १६ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः १७

अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः लीलाविदधतः स्वैरमीश्वरस्यात्ममायया १८ वयं तु न वितृप्याम उत्तमश्लोक विक्रमे यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे १९ ॥

अथेति प्रश्नांतरं अवतारकथाः स्थित्यर्थमेव तत्तद्वसरे ये मत्स्याद्यवतारास्तदाश्रयाः कथाः स्वैरं लीलाः कुर्वतः श्रीकृष्णावतारप्रयोजनप्रश्नेनैव तच्चरितप्रश्नोपि ज्ञात एव तथाप्यत्यौत्सुक्येन पुनरपि तच्चरितान्येव श्रोतुमिच्छंतस्तत्राप्यात्मनस्तस्य भावमाविर्वर्णयंति वयं त्विति यागयोगादिषु तृप्तास्मः उत्तमश्लोकस्य विक्रमे तु न तृप्यामः श्लोकयशोयस्य तस्य विक्रमेति विशेषणं न तृप्यामः अलमिति न मन्यामहे तत्र हेतुः यद्विक्रमं शृण्वतां यद्वा अन्वयोगुणाभवयं तुनेति तु शब्दस्यान्वयः अयमर्थः त्रैधाप्यलं वा बुद्धिर्भवति उदरपूरणादि भरणेन वा स्वादुविशेषाभावाद्वा तत्र शृण्वतामित्यनेन श्रोत्राख्याकरो बाह्यभरणमित्युक्तं रसज्ञानामित्यनेनेच्छाज्ञानतः प्रवृत्तत्वं निरारसज्ञानेन वा

हेता इक्षुभक्षणवद्रसांतराभावेन तृप्तिं निराकरोति पदेपदेय
तिक्षणं स्वादुतोपि स्वादु १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० प्र० १ अतः श्रीकृष्णचरित्राणि कथयेत्याशयेनाहुः कृतवानिति अतिमर्त्यानि मर्त्यानतिक्रान्तानि गोवर्द्धनोद्धरणादीनि मनुष्येष्वसंभावि
तानीत्यर्थः १९ ननु याजनाध्यापनादिव्यग्राणां कुत एव श्रवणावकाशः स्यात् अत आहुः कलिमागतं ज्ञात्वा क्रियाविघ्नमुपद्रवं नु का
माः दीर्घसत्रेण निमित्तेनासीना आहेरः कथायां सक्षणाः लब्धावसराः २० आस्मिन्नस्मिन्समये त्वद्दर्शनमीश्वरेणैव संपादितमित्याहुः अभि
नंदति त्वमिति कलिं निस्तर्तुमिच्छतां अर्णवं तितीर्षतां कर्णधारो नाविक इव २१ पुनः प्रश्नांतरं ब्रूहीति धर्मस्य वर्मणि कवच
षड्क्षके स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः अस्य चान्तरं कृष्णे स्वधामोपगते धर्मज्ञानादिभिः संहेत्य श्लोकौ २२ २३ इति श्री भावार्थदीपि

कृतवान्किल वीर्याणि सह रामेण केशवः अतिमर्त्यानि भगवान्गूढः कपटमानवः १९ कलिमागतमाज्ञाय क्षे
त्रेऽस्मिन्वैष्णवे वयं आसीना दीर्घसत्रेण कथायां सक्षणा हरेः २० त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां
कलिं सत्वहरं पुंसां कर्णधार इवार्णवं २१ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि स्वां काष्ठामधुनोपेते
धर्मः कं शरणं गतः २२ २३ इति श्री भागवते महापुराणे प्रथमस्कंधे नैमिषेयोपाख्याने प्रथमोऽध्यायः १
व्यास उवाच इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे १

कायां प्रथमे प्रथमोऽध्यायः १ तदेवं प्रथमेऽध्याये षट् प्रश्ना मुनिभिः कृताः द्वितीये तु तेषु उत्तरं सूत आह तत्र तु इत्थं (प्र)थ राम
विप्राणां इति एवं भूतैः सम्यक् प्रश्नैः सम्यक् हृष्टः रोमहर्षणस्य पुत्रः उग्रश्रवाः तेषां वचः प्रतिपूज्य सत्कृत्य प्रवक्तुमुपचक्रमे ५
उपक्रान्तवान्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवचनस्योपक्रमोनामगुरुदेवतानमस्कारइतितमाहत्रिभिः यमिति तत्रस्वगुरोः शुकस्यश्रवणंतच्चरितेनैववर्णयन्नाह यंप्रव्रजंतंसं
न्यासगच्छंतं अनुपेतमनुपनयस्वेत्युपनयनार्थमनुपसन्नं यद्वा केनाप्यनुपेतंअननुगतमेकाकिनमित्यर्थः तत्रहेतुः अपेतकृ
त्यंकृत्यश्रौश्रुत्यकर्ममार्गःप्रवर्त्तमानं नैष्ठिकत्वात् द्वैपायनोव्यासः विरहात्कातरोभीतः पुत्राइतिप्लुतेनाजुहाव आहूतवान्
कं४ दूरादाह्वानेप्लुतसत्यपिसंधिरार्षः तदातन्मयतयापुत्ररूपतयातरवोभिनेदुः प्रत्युत्तरमुक्तवंतः पितुःस्नेहानुबंधपरिहाराय
योऽहंरूपेणोत्तरंदत्तवानित्यर्थः तंमुनिमानतोस्मि तन्मयत्वोपपादनायविशेषणं सर्वभूतानांहृदन्तुमनः अयंतुयोगबले

सूतउवाच यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव पुत्रेतितन्मयतयातरवोऽभिने
दुस्तंसर्वभूतहृदयंमुनिमानतोस्मि २ यःस्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्ष
तांतमोंधं संसारिणांकरुणयाहपुराणगुह्यंतंव्याससूनुमुपयामिगुरुंमुनीनां ३ नारायणंनमस्कृत्य
नरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरयेत् ४

नप्रविशतीतिसर्वभूतहृदयंतं २ तत्कृपालुतांदर्शयन्नाहयइति अंधंगाढंतमः संसाराख्यंअतितर्तुमिच्छतांपुराणानां
मध्येगुह्यंगोप्यंतत्रहेतुत्वेनचत्वारिविशेषणानि स्वःनिजःअसाधारणः अनुभावःप्रभावोयस्यतत्स्वानुभावं अखिलश्रुती
नांसारं एकमद्वितीयं अनुपममित्यर्थः आत्मानंकार्यकारणसंघातमधिकृत्यवर्त्तमानमात्मतत्वमध्यात्मंतस्यदीपंभा
वःप्रभावोयस्यसाक्षात्प्रकाशकं उपयामिशरणंव्रजामि ३ एवंद्वाभ्यांगुरुंनमस्कृत्यदेवंप्रणमति जयत्यनेनसंसार
मितिजयोग्रंथः तमुदीरयेदितिस्वयंतथोदीरयन् अन्यान्पौराणिकानुपशिक्षयति ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० १० तेषांवचः प्रतिपूज्येतियदुक्तंतत्प्रतिपूजनंकरोति हेमुनयः साधुयथाभवतितथाहंपृष्टः यतोलोकानांमंगलमेतत् यद्यतः
कृष्णविषयः संप्रश्नः कृतः सर्वशास्त्रार्थसारोद्धारप्रश्नस्यापिकृष्णपर्यवसानादेवमुक्तं ५ तत्रयत्प्रथमंपृष्टंसर्वशास्त्रसा
रमैकांतिकंश्रेयोब्रूहीतितत्रोत्तरं सवैपुंसामिति अयमर्थः धर्मोद्विविधः प्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च तत्रयःस्व
र्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः यतस्तुधर्मात् श्रवणद्वारादिलक्षणाभक्तिर्भवतिसः परोधर्मः सएवैकांतिकंश्रेयइ
ति कथंभूता अहैतुकीहेतुः फलानुसंधानंतद्रहिता अप्रतिहताविघ्नैरनभिभूता ६ ननुतमेनमात्मानंवेदानुवचनेन

मुनयः साधुपृष्टोहंभवद्भिर्लोकमंगलं यत्कृतः कृष्णसंप्रश्नोयेनात्मासुप्रसीदति ५ सवैपुंसांपरोधर्मो
यतोभक्तिरधोक्षजे अहैतुक्यप्रतिहताययात्मासंप्रसीदति ६ वासुदेवेभगवतिभक्तियोगःप्रयो
६ जितः जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकं ७ धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः॥
नोत्पादयेद्यदिरतिं श्रमएवहिकेवलं ८

ब्रह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेनेत्यादिश्रुतिभ्योधर्मस्यज्ञानांगत्वंप्रसिद्धं तत्कुतोभक्तिहेतुत्वमुच्यते सत्यंतद्धि
भक्तिद्वारेणेत्याह वासुदेवइति अहैतुकंशुष्कतर्काद्यगोचरं औपनिषदमित्यर्थः ७ व्यतिरेकमाह धर्मइति योधर्मइतिप्रसिद्धः
सयदिविष्वक्सेनस्यकथासुरतिंनोत्पादयेत् तर्हिस्वनुष्ठितोपिसन् अयंश्रमोज्ञेयः ननुमोक्षार्थस्यापिधर्मस्यश्रमत्वमस्त्येव अ
तआह केवलंविफलश्रमइत्यर्थः नन्वस्तितत्रापिस्वर्गादिफलमित्याशंक्यैवकारेणनिराकरोति क्षयिष्णुत्वान्नतत्फलमि राम
त्यर्थः नन्वक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवतीत्यादिश्रुतेः नतत्फलस्यक्षयिष्णुत्वमित्याशंक्यहिशब्देनसाधयति॥ ६
तद्यथेहकर्मजितोलोकःक्षीयते एवमेवामुत्रपुण्यजितोलोकः क्षीयतइतितर्कानुगृहीतयाश्रुत्याक्षयिष्णुत्वप्रतिपादनात्
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं हरिभक्तिद्वारा तदिनरं वैराग्यात्मज्ञानपर्यंतः परो धर्म इत्युक्तं अन्ये तु मन्यंते धर्मस्यार्थः फलं तस्य च कामः फलं तस्य चेंद्रियप्री
तिः तत्प्रीतेश्च पुनरपि धर्मादिपरंपरेति तमाहुः धर्मादर्थश्च कामश्च स किमर्थं न सेव्यत इत्यादि तन्निराकरोति धर्मस्य हीति द्वाभ्यां
अपवर्गस्य तु कृत्स्नायनापवर्गपर्यंतस्य अर्थाय फलत्वाय अर्थो नोपकल्पते योग्यो न भवति तथाऽर्थस्यापि एवंभूतधर्माव्यभिचा
रिणः कामो लाभाय फलत्वाय न हि स्मृतो मुनिभिः कामस्य विषयभोगस्य च इंद्रियप्रीतिर्लाभफलं न भवति किंतु याव
ता जीवेत तावानेव कामस्य लाभः जीवनपर्याप्त एव कामः सेव्य इत्यर्थः जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभि
न १ यः इह प्रसिद्धः स्वर्गादिः सोऽर्थो न भवति किंतु तत्त्वजिज्ञासैवेति १० ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमि

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते नार्थस्य धर्मैकांतस्य कामो लाभाय हि स्मृतः ९ एवं कामस्य नेंद्रियप्रीतिर्ला
भो जीवेत यावता जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः १० वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मे
ति परमात्मेति भगवानिति शब्द्यते ११ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया पश्यंत्यात्मनि चात्मानं भक्त्या श्रु
तगृहीतया १२ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं १३ सि।

ति केचित् तत्राह वदंति तत्त्वविदस्तत्तदेव तत्त्वं वदंति किं तत् यत् ज्ञानं नाम अद्वयमिति क्षणिकविज्ञानपक्षं व्यावर्त्तयति ननु तत्त्ववि
दोऽपि विगीतवचना एव मैवं तस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मे
ति सात्वतैर्भगवानित्यभिधीयते ११ तच्च तत्त्वं सपरिकरया भक्त्यैव प्राप्यत इत्याह तच्चेत्यन्वयः ज्ञानवैराग्ययुक्तया त
त्र ज्ञानं परोक्षं तच्च तत्त्वं आत्मनि क्षेत्रज्ञे पश्यंति किं तत् आत्मानं परमात्मानं श्रुतेन वेदांतादिश्रवणेन गृहीतया प्राप्त
येति भक्तिर्द्वारमुक्तं १२ धर्मस्य फलं भक्तिः नार्थकामादिकमिति ममर्थमुपपाद्योपसंहरति अत इति हे द्विजश्रेष्ठाः हरितोष
णं हरेरेवाराधनं संसिद्धिः फलं ॥ १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० प्र० यस्माच्च भक्तिविहीनो धर्मः केवलं श्रम एव तस्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह तस्मादिति एकेन एकाग्रेण मनसा १४ भक्तिर
हितो धर्मः केवलं श्रम एवेति प्रपंचितं इदानीं भक्तिर्मुक्तिफलत्वं प्रपंचयति यदिति यस्यानुध्या अनुध्यानं सैव असिः खड्गस्तेन
युक्ताः विवेकिनः ग्रंथिमहंकारं निबध्नाति यत्कर्म तत् छिंदंति तस्य कथायां रतिं को न कुर्यात् १५ ननु सत्यमेवं कर्मेति मूलनीह
रिकथारतिस्तथापि तस्यां रतिर्नोत्पद्यते किं कुर्मस्तत्राह शुश्रूषोरिति पुण्यतीर्थनिषेवणादिभिर्निः पापस्य महत्सेवा स्यात्
तया च तद्धर्मे श्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः १६ ततश्च शृण्वतामिति पुण्ये श्रवणकीर्तने यस्य सः सतां सुहृत्
हितकारी हृदि यान्यभद्राणि कामादिवासनाः तानि अंतःस्थः हृदयस्थः सन् १७ ततश्च नष्टप्रायेष्विति सर्वाऽभद्रनाशस्य ज्ञानोत्तर

तस्मादेकेन मनसा भगवान्सात्वतां पतिः। श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा १४ यदनुध्यासिना युक्ताः
कर्मग्रंथिनिबंधनं छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं १५ शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् १६ शृण्वतां स्वकथाः कृष्णः पुण्यश्रवणकीर्तनः हृद्यंतःस्थो ह्यभद्रा
णि विधुनोति सुहृत्सतां १७ नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी १८
तदा रजस्तमोभावाः कामलोभादयश्च ये चेत एतैरनाविद्धं स्थितं सत्वे प्रसीदति १९ एवं प्रसन्नमनसो भगवद्भक्ति
योगतः भगवत्तत्वविज्ञानं मुक्तसंगस्य जायते २० भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि दृष्ट एवा
त्मनीश्वरे २१ अतो वै कवयो नित्यं भक्तिं परमया मुदा वासुदेवे भगवति कुर्वंत्यात्मप्रसादनीं २२

कालत्वात् प्रायग्रहणं भागवतानां भागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेपकाभावात् १८ रजस्तमश्च ये च तत्प्रभवाः भा
वाः कामादयः एतैरनाविद्धं अनभिभूतं प्रसीदति उपशाम्यति १९ भगवद्भक्तियोगतः प्रसन्नमनसः अत एव मुक्तसंगस्य भगवानेव
तत्वं २० ज्ञानफलमाह भिद्यत इति हृदयमेव ग्रंथिः चिज्जडग्रंथनरूपोऽहंकारः अत एव सर्वे संशयाः असंभावनादिरूपाः
कर्माण्यनारब्धफलानि आत्मनि स्वरूपभूत ईश्वरे दृष्टे एवकारेण ज्ञानानंतरमेव निवर्तयति २१ अत्र सदाचारं दर्शयन्नुपसंहर
ति अत इति आत्मनः प्रसादनीं मनसः शोधिनीं २२

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वासुदेवे भक्तिं कुर्वंतीति भजनीयविशेषादर्शितः तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेऽपि वासुदेवस्याधिक्यमाह सत्वमिति इ
१२ ह यद्यप्येक एव परः पुमान् अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं संज्ञाः केवलं भिन्ना धत्ते हरिविरिंचिहर इति वक्तोव्यंसे
धिराधैः तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्वतनोर्वासुदेवादेव स्युः २३ उपाधिवैशिष्ट्यं सदृष्टांतमाह पार्थिवात् स्वतः नकुलवेश्री
प्रवृत्तिप्रकाशरहितात् दारुणः काष्ठात्सकाशात् धूमः प्रवृत्तिस्वभावस्त्रयीमयः वेदोक्तकर्मप्रचुरः इष्टकर्मप्रत्यासत्तेः त स्यं २
स्मादपि अग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात् एवं तमसः सकाशात्तु रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकं तु राद्धेन त्वयोग्म
कोत्तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं न तु सर्वथा तत्प्रकाशकत्वं

सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः २३ पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनं २४ भेजिरे मुनयोऽथाग्रे भगवंतमधोक्षजं सत्वं विशुद्धं क्षेमाय कल्पंते येऽनु तानिह २५ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ नारायणकलाः शांता भजंति ह्यनसूयवः २६ रजस्तमःप्रकृतयः समशीला भजंति वै पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः २७

विक्षेपकत्वात् यत्सत्वं तत्साक्षाद्ब्रह्मदर्शनं अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि यथोत्तरं वैशिष्ट्यमिति भावः २४ वासुदेवभक्तौ
पूर्वाचारं प्रमाणयति भेजिर इति अथातो हेतोः अग्रे पुरा विशुद्धसत्वमूर्तिं भगवंतं अधोक्षजं अतो ये तान् अनुवर्तंते इह सं
न२ सारमोक्षाय कल्पंते २५ नन्वन्यानपि केचिद्भजंतो दृश्यंते सत्यं मुमुक्षवस्तु अन्यान्न भजंति किंतु सकामा एवेत्याह मुमुक्षव इति
तपर घोरान् भूतपतीनिति पितृप्रजेशादीनामुपलक्षणं अनसूयवः देवतांतराणि निंदकाः संतः २६ रजस्तमसी प्रकृतिः स्वभावो येषां
ते अत एव पितृभूतादिभिः समं शीलं येषां ते श्रिया सह ऐश्वर्यं प्रजाश्च प्रेप्संतीति तथा ते २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां वासुदेवः परः तात्पर्यगोचरो येषां ते ननु वेदा मख
पराः दृश्यन्त इत्याशंक्य तेपि तद्द्वारा धन्यत्वात्तत्परा एवेत्युक्तं योगा योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशं
क्य तासामपि तत्प्राप्त्युपायत्वात्तत्परत्वमुक्तं २८ ज्ञानं ज्ञानशास्त्रं ननु च तत्तु ज्ञानपरमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं
तपोऽत्र ज्ञानं धर्मो धर्मशास्त्रं दानव्रतादिविषयं ननु तत्स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं सापि तदानंदां
शरूपत्वात्तत्परैवेत्युक्तं यद्वा वेदा इत्यनेनैव तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तं तत्र ननु तेषां मखयोगक्रियादि शास्त्राणि
८ नानार्थपरत्वात्तदेकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमिति द्रष्टव्यं २९ ननु जगत्सर्गप्रवेशनियमनादिलीला

वासुदेवपरा वेदा वासुदेवपरा मखाः । वासुदेवपरा योगा वासुदेवपराः क्रियाः । २८ वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः । २९ स एवेदं ससर्जाग्रे भगवानात्ममायया । सदसद्रूपया चासौ गुणमय्याऽगु
णो विभुः । ३० तया विलसितेष्वेषु गुणेषु गुणवानिव । अंतः प्रविष्ट आभाति विज्ञानेन विजृंभितः । ३१ ॥ यथा ह्य
वहितो वह्निर्दारुष्वेकः स्वयोनिषु । नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३२ ॥

विलासयुक्तेष्वस्मिन्सर्वशास्त्रसमन्वयो दृश्यते कथं वासुदेवपरत्वं सर्वेषां तत्राह स एवेति चतुर्भिः एतैरेव श्लोकैः तस्य कर्मा
ण्युदाराणि ब्रूहीति प्रश्नस्योत्तरं सदसद्रूपया कार्यकारणात्मिकया अगुणः अप्यन्वयः स्वतो निर्गुणोपि सन्नित्यर्थः ॥ ३० ॥
भगवतो जगत्कारणत्वमुक्तं प्रवेशनियमनलक्षणं लीलामाह तयेति विलसितेषु गुणेषु आकाशादिषु अंतः प्रविष्टः सन्
गुणवानिव मदधीना एते गुणा इत्यभिमानवानिव ननु वस्तुतस्तथा यतो विज्ञानेन चिच्छक्त्या विजृंभितो ऽत्यूर्जितः ३१ ॥ बहु
रूपत्वलीलामाह यथेति स्वयोनिषु स्वाभिव्यंजकेषु अवहितो निहितः विश्वात्मा पुमान्परमेश्वरः भूतेषु प्राणिषु अं
तर्यामिणापि प्रतियोगिनानात्वेन नानात्वमिवोच्यते क्षेत्रज्ञरूपेण वा ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भोगरूपां लीलामाह असौ हरिः भूतसूक्ष्माणि च इंद्रियाणि च आत्मा मनः अंतैः स्वयं निर्मितेषु भूतेषु चतुर्विधेषु स्थितो भोगस्वातंत्र्य
योग्यैः तद्गुणान् तत्तदनुरूपान् विषयान् स्वयं भुंक्ते भोजयतीति णिजर्थो वा ज्ञेयः पालयतीति वा तदात्मनेपदमार्षं भु
जोनवनइतिस्मरणात् ३३ इदानीं सूतजानासीति प्रश्नोत्तरमाह भावयतीति पालयति एतत्तु सर्वावतारसाधारणं प्रयोज
न विशेषतः कृष्णावतारस्य कुंतीस्तोत्ते वक्ष्यते लोकभावनः लोकानां कर्त्ता देवादिषु पलीलावतारास्तेष्वनुरतो ऽनुरक्तः ३४ इ
ति श्रीभावार्थदीपिकायां द्वितीयो ऽध्यायः अवतारकथा प्रश्नस्तृतीये यत्तत्राभिधा पुरुषाद्यवतारोत्तयानत्तच्चारित्रवर्णनैः ३
यदुक्तं अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा इति तदुत्तरत्वेनावतारानुनुक्रमिष्यन् प्रथमं पुरुषावतारमाह जगृहे इ

असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ३३ भावयत्येष सत्त्वेन लोका
न्वै लोकभावनः लीलावतारानुरतो देवतिर्यङ्नरादिषु ३४ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वितीयो ऽध्यायः
सूत उवाच जगृहे पौरुषं रूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षया १ यस्यांभसि शयान
स्य योगनिद्रां वितन्वतः नाभिहृदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः २ यस्यावयवसंस्थानैः कल्पितो लोकविस्तरः
तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितं ३ पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं सहस्रमूर्द्धश्रवणाक्षि
नासिकं सहस्रमौल्यंबरकुंडलोल्लसत् ४

तिपंचभिः महदादिभिः महदहंकारपंचतन्मात्रैः एकादशेंद्रियाणि पंचमहाभूतानि षोडशकलान्यंशा यस्मिन् यद्यपि भगवद्विग्रहो नैवंभू
तः तथापि विराड्जीवांतर्यामिणो पासनार्थमेवमुक्तमिति द्रष्टव्यं १ कोसौ भगवानित्यपेक्षायां तं विशिनष्टि यस्यांभसि एकार्णवे शयानस्य
विश्रांतस्य तत्र च योगः समाधिः तद्रूपां निद्रां विस्तारयतः यो नाभिरेव हृदः तस्मिन् यदंबुजं तस्मात् कारणाच्च ब्रह्मा आसीत् अभूत् पौरुषे
त्येतत् पौरुषं रूपं जगृहे २ कीदृशं तद्रूपं यस्येति ननु कीदृशो विग्रहः तस्यावयवैः भि मिश्रितः तस्मिन्नाह तत्तस्य भगवतो रूपं तु विशुद्धं रजस्त
मसाभिन्नं अत एव एतत्तु योगिनां प्रत्यक्षमित्याह पश्यंतीति अदभ्रे मनस्त्वं ज्ञानात्मकं यच्चक्षुस्तेन सहस्राणि अपरिमितानि यानि पा
दादीनि तैरद्भुतं सहस्रं मूर्द्धादयो यस्मिंस्तत् सहस्राणि यानि मौल्यादीनि तैरुल्लसत् शोभमानं ४ ७

द२ स

एतनुकुटस्थं नत्वन्यावतारवदाविर्भावतिरोभाववदित्याह एतदिति आदिनारायणरूपं निधीयते ऽस्मिन्निति निधानं कार्यावसाने प्रवे
शस्थानमित्यर्थः बीजं उद्गमस्थानं बीजत्वेपि नान्यबीजवत्तुल्यं किंत्वव्ययं नकेवलमवताराणामेव बीजं किंतु सर्वप्राणिनामपीत्या
ह यस्यांशांशो ब्रह्मा तस्यांशा मरीच्यादयस्तैः ५ सनत्कुमाराद्यवतारं तच्चरितं चाह स एवेति कौमार आर्षः प्राजापत्यो मानव इत्या
दीनि सर्गविशेषनामानि यः पौरुषं रूपं जगृहे स एव देवः कौमाराख्यं सर्गमाश्रितः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार
प्रथमद्वितीयादिशब्दा निर्देशमात्रापेक्षया ६ अस्य विश्वस्य भवाय उद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः एवं सर्वत्रावतार
स्तत्कर्म चोक्तमित्यनुसंधेयं ७ नारदावतारमाह तृतीयमिति ऋषिसर्गमुपेत्य तत्र च देवऋषित्वमुपेत्येत्यर्थः सात्वतं वैष्ण ग्र१

एतन्नानावताराणां निधानं बीजमव्ययं यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादयः ५ स एव प्रथमं देवः कौमारं सर्ग
माश्रितः चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं ६ द्वितीयं तु भवायास्य रसातलगतां महीं उद्धरिष्यन्नुपादत्त
१९ यज्ञेशः शौकरं वपुः ७ तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ८
तुर्ये धर्मकलासर्गे नरनारायणावृषी भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ९ पंचमः कपिलो नाम सिद्धेशः
कालविप्लुतं प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं १० षष्ठमत्रेरपत्यत्वं वृतः प्राप्तो ऽनसूयया आन्वीक्षि त्रै २
कीमलर्काय प्रल्हादादिभ्य ऊचिवान् ११

वं तंत्रं पंचरात्रागमं आचष्ट उक्तवान् यतस्तस्मात् निर्गतं कर्मबंधहेतुत्वं येभ्यः तानि निष्कर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मो
चकत्वं यतो भवति तदाचष्टेत्यर्थः ८ तुर्ये चतुर्थे ऽवतारे धर्मस्य कलायां स्त्रियां भार्येत्यर्थः अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः
तस्याः सर्गे ऋषी भूत्वेत्येकावतारतां दर्शयति ९ कपिलावतारमाह आसुरये तन्नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य राम
विनिर्णयो यस्मिंस्तत्सांख्यं १० दत्तात्रेयावतारमाह षष्ठमिति अत्रेरपत्यत्वं तेनैव वृतः सन् प्राप्तः अत्रेरपत्यमभिकांक्षत १९
आह तुष्ट इति वक्ष्यमाणत्वात् कथं प्राप्तः अनसूयया भर्त्सदृशापत्यमिषेण सोमवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः
आन्वीक्षिकीं आत्मविद्यां प्रल्हादादिभिश्च ११ न्य१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञावतारमाह सयज्ञः यामैरिति स्वायंभुवपुत्र्यामाकूत्यां जातः यामा नाम देवाः तदादिभिः सह स्वायंभुवमन्वन्तरं पालितवान् तदा स्वयमिन्द्रोऽभूदित्यर्थः १२
ऋषभावतारमाह सर्वाश्रमनमस्कृतं अन्त्याश्रमं पारमहंस्यं वर्त्म धीराणां प्रदर्शयन् नाभेराग्नीध्रपुत्रात् ऋषभो जातः १३ पृथ्वावतार
माह पार्थिवं वपुः राजदेहं पृथुरूपं पार्थिवं पृथोरिदं पार्थिवं ओषधीरित्युपलक्षणं इमां पृथिवीं सर्वाणि वस्तूनि दुग्धेत्यदुग्ध अडाग
माभाव आर्षः हे विप्रास्तेन पृथ्वीदोहनेन सोऽयमवतारस्तु उशत्तमः कमनीयतमः वशकान्तावित्यस्मात् १४ मत्स्यावतारमाह चा
क्षुषमन्वन्तरस्य उदधिसंप्लवः संप्लवः तस्मिन् यद्यपि मन्वन्तरावसाने प्रलयो नास्ति तथापि केनचित्कौतुकेन सत्यव्रताय मा
याप्रदर्शिता अथाग्रेऽकांडे मार्कंडेयायापि निद्रष्टव्यं महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः अपात् रक्षितवान् विवस्वतमि

ततः सप्तम आकूत्यां रुचेर्यज्ञोऽभ्यजायत सयामाद्यैः सुरगणैरपात्स्वायंभुवांतरं १२ अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः
दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं १३ ऋषिभिर्याचितो भेजे नवमं पार्थिवं वपुः दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्त
मः १४ रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं १५ सुरासुराणामुदधिं मथ्नतां म
न्दराचलं दध्रे कमठरूपेण पृष्ठ एकादशे विभुः १६ धान्वन्तरं द्वादशमं त्रयोदशममेव च अपाययत्सुरानन्यान्मोहि
न्या मोहयन् स्त्रिया १७ चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितं ददार करजैर्वक्षस्येरकां कटकृद्यथा १८ पञ्चदशं वा
मनकं कृत्वागादध्वरं बलेः पदत्रयं याचमानः प्रत्यादित्सुस्त्रिविष्टपं १९ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् त्रिः
सप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं २०

निभाविनीसंज्ञा १५ कूर्मावतारमाह कमठः कूर्मः तद्रूपेण एकादशेऽवतारे विभुर्दध्रे दधार १६ धन्वन्तर्यवतारमाह धान्वन्तरं धन्वन्त
रिरूपं द्वादशमादि प्रयोग आर्षः त्रयोदशमेव रूपं तच्चरितेन सह दर्शयति अपाययदित्यत्र सुधामित्यध्याहारः मोहिन्या स्त्रिया
तद्रूपेण अन्यान् असुरान्मोहयन् धन्वन्तरिरूपेण मत्तमानीय मोहिन्याऽपाययदित्यर्थः १७ नृसिंहावतारमाह नारसिंहं स्वरूपं
बिभ्रत् एरकां निर्ग्रन्थि तृणविशेषः १८ वामनावतारमाह दुष्टानां मदं वामयतीति वामनं कं रूपं स्वं वा प्रत्यादित्सुः तस्मादाच्छिद्य
ग्रहीतुमिच्छुः १९ परशुरामावतारमाह अवतार इति त्रिः त्रिगुणं यथा भवति तथा सप्तकृत्वः सप्तवारान् एकविंशतिवारानित्यर्थः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰प्र॰ व्यासावतारमाह । अल्पमेधसः अल्पप्रज्ञान् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाः अकरोत् २१ रामावतारमाह नरदेवत्वं राघवरूपेण प्राप्तः सन्
अतः परं अष्टादशे २२ रामकृष्णावतारमाह विंशतितम इति वक्तव्ये तु कारलोपश्छंदोनुरोधेन रामकृष्णा वित्येवंनामनी जन्मनी प्रा
प्य २३ अजिनस्य सुतः जिनसुत इति पाठे जिनः स एव कीकटेषु मध्यगयाप्रदेशे २४ कल्क्यवतारमाह युगसंध्यायां कलेरंते विष्णु
यशसो ब्राह्मणात्सकाशाज्जनिता जनिष्यते २५ अनुक्तसर्वसंग्रहार्थमाह अवताराइति असंख्येयत्वे हेतुः यथेति अविदासिनः
उपक्षयशून्यात् दसुउपक्षय इत्यस्मात् सरसः सकाशात् कुल्याः क्षुद्रप्रवाहाः २६ विभूतीराह ऋषयइति २७ तत्र विशेषमा

ततः सप्तदशे जातः सत्यवत्यां पराशरात् । चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः २१ नरदेवत्वमापन्नः सुरकार्य
चिकीर्षया । समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परं २२ एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी । रामकृष्णा
विति भुवो भगवानहरद्भरं २३ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां । बुधानाम्ना जिनसुतः कीकटेषु भवि
ष्यति २४ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु । जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः २५ अव
१० ताराह्यसंख्येया हरेः सत्वनिधेर्द्विजाः । यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः २६ ऋषयो मनवो
देवा मनुपुत्रा महौजसः । कलाः सर्वे हरेरेव सप्रजापतयस्तथा २७ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं ।
इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे २८ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः । सायंप्रातर्गृणन्भक्त्या दुःखग्रामा
द्विमुच्यते २९

ह एते चेति पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयश्च तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वं ।
ज्ञत्वसर्वशक्तित्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं कुमारनारदादिष्वाधिकारिकेषु यथोपयोगमंशकलावेशः । राम
पृथ्व्यादिषु शक्त्यावेशः कृष्णस्तु भगवान्साक्षान्नारायण एव आविर्भूतसर्वशक्तित्वात् सर्वेषां प्रयोजनमाह इंद्रारयो दैत्या १०
स्तैर्व्याकुलमुपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति २८ एतत्कीर्तनेन फलमाह जन्मेति गुह्यं अतिरहस्यं जन्म प्रयतः शुचिः स
न् २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा
स्कं १

टी २

दुःखग्रामात् संसाराद्विमुच्यत इत्युक्तं तत्र कथं देहद्वयसंबंधस्तन्निवृत्तौ मुक्तिरित्याकांक्षायां देहद्वयसंबंधस्य भगवन्मायाकृतत्वात् विद्याविल
सितत्वाद्‌ तत्त्वश्रवणादिजनितविद्यया तन्निवृत्तिरुपपद्यत इत्याशयेनाह एतदिति पंचभिः अरूपस्य चिदाकारस्यात्मनो जीवस्य एतत्स्थू
लं रूपं शरीरं भगवतो या माया तस्या गुणैर्महदादिरूपैर्विरचितं क्व आत्मनि आत्मस्थाने शरीरं कृतमित्यर्थः ३० कथमित्यप
क्षायां स्वरूपावरणेन तदध्यास इति सदृष्टांतमाह यथा वायुना आश्रितो मेघौघो नभसि आकाशे अबुद्धिभिरज्ञैरारोपितः यथा
वा पार्थिवो रेणुः तद्गतो धूसरत्वादिरनिले एवं द्रष्टरि आत्मनि दृश्यत्वं दृश्यत्वादिधर्मकं शरीरमारोपितमित्यर्थः ३१ किंच अ
तः स्थूलाद्रूपात् परं अन्यदपि सूक्ष्मं आरोपितमित्यनुषंगः कथंभूतं तत् यदव्यक्तं सूक्ष्मं तत्र हेतुः अव्यूढगुणबृंहितं व्यूढः क

मू २

एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः मायागुणैर्विरचितं महदादिभिरात्मनि ३० यथा नभसि मेघौघो रेणुर्वा पा
र्थिवोऽनिले एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ३१ अतः परं यदव्यक्तमव्यूढगुणबृंहितं अदृष्टाश्रुतवस्तु
त्वात्स जीवो यत्पुनर्भवः ३२ यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ३३

र्विचरणादिपरिणामः तथा अपरिणताः अव्यूढाः ये गुणास्तैर्बृंहितं आकारविशेषरहितत्वादव्यक्तमित्यर्थः एतदेव कुतः तत्रा
ह अदृष्टाश्रुतवस्तुत्वात् यद्याकारविशेषवद्वस्तु तदस्मदादिवत् दृश्यते श्रूयते वा इंद्रादिवत् इदं तु न तथा नहि तस्य सत्वे किं
प्रमाणं तत्राह स जीवः जीवोपाधिः जीवो जीवनं निर्मुक्तः जीवो जीवं विहाय तस्मादेतो जीवोपाधौ लिंगदेहे जीवशब्दप्रयोगात् जीवो
त ४ पाधितया कल्प्यत इत्यर्थः ननु स्थूलमेव भोगायतनत्वाज्जीवस्योपाधिरस्तु किमन्यकल्पनयेत्यत आह यद्यस्मात् सूक्ष्मात्पुनर्भ
पि २ वः पुनः पुनर्जन्म उत्क्रांतिगत्यागतीनां तेन विनाऽसंभवादिति भावः ३२ तदेवमुपाधिद्वयमुत्क्रांतदपवादेन जीवस्य ब्रह्मतामाह
यत्र यदा इमे स्थूलसूक्ष्मरूपे स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः ज्ञानेन प्रतिषेधार्हत्वे तमेव हेतुमाह अविद्ययात्म
नि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः कथंभूतं दर्शनं ज्ञानैकस्वरूपं ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ तथापि भगवान्मायायाः संसृतिकारणभूतायाविद्यमानत्वात्कथंब्रह्मतानताचाह यदीति असंदेहेसंदेहवचन यदिवेदाः प्रमाणंस्युरिति
वत् वैशारदीविशारदः सर्वज्ञईश्वरः तदीयादेवीसंसारचक्रेण क्रीडंती एषामायायद्युपरताभवति किमित्युपरताभवत् तत्राह
मतिः विद्या अयंभावः यावदविद्याच्आत्मनः आवरणविक्षेपौकरोतितावन्नोपरमति यदातुसैवविद्यारूपेणपरिणतातदासैर
सद्रूपेजीवोपाधिंदग्ध्वानिरिंधनाग्निवत् स्वयमेवोपरमेदिति तदासंपन्न ब्रह्मस्वरूपं प्राप्तः एवेतिविदुस्तत्वज्ञाः किमतोयदे
वं स्वमहिम्निपरमानंदस्वरूपेमहीयतेपूज्यतेविराजतइत्यर्थः ३४ यथाजीवस्यजन्मादिमायाएवमीश्वरस्यापिजन्मकर्मा

यद्येषोपरतादेवीमायावैशारदीमतिः संपन्नएवेतिविदुर्महिम्निस्वेमहीयते ३४ एवंजन्मानिकर्माणिह्यकर्त्तुरजन
स्यच वर्णयंतिस्मकवयोवेदगुह्यानिहृत्पतेः ३५ सवाइदंविश्वममोघलीलः सृजत्यवत्यत्तिनसज्जतेऽस्मिन्
भूतेषुचांतर्हितआत्मतंत्रः षाड्वर्गिकंजिघ्रतिषड्गुणेशः ३६ नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुः कुम
नीषऊतीः नामानिरूपाणिमनोवचोभिः संतन्वतोनटचर्यामिवाज्ञः ३७ सवेदधातुः पदवींपरस्यदुरंतवीर्यस्यर
थांगपाणेः योऽमाययासंततयाऽनुवृत्त्यादसरोजगंधं ३८
भजेततत्पा

दिमायेत्याह एवमिति अकर्तुः कर्माणिअजनस्यजन्मानि हृत्पतेः अंतर्यामिणः ३५ तर्हिजीवादीश्वरस्यकोविशेषः स्वातंत्र्यमे
वविशेषइत्याह सवाइति षाड्वर्गिकंइंद्रियषड्वर्गविषयंजिघ्रतिदूरादेवगंधवद्गृह्णाति नतुसज्जतइत्यर्थः कुतः षड्गुणेशः ष
डिंद्रियनियंता ३६ ननुकिंईश्वरस्यसृष्ट्यादिकर्मभिर्विषयभोगैर्वा तत्राह नवेत्ति धातुर्जगद्विधातुरीश्वरस्यऊतीर्लीलाः कुम राम
नीषः कुबुद्धिर्निपुणेनतर्कादिकौशलेननअवैतिनजानाति मनसारूपाणिवचसानामानि संतन्वतः विस्तारयतः वचो
भिरितिबहुत्वंश्रुत्यभिप्रायेण मनोवचोभिः सहितिवा ३७ भक्तस्तुकथंचिज्जानातीत्याह सवेदेति अमाययाअकुटिलभावेन
मननयानिरंतरया अनुवृत्त्याअनुकूल्येनभजेत् ३८

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महदूभक्ता
दशास्कंधे
१

भक्तिमार्गप्रवृत्तान् ऋषीन् अभिनंदति अथेति यतोभक्त एव भगवत्तत्त्वं जानाति अथश्रतः भगवंतः सर्वज्ञाः भवंतो धन्याः कृतार्थाः
कुतः यद्यस्मात् इत्थंप्रश्नैर्वासुदेव आत्मभावं मनाग् ईशत्कुर्वंति सर्वात्मके ऐकांतिकीं यत्रयस्मिन्भावे सति भूयः परिवर्त्तो जन्ममर
णाद्यावर्त्तो न भवति २ए सूत किंमन्यच्छास्त्रमपूर्वं कथयसि तत्राह इदमिति ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकस्य चरितं य
स्मिन् तत् ऋषिर्व्यासः ४० तत्संप्रदायप्रवृत्तिमाह तदिदमिति सुतं शुकं ४१ प्रायेणमृत्युपर्यंतानाशकेनापविष्टमिति परमेवं
तत्पादर्शितः ४२ ४२ हेविप्राः विप्रर्षेः सकाशात् अध्यगमं ज्ञानवानस्मि तत्र कीर्तयतः तत्रैनिविष्ट इति चान्वय भेदात्तत्रपदाव

अथेह धन्या भगवंत इत्थं यद्वासुदेवे ऽखिललोकनाथे कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त्त उग्रः ३९ इदं भा
गवतं नाम पुराणं ब्रह्मसंमितं उत्तमश्लोकचरितं चकार भगवानृषिः निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ४०
तदिदं ग्राहयामास सुतमात्मवतां वरं सर्ववेदेतिहासानां सारं सारं समुद्धृतं ४१ स तु संश्रावयामास महाराजं परीक्षितं
प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ४२ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह कलौ नष्टदृशामेष पुराणार्को ऽ
धुनोदितः ४३ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् ४४ सोहं वः श्रावयि
ष्यामि यथाधीतं यथामति ४५ इति श्रीभागवते महापुराणे प्रथमस्कंधे तृतीयोऽध्यायः व्यास उवाच इति ब्रुवाणं सं
स्तूय मुनीनां दीर्घसत्रिणां वृद्धः कुलपतिः सूतं बह्वृचः शौनकोब्रवीत् १ शौनक उवाच सूत सूत महाभाग वद नो
वदतां वर कथां भागवतीं पुण्यां यदाह भगवान् शुकः २

इति रोषः ४४ यथाधीतं न तु स्वमतिविलसितं तत्रापि यथामति स्वमत्यनुसारेण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ४५
इति प्रथमस्कंधे तृतीयः तुर्ये भागवतारंभकारणं तन्न वर्ण्यते व्यासस्यापरितोषस्तत्तापः प्रवचनादिभिः इत्येवं प्रसन्नतया श्रावयिष्या
मीति ब्रुवाणं मुनीनां बहूनां मध्ये एकेन वक्तव्यमित्याह वृद्धः वृद्धेष्वपि बह्वृचः कुलपतिर्गणमुख्यः तेष्वपि बह्वृचो बह्वृचत्वान्वेदी तेन वक्तव्यं

स्रुतवांतं भगवान् शौनकोब्रवीत् १ सूतसूतमहाभाग ८

कस्मिन्वास्थाने केन हेतुना निमहाभारतादि धर्मशास्त्राणि कृतवतः पुनरेतत्संहिताकरणे किं कारणमित्यर्थः १ कुतइति सार्वविभक्तिकस्ता
सिः केन प्रवर्त्तित इत्यर्थः कृष्णो व्यासः २ यदुक्तं स तु संश्रावयामासेति तत्र शुकस्य व्याख्यानोदीकं कथं घटितमिति प्रष्टुं तस्य संगोदासी
नतामाह द्वाभ्यां तस्येति समदृक् सं समं ब्रह्म पश्यति अतो निर्विकल्पकः स्वार्थकः निरस्तभेदः किंच एकस्मिन्नेव अन्तः समाप्रिय
स्याः तथा भूतामतिर्यस्य सः यतः उन्निद्रः मायाशयनादुद्बुद्धः या निशा सर्वभूतानां तस्यां जागर्ति संयमीति स्मृतेः अत एव गू
ढः अप्रकटः मूढ इव प्रतीयेत ४ निर्विकल्पकत्वं प्रपंचयति दृष्ट्वेति आत्मजं शुकं प्रसक्तं गतमनुयान्तमनुगच्छन्तं ऋषिं व्यासं अनग्नमपि दृ २
ष्ट्वा जले क्रीडन्त्यो देव्यः अप्सरसः ह्रिया लज्जया वस्त्रपरिधानं कृतवत्यः अनग्नमपीत्यनेनार्थात् तत्सुतानग्नइत्युक्तं तन्न तस्य पुर

कस्मिन्युगे प्रवृत्तेयं स्थाने वा केन हेतुना कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ३ तस्य पुत्रो महायोगी समदृङ्निर्विकल्प
कः एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते ४ दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं तद्वीक्ष्य
१२ पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः ५ कथमालक्षितः पौरैः संप्राप्तः कुरुजाङ्गलान् उन्म
त्तमूकजडवद्विचरन्गजसाह्वये ६ कथं वा पाण्डवेयस्य राजर्षेर्मुनिना सह संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः
७ स गोदोहनमात्रं हि गृहेषु गृहमेधिनां अवेक्षते महाभागस्तीर्थीकुर्वंस्तदाश्रमं ८ अभिमन्युसुतं सूत प्राहुर्भागव
तोत्तमं तस्य जन्म महाश्चर्यं कर्माणि च गृणाहि नः ९ ॥

नोगस्ततः सुतस्य तु ह्रिया न परिदधुः तच्चित्रं वीक्ष्य इयं स्त्री अयं पुमानिति भिदा भेदस्तवास्ति विविक्ता पूता दृष्टिर्यस्य ५ एवंभू
तोः सौ कथमालक्षितः ज्ञातः कुरवो जांगला अदेशा विशेषास्तान्संप्राप्तः प्रथमं तेनागजसाह्वये विचरन् गजेन सहितमा १२
ह्वयो नाम यस्य तस्मिन्हस्तिनापुरे हस्तिनाम्नाराजाननिर्मितत्वात् ६ एवंभूतेन मुनिना सह यत्र संवाद एषा सात्वती भा
वस्कंना २ गवती श्रुतिः संहिता ७ एतच्चाख्यानं बहुकालापेक्षं तस्य त्वेकत्रावस्थानं दुर्लभमित्याह सइति गोदोहनमात्रं कालं प्रतीक्ष
ते तदपि भिक्षार्थं किं तु तेषामाश्रमं गृहं तीर्थीकुर्वन् पवित्रीकुर्वन् ८ तस्मादिदं भूतो ऽत्र वक्तव्यमाश्चर्यं श्रोतुमुत्कंठितमतो
नाश्चर्यं प्रायोपवेशनं यतः अतः कथयेत्याह अभिमन्युसुतमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्राट् चक्रवर्त्ती वेति वितर्के कस्य वा हेतोः कस्मात्कारणात् अधिराट् श्रियं अधिराजो श्रियं संपदमनादृत्य १० यस्य पादनिकेतौ चरणपीठ ॥
हस्फुटं धातान्यानीयशत्रवोनमंति अंगहेमृत युवा करुण एव ऐषत्तेएन्धुत आर्षमात्मनेनपदं असुभिः प्राणैः सह ११ विरक्तस्य किं धनादिभि
रितिचेत् तत्राह लोकस्य शिवाय सुखाय भवाय समृद्ध्यै भूतये एश्वर्याय च नोजीवंति तत्कोन्मार्थं एवं संति असौ राजा निर्विद्य विरज्यापि पर
षामाश्रयं कलेवरं कुतोहेतोर्मुमोच नहि परापजीवनं स्वयं त्यक्तुमुचितमित्यर्थः १२ यत्किंच पृष्टः सित्वं सर्वेनोऽस्मभ्यं समाचक्ष्व यस्मा
त् वाचां विषयगिरां गोचरेऽर्थे स्नातं पारंगतं त्वां मन्ये छांदसात् अन्यत्र वैदिकव्यतिरिक्तेण अत्रैव वर्णिकत्वात् १३ कस्मिन् युग इत्यादि प्रश्नानां

म २

स सम्राट् कस्यवा हेतोः पाण्डूनां मानवर्धनः । प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रियं १० नमंति यत्पादनिकेतमात्मनः ॥
शिवाय हानाय धनानि शत्रवः । कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टुमहो सहासुभिः ११ शिवाय लोकस्य भवाय भू
तये य उत्तमश्लोकपरायणा जनाः जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्विद्य कुतः कलेवरं १२ तत्सर्वं नः समाचक्ष्व
पृष्टो यदिह किंचन मन्ये त्वां विषये वाचां स्नातमन्यत्र छांदसात् १३ सूत उवाच द्वापरे समनुप्राप्ते तृतीये युगपर्यये पा
राशरात् योगी वासव्यां कलया हरेः १४ स कदाचित्सरस्वत्या उपस्पृश्य जलं शुचिः । विविक्त एक आसीन उदिते रविमंडले ३५
परावरज्ञः स ऋषिः कालेनाव्यक्तरंहसा युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे १६ भौतिकानां च भावानां शक्तिह्रासं च
तत्कृतं अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः १७

व्यासजन्मकथनपूर्वकमुत्तरमाह द्वापरे समनुप्राप्ते कदेत्यपेक्षायामाह तृतीये युगस्य पर्यये परिवर्त्ते वासव्यां उपरिचरस्य वसोर्वीर्य
ज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः १४ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः । आसीनो बभूवेति शेषः । विविक्ते देश इत्या
दि चित्तैकाग्र्यार्थमुक्तं अनेनैव बदरिकाश्रमस्थानं सूचितं १५ तत्र च ऋषिर्युगधर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां च यद्धितं त
त्सदृध्याविति तत्रायं नान्वयः परावरज्ञः अतीतानागतवित् अव्यक्तरंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा
भुवि युगे युगे १६ भौतिकानां शरीरादीनां तत्कृतं कालकृतं निःसत्वान् धैर्यशून्यान् दुर्मेधान् मंदमतीन् १७

ज्ञान:३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चातुर्होत्रं १

भा॰प्र॰ अमोघदृक् सर्वज्ञानसंपन्नः १८ तत्र होत्रोपलक्षिताश्चत्वारश्च ऋत्विजश्चातुर्होतारः तैरनुष्ठेयं कर्म शुद्धं शुद्धिकरं यज्ञसंतत्यै यज्ञानाम
विच्छेदाय १९ चातुर्विध्यमेवाह ऋगिति उद्धृताः पृथक्कृताः २० निष्णातः पारंगतः २१ दारुणः अथर्वोक्ताभिचारादिप्रवृत्तेः २२ पो॰ २
व्यस्यन् विभक्तवंतः २३ वेदविभागप्रयोजनमाह तएवेति यथापूर्वं मन्दमेधाविभिर्धार्यन्ते तएव २४ किंच स्त्रीशूद्रेति द्विजबंधवः त्रैव
र्णिकेष्वधमाः तेषां कर्मश्रेयसि श्रेयःसाधने एवं भवेत् अनेनैव प्रकारेण भवत्विति अतएव तेषां कृपया भारताख्यानं मुनिना कृ

दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् १८ चातुर्होत्रं कर्म शुद्धं प्रजानां
वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं १९ ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः इतिहासःपुराणं
च पंचमो वेद उच्यते २० तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः वैशंपायन एवैको निष्णातो यजुषामुत २१
१३ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः इतिहासपुराणानां पिता मे रोमहर्षणः २२ तएत ऋषयो वेदं स्वंस्वं व्य
स्यन्ननेकधा शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन् २३ तएव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा एवं चकार भ धा ५
गवान्व्यासः कृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह
इति भारतमाख्यानं कृपया मुनिना कृतं २५ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः सर्वात्मकेनापि यदा नातु
ष्यद्धृदयं ततः नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ वितर्कयन्विविक्तस्थ इदं प्रोवाच धर्मवित् २६ धृतव्र
तेन हि मया छंदांसि गुरवोऽग्नयः मानिता निर्व्यलीकेन गृहीतं चानुशासनं भारतव्यपदेशेन ह्याम्नायार्थश्च प्रदर्शितः
दृश्यते यत्र धर्मादिः स्त्रीशूद्रादिभिरप्युत २७ ॥ राम

तं २५ भूतानां श्रेयसि हिते सर्वात्मकेनापि कर्मणा नातिप्रसीदन् हृदयं यस्य सः चिन्ताप्रसंगो हि हेतुं वितर्कयन् इदमुवाच १३
स्वगतं २६ मानिताः पूजिताः २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतं ३०

ब

देहस्थः देहभवः आत्मा जीवः स्वतो विभुः परिपूर्ण एव आत्मना स्वेन रूपेण असंपन्नः तादात्म्यमप्राप्त इव भाति ब्रह्मवर्चसं वेदश्रवणाध्याय
नोत्कर्षजं तेजः तत्र साधवो ब्रह्मवर्चस्याः तेषु सत्तमः श्रेष्ठोऽपि यद्वा न केवलमसंपन्न इवाभाति प्रत्युत ब्रह्मवर्चसी ब्रह्मवर्च
न२ सवानपि असत्तम इवाभाति पाठांतरे कसनीयेमोपीति २८ असंपन्नो हेतुं स्वयमेवाशंकते किंवेति प्रायेण भयस्त्वेन हि यस्मा
त एव धर्माः अच्युतस्य प्रियाः २९ खिलं न्यूनं खिद्यतः खेदं प्राप्नुवतः कृष्णस्य व्यासस्य प्रागुदाहृतं सरस्वतीतीरस्थं ३० ततो
रदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामासेति ३१ इति भागवते प्रथमे चतुर्थः पंचमे सर्वधर्मव्याहृतिकीर्तने
म

अथापि बत मे दैह्य आत्मा चैवात्मना विभुः असंपन्न इवाभाति ब्रह्मवर्चस्यसत्तमः ३० किं वा भागवता धर्मा न प्रायेण नि
रूपिताः प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः २९ तमभिज्ञाय सहसा प्रत्युत्थायागतं मुनिः पूजयामास विधिवन्नार
दं सुरपूजितं ३२ इति श्रीभागवते महापुराणे प्रथमस्कंधे नारदव्याससंवादो नाम चतुर्थोऽध्यायः ४ सूत उवाच ॥ अथ
तं सुखमासीनमुपासीनं बृहच्छ्रवाः देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव १ नारद उवाच पाराशर्य महा
भाग भवतः कच्चिदात्मना परितुष्यति शारीर आत्मा मानस एव वा २ जिज्ञासितं सुसंपन्नमपि ते महदद्भुतं कृतवा
न्भारतं यस्त्वं सर्वार्थपरिबृंहितं ३ जिज्ञासितमधीतं च ब्रह्म यत्तत्सनातनं तथापि शोचस्यात्मानमकृतार्थ इव प्रभो
४ श्रीव्यास उवाच अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्म
म भवात्मभूतं ५

गौरवं व्यासचित्तप्रसादाय नारदेनोपदिश्यते १ उपसमीपे आसीनं विप्रर्षिं व्यासं बृहच्छ्रवाः महायशाः स्मयन्नीषद्धसन्निवेत्यनेन
मुखप्रसन्नतिर्द्योत्यते यद्वा इवेत्यनधिकारार्थे अहो महानपि मुख्यस्तीति स्मयमानः १ शारीरः शरीराभिमानी आत्मा आत्मना वा न शरी
रेण कच्चित्किं परितुष्यति मानस आत्मा मनोऽभिमानी तेन मनसा परितुष्यति कच्चित्न वा २ ते जिज्ञासितं ज्ञातुमिष्टं धर्मादि यत्त
त्सर्वं सुसंपन्नं सम्यक्ज्ञानं अपि त्वादाद्नुष्ठितं चेत्यर्थः अधीतिपाठसंबोधनं सुसंपन्नत्वे हेतुः महदद्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः
परिबृंहितं परिपूर्णं ३ किंच यत्सनातनं नित्यं परं ब्रह्म तत्त्वया जिज्ञासितं विचारितं अधीतं अधिगतं प्राप्तं चेत्यर्थः तथापि शोचसि त्व
किमर्थमिति शेषः ४ आत्मा शारीरो मानसश्च तन्मूलं तस्यापरितोषस्य कारणं अव्यक्तं अस्फुटं हे नारद त्वा त्वां पृच्छाम आत्मभवो

ब्रह्मणो मानसाद्देहाद्भूतः अगाधबोधः किं भगवान्यथावज्ज्ञातं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अगाधबोधतां प्रपंचयन्नाह सवाइति द्वाभ्यां सर्वगुह्यज्ञाने हेतुः यद्यस्मात्पुराणपुरुषस्त्वउपासितस्त्वया कथंभूतः परावरेशः कार्यकारण
नियंता मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृजतीत्यादि ६ किंच त्वं त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन च प्राणवायु
रिव सर्वप्राणिनामंतश्चरः सन्नात्मसाक्षी बुद्धिवृत्तिज्ञः अतः परे ब्रह्मणि धर्मतः योगेन निष्णातस्य मे तदुक्तं याज्ञवल्क्येन "इज्या
चारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति अवरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमै
र्निष्णातस्य मे अलमत्यर्थं यत्तु न्यूनं तद्विचक्ष्व वितर्कय ७ अनुदितप्रायं अनुक्तप्रायं भगवद्यशो विना येनैव धर्मादिज्ञानेनासौ
भगवान्न तुष्येत तद्दर्शनं ज्ञानं खिलं न्यूनं मन्ये हे ८ ननु भगवद्यशाएव तत्र तत्रानुवर्णितं तत्राह यथेति चशब्दाद्धर्मादिसाधर्मादि
वत्य

१४ सवैभवान्वेदसमस्तगुह्यमुपासितोयत्पुरुषः पुराणः परावरेशोमनसैवविश्वंसृजत्यवत्यत्तिगुणैरसंगः "६ त्वंपर्य
टन्नर्कइवत्रिलोकीमंतश्चरोवायुरिवात्मसाक्षी परावरेब्रह्मणिधर्मतोव्रतैः स्नातस्यमेन्यूनमलंविचक्ष्व "७"
नारदउवाच भवताऽनुदितप्रायंयशोभगवतोऽमलं येनैवासौनतुष्येतमन्येतद्दर्शनंखिलं ८ यथाधर्मादयश्चा
र्थामुनिवर्यानुकीर्तिताः नतथावासुदेवस्यमहिमाह्यनुवर्णितः ९ नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृ
णीतकर्हिचित् तद्वायसंतीर्थमुशंतिमानसानयत्रहंसानिरमंत्युशिक्क्षयाः १०

नानि च तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमानत्युक्त इत्यर्थः ९ वासुदेवव्यतिरिक्तान्यविषयज्ञानं वेदेवान्यविषयं वा कृत्वा
तुर्यं च खिलमेवेत्याह नेति चित्रपदमपि यद्वचो हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति मन्यंते
बुधाः मानसाः पवित्रमित्याह सत्त्वप्रधानमनस्विवर्त्तमाना हंसा यतयः पत्र न निरमंति कर्हिचिदपि नितरां न रमंते उशिक्क्षयाः उशि
क् कमनीयं ब्रह्म क्षयो निवासो येषां ते यथा प्रसिद्धा हंसा मानसरस्सि चरंतः कमनीयपद्मषंडनिवासाः त्यक्तविचित्रान्नादियुक्ते राम
ष्वुच्छिष्टगर्त्ते काककीडास्थाने न निरमंत इति शेषः १० " १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनापिपदचातुर्यं भगवद्यशः प्रधानं वचः पवित्रमित्याह तद्वाग्विसर्गः सचासौ वाग्विसर्गश्चेति वाचः प्रयोगः जनानां समूहो जन
ता तस्या अघं विप्लावयति नाशयतीति तथा यस्मिन्वाग्विसर्गे अबद्धवत्यपि अपशब्दादियुक्तेपि प्रतिश्लोकं अनंतस्य यशसा अं
कितानि नामानि भवंति तत्रहेतुः यत् यानि नामानि साधवो महांतः वक्तरि सति शृण्वंति श्रोतरि सति गृणंति अन्यदा तु स्वय
मेव गायंति कीर्तयंतीति ११ भक्तिहीनं कर्म चज्ञानं च न शोभत इति कैमुतिकन्यायेन दर्शयति नैष्कर्म्यमिति निष्कर्म ब्रह्म तदेकाकारत्वात् नि का४
ष्कर्मतारूपं नैष्कर्म्यं अज्यते अनेनेत्यंजनमुपाधिः तन्निवर्तकं निरंजनं एवंभूतमपिज्ञानं अच्युते भावो भक्तिस्तद्वर्जितं चेत्
अलमत्यर्थं न शोभते सम्यगपरोक्षाय न कल्पत इत्यर्थः तदा शश्वत् साधनकाले च फलकाले च अभद्रं दुःखरूपं यत्काम्यंक

तद्वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यच्छृण्वंति गायं
ति गृणंति साधवः ११ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्रमी
श्वरे न चार्पितं कर्म यदप्यकारणं १२ अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः उरु
क्रमस्याखिलबंधमुक्तये समाधिनानुस्मर तद्विचेष्टितं १३

र्म यदप्यकारणमकाम्यं तच्चेति चकारस्यान्वयः तदपि कर्म ईश्वरे नार्पितं चेत् कुतः पुनः शोभते बहिर्मुखत्वेन सत्त्वशोधक
त्वाभावात् १२ तदेवं भक्तिशून्यानि ज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थानि यतः (तदपि कर्म ईश्वरे नार्पितं) अतो ह
रेश्चरितमेवानुवर्णयेत्याह अथो अतः कारणात् अमोघा यथार्था दृक् धीर्यस्य शुचि शुद्धं श्रवो यशो यस्य सत्यरतः धृता
नि व्रतानि येन स भवान् एवं महागुणः अतः उरुक्रमस्य विविधं चेष्टितं लीला समाधिना चित्तैकाग्र्येण अखिलस्य
बंधमुक्तये त्वमनुस्मर स्मृत्वा वर्णयेत्यर्थः एतच्च वाक्यांतरमिति मध्यमपुरुषप्रयोगान्नानुपपन्नः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५ विपक्षे दोषांतरमाह गतत्रुक्रमविचेष्टितात्स्थकृद्दशः अत एवान्यथाप्रकाशांतरेणयत्तिंचिदर्थांतरे विवक्षतः तयाविक्षयाहतेतः स्फुरितरूपेना
मभिश्रवकव्यंतेनापस्थितेरदुःस्थिताः नवस्थितासतीमतिः कदाचिनुक्तापिविषये आस्पदं स्थानेनलभेन वाचेन आहता आघूर्णिता
नौरिव तदुक्तं गीतासु व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्च बुद्धयोऽव्यवसायिनामित्यादि १४ तदेवं हरियशोवि
नाभारत्यादिषु श्रुतं धर्मादिवर्णनमकिंचित्करमित्युक्तं प्रत्युत विरुद्धमेवजातमित्याह जुगुप्सितं नित्यं काम्यकर्मादि स्वभावतएव
रक्तस्य तत्ररागिणः पुरुषस्य धर्मकृते धर्मार्थं अनुशासतस्तव महानयंव्यतिक्रमः अन्यायः कुत इत्यत आह यस्य वाक्यतोऽयमे
वधर्मइतिस्थितोइतरः प्राकृतोजनः तस्य काम्यकर्मादेः अन्येन तत्त्वज्ञेन क्रियमाणं निवारणं स्वयमेवत्वयावाक्रियमाणं यद्वा न
तेताऽन्यथाकिंचनयद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः नकर्हिचित्क्वापिचदुःस्थितामतिर्लभेतवाताहतनौरिवा
स्पदं १४ जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्यमहान्व्यतिक्रमः यद्वाक्यतो धर्मइतीतरः स्थितो नमन्यतेतस्य
नर निवारणंजनः १५ विचक्षणोऽस्याहेतिवेदितुंविभोरनंतपारस्यनिवृत्तितः सुखं प्रवर्तमानस्य गुणैरनात्मनस्ततो भ
वैन्दर्शयचेष्टितंविभोः १६
भवन्
कर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुरित्यादिश्रुत्याक्रियमाणं निवारणं यथार्थमेतदितिनमन्यते किंतु प्रवृत्तिमार्गा
नधिकृतविषयमेतदितिकल्पयति तदुक्तं मंत्रार्थवादोपन्यासभेदैः तैस्त्रिवर्गाश्रितैर्वचनैः येषांपंथावादयोनराः गृहस्थत्वे शक्यंनिकर्तुं ते न२
षामयंविधिः नैष्ठिकब्रह्मचर्यंवापरिव्राजकतापिवा नैरेवश्यगृहीतव्याते नादौवतदुच्यतइत्यादि १५ ननु पद्यवै प्रवृत्तिमार्गानि
पेते तर्हि निवृत्तिमार्गेण सर्वक्रियात्यागेनैव परमेश्वरसुखस्वरूपानुभूतिः किं तस्याह कथमनेनापितत्राह विचक्षणोऽतिनिपु
णः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्या अस्य विभोः सुखं निर्विकल्पकं सुखात्मकं स्वरूपं वेदितुं ज्ञातुमर्हति नपुनरविचक्ष
णः प्रवृत्तिस्वभावः विभुत्वे हेतुः नन्तः कालतः पारं च देशतो यस्य तस्य विभोः अपिच ततः कारणात् हे विभो अनात्मनो
देहाद्यभिमानिनः अतएव गुणैः सत्वादिभिः प्रवर्तमानस्य जनस्य दर्शय भवानितित्वमित्यर्थः पाठांतरे हे भवन्निति संबोधनं १६ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतावत्काम्यकर्मादरनर्थहेतुत्वात्तं विहाय हरेर्लीलैव वर्णनीयेत्युक्तं इदानीं तु नित्यनैमित्तिकस्वकर्मनिष्ठामप्यनादृत्य केवलं हरिभक्ति
रेवोपदेष्टव्येत्याशयेनाह त्यक्त्वेति ननु स्वधर्मत्यागेन भजन्भक्तिपरिपाकेन कृतार्थो भवेत् तदा न काचिच्चिन्ता यदि पुनरपक्व ए
व म्रियेत ततो भ्रष्टपदात्तदा स्वधर्मत्यागनिमित्तोऽनर्थः स्यादित्याशंक्याह ततो भजनात्कथंचित्पतेत् भ्रंशेत् म्रियेत वा यदि त
दापि भक्तिरसिकस्य कर्मानधिकारान्नानर्थशंका अंगीकृत्याप्याह वाशब्दः कदाचित् यत्र क्वापि नीचयोनावपि अमुष्य भक्तिरसि
कस्य अभद्रमभूत् किं नाभूदेवेत्यर्थः भक्तिवासनासद्भावादिति भावः अभजद्भिस्तु केवलं स्वधर्मतः कोवात्रार्थ आप्तः प्राप्तः १७
अभजतामिति षष्ठी तु संबंधमात्रविवक्षया १७ ननु स्वधर्ममात्रादपि कर्मणा पितृलोकादिनिष्कामः पितृलोकप्राप्तिः फलमस्ये
व तत्राह तस्यैव हेतोः तदर्थं यत्नं कुर्यात् यत् उपरि ब्रह्मलोकपर्यंतं अधः स्थावरपर्यंतं च भ्रमद्भिर्जीवैः न लभ्यते षष्ठी तु

त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि यत्र क्व वाभद्रमभूदमुष्य किं को वार्थ आप्तोऽभजतां स्वध
र्मतः १७ तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र
२ गभीररंहसा १८ नवै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहा
तुमिच्छेन्न रसग्रहो जनः १९

वंवत् ननु विषयसुखेऽप्यन्यत एव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्यते दुःखवत् यथा दुःखं प्रयत्नं विनापि लभ्यते तद्वत् तदुक्तं
अप्रार्थितानि दुःखानि यथैवायांति देहिनां सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यत इति १८ यदुक्तं यत्र क्व वाऽभद्रमभूदिति त
दुपपादयति नवा इति मुकुंदसेवी जनः जातु कदाचित् कथंचन कुयोनिगतोऽपि संसृतिं नाव्रजेत् नाविशत् अंग अहो अन्यव
त् केवलकर्मनिष्ठवदिति च धर्मे दृष्टांतः कुत इत्यत आह मुकुंदांघ्रोः उपगूहनं आलिंगनं पुनः स्मरन् विहातुं नेच्छति त
यतोऽयं जनो रसग्रहः रसेन रसनीयेन गृह्यते वशीक्रियते यद्वा रसनीयं ग्रहं आग्रहो यस्य तदुक्तं भगवता यततेऽत्र ततो भूयः
संसिद्धौ कुरुनंदन पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः इति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्च भगवल्लीलैवाधाम्नानुवर्णयेत्युक्तं तत्र को भगवान् का वास्य लीलेत्यपेक्षायामाह इदं विश्वं भगवानिव सन्नु अस्माद्विश्व
स्मादितरः ईश्वरात्प्रपंचो न पृथक् ईश्वर एव प्रपंचात्पृथगित्यर्थः तत्र हेतुः यतो भगवतः हेतोर्जगतः स्थित्यादयो भवंति अनेन
नैव लीला अपि दर्शिताः यद्वा इदं विश्वं भगवान् इतर इव यः स जीवोऽपि भगवान् चेतनाचेतनप्रपंचस्य व्यतिरेकेण नास्ति
स्क० १ एवैकत्वमित्यर्थः हिशब्देन सर्वं खल्विदं ब्रह्मेत्यादि प्रमाणं सूचितं तद्धि स्वयमेव भवान्वेद प्रादेशमात्रं एकदेशमात्रं आ
चार्यवान्पुरुषो वेदेत्यादि श्रुत्यर्थसंपादनाय दर्शितं २० न चैतावताचार्यापेक्षा ईश्वरावतारत्वादित्याह त्वमिति हे अमो
घदृक् त्वं आत्मनास्वयं आत्मानमजमेव संतं जगतः शिवाय प्रजातमवेहि कुतः परस्य पुंसः कलांशं भूतं तत

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रद
र्शितं त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलां अजं प्रजातं जगतः शिवाय तन्महानुभा
२६ वाभ्युदयोऽधिगण्यतां २१ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः अविच्युतोऽर्थः कवि
भिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनं २२ अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां
निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि निर्विविक्षतां २३ ते मय्यपेताखिलचापलेऽर्भके दांतेऽधृ
तक्रीडनकेऽनुवर्तिनि चक्रुः कृपां यद्यपि तुल्यदर्शिनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि २४

स्मात् महानुभावस्य हरेरभ्युदयः पराक्रमोऽधि अधिकं गण्यतां निरूप्यतां २१ अनेनैव तप आदि सर्वं तव सफलं स्यादित्याह इदं
हीति आदिषु भावे निष्ठा इदमेव हि तपः श्रवणादेरविच्युतो नित्योऽर्थः फलं किं तत् उत्तमश्लोकस्य गुणानुवर्णनमिति य राम
त् २२ सत्संगतो हरिकथाश्रवणादिफलं स्ववृत्तांतेन प्रपंचयति अहं पुरा पूर्वकल्पे अतीते भवे पूर्वजन्मनि वेदवादिनां दास्याः २६
सकाशादभवं जातोऽस्मि निरूपितः नियुक्तः क्व योगिनां संन्यासिनां शुश्रूषणे आषाढे प्रावृषि वर्षापक्षे स्थितं चातुर्मास्ये विविक्ष
तां निर्वेशं एकत्र वासं कर्तुमिच्छतां २३ अपेतान्यखिलानि चापल्यानि यस्मात्तस्मिन्नियतेंद्रिये अधृतक्रीडनकं त्यक्तक्रीडासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उच्छिष्टलेपान् पात्रलग्नान् अनुमोदितो द्विजैरनुज्ञातः सकृद्भुञ्जे स्म तेन भोजनेनापास्तकिल्बिषोऽस्मि तेषां धर्मे परमेश्वरभजने एव आत्मनो मम रुचिः प्रजायते स्मेत्यनुषङ्गः २५ अशृणवं श्रुतवानस्मि मे श्रद्धया मे भवतस्ताः सिद्धयानत्वेनेन बलाज्ञानिनया अश्रोतामहत्त्वं यस्य पीन रुचेः २६ प्रियश्रवायशसि यस्य तस्मिन् भगवति लब्धरुचेर्मम मास्खलिता अप्रतिहता मतिरभवदित्यनुषङ्गः यया मत्या परे प्रपञ्चातीते ब्रह्मरूपे मयि सदसत् स्थूलसूक्ष्मं च एतत् शरीरं स्वमायया अविद्यया कल्पितं न तु वस्तुतोऽस्तीति न तु क्षणमेव पश्यामि २७ एवं शुद्धत्वंपदार्थज्ञाने देहादिकं तद्विलक्षणं निरूप्य तत्कारणभूतरजोगुणतमोनिवर्तिका दृढा भक्तिर्जातेत्याह इत्थमिति हरेर्यशः अनुसवं त्रिकाले २८ तस्य ज्ञानशुद्धत्वंपदार्थस्य दृढभक्तिमतो मम आश्रितस्य विनीतस्य गुह्यतममिति साधनभूतधर्मतत्त्वज्ञानं गुह्यं तस्माद्धर्मात्

उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुञ्जे तदपास्तकिल्बिषः एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते २५
तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रुचिः
२६ तस्मिंस्तदा लब्धरुचेर्महामुने प्रियश्रवस्यस्खलिता मतिर्मम ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे २७ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा २८ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः २९ येनैवाहं भगवतो वासुदेवस्य वेधसः मायानुभावमविदं येन गच्छन्ति तत्पदं ३० एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितं यदीश्वरे भगवति कर्म ब्रह्मणि भावितं ३१ आमयो यश्च भूतानां जायते येन सुव्रत तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितं ३२

विविक्तात्मज्ञानं गुह्यतरं तस्मादपीश्वरज्ञानं गुह्यतमं भगवतोदितं भागवतशास्त्रं अन्ववोचन् उपदिष्टवन्तः २९ तदेव ज्ञानं पूर्वोक्तं त्वंपदार्थज्ञानात् विविक्तं तत्पदार्थज्ञानं येनैवाहं भगवतो मायानुभावमविदं ज्ञातवानहं ३० तत्साधनधर्मरहस्यं वक्तुं सूचितमित्याह एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्तकं सत्त्वशोधकमित्यर्थः किं तत् भगवति भावितं समर्पितं यत्कर्म तत् केवलं भगवति ईश्वरे सर्वनियन्तरि एवंभूते च ब्रह्मणि अपरिच्छिन्ने पूर्णे ३१ ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वं सामग्रीभेदेन घटत इति दृष्टान्तमाह आमयो यश्चेति आ- मयो रोगः येन घृतादिना जायते तदेव केवलमामयकारणभूतं द्रव्यं तेनामयं न पुनाति न निवर्तयति नाशयतीत्यर्थः किंतु चिकित्सितं द्रव्यान्तरैर्भावितं सत् पुनात्येव यथा ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ आत्मविनाशायकर्मनिरस्तैनैयकल्पंते समर्था भवंति परे ईश्वरे कल्पिता अर्पिताः संतः अत्र च प्रथमं महत्सेवा ततस्तत्कृपा ततस्तद्धर्मे श्रद्धा ॥
ततो भगवत्कथाश्रवणं ततो भगवति रतिः तया च देहद्वयविवेकात्मज्ञानं ततो दृढा भक्तिः ततो भगवत्तत्वज्ञानं ततस्तत्कृपया सर्व
ज्ञत्वादि भगवद्गुणाविर्भाव इति क्रमो दर्शितः ३३ ननु च ज्ञानेनाज्ञानप्राप्तकर्मनाशः तच्च ज्ञानं भक्तियोगाद्भवति कथं कर्मणा कर्मना
शः स्यात् तत्राह यदत्रेति ३४ भगवदर्पणेन क्रियमाणं कर्म भक्तियोगं जनयतीति सदाचारेण दर्शयति यत्र यदा भगवतः शिक्षया कर्मा
णि कुर्वाणा भवंति तदा श्रीकृष्णस्य गुणानामानि गृणंति अनुस्मरंति च कृष्णमित्यर्थः इयं भगवच्छिक्षा यत्करोषि यदश्नासि यज्जुहोषि
ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति ३५ कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाह द्वाभ्यां ॐ नम इ

एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ते एवात्मविनाशाय कल्पंते कल्पिताः परे ३३ यदत्र क्रियते कर्म भगवत्परितोष
णं ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ३४ कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् गृणंति गुणनामानि कृष्ण
स्यानुस्मरंति च ३५ ॐ नमो भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ३६ इति मूर्त्य
मन्मूर्त्ति भिधानेन मंत्रमूर्तिं अमूर्तिकं यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ३७ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं अदान्मे ज्ञा
नमैश्वर्यं स्वस्मिन्भावं च केशवः ३८ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं प्राख्याहि दुःखैर्मु
हुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा ३९ इति श्रीभागवते महापुराणे प्रथमस्कंधे पंचमोध्यायः ५ सूत उ॰
एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः १ श्रीवेदव्यास उ॰ भिक्षुभिर्विप्रवसिते
विज्ञानादेष्टृभिस्तव वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् २

ति नमो धीमहि मनसा नमनं कुर्वीमहि ३६ अमूर्तिकं मंत्रोक्तव्यतिरिक्तमूर्तिशून्यं यजते पूजयति स पुमान् सम्यक् दर्शनो भवति ३७
एवं च कृतवतो मयि हरिः स्वसदृशं ज्ञानादिकं दत्तवानित्याह इमं स्वनिगमं स्वोपदेशं मयाऽनुष्ठितं अवेत्य ज्ञात्वा भावं प्रीतिं च ३८
अतस्त्वमप्येवं कुर्वित्याह त्वमिति अदभ्रं अनल्पं श्रुतं यस्य हे अदभ्रश्रुत विभोर्विश्रुतं यशः प्राख्याहि कथय येन विश्रुतेन बुद्धेन वि
दां विदुषां बुभुत्सितं बोद्धुमिष्टं समाप्यते यतो दुःखैः पीडितानां क्लेशशांतिप्रकारांतरेण न मन्यंते ३९ इति प्रथमे पंचमः ५ ॥ ५ ॥
व्यासस्य प्रत्ययार्थं च षष्ठे प्राग्जन्मसंभवं स्वभाग्यं नारदः प्राह कृष्णसंकथनोद्भवं १ स्वयमपि तथा चिकीर्षुर्गुरूपदेशानंतरभावि तच्चरितं

पृच्छति भिक्षुभिरिति विप्रवसिते दूरदेशगमनेनोषित्वेति विज्ञानस्योपदेष्टृभिः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परंवयः उत्तरामायुः स्वैनत्वं कथंचनिर्निनीत इदमिति दसीपुत्रभंगेकलेवरं उदस्राक्षीः उत्सृष्टवानसि ३ एषकल्याणलक्षणः कालः नेस्मृति कथं न
अवधानं खंडितवान् अडागमाभावस्त्वार्षः हि यतः एषसर्वस्यनिराकृतिरपलापायस्मात्ः ४ अकार्षीकृतवानहं रक्षकार्ययाविश्लेषः
छंदोऽनुरोधेन ५ तत्रैनावलोकितकाले तेनैवमाह अहं यंत्रितान्यवसामित्याह त्रिभिः एकएवात्मजो यस्याः सा योषिन्मूढेति च स्नेहानुष
धेनेतु ६ किंकरीत्यस्यार्थंप्रपंचयति अस्वतंत्रा सा अनेनकल्याणसमर्थाश्वासीन् दारुमयीयोषित्वेति पारवश्यदृष्टांतः गदेवसोस्नेहे
चेके ७ अहं च दिगादिषु न भिक्षुः अनंतेवन्यवसिमित्याह अहं च न स्मिन्नुसकुले न तस्याः मातुः स्नेहानुबंधस्यावेक्षया कदाचिदमे
दि विप्रतीक्षयेत्यर्थः ऋषिवान्वासकृतवान् पंचहायनः पंचवर्षः ८ गेहान्निर्गतांगादुहंतो हेतोः शतृप्रत्ययः दोर्धे निर्गतामित्यर्थः
पदापादेन आस्पृशः इषदाक्रांतः अदेशान् अरवादत्तु नतु मातुर्मरणं शंकस्यात्याणमभीप्समइशस्यानुग्रहे मन्यमानः प्राप्तितस्मिन्नितः

स्वांयं भुवकथयाष्टत्याचनिर्निंदपरंवयः कथंचिदमुदस्राक्षीः कालेप्रामकलेवरं २ प्राक्कृत्स्नविषयामन्वीम्भांतिनेसुरसत्तम
नत्येषु व्यवधात्कालएषसर्वनिराकृतिः ४ नारदउ॰ भिक्षुभिर्विप्रैर्सितपिज्ञानादृष्टिभिर्मम वर्त्तमानावयस्यायेनतएतद
कारेष ५ एकात्मजामेजननीयोषिन्मूढाच किंकरी मध्यात्मजेऽनन्यगतीचकेस्नेहानुषधनं ६ साऽस्वातंत्रानकल्पा
सीद्योगक्षेमस्यमच्छती ईशस्यहिवशेलोकोयोषादारुमयीयथा ७ अहं च तदू सकुलेकुषिवांस्तदवेक्षया दिग्देश
कालोव्युत्पन्नोबालकः पंचहायनः ८ एकदानिर्गतांगेहाद्दुहंतीनिशिगायधि सर्पोऽदशत्पदास्पृष्टः कृपणांकाल
चोदितः ९ तदानदहमीशस्यभक्तानांशमभीप्सतः अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां ॥ १० ॥ स्फीतान्जनपदांस्तत्र
पुरग्रामव्रजाकरान् खेटखर्वटवाटीश्च वनान्युपवनानि च चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् जलाशयान्शिवजलान्नलिनीः
सि ११ स्फीतान्जनपदादीन्नितियातः सन्नहमहद्विपिनमद्राक्षमितिचतुर्थेनान्वयः जनपदादिषुनानागुणदोषयुक्तेषु समदृष्टिः सन्नहमित्यभिप्रायो
र्थः स्फीतान्समृद्धान् जनपदान्देशान् तत्रतस्याहितीपुरग्रामव्रजाकरान् तत्रपुराणिराजधान्यः ग्रामाः भृगुप्राकाराः विप्राश्च विप्रभृत्यश्च यत्र चैव वस
तिन सन्तुग्रामाइत्युक्तेः शूद्राणांवासएवचतिव्रजागोकुलानि आकरारत्नाद्युत्पत्तिस्थानानि तान् खेटः कर्षकग्रामाः खर्वटागिरितटग्रामाः भृगुप्राकारो
वा एकवीथिचतुर्ग्रामानगरं चेकतः स्थितं मिश्रंतु खर्वटं नामनदीगिरिसमाश्रयमिति वाटाः पुष्पपुष्पादीनांवाटिकाः ताः वनानिस्वतः सिद्धवृक्षाणां
समूहाः उपवनानिरोपितवृक्षाणांसमूहाः तानितित्रैश्चित्रैर्धातुभिः स्वर्णरजतादिभिः विचित्रानद्रींश्च इभैर्भग्नाभुजाः शाखायेषांतान्द्रुमान्युष्पान् ॥
शिवानिभद्राणिजलानियेषांतान् नलिनीः सरसीः स्वनानियेषांतैः पत्ररथैः पक्षिभिः तन्नादप्रबुद्धैरितिस्वांतविभ्रमभृंगैभ्रमरैः श्रीः शोभायासांतान्
नगाह्वंर १२ एकएवातियातोऽहमद्राक्षंविपिनंमहत् घोरंप्रतिभयाकारंव्यालोलूकशिवाजिरं १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७०२०

परिश्रांतानींद्रियाणि आत्मा देहश्च यस्य तृषापरीतो व्याप्तः उपस्पृष्टः आचांतः पिप्पलोपस्थे अश्वत्थमूले आश्रितः उपविष्टः आत्मना बुद्ध्या आत्म
स्थं हृदिस्थं आत्मानं परमात्मनं १५ भावेन भक्त्या निर्जितं वशीकृतं चेतो यस्य तेन औत्कंठ्येन अश्रूणां कलाभिर्युक्ते अक्षिणी यस्य १६ प्रेम्णोऽतिभरेण निर्भिन्न
पुलकान्यंगानि यस्य आनंदसंप्लवे महाप्रवाहे परमानंदे उभयं आत्मानं परं च १४ मनसः कांतं अभीष्टं शुचां शोकः तमपहंतीति तथा तं
न उत्तस्थे उत्थितोऽस्मि पुनः हृदि मनः प्रणिधाय स्थिरीकृत्य अवितृप्त आतुर इव अभवमिति शेषः १७ गिरामगोचरः संवेदनस्या गि. ४
विषयभूतईश्वरः १७ हंतेति सानुकंपसंबोधनं मा इति मा द्रष्टुं मार्हसि यतः नार्हसि यतः न विपक्वा दग्धाः कषायाः मलाः कामा

ण्ये

परिश्रांतेंद्रियात्माहं तृट्परीतो बुभुक्षितः स्नात्वा पीत्वा हृदे नद्या उपस्पृष्टो गतश्रमः तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आ
श्रितः आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयं १३ ध्यायतश्चरणांभोजं भावनिर्जितचेतसा औत्कंठ्याश्रुकलाक्षस्य
१८ हृद्यासीन्मे शनैर्हरिः प्रेमातिभरनिर्भिन्नपुलकांगोऽतिनिर्वृतः आनंदसंप्लवे लीनो नापश्यमुभयं मुने १४ रूपं भगव
तो यत्तन्मनः कांतं शुचापहं अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव १५ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि
८ वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः १६ एवं यतंतं विजने मामाहागोचरो गिरां गंभीरश्लक्ष्णया वाचा शुचः प्रशम वी.
यन्निव १७ हंतास्मिञ्जन्मनि भवान्मा मां द्रष्टुमिहार्हति अविपक्वकषायाणां दुर्दर्शोऽहं कुयोगिनां १८ सकृद्यद्दर्शितं रूप
मेतत्कामाय तेऽनघ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् १९ सत्सेवयादीर्घयापि जाता मयि दृढा मतिः हित्वा
वद्यमिमं लोकं गंता मज्जनतामसि २० मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात्
२१ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेनुकंपितः २२

दर्शो येषां ते तेषां कुयोगिनां अनिष्पन्नयोगानां १८ कुतस्तर्हि दृष्टोऽसि तत्राह सकृदिति दर्शितं मया तत्तु एतत्कामाय मय्यनुरागाय त्वत्कामेन कि
मित्यत आह मत्कामः पुमान् हृच्छयान्कामान् १९ अदीर्घयापि सत्सेवया अवद्यं निंद्यं लोकं देहं मज्जनतां मत्पार्षदतां गंतासि २० प्र
जानां सर्गे सृष्टौ निरोधे संहारेऽपि प्रजासर्गस्य निरोधः इति वा २१ तन्महद्भूतं महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्या
दिश्रुतेः कीदृशं ईश्वरं सर्वनियंतृ नभसि लिंगं यस्य तत्तु नभोलिंगं संनिहितमपि न लिंगमिति अलिंगं तस्मै अदृष्टाय अवनामं प्रणा ८

महिदेकावनामं तेनानुकंपितः सन् २६

स्य२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतत्रपः॥ त्यक्तलज्जः विमत्सरो जातोस्मीति शेषः २३ काले स्वावसरे कालः॥ मृत्युः॥ प्रादुरभूत् आविर्बभूव अकस्मात्प्रादुर्भावे दृष्टांतः॥ विद्यु
दिवेति सौदामिनीति विशेषणं स्फुटत्वप्रदर्शनार्थं सुदामा मामालातत्र भवा सौदामिनी मालाकार इत्यर्थः॥ यद्वा सुदामा पर्वतः॥ तेनैकदिग
तिसूत्रेणात् स्फाटिकादिमयपर्वतपंक्ति भवा हि विकृदतिस्फुटा भवति तद्वदित्यर्थः॥ यद्वा तडिदिति आंतिकइत्यर्थः॥ तडिदित्यंतिकेवज्र
पातिति निरुक्तेः स्मरणात् २४ प्रयुज्यमाने मयि तामिति अयमर्थः॥ हित्वावद्यमिमंल्लोकं गता मज्जननाम सातिया भागवती भगवत्पार्ष
दरूपा शुद्धासत्वमयी तनुः॥ प्रति अस्तातां प्रति भगवता मयि प्रयुज्य माने नीयमाने आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्य आरब्ध
कर्मणो निर्वाणमेव निर्वाणयस्येति वा सः॥ पंचभूतात्मको देहो न्यपतत् अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्या

नामान्यनंतस्य हतत्रपः॥ पठन्गुह्यानि भद्राणि कृतानि च स्मरन् गां पर्यटंस्तुष्टमना गतस्पृहः॥ कालं प्रतीक्षन्विमदो विमत्सरः॥
२३ एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः॥ कालः प्रादुरभूत्काले तडित्सौदामिनी यथा २४ प्रयुज्यमाने मयि तां शुद्धां भागव
तीं तनुं आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः॥ २५ कल्पांत इदमादाय स्वायनेंऽभस्युदन्वतः॥ शिशयिषोरनुप्राणं विविशेंऽ
तरहं विभोः॥ २६ सहस्रयुगपर्यंत उत्थायेदं सिसृक्षतः॥ मरीचिमिश्रा ऋषयः॥ प्राणेभ्योऽहं च जज्ञिरे २७ अंतर्बहिश्च लो
कांस्त्रीन्पर्येम्यस्कंदितव्रतः॥ अनुग्रहान्महाविष्णोरविघातगतिः॥ क्वचित् २८ देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां मू
र्छयित्वा हरिकथां गायमानश्चराम्यहं २९ प्रगायतः स्ववीर्याणि तीर्थपादः॥ प्रियश्रवाः आहूत इव मे शीघ्रं दर्शनं याति चे
तसि ३०

दिसूचितं भवति २५ इदं त्रैलोक्यं आदाय उपसंहृत्य उदन्वतः॥ एकार्णवस्यांभसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोर्विभोर्ब्रह्म
णः॥ अंतः॥ मध्ये अनुप्राणं निश्वासेन सह विविशे प्रविष्टोऽहं तेनोऽवतीर्यपि विश्वात्मा देहमाविश्य चक्रिणः अवार्षवेषु योनिद्रामको भूत्वा पधि
ष्ठितिकूर्मोक्तेः स्वायने अंभसीति पाठे स्वायने स्वस्य अयनेऽंभसि शिशयिषोर्ब्रह्मणइति श्रीनारायणनाभेद विवक्षयाक्तमिति अवगंतव्यं २६
य प्राणेभ्यः इंद्रियेभ्यः॥ अहं मरीचिमिश्राः॥ तन्मुख्या ऋषयश्च जज्ञिरे २७ यत्कर्मणा सोच हिर्नयांति तपआदिभिर्ब्रह्मलोकंगताः॥ तेऽंतर्तनेयांति
अहं तु महाविष्णोरनुग्रहादखंडितब्रह्मचर्यव्रतः सन्नंतर्बहिश्च पर्येमि क्वचिदपि अविघाता अविहतागतिर्यस्य सः॥ २८ किमिति पर्यटसि
इश्वराज्ञयालोकमंगलार्थमित्याह चतुर्भिः देवेनेश्वरेण दत्तां स्वराः निषादऋषभगांधारषड्जमध्यमधैवतपंचमाइति सप्त त एव ब्रह्मत्वब्रह्मा

भिःकिक्तनानविभूषितिस्वरैः॥ सिद्धस्वरब्रह्मत्वामित्यर्थः॥ मूर्छयि
ताम्रकालापवर्तितिकिस्वा २९ स्वयचालनमाह प्रगायत इति ३०

१८ परप्रयोजनमाह एतद्धीति मात्रा विषयास्तेषां स्पर्शा भोगास्तेषामिच्छया आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनं यत्तदेव भवसिंधोः प्लवः
पोतः नकेवलं श्रोत्रिप्रमाण्येन किंत्वन्वयव्यतिरेकाभ्यां दृष्टएवेत्यर्थः ३३ एतदेव व्यक्तमवधारणमनुभवेन द्रढयति यमादिभिस्तथा न शाम्यति
यद्वन्मुकुंदसेवया अद्धा साक्षादात्मा मनः शाम्यति कथंचिन्मुकुंदसेवामात्रेण शाम्यति किंपुनस्तद्गुणवर्णनेनेति भावः ३४ भवतामनः परि
तोषकं चाख्यातं ३५ आमंत्र्य अनुज्ञाप्य यादृच्छिकः स्वप्रयोजनसंकल्पशून्यः ३६ हरिकथागायकं भाग्यं श्लाघते अहो इति मादयन् हृष्यन्
तंत्र्या वीणया ३७ इति प्रथमे श्रीभागवतव्याख्यायां षष्ठोऽध्यायः ६ अथ भागवतश्रोतुर्जन्म वक्तुः परीक्षितः । सुप्तबालवधो द्रौणेर्दंडः सप्तमे

एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः । भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ३३ यमादिभिर्योगपथैः कामलोभहतो मुहुः । मुकुं
दसेवया यद्वत्तथाऽत्माऽद्धा न शाम्यति ३४ सर्वं तदिदमाख्यातं यत्पृष्टोऽहं त्वयाऽनघ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ३५
सूत उवाच एवं संभाष्य भगवान्नारदो वासवीसुतं आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ३६ अहो देवर्षिर्धन्योऽयं य
त्कीर्तिं शार्ङ्गधन्वनः गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ३७ इति श्रीभागवते महापुराणे प्रथमस्कंधे षष्ठोऽध्यायः ६ ॥
शौनक उवाच निर्गते नारदे सूत भगवान्बादरायणः श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः १ सूत उवाच ब्रह्मनद्यां
सरस्वत्यामाश्रमः पश्चिमे तटे शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः २ तस्मिन्स्व आश्रमे व्यासो बदरीषंडमंडिते आ
सीनोऽप उपस्पृश्य प्रणिदध्यौ मनः स्वयं ३ भक्तियोगेन मनसि सम्यक्प्रणिहितेऽमले अपश्यत्पुरुषं पूर्णं मायां च तदपाश्र वे
यां ४ यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोऽपि मनुतेऽनर्थं तत्कृतं चाभिपद्यते ५
ति

ध्येते १ तस्य नारदस्याभिप्रेतं श्रुतवान्सन् १ ब्रह्मनद्यां ब्रह्मदेवत्यायां ब्राह्मणैरन्वितायां वा सत्रं कर्म वर्धयतीति तथा २ बदरीणां षंड
ेन समूहेन मंडिते मनः प्रणिदध्यौ स्थिरीचकार समाधिनाऽनुस्मरेति नारदोपदिष्टं ध्यानं कृतवानित्यर्थः ३ प्रणिहिते निश्चले अ ने
त्र हेतुः भक्तियोगेनाऽमले पूर्वं प्रथमं पुरुषं आदिपुरुषमीश्वरमपश्यत् पूर्णमिति वा पाठः तदपाश्रयां तदधीनां मायां चापश्य
त् ४ ईशमायाकार्यं च जीवानां संसृतिमपश्यदित्याह ययेति यया संमोहितः स्वरूपावरणेन विक्षिप्तः परोऽपि गुणत्रयात् व्यति
रिक्तोऽपि तत्कृतं त्रिगुणात्माभिमानकृतं अनर्थं च कर्तृत्वादिकं प्राप्नोति ॥५॥ ७ श्रीराम श्रीराम श्रीराम

ईश्वराश्रयां

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परानंदः स्वाविर्भूत

अनर्थमुपशमयति यो ऽधोक्षजे साक्षाद्भक्तियोगस्तं चापश्यत् एतत्सर्वं स्वयं दृष्ट्वा एवमज्ञानेनैव लोकस्यानर्थं सात्वतसंहितां श्रीभागवताख्यां
चक्रे तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपेण दर्शितः। एतदुक्तं भवति विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरूपः। सर्वज्ञः स
र्वशक्तिरीश्वरः। तन्मायया संमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा जीवस्तस्य चेश्वरस्य भक्त्या लब्धज्ञानेन मोक्ष इति तदुक्तं विष्णुस्वा
मिना ह्लादिन्या संविदाश्लिष्टः। सच्चिदानंद ईश्वरः। स्वाविद्यासंवृतो जीवः। संक्लेशनिकराकरः तथा स ईशो यदधीना माया स जीवो यस्तयार्
दितः। स्वाविर्भूतसुदुःखभूः। स्वादृगुत्थविपर्यासभवभेदजभीशुचः। यन्मायया जुषन्नास्ते तमिमं नृहरिं नुम इत्यादि ६ संहितायामन

अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ६ यस्यां वै श्रूयमाणायां कृष्णे परमपूरु
षे भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ७ स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं शुकमध्यापयामास निवृत्तिनिरतं
मुनिः ८ शौनक उवाच स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः। कस्य वा बृहतीमेतामात्मारामः समभ्यसत् ९ सूत उवाच
आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः। १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः।
अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः। ११ परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनं संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोद
यं १२ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे १३ भर्तुः प्रि
यं द्रौणिरिति स्म पश्यन्कृष्णासुतानां स्वपतां शिरांसि उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति १४ महतीं

र्थोपशमकत्वं दर्शयति यस्यां श्रूयमाणायामेव किं पुनः श्रुतायामित्यर्थः ७ अनुक्रम्य शोधयित्वा ८ कस्य वा हेतोः इहैव निवृत्तस्य ९ निर्ग
ग्रंथ्यंते ग्रंथि थाः ग्रंथेभ्यो निर्गताः। तदुक्तं गीतासु यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति यद्वा निवृत्तः को
धाहंकाररूपो ग्रंथिरवग्रंथः। निवृत्तो हृदयग्रंथेय इत्यर्थः ननु मुक्तानां किं भक्त्यादि सर्वाक्षेपपरिहारार्थमाह इत्थंभूतगुणो हरिरिति १० भ
क्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह हरेरिति अध्यगात् अधीतवान् विष्णुजनाः प्रिया यस्येति व्याख्याना
दिप्रसंगेन तत्संगतिकाम इति भावः। ११ एतेन तस्य पुत्रो महायोगीत्यादिना शुकस्य व्याख्यानप्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तं यदन्यच्च
ष्टं परीक्षितः प्रायोपवेशनश्रवणं कथमिति तस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरं वक्तुमाह परीक्षित इति विलापनं मुक्तिमत्कं वा संस्थां महाप्रस्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रपरीक्षितोजन्मनिरूपयिष्यन्द्रोणनाशकर्मस्थएवाश्वत्थाम्नोप्रस्तावस्त्रंरूकेम्मनरक्षितइतिवकुंकथाप्रस्तोतित्यदित्यादिना यदाद्रोणिरश्वत्थामा
रुक्मासुतानांद्रौपदीपुत्राणांशिरांस्युपाहरत् तदातन्मातागदेन् तांचसांत्वयन्किरीटमाली अर्जुनआहेति तृतीयेनान्वयः किमितिबाला
नांशिरांस्याहृतवान् नित्यपक्षाय्यामाह सन्धेयुद्धे यद्यपिपांडवाअपिकौरवाएव तथापिसंजयएवराज्ञो धृष्टद्युम्नः पांडवानांसेनापतिरिति
संजयानामित्युक्तं वीरगतिंस्वर्गं अथोअनंतरं वृकोदरेणविद्धायाः क्षिप्तायागदायाअभिमर्शेन घातेनभग्नावूरुदंडौयस्य तथाभूतेधृतरा
ष्ट्रपुत्रेदुर्योधनेसति भर्तुर्दुर्योधनस्यस्मितिवितर्के इतिएवंप्रियंस्यादिति पश्यतु तस्यतत्हिप्रियमेवतिवाक्यांतरं विप्रियत्वेहेतुः जुगुप्सित
मिति घोरंदुःसहंयथाभवेत्ति बाष्पस्यकलाभिःबिंदुभिराकुलेअक्षिणीयस्याःसा किरीटस्यकल्पितवंदयाणांबहुत्वात्किरीटमालीत्यु

((यदाम्रधेकौरवसंजयानांवीरेप्रथोवीरगतिंगतेषु वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे भर्तुः प्रियंद्रोणिरितिस्म
पश्यन्रुक्मासुतानांस्वपतांशिरांसि उपाहरद्धिप्रियमेवतस्यतज्जुगुप्सितंकर्मविगर्हयंति १४ मातातिशिशूनांनिधनंसुता
नांनिशम्यघोरंपरितप्यमाना तदाऽरुदद्बाष्पकलाकुलाक्षीतांसांत्वयन्नाह किरीटमाली १५ तदाश्रुचैत्तप्रसज्ज्ञामि
२० भेद्रयक्षत्लबंधाः शिरआततायिनः गांडीवमुक्तैर्विशिखैरुपाहरत्वाकम्पयेत्वास्यसिदग्धपुत्रा १६ इतिप्रियावल्गु
विचित्रजल्पैः संसांत्वयित्वाऽच्युतमित्रसूतः अन्वाद्रवद्दंशितउग्रधन्वाकपिध्वजोगुरुपुत्रंरथेन १७

लुप्ते १३ शुचः शोकाश्रूणि प्रमृज्ज्ञामिपरिमार्जयामि यदातु यदाब्रह्मसंबंधोब्राह्मणाधमस्यआततायिनइति अग्निदोगरदश्चैव
शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैवषडेतेआततायिनइतिस्मरणात् अत्राततायीशस्त्रपाणिः तेनचपुत्रहंतुस्तवलक्ष्यतो गांडीवा
त् धनुषामुक्तैर्विशिखैर्बाणैरुपाहरत्वत्समीपमानयामि यच्छिरः आक्रम्यआसनंविधाय दग्धपुत्रासती १४ वल्गुवीरम्या
विचित्राजल्पाः भाषणानितैः सोऽर्जुनः अच्युतएवमित्रंसूतश्चयस्य दंशितः बद्धकवचः उग्रंधनुःचापंयस्य कपिहेतु राम
मानुध्वजेयस्यसः गुरोःपुत्रंरथेनाअन्वाद्रवत् अन्वधावत् १५ २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पलायत२ तभितु यौ

अपतंतं आधावंतं संद्रोणिः कुमारहा बालघाती उद्विग्नमानाः कंपितहृदयः प्राणपरीप्सुः प्राणं रक्षितुमिच्छुः ननु कोसौ यावद्गमं भयात् पलायितवान् तावदुर्व्यां पराद्रवत् कः ब्रह्मा सुनीतोभूत्वा सुतायं मुग्धः सन् रुद्रस्य भयात् यथा पलायितस्तथा अर्को इति प्राह वामनपुराण कथास्मृतिना तथाहि विद्युन्मालीनामक असुरः श्रीविद्याक्षोभाभिमोहश्च तस्मै रुद्रेण सौवर्णं विमानं दत्तं ततः सावर्णकस्य पृष्ठतो भ्रामयन् विमानं दीप्त्या रात्रिं विलोपितवान् ततोऽर्केण निजतेजोभिर्द्रावयित्वा विमानं पातितं दृष्ट्वा कुपितरुद्रभयादर्कः पराद्रवत् ततोऽरुद्रस्य नेत्रदृष्ट्या दह्यमानः पतन् वाराणस्यां पतितो लोलार्कनाम्ना विख्यातो जातः १६ अशरणं रक्षकरहितं ननु पलायनमेव रक्षकमस्ति न तस्यापि कुण्ठितत्वादित्याह श्रान्तवाजिनं यस्मिन् ब्रह्मशिरः अस्त्रं ब्रह्मास्त्रं द्विजात्मजः इत्यदोषे दर्शितो कः माह १७ ते ब्रह्मास्त्र

तमापतंतं स विलक्ष्य दूरात्कुमारहोद्विग्नमना रथेन परादवत्प्राणपरीप्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथाऽर्कः १६ यदाऽशरणमात्मानमैक्षत श्रान्तवाजिनं अस्त्रं ब्रह्मशिरो मेन आत्मत्राणं द्विजात्मजः १७ अथोपस्पृश्य सलिलं संदधे तत्समाहितः अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते १८ ततः प्रादुष्कृतं तेजः प्रचंडं सर्वतो दिशं प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह १९ अर्जुन उवाच ॥ कृष्ण कृष्ण महाभाग भक्तानामभयंकर त्वमेको दह्यमानानामपवर्गोसि संसृतेः २० त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि २१ स एव जीवलोकस्य मायामोहितचेतसः विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणं २२ तथाऽयं चावतारस्ते भुवो भारजिहीर्षया स्वानां चानन्यभावानामनुध्यानाय चासकृत् २३ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं सर्वतोमुखमायाति तेजः परमदारुणं २४

समाहितः कृतध्यानः उपसंहारमजानतोऽपि संधाने हेतुः प्राणकृच्छ्र इति १८ ततः अस्त्रात् सर्वतो दिशं प्रादुष्कृतं प्रकटीभूतं तेजः अभिप्रेक्ष्य ततः प्राणापदं चाभिप्रेक्ष्य १९ प्रस्तुतविज्ञापयितुं प्रथमं स्तौति श्रीकृष्णेति चतुर्भिः संसृतेः दह्यमानानां तस्या अपवर्गः अपवर्जयिता नाशक इत्यर्थः २० यतस्त्वमीश्वरः साक्षात् कुतः यतः प्रकृतेः परः पुरुषः तत्कुतः यतः आद्यः कारणकारणत्वे अपि विकारितामाह मायां व्युदस्य अभिभूय कैवल्यरूपे आत्मन्यवस्थित इति २१ त्रिवर्गदातापि त्वमेवेत्याह स इति यस्त्वं मायामभिस्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् विधत्से वीर्येण प्रभावेन २२ तथा चानेनावतारेण तव साधुपक्षपातो लक्ष्यत इत्याह तथेति किं भूभारहरणं मदिच्छामात्रेण न भवति तत्राह स्वानां ज्ञातीनामनुध्यानाय च तथा अनन्यभावानामेकांतभक्तानां च २३

[illegible]

कु२ सूय२

२१ इदं द्रोणपुत्रस्य ब्रह्मास्त्रं तेन च प्राणबाधप्राप्ते प्रदर्शितं केवलं न तु तत्प्रयोगे कुशल इत्यर्थः यतोऽसावुपसंहारं न जानाति एतच्च त्वं वेत्थ जाना
सि २५ प्रत्यवकर्शनं क्षपकं निवर्तकमित्यर्थः अतस्त्वदस्त्रतेजः उन्नद्धं उत्कटं ब्रह्मास्त्रतेजसैव जहि घातय त्वत्प्रयुक्तेनास्त्रेण तदुप
संहृत्य स्वयमुपशामय यतस्त्वमस्त्रज्ञोऽसि २६ परवीरहा स एव वीरस्तान् हन्तीति तथा फाल्गुनोऽर्जुनः अपः स्पृष्ट्वा आचम्य तं श्री
ब्रह्मास्त्र कृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्रह्मास्त्रं निवर्तयितुं २७ तत उभयोस्तेजसी शरैः संवृते संवेष्टिते परस्परं मिलित्वा ववृ
यो॰ धाते अवर्द्धेतां किं कृत्वा रोदसी द्यावापृथिव्यौ खं च अन्तरिक्षं च आवृत्य यथा प्रलये संकर्षणमुखाग्निः उपरि स्थितोऽर्कश्च संहत्य

श्रीभगवानुवाच वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ वेद संहारं प्राणबाध उपस्थिते २५ न ह्यस्यान्यतमं किंचि
दस्त्रं प्रत्यवकर्शनं जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा २६ सूत उवाच श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा
स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मायसंदधे २७ संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते आवृत्य रोदसी खं च ववृधातेऽर्को
वह्निवत् २८ दृष्ट्वास्त्रतेजस्तु तयोस्त्रींल्लोकान्प्रदहन्महत् दह्यमानाः प्रजाः सर्वाः सांवर्तकममंसत २९ प्रजोप
द्रवमालक्ष्य लोकव्यतिकरं च तं मतं च वासुदेवस्य संजहारार्जुनो द्वयं ३० तत आसाद्य तरसा दारुणं गौतमीसु
तं बबंधामर्षताम्राक्षः पशुं रशनया यथा ३१ शिबिराय निनीषंतं रज्ज्वा बद्ध्वा रिपुं बलात् प्राहार्जुनं प्रकुपितो भग
वानंबुजेक्षणः ३२ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि योऽसावनागसः सुप्तानवधीन्निशि बालकान् ३३
मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ३४

वह्निवत् २८ तयोः द्रौणिफाल्गुनयोः तेन दह्यमानाः सांवर्तकं प्रलयाग्निं अमंसत मेनिरे २९ लोकानां व्यतिकरं ध्वंसरूपं नाशमित्यर्थः
वासुदेवस्य मतं चालक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान् ३० गौतमवंशजा गौतमी कृपी तस्याः सुतं अमर्षेण कोपेन ताम्रे अक्षिणी यस्य सः ३१
निष्ठुरत्वदृष्टांतः पशुं यथेति तस्य बंधनं धर्म इत्यत्र वा दृष्टांतः यथा याज्ञिकः पशुमिति रशनया रज्ज्वा ३१ शोककोपादियुक्तस्याप्यर्जुनस्य धर्म
निष्ठाख्यापनाय श्रीकृष्णवाक्यं तदाह षड्भिः शिबिराय राजनिवेशनाय नेतुमिच्छंतं प्रकुपित इवेति ३२ अनागसो निरपराधान् ३३ रिपोर
पि सुप्तस्य बालस्य च वधो न धर्म इत्यन्यायं दर्शयति मत्तं मद्यादिना प्रमत्तं अनवहितं उन्मत्तं ग्रहवातादिना जडं अनुद्यमं प्रपन्नं शरणागतं विर
थं भग्नरथं ३४

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्धोरं दंडरूपं तस्मिन्नेव श्रेयः पुरुषार्थः यद्यनेन दंडप्रायश्चित्तरहिताद्दोषात्स पुमानधोयातीति तथा च स्मरंति राजभिर्धृतदंडास्तु कृत्वा पापानि
मानवाः विधूतकल्मषा यांति स्वर्गं सुकृतिनो यथेति ३५ ३६ ३७ यद्यपि चोदितः तथापि हंतुं नेच्छतु आत्महंतं पुत्रहंतारमपि येनाम
हान् ३८ गोविंदः प्रियः सारथिर्यस्य आत्मजानुशोचंत्यै ३९ तथा परिभवेन आहृतमानीतं को मे जुगुप्सितेन दोषेण ताङ्कुरुष्व अपध
तं अपकारिणं रूपया निरीक्ष्य वामः शोभनः स्वभावो यस्याः सा ननाम च उवाच चेति चकारो भ्रांतिसंभ्रमः सूचितः बंधनेनानी

तस्य प्राणान्तः परप्राणैः प्रयुञ्ज्यात्म घृणः खलः तद्धि धर्मस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ३५ प्रतिश्रुतं च भवता पांचाल्यै श्च
एतन्मम आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ३६ तदसौ वध्यतां पाप आततायात्मबंधुहा भर्तुश्च विप्रियं वी
रकर्तास्यन्तु कुलपांसनः ३७ एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः नैच्छद्धंतुं गुरुसुतं यद्यप्यात्महनं महान् ३८
अथोपेत्य स्वशिबिरं गोविंदप्रियसारथिः न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान्हतान् ३९ तथाहृतं पशुवत्पा
शबद्धमवाङ्मुखं कर्मजुगुप्सितेन निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च उवाच चा
सहन्त्यास्य बंधनानयनं सती मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ४० सरहस्यो धनुर्वेदः सविसर्गोपसं
यमः अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् स एष भगवान्द्रोणः प्रजारूपेण वर्तते तस्यात्मनोऽर्धं पत्न्या
स्ते नान्वगाद्वीरसूः कृपी ४१ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः
४२ मारोदीदस्य जननी गौतमी पतिदेवता यथाहं मृतवत्सार्ता रोदिम्यश्रुमुखी मुहुः ४३

नयनमसंहृतीस्त्रं सहमाना ४० सरहस्यः गोप्यमंत्रसहितः विसर्गोऽस्त्रप्रयोगः उपसंयम उपसंहारः ताभ्यां सहितोऽस्त्रसमूहश्च
किंच तस्य द्रोणस्यात्मनोऽर्धदेहस्तस्यार्द्धरूपी आस्ते अर्धतेहेतुः पत्नी अर्धो वा एष आत्मनो यत्पत्नीति श्रुतेः जायापती अग्निमादधी
यातामिति श्रुतेः उभयोरेककारकत्वावगमाच्च ननु भर्तरि मृते कथं सा जीवतीत्यत आह नान्वगाद्भर्तारं यतो वीरसूः पुत्रवती ४१ तत्त
स्माद्गौरवं गुरोः कुलं भवद्भिः कर्तृभिः वृजिनं दुःखं प्राप्तुं नार्हति किंतु पूज्यं वंद्यं च ४२ मृतवत्सा मृतपुत्रा ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुन्यतां २ न्याय्यं २

विप्रसेदोषमाहेयेरिति नेषांराजन्मनोकुलंकर्म कथंभूतं सानुबंधं सपरिवारं शुचार्पितं नापितं व्याप्रं च ब्रह्मकुलं कर्त्रे प्रदहति ४४
धर्म्यमित्यादयोवचसः षड्गुणाः पूर्वश्लोकपंक्तेद्रष्टव्याः तत्र धर्म्यं धर्मादनपेतं मुन्यतामिति न्यायादनपेतं सरहस्यइत्यादि सकरुणं
तस्यात्मनोऽहेमिति निर्व्यलीकं निष्कपटं तद्वमिति समं पक्षपातशून्यं मारीरिदिति दुःखसाम्यं महत्त्वेः कोपितमिति
निष्ठुरात्वया हितोपदेशात् एवंभूतंराज्ञः वचः हेद्विजाः प्रत्यनंदन् अनुमोदितवान् नकुलादयश्च प्रत्यनंदन् युयुधानः ४७
स्य १ सात्यकिः ४५ तस्यतथाविधस्यद्रोणः वधएवश्रेष्ठः अन्यथाऽनरकपातप्रसंगात् नदाहन भवतुरिति अहन् जघान ४६ चतुर्भुजोक्तेरपंभा

येः कोपितैर्ब्रह्मकुलैराजन्यैरजितात्मभिः तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ४४ सूत उवाच धर्म्यं न्याय्यं सकरुणं निर्व्यलीकं
समं महत् राजाधर्मसुतोराज्ञ्याः प्रत्यनंदद्वचोद्विजाः नकुलः सहदेवश्च युयुधानो धनंजयः भगवान्देवकीपुत्रो ये चान्ये याश्च
योषितः ४५ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः नभर्तुर्नात्मनश्चार्थे योऽहन्सुप्तान् शिशून्वृथा ४६ निशम्यभीमग
दितंद्रौपद्याश्च चतुर्भुजः आलोक्यवदनंसख्युरिदमाहहसन्निव ४७ श्रीभगवानुवाच ब्रह्मबंधुर्नहंतव्यआततायीवधार्हणः
मयैवोभयमाम्नातं परिपाह्यनुशासनं ४८ कुरुप्रतिश्रुतं सत्यं यत्तत्सांत्वयताप्रियां प्रियं च भीमसेनस्य पांचाल्यामह्यमेव च
४९ सूत उ० अर्जुनः सहसाऽऽज्ञायहरेर्हार्दमथासिना मणिं जहार मूर्धन्यं द्विजस्यसहमूर्धजं ५० विमुच्यरसनाबद्धं बालह
त्याहतप्रभं तेजसामणिनाहीनं शिबिरान्निरयापयत् ५१ वपनंद्रविणादानं स्थानान्निर्यापणंतथा एषहि ब्रह्मबंधूनां
वधोनान्योस्तिदैहिकः ५२ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ५३ इति
श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां वैयासिक्यां महापुराणे प्रथमस्कंधे सप्तमोऽध्यायः ७ श्रीहरिः

वः भीमेनहंतुंप्रवृत्ते द्रौपद्यां च सहसातन्निवारणे प्रवृत्तायामुभयोः संवारणायाविष्कृतचतुर्भुजइतिसंदिहानस्य सख्युरर्जुनस्य
४७ वधार्हणः वधार्हः मयैवशास्त्रकृता ब्राह्मणो न हंतव्यइति तथा आततायिनमायांतमपिवेदांतपारगं जिघांसंतंजिघांसीयान्नतेन
ब्रह्महा भवेदितिचवदता तदुभयमप्यनुशासनं परिपालय ४८ तवचप्रतिज्ञापूरयेत्याह प्रियां सांत्वयता त्वया यत्प्रतिश्रुतं हननं त
चसत्यंकुरु प्रियंचकुरु मह्यंमम तच्चैव धे भीमस्य प्रियं भवति अवधे द्रौपद्याः ह यश्रीकृष्णस्य ४९ हार्दं अभिप्रायं आज्ञाय ज्ञात्वा
स्वशाकमुभयं विदध्यात् अतोयमभिप्रायइतिज्ञात्वेत्यर्थः असिनाखड्गेन मूर्धन्यं मूर्ध्नि जातं सह मूर्धजं सकेशं ५० मणिना च हीनं निर

३३

सात्यकिः सावधान ४५ अनेन श्लोके प्रो... न्यायं सकरुणं निर्व्यलीकं ... ५३ ...

राम
३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमे कुपिताद्द्रौणेरस्त्राद्रक्षा परीक्षितः । श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते १ ते पांडवाः संपरेतानां मृतानां गंगायामुदकं दातुं
सकृष्णाः श्रीकृष्णेन सहिताः स्त्रियः स्त्रीः पुरस्कृत्य अग्रतः कृत्वा तस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात् १ निनीयेति दत्वा हरिपादाब्जर
जोभिः पूतायाः सरितः गंगायाः जले पुनर्ग्रहणात् आदावपि स्नानाद् निगम्यते ३ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं ॥
मुनिभिः सहितः ३ कितवैर्धूर्तैर्दुर्योधनादिभिः द्रौपद्याः कचग्रहणादिना क्षतेन नष्टमायुर्येषां तान् घातयित्वेत्यादि भाविकथासंक्षेपः ४ श
तमन्योः शतक्रतोरिव ४ सैनयः शिनेर्नप्ता सात्यकिस्तेन चोद्धवेन संयुतः रथमास्थितः सन् उत्तरां परीक्षिन्मातरं अभिमुखं धावंतीं उपल

सूत उवाच अथ ते संपरेतानां स्वानामुदकमिच्छतां दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः १ ते निनीयोदकं सर्वे विलप्य च भृशं
पुनः आप्लुता हरिपादाब्जरजःपूतसरिज्जले २ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माध
वः सांत्वयामास मुनिभिर्हतबंधून् शुचार्पितान् भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां ३ साधयित्वाऽजातशत्रोः स्वं राज्यं
कितवैर्हृतं घातयित्वाऽसतो राज्ञः कचस्पर्शक्षतायुषः याजयित्वाऽश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः तद्यशः पावनं दिक्षु
शतमन्योरिवातनोत् ४ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः गंतुं कृतमतिर्ब्र
ह्मन्द्वारकां रथमास्थितः उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां ५ उत्तरोवाच पाहि पाहि महायोगिन्देवदेव जगत्प
ते नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ६ अभिद्रवति मामीश शरस्तप्तायसो विभो कामं दहतु मां नाथ मा मे गर्भो निपात्यतां
७ सूत उवाच उपधार्य वचस्तस्या भगवान्भक्तवत्सलः अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ८ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः
पंच सायकान् आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाद्रवन् ९ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां सुदर्शनेन स्वास्त्रे
ण स्वानां रक्षां व्यधाद्विभुः १० अंतःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः स्वमाययाऽवृणोद्गर्भं वैराट्याः कुरुतंतवे ॥११॥

भेददर्शी ५ उत्तरा श्रीकृष्णं प्रार्थयते पाहि पाहीति द्वाभ्यां अन्यस्य प्रार्थनायोग्यताभावमाह त्वत् त्वत्तः अन्यं अभयं भयरहितं न पश्यामि यत्र लो
के परस्परं मृत्युर्भवति ६ तत्र प्रस्तुतं भयमावेदयति अभिद्रवति अभिमुखमायाति तप्तमायसं लोहमयं शल्यं पश्य पश्य अतिकार्पण्यमाह
कामम् इति काममयं यथेष्टं ७ पराभवेनातिकुपितस्य द्रौणेः अपांडवं पांडवशून्यं इदं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्यत ८ अत एव बहुमुखं तदागतानि
त्याह तर्हीति ९ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात् तद्दुःपरिहारं व्यसनं वीक्ष्य अनन्यविषयस्य आत्मा येषां स्वैकनिष्ठानामित्यर्थः १० वैराट्या उ
त्तरायाः अंतःस्थः सन् गर्भमावृतवान् तत्र हेतुः यतः आत्मा अंतर्यामी योगेश्वर इति बहिःस्थस्यापि प्रवेशाघटनार्थं मुक्तं कुरूणां तंतवे संतानाय पांड

भागवतटीका अष्टमः ८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमोघमप्रतिक्रियं च समं शाम्यतु संशांतमासीत् १२ एतद्ब्रह्मास्त्रशमनं आश्चर्यं मामंस्थाः मामनुस्व १३ कृष्णमपाद्द्रौपद्यासह १४ त्वा त्वां नमस्ये नमस्क
रोमि ननु कुतो निष्कं मां कथं नमस्करोषि तत्राह आद्यं पुरुषं कुतः प्रकृतेः परं तत्कुतः ईश्वरं प्रकृतेरपि नियंतारं अत एव सर्वभूतानामंतर्बहिश्च
पूर्णत्वेनावस्थितं तथाप्यलक्ष्यं तत्र हेतुः मायैव यवनिका तिरस्कारिणी तया आच्छन्नं प्रतिच्छन्नं अतोऽहमज्ञा कैवलं त्वां नमस्यामि अधः अक्ष
जेंद्रियजं ज्ञानं यस्मात्तं अव्ययं अपरिच्छिन्नं १५ तत्प्रपंचः मूढदृशा देहाभिमानिना पुंसा त्वं न लक्ष्यसे किंच परमहंसानामात्मविवेकिनां
मुनीनां मननशीलानामपि तत्र आमलात्मनां निवृत्तरागादीनामपि तथा तेन निजमहिम्ना न लक्ष्यसे अतो भक्तियोगं विधातुं त्वां वयं स्त्रि
यः कथं हि पश्येम यद्वा परमहंसानामपि भक्तियोगविधानार्थं त्वां आत्मारामाणामपि अचिंत्यनिजगुणैराकृष्य भक्तियोगं विधातुं कार

यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियं वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह १२ मामंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते य
इदं मायया देव्या सृजत्यवति हंत्यजः १३ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती १४
कुंत्युवाच नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परं अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं मायाजवनिकाच्छन्नमज्ञाधोक्षज
मव्ययं १५ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा तथा परमहंसानां मुनीनाममलात्मनां भक्तियोगविधानार्थं कथं प
श्येम हि स्त्रियः १६ कृष्णाय वासुदेवाय देवकीनंदनाय च नंदगोपकुमाराय गोविंदाय नमो नमः १७ नमः पंकजनाभा
य नमः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये १८ यथा हृषीकेश खलेन देवकी कंसेन रुद्धाऽतिचिरं
शुचार्पिता विमोचिताऽहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् १९ विषान्महाग्नेः पुरुषाददर्शनादसत्स
भाया वनवासकृच्छ्रतः मृधे मृधेऽनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः २० विपदः सन्तु नः शश्वत्तत्र तत्र
जगद्गुरो भवतो दर्शनं यत्स्यादपुनर्भवदर्शनं २१

यितुमवतीर्णमित्यर्थः १६ ज्ञानभक्त्यारवाक्यत्वमुक्त्वा पुनः केवलं नमस्करोति श्रीकृष्णायेति द्वाभ्यां १७ पंकजं नाभौ यस्य पंकजानां माला अस्ति यस्य
पंकजवत्प्रसन्ने नेत्रे यस्य पंकजांकितौ अंघ्री यस्य तस्मै १८ तत्कृतोपकारान् स्मरति यथेति द्वाभ्यां अयमर्थः मातृतोऽपि मय्यधिका तव प्रीतिः
तथाहि हे हृषीकेश यथा देवकी कंसेन रुद्धा त्वया विमोचिता अहं च तथैव किं विमोचितेति का कथा महान् विशेषः उक्तं तद्दर्शयति सा अति
चिरं रुद्धा सती तस्माद्देवसरुद्धि मोचिता तथा च शुचार्पिता च सती न च तस्याः पुत्रा रक्षिताः अस्ति चान्यो नाथस्तस्याः अहं तु विपद्गणा
त् तत्रापि मुहुः शीघ्रं च सात्मजा च त्वयैव च नाथेनेति १९ विपद्गणमेव दर्शयति विषादिति भीमस्य विषमोदकेनात् महाग्नेः जतुगृहदाहात्
पुरुषादा हिडिंबादयो राक्षसाः तेषां दर्शनात् असत्सभायाः द्यूतस्थानात् अभितो रक्षिताः आस्म अभवाम २० यत्र यासु विपत्सु कीदृशं दर्श

भक्तियोगानाम नाम ४

नाभिपुनरपि भवदर्शनं यस्मात् १९

संपदस्तु श्रेयः परिपंथिन्य इत्याह जन्मसत्कुले जन्मादिभिरेधमानो मदो यस्य सः अभिधातुं कृष्ण गोविंदेति वक्तुमपि अकिंचनानां गोचरं वि
षयभूत २२ अस्माकं च मनोरथपूरणाय प्रणमति अकिंचना भक्ता एव वित्तं सर्वस्वं यस्य तस्मै ततः किं निवृत्ता गुणवृत्तयो धर्मार्थकामविषया यस्मा
त्तस्मै कुतः आत्मारामाय तत्कुतः शांताय रागादिरहिताय किंच कैवल्यपतये कैवल्यं दातुं समर्थाय २३ ननु देवकीपुत्रं मां कथमेवं स्तोषि
तत्राह मन्ये त्वां कालं ननु देवकीपुत्रं तत्र हेतवः ईशानं यं नियंतारं अनादिनिधनं आद्यंतशून्यं विभुं प्रभुं समं यथा भवति तथा सर्वत्र चरंतं
ननु पार्थसारथेः कथं मम साम्यं तत्राह यद्यपि त्वत्तो निमित्तभूताद्भूतानामेव मिथः कलिः कलहो भवति न तु त्वत्तः त्वयि वैषम्यं २४ ननु निग्र
हानुग्रहरूपमपि प्रसिद्धं वैषम्यं अत आह न वेदेति नृणां विडंबनमनुकरणमीहमानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिर्नु ग्रहनिग्रहरूपा

नि २

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान् नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरं २२ नमोऽकिंचनवित्ताय निवृत्तगुणवृत्तये
आत्मारामाय शांताय कैवल्यपतये नमः २३ मन्ये त्वां कालमीशानमनादिनिधनं विभुं समं चरंतं सर्वत्र भूतानां यन्मिथः कलिः २४
न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां
२५ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः तिर्यङ्नृषिषु यादस्सु तदत्यंतविडंबनं २६ गोप्याददे त्वयि कृतागसि दाम
तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति
२७ केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये यदोः प्रियस्यान्ववाये मलयस्येव चंदनं अपरे वसुदेवस्य देवक्यां याचि
७२ तोऽभ्यगात् अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषां भारावतारणायान्ये भुवो नाव इवोदधौ सीदंत्या भूरिभारेण जातो ह्या
त्मभुवाऽर्थितः भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः श्रवणस्मरणार्हाणि करिष्यन्निति केचन २८

पा भवति २५ अजस्य जन्म अकर्तुः कर्म तिर्यक्षु वराहादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण यादस्सु मत्स्यादिरूपेण २६ नरविडंबनमत्या
श्चर्यमित्याह गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावत्तदाम रज्जुमाददे जग्राह तावत्तत्क्षणमेव ते या दशा अवस्था सा मां वि
मोहयति किंभूतस्य अश्रुभिः कलिलं व्याप्तमंजनं ययोस्ते चंचले संभ्रमव्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं निनीय अधः कृत्वा ताडयिष्यतीति भय
स्य भावनया स्थितस्य यत् यतस्त्वत्तः भीरपि स्वयं बिभेति तस्य ते दशा २७ अत एव जगन्मोहमयत्वाद्दुर्ज्ञेयत्वात्तव जन्मादि बहुधा वर्णयंतीत्याह
केचिदिति चतुर्भिः पुण्यश्लोकस्य प्रियस्य युधिष्ठिरस्य कीर्तये यदोरन्ववाये यदुरिति वा मलयस्य कीर्तये वंशे वा चंदनं यथा तथा वसुदेवस्य देवक्यां
भार्यायां अज एव त्वमभ्यगात् पुत्रत्वमिति शेषः प्रथमपुरुषस्त्वार्षः अभेत्यमिति पाठः सुगमः ताभ्यामेव पूर्वं सुतपः पृश्निरूपाभ्यां याचितः सन् अ
स्य जगतः क्षेमाय अभवेति प्रसिद्धप्रार्थनस्य प्राधान्यविवक्षया मतांतरं परमानंदस्वरूपाज्ञानमविद्या ततो देहाद्यभिमानात्कामः ततः कर्म

२८ [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्याः परस्य सिद्धांततामभिप्रेत्य श्रवणादिफलमाह शृण्वंतीति नंदंति श्रेयेक्रीत्यमानमभिनंदंति चेयजनाः ईहितं चरितं तावकं त्वदीयं पदांबु
जं त एव पश्यंत्येव अचिरेणैवेति सर्वत्रावधारणं कीदृशं भवप्रवाहस्य जन्मपरंपराया उपरमो यस्मिन् तत् २९ इदानीं त्वत्तो वास्मत्परित्यागा
नुचित इत्याशयेनाह अपीति चतुर्भिः हे प्रभो सुहृदोऽनुजीवनश्च नोऽद्य अपि स्वित् किंस्वित् त्वं जिहाससि येषामस्माकं अन्यत्परायणं ने
वास्ति कुतः राजसु योजितमंहो दुःखं यैस्तेषां स्वानां कृतमीहितं येन हे स्वकृतेहित येन तस्य संबोधनं विसर्गोति पाठे त्वंपदविशेषणं ३० ननु गत
बंधवा यादवाः पुत्राश्च पांडवाः शूराः समर्थाश्च न त्विकापेण्य भापसे अत आह के वयमिति यर्हि भवतोऽदर्शनं यदा त्वमस्मान्न पश्यसि तदा ना
म्नाविख्यात्या रूपेण सम्यग्भावयदुभिः सहिताः पांडवानामकेवयं न के पि अनिगुर्व्छा इत्यर्थः हृषीकाणामीशितुर्जीवस्यादर्शने यथान

शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजं २९
अप्यद्य नस्त्वं स्वकृतेहितः प्रभो जिहाससि स्वित्सुहृदोऽनुजीविनः येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजि
तांहसां ३० के वयं नामरूपाभ्यां यदुभिः सह पांडवाः भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः ३१ नेयं शोभिष्यते त
त्र यथेदानीं गदाधर त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः ३२ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः वना
द्रिनद्युदन्वंतो ह्येधंते तव वीक्षिताः ३३ अथ विश्वेश विश्वात्मन्विश्वमूर्ते स्वकेषु मे स्नेहपाशमिमं छिंधि दृढं पांडुषु
वृष्णिषु ३४ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ३५ श्रीकृष्ण कृष्ण
सखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोद्विजसुरार्तिहरावतार योगेश्वराखिलगुरो भगवन्नमस्ते ३६

किंचिन्नामरूपं च न दृश्यते ३१ किंच यथेदानीमियमस्मत्पाल्या भूमिः स्वैरं साधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैश्चिह्नितैस्त्वत्पदैरंकिता
सती भाति न तत्र तदा त्वयि निर्गते सति न शोभिष्यते ३२ अपि च इमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः सतः ३३ गमनं पांडवानामकुशलं अ
गमने च यादवानामित्युभयतो व्याकुलचित्ता सती तेषु स्नेहनिवृत्तिं प्रार्थयते अथेति विश्वेशेत्यादि संबोधनानि स्नेहछेदसामर्थ्यख्याप
नाय दृढं संतं ३४ ततः किमत आह त्वयीति अनन्यविषया सती मम मतिः रतिमुद्वहतात् अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः ओघं पूरं यथा
गंगा अप्रतिबंधं गमयति एवं मतिरपि विघ्नान्न गणयत्विति भावः ३५ एवमभ्यर्थ्य पुनः प्रणमति हे कृष्ण तुभ्यं नमः उपकारान् अनुस्मरंती बहु
धा संबोधयति कृष्णसख अर्जुनस्य सखे वृष्णीनामृषभ श्रेष्ठ अवनेर्ध्रुहो ये राजन्यास्तेषां वंशस्य दहन एवमप्यनपवर्गवीर्य अक्षीण
प्रभाव गोविंद प्राप्तकामधेन्वैश्वर्य गोद्विजसुराणामार्तिहरोऽवतारो यस्येति ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्यानिमधुराणिपदानियस्तुतेर्वाक्यैः। परिणूतोऽखिलउदयोमहिमायस्यसः। शुस्केनावित्यस्मात् परिणुतेतिवक्तव्येदीर्घश्छंदोऽनुरोधेन मंदमी
षत् जहासएवमायावक्ष्यतीतिहि हासोजनोन्मादकरीचमायेति ३७ ततःयिमेऽनन्यविषयामतिरितियत्प्रार्थितं तद्वाढमित्युपगाह्य रथस्थाऽऽ
जाह्वयंप्रत्यागत्य पश्चात्तांचान्याश्चसुभद्राप्रमुखाः। स्त्रियः उपामंत्र्यानुज्ञाप्यस्वपुरंयास्यन्नु राज्ञायुधिष्ठिरेणप्रेम्णाऽत्रैवकिंचित्कालंनिवस
तेतिसंप्रार्थ्यनिवारितः। ३८ अथभीष्मनियाणोत्सवंवक्तुमुपोद्घातकथांप्रस्तौति व्यासाद्यैः। प्रबोधितोऽपिशुचार्पितः। व्यासः। सन्नावुद्भुत
विवेकेनप्रपकुतः। ईश्वरेहायाश्रेशे। स्वभक्तभीष्मनियाणमहोत्सवायराज्ञासहकुरुक्षेत्रंगंतव्यमत्रतन्मुखेनापप्रबोधनीयइतिईश्वराभि
प्रायः। कार्यद्वयंविधायकोस्तेमजानन्निरित्यर्थः। श्रीकृष्णेनापिप्रबोधितोनाबुध्यत अत्रहेतुः अद्भुतकर्मणेति यथाकुरुपांडवसंधाना

सूतउवाच पृथयेत्थंकलपदैः। परिणूताखिलोदयः। मंदंजहासवैकुंठोमोहयन्निवमायया ३७ तांबाढमित्युपामंत्र्यप्रविश्यग
५२ जसाह्वयं स्त्रियश्चस्वपुरंयास्यन्प्रेम्णाराज्ञानिवारितः। ३८ व्यासाद्यैरीश्वरेहाज्ञैःकृष्णेनाद्भुतकर्मणा प्रबोधितोपीतिहासै
र्नाबुध्यतशुचार्पितः। ३९ आहराजाधर्मसुतश्चिंतयन्सुहृदांवधं प्राकृतेनात्मनाविप्राःस्नेहमोहवशंगतः। ४० अहोमेपश्य
ताज्ञानंहृदिरूढंदुरात्मनः। पारक्यस्यैवदेहस्यबह्व्योमेऽक्षौहिणीर्हताः। ४१ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः।
नमेस्यान्निरयान्मोक्षोह्यपिवर्षायुतायुतैः। ४२ नैनोराज्ञःप्रजाभर्तुर्धर्मयुद्धेवधोद्विषां इतिमेनतुबोधायकल्पतेशासने
वचः। ४३

र्थंगतापियथाचित्तमेववदन्नापिविग्रहमेवदृढीकृतवान् एवमत्रापिप्रबोधयन् अबोधमेवदृढीचकारेत्यर्थः। ३९ अबोधमेवप्रपंचय
ति आहेतिषड्भिः प्राकृतेनअविवेकव्याप्तेन आत्मनोचित्तेनहेविप्राः। ४० पारक्यस्य शृगालाद्याहारस्यदेहस्यार्थेमेमया अक्षौहिणी॥
अक्षौहिण्यः अक्षौहिणीप्रमाणंव्यासेनोक्तं अक्षौहिणीप्रसंख्यानारथानांद्विजसत्तमाः। संख्यागणनतत्वज्ञैः सहस्राण्येकविंशतिः। श
तान्युपरिचैवाष्टौतथाभूयश्चसप्ततिः २१८७० गजानांचप्रसंख्यानमेतदेवप्रकीर्तितं। २१८७० ज्ञेयंशतसहस्रंतुसहस्राणिनवैवतु नरा
णामपिपंचाशच्छतानित्रीणिचैवहि १०९३५० पंचषष्टिसहस्राणितथाऽश्वानांशतानिच दशोत्तराणिषट्प्राहुःसंख्यातत्वविदोजनाः ६५६१०
एतामक्षौहिणींप्राहुर्यथावदिहसंख्ययेति ४१ सुहृदः संबंधिनः मित्राणिसखायः पितरः। पितृव्याः ४२ द्विषांवधः एनः। पापंभवतीतिय
च्छासनंशिक्षारूपंवचः कृतंतनकल्पते यतस्तद्वचः प्रजाभर्तुरेव अयंभावः। स्वप्रजानामन्यतोवधप्रसक्तौतद्वधोऽनुज्ञातः। दुर्योधने
नतुप्रजायांपाल्यमानायांमेयाकेवलंराज्यलोभेनहतत्वात्पापमेवेदंजातमिति ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच युद्धे पुंसां वधो भवतु नाम धर्मः। स्त्रीणां तु मया हतानां बांधवी यासां तासां योऽसौ द्रोहोऽनुद्दिष्टोऽप्युत्थितः। तं व्यपोहितुं अपकर्तुं कल्पः। समर्थो ना
हं गृहमेधीयैर्गृहमेधीयैर्गृहाश्रमविहितैः ४४ ननु च सर्वपाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति श्रुतेः। पापम
श्वमेधेन न शक्यं देवत्याशंक्याविवेकविजृंभितं हेतुवादमाश्रित्य निराकरोति यथा घनं पंकेन पंकांभो न मृज्यते यथा वा सुरालेशाकृत
मपावित्र्यं बह्व्या सुरया न मृज्यते तथैवभूतहत्यामेकां प्रमादतो जातां बुद्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ४५ इति श्रीभाग
वतटीकायां प्रथमेऽष्टमः। युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणं कृष्णभक्तानि आप्रमुक्ति अनवं मतस्य वर्ण्यते यदर्थं तस्याऽविवेकः। श्रीकृष्णमन

स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः। कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ४४ यथा पंकेन पंकांभः सुरया वा
सुराकृतं भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ४५ इति श्रीभागवते महापुराणे प्रथमस्कंधे कुंतीस्तुतिर्युधिष्ठिरानुतापो नामा
ष्टमोऽध्यायः। ८ सूत उवाच इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् १ तदा
ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तथा २ भगवानपि विप्रर्षे रथेन सधनं
जयः स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ३ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं प्रणेमुः पांडवा भीष्मं सानुगाः सह च
क्रिणा ४ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम राजर्षयश्च तत्रासन्द्रष्टुं भरतपुंगवं ५ पर्वतो नारदो धौम्यो भगवान्बादरा
यणः। बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ६ वसिष्ठ इंद्रप्रमदस्त्रितो गृत्समदोऽसितः। कक्षीवान्गौतमोऽ
त्रिश्च कौशिकोऽथ सुदर्शनः ७ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः। शिष्यैरुपेता आजग्मुः कश्यपांगिरसादयः ८
तान्समेतान्महाभागानुपलभ्य वसूत्तमः। पूजयामास धर्मज्ञो देशकालविभागवित् ९ कृष्णं च तत्प्रभावज्ञ आसीनं
जगदीश्वरं हृदिस्थं पूजयामास मायया पात्तविग्रहं १० पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान्। अभ्याच

२५

संवर्द्धितस्त्रद्दर्शयति इतीति सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः १ सं तैः अश्वाः अश्वीयसुत्तरथैः २ तत्र
तदा तत्रासन् तत्क्षणमेवागता इत्यर्थः। भरतपुंगवं भीष्मं ५ रेणुकासुतः परशुरामः। ६ ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ८ वसूत्तमो भीष्मः
हृदिस्थं संतं पुरतश्चासीनं पूजयामास ९ उपासीनान्समीप उपविष्टान्। प्रश्रयो विनयः। प्रेम स्नेहः। ताभ्यां संगतानुपसन्नान् पांडवांस्तत्राभ्याम
वनतान् अभ्याचष्ट अभ्यभाषत अनुरागास्रैः अश्रुभिरंधीभूतेन चक्षुषोपलक्षितः इदं दर्शनीयत्वा ११

राम २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिभाषणमाह अहो इत्येकादशभिः हे धर्मनंदनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ यूयं इति यत् एतत् अहो कष्टं जुगुप्सितं अहो अन्याय्यं
चैतत् यतो यूयं विप्राः धर्मोऽच्युतश्चाश्रयो येषां ते १० किंच संस्थिते मृते बालाः प्रजाः पुत्राः यस्याः सा वधूः अथ निर्दिन्यद्विर्तितं तोकान्यप
त्यानि तद्वती अपत्यैः सह क्लेशान्प्राप्तेत्यर्थः ११ कालकृतत्वेन शोकं वारयति सर्वमिति द्वाभ्यां भवतामपि यद्वशे यस्य वशवर्त्ती १२ अहो ह
८ यद्यनापदः कालइत्याह यत्रेति कृष्णोऽर्जुनः अस्त्री धन्वी ततः तत्रापि विपत् पुण्यशरीरबलं शस्त्रे नैपुण्यं शस्त्रे देवतासंपन्नावपीत्यर्थः
१३ ननु कृष्णः कथं कालोऽतिक्रम्य इत्यपेक्षायामाह नह्यस्य श्रीकृष्णस्य चेष्टां गुरुत्वान्न दिशति विधित्सितं कर्तुमिष्टं यस्य विधित्सितस्य जि

अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनंदनाः जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः १० संस्थितेऽतिरथे पांडौ पृथा बाल
प्रजावधूः युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः ११ सर्वं कालकृतं मन्ये भवतां च यदप्रियं सपालो यद्वशे लोको
वायोरिव घनावलिः १२ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः कृष्णोऽस्त्री गांडिवं चापं सुहृत्कृष्णस्ततो विपत् १३
नह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं यद्विजिज्ञासया युक्ता मुह्यंति कवयोऽपि हि १४ तस्मादिदं दैवतंत्रं व्यवस्य
भरतर्षभ तस्यानुविहितोऽनाथाः नाथ पाहि प्रजाः प्रभो १५ एष वै भगवान्साक्षादाद्यो नारायणः पुमान् मोह
यन्मायया लोकं गूढश्चरति वृष्णिषु १६ अस्यानुभावं भगवान्वेद गुह्यतमं शिवः देवर्षिर्नारदः साक्षाद्भगवान्क
पिलो नृप १७ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमं अकरोः सचिवं दूतं सौहृदादथ सारथिं १८

ज्ञासया १४ इदं सुखादिदैवतं ईश्वराधीनं व्यवस्य निश्चित्य तस्येश्वरस्यानुविहितः अनुवर्तमानः कर्त्तेरितः हे नाथ कुलपरंपराग
तस्वामिन् प्रभो समर्थ अनाथाः प्रजाः पाहि १५ अनुविधेयः परमेश्वरस्य श्रीकृष्ण एवेत्याह एष एव भगवान्सर्वेश्वरः यतः आद्यः
पुमान् तच्च कुतः यतो नारायणः साक्षात् १६ तदुपपादयति अस्येति अनुभावं प्रभावं १७ त्वमज्ञानात् यमेवं मन्यसे मातुले
यं मातुल्या देवक्याः सुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्तारं सुहृत्तमं उपकारानपेक्षोपकारकं च सौहृदाद्विश्वासात् अकरोः
कृतवानसि सचिवं मंत्रिणं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रापि हेतुः २

नन्वीश्वरस्य कथं नीचसारथ्यो दोषप्रसङ्गस्तत्राह सर्वेति तत्कृतं नीचोच्चकर्मकृतं ममायं परोऽयमिति मतेर्वैषम्यं क्वचिदपि नास्ति कुतः निरव
द्यस्य रागादिशून्यस्य तत्कुतः अनहंकृतेः तच्च कुतः अद्वयस्य तदपि कुतः समदृशः सर्वस्यात्मनः यथोक्तं वा हेतुहेतुमद्भावः १९ तथापि स
मत्वेऽपि हे भूप अनुकम्पितं अनुकम्पा २० इदानीं स्वदेहत्यागपर्यन्तं श्रीकृष्णावस्थानं प्रार्थयते भक्त्येति द्वाभ्यां यावदिति विलम्बं यानय
ति अहं हिनोमि त्यजामीति स्वातन्त्र्यं इदमित्यनात्मत्वं ज्ञातं प्रसन्नहासेन अरुणे लोचनाभ्यां च उल्लसद्रुचिरं मुखाम्बुजं यस्य
ध्यानस्य पन्था विषयः योऽन्यैश्चिरं त्यक्तकलेवरे सोऽयं स्थितः सन्मां प्रतीक्षतामित्यर्थः २१ तस्यानुकम्पं वाक्यमाकर्ण्य २२ पुरुषस्वभा

दृश मति

सर्वात्मनः समहृशो ह्यद्वयस्यानहंकृतेः तत्कृतं वैषम्यं निरवद्यस्य न क्वचित् १९ तथाप्येकान्तभक्तेषु पश्य भूपानुकम्पितं यन्मेऽसूंस्त्य
जतः साक्षात्कृष्णो दर्शनमागतः २० भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् त्यजन्कलेवरं योगी मुच्यते कामक
र्मभिः सदेवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्या
नपथश्चतुर्भुजः २१ सूत उवाच युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे अपृच्छद्विविधान्धर्मानृषीणामनुशृण्वतां
२२ पुरुषस्वभावविहितान्यथावर्णं यथाश्रमं वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् दानधर्मान्राजध
र्मान्मोक्षधर्मान्विभागशः स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने
नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् २३ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः यो योगिनश्छन्दमृत्योर्वाञ्छि
तस्तूत्तरायणः २४ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपुरुषे कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेऽमी
लितदृग्व्यधारयत् २५

२६ भावेन विहितान् नरजातिसाधारणान् वर्णयामासेति तृतीयेनान्वयः यथावर्णं वर्णधर्मान् यथाश्रमं
आश्रमधर्मांश्च वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् १ पुनस्तत्रैव विशेषमाह दानेति मो
क्षधर्मान् शमदमादीन् भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपान् समासव्यासौ संक्षेपविस्तारौ ताभ्यां योगो उपायो ताभ्यां
धर्मादींश्च यथाऽधिकारं प्रतिनियतोपायसहितान् यथायथावत् नानाख्यानेषु यद्इतिहासाः तेषु यथा सन्ति तथा वर्णयामास तु २३
छन्दतः स्वेच्छया मृत्युर्यस्य तस्य २४ सहस्रणीः युद्धसमीपस्थान्सहस्ररथिनो नयति पालयतीति सहस्रणीः भीष्मः सहस्रिणीरिति पाठे सहस्रार्थवती २६

गिरः लसत्पीतपटे [illegible] धारयत् २६

अनेनैव विशुद्धया धारणया हतमशुभं अशुभं यस्य सः तस्य श्रीकृष्णस्य ईक्षया कृपादृष्ट्यैव गता आयुधव्यथा यस्य सः अत एव निवृत्ताः सर्वेंद्रियवृत्तीनां वि
भ्रमः विविधं भ्रमणं यस्मात् सः जन्यं देहं ३१ परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतं मर्पयति इति नाना धर्मोपायैर्मनि
मैनो धारणलक्षणा उपकल्पिता समर्पिता क्व सात्वतानां पुंगवश्रेष्ठ भगवति वितृष्णा निष्कामा अपितृष्णा निवाक्ष्यदः अविकृतेत्यर्थः विग
तो भूमा यस्मात् तस्मिन् यमेव पक्ष्यान्यत्र महत्वेनास्तीत्यर्थः तदेव परमैश्वर्यमाह स्वसुखं स्वरूपभूतपरमानंदमुपगते प्राप्तवत्येव क्वचित्का
ले वितृं विहर्तुं क्रीडितुं प्रकृतिमुपयुषि स्वीकृतवति ननु स्वरूपतिरोधानेन जीववत् पारतंत्र्यमित्यर्थः विहर्तुमित्युक्तं तत्प्रपंचयति यद्यतः
प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति ३२ विजयसखिरतिमेवानुवर्णयन् त्रिभिः प्रार्थयते युधि युद्धे तुरगाणां खुरजं रजः तेन विधूम्रा
धूसरा अलकाश्च तेन विश्वक् व्याप्ता श्रमतः कचाः कुंतलाः तैर्लुलितं विकीर्णं श्रमवारि स्वेदबिंदुरूपं तेन भक्तो वात्सल्यदानेनालंकृतं मा

विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जंन्यं जनार्दनं ३१ श्रीभीष्म उवाच यं विसृज
इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ३२
त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ३३
ग युधि तुरगरजो विधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण
आत्मा ३४ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य स्थितवति परसैनिकायुरक्ष्णा हृतवति
पार्थसखे रतिर्ममास्तु ३५

यस्य तस्मिन् श्रीकृष्णे आत्मा मनोऽस्तु रमतामित्यर्थः पुनः किंभूते मदीयैर्निशितैस्तीक्ष्णैः शरैः विभिद्यमाना त्वक् यस्य शरैर्विलसत् त्रुटि
तकवचं यस्य तस्मिन् ३४ इदानीं श्रीकृष्णं निर्वर्णयन् तत्र गिं प्रार्थयते त्रिभुवनकमनं त्रिलोक्यां कमनीयं तत् वपुर्दधाने रतिर्मेऽस्तु कथंभूतं व
पुः तमालवत् नीलो वर्णो यस्य तत् प्रातःकालीनारवेः कराइव स्वच्छ एवं गौरे पीते अंबरे निर्मले अंबरे यस्मिन् तत् अलककुलैः कृपयावृत
तमाननाब्जं यस्मिन् तत् विजयसखे पार्थसारथौ अनवद्या अहेतुकी फलाभिसंधिरहिता रतिरस्तु ३३ किंच सपदि ति सेनयोरु
भयोर्मध्ये रथं स्थापय मेऽच्युत यावदेतान्निरीक्षेहं योद्धुकामानवस्थितानिति सखुरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव स्वपरबलयोः
सैन्ययोर्मध्ये स्थिते पार्थसखे रतिरस्तु तत्र स्थित्वा कृतं संख्यं दर्शयति परस्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति असौ
भीष्मः असौ द्रोणः असौ कर्ण इति तत्र तत्र प्रदर्शनव्याजेन दृष्ट्यैव सर्वेषामायुरा अर्जुनस्य जयं कृतवति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० प्र०

नैकेवल्लमर्जुनस्य सपत्न्यासुदर्शनेनैव जंमावहतु किंत्वविद्याहरणे पीत्याह व्यवहितादूरे स्थितायाःपृतनानास्यामुखमभिमुखे अग्रे स्थिताभी
क्ष्माहो निरीक्ष्येत्यर्थः स्वजनवधाद्विमुखस्य निरंतरस्य तदुक्ते गीतासु एवमुक्तार्जुनः संख्ये रथोपस्थउपाविशत् विसृज्य सशरं चापं शो
कसंविग्नमानस इति कुमतिं अहं हनिष्यामीत्यादि कुबुद्धिं ३६ ममत्वमहांत अनुग्रहं कृतवानित्याह द्वाभ्यां स्वनिगमं अशस्त्र एवाहं साहाय्यमा
२७ चरिष्यामीत्येवंभूतां स्वप्रतिज्ञां हित्वा श्रीकृष्णस्तु शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञां ऋतं सत्यं यथा भवति तथा अधि अधिकां क
र्तुं यो रथस्थः सन्नवप्लुतः सहसैवावतीर्णः अवप्लुतः सन्योऽभ्ययात् अभिमुखमधावत् इभं हंतुं हरिः सिंह इव किंभूतः धृतः रथ
चरणः चक्रं येन सः तदा च संरंभेण मानुष्यनाट्यविस्मृतेरुदरस्य सर्वभूतभुवनभारेण प्रतिपदं चलन्ती गौः पृथ्वी यस्मात् तेने

व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुध्या कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु
३६ स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हंतुमि
भं गतोत्तरीयः शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे प्रसभमभिससार मद्वधा
र्थं स भवतु मे भगवान्गतिर्मुकुंदः ३८ विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये भगवति र
मु। तिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः सरूपं ३९

वसंरंभेण पथि गतं पतितमुत्तरीयवस्त्रं यस्य सः मुकुंदो मे गतिर्भवत्वित्युत्तरेणान्वयः एवं यदाभ्ययात्तदा स्मयमानस्याततायिनो धन्वि
नो मे शितैस्तीक्ष्णैर्विशिखैर्हतः अतो विशीर्णदंशः विध्वस्तकवचः क्षतजेन रुधिरेण प्लुतः व्याप्तः सन्नपि प्रसभं बलात् वार्यमाणम
र्जुनमप्यतिक्रम्य मद्वधार्थमभिससार अभिजगाम एवं यो लोकप्रतीत्या अर्जुनपक्षपाती विलक्षितः वस्तुतस्तु मय्येवानुग्रहकृतो
वौनूयतममभक्तेन तत्तोवचः माऽन्यथाऽस्तु सभगवान्मे गतिर्भवत्वित्यर्थः ३८ तदेवमन्योर्योरपि मत्परक्षापेक्षया श्रीकृष्णं स्मरति माशास्ते
विजयोऽर्जुनस्तस्य रथ एव कुटुंबं अरक्ष्यं परिरक्षणीयाय तस्मिन् आत्ते तोत्रप्रतोदे येन तस्मिन् धृताश्वप्रग्रहा यानारश्मयः
प्रग्रहाश्च ते मनियस्य तस्मिन् श्रीह्यादिभ्य अवस्थनकारातादृशपि रश्मिशब्दो दिनः तच्छ्रिया तत्पार्थसारथ्यश्रिया ईक्षणीये शोभमाने मुमू
र्षोः मर्तुमिच्छोः नन्वन्यापवर्गिनि किमिति रतिः प्रार्थ्यते अतआह भगवति अचिंत्यैश्वर्ये यदाह युद्धे हताः सर्वे यं निरीक्ष्य स्वरूपं

प्रथमस्कंधनवमाध्याय टीका

राम
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दित्यद्दृश्यापत्रपन्नाह क्षात्रधर्मेण युध्यमानानस्तत्स्वरूपं प्रापुरित्येतन्न चित्रं यतोऽमदांधा अपि प्रापुरित्याह ललितगतिश्च विलासश्च रासा
दिभिः वल्गु मंजु गत्यादिभिः आत्मीयेस्तद्दीयैर्वा कल्पितस्तरुमानः पूजा यासां ताः अतः तत्कोटेन मदेनांधाः अत एव तदेकचि
त्तत्वेन तस्य कर्तीकर्मगोवर्धनोद्धरणादिकं अनुकृतवत्यो गोपवध्वः यस्य प्रकृतिं स्वरूपं अगन्नगमन् मकारलोपस्त्वार्षः किल प्रसि
द्धे तस्मिन् निरस्त्विति पूर्वेणैवान्वयः ३२ जगत्पूज्यतामनुस्मरन्नाह मुनिगणेन्न्दपवर्यैश्च संकुले व्याप्तेऽन्तः सदसि सभामध्ये यु
धिष्ठिरस्य राजसूय एषां मुनिगणादीनामीक्षणीयः अहो रूपमहो महिमेत्येवमाश्चर्येण विलोकनीयः सन्नुपपेदे प्राप एष जगता

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः कृतमनुकृतवत्य उन्मदांधाः प्रकृतिमगन्किल यस्य गोपवध्वः
२७ ३३ मुनिगणन्दपवर्यसंकुलेऽन्तः सदसि युधिष्ठिरराजसूय एषां अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ३४
तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेद
मोहः ३५ सूत उवाच कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत् ३६
संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ३७ तत्र दुंदुभयो नेदुर्देवमानववा
दिताः शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ३८ तस्य निर्हरणादीनि संपरेतस्य भार्गव युधिष्ठिरः कारयित्वा मु
हूर्तं दुःखितोऽभवत् ३९ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ४०
ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं पितरं सांत्वयामास गांधारीं च तपस्विनीं ४१

मात्मा मम दृशिगोचरः दृष्टिविषयः सन्नाविः प्रकटो वर्त्तते अहो मे भाग्यमिति भावः ३४ सोऽहं कृतार्थोऽस्मीत्याह तमिममहमजं सम्यगधि
गतः प्राप्तोऽस्मि सम्यक्त्वमाह विधूतभेदमोहः तदेवं भेदस्यौपाधिकत्वमाह आत्मकल्पितानां स्वयं निर्मितानां शरीरभाजां प्राणिनां हृदि हृ
दि प्रतिहृदयं धिष्ठितं अकारलोपस्त्वार्षः नैकधा अनेकधा अधिष्ठानभेदादनेकधा भान्तमित्यर्थः तत्र दृष्टांतः सर्वप्राणिनां दृशो दृशः प्रति एकमेवा
र्कमनेकधा प्रतीतमिवेति ३५ मनोवाग्दृष्टीनां वृत्तिभिः परमात्मनि श्रीकृष्णे अंतर्विलीनः श्वासो यस्य सः ३६ निष्कले निरुपाधौ संपद्यमानं मि
लितं आज्ञाय ज्ञात्वा ३७ देवैर्मानवैश्च वादिताः राज्ञां मध्ये ये साधवः अनसूयवः ३८ निर्हरणादीनि संस्कारा[illegible] सम्यक्परेतस्य मुक्तस्या
पीत्यर्थः ३९ ४० पितरं धृतराष्ट्रं तपस्विनीं संतापवतीं ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ राजायुधिष्ठिरः ४२ इतिश्रीभागवतेप्रथमेनवमः ९ दशमेकृष्णकार्यस्यहस्तिनापुरतोहरेः स्त्रीभिःसंस्तूयमानस्यवर्णयतेद्वारकाऽऽगमः ॥ १ ॥
राज्यंचकारेत्युक्तं तत्रपृच्छतिहत्वेति स्वस्यरिक्थंधनंस्पर्द्धतेस्पर्धयेतेनतथा यद्वा स्वरिक्थायस्पृधसंग्रामेयेषां अतएवधनादिहरणादात
तायिनः तान्हत्वाप्रत्यवरुद्धभोजनः वेष्टकवधदुःखेनसंकुचितभोगः राज्यलंभेनप्राप्तभोगोवाकथंराज्येप्रवृत्तः प्रवृत्तोवातत्रकिमका
र्षीत् १ राज्यप्रवृत्तौश्रीकृष्णस्यप्रीतिपर्यालोच्यप्रवृत्तइत्याशयेनोत्तरमाह वंशांकुरंसंरोहयित्वापरीक्षिद्रूपेणनसंरोहमंकुरितं
कृत्वा कथंभूतंवंशदवाग्निनिर्हृतं वंशएवदवोवनंतस्मादुत्थितः यःक्रोधरूपोऽग्निस्तेननिर्हृतंदग्धं निजराज्येनिवेश्यच २ प्रवृत्तौ
हेतुमुक्त्वाकिमकार्षीदित्यस्योत्तरमाह निशम्येति प्रवृत्तेयद्विज्ञानंपरमेश्वराधीनंजगन्नस्वतंत्रमित्येवंभूतंतेनविधूतोविभ्रमो
ऽहंकर्तृत्वंयेनभूतोमोहोयस्यसः अनुजैरनुवर्तितः सेवितः सन् अजितः श्रीकृष्णएवाश्रयायस्यसः परिधिः समुद्रस्तत्पर्यंतांगां

पित्राचानुमतोराजावासुदेवानुमोदितः चकारराज्यंधर्मेणपितृपैतामहंविभुः ४२ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधे
युधिष्ठिरराज्यप्रलंभोनामनवमोध्यायः ९ शौनकउवाच हत्वास्वरिक्थस्पृधआततायिनोयुधिष्ठिरोधर्मभृतांवरिष्ठः
सहानुजैःप्रत्यवरुद्धभोजनः कथंप्रवृत्तः किमकार्षीत्ततः १ सूतउवाच वंशांकुरंवंशदवाग्निनिर्हृतंसंरोहयित्वा
भवभावनोहरिः निवेशयित्वानिजराज्यईश्वरोयुधिष्ठिरंप्रीतमनाबभूवह २ निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृ
त्तविज्ञानविधूतविभ्रमः शशासगामिंद्रइवाजिताश्रयः परिध्युपांतामनुजानुवर्तितः ३ कामंववर्षपर्जन्यः सर्व
कामदुघामही सिषिचुःस्मव्रजान्गावः पयसोधस्वतीर्मुदा ४ नद्यःसमुद्रागिरयःसवनस्पतिवीरुधः फलंत्योष
धयःसर्वाःकाममन्वृतुतस्यवै ५ नाधयोव्याधयःक्लेशादैवभूतात्महेतवः अजातशत्रावभवन्जंतूनांरा
ज्ञिकर्हिचित् ६

पृथ्वींपालयामास ३ तस्यराज्यमनुवर्णयतिकाममितित्रिभिः महीसर्वकामदोग्ध्रीबभूव व्रजान्गोष्ठानि ऊधस्वतीः ऊधस्व
त्यः ऊधः क्षीराश्रयः स्थूलोधसइत्यर्थः सिषिचुः अभ्यषिंचन् ४ अन्वृतुऋतावृतौ ५ आधयोमनोव्यथाः व्याधयोरोगाः
क्लेशाः शीतोष्मादिकृताः दैवंचभूतानि च आत्माचहेतुर्येषामाधिदैविकादीनां तेजंतूनांनाभवन् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं द्वारकागमनं निरूपयिष्यन्नाह उषित्वेति स्वसुः सुभद्रायाः ७ तं युधिष्ठिरं युयुत्सुः धृतराष्ट्राद्वैश्यायां जातः गौतमः कृपः यमौ नकुल
सहदेवौ ९ अन्याश्च स्त्रियः मत्स्यसुताद्युत्तरा तस्याः पुनर्ग्रहणं गर्भरक्षकत्वेन कृष्णविरहमोहाधिक्यात् यद्वा मत्स्यसुता सत्यवती १० ॥
तेषां कृष्णविरहासहनं कैमुतिकन्यायेनाह सत्संगादिति द्वाभ्यां सतां संगाद्धेतोर्मुक्तः पुत्रादिविषयाद् दुःसंगो येन सः सद्भिः कीर्त्य
मानं रुचिकरं यस्य यशः सकृदप्याकर्ण्य तत्संगं त्यक्तुं न शक्नोति दर्शनादिभिस्तस्मिन् श्रीकृष्णे न्यस्ताऽर्पिता धीर्यैस्ते ॥ १२ ॥

उषित्वा हास्तिनपुरे मासान्कतिपयान्हरिः सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ७ आमंत्र्य चाभ्यनुज्ञातः परि
ष्वज्याभिवाद्य तं आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ८ सुभद्रा द्रौपदी कुंती विराटतनया तथा गांधारी धृतरा
ष्ट्रश्च युयुत्सुर्गौतमो यमौ ९ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः १०
सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ११ तस्मिन्न्यस्तधियः पार्थाः स
हेरन्विरहं कथं दर्शनस्पर्शसंलापशयनासनभोजनैः १२ सर्वे ते निमिषैरक्षैस्तमनुद्रुतचेतसः वीक्षंतः स्नेहस
बद्धा विचेलुस्तत्र तत्र ह १३ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते निर्यात्यगारान्नोऽभद्रमिति स्याद्बांधवस्त्रियः १४
मृदंगशंखभेर्यश्च वीणापणवगोमुखाः धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तदा १५ प्रासादशिखरारूढाः कुरुनार्यो दि
दृक्षया ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः १६ सितातपत्रं जग्राह मुक्तादामविभूषितं रत्नदंडं गुडाकेशः प्रि
यः प्रियतमस्य हि १७ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते विकीर्यमाणः कुसुमै रेजे मधुपतिः पथि १८

अत एव अनिमिषैर्नेत्रैस्तमेव वीक्षमाणास्तत्र तत्राह एतेन नयनार्थं चलंतिस्म यतः स्नेहेन सम्यग्बद्धाः अत एव तमनुगतानि चेतांसि येषां ते
१३ अगारान्निर्याति निर्गच्छति सति औत्कंठ्याद्धेतोरुद्गलत् स्रवत् बाष्पं अश्रु न्यरुंधन् नेत्रेष्वेव स्तंभितवत्यः तत्र हेतुः अभद्रं नो
स्यात् अमंगलं मा भूदित्येतदर्थं १४ मृदंगादयो वाद्यभेदाः १५ प्रेमव्रीडास्मितपूर्वमीक्षणं यासां ताः १६ गुडाका निद्रा तस्या ईशो जि
तनिद्रोऽर्जुनः १७ व्यजने चामरे जगृहतुः १७ मधुपतिः श्रीकृष्णः १२ १८

सत्याः श्रीकृष्णेनासामव्यभिचारात् किंतु नानुरूपा अनतानुरूपाश्च निर्गुणस्य परमानंदस्य सुखी भवेत्सा दया नानुरूपः गुणात्मनो
मनुष्यनाट्यावतारेऽनुरूपाश्चेत्यर्थः संधिराधः १४ सर्वासां श्रुतीनां मनोहरः उपनिषदोऽपि मूर्त्तिमत्यः सत्यः तासं जल्पमभ्यनंद
न्नित्यर्थः १५ तत्तेजःसौंदर्याद्यतिशयेन विस्मिताभ्यः सखीभ्योऽन्याः स्त्रियः कथयंति नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति स
वाइति चतुर्भिः वैस्मरणे किलेति प्रसिद्धाप्रमाणद्योतनं य एक एवाद्वितीयः पुरुष आसीत्स एवायं श्रीकृष्णः कुत्रासीत् अविशेष आ
त्मनि निष्प्रपंचे निजरूपकल्पा अग्रगुणेभ्यः गुणक्षोभात्पूर्वं तथा निशि प्रलये च तस्य लक्षणं जगतामात्मनि जीवे निमीलितात्मन्निति लु
प्तसप्तम्यंतं पदं जातावेकवचनं ईश्वरे लीनरूपेषु जीवेषु सत्स्वित्यर्थः ननु जीवानां ब्रह्मत्वात्कथं लय यस्तत्राहुः सुप्तासुशक्तिषु सतीषु जी
वोपाधिभूतसत्वादिशक्तिलय एव जीवलय इत्यर्थः १६ तदेवं सृष्टेरादौ प्रलयानंतरं च निष्प्रपंचावस्थानमुक्त्वा सृष्टिप्रलययोर्मध्ये सप्रपंचा
त्तिः

आश्रूयंताशिषसत्यास्तत्र तत्र द्विजेरिताः नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः १४ अन्योन्यमासीत्संजल्प उ
त्तमश्लोकचेतसां कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः १५ स वै किलायं पुरुषः पुरातनो य एक आसीदविशे
ष आत्मनि अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु १६ स एव भूयो निजवीर्यचोदितां
स्वजीवमायां प्रकृतिं सिसृक्षतीं अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत् १७ स
२९ वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः पश्यंति भक्त्युत्कलितामलात्मना नन्वेष सत्वं परि
मार्ष्टुमर्हति १८

वस्थानमाहुः स एव अप्रच्युतस्वरूपस्थितिरेव प्रकृतिमनुससार अधिष्ठितवान् सृष्टिप्रवाहभूयः पुनः स्यानादित्वात् कीदृशीं निजवी
र्यचोदितां स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायामोहिनीं अत एव सिसृक्षतीं स्रष्टुमिच्छंतीं किमर्थमनुससार अनामरूप आ राम
त्मनि जीवे रूपनामानी विधातुमिच्छन् उपाधिसृष्ट्या जीवानां भोगायेत्यर्थः कर्माणि च विधातुं वेदान्कृतवानित्याहुः शास्त्रकृदिति २९
१७ अस्य दर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः स वै अयं यस्य पदं स्वरूपं अघ्रिंवा निर्जितमातरिश्वाप्राणा येः हे सखि मांषे ते सूरय एव
पश्यंति केन भक्त्या उत्कलितं उत्कंठितोऽमलोयं आत्मा बुद्धिस्तेन दृश्यते त्वस्यया बुध्यते नान्ये बुद्धिवैमल्यस्याप्ययमेव हेतुरित्याहुः न
नु हे सखि एष एव सत्वं बुद्धिं परिमार्ष्टुं सम्यक्शोधयितुमर्हति न तु यागादय इत्यर्थः यद्वा नु अहो एष सत्वं ज्ञानं परिमार्ष्टुं नाशयितुं
दूरगमनेनाप्रत्यक्षीभवितुं नार्हति किंत्वनेन सह वयं गंतव्य इत्यर्थः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुण्यश्लोककतामाह । हे सखि यो वेदेषु रहस्यगेषु च रहस्य निरूपकैः अनुगीतसत्कथः अनुगीताः सत्यः कथा यस्य स एवार्थे गानप्रकारमाह
य एक ईश इत्यादि १९ एवं भूतस्य नाना अवतारकारणमाह । यदा हीति नेमो व्याप्ता धीयेषां ते नृपा अधर्मेण जीवंति केवलं प्राणान्पुष्णंति
ने२ तत्रैव एष एव भवाय स्थित्यै सत्त्वतः विशुद्धरूपेण सत्त्वेन रूपाणि दधत् भगादीनि धत्ते प्रकटयति युगे युगे तत्र तदवसरे भगऐश्वर्यं सत्यं स
त्यप्रतिज्ञत्वं ज्ञानं यथार्थोपदेशकत्वं दया भक्तेष्टपायता अद्भुतकर्मत्वं २० विशेषतः श्रीकृष्णावतारे सौभाग्यं वर्णयंति अहो इति पंच
भिः यद्यस्मात् एषः पुरुषोत्तमः श्रियः पतिः स्वजन्मना यदोः कुलं अवति पूजयति सत्करोति अतः श्लाघ्यतमं ततु चंक्रमणेन च मधो
र्वनं मथुरां सत्करोति अतस्तत्पुण्यतममिति तमवर्थस्याप्यर्थता निशंयं अलमिति तत्राप्याश्चर्यं अहो इत्युक्तं २१ अहो बत अत्या
ये किं नु कुशस्थली द्वारका स्वर्गात् उत्कृष्टा इति यद्यशस्वास्य तिरस्कारी परिभवकर्त्री भुवः पुण्ययशः केतो भवति यद्धोः यत्प्रजाः

पतिः २

सवा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते १९ यदा
ह्यधर्मेण तमो धियो नृपा जीवंति तत्रैष हि सत्त्वतः किल धत्ते भगं सत्यमृतं दयां यशो भवाय रूपाणि दधद्युगे युगे २० अहो अलं
श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं यदेष पुंसामृषभः श्रियः प्रियः स्वजन्मना चंक्रमणेन चांचति २१ अहो ब
हे४ त स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः २२
नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृहीतपाणिभिः पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः ऊ२
२३ या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः प्रद्युम्नसांबांबसुतादयो अपरा याश्चाहृता भौमवधे बे२
सहस्रशः एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृ
तिभिर्हृदि स्पृशन् २४

यत्र त्या सर्वाः प्रजाः स्वानुग्रहेण इषितं प्रेषितं स्मितपूर्वावलोकं यदा अनुग्रहार्थमिषितं इष्टं स्वस्यात्मनः पतिं श्रीकृष्णं ननु पित्रादि वदेहमात्र
पतिं नित्यं पश्यंतीत्यत्र उषितमिति पाठे स्वानुग्रहार्थमुषितं कृतनिवासं नतु स्वर्गे तथा स्थः २२ हे सखि अस्य गृहीतपाणिभिः पत्नी
भिः ईश्वरोयं पूर्वं नूनं जन्मांतरेषु समर्चितः यस्मिन्नधरामृतं आशयाश्चेन यासां ताः संमोहं प्राप्ताः इति मनोहरत्वमुक्तं २३ एतत्प्रपंचय
ति या इति द्वाभ्यां वीर्यं प्रभाव एव शुल्कं मूल्यं तेन शुष्मिणः बलिष्ठान् प्रद्युम्नः सांबः अंबः अंब सुताः सारुक्मिणी जांबवतीनाग्नजितीनां
वा आदि यासां सत्यभामादीनां ताः याश्चापराः अस्य श्लोकस्योत्तरश्लोकेनान्वयः एताः स्त्रीत्वमपरं केवलं साधु शोभनं कुर्वंते अ
पास्तं पेशलं भद्रं स्वातंत्र्यं यस्मात् तत् निरस्तं शौचं शुचित्वं यस्मात् तथाभूतमपि जातु कदाचिदपि नापैति न निर्गच्छति आहृतिभिः आहारैः यद्वा पारि

नानाविधप्रियवस्त्राहारैः इति स्मृतान् श्रीकांतटपत् २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंविधाश्चित्रागिरः सस्मितेन निरीक्षणेनाभिनंदन्नु सहरियैयो २५ मधुद्विषापि गोपीथाय रक्षणाय स्नेहात्परेभ्यः। शत्रुभ्यः। शंकितैः सन्नायु
क्तैः हस्त्यश्वरथपादातसेनांगस्याच्चतुर्विधमित्येवं चतुरंगिणी तत्तनांसेना २६ पांडोः। कुरुवंशजत्वात्पांडवाश्चापि कौरवाः एवतान् प्रियैः सुहृ
द्वादिभिः सह २७ कुरुक्षेत्रं कुरुदेशांतर्गतमेव केमात्रेनचिवक्षितः। मरु निरुदकोदेशः। धन्वाऽल्पोदकः। आनर्त्तो रूप्याहारे कोदेशः। सवि
भुः उपागात् प्राप्तः। हे भार्गव मनाक्कईषत् आगतावाहाय स्पसः। २८ तत्र तत्र देशात्तत्रत्यैर्जनैः प्रत्युद्यता निविदिता नि अर्हणानित
पायनानि यस्मैसः। सोयं अपराह्णे प्राद्दिशं पश्चिमादिशं भेजप्राप्तः। गतागा विष्ठः स्वर्गस्थः सूर्यः गोत्वं दर्शकं गतः। प्रविष्टः अस्तंगतइत्यर्थः।

एवंविधा गदंतीनां सगिरः पुरयोषितां निरीक्षणेनाभिनंदन्सस्मितेन ययौ हरिः २५ अजातशत्रुः पृतनां गोपीथाय मधुद्वि
षः परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं २६ अथ दूरागतान्शौरिः कौरवान्विरहातुरान् सन्निवर्त्य दृढं स्नि
ग्धान्प्रायात्स्वनगरीं प्रियैः २७ कुरुजांगलपांचालान्शूरसेनान्सयामुनान् ब्रह्मावर्त्तं कुरुक्षेत्रं मत्स्यान्सारस्वतान
थ मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् आनर्त्तान्भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः २८ तत्र तत्र ह तत्रत्यैर्ह
रिः प्रत्युद्यतार्हणः सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा २९ इति श्रीभागवते महापुराणे प्रथमस्कंधे दशमोऽध्यायः
सूत उवाच आनर्त्तान्स उपव्रज्य स्वृद्धाञ्जनपदान्स्वकान् दध्मौ दरवरं तेषां विषादं शमयन्निव १ स उच्चकाशे धवलो
दरो दरोप्युरुक्रमस्याधरशोणशोणिमा दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः २ तमुप
श्रुत्य निनदं जगद्भयभयावहं प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ३

अध्योवा एषप्रातरुदेत्यापः सायं प्रविशतीति श्रुतेः। यद्वा तदा सायंकाले जातेरथादवतीर्य गविष्ठः भूमौ स्थितः। गांजलाशयं गतः। सन्
पश्चाद्दिशं संध्यां भेजे उपासितवानित्यर्थः। २९ इति प्रथमे दशमः। आनर्त्तान्स्तूयमानस्य पुरीनिर्विश्य बंधुभिः एकादशेरतिः सम्पश्या
द्वंद्वस्य वर्ण्यते। १ उत्सवेरुच्चलत्पोरमुदं च ध्वजतोरणं उत्स्वसद्दत्तदीपालिस्वपुर्व प्रभुराविशत् २ स्वृद्धान् समृद्धान् दरवरं पां राम
चजन्याख्यं दध्मौ वादितवान्। दरः शंखः। उच्चकाशे शुशुभे। धवल उदरं यस्य सः। उरुक्रमस्याधरस्य यः शोणगुणस्तेन शोणिमा
मायस्यः कथं चकास अब्जखंडे रक्तकमलसमूहे कलहंसो राजहंस उच्चकाशेतद्वत् २ जगतो यद्भयं तस्य भयावहं प्रत्युद्ययुः
प्रत्युज्जग्मुः भर्तुर्दर्शनलालसा औत्सुक्यं यासां ताः। ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिताः बल्य उपायनानि याभिस्ता निरपेक्षे पूर्णे तस्मिन्ना दरेण समर्पणे दृष्टांतः रवेर्दीपमिवेति पितरम
र्भकाइवतं सर्वसुहृदमवितारमूचुरित्युत्तरेणान्वयः सुहृत्त्वेनैवावितारं न तु कामेन अत्र हेतुः आत्मारामं तत्र हेतुः परमानंद निजरूप स्व २
लाभेनैव पूर्णकामं ४ विरिंचिब्रह्मा वैरिंच्याः सनकादयः इह संसारे परं क्षेममिच्छतां परायणं परमं शरणं कुतः येषां ब्रह्मादीनां प्रभुर
पि कालो यत्र प्रभुर्न भवेत् ५ अतो भवाय उद्भवाय नोस्माकं त्वं भव हे विश्वभावन हेतुतः त्वन्नाथा बभूविम ज्ञाता वय ६ हे नाथ त्वमेव
हुः अहो भवता वयं सनाथाः स्मः यद्यस्मात्तव रूपं परमं त्रैविष्टपानामपि दूरदर्शनं यस्य तनु देवानामपि दुर्लभमित्यर्थः प्रमणा यत्स्मि
तेन स्निग्धं निरीक्षणं यस्मिन् तदाननं यस्मिन् तद्रूपं सर्वसर्वेषु अंगेषु सौभाग्यं यस्मिन् ७ अर्भकाइव सकरुणं माहुः यर्हि य

तत्रोपनीतबलयो रवेर्दीपमिवादृताः आत्मारामं पूर्णकामं निजलाभेन नित्यदा प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा पित
रं सर्वसुहृदमवितारमिवार्भकाः ४ नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितं परायणं क्षेममिहेच्छतां परं
न यत्र कालः प्रभवेत्परः प्रभुः ५ भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता त्वं सद्गुरुर्नः परमं च दैवतं यस्या
नुवृत्त्या कृतिनो बभूविम ६ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणाननं प
२४ रूपमकुपंतं सर्वसौभगं ७ य बुजाक्षापससार भो भवान्कुरून्मधून्वाथ सुहृद्दिदृक्षया तत्राब्दकोटिप्रतिमः क्षणो भ
१२ वेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ८ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्रावि
शत्पुरीं मधुभोजदशार्हार्हकुकुरांधकवृष्णिभिः आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव सर्वर्तुसर्वविभवपुण्यवृ
क्षलताश्रमैः उद्यानोपवनारामैर्वृतपद्माकरश्रियं २ गोपुरद्वारमार्गेषु कृतकौतुकतोरणां चित्रध्वजपताकाग्रैरंतः
प्रतिहतातपां ४

दा भो अंबुजाक्ष नो भवानिति पाठे न इत्यनादरे षष्ठी अस्माननादृत्य अपससार अपहाय अगाम कुरून् हस्तिनापुरं मधून्मथुरां वा तत्र १०
तदा रविं विना आंध्यादक्ष्णोर्यथा एवं तव नः त्वदीयानामस्माकमपीत्यर्थः ८ इति चैवंविधाः अन्या अप्युच्चरिता वाचः शृण्वन् दृष्ट्या
साभिनंदनावलोकनेनानुग्रहं कुर्वन्पुरीं द्वारकां प्राविशत् तां द्वारकां स्तौति पंचभिः स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षितां सर्व
र्तुषु सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षा लता आश्रमा लतामंडपा आश्रयभूता उद्यानादिभिः वृता ये पद्माकराः सरांसि तैः
श्रीः शोभा यस्यां तां उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं आरामः क्रीडार्थं वनं गोपुरं पुरद्वारं द्वारं गृहद्वारं एतानि कौतुकेन उत्स
वेन तोरणानि यस्यां तां गरुडादिचिह्नांकिताः ध्वजाः जयप्रदर्यंत्रांकिताः पताकाः चित्राणि ध्वजपताकानामग्रैः अंतः प्रतिहतः आ

भा०प्र०
संमार्जितानि लिप्तानि । सारितरजस्कानि महामार्गादीनि यस्यांतां महामार्गो । रथ्या इतरमार्गो । आपणकाः पण्यवीथयः चत्वराण्यंगणानि
लोहितैर्भिरुप्ता अवकीर्णा ५ ६ ७ प्रेष्ठमायांतं निशाम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतुर्थेनान्वयः । १ प्रहर्षवेगेन उच्छ्वसितानि
उल्लसितानि शयनादीनि यैस्ते शयनसद्मसुनगतो २ वारणेंद्रं मंगलार्थं पुरतः कृत्वा ससुमंगलैः सुमंगलपुष्पादिभिः कुंकुमपाणिभिः ब्रह्म
यानि घोषा मंत्रपाठः ३ प्रणयेन स्नेहेन आगतेन साध्वसं संभ्रमो यासां ४ वारमुख्या नर्तक्यः प्रत्युज्जग्मुः अश्रूवानिवेतिच कारस्य नटे
व दिनश्चेत्यन्वयः । लसत्कुंडले निर्भाताः निकपोलानि तैर्वदनपुश्रीयासां ताः । वारमुख्याः नर्तकाविशेषा इति यावत् १० नराः । नव

संमार्जितमहामार्गरथ्यापणकचत्वरां सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः ५ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षु
भिः अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः ६ ७ निशम्य प्रेष्ठमायांतं वसुदेवो महामनाः । अक्रूरश्चोग्रसेनश्च रामे
श्चाद्भुतविक्रमः । १ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः । प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः । २ वारणेंद्रं पु
रस्कृत्य ब्राह्मणैः ससुमंगलैः । शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः । ३ प्रत्युज्जग्मू रथैर्हृष्टाः प्रणयागतसाध्व
३१ साः ४ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः । लसत्कुंडलनिर्भातकपोलवदनश्रियः १० नटनर्तकगं
धर्वाः सूतमागधबंदिनः । गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ११ भगवांस्तत्र बंधूनां पौराणामनु
वर्तिनां । यथाविध्युपसंगम्य सर्वेषां मानमादधे । प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः । आश्वास्य चाश्वपाक
भ्यो वरैश्चाभिमतैर्विभुः १२ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि । आशीर्भिर्युज्यमानोऽन्यैर्वंदिभिश्चाविशत्पु
रं १३ राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः । हर्म्याण्यारुरुहुर्विप्रास्तदीक्षणमहोत्सवाः १४

रसाभिनयचतुराः गान्धर्वानुसारेण नृत्यंतोनर्तकाः । गंधर्वा गायकाः । सूताः पौराणिकाः प्रोक्ताः मागधा वंशशंसकाः । बंदिनस्त्वमलप्रज्ञाः राम
प्रस्तावसदृशोक्तयः । तेसर्वे गायंति चेतिगायंतिस्मचेत्यर्थः ११ यथाविधि यथोचितं सह यथोचितं तथा समागमं कृत्वा सर्वेषां मानं ३२
प्रह्वेति कृतवानित्यर्थः । तदाह प्रह्वत्वं विनम्रत्वं सानतिः । अभिवादनं वाचानतिः । आश्वास्य अभयं दत्वा श्वपाकानभिव्याप्य वरैरभिष्टदानेश्च
मानं कृतवान् १२ अन्यैश्च बंदिभिश्च १३ हे विप्राः तस्य क्षणेन महोत्सवो यासां १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यस्मान्नित्यं सदाच्युतं निरीक्षमाणानामपि दृशः न वितृप्यंति अतस्तत्कथं भूतं श्रियः शोभायाः धाम स्थानमंगं यस्य तं १५ एतदेवा
भिनयेनाह श्रियो लक्ष्म्या यस्योरः वक्षः निवासः यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पात्रं यस्य बाहवो लोकपालानां निवासः
सारं कृष्णं गायंतीति सारंगा भक्तास्तेषां यस्य पादांबुजं निवासः तं निरीक्षमाणानां दृशः इति पूर्वेणान्वयः १६ सितेराता
पत्रव्यजनैरुपस्कृतो मंडितः अर्कश्च उडुपो नक्षत्रसहितश्चंद्रश्च चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजश्च तैः अर्क[illegible]त्रस्योपमानं नक्षत्रा
णि पुष्पवृष्टिः चंद्रः परितः मुक्तामंडलाकारयोश्चामरव्यजनयोः चापं वनमालायाः विद्युत्तेजः पिशंगवाससोः अभूतोपमेयं य

नित्यं निरीक्षमाणानां यदपि द्वारकौकसां । न वितृप्यंति हि दृशः श्रियो धामांगमच्युतं । १५ । श्रियो निवासो यस्योरः [illegible]पान
पात्रं मुखं दृशां । बाहवो लोकपालानां सारंगाणां पदांबुजं । १६ । सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि । पि
शंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः । १७ । प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः । ववंदे शिरसा
सप्त देवकीप्रमुखा मुदा । १८ । ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः । हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः । १९ ।
अथाविशत्स्वभवनं सर्वकाममनुत्तमं । प्रासादा यत्र पत्नीनां सहस्राणि च षोडश । २० । पत्न्यः पतिं प्रोष्य गृहानुपाग
तं विलोक्य संजातमनोमहोत्सवाः । उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः । २१ ।

यदि घनस्योपरि सूर्यबिंबमुभयतश्चंद्रो सर्वेतो नक्षत्राणि मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजो यदि भवेत् तर्हि स घनो यथा भाति तथा हरिर्बभा
विस्यर्थः १७ देवकीप्रमुखाः सप्त ववंदे इति मातृः सौंदर्योदादर विशेषज्ञापनार्थमुक्तं अष्टादश पितुर्वसुदेवस्य भार्या मातरः तुल्यत्वा
न्नमस्कृता एव १८ १९ सहस्राणि च षोडशेति चकारात् अष्टोत्तरशताधिकानीति ज्ञेयं २० प्रोष्य देशांतरे उषित्वा आराद्दूरादेव वि
लोक्य संजातो मनसि महोत्सवो यासां ताः आसनात् आशयाश्च आसनादेर्दूरत उत्तस्थुः आशयोऽतः करणं तस्मादप्यात्मनोत्तस्थुः श्रीकृष्ण
नाम्ना संश्लेषं अंतःकरणव्यवधानमपि नासहंतेत्यर्थः व्रीडितानि लोचनानि आननानि च यासां अपांगैः स्ववीक्षणात् व्रीडितलोचनाः अवन
तमुखत्वात् व्रीडिताननाः साकं व्रतैरिति हास्यक्रीडावर्जनादिनियमा अपि नाम उत्तस्थुरित्यर्थः उत्तस्थुः एवोत्तस्थुरितिवा व्रतानि च याज्ञवल्क्येनोक्ता
नि क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं हास्यं परगेहे यानं त्यजेत्प्रोषितभर्तृकेति २१

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयांतंतपतिंदर्शनात्पूर्वमात्मनाबुद्ध्यापरिरेभिरे ततोदृष्टिभिः ततःसमीपमागतमात्मजैः पुत्रैः गृहीतकंठमालिंगयंत्यइवस्वयमालिंगितवत्य
इत्यर्थः अत्रहेतुः दुरंतभावाः गंभीराभिप्रायाः तदाचतासांनेत्रयोः निरुद्धमप्यंबुबाष्पंवैक्लव्यात्स्नेहवशात् आस्रवदीषत्सुस्राव अतएवधैर्य
हान्याविलज्जतीनांहेभृगुवर्यचित्रमेतदितिभाव ३२ पार्श्वगःततःसमीपस्थः तत्रापिरहोगतः एकांतवर्तिनस्तस्य पदेपदेप्रतिक्षणं नवंनवमेव अत्रैतस्मु
मुत्सपायः काविरमेतेति चलाचंचलस्वभावापि ३३ उक्तंश्रीकृष्णचरितंसंक्षिप्याह एवमितिद्वाभ्यां क्षितिभारायजन्मयेषां अक्षौहि

तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाः परिरेभिरेपतिं निरुद्धमप्यास्रवदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्लवात् ३२
यद्यप्यसौपार्श्वगतोरहोगतस्तथापितस्यांघ्रियुगंनवंनवं पदेपदेकाविरमेततत्पदाच्चलापियच्छ्रीर्नजहातिकर्हिचित् ३३
एवंनृपाणांक्षितिभारजन्मनामक्षौहिणीभिःपरिवृत्ततेजसां विधायवैरंश्वसनोयथाऽनलंमिथोवधेनोपरतोनिरायुधः स
३४ सएषनरलोकेऽस्मिन्नवतीर्णःस्वमाययारेमेस्त्रीरत्नकूटस्थोभगवान्प्राकृतोयथा ३५ उद्दामभावपिशुनामल
वल्गुहासव्रीडावलोकनिहतोमदनोपियासां संमुह्यचापमजहात्प्रमदोत्तमास्तायस्येंद्रियंविमथितुंकुहकैर्
नशेकुः ३६ तमयंमन्यतेलोकोह्यसंगमपिसंगिनं आत्मौपम्येनमनुजंव्यापृण्वानंयतोऽबुधः ३७

धु

णीभिः सेनाभिःपरिवृत्तंसर्वतःप्रसृतंतेजःप्रभावोयेषां श्वसनोवायुःवेणूनामन्योन्यसंघर्षेणानलं जनयित्वा मिथोवधेहेतयथोपरमति
स्यतितद्वत् ३४ स्त्रीरत्नकूटस्थः उत्तमस्त्रीकदंबस्थः ३५ ननुवंस्त्रीसंगादिभिःसंसारप्रतीतेःकथंभगवानवतीर्णइत्युच्यतेतत्रा
ह उद्दामेतिद्वाभ्यां यासांउद्दामःगंभीरोयोभावोऽभिप्रायःतस्यपिशुनःसूचकोऽमलोवल्गुःसुंदरोहासोव्रीडावलोकश्चताभ्यांनि
हतःअमदनःश्रीमहादेवोपिसमुह्यलज्जयाचापंपिनाकमजहात् एवंप्रभावायाःस्त्रियइंद्रियनावद्विवक्षितं यद्वाभगवतोमोहि
नीरूपेणमहेशोऽपिमोहितएवएताश्रृंगारविलासाएवतंतथाप्यक्रियाःकेपटैर्विभ्रमैर्यस्येंद्रियंमनःविमथितुंक्षोभयितुंनशेकुः
३६ तंश्रीकृष्णमयंप्राकृतोलोकःआत्मौपम्येनस्वसादृश्येनसंगिनमनुजंमन्यते अत्रहेतुःव्यापृण्वानंव्याप्रियमाणमेतायमबुधः
अतत्वज्ञः ३७

कुहकैः

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ प्र॰ १

प्र॰ ४

५३

शिरसेव सपर्यामाजहार आत्मनिवेदनं कृतवान् तेन सहागताः स्वपत्न्यादयो निवृत्ताः संवोपविवेश सं धिराषे॥ सभगवान्ब्रह्मर्ष्यादिसंघैः
संवृतः सन् अलं व्यरोचत ग्रहाः शुक्रादयः ऋक्षाणि अश्विन्यादीनि अन्यास्ताराः २७ नत्वा शिरसा धार्यं अवहितः धायुस्यत प्रश्नार्थं पुनर्नत्वा २८
सूनृतया गिरमाह अहो इति पंचभिः सत्सेव्याः जाताः यतः अतिथिरूपेण हेतुना तीर्थकाः योग्याः कृताः २९ ३० विष्णोः सान्निध्या
दसुराः गयादैइव ३१ पाण्डुसुतानां प्रियः अतस्तेषां पैतृष्वसेयानां प्रीत्यर्थं तद्गोत्रस्य मे आत्तः स्वीकृतः बान्धवभावः स्नेहो येन सः ३२ अ
न्यथा श्रीकृष्णप्रसादं विना अव्यक्ता गतिर्यस्य तव दर्शनं कथं अस्मदादीनां तत्रापि नितरां म्रियमाणानां नितरां कथं स्यात् वनयिता

स विष्णुरातोऽतिथय आगताय तस्मै सपर्यां शिरसाजहार । ततो निवृत्ता ह्यबुधाः स्त्रियोऽर्भका महासने सोपविवेश पूजितः २६
स संवृतस्तत्र महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः । व्यरोचतालं भगवान्यथेन्दुर्ग्रहर्क्षतारानिकरैः परीतः २७ प्रशान्त
मासीनमकुण्ठमेधसं मुनिं नृपो भागवतोऽभ्युपेत्य प्रणम्य मूर्ध्नावहितः कृताञ्जलिर्नत्वा गिरा सूनृतयान्वपृच्छत् २८ अ
हो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबन्धवः कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः २९ येषां संस्मरणात्पुंसां सद्यः शुद्ध्यन्ति
वै गृहाः किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ३० सान्निध्यात्ते महायोगिन्पातकानि महान्त्यपि सद्यो नश्यन्ति वै पुंसां
विष्णोरिव सुरेतराः ३१ अपि मे भगवान्प्रीतः कृष्णः पाण्डुसुतप्रियः पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबान्धवः ३२ अन्यथा
तेऽव्यक्तगतेर्दर्शनं नः कथं नृणां नितरां म्रियमाणानां संसिद्धस्य वनीयसः ३३ अतः पृच्छामि संसिद्धिं योगिनां परं
मं गुरुं पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ३४ यच्छ्रोतव्यमथो जप्यं यत्कर्तव्यं नृभिः प्रभो स्मर्तव्यं भजनीयं वा ब्रूहि
यद्वा विपर्ययं ३५ नूनं भगवतो ब्रह्मन्गृहेषु गृहमेधिनां न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ३६ सूत उवाच
एवमाभाषितः पृष्टः स राज्ञा श्लक्ष्णया गिरा प्रत्यभाषत धर्मज्ञो भगवान्बादरायणिः ३७ इति श्रीभागवते महापुराणे
पारमहंस्यां संहितायां प्रथमस्कन्धे श्रीशुकागमनं नाम एकोनविंशतितमोऽध्यायः १९ श्रीहरिः समर्थ श्री॥

नाशाच पिता वनयितव्यो नितरां पनीयान् तस्य अत्युदारतया मांसाद्यपि स्वस्वइति प्रवर्तकोऽस्य [illegible] ३३ सम्यक् सिद्धिर्यस्मात् ३४ यत्कार्यं कर्तुं योग्यं
कर्तव्यं तु आवश्यकमिति भेदः विपर्ययं अश्रोतव्यादि ३५ तद्दर्शनस्य पुनर्दुर्लभत्वादिदानीमेव कथनीयमित्याशयेनाह नूनमिति गो
दोहनमात्रकालमपि ३६ एवं अहो इत्यादिकया श्लक्ष्णया मधुरया गिरा आभाषितः अभिमुखीकृतः पृष्टश्च ३७ श्रीधर्मज्ञमा
हात्म्यमदनोऽकृत्वा परिक्षिन्नं पंत्रसो अभिर क्षितकलिजयख्यातिवृत्तो भुवि अतेयः शुकरूपतः स्वपरमज्ञानोपदेशेन त
परमानंदाकृतिमाधवं प्रथमस्कंधगूढार्थपदभावार्थदीपिका सन्द्रिरुद्दीपनीयेयं यथास्यात्तत्वदीपिका इति श्रीमद्भागवत भावा

आर्य ३

स्य॰ ५

५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतप्रथमस्कंधसमाप्त॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२।४

कुतइत्यपेक्षयामैश्वर्यलक्षणमाह एतदिति ईशस्येशर्णमैश्वर्यंनामैतदेव किंतत् प्रकृतिस्थोपितत्स्यागुणैः सुखदुःखादिभिः संदेवनयु
ज्यतइतियत् यथाश्रात्मस्थैरानंदादिभिः श्रात्माऽश्रयाऽपिबुद्धिर्नयुज्येतनद्रष्टव्येधर्म्यैदष्टांतोवा श्रात्मस्थैः सत्ताप्रकाशादिभिर्यथाबु
द्धिर्युज्यतइति एवंवा श्रसदात्मादेहः तत्रस्थैर्गुणैस्तदाश्रयाबुद्धिः तदुपाधिर्जीवोयथायुज्यते एवंप्रकृतिस्थोपितद्गुणैर्नयुज्यतइति
यत् एतदीशस्यतिः ३८ तस्मात्मोऽपितस्यतत्त्वनजानंतीत्याह तत्स्त्रैणंश्रात्मवश्यंयदेहं एकांतेश्रनुव्रतंश्रनुरक्तंचमेनिरे भर्तृप्रमा
णविदः प्रमाणमियत्तांमहिमानमजानंत्यइत्यर्थः ईश्वरं क्षेत्रज्ञमतयः श्रहंरतेर्नयायथास्वाधीनंस्वधर्मयोगिनंमन्यतेतद्वत्

ति
एतदीशानमीशस्यप्रकृतिस्थोऽपितद्गुणैः नयुज्यतेसदात्मस्थैर्यथाबुद्धिस्तदाश्रया ३८ तंमेनिरेऽबलामूढाः स्त्रैणंचानु
व्रतंरहः श्रप्रमाणविदोभर्तुरीश्वरंमतयोयथा ३९ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेएकादशोऽध्यायः ११
शौनकउवाच श्रश्वत्थाम्नोपसृष्टेनब्रह्मशीर्ष्णोरुतेजसा उत्तरायाहतोगर्भईशेनाजीवितःपुनः १ तस्यजन्मम
हाबुद्धेःकर्माणिचमहात्मनः निधनंचयथैवासीत्सप्रेत्यगतवान्यथा तदिदंश्रोतुमिच्छामिगदितुंयदिमन्यसे ब्र
हिनःश्रद्धधानानांयस्यज्ञानमदाच्छुकः २ सूतउवाच श्रपीपलद्धर्मराजःनिस्पृहः सर्वकामेभ्यःकृष्णपादानुसेव
या ३ संपदःक्रतवोलोकामहिषीभ्रातरोमही जंबूद्वीपाधिपत्यंचयशश्चत्रिदिवंगतं किंतेकामाःसुरस्पार्हाःमु
कुंदमनसोद्विजाः श्रधिजह्रुर्मुदंराज्ञःक्षुधितस्ययथेतरे ४ पिहवऽजयन्नजाः ॥२

यद्वायथायथातासांमतयःकल्पनाःतथातथातमीश्वरंस्त्रैणादिरूपंमेनिरइत्यर्थः ३९ इतिप्रथमेएकादशः ११ पुरांतेयस्यसंगायेद्रोणि
दंडादिविस्तरात् द्वादशेतुतदेवाथपरीक्षिज्जन्मवर्ण्यते परीक्षितोऽथराजर्षेर्जन्मकर्मविलापनं संस्थांचपांडुपुत्राणांवक्ष्येकृष्णकथोदय
मितिप्रतिज्ञायपांडवानांराज्यस्थितिरूपोह्यवांतभूतासप्रसंगंसप्तमध्यायमारभ्यनिरूपिताइदानींमाप्राह्ण तिकमुक्तानुवादपूर्वकंपृ
च्छति श्रश्वत्थाम्नेतितउपसृष्टेनविसृष्टेन १ तस्यजन्मेत्यादिब्रूहिहेत्युत्तरेणान्वयः सपरीक्षित्प्रेत्यदेहंत्यक्त्वाप्रार्थयेनत्वांज्ञापयामीत्या
ह गदितुंयदिमन्यसेश्रनुग्रहेणतर्हिब्रूहिति यस्यज्ञानमदाच्छुकइतिश्रवणच्छायाकारणं २ निस्पृहस्यापिराज्ञःश्रीकृष्णानुग्रहात्प्र
पत्र्यादितित्रिभिःपिल्वदपीपलत्पालयामास ३ क्रतवःतदुपार्जितलोकाःश्रसुरस्पार्हाःसुराणांस्पृहणीयाः तेसंपदादयःकामाविष
याःराज्ञःकिंमुदंप्रीतिमधिजह्रुः धितस्यश्रन्नेनकामनसःयथाइतरे
स्रक्चंदनादयानकुर्वंतितद्वत् ४

अस्त्रकृतमाह मातुरिति सपरीक्षित्॥१॥ पुरटं सुवर्णं स्फुरत्पुरटं मौलिर्यस्य तमिति व्रीह्यादिभ्यश्चेति प्रत्ययः॥ अपीच्यं अतिसुन्दरं दर्शनं रूपं यस्य तडिद्वाससं सौपस्येति श्यामं मेमितिच पदद्वयं विशेषितं मेघोपमासूचिता अच्युतं अविकारं तप्तं द्राहोत्तीर्णं यत्काञ्चनं तन्मये कुंडले यस्य क्षतजाक्षं संरंभाद्रत्यारक्तनेत्रं मद्भक्तस्यापि गर्भादि पीडेति क्रोधेनेति भावः॥५॥ अस्त्रतेजो विधमंतं विनाशयंतं नीहारं हिमं गोपतिः सूर्य इव सन्निकर्षे समीपे ददर्श दृष्ट्वा च असौ क इति पर्यैक्षत वितर्कितवान्॥६॥ अमेयात्मा कथं तद्विधूतवानित्यत्र स्वरूपे॥ धर्मं गोपायती स्या

मातुर्गर्भगतो वीरः स तदा भृगुनंदन ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा॥१॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं॥२॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं॥३॥ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः॥ अस्त्रतेजः स्वगदया नीहारमिव गोपतिः॥ विधमंतं सन्निकर्षे पर्यैक्षत क इत्यसौ॥६॥ विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः॥ मिषतो दशमासस्य तत्रैवांतर्दधे हरिः॥७॥ ततः सर्वगुणोदर्के सानुकूलग्रहोदये जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा॥८॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः॥ जातकं कारयामास वाचयित्वा च मंगलं॥९॥ हिरण्यं गां महीं ग्रामान्हस्त्यश्वान्नृपतिर्वरान् प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्॥१०॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं एष ह्यस्मिन्प्रजातंतौ पुरूणां पौरवर्षभ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना॥ तस्मान्नाम्ना विष्णुरात इति लोके बृहच्छ्रवाः॥ भविष्यति न संदेहो महाभागवतो महान्॥११॥

विधमंतं दहंतमासमपरिच्छेद्यस्य मिषतः पश्यतः यत्र दृष्टस्तत्रैवांतर्हितवान्न त्वन्यत्र गतः यतो विभुः सर्वगतः॥७॥ उदर्के उत्तरं फले सर्वगुणानामुत्तरोत्तराधिक्यसूचके काले न केवलं तत्र हेतुः अनुकूलग्रहोदये इतिसहितानां शुभग्रहाणामुदयो यस्मिन्॥८॥ जातके जातकर्मे मंगलं पुण्याहं वाचयित्वा श्रेष्ठान् स्वन्नं शोभनमन्नं च तीर्थवित् दानकालज्ञः यावन्नाभिच्छिद्यते तावन्नाशौचमिति स्मृतेः छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते इति वचनात् ततः प्रादात् आमान्नं वा प्रजातीर्थे पुत्रोत्पत्तिपुण्यकाले पुत्रे जाते पितॄणां पाने दत्तं भवति चाक्षयमिति स्मृतेः॥ देवी अपि तत्र अथ पुत्रे जाते द्विजन्मनां आयाति हि नृपः श्रेष्ठपुण्याहमिति चाब्रुवन्॥१०॥ हे पौरवर्षभ पुरूणां कुरुवंश्यानां शुक्ले शुद्धे अस्मिन्प्रजातंतौ दैवेन कथंभूतेन अप्रतिघातेन दुर्वारेण संस्थां नाशं प्रत्युपेयुषि प्राप्तवति सति वोऽनुग्रहार्थाय यस्मात्प्रभवनशीलेन श्रीविष्णुना रातो दत्तः तस्माल्लोके विष्णुरात इति नाम्ना भविष्यति महाभागवतश्च गुणैश्च महान्भविष्यति नात्र संदेह इति राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्वयः॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महाभागवतो भविष्यतीत्युक्ते हृष्टः । पृच्छति अपि स्विन्नु किं स्वित् साधुवादेन प्रशंसासत्कीर्त्या च अनुवर्तिता भविष्यतीति पूर्ववंश्यान्वा । परमप
नुषंगः १२ प्रजानामविता रक्षकः । मानवः । मनोः पुत्रः ब्राह्मणेषु हितः । सत्यप्रतिज्ञश्च श्रीरामो यथा १३ उशीनरदेशाधिपतिः । शिबिः
येन स्वमांसं श्येनाय दत्वा शरणागतः कपोतो रक्षितः । स्वानां ज्ञातीनां यज्वनां च यशोविस्तारको दौष्यन्तिर्भरत इव १४ अर्जुनयोः । पा
र्थकार्तवीर्ययोः १५ हिमवानिव सतां निषेव्यः । अन्यनेगतिकत्वेन वसुधेव तितिक्षुः क्षन्ता प्राप्ता मातापितरौ इव सहिष्णुः । १६ पि
तामहो ब्रह्मा तेन समः । साम्ये समत्वे रमाश्रयो हरिः । १७ सर्वैः सद्गुणैर्यन्माहात्म्यं तस्मिन् श्रीकृष्णमनुव्रतः । १८ धृत्या धैर्येण सद्ग्रहः

युधिष्ठिर उवाच अप्येष वंश्यान् राजर्षीन्पुण्यश्लोकान्महात्मनः । अनुवर्तिता स्विद्यशसा साधुवादेन सत्तम । १२ ब्राह्मणा
ऊचुः । पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः । ब्रह्मण्यः । सत्यसंधश्च रामो दाशरथिर्यथा १३ एष दाता शरण्यश्च यथा
ह्यौशीनरः । शिबिः यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनां १४ धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः । हुताश इ
व दुर्धर्षः । समुद्र इव दुस्तरः । मृगेंद्र इव विक्रान्तो निषेव्यो हिमवानिव तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव १६
पितामहसमः साम्ये प्रसादे गिरिशोपमः । आश्रयः सर्वभूतानां यथा देवो रमाश्रयः । १७ सर्वसद्गुणमाहात्म्ये एष कृष्ण
मनुव्रतः । १८ रन्तिदेव इवोदारो ययातिरिव धार्मिकः । धृत्या बलिसमः । कृष्णे प्रल्हाद इव सद्ग्रहः । १९ आहर्तै
पि॰ ३ षोऽश्वमेधानां वृद्धानां पर्युपासकः । राजर्षीणां जनयिता शास्ता चोत्पथगामिनां निग्रहीता कलेरेष भुवो धर्मस्य
कारणात् २० तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः । २१ जिज्ञासितात्म
याथात्म्यो मुनेर्व्याससुतादसौ हित्वेदं नृप गंगायां यास्यत्यद्धाऽकुतोभयं २२ इति राज्ञ उपादिश्य विप्रा जातकको
विदाः लब्धापचितयः । सर्वे प्रतिजग्मुः स्वकान् गृहान् २३ स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः । पूर्वदृष्टमनुध्यायन्
परीक्षेत नरेष्विह २४

अभिनिवेशो यस्य सः । १९ आहर्ता कर्ता राजर्षीणां जनमेजयादीनां २० द्विजपुत्रेण प्रेरितात्तक्षकात् आत्मनो मृत्युमुपश्रुत्य ह
रेः पदं प्रपत्स्यते भजिष्यते २१ तत्त्वं च जिज्ञासितमात्मनो याथात्म्यं येन सः । इदं शरीरं गंगायां हित्वा अकुतोभयं पदं यास्यति २२ लब्धा
उपचितिः पूजा यैः । २३ परीक्षिदिति नाम निर्वक्ति स एष इति यद्यस्मात्प्रभुः । समर्थः । स नु गर्भे दृष्टं पुरुषं अनुध्यायन् इह दृश्यमानेषु
मध्ये सर्वमपि नरं परीक्षेत अयमसौ भवति नवेति विचारयेदतः परीक्षिदिति ख्यातः । पूर्वदृष्टमिति वा पाठः । २४ नरेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰प्र॰स्क॰१ शुक्ले शुक्लपक्षे प्रसिद्ध उडुपोऽन्वहं यथा काष्ठाभिः आपूर्यमाणो वर्धते एवं पितृभिः युधिष्ठिरादिभिः कामैश्चानुः षष्ठिकलाभिश्चापूर्यमा त्रि॰
स॰णो वर्धे २५ पूर्वमपह्नव्योक्तान् अश्वमेधान्त्ववसरे प्रकारं कथयति ज्ञातिद्रोहस्य हानेच्छयाऽयक्ष्यमाणः करदंडयोरन्यत्र ताभ्यां विना
न लब्ध धनः दध्यौ चिंतयामास करदंडजस्य परिजनभरणमात्रोपक्षीणत्वात् २६ प्रहीणं मरुत्तस्य यज्ञस्य त्यक्तं सुवर्णपात्रादि क
मानीतवंतः २७ संभृतसंभारः संपादितयज्ञोपकरणः भीतो ज्ञातिद्रोहात् २८ इति श्री प्रथमे द्वादशः १२ निर्गमो धृतराष्ट्रस्य
विदुरात्तस्यात्र यादशोक्तः पौत्राभिषेकेण वद्धुः राज्ञो महापथं इदानीं परीक्षितेः कलिनिग्रहादिकमीणिक अथ यियासुः विदुरा

स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं २५ यक्ष्यमाणोऽश्वमेधेन ज्ञा
तिद्रोह जिहासया राजा लब्धधनो दध्यौ नान्यत्र करदंडयोः २६ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः धन
त्रि प्रहीणमाजह्रुः उदीच्यां दिशि भूरिशः २७ तेन संभृतसंभारो लब्धकामो युधिष्ठिरः वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समय
जद्धरिं २८ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वादशोऽध्यायः १२ सूत उवाच विदुरस्तीर्थयात्रायां मैत्रेया
२४ दात्मनो गतिं ज्ञात्वाऽगाद्धास्तिनपुरं तयाऽवाप्तविविदिषः १ यावतः कृतवान्प्रश्नान् क्षत्ता कौषारवाग्रतः जा
ते कभक्तिर्गोविंदे तेभ्यश्चोपरराम ह २ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः धृतराष्ट्रो युयुत्सुश्च सूतः शार
द्वतः पृथा गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः प्रत्युज्ज
ग्मुः प्रहर्षेण प्राणं तन्व इवागतं ४ अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यका
तराः ४ राजा तमर्हयांचक्रे कृतासनपरिग्रहं ५ तं भुक्तवंतमासीनं विश्रांतं सुखमासने अप्रश्रयावनतोऽप्राह तेषां जा
चशृण्वतां ६

गमनेन धृतराष्ट्रप्रस्थानं तत्रोऽर्जुनागमनं तत्र पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः गतिं हरिं तयाऽत्मगत्याऽवाप्तविविदि राम
तं ज्ञातुमिष्टं संवेद्य न १ तदेवाह यावतः कर्मयोगव्रतादि विषयान्प्रश्नान्प्रथमं कृतवान् कौषारवस्य मैत्रेयस्य पुरतः पश्चात् त्रिच
तुरः प्रश्नार्थज्ञानमात्रेण गोविंदे जातैकांतभक्तिः कृतार्थः सन् तेभ्यः प्रश्नेभ्यः उपरराम न तत्र परं न विजिज्ञासितवान् ४ २४
सूतः संजयः शारद्वतः कृपः कृपी द्रोणभार्या जामयो ज्ञातिभार्या अन्याश्च स्त्रियः प्राणं तन्व इवेति कुतश्चिन्मूर्छादिदोषतः
प्राणसन्निसर्गितन्वः करोत्थानादयो निश्चेष्टा भवंति पुनस्तस्मिन्नाविर्भूते यथा तिष्ठति तद्वत् ३ विरहेण यदौत्कंठ्यं तेन कातराः
विवशाः ४ ५ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पक्षिणोह्यपत्यानि यथातिस्नेहेन पक्षच्छायया वर्द्धयंति तद्वद्युष्मत्पक्षपातच्छायया समेधितान् नः अस्मान् किं स्मरथ समेधितत्वमेवाह
विपद्गणात् यस्मान्मोचितास्मः ७ वो युष्माभिः कया वृत्त्या वर्त्तितं देहवृत्तिः कृता कानि च तीर्थादीनि सेवितानीति ८ भवतां च तीर्थाटने
नेन स्वार्थं किंतु तीर्थानुग्रहार्थमित्याह भवद्विधेति मलिनजनसंपर्केण तीर्थानि मलिनानि संति संतः पुनः स्वयं तीर्थीकुर्वंति स्वांत
मनः तत्रस्थेन स्वस्यांतःस्थितेनेति वा ९ अपि किं सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा १० ११ यदुकुलक्षयावर्णने कारणम्।

युधिष्ठिर उवाच अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान् विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ७ कया वृत्त्या वर्त्तितं वश्च
रद्भिः क्षितिमंडलं तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ८ भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो तीर्थीकुर्वंति
तीर्थानि स्वांतस्थेन गदाभृता ९ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः दृष्टाः श्रुता वा यादवाः स्वपुर्यां सुखमासते
१० इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत् यथानुभूतं क्रमशो विना यदुकुलक्षयं ११ नन्वप्रियं दुर्विषहं नृणां स्वयमुप
स्थितं नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः १२ किंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं भ्रातुर्ज्येष्ठस्य श्रेयस्कृ त्स्वैः
त्सर्वेषां प्रीतिमावहन् १३ अबिभ्रदर्यमा दंडं यथावदघकारिषु यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः १४ युधिष्ठिरो
लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया १५ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया
अत्यक्रामदविज्ञातः कालः परमदुस्तरः १६

ह नन्विति १२ श्रेयस्कृत्तत्वमुपदिशन् १३ ननु शूद्रोसौ कथमुपदिशन् नह्ययंसौ शूद्रः किंतु यमस्तद्रूपेणासीत् किं तत्र कारणं यमेत्रागते अमुत्र
कोदंडधर इत्यपेक्षायामाह अबिभ्रदिति धृतवानित्यर्थः मांडव्यस्य शापात् तथाहि केचिच्चोरान् अनुधावंतो राजभटाः मांडव्यस्याश्रमे सतपश्च
या रतः समीपे तान्संप्राप्य तेन सह निबध्यानीय राज्ञे निवेद्य तदाज्ञया सर्वान् शूलमारोपयामासुः ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादया
मास ततो मुनिर्यमं गत्वा कुपित उवाच कस्मादहं शूलमारोपित इति तेनोक्तं त्वं बाल्ये शलभं कुशाग्रेणाविध्य क्रीडितवानिति तच्छ्रुत्वा मा
डव्यस्तं शशाप बाल्येऽज्ञानतो मम महांतं दंडं यतस्त्वं कारितवान् अतः शूद्रो भवेति १४ इदानीं राज्ञः सापकर्षं निरूपयितुं उत्कर्षं नि
गमयति युधिष्ठिर इति कुलंधरं वंशधरं १५ तदीहया गृहव्यापारेण प्रमत्तानां अत्यक्रामत् आयुःकालोऽतिक्रांतः यद्वा तेन भ्य भवद्
त्यर्थः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० प्र० १ अभिप्रेत्य ज्ञात्वा १७ तत्प्रतीकारः क्रियतां किं निर्गमेनेनेत्यत आह प्रतिक्रियेति सर्वेषामिति येषां प्रतिकर्तव्यं तेषामित्यर्थः १८ कथं धनादिवियो
गः सोढुं शक्यः अत आह येनेति अभिपन्नः अभिग्रस्तः १९ अत्रावस्थानमतिदैन्यमिति दर्शयन्वैराग्यमुत्पादयति पितृभ्रात्रिति सप्तभिः
आत्मा च देहः २० येन पुत्रा हतास्तेन भीमेन दत्तं पिंडमन्नं गृहपालः श्वेव २१ निसृष्टः प्रक्षिप्तः गरो विषं दूषिता अवमताः तद्दत्तैरन्ना
दिभिर्लब्धैरसुभिः कियत्प्रयोजनं न किंचिदित्यर्थः २२ तस्यापि एवं दैन्यमनुभवतोऽपि परैति क्षीयते २३ गतस्वार्थं यशोधर्मादिशून्यं मुक्त

विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं १७ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो स
एष भगवान्कालः सर्वेषां नः समागतः १८ येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि जनः सद्यो वियुज्येत किमुतान्यैर्धनादि
भिः १९ पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः आत्मा च जरया ग्रस्तः परगेहमुपाससे २० अहो महीयसी जंतोर्जी
३५ विताशा यथा भवान् भीमेनावर्जितं पिंडमादत्ते गृहपालवत् २१ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः हृतं क्षेत्रं ध
नं येषां तद्दत्तैरसुभिः कियत् २२ तस्यापि तव देहोऽयं कृपणस्य जिजीविषोः परैत्यनिच्छतो जीर्णो जरया वाससी इव २३
मिमं गतस्वार्थं देहं विरक्तो मुक्तबंधनः अविज्ञातगतिर्जह्यात्स वै धीर उदाहृतः २४ यः स्वकात्परतो वेह जात
निर्वेद आत्मवान् हृदि कृत्वा हरिं गेहात्प्रव्रजेत्स नरोत्तमः २५ अथोदीचीं दिशं यातु स्वैरज्ञातगतिर्भवान् इतोऽर्वाक्प्रा
यशः कालः पुंसां गुणविकर्षणः २६ एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधित आजमीढः छित्त्वा स्वेषु स्नेहपा
शान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा २७

सर्वबंधनः त्यक्ताभिमानः कगत इत्यविज्ञातगतिर्यस्य सः धीरः प्राप्तदुःखस्य स्वयं देहे सनेन मुक्तिप्राप्तः २४ नरोत्तमस्तत्ततः प्रागवस्थात राम
प्रतीकारः स्वकात् स्वत एव परतः परोपदेशतो वा २५ त्वं तु नरोत्तमो माभूः अत इदानीं धीरो भवेत्याह अथेति अर्वाक् अर्वाची ३५
नः एष्यन्नित्यर्थः गुणान्धैर्यदयादीन् विकर्षति आच्छिनत्तीति तथा २६ आजमीढः अजमीढवंशजः प्रज्ञाचक्षुः अंधः एवं
बोधितः सन् द्रढिम्नः चित्तदार्ढ्यात् भ्रात्रा संदर्शितः अध्वा वनमोक्षमार्गो यस्य सः २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुबलस्यपुत्री गांधारीसाध्वीसुशीलाहिमालयंप्रयांतंपतिमनुजगाम ननुकथंसासुकुमारीहिमालयंदुःखबहुलंहिमवंतं गता अतआह न्यस्तदंडानांप्रहर्षोयस्मिन् तंदुःखमपिकेषांचित्प्रहर्षहेतुर्भवतीत्यत्रदृष्टांतः मनस्विनांशूराणांयुद्ध सनृतीव्रः प्रहारायथा पांगंतरेसत्संप्रहारंयुद्धेयथेति २८ कृतंमैत्रंमित्रंहिवेस्तंसधावंदनंयन् नत्वासंपूज्यपितरौविदुरधृतराष्ट्रौ २९ ३० हेगावल्गणगवल्गणस्यपुत्रसंजय ३१ अकृतप्रज्ञेमंदमतौ शमलं अपराधं आशंसमानः आ

पतिंप्रयांतंसुबलस्यपुत्रीपतिव्रताचानुजगामसाध्वी हिमालयंन्यस्तदंडप्रहर्षंमनस्विनामिवसत्संप्रहारः २८ अजातशत्रुः कृतमैत्रोहुताग्निर्विप्रान्नत्वातिलगोभूमिरुक्मैः गृहंप्रविष्टोगुरुवंदनायनचापश्यत्पितरौसौबलींच २९ तत्रसंजयमासीनंपप्रच्छोद्विग्नमानसः ३० गावल्गणेक्वनस्तातोवृद्धोहीनश्चनेत्रयोः अंबावाहतपुत्रार्तापितृव्यःक्वगतःसुहृत् ३१ अपिमय्यकृतप्रज्ञेहतबंधुःसभार्यया आशंसमानः शमलंगंगायांदुःखितोऽपतत् ३२ पितर्युपरतेपांडौसर्वान्नःसुहृदःशिशून् अरक्षतांव्यसनतः पितृव्यौक्वगतावितः ३३ सूतउवाच कृपयास्नेहवैक्लव्यात्सूतोविरहकर्शितः आत्मेश्वरमचक्षाणोनप्र-
ति त्याहातिपीडितः ३४ विमृज्याश्रूणिपाणिभ्यांविष्टभ्यात्मानमात्मना अजातशत्रुंप्रत्यूचेप्रभोःपादावनुस्मरन् ३५ संजयउवाच नाहंवेदव्यवसितंपित्रोर्वःकुलनंदन गांधार्यावामहाबाहोमुषितोस्मिमहात्मभिः ३६ अथाजगामभगवान्नारदःसहतुंबुरुः प्रत्युत्थायाभिवाद्याहसानुजोभ्यर्चयन्निव ३७ युधिष्ठिरउवाच नाहंवेदगतिंपित्रोर्भगवन्क्वगतावितः अंबावाहतपुत्रार्ताक्वगताचतपस्विनी ३८

शंकमानः भार्ययासह ३२ योऽस्मान्रक्षतांतौइतःस्थानात् ३३ कृपयास्नेहवैक्लव्याच्चातिपीडितः आत्मेश्वरंधृतराष्ट्रंअपश्यन्विरहकर्शितः अस्तुतःसंजयः नप्रत्युत्तरमाह ३४ आत्मनाबुद्ध्याआत्मानंमनोविष्टभ्यधैर्ययुक्तंकृत्वाप्रभोःधृतराष्ट्रस्यगांधार्याश्च ३५ व्यवसितंनिश्चयं यतोमुषितःवंचितोस्मि ३६ एवंकिंचित्कालंशोचतितस्मिन् अथनारदआजगाम् अत्रोत्तिष्ठविदुरलोकेपाठांतरंतदुक्तंयथासंप्रदायंव्याख्यायते शोकवेगादभ्यर्चयन्निवाहराजानमभ्यर्चयन् ३७ नाहंवेदवायितपस्विनीदुःखयुक्ताअपारेशोकार्णवे भगवान्त्वमेवपारदर्शकः अग्रेनोऽस्माकंहीतिशेषः ३८

२

मुनि

ओ २

३९ अहोविवयथाहृत्तत्कथनेनशोकेनमूर्छितः पतोहितिअथमंगवाक्योकमुपशामयति कंचनमाशुचः मायोन्ध नेकवत्सेनाविव य.
यस्मादीश्वराधीनंजगत् तदेवाह लोकाइति संयुनक्ति संयोजयति वियुनक्ति वियोजयति च ४० गावोबलीवर्दाः नस्यांहि
धेनंत्यांबद्धाः दामभिः नासिकायांप्रोताः स्वामिनो बलिंवहंतियथा एवंवाक्तंत्यांवाक्तंत्याख्यायांविधाय केवेदलक्षणायां
नामभिर्ब्राह्मणब्रह्मचारीत्यादिभिर्नामलक्षणैर्बद्धाः परमेश्वरस्य बलिंवहंतीत्यर्थः ४१ प्रकृतौतौपारतंत्र्यमुक्त्वा संयोगवि
योगयोरप्याह यथेति क्रीडोपस्कराणां क्रीडासाधनानां ४२ ईश्वराधीनत्वान्नशोकः कार्यइत्युक्तं लोकतत्त्वविचारेण

३६

कर्णधारइवापारे भगवान्पारदर्शकः ॥ अथाबभाषे भगवान्नारदो मुनिसत्तमः ॥ ३९ मा कंचन शुचो राजन् यदीश्व
रवशंजगत् लोकाः सपाला यस्येमे वहंति बलिमीशितुः सः संयुनक्ति भूतानि स एव वियुनक्ति च ४० यथा गावो
नसिप्रोतास्तंत्यां बद्धाः स्वदामभिः वाक्तंत्यां नामभिर्बद्धा वहंति बलिमीशितुः ४१ यथा क्रीडोपस्कराणां
संयोगविगमाविह इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ४२ यन्मन्यसे ध्रुवं लोकमध्रुवं वा न चो

नेत्यमांविना

भयं सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ४३ तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः कथंत्व
नाथाः कृपणा वर्तेरंस्ते च मां विना ४४ कालकर्मगुणाधीनो देहोयं पांचभौतिकः कथमन्यांस्तु गोपा
येत्सर्पग्रस्तो यथापरं ४५ अहस्तानि सहस्तानामपदानि चतुष्पदां फल्गूनि तत्र महतां जीवो जीवस्य
जीवनं ४६ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक् अंतरोनंतरो भाति पश्य तं माययोरुधा ४७

तानि विषयांपि शोकइत्याह यद्यपि लोकं जनं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण वेतिन वेतिन ध्रुवं नाप्यध्रुवं शुद्धब्रह्मरूपेण अ.
निर्वचनीयत्वेन वा उभयं वा चिज्जडांशात् सर्वथा चतुर्ष्वपिपक्षेषु तेपित्रादयो न शोच्याः स्नेहादन्यत्र स्नेह एव केवलं शोकहेतुः स चाज्ञा
नमूलइत्यर्थः ४३ तस्मान्मांविना कथंतिमनसावैक्लव्यं च व्याकुलतां त्यज ४४ तत्रदेहदृष्ट्या तेषां दुःस्थिति चिंत्यतां तावन्नास्तीत्याह का
लोगुणक्षोभकः कर्मजन्मनिमित्तं गुणा उपादानं तदधीनः पांचभौतिकः जडः नहि भोगनाशार्थं अहिसर्पग्रस्तः अजगरगिलितः यथा
अन्यं नरक्षति तद्वत् ४५ ईश्वरेण विहिता [illegible] सर्वतः सुलभैवेत्याह अहस्तानि पश्वादीनि अपदानि तृणादीनि तत्र तेषु हस्तादिमत्सु
पिफल्गूनि निर्बलानि एवं जीवः सर्वोपि सर्वस्य जीवनं जीविका एतेनैव सर्वतो भयाभासत्वं चोक्तं ४६ मोहनिवृत्त्यर्थं तत्स्वाचक्कों[?]माह
तदिदं अहस्तसहस्तादिरूपं जगत् स्वदृग्भगवानेव ननु तः पृथक् सचैक एव ननु नाना ननु सजातीयविजातीयभेदप्रत्ययकुत इत्यत आ
ह आत्मनां भोक्तॄणां आत्मा स्वरूपं अतो न सजातीयभेदः अंतरोऽनंतर अ अंत
बहिश्च भोक्तृभोग्यरूपा अभाति अतो न विजातीयभेदोपि एकः कथं तथा प्रतीयते
अत आह मायया बहुधा तं पश्यंति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कासावस्तीद्दैशामहामायाविहारकायामित्याह सोयमिति अस्यां भूमौ अभवायनाशाय ४८ तर्हि श्रीकृष्णोऽत्रास्तीत्यत्रैवास्थांमारु
थाइत्याह तच्चदेवानां कार्यंतेन निष्पादितं केवलमवशेषं प्रतीक्षते यदुकुलक्षयमितिहदिस्थे ततोनिजं धामयास्यतितेतोयूय
मपिगच्छतेत्यर्थः तच्चभूतमपिविदुरवदेवनावर्णयत् ४९ तदेवशोकमास्थांच निवार्यजिज्ञासवेत्तस्मैयथावृत्तंकथयति धृतरा
ष्ट्र इतिषड्भिः हिमवतोदक्षिणभागे ५० यावैप्रसिद्धास्वर्धुनीसाआत्मानंसप्तधाव्यधात् किमर्थं नानापृथक्सप्तभिः स्रोतोभिः
प्रवाहैः सप्तानामृषीणांप्रीतये अतएवतत्तीर्थंसप्तस्रोतोवदंति ५१ तेनस्नातेअष्टांगयोगमाह स्नात्वेतिचतुर्भिः तत्रस्नानंहोमोऽ
८२ ब्भक्षणंच नियमाउक्ताः भक्ष्यस्थानेअपांस्वीकारोऽब्भक्षः उपशांतआत्मायस्य विगताःपुत्राद्येषणायस्मादितियमाउक्ताः ५२
जितासनइत्यादिनाआसनप्राणायामप्रत्याहाराउक्ताः हरिभावनयेतिधारणोक्ता ध्वस्तारजःसत्वतमोरूपामलायस्येतिप्र

सोयमद्यमहाराजभगवान्भूतभावनः कालरूपोऽवतीर्णोऽस्यामभावायसुरद्विषां ४८ निष्पादितंदेवकृत्यमवशेषं
प्रतीक्षते तावद्यूयमवेक्षध्वंभवेद्यावदिहेश्वरः ४९ धृतराष्ट्रःसहभ्रात्रागांधार्याचस्वभार्यया दक्षिणेनहि
मवतऋषीणामाश्रमंगतः ५० स्रोतोभिःसप्तभिर्यावैस्वर्धुनीसप्तधाव्यधात् सप्तानांप्रीतयेनानासप्त
स्रोतःप्रचक्षते ५१ स्नात्वाऽनुसवनंतस्मिन्हुत्वाचाग्नीन्यथाविधि अब्भक्षउपशांतात्मासआस्तेविगतैषणः ॥ धा
५२ जितासनोजितश्वासःप्रत्याहृतषडिंद्रियः हरिभावनयाध्वस्तरजःसत्वतमोमलः विज्ञानात्मनिसं
योज्यक्षेत्रज्ञेप्रविलाप्यतं ब्रह्मण्यात्मानमाधारेघटांबरमिवांबरे ध्वस्तमायागुणोदर्कोनिरुद्धकरणाशयः
निवर्तिताखिलाहारआस्तेस्थाणुरिवाचलः ५३ तस्यांतरायोमैवाभूःसंन्यस्ताखिलकर्मणः ५४

ततोध्यानमुक्तंसमाधिमाह विज्ञानेतिद्वाभ्यां आत्मानमहंकारास्पदंस्थूलदेहादिवियोज्यविज्ञानात्मनिबुद्धौसंयोज्यएकीकृत्यतंवि
ज्ञानात्मानंदृश्यांशादिवियोज्यक्षेत्रज्ञेद्रष्टरिप्रविलाप्य तंचक्षेत्रज्ञंद्रष्टृत्वांशादिवियोज्य आधारे आश्रयसंज्ञेब्रह्मणिप्रविलाप्यघटांबरं
घटोपाधिवियोज्ययथामहाकाशेप्रविलाप्यतेतद्वत् व्युत्थानाभावमाह ध्वस्तेति अंतर्गुणक्षोभाद्बाह्येंद्रियविक्षेपोव्युत्था टा
नंभवतु तदुभयंतस्यनास्तियतः ध्वस्तोमायागुणानामुदर्कःउत्तरंफलंवासनायस्य निरुद्धानिकरणानिचक्षुरादीनिआ
शयोमनश्चयस्य अतएवनिवर्तितअखिलआहारोभोग्यइंद्रियैर्विषयाहरणंवायेनसः स्थाणुरिवनिश्चलआस्ते ५३
तथाभूतमप्यानेतुंयत्नंप्रत्याह तस्येति अंतरायोविघ्नोमैवाभूःरित्यडागमःछांदसः ५४

उं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथाभूदर्शनमपितावत्कुर्यामित्युद्यतं प्रत्याह सर्वेति घनानादकः स्वस्वाधीनं तर्हि तद्द्वाहार्थं गमिष्यामिनेत्याह तच्चेति ५५ तर्हि गं
धार्यानयनार्थं गमिष्यामिनेत्याह पत्युर्देहे सहोटजेपर्णशालया सहितेयोगाग्निना महेगाहे पत्यादिभिः दह्यमानेतस्यपत्नी
बहिः स्थितासतीतं पतिमनु अग्निं वेक्ष्यति प्रवेक्ष्यति ५६ तर्हि विदुरानयनार्थं गंतव्यमेव नेत्याह विदुरस्त्वितिनिशाम्य दृष्ट्वा
भातुः सुगत्याहर्षः तन्मत्कनाशोकः श्रुता अयुक्तः तस्मात्स्थानात्तीर्थानिनिषेवितुंगंतागमिष्यति ५७ शुचःशोकात्५८
इतिश्रीभागवते प्रथमेत्रयोदशः चतुर्दशेत्वरिष्टानि दृष्ट्वाराजा विशंकितः अर्जुनादर्जुनात्कृष्णतिरोधानमितीर्यते ११

सवाअवृजिनाद्राजन्परतः पंचमेहनि ॥ कलेवरं हास्यति स्वं तच्च भस्मी भविष्यति ५५ दह्यमानेऽग्निभिर्देहे प
त्युः पत्नीसहोटजे बहिः स्थितापतिं साध्वीतमग्निमनुवेक्ष्यति ५६ विदुरस्तुतदाश्चर्यं निशाम्यकुरुनंदन हर्ष
शोकयुतस्तस्माद्गंतातीर्थनिषेवकः ५७ इत्युक्त्वाऽथारुहत्स्वर्गं नारदः सहतुंबरुः युधिष्ठिरोवचस्तस्य हृदिकृ
त्वाजहाच्छुचः ५८ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेत्रयोदशोऽध्यायः सूतउवाच संप्रस्थितेद्वारकायांजि
ष्णौबंधुदिदृक्षया ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं व्यतीताः कतिचिन्मासास्तदानायात्ततोऽर्जुनः
१ ददर्शघोररूपाणिनिमित्तानिकुरूद्वहः कालस्यचगतिंरौद्रांविपर्यस्तर्तुधर्मिणः पापीयसींनृणांवार्तांक्रो
धलोभानृतात्मनां जिह्मप्रायंव्यवहृतंशाठ्यमिश्रंचसौहृदं पितृमातृसुहृद्भ्रातृदंपतीनांचकल्कनं २ नि
मित्तान्यत्यरिष्टानिकालेत्वनुगतेनृणां लोभाद्यधर्मप्रकृतिंदृष्ट्वोवाचानुजंनृपः ३ युधिष्ठिरउवाच सं
प्रेषितोद्वारकायांजिष्णुर्बंधुदिदृक्षया ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितं ४ गताःसप्ताधुना
मासाभीमसेनतवानुजः नायातिकस्यवाहेतोर्नाहंवेदेदमंजसा ५ अपिदेवर्षिणादिष्टःसकालोयमुपस्थितः

३७

कृष्णस्येतिचकारेणाभिप्रायंज्ञातुं कतिचित्सप्ता तदा कालातिक्रमेपि ततःद्वारकायानायातुनागतः १ २ निमित्तानिउत्पा
तान्कुरुद्वहोयुधिष्ठिरः रौद्रांघोरां तदेवाह विपर्यस्ताऋतुधर्मायस्मिंस्तस्य वार्तांजीविकां क्रोधलोभादिभियुक्तं आत्मायेषां जिह्मप्रायंकपटबहुलं व्यवहृतंव्यवहारं शाठ्यंवंचनंतन्मिश्रंसौहृदंसख्यं पित्रादीनांपरस्परंकल्कनंकलहादि २ अत्यरिष्टानिअत्यंतमशुभानिदृष्ट्वानृणांलोभाद्यधर्मप्रकृतिंचदृष्ट्वा अनुजंभीमं ३ ४ वितिवितर्के कस्माद्धेतोर्नायातीत्यहंनवेद नवेद्मि ५ अपिकिं यदा आत्मनःआक्रीडं क्रीडासाधनं अंगमनुष्यनाट्यं उत्स्रष्टुमिच्छतिसकालःप्राप्तः६ राम

३७

अस्माकं सर्वपुरुषार्थत्वहेतुः श्रीकृष्णः अनलादियोगी विनाशिं तस्मादिस्याशयेनाह तस्मात्कुशलहस्मोऽद्वैतोः एतच्चोप
रिष्टादर्जुनः स्पष्टीकरिष्यति लोकाश्च यज्ञकरणरूपाय स्यानुग्रहात् ७ अदूरात्संनिहितो नोऽस्माकं आशंसतः
उत्पातान् ८ देहिकानाह कुर्वेक्षीति कुर्वीदयावामाः स्फुरंति वेपथुः कंपः अहृदये वेवर्त्तते एतन्मत्वे आरात्संनि
हितं विप्रियं दास्यति ९ भौमानाह सार्धं त्रिभिः शिवाक्रोष्टा आदित्यमभिरौति उद्धत्स्यामिमुखं क्रोशति अ
नलाननाः अग्निमुखेनवमंती अंगहे भीमममामभिलक्ष्य सारमेयः श्वाभिरौति स्तुतौ अभीरूवत् निःशाकः १० श
स्ताग वादयो मांसव्यवामं कुर्वेति अपेरगर्दे भावाः प्रदक्षिणं कुर्वेति वाहान् अश्वान् ११ अयं कपोतो मृत्युदूतो

यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः आसन्सपत्नविजयो लोकाश्च यदनुग्रहात् ७ पश्योत्पातानि
रत्याग्रदिव्यान्भौमान्सदेहिकान् दारुणान्शंसतोऽदूराद्भयं नो बुद्धिमोहनं ८ कुर्वेक्षिवाहवोमत्त्यस्फु
रंत्यंग पुनःपुनः वेपथुश्चापि हृदये आराद्दास्यंति विप्रियं ९ शिवैषोद्यतमादित्यमभिरौत्यनलानना
य मामंग सारमेयोऽभिरौति ह्यभीरुवत् १० शस्ताः कुर्वंति मां सव्यं दक्षिणं पशवोऽपरे वाहांश्च पुरुषव्या सा:८
घ्र लक्षये रुदतो मम ११ मृत्युदूतः कपोतोऽयमुलूकः कंपयन्मनः प्रत्युलूकश्च कुह्वानैरनिद्रौ शून्य
मिच्छतः १२ धूम्रा दिशः परिधयः कंपते भूः सहाद्रिभिः निर्घातश्च महानासीत्साकं च स्तनयित्नु
भिः १३ वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः असृग्वर्षंति जलदा बीभत्समिव सर्वतः १४
सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी १५

समिधः
मृत्युदूतो मृत्युसूचकः उलूको घूकः प्रत्युलूकः तत्प्रतिपक्षो धूकः काकोवा कुह्वानैः कुत्सितशब्दैर्विश्वं
शून्यमिच्छतः १२ धूम्राः धूसराः दिशः परिधयः इवाग्निलोकामार्तण्डंवति दिव्यानाह सार्धाभ्यां निर्घातो निर
भ्रवज्रपातः स्तनयित्नवोः गर्जितानि तैः सह १३ विशेषेण सृजन् असृक् रक्तं १४ ग्रहणां मर्दं युद्धं भूता
रुद्रानुचराः तेषां गणैः संकुलैः व्यामिश्रैः प्राणिभिः सहितैः रोदसी द्यावापृथिव्यो ज्वलिते दीप्ते इव च पश्य पति १५ नमः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०१

पुनर्भौमावाहनत्यइतिसौरेडुरिभिः प्राणिनांमनांसिच १६ नदुह्यंतीतिकर्मकर्तर्यार्षं नप्रस्त्रवंतीत्यर्थः १७ देवतानिप्रति
माः अश्रुद्रुः स्वं १८ एतैः उत्पातैर्वितर्कितंअन्येषु पुरुषेषु श्रीवर्त्सांकुशादिशोभायांपृर्णे भगवतः पदे हीना भूरित्यहं मन्ये १९
तस्यराज्ञः इत्येवंदृष्टानिअरिष्टानियंनतेनचेतसा चिंतयतः सतः २० अथयथापूर्वंनिपतितं नेदृवाहअप्तुरमित्यादि अ
पाविद्गन् अश्रूणिनेत्राभ्यांविसृजतमित्यर्थः उद्विग्नंकंपितंहृदयंयस्य विच्छायं विगतकांति २१ स्वजनावांधवाः २२

नंदंत्यानदाश्चक्षुभिताः सरांसिचमनांसिच नज्वलत्यग्निराज्येन कालोयं किंविधास्यति १६ नपिबंतिस्तनं
वत्सानदुह्यंतिचमातरः रुदंत्यश्रुमुखागावोनहृष्यंत्यृषभाव्रजे १७ देवतानिरुदंतीव स्विद्यंतिह्युच्चलं
तिच इमेजनपदाग्रामाः पुरोद्यानाकराश्रमाः भ्रष्टश्रियानिरानंदाः किमघंदर्शयंतिनः १८ मन्यएतै
र्महोत्पातैर्नूनं भगवतः पदैः अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा १९ इतिचिंतयतस्तस्यदृष्टारिष्टेनचेतसा
राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः २० तंपादयोर्निपतितमयथापूर्वमातुरं अधोवदनमब्बिंदून्सृज
तंनयनाब्जयोः विलोक्योद्विग्नहृदयोविच्छायमनुजंनृपः पृच्छतिस्मसुहृन्मध्येसंस्मरन्नारदेरितं २१
युधिष्ठिरउवाच कच्चिदानर्तपुर्यांनः स्वजनाः सुखमासते मधुभोजदशार्हार्हसात्वतांधकवृष्णयः २२
शूरोमातामहः कच्चित्स्वस्त्यास्तेवाथमारिषः मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः २३
सप्तस्वसारस्तत्पत्न्योमातुलान्यः सहात्मजाः आसतेसस्नुषाः क्षेमंदेवकीप्रमुखाः स्वयं २४ कच्चि
द्राजाहुकोजीवत्यसत्पुत्रोस्यचानुजः २५ हृदीकः ससुतोक्रूरोजयंतगदसारणाः आसतेकुशलं
कच्चिद्येचशत्रुजिदादयः २६

स्वजनाबांधवाः २२ किंवक्ष्यतीतिशंकयाप्यवहितक्रमेणपृच्छति शूरइत्यादिना मारिषः मान्योमातामहः आनकदुंदुभि
र्वसुदेवः २३ स्वसारः परस्परंवसुदेवपत्न्यः क्षेमेणतासामपिक्षेमेपृष्टेमेवतथापिपृथगपिपृच्छतिस्वयमिति २४ आहुकः
उग्रसेनः असत्पुत्रोयस्य अतएवजीवनमात्रमेवपृष्टं अनुजश्चदेवकः २५ हृदीकसुतः कृतवर्मा जयंतादयः कृ
ष्णभ्रातरः २६

राम ३८ शूरोनाम यादवः कुंत्याः पिता

२७ सर्वृष्णिनीम ध्येमहारथः गंभीरस्यः कुर्ईतमोदनइत्यर्थः २८ श्रीकृष्णस्यापत्यानि कार्ष्णयः तेषुप्रवराः १ सुनंदने
देशीर्षण्यौमुख्यौयेषांते २९ भगवतिसुखमास्तइतिप्रश्नस्योत्तरं चिंत्यमाशंक्याह पुरइत्यादि ३० भगवतोऽन्त्रावस्थानेहि
लोकानांमंगलंनान्यथेत्याशयेनाह चतुर्भिः मंगलायशुभाय क्षेमायलब्धपालनायउद्भवाय अनंतसखः बलभद्रसहायः
३१ अच्चिताः सेविताः जिताः परमानंदंयथाभवति तथामहापौरुषिकाः वैकुंठनाथानुचराः ३२ यस्यपादशुश्रूषणमेवमु
ख्यंतपआदिभ्यः श्रेष्ठंयत्कर्मतेनसत्यभामादयः संख्ययुद्धे श्रीकृष्णबलेननिर्जित्यत्रिदशेशिषः देवभोग्यान्पारिजातादी

कच्चिदास्तेसुखंरामोभगवान्सात्वतांप्रभुः २७ प्रद्युम्नः सर्ववृष्णीनांसुखमास्तेमहारथः गंभीररयोऽनिरु
द्धोवर्द्धतेभगवानुत २८ सुषेणश्चारुदेष्णश्चसांबोजांबवतीसुतः अन्येचकार्ष्णिप्रवराः सपुत्राऋषभा
दयः १ तथैवानुचराः शौरेः श्रुतदेवोऽद्धवादयः सुनंदनंदशीर्षण्यायेचान्येसात्वतर्षभाः २ अपिस्वस्था
सतेसर्वेरामकृष्णभुजाश्रयाः अपिस्मरंतिकुशलमस्माकंबद्धसौहृदाः २९ भगवानपिगोविंदोब्रह्मण्यो
भक्तवत्सलः कच्चित्पुरेसुधर्मायांसुखमास्तेसुहृद्वृतः ३० मंगलायचलोकानांक्षेमायचभवायच आ
स्तेयदुकुलांभोधावाद्योऽनंतसखःपुमान् ३१ यद्बाहुदंडगुप्तायांस्वपुर्यांयदवोऽर्चिताः क्रीडंतिपरमा
नंदंमहापौरुषिकाइव ३२ यत्पादशुश्रूषणमुख्यकर्मणासत्यादयोद्व्यष्टसहस्रयोषितः निर्जित्य
ध संख्येत्रिदशांस्तदाशिषोहरंतिवज्रायुधवल्लभोचिताः ३३ यद्बाहुदंडाभ्युदयानुजीविनोयदुप्रवीराह्यकुतोभ
यामुहुः अधिक्रमंत्यंघ्रिभिराहृतांबलात्सभांसुधर्मांसुरसत्तमोचितां ३४ कच्चित्तेऽनामयंतात भ्रष्टते
जाविभासिमे अलब्धमानोऽवज्ञातः किंवातातचिरोषितः ३५ कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंग
लैः नदत्तमुक्तमर्थिभ्यआशयायत्प्रतिश्रुतं

नु वज्रायुधस्यवल्लभाशचीतस्याउचिताः ३३ यद्बाहुदंडप्रभावोपजीविनः सुधर्मामंघ्रिभिरधिक्रामंति संगाविलास
सुमारोहइतिगतपंचमश्लोकेनान्वयः ३४ इदानींतस्यैवकुशलंपृच्छतिकच्चिदितिषड्भिः अनामयंआरोग्यं नलब्धोमा
नोयेनतद्धनस्यसकाशात् किंवातिः प्रत्युतअवज्ञातः निरस्कृतः यतश्चिरोषितः बहुकालंतत्रस्थितः ३५ अभावैरिति
च्छेदः प्रेमशून्यैः अमंगलैः पुरुषैः शब्दादिभिर्नाभिहतः नताडितोऽसिकच्चिद्यद्वा अर्थिभ्यः किमपिदास्यामीतिनाकिंच

द्दा आशया सहृदयं या आशा भवति तथा दास्यामीति प्रतिश्रुत्य न द
त्तं कि ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०१ अन्यद्वा शरणागतं सत्वं प्राणिमात्रं न त्यक्तवानसि किं यतस्त्वं पूर्वं शरणप्रदः आश्रयप्रदः ४१ अगम्यामिति च्छेदः निंदितां स्त्रियं
अगमः किं न गतवानसि असत्कृतां मलिनवस्त्रादिना अगमः किं नोत्तमैः अनुत्तमैः समैरित्यर्थः असमैरधमैर्वा किं न प
राजितोसीत्यर्थः ४२ संभोजनार्हान्वृद्धान्बालकांश्च किंस्वित्परिभुंक्थाः त्यक्त्वा भुक्तवानसि अक्षमं कर्त्तुं मयायोग्यं यत्तन्न
कृतवानसि किं ४३ नित्यं सदा प्रेष्ठतमेन हृदयेनात्यंतरंगेण स्वबंधुना श्रीकृष्णेन रहितः शून्योस्मीति आत्मानं मन्यसे इ
त्यर्थः अन्यथा ते तव रुक् मनःपीडा न घटते ४४ इति प्रथमे चतुर्दशः १४ कलिप्रवेशमालक्ष्य धौरेय्यस्य परीक्षिति आरो
हन्नृपः स्वर्गमिति पंचदशेऽब्रवीत् कृष्णोऽर्जुनः अविकल्पित इतिच्छेदः नानाशंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः

कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं शरणोपसृतं सत्वं नात्याक्षीः शरणप्रदः ४१ कच्चित्त्वं नागमोऽ
गम्यां गम्यां वाऽसत्कृतां स्त्रियं पराजितो वाऽथ भवान्नोत्तमैर्नासमैः पथि ४२ अपि स्वित्पर्यभुंक्थास्त्वं सं
भोज्यान्वृद्धबालकान् जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमं ४३ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्म
३८ बंधुना शून्योस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक् ४४ इति श्रीभागवते महापुराणे युधिष्ठिरवितर्को
नाम चतुर्दशोऽध्यायः १४ सूत उवाच एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः नानाशंकास्पदं रू
पं कृष्णविश्लेषकर्शितः शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभा
षितुं १ कृच्छ्रेण संस्तभ्य शुचः पाणिनाऽमृज्य नेत्रयोः परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः सख्यं मैत्रीं
ग सौहृदं च सारथ्यादिषु संस्मरन् नृपमग्रजमित्याह बाष्पगद्गदया गिरा २ अर्जुन उवाच वंचितोहं महारा
ज हरिणा बंधुरूपिणा येन मेऽपहृतं तेजो देवविस्मापनं महत् ३

प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः तत्र हेतवः कृष्णविश्लेषणकर्शितः कृशः कृतः शोकेन हेतुना वदनं हृच्चेत एव सरो राम
जे शुष्यती वदनहृत्सरोजे यस्य सः हता प्रभा तेजो यस्य सः १ शुचः शोकाश्रूणि यान्युद्गच्छंति तानि नेत्रयोरेव संस्तभ्य ३८
गलितानि च पाणिना आमृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना समुन्नद्धमधिकं यत्प्रेम औत्कंठ्यं तेन कातरः
व्याकुलो नृपमित्याहेत्युत्तरेणान्वयः सख्यं हितोपित्वं मैत्रीं उपकारित्वं सुहृत्वं संबंधित्वं च बाष्पेण कंठावरोधाद्गद्गदया २
येन मां वंचयता देवानपि विस्मापयति यत् ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्य क्षणवियोगेन त्वा हदिय उद्धानां तेनाहमद्य मुषित इति सप्तम श्लोकस्य नतद्धेदेन संबंधः प्रियस्याप्यप्रियं त्वेदं दृष्टानां उक्तेन प्रणेन एव
पित्रादिः ४ श्रीकृष्णस्योपकारान् अनुस्मरति यत्संश्रयादिति दशभिः यस्य संश्रयात् कृत्वात् स्मरणकामनं दुर्मदः नाम तिमन्नानां तेजः प्रभा
वः हतः धनुर्ग्रहणेन च पश्चात् तदनुसञ्जीकृतं च तेन च मत्स्याप्यत्रोपरि भ्रमन् अनुविद्धः तत्सात्रिजित्य द्रौपदी प्राप्ता ५ तद्दति विस्मय
खांडवेंद्रस्य वेनं श्रद्धाद्वैत वानस्मि खांडवदाहे रक्षितेन मयेन कृतानाच सभा त्वष्ट्री अद्भुतशिल्परूपा मायाया यस्यां सा ते अध्वरे

यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा ४ यत्संश्रयाद्द्रुपदगेहमुपागता
नां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां तेजो हृतं खलु मया ऽभिहतश्च मत्स्यः सज्जीकृतेन धनुषाऽधिगता च कृष्णा
५ यत्संनिधावहमु खांडवमग्नये ऽदामिंद्रं च सामरगणं तरसा विजित्य लब्धा सभा मयकृताऽद्भुतशिल्पमा
या दिग्भ्य आहरन्नृपतयो बलिमध्वरे ते ६ यत्तेजसा नृपशिरोंघ्रिमहन्मखार्थं मार्योऽनुजस्तव गजायुत
सत्त्ववीर्यः तेनाहृताः प्रमथनाथमखाय भूपा यन्मोचितास्तदनयन्बलिमध्वरे ते ७ पत्न्यास्तवाधि
ने२ मखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकबरं कितवैः सभायां स्पृष्टं विकीर्य पदयोः पतिताश्रुमुख्या यस्त
योऽकृत हतेशविमुक्तकेशाः ८

योगराजसूय ६ अनंतर श्लोको विगीतस्तथापि व्याख्यायते नृपशिरस्सु अंघ्रिर्यस्य तं जरासंधं तत्ववानुजो भीमः मखार्थमहन्
हतवान् तन्निर्जयं विना राजसूयानुपपत्तेः गजायुतस्येव सत्त्वमुत्साहशक्तिः वीर्यं बलं च यस्य तं हत्वा प्रथमं नाथो महा ५२
भैरवः तस्य मखाय ये राजानस्तेनाहृताः ये यस्मान्मोचिताः तत्तस्मात्ते ऽध्वरे बलिमानीतवंतः ७ ये कितवैर्दुःशासनादिभिः
तव पत्न्याः कबरं विकीर्य उन्मुच्य स्पृष्टं आकृष्टं तेषां स्त्रियो हतेशाः अत एव वैधव्याद्विमुक्तकेशाः अकृत चकार कथंभूतं कब
मधि२ रं अधिमखं राजसूये कृत्स्नक्लृप्तः विहितो यो महाभिषेकः तेन श्लाघ्यतमं चारुरम्यं तत्कबरं स्मरणात्तदानीमेव प्राप्तस्य श्रीकृ
ष्णस्य नमने पादयोः पतिताश्रुमुख्यास्याः पत्न्याः पदद्वाद्वसापेक्षस्यापि पतितशब्दस्याश्रुपदेन समासो नित्यसापेक्षि
तत्वात् ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०१

शिष्याणामयुतस्यान्नं त्वं क्षो भुंक्षेयः॥ तस्माद्दुर्वाससो मोहतो॥ अरिगार्वितीयदुरंतक्लुप्तं शापलक्षणै तस्मात्सकाशात् त्रस्मान्वने
एत्य जुगोप किं कृत्वा शाकमेवान्नं तस्मिन्नवपात्रे वशिष्टं उपभुज्य जग्ध्वा यत्तत्तपर्यागात्सलिले निमग्ना मुनीनां संघ॥ त्रिलो
कीं तृप्ता समस्ता एवं हि भारते कथा कदाचिद्दुर्वाससा दुर्योधनेन नितिथ्यं कृत्वा नेनच परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्वाससः॥ शाप
त्पांडवानश्च युरिति मनसि विधाय दुर्योधनेनोक्तं युधिष्ठिरः सकुलमुख्यास्तत्स्यापि भवतैव मेव शिष्यायुतसहितेनाः
तिथिना भवितव्यं किंतु द्रौपदी यथा क्षुधानसीदेत्तथा तस्या भुक्तवत्यां तद्गृहं गंतव्यमिति ततः तथैव दुर्वाससि प्राप्ते यु
धिष्ठिरेण मा ध्याह्निकं कृत्वा आगम्यतामिति विज्ञापितो मुनिसंघः धर्मर्षेणायज्जले निमग्नास्तत्र चिंतातुरया द्रौ
पद्यास्मृतमात्रः श्रीकृष्णः तत्क्षणमेव भक्तवात्सल्यतया चागतः॥ तया चावदिति तदुक्ते भगवानुक्तं हे द्रौपदि अहं च बुभुक्षितो
स्मि प्रथमं मां भोजयेति तया चातिलज्जयोक्तं स्वामिन्मद्भोजनपर्यंतमक्षयमपन्नं सूर्यदत्तं स्थाल्यां मया च सर्वान्सं

योनानुगोपवनमस्यदुरंतकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः॥ शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीं तृप्तां
ममज्जसलिले विनिमग्नसंघः॥ ९ यत्तेजसाऽथ भगवान् युधिशूलपाणिर्विस्मापितः॥ स गिरिजोऽस्त्रमदान्निजं मे
अन्यपि चाह मम मुनेऽवकलेवरेण प्राप्तामहेंद्रभवने महदासनार्द्धं १० तत्रैव मे विहरतो भुजयुग्मदंड गांडीवलक्षण
मरातिवधाय देवाः॥ सेंद्राः श्रिताय दनुभाविनृमाजमीढ तेनाहमद्य मुषितः॥ पुरुषेण भूम्नो ११ यद्वांधवः॥ कुरु
वलो द्विमनंतपारमेकोरथेन ततरेऽहमतीर्यसत्त्व प्रत्याहृतं बहुधनं च मया परेषां तेजास्पदं मणिमयं च हृतं शि

भोज्यमुक्तं अतो नास्त्यन्नमिति तथाप्यतिनिर्बंधेन स्थालीमानाय्य तत्कंठलग्नं किंचिच्छाकान्नं प्राश्य पात्रे अथ भोक्तुं मुनिसंघमाह
येति स च तावता तृप्तः॥ तथा पाकभयेन पलायमान इति ९ गिरिजासहितो विस्मापितः॥ स निजं पाशुपतमस्त्रं अन्यपिलो
कपालाः॥ निजान्यस्त्राणि अदुः॥ अन्यदप्याश्चर्यमाह अमुनैव पितृ महदर्द्धं स्यासनार्द्धं १० तत्रैव स्वर्गे क्रीडतः॥ गांडीवलक्ष
णं चिन्हं यस्य तत् अरातयो निवातकवचादयस्तेषां वधार्थं आश्रितवंतः येनानुभावितं प्रभावयुक्तेन कृतं हे आजमीढ युधि
ष्ठिर तेन मुषितः वंचितोस्मि कथंभूतेन भूम्नानिजमहिमावस्थानेन ११ यद्वांधवः इत्यादि श्लोकत्रयस्यार्पितेन मुषितोऽहमि
ति पूर्वेणैव संबंधः॥ श्रीकृष्णबांधवएक एवाहं कौरवसैन्याद्धिं नास्त्यंतो गांभीर्येण पारं च देशतो यस्य तं तरे तीर्णवान् उत्तरगोग्र
हे यस्मिन् परेषां गोधनं प्रत्याहृतं परेषां च शिरोभ्यः सकाशात्तेजास्पदं उष्णीषरूपं मणिमयं मुकुटं रत्नरूपं च बहुधनं तान्याह नास्त्रे

४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहम्बाम्बनन्यायराजन्यवर्यास्तेषांरथमंडलेमेडिनासुभीष्मादीनीचमूषुमारथिरूपेणममायंचरः सन् हेविभोतेषांरथयूथपानांमा
युरादीनियादृशाहक्षेवआर्छगृहनवान् मनोमात्सुत्साहादिशक्तिं महाबलं ओजः अस्मादिकोशल्यं १३ यस्यदोषुभुजेषुमा
मांप्रणिहितंस्थापितंतेनैव गुणादिभिर्निरूपितानिप्रयुक्तान्यस्त्राणितानस्पृशंतिस्म गुरुर्द्रोणः त्रिगर्त्तः त्रिगर्त्तदेशाधिपतिः
सुशर्मा शल्यः शल्यः सैंधवः सिंधुदेशाधिपतिर्जयद्रथः वाह्लिकः शंतनोर्भ्राता अमोघामहिमायेषांतथान्यपिपाठांतरेपि
सएवार्थः प्राणीकाराकरणेप्यस्पर्शेदृष्टांतः न्हहरिदासेप्रल्हादेमिवेति १४ स्वापराधमनुस्मरन्संतप्यमान आह सौत्येसा
रथ्यकुमतिनाममयासंहृतः कुमतित्वमेवाह आत्मदइत्यादिना अभयायमोक्षाय भव्याः अष्टाः शंतावहा अश्वायस्पतंमां
जयद्रथवधेहिजलपानेविनाऽश्वाः श्रांताः तेनारथादवतीर्यबाणेभुवंभित्वाजलंसंपादितंमया तदायस्यानुभावेननिर
नौ २

योभीष्मकर्णगुरुशल्यचमूषदभ्रराजन्यवर्यरथमंडलमेडिनासु अग्रेचरोममविभोरथयूथपानामायुर्मनांसिचदृशासह
ओजआच्छित् १३ यद्दोःषुमाप्रणिहितंगुरुभीष्मकर्णद्रोणित्रिगर्त्तशल्यसैंधवबाह्लिकाद्यैः अस्त्राण्यमोघमहिमानिनि नि
रूपितानिनोपस्पृशुर्नृहरिदासमिवासुराणि १४ सौत्येवृतः कुमतिनाऽऽत्मदईश्वरोमेयत्पादपद्ममभयायभजं
तिभव्याः मांश्रांतवाहमरयोरथिनोभुविष्ठंनप्राहरन्यदनुभावनिरस्तचित्ताः १५ नर्माण्युदाररुचिरस्मितशो
भितानिहेपार्थहेऽर्जुनसखेकुरुनंदनेति संजल्पितानिनरदेवहृदिस्पृशानिस्मर्तुर्लुठंतिहृदयंममामाधवस्य
१६ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्यऋतवानितिविप्रलब्धः सख्युःसखेवपितृवत्तनयस्यसर्वंसे
हेमहान्महितयाकुमतेरघंमे १७

स्तचित्ताः अरयोमांनप्रहृतवंतः सौत्येसूत्येवृत्तइतिकुमतित्वे १५ हेनरदेवउदारगंभीरेरुचिरेयस्मिन्तेनशोभितानिनिर्माणिपरिहा
सवाक्यानि तथाकार्यप्रस्तावेषुहेपार्थेत्यादीनिमधुराक्षराणिसंजल्पितानिच हृदिस्पृशानिमनोज्ञानिमाधवस्ययानिता
निइदानींस्मर्तुर्ममहृदयंलुठंति लोठयंतिक्षोभयंति णिजभावआर्षः १६ विकत्थनंस्वगुणश्लाघनंशय्यादिषुऐक्यात् अव्य
भिचारात् केलाविद्यभिचारेद्व्याहेवयस्यऋतवान्सत्यमुक्तस्त्वमितिवक्तात्वयाविप्रलब्धः तिरस्कृतोपि अभूमानितिपा
ठ अभूद्देवाः सेवकाः सतियस्य असौमहानपिमयावयस्यइतिमत्वाविप्रलब्धः तिरस्कृतइत्यर्थः अतमानितिपाठवत्वाभा
वआर्षः मम अघं अपराधंअसहत महितयामहत्वेन एकपदे अतिमहत्वेनेत्यर्थः सख्युरघंसखेव तनयस्याघंपितेव १७॥

भतुमारू २
नौ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०१ त्वया शंकितं पराजयं चापि प्राप्तो ऽहमित्याह तेनेति सख्या हितः अतो हृदयेन शून्यः अंग हे राजन् उरुक्रमस्य परिग्रहं षोडशस
हस्रस्त्रीलक्षणं असद्भिर्गोपैः अबलायोषिदिव १८ श्रीकृष्णवियोग एवात्र हेतुर्नान्यदित्याह तदिति यतः येभ्यः ईशर
ख ४ रिक्तं शून्यं असत् अकार्यक्षमं असंभवं च विधाने ऽपि भस्मनि हुतमिव अतिप्रीतादपि कुहकात् मायाविनः सकाशा
त् राद्धं लब्धं यथा सम्यक् ऊषरे भूमौ उप्तं बीजमिव १९ सुहृत्पुरस्त्वयापृष्टानां नः सुहृदां मध्ये चत्वारः प
चावशेषिताः तत्र हेतुः विप्रशापत्वादि वारुणीमन्नमयीं अज्ञानतो मिवान्यान्यपरकामुष्टिभिर्निघ्नतो २० अ
वशेषिता इत्यनेनोक्तेहेतुकर्त्तारमाह त्रिभिः प्रायेणेति भावयंति २१ जलौकसां मत्स्यादीनां मध्ये महान्तः स्थूलाः ११ पालयंति

सो ऽहं नृपेन्द्र रहितः पुरुषोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः। अध्वन्युरुक्रमपरिग्रहमंग रक्षन् गोपैर
४१ सद्भिरबलेव विनिर्जितो ऽस्मि १८ तद्वै धनुस्त इषवः स रथो हयास्ते सो ऽहं रथी नृपतयो यत आनमंति
सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्यां १९ राजंस्त्वयाभिपृष्टानां सुहृदां नः सु
हृत्पुरे विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां अजानता
मिवान्योन्यं चतुःपंचावशेषिताः २० प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितं मिथो निघ्नंति भूतानि भावयंति वि ५
चयन्मिथः २१ जलौकसां जले यद्वन्महांतो ऽदंत्यणीयसः दुर्बलान्बलिनो राजन्महांतो बलिनो
मिथः एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः यदून्यदुभिरन्योन्यं भूभारान्संजहार ह २२ देश
कालार्थयुक्तानि हृत्तापोपशमानि च हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे २३ एवं चिंतयतो
जिष्णोः कृष्णपादसरोरुहं सौहार्देनातिगाढेन शांतासीद्विमला मतिः २४

अणीयसः सूक्ष्मान् यथा भक्षयंति भुवो भारभूतान् संहृतवान् २२ अतः परं वक्तुं न शक्नोमीति सूचयन्नाह देशकालोचि राम
तार्थयुक्तानि मनः पीडोपशमकराणि च गोविंदस्य वचनानि स्मरतो मम चित्तं हरंति आकर्षंति २३ एवमिति सूक्तिः ४१
क्तिः अतिदृढेन स्नेहेन चिंतयतो मतिः शांता विशोका विमला विरक्ता चासीत् २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतिर्विमलफलमाह वासुदेवानुध्यानेनपरिबृंहितंरंहोवेगोयस्याः तयानिर्मथिताउन्मूलिताअशेषाःकषायाः ग
कामाद्यायस्याः साधिषणाबुद्धिर्यस्यसः ज्ञानंपुनरप्यगमदित्युत्तरेणान्वयः कालेनकर्मभिः तमसाभोगाभिनि
वेशेनचरुद्धंआवृत्तंसत् २५ ज्ञानफलमाह विशोकइति एतद्देवशोकहेतुभावेनोपपादयति शोकास्पदंहिहेतुर्दे
हभ्रमः तस्यहेतुः तस्यलिंगंतस्यगुणाः तेषांअविद्या तत्रब्रह्मसंपत्त्याअहमोहमितिज्ञानेनलीनाप्रध्वस्ताअविद्या
यस्मिन् तेनैर्गुण्यंभवति नतुसुषुप्तिप्रलययोरिवविद्याशेषः तस्मान्नैर्गुण्यात्कृणकार्यलिंगनाशः अलिंगत्वाच्चअसं
भवः सम्यग्भागायभवतिपुनःपुनरितिसंभवः स्थूलशरीरंतद्रहितः ततअनपरिच्छेदाभावात्संछिन्नाद्वैतलक्ष

वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा भक्त्यानिर्मथिताशेषकषायधिषणोऽर्जुनः गीतंभगवताज्ञानंयत्त
त्संग्राममूर्द्धनि कालकर्मतमोरुद्धंपुनरध्यगमद्विभुः २५ विशोकोब्रह्मसंपत्त्यासंछिन्नद्वैतसंशयः ली
नप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः २६ निशम्यभगवन्मार्गंसंस्थांयदुकुलस्य च स्वःपथायमतिंचक्रे
निभृतात्मायुधिष्ठिरः २७ पृथाप्यनुश्रुत्यधनंजयोदितंनाशंयदूनांभगवद्गतिंचतां एकान्तभक्त्याभगवत्य
धोक्षजे निवेशितात्मोपरराम संसृतेः २८ ययाहरद्भुवोभारंतांतनुंविजहावजः कंटकंकंटकेनेवद्वयं
चापीशितुःसमं २९ यथामत्स्यादिरूपाणिधत्तेजह्याद्यथानटः भूभारःक्षपितोयेनजहौतच्चकलेव
रं ३० यदामुकुंदोभगवानिमांमहींजहौस्वतन्वाश्रवणीयसत्कथः तदाहरेवाप्रतिबुद्धचेतसामधर्महेतुः
कलिरन्ववर्तत ३१

णः संशयोभ्रमोयस्यसविशोकोजातइति २६ भगवतोमार्गमालक्ष्ययदुकुलस्यसंस्थांनाशं
श्रुत्वानारदोक्तंचानुस्मृत्यस्वःपथायस्वर्गमार्गायनिभृतात्मानिश्चलचित्तः २७ तांभगवद्गतिंदुर्विज्ञेयांवक्ष्यतिहिसोदामि
न्याथवाकाशयात्माहित्वाभ्रमंडलगतिनिलक्ष्यतेमर्त्यैस्तथाहस्मस्पंदपितृरीति संसृतेरुपरराम जीवन्मुक्ताबभूव देहंजहावि
तिवा २८ तदेवमुक्तमपियादवेभ्योभगवतोविलक्षणमनुष्ठानंत्सांम्यंचदत्तोमहमतोनत्रापिविलक्षणंस्पष्टयति द्वाभ्यां ययाया
दवरूपयातन्वाभुवोभारंकंटकेनकंटकमिवाहरत् यादवतनुः भूभारतनुश्चेतिद्वयमपीश्वरस्यसंहायत्वेनसममेव २९ अहि
स्मिन्नेवविशेषमाह यथेति तान्यपियथाधत्तेजहातिच तद्वदित्यर्थः यथानटोनिजरूपेणस्थितोरूपांतराणिधत्तेअंतर्दधातिचतथात
दपिकलेवरंजहौअंतर्धादित्यर्थः ३० युधिष्ठिरस्यस्वर्गारोहप्रसंगायकलिप्रवेशमाह यदेति स्वतन्वाजहौरचनेनाखिलवैकुंठारोहत् अ
तोदायदहस्तास्मिन्नेववत्सरहरितिलुप्तमतमस्सतपदं अप्रतिबुद्धचेतसामितिविवेकिनानतुप्रभुरित्युक्तं अन्वर्तत्तेतिपूर्वमेवांशेनप्रविष्ट

भा॰ प्र॰ १ युधो युधिष्ठिरः तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कथंभूतं लोभाद्यधर्मचक्रं यस्मिन् जिह्मं कौटिल्यं पर्यधात् तदुचितं परिधान
मकरोत् ३१ आत्मनः स्वस्य गुणैः सुसमं अनिसदृशं तोयं सवनः स्थितं समुद्रोदकमेव नीवी परिधानविशेषाय स्याः तस्याः भूमेः
पतित्वेनाभिषिक्तवान् ३२ वज्रं अनिरुद्धस्य पुत्रं निरूप्य कृत्वेत्यर्थः अपिबत आत्मन्यारोपयामास ईश्वरः समर्थः संछिन्नान्य
शेषाणि बंधनानि उपाधयो येन ३४ तदेव दर्शयति द्वाभ्यां वाचमित्युपलक्षणं सर्वेंद्रियाणि मनसि प्रविलापितवानित्यर्थः
तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् तं च प्राणं इतरे अपाने तेनाकर्षणात् अपानव्यापारत्वसर्गः तत्सहितमपानं म
त्योतदधिष्ठातृदेवतायां अनेनैव वागादिष्वपि तत्तत्कर्मसाहित्यं ज्ञेयं तं मृत्युं पंचत्वे पंचभूतानामैक्ये देहे देहस्यैव म

युधिष्ठिरस्तत्परिसर्पणं बुधः गृहे च राष्ट्रे च पुरे तदात्मनि विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमना
य पर्यधात् ३१ स्वराट् पौत्रं विनयिनमात्मनः सुसमं गुणैः तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ३२ मथु
४२ रायां तथा वज्रं शूरसेनपतिं ततः प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः विसृज्य तत्र तत्सर्वं दुकूलवल
याहिकं निर्ममो निरहंकारः संछिन्नाशेषबंधनः ३४ वाचं जुहाव मनसि तत्प्राण इतरे च तं मृत्यावपानं
सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ३५ त्रित्वे हुत्वाथ पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः सर्वमात्मन्यजुहवीद्ब्रह्म
ण्यात्मानमव्यये ३६ चीरवासो निराहारो बद्धवाङ्मुक्तमूर्द्धजः दर्शयन्नात्मनो रूपं जडोन्मत्तपि
शाचवत् अनवेक्षमाणो निरगादशृण्वन्बधिरो यथा ३७ उदीचीं प्रविवेशाशां गतपूर्वां महात्मभिः
हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ३८ सर्वे तमनु निर्जग्मुः भ्रातरः कृतनिश्चयाः कलिनाऽधर्ममित्रेण दृष्ट्वा स्पृ
ष्टाः प्रजा भुवि ३९ ते साधुकृतसर्वार्था ज्ञात्वाऽत्यंतिकमात्मनः मनसा धारयामासुर्वैकुंठचरणांबुजं ४०॥ राम २

त्युर्नाम सन इति भावितवानित्यर्थः अजोहवीदिति पङ् लुगंतात् लुङि रूपं ३५ त्रित्वे गुणत्रये तच्च त्रित्वं एकत्वे अविद्यायां
त्रिभुवन्धे अजुह वेदि २ सर्वं सर्वारोपहेतुमविद्यायां आत्मनि जीवे अजोहवीदित्यार्षं एवं शोधितमात्मानं ब्रह्मणि अव्यये कूटस्थे तं तस्मा राम
न्नत्र लय इत्यर्थः ३६ तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह चीरवासा इति सार्द्धाभ्यां बद्धवाक् मौनी अनवेक्ष ४२
माणः अनुजादिप्रतीक्षामकुर्वन् ३७ आशां दिशं गतपूर्वां पूर्वं प्रविष्टां यतः यां दिशं ३८ अधर्ममित्रेण सता
३९ असाधुकृताः सर्वे अर्थाः धर्मादयो यैः अतएव वैकुंठस्य चरणांबुजमेव आत्यंतिकं शरणं ज्ञात्वा ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंभूते पदे विधूतकल्मषाणी आस्थाने निवासस्थाने यत्रस्मिन् विरजेनात्मनैव गतिं प्रापुः नतु षाड्वाकेन लिंगेन गतवी विशे
षणं विरजेनात्मनैवावस्थान रूपां गतिं इति विधूतकल्मषाः प्रापुरिति ४१ तीर्थान्यपदन्यभासः श्रीकृष्णावेशेन हृत्स्थे चित्तमा
वेश्य पदे हृत्य परित्यज्य तत्तच्चित्त एव मनुत्तदानीं निजुमार्गतेः पित्तृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ४२ आत्मानप्रतिश्र
नपेक्षतां तदाज्ञात्वान्नमाप ४३ इति एवं पत्संप्रयाणे अलमतिशयेन स्वस्त्ययनं मंगलास्पदं अलं पवित्रं च ४४ इति प्रथ
मे पंचदशः ॥ ततश्च षोडशे भूमिधर्मयोः कलिखिन्नयोः संवादवर्णनं प्राप्तिः पालकस्य परीक्षितः द्विजवर्याणां शिक्ष

१८

तद्ध्यानोद्रिक्तया भक्त्या विशुद्धधिषणाः परे तस्मिन्नारायणपदे एकांतमतयो गतिं अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः
विधूतकल्मषा स्थानं विरजेनात्मनैव हि ४१ विदुरोपि परित्यज्य प्रभासे देहमात्मवान् कृष्णावेशेन तच्चित्तः पितृभिः स्वक्ष
यं ययौ ४२ द्रौपदी च तदाज्ञाय पतीनामनपेक्षतां वासुदेवे भगवति ह्येकांतमतिराप तं ४३ यः श्रद्धयैतद्भगव
त्प्रियाणां पांडोः सुतानामिति संप्रयाणं शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ४४ इति श्री
भागवते महापुराणे प्रथमस्कंधे स्वर्गारोहणं नाम पंचदशोध्यायः १५ सूत उवाच ततः परीक्षिद्द्विजवर्यशिक्षया
मरा४ महीं भागवतः शशास ह यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्र महद्गुणस्तथा १ स उत्तरस्य तनया
मुपयमे इरावतीं जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् २ आजहाराश्वमेधांस्त्रीन्गंगायां भूरि
दक्षिणान् शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ३ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् नृपलिंग
धरं शूद्रं घ्नंतं गोमिथुनं पदा ४ शौनक उवाच कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः नृदेवचिन्हधृक् शूद्रकः को
सौ गां यः पदाहनत् ५

या सूत्यां जन्मनि अभिजातकोविदाः जातकर्मविदः हे विप्र महतां गुणा यस्मिन् सः १
जनमेजयादीन् इत्यक्षराधिक्यं छांदसं २ आजहार कृतवानित्यर्थः शारद्वतं कृपं यत्र येष्वश्वमेधेषु ३ निजग्राह निगृहीतवान् ॥
कलिमवनिर्दिशति नृपेति ४ कस्य हेतोरिति अयमर्थः कलिं कस्मात् हेतोः केवलं निजग्राह नतु हतवान् यतोसौ शूद्रकः अतिकु
त्सितः यो गां पदाहनत् अहन्निति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

भा०प्र०१

५३

अस्यविश्रमाः पदांभोजयोर्योमकरंदः तंलिहंति आस्वादयंतियेतेषांसतांवाकथाश्रयमितिसमासान्निष्टस्यानुषंगः नहिक
थ्यतां नचेत्तु किमन्यैरसद्भिरालापैः यतुर्यैः आयुषोऽस्माकमसद्व्ययः ६ अस्माकमयंसत्रप्रयत्नोपिहरिकथामृतपानार्थएवेति
आहसार्द्धद्वाभ्यां क्षुद्रमल्पमायुर्येषां अतोमर्त्यानांमरणधर्मवतां तथापिऋतंसत्यंमोक्षमिच्छतां योमृत्युः सइहसत्र
शामित्रेदंशामित्रकर्मपशुहिंसनंतदर्थमुपहूतः ७ ततः किमतआह नकश्चिदितित्रिभिः ततोपिकिमतआह अहोनृलो
केहरिलीलामृतंवचः पीयेतत्वतदर्थंहरिलीलेवामृतंयस्मिन्नुततु ८ तदभावेदैवजीवनमित्याह मंदस्यअल्पसस्य

तत्कथ्यतां नोमहाभागयदिकृष्णकथाश्रयं अथवास्यपदांभोजमकरंदलिहांसतां किमन्यैरसदालापैरायु
षोयदसद्व्ययः ६ क्षुद्रायुषांनृणामंगमर्त्यानामृतमिच्छतां इहोपहूतोभगवान्मृत्युःशामित्रकर्मणि ७ नकश्चि
न्म्रियतेतावद्यावदास्तइहांतकः एतदर्थंहिभगवानाहूतःपरमर्षिभिः अहोनृलोकेपीयेतहरिलीलामृतं
वचः ८ मंदस्यमंदप्रज्ञस्यवयोमंदायुषश्चवै निद्रयाह्रियतेनक्तंदिवाचव्यर्थकर्मभिः ९ सूतउवाच मृगेंद्र

यदापरिक्षित्कुरुजांगलेवसत्कलिंप्रविष्टंनिजचक्रवर्तितेनिशम्यवा
र्तामनतिप्रियांततःशरासनंसंयुगशौंडिरादंदे १० स्वलंकृतंश्यामतुरं
गयोजितंरथं ×८

ध्वजमाश्रितःपुरात् वृतोरथाश्वद्विपपत्तियुक्तयास्वसेनयादिग्विजयायनिर्गतः ११ भद्राश्वंकेतुमालंच
भारतंचोत्तरान्कुरून् किंपुरुषादीनिसर्वाणिविजित्यजगृहेबलिं १२ तत्रतत्रोपशृण्वानःस्वपूर्वेषांमहा
त्मनां प्रगीयमानंचयशःकृष्णमाहात्म्यसूचकं आत्मानंचपरित्रातमश्वत्थाम्नोऽस्त्रतेजसः स्नेहं
चवृष्णिपार्थानांतेषांभक्तिंचकेशवे तेभ्यःपरमसंतुष्टःप्रीत्युज्जृंभितलोचनः महाधनानिवासांसिद
दौहारान्महात्मनाः १३

नक्तंरात्रौव्ययः आयुः ननुनिद्रयाह्रियते दिवाअह्निचव्यर्थस्वार्थकर्मभिरपह्रियते ९ तत्रतावत्कलिनिग्रहप्रसंगमा
ह यदानिजचक्रवर्तितेस्वसेनयापालितेदेशेकलिंप्रविष्टंश्रुत्वा तदातां अनतिप्रियांवार्तांकिंचित्प्रियांचयुद्धकौतुकसं
पत्तेः तांनिशम्यततःशरासनंदुष्टनिग्रहार्थमाददे संयुगेशौंडिर्युद्धेप्रगल्भः प्राक्तनैर्युद्धैर्गर्वितुल्यः १० ततःअदिग्विज
यायनिर्गतः ११ भद्राश्वादीनिपूर्वपश्चिमदक्षिणोत्तरतः समुद्रांतानिवर्षाणि मेरोःसर्वतइलावृतं ततउत्तरनील
रम्यकंहिरण्मयंच दक्षिणतोहरिवर्षंकिंपुरुषंच तानिविजित्य १२ प्रगीयमानंचयशः यशआदौनिःशृण्वन् तेभ्योददावि
तितृतीयेनान्वयः १३

राम

५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मः पदैकेन चरन्॥ एकेन पादेन चलनासंभवात् तत्पादिपादानामेकस्य अंशस्य विद्यमानत्वेनांशचतुष्टयं मिलित्वा एकः स्थर पादइति मुख्यचरणव्याख्या॥

किंच क्षितिपेषु पांडवेषु विष्णोर्योनि सारथ्यादीनि कर्माणि तानि शृणुत तथा विष्णो जगत्कर्तृः कीर्त्तिंच शृणुत नृपतिः परीक्षित् विष्णोश्चरणारविंदे भक्तिं करोति स्म पारषदमिति रेफषकारयोर्विश्लेषः छांदसः तत्र पार्षदं सभापतित्वं सेवनं चित्तानुवृत्तिः वीरासने रात्रौ खड्गहस्तस्य तिष्ठतो जागरणे १४ इत्ति मनुवर्त्तमानस्य सतः नातिदूरे शीघ्रमेव १५ धर्मो वृषरूपः विच्छायोहतप्रभां गां गोरूपां पृथ्वीं विवत्सामीशपत्नीं १६ तेन आत्मनो देहस्य यद्यपि बहिरामयान् लक्ष्य तेन तथापि अंतर्मध्ये आधिः पीडायस्यास्तां त्वां आलक्षये केन यतो विच्छायासि अतो ईषदुन्म्लायता विवर्णं भजता मुखेन लिंगेन तत्र कारणानि विकल्पयन् पृच्छति दूरे बंधुमित्यादिपंचभिः दूरे स्थितं बंधुं १७ त्रिभिः पादैर्न्यूनं अतएवैकपादं मामे वृषलैः शूद्रैः भोक्ष्यमाण पुरस्त्वमित्यपदविशेषणत्वात् हेतोः यज्ञभागा येषां तान् यज्ञाभावकारणात्तु १८

सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामैः स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे १४ तं स्पृशं वर्त्तमानस्य पूर्वेषां वृत्तिमन्वहं नातिदूरे किलाश्चर्यं यदासीत्तन्निबोधमे १५ धर्मः पदैकेन चरन् विच्छायामुपलभ्य गां पृच्छति स्माश्रुवदनां विवत्सामिव मातरं १६ कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन आलक्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंच मांब १७ पादैर्न्यूनं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणे आहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवत्यवर्षति १८ अरक्ष्यमाणाः स्त्रिय उर्विबालान् शोचस्यथो पुरुषादैरिवार्त्तान् वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् किं क्षत्रबंधून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि इतस्ततो वाशनपानवासः स्नानव्यवायोन्मुखजीवलोकं यद्वांब ते भूरिभरावतारकृतावतारस्य हरेर्धरित्रि अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबितानि १९

हे उर्वि पृथ्वि भर्त्तृभिः रक्ष्यमाणाः स्त्रियः पितृभिः तानि रक्ष्यमाणान् बालान् प्रत्युतैरेव पुरुषादैरिव निर्दयैः राजभिर्नृन्क्लिश्यन्नृ वाचं देवीं सरस्वतीं कुकर्माणि दुराचारे स्थितां कुलाग्र्यान् ब्राह्मणानुत्तमान् सेवकान् उपसृष्टान् व्याप्तान् अवरोपितानि उद्वासितानि व्यवायो मैथुनं इतस्ततः निषेधाभावे रेण सर्वतः अशनादिषून्मुखं प्रवर्त्तमानं जीवलोकं वा हे अंब मातः धरित्रि तेन वयोभूरिभारः तस्यावतारणार्थं कृतावतारस्य कर्माणि स्मरंती तेन विसृष्टा सती शोचसि निर्वाणं चिलंबितं आश्रितं येषु तानि पा

धर्मःपदैकेनचरन्विच्छायामुपलभ्य गां कंचमांब १८

भा॰प्र॰१ देश्व ते सौभाग्यं कालेन वा हृतं २० २१ भवान् जानात्येव तथापि वक्ष्यामीत्याह येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्जितोसि यत्र च सत्याद
यो गुणा न वियंति न क्षीयंते तेन श्रीनिवासेन रहितं लोकं शोचामीति षष्ठेनान्वयः १ सत्यं यथार्थभाषणं शौचं शुद्धत्वं दया पर
दुःखासहनं क्षान्तिः क्रोधप्राप्तौ चित्तसंयमनं त्यागः मुक्तहस्तता संतोषः अलंबुद्धिः आर्जवं अवक्रता शमो मनोनैश्चल्यं
दमो बाह्येंद्रियनैश्चल्यं तपः स्वधर्मः साम्यं अरिमित्राद्यभावः तितिक्षा परापराधसहनं उपरतिर्लाभप्राप्तावौदासीन्यं श्रु
तं शास्त्रविचारः ज्ञानमात्मविषयं विरक्तिर्वैतृष्ण्यं ऐश्वर्यं नियंतृत्वं शौर्यं संग्रामोत्साहः तेजः प्रभावः बलं दक्षत्वं स्मृतिः

इदं ममाचक्ष्व तवाधिमूलं वसुंधरे येन विकर्शितासि कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमंब सौभ
गं २० धरण्युवाच भवान् हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि २१ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः सत्यं शौ
४४ चं दया क्षान्तिस्त्यागः संतोष आर्जवं शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं ज्ञानं विरक्तिरैश्वर्यं तेजो ब शौर्यं३
लं स्मृतिः स्वातंत्र्यं कौशलं कांतिर्धैर्यं मार्दवमेव च प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः गांभीर्यं
स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः इमे चान्ये च भगवन्नित्या यत्र महागुणाः प्रार्थ्या महत्त्वमिच्छ
द्भिर्न वियंति स्म कर्हिचित् २ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं शोचामि रहितं लोकं पाप्मना क
लिनेक्षितं २२ आत्मानं चानुशोचामि भवंतं चामरोत्तमं देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमां

कर्तव्यार्थानुसंधानं स्वातंत्र्यं अपराधीनता कौशलं क्रियानिपुणता कांतिः सौंदर्यं धैर्यं अव्याकुलता मार्दवं चित्त
काठिन्यं प्रागल्भ्यं प्रतिभातिशयः प्रश्रयो विनयः शीलं सुस्वभावः सह ओजो बलानि मनसः ज्ञानेंद्रियाणां कर्मेंद्रियाणां राम
च पाटवानि भगः भोगास्पदत्वं गांभीर्यं अक्षोभ्यत्वं स्थैर्यं अचंचलता आस्तिक्यं श्रद्धा कीर्तिर्यशः मानः पूज्यत्वं ४४
अनहंकृतिः गर्वाभावः एते एकोनचत्वारिंशत् अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महांतो गुणा यस्मिन्नित्याः सह
जाः न वियंति न क्षीयंते स्म २ तेन गुणपात्रेण गुणालयेन पाप्मना पापहेतुना २२ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य विरहे दुःसहं इत्याह चतुर्भिः। ब्रह्मादयो यस्याः श्रियः अपांगमोक्षः स्वस्मिन् दृष्टिपातः। तत्कामाः संतः बहुतिथं बहुकालेन तपः स
मचरन् सम्यक्कृतवंतः तस्य भगवदंघ्रिरत्नैः। प्रपन्ना आश्रिता अपि सा श्रीः यस्य पादलावण्यं अलमनुरक्ता सती सेवते तस्य भगवतः।
श्रीमदंघ्रिः पदैः केतुध्वजः। अब्जादयः केता चिन्हा नियमाने। यद्वा अब्जादीनामाश्रयैः सम्यगलंकृतमंगं यस्याः। साहं ततो भग
वतो विभूतिसंपदं तु पत्त्यभ्य प्राप्य त्रीनु लोकान् अतिक्रम्य अरोचधाभिनवत्यस्मि पश्चात्तस्याः। विभूतेरंते नाशकाले प्राप्ते सति
तु त्स्मयंतीं गर्वं कुर्वाणं मां सव्यसृजत्त्यक्तवान् २४ किंच यो वै आसुरावंशोयषां तेषां राज्ञां अक्षौहिणीशतरूपं ममातिभरं भार
मपनीतवान् लीचक्रूनपदत्वात् दुःस्थं सत्तं पौरुषेण पुरुषकारेण आत्मनि स्वस्मिन्स पूर्णपदं सुस्थं संपादयन् लक्षणहेत्वोः।

ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्नाः सा श्रीः स्ववासमरविंदवनं विहाय यत्पादसौभगम
लं भजतेऽनुरक्ता तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी त्रीनत्यरोचमुपलभ्य त
तो विभूतिं लोकान्स मां व्यसृजदुत्स्मयंतीं तदंते २४ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्म
तंत्रः। त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदंगं का वा सहेत विरहं पुरुषोत्तमस्य प्रेमाव
लोकरुचिरस्मितवल्गुजल्पैः। स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम यदंघ्रिविटंकितायाः। २५
तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीं २६ इति श्रीभागवते महापु
५३ राणे प्रथमस्कंधे पृथ्वीधर्मसंवादो नाम षोडशोऽध्यायः। १६ तत्र गोमिथुनं राजा हन्यमानमनाथवत् दंडहस्तं
च वृषलं ददृशे नृपलांछनं १

सूत उवाच

क्रियाया इति हेतौ शतृप्रत्ययः। संपादयितुमित्यर्थः। अबिभ्रत् धृतवानित्यर्थः। तस्य विरहं का वा सहेत प्रेमावलोकः अन्यत् चिरस्मि
तं च वल्गुजल्पश्च तैः मधुमानिनीनां सत्यभामादीनां समानं गर्वसहितं स्थैर्यं स्तब्धत्वं यः अहरत् यस्याः अंघ्रिणा रजस्सु स्थितेन वि
टंकितायाः अलंकृतायाः मम सस्यादिमिषेण रोमोत्सवो भवति २५ कथयतोः। प्राचीं पूर्ववाहिनीं कुरुक्षेत्रे २६ इति श्रीप्रथमस्कंधे
षोडशः १६ ततः सप्तदशे राज्ञा कलेर्निग्रह उच्यते तत्रैव वीर्यभाजोऽपि वैराग्यं वक्तुं मंक्षु ते हन्यमाने नाऽप्यमाने १ हरिः सर्वं ॥

सनोः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰प्र॰१

नि॰२ व३

मृणालं पद्मकंदः तद्वद्धवलं भयातुमेहंतं मूत्रयंतं इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयन्निव प्रतिक्षणं क्षीयमाणांशः
तस्याप्यनिर्वाहात्कंपमानइवेंदर्शितं ३ धर्मंदुर्यान्त विरोधी क्षामां कृशां यवसं तृणं अत्रापि सस्या दिर्प्रसस्या दिप्रसव
क्षयाद्विवृत्तेव यज्ञाद्यभावान्कृशा। अतएव यज्ञभागमिच्छतीं पृथ्वीति सूचितं १ कार्तस्वरं सुवर्णं तन्मयः परिच्छदः परि
करो यस्य स्वर्णनिबद्धमित्यर्थः सज्जीकृतकार्मुकः २ हंसि घातयसि राज्ञाहमिति चिन्तयति नटइवेवेषमात्रेण नरदेवो
सि कर्मणातु अद्विजः शूद्रः ३ अशोच्यान्निरपराधानुरेहे सि प्रहरन्प्रहरसि सो शोच्यः सापराधोसि अतोवधमर्हसि ४
वृषंप्रत्याह त्वंचाकः स्वयमेव संभावयति किं कोपि देवो वृषरूपेणास्मान्परिखेदयन्वर्तसे ५ दोर्दंडः परिरंभितं

गोत्योऽस्य४

वृषं मृणाल धवलं मेहन्तमिव बिभ्यतं वेपमानं पदैकेन सीदन्तं शूद्रताडितं ३ गांच धर्मदुघां दीनां भृशं शूद्रपदाह
तां विवत्सामश्रुवदनां क्षामां यवसमिच्छतीं १ पप्रच्छरथमारूढः कार्तस्वरपरिच्छदः मेघगंभीरया वाचा समा
रोपितकार्मुकः २ कस्त्वं मच्छरणे लोके बलाद्धंस्यबलान्बली नरदेवोसि वेषेण नटवत्कर्मणाद्विजः ३ कस्त्वं
कृष्णे गते दूरं सह गांडीव धन्विना। शोच्योस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ४ त्वं वा मृणालधवलः पादैर्न्यूनः पदाचर
न् वृषरूपेण किं कश्चिद्देवो नः परिखेदयन् ५ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते भूतलेनुपतंत्यस्मिन् विना ते
प्राणिनां शुचः ६ मा सौरभेयानुशुचो व्येतु ते वृषलाद्भयं मा रोदीरम्ब भद्रं ते खलानां मयि शास्तरि ७
यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यंते साध्व्यसाधुभिः तस्य मत्तस्य नश्यंति कीर्तिरायुर्भगो गतिः ८
एष राज्ञां परो धर्मो ह्यार्तानामार्तिनिग्रहः अतएनं वधिष्यामि भूतद्रुहमसत्तमं ९ कोवृश्चत्तव पादांस्त्रीन्सौ
रभेय चतुष्पदः मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्तिनां १०

गु२

परिरंभितं वत्सुरक्षितं तेशुचः अश्रूणि विना अन्येषाम अश्रूणि नानुपतंति इति खेदहेतुत्वं दर्शितं ६ एवमुक्ते पुनरपि शोचन्तीं प्र
त्याह भोः सुरभेः पुत्र माशुचः शोकं माकुरु व्येतु अपयातु गां प्रत्याह अंब मातः शास्तरि मयि जीवति सति तेभद्रमेव अतो मा
रोदीः ७ मत्कृतार्थमेवैतन्न निष्पादितं नतु वापकारमित्याह यस्येति द्वाभ्यां हे साध्वीः सर्वाः याः काश्चित्प्रजाः असाधुभिः भगोभा
ग्यं गतिः परलोकः ८।९ च पुनरतिशोचन्तं वृषं प्रत्याह कः आवृश्चत् छिन्नवान् त्वादृशाः त्वद्विधाः दुःखिताः ।।१०।।

४५

राम

४५

गौरांगौरभयानुकंपी वैनुगतपथलानुध्ये गौरांगौरंच
भद्रं गौरवशालां मायिकाणारे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

को भद्रमस्तु आत्मानस्तव पादच्छेदेन वैरूप्यं कृतवन्तं कीर्तिं दूषयन्तीति तथा तं आख्याहि ११ ननु तदाख्यानकृतेन कथं भद्रं स्या
दित्यत आह यस्मादनागसि जने यः अघं दुःखं युंजन् कुर्वन्भवति अस्य एवंभूतस्य मत्तः सकाशात्सर्वत्रापि भयं भव
ति ततः साधूनां भद्रं भवेदिति १२ एतस्य दंडे अहमसमर्थ इति माशंकीरित्याह अनागःस्विति आगस्कृत् अपराधकर्ता
तस्यामर्त्यस्य देवस्यापि भुजं आहर्तास्मि आहरिष्यामि सांगदं इत्यनेन समूलमुत्पाट्याहरिष्यामीति दर्शितं १३ नन्वे
कस्य निग्रहेणान्यस्यानुग्रहे न वा किं प्रयोजनं तत्राह राज्ञो हीति आन्यान् धर्मिष्ठाननुशासतः दंडयतः १४ आर्त्तानामभयं
यस्मात्तद्वचो वा युक्तमुचितमेव १५ वयं तु यतः पुरुषात् प्राणिनां क्लेशा हेतवो भवेयुः तं पुरुषं न विजानीमः यतः

आख्याहि वृष भद्रं वः साधूनामकृतागसां आत्मवैरूप्यकर्तारं पार्थानां कीर्त्तिदूषणं ११ जनेऽनागस्यघं युं
जन्सर्वतोऽस्य च मद्भयं १२ अनागःस्विह भूतेषु य आगस्कृन्निरंकुशः आहर्तास्मि भुजं साक्षादमर्त्यस्या
पि सांगदं १३ राज्ञो हि परमो धर्मः स्वधर्मस्थानुपालनं शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह १४
धर्म उवाच एतद्वः पांडवेयानां युक्तमार्त्ताभयं वचः येषां गुणगणैः कृष्णो दौत्यादौ भगवान्कृतः १५
न वयं क्लेशबीजानि यतः स्युः पुरुषर्षभ पुरुषं तं विजानीमो वाक्यभेदविमोहिताः १६ केचिद्वि
कल्पवसना आहुरात्मानमात्मनः दैवमन्ये परे कर्म स्वभावमपरे प्रभुं १७ अप्रतर्क्यादनिर्दे
श्यादिति केष्वपि निश्चयः अत्रानुरूपं राजर्षे विमृश स्वमनीषया १८ एवं धर्मे प्रवदति स सम्रा
ड्द्विजसत्तम समाहितेन मनसा विखेदः पर्यचष्ट तं १९

साधूनां भद्रमेव स्यादसाधुदमने कृते

वादीनां वाक्यभेदैर्विमोहिताः १६ वाक्यभेदानेवाह विकल्पैर्भेदैर्वसनं आच्छादनं येषां योगिनस्ते आत्मानमेवात्मनः प्रभुं सु
खदुःखप्रदमाहुः तदुक्तं आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मन इति यद्वा विकल्पैः कुतर्कैः प्राह नानास्तिकाः एवं हि तद्व
देति न तावद्देवतादीनां प्रभुत्वं कर्माधीनत्वात् न च कर्मणः स्वाधीनत्वात् अतः स्वयमेव प्रभुर्न चान्यः कश्चिदिति अन्ये दैवज्ञाः
दैवं ग्रहादिरूपं देवता परे तु मीमांसकाः कर्म अपरे लोकायतिकाः स्वभाव १७ केष्वपि सेश्वरसांख्येष्वपि इदं निश्चितं
इति सिद्धांतस्त्वं अप्रतर्क्यात् मनोगोचरात् अनिर्देश्यात् वचनागोचरात् परमेश्वरात्सर्वं भवतीति स्वयं विचारयस्व बुद्ध्या १८ वि

भा॰प्र॰१ अनिर्द्दोरितमिवब्रुवन् घातकेजानन्नपि न सूचयेदिति एवंरूपं धर्मं ब्रवीषि अतो धर्मोसि सूचने को दोषइत्यत आह स्थानीन
रकादि २० यद्वा अज्ञानादप्यकथनं भवतीत्याह अथवेति देवस्य मायया गतिर्विषय घातकलक्षणा रतिर्भूतानां चेतसो वा
चसश्चागोचरे सुज्ञया न भवतीति निश्चयः २१ धर्मोसीति विज्ञातवान् स्वपादानुवादेन व्यवस्थामाह। तप इति द्वाभ्यां
अधर्मपादैस्त्रिभिरंशैस्तव त्रयः पादा भग्नाः स्मयो विस्मयः २२ इदानीं कलौ हे धर्म ते पादः चतुर्थोंशः तत्रा
पि सत्यमेवास्ति यतः सत्यात् भवान् आत्मानं निवर्त्तयेत् कथंचिन्निर्वाहयेत् यद्वा पुरुषस्तोसाधयेत् तमपि पादं अनृते

धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक् यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् २० अथवा देवमायाया नू
नं गतिरगोचरा चेतसो वचसश्चापि भूतानामिति निश्चयः २१ तपः शौचं दया सत्यमिति पादाः प्रकीर्त्ति
ताः अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव २२ इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः तं जिघृक्षत्य
धर्मोयमनृतेनैधितः कलिः इयं च भूमिर्भगवता न्यासितोरुभरा सती श्रीमद्भिस्तत्पदन्यासैः स
र्वतः कृतकौतुका शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता सती अब्रह्मण्या नृपव्याजाः शूद्रा भो
क्ष्यंति मामिति २४ इति धर्मं महीं चैव सांत्वयित्वा महारथः निशातमाददे खड्गं कलयेऽधर्महेत
वे २५ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं तत्पादमूलं शिरसा समगाद्भयविह्वलः २६

४६ न संवर्द्धितः कलिरूपोयमधर्मो ग्रहीतुमिच्छति तत्रेयं स्थितिः कृतयुगप्रथमं संपूर्णं चतुष्पाद्धर्मः त्रेतायां चतुर्णा
मपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृतेन सत्यमित्येवं चतुर्थांशो हीयते द्वापरे खंडं कलौ
चतुर्थांशः वशिष्यते सोप्यनेनैष्यतीति २२ न्यासितः अन्योन्य हारेणावतारितः उरुर्भारो भारो यस्याः कृतं कौ
तुकं मंगलं यस्याः सा अश्रुकला अश्रुकणान् मुंचतीत्यश्रुकला तेन त्यक्ता सती शूद्रा भोक्ष्यंति मामिति शोच
ति २४ निशातं निशितं अधर्मस्य हेतवे कलिं हंतुमित्यर्थः २५ अभिप्रेत्य ज्ञात्वा २६ श्रीहरिः श्री

राम
४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरण्य। आ। आयाहि। श्लोक्य। सत्कीर्त्यर्हः २७ गुडाकेशो ऽर्जुनः तस्य यशो धराणि यशोधर हे अर्जुन तेषां तान् प्रतिबद्धाञ्जलिर्ये
न तस्य ते किंतु कथंचन केनापि पीशेन न वर्त्तितव्यं यस्मात्त्वमधर्मस्य बधः २८ तदेवाह राजदेहेषु वर्त्तमानं त्वामनुस
वेत। प्रवृत्त। अनार्यदौर्जन्यं अंहः स्वधर्मत्याग। ज्येष्ठा अलक्ष्मी। मायाकपटं २९ ननु तस्मात् वर्त्तितव्यं वर्त्तितु
मर्हं ब्रह्मावर्त्तदेशो यज्ञस्य वितानं विस्तारः तत्र विज्ञ। निपुण। ३० इज्या यागस्तद्रूपा मूर्त्तिर्यस्य स क्षेमं कामं अ
नन्विंद्रादयोदेवाइज्यंते ननु हरिसत्राह एषः स्थावरादीनामात्मेति तथापि जीववन्नपरिछिन्नि स्तातु। त्याह
अंतर्बहिरिति यथा वायुः प्राणरूपेणांतः स्थापि बहिरप्यस्ति तद्वत् सर्वात्मा यो मीश्वरोपीति ३१ उद्यतोऽसित
प तितं पादयोर्वीर। कृपया दीनवत्सल। शरण्यो नावधी श्लोक्य आह चेदं हसन्निव २७ राज्ञो
वाच नतेगुडाकेशयशोधराणां बद्धांजलीनां भयमस्ति किंचित् न वर्त्तितव्यं भवता कथंचन क्षे
त्रे मदीये त्वमधर्मबंधः २८ त्वां वर्त्तमानं नरदेववदेहेष्वनु प्रवृत्तो यमधर्मपूग। लोभोऽनृतं चौ
र्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभ। २९ न वर्त्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्त्ति
तव्यं ब्रह्मावर्त्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ३० यस्मिन्हरिर्भगवानिज्यमान
इज्यात्मूर्त्तिर्यजतां शं तनोति कामानमोघान् स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा ३१ सूत उवाच
परीक्षितैवमादिष्टः स कलिर्जातवेपथुः तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतं ३२ यत्र क्वचन व
त्स्यामि सार्वभौम तवाज्ञया लक्षये तत्र तत्रापि त्वामात्तेषुशरासनं ३३ तन्मे धर्मभृतां श्रेष्ठ स्था
नं निर्देष्टुमर्हसि यत्रैव नियतो वत्स्य आतिष्ठंस्तेऽनुशासनं ३४ श्रीराम श्रीराम श्रीराम॥

घत रवड्गं दंडपाणि यमं उद्यतं उ घ्नतं ३२ अत्र न वस्तव्यमिति यातवाज्ञा तथा यत्र क्वापि वत्स्यामि किंतु
तत्र तत्रापि आत्तः गृहीतः इषुः शरासनं च येन तं त्वामेव लक्षये ३३ ततस्मान्नियतो निश्चलो वत्स्यामि ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पानेमद्यादेः सूनाः प्राणिवधाः द्यूतेऽनृतं पाने दंभे पूर्वमद्रोहयानाशकत्वेनोक्ताः अत्रानुगर्वेणारागेणो नाशकत्वेन स्त्रीषु संग:
हिंसायां क्रौर्यं दयानाशकमिति ज्ञेयं यद्यपि सर्वं सर्वत्र संभवति तथापि प्राधान्येनानृतादीनां द्यूतादिषु यथासंख्यं ज्ञेयं
द्वादशस्कंधे तु सत्यदयातपोदानमिति पादविभागः पूर्वत्र दानशब्देन शौचमेवोक्तं मनः शुद्धिरूपत्वात् तथाभयनोदान
स्य त्रेतायां धर्मपादानां चतुर्थांशो हीयते शनैः अधर्मपादैरनृतहिंसासंतोषविग्रहैरित्यत्र च असंतोषशब्देन च तस्य
हेतुर्गर्वो लक्ष्यते विग्रहशब्देन चानमित्रितु स्त्रीसंग इत्यविशेषः ३४ चतुर्विधस्यापि केत्रैवावस्थाने देहीति पुनर्या

सूत उवाच अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ३५
पुनश्च याचमानाय जातरूपमदात्प्रभुः ततोऽनृतं मदं कामं रजो वैरं च पंचमं ३६ अमूनि पंच स्थाना
नि ह्यधर्मप्रभवः कलिः औत्तरेयेण दत्तानि न्यवसत्तन्निदेशकृत् ३७ अथैतानि न सेवेत बुभूषुः पुरुषः
क्वचित् विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ३८ वृषस्य नष्टांस्त्रीन्पादान् तपः शौचं दयामिति
प्रतिसंदध आश्वास्य महीं च समवर्द्धयत् ३९ स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं पितामहेनो
पन्यस्तं राज्ञारण्यं विविक्षता ४० आस्तेऽधुना स राजर्षिः कौरवेंद्रश्रियोल्लसन् गजाह्वये महाभाग
श्चक्रवर्ती बृहच्छ्रवाः ४१ इत्थंभूतानुभावोयमभिमन्युसुतो नृपः क्षौणीं यूयं सत्राय दीक्षिताः ४२
इति श्री भागवते महापुराणे प्रथमस्कंधे कलिनिग्रहो नाम सप्तदशोऽध्यायः १७ श्रीहरिः समर्थः
यस्य पालयतः २

याचमानाय जातरूपं सुवर्णं दत्तवान् ततः सुवर्णदानानुषंगेणानृतं मदं काममिति स्त्रीषु संग रजइति रजोमूलो हिंसा ए
तानि चत्वारि पंचमं वैरं चाहादिति ३६ अमूनि अमीषु स्थानेषु न्यवसदित्यर्थः ३७ अथ इति हेतोः बुभूषुः उत्क
र्षं तु मिच्छुः स्त्रीसुवर्णयोरसेवनं नाम तयोरनासक्तिः ३८ एवं कलिं निगृह्य वृषस्य पादानन्यानपि संदधे तपः श
हो निप्रवर्त्तितवानित्यर्थः ३९ युष्मदीयसत्रप्रवृत्तिरपि तत्प्रभावादेवेत्याह त्रिभिः एतर्हि इदानीं युधिष्ठिरेणा
रण्यं प्रवेष्टुमिच्छता उपन्यस्तं समर्पितं आसनं मध्यास्ते ४० अधुना पालयतः इति च वर्त्तमानसामीप्ये वर्त्तमानसन्नि
धौ ४१ स्वेत्यध्याहारो वा ४१ सत्राय सत्रं कर्तुं दीक्षिताः दीक्षां कृतवंतः ४२
इति प्रथमे सप्तदशोऽध्यायः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४७ त्यर्पिताशयः॥उत्सृज्यसर्वतः४

राज्ञस्तु शद्देशेन तस्य ब्रह्मशापो निरूप्यते स चानुग्रह एवास्य जातो वैराग्यमावहन् परीक्षितो निर्याणं भक्त्याश्चर्यं वक्तुं तत्संभावनायतज्जन्माश्चर्यमनुस्मारयति योवाइति विप्लुष्टो निर्दग्धः सन् ब्रह्मकोपादुत्थितात् तक्षकात् यः प्राणविप्लवः प्राणनाशस्तस्माद्दुरुभयं तस्मान्न संमुमोह अत्र हेतुः यस्तु भगवत्यर्पिताशय इति १ किंतु उत्सृज्येति वैयासकेः शुकस्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थितिस्तत्त्वं येन सः २ न चैतच्चित्रमित्याह उत्तमश्लोकस्य वार्त्तानां येषु अतएव नित्यं तत्कथामृतरूपममृतं जुषतां संभ्रमो नस्यात् ३ तस्मिन्नाजिसुतरां तन्न चित्रमित्याशयेनाह तावदिति अभि

सूत उवाच योवैद्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः ब्रह्मकोपोत्थिता
द्यस्तु तक्षकात्प्राणविप्लवात् नसंमुमोहोरुभयाद्भगव[illegible]संगं विज्ञाताजितसंस्थि
तिः वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरं २ नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतं स्यात्संभ्रमोंतका
लेपि स्मरतां तत्पदांबुजं ३ तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः यावदीशो महानुर्व्यामाभिमन्यव एकरा
ट् ४ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः ५ नानुद्वेष्टि कलिं
सम्राट् सारंग इव सारभुक् कुशलान्याशु सिद्ध्यंति नेतराणि कृतानि यत् ६ किंनु बालेषु शूरेण कलिना
धीरभीरुणा अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्त्तते ७ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया वासुदेवक
थोपेतमाख्यानं यदपृच्छत ८

मन्योः पुत्रः एकराट् चक्रवर्ती ईशः पतिः तावत् ४ ननु तदा कलेः प्रवेश एवास्तु प्रविष्टोपि न प्रभवेदिति कुतः तत्राह यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीं अनुवृत्तः प्रविष्टः अधर्मस्य प्रभवो यस्मिन् ५ नन्वधर्महेतुं कलिं सर्वथा किं न हतवांस्तत्राह नानुद्वेष्टीति सारंगो भ्रमर इव सारग्राही सारमाह यत्र यस्मिन्कुशलानि पुण्यानि आशु संकल्पमात्रेण फलंति इतराणि पापानि आशु न सिद्ध्यंति यत्र यानि कृतान्येव सिद्ध्यंति न तु संकल्पितमात्राणीति ६ ननु दोषाधिक्याद्द्वेष एव युक्तः न धीरेषु तस्याकिंचित्करत्वादित्याह किंन्विति न भवेत् बालेषु अधीरेषु अप्रमत्तः अवहितः सन्यो वृक इव वर्त्तते ७ पारीक्षितमाख्यानं अपृच्छ

न्ये२

भा० प्र०

४८ किं बहुनानेनैरेनाथ देवकर्तव्यमिति सर्वशास्त्रार्थसारं कथयति यायाइति कथनीयान्युरूणि कर्माणि यस्य तस्य गणकर्मवि
षयाः बभूषुभिः सद्भावमिच्छद्भिः ९ एवं पुनर्विस्तरेण कथनार्थं सूतोक्तिसत्संगं चाभिनंदति सूतेति त्रिभिः शाश्वतीः समाः
अनंतं वैतामत्सरान्जीव अत्यंतसंयोगे द्वितीया विशुद्धं यथा कीर्त्तयसि तच्चास्माकं मर्त्यानाममृतं मरणान्निवर्त्तकं १०
किंच अस्मिन्कर्मणि सत्रे अनाश्वासे अविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् धूमेन धूम्रः विवर्ण
आत्मा शरीरं येषां तानान् अस्मानित्यर्थः कर्मणि पुष्टा आसवं मकरंदं मधुरं मधु ११ भगवत्संगिनो चिह्न भक्ता तेषां सं
गस्य पंयाल्लवः अत्यल्पकः कालस्तेनापि स्वर्गं न तुलयाम समं न पश्याम नचापवर्गं संभावनायां लोट् मर्त्यानीतु

याया: कथा भगवतः कथनीयोरुकर्मणः गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषुभिः ९ ऋषय ऊचुः सूतजी
वसमाः सौम्य शाश्वतीर्विशदं यशः यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः १० कर्मण्यस्मिन्ननाश्वासे धू
मधूम्रात्मनां भवान् आपाययति गोविंद पादपद्मासवं मधु ११ तुलयाम लवेनापि न स्वर्गं नापुनर्भवं भगवत्सं वे२
गिसंगस्य मर्त्यानां किमुताशिषः १२ को नाम तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य नांतं गुणानामगुणस्य
जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः १३ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य हरेरुदारं चरितं
विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् १४ सवै महाभागवतः परीक्षित् येनापवर्गाख्यमदभ्रबुद्धिः ज्ञानेन वै

य्यासाकिशोराज्ञाप्राप्यान्तुलयामेति किमुतवक्तव्यं १२ एवं सत्संगमभिनंद्य श्रवणोत्सुकतामाविः कुर्वंति कोनामेति रसवित् रस
ज्ञः महत्तमानामेकांतेन परं अयनं आश्रयो यः तस्य कथायां अगुणस्य प्राकृतगुणरहितस्य कल्याणगुणानामंतं ये योगेश्व
रास्तेपि न जग्मुः एतावंत इति न परिगणयांचक्रुः भवः शिवः पद्मजो ब्रह्मा च मुख्यो येषां ते १३ नोऽस्माकं मध्ये भगवान्प्र
धानः सेव्यो यस्य स भवान् शुश्रूषतां हरेश्चरितं विस्तारयतु १४ तत्र परीक्षित्संवादं कथयेत्याह सवाइति द्वाभ्यां ॥ शुक २
वैयासकिना शब्दितेन कथितेन येन ज्ञानेन ज्ञानसाधनेन अपवर्गाख्यां यस्य तत् खगेंद्रध्वजस्य हरेः पादमूलं स्वरूपं भेजे १५

[illegible]

४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जन्मनः सफलं ८

ततृअसंवृतार्थं यथा तथाख्याहि नंतस्य निर्दिशति परिक्षितेकथितं परीक्षिते आख्याने श्रीभागवते पुराणे परं पुण्यं सत्त्वशो
धकं अत्यद्भुतयोगनिष्ठायस्य अनंतस्याचरितैरुपपन्नं युक्तं अत एव भागवतानामभिरामं प्रियं एतैर्विशेषणैः कर्मज्ञा
नभक्तियोगप्रकाशकत्वं दर्शितं १६ श्रीभागवतव्याख्यानलब्धप्रसंगमहतामादरपात्रमात्मानं श्लाघते द्वाभ्यां अहो
इत्याश्चर्ये हर्ष इति हर्षे वयमिति बहुवचनं श्लाघायां प्रतिलोमजा अपि श्रेष्ठजन्मानः आसम जाताः वृद्धानामनुवृ
त्या आदरेण ज्ञानवृद्धः शुकः तस्य सेवयेति वा यतो दुःकुलत्वनिमित्तमाधिं च मनःपीडां महत्तमानामभिधान
योगः लौकिकोपि संभाषणलक्षणः संबंधः विधुनोति अपनयति कुतस्तुनः किंपुनर्वक्तव्यं तस्यानंतस्य नामगृण

तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं आख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभि
रामं १६ सूत उवाच अहो वयं जन्मभृतोद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः दौष्कुल्यमाधिं विधु
नोति शीघ्रं महत्तमानामभिधानयोगः कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य योऽनंत
शक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः १७ एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायन
स्य हित्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेऽनभीप्सोः १८ अथापि यत्पादनखावसृष्टं ज
गद्विरिंचोपहृतार्हणांभः सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः १९

स्प॰ २

नेषु पुंसो महत्तमानामभिधानयोगो दौष्कुल्यं विधुनोतीति यद्वा नामगृणतः कुतः पुनः दौष्कुल्यमिति यद्वा गृणतः पुंसे
तस्य नाम दौष्कुल्यं विधुनोतीति किं वक्तव्यमिति के मुख्यमवाह अनंताः शक्तयो यस्य स्वतोप्यनंतः किंच महत्सु गुणा
यस्य महद्गुणः तस्य भावः तस्मात् यं गुणतोप्यनंतमाहुः १७ एतत्प्रपंचयति त्रिभिः एतावतेति तस्य यदसाम्यं अनतिशा
यनं च गुणैः तस्मात्समानाधिकं च नास्तीत्यस्यार्थस्य ज्ञानं एतावता सूचितेन अलं पर्याप्तं किं तस्मादिस्तारे नावतु श्रा
त्यो लितदेवाह इतरान्ब्रह्मादीन् प्रार्थयमानान् हित्वा विभूतिर्लक्ष्मीः अनभीप्सोरपि यस्यांघ्रिरेणुं सेवत इति १८ अथे
स्वादवसृष्टं निःसृतमपि विरिंचेनोपहृतं समर्पितं अर्हणांभः अर्घोदकं ईशसहितं जगत्पुनाति विरिंचोपहृतं सेशमिति च तत्रैया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०१ धीरैः संनद्धुं धृतं अत्यंतपरमकाष्ठापन्नं नदाह यस्मिन्नहिंसातपशमश्च स्वाभाविको धर्मः २० एवं स्वभावसमभिनं घपारीक्षि
तो पारव्यानेवक्तुमाह अहं हीति अर्यमणः हे सूर्य तपो मूर्तयः अत्रपावानात्मावगमः ममज्ञानं नावदाचक्षे प्रवक्ष्यामि न
थाहि यथापक्षिणो नभः आत्मसंस्वरूपं तु रूपमेवात्मतति न तु स्वं तथाविपश्चितोपि विद्मार्गं तिल्लीलां समं स्वमत्य
नुरूपमेव वदंतीत्यर्थः २१ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं २२ तस्मिंश्च मुनि शमीकं प्रतिरुद्धाः प्रत्याहृताः इंद्रि
याहेयायेन तं अत एवोपारतं स्थानत्रयात् जाग्रदादिलक्षणात् परतुरीयं पदं प्राप्तं अत एव ब्रह्मभूतत्वादविक्रियं विप्र

यत्रानुरक्ताः सहसैव धीराः व्यपोह्य देहादिषु संगमूढं व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः
२० अहं हि पृष्टोऽर्यमणो भवद्भिराचक्ष आत्मावगमोऽत्र यावान् नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णु
गतिं विपश्चितः २१ एकदा धनुरुद्यम्य विचरन्मृगयां वने मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं जला
४९ शयमचक्षाणः प्रविवेश तमाश्रमं २२ ददर्श मुनिमासीनं शांतं मीलितलोचनं प्रतिरुद्धेंद्रियप्राणमनोबुद्धि
मुपारतं स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं विप्रकीर्णजटाछन्नं रौरवेणाजिनेन च २३ विशुष्यत्ता
लुरुदकं तथाभूतमयाचत अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः अवज्ञातमिवात्मानं मन्यमानश्चु
कोप ह २५ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च २६ स तु ब्रह्मऋषेरं स्कं२ रा२
सेगतो मुमुरगं रुषा विनिर्गच्छन्धनुष्कोट्या निधाय पुरमागमत् २७ एष किं निभृताशेषकरणो मी
लितेक्षणः मृषासमाधिराहोस्वित्किं नु स्यात्क्षत्रबंधुभिः २८ श्रीहरि श्रीरामकृष्णवासुदेव

सनं२ कीर्णाभिर्जटाभिराछन्नं रुरुर्मृगविशेषः तस्य चर्मणा चाछन्नं २३ विशोषिणशुष्यत्तालुर्यस्य सः तथाभूतं मुनिं २४ नल राम
ब्धं तृणं तृणाभूमिरुपवेशनस्थानं च येन सः न संप्राप्तः अर्घः सूनृतं प्रियवचनं च येन सः २५ मत्सरः स्पर्धा उत्कर्षासहनं २६ ४९
गतासुं मृतं धनुष्कोट्या चापाग्रेण २७ सर्पनिधानेन राज्ञोऽभिप्रायमाह एष किं प्रत्याहृतसर्वेंद्रियः सन् मीलितेक्षणः स्थितः
यद्वा क्षत्रबंधुभिरागतैर्वा किं नु स्यादित्यवज्ञया मृषा समाधिः संनिनिजिज्ञासयेत्यर्थः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग०प्र०
९

श्रीः

तस्यपुत्रः श्रृंगीनाम अत्यंदुःखं तत्रअर्भकमध्ये २९ पालानांराज्ञांपार्वेगापुष्टानी अधर्ममेवदर्शेति स्वामिनिदासा
नांयथैवपापाचरणे बलिभुजांकाकानामिवशुनामिवचेति ३० दासत्वेदर्शयति ब्राह्मणेरिति सभांडभांडएव
स्थिते ३१ ततनंदनंतरं अहंशास्मिदंडयामि ३२ इतिवयस्यानुत्कोरोषेणताम्रेअक्षिणीयस्यसः कोशिकोनदीत
स्याः अपः संधिरार्षः वाग्वज्रंशापमिति ३३ इत्येवंसर्पेनिः क्षेपेण दंक्ष्यंति भक्षयिष्यति पाठांतरेभस्मीकरि
ष्यति स्मेति पादपूरणे कुलस्यांगारतुल्य मेमया ततेनिरूक्षमार्ष ३४ गलेसर्पकोलेवरंयस्यतत्तु वसमासः

तस्यपुत्रोऽतितेजस्वीविहरन्बालकोऽर्भकैः राज्ञांधप्रपितेनाल श्रुत्वातत्रेदमब्रवीत् २९ अहोअधर्मः
पालानांपार्वणाबलिभुजामिव स्वामिन्यघंयद्दासानांद्वारपालानांशुनामिव ३० ब्राह्मणैः क्षत्रबंधुर्हि द्वार
पालोनिरूपितः सकथंतद्गृहेदास्यः सभांडभोक्तुमर्हति ३१ कृष्णेगतेभगवतिशास्तर्युत्पथगामिनां
तद्भिन्नसेतूनद्याहंशास्मिपश्यतमेबलं ३२ इत्युक्त्वारोषताम्राक्षोवयस्यानृषिबालकान् कोशि
क्यापउपस्पृश्यवाग्वज्रंविससर्जह ३३ इतिलंघितमर्यादंतक्षकः सप्तमेहनि दंक्ष्यतिस्मकुलां
गारंचोदितोमेततद्रुहं ३४ ततोऽभ्येत्याश्रमंबालोगलेसर्पकलेवरं पितरंवीक्ष्यदुःखार्तोमुक्त
३५ कंठोरुरोदह ३५ सवाआंगिरसोब्रह्मन्श्रुत्वासुतविलापनं उन्मील्यशनकैर्नेत्रेदृष्ट्वास्वांसेमृतोरगं ४
३६ निशम्यशप्तमतदर्हनरेंद्रंसब्राह्मणोनात्मजमभ्यनंदत् अहोबतांहोमहदद्यतेकृतमल्पी
यसिद्रोहउरुर्दमोधृतः ३७ नवैनृभिर्नरदेवंपराख्यंसंमातुमर्हस्यविपक्वबुद्धे यत्तेजसादुर्विषहे
णगुप्ताविंदंतिभद्राण्यकुतोभयाः प्रजाः ३८
मुक्तकंठः उच्चैरित्यर्थः ३५ तंसर्पविसृज्यकलापकारः कृतः ३६ अनभिनंदनवाक्यंअहोइत्यादि बतकष्टं ते
त्वयामहत्पापकृतंद्रोहे अपराधदमोदंडः ३७ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प्र०१ परः विष्णुः रिन्त्या रव्या रव्यातिर्यस्य तं नरदेवं नृभिः समातुं सं दृष्टुं ३८ अरक्ष्यमाणेऽदृश्यमाणे अविवरूथवत् मे
षसंघवत् ३९ नष्टो नाथो यस्य लोकस्य तस्य वसोः वसुनो धनस्य विलुंपकात् पह तु श्चौरादेर्हेतोर्यत्पापं भविष्य
तितत् अस्मान्निमित्तत्वादस्मानुपैष्यति अनन्वयं सवंधशून्यमेव तदेव पापं दर्शयति परस्परमिति शपंति
परुषं वदंति पश्वादीन्वृंजते अपहरंति पुरुदस्यवः श्चोरबहुलाः ४० आर्यधर्मः सदाचारः शुनां कपीनामि

नैवेन्द्र भिर्नरदेवं परारव्यं समातुमर्हस्यविपक्वबुद्धे यत्तेजसा दुर्विषहेण गुप्ता विंदंति भद्राण्यकुतोभयाः
प्रजाः ३८ अरक्ष्यमाणे नरदेवनाम्नि रथांगपाणावयमंग लोकः तदा हि चौरप्रचुरो विनंक्ष्य
त्यरक्ष्यमाणोऽविवरूथवत्क्षणात् ३९ तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंप
कात् परस्परं घ्नंति शपंति वृंजते पशून्स्त्रियोर्थान्पुरुदस्यवो जनाः ४० तदार्यधर्मः प्रविलीयते नृ
णां वर्णाश्रमाचारयुतस्त्रयीमयः ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः
५० ४१ धर्मपालो नरपतिः स तु सम्राड्बृहच्छ्रवाः साक्षान्महाभागवतो राजर्षिर्हयमेधयाट् क्षुत्तृट्श्र
मयुतो दीनो नैवास्मच्छापमर्हति ४२ अपापेषु स्वभृत्येषु बालेनापक्वबुद्धिना पापं कृतं तद्भगवा से२
न्सर्वात्मा क्षंतुमर्हसि ४३ तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि नास्य तत्प्रतिकुर्वंति तद्भक्ताः
प्रभवोपि हि ४४

व चार्थकामयोरेवाभिनिवेशितं चित्तं येषां ४१ एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रस्तुतस्य तु विशेषमाह धर्मपाल ३०राम
२१२ इति साईन हयमेधयाट् अश्वमेधयाजी ४२ अस्य महापापस्यानुत्तापोऽत्र महत् दृष्ट्वा पापं मत्वोदयन् भगवंतं प्रा ५०
र्थयते अपापेष्विति ४३ राज्ञा चल्पितशापं दत्तवान् हितः कृतिभवदपि तत्तु न तस्य भवति न स्य महाभागवत
त्वादित्याह तिरस्कृताः निंदिताः विप्रलब्धा वंचिताः क्षिप्ताः अवज्ञाताः हताः ताडिताः अस्य तिरस्कारा
दिकर्तुः न तत्प्रतीकारं कुर्वंति तद्भक्ताः प्रभवः समर्था अपि ४४

विष्णुभक्ताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्रकृतः अपकृतः अपराधं ४४ युक्तं चैतदित्याह प्रायशइति द्वंद्वेषु सुखदुःखादिषु अगुणाश्रयः सुखदुःखाद्या
श्रयो न भवति ४६ इति श्रीमत्प्रथमे ऽष्टादशोऽध्यायः प्रायोपविष्टगंगायां राज्ञि यागिजनाहृतैः शुकसंगः सूर्ततत्र प्रोक्तो मे कोन
विंशके स्वकृतं तत्कर्ममुनिस्कंधे सर्पप्रक्षेपणं गर्हन्निति चिंतयन् सुदुर्मना जातः चिंतामेवाह साद्धैः षड्भिः अहो इति नी
चं पापं अभीवद्धतिपातः सएवार्थः ब्रह्मणि ब्राह्मणे गूढं गुप्तं तेजो यस्मिन् १ हेलनं भवतु देवहेलनं ईश्वराज्ञा पापमित्यर्थः तस्मा
न्नैव्यसनं भविष्यति न तु नातिदीर्घात्कालात् अचिरादेवास्तु तत्रापि आद्दासाक्षान्न पुत्रादिद्वारेणेति प्रार्थना कामं अस्मेको
चनः एवं प्रार्थनायाः प्रयोजनं अघस्य निष्कृताय प्रायश्चित्ताय यथा पुनरेवं न कुर्यामिति च २ एवं साक्षात्स्वस्यैव व्यसनं प्रार्थ्य
ततः प्राग्वत्किंचित्प्रार्थयते अद्येवमे राज्यादि दहतु प्रकोपितः ब्रह्मकुलं मेवानलः पुनर्द्विजादिन्योऽद्यपि तु धीर्मे माभूत् नम

× सूत उवाच महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि
गूढतेजसि १ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् तदस्तु कामं मघनिष्कृताय मे यथा न कुर्यां
न पुनरेवमद्धा २ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे दहत्वभद्राय पुनर्न मे भूत्पापीयसी धीः
द्विजदेवगोभ्यः ३ स चिंतयन्नित्यमथाशृणोद्यथा मुनेः सुतोक्तो निरृतिस्तक्षकाख्यः स साधु मेने न चिरेण
तक्षकानलं प्रसक्तस्य विरक्तिकारणं ४ अथो विहायेममनुं च लोकं विमर्शितौ हेयतया पुरस्तात् कृष्णां
घ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ५

वेदित्यर्थः ३ इत्थं चिंतयन्स राजा मुनेः सुतेनोक्तः सप्तमेऽहनि निरृतिर्मृत्युर्यथा भविष्यतीति यः शृणोत् शमीकप्रेषिताच्छि
ष्यात् श्रुत्वा च स तक्षकस्य विषाग्निं साधु मेने यतो विषयेषु प्रसक्तस्य विरक्तिकारणं ४ अथानंतरं उभौ लोकौ पुरस्ता
द्राज्यमध्य एव हेयतया विचारितौ तौ विहाय श्रीकृष्णांघ्रिसेवामेवाधिमन्यमानः सर्वपुरुषार्थाधिको जानन् प्रायम
नशनं तस्मिन्नित्यर्थः तत्संकल्पेनोपाविशदितियावत् यद्वा प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ॥५॥७

इति पुत्रकृतादेनसोऽनुतप्तो महामुनिः स्वयं विप्रकृतो राज्ञा नैवाघं तद्‌
अचिंतयत् ४५ प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः न व्यथंति
न हृष्यंति यत आत्मागुणाश्रयः ४६ इति श्रीभागवते महापुराणे प्रथ
मस्कंधे विप्रशापोपलंभनं नामाष्टादशोऽध्यायः ॥१८॥ × १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभ्यर्त्थनया मिति विशेषणस्य फलमाह यागंगालसंती श्रीर्यस्याः तुलस्याः तया विमिश्राः ये कृष्णांघ्रिरेणवः तैरभ्यधिकं सर्वोत्कृ
ष्टं यदंबु तस्य नेत्री वाहिनी उभयत्र अंतर्बहिश्च सेशान् लोकपालैः सहितान् लोकान्पुनाति मरिष्यमाणः आसन्नमरणः
मरणस्यानियतकालत्वात् सर्वोपि तथा अतस्तां को न सेवेत ६ इति एवं विष्णुपाद्यां गंगायां प्रायोपवेशं प्रति व्यवच्छिद्य नि
श्चित्य पांडवेय इति तत्कुलोचितं दर्शयति नास्त्यन्यस्मिन्भावो यस्य सः कुतः मुनिव्रतः उपशांतः तत्कुतः मुक्तः समस्त
संगो येन सः ७ तत्र तदा तद्दर्शनार्थं मुनय उपागताः ननु तीर्थस्नानार्थं कृतार्थत्वात् ननु तद्दर्शनामपि तीर्थयात्रा दृश्यते

यो वैलसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री पुनाति लोकानुभयत्र सेशान्कस्तां न सेवेत मरिष्यमाणः ६
इति व्यवच्छिद्य स पांडवेयः प्रायोपवेशं प्रति विष्णुपद्यां दधौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः ७
तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः सशिष्याः प्रायेण तीर्थाभिगमापदेशैः स्वयं हि तीर्थानि पुनंति
५१ संतः ८ अत्रिर्वसिष्ठः च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च पराशरो गाधिसुतोऽथ राम उतथ्य इंद्रप्रमदेध्म
वाहौ मेधातिथिर्देवल आर्ष्टिषेणो भरद्वाजो गौतमः पिप्पलादः मैत्रेय और्वः कवषः कुंभयोनिर्द्वैपा
यनो भगवान्नारदश्च अन्ये च देवर्षिब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च ९ नानार्षेयप्रवरान्समेतानभ्यर्च्य
राजा शिरसा ववंदे १० सुखोपविष्टेष्वथ तेषु भूयः कृतप्रणामः स्वचिकीर्षितं यत् विज्ञापयामास विविक्त
चेता उपस्थितोऽग्रेऽभिगृहीतपाणिः ११

तत्राह प्रायेणेति तीर्थयात्राव्याजैः ८ अरुणादयः कांडर्षिवत्विशेषण पृथक् निर्दिष्टाः ९ नानार्षेयाणि ऋषी राम
णां गोत्राणि तेषु प्रवरान्श्रेष्ठान् शिरसा भुवस्पृष्ट्वा ववंदे १० विज्ञापनार्थं पुनः कृतप्रणामः विविक्तं शुद्धं चेतो यस्य अभि ५१
गृहीतौ संयोजितौ पाणी येन सः स्वचिकीर्षितं प्रायोपवेशनादि युक्तमयुक्तं वेति विज्ञापयामास ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुमोदनेनानुग्रहमालक्ष्यात्मनः स्मानं श्लाघते अहो इति नृपाणां मध्ये महत्तमैरनुग्रहणीयशीलं वृत्तं येषां ते एतच्च राज्ञा
मतिदुर्लभमित्याह ब्राह्मणानां पादशौचात् पादप्रक्षालनोदकात् दूराद् उच्छिष्टविण्मूत्रपात्रभांडानि समुत्सृज्य दीप्ति सद्य
तः दूरे हितेस्तु द्विसृज्यते नैवोपि दूरादेव तत्र द्विस्पृश क्षिप्तं तत्रापि स्यात् मे यामित्यर्थः गर्ह्यकर्मयस्य त्वात्मानं मुहिश्याह
८ । १२ आत्मोक्तावनुग्रहः ब्रह्मशापोपि भगवत्प्रसाददेव जात इत्याह तस्य गर्ह्यकर्मण एव स्वेत्तः अवद्यस्य पापात्मनः ग
हेष्वासक्तचित्तस्य मेस्व प्राप्य परावराणां मीश एव द्विजशापतया बभूव यत्र यस्मिन् शापे सति गेहेषु प्रसक्तो भयं धत्ते

राजोवाच अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः राज्ञां कुलं ब्राह्मणपादशौचाद् दूरा
द्विसृष्टं बत गर्ह्यकर्म ११ तस्यैव मेऽघस्य परावरेशो व्यासक्तचित्तस्य गृहेष्वभीक्ष्णं निर्वेदमूलो द्विजशा
परूपो यत्र प्रसक्तो भयमाशु धत्ते १२ तं मोपयातं प्रतियन्तु विप्रा गंगा च देवी धृतचित्तमीशे द्विजोप
सृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः १४ पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसंगश्च
तदाश्रयेषु महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः १५ इति स्म राजाऽध्यवसाययुक्तः
प्राचीनमूलेषु कुशेषु धीरः उदङ्मुखो दक्षिणकूल आस्ते समुद्रपत्न्याः स्वसुतन्यस्तभारः १६
एवं च तस्मिन्नरदेवदेवे प्रायोपविष्टे दिवि देवसंघाः प्रशस्य भूमौ व्यकिरन्प्रसूनैर्मुदा मुहुर्दुंदुभयश्च
नेदुः १७ महर्षयो वै समुपागता ये प्रशस्य साध्वित्यनुमोदमानाः ऊचुः प्रजानुग्रहशीलसारा यदुत्तम
श्लोकगुणाभिरूपं १८ न वा इदं राजर्षिवर्य चित्रं भवत्सु कृष्णं समनुव्रतेषु येऽध्यासनं राजकिरीटजुष्टं
सद्यो जहुर्भगवत्पार्श्वकामाः १९

निर्विण्णो भवति यतो निर्वेदमूलः निर्विदो वैराग्यमूलः प्राप्तिकारणं यस्मिन् स्वस्य वैराग्यप्राप्तत्वात् तस्य च भयमूलत्वात् तदर्थं द्विजशापे
कारितवानित्यर्थः १२ तामाश्रयं तेन मितिहाशांत मामाभ्युपयातं शरणागतं प्रतियन्तु जानन्तु देवी देवतारूपा गंगा च प्रत्येतु वा शर्वः प्र
तिक्रिया अनादरे गाथाः कथाः १४ सर्वत्र यां यां यो पात्र सु प्रकृष्ट संगो भूयात् तेषु सर्वस्मा सृष्टौ जन्मनि १५ अध्यवसायो निश्चयः
पूर्वाग्रास्तेषु स्वसुते जनमेजये न्यस्तो भारो राज्यं येन सः १६ मुदा व्यकिरन् देवसंघा वादितवन्तः दुः १७ प्रजानुग्रहे शीलं स्वभावः सारो ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्परं संमंत्रयंतेन सर्वे इति परं श्रेष्ठं लोकं तत्र हेतुः विरजस्कं निर्मायं विशोकं च यास्यतीति कुतः तत्राहुः अयमिति २० आश्रुत्या
कर्ण्य सम्यक्पक्षपातशून्यं मधुच्युतं अमृतं अविगुरुकं गंभीरार्थं अव्यलीकं सत्यं २१ त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके वेदा य
था मूर्तिधरा भवंति न तुल्याः ज्ञानातिशययुक्ताः कृपालुतामाहुः नेहेति भवतां प्रयोजनं परानुग्रहं विना नास्ति न हि स एवार्थः स्वा
नु न त्वात्मशीलं स्वस्वभावं २२ पृच्छ्यं प्रष्टव्यं विश्रभ्य विश्वासं कृत्वा एवं कर्तव्यमिति विस्रंभाव इति कृत्यता तस्मिन् विषये सर्वा
त्मना सर्वावस्थासु यत्कृत्यं विशेषतश्च म्रियमाणैः तच्च शुद्धं पापसंपर्करहितं आमृशत विचारयत २३ तत्र तेषु यागेषु यागत
पोदानादिभिर्विवदमानेषु सत्सु यदृच्छया गां पर्यटन् व्यासपुत्रः तत्र अभवत् प्राप्तः न लक्ष्यमाश्रमादि लिंगं यस्य अवधूतः

सर्वे वयं तावदिहास्महेथ कलेवरं यावदसौ विहाय लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतप्रधानः २०
आश्रुत्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं आभाषतैनानभिवंद्य युक्तान् शुश्रूषमाणश्चरिता
नि विष्णोः २१ समागताः सर्वत एव सर्वे वेदा यथा मूर्तिधरास्त्रिपृष्ठे नेहाथ वामुत्र च कश्चनार्थं ऋते परानुग्रह
मात्मशीलं २२ ततश्च वः पृच्छ्यमिदं विपृच्छे विश्रभ्य विप्रा इति कृत्यतायां सर्वात्मना म्रियमाणैश्च कृत्यं शुद्धं च
तत्रामृशताभियुक्ताः २३ तत्राभवद्भगवान्व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः अलक्ष्यलिंगो निजला
भतुष्टो वृतश्च बालैरवधूतवेषः २४ तं द्व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रं चार्वायताक्षोन्नसतु
ल्यकर्णं सुभ्र्वाननं कंबुसुजातकंठं निगूढजत्रुं पृथुतुंगवक्षसं आवर्तनाभिं वलिवल्गूदरं च दिगंबरं वक्त्रविकी
र्णकेशं प्रलंबबाहुं स्वमरोत्तमाभं श्यामं सदाऽपीच्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन प्रत्युत्थितास्ते मुनयः स्वा
सनेभ्यस्तल्लक्षणज्ञा अपि गूढवर्चसं २५

अवधूत इत्यक्तोऽयं तस्य वेषो यस्य सः २४ तमित्यादीनां प्रत्युत्थिता इति तृतीयश्लोकेनान्वयः द्विगुणान्यष्टौ वर्षाणि यस्य सुकु
माराः पादौ करौ ऊरू बाहू अंसौ कपोलौ गात्रं च यस्य चारुणी आयते अक्षिणी यस्मिन् उन्नता नासा यस्मिन् तुल्यौ कर्णौ यस्मिन् लवह स्वादिवपर्य
यिनान्तुल्यौ कर्णौ यस्मिन् शोभने च भ्रुवौ यस्मिन् एवंभूतं आननं यस्य कंबुवद्रेखात्रयांकितः सुष्ठु जातः कंठो यस्य सः अधोभागयोः
स्थिते अस्थिनी जत्रुणी मांसेन निगूढे जत्रुणी यस्य पृथु विस्तीर्णं तुंगमुन्नतं च वक्षो यस्य आवर्तवन्नाभिर्यस्य वलिभिस्तिसृभिः
वल्गुरम्यमुदरं यस्य दिश एव अंबरं यस्य वक्त्रे विकीर्णाः केशा यस्य प्रलंबौ बाहू यस्य स्वमरेषु श्रेष्ठेषु उत्तमो हरि
स्तदाभ्रपीच्य अस्यंतो नमे यद्वयो यौवनं तेन या अंगलक्ष्मीः हल कांतिस्तया रुचिरस्मितेन च गूढवर्चसमपि प्रत्युत्थिताः तं दृष्ट्वा प्रत्युत्थितं

राम
५२
देवेषु २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ द्वितीयस्कंध प्रारंभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिंतां प्रस(?)क्तिसिध्यर्थमुपोद्घातं विदुर्बुधाः॥ प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थं समर्थं लक्षणैनमुपोद्घातः॥३
नाममात्रेणवस्तु संकीर्त्तनमुद्देशः॥ असाधारणधर्मवचनं लक्षणं॥१

श्रीगणेशायनमः॥ द्वितीये तु दशाध्याये श्रीभागवतमादितः॥ उद्दिष्टं लक्षणैर्भक्त्या संक्षेपेणोपवर्ण्यते॥१॥ तत्र तु प्रथमेऽध्याये कीर्त्त
नाश्रवणादिभिः स्थविष्ठभगवद्रूपे मनसो धारणोच्यते॥२॥ यन्नामकीर्त्तनं दानतपोयोगादिसत्फलं॥ तं नित्यं परमानंदं हरिं नरहरिं न
मस्महे॥ अथ द्वितीयस्कंधव्याख्या॥ उक्तः पूर्वमुपोद्घातः सप्रसंगः शुकागमः॥ राज्ञा पृष्टं नृणां कृत्यमथाह शुकसन्मुनिः॥४॥ राज्ञः प्रश्न
मभिनंदति वरीयानिति॥ तत्वया पुंसां श्रोतव्यादिषु मध्ये यः परः श्रेष्ठगोचरः प्रश्नः कृतः एषः वरीयान्॥ यतो लोकहितमतत्त्वमो

यो३

ॐ नमो भगवते श्रीवासुदेवाय॥ शुक उवाच॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप॥ आत्मवित्संमतः
पुंसां श्रोतव्यादिषु यः परः॥१॥ श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः॥ अपश्यतामात्मतत्त्वं गृहेषु गृहमे
धिनां॥२॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः॥ दिवा चार्थेहया राजन् कुटुंबभरणेन वा॥३॥ देहापत्यकल
त्रादिष्वात्मसैन्येष्वसत्स्वपि॥ तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति॥४॥ श्रीहरिकृतो॥ श्रीराम॥

द्धहेतुत्वात्॥ आत्मविदां मुक्तानां सम्मतो यतः॥१॥ तत्र तावत् स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन्॥ अक्रियत्वा विपर्ययमि ५१
त्यभिप्रायेणाह श्रोतव्यादीनीति त्रिभिः गृहेषु प्रसक्तानां॥ अत एव गृहमेधिनां तद्धनपंचसूनानाप्राणं मेधनि हिंसा
र्थेः॥२॥ तेषु कृते वायुर्व्यर्थ भवतीत्याह॥ नक्तं रात्रौ यत्तु वयः आयुः तन्निद्रया व्यवायेन रत्या॥ चा ह्रियते॥ दिवा अक्रिय ठ३ राम
यः तत्॥ अर्थेहया अर्थार्थमुद्यमेन॥ सिद्धेर्थे कुटुंबपोषणेन वा॥ चकारावनुक्तसमुच्चयार्थौ॥३॥ ननु नश्वरकुटुंबाद्य
र्थं कथमायुर्व्ययं कुर्यात्तत्राह देहादिष्वात्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूतेष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादि २१
दृष्टं तन्नाशं पश्यन्नपि नानुसंधत्ते॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा श्रोतव्यादिप्रश्नस्योत्तरमाह तस्मादिति। हे भारत। भरतवंश्य। सर्वात्मेति श्रेष्ठत्वमाह। भगवानिति सौन्दर्यं ईश्व
र इत्यावश्यकत्वं हरिरिति निर्बन्धहारित्वं। अभयं मोक्षमिच्छता ५ अतः परमन्यच्छ्रेयो नास्तीत्याह एतावानेव जन्मनां लाभः फलं त
माह नारायणस्मृतिरिति। सांख्यादिभिः साध्यत इति। तेषां स्वानुष्ठानेन लाभत्वं वारयति सांख्यमात्मानात्मविवेकः। योगोऽष्टांगः॥
अन्तेनुस्मृतिः परो लाभः न तन्मध्ये हि भावत्वं शक्य इत्यर्थः। ६ तत्र सदाचारं प्रमाणयति। प्रायेणेति विधिषेधतः। विधिनिषेधाभ्यां निवृत्ताः
नैर्गुण्ये ब्रह्मणि स्थिता अपि स्म प्रसिद्धं। ७ किमिदं अपूर्वं कथयसि सत्यमत्य पूर्वमेवेदमित्याह इदं भगवत्प्रोक्तं तन्नामैकप्रधानं।

तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयं ५ एतावान्सांख्ययो
गाभ्यां स्वधर्मपरिनिष्ठया। जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ६ प्रायेण मुनयो राजन् निवृत्ता वि
धिषेधतः। नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरेः ७ इदं भागवतं नाम पुराणं ब्रह्मसम्मितं। अधीतवा
न् द्वापरादौ पितुर्द्वैपायनादहं। परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया। गृहीतचेता राजर्षे आ
ख्यानं यदधीतवान्। ९ तदहं तेऽभिधास्यामि महापौरुषिको भवान्। यस्य श्रद्दधतामाशु स्यान्मुकुन्दे मतिः
सती। १० एतन्निर्विद्यमानानामिच्छतामकुतोभयं। योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनं ११ राम

पुराणं। ब्रह्मसम्मितं सर्ववेदतुल्यं। यद्वा। ब्रह्मसम्यक्मितं येन कृत्स्नत्वया प्राप्तमत आह अधीतवानिति। सिद्धस्य तव कु
तोऽध्ययने प्रवृत्तिः तत्राह परिनिष्ठितोऽपीति। गृहीतचेताः आकृष्टचित्तः। ८ ९ महापुरुषो विष्णुः तद्दीयः यस्य यस्मिन् श्रद्धां कु
अ२ र्वतां सतीं हैतुकी १० साधकानां सिद्धानां च न ततः परमन्यत् श्रेयोऽस्तीत्याह एतदिति इच्छतां कामिनां तत्फलसाधनमे
तदेव निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनमेतदेव योगिनां ज्ञानिनां फलं चैतदेव निर्णीतं नात्र प्रमाणं वक्तव्यमि
त्यर्थः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि०

अल्पमेवायुरवशिष्टं किमहं साधयेयमिति मा शुच इत्याह । किमिति त्रिभिः । परोक्षैरलक्षितैर्हायनैर्वर्षैः विदितं तथा यातीति ज्ञानं य
तोऽयं तज्ज्ञानेन घटेत यत्नं करोति ॥१२॥ खट्वाङ्गो हि देवपक्षे स्थित्वा दैत्यान्जयन् । ततः प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्तोऽरं तत्स्तेनोक्तं
प्रथमं तावन्ममायुः कथ्यतामिति । ततो देवैः केवलं मुहूर्तमात्रमस्तीति । ततोऽतिशीघ्रविमानेन भुवमागत्य हरिं शरणं गत इ
ति यतः इयं स्वर्गभूमिरजाधिका । कर्मभूमिः पृथ्वी । अतो वेतु यत्नस्येदानीमपि नावह इति तावता कालेन सांपरायिकं पार

किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह । वरं मुहूर्तं विदितं घटते श्रेयसे यतः ॥१२॥ खट्वाङ्गो नाम राजर्षिः ज्ञात्वे
यत्तामिहायुषः । मुहूर्तात्सर्वमुत्सृज्य गतवानभयं हरिं ॥१३॥ तवाप्येतर्हि कौरव्य सप्ताहं जीवितावधिः ।
२ उपकल्पय तत्सर्वं तावद्यत्सांपरायिकं ॥१४॥ अन्तकाले तु पुरुष आगते गतसाध्वसः । छिंद्यादसंग
शस्त्रेण स्पृहां देहेनु ये च तं ॥१५॥ गृहात्प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः । शुचौ विविक्त आसीनो
विधिवत्कल्पितासने ॥१६॥ अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं । मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्म
रन् ॥१७॥ नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः । मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥१८॥

लौकिकं साधनं संपादय ॥१४॥ तत्र वैराग्यं तावदाह । अन्तकाल इति । गतसाध्वसः मृत्युभयशून्यः असंगो नाम अनासक्तिः तेन श
स्त्रेण स्पृहां सुखेच्छां । देहमनु ये पुत्रकलत्रादयः तेष्वपि स्पृहां छिंद्यात् ॥१५॥ किंच गृहात्प्रव्रजितः निर्गतः गृहे स्थितस्य पुनर
प्यासक्तिसंभवात् । तत्राष्टांगयोगमाह । धीर इति ब्रह्मचर्यादियमोपलक्षणं पुण्यतीर्थेति स्नानादिनियमोपलक्षणं । आसनमाह शुचावि राम
ति । विविक्ते एकांते विधिवत्कुशाजिनचैलैः क्रमेण निर्मिते ॥१६॥ जपगर्भप्राणायामं वक्तुं जपमाह । त्रिवृत् त्रिभिः कारादिभिर्वृद्धं दि२
आवर्तयेत् ३ तिं ग्रथितं ब्रह्माक्षरं प्रणवं मनसाभ्यसेत् मनसा इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह । मनो यच्छेत् । ब्रह्मबीजं
प्रणवमविस्मरन्नेव जितश्वासः सन् ॥१७॥ प्रत्याहारमाह नियच्छेदिति । अक्षान् इंद्रियाणि निश्चयात्मिका बुद्धिः सारथिर्यस्य सः ।
धारणामाह मन इति । पुनश्च कर्मभिः तद्वासनाभिराक्षिप्तं आकृष्टं शुभार्थे भगवद्रूपे ॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वार्थं

ध्यानमाह तत्रेति। एकमेकं पादाद्यवयवं। अव्युच्छिन्नेन समग्ररूपाद वियुक्तेन। आश्रयविशेषसामान्येन स्थिरीकरणं धारणा॥ अवयवविभावनया तदाश्रयं ध्यानमिति भेदः समाधिमाह। निर्विषयं मनो युक्त्वा समाधाय स्थिरीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वेत्यर्थः प्रसीदति तुष्यति। १९॥ गुणलेशशान्त्यै पुनरपि तथा भसनी धारणामेव स्थिरीकुर्यादित्याह। रजसा आक्षिप्तं तमसा विमूढं स्वीयं मनो निरुंध्यात्। तत्कृतं रजस्तमोभ्यां कृतं २०॥ यतः। यस्यां क्रियमाणायां योगिनः भद्रं सुखात्मकं आश्रयं विषयं पश्यतः। तत्रैव प्रीतिर्भवति। २१॥ यथा यत्र यादृशी इति चेति कर्तव्यता विषय तत्त्वविशेषणानां प्रश्नाः

तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा॥ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत्॥ पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति॥ १९॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः। यच्छेद्धारणया धीरो हंति यावत्तत्कृतं मलं॥ २०॥ यतः संधार्यमाणायां योगिनो भक्तिलक्षणः। आशु संपद्यते योग आश्रयं भद्रमीक्षतः। २१॥ राजोवाच॥ यथा संधार्यते ब्रह्मन्धारणा यत्र संमता॥ यादृशी वा हरेदाशु पुरुषस्य मनोमलं॥ २२॥ श्रीशुक उवाच॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः। स्थूले भगवतो रूपे मनः संधारयेद्धिया॥ २३॥ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत्॥ २४॥ अंडकोशे शरीरेस्मिन्सप्तावरणसंयुते॥ वैराजः पुरुषो योसौ भगवान्धारणाश्रयः॥ २५॥ पातालमेतस्य हि पादमूलं पठंति पार्ष्णिप्रपदे रसातलं॥ महातलं विश्वसृजोथ गुल्फौ तलातलं वै पुरुषस्य जंघे॥ २६॥

स्वा॰२ २२॥ पथे स्य सोपानं जितासन इति॥ विषयमाह स्थूल इति सार्धेन २३॥ विशेषो विराड्देहः। अतिस्थूलानामपि स्थूलतरः। स तु कार्यमात्रं २४॥ अस्य चोपलक्षणत्वेन विषयत्वं वस्तुतस्तु विराड्जीवनियंता भगवानेव विषय इत्याह। अंडकोश इति अंडकोशांतर्वर्तिनि कलाह एवं पृथिव्यावरणानि तत अपूंतेजो वायु आकाशाहंकारमहत्तत्वानीति सप्त। विराड्देहस्य जीवतद्देहयो मिणा अभेदमारोप्योपासनं कर्तव्यमित्याशयेनाह। पातालं पादमूलं पादस्याधोभागः पातालादीनां तदवयवता विधीयते पातालादीन्यत्र लोकानि अधस्तनादारभ्य सप्तभूमि विचरणापि पठंति गणंति॥ तत्रादि प्रमाणप्रदर्शनं पार्ष्णिप्रपदे

पा॰ स्कं २ श्रीभागवतो ॥ ६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊरुद्वयं तस्य अधोभागवितलं उत्तरभागं अतलमिति ज्ञेयं। नाभिरवसरः॥२७॥ ज्योतिरनीकं ज्योतिषां समूहः स्वर्गं महर्लो
कं ग्रीवेति। तपो लोकं वराटीं ललाटं सत्यं सत्यलोकं॥२८॥ उस्राः देवाः तेजोमयशरीरत्वात् ते बाहव इत्याहुः। दिशः अस्मदा
दि श्रोत्राधिष्ठात्री देवताः कर्णौ श्रोत्रस्याधिष्ठानं शब्दः स्त्री श्रोत्रविषयः सतस्य श्रोत्रेंद्रियं एवं नासि का दि[illegible] ना
सत्यदस्रौ अश्विनौ नासे नासापुटद्वयं दीप्तः॥२९॥ द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं पतंगः सूर्यः॥
अहनी रात्र्यहनी परमेष्ठिधिष्ण्यं ब्रह्मपदं तालुः अधिष्ठानं जिह्वा इंद्रियं॥३०॥ छंदांसि वेदाः शिरो ब्रह्मरंध्रस्थाने के

हे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च॥ महीतलं तज्जघनं महीपते नभस्तलं नाभिसरो
गृणंति॥२७॥ उरःस्थलं ज्योतिरनीकमस्य ग्रीवा महर्वदनं वै जनोस्य तपो वराटीं विदुरादिपुं
सः सत्यं तु शीर्षाणि सहस्रशीर्ष्णः॥२८॥ इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः॥
नासत्यदस्रौ परमस्य नासे घ्राणोस्य गंधो मुखमग्निरिद्धः॥२९॥ द्यौरक्षिणी चक्षुरभूत्पतंगः पक्ष्मा
२ णि विष्णोरहनी उभे च तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमापोस्य तालू रस एव जिह्वा॥३०॥ छंदांस्यनंत
स्य शिरो गृणंति दंष्ट्रा यमः स्नेहकला द्विजानि॥ हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमो
क्षः॥३१॥ व्रीडोत्तरोष्ठो धर एव लोभो धर्मः स्तनोऽधर्मपथोस्य पृष्ठं॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः स्कं
समुद्रा गिरयोस्थिसंघाः॥३२॥ नद्योस्य नाड्योथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र॥ अनंतवीर्यः श्वसि
तं मातरिश्वा गतिर्वयः कर्मगुणप्रवाहः॥३३॥ २

ल्लाः पुत्रादिस्नेहलेशाः द्विजानि दंताः षष्ठं मार्षिंदुरंतः अपारः सर्गः इति यत् नृस
नस्य कटाक्षः॥३१॥ अधर्ममार्गोस्य पृष्ठभागः कः प्रजापतिः मित्रौ मित्रावरुणौ॥३२॥ अनंतवीर्यस्य सः॥ वयः
कालस्तस्य गमनं गुणप्रवाहः प्राणिनां संसारः कर्म तस्य क्रीडा॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्नः विभोः। अव्यक्तं प्रधानं। सः प्रसिद्धः। चंद्रमाः तदीयं मनः सर्वेषां विकाराणां कोशाइ वा आश्रयभूतः॥ २४॥ विज्ञानशक्तिं
चित्तं महिमहत्तत्वं। अंतः करणं अहंकारं गिरित्रं श्रीरुद्रांगाद् भाद्दउवायामुत्पन्नाः श्वतरीः॥ २५॥ वयांसि पक्षिणः तस्य
व्याकरणं नाम रूपैर्व्याकरणां पाणीतिं॥ अकल्पतो शिल्पनैपुण्यं। यथाहः येन शुक्ली कृता हंसाः शुकाश्च हरितीकृताः। मयूराः चित्रिता येन स तेऽवृत्तिं विधास्यतीति॥ मनुः स्वायंभुवः म नीषा बुधिः मनुजः पुरुषः निवासः आश्र

ईशस्य केशानु विदुरंबुवाहानु वासस्तु संध्यां कुरुवर्य भूम्नः॥ अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः सर्व
विकारकोशं॥ २४॥ विज्ञानशक्तिं महिमामनंति सर्वात्मनोंतः करणं गिरित्रं॥ अश्वाश्वतर्युष्ट्रगजा नर
वानि सर्वे मृगाः पशवः श्रोणिदेशे॥ २५॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवासः॥
गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः॥ २६॥ ब्रह्माननं क्षत्रभुजा महात्मा विड्रू
रंघ्रिश्रितकृष्णवर्णः॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म वितानयोगः॥ २७॥ इयानसा
वीश्वरविग्रहस्य यः सन्निवेशः कथितो मया ते। संधार्यतेस्मिन्वपुषि स्थविष्ठे मनः स्वबुद्ध्या न यतोस्ति
किंचित्॥ २८॥

यः पुरुषेष्वेवाविकलरामांल्मतिश्चान्तः॥ गंधर्वादीनीं देहे क्षयीः गंधर्वादयः स्वरस्मृतीः षड्जादिस्वरस्मृतयः इत्यर्थः॥
असुरानीकं वीर्यं यस्य सः स्वराः स्मृतिरसुरानीकवर्य इति पाठः॥ गंधर्वादयः स्वरः असुरसमूहश्रेष्ठः प्रह्ला
दः स्मृतिः स्मृतिस्तस्य ति॥ २६॥ ब्रह्म विप्रस्तस्याननं मुखं॥ क्षत्रं क्षत्रियो भुजा यस्य॥ विट् वैश्यः ऊरू यस्य श्रि
तः कृष्णवर्णः शूद्रो यस्य नानाभिधाना नामानि येषां ते च ते आभीज्यादेवा स्तेषां गणैर्वसुरुद्रादिभिरुपप
न्नो युक्तः द्रव्यात्मको हविः साध्यः विनानयोगः यज्ञप्रयोगः तस्य कर्म कार्यः आवश्यकोपि प्रतइत्यर्थः॥ २७॥

इयानुपलावानुसंनिवेशः अवयवसंस्थानं। अस्मिन् स्वबुध्यामनः
संधार्यते मुमुक्षुभिर्यतो व्यतिरिक्तं किंचिन्नास्ति तस्मिन्॥ २८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४

तदेवं चित्तस्थैर्यार्थं विराड्देहजीवेश्वराणामभेदेनोपासनं मुक्तौ तत्र तु देहजीवावीश्वरे प्रविलाप्य स एव ध्येय इति नि
र्दूरय इति निर्द्धारयति स इति ॥ सर्वेषां धीवृत्तिभिरनुभूतं सर्वं येन स स्वयं ॥ एक एव सर्वान्तर आत्मा ॥ तं एव सत्यं भजेत ॥ अ
न्यत्रापलक्षणं सज्जेत ॥ यत अासंगात् आत्मनः पातः संसारो भवति ॥ एकस्यैतत्त्वदिंद्रियैः सर्वानुभूतो दृष्टान्तः ॥ स्वप्न
जनानामीक्षितायथेति ॥ स्वप्ने हि केदोचित् बहून् देहान् प्रकल्प्य जीवस्तत्तदिंद्रियैः सर्वं पश्यति तद्वत् ॥ ईश्वरस्य
तु विद्याशक्तित्वान्न बंधः ॥ ३९ ॥ इति द्वितीये प्रथमः ॥ द्वितीये तु ततः स्थूलधारणातो जितमनाः सर्वसाक्षिणि स

स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः ॥ तं सत्यमानंदनिधिं भजेत नान्यत्र सज्जेद्य
त आत्मपातः ॥ ३९ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे महापुरुषसंस्थानुवर्णने प्रथमो
ध्यायः ॥ १ ॥ ॥ श्रीशुक उवाच ॥ एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ॥
तथा ससर्जेदममोघदृष्टिर्यथाप्ययात् प्राक् व्यवसायबुद्धिः ॥ १ ॥ शाब्दस्य हि ब्रह्मण एष पंथा
यन्नामभिर्ध्यायति धीरपार्थैः ॥ परिभ्रमंस्तत्र न विंदतेर्थान् मायामये वासनया शयानः ॥ २ ॥

वैराग्यविस्मृतो धार्यमिति तीर्यते ॥ दृश्यात्वं च न रूपे च मुक्ता विराजधारणा ॥ इहोच्यते तु तस्या ध्यासंबीतयोमिधारणाग त
त्रतावत् पूर्वोक्तधारणाया अवांतरफलमाह ॥ एवं या धारणा तया तुष्टाद्धरेः ॥ पुरा प्रलयसमये नष्टां स्मृति
प्रत्यवरुध्य बुध्वा अप्ययात् प्रागिदं विश्वं यथासीत् ॥ तथा ससर्ज व्यवसायात्मिका बुद्धिर्यस्य ॥ अत एवामो
घा दृष्टिर्यस्येति ॥ अनेन या धारणया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥ उपासनाफलादपि विरक्तस्य शुद्धात्मधार
णायामधिकारः ॥ अतो वैराग्यार्थं सर्वकर्मफलं निंदति शाब्दे शब्दमये ब्रह्मवेदे ॥ तस्य एष पंथाः ॥ कर्मफलबोधनप्रका

रः को सौ अर्थे अन्येरेव स्वर्गादिनामभिः साधकस्य धी ध्येय ति
तत्र द्विंछाकेरा नीति यनु अपार्थत्वमेवाह ॥ तत्र मायामये पथि सुख
मिति वासनया शयानः ॥ स्वप्नान् पश्यन्निव परिभ्रमन् अर्थान् न वि
दति तत्र लोके प्राप्तोपि निरवद्यसुखेन लभत इत्यर्थः ॥ २ ॥

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि सर्वथा कर्मफलत्यागे सद्य एव देहपातः स्यादित्याशंक्याह। अतः कविर्नाममात्रेषु भोग्येषु यावतार्थो न अर्थो देहनिर्वाहो यस्य न तथा भूतः स्यात् अप्रमत्तः तावन्मात्रेष्वनासक्तः। व्यवसायबुद्धिर्नेदं सुखमिति निश्चयवान्। तदापि तत्र तस्मिन्नर्थे अन्यथैव सिद्धे सति। तत्र यत्नेन परिश्रमं पश्यन्न यतेत॥ अन्यथा सिद्धिमाहाद्वाभ्यां सत्यामिति। कशिपोः शय्यायाः स्वतः सिद्धे बाहौ सति उपबर्हणैः उच्छीर्षकैः। पुरुधा बहुप्रकारया अन्नपात्र्या भोजनपात्रेण॥४॥ ननु दिकु सज्जीवानामनग्नत्वमेव। वल्कलमन्नं तोयं वासस्थानं च याञ्चां प्रयत्नं विना कथं प्राप्यमित्यत्राह। चीराणि वस्त्रखंडानि। परान् बिभ्रति पुष्णंति फलादिभिर्ये। गुहाः गिरिदर्यः॥ ननु केदाचिदेषामलाभे किं कार्यमित्यत्राह॥

अतः कविर्नामसु यावदर्थः स्यादप्रमत्तो व्यवसायबुद्धिः॥ सिद्धेऽन्यथार्थे न यतेत तत्र परिश्रमं तत्र समीक्षमाणः॥४॥ सत्यां क्षितौ किं कशिपोः प्रयासैर्बाहौ स्वसिद्धे ह्युपबर्हणैः किं॥ सत्यंजलौ किं पुरुधान्नपात्र्या दिग्वल्कलादौ सति किं दुकूलैः॥४॥ चीराणि किं पथि न संति दिशंति भिक्षां नैवांघ्रिपाः परभृतः सरितोप्यशुष्यन्॥ रुद्धा गुहाः किमजितोऽवति नोपसन्नान् कस्माद्भजंति कवयो धनदुर्मदांधान्॥५॥

अजितो हरिः॥ उपसन्नान् शरणागतान् किं न अवति न रक्षति॥ किंवा तस्य पूर्ववत्रापि संबंधः धनेन यो दुर्मदस्तेन अंधान्॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा तेन किं कर्त्तव्यं हरिस्को सेव्य इत्याह। एवं विरक्तः सन्नुक्तं भजेत्। भजनीयत्वे हेतवः स्वचित्ते स्वत एव सिद्धः यतः आत्मा। अत ए
व प्रियः प्रियस्यत्वं च मेवासुखरूपैव। अर्थः सत्यः नत्वनात्मवन्मिथ्या भगवान् भजनीयगुणश्च। अनंतश्च नित्यः। य एवंभू
तः तं भजेत्। नियतार्थः निश्चितस्वरूपः तदनुभवानंदेन निर्वृत्तः सन्निति स्वतः सुखात्मत्वं दर्शितं। किंच यत्र यस्मि
न् भजने सति संसारहेतोरविद्यायाः उपरमो नाशो भवति॥६॥ एतदेवान्यचिंतानिंदया द्रढयति कइतितां तथाभूतां
परस्य हरेरनुचिंतां धारणामनादृत्य पशून् कर्मजडान् विना यथा पशुरेव संदेवानामिति श्रुतेः। असतीं विषय
चिंतां को नाम कुर्यात्। तथा चिंतया वैतरण्यां पतितं। तत्र च स्वकर्मजान् आध्यात्मिकादिक्लेशान् सेवमानं जनं पश्य

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोर्थो भगवाननंतः॥ तं निर्वृतो नियतार्थो भजेत संसारहेतू
परमश्च यत्र॥६॥ कस्तां त्वनादृत्य परानुचिंतामृते पशूनसतीं नाम कुर्यात्॥ पश्यन् जनं पतितं
५ वैतरण्यां स्वकर्मजान् परितापान् जुषाणं॥७॥ केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरु
षं वसंतं॥ चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति॥८॥ प्रसन्नवक्त्रं नलिनायते
क्षणं कदंबकिंजल्कपिशंगवाससं॥ लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंड
लं॥९॥

न् वैतरण्यां यमद्वारस्थानद्यां तत्तुल्यत्वात् संसृतिर्वैतरणी॥७॥ तामेव धारणां सविशेषणामाह केचिदिति षड्भिः। स्वदेहस्यांत
हनू २ र्मध्ये यत् हृदयं तत्र योवकाशः तस्मिन् वसंतं प्रादेशः तर्जन्यंगुष्ठयोर्विस्तारः स एव मात्रा प्रमाणं यस्येति हृदयपरिमाणे राम
तत्रोपचर्यते। कंजं पद्मं रथांगं चक्रं॥८॥ नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य कदंबकुसुमस्य किंजल्काः के ५
शरास्तद्वत् पिशंगपीतेवाससी यस्य। लसंति महारत्नानि येषु तानि सुवर्णमयान्यंगदानि यस्य स्फुरंति च तानि महारत्नानि च त
न्मयानि किरीटकुंडलानि यस्य॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उन्निद्रेति विकसितं पत्रं यस्य हृदयस्य कंजं तस्य कर्णिकैव आलयः स्थानं तस्मिन् योगेश्वरैः स्थापितौ पादपल्लवौ यस्य श्रीरेव लक्ष्म चिह्नं तद्युक्तं । पामादि विहितामत्वर्थीयाणि प्रत्ययः कौस्तुभरत्नं कंधरायां यस्य । अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितः व्याप्तः ॥ १० ॥ स्निग्धत्वादि विशिष्टैः कुंतलैः विराजमानं । अननं येन हासः तेन पद्मालं सुंदरं ॥ ११ ॥ अदीनं उदारं पल्लीलाहसितं तेन यदीक्षणं तस्मिन् उल्लसंतौ यौ भ्रुभंगौ भ्रुविक्षेपौ तैः संसूचितः अभूरिरनुग्रहो येन । चिंतामयं चिंतयाप्त्या विभावितं ॥ १२ ॥ अस्यैव ध्यानमाहैकैकश इति । अनुभावयेत् ध्यायेत् पदं जितं अयत्नतः स्फुरितं पादगुल्फादि स्था

उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितं ॥ १० ॥ विभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलं ॥ ११ ॥ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते ॥ १२ ॥ एकैकशोंगानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुध्यति धीर्यथा यथा ॥ १३ ॥ यावन्न जायेत परावरेस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुष स्य रूपं क्रियावसाने प्रयतः स्मरेत ॥ १४ ॥

नं अवयवस्तत्तद्योगस्य स्थानं पादगुल्फा परपरं जंघाजान्वादि धारयेत् ध्यायेत् ॥ शुध्यति तस्मिन् निश्चला भवति ॥ १३ ॥ पूर्वोक्तं वैराजधारणया एतद्धारणा गत्वमाह यावदिति ॥ परे ब्रह्मादयः अवरे यस्मात् कुतः विश्वेश्वरे द्रष्टरि न तु दृश्ये चैतन्यघनत्वात् ॥ भक्तियोगः प्रेमलक्षणः क्रियावसाने आवश्यककर्मानुष्ठानानंतरं । अनेन कर्मापि भक्तियोगप

कैवल्यदीपि ॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंतावद्दासन्नमृत्योः पुंसः कृत्यमुक्तं। इदानीं तस्यैव स्वयं देहं त्यक्तुमिच्छतः कृत्यमाह स्थिरमिति सौर्द्धैस्त्रिभिः। अंगहेरा
जन्नेवंभूतो यतिर्यदा इमं लोकं देहं जिहासुः हातुमिच्छति तदा देशे पुण्यक्षेत्रे काले च उत्तरायणादौ मनो न सज्जयेत् संग
न प्रापयेत्। न देशकालौ योगिनः सिद्धिहेतू किंतु योग एवेति दृढनिश्चयो भूत्वा स्थिरं सुखकरं वासनमास्थितः
सन् प्राणं नियच्छेदित्यर्थः १५ एतां बुद्धिं क्षेत्रज्ञे बुद्ध्यादिद्रष्टरि निनयेत् प्रविलापयेत्। तं च क्षेत्रज्ञं आत्मनि शुद्धे तं च
शुद्धमात्मानं आत्मन्येवाहमिति आत्मनि शुद्धे ब्रह्मणि अवरुध्य एकीकृत्य लब्धोपशांतिः प्राप्तनिर्वृतिः सन् कृत्यादि
रमेत्। ततः परं प्राप्याभावात् १६ तदेवाह न यत्रेति। यत्रात्मस्वरूपे कालो न प्रभुः किमपि कर्तुं न समर्थः अत

स्थिरं सुखं वासनमास्थितो यतिर्यदा जिहासुरिममंग लोकं॥ काले च देशे च मनो न सज्जयेत् प्राणान्नि
यच्छेन्मनसा जितासुः॥ १५ मनः स्वबुद्ध्या मलया नियम्य क्षेत्रज्ञ एतां निनयेत्तमात्मनि। आत्मानमा
त्मन्यवरुध्य धीरो लब्धोपशांतिर्विरमेत कृत्यात्॥ १६॥ न यत्र कालो निमिषां परः प्रभुः कुतो नु देवा
जगतां य ईशिरे॥ न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान्प्रधानं॥ १७॥ परं पदं वैष्णवमामनं
ति तन्नेति नेतीत्यतदुत्सिसृक्षवः विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे १८॥

एवं देवा न प्रभवंतीत्याह अनिमिषां देवानां परः प्रभुः कालोपि यत्र न प्रभुः तत्र कुतो नु देवाः प्रभवेयुः देवनियम्यानां तु
य जगतां प्राणिनां का वार्तेत्याह जगतामिति। कुतो न प्रभवंतीत्यपेक्षायां निरुपाधित्वादित्याह न यत्रेति। यद्वा जग
त्कारणान्यपि न यस्य सृष्ट्यादौ प्रभवंतीत्याह न यत्रेति। विकारो अहंकारः अनिरुपाधित्वं कुत इत्यत आह
परमिति यद्यस्मात् अतत् आत्मव्यतिरिक्तं नेति नेतीत्येवमुत्स्रष्टुमिच्छवो दौरात्म्यं देहाद्यात्मकत्वं विसृ
ज्य अहेयस्य पूज्यस्य श्रीविष्णोः पदं पदे पदे क्षणे क्षणे हृदा उपगुह्य आश्लिष्य नान्यस्मिन्सौहृदं येषां तथाभूताः संतः ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किमत आह तस्मादिति। तस्मादित्थं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत्। वशेन यदि प्रयास्यन्निति वक्ष्यमाणात्स
काशाद्विशेषणत्वात् तमाह। विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जानातीति दृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिता विहिंसि
ताः। आशया विषयवासना यस्य सः। इदानीं तस्य देहत्यागप्रकारमाह। स्वपार्ष्णिना पादमूलेन [illegible] गुदं
मूलाधारं आपीड्य निरुध्य अनिलं प्राणं उन्नमयेत्। ऊर्ध्वं नयेत्। जितः क्लमो येन षट्सु स्थानेषु नाभ्यादिषु ॥१९॥
नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य तस्मादुरसि कण्ठादधो देशे स्थिते विशुद्धिचक्रे ॥ मनस्वी जि

इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्यसुरंधिताशयः ॥ स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं नी१
स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥ नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्
मुनिः ॥ ततोऽनुसंधाय धिया मनस्वी स्वतालुमूलं शनकैर्नयेत्ततः ॥२०॥ तस्माद्भ्रुवोरंतरमुन्नयेत
निरुद्धसप्तायतनोऽनपेक्षः ॥ स्थित्वा मुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्य मूर्द्धन्विसृजेत्परं गतः ॥
॥२१॥ यदि प्रयास्यन्नृप पारमेष्ठ्यं वैहायसानामुत यद्विहारं ॥ अष्टाधिपत्यं गुणसन्निवाये सहैव ग
च्छेन्मनसेंद्रियैश्च ॥२२॥

तच्चित्तः। स्वतालुमूलं तस्यैव चक्रस्याग्रदेशं। ततो बहुधा गमनसंभवाच्छनैरित्युक्तं ॥२०॥ तस्माद्भ्रुवोरंतरं आज्ञा
चक्रे। निरुद्धानि श्रोत्रनेत्रनासिकामुखं चेत्येवं सप्तायतनानि प्राणमार्गा येन सः अनपेक्षः ॥ परं ब्रह्मगतः स
न् मूर्द्ध निर्ब्रह्मरंध्रं निर्भिद्य देहमिंद्रियाणि च विसृजेत् ॥२१॥ सद्योमुक्तिमुक्त्वा क्रममुक्तिमाह यदीति। दशभिः प
दैस्तु पारमेष्ठ्यं पदं प्रयास्यन् भवति। वैहायसानां खेचराणां सिद्धानां यद्विहारक्रीडास्थानं तच्च दृष्टं अष्टावधि
पत्यानि अणिमाद्यैश्वर्याणि यस्मिन् तदपि प्रयास्यन्। गुणसंनिवाये गुणसमुदायरूपे ब्रह्मांडे सर्वत्रेत्यर्थः ॥
तर्हि देहत्यागावसरे मनश्चेंद्रियाणि न त्यजेत् किंतु तैः सहैव तत्तल्लोकभोगार्थं गच्छेत् ॥२२॥

आधारमणिपूरकं १ स्वाधिष्ठानं २ अनाहतं ३ विशुद्धि ४ आज्ञा ५ ... ६ ब्रह्मरंध्र ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ मानंद २

तदेव स्थूलसूक्ष्मभूतातिक्रममुक्त्वा तदावरणभूताहंकारप्राप्यामहदादिप्राप्तिमाह। संयोगी विकार्यैः संसाद्य विज्ञानतत्त्वं याति विविधं कार्यमस्येति विकार्योहंकारः स त्रिविधः तामसो राजसः सात्त्विक इति तत्र तामसाज्जडानि भूतसूक्ष्माणि जायंते राजसाद्बहिर्मुखानि दशेंद्रियाणि सात्त्विकान्मनइंद्रियं देवाश्चैतेषां लयश्चैतत्त्वदहंकारे तत्र भूतसूक्ष्माणामिंद्रियाणां च सन्निकर्षे लयस्थानं तामसं राजसं च मनोमयं देवमयं च सात्त्विकं प्राप्य गत्या एवं गमनेनैतेनाहंकारेण सह विज्ञानतत्त्वं महत्तत्त्वं याति ततः गुणानां सन्निरोधाल्लयाय स्मिन् तत्प्रधानं याति ॥ २९ ॥ तेनात्मना प्रधानरूपेणानंदमयेः सनूउपाधिनामचसाने शांतमविछिन्नमानंदं परमात्मानमुपैति ॥ न विषज्जते नावर्त्तत इत्यर्थः ॥ ३० ॥ स तौ मार्गौ प्र

सभूतसूक्ष्मेंद्रियसंनिकर्षं मनोमयं देवमयं विकार्यं ॥ संसाद्य गत्या सह तेन याति विज्ञानतत्त्वं गुणसंनिरोधं ॥ ३० ॥ तेनात्मनात्मानमुपैति शांतमानंदमानंदमयोवसाने ॥ एतां गतिं भागवतीं गतो यः स वै पुनर्नेह विषज्जतेंग ॥ ३१ ॥ एते सृती ते नृप वेदगीते त्वयाभिपृष्टे ह सनातने च ॥ ये वै पुरा ब्रह्मण आह पृष्ट आराधितो भगवान्वासुदेवः ॥ ३२ ॥

कारावित्यर्थः ॥ हे नृप ॥ अनपेक्षो निर्भिद्य मूर्द्धन्विसृजेत् परं गत इति या सद्योमुक्तिरेका सृतिः ॥ यदि प्रयास्यन्निर्त्यादिना क्रममुक्तिश्च द्वितीया सृतिः ॥ एते सृती वेदेन गीते उक्ते न तु स्वोत्प्रेक्षिते। तत्र पदा सर्वं प्रमुच्य नेकामाय स्पृहदिश्रिताः अथ मर्त्यो मृतो भवत्यत्र ब्रह्म समश्नुत इतिस सद्योमुक्तिः ॥ ते र्चिरभिसंभवंतीत्यादिना क्रममुक्तिश्च वेदेनोक्ता यद्दानकर्म भिस्तांगतिं मो भुवंतीति दक्षिणमार्गस्यापि सूचितत्वादेते सृती इति द्विवचनं त्वयाभिपृष्टे यद्ध्यातव्यमित्यादि प्रश्नेनार्थान्मुक्तिविषये अपि सृती पृष्टे उहियद्वा विपर्ययमिति दक्षिणमार्गोप्यर्थात्
स

राम
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतिसंसरतः पुंसावहेर्वामोक्षमार्गोः तपोयोगादयः समीचीनस्त्वयमेवेत्याह नहीति यतानुष्ठिताद्भक्तियोगोभवेत अतोनृः
शिवः सुखरूपो निर्विघ्नश्चनास्त्यव ३३ कुत एतदत आह भगवानु ब्रह्माकृत्स्नशः निर्विकारः एकाग्रचित्तः सन्नित्यर्थः
त्रिस्त्रीन्वारानुकार्त्स्न्येन साकल्येन ब्रह्मवेदं अन्वीक्ष्य विचार्ययत्तश्चात्मनि हरेरतिर्भवेत्तदेव मनीषया अध्यव
स्यत् निश्चितवान् ३४ नन्वनुभूतेर्थे रतिर्भवति अननुभूते तु भगवति कथं रतिः स्यात्तत्राह भगवानु लक्षितः द्रष्टृक

नह्यतोन्यः शिवः पंथा विशतः संसृताविह वासुदेवे भगवति भक्तियोगो यतो भवेत् ३३ भगवान्ब्रह्मका
र्त्स्न्येन त्रिरन्वीक्ष्य मनीषया तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ३४ भगवान्सर्वभूतेषु लक्षितः
स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैः ३५ तस्मात्सर्वात्मना राजन् हरिः सर्वत्र
सर्वदा श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणां ३६ पिबंति ये भगवत आत्मनः सतां कथा
मृतं श्रवणपुटेषु संभृतं पुनंति ते विषयविदूषिताशयं व्रजंति तच्चरणसरोरुहांतिकं ३७ ॥
इति श्रीभागवते महापुराणे द्वितीयस्कंधे द्वितीयोऽध्यायः २ श्रीराम

थं स्वात्मना क्षेत्रज्ञांतर्यामितया कैर्दृश्यैर्बुद्ध्यादिभिः तदेव हेतुं दर्शयति दृश्यानां जडानां दर्शनं स्वप्रकाशं द्रष्टारं विना
न घटत इत्यनुपपत्तिमुखेन लक्षणैः स्वप्रकाशांतर्यामिलक्षणैः तथा बुद्ध्यादीनि कर्तृप्रयोज्यानि करणत्वाद्वा
स्यादिवदिति व्याप्तिमुखेनानुमापकैः स्वतंत्रप्रयोक्तृत्वेनेश्वरसिद्धिः ३५ यद्धेतोः तव्यमित्यादि प्रश्नोत्तरमुपसं
हरति तस्मादिति ३६ श्रवणादिफलमभिनयनाह पिबंतीति सतां आत्मनः आत्मत्वेन प्रकाशमानस्य कथैवामृ
तं विषयैर्विदूषितं मलिनीकृतं आशयं पुनंति शोधयंति तस्य चरणपद्मांतिकं श्रीविष्णुपदं व्रजंति ३७ इति द्वि
तीयोऽध्यायः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीये विष्णुभक्तेः स्तुवे शिष्टं श्रावितां मुनेः॥ भक्त्युद्रेकेण तत्कर्मश्रवणादरईर्यत॥ इदानीमन्यदेवताभजनस्यापि पु
त्रादिभजनवद्देवतुच्छफलत्वेनेह यत्वं वक्तुं पूर्वोक्तमनुवदति एवमितिं ममेतिमा कदाचिद्दैवयोगेन मनुष्यत्वे
प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि म्रियमाणानां तेषां विशेषत एवं मनः शुद्धिकथाश्रवणादिकं निगदितं
विहितमित्यर्थः॥१॥ ब्रह्मणस्पतिं वेदपतिं ब्रह्माणं इंद्रियपाटवकामस्त्विंद्रं प्रजापतीन् दक्षादीन्॥२॥ मायां दुर्गां

॥श्रीशुक उवाच॥ एवमेतन्निगदितं पृष्टवान् यद्भवान्मम॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषि
णां॥१॥ ब्रह्मवर्च्चसकामस्तु यजेत ब्रह्मणस्पतिं॥ इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन्॥
२॥ देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं॥ वसुकामो वसून् रुद्रान् वीर्यकामोथ वीर्य
वान्॥३॥ अन्नाद्यकामस्त्वदितिं स्वर्गकामोदितेः सुतान्॥ विश्वान् देवान् राज्यकामः॥
साध्यान्संसाधको विशां॥४॥ आयुष्कामोश्विनौ देवौ पुष्टिकाम इलां यजेत्॥ प्रतिष्ठाकामः
पुरुषो रोदसी लोकमातरौ॥५॥ रूपाभिकामो गंधर्वान् स्त्रीकामोप्सर उर्वशीं॥ आधिपत्य
कामः सर्वेषां यजेत परमेष्ठिनं॥६॥

विभावसुं अग्निं॥ वसुकामः धनार्थी वीर्यप्रभावः तत्कामो वीर्यवान् सन् रुद्रान् यजेत्॥३॥ अन्नाद्यं भोज्यम
क्ष्यं वा अदितेः सुतान् द्वादशादित्यान्॥ विशां दशस्थप्रजानां स्वाधीनतामिच्छन् साध्यान् यजेत्॥४॥
इलां पृथ्वीं प्रतिष्ठा स्थानादृढप्रच्युतिः॥ रोदसी द्यावाभूमी॥५॥ अप्सरा अप्सरसो उर्वशीं वर्तां॥६॥ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

ऌ२

यज्ञं यज्ञोपाधिं विष्णुं कोशो वसु संचयः वसुकाम इत्यत्र धनमात्रमिति भेदः दांपत्यमन्योन्यप्रीतिः तदेवार्थो यस्य सः ॥७॥ धर्मोर्थः
धर्मकामः उत्तमश्लोकोपाधिं विष्णुं तंतुं तन्वन् संतानवृद्धिमन्विच्छन् रक्षा बाधानिवृत्तिः तत्कामः पुण्यजनान् यक्षान् ॥
नुं ओजो बलं तत्कामः मरुद्गणान् देवान् ॥ राज्यं राजत्वं तत्कामो मनून् देवान् मन्वंतरपालान् देवान् राज्ञः कामेराड्यं ते
कामा विश्वान् देवानि निर्विशेषः अभिचरन् शत्रुमरणमिच्छन् निर्ऋतिं राक्षसं कामकामः भोगेच्छुः अकामः वैरा

यज्ञं यजेद्यशस्कामः कोशकामः प्रचेतसं विद्याकामस्तु गिरिशं दांपत्यार्थ उमां सतीं ॥७॥ धर्मार्थ
उत्तमश्लोकं तंतुं तन्वन् पितॄन् यजेत् ॥ रक्षाकामः पुण्यजनान् ओजस्कामो मरुद्गणान् ॥८॥
राज्यकामो मनून् देवान् निर्ऋतिं त्वभिचरन् यजेत् ॥ कामकामो यजेत्सोममकामः पुरु
षं परं ॥९॥ अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं
परं ॥१०॥ एतावानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥११॥

ग्यः कामः पुरुषं परं प्रकृत्यतिरिक्तं निरुपाधिमीश्वरं ॥९॥ अकामः एकांतभक्तः उक्तानुक्तसर्वकामो वा पुरुषं पूर्णं
निरुपाधिं ॥१०॥ पूर्वोक्तनानादेवतायजनस्यापि संयोगपृथक्त्वेन भक्तियोगफलत्वमाह एतावानिति ॥
इंद्रादीनामपि यजतां इह तत्तद्यजने भागवतानां संगतो भगवत्यचलो भावो भक्तिर्भवतीति यत् एतावानेव निः
श्रेयसस्य परमपुरुषार्थस्योदयः लाभः अन्यत्तु सर्वं तुच्छमित्यर्थः ॥११॥

एकस्य तूभयार्थत्वे संयोगपृथक्त्वं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतसंगत इत्यनेन स्मृविना हरिकथारतिस्तोतिज्ञानमिति ॥ यत्तूयासु कथासु ज्ञानं भवति ॥ कीदृशं ज्ञासर्वतः प्रतिनि
वृत्तं उपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत् ॥ उत्त अनंतरं ते इतुरात्मप्रसादश्च ॥ यत्र यासु मनः प्रसादहेतुः
गुणेषु विषयेष्वसंगो वैराग्यं च उभयं त्रनिपादे इहामुत्रे च गुणेष्वसंगः ॥ कैवल्यमित्येव सम्मतः पंथा यो भक्तियोगः ॥
निर्वृत्तः श्रवणसुखेन अन्यत्रा निर्वृत्त इति वा ॥ तासु हरिकथासु को रतिं न कुर्यात् ॥ १२ अभिव्याहृतं उक्तं ऋषिं

ज्ञाने यदा प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उभय ॥ त्र गुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्व
थ भक्तियोगः को निर्वृतो हरिकथासु रतिं न कुर्यात् १२ शौनक उवाच ॥ इत्यभिव्याहृतं राजा
निशम्य भरतर्षभः ॥ किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कवि १३ एतच्छुश्रूषतां विद्वन्
१० सूत नोर्हसि भाषितुं ॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं १४ स वै भागवतो राजा
पांडवेयो महारथः ॥ बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे १५ वैयासकिश्च भगवा
न्वासुदेवपरायणः ॥ उरुगायगुणोदाराः सतां स्युर्हि समागमे १६ आयुर्हरति वै पुंसामुद्य
न्नस्तं च यन्नसौ ॥ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया १७

परब्रह्मदर्शिनं कविं शाद्ब्रह्मनिष्णातं १३ श्रवणेच्छायां हेतुः हरिकथा एव उदर्के उत्तरफलं यासु ताः कथाः सतां भागव गम
तानां सदसि सभायां स्युः १४ एतत्प्रपंचयति स चाइति द्वाभ्यां कृष्णपूजादिरूपां क्रीडां यः स्वीकृतवान् १५ उरुगायस्य १०
गुणैरुदाराः महत्यः कथाः स्युः १६ किंच रवेर्वक्ष्यमाणमायुर्हरति कथायास फलं कुर्वित्याशयेनाह त्रिभिः आ
युरिति ॥ असौ सूर्य उद्यन् उद्गच्छन् अस्तं अदर्शनं च यन्नागच्छन् यत् यन क्षणो नीतः तस्य आयुः ऋते वर्जयित्वा हरत्येव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु जीवनमेवैषामायुषः फलमस्तीत्याह तरव इति ॥ ननु तेषां श्वासो नास्ति । नहि भस्त्राः चर्मकोशाः ननु तासामाहारादिकं नास्तीत्याह । न खादंति नाश्नंति । न मेहंति रेतः सेकं मैथुनं न कुर्वंतीति किं तु ते अपि नराकारं पशुमत्वाह अपरे इति ॥१८॥ तदेवाह श्वादिभिः संस्तुतः सदृशो निरूपितः यस्य कर्णपथं कदाचिदपि नागतः ॥ सः श्ववेशस्य दत्वात् श्वभिः कश्मलविषयासक्तत्वात् विड्वराहैर्ग्रामशूकरैः कटकेष्वपि दुःखदविषयासक्तत्वात् उष्ट्रैः भारवाहित्वात् खरैः तुल्य इत्यर्थः ॥१९॥ तस्यांगानि च निःफलानीत्याह बिले इति पंचभिः बतेति खेदे न शृण्वतः

तरवः किं न जीवंति भस्त्राः किं न श्वसंत्युत न खादंति न मेहंति किं ग्रामपशवोपरे ॥१८॥ श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ॥१९॥ बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ॥२०॥ भारः परं प ट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदं शावौ करौ नो कुरुतः सपर्यां हरेर्लसत्कांचनकंकणौ वा ॥२१॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्षतो ये पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ॥२२॥ जीवञ्छवो भागवतांघ्रिरेणुं न जातु मर्त्योभिलभेत यस्तु ॥
श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसञ्छवो यस्तु न वेद गंधं ॥२३॥

अशृण्वतो नरस्य ये कर्णपुटे ते बिले इत्यर्थः । घ्राणं च दुपमायति तस्य जिह्वा असती दुष्टा । दर्दुरो भेकस्तदीया जिह्वेव ॥२०॥ पट्टवस्त्राभूषणकिरीटेन च जुष्टमपि शिरो यदि न नमेत् तर्हि केवलं भार एव शावौ मृतकस्य तत्कराविव लसती कांचनकंकणे ययोस्तौ अपि अर्थवाचार्थः ॥२१॥ ये नयने विष्णोर्मूर्तीर्न निरीक्षेते ते बर्हापिच्छे मयूरपिच्छे नेत्रतुल्ये द्रुमवज्जन्म भजतः इति तथा वृक्षमूलतुल्यावित्यर्थः ॥२२॥ नाभिलभेत अभितो न स्पृशेत् न धारयेत् श्रीविष्णुपद्याः श्रीविष्णुपदत्वग्न्याः पानवेदनिश्चय घ्रायनाभिनंदे दित्यर्थः ॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्मवत्सारो बलं काठिन्यं यस्य विक्रियालक्षणमाह अथेति गात्ररुहेषु रोमसु हर्षः उद्गमः ॥ २४ यस्मात् भक्तस्य सर्वे मन
अर्थं मनसानुकूलं च प्रियं ब्रूष अथ अतः साधु पृष्टः सन् वैयासकिः नृपतिं प्रतिदाह नहमिवेहीति ॥ २५ द्वितीये तृती
यः ॥ तुर्ये परीक्षिता पृष्टं सृष्ट्यादि हरिचेष्टितं शुकेन ब्रह्मनारदसंवादेनोपवर्ण्यते ॥ राज्ञः प्रश्नं कथयितुं तस्य
प्राकृतनीं स्थितिमाह चतुर्भिः वैयासकेः शुकस्य इति एवं कृत आत्मनस्तत्वस्य निश्चयाय सम्यातु तत्त्व उपधा

तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ॥ न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहे
११ षु हर्षः ॥ २४ अथाभिधेह्यंग मनोनुकूलं प्रभाषसे भागवतप्रधानः ॥ यदाह वैयासकिरात्मविद्या
विशारदो नृपतिं साधु पृष्टः ॥ २५ इति श्रीभागवते महापुराणे द्वितीयस्कंधे तृतीयोध्यायः ॥ ३ ॥
सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ॥ उपधार्य मतिं कृष्णे औत्तरेयः सतीं व्य
धात् ॥ १ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ राज्ये चाविकले नित्यं विरूढां ममतां जहौ ॥
२ पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ संस्था
विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ राजोवाच ॥ स
मीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ॥ तमो विशीर्यते मह्यं हरेः कथयतः कथां ॥ ५ भूय एव य२
विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६

ये आकलस्य सतीं दृष्ट्वा एवं सम्यक् नान्य इत्येवं कृत्वा ॥ १ आत्मा देहः पशवो गजादयः ॥ २ इममेवार्थं हरिलीला राम
लक्षणं ॥ ३ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं संन्यस्य त्यक्त्वा आत्मभावं परमप्रेमलाभं भगवद्धा ११
त्मत्वं गतः प्राप्तः सन् पप्रच्छ ॥ ४ मह्यं मम तमो अज्ञानं नश्यति तत्र च कथयतः सतः त्वत्तः समीचीनं ॥ ५ पुनश्च वेदि
तुमिच्छामि इदं दुर्विभाव्यं अवितर्क्यं विश्वं यथा सृजति ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपायतिपालयति। संयछ्छेतेसंहरते। पुरुशक्तिः बहुशक्तिमान्। क्रीडन्यथाकरोति। आत्मानंब्रह्मादिरूपिणंक्रीडयन्विकरोतिविविधंकरोति ७ ८ एकः पुरुषरूपेणयुगपज्जन्मभिः ब्रह्माद्यवतारैः क्रमेशोवायथाप्रकृतेर्गुणान्गृह्णाति ९ विचिकित्सितंसंदिग्धं शाब्दब्रह्मणोविचारेणनिष्णातःपरस्मिन्ननुभवेन १० उपमंत्रितः प्रार्थितः उपचन्द्रमेदेवतागुरुनमस्कारादिरूपमुपक्रमेहेत्वानिदानित्यर्थः ११ नदेवाहप्रयादशाभिः परस्मैसर्वोत्तमाय तत्रहेतुः भूयसे अपरिमितमहिम्नेतद्दर्शयतिसतः प्रपंचस्यउद्भवादिषुनिमित्तभूतायालीलयागृहीतंब्रह्मादिरूपेणरजआ

१२

यथागोपायतिविभुर्यथासंयछ्छतेपुनः। यांयांशक्तिमुपाश्रित्यपुरुशक्तिःपरःपुमान्। आत्मानंक्रीडयन्क्रीडन्करोतिविकरोतिच ७ नूनंभगवतोब्रह्मन्हरेरद्भुतकर्मणः। दुर्विभाव्यमिवाभातिकविभिश्चापिचेष्टितं ८ यथागुणांस्तुप्रकृतेर्युगपत्क्रमशोपिवा। बिभर्तिभूरिशस्त्वेकः कुर्वन्कर्माणिजन्मभिः ९ विचिकित्सितमेतन्मेब्रवीतुभगवान्यथा। शाब्देब्रह्मणिनिष्णातःपरस्मिंश्चभवान्खलु १०
सूतउवाच इत्युपामंत्रितोराज्ञागुणानुकथनेहरेः। हृषीकेशमनुस्मृत्यप्रतिवक्तुंप्रचक्रमे ११ श्रीशुकउवाच नमःपरस्मैपुरुषायभूयसेसदुद्भवस्थाननिरोधलीलया। गृहीतशक्तित्रियायदेहिनामंतर्भवायानुपलक्ष्यवर्त्मने १२ भूयोनमःसद्वृजिनच्छिदेऽसतामसंभवायाखिलसत्वमूर्तये।
पुंसांपुनःपारमहंस्यआश्रमेव्यवस्थितानामनुमृग्यदाशुषे १३

दिशक्तित्रितयंयेनतस्मैअंतर्भवायअंतर्यामिणे। अतएवसर्वांतरत्वादनुपलक्ष्यंवर्त्मयस्य १२ विचित्रफलदातृत्वंमनुस्मरन्प्रणमति। भूयः पुनश्चनमः सतांधर्मवर्तिनांवृजिनच्छिदेदुःखहर्त्रे। असतांअधर्मशीलानांअसंभवायअनुद्भवहेतवे। अखिलसत्वमूर्तयेयतस्तत्तद्देवादिरूपेणतत्तत्फलदायेत्यर्थः समयसत्वमूर्तयइतिवा। पुनरपिपूर्वोक्तंभयवैलक्षण्यमाहपारमहंस्येप्रत्यक्निष्ठारूपेआश्रमेव्यवस्थितानांपुंसांअनुमृग्यअतन्निरसनेनपुनःपुनर्मृग्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सात्वतां भक्तानां ऋषभाय पालकाय कुयोगिनां भक्तिहीनानां विदूरा काष्ठा दिगपि यस्य दुर्ज्ञेयायेत्यर्थः तदेवं वैषम्यप्रतीतावपि
निर्दोषत्वया विर्यमैश्वर्यमाह निरस्तसाम्यम् अतिशयश्च यस्य यदपेक्षया अन्यस्य साम्यमतिशयश्च नास्तीति न नराधसा ऐश्वर्येण
स्वधामनि स्वस्वरूपे ब्रह्मणि रममाणाय १४ सर्वसाधनेभ्यो भक्तिः श्रेष्ठं अनुस्मरन् प्रणमतिय कीर्तनमितिद्वाभ्यां अर्हणां पू
जनं सुभद्रं मंगलं श्रवः यशो यस्य नं स्मै १५ विचक्षणाः विवेकिनः यस्य चरणयोरुपसादनात् उपसत्तेर्भजनात् अंतरात्मनाम
नमो नमस्तेऽस्त्वृषभाय सात्वतां विदूरकाष्ठाय मुहुः कुयोगिनां ॥ निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रं
स्यते नमः १४ यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणं ॥ लोकस्य सद्यो विधुनोति कल्मषं त
स्मै सुभद्रश्रवसे नमो नमः ॥ १५ विचक्षणा यच्चरणोपसादनात् संगं व्युदस्योभयतोऽन्तरात्मनः ॥ विंद
ति हि ब्रह्मगतिं गतक्लमास्तस्मै सुभद्रश्रवसे नमो नमः ॥ १६ तपस्विनो दानपरा यशस्विनो मनस्विनो
मंत्रविदः सुमंगलाः ॥ क्षेमं न विंदंति विना यदर्पणं तस्मै सुभद्रश्रवसे नमो नमः ॥ १७ किरातहूणांध्र
पुलिंदपुल्कसा आभीरकंका यवनाः खसादयः ॥ येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्ण
वे नमः ॥ १८ ॥
नमः उभयत्र इह च परत्र च संगं व्युदस्य निरस्य गतक्लमाः प्रयासरहिताः ॥ १६ भक्तिशून्यानी सर्वसाधनैर्वैफल्यं दर्शय
न्नमस्ति तपस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचराः यस्मिन् तत्र आद्यपर्णं विना सुभद्रश्रवस इति अस्यार्
तियशः श्रवसोऽत्र प्राधान्यज्ञापनाय १७ भक्तेः परमशुद्धिहेतुत्वं दर्शयन्नाह किरातादयो ये पापजातयः ॥ ग
अन्ये च ये कर्मतः पापरूपास्ते यदुपाश्रयाः भागवताः तदाश्रयाः सन्तः शुध्यंति असंभावनाशंकां परिहर
ति प्रभविष्णवे प्रभवनशीलायेति १८ ॥ ॥ ॥ श्रीः ॥ ॥ ॥ श्रीः ॥ ॥ ॥ श्रीः ॥ ॥ हरिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेवोपास्यत्वमनुस्मरन्प्रार्थयते। सएषआत्मवतांधीराणांमात्माआत्मत्वेनोपास्यइत्यर्थः त्रयीमन्वादिविशेषणैः तत्रन्यायेणोपास्यत्वे
विचक्षितंगतेव्यलीकेनिष्कपटेभक्तेविनेकं अन्याश्रयेणवीक्षणीयंलिंगंमूर्तिर्यस्यसप्रसीदतु १९ सर्वपालकत्वमनुस्मरन्नाह श्रिय
इतिगतिश्चसर्वोपत्सुरक्षकः २० ज्ञानप्रदत्वमनुस्मरन्नाहद्वाभ्यां यस्यांघ्रोरनुध्यानमेवसमाधिस्तेन धौतयाशोधितयायथास्वंय
चानुसारेणसगुणनिर्गुणादिभेदेः यद्वारूपंप्रतिभायथामनीत्यर्थः २१ किंच पुराकल्पादौअजस्यहृदिसतीसृष्टिविषया
स्मृतिर्वितन्वतीविस्तारयंतीयेनप्रचोदितासतीतस्यमुखतःकिलप्रादुर्भूता स्वानिलक्षणानि निरीक्ष्यायुक्तानियस्याःसा

सएषआत्मात्मवतामधीश्वरस्त्रयीमयोधर्ममयस्तपोमयः गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगोभग
वान्प्रसीदतां १९ श्रियःपतिर्यज्ञपतिःप्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः पतिर्गतिश्चांधकवृ
ष्णिसात्वतांप्रसीदतांमेभगवान्सतांपतिः २० यदंघ्र्यनुध्यानसमाधिधौतयाधियानुपश्यंतिहित
त्वमात्मनः वदंतिचैतत्कवयोयथारुचंसमेमुकुंदोभगवान्प्रसीदतां २१ प्रचोदितायेनपुरासर
स्वतीवितन्वताजस्यसतींस्मृतिंहृदि स्वलक्षणाप्रादुरभूत्किलास्यतःसमेऋषीणामृषभःप्रसीद
तां २२ भूतैर्महद्भिर्यइमाःपुरोविभुर्निर्मायशेतेयदमूषुपूरुषः भुंक्तेगुणान्षोडशषोडशात्मकः सोऽलंकृषी
ष्टभगवान्वचांसिमे २३ नमस्तस्मैभगवतेवासुदेवायवेधसे पपुर्ज्ञानमयंसौम्यायन्मुखांबुरुहासवं २४

ऋषीणां ऋषभःश्रेष्ठः २२ इदानींस्ववाक्छोतृजनानांह्लादिनींशृंगारकरुणादिशोभांप्रार्थयते भूतैरिति समेवचांसिअलंकृषी
ष्टअलंकरोतु अन्यस्यवचसामन्येनालंकाराःसंभवमाशंक्यतस्यान्तर्यामित्वमाविष्करोति यामहद्भिर्भूतैरिमाःपुरःशरीराणि
सृष्ट्वाअमूषुपूर्षुअंतर्यामितयाशेतेवसति अत्रपुरुषसमाख्याप्रमाणयति यदयस्मात्पुरुषइति अतएवयःएकादशेन्द्रियपंचभूतरूपा
न्षोडशगुणान्कलाःभुंक्तेप्रकाशयतिपालयतीतिवा तदात्वात्मनपदमार्षं अत्रहेतुः यतःषोडशात्मा तमाचचक्षेयितारंस्वा
र्थेकः नन्वत्रजीवत्वमुच्यतेप्रार्थनाविरोधात् २३ श्रीव्यासनमस्करोतिसौम्याभक्ताःयस्यमुखांबुरुहआसवामकर
दं ते २४

श्रापोड २

श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न२

इदानीं प्रश्नस्योत्तरं ब्रह्मनारदसंवादं प्रस्तौति एतदिति । उत्पत्तिसमय एव वेदगर्भो यस्य साक्षाद्धरिर्यदाह २५ इति द्वितीयचतुर्थः
पंचमे नारदेनाथ पृष्टः स्रष्टादिवक्ताऽजः हरेर्लीलां विराट्सृष्टिकालकर्मादिशक्तिभिः । नारदाय विपृच्छते वेदगर्भोऽभ्यधादिति तु
के तत्र नारदप्रश्नमाह देवदेवेति हे भूतभावन त्वमेव सर्वेषां पूर्वज अनादि जायते नेनेति ज्ञानं तत्साधनं यत्तन्न हि जानी
हि विशेषेण ज्ञापय तस्यैः कथंभूतं आत्मतत्त्वं निरंतरो दर्शयते येन तत् १ उपलक्षणभूतं विश्वमवात्मज्ञानसाधनं अत
स्तद्विशेषं पृच्छति यद्रूपं येन रूप्यते प्रकाश्यते यदधिष्ठानं यदाश्रयं यतः येन सृष्टं यत्संस्थं यस्मिन् लीयते यत्परं यदधीनं

एतद्वात्मभूराजन्नारदाय विपृच्छते वेदगर्भोऽभ्यधात्साक्षाद्यदाह हरिरात्मनः २५ इति श्रीभागवते म ह२
हापुराणे द्वितीयस्कंधे चतुर्थोध्यायः ॥ ४ श्रीनारद उवाच देवदेव नमस्तेऽस्तु भूतभावन पूर्वज ॥ न द्विजानी र्वे२
हि यज्ज्ञानमात्मतत्त्वनिदर्शनं १ यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं व
१३ द तत्त्वतः २ सर्वं ह्येतद्भवान्वेद भूतभव्यभवत्प्रभुः करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३
यद्विज्ञानो यदाधारो यत्परस्त्वं यदात्मकः एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४

यद्वेति । यदात्मकं स्वतः सत्कारणं तो चेत्यर्थः । तस्य तत्त्वं याथार्थ्येन तत्त्वतो वद २ न जानामीति नन्वविज्ञात्वमित्याह सर्व
मिति भूतं जातं भव्यं जनिष्यमाणं भवत् जायमानं तेषां प्रभुर्यतः अतः विशिष्टेन ज्ञानेनावसितं निश्चितं ३ आ
य२ स्तामिदं आदौ तावत् त्वामेव कथयेत्याह यतो विज्ञानं स्यके तव विज्ञानद इत्यर्थः ॥ यदाधारः के तवाश्रयः यत्प राम
रः यदधीनः यदात्मकः स्वस्वरूपः मम तु त्वमेव स्वतंत्रः परमेश्वर इति बुद्धिः न वक्तव्य पश्चरणेन तु परशंकया पृच्छा १३
मीत्याह सोऽहं अर्तुभिः एकः असहायः ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा ३ स्क २

आत्मनि भावयसे पालयसि स्वयमेव पराभवमप्रापयन् ॥ अक्लामः श्रमरहितः । यथोर्णनाभिरात्मन एव शक्तिमवष्टभ्य सृजति
तद्वत् ॥ ४ ॥ तस्मादहं तु अस्मिन्विश्वस्मिन् परमुत्तमं अपरम् अधमं समं मध्यमं च । तत्रापि नाम मनुष्यादि रूपं द्विपदत्वादि गुणाः शुक्ल
त्वादिर्वा भाव्यं साध्यं । तत्रापि सदसत् स्थूलं सूक्ष्मं च किंचिदप्यन्यतो न वेद किं तु त्वमेव सर्वं भवतीति मन्ये ॥ ५ ॥ स तथाविधोऽपि भ
वान् तपश्चचरदिति यत् तेन नोऽस्मान् खेदयसे मोहयसि । यतः पराशंकां ईश्वरशंकां प्रयच्छसि ॥ ६ ॥ यथैवाहं त्वयानुशासितः
शिक्षितः सन् बुध्ये बुध्येयं तथा विशेषेण विज्ञापय ॥ ७ ॥ प्रश्नमभिनंदति हे वत्स पुत्र ते वद विचिकित्सितं संदेहः तत्पूर्वकः प्रश्नो

आत्मन् भावयसे तानि न पराभावयन् स्वयं ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥ नाहं वेद परं ह्यस्मि
न् नापरं न समं विभो । नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ॥ ६ ॥ स भवानचरद्घोरं यत्तपः सुसमाहि
तः । तेन खेदयसे नस्त्वं पराशंकां च यच्छसि ॥ ७ ॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ सकलेश्वर ॥ विजानीहि य
थैवेदमहं बुध्येऽनुशासितः ॥ ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं वत्स ते विचिकित्सितं ॥ यदहं चोदि
तः सौम्य भगवद्वीर्यदर्शने ॥ ९ ॥ नानृतं तव तच्चापि यथा मां प्रब्रवीषि भोः ॥ अविज्ञाय परं मत्त एता
वत्त्वं यतो हि मे ॥ १० ॥

यं सम्यगित्यर्थः । यतः कारुणिकस्य तवायं प्रश्नः ॥ अत्र हेतुः यत् यतः परमधर्मे भगवद्वीर्यप्रकाशने प्रवर्तितोऽस्मि
श्री २ अतस्त्वं जि[illegible]सुरपि भयि कृपामेव कृतवानित्यर्थः ॥ ८ ॥ ननु त्वमेव भगवानित्युक्तं त्वया एकः सृजसि भूतानि
त्यादिना । सत्यं यथा मामीश्वरत्वेन प्रभाषसे तदपि न वृथा भाषणं नानृतं न मन्ये यतः कारणात् एतावत् प्रभावस्य भावः
यतावत्त्वमस्ति । किं तु मत्तः परमीश्वरमविज्ञाय ब्रूषे अतः सादृश्यात्तवेयं भ्रांतिः न तु बुद्धिपूर्वं नृतमित्यर्थः यत स्क २
ईश्वरान्मम एतावत्त्वं तमविज्ञायेति चान्वयः ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकाशितेनेरोचितं

वी॰

तर्हि कोसावीश्वर इत्यपेक्षायां भक्तानमस्कुर्वन्नेव तं कथयति त्रिभिः॥ येन स्वप्रकाशितमेव प्रकाशयामि सत्याभिव्यक्तिं करोमि। य
थार्कोदयं श्रितं तत्प्रकाशमेव प्रकाशयति। तथा च श्रुतिः॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः।
तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति॥११॥ तस्मै नमो धीमहि यस्य मायामोहिताः संतो युष्मदादयो मां
जगत्प्रभुं जगत्कर्तारं वदंति तस्मै॥१२॥ यन्माययेति मायासैव धोक्ता तस्मात् दुर्ज्ञेयत्वोक्तिः अतस्योपि किमस्ति संसारः।
नैव त्वाहमत्कपदं संसो जानातीति। यस्य दृष्टिपथस्थातुं विलज्जमानं येव तस्मिन् स्वकार्यमकुर्वत्या अमुया मा।

येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं। यथार्कोग्निर्यथा सोमो यथा ऋक्षग्रहतारकाः॥११॥ तस्मै नमो
भगवते वासुदेवाय धीमहि। यन्मायया दुर्ज्जयया मां ब्रुवंति जगद्गुरुं॥१२॥ विलज्जमानया यस्य स्था
१४ ऽमुया २ तुमीक्षापथेमुया। विमोहिता विकत्थंते ममाहमिति दुर्धियः॥१३॥ द्रव्यं कर्म च कालश्च स्वभावो जी
व एव च। वासुदेवात्परो ब्रह्मन्न चान्योर्थोस्ति तत्वतः॥१४॥ नारायणपरा वेदा देवा नारायणां
गजाः। नारायणपरा लोका नारायणपरा मखाः॥१५॥

यया विमोहिता अस्मदादयो दुर्द्धियः। अविद्याकृतज्ञानाः एवं केवलं विकत्थंते श्लाघंते अनेन नयद्रूपमित्यस्य प्रश्नस्योत्त
द्रव्यं २ रमुक्तं भवति॥१३॥ तदेवं स्वस्मादन्यं परमेश्वरं निरूप्येदानीं यदधिष्ठानमित्यादिनव प्रश्नानां स एवाधिष्ठानादिकं सर्वमि
त्युत्तरं वक्तुं तद्व्यतिरेकेणान्यस्यासत्वमाह द्रव्यमिति द्रव्यमिति महाभूतानि उपादानरूपाणि। कर्म जन्मनिमित्तं का
स्वः २ लः क्षोभकः। स्वभावस्तत्परिणामहेतुः। जीवो भोक्ता। वासुदेवात्परोन्योर्थो नास्ति कारणाव्यतिरेकात्कार्यस्य॥१४॥ तत्प्र
पंचयति द्वाभ्यां नारायणः परः कारणं येषां ते अनेनैव शास्त्रयोनित्वप्रतिपादनेनेश्वरः प्रमाणं सर्वज्ञत्वादिकं चोक्तं

राम
१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सृज्यमपि तेन सृष्टोहं

योगः प्राणायामादिः तपस्तत्साध्यं चित्तैकाग्र्यं ज्ञानं तत्साध्यं गतिस्तत्फलं अनेनैव सर्वं तद्धि नमित्युक्तं १६ तर्हि त्वं किंकरोषीत्यपेक्षायामाह
तस्यैव सृजामि ईक्षया कटाक्षेण तत्र हेतवः द्रष्टुरित्यादयः १७ ननु कुतोयं जीवेश्वरविभागः यतस्त्वं प्रेर्यः स च प्रेरकः स्यादित्यपेक्षा
यां जीवेश्वरविभागहेतुमाह त्रिभिः सत्वमिति निर्गुणस्यापीश्वरस्यैते त्रयो गुणा बध्नन्तीत्युत्तरेणान्वयः कथंभूताः तेनैव स्वातंत्र्येण
स्थित्याद्यर्थं मायया गृहीताः १८ बन्धकत्वं सर्वदा मुक्तमपि मायिनं मायाविषये पुरुषं जीवं बध्नन्ति कार्यं कायं अधिभूतं कार

नारायणपरो योगो नारायणपरं तपः ॥ नारायणपरं ज्ञानं नारायणपरा गतिः ॥ १६ ॥ तस्यापि द्रष्टुरीशस्य कूट
ज्यं २ स्थस्याखिलात्मनः ॥ सृ~~ज्यं~~ सृजामि सृष्टोहमीक्षयैवाभिचोदितः ॥ १७ ॥ सत्वं रजस्तम इति निर्गुणस्य गुणा
स्त्रयः ॥ स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥ १८ ॥ कार्यकारणकर्तृत्वे द्रव्यज्ञानक्रियाश्रयाः ॥
बध्नन्ति नित्यदा मुक्तं मायिनं पुरुषं गुणाः ॥ १९ ॥ स एष भगवान् लिंगैस्त्रिभिरेतैरधोक्षजः ॥ स्वलक्षि
तगतिर्ब्रह्मन् सर्वेषां मम चेश्वरः ॥ २० ॥ कालं कर्म स्वभावं च मायेशो मायया स्वया ॥ आत्मन् यदृच्छया
प्राप्तं विबुभूषुरुपाददे ॥ २१ ॥ कालाद्गुणव्यतिकरः परिणामः स्वभावतः ॥ कर्मणो जन्म महतः पुरुषाधिष्ठिता
दभूत् ॥ २२ ॥

णमध्यात्मं कर्तृत्वमधिदैवं तेषां भावस्तत्त्वं तस्मिन् द्रव्यं महाभूतानि ज्ञानं शब्दं देवताः क्रिया इंद्रियाणि तदाश्रयाः तेषां कारण
भूताः तत्तदभिमानेन बध्नन्ति १९ अतः स एव वश्यमायः एभिर्गुणैर्लिंगैः जीवानामावरकैरुपाधिभिः सुष्ठु अलक्षि
ता गतिस्तत्त्वं यस्य सः स्वभक्तैरेव लक्षिता गतिर्यस्येति वा २० तस्य सृष्टिप्रकारं कालमिति कर्म जीवादृष्टं विबुभूषुः विविधं माहा २
त्रि भवितुमिच्छन् २१ गुणानां व्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपान्तरापत्तिः पुरुषः ईश्वरस्तेनाधिष्ठितात् त्वं त्रय
णां विशेषणं महतः महत्तत्त्वस्य २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विकुर्वाणात् विक्रियमाणात् तस्य च क्रियाज्ञानशक्तित्वात् त्रिगुणत्वेपि रजःसत्वाभ्यामुपबृंहितत्वं अहंकारस्य त्वावरकत्वात्
मः प्रधानत्वं अत एवाहंकारकार्येषु तामसमाकाशादिकं बहु राजसं सात्विकं चाल्पं एवं तद्रूपाधिकेषु त्रिविधेष्वपि तंथैव ता
मसाधिक्यं २३ स च विकुर्वन् रूपांतरं गच्छन् त्रैविध्यमेवाह वैकारिकः सात्विकः तैजसो राजसः यद्विद्यायस्य भेदः
द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्यमेहाभूतारव्यं शक्तिर्यस्य क्रियासु इंद्रियेषु शक्तिर्यस्य ज्ञानेषु
देवेषु शक्तिर्यस्य हि प्रभावोऽस्य शक्तः २४ भूतादेरिति नामसस्य विशेषणं ननु तामसात्प्रथमं शब्दो भवतीति प्रसिद्धं सत्यं सत्

महतत्त्वाद्विकुर्वाणाद्रजःसत्त्वोपबृंहितात् तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः २३ सोहंका
र इति प्रोक्तो विकुर्वन् समभूत्त्रिधा वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा द्रव्यशक्तिः क्रियाशक्ति
र्ज्ञानशक्तिरिति प्रभो २४ तामसादपि भूतादेर्विकुर्वाणादभून्नभः तस्य मात्रा गुणः शब्दो लिंगं
यद्द्रष्टृदृश्ययोः २५ नभसोथ विकुर्वाणादभूत्स्पर्शगुणोनिलः परान्वयाच्छब्दवांश्च प्राणओ
जः सहोबलं २६ वायोरपि विकुर्वाणात्कालकर्मस्वभावतः उदपद्यत तेजो वै रूपवत्स्पर्शश
ब्दवत् २७ तेजसस्तु विकुर्वाणादासीदंभो रसात्मकं रूपवत्स्पर्शवच्चांभो घोषवच्च परान्वयात् २८

तस्य नभसो मात्रा सूक्ष्मं रूपं गुणश्च असाधारणः व्यावर्तको धर्मः शब्दद्वारानभउत्पद्यत इत्यर्थः एवमेव स्पर्शादिष्वपि द्रष्टव्यं शब्द
स्य लक्षणं लिंगमिति कुड्याद्यंतरितेन केनचिदुच्चैर्गजो गजइत्युक्तो यो गज इष्टा यश्च तेन दृश्यो गजः तयोर्लिंगं बोधकं लिंग
विशेषणत्वात् यच्छब्दस्य षष्ठत्वं २५ परस्य नभसः कारणत्वेनान्वयाच्छब्दवांश्च वायुः तस्यैव लक्षणं प्राणो देहधारणं तु ९५
जः सहो बलानि इंद्रियमनःशरीराणां पाटवानि तेषां हेतुरित्यर्थः २६ स्वतो रूपवत्तेजः वायुनभसोः कारणभूतयो
रन्वयात्स्पर्शशब्दवच्च एवमभसः पृथिव्याश्च परान्वयादधिकात् गुणाधिक्यं २७ घोषः शब्दः २८ ॥ ७ ७

विशेषः पृथ्वीपृथिव्या अप्परान्वया धिक्यानुगुणाधिक्यो ॥ २७ ॥ मनः शब्दे नैवनदधिष्ठानाचंद्रोपिदृश्यः ॥ अन्ये चदशदेवावैकारिका । सा-
विकाहंकार कार्याः ॥ नानाहदिशः अवाते अर्क अप्रचेता अश्विनौ चएते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वन्हिः अ-
इंद्र अतउपेंद्र अमित्र अक अप्रजापतिः ॥ एतेपंचवाक्पाणिपादपायूपस्थानां अधिष्ठातारः ॥ २० ॥ यतोज्ञानशक्ति र्बुद्धिः क्रि-
याशक्तिः प्राण अतेतैजसाहंकारकार्यो ॥ अतो ज्ञान क्रियाविशेषरूपाणींद्रियाण्यपि तैजसाद भवन्नित्यर्थः ॥ नान्योह श्रोत्र

विशेषस्त्वविकुर्वाणादिंभसांगंधवान्भूतं ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥ २७ ॥ वैकारिकान्मनोज-
ज्ञे देवावैकारिकादश ॥ दिग्वातार्कप्रचेतोश्विवन्हींद्रोपेंद्रमित्रकाः ॥ २० ॥ तैजसात्तुविकुर्वाणादिंद्रिया-
णिदशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिर्बुद्धिःप्राणस्तु तैजसौ ॥ श्रोत्रंत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रि-
पायवः ॥ २१ ॥ यदैतेऽसंगताभावाभूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणेनशेकुर्ब्रह्मवित्तम ॥ २२ ॥ तदासंहत्य
चान्योन्यंभगवच्छक्तिचोदिताः ॥ सदसत्वमुपादायचोभयंससृजुर्ह्यदः ॥ २३ ॥ वर्षपूगसहस्रांतेतदंडमुदके-
शयं ॥ कालकर्मस्वभावस्थोजीवोऽजीवमजीवयत् ॥ २४ ॥ सएवपुरुषस्तस्मादंडंनिर्भिद्यनिर्गतः ॥ सहस्रो-
र्वंघ्रिबाहूक्षःसहस्राननशीर्षवान् ॥ २५ ॥ यस्येहावयवैर्लोकान्कल्पयंतिमनीषिणः ॥ वंघ्रिबाहूक्षसहस्रा × कआदिःसिरधःस

मिति दोः पाणिः मेढ्रः उपस्थः कामस्त्वत्रन विवक्षितः ॥ २१ ॥ एवं कारणसृष्टिमुक्त्वाकार्यसृष्टिमाह ॥ यदाएते असंगताः ॥ अमिलिता
आसन् अतएवयदा आयतनस्यशरीरस्यनिर्माणेनशेकुः ॥ २२ ॥ तदासदसत्वं प्रधानगुणभावंउपादाय स्वोसेयच
भयंसमष्टिव्यष्ट्यात्मकं शरीरं ॥ २३ ॥ कालकर्मस्वभावनधिष्ठायस्थितः ॥ जीवयतीजीवः ॥ परमात्मा अजीवमचेतनं
अजीवयत् चेतयतिस्म ॥ २४ ॥ निर्भिद्यपृथक्कृत्वास्थितइत्यर्थः ॥ २५ ॥ तदवयवैर्लोकरचनामाहयस्येति ॥ कटिरिति तुरभं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्णानां तत उत्पत्तिं दर्शयति पुरुषस्येति ब्रह्म ब्राह्मणः मुखमिति कार्यकारणयोरभेदविवक्षया उक्तिर्बाहव इति क्षत्रं क्षत्रियः ३७॥
इदानीमुपासनार्थं लोककल्पनाभेदान् दर्शयन् सप्तलोकपक्षमाह द्वाभ्यां भूर्लोकः पातालमारभ्य षड्भीकटिपर्यन्ताभ्यां ३८ ग्री
नहृदयादित्तिउपासनार्थत्वादूर्ध्वाधोभावविपरीत्यं न दोषः यद्वास्मिन्नन्तु शङ्कुवेत् यदा ह्युद्वर्तत स्मादित्यर्थः ब्रह्मलोकः वैकु
ण्ठाख्यः सनातनः नित्यः न तु सृज्यप्रपञ्चान्तर्वर्तीत्यर्थः ३९ इदानीं चतुर्दश दर्शयन्नितत्र जघनादिनि भूरादयः पूर्वोक्ता एव सप्तक

पुरुषस्य मुखं ब्रह्म क्षत्रमेतस्य बाहवः ऊर्वोर्वैश्यो भगवतः पद्भ्यां शूद्रोऽभ्यजायत ३७ भूर्लोकः कल्पितः पद्भ्यां
भुवर्लोकोऽस्य नाभितः हृदा स्वर्लोक उरसा महर्लोको महात्मनः ३८ ग्रीवायां जनलोकश्च तपोलोकः स्तन
द्वयात् मूर्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः ३९ तत्कट्यां चातलं क्लृप्तमूरुभ्यां वितलं विभोः जानु
भ्यां सुतलं शुद्धं जङ्घाभ्यां तु तलातलं ४० महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलं पातालं पादतलत
इति लोकमयः पुमान् ४१ भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः स्वर्लोकः कल्पितो मूर्ध्ना इति वा लो
ककल्पना ४२ इति श्रीभागवते महापुराणे द्वितीयस्कन्धे पञ्चमोऽध्यायः ब्रह्मोवाच वाचां वह्नेर्मुखं
क्षेत्रं छन्दसां सप्त धातवः हव्यकव्यामृतान्नानां जिह्वा सर्वरसस्य च १

दिभिः रघः सप्तलोकानाह तलकल्पामितिद्वाभ्यां शुद्धं हरिभक्तनिवासत्वात् ४०/४१ त्रिलोकपक्षमाह भूर्लोकः पातालादिसहि
तः ४२ इति द्वितीये पञ्चमः षष्ठे विराड्विभूतिश्च प्रोक्ताध्यात्मादिभेदतः हरेः रूपं च पूर्वोक्तं सर्वं पुरुषसूक्ततः सर्वं पुरुषसूक्ते
इदानीं विराजस्य विभूतिः सप्रपञ्चमनुवर्णयते वाचां अस्मदादिवागिन्द्रियाणां तदधिष्ठातुर्वह्नेश्च तस्य मुखं क्षेत्रं उत्पत्तिस्थानं छ
न्दसां गायत्र्यादीनां सप्तानां तस्य सप्त धातवः त्वगादयः क्षेत्रं हव्यं देवानामन्नं कव्यं पितॄणां अमृतं तद्भयशेषो मनुष्याणां तेषाम
न्नानां सर्वरसस्य मधुरादेः षड्विधस्य च कारादस्मदादिसनेन्द्रियस्य तदधिष्ठानुर्वरुणस्य च एतस्य जिह्वा क्षेत्रं उत्पत्तिस्थानं एवं सर्वं

२२

सर्वासूनामस्मदादिप्राणानांतस्यनासिकानासारंध्रेपरमायनेतत्तन्मेदेनेमोदप्रमोदयो अ सामान्यविशेषगंधयोर्घ्राणः घ्राणेंद्रियं
परमायने १ रूपाणांतेजसांरूपप्रकाशानांचक्षुरिंद्रियस्य दिणिनेत्रगोलके सर्वत्र षष्ठ्यंतानांप्रथमांत क्षेत्रे द्रष्टव्यं कर्णौ
श्रोत्राधिष्ठानेश्रोत्रमिंद्रियं तस्यगात्रशरीरेवस्तूनांयेसाराशा १ तेषां भाजनंस्थानं ३ अस्यत्वक्स्पर्शस्यवायोरस्यर्थं
यज्ञस्य सर्वमेधस्य ३ उद्भिज्जजातीनांसर्ववृक्षाणांयेपृष्ठेदेर्यज्ञः सम्यक्साधितः तेषामेववा ४ केशामेघानां द्यौत्रे पूर्वेतथोक्ते १
श्मश्रूणि विद्युतो पादकरनखानि शिलालोहानामिति साहस्यादूह्यं क्षेमकर्मणेपालनकर्तृणी ५ विक्रमः १ पा

सर्वासूनांववायोश्चतन्नासपरमायने ॥ अश्विनोरोषधीनांचघ्राणेमोदप्रमोदयो १ २ रूपाणांतेजसांच
क्षुर्दिवः सूर्यस्यचादिणी ॥ कर्णौदिशांचतीर्थानांश्रोत्रमाकाशशब्दयो १ ॥ तद्गात्रेवस्तुसाराणांसौ
हात्रविघ्रसांवा भगस्यचभाजनं ३ त्वगस्यस्पर्शवायोश्चसर्वमेधस्यचैवहि ॥ रोमाण्युद्भिज्जजातीनांयैर्वायज्ञस्त्वसं
भृतः ४ केशश्मश्रुनखान्यस्यशिलालोहंबाल्लोकपालानांप्रायशः क्षेमकर्मणी ५ विक्रमोभूर्भुवस्व
श्र श्चक्षेमस्यशरणस्यच ॥ सर्वकामवरस्यापिहरेश्चरणंस्पदं ६ अपांवीर्यस्यसर्गस्यपर्जन्यस्यप्रजा
पतेः ॥ पुंसः शिश्नउपस्थस्तुप्रजात्यानंदनिर्वृतेः ७ पायुर्यमस्यमित्रस्यपरिमोक्षस्यनारद ॥ हिंसा
यानिर्ऋतेर्मृत्योर्निरयस्यगुदः स्मृतः ८ ॥

दन्यासो भूरादिलोकानां आस्पदं आश्रयः भूरादिशब्दानामव्ययत्वात् षष्ठ्यालुक् क्षेमालयं रक्षणंशरणं भयाद्रक्षणं स ८७
घ्रि २ र्वेषांकामानांवरस्यवरणस्यापिहरेः पदंरास्पदं ६ वीर्यस्यशुक्रस्यशिश्नाधिष्ठानं उपस्थइंद्रियं प्रजात्या
नंदः संतानार्थः संभोगस्तेननिर्वृतिः १ नायहानिस्तस्याः ७ परिमोक्षस्यमलत्यागस्यपायुरिंद्रियं गुदः स्थानंनि
र्ऋतेरलक्ष्म्याः १ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमसोः स्थानस्य पश्चिमः पृष्ठभागः गोत्राणां गिरिणोऽस्थिसंघानः टी अव्यक्तेः प्रधानं रसः अन्नादिसारः सिंधवः समु
द्रास्तेषां निधनस्य लयस्य उदरं पदं स्थानं विदितं ज्ञानिभिः मनसः असमदादिलिंगशरीरस्य १० नृभ्यंतरवकुमारा
णां सनकादीनां भवस्य श्रीरुद्रस्य आत्मा चित्तं पूरमायनं ११ एवं तावत् परमेश्वराज्जातं विश्वं ततो न भिन्नं यथा कुंड
लं सुवर्णान्न पृथक् स तु सर्वनियंता सर्वप्रकाशको नित्यमुक्त इत्यर्थादुक्तं एतदेव पुरुषसूक्तार्थकथनेन इदय
ति नेत्रसहस्रशीर्षेत्य ब्रह्मणस्य मुखमासीदित्यादि ... चेतु द्यस्यार्थः पूर्वाध्याय एव दर्शितः पु

१८ पराभूतेरधर्मस्य तमसः आपि पश्चिमः ॥ नाड्यानदनदीनां तु गोत्राणामस्थिसंहतिः टी अव्यक्तर
ससिंधूनां भूतानां निधनस्य च ॥ उदरं विदितं पुंसो हृदयं मनसः पदं १० धर्मस्य मम तुभ्यं च
कुमाराणां भवस्य च ॥ विज्ञानस्य च सत्वस्य परस्यात्मा परायणं ११ अहं भवान् भवश्चैव त इमे
मुनयोऽग्रजाः सुरासुरनरा नागाः खगा मृगसरीसृपाः १२ गंधर्वाप्सरसो यक्षा रक्षोभूतग
णोरगाः पशवः पितरः सिद्धाः विद्याध्राश्चारणा द्रुमाः अन्ये च विविधा जीवा जलस्थलनभो
कसः १३ ग्रहर्क्षकेतवस्तारास्तडितः स्तनयित्नवः सर्वं पुरुष एवेदं भूतं भव्यं भवच्च सत् १४

रुष एवेदं सर्वमित्यस्यार्थं दर्शयति अहं भवानिति सार्द्धैः त्रिभिः ते अग्रजा इमे सनकादयः मरीच्यादयश्च १२ राम
जलं च स्थलं च नभश्चौकांसि येषां ते नभौकसः इति संधिरार्षः १३ सर्वं पुरुष एव न ततः पृथगित्यर्थः १४ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४

स्वधिष्ण्यमित्यादिना ॥ असौ प्राण आदित्यः ।३ ऋचो ।२ सर्वमित्यादिना । प्राण आत्मा जीवः स्वस्य धिष्ण्ये प्रकाश यन् बहिश्च प्रकाशयति २

प्रपंचेनानंतस्यापरिच्छेदं वक्तुं सभूमिमित्यस्यार्थमाह ॥ तेन पुरुषेण विश्वमिति भूमिपदस्यार्थः ॥ वितस्तिमिति दशांगुलपदस्य ॥ अधीत्यति
शब्दस्य ॥ सर्व वितस्तिमधिकं व्याप्य तिष्ठतीति ॥ आधिक्यमात्रं विवक्षितं न प्रमाणं ॥ अनुपयोगादपरिच्छिन्नत्वाच्च ॥ एतस्मिन् दृष्टांत
माह ॥ असौ वा आदित्यः प्राण इति श्रुतेः ॥ स्वधिष्ण्यं मंडलं प्रकाशयन् यथा बहिश्च प्रकाशयति ॥ एवं विराड् देहं प्रकाश
यन् ब्रह्मांडमंतर्बहिश्च प्रकाशयति ॥ १५ नित्यमुक्तत्वं दर्शयितुं उत्तमत्वनिरूपणस्य तस्यार्थमाह स इति ॥ अभयस्येति मंत्रग

तेनेदमावृतं विश्वं वितस्तिमधितिष्ठति ॥ स्वधिष्ण्यं प्रतपन् प्राणो बहिश्च प्रतपत्यसौ ॥ १५ ॥
एवं विराजं प्रतपंस्तपत्यंतर्बहिः पुमान् ॥ सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् ॥
महिमैष ततो ब्रह्मन् पुरुषस्य दुरत्ययः ॥ १६ ॥

तः ॥ मृतपदव्याख्या अन्नेनेति पदे विभक्तिव्यत्ययेन व्याचष्टे ॥ मर्त्यं मरणधर्मकं अन्नं कर्मफलं यस्मादत्यगात् अति
क्रांतवान् ॥ अतो न केवलं सर्वात्मकः ॥ किंतु अमृतत्वस्य निजानंदस्यापीश्वर इत्यर्थः ॥ १६ ॥ प्रपंचात्मकस्य कुतोऽनि
१८ त्यमुक्तत्वमित्याशंक्य तत्परिहाराय एतावानस्येत्यस्यार्थमाह महिमेति ॥ प्रपंचात्मकस्याप्यमृतत्वमित्येष महिमा दुरत्ययः
अपारः प्रपंचानभिभूतत्वादिविभावः ॥ मंत्रेणाच एतावानस्य महिमा विभूतिः सतुज्यायान् महत्तर इति वदता ॥ येनवार्थ उक्तो
॥ १६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नदेवमीश्वरो नित्यमुक्त इत्युक्तं। तदाश्रितानां भूतानां बंधमोक्षौ व्यवस्थापयितुं दर्शयन् पादोस्य विश्वा भूतानीत्यस्यार्थमाह पादेष्वि
ति। निष्कर्षं तु त्रि स्थितया भूरादिलोकाः ते पादा इव पादाः अंशा यस्य सः। स्थितिपात् तस्य पादे [illegible]
दु [illegible] मंत्रे तु पादोस्य विश्वा भूतानीति सामानाधिकरण्यम धिष्ठाना धिष्ठेयाभेद विवक्षया पाद इत्येकवचनं च सामान्या
भिप्रायेणेति व्याख्यातं भवति। भूतेषु फलवैचित्र्यं दर्शयन् त्रिपादस्यामृतं दिवीत्यस्यार्थमाह। अस्येश्वरस्य सर्व स्थितिपाद
मृतं नित्यसुखं दिवि ऊर्ध्वलोकेषु न त्रिलोक्यामित्यर्थः। तदेव त्रिपात्त्वेनोक्तं विभज्य दर्शयन्नाह। त्रयाणां लोकानां मूर्द्धानस्त मूर्द्धानमह
दुपरितनलोकास्तेषु यथाक्रमं अमृतादिकं अधायि निहितं। तत्र त्रिलोक्यां नश्वरमेव सुखं। महर्लोकस्य तु महामुक्तिस्थलोकैः नस्य२

पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः॥ अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धसु॥ १७॥ पादा स्त्व२
स्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः॥ अंतस्त्रिलोक्यां परो गृहमेधोऽबृहद्व्रतः॥ १८॥

नवे पि कल्पांते तत्र त्यानी स्थान त्यागाद्विना शिसुखं जनलोके त्वमृतमविनाशि सुखं यावज्जीवं स्वस्थानापरित्यागात्॥
किंतु॥ महर्लोकवासिनां कल्पांते त्रिलोकदाहोष्मपीडितानां तेदानत्र गमनाद्दोभदर्शेन भक्ति। तपोलोके तस्याभावा
तु हे भेमेव चक्रवर्त्ति। हि त्रिलोक्यां दह्यमानायां शक्यासमकर्षणाग्निना यां स्तुष्मणा महर्लोकान् जनं भगवादयो दि
ताइति। सत्यलोके त्वभयं माह॥ तत्प्रत्यासन्नं॥ १९॥ एतदेव वैचित्र्यमधिकारिभेदेनोपपादयन् त्रिपादूर्ध्व इत्य
स्यार्थमाह न प्रजायंते पुत्रादिरूपेण त्यप्रजाः॥ नैष्ठिकब्रह्मचारि वानप्रस्थ यतयस्तेषामाश्रमाः॥ त्रिलोक्याः १८
पादा२ सादिना बहिरासन्न गृहमेधस्त्वंतः यस्मादबृहद्व्रतः ब्रह्मचर्यव्रतरहितः॥ १८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतीत्यादिना

अयं चाधिकारिभेद एकोस्यैवाच स्थाभेदेन न तु स्वतंत्र भिन्नविषय इति दर्शयितुं मंत्रो विषङ्ङित्यस्यार्थमाह विविधं सुष्टु अंचतीति विषङ्
पुरुषः क्षेत्रज्ञः सतीमार्गादन्नित्याज्ञानं विचक्रामेत्यस्य निस्सः कथंभूते सतीसाशनानशने भोगापवर्गप्राप्तिसाधनभूते अत्र हेतु
त्वेन पुनर्विशेषणं यद्यतः अविद्याकर्मरूपा एका विद्या च तत्साधनोपासनारूपान्या १९ तदेवं विराडत्र व निर्नोपफलत्वे चित्त्रं
मुक्तात्त कारणेश्वरस्य तत्त्वैलक्षण्यं दर्शयितुं तस्माद्विराडजायतेत्यस्यार्थमाह यस्मादंडं जज्ञे तत्र च भूतेंद्रियगुणात्मको वि
राड्वजज्ञे स ईश्वरः तनुर्विश्वं विराड्देहं द्रव्यं अंडं च अतिक्रांतवान् सूर्य इवेति पूर्वोक्त एव दृष्टांतः २० नन्वेवं पुरुषएवेंचत्स

सती विचक्रमे विष्वक् साशनानशने उभे यदविद्या च विद्या च पुरुषस्तूभयाश्रयः १९ यस्मादंडं वि
राड् जज्ञे भूतेंद्रियगुणात्मकः तत्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् २० यदास्य नाभ्यान्नलि
नादहमासं महात्मनः नाविदं यज्ञसंभारान् पुरुषावयवादृते २१ तेषु यज्ञस्य पशवः सवनस्पतयः
२० कुशाः इदं च देवयजनं कालश्चोरुगुणान्वितः २२ वस्तून्योषधयः स्नेहा रसलोहमृदो जलं
ऋचो यजूंषि सामानि चातुर्होत्रं च सत्तम २३

र्वेत्तर्हि यज्ञस्य तत्साधनानां च पृथक्त्वाभावात् यज्ञेः पुरुषाराधनेन
सिद्धो दित्याशंक्य तत्परिहाराय यत्पुरुषेण हविषेत्यादिमंत्रार्थं संगच्छद्दर्शयति यदेत्यादिना अस्येति विराडंतर्यामिणः
तस्यैव प्रकृतत्वात् नाभी भवनाभ्यंतस्मात् यज्ञस्य संभारान् साधनानि नापश्यं २१ तदेतेषु संभारेषु साध्येषु सत्सु
पुरुषावयवैः एते संभाराः संभृता इति चतुर्थेनान्वयः वनस्पतयो यूपाः देवयजनं यज्ञभूमिः इदं चेति वचनाद्ब्र
ह्मोहं स्थानं उपविष्टः कथयामीति गम्यते बहुगुणान्वितो वसंतादिकालः २२ वस्तूनि पात्राणि ओषधयो व्रीह्यादयः
रसा मधुरादयः सुवर्णादीनि लोहानि मृदं श्च चातुर्होत्रं होत्रादिकं कर्म २३ स्नेहा घृतादयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामधेयानि ज्योतिष्टोमादीनि । अग्न्यादीनामुक्तेवान्मंत्राइति स्वाहाकारादयः । देवतानामनुक्रमस्त्वेदृशः । कल्पौबोधायनादिकर्म
पद्धतिर्ग्रन्थः । अनेनाहं पश्यइति संकल्पः । तंत्रमनुष्ठानप्रकारः । २४ गतयो विष्णुक्रमाद्याः । मतयो देवताध्यानानि क्लिष्टस्य भगवति सम
र्पणं २५ संभृताः संपादिताः संभारा येन सोहं तेनैव यज्ञेनैव । अनेन न यज्ञेन यज्ञमयजंतेति मंत्रार्थः । सूचितः २६ तेन देवा
अयजंतेत्यस्यार्थं सप्रपंचं दर्शयति ततइति द्वाभ्यां व्यक्तेंद्रादिरूपेण अव्यक्तस्व तः । अनेन पुरुषं जातमग्रतः । इत्यस्या
र्थो दर्शितः २७ काले स्वस्वावसरे २८ यदधिष्ठानमित्यस्य प्रश्नोत्तरार्थमुपसंहरति नारायणइति । आहितमधिष्ठि

नामधेयानि मंत्राश्च दक्षिणाश्च व्रतानि च । देवतानुक्रमः कल्पः संकल्पस्तंत्रमेव च २४ गतयो मतयश्चै
१९ व प्रायश्चित्तं समर्पणं । पुरुषावयवैरेते संभाराः संभृता मया २५ इति संभृतसंभारः पुरुषावयवैर
हं । तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं २६ ततस्ते भ्रातर इमे प्रजानां पतयो नव । अयजन्व्यक्तमव्य
क्तं पुरुषं समाहिताः २७ ततश्च मनवः काले ईजिरे ऋषयोऽपरे । पितरो विबुधा दैत्या मनुष्याः क्र
तुभिर्विभुं २८ नारायणे भगवति तदिदं विश्वमाहितं । गृहीतमायोरुगुणः सर्गादावगुणः स्वतः
२९ सृजामि तन्नियुक्तोहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ३० इति ते
ऽभिहितं तात यथेदमनुपृच्छसि ॥ नान्यद्भगवतः किंचिद्भाव्यं सदसदात्मकं ३१

तं भगवत्येव हेतुः यः स्वतो ऽगुणः सर्गादौ गृहीता मायया उरवो गुणा येन तस्मिन् २९ यत्परस्त्वमित्यस्य प्रश्नोत्तरं यदुक्तं स एष भगवा
न् सर्वेषाममीश्वर इति तदुपसंहरति सृजामीति पालनं तु स्वयमेव करोतीत्याह विश्वमिति । पुरुषरूपेण विष्णुरूपेण त्रिशक्तिर्माया
तां धरतीति तथा सः ३० यच्चेदं विश्वं यदात्मकमित्यव मादि सर्वप्रश्नानां सामान्योत्तरं यदुक्तो वासुदेवात्परो ब्रह्मन्नन्यो वास्त्यर्थोऽस्ति
तत्व तइति पुरुष एवेदं सर्वमिति श्रुत्याच प्रदर्शितं तदुपसंहरति इतीति । कार्यकारणात्मकं भाव्यं सद्रूपं भगवतः सकाशादन्यत् पृथक्

भागवतटीका द्वि

राम
१९

यदुक्तं यतो हि मम तमविज्ञाय मामीश्वरं प्रब्रवीषि तदुपोद्घातं संहरति नभारतीति यन्तु यस्मान्मे मया ओत्कण्ठ्यं भक्त्युद्रेकः तद्युक्तेन हृदा हरिर्धृतः ध्यातः ३१
अंग हे नारद अतः मद्वाङ्मनइन्द्रियाणाम् तयः सत्यार्थाः ननु मम प्रभावेनेत्यर्थः ३२ अत्र स्वानुभवमेवान्वयव्यतिरेकाभ्यां प्रमाणयति द्वाभ्यां
सोहं समाम्नायादिभिः सर्वोत्कृष्टोपि योगमाश्रित्यापि यत आत्मनो मम संभवो जन्म तमेव तं ज्ञातवानस्मि कुतो ऽन्यस्य वार्तातः ऽत एव अन्वेषणार्थं तीय स्कन्धे
पद्माद्भवं च त्रातं ३३ तदा समीयुषा शरणागतानां संसार निवर्तकं मंगलावहं सुखमयं च तस्य चरणं नतोस्मि नतो ऽचिन्त्यमहिमत्वं ज्ञातवान
स्मीति केमुत्यन्यायेनाहं योहीति स्वमायाविस्तारं यः स्वयमपि पर्यगात् परिच्छेदीनिषे धएतावानितिनज्ञानवानित्यर्थः अपरे कुतोज्ञा

न भारती मेंग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः। न मे हृषीकाणि पतंत्यसत्पथे यन्मे हृदौत्कंठ्यवता
धृतो हरिः ३२ सोहं समाम्नायमयस्तपोमयः प्रजापतीनामभिवंदितः पतिः आस्थाय योगं निपुणं समाहि
तस्तन्नाध्यगच्छं यत आत्मसंभवः ३३ नतोस्म्यहं तच्चरणं समीयुषां भवच्छिदं स्वस्त्ययनं सुमंगलं। यो ह्यात्ममाया
विभवं स्म पर्यगाद्यथा नभः स्वांतमथापरे कुतः ३४ नाहं न यूयं यदृतां गतिं विदुर्न वामदेवः किमुतापरे सुराः
तन्मायया मोहितबुद्धयस्त्विदं विनिर्मितं चात्मसमं विचक्ष्महे ३५ यस्यावतारकर्माणि गायंति ह्यस्मदादयः
न यं विदंति तत्त्वेन तस्मै भगवते नमः ३६

योयुः तस्य चरणं नतोस्मीति पूर्वेण संबंधः ननु सर्वज्ञः कथं न जानाति अनाभावादिनिदृष्टांतेनाह यथा स्वस्यांतं नभो नाप्नोति तद्वत् न हि खपुष्पा
दर्शने सार्वज्ञ्यं विहन्तीति भावः तथा च ब्रह्म निधपतयएवंनेन य पुरंतमनंततयात्वमपि यदंतरांड निचयान नुसाचरणाडुत्योदिश्रु
अ२ तिश्च योस्याध्यक्षः परमे व्योमन् सो अंग वेद यदि वा न वेदेति ३४ एतत्प्रपंचयति नाहमिति द्वाभ्यां वामदेवो रुद्रः यस्य तत्त्वां गतिं
परमार्थस्वरूपं किंत्विदं सप्रपंचरूपं तस्य मायया विनिर्मितं विचक्ष्महे विद्मः तदप्यात्मसमं स्वज्ञानानुरूपमेव न सम्यक् तत्त्वं मोहितबुद्धय
इत्ययं तदज्ञाने प्रपंचज्ञाने च हेतुः ३५ ननु सर्वेपि तं वर्णयंतो दृश्यंते तत्राह यस्येति ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतारकर्माणि संक्षेपेणादर्शयति । स एष आद्यो भगवान् यः पुरुषावतारः सृष्ट्यादि करोति । आत्मात्मन्यात्मनात्मानमिति । कर्त्ता अधि-
करणं साधनं कर्म च स्वयमेवेत्यर्थः पुरुषावतारः सृष्ट्यादीनि कर्माणीति संक्षेपार्थः ३७ नयं विदंति तत्त्वेनेत्युक्तं किं तत्तत्त्वमित्यपे-
क्षायामाह । ज्ञानं केवलं सत्यं तत्त्वं घटाद्याकारवृत्तिज्ञानमवच्छेदार्थं विशेषणानि विशुद्धं विषयाकारशून्यं यतः प्रत्यक् सर्वान्तरं
अतएव सम्यक् संदेहादिरहितं अवस्थितं स्थिरं यतो निर्गुणं गुणकार्यं हि गुणव्यतिकराच्चंचलं भवति यद्यपि वृत्तिज्ञानमपि स्व-
पज्ञानमेव तेन चाचल्यादिदोषयुक्तं तथाप्यंतःकरणवृत्तिदोषमन्यथात्वतथा भवतीत्यवच्छिद्यते एभिरेव विशेषणैः सत्यत्व

स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः । आत्मात्मन्यात्मनात्मानं संयच्छति च पाति च ॥३७॥
विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगवस्थितं ॥ सत्यं पूर्णमनाद्यंतं निर्गुणं नित्यमद्वयं ॥३८॥
ऋषे विदंति मुनयः प्रशांतात्मेंद्रियाशयाः । यदा तदेवासत्तर्कैस्तिरोधीयेत वि- प्लुतं ॥३९॥

मपि समर्थितं । किंच । यद्विकारवत्तदसत्यं दृष्टं न चास्य जन्मादयः षड्विकाराः संतीत्याह अनाद्यंतं जन्मनाशरहितं अ-
तएव जन्मानंतरस्तित्वलक्षणोपि विकारो नास्ति । वृद्धिविपरिणामापक्षया अन संतीत्यतः पूर्णं सर्वत्र हेतुः नित्यमद्व-
यं । नित्यं सर्वदा द्वैतप्रतीतिसमयेपि परमार्थतोऽद्वयमिति ३८ अत्र विद्वदनुभवं प्रमाणयति हे ऋषे नारद प्र-
शांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसो यदा भवंति तदा विंदंति अन्यदा न दर्शने कारणमाह । यदा तु तदेव २०
प्रकाशमानमेव असत्तर्कैः विप्लुतं स्यात्तदा तिरोधीयेतेति ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतारान्विस्तरेणाह आद्य इत्यादि यावत्समाप्ति परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्य सहस्रशीर्षेत्युक्तो लीलाविग्रहः स आद्योऽव
तारः वक्ष्यति हि भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन् स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेव इति
यथोक्तं विष्णोस्त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा १०
विमुच्यत इति यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते तथापि कालश्च स्वभावश्च सदसदिति कार्यकारणात्मिका प्रकृतिश्च स्व २
एताः शक्तयः मनआदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षादयो विभूतय इति विवेक्तव्यं मनः महत्तत्वं द्रव्यं महाभूतानि

आद्योऽवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च । द्रव्यं विकारो गुण इंद्रियाणि विराट् स्वराट् स्था
स्नु चरिष्णु भूम्नः ४० अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च । स्वर्लोकपालाः खगलो
कपाला नृलोकपालास्तललोकपालाः ४१ गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ।
ये वा ऋषीणामृषभाः पितॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ४२ अन्ये च ये प्रेतपिशाचभूतकूष्मां
डयादोमृगपक्ष्यधीशाः ४३ यत्किंच लोके भगवन्महस्वदोजः सहस्वद्बलवत्क्षमावत् । श्रीह्रीविभूत्या
त्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपं ४४

भूतानि क्रमोत्पन्नविवक्षितः विकारोऽहंकारः गुणाः सत्वादिः विराट् समष्टिश
रीरं स्वराट् वैराजः स्थास्नु स्थावरं चरिष्णु जंगमं च व्यष्टिशरीरं ४० अहं ब्रह्मा भवो रुद्रः यज्ञो विष्णुः दक्षादयो ये इमे प्रजेशाः
तललोकपालाः पातालाधिपतयः ४१ गंधर्वादीनामीशाः यक्षादीनां नाथाः रक्षांसि राक्षसाः ऋषभाः श्रेष्ठाः ऋषीणां पितॄणां च श्रे
ष्ठाः ४२ प्रेतादीनामधीशाः ४३ किं बहुना यत्किंचिद्भगवदादि तत्सर्वं परमं तत्त्वमित्यन्वयः भगवत् ऐश्वर्ययुक्तं महस्वत् तेजो
युक्तं ओजः सहः इंद्रियमनःशक्तिर्नैपुण्यं बलवद्दाक्ष्य श्रीः शोभा ह्रीः कर्मजुगुप्सा विभूतिः संपत्तिः आत्मा बुद्धिः तद्युक्तं अद्भु
तार्णं आश्चर्यवर्णमित्यर्थः रूपमवस्वरूपं रूपवत् अरूपं च यन्न तत्सर्वं परं तत्त्वं न किंचिदिति त्वर्थः ४४
अर्णो वर्णः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुद्धसत्त्वावतारानुवक्तुमाह प्राधान्यतइति । अथ सत्कथाश्रवणेऽयोग्यकर्णयोः कषायाः मलास्तान् शोषयंतीति तथा तान् सुपेशान्
सुंदरान् सकारलोपश्चार्षः हे नृप येन अनुभ्यं अनुक्रमिष्ये तदनुक्रमणाम् तेन त्वयापीयतामित्यर्थः यद्वा आपीयतामिति शत्रंतं आ
पिबतां कर्णकषायशोषानित्यर्थः ४५ द्वितीयषष्ठः ॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः नारदायनुतत्क्रमे प्रयोजन
गुणैः १ सह । यत्र यत्र क्षितितलोद्धरणार्थं वाराहीं तनुं बिभ्रत् सन् उद्यतोऽनंतः १ तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रयाददा

प्राधान्यतो यानृष आमनंति लीलावतारान् पुरुषस्य भूम्नः । आपीयतां कर्णकषायशोषा
ननुक्रमिष्ये त इमान्सुपेशान् ४५ इति श्री भागवते महापुराणे द्वितीयस्कंधे षष्ठोऽध्यायः
२१ ब्रह्मोवाच यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनंतः अंतर्म
हार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव वज्रधरो ददार १ जातो रुचेरजनयत्सुयमान्सु
यज्ञ आकूतिसूनुरमरानथ दक्षिणायां लोकत्रयस्य महतीमहरद्यदार्तिं स्वायंभुवेन मनुना
हरिरित्यनूक्तः २

२१ दंष्ट्रया क्षितितलोद्धरणायोद्यतः इत्यन्वयः अन्यथा करेण कर्णमूलेऽहन्निति वक्ष्यमाणेन विरोधः यद्वा लीलेत्येवं व्या
ख्येयं करेणातिकरवला धनवदैत्य वर्तमानं यं दंष्ट्रया अहन्निति यज्ञावतारमाह रुचेः प्रजापतेः सकाशात्तज्जायायां आ
कूत्यां सूनुः सुयज्ञो नाम जातः स च स्वभार्यायां दक्षिणायां सुयमान् देवान् अजनयत् स एवेंद्रः सन् यदा आर्तिं मह
तीं तदा पूर्वं सुयज्ञ इत्युक्तोपि अनुपश्चात् मनुना मातामहेन हरिरित्युक्तः अनेन देवोत्पादनेन लोकत्रयार्तिहरणं च
 गम २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कपिलावतारमाह कर्दमस्य प्रजापतेर्गेहे च तत्स्त्रीयां देवहूत्यां जज्ञे नवभिः सह सवस्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान् ययात्मगत्या सा आत्मनः शमलं मलिनीकरणं गुणसंगरूपं पंकं अस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ३ दत्तात्रियावतारमाह मया इहैव तुभ्यं दत्त इति यद्यत आह ततः स नाम्ना दत्तो जातः स्वभक्तेभ्यो योगैश्वर्यदानेन चरितं दर्शयति यस्य पादपंकजयोः परागः तेन पवित्रो देहो येषां ते उभयीं ऐहिकीं आमुष्मिकीं च भुक्तिमुक्तिरूपां वा ४ कुमारावतारमाह मे मम आदौ यत्तपस्तप्तं तस्मात् स्वतपसः मत्तपसो हेतोः

जज्ञे च कर्दमगृहे द्विज देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं प्रपेदे ३ अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यद्भगवान्स दत्तः यत्पादपंकजपरागपवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ४ तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्स्वतपसः स चतुःसनोऽभूत् प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यग्जगाद मुनयो यदचक्षतात्मन् ५

सहरिः चतुःसनो भूत् सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः कथंभूतात् स्वतपसः सनात् अखंडितात् यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः षणु दाने सः च पूर्वकल्पस्य संप्लवे प्रलये विनष्टं उच्छिन्नसंप्रदायं आत्मतत्त्वं इह अस्मिन् कल्पे सम्यक् जगाद उक्तवान् सम्यक्त्वं दर्शयति यद्वदितमात्रमेव मुनयः आत्मनि मनसि च ज्ञानसाक्षात् अपश्यन् ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरनारायणावतारमाह धर्मस्य पत्न्यां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन जातः कथंभूतः स्वः असाधारणस्तपः प्र
भावो यस्य तदेवाह अनंगस्य पृतनो देव्याः स्मरस्य भगवतः सकाशादात्मनः स्वप्रतिरूपाः उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमाव
लोपव्रतभंगं घटितुं साधयितुं न शेकुः यद्वा आत्मनः स्वस्य यो नियमः तपो नाशनरूपः तस्य अवलोपतत्र दृष्ट्वा भगवन्तं न२
घटयितुं न शेकुरिति एतच्चा[illegible]ख्यानमेकादशे भविष्यति ६ यत्र कामविजयी क्रोधोपि विभेति तत्र [illegible] कामा

न२

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः दृष्ट्वात्मनो भगवतो नियमाव
लोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः ६ कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंतमुत ते न दहंत्यसह्यं सोयं य त्युत तेन दहं
दंतरमलं निविशन् विभेति कामः कथं नु पुनरस्य मनः श्रयेत ७ विद्धः सपत्न्युदितपत्रिभिरंति
राज्ञो बालोपि सन्नुपगतस्तपसे वनानि तस्मा अदात् ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुन
यो यदुपर्यधस्तात् ८

टी० । नच भवतीति किं वक्तव्यमित्याह काममिति नः श्रीरुद्रप्रमुखाः रोषयुक्तया दृष्ट्या कामं दहंति रोषं त्वात्मानं दहंतमपि ते न दहं
ति क्रोधेनाभिभूयंत इत्यर्थः ननु अहो सोयं यं रोषो यदंतरं यन्मध्यं प्रविशन्नमलं विभेति यद्वा यस्यांतः मनः कथंभूतं अमलं नि
र्मलं प्रविशन्निति ७ चरित्रेणैककमप्यवतारं सूचयति मातुः सपत्न्याः सुरुच्या उदितानि उक्तानि वाक्यानि एव पत्रिणो
बाणाः तैर्विद्धो ध्रुवः राजपुत्रानपदोतिसमीपे तपसे तपस्यन् ध्रुवगतिं ध्रुवपदं यत्र यां उपरिस्थिताः अधस्तात् स्थिताः दि २२
विभवादिव्याः सप्तर्षयः स्तुवंति यद्वा उपरिस्थिता भृग्वादयः अधस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथ्ववतारमाह। यद्यदात्रृषिभिरर्थितः नदांवेनं त्वाचात्रन्नर्थं तत्सुतं इतिपदेनामले भि पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः। तस्मात्पुत्र
इतिप्रोक्तः स्वयमेव स्वयंभुवेति हि पुत्रपदव्युत्पत्तिः कथंभूतं द्विजानीशापवाक्यमेव वज्रं तेन निविप्लुष्टं दग्धं पौरुषं भगं ऐश्वर्यं च यस्य तं।
चरित्रांतरमाह येन नृजगन्निजगदर्थं वसूनि अन्नादि द्रव्याणि दुग्धा ९ ऋषभावतारमाह श्रीसोहरिर्नाभेरग्नीध्रपुत्रात् सुदे
व्याः सूनुरासनाभेर्भार्यायां मरुदेव्याएव सुदेवीत्यपिसंज्ञा जडवद्योगेन नित्यसमाधिना चर्या यदिति यो तत्र हेतुं समदृक्"
तत्रापिहेतुः स्वस्थः स्वरूपस्थितः यतः प्रशांतेंद्रियः तत्कुतः यतः परित्यक्तमुक्तसंगः १० हयग्रीवावतारमाह सत्रइति अथोइत्यर्थो

यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरयेपतंतं त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा
सकलानि येन ९ नाभेरसावृषभआससुदेविसूनुर्योवैचचारसमदृक् जडयोगचर्या यत्पारमहंस्यमृषयः पद
मामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः १० सत्रेममासभगवान् हयशीर्षा साक्षात् सयज्ञपुरुषस्तप
नीयवर्णः छंदोमयोमखमयोखिलदेवतात्मावाचोबभूवुरुशतीः श्वसतोस्यनस्तः ११ मत्स्योयुगांतसम
येमनुनोपलब्धः क्षोणीमयोनिखिलजीवनिकायकेतः विस्रंसितानुरुभयेसलिलेमुखान्मेआदायतत्रविज
हारहवेदमार्गान् १२ आयो३

तेरे सएव साक्षाद्भगवान् मम ब्रह्मणः सत्रे यज्ञे हयशीर्षो आस। तपनीयं सुवर्णं तद्वद्वर्णो यस्य सः छंदोमयः वेदमयः। तद्विधेयो मखमयः"
तन्मयः अमृतमयइतिवापाठः। सर्वैरपि पूजनीयात्माखिलादेवतात्मा च अस्यश्वसतः श्वासं मुंचतः नस्तः नासापुटात् उश
तीः उशत्यः कमनीया वेदलक्षणा वाचो बभूवुः ११ मत्स्यावतारमाह मत्स्यो भाविनाविवस्वततेन मनुनादृष्टः क्षोणीमयः पृथ्वी
प्रधानः तदाश्रयइत्यर्थः अतएव निखिलजीवनिकायानामाश्रयः मेमुखाद्विस्रंसितान् गलितान् वेदमार्गान् वेदानादाय तत्र युगांतसलिले विजहार हर्षेण १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कूर्मावतारमाह क्षीरोदधौ कच्छपवपुः सन् गात्रं मथनार्थं मंदरगिरिं पृष्ठेन विधृतवान् कदाचिदमृतलब्धये क्षीराब्धिमुन्मथतां असुराणां निद्रायाः
क्षणः अवसरस्तेषां वा यस्य सः तदा निद्रावशगः कुतस्तत्राह अद्रिपरिवर्त्तैः परिभ्रमैः स एव कषाणां कषणं घर्षणं सुखप्रदा यस्यो
सौ कंडूयस्य सः यद्वा अद्रिपरिवर्त्तैरेव कषैः कषणैस्तेन अणिनिश्रपयातीति कषाणां कंडूर्यस्य १३ श्रीनृसिंहावतारमाह त्रैविष्ट
पा देवाः तेषामुरुभयं हंतीति तथा स भगवान् कथंभूतं भ्रमंत्यो भ्रुकुट्यो दंष्ट्राश्च यस्मिन् तत्करालवक्त्रं यस्मिन् तं दैत्येंद्रस्य

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः । पृष्ठेन कच्छपवपुर्विदधार गोत्रं निद्राक्षणोऽद्रिप-
रिवर्तकषाणकंडूः १३ त्रैविष्टपोरुभयहा स नृसिंहरूपं कृत्वा भ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रं । दैत्येंद्रमाशु गदयाभि-
२३ पतंतमारादूरौ निपात्य विददार नखैः स्फुरंतं १४ अंतःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरंबुजह-
स्त आर्तः । आहेदमादिपुरुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय १५ श्रुत्वा हरिस्तमरणा-
र्थिनमप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः । चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भ-
गवान् कृपयोज्जहार १६

रंतं आरात् समीप एव गदया उपलक्षितं अभिपतंतं नखैर्विददार १४ हरिसंज्ञकावतारमाह अंतरिति युगलेन नागज राम
स्य २ यूथपतिः तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः श्रवणेनैव मंगलं नामधेयं यस्य १५ तदेव चेत् श्रुत्वा शरणार्थिनं तं ह २३
स्ते शुंडायां प्रगृह्य किं कृत्वा नक्रस्य ग्राहस्य [illegible] वदनं विनिपाट्य विदार्य तस्मात् हृदनात् ॥ १६
हे तीर्थश्रवः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वामनावतारमाह॥ अदितेः सुतानां द्वादशादित्यानां मध्ये यज्ञः यज्ञाधिष्ठाता विष्णुः अवरजः कनीयानपि गुणैर्ज्यायान्
ज्येष्ठः गुणानेवाह यद्यतइमानुं विचक्रमे पादन्यासैः क्रांतवान् अथ प्रतिश्रुता नैनेनरमेव तत्र हेतुः बलेः क्ष्मां वामनरूपे
ण जगृहे नन्वीश्वरः स्वयं किमिति तथा चकार तत्राह याच्ञां विना धर्ममार्गे वर्तमानानां चाल्यः ऐश्वर्यान्नभ्रंशनीयः इति १७
ननु तर्हि यांच्ञयापि चालनमनुचितमेवन्याशंक्य तेनापि धिकस्वमाली क्यादिदोषस्याभीत्याशयेन दत्तवानित्याह नार्थइति
यद्विबुधाधिपत्यमिदानीं बलात्प्राप्तं अप्रदीयमानं च अयं बलेः पुरुषार्थो न भवति कुतः इत्यत आह आत्मपदं इति छदे
२। त्र्यापानुगुणैर्वरजोप्यदितेः सुतानां लोकान्विचक्रमइमान्यदथाधियज्ञः क्ष्मां वामनेन जगृहे त्रिप म०
दछलेन याच्ञामृते पथि चरन्प्रभुभिर्न चाल्यः १७ नार्थो बलेरयमुरुक्रमपादशौचमापः १८ षट् न्य सल
शिखा धृतवतो विबुधाधिपत्यं योवै प्रतिश्रुतमृते न चिकीर्षदन्यदात्मानमंग शिरसा हरयेभिमेने १८॥ तुभ्यं
च नारद भृशं भगवान्विवृद्धभावेन साधु परितुष्ट उवाच योगं ज्ञानं च भागवतमात्मसतत्त्वदी
पं यद्वासुदेवशरणा विदुरंजसैव १९॥
उरुक्रमस्य पादशौचं चरणक्षालनरूपा आपः आसमंततो धृतवतः कशिखायां मूर्ध्नीत्यर्थः किंच शुक्रेण वारितः संप्रापि
अंगेह नारद प्रतिश्रुतं विनान्यत्तु न चिकीर्षत् कर्तुं नैच्छत् यः तृतीयपादपूरणार्थं हरये आत्मानं देहमपि अभिमे ने
अंगीकृतवान् एवं सदेहं त्रैलोक्यं अद्य यादत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः १८ हंसावतारमाह तुभ्यमि
ति भृशं विवृद्धेन भावेन आत्मप्रदीपिकया भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथा उवाच ज्ञानं च तज्ज्ञानसाधनं
किंतत् भागवतं नामाकथंभूतं तत्त्वमेव सतत्त्वं आत्मतत्त्वदीपकं विवृद्धभावेनेति विशेषणस्य फलमाह य दिति १९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तन्मवतारो नाह चक्रमिति स्वतेजः निजप्रभावमेव चक्रं सुदर्शनं बिभर्त्ति चक्रवद्दहत्तत्प्रभावं बिभर्त्तीत्यर्थः तदेवा
ह मनुवंशपालकः सन्नुत्तयाणां लोकानां पृष्ठ उपरि स्थितेन सत्यलोके पिकमनीयां स्वकीर्त्तिविस्तारयन् राजसु दंडं
विधत्ते २० धन्वंतर्यवतारमाह लोकेऽवतीर्य धन्वंतरिः सन्नु पुरूरुजां महारोगिणां स्वनाम्नैव रुजः रोगान् हंति
स्वयमेव कीर्त्तिरिति कीर्त्त्यतिशयात्तिः अमृतं मरणशून्यमायुर्यस्मात् सः अवसन्नपूर्वदैत्यः प्रतिसंहृ
यज्ञभागं च अवरुंधन् भवत्यवापरुद्धमिति पठ्यपयमेवार्थः अथ विषयं वेदं वानुशास्ति प्रवर्त्तयति ॥ २२ परशु

चक्रं च हि स्वविहतं दशसु स्वतेजो मन्वंतरेषु मनुवंशधरो बिभर्त्ति दुष्टेषु राजसु दमं व्यदधात्
स्वकीर्त्तिं सत्ये त्रिपृष्ठ उशन्तीं प्रथयं अरित्रैः २० धन्वंतरिश्च भगवान् स्वयमेव कीर्त्तिर्नाम्ना नृणां पुरुरुजां रु
ज आशु हंति यज्ञे च भागममृतायुरवाऽवरुंधन् आयुश्च वेदमनुशास्त्यवतीर्य लोके २१ क्षत्रक्षयाय विधिनो
सु३ पभृतं महात्मा ब्रह्मध्रुगुज्झितपथं नरकार्त्तिलिप्सु उद्धंत्यसाववनिकंटकमुग्रवीर्यः त्रिःसप्तकृत्व
उरुधारपरश्वधेन २२ अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे तिष्ठ न्प२
त्वनं सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्तिमार्छत् २३

रामावतारमाह जगतः क्षयाय विधिना देवेनोपभृतं संवर्द्धितं मत्स्येव समर्पितमिति वा ब्राह्मणेभ्यो द्रुह्यतीति तथा अतः उज्झितः
पंथा वेदमार्गो येन अतएव नरकार्त्तिं लिप्सतीव एवंभूतमवनेः कंटकतुल्यं क्षत्रं असौ महात्मा हरिः उद्धंति उत्सादयति दीर्घ
तीक्ष्णधारेण परशुना २२ श्रीरामावतारमाह त्रिभिः अस्मदिति अस्माकं ब्रह्मादीनां प्रसादे सुमुखः कलया भरतादि- २४
पयासह कलामायात्मस्याइशः गुरोर्दशरथस्याज्ञायां तिष्ठन् सीतालक्ष्मणाभ्यां सहितो वनमाविवेश ॥ यस्मिन्विरोधं कृत्वा
रावणो नाशं प्राप्तः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मैरामायरुद्धिर्मार्गंददौ सपदिशीघ्रंहरेरायथात्रिपुरंदिधक्षुः तद्वत्अरिपुरंलंकांदग्धुमिच्छोः षष्ठीचतुर्थ्यर्थे यद्वापंचमीयंदिधक्षोः
रामात् पङ्कजभ्रान्तेन ... केपोगम्येति कथंभूतउदधिः ऊढंप्राप्तंयद्भयंतेनअंगेषुवेपःकंपोयस्य अत्रहेतुः दूरवर्त्तमानासुहृ
तु सीतानयानिमित्तभूतयामार्थितः क्षुभितोरोषः येनसुशोणाअत्यरुणाद्दृष्टिस्तस्याःपातेनतप्यमानमकराणांनक्राणांचचक्रं मुरगाणां
यस्मिन् २४ किंच युद्धेरुग्णाभग्नायमहेंद्रवाहस्यऐरावतस्यदंताः तेविडंबिताः स्वधवलिम्नाध वलीकृताः तत्रहि स्मपति
रावणस्यवक्षःस्थलस्यरोमि

यस्माअदादुदधिरूढभयांगवेपोमार्गंसपद्यरिपुरंहरवद्दिधक्षोः॥ दूरेसुहृन्मथितरोषसुशोणदृ
ष्ट्यातातप्यमानमकरोरगनक्रचक्रः॥ २४ वक्षःस्थलस्यरणरुग्णमहेंद्रवाहदंतैर्विडंबित
ककुब्झषकूटहासंसद्योऽसुभिःसहविनिष्पतितारहंतुंविस्फूर्जितैर्धनुषउच्चरतोधिसैन्य २५

तैः प्रकाशिताइत्यर्थः॥ याएवंभूताः ककुभोदिशः॥ ताः जुषतेसेवतेपाल्ययुतीतितत्थोंऽस्पदारहंतुंरावणस्यअहोमत्समः कोन्यो
स्तीतिमहागर्वेणऊढंप्राप्तंहासंअसुभिः॥ प्राणैः॥ सहसद्यः॥ शीघ्रंविनिष्पतिताअपनेष्यति कैः॥ धनुषोविस्फूर्जितैः॥ टंका
रघोषैरेव कथंभूतस्यअधिसैन्यंस्वपरसैन्यमध्येउच्चरतः॥ ककुब्झयकूटहासमितिपाठेतेजोज्वलितानांककुभंजयन
योरूढहासःसंजातगर्वस्तमपनेष्यतीत्यर्थः॥ २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णावतारमाह भूमेरिति द्वाभ्यां सुरेतराः असुरांशसंभूताः राजानस्तेषां वरूथैः सैन्यैर्विमर्दितायाः भारेण पीडितायाः कलया रामेण सह जातः स नु कोऽसौ जातः सितकृष्णौ यस्य भगवतः स एव साक्षात् सितकृष्णकेशान्वयेनाभेवनन्नुवपः परि-
णामकृतं अविकारित्वात् यन्नूक्तं विष्णुपुराणे उज्जहारात्मनः केशौ सितकृष्णौ महामुन इति यच्च भारते सवापि
केशौ हरिरुद्बबर्ह शुक्लमेकमपरं चापि कृष्णं तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं
चतयोरेकोवलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः कृष्णो द्वितीयः केशवः संबभूव केशो यो योऽसौ वर्णतः कृष्ण इति
तन्न केशमात्रावताराभिप्रायं किंतु भारावतारणरूपकार्यं कियदेतन्मम केशावेतौ तु शक्ताविति द्योतनार्थं रामकृष्णयो
र्वर्णसूचनार्थं च केशोद्धरणमिति गम्यते अन्यथा तत्रैव पूर्वापरविरोधापत्तेः कृष्णस्तु भगवान्स्वयमित्यत्र हि विरोधाच्च

२५ भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय कलया सितकृष्णकेशः जातः करिष्यति जनानुपलक्ष्यमार्गः कर्मा-
णि चात्ममहिमोपनिबंधनानि २६ तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः
यद्रिंगतांतरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यं २७ यद्वै व्रजे व्रजपशून् विषतोयपीतान्
पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या तच्छुद्धयेति विषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन् ह्र-
दिन्यां २८

कथंभूतः परमेश्वरतया जनैः अनुपलक्ष्यो मार्गो यस्य न हि ईश्वरत्वे किं प्रमाणं अतिमानुषकर्मान्यथानुपपत्तिरेवेत्याह
आत्मनो महिमा उपनिबध्यते अभिव्यज्यते येषु तानि २६ एतदेव प्रपंचयति तोकेनेत्यादिना बालेन पूतनायाः जीव-
हरणं यत् विगतजानुभ्यां गच्छता अंतरगतेन मध्यप्राप्तेन दिविस्पृशोः अत्युच्चयोः इतरथा अनीश्वरत्वे तन्न
भवितव्यं २७ विषतोयपीतान् विषमयं तोयं पीतं यैः तान् येषां पालान् गोपान् अनुकंपादृष्टिसुधावृष्ट्या जीवयिष्यति नियमुनायां क्रीडन्
उरंगं कालियं उच्चाटयिष्यति नद्याः कस्माद्धदिन्यां निर्विषत्वाय ता-
पयति विषवीर्येण विलोला चंचला जिह्वा यस्य २८

२५ रामः

नेत्रे पिधाप्य पिहिते कारयित्वा २

दिव्यमलौकिकं दैवतिलौकोक्तिः उन्नेष्यति उद्धरिष्यति शुचिर्ग्रीष्मः तत्संबंधिनि वने शुष्क इत्यर्थः अनेहा दावाग्नेर्हेतोः अवसितो नि
श्चितो अन्तकालो यस्य तं सबलः सरामः अनधिगम्यं दुर्ज्ञेयं वीर्यं यस्य तत्र निशि निः शयानमिति कालियदमने रात्र्यां यमुनातीरे नेत्रे पि
धाप्य पिहिते कारयित्वेति मुंजाटव्यामिति ज्ञेयं २९ उपबध्यतेऽनेनेति उपबंधनं तत्साधनं शुल्बं दाम अमुष्य माता यशोदा अग्रहीत् त्वं ३
अमुष्य नमो निबंधनं से मिनं न भवति न पूर्यत इत्यर्थः गोपी यशोदा तां संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजे अर्थे ज्ञापिता आसीदिति यत्तु तेऽत्र

तत्र स दिव्यमिव यन्निशि शयाने दावाग्निना शुचिवने परिदह्यमाने उन्नेष्यति व्रजमतोऽवसितान्तका
ले नेत्रे पिधाप्य सबलोऽनधिगम्यवीर्यः २९ गृह्णीत यद्युपनिबंधममुष्य माता शुल्बं सुतस्य न तु तत्त
दमुष्य माति यज्जृंभतोऽस्य वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ३० नंदं च
मोक्ष्यति भयाद्वरुणस्य पाशाद्गोपान्बिलेषु पिहितान्मयसूनुना च अह्न्यापृतं निशि शयानमतिश्रमेण
लोकं विकुंठमुपनेष्यति गोकुलं स्म ३१ गोपैर्मखे प्रतिहते व्रजविप्लवाय देवेऽभिवर्षति पशूननुकंपया
रिरक्षुः धर्त्तोच्छिलीन्ध्रमिव सप्त दिनानि सप्तवर्षो महीध्रमनघैककरे सलीलं ३२

कर्म दिव्यमिवेति सर्वत्र पूर्वेणैवान्वयः ३० वरुणस्य पाशात् यत्कर्षिते तस्मात् मोचयिष्यति मयसूनुना व्योमनाम्ना आपृतं व्याप
ते व्यापारयुक्ते निशि शयानमिति चैवं वैकुंठप्राप्तिसाधनानुष्ठानाभावाद् शितः उपनेष्यति प्रापयिष्यति गोकुलवासी
ने जनं स्मेत्याश्चर्ये ३१ देवे इंद्रे पशून् रिरक्षुः रिरक्षिषुरित्यर्थः अनघ अमरहित एकस्मिन्नेव करे सलीलं यथा तथा म
हीध्रं गोवर्द्धनं धर्त्ता धारयिष्यति उच्छिलींध्रं उद्भूतं छत्राकमिव सप्तवर्षाणि वयो यस्य सः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

निशिरात्रौ निशाकररश्मिभिः गोप्यां धवलायां वने क्रीडन् कलानि मंजुलानि पदानि यस्मिन् यच्चरितं आयतं दीर्घं मूर्छितं आलापविशेषयुक्तं गीतं तेन उद्दीपितः स्मर एव रुक् यासां तासां गोपीनां हर्तुं शंखचूडस्य शिरो हरिष्यति ३३ यच्च प्रलंबादयः ते सर्वे हरिणा हतु भूतेन नदीयेन निलयं अदर्शनं दर्शनायोग्यं वैकुंठ अलं यास्यति त्यन्तरेणान्वयः खरो धेनुकः दर्दुर इव दर्दुरो वकः इभः कुवलयापीडः कपिर्द्विविदः कुंजो नरकः ३४ यच्च मृधे आत्तचापाः समितौ संग्रामे शालिते श्लाघं

क्रीडन् वने निशि निशाकररश्मिगौर्यां रासोन्मुखः कलपदायतमूर्छितेन उद्दीपितस्मररुजां व्रजभृद्वधूनां हर्तुर्हरिष्यति शिरो धनदानुगस्य ३३ यच्च प्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौंड्रकाद्याः अन्ये च शाल्वकपिबल्वलदंतवक्त्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ३४ ये वा मृधे समितिशालिन आत्तचापाः कांबोजमत्स्यकुरुकैकयसृंजयाद्याः यास्यंत्यदर्शनमलं बलपार्थभीमव्याजाह्वयेन हरिणा निलयं तदीयं ३५ कालेन मीलितधियामवमृश्य नॄणां स्तोकायुषां स्वनिगमो वत दूरपारः आविर्हितस्त्वनुयुगं स हि सत्यवत्यां वेदद्रुमं विटपशो विभजिष्यति स्म ३६

ते ते समितिशालिनः ननु प्रलंबखरकपिबल्वलरुक्मिप्रमुखाः बलभद्रेण निहताः कांबोजादयश्च भीमार्जुनादिभिः शंबरः प्रद्युम्नेन यवनो मुचुकुंदेन ननु हरिणा तत्राह बलो भीमः पार्थ इत्यादयो व्याजो ह्वया कपटनामानि यस्य तेन दैमिनाः कालांतरे यास्यतीति भावः एतच्च सर्वमपि कर्म दिव्यमिव तच्चान्यथानभाव्यमिति पूर्वेणैव संबंधः ३५ व्यासावतारमाह अनुयुगं मीलितासु कुधिना धीर्येषां स्तोकमल्पमायुर्येषां तेषां स्वनिगमः स्वकृतो वेदराशिः बत अहो दूरपारः अंस्यति दुर्गम इत्यव

…सयग्यामाविभेदीः मनमगावहिः विटपाः ग्रालव

भेद्य ३६

२६

सद्यो ह्यण्वकृनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible] देवद्विषां दैत्यानां निष्ठितानां नितरां स्थितानां नन्दलेन नृचपुर्भिः पुरीभिः अदृश्यतूर्भिः अलक्ष्यवेगाभिः मतेर्विमोहः
योगपतात्यागोयस्मात्तं मतः प्रलोभश्चात्रयुक्तोस्त्वाकरोयस्मात्तं पाषंडवेषं विधायतेतन औपधर्म्यं पाषंड धर्मं स्वार्थे ष्यत्रू बहु भाषिष्यत
इत्यर्थः ३७ कल्क्यवतारमाह यर्हियदासतामपात्येयषु गृहेषु त्रैवर्णिकाः पाषंडिनः स्युः शूद्राश्च राजानः स्युः तदा कल्किरूपे
ण कलेः शास्ता भविष्यति अत्रच ब्रह्मनारदसंवादात् प्रोक्ता विनावराहादयः मन्वन्तरावतारास्तु भुताभाविनश्च धन्वंतरिपर

देवद्विषां निगमवर्त्मनि निष्ठितानां पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः लोकान् घ्नतां मतिविमोह
५२ मतिप्रलोभं वेषं विधाय बहु भाष्यत औपधर्म्यं ३७ यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः पाषंडिनो द्वि
जजना वृषला नृदेवाः स्वाहा स्वधा वषडिति स्म गिरो न यत्र शास्ता भविष्यति कलेर्भगवान् युगां
ते ३८ सर्गे तपोहमृषयो नव ये प्रजेशाः स्थाने च धर्ममखमन्वमरावनीशाः अंते त्वधर्महरम
न्युवशासुराद्या मायाविभूतय इमाः पुरुशक्तिभाः

भुरामो न दाशरथिः श्रीरामादयस्तु भाविनः तत्र तु कल्क्यादि निर्देशः छांदस इति द्रष्टव्यः ३८ सृष्ट्यादि कार्य भेदेन मायागुणाव
तार विभूतीराह सर्गे इति स्थाने स्थितौ मखो विष्णुः धर्मश्च मखश्च मनवश्च अमराश्च अवनीशाश्च अंते संहारे हरो रुद्रः मन्युवशाः ७२
सर्पाः बहुशक्तिधारिणो भगवत इमा विभूतयः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदं मया संक्षेपेणोक्तं विस्तरेण वक्तुं न कोपि समर्थ इत्याह पृथिव्याः परमाणूनपि यो विममे गणितवान् तादृशोपि कोपि विष्णोर्वीर्यगणनां कर्तुं
महेति कथंभूतस्य यो विष्णुः त्रिपृष्ठं सत्यलोकं चस्कंभ धृतवान् किमिति चस्कंभ यस्मात् त्रिविक्रमस्य अस्खलता प्रतिघातशून्येन स्वरंहसा
स्वपादवेगेन त्रिसाम्यरूपं सदनमधिष्ठानं प्रधानं तस्मादारभ्य तदुरु अधिकं कंपयानं कंपमानं कंपनं यानं यस्य तद्वा अतः कारणात् च
स्कंभ अत्रिपृष्ठमिति विच्छेदः सत्यलोकमभिव्याप्य यः सर्वं धृतवानित्यर्थः तथा च मंत्रः विष्णोर्नुकमिति अस्यार्थः विष्णोर्नु वीर्या
णि कं प्रवोचं कः प्रावोचदित्यर्थः यः पार्थिवानि रजांस्यपि विममे सोपि यो विष्णुः त्रेधा विचक्रमाणः त्रिविक्रमं कुर्वन् उत्तरं

विष्णोर्नु वीर्यगणनां कतमोर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि चस्कंभ यः स्वरंहसास्खलता त्रिपृष्ठं य
२० स्मात्त्रिसाम्यसदनादुरुकंपयानं ४० नांतं विदाम्यहममी मुनयोग्रजास्ते मायाबलस्य पुरुषस्य कुतोपरे ये गा
यन् गुणान् दशशताननआदिदेवः शेषोधुनापि समवस्यति नास्य पारं ४१ येषां स एव भगवान् दययेदनं
तः सर्वात्मनाश्रितपदो यदि निर्व्यलीकं ते दुस्तरामतितरंति च देवमायां नैषां ममाहमिति धीः श्वशृगालभक्ष्ये ४२

लोकं अस्कंभायत् अवष्टंभितवान् कथंभूतं सधस्थं सहस्थं सधादेशः तिष्ठंतीति स्थाः तत्र स्थं देवैः सहवर्त्तमानमित्यर्थः ४०
एतत्प्रपंचयति नांतमिति पुरुषस्य यन्मायाबलं तस्यांतं न विदामि न वेद्मि दशशतान्याननानि यस्य सोपि अस्य गुणान्
गायन् पारं न समवस्यति न प्राप्नोति ४१ यद्येवं कोपि विदंति तर्हि कथं मुच्येरन् तत्राह येषामिति येषां यत्तु दयाकुर्या ८९.२७ राम
त् ते च यदि निःकपटं आश्रितचरणा भवंति ते दुस्तरां देवमायां अतितरंति चकारात् मायावैभवं विदंति च अयंति वा पा
ठः प्रत्यक्षमेव तेषां मायातितरणमित्याह नैषामिति श्वशृगालानां भक्ष्ये देहे ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतर्दर्शनाभावेपिमायेयमितिज्ञानंनतुरूपंतौ(वे)बहुनामस्तीत्याहवेदाहमितित्रिभिः यूयमितिसनकादीनांनभोग्यंबहुत्वं दैत्यवर्यः प्रह्लादः
मनुःस्वायंभुवः तस्यपत्नीचतदात्मजाः पुत्रीकन्याश्च प्राचीनबर्हिषोविसर्गलोपश्छांदसः ४२ शतंधनुः अनुश्चवसोधिराजः रंतिदे
वाइतिपाठःसुगमः ऐकपद्यएतैः सहितादेवव्रतइत्यर्थः ४४ उपेंद्रदत्तः शुकः विभीषणादयोवर्यामुख्यायेषांते ४५ किंबहुना

वेदाहमंगपरमस्यहियोगमायांयूयंभवश्चभगवानथदैत्यवर्यः पत्नीमनोःसचमनुश्चतदात्मजाश्चप्राची
नबर्हिऋभुरंगउतध्रुवश्च ४३ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयनाहुषाद्याः मांधा
त्रलर्कशतधन्वनुरंतिदेवादेवव्रतोबलिरमूर्त्तरयोदिलीपः ४४ सौभर्युतंकशिबिदेवलपिप्पला
शारद दाःसारस्वतोद्धवपराशरभूरिषेणाः येन्येविभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः
४५ तेवैविदंत्यतितरंतिचदेवमायांस्त्रीशूद्रहूणशबराअपिपापजीवाः यद्यद्भुतक्रमपरायणशीलशिक्षा
प तिर्यग्जनाअपिकिमुश्रुतधारणाये ४६

सत्संगेनसर्वेपिविदंतीत्याहतेवाइति अद्भुतःक्रमःपादन्यासोयस्यहरेः तत्परायणास्तद्भक्ताः तेषांशीलेशिक्षाये
षांतेतथायदिभवंतितर्हितेपिविदंतीत्यर्थः श्रुतेभगवत्स्वरूपे धारणामनोनियमनंयेषांतेविदंतीतिकिमुवक्तव्यं ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किं तद्भगवतः स्वरूपं यस्मिन्मनोधारणीं विधाय मायानंतरं तोल्यपेक्षायामाह शश्वदित्यादिभ्यां यद्ब्रह्मेति विदुर्मुनयः तद्वै भगवतः स्वरूपं किं
तद्ब्रह्म तदाह अजस्रं नित्यं च तत्सुखं च विशोकं चेति अजस्रसुखत्वे हेतुः शश्वत्सदा प्रशांतं अतो नित्यसुखरूपं विशोकत्वे हेतुः अभयं
कुतः यतः समं भेदशून्यं अतो द्वितीयाद्वै भयं भवतीति श्रुतेः तत्कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसं ननु ज्ञानस्यापि नीलपीताद्याका
इति चे रेण चक्षुरादिकरणभेदेन च भेदो दृश्यते न शुद्धं निर्मलं ननु दर्शितो विषयकरणोपरागरूपो मल इत्यत आह सदसतः परं विषयकर
णसंगशून्यं तेन तदुपरागो न ज्ञानस्येति भावः ननु तथापि ज्ञातृज्ञानभेदः स्यात् न आत्मतत्त्वं आत्मनो ज्ञानं स्वरूपमेव तन्नु नानातो
भिन्नं ननु च तत्त्वौपनिषदं पुरुषं पृच्छामीति शाब्दबोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह शब्दो न यत्रेति आरोपितनिवृत्तिव च शब्द
स्य व्यापारो न तद्बोध इत्यर्थः ननु भवतु नाम निरस्तभेदज्ञानरूपत्वाद्विशोकत्वं सुखस्य तु नानाकारकसाध्यक्रियाफलत्वात् कथ
मजस्रसुखत्वं तस्येत्यत आह यत्र बहुकारकसाध्यः क्रियार्थः उत्पाद्यादिचतुर्विधः उत्पाद्याप्यविकार्यसंस्काररूपं चतुर्विधं क्रि

शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वं शब्दो न यत्र पुरुकारकवान्क्रियार्थो माया परैत्यभिमुखे च विल
ज्जमाना ४७ तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकं सध्र्यङ्नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडि
व निपानखनित्रमिंद्रः ४८

याफलं च नास्ति इंद्रियैर्ज्ञानांशाभिव्यक्तिरेव क्रियाभिरानंदांशाभिव्यक्तिमात्रं क्रियते न तूत्पत्त्यादिकमिति भावः ननूत्पत्त्याद्यभावेऽपि माया
मलापकरणेन विकार्यत्वं स्यादेव व्रीहीणामिव तुषापकरणेनेत्याशंक्याह माया अभिमुखे स्थातुं विलज्जमाना च यस्मात्परैति
दूरतोऽपसरति ४७ तस्मादेवंभूते भगवति नियमितमनसां कृतार्थानां न किमपि कर्तव्यमस्तीत्याह सध्र्यगिति सध्र्यक् सह चरं मनः यं प्रति नि
रम्य यम्य यस्मिन् स्थिरीकृत्य यतयो यमशीलाः कर्तहेतिं भेदं न निरासाकृतं तत्र हेतिं साधनं जह्युः त्यजेयुः अनुपयोगात्तत्राद्रियंत इत्यर्थः उप
योगाभावेन साधनानादरे दृष्टांतः निपीयते यस्मिन्निति निपानं कूपः तस्य खनित्रं खननसाधनं यथा स्वराट् स्वयमेव पर्जन्यरूपेण विरा
जमान इंद्रो नादत्त तद्वदिति यद्वा स्वेनैव राजत इति स्वराट् दरिद्रः स यथा इंद्रः सम्राट् सन् कर्मकारदशायां गृहीतं निपानखनित्रं जह्यात्तद्व २८
दित्यर्थः ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स श्रेयसामपि साद्रि २

न

एवं तावद्ब्रह्मसमुखं विशोकेब्रह्मसेव भगवतः। स्वरूपं तत्प्राप्तानीर्वे प्राप्यं सुखं वा किंचिदस्तीत्युक्तं इदानीं ततः प्राक् स एव सर्वफलदाता सर्वेकर्मप्र
वर्तकश्चेत्याह स एव श्रेयसां फलानां विभुः दातापि तत्र हेतुः। भावानां ब्राह्मणादीनां स्वभावेः शमदमादिभिर्विशेषणैर्विहितस्य सतः। भु
मस्य कर्मणो यतः प्रवर्त्तकात्प्रसिद्धिः यद्वा भावानां महदादीनां स्वभावेन परिणामेन विहितस्य सतः। कार्यस्य प्रसिद्धिः स एव सर्गादीनां दातेत्य
र्थः ननु कर्मकर्तुर्मर्त्तस्य कथं स्वर्गादिफलं स्यात्तत्राह स्वारंभकधातुना भूतानां विगमे वियोगे सतोऽप्यनु विशीर्यमाणे पि देहे तत्र स्वेव्यो
१ य मवस्तेन सह न विशीर्यते यतः अजः तेन सह न जातः तस्य पुरुषस्य श्रेयसां प्रभुरित्यर्थः ४९ अध्यायत्रयस्यार्थमुपसंहरति सायंते॥

[illegible] २

ब्रह्मोवाच २
स श्रेयसामपि विभुर्भगवान्यतोऽस्य भावस्वभावविहितस्य सतः प्रसिद्धिः देहे स्वधातुविगमेनु विशीर्यमाणे व्योमवत्
त्पुरुषो न विशीर्यतेजः। ४९ सोयं तेभिहितस्तात भगवान्विश्वभावनः। समासेन हरेर्नान्यदन्यस्मात्सदसच्च
यत्। ५० इदं भागवतं नाम यन्मे भगवतोदितं संग्रहोयं विभूतीनां त्वमेतद्विपुलीकुरु ५१ यथा हरौ भगव
ति नृणां भक्तिर्भविष्यति सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ५२ मायां वर्णयतोमुष्य ईश्वरस्यानुमो
दतः शृण्वतः श्रद्धया नित्यं मायया त्मा न मुह्यति ५३ इति श्री भागवते महापुराणे द्वितीयस्कंधे ब्रह्मनारद
संवादे सप्तमोऽध्यायः।

समासेन संक्षेपेणाभिहितः। तमेवाह सदसत्कार्यकारणं च हरेरन्यन्न भवति ननु हरेस्तद्व्यतिरेके तद्गत विकारप्रसंगः। स्यान्नेत्यत आह अन्य
स्मात्कारणभूतो हरिः। कार्याद्व्यतिरिक्त इत्यर्थः। ५० अयं च विभूतीनां संग्रह उदितः। ५१ यथा वर्णितेन नृणां भक्तिर्भविष्य
त्येवं संकल्प्य संचिन्त्य तथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय ननु भक्तिरस विद्यातेन केवलं तत्त्वमित्यर्थः। ५१ ननु ली
ला मायाश्रया किं तद्वर्णनेनेत्यत आह मायामिति ५३ इति श्री भागवते महापुराणे द्वितीयस्कंधे सप्तमोऽध्यायः॥ ७॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमे देहसंबंधमाक्षिपन्नीशजीवयोः वह्ननुपरीक्षिदाप्रच्छत् पुराणार्थाननुबुभुत्सितान् ब्रह्मेनद्विपुलीकुर्वित्युक्तो नदेव विपुलीकरणेः
च्छति ब्रह्मणो नोदितेति भिः अगुणस्य गुणातीतस्यापि देवदर्शनः यस्मैः १ । २ निःसंगं मनः श्रीकृष्णे निवेश्य त्यक्ष्ये स्वप्रयत्नादर्शि- तो
तः सोपि श्रद्धया शृण्वतो नावश्यकं इत्याह शृण्वत इति स्वप्रयत्नं विना भगवान् स्वयमेव हृदि विशति ४ भावसरोरुहं हृदय
कमलं प्रविष्टः सन् तत्रत्यं सर्वं मलं धुनोति सलिलस्येति द्रव्यांतरव्यामिश्रणादिना कुंभस्थे जले शरत् धिनोति देवकवलश्रुद्धति

राजोवाच ब्रह्मणा चोदितो ब्रह्मन् गुणाख्यानेऽगुणस्य च यस्मै यस्मै यथा प्राह नारदो देवदर्शनः १ एतद्वेदि
तुमिच्छामि तत्त्वं वेदविदां वर २ हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः ३ कथयस्व महाभाग यथाहम
खिलात्मनि कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरं ३ शृण्वतः श्रद्धया नित्यं गृणतश्च स्वचे-
२७ ष्टितं कालेन नातिदीर्घेण भगवान् विशते हृदि ४ प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं धुनोति
शमलं कृष्णः सलिलस्य यथा शरत् ५ धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति मुक्तसर्वपरिक्लेशः
पांथः स्वशरणं यथा ६

४। ननु नदीतडागादिगतो यच्च मलः कुंभस्थं नास्ति सत्यं ननु सर्वथा विलीयते अतएव किंचित्स्खलनेन पुनः क्षुभ्यति च ॥
एवं तपोदानादिप्रायश्चित्तेन सर्वथा सर्वेषां सर्वपापं धुनोति किंतु सावशेषं तच्च कस्यचिदेव किंचिदेव हृदि प्रविष्टमात्र राम
स्तु श्रीकृष्णः सर्वेषां सर्वपापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति ५ ततश्च कृतार्थो २७
भवतीत्याह धौतात्मा निःपापः मुक्ताः सर्वरागद्वेषादयः परिक्लेशा येन पांथः प्रवासादागतः स्वशरणं गृहं य
थान मुंचति तद्वत् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंश्रवणोत्सुकभावि॰ कृत्यसंदिग्धानर्थशिष्टपृच्छति। अधातुमतः धात्तवोभूतानि तत्संबंधश्चानुपपन्नः लौकिकस्यात्मनः अस्य
धातुभिर्देहारंभ इति यत्तदेत्तत्किं यदृच्छयानिनिमित्तं हेतुनावा कर्मादिना भवंतो यथावज्जानंते अतः कथयंतीति शेषः ॥७॥
यश्चासावीश्वरः सोपि तत्तुल्यदेहवानुप्रोक्तं ततस्तस्य कोविशेष इत्याशयेन पृच्छति आसीदिति सौदर्नल्लोकानां संस्थाने नानादेवत्वलक्षणे ६२
स्वरूपं यस्य तत्पद्मं यस्मादुदरात् आसीत् असावीश्वरः इयत्तायुक्तैः स्वपरिमितैरवयवैरपलौकिकः पुरुषो यावान् यन्त्ररव्याकाव

यद्धातुमतो ब्रह्मन्देहारंभोस्य धातुभिः यदृच्छयाहेतुनावा भवंतो जानते यथा ७ आसीद्यदुदरात्पद्मं
लोकसंस्थानलक्षणं यावानयंवैपुरुषइयत्तावयवैः पृथक् तावानसाविति प्रोक्तः संस्थावयववानि
च ८ अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ददृशे येन तद्रूपं नाभिपद्मसमुद्भवः ९ ॥ स
चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः मुक्त्वात्ममायां मायेशः शेते सर्वगुहाशयः १० पुरुषावयवैर्लो
काः सपालाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरिति शुश्रुम ॥११॥

तावयेयुक्तः तावानुप्रोक्तः संस्थावानु अवयववानिव प्रोक्तः अतः कोविशेषस्तस्येति ८ अवश्यंत्वविशेषोवाच्य इत्याह
अजो ब्रह्मा भूतानीच्छत्युपाधीनामात्मानियंता समष्ट्युपाधित्वात् येन च अनुग्रहेण तत्स्वरूपं ददृशे ददृष्टवान् एतच्चतस्या
पि द्वपरीशस्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहमीक्षयैवाभिनोदितः इत्यादिना चोक्तमनुसंधेयं अग्रेनुस्पष्टं भविष्य
ति ९ प्रश्नांतरमाह सचापीति यत्र शेते येन रूपेणावतिष्ठते विश्वस्य स्थित्यादयो यस्मात् एवमादि प्रश्नानां तद्वेताहेस्युदाह
तु मितिसर्वत्र क्रियाध्याहारः संबंधः १० प्रश्नांतरमाह पुरुषस्यावयवैः पूर्वकल्पिताः यस्य हावयवैर्लोकानुकल्पयंतीत्यादौ लोकैः अ
मुष्यावयवा इतिपातालमेतस्य हि पादमूलमित्यादौ तत्त्वमुखाद्भुतवंतावयं ॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि० एवं संदेहविपर्ययाभावं पृष्ट्वा इदानीमज्ञानानुवृत्त्यनर्थान् पृच्छति यावानित्यादिना कल्पो महाकल्पो विकल्पोऽवांतरकल्पः भूतादिशब्दो यस्मात् य टी० ८
स्य वाचकः इति वा मतः स्थूलदेहाभिमानिनां मनुष्यपितृदेवादीनां आयुषः प्रमाणं १२ अनुमानप्रकारः पृष्टो विशेषं पृच्छति कालस्य
ति अनुगतिः प्रवृत्तिः कर्मगतयः कर्मप्राप्यानि स्थानानि यादृशी यादृश्यः १३ गुणानां सत्त्वादीनां परिणामं देवादिरूपमिच्छतां गु
णिनां जीवानां मध्ये यस्मिन्परिणामे कर्मणां पुण्यपापानां समावायः समुदायः येन कर्मसमुदायेन केऽर्थं तेन कोपि कारी देवो पि२

यावान्कल्पो विकल्पो वा यथा कालोनुमीयते भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः १२ कालस्यानुगतिर्या
तु लक्ष्यतेण्वी बृहत्यपि यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम १३ यस्मिन्कर्मसमावायो यथा येनोपगृ-
ह्यते गुणानां गुणिनां चैव परिणाममभीप्सतां १४ भूपातालककुब्व्योमग्रहनक्षत्रभूभृतां सरित्समुद्र-
३० द्वीपानां संभवश्चैतदोकसां १५ प्रमाणमंडकोशस्य बाह्याभ्यंतरभेदतः महतां चानुचरितं वर्णाश्र-
मविनिश्चयः १६ अवतारानुचरितं यदाश्चर्यतमं हरेः युगानि युगमानं च धर्मो यश्च युगे युगे १७
नृणां साधारणो धर्मः सविशेषश्च यादृशः श्रेणीनां राजर्षीणां च धर्मः कृच्छ्रेषु जीवतां १८ तत्त्वानां परि-
संख्यानं लक्षणं हेतुलक्षणं पुरुषाराधनविधिर्योगस्याध्यात्मिकस्य च १९

द्विभावं प्राप्नोतीत्यर्थः १४ भूरादीनां संभवः एतान्निर्युक्ता सिंधि येषां प्राणिनां तेषां च संभवः यद्वेति सर्वत्रानुषंगः १५ वर्णा राम
नामाश्रमाणां च विनिश्चयः तत्तत्स्वभावे निर्धारः १६ युगे युगे प्रतियुगं यो धर्मः यश्च हरेरवतारानुचरितं १७ सविशेषः व ३०
नि० र्णाश्रमैर्बंधनः श्रेणीनां तत्तद्व्यवसायोपजीविनां व्यवहारनियमलक्षणो धर्मः राजर्षीणां प्रजापालनाधिकारिणां कृच्छ्रेषु आ
पत्सु जीवतां सर्वेषां १८ तत्त्वानां प्रकृत्यादीनां परिसंख्यानं संख्या लक्षणं स्वरूपं हेतुतो लक्षणं तत्तत्कार्यहेतुत्वेन च लक्षणमित्य नो० २
र्थः पुरुषाराधनस्य विधिः देवपूजाप्रकारः अष्टांगयोगस्य च विधिः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगेश्वराणामैश्वर्यमणिमादिना अर्चिरादिगतिः लिंगशरीरस्य भंगः प्रलयः वेदाः ऋग्वेदादयः उपवेदा आयुर्वेदादयः धर्मः धर्मशास्त्राणि ते
षांइतिहासपुराणयोश्चागतिः स्वरूपं २० संप्लवः अवान्तरप्रलयः यद्वा सम्यक् प्लवनं उद्भवः विक्रमः स्थितिः प्रतिसंक्रमो महाप्रलयः
इष्टं वैदिकं कर्म पूर्तं स्मार्तं वापीकूपतडागादि देवतायतनानि च अन्नप्रदानमारामः पूर्तमित्यभिधीयत इति तत्र च काम्यानामग्निहो
त्रादीनां विधिः अविरोधप्रकारः २१ अनुशायिनां लीनोपाधीनां जीवानां आत्मनो जीवस्य व्यवस्थानं वा धर्मोक्षाविति तेषां स्वरूपेण
वस्थानं २२ उदासीनः प्रलये २३ वशब्दादपृष्टमपि २४ प्रमाणं सम्यक् ज्ञानं यत्र स्रष्टप्रब्रह्मनारदव्यासक्रमेण संप्रदायो स्तीति सामान्य

योगेश्वरैश्वर्यगतिर्लिंगभंगस्तु योगिनां वेदोपवेदधर्माणामितिहासपुराणयोः २० संप्लवः सर्वभूतानां विक्र
मः प्रतिसंक्रमः इष्टापूर्तस्य काम्यानां त्रिवर्गस्य च यो विधिः २१ यश्चानुशायिनां सर्गः पाषंडस्य च संभवः आत्म
नो बंधमोक्षौ च व्यवस्थानं स्वरूपतः २२ यथात्मतंत्रो भगवान् विक्रीडत्यात्ममायया विसृज्य वा यथा मायामु
दास्ते साक्षिवद्विभुः २३ सर्वमेतच्च भगवन् पृच्छते मे नुपूर्वशः तत्त्वतो र्हस्युदाहर्तुं प्रपन्नाय महामुने २४ अत्र प्र
ग माणं हि भवान् परमेष्ठी यथात्मभूः परे चेहानुतिष्ठंति पूर्वेषां पूर्वजैः कृतं २५ न मेसवः परायंति ब्रह्मन्ननशनादमी
पिबतो च्युतपीयूषमन्यत्र कुपिताद् द्विजात् २६ सूत उवाच स उपामंत्रितो राज्ञा कथायामिति सत्पतेः
ब्रह्मरातो भृशं प्रीतो विष्णुरातेन संसदि २७ प्राह भागवतं नाम पुराणं ब्रह्मसंमितं ब्रह्मणे भगवत्प्रोक्तं ब्रह्मक
ल्प उपागते २८ यद्यत्परीक्षिद्दृषभः पांडूनामनुपृच्छति आनुपूर्व्येण तत्सर्वमाख्यातुमुपचक्रमे २९
इति श्रीभागवते महापुराणे द्वितीयस्कंधे ष्टमो ध्यायः ॥ ८ ॥

नायनाह परे चेति यद्वा त्वदन्यथा यशोगानानुगतिकाः एवं न तत्त्वविद इत्याह परे चेति २५ ननु ते वा नशनं द्विजकोपाद्भयं व्याकुलस्य कुतः अ
त्र आह नेति न परायंति नापगच्छंति न व्याकुलो भवतीत्यर्थः अच्युतकीर्तिपीयूषं पिबतः २६ उपामंत्रितः पृष्टः स व्यासो पतिश्व तस्य
२७ ब्रह्मकल्पे स्मद्युपक्रमे कल्पे भागवताख्यानेन वप्रश्नानामुत्तरदानमुपक्रांतवानित्यर्थः २८ पांडूनां ऋषभः श्रेष्ठः आनुपूर्व्येणेति प्रश्न

वकोमात्राविवक्षितः नपश्नक्रमः २८ इतिद्वितीये ८

भा० द्वि० राजञ्श्रोतुरेवं स्वप्नप्रश्नेण हरिणोदितं कथयामास नवमे शुको भागवतं पुनः तत्र यत्तावदुक्तं यद्धातुमत इत्यनेन जीवस्य कथं देहसं
बंध इति तत्रोत्तरमाह आत्मनो हरेर्मायां ऋते अनुभवरूपस्यात्मनः अर्थेन दृश्येन देहादिना संबंधः अंजसा तत्त्वेन न घटेत अ
स्वप्नद्रष्टुः त्वहेतुः परस्येति स्वप्ने देहसंबंधो न घटेत तद्वत् १ संसारोपि माययैवेत्याह बहुरूप १ बालयुवादिरूपः देवनरादिरूपश्च आभा
यथा २ ति गुणेषु देहादिषु २ अतएव भक्तियोगेन तन्निरासे सति मोक्षोपि घटत इत्याह यर्हीति वावशब्द एवार्थे स्व एव महिम्नि यदा
मेत तदैवाह कालमाययोः पुरुषप्रकृत्योः परस्मिन् तदा उभयं अहंममेति च त्यक्त्वा उदास्ते पूर्णस्वरूपेणावतिष्ठते तदुक्तो
ययासंमोहितो जीव आत्मानं त्रिगुणात्मकं परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते अनर्थोपशमं साक्षाद्भक्तियोगमधो

श्रीशुक उवाच आत्ममायामृते राजन् परस्यानुभवात्मनः । न घटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा १
३१ बहुरूप इवाभाति मायया बहुरूपया । रममाणो गुणेष्वस्या ममाहमिति मन्यते २ यर्हि वाव महिम्नि स्वे
परस्मिन् कालमाययोः । रमेत गतसंमोहस्त्यक्त्वोदास्ते तदोभयं ३ आत्मतत्त्वविशुद्ध्यर्थं यदाह भ
गवानृतं । ब्रह्मणे दर्शयन्रूपमव्यलीकव्रतादृतः ४ श्री श्री श्री श्री श्री श्री श्री श्री

क्षजे लोकस्याजानतो व्यासश्चक्रे सात्वतसंहितामिति ३ यच्चोक्तं परमेश्वरस्यापि देहसंबंधाविशेषात् कथं तद्भक्त्या मोक्षः १ इ
त्यादि तिश्चासीद्यदुदरात्पद्ममित्यादिना तत्राह आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तत्त्वज्ञानार्थं तद्भवत्येवाकिं तत् ॥ य
त्तप आदिना भजनं भगवान् ब्रह्मणे आह किं कुर्वन् ऋतं सत्यं चिद्घनरूपं दर्शयन् हेतुः अव्यलीकेन व्रतेन राम
तपसा आदृतः संचित्तः सन् अयंभावः जीवस्याविद्यया मिथ्या रूपदेहसंबंधः १ ईश्वरस्य तु योगमायया ३२
चिद्घनलीलया विग्रहाविर्भाव इति महान् विशेषः १ अतस्तद्भजनान्मोक्षोपपत्तिरिति ॥ ४ ॥ ८७

नू दर्शने २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवद्भजनादेव तत्त्वज्ञानमित्येतत्सप्रपंचयिष्यन् ब्रह्मणोपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुमितिहासमित्यादिना परोगुरुः। भक्तिरहस्यो
पदेष्टा स्वधिष्ण्यं पद्मं आस्थाय अधिष्ठाय तस्य अधिष्ठानान्वेषणपूर्वं जले निमग्नः। परावृत्य स्वधिष्ण्यमास्थितवानित्यर्थः। ऐक्षत लोकं स्रष्टुमि
त्यालोचितवान् तादृशप्रज्ञां अत्र सृष्टिविषये संमतां अव्यभिचारिणीं विधिः प्रकारः। ५ स ह्येष चिन्तयन् कदाचित् द्व्यक्षरं वचः। अम्भ
सि उपाशृणोत् उपसमीपे श्रुतवान् ते अक्षरे दर्शयति कादयो मावसानाः स्पर्शाः। तेषु यत् षोडशं तकारः। एकविंशं पकारः।
वचसो निर्देशार्थं तदर्थमाह हे नृप निःकिंचनानां त्यक्त धनानां धनं यद्विदुः येन तपोधना इति प्रसिद्धः। तच्च द्विर्गदितं तपतपेति लो

स [stain] आदिदेवो जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्मा
णविधिर्यया भवेत् ५ स चिन्तयन् द्व्यक्षरमेकदाम्भस्युपाशृणोत् द्विर्गदितं वचो विभुः। स्पर्शेषु यत्षोडशमेकविंशं
निः किंचनानां नृप यद्धनं विदुः ६ निशम्य तद्[stain]दिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः स्वधिष्ण्य
मास्थाय विमृश्य तद्धितं तपस्युपादिष्ट इवादधे मनः। ७ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा
विजितोभयेंद्रियः अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः। ॥ ८ ॥ तस्मै स्वलो
कं भगवान् सभाजितः संदर्शयामास परं न यत्परं व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ९

पमध्यमपुरुषैकवचने तस्य वशीकर्ता आदरविधिरूपामस्तौणादित्यर्थः। ६ एवं निशम्य तस्य वक्तारं दिदृक्षया ततः प्रचलितः। सन् दि
शो विलोक्य पुनः स्वधिष्ण्यमास्थायैकेन चित्तप्रत्यक्षं नियुक्त इव तत्रात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः। ७ ततः सः अखि
लानां लोकानां तापनं प्रकाशकं तपः अतप्यत कृतवान् तपतस्यत तस्य वचसोर्थं अमोघदर्शनं तस्य जितः अनिलः आत्मा मन
श्च येन विजितानि उभयेन्द्रियाणि ज्ञानकर्मात्मकानि येन तपतां तानप अरतां धृतपायान् अतिशयेन तपस्वी ८ तस्मै ब्रह्मणे स्वलोकं
वैकुंठाख्यं परं श्रेष्ठं न यत्परं यतः परम मुकुटश्च मन्यन्नास्ति तमेव लोकमनुवर्णयति पंचभिः व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भि
र्मनुष्यवद्भिः यद्वा स्वस्य दृष्टं दर्शनमस्ति येषां आत्मविद्भिरित्यर्थः। ९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि० ताभ्यां मिश्रं सत्वं न प्रवर्त्तते किंतु शुद्धमेव सत्वं कालविक्रमो नाशः अपरे रागलोभादयो [illegible] वक्तव्यं अनुव्र[illegible]
श्यामाश्च ते अवदाताश्च पद्मनेत्राः पीतांबराः सुरुचः अतिकमनीयाः सुपेशसः अतिकुमाराः उन्मिषंत इव प्रभावंतो मणिप्रवेकाम
णयुत्तमायुक्तानि निष्कानि पदकान्याभरणानि येषां ते सुवर्चसः अतितेजस्विनः ॥ ११ ॥ प्रवालादिवत्ववर्चसो वर्णो येषां ते परिस्फुरंति कुं
डलानि मौलयो मालाश्च संति येषां ॥ ११ ॥ पार्षदाननु अनुवर्ण्य पुनरपि लोकमनुवर्णयति भ्राजिष्णुभिर्दीप्यमानाभिः प्रमदोत्तमानां दि
वः कांतयस्ताभिः विद्योतमानः सह विद्युद्भिः वर्त्तमाना सविद्युतः ताभिरभ्रावलीभिः तत्र विद्युत इव स्त्रियः अभ्रपं[illegible]वद्विमानानि

प्रवर्त्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं न च कालविक्रमः न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ॥ १० ॥
श्यामावदाताः शतपत्रलोचनाः पिशंगवस्त्राः सुरुचः सुपेशसः सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभर
णाः सुवर्चसः ॥ ११ ॥ प्रवालवैदूर्यमृणालवर्चसः परिस्फुरत्कुंडलमौलिमालिनः ॥ ११ ॥ भ्राजिष्णुभिर्यः परितो वि
३२ राजते लसद्विमानावलिभिर्महात्मनां विद्योतमानः प्रमदोत्तमाद्युभिः सविद्युदभ्रावलिभिर्यथा नभः ॥ १२ ॥
श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः प्रेंखं श्रिता या कुसुमाकरानुगैर्विगीयमाना
द३ प्रियकर्म गायती ॥ १३ ॥ ददर्श तत्राखिलसात्वतां पतिं श्रियः पतिं जगत्पतिं सुनंदनंदप्रबलार्हणादिभिः स्वपार्षद यज्ञपतिं २
मुख्यैः परिसेवितं विभुं ॥ १४ ॥ भृत्यप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननं किरीटिनं कुंडलिनं चतु
र्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ॥ १५ ॥ अध्यर्हणीयासनमास्थितं परं वृतं चतुः षोडशपंचशक्तिभिः ॥

नभइवलोकः ॥ १२ ॥ श्रीः संपद्रूपिणी मूर्तिमती मानं पूजां विभूतिभिर्नानाविभवैः प्रेंखं आंदोलं श्रिता कुसुमाकरो वसंतस्तस्यानुगाः
पं २ भ्रमरास्तैर्विगीयमाना स्वयं तु प्रियस्य हरेः कर्म गायती भवतीति ॥ १३ ॥ यत्रैवंभूतो लोकः तत्र तस्मिन् ॥ १४ ॥ भृत्यानां प्रसादे अभि पम
मुखं दृगेव आसवः इव दृक् णां हर्षकरो यस्य तं प्रसन्नहासमरुणलोचनं चाननं यस्य वक्षसि स्थितया श्रिया लक्षितं अलंकृ ३२
तमित्यर्थः ॥ १५ ॥ अध्यर्हणीयं वरिष्ठं सिंहासनं चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः षोडश एकादशेंद्रियमहाभूतान्याः पंचतन्मा
त्ररूपायाः शक्तयस्ताभिर्वृतं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वे भगे ॥ स्वाभाविके ऐश्वर्यादिभिः इतरत्र योगिषु अध्रुवैः आगन्तुकैः साधारणैरित्यर्थः एवं सत्यपि स्व एव धाम्नि स्वस्वरूप एव रममाणं अत
एव ईश्वरं १६ तस्य दर्शनेन यः आह्लादः तेन परिप्लुतं व्याप्तं अन्तरं मनः कारणं यस्य हृष्यत्तनोः मा चित्तानुर्यस्य प्रेमभरेण अश्रूणि लोचनेषु
यस्य विश्वसृक् ब्रह्मा पारमहंस्येन यथा ज्ञानमार्गेण १७ तं ब्रह्माणं भगवान् भाषे प्रजाविसर्गकार्ये निजशासनार्हणं स्वनियोगार्हणं
प्रजाविसर्गसमुपस्थितमितिवान्वयः ईषत्स्मितेन नराचिर्हास्तिः शोभायुक्ता तया गिरा १८ सिसृक्षया हेतुना चिरं संभृतेन तपसा अहं
सम्यक् परितोषितः दुस्तोषः तोषयितुमशक्यः १९ मा इति मा श्रेयसां फलानां परिश्रामः साधनप्रयासः मम दर्शनमवधिर्ये

युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्रममाणमीश्वरं १६ तद्दर्शनाह्लादपरिप्लुतान्तरो हृष्यत्तनुः प्रेमभराश्रुलोचनः
ननाम पादाम्बुजमस्य विश्वसृक् यत्पारमहंस्येन यथाधिगम्यते १७ तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशा
सनार्हणं बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् १८ श्रीभगवानुवाच ॥ त्वयाहं तोषितः
सम्यग्वेदगर्भ सिसृक्षया चिरं भृतेन तपसा दुस्तोषः कूटयोगिनां १९ वरं वरय भद्रं ते वरेशं माभिवाञ्छितं ॥
ब्रह्मन् श्रेयः परिश्रामः पुंसां मद्दर्शनावधिः २० मनीषितानुभावोयं मम लोकावलोकनं यदुपश्रुत्य रह
सि चक्रे थे परमं तपः २१ प्रत्यादिष्टं मया तत्र त्वयि कर्मविमोहिते तपो मे हृदयं साक्षादात्माहं तपसोनघ २२ ॥
सृजामि तपसैवेदं ग्रसामि तपसा पुनः बिभर्मि तपसा विश्वं वीर्यं मे दुश्चरं तपः २३

श्रमस्य स तथा ततोधिकं तु पुनः फलं नास्तीत्यर्थः २० एतच्च मत्कृपयैव लब्धं प्राप्तमित्याह मनीषितमिच्छानुरूपमिदं दातव्यमिति या मम
च्छा तदनुरूपमिदं दातव्यमिति या ममेच्छा तस्या अनुभावोयं कोसावित्याह मम लोकस्यावलोकनं यत् न चेदं मे मया तपोबलेन प्राप्त
मिति स्वातन्त्र्यमन्यस्व त्वयेदं तेरापि मत्कृतत्वादित्याह रहसि तपः प्रेति यद्वच उपश्रुत्य परमं तपश्चके कथं कृतवानसि २१ तदपि वो न:
प्रति मयैवादिष्टं उपदिष्टं कदा तत्र तदा संसारे त्वयि कर्मणा कार्यार्थे विमोहिते सति किंच तपो नाम ममैव शक्तिरित्याह तपो
मे हृदयं अन्तरंगा शक्तिः आत्मा स्वरूपं यस्य ज्ञानमयं तपः इति श्रुतेः २२ ग्रसामि संहरामि बिभर्मि पालयामि वीर्यं शक्तिः २३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अध्यक्षः अधिष्ठितागुहायांबुद्धाववस्थितस्तथापिवेदस्तथापीत्युत्तरेणान्वयः २४ नाथमानस्यायाचमानस्यउपतप्यमानस्येतिवाहेनाथानाथय
आशंसयप्रयच्छनाथितंयाचितं नाथृनाधृपाच्चोपतापैश्वर्याशीःषुनाथितमेवाहपरंसूक्ष्मंअवरंस्थूलंचतेरूपंयथाजानीयां २५ य
थाचक्रीडसितथात्वंद्धिषयांमनीषामपिधेहीत्युत्तरेणान्वयः नानाशक्त्युपबृंहितंविश्वंविलुंपन्संहरन्विविधंसृजन्बिभ्रत्पालयन्
आत्मनास्वयमेवआत्मानंब्रह्मादिरूपंगृह्णन्क्रीडसि २६ ऊर्णुतंतुभिरात्मानमाच्छादयति २७ तत्किंसृष्टेरुद्विग्नएवनत्वहमात्मना२
नेप्रार्थयसेनेत्याह भगवतात्वयाशिक्षितंअनुशिष्टंअनुद्विग्नअनलसःसन्नुकरिष्यामि तर्हिकिंमेननतत्वज्ञानेनतत्राहयस्माद्देवम

ब्रह्मोवाच भगवान्सर्वभूतानामध्यक्षोवस्थितोगुहां वेदह्यप्रतिरुद्धेनप्रज्ञानेनचिकीर्षितं २४ तथापिनाथमा
नस्यनाथनाथयनाथितं परावरेयथारूपेजानीयांतेत्वरूपिणः २५ यथात्ममायायोगेननानाशक्त्युपबृंहि
तं विलुंपन्विसृजन्गृह्णन्बिभ्रदात्मानमात्मना २६ क्रीडस्यमोघसंकल्पऊर्णनाभिर्यथोर्णुते तथात
द्विषयांधेहिमनीषांमयिमाधव २७ भगवच्छिक्षितमहंकरवाणिह्यतंद्रितः नेहमानःप्रजासर्गंबध्येयं
यदनुग्रहात् २८ यावत्सखासख्युरिवेशतेकृतःप्रजाविसर्गेविभजामिभोजनं अविक्लवस्तेपरिकर्मणि
स्थितोमामे[illegible]समुन्नद्धमदोऽजमानिनः २९ ॥

तेतवानुग्रहात्प्रजासर्गमीहमानः कुर्वन्नपिअहंकारादिभिर्नबद्धोनभवेयमिति २८ अवश्यंचमदोभविताततुकेचिकात्वंमाभूदि
तिप्रार्थयतेयावदिति भोईशमेत्वयात्वोकिकस्यसखुःसखेवाहंकृतःकरस्पर्शनादिनासम्मानितःसन्प्रजासर्गरूपेतत्र राम
वपरिकर्मणिसेवायांस्थितःविक्लवःव्याकुलएवयावज्जनंविभजामितत्तममध्यमादिभेदेनसृजामितावत्त्वंसमा ३३
नादहमप्यजःस्वतंत्रइतिमानिनोममसमुन्नद्धउत्कटोमदोमाभूत् यद्वा मदोमासमुन्नत्यतांउद्रिक्तोनभवेदित्यर्थः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञानं तदुपदिशति। ऋतेऽर्थमिति। अबाध्यमर्थं ऋते यत्प्रतीयेत परं देहघटादिकं जायमानं योऽसौ निसुष्टु भावरूपो न प्रतीये
त चात्मनि प्रतीयेत आत्मनो मायां विद्यात् आभासः स्वंद्रादेः प्रतिबिंबोरूपः तमश्छायां तद्वदयं यत्प्रतीयेत तदा पर्यर्थं विना प्रतीयेत
ज्ञानं शास्त्रोक्तं विज्ञानमनुभवः इहस्यं भक्तिः सुगोपमपि वक्ष्यामीत्यादि निर्देशात् तस्यांगं साधनं ३० ननु त्वद्दर्शनेप्यसमर्थोऽहं कथं ज्ञाना
धिकारी स्यां तत्राह यावानिति यावान् स्वरूपतः यथाभावः यादृक्सत्तावान् यानि रूपाणि गुणाः कर्माणि च यस्य ३१ एतदेव समय
गुपदिशन् यावानित्यस्यार्थं स्फुटयति अहमेवायमग्रे पूर्वमासं स्थितः नान्यत्किंचित् यत्सत् स्थूलं असत्सूक्ष्मं परं तयोः
कारणं प्रधानं तस्याप्यंतर्मुखं तया तदा मय्येव लीनत्वात् अहं च तदा आसमेव केवलं न चोपदकर्ता पश्चात्सृष्टेरनंत
तरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि प्रलये यो वशिष्येत सोप्यहमेव अनेन चानाद्यनंतत्वादद्वितीयत्वाच्च परिपूर्णोहं

श्रीभगवानुवाच ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितं सरहस्यं तदंगं च गृहाण गदितं मया ३० यावानहं यथाभावो
यद्रूपगुणकर्मकः तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ३१ अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं पश्चादहं यदे
७३ तच्च योऽवशिष्येत सोऽस्म्यहं ३२ ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथा तमः३
३४ यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं ३५ एतावदेव जिज्ञास्यं तत्
त्वजिज्ञासुनात्मनः अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ३६

मित्युक्तं भवति ३२ यथात्ममायायोगेन त्वं नेन मायाया अपि पृष्टत्वाद्वक्ष्यमाणोपयोगित्वाच्च मायां निरूपयति ऋतेऽर्थं विनापि वास्तवमर्थं यद्य
तः किमप्यनिरुक्तं आत्मन्यधिष्ठाने प्रतीयेत सदपि च न प्रतीयेत तं तु आत्मनो मम मायां विद्यात् यथा आभासो द्विचंद्रादिरिति अर्थं
विना प्रतीतौ दृष्टांतः यथा तमः इति असतो प्रतीतौ तमो राहुर्यथा ग्रहमंडले स्थितोपि न दृश्यत इत्यर्थः ३४ यथा भाव इत्येतत्स्पष्टयति यथा
महाभूतानि भौतिकेषु अनुस्यूतरनंतरं प्रविशंति तेषूपलभ्यमानत्वात् अप्रविष्टानि च प्रागेव कारणतया तेषु विद्यमानत्वात् तथा ते
षु भूतभौतिकेष्वहं एवं भूतानां मम सत्तेत्यर्थः ३५ साधनमाह आत्मनस्तत्त्वजिज्ञासुना एतावदेव जिज्ञास्यं विचार्यं तदेवाह अन्वयः
कार्येषु कारणत्वेनानुवृत्तिः कारणावस्थायां च तेभ्यो व्यतिरेकः तथावस्थासु तत्साक्षितयान्वयः व्यतिरेकः समाध्यादौ एवमन्वय
तिरेकाभ्यां यत्स्यात् सर्वत्र सर्वदा च तदेवात्मेति ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्स्वार्थितं तेनेहमानः प्रजासर्गमिति तत्त्वप्रसादीकरोति एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु विकल्पाः विविधसृष्
यस्तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति ३७ एवं संप्रदिश्य उपदिश्य जनानां परमेष्ठिनं परमेश्वराधिपत्ये स्थितं ब्रह्माणं आत्मन
स्तद्रूपं पश्यतः आत्मानुं अन्तर्हितवान् ३८ अन्तर्हिताः इन्द्रियार्थाः प्रत्यक्षरूपं येन तस्मै वद्धाञ्जलिः सन् ३९ तदनन्तरं पूर्वोक्तो ब्रह्मनारदसं
वादः प्रवृत्त इत्याह प्रजापतिरिति पञ्चभिः प्रजानां भद्रमन्विच्छन् विमृशन् सेव स्वार्थकाम्या स्वप्रयोजनं छोतयायम नियमान
वतिष्ठत् ४० रिक्थादानां पुत्राणां मध्ये प्रियतमः तं पितरं सेवमानः शीलादिना परितोषयामास ४१ किमिच्छन् विष्णोर्मायां वि

एतन्मतं समातिष्ठ परमेण समाधिना भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ३७ श्रीशुक उवाच संप्रदिश्यैवम
जनो जनानां परमेष्ठिनं प्रभुः पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्धरिः ३८ अन्तर्हितेन्द्रियार्थाय हरये विहिताञ्जलिः।
सर्वभूतमयो विश्वं ससर्जेदं स पूर्ववत् ३९ प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् भद्रं प्रजानामन्विच्छन्नाति
रि ष्ठत्स्वार्थकाम्यया ४० तं नारदः प्रियतमो रिक्थादानामनुव्रतः। शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ४१ मायां
३४ विविदिषन्विष्णोर्मायेशस्य महामुनिः। महाभागवतो राजन्पितरं पर्यतोषयत् ४२ तुष्टं निशाम्य पितरं लोकानां
प्रपितामहं देवर्षिः परिपप्रच्छ भवान्यन्मानुपृच्छति ४३ तस्मा इदं भागवतं पुराणं दशलक्षणं प्रोक्तं भगवता प्रा
ह प्रीतः पुत्राय भूतकृत् ४४ नारदः प्राह मुनये सरस्वत्यास्तटे नृप। ध्यायते ब्रह्म परमं व्यासायामिततेजसे ४५
यदुताहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः ४६ इति श्रीभागवते महा
पुराणे द्वितीयस्कन्धे नवमोऽध्यायः ९

ष्णोर्मायां विविदिषन् ४२ निशाम्य दृष्ट्वा ज्ञात्वेत्यर्थः मामा ४३ भगवता चतुःश्लोक्यां संक्षेपेण प्रोक्तं विस्तरेण प्राह दशलक्षणानि लक्ष
णानि यस्मिन् यथा विवृतं यस्मिन् तत् ४४ तत्संप्रदायतो भागवतं मया ज्ञातमित्याशयेनाह नारद इति ४५ भागवतव्याख्यानेन त्वत्प्रश्ना राम
नामुत्तरं दास्यामीत्याह यदुतेति पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः इत्यादिना वैराजात्पुरुषादिदं विश्वं कथं [illegible] ३४
मिति यदहं त्वया पृष्टः तद्यथावदुपाख्यामि श्रावयिति ४६ इति द्वितीये न
वमः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वि० आभासः सृष्टिः। निरोधो लयश्च यतो भवति अध्यवसीयते प्रकाशते च स ब्रह्मेति परमात्मेति प्रसिद्धः। आश्रयः कथ्यते ७ आश्रयस्वरू
पमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादिविभागमाह योयमध्यात्मिकः। पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः। स एवा
धिदैविकः चक्षुराद्यधिष्ठाता सूर्यादिः। तत्रैकस्मिन्नेव उभयोर्विक्रियोपाधिविच्छेदो यस्मात् स आधिभौतिकः। चक्षुर्गोलकाद्युप
लक्षितो दृश्यो देहः। पुरुष इति पुरुषस्य जीवस्योपाधिः। स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः। ८ एकमेकतराभाव इत्येते
षामन्योन्यसापेक्षसिद्धित्वेन नानात्मत्वं दर्शयति तथा हि दृश्यं विना तत्प्रतीत्यनुमेयं करणं न सिध्यति नापि द्रष्टा न च तद्वि
नाकारणप्रवृत्त्यनुमेयस्तदधिष्ठाता सूर्यादिः। न च तं विना करणं प्रवर्त्तते न वा तद्विना दृश्यमित्येवमेकतरस्याभाव एकेनोप
लभामहे तत्र तदा तत्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः। तेषामपि परस्परमा

आभासश्च निरोधश्च यतश्चाध्यवसीयते स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ७ योध्यात्मिकोयं पुरुषः।
३५ सोसावेवाधिदैविकः। यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः। ८ एकमेकतराभावे यदा नोप
लभामहे त्रितयं तत्र यो वेद स आत्मा स्वाश्रयाश्रयः। ९ पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः।
आत्मनोऽयनमन्विच्छन्नपोस्राक्षीच्छुचिः शुचीः। १०

आश्रयत्वमस्यैवेति तत्र अवच्छेदार्थं विशेषणं स्वाश्रयः अनन्याश्रयः। स चासावन्येषामाश्रयश्चेति तथा च भगवानुवक्ष्यति दृग्रूपमार्कं वपुर
त्र रन्ध्रे परस्परं सिध्यति यः स्वतः। खे आत्मा यदेषामपरो य आद्यः। स्वयानुभूत्याखिलसिद्धसिद्धिरिति एतेन व्यभिचारिति एतेन व
व्यभिचारित्वात्तेषामायामयत्वमप्युक्तं अत एव पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः लोकैरमुष्यावयवाः सपालैरित्यनेनोक्तो
विरोधः परिहृतः ९ उक्तमेवाध्यात्मादिविभागं प्रपंचयन् यदुक्तमहं त्वया पृष्टो वैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्य इति प्र राम
तिज्ञातं च तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना पुरुषो वैराजः अंडं विनिर्भिद्य पृथक् कृत्य विनिर्गतः। पृथक् स्थित इत्यर्थः। ३५
अयनं स्थानं अन्विच्छन् विमृशन् यतः शुचिः स्वयमतः। शुचिः शुद्धाः अपः। गर्भोदकसंज्ञाः अस्राक्षीत् असृजत् १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्सुवासं नारायणनामनिरुक्त्यास्पष्टयति तेन अप्सुवासेन यद्यस्मात्पुरुषोनरः तस्मादुद्भवायासांताः नाराः आपोयनमस्येतिनाराय
णइत्यर्थः तदुक्तं आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणःस्मृतइति ११ तस्यप्रभावमाह द्रव्यमुपादानंकर्मादि
निमित्तानि जीवोभोक्ता यस्यानुग्रहात्संति कार्यक्षमाभवंतीत्यर्थः १२ योगएवतल्पंशय्यातस्मात् वीर्यंगर्भरूपंदेहं हिरण्मयमिवप्रका
शबहुलं १३ तदेवत्रयंप्रपंचयति अथेत्यादिना १४ अंतःशरीरेयः आकाशः तस्मात्क्रियाशक्त्यातत्रविविधंचेष्टमानस्यसतः ओजः इंद्रियशक्तिः
सहोमनःशक्तिः बलंदेहशक्तिः ततः शक्तित्रयात्मकात् सूक्ष्मरूपात्प्राणः सूत्राख्यः महान्मुख्यः असुः प्राणः सर्वेषां १५ महत्त्वंदर्शयति प्रा

तास्ववात्सीत्स्वसृष्टासुसहस्रपरिवत्सरान् तेननारायणोनामयदापःपुरुषोद्भवाः ११ द्रव्यंकर्मचकालश्चस्वभावोजीवएवच
यदनुग्रहतः संतिनसंतियदुपेक्षया १२ एकोनानात्वमन्विच्छन्योगतल्पात्समुत्थितः वीर्यंहिरण्मयंदेवोमाययाव्यसृज
त्त्रिधा अधिदैवमथाध्यात्ममधिभूतमितिप्रभुः १३ अथैकंपौरुषंवीर्यंत्रिधाभिद्यततच्छृणु १४ अंतःशरीरआकाशात्
पुरुषस्यविचेष्टतः ओजःसहोबलंजज्ञेततःप्राणोमहानसुः १५ अनुप्राणंतियंप्राणाः प्राणंतंसर्वजंतुषु अपानंतमपा
नंतिनरदेवमिवानुगाः १६ प्राणेनाक्षिपताक्षुत्तृडंतराजायतेविभोः पिपासतोजक्षतश्चप्राङ्मुखंनिरभिद्यत १७ मुखत
स्तालुनिर्भिन्नंजिह्वातत्रोपजायते ततोनानारसोजज्ञेजिह्वयायोधिगम्यते १८ विवक्षोर्मुखतोभूम्नोवह्निर्वाग्व्याहृतंत
योः जलेवैतस्यसुचिरंनिरोधःसमजायत १९

णाइंद्रियाणियंप्राणंतंचेष्टांकुर्वंतं अनुप्राणंति प्राणानिचेष्टांकुर्वंति अपानंतंचेष्टांत्यजंतंतमनु अपानंतिचेष्टांत्यजंति राजानमनुभृत्याइव १६
क्षिपताचालयतानिमित्तेनक्षुत्तृडादिकंविभोरितिविराजोजीवाभेदेनोपासनार्थमुक्तं आजायेतेतस्मात् जक्षतः भक्षयितुमिच्छतइ
त्यर्थः प्राक्प्रथमंनिरभिद्यतविभक्तमभूत् १७ तालुअधिष्ठानंजिह्वाइंद्रियं नानारसोविषयः वरुणोदेवताज्ञातव्या एवंस
र्वत्रअधिष्ठानमिंद्रियंदेवताविषयइत्येतच्चतुष्टयमनूक्तमप्यूह्यं १८ विवक्षोः वक्तुमिच्छोः मुखतएववह्निर्देवतावाक्इंद्रियंव्याहृ
तंभाषणंतयोरितिइंद्रियदेवताधीनत्वंक्रमेणादर्शयति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततो भागवतव्याख्याहं वै दशमे स्फुटीराजप्रश्नोत्तरं वक्तुमारभे बादरायणिः दशलक्षणं पुराणं प्राहेत्युक्तं तानि दशलक्षणानि दर्शयति अत्रे
ति मन्वन्तराणीशानुकथा अत्र निर्दिष्टः सर्गादयो ऽत्र दशार्थलक्ष्यन्ते १ नन्वेवमर्थभेदाच्छास्त्रभेदः स्यात्तत्राह दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्व
ज्ञानार्थं नवानां लक्षणं स्वरूपं एकस्यैव प्राधान्याज्ञायेदोषइत्यर्थः नन्वत्र नैव प्रतीयते अत आह श्रुतेन श्रुत्यैवस्तोत्यादिस्थानेषु अंजसा
साक्षाद्वर्णयंति अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु २ सर्गादीनां प्रत्येकं लक्षणमाह भूतानि आकाशादीनि मात्राणि च शब्दादीनि इ
न्द्रियाणि च धीशब्देन महदहंकारौ गुणानां वैषम्यात् परिणामात् ब्रह्मणः परमेश्वरात् कर्तृभूतादीनां यथा विराड्रूपेण स्वरूपतश्च जन्म स

श्रीशुक उवाच अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः। मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः। १ दशमस्य वि
शुद्ध्यर्थं नवानामिह लक्षणं वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा २ भूतमात्रेन्द्रियधियां जन्म सर्ग उदा
हृतः ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः ३ स्थितिर्वैकुंठविजयः पोषणं तदनुग्रहः मन्वंतराणि
सद्धर्म ऊतयः कर्मवासनाः ४ अवतारानुचरितं हरेरस्यानुवर्तिनां पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहि
ताः ५ निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ६

स सर्गः पुरुषो वैराजः तत्कृतः पौरुषः चराचरसर्गो विसर्गइत्यर्थः ३ वैकुंठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः
स्थानं स्वभक्तेषु तस्यानुग्रहः पोषणं तदनुगृहीतानां सतां मन्वंतराधिपतीनां धर्मः कर्मणां वासनाः चेत्यूतं तु संतानं तु यत्ते कर्मभिः
संतन्यंत इत्यूतयः यद्वा ऊङ्धातोः संश्लेषार्थाद्भावप्रत्ययेनधातोरिदं रूपं ऊपत्ते कर्मभिर्वर्द्धन्ते संश्लिष्यंते इति वा ऊतयइत्यर्थः ४ हेरव
तारानुचरितं अस्यानुवर्तिनां च सत्कथा ईशानुकथाः प्रोक्ता इत्यर्थः ५ अस्यात्मनो जीवस्य हरेर्योगनिद्रामनु पश्चात् शक्तिभि
श्चोपाधिभिः सह शयनं लयः निरोधः अन्यथारूपं अविद्यया ऽध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थिति
मुक्तिः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि० नभस्वति प्राणवायौ दोधूयमाने अत्यंतं प्रचलति सति तत्र च नासिकायां वायुर्देवता गंधवहतीति तथा अनेन गंधो विषय उदर्शितः घ्राणः इंद्रि-
यं जिघ्रक्षतः गंधग्रहीतुमिच्छतः २० निरालोकं प्रकाशशून्यं आसीदिति शेषः निमिलिक मितिवदवयोक्तावः तदात्मानं देहं च कारादन्यच्च
वक्ष्ये दिदृक्षतः अक्षिणी स्थानं ज्योतिः आदित्यो देवता चक्षुरिंद्रिय ततो गुणस्य रूपस्य ग्रहः ग्रहणं अनेन रूपं विषय उदर्शितः २१ ऋषिभिर्वेदैः
बोध्यमानस्य तत आत्मनः प्रबोधनं ग्रहीतुमिच्छतः ततो गुणग्रहः शब्दग्रहणं २२ मृदुत्वं काठिन्यं चलघुत्वं च गुरुत्वं च आतप्रत्वं इषदुष्ण-
त्वं च शीततां चेत्यर्थः यद्यप्युष्णत्वमपींद्रियविषय एव तथापि तस्य जिघृक्षाभावाकोष्णमित्युक्तं गुरु उष्णेति पाठे यणादेशः दिसे वस्तुन
एतान् धर्मान् जिघृक्षतः त्वक् निर्भिन्ना त्वगिंद्रियाधिष्ठानं चर्म जातमित्यर्थः तस्यां रोमाणि इंद्रियं महीरुहा अदेवता जाता वस्तुनि ह-
स्तेनानालितत्वे मृदुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिंद्रियविषयत्वमिति पौराणिकाः तत्र त्वचि अंतर्बहिश्च वर्तमानः आरब्ध्य स्थितः कर्तेरि

नासिके निरभिद्येतां दोधूयति नभस्वति तत्र वायुर्गंधवहो घ्राणो नसि जिघृक्षतः २० यदात्मनि निरालोकमात्मानं च दिदृ-
३६ क्षतः निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः २१ बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः कर्णौ च निरभिद्येतां
दिशः श्रोत्रं गुणग्रहः २२ वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीततां जिघृक्षतस्त्वक् निर्भिन्ना तस्यां रोममहीरुहाः ॥
तत्र चांतर्बहिर्वायुस्त्वचा लब्धगुणो वृतः २३ हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया तयोस्तु बलवानिंद्र आदानमु-
भयाश्रयं २४ गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकां पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः २५

निष्ठा कथंभूतः त्वचा लब्धो गुणः स्पर्शो येन अयमर्थः त्वगिंद्रियमेव बहिः कंडूतिसहितं स्पर्शं गृह्णन् लोमशब्देनोच्यते तत्र महीरुहाणां
देवतात्वं अंतर्बहिश्च स्पर्शं गृह्णन् तद्वत्त्वकु वायुना व्याप्ते तत्र वातो देवता तथा च वक्ष्यति त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोष-
धीः अंशेन लोमभिः कंडूं यैरसौ प्रतिपद्यते निर्भिन्नान्यस्य चर्माणि लोकपालो निलो विशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते इति ॥
तत्र चर्माणि त्वचमिपलक्षितान्यपि इत्यर्थः प्राणेनांशेन निप्राणवायुव्याप्तेन त्वगिंद्रियेणेत्यर्थः वह्निश्च श्रोत्रविकस्यांशो निर्दिष्टः त्व- राम
ङ्किर्भिद्यत च चात्र लोमानि लोमभान्नौषधिवनस्पतय इति २३ रुरुहतुः निर्भिन्ने वनमिंद्रियं इंद्रो देवता तदुभयाश्रयं आदानं कर्म २४ ॥ ३६
अभिकामिकां अभीष्टां विहितामित्यर्थः पद्भ्यां सह यज्ञो विष्णुरवस्थितः तदधिष्ठातृरूपेण स्थितः कर्मभिरिति गत्याख्यात्कर्मशक्तिरिंद्रि-
यमुक्तं हव्यं क्रियत इति गतिं प्राप्य यज्ञार्थं द्रव्यविषय इत्युक्तं नृभिरिति व्याप्तिर्जीवस्य पिंड्येमचरीतिभिर्निदर्शयन्नराधिकारित्वं यज्ञादीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजा अपत्यं आनंदो रतिः । अमृतं स्वर्गादि तद्दर्शिनः शिश्नः अधिष्ठानं उपस्थ इन्द्रियं प्रजापतिश्चासीदिति ज्ञेयं तदुभयाश्रयं कामानां स्त्रीणां सं
भोगानां संबंधि प्रियमुखं २६ धातुमलं भुक्तान्नादीनामसारांशः त्यक्तुमिच्छोः । गुदं पायुमित्रोत्सर्गः । अधिष्ठानेन्द्रियदेवताविषयाः २७ गु
योः देहात् पुरः । देहान्तराणि आसिसृप्सोः । सर्वतो गंतुमिच्छोः निरभिद्यतेत्यनुषंगः अपानतः । अपगच्छतः । पृथक्त्वं मरणं नाभ्यादीन्यधि
ष्ठानादीनि नाभ्या हि प्राणापानयोर्बंधविश्लेषो मृत्युरिति प्रसिद्धं २८ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्चांत्राणि च नाड्यश्चा
सन् तत्र कुक्षिरधिष्ठानं अंत्राण्यन्नसंग्रहकरणमिंद्रियस्थानीयं नाड्यस्तु पानसंग्रहं तयोर्नाड्यंत्रवर्गयोः । क्रमेण नद्यः । समुद्राश्च दे

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयं २६ उत्सिसृक्षोर्धातु
मलं निरभिद्यत वै गुदं ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः २७ आसिसृप्सोः पुरः पुर्या निरभिद्यत सपान
तः तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं २८ आदित्सोरन्नपानानामासन्कुक्ष्यंत्रनाडयः नद्यः समु
द्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये २९ निदिध्यासोरात्ममायां हृदयं निरभिद्यत ततो मनस्ततश्चंद्रः संकल्पः का
म एव च ३० त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ३१

वे तुष्टिरुदरभराणां पुष्टिस्तत्कारसपरिणामतः स्रोतोत्पन्नतदाश्रये तदुभयनिमित्ते तत्रान्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्रतुष्टि
पइति चतुष्टयं पयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः । २९ निदिध्यासोर्नितरां चिंतयितुमिच्छोः कामोभि
लाषः हृदयं मनः चंद्रः संकल्पाः अधिष्ठानादयः ३० तदेवमधिदैवादिभेदं विभज्यात्मकानदशभूतानां धान्यादीनां स्वरूप
माह त्वगिति द्वाभ्यां त्वक् स्थूलं चर्म तदुपरिस्थितं सूक्ष्मं त्वगादयो यस्मिंताः देहे कवक्तावन निर्दिष्टाः सप्तैव धातवः ते भूम्यप्तेजो
मयाः । तेषां च पांचभौतिकत्वेपि वाय्वाकाशयोराहारादिरूपेण सवर्द्धकत्वाभावादेवमुक्तं ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वि०

गुणात्मकानिगुणेषुशब्दादिष्वात्मायेषामभिमुखस्वभावानीत्यर्थः गुणाःशब्दादयःभूतादिरहंकारःततःप्रकर्षेणभवंतीतितथाअहं
कारकल्पितंशोभनस्वभावः नवकल्पितइत्यर्थः अत्रहेतुः यतोमनएवसर्वविकाराणामात्मास्वरूपंबुद्धिस्तुतथाभूतार्थवि
ज्ञानरूपिणीननुपरमार्थग्राहिणीतिवैराग्यार्थमुक्तं अनेनैवबुद्धिमनसोःस्वरूपंचोक्तं ३२ उपसंहरति एतदितिप्रकृत्यासहा
ष्टभिः ३३ स्थूलमुक्त्वासूक्ष्मंसमष्टिलिंगशरीरमाह अतःपरंअस्यकारणभूतंसूक्ष्मंअतींद्रियं यतः अव्यक्तंनकृतः यतो
निर्विशेषणं नैरुक्तः अनादिमध्यनिधनंउत्पत्तिस्थितिलयशून्यं नित्यंसदैकरूपं अपक्षयादिशून्यमित्यर्थः अतएव

३० गुणात्मकानींद्रियाणिभूतादिप्रभवागुणाः मनःसर्वविकारात्माबुद्धिर्विज्ञानरूपिणी ३२ एतद्भगवतो
रूपंस्थूलंतेव्याहृतंमया मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३३ अतःपरंसूक्ष्मतममव्यक्तंनि
र्विशेषणं अनादिमध्यनिधनंनित्यंवाङ्मनसःपरं ३४ अमुनीयभगवद्रूपेमयाते ह्यनुवर्णिते
उभेअपिनगृह्णंतिमायासृष्टेविपश्चितः ३५ सवाच्यवाचकतयाभगवान्ब्रह्मरूपधृक् नामरूपक्रिया
धत्तेसकर्माकर्मकःपरः ३६ प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् सिद्धचारणगंधर्वान्विद्याध्रा
सुरगुह्यकान् ३७ किंनराप्सरसोनागान्सर्पान्किंपुरुषोरगान् मातृरक्षःपिशाचांश्चप्रेतभूतविनायकान् ३८

वाङ्मनसीतिद्वंद्वैक्यंतस्मात्परं ३४ उपासनार्थंभगवत्यारोपितंरूपद्वयमपवदति अमुनीइतिनगृह्णंतिवस्तुत्वेनांगीकुर्वंति यतोमयासृष्टे
३५ यद्रूपगुणकर्मकइतियदुक्तंभगवताब्रह्माणंप्रतितत्प्रपंचयितुंब्रह्मादिरूपाणितत्कर्माणिचाहसइत्यादिनाद्वंद्वंभावेनेत्यतः प्राक्तनेन राम
ग्रंथेनसभगवान्ब्रह्मरूपधृक्सन्वाच्यवाचकतयानामानिवाच्यतयारूपाणिक्रियाश्चधत्तेसृजतीत्यर्थः मायायासकर्मासव्यापारः ३०
सन्नवस्तुतस्त्वकर्मकः ३६ एतत्प्रपंचयतिप्रजापतीनितिसार्द्धैस्त्रिभिः द्वितीयांतानांधत्तइत्यनेनान्वयः तत्रप्रजापत्यादीतिना
मानितद्वाच्यानिरूपाणितत्कर्माणिचज्ञेयानि पृथक्गणतदवांतरभेदेन ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गिरीनित्यस्मानंतरं नृपेति संबोधनं ३९ द्विविधः स्थावरजंगमरूपेण चतुर्विधः जरायुजाण्डजस्वेदजोद्भिज्जरूपेण जलस्थलनभांसिनु
कांसि येषां तानि धत्त इति पूर्वेणान्वयः यच्च राज्ञा पृष्टं यावत्यः कर्मगतयो यादृशी द्विजसत्तमेति तस्यापि प्रसंगादनेनैवोत्तरमाह कुशला
उत्तमाः अकुशलाः नीचाः मिश्रा इति पदानन्तरं मिश्राः मध्यमाः कर्मणां पुण्यापुण्यमिश्राणां गतयः फलानि ४० सत्त्वादिभेदेन कर्म
गतिवैचित्र्यं प्रपंचयति सत्त्वमिति सार्द्धेन सत्त्वादयस्तिस्रो गतयः सुरादिशब्दो लक्षणया सत्त्वादीनामुपलक्षणार्थः अन्याभ्यां गुणाभ्यां

कूष्माण्डोन्मादवेतालान् यातुधानान् ग्रहानपि खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरीसृपान् ३९ द्विवि
धाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः कुशलाकुशला मिश्राः कर्मणां गतयस्त्विमाः ४० सत्त्वं रजस्तम इ
ति तिस्रः सुरनृनारकाः तत्राप्येकैकशो राजन् भिद्यन्ते गतयस्त्रिधा यदैकैकतरोऽन्याभ्यां स्वभाव उपह
न्यते ४१ स एवेदं जगद्धाता भगवान् धर्मरूपधृक् पुष्णाति स्थापयन् विश्वं तिर्यङ्नरसुरात्मभिः ४२ ततः का
लाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः संनियच्छति कालेन घनानीकमिवानिलः ४३ इत्थंभावेन कथि
तो भगवान् भगवत्तमः नेत्थंभावेन हि परं द्रष्टुमर्हन्ति सूरयः ४४ श्री श्रीरामजयरामजयजयराम

स्वाभावो गुणः उपहन्यते अनुविध्यते ४१ ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पालकत्वमाह स एव भगवान् तिर्यगाद्यवतारै
रिदं विश्वं स्थापयन् धर्मरूपेण पुष्णाति भोगैः संवर्द्धयति ४२ रुद्ररूपेण संहर्तृत्वमाह तत इति आत्मनः सकाशाद्यदिदं सृष्टं तत्
संनियच्छति संहरति ४३ कर्त्तृचोद्यएवादनद्रामस्य शुद्धिमाह इत्थंभावेन सृष्ट्यादिरूपेण नतस्मादन्यस्मात् आत्मनः आकाशः सं
भूतः सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुत्या कथितः सूरयस्तु परं केवलमेवंरूपेणैव द्रष्टु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न किंचनः अस्य विश्वस्य जन्मादीनि कर्माणि परस्य ईश्वरस्य इत्थंभावः कर्तृत्वं नास्ति श्रुत्यापि तात्पर्येण न प्रतिपाद्यते किंतु अनुविधीयते
अनुवर्त्यते किमर्थं कर्तृत्वप्रतिषेधार्थं हि यंतो मायया अनद्दारोपितं प्रकाशितं तथा च श्रुतिः निःकलं निष्क्रियं शांतं निरवद्यं निरं
जनं इंद्रो मायाभिः पुरुरूप ईयत इत्याद्या ॥ ४५ उक्तमर्थमुपसंहरति अयं त्विति ब्रह्मणः संबंधी कल्पो महाकल्पः विकल्पो वांतर
तन्मूहितः उदाहृतः उदाहरणं तु नन संक्षेपत उक्तः कथंभूतः यत्र महाकल्पे प्राकृताः महदादिसर्गाः अवांतरकल्पे च वैकृताः

नास्य कर्मणि जन्मादौ परस्यानुविधीयते कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत् ४५ अयं तु ब्रह्म
णः कल्पः सविकल्प उदाहृतः विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः ४६ परिमाणं च का
लस्य कल्पलक्षणविग्रहं यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु ४७ शौनक उवाच ॥
यदाह नो भवान् सूत क्षत्ता भागवतोत्तमः चचार तीर्थानि भुवस्त्यक्त्वा बंधून् सुदुस्त्यजान् ॥ ४८
कुत्रै कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह ४९ श्रीरा०

स्थावरादिसर्गाः इत्ययं विधिः प्रकारः अन्यैर्महाकल्पादिभिः साधारणः ४६ वक्ष्यमाणं विस्तारं प्रतिजानाति परिमाणं स्थूलं सू
क्ष्मं च कल्पस्य लक्षणाइयानू एवंरूप इति तन्निदिग्रहं अवांतरकल्पमन्वंतरादिरूपं विभागं च यथावद्विस्तरेण पुरस्ताद्वृत्त
तीयस्कंधे व्याख्यास्यामि तत्र पाद्मं कल्पं अथो इति कार्त्स्न्येन व्याख्यायमानं शृणु ४७ यदर्थं मत्स्यादिनिरूपणं तदेव साक्षात्
श्रोतुकामः कथांतरं पृच्छति यदाहेति भुवः संबंधीनि तीर्थानि भुवः क्षेत्राणि वेति ४८ कौषारवेर्मैत्रेयस्य तस्य क्षत्तुश्च अध्यात्मज्ञान
संश्रितः संवादः ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वि॰ पुनरागतवांश्च तत्र च निमित्तं ब्रूहि ५० राज्ञा पृष्टः इति त्रयमर्थः यत्तु यूयं पृच्छथ इदमेव राजापि शुकं पृष्टवान् शुकोपि विदुरमैत्रे
यसंवादं पुरस्कृत्य यत्पूर्वं राज्ञा कृताः प्रश्नाः तदनुसारेण सर्वपुराणार्थमवोचत् तदेवाहं तेऽभिधास्यामि तथैव शृणुतेति इति श्री
भागवतटीकायां श्रीधरस्वामिविरचितायां द्वितीयस्कंधे दशमोऽध्यायः श्रीमद्भागवतं येन स्वब्रह्ममुखतोऽभितं ब्रह्मणा

ब्रूहि नस्तद्विदं सौम्य विदुरस्य विचेष्टितं बंधुत्यागनिमित्तं च तथैवागतवान्पुनः ५०
सूत उवाच राज्ञा परीक्षिता पृष्टो यदवोचन्महामुनिः तद्वोऽभिधास्ये शृणुत राज्ञः प्र
२९ श्नानुसारतः १ इति श्रीभागवते महापुराणेऽष्टादशसाहस्र्यां संहितायां द्वितीयस्कं
धे दशमोऽध्यायः इति समाप्तोयं द्वितीयस्कंधः ॥ श्रीराम श्रीराम श्रीराम ॥

रदयोः प्रोक्तं तं वंदे पुरुषमीश्वरं १ यत्कृत्यं यंति तित्रिंत विश्वं नरा नन्निजगत्त्रयं संतस्तमेव पृच्छंतु यदत्र सवलितमम राम
द्वितीयस्कंधसंबंधिपदभावार्थदीपिका उद्दिष्यतामियं सद्भिर्यथा स्यात्तत्त्वदीपिका ३ इक्षंतामिच्छयासंतः क्षमंता २९
ममसाहसं मया हि स्वाध्यायवोधाय कृतमनंतसर्वतः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वितीयस्कंदसमाप्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ तृतीयस्कंधमारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टी॰

श्रीगणेशायनमः तृतीयेतुत्रयस्त्रिंशदध्याये१ सर्गवर्णनं ईशेक्षयागुणक्षोभात्सर्गोब्रह्मांडसंभवः तत्रतुप्रथमेध्यायेवैधुरेहिवागतायुष१
निर्गतस्योद्धवेनासेसंवादः१ क्षत्तुरुच्यते अथतृतीयस्कंधव्याख्या भगवद्ब्रह्मसंप्रोक्तंसंक्षिप्तंवर्णितंपुरा प्राहभागवतंशेषप्रोक्तंविस्त
रतःपुनः द्विधाहिश्रीभागवतसंप्रदायप्रवृत्तिः१ एकतःसंक्षेपतः श्रीनारायणब्रह्मनारदादिद्वारेण अन्यतस्तुविस्तरतः१ शेषसन
त्कुमारसांख्यायनादिद्वारेण तत्रद्वितीयेश्रीनारायणब्रह्मसंवादेनसंक्षेपतः१ चतुःश्लोक्याश्रीभागवतंनिरूपितं तदेवब्रह्मनारद
संवादेनदशलक्षणतयाकिंचिद्विस्तरेणोक्तं तदेवशेषोक्तमिति विस्तरेणावक्तुंतृतीयारंभः१ तत्रतृतीयप्रथमेक्षत्तुर्मैत्रेय

ॐ नमोभगवतेश्रीवासुदेवाय श्रीशुकउवाच एवमेतत्पुरापृष्टोमैत्रेयोभगवान्किल क्षत्त्रावनंप्रविष्टे
नत्यक्त्वास्वगृहमृद्धिमत् १ यद्वाअयंमंत्रकृद्वोभगवानखिलेश्वरः१ पौरवेंद्रगृहंहित्वाप्रविवेशा
त्मसात्कृतम् २

समागमश्चतुर्भिरध्यायैः१ ततोष्टभिःसविसर्गः१ सर्गप्रपंचः ततोविसर्गप्रस्तावेनसप्तभिर्वाराहावतारः१ ततएकेनविसर्गस
माहारः तत्प्रसंगेनचतुर्भिः१ कपिलावतारः१ ततोनवभिःकपिलाख्यानमिति त्रयस्त्रिंशताध्यायैः१ तृतीयस्कंधप्रवृत्तिः१
तत्रद्वितीयांतेपरिमाणंचकालस्यकल्पलक्षणंविग्रहं यथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृण्विति प्रतिज्ञातमर्थंविस्त
रेणनिरूपयितुंइतिहासंप्रस्तौति एवमितिद्वाभ्यां ऋद्धिमत्सर्वसंपद्भिः१ संपूर्णं १ किंचित्रतिरस्कारोपित्यागानर्हमित्या
ह यद्वेतिप्रसिद्धंगृहंवःपांडवानांमंत्रकृत् दौत्यकर्तासन् अयंश्रीकृष्णः बुद्धिसन्निधानादमितिनिर्देशः१ पौरवेंद्रोदुर्योध य२ राम
धनः१ तस्यगृहेहित्वाअनाहूतएवप्रविवेश तत्रहेतुः१ आत्मसात्कृतं आत्मीयत्वेनगृहीतं२ विदुरस्य

विदुरस्यगृहं गृहंमदीयमेव॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुत्र संगम आस बभूव २ वरीयसि श्रेष्ठे अल्पस्यार्थस्योदयो यस्मात्तथाभूतो न भवति साधुवादेन सतामनुमोदनेनोपबृंहितः संवर्द्धितः यद्वा साधो
मैत्रेय त्वद्वादेनान्तरा श्लाघित इत्यर्थः ४ ५ त्यागानर्हस्यापि गृहस्य त्यागे हेतुत्वेन कौरवापराधानाह यदेत्येकादशभिः एतेषां च तदा सह
न्नाश्रयादित्येकादशे क्रियासंबंधः यविष्ठस्य कनिष्ठस्य पांडोः विबंधून् पितृहीनान् ६ कुरुदेवस्य युधिष्ठिरस्य देव्याः द्रौपद्याः आत्मनः

राजोवाच ॥ कुत्र क्षत्तुर्भगवतां मैत्रेयेणास संगमः ॥ कदा वा सह संवाद एतद्वर्णय नः प्रभो २ ॥ नह्यल्पार्थोदयस्तस्य
विदुरस्यामलात्मनः ॥ तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ४ सूत उवाच ॥ स एवमृषिवर्योयं पृष्टो राज्ञा
परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ५ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून्
पुष्णन्न धर्मेण विनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभवने ददाह ६ यदा सभायां
कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यं ॥ न वारयामास नृपः स्नुषायाः स्वास्रैर्हरन्त्याः कुचकुंकुमानि ७ द्यू
ते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य ॥ न याचतोऽदात्समयेन दायं तमो जुषाणो यदजातश
त्रोः ८ यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः ॥ न तानि पुंसाममृतायनानि राजोरु मेने क्षत
पुण्यलेशः ९

स्नुषायाः स्वास्रैः स्वैः अश्रुभिः स्वकुचकुंकुमानि रिपुस्त्रीणामिवानतु भर्तृवधं न हरन्त्याः ७ सत्यावलंबस्य सत्याश्रयस्य वनात्प्रत्यागतस्य समयेन ४ अल्पत्वमा
विहितेन दायं यथावमानस्य यत्प्रदानं अदात्तु न ददौ तमो मोहं जुषमाणः पुत्रं सेवमानः अविवेकी वा ८ यानि वचनानि पुंसां भीष्मादीनां अमृतायनानि पि २
राजा धृतराष्ट्रः दुर्योधनो वा ऽनु बहु न मेने क्षतानष्टाः पुण्यलेशा यस्य सः न सुखकीर्त्तिधर्मादिहेतुः किंतु राज्यप्राप्तिमात्रहेतुः पुण्यलेशाः
वासितस्यापि नष्टत्वादनादृतवानित्यर्थः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

भा॰टी॰ इदानीं विदुरस्यैव वक्तुं पराभवं दर्शयति षड्भिः यदा पूर्वजेन मंत्राय चोपहूतोन एवं गृहं प्रविष्टो मंत्रं पृष्टः सन् अथ अनंतरं तदाह किं मंत्रिणोप्यापि
यदैव दुरिकं विदुर वाक्यमिति प्रसिद्धं वदति १० तदेवाह अजातशत्रोरिति त्रिभिः नचेत् आगः अपराधं सहमानस्य दायं प्रतियच्छेदेहि यत्रापराधे
अनुजैः सहवर्तमानो वृकोदरः कोपाहिः कोधनः श्वसन् वर्तते यतः तस्मात्त्वमनर्थं बिभेषि ११ मम ताहशाः पुत्राः बहवः संतीति गर्वं मा कुरु थाइत्या
न॰१ ह पार्थान् सुमुकुंद आत्मीयत्वं गृहीतवानुसचेदेवः तत्रापि भगवान् न तु प्राकृतः किंच सह क्षितिदेवैर्द्रुवैः अग्न्यादिभिर्वर्तमानः यतोसौ तत्रैव

यदोपहूतो भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन अथाह तन्मंत्रदृशां वरीयान् यन्मंत्रिणो वैदुरिकं वदंति १०
अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः सहानुजो यत्र वृकोदराहिः श्वसन् रुषा यत्त्वमलं
बिभेषि ११ पार्थांस्तु देवो भगवान्मुकुंदो गृहीतवान् सक्षितिदेवदेवः आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जि
ताशेषनृदेवदेवः १२ स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्य
मिथस्पर्द्धिन्समंवोद्दवानमिल्लन॥ परस्परं विश्वकर्मणेपनीशानानि विस्माहरिमोडिरोप्रपन्नानांतापोपशमे आतपत्रं छत्रं तत्र
हेतुः यस्यपदारविंदस्यमूलंतत्केतनं आश्रयोयेषांतेबहिर्दूरंतदुत्क्षिपंतिपरित्यजंति यथापांथाः खरंहेशापंमार्गश्रम
मिव ३८ श्रमंविनिवेदयंतः आहुः हेधातः पितः यद्यस्माद्भवेसंसारे आत्मनु आत्मनिसंबोधनंवाशर्मसुखंस्वतेयदि
तिपादे यत्पादभजनंविनाशर्मनलभंते ननुज्ञानादज्ञानकृतस्तापोनिवर्त्तते किमंदेघ्रिच्छायाश्रयणेनतत्राहुः१७
सविद्यांतदाश्रयणमेवविद्याप्रापकमित्यर्थः ३९ अज्ञानस्याश्रयणायोगान्ततु ज्ञानसाधनमाहुः मार्गंति आन्वेषयंति

१५

देवाऊचुः नमामतेदेवपदारविंदंप्रपन्नतापोपशमातपत्रं यन्मूलकेतायतयोंजसोरुसंसार
दुःखंबहिरुत्क्षिपंति ३९ धातर्यदस्मिन्भवईशजीवास्तापत्रयेणोपहतानशर्म्म आत्मल्लभं
तेभगवंस्तवांघ्रिच्छायांसविद्यामतआश्रयेम ३९ मार्गंतियत्तेमुखपद्मनीडैः छंदः सुपर्णैः
ऋषयोविविक्ते यस्याघमर्षोदसरिद्वरायाः पदंपदंतीर्थपदः प्रपन्नाः ४० यच्छ्रद्धयाश्रुतवत्या
चभक्त्यासंमृज्यमानेहृदयेवधाय ज्ञानेनवैराग्यबलेनधीराव्रजेमतत्तेंघ्रिसरोजपीठं ४१

यत्तत्तीर्थपदस्तवपदंवयंप्रपन्नाः केमार्गंतिछंदः सुपर्णैः वेदपक्षिभिस्तेतवमुखपद्मंनीडंयेषांयथापक्षिणोनी
डादुद्गतास्ततस्ततः परिभ्रम्यपुनस्तत्रैवविशंतितथावेदाअपितत्तदुद्गतास्तत्रैवपर्यवस्यंति अतोवेदानाम्भि
न्यत्वंपदंमृगयंतइति विविक्तेअसंगेमनसिकिंच अघमर्षमघनाशकं उदं उदकंयासांसरितांतासुवरा
यागंगायापदंउद्भवस्थानं अतोगंगामनुसेवमानाअपितदुद्भवस्थानंत्वत्पदंप्राप्नुवंतीत्यर्थः ४० ननुविषयाकृ
ष्टचित्तानांकुतस्तदन्वेषणं तत्राहुः यच्छ्रद्धयाहृदयेअवधायध्यात्वावैराग्यबलंयस्यतेनज्ञानेनधीराभवंति सरागेचित्ते
ध्यानमेवकुतः श्रद्धयाश्रवणापूर्विकयाभक्त्याचसंमृज्यमानेसंशोध्यमाने ४१ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तानुग्रहं स्मरन्नाह विश्वस्येति ४२ अन्तर्यामितया नित्यं सन्निहिते अनर्थकं व्रजनमित्याशंक्याह यदिति सानुबंधे सोपकरणे असति तुच्छे पुर्यां स्वदेहे एव वसतोऽपि यत्सुदूरं दुःप्रापं ४३ ननु यदि हृदिस्थस्यापि पदाब्जं केषांचित्सुदूरं तर्हि अन्येषामपि तथैव स्यात् अविशेषादित्याशंक्याह तानिति असद्वृत्तिभिर्बहिर्मुखैरक्षिभिरिन्द्रियैः पराहृतं दूरं अपहृतं अन्तरङ्गं मनो येषां ते अथो अत एव नूनं त्वां न पश्यन्ति वै प्रसिद्धं कुतः पुनस्तेषां तत्संगः स्यात् कानु तेन तव पदन्यासागमनेन

विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदाम्बुजं ते व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ४२ यत्सानुबंधेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणां पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जं ४३ तान्वा असद्वृत्तिभिरक्षिभिर्ये पराहृतान्तर्मनसः परेश अथो न पश्यन्त्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ४४ पानेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये वैराग्यसारं प्रतिलभ्य बोधं यथाञ्जसान्वीयुरकुंठधिष्ण्यं ४५ तथापरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठां त्वामेव धीराः पुरुषं विशन्ति तेषां श्रमः स्यान्न तु सेवया ते ॥४६ श्रीराम श्रीराम

तस्य विलासो विभ्रमः तस्य लक्ष्मीः शोभा तस्याः यद्वा लीलाकथादिभिः शोभमाना ये तानुत्कर्षेण क्रान्तानित्यर्थः यद्वा इति लक्ष्म्या
त्य २ निति च पाठे तत्पदन्यासविलासो लक्ष्म्याः ये ये ते तान् अपथः तन्मार्गभूतान्सतः मार्गान्वा श्रवणादीनुं न पश्यन्तीत्यर्थः यद्वा एवं
ते भूता भागवतास्ते तान् भक्तानुं नूनं नैव पश्यन्तीत्यन्वयः सत्संगाभावेन हरिकथाश्रवणाभावात् हृदिस्थितमपि तेषां सुदूरमिति
भावः ४४ एतदेव स्फुटयति पानेनेति द्वाभ्यां वैराग्यं सारो बलं यस्य बोधस्य तं लब्ध्वा अन्वीयुः प्रापुः अकुंठधिष्ण्यं वैकुंठधिष्ण्यं
४५ आत्मनि समाधिर्मनःस्थैर्यं स एव योग उपायस्तस्य बलेन ज्ञानयोगतः श्रमेण मोक्षः त्वत्संगतः त्वत्कथाश्रवणादिना त्व

प्राप्नोति व क्वाहं ममताविशान्तौ तु कथं स्थितिरिति भावः ४६

व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० तृ०

ते देवं स्तुत्वा प्रार्थयन्ते चतुर्भिः तत्तस्मात् हे आद्य तेन त्वदीया वयं यस्माल्लोकानां सिसृक्षया त्वयानुसृष्टाः क्रमेण महदादिना त्रिभिरात्म
भिः सत्त्वादिः स्वभावैरत एव विरुद्धस्वभावत्वात् वियुक्ताः सन्तः यदर्थं सृष्टाः तत्स्वविहारतन्त्रं स्वक्रीडोपकरणं ब्रह्माण्डं ते तुभ्यं प्र
तिहर्तवे प्रतिहर्तुं समर्पयितुं न शक्नुमः अतस्त्वं स्वचक्षुः परिदेहीति त्रयाणां श्लोकानां चतुर्थेनान्वयः ४७ असामर्थ्यमेव
प्रपञ्चयितुं कार्यस्यात्मवैचित्र्यमाह भो अज कालेन ते तुभ्यं यावद्बलिं भागं यावत्साकल्येन ते तुभ्यं हराम समर्पयाम यथा येन
नत्र कारण अन्नमदाम भक्षयाम इत्यनेनान्नमात्रं चास्माकं ऐश्वर्यं एतानुभोगको वेवस्युक्तं उभयेषां तव चास्माकं चायतत्रास्ति स्वा

तत्तेन वयं लोकसिसृक्षयाद्य त्वयानुसृष्टास्त्रिभिरात्मभिः स्म सर्वे वियुक्ताः स्वविहारतन्त्रं न शक्नुमस्तत्प्र
तिहर्तवे ते ४७ यावद्बलिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र यथोभयेषां त इमे हि लोका ब
लिं हरन्तोऽन्नमदन्त्यनूहाः ४८ त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः त्वं देव
शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ४९ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्
करवाम किं ते त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणाम् ५० इति श्रीभागवते महा
पुराणे तृतीयस्कन्धे पञ्चमोऽध्यायः

३६

इमे जीवाः अनूहाः अप्रत्यूहा यद्वा अनूहाः अवितर्काः निःशेषं यात इत्यर्थः तथा च श्रुतिः ताएनमब्रुवन्नायतनं नः प्रजानीहि
यस्मिन् प्रतिष्ठिता अन्नमदामेति ४८ अवश्यं च त्वया अस्माकमेषां च कार्योपाधीनां जीवानां सृष्टिः परिकल्पनीया जनकत्वादित्याहुः
नोऽस्माकं सान्वयानां सकार्याणां यद्वा अन्वेतीत्यन्वयः कारणं तत्सहितानां त्वमेवाद्यः कारणं अत्र हेतवः कूटस्थः अविक्रियः पुरुषः
अधिष्ठाता पुराणः पुरातनः एतदुपपादयति त्वमिति हि देव अजायां त्रिगुणानां सत्त्वादीनां कर्मणां जन्मादीनां च योनौ कारणभूता
यां शक्त्यां मायायां प्रथमं रेत आदधे निहितवानसीत्यर्थः कीदृशं कविं महत्तत्त्वरूपं ४९ ततः हे आत्मन् देव सत्प्रमुखा महदा
दयो वयं यदर्थं बभूविम तत्किं ते कार्यं करवाम सृष्टिमिति चेत्तत्राहुः न हि नोऽस्माकं स्वं चक्षुः स्वीयज्ञानशक्त्या सह परिदेहि प्रयच्छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ तैरीश्वराविष्टैः सृष्टिमाह विराड् तेनाः अधिदैवादिभेदं च तत्रैव भगवदुक्तं १ स्वशक्तीनां महदादीनां असमेत्य अमिलित्वा सतीनां स्थि
प्र२ तानां प्रसुप्तं लोकतंत्रं विश्वसृजनायासां यदा सुप्तजीवोपकरणानां गतिं स्थितिं दृष्ट्वा आविशदित्युत्तरेणान्वयः १ २ कालेन संज्ञा अदृष्टं
धीयते यस्याः कालयति क्षोभयति स्वकार्याणीति वा कालसंज्ञा प्रकृतिः तां शक्तिं प्रकृत्या सह प्रवेशात् त्रयोविंशतितत्त्वानामित्युक्तं त्र
यो मिलित्वा प्राविशत् २ चेष्टारूपेण क्रियाशक्त्या कर्मेति षाक्रियाजीवानामदृष्टं वा ३ प्रबुद्धकर्म क्रियाशक्तिर्यस्य स त्रयोविंश
तिगणः दैवेन ईश्वरेण प्रेरितः मात्राभिरंशैः अधिपुरुषं विराड्देहं ४ जननमेवाह परेणेश्वरेण विश्वसृजां तत्त्वानां गणः मात्र

ऋषिरुवाच इति तासां स्वशक्तीनां सतीनामसमेत्य सः प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः १ कालसं
ज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः त्रयोविंशतितत्त्वानां गणं युगपदाविशत् २ सोऽनुप्रविष्टो भगवांश्चेष्टारूप
प्र३ णेन तं गणं भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ३ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः प्रेरितोऽजन
यत् स्वाभिर्मात्राभिरधिपूरुषं ४ परेण विशता स्वस्मिन्मात्रया विश्वसृग्गणः चुक्षोभान्योन्यमासा
द्य यस्मिन् लोकाश्चराचराः ५ हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् आण्डकोश उवासाप्सु सर्व
सत्त्वोपबृंहितः ६ स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् विबभाजात्मनात्मानमेकधा दशधा त्रिधा

या चुक्षोभ परिणतः नसर्वात्मना यस्मिन् लोकाः स्थिताः ५ स पुरुषो योऽधिपुरुष इत्युक्तः आण्डकोशे ब्रह्माण्डमध्ये सर्वैरनुशायि सटी ४
भिर्जीवैः सहितः ६ गर्भः कार्यरूपो विराड्देवशक्तिर्ज्ञानशक्तिर्ज्ञानशक्तिस्तया एकधा हृदयावच्छिन्नं चैतन्यरूपेण कर्म
शक्तिः क्रियाशक्तिस्तया दशधा प्राणरूपेण प्राणादयः पञ्च नागः कूर्मः कृकलो देवदत्तो धनंजय इत्येवं पञ्चवृत्तिभेदेन
दशविधः प्राणः आत्मशक्तिर्भोक्तृशक्तिस्तया आध्यात्मादिभेदेन त्रिधा आत्मानं विभक्तवान् ७

भा० तृ० एवंविभागसामर्थ्यंयतस्तस्योत्कर्षमाह एषहीति अशेषसत्वानांप्राणिनामात्मा व्यष्टीनांतदंशत्वात् अंशोजीवः अवतारत्वोक्ति
स्तस्मिन्नारायणाविर्भावाभिप्रायेण ८ पूर्वश्लोकार्थंविवृणोति साध्यात्मइति इंद्रियाणितत्सहितः विराडितिसर्वत्र ९ अ
ध्यात्मादिभेदंप्रपंचयितुमाह स्मरन्निति विज्ञापितंयावद्बलिंतज्जहरामइत्यादि स्वेनतेजसाचिच्छक्त्या अतपत् एवंकरि
ष्यामीत्यालोचितवान् यस्यज्ञानमयंतपइतिश्रुतेः विवृत्तये विविधवृत्तिलाभाय १० मे मत्तः शृणु ११ आयतनान्येवाह

एषह्यशेषसत्वानामात्मांशः परमात्मनः आद्योवतारोयत्रासौभूतग्रामोविभाव्यते ८ साध्यात्मः साधिदैवश्चसा
धिभूतइतित्रिधा विराट्प्राणोदशविध एकधाहृदयेनच ९ स्मरन्विश्वसृजामीशोविज्ञापितमधोक्षजः वि
राजमतपत्स्वेनतेजसैषांविवृत्तये १० अथतस्याभितप्तस्यकतिचायतनानिह निरभिद्यंतदेवानांतानिमे
१७ गदतःशृणु ११ तस्याग्निरास्यंनिर्भिन्नंलोकपालोविशत्पदं वाचास्वांशेनवक्तव्यंययासौप्रतिपद्यते १२ नि
र्भिन्नंतालुवरुणोलोकपालोविशद्धरेः जिह्वयांशेनचरसंययासौप्रतिपद्यते १३ निर्भिन्नेअश्विनौना
सेविष्णोराविशतांपदं घ्राणेनांशेनगंधस्यप्रतिपत्तिर्यतोभवेत् १४ निर्भिन्नेअक्षिणीत्वष्टालोकपालो
विशद्विभोः चक्षुषांशेनरूपाणांप्रतिपत्तिर्यतोभवेत् १५ निर्भिन्नान्यस्यचर्माणिलोकपालोनिलोविशत्
प्राणेनांशेनसंस्पर्शंयेनासौप्रतिपद्यते १६ कर्णावस्यविनिर्भिन्नौधिष्ण्यंस्वंविविशुर्दिशः श्रोत्रेणांशेन
शब्दस्यसिद्धिंयेनप्रपद्यते १७

तस्याग्निरित्यादिचतुर्दशभिः आस्यंनिर्भिन्नंपृथक्जातंपदंस्वस्थानंस्वांशेनस्वयंतयावाचासहाविशत् असौजीवः वक्तव्यं राम
प्रतिपद्यतेशब्दमुच्चारयतीत्यर्थः सर्वत्रयन्निर्भिन्नंतदधिष्ठानंआस्यादिप्रथमांतमधिदैवंवागादीद्रियंतत्तद्यांतदध्यात्मं १७
प्रतिपत्तव्यमधिभूतं १२ हरेः विराजः १३ १४ त्वष्टा आदित्यः १५ प्राणेनेति प्राणवद्देहव्यापिनात्वगिंद्रियेणेत्यर्थः १६ शब्दस्यसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओषधीः १

द्वि २

त्वचं चर्म्म ओषधयः त्वगिंद्रियस्य वस्थान भेदेन विषयद्वयं कंडूः स्पर्शश्च नरवाचां नाम भेदो देवता भेदश्चेति द्वितीयस्कंधे एवं व्याख्या
तं १८ कः प्रजापतिः १९ २० खः पतिः स्वर्गस्य पतिः वार्त्तया क्रयविक्रयांशतया वृत्तिजीविका २१ २२ विक्रियां संकल्पादि

त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन रोमभिः कंडूं यैरसौ प्रतिपद्यते १८ मेढ्रं तस्य विनिर्भि
न्नं स्वधिष्ण्यं क उपाविशत् रेतसांशेन येनासौ चानंदं प्रतिपद्यते १९ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश
आविशत् पायुनांशेन येनासौ विसर्गं प्रतिपद्यते २० हस्तावस्य विनिर्भिन्ना विंद्रः स्वर्पतिराविशत्
वार्त्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते २१ पादावस्य विनिर्भिन्नौ लोकेशो विष्णुराविशत् गत्या स्वांशेन
पुरुषो यया प्राप्यं प्रपद्यते २२ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमाविशत् मनसांशेन येनासौ वि
क्रियां प्रतिपद्यते २३ आत्मानं चास्य निर्भिन्नमभिमानो विशत्पदं कर्मणांशेन येनासौ कर्त्तव्यं प्रति
महान् २३ पद्यते २४ सत्वं चास्य विनिर्भिन्नं धिष्ण्यमुपाविशत् चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते २५
शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत गुणानां वृत्तयो येषु प्रतीयंते सुरादयः २६ आत्यंति
केन सत्वेन दिवं देवाः प्रपेदिरे धरां रजःस्वभावेन पणयो ये च तानन्नु २७

पं २३ आत्मानं अहंकारे अभिमन्यते अनेनेत्यभिमानो रुद्रः कर्मणा अहंवृत्या कर्त्तव्यमिति क्रिया २४ सत्वमिति बुद्धिचित्तयोर
भेदेन निर्देशः महानिति ब्रह्मा चित्तेन चेतनया २५ त्रिलोकोत्पत्तिमाह शीर्ष्ण इति वृत्तयः परिणामाः २६ एतदेव प्रपंचयति द्वा
भ्यां आत्यंतिकेनत्सूर्जितेन पणाः व्यवहारः पणंते यागादिना व्यवहरंतीति पणयो मनुष्याः तान् अनु ये च तदुपकरणभूता गावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रपार्षदां १

भा॰स्कं॰ तृतीयेनमः तदीयेनतामसेनउभयोर्द्यावापृथिव्योरंतरेमध्येव्योमअंतरिक्षंतदेवभगवंतानाभिस्थानमाश्रिताः रुद्रस्यपार्षदानांभूता
दीनांगणाः २८ अथवर्णानप्रवृत्तिं ब्रह्मवेदस्तस्यउत्तममुखत्वात्मुखाङ्गत्वात्वर्णानांमुख्यः मुखमिवप्रथमः गुरुश्चाभूत् सोपिमु
खेनावर्त्ततेत्यनुषंगः अध्ययनादिनाब्राह्मणस्यैवर्थः एवमुत्तरत्रवर्णत्रयेपिज्ञातव्यं २९ क्षत्रंपालनतत्पाहतिः ततक्षत्रंत्र
अनुष्ठुनः १ नुव्रतः क्षत्रियोपिवाहुभ्यावर्त्ततइत्यर्थः तदनुव्रतत्वमेवाह यइतिपौरुषः पुरुषस्यविष्णोरंशः कंटकाश्चोरादयस्तेभ्योपत्

तान्तीयेनस्वभावेनभगवान्नाभिमाश्रिताः उभयोरंतरं व्योमयेरुद्रपार्षदांगणाः २८ मुखतोवर्त्ततब्रह्म
पुरुषस्यकुरूद्वह यस्तून्मुखत्वाद्वर्णानांमुख्योभूद्ब्राह्मणोगुरुः २९ बाहुभ्योवर्त्ततक्षत्रंक्षत्रियस्त
दनुव्रतः योजातस्त्रायतेवर्णान्पौरुषः कंटकक्षतात् ३० विशोवर्त्तंततस्योर्वोर्लोकवृत्तिकरीर्वि
१८ भोः वैश्यस्तदुद्भवोवार्त्तांनृणांयःसमवर्त्तयत् ३१ पद्भ्यांभगवतोजज्ञेशुश्रूषाधर्मसिद्धये तस्यांजा
तःपुराशूद्रोयद्वृत्त्यातुष्यतेहरिः ३२ एतेवर्णाःस्वधर्मेणयजंतिस्वगुरुंहरिं श्रद्धयात्मविशुद्ध्यर्थंयज्जा
ताःसहवृत्तिभिः ३३

क्षतंउपद्रवस्तस्मात्त्रायतेरक्षतइति ३० विशःकृष्यादिव्यवसायाः लोकस्यवृत्तिकरीः जीविकाहेतवः तस्यवि
आदुर्भूताः २ भोरूर्वोः प्रवृत्ताः तदुद्भवः ऊरुजः वार्त्ताजीविकायः स्ववृत्त्यासंपादितवान् ३१ तस्यानिमित्तभूतायांयस्यवृत्त्या
हरिःस्वयमेवतुष्यते ३२ यद्यस्माज्जाताःगुरुत्वाज्जनकत्वात्वृत्तिप्रदत्वाच्चहरेरराधनंतेषांपरोधर्मइत्यर्थः ३३ मो
क्षेतःकोमेदेवात्मरूपिणाः कालकर्मस्वभावशक्तिमतः भगवतोयोगमायाबलेनाजं भितमतद्विराट्रूपंउपाके
नैसाकल्पमनिरूपयितुंकः श्रद्दधातुइच्छांप्रशस्तपानिरूपणानुद्दूरतइत्यर्थः ३४

न इछा १

श्लोकि॰ पुराणश्रवणभागवतोदेवकौमारमिरूपिणः ॥ कैः श्रद्दधातिपाकं योगमायाबलोदयं ३४

राम १८

नर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगविदुरस्तथापिहरेः कीर्त्तिंकीर्त्तयामियथ
प्यतिरिक्तार्थोभिधानंतयास्तीमलिनं स्वार
वत्समित्याह एकांततोत्माभंगु निश्चितमि
तीयज्ञानेनिर्द्धेधः कर्त्तव्यः ब्रह्मणोपिदुर्ज्ञेय

अथापिकीर्त्तियास्यंगयथामत्ति
भंवचसोनुपुंसांसुश्लोकमौलेगु
गं २६ आत्मनावसित्तावत्समहि
तोभागवतीमायामायिनामपीमो हि
वेत्तितेवाच अमनसासह अहंचान्य
त्तीय

नाब्रह्मणोपिकिमवसितइतिकाकूत्तयाएतावानिति
त्मैस्वमायागत्तिंएचावदितिनवेद अनंतत्वात् २८ अ
चोपिमनसासहतमप्राप्यवन्यवर्त्तंतदुर्ज्ञेयत्वात् नेकेप
देवाग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० तृ

सप्तमे संशयच्छेदि शत्रृिनंशमुनेर्वचः। पुनः स्वत्राप्रकृतानाना
त्यादिनामायागुणैलीलया भगवान् सृष्ट्यादिकरोतीत्येवं
तु निर्विकारस्य क्रिया निर्गुणस्य च गुणाः। कथं लीलये
वल्लीलापि न युज्यते वैषम्यादित्याहाउ यद्यपि प्रवर्ते
वस्त्वंतरेण वाल्लांतर प्रवर्त्तनेन वालस्य क्रीडेच्छाभ

श्रीशुकउवाच एवं ब्रुवाणं मैत्रेयं द्वैपायन
ब्रह्मन्कथं भगवतश्चिन्मात्रस्याविकारि
१५ मुद्यमोर्भस्य कामश्चिक्रीडिषान्यतः
गुणमय्यात्ममायया तयासंस्

गा द्वितीयस्य कथमन्यतश्चिक्रीडिषेत्य
धे जीवस्य भोगाद्यर्थमीश्वरः सृष्ट्यादिपं
मोहक्लेशादि मोहादित्यादि कायामायात
नुते नर्थे तल्लक्षणं चाभिपद्यत इत्यादि न
प्रत्यपि धास्यति प्रातिकोस्य न तिरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतच्च जीवस्याविद्याश्रयत्वं घटेत न तु तस्य भगवतो न्यायाह देशत इति योसौ देशादिभिरविलुप्तावबोधश्चात्मा जीवः ब्रह्मस्वरूपत्वात्
स कथमजयाऽविद्यया युज्येत न तावद्देशतो दीपप्रभायाइव लोपोनास्ति सर्वगतत्वात् न कालतो विद्युतइव नित्यत्वात् नाव
स्थातः स्मृतिवत् अविक्रियत्वात् न स्वतः स्वप्नवत् सत्यत्वात् नान्यतः घटादिवत् अद्वितीयत्वात् एवमेतैर्यस्य बोधो न लुप्येत
स कथमजया युज्येत अज्ञा चात्राविद्यैव न माया तस्याश्च बोधनविरोधाभावात् ५ किंच ब्रह्मस्वरूपत्वादेव जीवस्य संसारोपि न वि धा २
घटत इत्याक्षिपति सर्वक्षेत्रेष्ववस्थितो भोक्तापि च स्तुतो भगवान् एष चिद्रूपत्वेन तद्व्यतिरेकाभावात् एवं सति अमुष्य जीवस्य

देशतः कालतो योसावस्थातः स्वतोन्यतः अविलुप्तावबोधात्मा स युज्येताजया कथं ५ भगवानेक एवैष स
र्वक्षेत्रेष्ववस्थितः अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ६ एतस्मिन्मे मनो विद्वन् खिद्यतेज्ञानसंकटे
तन्नः पराणुद विभो कश्मलं मानसं महत् ७ श्रीशुक उवाच ॥ स इत्थं चोदितः क्षत्त्रा तत्त्वजिज्ञासुना मुनिः
प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः ८ मैत्रेय उवाच सेयं भगवतो माया यन्नयेन विरुध्यते ईश्वरस्य न्न २
विमुक्तस्य कार्पण्यमुत बंधनं ९ यदर्थेन विनामुष्य पुंस आत्मविपर्ययः प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादि
कः १०

दुर्भगत्वं आनंदादिभ्रंशः कर्मभिर्हेतुभूतैः क्लेशो वा कुतः कर्मसंबंधाभावात् अन्यथा ईश्वरस्यापि तत्प्रसंगः स्यादिति भा
वः ६ अज्ञानमेव संकटं दुर्गं तस्मिन् तत् मानसं कश्मलं मोहं पराणुद अपाकुरु ७ चोदितः आक्षिप्तः स्मयन्निव प्रौढिं
आविः कुर्वन्निव स्वतस्तु गतस्मयः ८ भगवतोचिन्त्यशक्तेरीश्वरस्य सेयं माया यन्नयेन तर्केण विरुध्यत इतीयत् तर्कवि
रोधमेवानुवदति विमुक्तस्यैव पुंसो विद्यया बंधनं कार्पण्यं च भवति अत्रोदाहरणमाह यद्यथा अर्थेन शिरश्छेदादिना
विनापि उपद्रष्टुः स्वप्नसाक्षिणः ममेदं शिरः छिन्नमित्यात्मविपर्ययः केवलं मायैव प्रतीयते तद्वत् १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी०
तर्हीश्वरस्यापि किं न प्रतीयत तत्राह। यथा जले प्रतिबिम्बितस्यैव चन्द्रमसो जलोपाधिकृतः कंपादिधर्मो दृश्यते न त्वाकाशे स्थि
तस्य तथा अनात्मनो देहादेः धर्मः असन्नपि तदभिमानिनो द्रष्टुरात्मनो जीवस्यैव न त्वीश्वरस्येत्यर्थः। ११ तन्निवृत्त्युपायमाह
स वै अनात्मनो गुणः निवृत्तिधर्मेण वासुदेवानुकंपया च तस्मिन् भक्तियोगः तेन तिरोधत्ते अदृश्यो भवति शनैरित्यनेन
न साधनानुसारेणेत्युक्तं २२ न हि सर्वानर्थनिवृत्तिः कदेत्यपेक्षायामाह यदेंद्रियाणामुपरामो निःशल्यः तदा द्रष्टुरात्मनि
तर्यामिनि अथ अनंतरमेव कृत्स्नः क्लेशो विलयमात्रे दृष्टांतः संसुप्तस्येवेति ननु पुनरुत्थाने १३ भक्तियोगेन क्लेशनिवृत्तिं

यथा जले चंद्रमसः कंपादिस्तत्कृतो गुणः। दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः ११ स वै निवृत्तिधर्मेण वासु
देवानुकंपया। भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यदेंद्रियोपरामोऽथ द्रष्टात्मनि परे हरौ। विलीयंते तदा क्ले
२० शाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः। कुतः पुनस्तच्चरणारविं
दपरागसेवारतिरात्मलब्धा १४ विदुर उवाच। संछिन्नः संशयो मह्यं तव सूक्तासिना विभो। उभयत्रापि भ
गवन्मनो मे संप्रधावति १५

दर्शयति अशेषेति गुणानामनुवादश्च श्रवणं च आत्मनि मनसि लब्धा श्रवणकीर्तनापेक्षया सप्रेमध्यानेन किं पुनर्न्या
नो०२ यमिति। १४ उत्तरमभिनंदन्नात्मनः कृतार्थतामाविः करोति संछिन्न इति षड्भिः। चिद्रूपत्वाविशेषेऽपि कथमीश्वरस्य
जगत्कर्तृत्वादिकं कथं वा जीवस्य संसार इति यः संशयो मम आसीत् स तव सूक्तैः सोपपत्तिकैर्वाक्यैरेवासिः खड्गस्तेन सं राम
छिन्नः। अतः इदानीं मे मनः। उभयत्रापि ईश्वरस्वातंत्र्ये जीवपारतंत्र्ये च संप्रधावति सम्यक् प्रविशति एवं वा अ २०
विलुप्तावबोधरूपस्यात्मनः कथमविद्यया बंधः कुतो वा निवृत्तिरिति संशयः उभयत्रेति बंधमोक्षे चेत्यर्थः। १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा जगत्सत्यत्वबुद्धिः पुण्यकरणे पापाकरणे वा सामर्थ्यः सुखमिच्छति दुःखान्न विरज्यते इति अंतरितो न बुधो न मूढः संसारहान्निस्य
नीको ऽर्थः सुखं मे स्यात् दुःखं मा भूत् इति चिंतयन् मोहनमसौ धीरतः ... संप्रहारमन्नमुंजः सारमेयवत्प्रधावति क्लिश्यतीत्यर्थः १

यस्मात् त्वया साधु व्याहृतं किंतु हरेः शक्तिर्या आत्ममाया जीवविषया तदयनं तदाश्रयं मेन तु दुर्भगत्वादिकं भातीति यद्यस्मा
त् स्वशिरश्छेदादिवदपार्थमवस्तुभूतं मूलशून्यं च यस्मादस्य विश्वस्य मूलं स्वाज्ञानं विना बहिर्नास्ति १६ अल्पज्ञत्वात् पूर्वं म
म ३ मसंशयो जात इत्याह यश्चेति मूढतमो देहाद्यासक्तः बुद्धेः प्रकृतेः परमीश्वरं प्राप्तः सो सुखयथा भवति तथाप्यन्तरितो जीवतद्
त्यर्थः संशयक्लेशाभावात् यस्तु दुःखानुसंधानेन प्रपंचं जिहासति स्वानंदसंवेदनाभावात् हातुं न शक्नोति मनु क्लिश्यती
त्यर्थः १७ इदानीं नु स्तार्थोस्मि यतस्त्वया संशयश्छिन्नः केवलं बाधितानुवृत्तिरेवावशिष्टा सापि युष्मत्प्रसादान्नि

साधितद्याहं ते विद्वन्नात्ममायायनं हरेः आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः १६ यश्च मूढत
मो लोके यश्च बुद्धेः परं गतः तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः १७ अर्थाभावं विनिश्चित्य प्र
तीतस्यापि नात्मनः तां चापि युष्मच्चरणसेवयाहं पराणुदे १८ यत्सेवया भगवतः कूटस्थस्य मधु
द्विषः रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः १९ दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु यत्रो
पगीयते नित्यं देवदेवो जनार्दनः २०

वर्तिष्यत इत्याह नात्मनः अनात्मनः प्रपंचस्य प्रतीतस्यापि अर्थाभावं अर्थोऽत्र नास्ति किंतु प्रतीतिमात्रं युष्मच्च
रणसेवया निश्चित्य तां प्रतीतिमप्यहं पराणुदे अपनेष्यामीत्यर्थः १८ मधुद्विषः पादयोः रतिरासः प्रेमोत्सवः तीव्र
नारायणी २ दुर्वारः स्वाभाविकः व्यसनं संसारमर्दयतीति तथा १९ अहो दुर्लभं प्राप्तं मयेत्याह दुरापा दुर्लभा वैकुंठस्य विष्णो
स्तल्लोकस्य वा वर्त्मसु मार्गभूतेषु महत्सु यत्र येषु महत्सेवया हरिकथाश्रवणं ततो हरौ प्रेम तेन च देहाद्यनुसंधानं नि
मपि

अर्थांतरं स्रष्टुं तदुक्तमनुवदति त्रिभिः सृष्ट्वेति विकारैरिंद्रियादिभिः सहितानि उद्धृत्य तदंशेर्विराजं सृष्ट्वा २१ प्रविष्टस्य स्वरूपमाह
यमिति विराजं विशिनष्टि यत्रेति तेइमे विश्वे सर्वे लोकाः सविकाशं अंशकोचेन २२ प्राणादयः पंचनागादयः पंचेति एवं दश
विधः इंद्रियाणि च अर्था अइंद्रियाणि चेति पुनरुक्तिः तेइंद्रियवतां लक्षणार्था तत्सहितः सर्वोपष्टंभकत्वात् प्राणस्य तत्साहि
त्यं एवं त्रिवृत् त्रिविधः प्राणस्त्वयेरितत्वक्तः तेस्य विभूतीर्ब्रह्माद्याः विसर्गशब्दवाच्याः २३ यत्र यासु इदं विश्वं ततं व्याप्तं २४ अ

सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्रमात् तेभ्यो विराजमुद्धृत्य तमनुप्राविशद्विभुः २१ यमाहुराद्यं पुरुषं सहस्रां
घ्र्यूरुबाहुकं यत्र विश्व इमे लोकाः सविकाशं त आसते २२ यस्मिन्दशविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरि
तो यतो वर्णास्तद्विभूतीर्वदस्व नः २३ यत्र पुत्रैश्च पौत्रैश्च नप्तृभिः सह गोत्रजैः प्रजा विचित्राकृतय आसन्या
भिरिदं ततं २४ प्रजापतीनां स पतिश्चिक्लृपे कान्प्रजापतीन् सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् २५ नृ
२१ एतेषामपि वंशांश्च वंशानुचरितानि च उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते २६ तेषां संस्थां प्रमाणं च
२च भूर्लोकस्य च वर्णय तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणां २७ वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदां दं
गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयं सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमं २८

एवमेतत्पुराणे शेषैमैत्रेयो भगवान् किलेति परीक्षित्प्रश्नोत्तरतया विदुरमैत्रेयसंवादः प्रस्तावितः अतस्तान्वविदुरेणोक्तान् प्र राम
श्नानाह यावत्समाप्ति प्रजापतीनां पतिः ब्रह्मेत्यादीनां वर्णयेति वक्ष्यमाणेनान्वयः चिक्लृपे अकल्पयत् सर्गान् नवविधा २१
न् अनुसर्गान् तत्कृतान् २५ हे मित्रायाः आत्मज २६ संस्थां संनिवेशं २७ सर्गाणां संव्यूहं सविभागं गार्भस्वेदद्विजोद्भिदां
गार्भा जरायुजाः स्वेदाः स्वेदाभ्यां च जाताः स्वेदजा द्विजा अंडजा उद्भिजश्च तेषां सर्गादीन् आश्रयं च सृजतः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्पं लिंगं शीलमाचारः स्वभावः शमादिः नतः विकर्षणं विभागान् २९ वितानानि विस्तारान् नैष्कर्म्यस्य च ज्ञानस्य
तदुपायस्य च सांख्यस्य पथः मार्गान् तंत्रं चेत्यर्थः ३० पाषंडानां पथः प्रवृत्तिः तदवैषम्यं ३१ निमित्तानुपायान् प
रस्पराविरोधेन ३२ ग्रहादीनां कालचक्रे संस्थितिं ३३ येन मार्गेण संतुष्येत् यथाभिनियात् दृशानां ३४ अनापृष्टमि

वर्णाश्रमविभागं स्वरूपशीलस्वभावतः ऋषीणां जन्मकर्मादि वेदस्य च विकर्षणं २९ यज्ञस्य च वि
तानानि योगस्य च पथः प्रभो नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं ३० पाषंडपथवैषम्यं प्रतिलो
मनिवेशनं जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ३१ धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः
वार्त्तायादंडनीतेश्च श्रुतस्य च विधिं पृथक् ३२ श्राद्धस्य च विधिं ब्रह्मन् पितॄणां सर्गमेव च ग्रहनक्ष
त्रताराणां कालावयवसंस्थितिं ३३ दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं प्रवासस्थस्य यो
धर्मो यश्च पुंस उतापदि ३४ येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः संप्रसीदति वा येषामेत
दाख्याहि चानघ ३५ अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम अनापृष्टमपि ब्रूयुर्गुरवो दीन
वत्सलाः ३६ तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः तत्रेमं क उपासीरन् क उ स्विदनुशेरते ३७
पुरुषस्य च संस्थानं स्वरूपं वा परस्य च ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनं ३८ निमित्तानि च तस्ये
ह प्रोक्तान्यनघसूरिभिः स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव वा ३९

ति अपृष्टमपि मे योग्यं वक्तव्यमिति भावः ३६ प्रतिसंक्रमः प्रलयः तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामर
ग्राहिणः के वा अनुशेरते शयानमनुस्वपिति ३७ पुरुषस्य संस्थानं जीवस्य तत्त्वं परमेश्वरस्य रूपं यन्नोशनयोरेक्य
कं तथा च ज्ञानं च नैगमं मोपनिषदं यानि सूरिभिः प्रोक्तानि तस्य ज्ञानस्य साधनानि तानि च ब्रूहि ३८ गुरु विनैव त

भवास्याहस्कलि ३१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंभूतस्य मे अजया मायया नष्टमपहृतं च चक्षुर्ज्ञानं यस्य स नष्टचक्षुस्तस्य ४० ज्ञानदानं सर्वधर्मेभ्यः श्रेष्ठमित्याह सर्व इति।

मे श्वान् मे मित्रत्वात् स्निग्धत्वादिति अन्वयः भेवान् मे परस्य पोनःकृत्वा ४० तत्त्वोपदेशेन जीवाभयप्रदानस्य ४१ पुराणे कल्पेन प्रकाशत इति पुराणकल्पः प्रभुर्भुसितोऽर्थः आद्यः पुराणकल्पोऽयं मुनिप्रधानः ४२ तृतीयस्कन्धे सप्तमः अथ मेर्स मभ्रू ज्ञानाभ्यक्ताजलशायिनः तमजाननु जले विश्वम् तपसा नाधयद्धि सु १ आनारमभिनंदति सर्वास्त्वियु योग्यः चतस्राहा

एतान्मे पृच्छतः प्रश्नान् हरेः कर्मविवित्सया। ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ४० सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ। जीवाभयप्रदानस्य न कुर्वीरन् कलामपि ४१ श्रीशुक उवाच स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः। प्रवृद्धहर्षो भगवत्कथायां संचोदितस्तं प्रहसन्निवाह ४२ इति श्रीभागवते महापुराणे तृतीयस्कन्धे सप्तमोऽध्यायः

22 मैत्रेय उवाच सत्सेवनीयो बत पूरुवंश्यो यल्लोकपालो भगवत्प्रधानः। बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णम् १ सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य। प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः २ आसीनमुर्व्यां भगवन्तमाद्यं संकर्षणं देवमकुण्ठसत्त्वम्। विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन् ३

यस्मात् इह अस्मिन् पूरुवंशे बभूविथ जातोऽसि कथंभूतः भगवानेव प्रधानभूतो यस्य सः। अत्र हेतुः प्रतिक्षणं नूतनयसि नवीनां करोषि १ अल्पसुखाय महत् दुःखं प्राप्तानां तस्य दुःखस्य विरमाय प्रवर्तये प्रारभे २ कोऽसौ भगवान् केभ्य ऋषिभ्यः आह कथं च त्वया प्राप्तमित्यपेक्षायामाह आसीनमिति त्रिभिः उर्व्यां पातालतले अकुण्ठसत्त्वं अप्रतिहतज्ञानं अनन्तः संकर्षणाख्यः परस्य श्रीवासुदेवस्य ३

जीवानां विषयमार्गे प्रेरणं हिंसैवेति भावः जीवस्य अभयप्रदानस्य फलं तस्य कलामपि एकदेशं सर्वे वेदादयः न जयापि न कुर्वन्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमेव विशिनष्टि स्वमेर्मैधिष्ण्यं स्वीयमाश्रयं वासुदेवसंज्ञं परमानंदरूपं ध्यानपथे अनुभूय बहुमानयंतं सर्वोत्कर्षेण पूजयंतं प्रत्यग्भू
तमंतर्मुखमक्षं नेत्राबुजमुकुलं किंचिदुन्मीलयंतं कृपावलोकेन सनत्कुमारादीनामभ्युदयार्थं ४ मुनीनां विशेषणं सोद्वे
न स्वर्धुन्याउदकेनार्द्रैरिति श्रीभागवतश्रवणार्थं सत्यलोकात्पातालं प्रत्यवतरंतो निरंतरं गंगामध्येनैवावतीर्णा
इतिभावः चरणोपधीयेन यस्मिन् पद्मनदुपस्पृश्यमानानमतः कथंभूतं तदाह यत्पद्मप्रेमसहितं यथा भवत्येवं नाना

स्वमेव धिष्ण्यं बहुमानयंतं वासुदेवाभिधमामनंति प्रत्यक्धृताक्षांबुजकोशमीषदुन्मीलयंतं विबु
धोदयाय ४ स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुपस्पृशंतश्चरणोपधानं पद्मं यदर्चंत्यहिराजकन्याः स
प्रेमनानाबलिभिर्वरार्थाः ५ मुहुर्गृणंतो वचसानुरागस्खलत्पदेनास्य कृतानि तज्ज्ञाः किरी
टसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ६ प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभि
तेर २ रताय तेन सनत्कुमाराय स चाह पृष्टः सांख्यायनायांग धृतव्रताय ७ सांख्यायनः पारमहंस्यमु
ख्यो विवक्षमाणो भगवद्विभूतीः जगाद सोऽस्मद्गुरवेऽन्विताय पराशरायाथ बृहस्पतेश्च ॥ ८ ॥

उपहारैः १ पद्मोपरि पूजयंति वरार्थाः पतिकामाः ५ कृतानि कर्माणि गृणंतः केन अनुरागेणास्खलंति पदानि यस्मिन् तेन वच
चसा तानि जानंतीति तज्ज्ञाः सहस्रमेव साहस्रं किरीटानां साहस्रं यन्मणिप्रवेकाः रत्नोत्तमाः तैः प्रद्योतितं उद्दाम
फणानां सहस्रं यस्य तं अप्यृच्छन्निति पूर्वेणान्वयः ६ तेन संकर्षणेन सनत्कुमाराय प्रोक्तं ७ पारमहंस्ये धर्मे मुख्यः ॥
विवक्षमाण इत्यात्मनेपदं प्रवादे शम्पाकव्रत भयपरिवान् ॥ अन्विताय अनुगताय ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰त॰ पुलस्त्येनोक्त इत्यत्रैवमाख्यायिका। पितरं राक्षसभक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येन
स्वसन्ततिरक्षणात् तुष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यसीति ७ तदेवं संकर्षणात्संप्रदायप्रवृत्तिं प्रदर्श्य विभूतिं कथनाय
पद्मोद्भवं वक्तुमाह उदाप्लुत एकार्णवोदके निमग्नं यत् यदा आमीलितदृक् अतिरोहितचिच्छक्तिरेव श्रीनारायणोऽन
न्तेऽभिमीलितवानित्यर्थः मायाविनोदं परित्यज्य स्वात्मरतो स्वरूपानन्द एव सक्तो न्सवः अतएव निरीहः निष्क्रियः सन् १०

प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं सोऽहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनु
व्रताय ७ उदाप्लुतं विश्वमिदं यदासीद्यन्निद्रयामीलितदृङ्न्यमीलयत् अहीन्द्रतल्पेऽधिशयान
२३ एकः कृतक्षणः स्वात्मरतो निरीहः १० सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरया
णः उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः ११ चतुर्युगानां च सहस्रमप्सु
स्वपन् स्वयोदीरितया स्वशक्त्या कालाख्ययासादितकर्मतन्त्रो लोकानपीतान् ददृशे स्वदेहे १२
तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत
नाभिदेशात् १३

कालः सत्त्वं प्रेरणं पुनः स सप्तवसरे प्रबोधनार्थं स्वपदे अधिष्ठाने वहिस्तत्त्व भविष्यति ततः यथानलइति ११ स्वयाचिच्छक्त्या राम
सह वर्तमान एव योगनिद्रया स्वपन् स्वमेव प्रबोधनार्थं नियुक्तया स्वकालशक्त्या आसादितं प्रापितं कर्मतन्त्रं क्रियाका
लापो यस्य सः अपीतान् लीनान् ददर्श १२ लोकसृष्ट्यर्थं अर्थे सूक्ष्मे अभिनिविष्टा दृष्टिर्यस्य कालानुसारिणा र रि॰ २३
जोगुणेन विद्धः संक्षोभितः सन् तनीयान् अतिसूक्ष्मोऽर्थः सूष्यन् प्रसोष्यन् उद्भविष्यन् नाभिदेशात् [illegible] इत्यर्थः १३

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सननीयानर्थः पद्मकोशः सहसुदतिष्ठत् कर्मणां जीवादृष्टानां प्रबोधयतीयः कालस्तेन आत्मा श्रीविष्णुर्योनिर्यस्य १४ तल्लो
कात्मकं पद्मं स एव विष्णुः गुणान् जीवभोग्यानर्थान् अवभासयतीति तथा तत्र यस्मात् ज्ञानं स एव विष्णुः उ इति संबोधन प्राविवि
शत् प्रकर्षेणाल्पप्रशक्तिरंतर्यामितया विवेश तस्मिन् विष्णुना अधिष्ठिते पद्मे विधाता ब्रह्मा अभूत् कथंभूतः स्वयमे
व वेदमयः नत्वध्ययनेन प्राप्तवेदः कोसौ अदृष्टपितृत्वेन यं स्वयंभुवं वदंति सः प्राक्कल्पात् नारायणेन सह निद्रयैकी

स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन स्वरोचिषा तत्सलिलं विशालं विद्योत
यन्नर्क इवात्मयोनिः १४ तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं तस्मि
स्मव ३ न्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदंति सोभूत् १५ तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकम
पश्यमानः परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेनुदिशं मुखानि १६ तस्माद्युगांतश्वसना
वघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं उपाश्रितः कंजमु लोकतत्वं नात्मानमद्धाविददादिदेवः त
१७

भूत आसीत् तस्मिंश्च प्रबुद्धे तत एव पाद्मकल्पोपमहारेणाभिव्यक्तिप्रादुर्भाव इत्यर्थः १५ स च तस्मिन्कल्पे चतुर्मुखो भूदि
त्याह तस्यामिति परिक्रमन् तत्र स्थ एव ग्रीवां चालयन् लोकनिरीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य १६ तस्य च श्री
नारायणोपासनेनैवाविर्भूतज्ञानक्रियाशक्तेर्लोककर्तृत्वेन स्वतः इति बकुं प्रथमं तस्य विमोहमाह तस्मात्सलिला
त् विरूढं उद्भूतं कंजं मया आश्रितोपि साकल्येन तत्कंजं लोकतत्वं चात्मानं च साक्षात् न ज्ञानवान् उ इति विस्मये कथंभूता
त् युगांतश्वसनः प्रलयवायुः तेनावघूर्णितत्र तत्र प्रकंपितं यज्जलं तस्मात् संवर्त्तमिचक्रं यस्मिन् १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ३ अविदुषस्तस्य वितर्कमाह योऽसावहमब्जपृष्ठे एकः अनन्यत् एकमेवैतदब्जं कुतो वा जातं यच्चैतदधिष्ठितं तेन अधस्तात् सता वर्त्त
मानेन नु निश्चितं भाव्यं स इत्थमुद्वीक्ष्य तु तेरणान्वयः तथा च श्रुतिः सोऽपश्यत्पुष्करपर्णे तिष्ठन् सोऽमन्यत अस्ति वै तन् यस्मिन्नि
दमधितिष्ठतीति १८ तस्य च बहिर्मुखप्रवृत्त्या महतापि कालेन तदप्राप्तिमाह स इति द्वाभ्यां यस्याब्जस्य यन्नालं तस्य नाडीभिः कं ३२
अंतः छिद्रैः तस्य खरमालस्य पद्मस्य यन्नालं तस्य नाभिमधिष्ठानं विचिन्वन्नर्वाग्गतोऽपि तत्तदा नाविंदत् १९ आत्मसर्गं स्वका

२४ क एष योऽसावहमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु। अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता
नु भाव्यं १८ स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश। नार्वाग्गतस्तत्खरनालनालनाभिं
विचिन्वंस्तदविंदताजः १९ तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभूत्सुमहांस्त्रिणेमिः। यो देहभा
जां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः २० ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासा
द्य पुनः स देवः। शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः २१

रणं त्रिनेमिः कालः अजस्य विष्णोर्हेतिः सुदर्शनरूपं शस्त्रं देहभाजां नराणां भयमुत्पादयन् त्रिनेमिः संवत्सरशतमतिक्रा राम
तः इत्युक्तं भवति २० अंतर्मुखतया तु भगवंतं दृष्टवानित्याह द्वाभ्यां ततः अन्वेषणान्निवृत्तः न प्रतिलब्धः कामो २४
मनोरथो येन स्वधिष्ण्यं पद्मं जितेन श्वासेन निवृत्तं संयतं चित्तं यस्य अत एव आरूढः आश्रितः समाधियोगो येन
तथाभूतः सन् न्यषीदत् उपविवेश २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त।

पुरुषायुषासंवत्सरशतेन कालेन अभिप्रवृत्तः सुनिषण्णो योगेन तेन विरूढउत्पन्नो बोधो यस्य स तस्मिन् पूर्वं विचिन्वन्नपि नापश्यत्
ततस्स्वयमेवांतर्हृदये च भागमपश्यत् २३ यदपश्यत् तद्दर्शयति मृणालेति नवभिः नवस्तुम्बपश्यदित्यस्य चानुषङ्गः
मृणालवद्गौरश्चासावायतश्च यः शेषस्तस्य भोगो देहः स एव पर्यंकः तस्मिन् कुत्र स्थितं पर्यंकं फणातपत्रैरायुतः।
सर्वेतायुतानां मूर्द्धानस्तेषां रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिर्हतं ध्वांतं युगांततोयं २३ कथंभूतं पुरुषं हरि

कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः स्वयं तदंतर्हृदयेऽवभातमपश्यतापश्यत य
न्न पूर्वं २३ मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानं फणातपत्रायुतमूर्द्धरत्नद्युभिर्ह
तध्वांतयुगांततोये २३ प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्द्ध्नः रत्नोदधा
रौषधिसौमनस्यवनस्रजो वेणुभुजांघ्रिपांघ्रेः २४

तोपलाद्रेर्मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपंतं स्वलावण्यातिशयेन तिरस्कुर्वंतं संध्याभ्रनीविपरिधानं
रु२ यस्य तस्य शोभां पीतांबरेण क्षिपंतं उरुरुक्ममूर्द्ध्नः अनेकस्वर्णशिखरस्य तस्य स्वकीरीटैः रत्नानि च उदधा
राश्च ओषधयश्च सौमनस्यानि च पुष्पसमूहाः सुमनस एव वा तेषां वनस्रजः वनमालास्तस्य वेणवश्च भुजाय
स्य अंघ्रिपा एव वांघ्रयो यस्य तस्य स्वांसौ समुच्चतस्य अयमर्थः यदि तस्मिन् माला इव स्थिता रत्नादयो भवेयुस्तर्हि वेणव
श्च भुजा इव वृक्षाश्च पादा इव तर्हि तस्य शोभा स्यात् ये परत्न मुक्तातुलसीपुष्पदामभिः भुजैरंघ्रिभिश्च क्षिपंतमिति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७१

भा॰टी॰ किंच आयामेनोदैर्घ्येण विस्तरश्च स्वमानं देहेन मीयते अनेनेति मानमुपमा शोभनश्चासाव मानो निरूपमो देहस्तेन यद्वा सुष्ठु
श्रमानः अपरिच्छिन्नः तेन यद्वा ताभ्यां स्वानुरूपप्रमाणेन. अत एव लोकत्रयसंग्रहो येन यस्मिन् तथापि विचित्राणि नानाविधा
नि दिव्यान्यपूर्वाणि वाभरणान्यंशुकानि चैतेषां कृता आसमन्तात् श्रीः शोभा येनेनानेन देहेन विशिष्ट एव स्वत एवातिरम्ये
पि अपाश्रितवेषः स्वीकृतालंकारो देहाय स्पतमपर्यैन्नु यद्वा केनेपेक्षाक्षिपतमित्यपेक्षायामयं सनुतेनदेहेनेति संबंधः

आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण विचित्रदिव्याभरणांशुकानां कृता श्रिया या श्रितवेष
२५ देह २५ सुसा स्वकामाय विविक्तमार्ग रम्यर्चितां कामदुघांघ्रिपद्मं प्रदर्शयन्तं कृपया नखेंदुमयूखभिन्नांगु ॥२
लिचारुपत्रं २६ सुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिंबभासा
प्रत्यहयन्तं सुनसेन सुभ्रवा २७ कटिबिंजल्कापिशंगवाससा स्वलंकृतं मेखलया नितंबे हारेण चानंत
धनेन वत्स श्रीवत्सवक्षस्थलवल्लभेन २८

२५ स्वाभिलषितफलाय विविक्तो मार्गः शुद्धः वेदोक्तो मार्गः रम्यर्चितां पुंसां कामदुघमंघ्रिपद्मं प्रदर्शयन्तं किं चिदुन्नमय्य समर्प
यन्तं नखा एव इंदवस्तेषां मयूखाः रश्मयस्तैर्भिन्नाः संभिन्नाः अंगुलय एव चारूणि पत्राणि यस्य तत् २६ लोकार्तिहरं स्मितं यस्मि राम
ध्याः३ न्नेतेन परिस्फुरद्भ्यां कुंडलाभ्यां मंडितेन. अधरबिंबदीप्त्या शोणवद्वाचरितेन शोभनना सायुक्तेन सुभ्रा शोभनया भ्रुवाच २५
प्रत्यर्हयंतं पूजकान् प्रतिपूजयन्तम् सुन्नतात् २७ कदंबकिंजल्कवत्पिशंगं यद्वासस्तेन मेखलया च नितंबे स्वलंकृतं संतं ॥
हेवत्स श्रीवत्सयुक्तो यद्वक्षस्थलं तस्य वल्लभेन वक्षस्पनप्येण हारेण स्वलंकृतमित्यर्थः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महाचंदनवृक्षस्वरूपेण निरूपयितुं तं विशिनष्टि पराद्ध्यानि श्रेष्ठानि केयूराणि अंगदानि मणिप्रवेकाः मण्युत्तमास्तैः पर्यस्ता
व्याप्ता दोर्दंडा एव सहस्रं अनंताः शाखा यस्य चंदनवृक्षोपि केयूरादितुल्यैः फलपुष्पादिभिर्व्याप्तैः शाखो भवति अव्यक्तं
प्रधानं मूलमधो भागो यस्य यद्वा अव्यक्तं ब्रह्म मूलं यस्य ब्रह्माभिव्यक्तिरूपत्वात् वृक्षस्यापि मूलं न व्यक्तं भुवना
नां कं मंगलं प्रियं इंद्र अहींद्रस्यानंतस्य भोगैः फणैः देहावयवैर्वा अधिवीताः संवेष्टिताः स्पृष्टा वा शाखा येन स्कंधा यस्य चंदनस्य तं लू४
न्नानवल्लीशोविरोहितत्रिशुनैः सोपि सर्पैर्वेष्टितो भवति २९ प्रेक्षां क्षिपत मित्यत्र पर्वतरूपेण निरूपितमपि विशेषणां
उ १ तरैः पुनर्निरूपयति भगवानेव महीध्रस्तौ चराचरणाम्भा कस्थानं सोपि तथा अहीद्रस्य वपुः सोपि अहींद्राणां वपुः

पराद्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं अव्यक्तमूलं भुवनाधिपेंद्र महीद्र भोगैरधिवीत
महींद्र २ वल्ल्यां २९ चराचरैकोभगवन्महीध्रः शुभंसलिलोपगूढं किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौ
य १ स्तुभरत्नगर्भं ३० निवीतमाम्नायमधुव्रतश्रियास्वकीर्त्तिमय्यावनमालयाहरि सूर्येदुवाय्वग्निमगमं
त्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदं ३१

सलिलेनोपगूढमावृत्तं पर्वतोपि मेनाकादिस्तथा किरीटसाहस्रमेव हिरण्यशृंगाणि यस्य सोपि मेर्वादिस्तथा यथा
पर्वतस्य गर्भे क्वचिद्रत्नमाविर्भवति तथा आविर्भवत् स्पष्टं दृश्यमानं कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तं ३० किंच वन
मालया निवीतं कंठलंबितया व्याप्तं आम्नायाः वेदाएव मधुव्रतास्तैः श्रीर्यस्याः सा शोभाहरिमिति पर्वतादिरूपं पश्यतु हे
हरिः साविति ह्लादितानित्यर्थः सूर्यादिभिरगमं अगम्यं स्वव्यापारे राकल्पयितुमशक्यमित्यर्थः किंचित्रिप्रपि लोके
परितो धावद्भिः धामरूपं निर्यातैः रक्षणार्थं परिक्रामद्भिः प्रधानिकैः प्रधनं संग्रामस्तत्प्रयोजनैः सुदर्शनादिभिर्हेतुभूतैर्दुरासदं दुःप्राप ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ तृ॰ यदैव हरिमपश्यत् तर्ह्येव तदेव लोकविसर्गदृष्टिः सनूतन्नाभिसरसि सरोजं श्वसनं प्रलयवायुं वियत् आकाशं च ददर्श ३२
कर्मबीजं लोकसृष्टेः कारणं उपरक्तः रजोगुणोपयुक्तः अतः प्रजाः स्रष्टुमिच्छन् इयदेव नाभिसरोजादिपंचकमेव विस
र्गेऽपि अभिमुखः दत्तचित्तः अव्यक्तवर्त्मनि भगवति निवेशितचित्तः ३३ तृतीये अष्टमः नवमे तु प्रसादार्थं दृष्ट्वा नारायणं त्व
जः अस्तौदिकार्णवे सीदन् लोकसर्गचिकीर्षया भगवत् ज्ञानिनात्मानः कृतार्थतामाविः कुर्वन् ज्ञातोऽसीति चन्नाह मज्ञा

तर्ह्येव तन्नाभिसरः सरोजमात्मानमंभः श्वसनं वियच्च ददर्श देवो जगतो विधाता नातः परं लोक
विसर्गदृष्टिः ३२ स कर्मबीजं रजसोपरक्तः प्रजाः सिसृक्षन्नियदेव दृष्ट्वा अस्तौद्विसर्गा
२६ भिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ३३ इति श्रीभागवते महापुराणे तृतीयस्कंधे ८
ष्टमोऽध्यायः श्रीब्रह्मोवाच ज्ञातोऽसि मेऽद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्य
वद्यं नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि १

तोऽसीति सुचिराद्बहुकालोपासनेन अद्य मे मया ज्ञातोऽसि ननु अहो देहभाजामेतदेवं महद्दोषः किं तु यद्भगवंस्तव गतिं राम
य् तत्त्वं न ज्ञायत इति यत्तत्त्वमेव ज्ञातुं योग्यः सत्यत्वात् त्वत्तोऽन्यत् नास्त्यसत्वादित्याह त्वत्तोऽन्यन्नास्ति यद्यप्यस्तीति प्रति २६
भाति तदपि शुद्धं सत्त्वं न भवति कथमसतः प्रतीतिस्तत्राह यतः मायागुणक्षोभात् त्वमेव उरुः बहुरूपो विभासि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कं ३

ननु त्वमपि सम्यङ् न जानासि यत्त्वया दृष्टं रूपमेतदपि गुणात्मकमेव निर्गुणं ब्रह्म त्वन्यदित्यत आह रूपमिति द्वाभ्यां अवबोधरसोदयेन
चिच्छक्तेराविर्भावेन शश्वत्सदा निवृत्तं तमो यस्मात् तस्य तव यदेतद्रूपं त्वयैव स्वीकृतं सतामुपासकानामनुग्रहाय गृ० हीतमाविः
ष्कृतं अवतारशतस्य शुद्धसत्त्वात्मकस्य यदेकं बीजं मूलं तस्य दर्शनार्थं गुणावतारबीजत्वं दर्शयति यन्नाभीति । २ हे परम अविद्ध
वर्चः अनावृतप्रकाशं अतः अविकल्पं निर्भेदं अत एवानंदमात्रं एवंभूतं यद्भवतः स्वरूपं तत्तु अतो रूपात्परं भिन्नं न पश्यामि
किंतु इदमेव तत् अतः कारणात्तु तेन त्वदः इदं रूपमुपाश्रितोऽस्मि योग्यत्वादपीत्याह एकं उपास्येषु मुख्यं यतः विश्व

रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय आदौ गृहीतमवतारशतैकबीजं य
न्नाभिपद्मभवनादहमाविरासं २ नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धव
र्चः पश्यामि विश्वसृजमेकमविश्वमात्मन् भूतेंद्रियात्मकमदस्त उपाश्रितोऽस्मि ३ तद्वा इदं भुव
नमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानां तस्मै नमो भगवतेऽनुविधेम तुभ्यं योऽनादृ
तो नरकभाग्भिरसत्प्रसंगैः ४ त २

सृजं अत एव अविश्वं विश्वस्मादन्यत् किंच भूतेन्द्रियात्मके भूतानामिन्द्रियाणां चात्मानं कारणमित्यर्थः । ३ नन्वेवमपि सोपा
हेः धिकमेतद्देवार्चीनमित्याशंक्याह तदिदं देव हे भुवनमंगल यतः ते त्वया नोऽस्माकमुपासकानां मंगलाय ध्याने दर्शितं तस्य अत्रेच र्मी
भिनिवेशिना चित्तानामस्माकं त्वया सोपाधिकदर्शनं युक्तमिति भावः । अतस्तुभ्यं नोऽस्माननुविधेम अनुवृत्त्या करवाम तर्हि किमिति
केचिन्मानाद्रियंत तत्राह योऽनादृत इति असत्प्रसंगैः निरीश्वरकुतर्कैः निष्ठैः ४

त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०तृ० आदरेणानुत्तोभंजतः कृतार्थोऽइत्याह ये त्विति श्रुतिर्वेदः स एव वातः तेन नीतं प्रापितं नापैषि नापयासि यत्त्वत्कथाश्र
वणमत्यादरेण कुर्वंति तेषां हृदि नित्यं प्रकाशसइत्यर्थः ५ ततः किमतआह तावदिति द्रविणादौ विद्यमाने भयं गेते शोकः
पुनश्च स्पृहा ततः परिभवः तथापि विपुलो लोभः तस्यापुनः कथं चिद्व्याप्रमे ममत्यसदाग्रहः आर्तिमूलं भयशोकादेः
कारणं नयं न प्रवृणीत नाश्रयेत् तत्पादाश्रयणमात्रेण भयादि निवृत्तिः किंपुनस्तत्प्रकाशसतीति भावः ६ ये तु कामा
अपिसंतस्ते नाद्रियंते तेन रके भाजइत्युक्तं यत्तु त्वत्कथाश्रवणादिमुखाः संतः काम्यकर्मपरास्तेनिर्मदाइत्याह दे

ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं भक्त्या गृहीतचरणः परया च तेषां नापै गे २
षि नाथ हृदयांबुरुहात्स्वपुंसां ५ तावद्भयं द्रविणदेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः
तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्न तेंघ्रिमभयं प्रवृणीत लोकः ६ दैवेन ते हतधियो भवतः प्रसंगा
त्सर्वाशुभोपशमनाद्विमुखेंद्रियाये कुर्वंति कामसुखलेशलवाय दीना लोभाभिभूतमनसोकुशला
२७ नि शश्वत् ७ क्षुत्तृट्त्रिधातुभिरिमामुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च कामाग्निनाच्युत
रुषा च सुदुर्भरेण संपश्यतो मन उरुक्रम सीदते मे ८ यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमायाबल
भगवतो जन ईश पश्येत् तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुःखनिवहं वहती क्रियार्था ९

तेन ते हतधियः नष्टमतयः प्रसंगात् श्रवणकीर्तनादिरूपात् सर्वदुःखनिवर्तकात् विमुखानींद्रियाणि येषां अ
एव२ कुशलानि अक्षेमकराणि ७ अकुशलत्वमेव दर्शयति क्षुत्तृट्च त्रिधातवश्च वातपित्तश्लेष्माणस्तैः इमाः प्र राम
जाः सुदुर्भरेण सुदुःसहेन कामाग्निना अच्युत यानुषा अविच्छिन्नक्रोधेन च पीड्यमानाः संपश्यतो मम मनः २७
सीदति ८ नन्वेवं मत्ता यां संसारपरमार्थत्वा किमर्थं विषादः क्रियतेतत्राह यावदिति आत्मनइदं पृथक् त्वं दे
हादिभावं भगवतस्तवइंद्रियार्थरूपायामायाया यावत्त्व माधिक्यं पश्येत् न प्रतिसंक्रमेत नोपरमेत् दुःखसमं ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवत्येवमविवेकिनो विवेकिनस्तु मुक्ता एवेति किं तेषां भक्त्या अत्यंतमत आह अह्नि आपृतानि व्यापृतानि च तान्यार्त्तानि क्लिष्टा-
नि करणानींद्रियाणि येषां रात्रौ विषयसुखलेशोपि नास्ति यतो निःशयानाः स्वप्नदर्शनेन च क्षणे क्षणे भग्ननिद्राः दै-
वेनाहताः सर्वतः प्रतिहताः अर्थरचना अर्थोद्यमा येषां १० तदेवं भक्तानां संसारानिवृत्तिर्मुक्ता भक्तानां तन्निवृत्तिमा-
ह त्वमिति भक्तियोगेन शोधितं हृत्सरोजं आस्से तिष्ठसि श्रुतेन श्रवणेनेक्षितः पंथा यस्य किंच श्रवणं विक्षिता पि त्व-
द्भक्ताः मनसा यद्यत्तव वपुः रूपं स्वेच्छया ध्यायंति तत्तत्प्रणयसि प्रकटयसि सतां भक्तानामनुग्रहाय ११ भक्तानां च

श्री॰

अह्न्यापृतार्त्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः दैवाहतार्थरचना ऋ-
षयोपि देव युष्मत्प्रसंगविमुखा इह संसरंति १० त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षि-
तपथो ननु नाथ पुंसां यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ११ नाति-
प्रसीदति तथोपचितोपचारैराराधितः सुरगणैर्हृदि बद्धकामैः यत्सर्वभूतदययासदलभ्ययैको
नानाजनेष्ववहितः सुहृदंतरात्मा १२ पुंसामतो विविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रत-
चर्यया च आराधनं भगवतस्तव सत्क्रियार्थो धर्मोर्पितः कर्हिचिद्ध्रियते न यत्र १३

निष्कामानां त्वमतिसुलभो नेतरेषामित्याह नेति उपचितैः कल्पितैः उपचारैः पुष्पोपहारादिभिः यत्तु यथा असतामभ-
य२ भक्तानां अलभ्यया अदयया प्रियत्वे हेतुः एक इत्यादि १२ यतः सकामानां भवान्नातिप्रसीदति अतः कामप्राप्तिः क्रियाणां मु-
ते ख्यं फलं न भवति किंतु त्वत्प्रीणनमेव कामसंयोगस्तु अवांतरफलं न प्ररोचनार्थमित्याह पुंसामिति भगवतस्तवाराध-
नमेव स आसौ क्रियार्थः श्रे श्रेष्ठं क्रियाफलं श्रेष्ठत्वे हेतुः यत्र त्वय्यर्पितो धर्मो न कदाचित् ध्रियते न नश्यति कामार्थस्तु

भिः कामदेवान्भगवतोत्यर्थैः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ त॰ अत स्तोमेवववर्मनताइत्याह शश्वत् सर्वदा स्वरूपेचैतन्येनैव निरस्तभेद भ्रमायपुनः अवेबोधाएव धिषणाविद्याशक्तिर्यस्य यद्वा धिष
णामाश्रयः अतएव परस्मै अत्रहेतुः विश्वोद्भवादि निमित्तयामायातस्यां लीला विलासाः तयारासः क्रीडायस्य तत् तुभ्यं इदं नमः
नमनं च कुमः कृतवंतो वयं १४ नामग्रहणमात्रता कैवल्यप्रदत्वेनैश्वर्यस्य जन्नमस्करोति यस्येति अवतारादीनां विडंबनम
नुकरणमर्त्त्येषु तत्रावतार विडंबना निदेवकीनंदन इत्यादीनि गुण विडंबनानि सर्वज्ञो भक्तवत्सल इत्यादीनि कर्मवि
डंबनानि गोवर्द्धनोद्धरणो कंसारिरित्यादीनि असु विगमेपि विवशा अपिगृणंति उच्चारयंति केवलं शमलं पापं अपाह
ते निरस्तावरणं अतं ब्रह्म प्राप्नुवंति १५ तत्र गुणावतारकर्माणि दर्शयन् प्रणमति योवैएकः त्रिपात्रया ब्रह्मादयः पादः

शश्वत्स्वरूपमहसैव निपीतभेदमोहायबोधधिषणायनमः परस्मै विश्वोद्भवस्थितिलयेषुनिमित्तलीला
रासायतेनमइदंचकृमेश्वराय १४ यस्यावतारगुणकर्मविडंबनानिनामानियेसुविगमेविवशागृणंति
तेनैकजन्मशमलंसहसैवहित्वासंयांत्यपावृतमृतंतमजंप्रपद्ये १५ योवाअहंचगिरिशश्चविभुःस्व
यंचस्थित्युद्भवप्रलयहेतवआत्ममूलं भित्वात्रिपाद्ववृधएकउरुप्ररोहस्तस्मैनमोभगवतेभुवनद्रु
माय १६ लोकोविकर्मनिरतःकुशलेप्रमत्तः कर्मण्ययंत्वदुदितेभवदर्चनेस्वे यस्तावदस्यबलवानि
हजीविताशांसद्यश्छिनत्त्यनिमिषायनमोस्तुतस्मै

स्कंधाय स्यपृथक्चत्वारः प्ररोहाः शाखोपशाखा मरीच्यादिमन्वादिरूपा यस्य तथा भूतः सनुवद्धितस्मै भुवनाकाराय द्रुमाय नमः
किं कृत्वावद्धे आत्मस्वयमेव मूलं मधिष्ठानं यस्य तत्प्रधानं भित्वा गुणत्रयरूपेण विभज्य त्रिपात्वमेवाह अहं ब्रह्मा गिरिशश्च
स्वयं विभुर्विष्णुश्चेति स्थित्युद्भवप्रलयहेतवो वयंवयं एवं त्रिपाद्भूत्वा यो वावृधइत्यर्थः १६ एवं गुणावतारकर्म विडंबनमुक्त्वा
स्वकालरूपं तत्कर्मचे दर्शयन् प्रणमति लोक इति द्वाभ्यां विकर्मनिरतः विरुद्धकर्मनिष्ठः कुशले हितेस्वे आत्मीयेत्व
दुदिते त्वयेव साक्षादुक्ते भवदर्चनरूपे कर्मणि जके हिर्गतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय

नेति क्रियाभग्गप्रगल्भितिवि नतिमिन्नस्यमहः श्रद्धाविल्कवितावद

नैतावदस्यकौविकस्य अनिमिषायनिमिषाय कालाय १७

स्क॰ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आस्तां तावल्लोकस्य कथा यस्मात्कालाख्याच्चतः द्विपरार्द्धावस्थायि धिष्ण्यं स्थानं तदाक्रान्तोपि विभेमि भीतः सन् त्वामेवा
२१ ववरुन्धमानः प्राप्तुमिच्छंस्तपस्तप्तवान् कथंभूतं बहुसवः बहवः सवाः यागाः संवत्सरा वा यस्य बहून् यागान् पिष्टो वा बहून् संवत्सरान्वा तपस्तप्तवानित्यर्थः अधिमखाय मखाधिकर्माधिष्ठात्रे १८ इदानीं तत्तत्कालभाविलीलावतारकर्मा २२
णि दर्शयन्नाह तिर्यगादिषु जीवयोनिषु स्वेच्छया स्वीकृतमूर्त्तिः सन् स्वकृतधर्ममर्यादापालनेच्छया रमते सतुत्युः स्वा
नंदानुभावेनैव निरस्तविषयसुखाभिलाषः अत एव पुरुषोत्तमः तत्तदुपाधिधर्मासंस्पर्शात् तदुक्तं गीतासु यस्मात्

यस्माद्बिभेम्यहमपि द्विपरार्द्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत् तेपे तपो बहुसवोव
रुरुत्समानस्तस्मै नमो भगवतेधिमखाय तुभ्यं १८ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वा
त्मेच्छयात्मकृतसेतुपरीप्सया यः रेमे निरस्तरतिरप्यवरुद्धदेहः तस्मै नमो भगवते पुरुषोत्त
माय १९ यो विद्ययानुपहतोपि दशार्द्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः अन्तर्जले
हि कशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् २०

क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति १९ इदानीं दृश्यमानामिव मूर्त्तिं प्रण
मति यो विद्ययेति द्वाभ्यां दशार्द्धा पंच वृत्तयो यस्याः तया अविद्यया निद्राहेतुभूतया अनभिभूतोपि निद्रामुवाह २१
तस्मै नमइत्युत्तरेणान्वयः जठरीकृता उदरे प्रविलापिता लोकयात्रा लोकस्थितिर्येन अहिदेव कशिपुः श
य्या तस्याः स्पर्शानुकूलाय स्तां निद्रां भीमानामूर्मीणां माला विद्यते यस्मिन् अन्तर्जले निद्राणस्याविवेकिनो जनस्य
निद्रासुखमीदृगिति विवृण्वन् प्रदर्शयन् उपहसन्नित्यर्थः अत एवानर्जलत्वादि विशेषणानि यद्वा पूर्वकल्पे आन्तस्य
जनस्य विश्राम सुखं विवृण्वन् स्फारयन् तदानुपरोपकाराय स्वयं दुःसहमपि दुःखं सोढमिति द्योतनार्थं विशेषणानि २०

एताः पंच तमो अविद्याया: तमो मोहो महामोह उतामिस्र अंधतामिस्राः तत्र स्वरूपाप्रकाशस्तमः देहे बुद्धिर्मोहः महामोहो भोगेच्छा तामिस्र स्तत्प्रतिघाते क्रोधः अंधतामिस्रस्तन्नाशे अहमेव मृतोस्मीति मतिः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ तृ॰ किंच यस्य नाभिपद्मे भवभवनं तस्मात् लोकत्रयमुपकरणं यस्य यद्वा लोकत्रयस्य सृष्ट्यादिद्वारेणोपकरोतीति तिनथानाद्दृशो हे यदनु
ग्रहेणांस्तउदरे स्थितः भवः संसारप्रपंचो यस्य योगनिद्रावसाने किंचिन् विकसन् उन्मीलन् वदीक्षणं यस्य २१ एवंस्तुत्वा प्रार्थयते
सोयमितित्रिभिः यत् येन सत्वेन ज्ञानेन भगेन ऐश्वर्येण च मह्यं तेन सुखयति विश्वं दृष्टा प्रज्ञा अनुस्मृत्य वाना तु योजयतु यथाहंस्रु
ष्टुं क्षमो भविष्यामि यतः प्रणतप्रियोसौ अहं च प्रणतः न चान्यः प्रार्थनीयोस्ति यतः स एव समस्तजगतां सुहृत् यतोसौ अतो
नुस्मृत आत्मा अंतर्यामी २२ आत्मशक्त्या रमया सह यद्यस्मात् बहुकरिष्यति स्व विक्रमं विश्वमेव विक्रमः प्रभुत्वा यस्मिन् तदिदं

यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण तस्मै नमस्त उदरस्थभवाय योगनिद्रावसानविकस
न्नलिनेक्षणाय २१ सोयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान् भगेन तेनैव मे दृशमनुस्पृशताद्
यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ २२ एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः त
स्मिन्स्वविक्रममिदं सृजतोपि चेतो युंजीत कर्मशमलं च यथा विजह्याम् २३ नाभिह्रदादिह सतोम्भसि यस्य पुंसो
२४९ विज्ञानशक्तिरहमासमनन्तशक्तेः रूपं विचित्रमिदमस्य विवृण्वतो मे मा रीरिषीष्ट निगमस्य गिरां विसर्गः २४
सोसावदभ्रकरुणो भगवान् विवृद्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् उत्थाय विश्वविजयाय च नो विषादं मा
ध्व्या गिरापनयतात्पुरुषः पुराणः २५

विश्वं तदा सृजतोपि मे चेतः स एव युंजीत प्रवर्तयतु कर्मात्मशक्तितत्कृतं शमलं तेषम्यादि पापं यथा विजह्यां त्यक्ष्यामि २३ च॰ राम
स॰ अंभसि स्थितायस्य नाभिह्रदादिहासं विज्ञानशक्तिर्यस्य महत्तत्वात्मकस्य चित्तस्य तदभिमानी अस्य रूपमिदं विश्वं विस्तार २५९
यतो मे निगमस्य वयवभूतानां गिरां विसर्गउच्चारणं मा रीरिषीष्ट हन्तां तेब्रह्मवर्चसमितिन्यायेन मा लुप्यता मित्य
र्थः २४ विवृद्धप्रेम्णा स्मितेन विजृंभयन् विश्वस्य विजयाय उत्थाय च कारात् अस्मदनुग्रहाय चोत्थाय २५ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्वसंभवायस्मात्तंतपः शारीरं विद्याउपासना समाधिरेकाग्र्यंतैर्निशाम्यदृष्ट्वायथाशक्तिस्तुत्वाश्रांतवद्विरराम २६
आत्मनोलोकसंस्थानविज्ञानपरिखिद्यतोब्रह्मणोभिप्रेतमात्मक्ष्पत्तमोहितिद्वयोरन्वयः तेनप्रलयोदकेनविष
ण्णचेतसं २७ कश्मलंमोहं इवेतिसमस्तमोहाशमनंदर्शयति २८ हेवेदगर्भतंद्रींविषादकृतंमालस्यमागाः तेन
म॰ वमेहर्शनुस्पृशताहित्यादिप्रार्थयते तदग्रपूर्वमेवसंपादितं २९ तर्हिकथमहंलोकानामीक्ष्यतत्राह भूयइति॥

श्रीमैत्रेयउवाच स्वसंभवंनिशाम्यैवंतपोविद्यासमाधिभिः यावन्मनोवचःस्तुत्वाविररामसखिन्नव
त् २६ अथाभिप्रेतमन्वीक्ष्यब्रह्मणोमधुसूदनः विषण्णचेतसंतेनकल्पव्यतिकरांभसा २७ लो
कसंस्थानविज्ञानआत्मनःपरिखिद्यतः तमाहगाधयावाचाकश्मलंशमयन्निव २८ श्रीभग
म॰ वानुवाच मावेदगर्भगास्तंद्रींसर्गउद्यममावह तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभवान् २९
भूयस्त्वंतपआतिष्ठविद्यांचैवमदाश्रयां ताभ्यामंतर्हृदिब्रह्मन्लोकान्द्रक्ष्यस्यपावृतान् ३०॥
ततआत्मनिलोकेचभक्तियुक्तःसमाहितः द्रष्टासिमांततंब्रह्मन्मयिलोकांस्त्वमात्मनः ३१ यदा
तुसर्वभूतेषुदारुष्वग्निमिवस्थितं प्रतिचक्षीतमांलोकोजह्यात्तर्ह्येवकश्मलं ३२ यदारहितमा
त्मानंभूतेंद्रियगुणाशयैः स्वरूपेणमयोपेतंपश्यन्स्वाराज्यमृच्छति ३३ श्रीराम श्रीराम॥

भक्तियुक्तः समाहितश्चसन् आत्मनिस्वस्मिन्लोकेचमांततंव्याप्य स्थितंद्रष्टासिद्रक्ष्यसिआत्मनोजीवाश्च
३१ सर्वत्रमद्दर्शनेमोहोनिवर्त्ततइत्याह यदातुइतिप्रतिचक्षीतपश्यत् ३२ तदाचमिथ्याज्ञाननिवृत्तोमुच्यत
आसानं॰ इत्याहयदेति भूतादिभिर्विरहितंजीवत्वंशुद्धंत्वंपदार्थंस्वरूपेणस्वस्यात्मभूतेनमयातत्पदार्थेनउपेतमे
कीभूतंपश्यन्भवतितदास्वाराज्यंमोक्षंप्राप्नोति ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०त०

यतः वर्षीयानुग्रहृत्तरः अत्यधिकोस्तीत्यर्थः ३४ अनुग्रहमेवाह ऋषिमिति चतुर्भिः यद्यत्तत्त्वयामेनामयि निर्वेदं ३५
यद्यस्मात् भूतेन्द्रियगुणैः सत्वादिभिरात्मनाहंकारेणवायुक्तो मन्यसे ३६ तुभ्यं तव नालेन मार्गेण पुष्करस्य मूलम
धिष्ठानं सलिले विचिन्वतामपि विचिकित्सायां भवितव्यमस्याश्रयेण न च दृश्यते अतो नास्ति नास्तीति संदेहे सति आ
त्मास्वरूपं मया अवहिरंतर्हृदि दर्शि ३७ अंगेह ब्रह्मन्नु चक्रे कृतवानसि मत्कथेवाभ्युदयतः तेनाकिं

नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः । नात्मावसीदत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ३४ ऋषिमाद्यं
न बध्नाति पापीयांस्त्वां रजोगुणः । यन्मनो मयि निर्बद्धं प्रजाः संसृजतोपि ते ३५ ज्ञातोहं भवता त्वद्य
दुर्विज्ञेयोपि देहिनां । यन्मां त्वं मन्यसे युक्तं भूतेन्द्रियगुणात्मभिः ३६ तुभ्यं मद्विचिकित्सायामात्मा मे दर्शि मा२
तो बहिः । नालेन सलिले मूलं पुष्करस्य विचिन्वतः ३७ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयांकि
३० तं । यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ३८ प्रीतोहमस्तु भद्रं ते लोकानां विजयेच्छया । यदस्तौषी
र्गुणमयं निर्गुणं मानुवर्णयन् ३९ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजेत् । तस्याशु संप्रसीदेयं
सर्वकामवरेश्वरः ४० पूर्तेन तपसा यज्ञैर्दानैर्योगसमाधिना । राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्व
विन्मतं ४१ अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि । अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः ४२

स एष बंधाभावः मयि मनो निर्बंधः सत्तज्ञानं मद्रूपस्य हृदि दर्शनं मत्स्तुतिः तपो निष्ठा चिंतियन्तः एष सर्वोपि मदनुग्र
हः ३८ गुणमयत्वेन प्रतीयमानमपि निर्गुणमेवानुवर्णयन् ३९ तव प्रीतः इति किं वक्तव्यमित्याह य इति ४० राम ३०
न च मत्प्रीतेरप्यधिकं किंचिदस्तीत्याह पूर्तेनादिभिः राद्धं सिद्धं यन्निःश्रेयसं फलं तन्मत्प्रीतिरेवेति तत्त्वविदां म
तं ४१ अत्र हेतुमाह अहमिति आत्मनां अहंकारोपाधीनां जीवानामात्मा अतः प्रेयसां अतिप्रियाणामपि मध्ये प्रे

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतस्त्वं स्मृतार्थ एव तथापि मद्विधानां चेष्टिं कुर्वित्याह सर्वेति आत्मा च इदं देवत्रैलोक्यं यां मय्यनुशेरते ताः प्रजा असृ
न१ जेकेत्यात्मनैवान्यनिरपेक्षेण तत्र ज्ञापकापेक्षाभावमाह सर्ववेदमयेनेति आत्मा अहं योनिः कारणं यस्येति ज्ञान
क्रियाशक्त्यतिशयं सूचयति यथापूर्वमिति तत्रात्राभ्यासोऽप्यस्तीत्युक्तं मय्यनुशेरत इति स्थितानामभिव्यक्तिमात्र
मेव कर्तव्यमित्यनायासत्वमुक्तं ४३ इदं सृज्यं व्यज्य प्रकाश्य पद्मनाभः श्रीनारायणरूपेण तिरोदधे अदृश्यो भवत् ४४ अंतर्ह

नां दीनानामकृतागसां स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ३९ तदा विश्वेश्वरः क्रुद्धो भगवान् लोकभा
वनः हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृक् ४० श्रीदितिरुवाच वधं भगवता साक्षात्सुनाभोदारबाहुना
न ब्रह्म भयदंडस्य चार् आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो ४१ न ब्रह्मदंडदग्धस्य नारका अनुगृह्णंति यां यां योनिमसौ गतः
४२ कश्यप उवाच कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् भगवत्युरुमानाच्च भवे मय्यपि चादरात् ४३
पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः गास्यंति यद्यशः शुद्धं भगवद्यशसा समं ४४ योगैर्हेमेव दुर्वर्णं भा
वयिष्यंति साधवः निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुं ४५ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकं
स स्वदृक् भगवान्यस्य तोष्यते नन्यया दृशा ४६

प्रथि १ वर्तिहरो भवश्रीरुद्रे एतैः पंचभिः कारणैः ४३ पुत्रस्य हिरण्यकशिपोः पुत्राणां मध्ये एकः सतां मतो भविष्यति तमेव वर्णयति गास्य
तीति सार्द्धैः पंचभिः समं सह सदृशं वा ४४ हीनवर्णं हेम यथा योगैर्दाहादिभिः शुप्यते शोध्यते तथा यस्य शीलं स्वभावं अनुवर्तितुं अ
नुगंतुं प्राप्तुं निर्वैरादिभिर्योगैरात्मानं भावयिष्यंति शोधयिष्यंति ४५ विश्वप्रसादे हेतुः यदात्मकं स्वदृक् आत्मसाक्षी नन्यया भ
गवानेव सत्य इत्येवं भूतया दृशा तोष्यते तोषं प्राप्स्यतीति ४६

यस्या १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र हेतुः स वा इति महात्मा अपरिच्छिन्नदृष्टिः महानुभावः महाप्रभावः महतामपि मध्ये महिष्ठः अतिशयेन महान् प्रवृद्धया भक्त्या
नुभाविते शोधिते चित्ते वैकुंठं हरिं निवेश्य देहाद्यभिमानं त्यक्ष्यति ४७ महाभागवतत्वमाह अलंपट इति शीलधरः सुखभा
वः गुणानां धैर्यादीनामाकरो जन्मभूमिः परेषां समृद्ध्या हृष्टः परेषु दुःखितेषु सत्सु न भूतो जातः शत्रुर्यस्य निदाघे भवं ता
पं चंद्रो यथा हरति एवं जगतः शोकहर्त्ता भविष्यति ४८ अपरिच्छिन्नदृष्टत्वमाह अंतरिति स्वपुरुषाणामिच्छया पुनः पुनर्गृही

४८ स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः प्रवृद्धभक्त्यानुविभाविताशये निवेश्य वैकुंठमिमं वि
हास्यति ४७ अलंपटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखितेषु अभूतशत्रुर्जगतः शोकहर्त्ता
नैदाघिकं तापमिवोडुराजः ४८ अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं पौत्रस्तव श्रील
लनाललामं द्रष्टा स्फुरत्कुंडलमंडिताननं ४९ श्रीमैत्रेय उवाच श्रुत्वा भागवतं पौत्रममोदत दिति
र्भृशं पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामनाः ५० इति श्रीभागवते महापुराणे तृतीयस्कंधे दिति
कश्यपसंवादे चतुर्दशोऽध्यायः १४ श्रीमैत्रेय उवाच प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः दधार वर्षाणि
शतं शंकमाना सुरार्दनात् १ लोके तेन हतालोके लोकपाला हतौजसः न्यवेदयन् विश्वसृजे ध्वांतव्यतिकरं
दिशां २
तानि रूपाणि येन श्रीरेव ललनासुंदरी तस्याः ललामं मंडनं द्रष्टा द्रक्ष्यति ४९ महामनाः सोत्साहचित्ताः हरिणा सह युद्धे
न मरणं पुत्रयोः कीर्त्तिः सद्गतिश्च भविष्यतीति ५० तृतीये चतुर्दशः १४ हतप्रभैः सुरैः पृष्टः प्राह पंचदशे विधिः तद्धेतुं विप्रशापा
दि वैकुंठे विष्णुभृत्ययोः तेदेवदेवानां ब्रह्मणश्च संवादः प्रस्ताव मुक्तो दानीं तं संवादं वक्तुमाह प्राजापत्यं काश्यपं तेजो वीर्यं परेषां
तेजोहतीति तथा आर्षेः स्वपुत्राभ्यां करिष्यते यत्सुराणामर्दनं पीडनं तस्मात् शंकमानाः १ तेन गर्भतेजसा हतात् लोके निरस्त सूर्यादि

राम ४८

वेत्थ जानासि किं विचारयसि यद्येन वयं संविग्ना भीताः अव्यक्तं अज्ञातं नस्पृष्टं वर्त्म ज्ञानप्रचारो यस्य ३ आत्मानं परमेश्वरत्वेन स्तुवंतः
प्रार्थयंते हे देवदेवेति सप्तभिः लोकनाथानां शिखामणे भाववित् अभिप्रायज्ञोसि केनाभिप्रायेण दितेर्गर्भो वर्द्धते इति जानासीत्यर्थः ४
विज्ञानं वीर्यं चित्तं यस्य इदं मंत्र ब्रह्मदेहमुपेयुषे प्राप्तवते गृहीता गुणभेदो रजोगुणो येन व्यक्तस्य प्रपंचस्य योनये कारणाय न व्यक्तो कि
नापि प्रमाणेन विज्ञातो योनिर्यस्येति वा ५ सकामता या प्रतिक्षणं दुःखमनुभवंतो निष्काम भक्तास्तु वंतः आहुर्द्वाभ्यां ये त्वां त्वा
नन्येन निष्कामेन भावेन भक्त्या ध्यायंति आत्मनो जीवाननुभावयतीति तथा स्वस्मिन्प्रोतानि ग्रथितानि भुवनानि येन चेतनानि

ग्ना

तम एतद्धि भो वेत्थं संविज्ञाय हृदयं भृशं न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ३ देवदेव जगद्धातर्लो
कनाथशिखामणे परेषामपरेषां त्वं भूतानामसि भाववित् ४ नमो विज्ञानवीर्याय माययेदमुपेयुषे
गृहीतगुणभेदाय नमस्तेव्यक्तयोनये ५ ये त्वानन्येन भावेन भावयंत्यात्मभावनं आत्मनि प्रोतभुवनं परं
सदसदात्मकं ६ तेषां सुपक्वयोगानां जितश्वासेंद्रियात्मनां लब्धयुष्मत्प्रसादानां न कुतश्चित्पराभवः ७
यस्य वाचा प्रजाः सर्वा गावस्तंत्येव यंत्रिताः हरंति बलिमायत्तास्तस्मै मुख्याय ते नमः ८ स त्वं विधत्स्व शं
भूमंस्तमसा लुप्तकर्मणां अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुं ९ एष देव दितेर्गर्भ ओजः काश्यप
मर्पितं दिशस्तिमिरयन्सर्वा वर्द्धतेग्निरिवैधसि १०

तत प्रपंचकारणमित्यर्थः तत्र हेतुः सदसदात्मकं कार्यकारणरूपं वस्तु ताभ्यां परं ६ जितश्वासइंद्रियाणि आत्मा मनश्च यैः अतः
सुपक्वयोगाः अत एव प्राप्तो युष्मत्प्रसादो यैः तेषां ७ अन्यत्तु नित्यकर्मेत्कोशिन इत्याहुः ये इति तंत्या दाम्ना आयत्ता अधीनाः मुख्या
य नियंत्रे प्राणरूपायेति वा तथा च श्रुतिः तस्य वाचा तंतिर्नामानि दामानि इत्यादि ८ तमसा अहोरात्रविभागाभावेन लुप्तानि कर्मा
णि येषां आपन्नान् आपद्गतान् अस्मान् आपत्कारणमाहुः एष गर्भः तस्य विशेषणं अर्पितं निक्षिप्तं काश्यपमोजो वीर्यं दिशस्तिमिरयन् त
मोव्याप्ताः कुर्वन् १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दितेः सुरैश्च हितं ज्ञात्वा प्रहस्य देवानां येशाद्याः विज्ञप्तिवाक्यानि तेषां गोचरो विषयभूतः प्रत्यभाषत ११ युष्मत्तु सकाशात् पूर्वजाताः १२
वैकुंठस्य लोकं ययुः तेषां वर्णयति वसंतीत्यादि द्वादशभिः वैकुंठस्य हरेरिव मूर्तिर्येषां ते निमित्तं फलं तेन निमित्तेन प्रवर्तकं यस्मिन्
निष्कामेन धर्मेणेत्यर्थः आराधयन् आराधितवंतः १४ शब्दगोचरः वेदांतैकवेद्यः विरजं सत्त्वं मूर्तिं विष्टभ्य धृत्वा वृषो धर्ममूर्तिः
स्वानां स्वान् १५ तत्रत्यं वनं विशिनष्टि यत्रेति त्रिभिः सर्वर्तुश्रीः सुपुष्पादिसंपद्येषां तैः १६ चरितानि चरित्राणि भर्तुः प्रभोः
अनुविकसन्त्यः मधुमकरंदः तद्युक्ताः माधव्यो वासंत्यो लताः यद्वा अनुविकसन्माधवः प्रसरन्मकरंदः माधव्यः मधुकाल्लीनाः सु-
मनसः तासां गंधेन खंडिता विच्छिन्ना धीर्येषां तेऽपि तद्गंधप्रापकमनिलं क्षिपंतः तिरस्कुर्वंतो गायंति अनेन भगवत्पार्षदानां निरति-

४८ श्रीमैत्रेय उवाच सप्रहस्य महाबाहो भगवां शब्दगोचरः प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरया गिरा ११
श्रीब्रह्मोवाच मानसा मे सुता युष्मत्पूर्वजाः सनकादयः चेरुर्विहायसा लोकांल्लोकेषु विगतस्पृहाः १२ त ए-
कदा भगवतो वैकुंठस्यामलात्मनः ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं १३ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः
येऽनिमित्तनिमित्तेन धर्मेणाराधयन्हरिं १४ यत्र चाद्यः पुमानास्ते भगवां शब्दगोचरः सत्त्वं विष्टभ्य विरजं स्वा-
नां नो मृडयन्वृषः १५ यत्र नैःश्रेयसं नाम वनं कामदुघैर्द्रुमैः सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् १६
वैमानिकाः सललना चरितानि यत्र गायंति लोकशमलक्षपणानि भर्तुः अंतर्जलेऽनुविकसन्मधुमाधवीनां
गंधेन खंडितधियोऽप्यनिलं क्षिपंतः १७ पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः
कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृंगाधिपे हरिकथामिव गायमाने १८ मंदारकुंदकुरबोत्पलचंपकार्ण-
पुन्नागनागबकुलांबुजपारिजाताः गंधेऽर्चिते तुलसिकाभरणेन यस्या यस्मिंस्तपः सुमनसो बहु मानयंति १९

शय विषयसुखेऽपि भगवद्भजनानंदाशक्तिर्दर्शिता १७ अन्यभृताः कोकिलाः दात्यूहः आगकः अचिरमात्रं क्षणमात्रं विरमतीति अनेन तत्र-
त्यपक्षिणामपि हरिकथाश्रवणादिपरमानंदो दर्शितः १८ मंदारपारिजातौ सुरतरुविशेषौ कुरबस्तिलकवृक्षः उत्पलं रात्रिविकाशि अं-
बुजं दिनविकाशि नागो नागकेसरः एताः सुमनसः पुष्पजातयः सुगंधा अपि तुलसिकाभरणेन श्रीहरिणा तुलस्या गंधे चिंतिते सति यस्मि-
न्वनेन स्मात्तपो बहु मानयंति अनेन तत्त्वगुणग्राहिणा पवनमत्सरिण इत्युक्तं एवंभूतं वनं यत्र तद्वैकुंठं ययुरिति पूर्वेणान्वयः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनर्वैकुंठमेव विशिनष्टि तत्संकुलं स्यात् भवति केः हरिपदयोरानतिः प्रणामः तावन्मात्रेण दृष्टैः भक्तानां विमानैः नकर्मादिप्राप्यैः
वैडूर्यमारकतहेममयैश्च विमानैः बृहत्कटितटा नितंबा नियासां स्मितशोभीनि मुखानि यासां ताश्च अपि कृष्ण आत्मा येषां रजः का
न२ मं उत्स्मयाद्यैः परिहासादिभिः आदधुर्जनयामासुः २० श्रीर्लक्ष्मीः रूपिणी मनोहरमूर्त्तिधारिणी सती श्रीहरेः सद्मनि संमा
र्जनं कुर्वतीति यत्र यस्मिन् लोके संलक्ष्यते चरणारविंदं क्वणयती नूपुरेण शब्दयंती विमुक्तो दोषश्चांचल्यं यया यद्वा मुक्तेन दोषा
प्रसारितेन बाहुना लीलांबुजेन कमलेन सह मनिस्फटिकमयानि कुड्यानि यस्मिन् मध्ये च मध्ये च शोभार्थं उपेतं संयुक्तं हेम यस्मिन् यस्या
अनुग्रहेण श्रीरनुग्रहं करोतु तदर्थमन्येषां ब्रह्मादीनां यत्नः साश्रयं भावः यद्यपि तत्र रजो नास्त्येव तथापि स्वर्णपदिं काव ८१

तत्संकुलं हरिपदानतिमात्रदृष्टैर्वैडूर्यमारकतहेममयैर्विमानैः यषां बृहत्कटितटाः स्मितशोभि
मुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः २० श्रीरूपिणी क्वणयती चरणारविंदं लीलां
बुजेन हरिसद्मनि मुक्तदोषा संलक्ष्यते स्फटिककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहणेन्यय
त्नः २१ वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशं अभ्यर्चती स्वलक
मुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमतांग यच्छ्रीः २२

छिन्नभित्तिभागेषु बहुधा प्रतिबिंबिता सती लीलांबुजं भ्रामयंती विनयभक्तिभ्यां तथा लक्ष्यत इति २१ अंग हे देवाः यत्र यस्मि
न् लोके श्रीरेवं अमत अमंस्त मेने किं कुर्वती विद्रुममयानि तटानि यासां अमलानि अमृततुल्यानि आपो यासां तासु वापीषु
निजवने लक्ष्मीवने परिचारिकाभिरन्विता तुलसीभिः श्रीविष्णुं पूजयंती तदा तु दके प्रतिबिंबितं शोभनालकयुक्तं उन्नत
नासिकायुक्तं च स्ववक्त्रं वीक्ष्य भगवता उच्छेषितं चुंबितमिति मन्यते अनेन लक्ष्म्या अपि सौभाग्यसुखं भगवदनुग्रहेणैवेति
द्योतितं २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः कथंभूतं तत् यद्वैकुंठं न व्रजंति के ये कुकथाः शृण्वंति कास्ताः अघं भिनत्तीत्यघभित् तस्य हरेः रचनास्सृष्ट्यादिलीलास्तस्या अनु
वादादन्यविषयाः अर्थकामादिवार्त्ताः मतिघ्नीर्नाशिकाः तेषामव्रजने हेतुः यास्तु हतभाग्यैर्नरैः श्रुताः सत्यः तांस्तान् श्रोतॄन् अश
रणेषु निराश्रयेषु तमःसु नरकेषु क्षिपंति हंतेति खेदे कथंभूताः आत्ताः साराः श्रोतॄणां पुण्यानि याभिस्ताः २३ प्रसंगात्तान्नृशो
चति नोऽस्माभिः ब्रह्मादिभिरप्यभ्यर्थितां नृगतिं मनुष्यजातिं प्रपन्नाः प्राप्ताः संतोपि हरेराराधनं न कुर्वंति कीदृशीं नृगतिं य
त्र यस्यां धर्मसहितं तत्त्वज्ञानं भवति तदुभयसाधकत्वात्तस्याः तेऽमुष्य भगवतो विस्तृतया मायया न नु संमोहिता वतेति खे

यन्न व्रजंत्यघभिदो रचनानुवादात् शृण्वंति येन्यविषयाः कुकथा मतिघ्नीः यास्तु श्रुता हतभगैर्नृभिरात्त
४९ सारास्तांस्तान् क्षिपंत्यशरणेषु तमःसु हंत २३ येभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्ववि
षयं सहधर्म यत्र नाराधनं भगवतो वितरंत्यमुष्य संमोहिता विततया बत मायया ते २४ यच्च व्रजं
त्यनिमिषामृषभानुवृत्त्या दूरे यमा ह्युपरि नः स्पृहणीयशीलाः भर्त्तुर्मिथः सुयशसः कथनानुरागवै या २
क्लव्यबाष्पकलया पुलकीकृतांगाः २५

देति यद्धि चैवं संबंधनः न केवलं त एव न व्रजंति किंतु ये भगवदाराधनं न कुर्वंति तेपि तेषां मायामोहितत्वादिति २४ पुनः
कथंभूतं यच्च नः उपरि स्थितं व्रजंति के अनिमिषां देवानां ऋषभाः श्रेष्ठा हरिस्तस्यानुवृत्त्या दूरे यमो येषां यद्वा दूरी दूर राम ४९
कृता यमनियमाः पाठांतरे दूरेहमाः दूरीकृताहंकारा इत्यर्थः स्पृहणीयं करुणादिशीलं येषां किंच भर्त्तुर्हरेः यत् सुय
शः तस्य मिथः कथनेयानुरागस्तेन वैक्लव्यं वैवश्यं तेन बाष्पकला तया सह पुलकीकृतमंगं येषां यद्वा नः उपरीति व्रजतां विशे
षणं निरहंकारत्वादस्मांस्तानपि ये अधिकास्ते यद्व्रजंतीत्यर्थः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुकुंदाः

तत्र हापूर्वं विकुंठं अथो अनंतरमुपेत्य मुनयः परां मुदमापुः अपूर्वत्वे हेतवः विश्वगुरुणा हरिणा अधिष्ठितं अधिष्ठितं भुवनाना
मेकमेववंद्यं दिव्यमलौकिकं विचित्राणि विबुधानां विमानानि तेषां शोचिर्दीप्तिर्यस्मिन् योगमायाबलेनेति अष्टांग
योगप्रभावेनोपेत्य परमेश्वरे तु योगमायेति चिच्छक्तिविलास इति द्रष्टव्यं २६ तस्मिन् विकुंठे षट् कक्षाः प्राकारद्वाराणि
असज्जमानाः भगवद्दर्शनोत्कंठया तत्तदद्भुतदर्शने आसक्तिमकुर्वाणाः द्वारपालौ देवावपश्यन् समानवयो ययोः गृही
ते गदे याभ्यां परार्ध्यैः केयूरादिभिः विटंकः सुंदरो वेषो ययोः तौ चवर्णाय तिमत्ता द्विरेफा यस्यां तया वनमालया निवीतौ

तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः आपुः परां मुदमपूर्वमुपेत्य
योगमायाबलेन मुनयस्तदथो विकुंठं २६ तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समान
वयसावथ सप्तमायां देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ २७
मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तया निवीतौ विन्यस्तयासितचतुष्टयबाहुमध्ये वक्त्रं भ्रु
वा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग्रभसं दधानौ २८ द्वार्येतयोर्निविविशुर्मिषतोरपृ
ष्ट्वा पूर्वा यथा पुरटवज्रकपाटिका याः सर्वत्र ते विषमया मुनयः स्वदृष्ट्या विश्रंचरंत्यविहता विगता ये संचरंति
भिशंकाः २९

कंठलं विन्यास्तलं लंतो असिताः नीलाः चतुष्टये चतुः संख्याका बाहवस्तेषां मध्ये विन्यस्तया वक्त्रं च मनाग्रभसं किंचित् क्षुब्
दधानौ स्फुटौ उत्फुल्लौ निर्गमौ श्वाससमार्गौ नासापुटाभ्यां २८ एतयोर्मिषतोः पश्यतोः तावनादृत्यापृष्ट्वैव च याः पूर्वाः षट्
द्वारः पुरटात्मकतत्वज्रमयः कपाटिका यासु ताः यथा तथा सप्तमायामपि द्वारि ते विविशुः अप्रश्ने हेतुः सर्वत्र ये अविहता
अनिवारिताः संचरंति निःशंकत्वे हेतुः अविषमया स्वदृष्ट्येति २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाहेगुः

भा०तृ०३ वातरसनानुनग्नान् वृद्धानपि पंचवर्षबालकवत्प्रतीयमानान् च कारादाज्ञयाच अस्खलयतां निवारितवंतौ नतत्खलनमर्हं
तीति तथा तानु अहो अत्रापि धार्ष्ट्यमित्येवं तेषां तेजो विहस्य भगवतो ब्राह्मण्यदेवस्य प्रतिकूलशीलयोः ३० हरेर्द्वारपालपतिभ्यां
देवेषु पश्यत्सु वार्यमाणास्ते मुनयः कोवामित्यादि श्लोकत्रयमूचुः सुहृत्तमः श्रीहरिः तस्य दिदृक्षितं दर्शनेच्छा तस्य भंगसति
कामस्यानुजः क्रोधस्तेन सहसा कस्माद्वा उपप्लुतानि क्षुभितान्यक्षीणि येषां ते सुष्ठु पूज्यतमा अपीति निषेधानर्हत्वे क्रोधानर्ह
त्वे च हेतुः ३१ उच्चैर्महत्या भगवत्परिचर्यया एत्य प्राप्य इह वैकुंठे निवसतां तद्धर्मिणां भगवद्धर्मिणां समदर्शिनां मध्ये वां युवयोः

५० तान्वीक्ष्य वातरसनांश्चतुरः कुमारान् वृद्धान्दशार्द्धवयसो विदितात्मतत्त्वान् वेत्रेण चास्खलयतामतदर्हणांस्तौ
तेजो विहस्य भगवत्प्रतिकूलशीलौ ३० ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा ह्यपि हरेः प्रतिहारपा
भ्यां ऊचुः सुहृत्तमदिदृक्षितभंग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः ३१ मुनय ऊचुः को वामिहैत्य भ
गवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमः स्वभावः तस्मिन्प्रशांतपुरुषे गतविग्रहे वां को वात्मवत्कुहकयोः प
रिशंकनीयः ३२ न ह्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः पश्यंति यत्र युवयोः सु
रलिंगिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोस्य ३३ तद्वाममुष्य परमस्य विकुंठभर्तुः कर्तुं प्रकृष्टमिह धीमहि
मंदधीभ्यां लोकानितो व्रजतमंतरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोस्य यत्र ३४

वः कोयं विषमस्वभावः केश्चित्वेष्ट्यं केश्चित्विवेष्टव्यं केश्चिन्नेत्येवं भूतः स्वामिनो रक्षार्थं द्वारपालयोरेष स्वभावो गुण एवेति चेत्तत्रा
हुः तस्मिन्निति कुहकयोः कपटयोः आत्मवत्स्वदृष्ट्यैव तेन यथा आवां कपटेन तथान्योपि कश्चित्कपटः प्रवेक्ष्यतीति अयं भावः न ह्यत्र
भगवद्भक्तेर्विना कश्चिदागच्छति न चेश्वरे प्रशांतत्वाद्विग्रहमानविरोधभयशंका अतो युवां केवलं धूर्तावेवेति ३२ भयशंकाबीजं भे
दः स च कस्याप्यस्मिन्नास्तीत्याहुः नहीति समस्तो विश्वं कुक्षौ यस्य यत्र परत्र इह भगवति धीराः विद्वांस आत्मनोंतरं भेदं न पश्यंति किंत्वस्मि
न्परमात्मन्यात्मानमेकीभूतं पश्यंति महाकाशे घटाकाशमिव तत्र यथान्यस्य राजादेः उदरभेदि उदरभेदयुक्तं भयं भवति तथास्य श्रीहरेः
दिग्नेतत्किं न किंचिदित्यर्थः ३३ तत्तस्मादमुष्य वैकुंठनाथस्य मन्दाभ्यां युवाभ्यां प्रकृष्टं भद्रमेव कर्तुं इहास्मिन्नपराधे यत्युक्तं तद्धीमहि चिंतयामः

मंतादृग्भयं यतः येन कारणेन सुरवेषधारिणोर्युवयोर्विशेषणोस्मि

दिवाहुः अंतरस्वभावः सत्तातदृष्टेनेतइतः वैकुंठात् लोकान् व्रजतं यच्च येषु लोके
ष्वस्य पापीयसोंतर उक्तः इमे कामः क्रोधस्तथा लोभ इति गीता कामस्येपा
रिपवो भवंति पापीयसो लोकानितो वा ३४

॥५०॥

इदं स्ट्टिनपत्रं प्रथमलिखित रूपं चारस्येत्रेउत्तरपुटे कुमारोक्तैः प्राक् प्रथमपंक्तौ ज्ञेयं

कस्य प्रसादस्य द्वारपालमुनिवृंदस्य प्रसादे सुसुखं। स्पृहणीयानां गुणानां धाम स्थानं। स्नेहावलोककल्लयास प्रेमकृपा कटाक्षेण हृदि संस्पृष्टं तं सुखयंतं। त्रैलोक्यविलक्षापक्षेस सत्यलोकपर्यंतः स्वर्गस्तस्य चूडामणिवत् स्थितं स्वधिष्ण्यं वैकुंठं स्वकांत्या लगयंतं। शोभयंतं पृथुनितंब आश्रयस्थेन विघनेयस्य तस्मिन् पीतांशुके अलिभिर्नादितया वनमालया च युक्तं सुलगयंतं नितरां शोभयंतं निपूर्वेणैव वासितं धः। वल्गु प्रकोष्ठे सुवलयानि यस्य विन्यस्त एकोल्लसोयेन। इतरेणान्येन अब्जं धुनानं भ्रामयंतं विन्यस्येति पाठे च वल्गिता दिल्लसस्य विशेषणं ॥१८॥ स्वकौ सा विद्युतः क्षिपतीयेमकराकारकुंडलेनयोर्मंडनस्याहेगंडस्थले यस्मिन्नुन्नतदुन

कस्य प्रसादसुसुखं स्पृहणीय धाम स्नेहावलोककल्लया हृदि संस्पृष्टं तं ॥ स्यामे पृथावुरसि शोभितया श्रिया स्वश्चूडामणिं सुलगयंतमिवात्मधिष्ण्यं ॥१९॥ पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्यालिभिर्विरुतया वनमालया च ॥ वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानम्[illegible]ब्जं ॥२०॥ विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलो न्नसमुखं मणिमत्किरीटं ॥ दोर्दंडखंडविवरे हरता पराद्ध्यहारेण कंधरगतेन च कौस्तुभेन ॥२१॥ अत्रोपसृष्टमितिचोत्स्मितमिंदिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यं ॥ मह्यं भवस्य भवतां च भजंतमंगं नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः ॥२२॥

सं च मुखं यस्य मणियुक्तं किरीटं यस्य दोर्दंडानां खंडः समूहः तस्य विवरे मध्ये स्थितेन हरता मनोहरेण विहरतेति वा परार्ध्येत्युत्कृष्टः तेन हारेण कंधरायां स्थितेन ॥२१॥ किं बहुना। इंदिरायाउत्स्मितं अहमेव सर्वसौंदर्यनिधिरित्यहंकरणं अत्र भगवत्सौंदर्ये उपसृष्टं असंगतमिति स्वानां भक्तानां धिया विरचितं न स्वैः स्वमनस्येव वितर्कितमित्यर्थः। कुतः बहुसौष्ठवेन सौंदर्येणाआढ्यं युक्तं किंच मह्यं मम भवस्येश्वरस्य भवतां च रूते अंगं भजंतं मूर्तिं प्रकटयंतं अचक्षतं निरीक्ष्य च कैः शिरोभिर्मुदा नेमुः नमस्कृतं न विशेषेण तृप्ताः दृशो नेत्राणि येषां ते ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५१ स्वरूपानंदादपि तेषां भजनानंदाधिक्यमाह। तस्य पदारविंदकिंजल्कैः केशरैर्मिश्रा या तुलसी तस्या मकरंदेन युक्तो
वायुः स्वविवरेण नासाछिद्रेण अक्षरजुषां ब्रह्मानंदसेविनामपि संक्षोभं चित्ते तिलहर्षं तनौ रोमांचं ॥४३॥ दर्पकारिनं संभ्रम
माह। द्वाभ्यां। ते वै किल वदनमेवासितपद्मस्य कोशोंतर्गतमं असितपद्मकोशमिति सदृशोपमा। सुंदरतरे अरुणे अधरो
ष्ठे कुंदवद्धासो यत्र स्मितं। उरुधा ध्र्वीक्ष्य लब्धमनोरथाः संतः तस्यैव अरुणमणयस्तेषां श्रयणं आश्रयमं तस्यांघ्रिद्वंद्व

तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः। अंतर्गतः स्वविवरेण
चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ॥४३॥ ते वा अमुष्य वदनासितपद्मकोश
मुद्वीक्ष्य सुंदरतराधरकुंदहासं। लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्र
यणं निदध्युः ॥४४॥ पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयनाभिरा
मं। पौस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभोगैः ॥४५॥

पुनरवेक्ष्य अधोरस्यावीक्ष्य पुनःपुनरेवं निरीक्ष्य युगपत्सर्वांगलावण्यग्रहणाशक्तेः पश्चान्निदध्युः ध्यातवंतः ॥४४॥
योगमार्गैर्गतिं मृगयतां पुंसां ध्यानस्य विषयभूतं बहुमतं प्रसादलास्पदं बहूनां नयनयोः रांसमत्मिति वा पौस्नं पौरु
षं वपुर्दर्शयंतं। अन्येष्व सिद्धैरसाधारणैः औत्पत्तिकैर्नित्यैरणिमाद्यष्टैश्वर्यैर्युतं समगृणन् सम्यगस्तुवन् ॥४५॥ ५१

५०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ लितेषामीरितं भाषणं घोरमवधार्येत्यं च ब्रह्मदंडं ब्रह्मशापमवधार्येत्यं चास्त्रसमूहे हरेण्णनिवार्यमवधार्य हरेरनुचरौ अतिकातरे
णाश्चतिकातरेण भयेन तत्पादग्रहणं कुर्वंतौ संतौ दंडवत्पतनतौ कथंभूतस्य हरेः एवंभूतेभ्यो मुनिभ्यः ताभ्यामपि तु अधिकं विभ्यतः ३२
भयं भावयतः ३१ अहो अपराद्धमस्माभिरित्यनुतप्यमानान् भवत्वं तु अघानि अघवति यत्र विनोदंडः स एव भगवद्भिरकारि नात्र
भवतामपराधः कश्चित् अतो संनो अवयोर्भूयात् यः अशेषमपि सुरहेलनं ईश्वरज्ञातिक्रमरूपं पापं हरेत् किंतु युष्माकं यः कृपा
नो २ निमित्तानुतापस्तस्य लेशात् अधोधामूढ्यानि व्रजतोरपि भगवत्स्मृतिप्रतिघातको मोहो न भवेत् किंतु मोहोपि स्मृतिमेव प्रवहता
दिति प्रार्थना ३६ एवं स्वानामहत्सु अतिक्रममपराधं तत्क्षणमेव विबुध्यतस्मिन् यच्च तेरुद्धास्ते दंशयेयो आर्योणां हृद्यः मेनो

तेषामितीरितमुभाववधार्य घोरं तं ब्रह्मदंडमनिवारणमस्त्रपूगैः सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण ३५ भूयादघोनि भगवद्भिरकारि दंडो यो नौ हरेत सुरहेलनमप्यशेषं मा वोनुतापकलया
भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः ३६ एवं तदैव भगवानरविंदनाभः स्वानां विबुध्य सदतिक्रममार्य
हृद्यः तस्मिन्ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्सहश्रीः ३७ तं त्वागतं प्रतिहृतौपयिकं स्वपुंभि
स्तेऽचक्षताक्षविषयं स्वसमाधिभाग्यं हंसश्रियोर्व्यजनयोः शिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकरांबु

ऽः चरणौ चलयन्निति अयं भावः मच्चरणदर्शनप्रतिघातजं क्रोधं तौ दर्शोपूत्शमयिष्यामीति त्वरायोजनपरत्रामवयेयो श्रीसाहिस
ने १ च निष्कामापि विभूतिभिः पूरयित्वा क्षमापयितुं ३७ तत्रैते दृष्ट्वेवमनुवर्णयति पंचभिः तं तु आगतं ते अचक्षत अपश्यन् आपं च मो
दिदमेव क्रियापदं स्वपुंभिः शीघ्रप्रतिहृतं आनीतं औपयिकं गमनोचितं छत्रपादुकादि यस्य कथंभूतं स्वसमाधिना भाग्यं भजनी
न २ यं फलं यं ब्रह्मानंदेवाक्षविषयं हंसवत् श्रीर्ययोस्तयोरुभयतश्चलतोर्व्यजनयोर्यः शिवानुकूलो वायुः तेन लोलं चलं च तत्तः शु
भ्रातपत्रं शशिकेसरः शुभ्रं यदातपत्रं तदेव स शशी तस्य केसरा मुक्ताहारविलंबाः तेभ्यो गलंति सीकरांबुनि यस्मिन्
तशीकरांबुकणोः ३८
तु

अत्र हरितसुन्दरपत्रं ज्ञेयं

८१

नित्यं ब्रह्मरूपेण प्रकाशसे न तच्चित्रं इदानीं तु परं मंगलं विशुद्धसत्वसत्वश्रीमूर्त्या प्रत्यक्षोसि अहो भाग्यमस्माकमित्याहुः हे अनन्त
यस्त्वं हृद्गतोपि दुरात्मनामंतर्हितो न स्फुरसि स नोस्माकमंतर्हितो न भवसि नयनमूलं त्वं अद्यैव राद्धः प्राप्तोसि अंतर्द्धानाभावे हेतुः
भवतः सकाशादुद्भवो यस्य तेन अस्मत्पित्रा यर्हि यदैव अनुवर्णितरहः उपदिष्टरहस्यः तदैव नः कर्णमार्गेण गुहां बुद्धिं गतः प्राप्तोसी
८२ ति ४६ ननु पित्रोपदिष्टं भगवत्तादृश्यमात्मतत्वं अहं त्वन्य एव सांप्रतं दृश्यत्वात् नैवं अस्माकं त्वभिज्ञैर्या भेदनिरासादित्याहुः तमि
तं ८१ ति हे भगवन् आत्मतत्वमेव परं तं त्वा विदाम विद्मः प्रत्यभिजानीमः ननु निरुपाधेरात्मतत्वस्य कथमीदृशमैश्वर्यं स्यात् आत्म

४ श्रीकुमारा ऊचुः योंतर्हितो हृदि गतोपि दुरात्मनां त्वं सोद्यैव नो नयनमूलमनंत राद्धः यर्ह्येव कर्णविव
रेण गुहां गतो नः पित्रानुवर्णितरहो भवदुद्भवेन ४६ तं त्वां विदाम भगवन् परमात्मतत्वं सत्वेन संप्रति
५१ रतिं रचयंतमेषां यत्तेनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागाः ४७ नात्यंति
कं विगणयंत्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते येंग त्वदंघ्रिशरणा भवतः कथायाः की
र्तन्यतीर्थयशसः कुशला रससज्ञाः ४८

उन्नसुरवार्थ
सात्विकम तु: सत्वेन विशुद्धसत्वमूर्त्या एषां भक्तानां सम्यक् प्रतिक्षणं संप्रति रतिं करं च यत्तत् आत्मतत्वमेवाहुः तेनुतापः कृपा तेन विदि
न्निग्रहया तैः ज्ञातैः दृढैर्भक्तियोगैः श्रवणादिभिः मुनयो हृदि यद्विदुः कीदृशाः उद्ग्रंथयो निरहंमानाः अत एव विगतरागाः ४७ स्वय रामं
पितिनाव: मपि भक्तिप्रार्थयितुं भक्तानां सुखातिशयमाहुः आत्यंतिकं मोक्षाख्यमपि तव प्रसादं तेन गणयंति नाद्रियंते किंतु किमुतान्य ८२
त् इंद्रादिपदं ते भ्रुव उन्नयैरुत्तुंभैः अर्पितं निहितं भयं यस्मिन् तत् केंग हे भगवन् ये भवतः कथायाः रसज्ञाः कथंभूत
स्य रमणीयत्वेन पावनीयत्वेन च कीर्तनार्हं तीर्थं च यशो यस्य ४८ तू ८

तव १

इदानीं स्वापराधं पालयंतो भक्तिं प्रार्थयंते कामं इति हे भगवन्निरः श्रुतैरस्माकं वृजिनं नाभवतु इदानीं सर्वार्थ पिजानानियतरन्वह ७७
इदानीं स्वापराधं यो गतयंतो भक्तिं प्रार्थयंते कामं इति हे भगवन्निरः श्रुतैरस्माकं वृजिनं नाभवतु इदानीं सर्वार्थ पिजानानियतरन्वह
कोश प्रेभ्रतैः स्ववृजिनैर्निरयेषु कामं नोस्माकं भवाजन्मस्तनु स्यात् ४ नु चितेकीयदिनु नश्चेत्तस्ते पदयोरमेत अलिर्यथा कंदेकेरापि
कोशप्रेश्रतैः स्ववृजिनैर्निरयेषु कामं नोस्माकं भवाजन्मस्तनु स्यात् ४ नुवितेकीयदिनु नश्चेत्तस्ते पदयोरमेत अलिर्यथा कंदेकेरापि
पुष्पमानो पिपुष्पपुरमेतेन हृदनु विज्ञान विगणस्य पदिरमेत अघ्रिभ्यां शोभायासो यथा च तुलसी स्वगुणैर्नरपस्पेण स्वदत्रिसंवर्धते
वशीभेते तथाय दिनो वाचः शोभरन् यदि च तेगुणगणैः पूर्येत कर्णरंघ्रइत्यत्वस्य पूरणमिव याचकारोत्या प्रार्थयंते अयंतु गूढा
भिप्रायः कर्णरंघ्रस्य काशत्वात् गुणगुणानां चामूर्त्तत्वान्नकदाचित्पूरणमतोनित्यमेव श्रवणं फलि पुष्पतीति ४९ अत्रव यंत

कामं भवः स्ववृजिनैर्निरयेषु नस्ताच्चेतो ऽलिवद्यदिनुते पदयोरमेत वाचश्च नस्तुलसिवद्यदितेंघ्रि
शोभाः पूर्येत ते गुणगणैर्यदि कर्णरंध्रः ४९ प्रादुश्चकर्थयदिदं पुरुहूतरूपं तेनेश निर्वृत्तिमवापु
रलं दृशोनः तस्मा इदं भगवते नम इद्विधेम योनात्मनां दुरुदयो भगवान्प्रतीतः ५० इति श्री भाग
वते महापुराणे तृतीयस्कंधे पंचदशोध्यायः श्री ब्रह्मोवाच इति तद्गृणतां तेषां मुनीनां योगध
र्मिणां प्रतिनंद्य जगादेदं विकुंठनिलयो विभुः १ श्री भगवानुवाच एतौ तौ पार्षदौ मह्यं जयो विजय
एव च कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमं यस्त्वेतयोर्धृतो दंडो भवद्भिर्मामनुव्रतैः सएवानु
मतोस्माभिर्मुनयो देवहेलनात् २

तार्थाः स्मइत्याहुः हे पुरुहूत विपुलकीर्त्ते यदिदं प्रादुश्चकर्थ प्रकटितवानसि दृशां नेत्राणां अनात्मनां अजितेंद्रियाणां दुरुदयः
अप्रकटोपि इत्यूह्यं यः प्रतीतो सि तस्मै तुभ्यमिदं नेमा विधेम ५० तृतीयपंचदशः हरिणा सांत्विते विप्रैरनुतेप्तस्तु षोडशात्तयोः सु २२
तरभाव पिक्षेनानुग्रह इर्यते १ इतिगृणतां तेषां च हाक्यं प्रतिनंद्य इदं जगाद २ यद्यस्मात् मां कदर्थीकृत्य तु च्छीकृत्य वहु यथाभवति तथा
अतिक्रामंभवः कृतवंतो २ एतौ विर्सकोदस्तामि:
अपराधं

निरस्तश्लो २

तस्मात्स एवदंडोंगीकृतः ३ हियस्मात् अत्र ब्रह्मण एवेमपरमंदेवंतंतस्मात् दयेवः प्रसादयामितवकोपराधइतिचेत्तत्राह तद्दी
तिमदीयैः पुंभिरस हितोंइतियत्तत्तदात्मकृतमेवमन्ये ४ किंचममेवैताभ्यांअनिष्टं कृतमित्याह यस्यस्वामिनोनामानि तं
स्यकीर्ति श्रामयोत्र अत्र कुंठं ५ यस्यमेस्य अमलत्तत्पेश्रमलंयशसि श्रवणेनागाहः प्रवेशाः श्वपचमभिव्याप्यजगत्सद्यस्तत्
क्षणमेवपुनातिसोहंविकुंठः भवग्रहेतुभ्यतेभ्यः उपलब्धाग्राह्यासुशो[illegible]तीर्थभूताकीर्तिर्येनसः स्ववाहुस्थानीयंलोके
श्वरमपिहन्यां कान्यस्यकथेत्यर्थः स्वगुणानुवर्णनंतुब्राह्मणोत्कर्षार्थमेव ५ चरणपद्मयोः स्थितः पवित्रारेणुर्यस्य अत एवक्ष

५२ तद्दः प्रसादयाम्याद्यब्रह्मदेवंपरंहिमे तद्दीत्यात्मकृतंमन्येयत्त्वपुंभिरसहितः ३ यन्नामानिचगृह्णा
तिलोकोभृत्येकृतागसि सोसाधुवादस्तत्कीर्तिंहंतित्वचमिवामयः ४ यस्यामृतामलयशः श्र
वणावगाहः सद्यःपुनातिजगदाश्वपचाद्विकुंठः सोहंभवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिंद्यांस्व
बाहुमपिवः प्रतिकूलवृत्तिं ५ यत्सेवयाचरणपद्मपवित्ररेणुंसद्यःक्षताखिलमलंप्रतिलब्धशी
लंनश्रीर्विरक्तमपिमांविजहातियस्याः प्रेक्षालवार्थइतरेनियमान्वहंति ६ नाहंतथाद्मियजमानहविर्विताने श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन यद्ब्राह्मणस्यमुखतश्चरतोनुघासंतु
ष्टस्यमय्यवहितैर्निजकर्मपाकैः ७

तोनिरस्तः अखिलस्यलोकस्यमलंलायेनायद्वाचरणपद्माल्लग्नः पवित्रारेणुर्यस्मिन्निति क्षताखिलोमलोयेस्थितिच विग्रहः प्रति
लब्धप्रांतशीलंयेनयेषांसेवयाएतेगुणाममअतएवश्रीर्मांनविजहाति प्रेक्षालवार्थं अवलोकनलेशार्थंइतरेब्रह्मादयः तेषांवःप्रति
कूलवर्तिनं छिंद्यामितिपूर्वेणवसंबंधः ६ किंचब्राह्मणानामेवमुखंश्रेष्ठंमुखंयतो युष्मदवज्ञयास्वतिरस्कार एवकृतइत्याह नाहमिति
विताने यज्ञे यजमानस्यहविश्चरुपुरोडाशादिहुतभुगग्निस्तन्मुखेन अदन् अश्नन्नपि तथानाग्निनाअश्नामि यद्यथाश्च्योतताक्षर
ताघृतेनप्लुतंविलोडितं पापमासादिप्रतियज्ञेरेसास्वादरूपंकं चरतोभुंजानस्यज्ञानिनोब्राह्मणस्यमुखतोश्नामि मयिसमर्पितैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच येषांत्वमलं अंघ्रिरजः अहं किरीटैः विभर्मि तान् विप्रान् अपकुर्वेतोपि कोन्योन विषहेत कथंभूतोहं अखंडा अनवछिन्ना वि
कुंठा अप्रतिहता चयोगमायाविलासभूताविभूतिर्यस्य तथा यस्यमाहर्हणांभः पादोदकं चंद्रेललामेन ईश्वरेण सहितान् लोकान्
सद्यः पुनाति एवंपरमेश्वरः परमपावनोपि सन्नहं विभर्मीति ॥ ७ ॥ किंच मतनु अधिष्ठानानि कास्ताः द्विजवरान् दुहतीर्गाः धौं इत्यर्थः
दुहितरिति पाठेपि गाएव विरचरूपायत्त्वयोदुत्पन्नत्वात् सर्वे सुता अगावइति वचनात् अलब्धशरणानि रक्षकहीनानि भेद
बुध्या मदधिष्ठानेन भवंतीति पृथक्दृष्ट्या ये द्रक्ष्यंति अघेन क्षतानष्टादृष्टिर्येषां तान् मदीयाः धिकृतो दंडनेता यायमः तस्य गृ

येषां विभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः विप्रास्तु कोन विषहेत यदर्हणांभः
सद्यः पुनातिसहचंद्रललामलोकान् ॥ ८ ॥ येमेतनूर्द्विजवरान् दुहतीर्मदीयाभूतान्यलब्धशरणानि चभेद
बुध्या द्रक्ष्यंत्यघक्षतदृशोत्यहिमन्यवस्तान् गृध्राः रुषाममकुषंत्यधिदंडनेतुः ॥ ९ ॥ ये ब्राह्मणान् मयि
धियाक्षिपतोर्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः वाण्यानुरागकलयात्मजवद्गृणंतः संबो
धयंत्यहमिवाहमुपाहृतस्तैः ॥ १० ॥

तु ध्राः कारादूताः अहिवत् मन्युर्येषां ते कुषाक्रोधेन कुर्वंतीति चंचुभिश्छिंदंति ॥ ९ ॥ एवंभूतास्तुमां वशीकुर्वंतीत्याह ये क्षिपतः पु
रुषं भाषमाणानपि ब्राह्मणान् संबोधयंति मयि याधीस्तया वासुदेवदृष्ट्या अर्चयंतः संतः तुष्यद्धृदः प्रीयमाण
चित्ताः स्मितमेव सुधा तया उक्षितं पद्मतुल्यं वक्त्रं येषां अनुरागकलया प्रेमशोभया वाचा गृणंतश्च स्तुवंतः यथा कुपितं
मात्मजं स्निग्धः पिता सत्पुत्रो वा पितरं अहमिव मद्गुरु युष्माभिर्वा तैरहमुपाहृतो वशीकृतः ॥ १० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तस्मात् स्वैवमायमभिप्रायं अलक्षमाणो ज्ञानेनेतो युष्मदपराधोचितां गतिं सद्यः प्राप्य मत्समीपं इतो प्राप्नुवतां तदितिसत्वं मेऽनुग्रहः
तमेवाह यत् भृतयोर्विवासः अचिरतः शीघ्रं कल्पतां संपद्यतां समाप्यतामिति १२ उशतीं प्रियां देवीं द्योतमानां ऋषिकुल्यां ऋष
यो मंत्राः तद्रूपां ऋषिकुल्यां यायामितिवा सरस्वतीं वाचं आस्वाद्य तन्माधुर्यमनुभूय सर्पप्रायेण मन्युना दष्टानामपि क्रोध
विषव्याप्तानां हि मनोरमानुभवाभावात् प्रियभाषणमपि न सहते तेषां तु आत्मा मनः नातृप्यत् अलमिति नामन्यत १३ सतीं नाद्दष्ट
श्रेष्ठां व्यादाय प्रसार्य कर्णं दत्वेत्यर्थः लघ्वीं मिताक्षरीं गुरुभिरर्थैर्गह्वरां दुःप्रवेशां अगाधामभिप्रायतः गंभीरामर्थतः विगाह्य वि

तत्र स्वभर्तुरवसायमलक्षमाणा युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः भूयो ममांतिकमितां तदनुग्रहो मे यत्क
ल्पतामचिरतो भृतयोर्विवासः १२ ब्रह्मोवाच अथ तस्यागतां देवीमृषिकुल्यां सरस्वतीं नाऽस्वाद्य मन्यु
५३ प३ दष्टानां तेषामात्माऽप्यतृप्यत १३ सतीं व्यादाय शृण्वंतो लघ्वीं गुर्वर्थगह्वरां विगाह्यागाधगंभीरां न विदु
स्तच्चिकीर्षितं १४ ते योगमाययारब्धपारमेष्ठ्यमहोदयं प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः १५
ऋषय ऊचुः न वयं भगवन् विद्मस्तव देव चिकीर्षितं कृतो मेऽनुग्रहश्चेति यदध्यक्षः प्रभाषसे १६ ब्रह्मण्य
स्य परं दैवं ब्राह्मणाः किल ते प्रभो विप्राणां देवदेवानां भगवानात्मदैवतं १७ राम राम राम राम

चार्यापि किमस्मानभिनंदतिवा अस्मत्कृतं दंडं वा संकोचयतीति न विदुः १४ ततश्चाभिनंदतीति ज्ञात्वा ते प्रहृष्टाः संतः प्रोचुः क्षु कुपि राम
भितारोमांचिताः त्वक् येषां कुपिते इति पाठे संजातरामकूपा त्वक् यारोमांचितत्वमेवोक्तं आरब्धः आविष्कृतः पारमेष्ठ्यस्य परमैश्वर्यस्य म
होदयः परमोत्कर्षो येन तं अधिराजत्वमाविष्कृत्य राजशिक्षार्थं ब्राह्मणान्मानयतीति ज्ञात्वेत्यर्थः १५ अध्यक्षः सर्वेश्वरः सन् त स्य ५३
द्वीयात्मकृतं मन्तु इति त्वा मयापराधः कृत इति तथा तदनुग्रहो मे इत्यादि वचनेन ममानुग्रहश्चेति यत्प्रभाषसे तेन यच्चिकी
र्षितं तन्न विद्मः १६ किं तेन लोकशिक्षार्थं सूचितं परमार्थमाहुः विप्राणामिति देवदेवानां देवपूज्यानामपि भगवान् त्वं आत्मा च दैवतं
च १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकशिक्षार्थताप्रपंचः त्वत्त इत्यष्टभिः धर्मस्त्वत्त एव भवति रक्ष्यते च त्वदवतारैः परमः फलरूपः अतः गुह्यः गोप्यः न च स्वर्गादिफलव
द्विकारी किंतु निर्विकारो मतः अत एवंभूतस्य तवेदं लोकशिक्षामात्रमिति भावः १८ विपरीतं चेदमित्याहुः तरंतीति यस्यानुग्रहो दैव
निवृत्ताः विरक्ता योगिनश्च संतो मृत्युं तरंति स भवान् परैरनुगृह्येतेति किंचित्तु न किंचिदित्यर्थः १९ यच्चोक्तं यत्सेवया चरणपुष्प
वित्ते रेणुसघः क्षेता खिलमत्व प्रतिलक्ष्मीशालं इत्यादि तदस्यं चासंसंभावितमित्याहुः द्वाभ्यां यं वै विभूतिर्लक्ष्मीः अन्यनुवेलं अवसरे
वसेरेउपयाति सेवते धृतः पादरेणुर्यस्याः धन्यैः सुकृतिभिरर्पितं अग्रे यत्तुलस्या नवं दाम माल्यं तद्दाम स्थानं यस्य तस्य मधुव्रतप
तेः भ्रमरसुखः स्पलोकं स्थानमंघ्रिं कामयमानेव २० विविक्तचरितैः विशुद्धैः परिचरणैः अनुवर्त्तमानानां सेवमानामपि यानात्याद्रिय
तू नातीवाद्रियतवान् स एवंभूतः स्वयं भावः इत्थं नामातिलंपटतया लक्ष्मीस्तां सेवते कथं एवं हि मामेन अयं हि सारग्राही मधुव्रतः

त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव धर्मस्य परमो गुह्यो निर्विकल्पो भवान्मतः १८ तरंति ह्यंजसा मृत्युं निवृत्ता य
दनुग्रहात् योगिनः स भवान् किंस्विदनुगृह्येत यत्परैः १९ यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिर
सा धृतपादरेणुः धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना २० यस्त्वां विविक्तचरितै
रनुवर्त्तमानां नात्याद्रियत्परमभागवतप्रसंगः स त्वं द्विजानुपथपुण्यरजःपुनीतः श्रीवत्सलक्ष्म किमगा भगभाज
नस्त्वं २१

चंचलश्च स चाग्रिगतां तुलसीं सह परिवारां निश्चलं सनुरमेत अतोंघ्रिलावण्यमत्यधिकं स्यात् ततोहं वक्षसि स्थिताऽपि यांति
जनादिवहं सेवकसंघर्षं मंगीकृत्यापि तुलस्या सह सापत्न्येनापि चरणौ सेविष्यामीति तदेवमस्तोत्सुक्येनानुवर्त्तमानामपि तां
नातीवाद्रियसे यतः परमभागवतेष्वेव प्रेष्ठः प्रसंगवान् स एव परमसौभाग्यनिधिस्त्वं अतो ब्राह्मणप्रसादात् मां श्रीर्निविजहातीत्य
लभ्यलाभत्वेन निर्देशो न समंजस इति किंच स्वतएव त्वं भगभाजः भजनीया ये गुणास्तेषामाश्रयः परमशुद्धः अतस्त्वां द्विजानाम
नुपथं पथि लग्नं यत्पुण्यं रजः तथा श्रीवत्सलक्ष्म च किं पुनीतः पवित्रीकुरुतः किं किमर्थं चागात् अभ्यागाः प्राप्तः भूषणत्वेन स्वीकृत
वानसि अतो यत्सेवया चरणपद्मपवित्ररेणुमित्यादि वचनं लोकसंग्रहमात्रमित्यर्थः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्ममूर्त्तेश्चैतवेदमुचितमेवेत्याहुः धर्मस्येति त्रिभिः त्रिष्वपि युगेष्वाविर्भवतीति त्रियुगः यद्वा त्रीणि युगलानि त्रियुगाः षड्गुणाः भगवच्छब्द।
वाच्याः संत्यस्येति त्रियुगः हे त्रियुग धर्मरूपस्य तव त्रिभिः पद्भिः स्वैर साधारणैः तपःशौचदयाभिः सत्यस्य धर्मविग्रहस्यैव पि कुलावनु
वर्त्तमानत्वात् त्रिभिरित्युक्तं भृतं पालितं किं कृत्वा नास्माकं वरदया सत्त्वेन तनुवा तत्त्वा सत्त्वमूर्त्या तदभिघातिनि तेषां पापानाम भि
अ२ घातके रजस्तमसी निरास्य निराकृत्य द्विजानां देवतानां च प्रयोजनाय नूनं भृतं यद्वा हि लोपरूपं निरस्येति अस्माकं तन्निवर्त्तयेत्यर्थः
२२ आत्मगोपं त्वयैव रक्षणीयं द्विजोत्तमानां कुलं यदि हस्फुटं त्वं न गोप्ता न रक्षिता स्यन् प्रत्ययान्तत्वात् न षष्ठी प्रयोगः वृषः श्रे

धर्मस्यते भगवतस्त्रियुगस्त्रिभिः स्वैः पद्भिश्चराचरमिदं द्विजदेवतार्थं नूनं भृतं तदभिघाति रजस्तमश्च सत्त्वेन
नो वरदया तनुवा निरस्य २२ नत्वं द्विजोत्तमकुलं यदि हात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन तर्ह्येव नं
क्ष्यति शिवस्तव देव पंथा लोकोग्रहीष्यदृषभस्य हि तत्प्रमाणं २३ तत्तेनभीष्टमिव सत्त्वनिधेर्विधित्सोः क्षेमं
जनाय निजशक्तिभिरुद्धृतारेः नैतावता त्र्यधिपतेर्वत विश्वभर्त्तुस्तेजः क्षतं त्ववनतस्य स ते विनोदः २४ यं
वानयोर्दममधीश भवान् विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकं अस्मासु वा य उचितो ध्रियतां स दंडो येना
गसौ वयमयुंक्ष्महि किल्बिषेण २५

ष्ठः हे देव पंथा वेदमार्गो नंक्ष्यति नाशं यास्यति ऋषभस्य श्रेष्ठस्य हि यस्मात्तत् अनर्हणं असून्नृतं च अग्रहीष्यत् तदुक्तं गीतासु यद्य
दाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते इति २३ नचैत्वत्ति चेत्तत्राहुः तत्ते वेदमार्गनाशनं इव विद्रुतेलि राम
कोक्तिः सत्त्वनिधित्वाज्जनाय क्षेमं विधातुमिच्छोः अतएव निजशक्तिभिः राजादिभिः रुत्थापितं धर्मप्रतिपक्षस्य अनस्तत्त्व ब्रह्मसु ५४
त्येवनतियुक्तेव ननु महतोन्येषु नतिस्तेजो हानिकरी तत्राहुः एतावता नुधर्मत्राणप्रयोजनेन अचेतनस्य नमनेन कृतावतस्तव तेजः स्वभा
वः न क्षतं नक्षीणं यतः सं नमनादिस्तेविनोदः २४ शापाग्रहं परित्यज्य विज्ञापयति यं चान्यदेउ विधास्यति भवान् वृत्तिं नु अधिकं जीविकां अ२
व२ वा तत्सर्वमनुमन्यामहे यद्वयं निरपराधौ वतो किल्बिषेन शापेन अयुंक्ष्महि योजितवंतः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्कारितान्छापं युष्माकं नापराध इत्याश्वासयन्नाह एतौ सद्य एवासुरयोनिं प्राप्स्यतोऽप्याशु मत्सामीप्यमागमिष्यतः संरंभेण क्रोधा
वेशेन संभृतः संचितो यः समाधिः एकाग्रता तेनानुबद्धो दृढीकृतो योगो ययोः हे विप्राः यो वः शापः युष्मत्कृतः शापः तदितितमः म
यैव निर्मितः निर्मितः इत्येवेतजानीत २६ नेत्रोत्सवजनकं विकुंठं हरिं तन्निवासं च वैकुंठलोकं स्वयंप्रकाशं प्रकाशांतरानपेक्षं सत्व
परिणामत्वात् अनुमान्य अनुज्ञाप्य ममेव तनुमतं संमतं इदमत्र तत्वं यद्यपि सनकादीनां क्रोधो न संभवति न च भगवत्पार्षदयोर्ब्रा स्यो

श्रीभगवानुवाच एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ भूयः सकाश
मुपयास्यत आशु यो वः शापो मयैव निर्मितस्तदवेत विप्राः २६ ब्रह्मोवाच अथ ते मुनयो दृष्ट्वा
नयनानंदभाजनं वैकुंठं च स्वयंप्रभं २७ भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च प्रतिजग्मुः प्रमु
दिताः शंसंतो वैष्णवीं श्रियं २८ भगवाननुगावाह यातं माभैष्टमस्तु शं ब्रह्मतेजः समर्थोपि हंतुं
नेच्छे मतं तु मे २९

तदधिष्ठानं विकुंठं २

स्यापत्तिकौशल्ये न च भगवतः स्वभक्तोपेक्षा न च वैकुंठगतानां पुनर्जन्म तथापि भगवतः सिसृक्षादिवत्कदाचित् युयुत्सा समाज
नि तदान्येषामल्पबलत्वात् स्वपार्षदानां तुल्यबलत्वेपि प्रातिपक्ष्यानुपपत्तेरेतावेव ब्राह्मणानिवारणे प्रवर्त्य तेषु च क्रोधमुद्दीप्य त
च्छापव्याजेन प्रतिपक्षौ विधाय युद्धकौतुकं संपादनीयमिति भगवतो वर्ण्यं मितीं अतः सर्वं संगच्छते तदिदमुक्तं शापो मयैव नि
र्मित इति माभैष्टमिति अस्तु शं मिति हंतुं नेच्छे मतं तु मे इत्यादि च २९

प्रत्येष्यतं प्रत्येष्यथः निकाशं समीपं ३० । दुस्तरात् ब्रह्मशापात् हरिलोकतः पततौ विविशेषः हरिलोकत एव हतश्रियावभूतामिति वा विगतस्मयौ न स्मर्गर्वौ च ३२ विकुंठस्य धिषणात् स्थानात् पुत्रकाहे देवाः ३३ काश्यपं तेजो वीर्यं प्राप्तौ सहैव गर्भं प्रविष्टौ यमौ ३४ तयोस्तेजसा

मयि संरंभयोगेन निस्तीर्य ब्रह्महेलनं प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ३० द्वाःस्थावादिश्य भगवान् विमानश्रेणिभूषणं सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ३१ तौ तु गीर्वाणऋषभौ मा.ति.२
दुस्तराद्धरिलोकतः हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ ३२ तदा विकुंठधिषणात्तयोर्निपतमानयोः हाहाकारो महानासीत् विमानाग्र्येषु पुत्रकाः ३३ तावेव ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः दि
५५ तेर्जठरनिर्विष्टं काश्यपं तेज उल्बणं ३४ तयोरसुरयोरद्य तेजसा यमयोर्हि वः आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति ३५ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैरपि दुरत्यययोगमायः
क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेन कियानिहार्थः ३६ इति श्रीभागवते महापुराणे तृतीयस्कंधे षोडशोऽध्यायः १६ श्रीराम श्रीराम नारायण वासुदेव श्रीराम श्रीराम ५५

वस्तेज आक्षिप्तं तिरस्कृतं न चात्र प्रतिविधिः शक्यः यत एतर्हि इदानीं भगवानेव तदेव विधातुमिच्छति ३५ तथापि कोऽप्युपायो विमृश्यतामिति चेत्तत्राह विश्वस्येति त्रयाणां गुणानामीशः स एव सर्वोत्कर्षकालेन क्षेमं विधास्यति विमृशेन विमर्शेन ३६ इति तृतीये षोडशः १६

ततःसप्तदशेजन्मतयोर्लोकेभयंकरं हिरण्याक्षप्रभावश्चवर्ण्यतेदिग्जयेऽद्भुतः १ क्षेमंविधास्यतीतिब्रह्मवचनानंतरंशंकयात्यक्ताः १ भर्तु
रादेशात् लोकान्सपालांस्त्रीन्चंडिमुहुराक्रंदयिष्यतइतिवाक्यात् स्वापत्याभ्यांपरिशंकिनीदेवोपद्रवंशंकमाना २ तत्रैवनिपे न२
तुः ३ हभुवः अचलैःसहिताःभुवःप्रदेशाः केतवश्चउदयंचक्रुरितिशेषः ४ फूत्कारानितितीव्रवायुशब्दानुकरणं नगपतीन्
महावृक्षान् वात्याएवअनीकंयस्यरजएवध्वजोयस्य ५ उद्धसंत्यइवतडितोयेषुतेषामंबुदानांघटयासमूहेननष्टाभागणाः

श्रीमैत्रेयउवाच निशम्यात्मभुवागीतंकारणंशंकयोज्झिताः ततःसर्वेन्यवर्त्ततत्रिदिवायदिवौकसः १
दितिस्तुभर्तुरादेशादपत्यपरिशंकिनी पूर्णेवर्षशतेसाध्वीपुत्रौप्रसुषुवेयमौ २ उत्पाताबहवस्त
त्रनिपेतुर्जायमानयोः दिविभुव्यंतरिक्षेचलोकस्योरुभयावहाः ३ सहाचलाभुवश्चेलुर्दिशः
सर्वाःप्रजज्वलुः सोल्काश्चाशनयःपेतुःकेतवश्चार्त्तिहेतवः ४ ववौवायुःसुदुःस्पर्शःफूत्कारानी
रयन्मुहुः उन्मूलयंन्नगपतीन्वात्यानीकोरजोध्वजः ५ उद्धसत्तडिदंभोदघटयानष्टभागणे
प्र२ व्योम्निप्रविष्टतमसानस्मव्यादृश्यतेपदं ६ चुक्रोशविमनावार्द्धिरुदूर्मिःक्षुभितोदरः सोदपानाश्चस
रितश्चुक्षुभुःशुष्कपंकजाः ७ मुहुःपरिधयोभूवन्सराह्वोःशशिसूर्ययोः निर्घातारथनिर्ह्रादा
विवरेभ्यःप्रजज्ञिरे ८
न२

सूर्यादिप्रभासमूहोयस्मिन् पदंस्थानंनव्यादृश्यतस्मईषदपिनादृश्यत् ६ वार्द्धिःसमुद्रःविमनाइवउद्धताऊर्मयोयस्मात् क्षुभि
तमुदरंस्थामकरादयोयस्मिन् उदपानैर्वापीकूपादिभिःसहिताःशुष्काणिपंकजानियासु ७ परिधयःपरिवेषाःसराह्वोः
राहुग्रस्तयोःराहुग्रस्तयोः निर्घाताःनिरभ्रगर्जितानि रथनिर्ह्रादतुल्याःध्वनयःविवरेभ्यःगिरिगुहाभ्यः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृगालानामुलूकानां चंकारैः ध्वनिभिः सह एवं ग्रामसिंहाः श्वानः १० कर्कशैः तीक्ष्णैः हेक्षैः खरैः खाद्भिरोगर्दभः जातिशब्दस्तस्मिन्
रभसः संभ्रमोपि यथावन्नृथशः संघशः ११ रासभशब्दात्रस्ताः १२ सर्वतः क्रोशन्तः गावोत्रसन् असृग्दोहाः अश्रुभूवुः देवलिंगानि च्युनु २०२
दनुप्रतिमानीअश्रुस्रावश्चासीदित्यर्थः १३ पुष्पन्तमानुगुरुबुधादीन् भगणान् बहूनि नक्षत्राणि च अन्ये शेरग्रहा मंगलादयः कू२
अतिचेरुः अतिक्रम्य जग्मुः वक्रगत्या प्रत्याहत्य युयुधुश्च १४ ब्रह्मपुत्रान् ते विना तेषां स्वशापादिज्ञानात् १५ वध्यमानं आत्मपौरुषं
पूर्वसिद्धं स्वेपास्तपंययोः १६ निरुद्धा व्याप्ताः काष्ठा दिशो याभ्यां स्फुरत्यंगदानि येषुते भुजा ययोः अंगदेति चावंतत्त्वमार्षं शोभनाको

२६ अंतर्योमेषु मुखतोवसंत्योवह्निमुल्वणं शृगालोलूककंटकारैः प्रणादुरशिवाः शिवाः एवं संगीतवद्रोदनवदुन्नमय्य शिरो
धरं व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः १० खराश्च कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलं खार्कार रभसामत्ताः प
र्यधावन्वरूथशः ११ रुदंतोरासभत्रस्तानीडादुदपतन्खगाः घोषेरण्ये च पशवः शकृन्मूत्रमकुर्वत १२ गावोच
सरत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः व्यरुदन्देवलिंगानि द्रुमाः पेतुर्विनानिलं १३ ग्रहान्पुण्यतमानन्ये भगणांश्चा
पिदीपिताः अतिचेरुर्वक्रगत्या युयुधुश्च परस्परं १४ दृष्ट्वान्यांश्च महोत्पातानतत्तत्त्वविदः प्रजाः ब्रह्मपुत्रान्ऋते भीता
मेनिरे विश्वसंप्लवं १५ तावादिदैत्यौ सहसाव्यज्यमानात्मपौरुषौ ववृधातेऽश्मसारेण कायेनाद्रिपती इव १६ दिवि
२८ स्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ गां कंपयंतौ चरणैः पदे पदे कट्या सुकांच्यार्कमतीत्य तस्थतुः
प्रजापतिर्नाम तयोरकार्षीद्यः प्राक्स्वदेहाद्यमयोरजायत तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्र
तः १८

म१ तः पस्या तयाकल्या १७ यमयोर्मध्ये यः स्वदेहात्प्रथमं जायत तं यथा हिरण्यकशिपुं विदुः सादितिः प्रथमं यं असूत तं हिरण्याक्षं यथाविदुः
तथानामकृतवानित्यर्थः अयंभावः यद्यपि हि गर्भाधानस्य समये योनिपुष्पविशेषार्यं द्विधाविभक्तं आदिप्रआक्रांतं प्रविशति तदा यमो
नयोश्च पिहितः भवतः प्रवेशक्रमविपर्ययेण मातृतः प्रसूतिः यदा विशेत् द्विधाभूतं योनिपुष्पं परिक्षरन् द्वौ तदा भवतो गर्भौ सूतिर्वेशविपर्ययादिति गा५दे॥
२ पिंडसिद्धिस्मरणात् अतः स्वदेहात्पूर्वं योजान स्तस्य हिरण्यकशिपुरिति दितेः प्रथमं प्रसूतस्य हिरण्याक्ष इति नामकृतवानुः इति १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोर्भ्यामुद्धतः ब्रह्मवरेणाकुतोमृत्युः १९ रणं युद्धं २० मनसा शौर्येण बलेन वरेण च उत्सिक्तं गर्वितं असृण्यं निरंकुशं निलिल्यिरे लीना बभूवुः २२ स्वेन महसा तेजसा तिरोहितान् सहसा दृष्ट्वा क्षीवान् मत्तान् क्लीबान् इति पाठे पौरुषहीनान् २३ ४ सन्ना अवसन्ना धीर्येषां ते

चक्रे हिरण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च वशे सपालांल्लोकांस्त्रीनकुतोमृत्युरुद्धतः १९ हिरण्याक्षोनुजस्तस्य प्रियः
३ प्रीतिकृदन्वहं गदापाणिर्दिवं यातो युयुत्सुर्मृगयन्रणं २० तं वीक्ष्य दुःसहजवं रणत्कांचननूपुरं वैजयंत्या स्रजा जुष्टमंसन्यस्तमहागदं २१ मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयं भीता निलिल्यिरे देवाः तार्क्ष्यत्रस्ता इवाहयः
२२ सवै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् सेंद्रान् देवगणान् क्षीवानपश्यन्व्यनदद्भृशं २३ ततो निवृत्तः क्रीडिष्यन् गंभीरं भीमनिस्वनं विजगाहे महासत्वो वार्द्धिं मत्त इव द्विपः २४ तस्मिन् प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः अहन्यमाना अपि तस्य वर्चसा प्रधर्षिता दूरतरं प्रदुद्रुवुः २५ सवर्षपूगानुदधौ महाबलश्चरन्महोर्मीन् श्वसनेरितान्मुहुः मौर्व्याभिजघ्ने गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः २६ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगं २७ त्वं लोकपालोधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनां विजित्य लोकेखिलदैत्यदानवान् यद्राजसूयेन पुरायजत्प्रभो २८ सएवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपांपतिः रोषं समुत्थं शमयन् स्वया धिया व्यवोचदंगोपशमं गता वयं २९ पश्यामि नान्यं पुरुषात्पुरातनाद्यः संयुगे त्वां रणमार्गकोविदं आराधयिष्यत्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ३० श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम ध६

वर्चसा तेजसा प्रधर्षिता अभिभूताः संतः महोर्मीन् अभिजघ्ने मौर्व्या मारयतीति मौर्वी का सा आयसं तन्मया यद्वा मूर्वाना मत्स्यविशेषः यत्र मुरत्वाद्दृढनिबद्ध्येत्यर्थः विभावरीसंज्ञा आसेदिवान् प्राप्तः २६ असुराणां लोकः पाताल तत्पालकं प्रलब्धुं उपहसितुं प्रणिपत्य २७ यद्यस्मात् राजसूयेन भवानयजत् २८ उपशमं युद्धादिकौतुकादुपरमं २९ युद्धमार्गे निपुणं त्वां यस्तोषयिष्यति तमिह गच्छ गृणते स्तुवंति ३०

आरात् शीघ्रं विस्मयः नष्टगर्वः वीराशयैः रणांगणे नृपाणि वराहाद्यवतारान् ३१ इति तृतीये सप्तदशोऽध्यायः अष्टादशे हिरण्याक्ष
धराधर्त्तुर्वराहयोः निर्विशेषमहायुद्धं देवक्षाभिलिनृप्यते १ अनियोद्धारं श्रुत्वा महामनाः शपिष्य इति यदुक्तं तत्तु विगणय्य अग्रेणयि
त्वा यत्ना यत्नोद्गुमेदः अभिताजयतीत्यपि जिनुतं श्रीहरिं प्रकर्षेणोद्ध्वंनीयमानावनिर्येन अग्रदंष्ट्रयादंष्ट्राग्रेण स्वचेष्टः हिरण्याक्ष
तेजांसि अनेन श्रियायुक्तं यतुतेना क्ष्मानेत्रण मुष्णंतं निरस्कुर्वैतं अहो चित्रं वनगोचरो मृगः वारिचरो वराहः २ एहि आगच्छ रेसी

तं वीरमाराद्भिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः यस्त्वद्विधानामसतां प्रशांतये नृपाणि धत्ते सदनु
ग्रहेच्छया ३१ इति श्रीभागवते महापुराणे तृतीयस्कंधे हिरण्याक्षदिग्विजयो नाम सप्तदशोध्यायः ॥ १७
श्रीमैत्रेय उवाच तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः हरेर्विदित्वा गतिमंग नार
दाद्रसातलं निर्विविशे त्वरान्वितः १ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया मुष्णंतम
क्ष्णा स्वरुचोरुणश्रिया जहास चाहो वनगोचरो मृगः २ आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां वि
श्वसृजेयमर्पिता न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ३

५७ कसां पातालवासिनां नोस्माकं समर्पिता अन्यथा पातालावतरणमस्यानघटनइतिभावः हिरण्याक्षेणाधिक्षेपार्थं प्रयुक्तापि राम ५७
भारतीवस्तुतो भगवंतं स्तौति तथाहि वनगोचरः जलेशयानः श्रीनारायणाः स एव योगिभिर्मृग्यते दुष्टान् वार्हंतु मृगयत हं २
इति मृगः अज्ञ नास्ति ज्ञोयस्मात् सर्वज्ञेत्यर्थः सुराधमाय स्मात् हे सुरोत्तम ममेक्षमाणस्यापि सतः मामनादृत्यापि त्वम
नया सह वर्त्तमानः असमदीयं स्वस्ति समस्तं मंगलं राज्यं यास्यसि प्राप्स्यसि नात्र संदेहः तथाप्यस्मत्कृपया विमुंचेत्यर्थः आ
सादिता लीलया स्वीकृता सूकराकृतिर्येन ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभवायनाशाय भृतः पुष्टः वसुनस्तु मोक्षाय भृतो धृतः अश्विनइत्यर्थः यो भवान् परोक्षेण चौर्येण जयतीति तथा वसुनस्तु हर
तएव स्थित्वा जयतीति संस्थाप्य हत्वा वसुनस्तु योगमायायां मम चिंत्यं बलं यस्य अत्यंपौरुषं यस्मात् तं त्वां सम्यक् स्थापयि
त्वा भक्त्या हृदि स्थिरीकृत्येत्यर्थः हे मूढप्रमूढान् शाति आप्यायतीतित था प्राप्नोतीविति धातुः सुहृदां शुचः संसार दुःखानि
भंजेनाशयामि यतस्त्वं सर्वेषां बंधिवानपि मोचयसीति भावः ४ अस्मद्गुरुच्युतयाः पिगदया अशीर्णशीर्षयस्य तथा

त्वं नः सपत्नैरभवाय किं भृतो यो मायया हंत्यसुरान् परोक्षजित् त्वां योगमायाबलमल्प
पौरुषं संस्थाप्य मूढ प्रभजे सुहृत् शुचः ४ त्वं संस्थितेनगदयाशीर्णशीर्षएषः स्मद्गुरुच्यु ति २
तयापि चतुर्भुजं बलिंहरं त्वं षयोयेचदेवाः स्वयं सर्वेन भविष्यंत्यमूलाः ५ सचुद्यमानो
रिदुरिक्तोतामेरे दंष्ट्राग्रगंगामुपलक्ष्य भीतो तोदं मृषनु निरगादचुमध्या कुंहाहतः सके
रणुर्येथमः ६

भृतेत्वयि सुखं स्थितोसिति यत्तु भ्रमम धुना बलिंहरं ति नवीनाभा कायेच पूर्वे भक्ताः ऋषयो देवा अन्ये सर्वे स्वयमेवक्त
यमं विनैव अमूलान भविष्यंति किंतु हृढमूला अभविष्यंतीत्यर्थः ५ सहरिः अरेः दुरुक्तान्नेवतामराः स्त्रविशेषाः ते श ३ २
सुद्यगानो व्यथ्यमानः दंष्ट्राग्रगतां पृथ्वीं भीतामालक्ष्यंतोदं दुरुक्तेव्यथां मृषत् सहमान एव निर्गतः कोरेणुर्हस्तीनीव
स्तुतस्तु अरिदुरुक्तितः असुरे निमित्त भृतो सुद्यमानः यथाश्रुतार्थ ग्राहीणां प्रसोदीनां दृष्ट्वा अनुकंपयापीड्यमान
इत्यर्थः तोदं मृषत् इत्यस्याप्यय मेवार्थः ६ व्यथां २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सलिलान्निर्गच्छंतमनुगतः सन् हिरण्यवत्कपिशाः केशायस्यऽक्षोभकरः करालादंष्ट्रायस्य अशनिवन्निस्वनोयस्य निर्लज्जा
नामसतां किं विगर्हितमस्तिनिंद्यं भयाभावात् पलायनं नायुक्तमित्यर्थः यत्नुगत्नुगतक्रियः नसंतोयेभ्यः तेषां कृपालूनां
कृतः२ किं विगर्हितं न किंचित् अंतः कृपालुत्वोदृष्ट्वा प्रितभूरक्षणार्थं किंचित्पलायनमपिनंनिंदितमित्यर्थः यद्वालोकापका
रायभुवमुद्धरतोऽनुद्रवणमनुचितंसतांनो दैत्यआत्मानमेवाधिक्षिपति गतन्हियां स्वार्थेकपराणां असतामस्माकं किं

तंनिःसरंतं सलिलादनुद्रुतोहिरण्यकेशो द्विरदयथाझषः करालदंष्ट्रोशनिनिस्वनोब्रवीद्गतन्हि
५८ यां किंत्वसतां विगर्हितं ७ सगामुदस्तात्सलिलस्यगोचरे विन्यस्यतस्यामदधात्स्वसत्त्व आधात्स्व
सत्वं अभिष्टुतो विश्वसृजाप्रसूनैरापूर्यमाणो विबुधैः पश्यतोरेः ८ परानुषक्तं तपनीयोप
कल्पं महागदं कांचनचित्रदंशं मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ९

विबुधैः१ विगर्हितमस्ति अपितु नास्त्येव धिगस्मानित्यब्रवीदित्यर्थः ७ भगवान् विश्वसृजाभिष्टुतो विविधैश्च प्रसूनैरापूर्यमा रामस्व२
णः पाठांतरे विश्वसृजां प्रसूनैरभिष्टुतइति सलिलस्योदस्तात् उपरिष्टव्यवहारगोचरे देशे गां विन्यस्य स्वसत्त्वमाधा ५८
रशक्तिं निहितवान् अरेस्तस्य पश्यत एव ८ पराकृष्टमनोऽनुषक्तं लग्नं तपनीयैः कल्पं सुवर्णभरणं कांचनमयं चित्रं दंशः
कवचं यस्य तं दैत्यं प्रचंडमन्युस्तं अधिक्षेपादिकं चानुकरणं मात्रं दैत्यवाक्यभीतानां देवानां भयनिवृत्त्यैवस्तुतस्तेन [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रामसिंहान् शुनः प्रतिमुक्तस्य बद्धस्य । कविकत्थनं श्लाघां १० न्यासहरा निक्षेपहराः द्राविताः पलायनं कारिताः अथा
पि असमर्थो अपि तिष्ठामः न किंच न स्थेयं स्थातव्यमेवास्माभिः नत्किमित्याह क्व यामः गंतव्यदेशाभावात् ११ पद्रथा
नां पदातीनां यूथपास्तेषामधिपः मुख्य इत्यर्थः अस्वस्त्यं पराभावार्थं आशु घटस्व प्रयतस्व अनूहो निर्वितर्कः यो

श्रीभगवानुवाच सत्यं वयं भो वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान् न मृत्युपाशैः प्रतिमु
क्तस्य वीरा विकत्थनं तव गृह्णन्त्यभद्र १० एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविता स्ते
तिष्ठामहेथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरं ११ त्वं पद्रथानां किल यूथपाधिपो
घटस्व नोस्वस्तय आश्वनूहः संस्थाप्य चास्मान् प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपिप
र्त्यसभ्यः १२ श्रीमैत्रेय उवाच सोधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं आजहारोल्बणं क्रो
धं क्रीड्यमानो हिराडिव १३ सृजन्नमर्षितः श्वासान् मन्युप्रचलितेंद्रियः आसाद्य तरसा दैत्यो
गदयाभ्यहनद्धरिं १४ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि अवंचयत्तिरश्चीनो योगारूढ इ र ३
वांतकं १५ पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदं
१६ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः आजघ्ने स तु तां सौम्य गदया कोविदोहनत्

नातिपिपर्ति निस्तरयति पालयति वा असावसभ्यः सभायामनर्हः १२ सोधिक्षिप्तः सत्यं वयमिति श्लोकेन रुषा प्रलब्धश्च उप
हसितश्च एते वयमिति द्वाभ्यां क्रीडां कार्यमाणो हिराट् महासर्प इव १३ मन्युना प्रचलितानि क्षुभितानींद्रियाणि यस्य १४
अंतकं मृत्युं १५ १६ सोथ विदुर त्वां गदां अप्राप्तामेवाहनत् १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हर्यक्षो हिरण्याक्षः १८ स्वेदोस्रस्वेदमानयोः दिदृक्षुः गदाहस्ताभ्यां आहताभ्यां मानिषयोः क्षताद्अस्रवती निःक्षिताऽस्रवंतु धिर्येनस्य घ्राणमवघ्राणं
तेनविवृद्धो मन्युर्ययोः विचित्रान्मार्गान्गदायुद्धस्य भ्रमणभेदानुद्दलोगेः तयोर्निमित्तभूतायां शुष्मिणोर्मनस्वयोरर्दिषभयोः प्रस्तु
तेपिइलायांपृथ्वीनिदर्थं वृषभोहि खलु बहूनि दिनानि संयुध्येतावुंग शृंगसंघर्षविदीर्णगलगलद्रुधिरो परस्परं महिष्य ७३
प्रोत्संरंभोत्पमकारितगजयूथपौयुद्ध्यमानौ तिष्ठत इति प्रसिद्धं १९ यज्ञावयवस्य यस्य तस्य च मह्यां महीनिमि
त्तं द्विषतः २० आगत्य च नारायणमाह किं कृत्वा दैत्यं विलक्ष्य कथंभूतं आसन्नं प्राप्तं शौंडीरं शौर्यमदोवा येन अपेत

एवं गताभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च जिगीषयासुसंरब्धावन्योन्यमभिजघ्नतुः १८ तयोस्तथास्ति
म्मगदाहतांगयोः क्षतास्रवतु घ्राणविवृद्धमन्य्वोः विचित्रमार्गांश्चरतो जिगीषयाव्यभादिलाया
५१ मिव शुष्मिणोर्मृधः १९ दैत्यस्य यज्ञावयवस्य मायया गृहीतवाराहतनोर्महात्मनः कौरव्य मह्यां
द्विषतो विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् २० आसन्नशौंडीरमपेतसाध्वसं कृतप्रतीकार
महार्यविक्रमं विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरः २१ ब्रह्मोवाच एष
ते देव देवानामंघ्रिमूलमुपेयुषां विप्राणां सौरभेयीणां भूतानामप्यनागसां २२ आगस्कृद्भयकृ
द्°स्मद्राद्धवरोसुरः अन्वेषन्नप्रतिरथो लोकानटति कंटकः २३ श्रीराम श्रीराम श्रीराम
(दुष्कृद)

साध्वसं यस्मात् कृतः प्रतीकारो येन अहार्यः अप्रतीकार्यो विक्रमो यस्य सहस्रणीः सहस्राणां नेता राम
२१ हे देव ते अंघ्रिमूलं प्राप्तानां देवादीनां एषोसुरः २२ आगस्कृत् दुष्टः अथवापराधी अपकारी तत्परिहाराय प्रवृत्तो भयकृत् तु ५१
भीतिकृत् ज्ञात्वा दुष्कृत् अर्थप्राणादिहर्ता अस्मत्तो राद्धो लब्धो वरो येन अन्वेषन् प्रतिरथमवलोकयन् अप्रतिरथः प्रति
पक्षशून्यः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यस्मात् एवंभूतायंतस्मादेनंमाक्रीडयहेदेव यथाउत्थितं क्षुभितं आशीविषंसर्पंवालः पुच्छाकर्षणादिनाक्रीडय निनद्दन् २४ स्वांआसुरींहेदेव स्वांमायांअघंपापरूपं २५ वेलांमेवाह एषेतिलोकानांछंवट्करीविनाशकरी छंवडित्य यंविनाशवर्त्तते २६ अभिजिन्मध्याह्नः सएवमौहूर्त्तिकोयोगः सन्मुहूर्त्तः शुभदः कालः आगात् गतप्रायः अ

आमु १ तोयावन्मुहूर्त्तशेषास्तितावदेवंसुदुस्तरंमनंनिस्तरजहि २७ त्वांमृत्युंत्वयेवशापानुग्रहकाले विहितंनिर्मितं आ

मैनंमायाविनंदृप्तंनिरंकुशमसत्तम आक्रीडवालवद्देवयथाशीविषमुत्थितं २४ नयावदेषवर्द्धे तस्वांवेलांप्राप्यदारुणः स्वांदेवमायामास्थायतावज्जह्यघमच्युत २५ एषाघोरतमासंध्या लोकछंवट्करीप्रभो उपसर्पतिसर्वात्मन्सुराणांजयमावह २६ अधुनैषोऽभिजिन्नामयोगो मौहूर्तिकोह्यगात् शिवायनस्त्वंसुहृदामाशुनिस्तरदुस्तरं २७ दिष्ट्यात्वांविहितंमृत्युमयमासा दितःस्वयं विक्रम्यैनंमृधेहत्वालोकानाधेहिशर्मणि २८ इतिश्रीभागवतेमहापुराणेतृतीय स्कंधेहिरण्याक्षवधेष्टादशोध्यायः मैत्रेयउवाच अवधार्यविरिंचस्यनिर्व्यलीकामृतंवचः प्रहस्यप्रेमगर्भेणतदपांगेनसोग्रहीत् १ ततःसपत्नंमुखतश्चरंतमकुतोभयं जघानोत्पत्यगद याहनावसुरमक्षजः २ साहतातेनगदयाविहताभगवत्करात् विघूर्णितापतद्रेजेतदद्भुतमिवाभ वत् ३

सादितःप्राप्तःशर्मणिसुखेआधेहिस्थापय॥२८ तृतीयेष्टादशः ॥ तुनविंशेविरिंच्यादिप्रार्थितेनमहामृधेनारोहेणहिर

८ ण्याक्षवधश्लाघ्यानुवर्ण्यते २ निर्व्यलीकंचतदमृतंचपांगेनतरे निष्कपटाभिप्रायंचतत् अतंच कालात्मनापिममहूर्ते वलमुपदिशतीतिप्रहस्यआपांगालोकेनतत्स्वीकृतवान् १ मुखतःअभिमुखेहनौकपोलस्याधोभागे अक्षजःब्रह्मणो घ्राणेंद्रियादाविर्भूतः २ साच गदयातेनहतातेनाविहताविच्युतासतीविघूर्णिताभूत्वापतत् रेजेच तत् भगवत्करात्पतनंपद्म नं १

८

लब्ध्वा तीर्थो लब्धावसरः सचनववाधेन प्राहरत् समानयत् बभूवेति वाक्यभेदात्सदृत्यस्यापौनरुक्त्यं ४ अग्रं समं भ्रमं चक्रं यस्य
विषज्जमानं विशेषणसंगप्राप्नुवंतं प्रति आतहितांतस्य भावमेज्ञानता आसमंतादासनुस्म ६ संदेत्यस्तामान्तचक्रे निशा
म्य दृष्ट्वा अग्रतो व्यवस्थितं च विलोक्य अमर्षेण क्रोधेन परिप्लुतानि क्षुभितानींद्रियाणि यस्य सः आदशनुदष्टवान् ७

६० स तदा लब्धतीर्थोपि नववाधे निरायुधं मानयन् समृधे धर्मं विष्वक्सेनं प्रकोपयत् ४ गदायामपविद्धा
यां हाहाकारे विनिर्गते मानयामास तद्धर्मं सुनाभं चास्मरद्विभुः ५ तं व्यग्रचक्रं दितिपुत्राधमेन स्वपार्ष
दमुख्येन विषज्जमानं चित्रावाचो तहितां खेचराणी तत्रास्मासनु स्वस्ति ते मुंजहीति ६ स तं निशाम्या
त्तरथांगमग्रतो व्यवस्थितं पद्मपलाशलोचनं विलोक्य चामर्षपरिप्लुतेंद्रियो रुषा स्वदंतच्छदमादशद्
स४ छ्वसन् ७ करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव अभिप्लुत्य स्वगदया हतोसीत्याहनद्धरिं ८॥
पदा सव्येन तां साधो भगवान्यज्ञसूकरः लीलया मिषतः शत्रोः प्राहरद्वातरंहसं ९ आह चायुधमा
धत्स्व घटस्व त्वं जिगीषसि इत्युक्तः स तया भूयस्ताडयन्व्यनदद्भृशं १० तां स आपततीं वीक्ष्य भगवा
न्समवस्थितः जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीं ११ स्वपौरुषे प्रतिहते हतमानो महासुरः
नैच्छद्गदां दीयमानां हरिणा विगतप्रभः १२

चक्षुर्भ्यां दहन्निव संचक्षाणः पश्यन् इवेति वस्तुतः क्रोधाभावमाह हतोसि ज्ञातोसीति वास्तवोर्थः ८ वातरंहसं ॥६०॥
वायुवेगं ९ घट स्वत्प्रयत्नं कुरु यतस्त्वं जेतुमिच्छसि १० ११ हतमानो गर्वो यस्य १२ राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वलनप्रयोज्वलनः तद्वल्लोलुपं ग्रसनच्युतं यज्ञाय विष्णुमालक्ष्य अकार्यकरत्वे दृष्टान्तः विप्रमुद्दिश्याभिचारं कुर्वन्
यथा १३ अतः स्वेच्छाकाशमध्ये चकाशीत् प्रकाशमानं तद्दीर्णोत्त्क्रतदीधितिदीप्तिर्यस्या निशातनेमि निनोतिनधा
रेण हरिरिन्द्रो यथा तार्क्ष्यस्य पतत्रमुक्षितं चिच्छेद देवान्विनिर्जित्य अमृतकलशं नयता गरुडेनेन्द्रः प्रभुक्तो वज्रस्या
मोघस्यमानं दातुं पिच्छमेकं त्यक्तवान् तत्र यथाइन्द्रश्चिच्छेद छिन्नं च तत्र यथाखे प्रकाशात तद्वत्प्रकाशमानमित्यभिसंधिः ४

जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपं यज्ञाय धृतरूपाय विप्रायाभिचरन्यथा १३ तदोजसा दे
प्तमहाभयार्पितं चकासं हंतः स्वतुहीर्णदीधिति चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपत
त्रमुक्षितं १४ दृष्ट्वा शूलं बहुधा रिणाहरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् प्रवृद्धरोषः सकेद्या
रमुष्टिना तदंशहत्यां तरधीयतासुरः १५ तेनेत्वमाहतः क्षतभेगवानादिपुरुषः नाकंपत मनाक्षा
पिस्रजाहत इव द्विपः १६ अथारुह्य धाम्न जन्मायो यो योगमायेश्वरे हरौ यो विलोक्य प्रजास्त्रस्तामे
तिरस्त्यापसंयमे १७ प्रववुर्वायवश्चंडास्तमः पांसवमेरयन् दिश्चो निपेतुर्ग्राचाणः क्षेपणप्रहिताइ
व १८ द्योते भगणान्यो घेः सविद्युस्तनयित्नुभिः वर्षद्भिः पूयकेशासृक्विण्मूत्रास्थीनि चासकृ
त् १९ गिरयः प्रत्यदृश्यंत नानायुधमुचोनघ दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्द्धजाः २०

अगः संश्लेष्यति अरिचक्रे तेन बहुधा शक्त्या छिन्नमिति शेषः तस्याभिमुखमागत्य हरेरुरः वक्षः प्रत्याहृ १५ मनाक् ईषदपि
काप्यते १६ अस्य जगतः उपसंयमे प्रलये १७ पांसुकृतेन नमो अप्रेरितं च तः क्षेपणैः यंत्रैः १८ नक्षत्र भगणानक्षत्रैसमूहो
यस्यां अनेन दैत्यबलातिरेकात् प्रलयदिनमुहूर्तातिक्रमो गम्यते अक्षिनक्षत्राणामसंभवात् नानायुधानि मुंचतीति

वि॰पु॰टी॰ पंचमांशे अ॰ ३३ ५८

हिंस्राः छिधि त्येवं भूताः अतिवैशसा अत्युग्रा वाचः उत्सृष्टाः इत्यत्रैव वाक्यसमाप्तिः २१ प्रादुष्कृतानामिति प्रकटिता मायाः
विनाशयत् विनाशनमिति पाठः यथा श्रुतेः वषट्‌कृतौ त्रीणि सवनानि पादा यस्य यज्ञमूर्तिरित्यर्थः त्रयो यस्य पादा इति श्रुतेः २२
भर्तुरादेशं वत्स्यते भगवान् हनिष्यतीत्येवं भूतं २३ उपगूहमानः वाक्कारं तन्निर्धार्य संघट्टयन् २४ अहन् जघान त्वा

वहुभिर्यक्षरक्षोभिः पत्त्यश्वरथकुंजरैः आततायिभिरुत्सृष्टा हिंस्रा वाचोतिवैशसाः २१ प्रादुःकृ
तानां मायानामासुरीणां विनाशनं सुदर्शनास्त्रं भगवान् प्रायुंक्त दयितं त्रिपात् २२ तदा दितेः समभ
वत् सहसा हृदि वेपथुः स्मरंत्या भर्तुरादेशं स्तनाच्चासृक् प्रसुस्रुवे २३ विनष्टासु स्वमायासु
भूयश्चाव्रज्य केशवं रुषोपगूहमानोमुं ददृशेवस्थितं वहिः २४ तं मुष्टिभिर्विनिघ्नंतं वज्रसारैर
६९ धोक्षजः २३ करेण कर्णमूलेहन् यथा त्वाष्ट्रं मरुत्पतिः २५ स आहतो विश्वजिता ह्यवज्ञया परिभ्र
मद्गात्र उदस्तलोचनः विकीर्णवाह्वंघ्रिशिरोरुहोपतद् यथा नगेंद्रो लुलितो नभस्वता २२६
क्षितौ शयानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदं अजादयो वीक्ष्य शशंसुरागता अहो इमं को
नु लभेत संस्थितिं २७ यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया तस्यैष दैत्यर्षभः
पदाहतो मुखं प्रपश्यंस्तनुमुत्ससर्ज ह २८ एतौ तौ पार्षदावस्य शापाद्यातावसद्गतिं पुनः कतिपयैः राम ६९
स्थानं प्रपत्स्येते ह जन्मभिः २९

ष्ट्रं वृत्रं मरुत्पतिरिंद्रः २५ परितो भ्रमंनु गात्रं शरीरं यस्य उदस्ते वहिर्निर्गते लोचने यस्य विशीर्णा वाह्वादयो यस्य नगेंद्रो महाद्रुमः लुलित उन्मूलितः नभस्वता वायुना २६ संस्थितिं मृत्युं २७ असतः आरोपितात् लिंगशरीरात्
मोक्तुमिच्छया वराहस्य पूर्वपादयोरवकरत्वात् करेणाहन्निति पदाहत इति चाविरुद्धं २९

अखिलयज्ञानां तं नैव विस्तारायकारणेयेतिवा अनुतुष्टः मर्मभेत्ता ३० सादयित्वाहत्वेत्यर्थः पुष्करविष्टरादिभिर्ब्रह्मा
दिभिः संस्तुतः ३१ यथानूक्तगुरुक्तिमनतिक्रम्य मयाप्रवादितवकथितं हे सुमित्र यथायेन प्रकारेण ३२ हे द्विजश्रे
नक ३३ कथांतप्रश्नुत्य ३४ भक्तिमात्रेण प्रश्नानामपिसुलभः अन्यथादेवानामपिदुर्लभः तितत्कथाश्रवणके स्याने
दोन स्मादित्याह यइति द्वाभ्यां श्रीपाग्राह: क्रोशतो नांसगीनामितिरूपान्तु त्वमुक्तं संकटादमोचयत् ३५ ३६ को

श्रीदेवाऊचुः नमो नमस्ते खिलयज्ञतंतवे स्थितौ गृहीताममलसत्वमूर्तये दिष्ट्या हतोयं जगतामरुंतुद
स्त्वत्पादभक्त्या वयमीश निर्वृताः २० श्रीमैत्रेय उवाच एवं हिरण्याक्षमसह्यविक्रमं स सादयित्वा हरी
रादिसूकरः जगाम लोकं स्वमखंडितोत्सवं समीडितः पुष्करविष्टरादिभिः ३१ मया यथानूक्तमवा
दितेहरेः कृतावतारस्य सुमित्र चेष्टितं यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ३२
श्रीसूत उ० इति कौषारवाख्यातामाश्रुत्य भगवत्कथां क्षत्तानंदं परं लेभे महाभागवतो द्विजः ३३ अ
न्येषां पुण्यश्लोकानामुद्दामयशसां सतां उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किंपुनः ३४ योगजेंद्रं
षग्रस्तं ध्यायंतं चरणांबुजं क्रोशंतीनां करेणूनां कृच्छ्रतो मोचयत्ततः ३५ तं सुखाराध्यमृजुभिरनन्य
शरणैर्नृभिः कृतज्ञः को न सेवेत दुराराध्यमसाधुभिः ३६ यो वै हिरण्याक्षवधं महाद्भुतं विक्रीडितं का
रणसूकरात्मनः शृणोति गायत्यनुमोदतेंजसा विमुच्यते ब्रह्मवधादपि द्विजाः ३७ एतन्महापुण्यम
लं पवित्रं धन्यं यशस्यं पदमायुराशिषां प्राणेंद्रियाणां युधि शौर्यवर्द्धनं नारायणोंते गतिरंग शृण्वतां ३८
इति श्रीभागवते महापुराणे तृतीयस्कंधे एकोनविंशोध्यायः

रणेन पृथिव्युद्धरणादि सूकररूपस्य ३७ तद्धरेर्विक्रीडितं शृण्वतां मर्त्ये श्रीनारायणोंते गतिर्भवति महापुण्यं स्वर्गादिप्रदं
अलं पवित्रं अनिशयेन शोधकं धन्यं धनावहं यशस्यं कीर्तिकरं आयुष आशिषां च पदं स्थानं परित्राणं वा प्राणानां

श्रीभागवतटीकायां तृतीयस्कंधे ३० ते १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषवराहजन्मादिप्यवधानादथादितः सर्गानुस्मारयितवक्तुमन्वयं प्रस्तौति मनोः प्रतिष्ठां स्थानेऽध्यस्य प्राप्य सौते सूतस्य
रोमहर्षणस्य पुत्र अवरं अर्वाचीनं जन्म येषां तेषां ईश्वरे लीनानां मार्गाय निर्गमाय कानि द्वाराणि कृतवान् अर्वाची
नान् प्राणिनः केनोपायेन सृष्टवानित्यर्थः १ विदुरमैत्रेयसंवादेनैवैतत् ज्ञास्यत इति तमेव संवादं प्रष्टुमाह क्षत्तेति त्रिं
हृ। त्रिभिः श्रीकृष्णस्य सुहृत्त्वे हेतुः य इति दुर्योधनादिभिरपत्यैः सहितमग्रजं धृतराष्ट्रं अघवान् कृतापराध इति हेतोः २॥

श्रीशौनक उवाच महीं प्रतिष्ठामध्यस्य सौते स्वायंभुवो मनुः कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनां १
क्षत्ता महाभागवतः कृष्णस्यैकान्तिकः सुहृत् यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति २ द्वैपायनादन
वरो महित्वे तस्य देहजः सर्वात्मना श्रितः कृष्णं तत्परांश्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयं विरज
स्तीर्थसेवया उपगम्य कुशावर्त्त आसीनं तत्त्ववित्तमं ४ तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः॥
आपो गांगा इवाघघ्नीः हरेः पादांबुजाश्रयाः ५ ता नः कीर्त्तय भद्रं ते कीर्त्तन्योदारकर्मणः रसज्ञः को
नु तृप्येत हरिलीलामृतं पिबन् ६ एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः भगवत्यर्पिताध्यात्मस्ता
नाह श्रूयतामिति ७ मो श्रीसूत उवाच हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात्॥
लीलां हिरण्याक्षमवज्ञया हतं संजातहर्षो मुनिमाह भारतः

श्रीकृष्णैकमेवान्तरे हेतुः यः तत्याज २ अनवरः अन्यूनः महित्वे महिम्नि ३ कुशावर्त्ते गंगाद्वारे ४ यत्किमपि पृष्टवन्तः किं राम
तेवेति चेत् तत्राह तयोरिति अघघ्नीः अघघ्न्यः नूनं कथाः प्रवृत्ताः ५ कीर्त्तन्यानि कीर्त्तनार्हाणि उदाराणि कर्माणि यस्य हरेः ६ ६३
एवमिति व्यासवाक्यं उग्रश्रवाः रोमहर्षणपुत्रः नैमिषमयनमाश्रयो येषां अर्पितमध्यात्मं मनो येन ७ गोरुद्धरणं
लीलां हिरण्याक्षं चावज्ञया हतं निशम्य भारतो विदुरः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मात्त्वमव्यक्तमार्गवित् ब्रह्मणो वा विशेषणं ९ एतज्जगत् अभावयन् उत्पादयामासुः १० सद्वितीयाः सभार्याः स्वतन्त्रा भार्यान
पेक्षाः कर्मसु प्रजासर्गादिषु संहताः परस्परापेक्षाः इदं जगत् ११ अस्मात्किमारभतेति प्रश्नस्य पक्षादीन् सृष्टवानुद्दिश्योत्तरं
वक्तुं पूर्वोक्तां सृष्टिमनुस्मारयति दैवेनेति सप्तभिः मन्वादिप्रश्नानां तूत्तराध्याय मारभ्योत्तरं भविष्यति दुर्वितर्क्येण दैवे
न जीवादृष्टेन परेण प्रकृत्यधिष्ठात्रा महापुरुषेण अनिमिषेण कालेन च हेतुना भगवतो निर्विकारात् जातक्षोभं यत् गुण

श्रीविदुर उवाच प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् किमारभत मे ब्रह्मन् प्रब्रूह्यव्यक्त
मार्गवित् ९ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ते वै ब्रह्मण आदेशात् कथमेतदभावय
न् १० सद्वितीयाः किमसृजन् स्वतन्त्रा उत कर्मसु आहो स्वित्संहताः सर्व इदं स्म समकल्पय
न् ११ श्रीमैत्रेय उवाच दैवेन दुर्वितर्क्येण परेणानिमिषेण च जातक्षोभाद्भगवतो महानासी
द्गुणत्रयात् १२ रजःप्रधानान्महतस्त्रिलिंगो दैवचोदितात् जातः ससर्ज भूतादिर्वियदादीनि
पंचशः १३ तानि चैकैकशः स्रष्टुमसमर्थानि भौतिकं संहत्य दैवयोगेन हैममंडमवासृजन् १४
सोऽशयिष्टाब्धिसलिले आंडकोशो निरात्मकः साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५

त्रयं प्रधानं तस्मान्महानासीत् तदुक्तं तंत्रे विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसं
स्थितं तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते इति १२ महतो जातो भूतादिरहंकारस्त्रिलिंगो त्रिगुणः रजःप्रधानादिति स्वतः
सत्त्वप्रधानस्यापि महतोऽहंकारोत्पत्तिकाले कार्यानुरूपं रजःप्रधानत्वं भवतीति भावः पंचशः तन्मात्राणि महाभूतानि ज्ञा
नेंद्रियाणि कर्मेंद्रियाणि तत्तद्देवताश्चेति पंच पंच ससर्जेत्यर्थः १२ भौतिकं हैममंडमेकैकशः प्रत्येकं स्रष्टुमसमर्थानि संति संह

स्कं० ३ श्रीभागवतटीका २४

लि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहस्रार्कोरुमिवोरुदीधितिर्यस्य तत् सर्वजीवनिकायानामोकःस्थानं पद्मं स्वराट् ब्रह्मा १५ यः सलिलाशये गर्भोदके स्यांतः
ते २ शेते तेन भगवतानुविष्टोधिष्ठितः सन् सः स्वराट् स्वया संस्थया नामरूपादिक्रमेण १६ छायया प्रभाप्रतियोगिनी तया अबु-
द्ध्येत्यर्थः यस्त्ववुद्धिस्तेनः प्रभोरित्युक्तत्वात् मोहो महातम इति महामोहः स्वरूपनिर्देशमात्रविवक्षया मोह इति प्रथमाप्रयोगः
७ तदेव प्रथमोक्तं साधारणं सृष्टिमनूद्य केन विशिष्टेण साधारणां सृष्टिमाह विससर्जेत्यादिना यावत्समाप्ति तद्विसृष्ट
कायं रात्रिरूपं तत एव जाता नियक्षरक्षांसि जगृहुः क्षुत्तृषोः समुद्भवो यस्यां तां अत्र च यारूपता तन्त्ररासातु तामपोह तत्यके

६३

तस्य नाभेरभूत्पद्मं सहस्रार्कोरुदीधिति सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् १५ सोनुविष्टो
भगवता यः शेते सलिलाशये लोकसंस्थां यथापूर्वं निर्ममे संस्थया स्वया १६ ससर्जच्छायया।
विद्यां पंचपर्वाणमग्रतः तामिस्रमंधतामिस्रं तमो मोहो महातमः १७ विससर्जात्मनः कायं नाभि-
नंदंस्तमोमयं जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवां १८ क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभि-
दुद्रुवुः मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः १९ देवस्तानाह संविग्नो मा मां जक्षत रक्षत
अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ २०

तानुसानामिस्त्राभवदित्यादिश्रुतिरनुसंधेया १८ उपसृष्टाः अभिभूताः जग्धुं अत्तुं भक्षयितुं यंतं वयं क्षुत्तृड्भ्यामर्दिताः अन्न
एनं पितनिष्टपमारक्षतेत्येके अन्ये तु जक्षध्वं भक्षयेनेति ब्रुवंतः जक्ष भक्षहसनयोरिति धातुः १९ देवो ब्रह्मा संविग्नो भी-
तः सन् मां मा भक्षयत किंतु रक्षत अहो हे यक्षरक्षांसि यूयं मे प्रजाः सुता बभूविथ जाताः स्थ एवमुग्रस्वभावाय क्षरास्स ॥६३॥
माजाता इत्यर्थः तत्रैये पक्षध्वमित्यूचुः ते यक्षाः ये तु मा रक्षतेति ते रक्षसा इति ज्ञेयं एतच्च तिर्यगादिनामसर्गस्याप्युपलक्षणं २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभया दीव्यन् द्योतमानः या याः देवताः द्युतिमत्यः सात्विक्यः तास्ताः प्रमुखतः प्राधान्येनासृजत् ते देवा देवता इति स्त्रीत्वेन निर्दिष्टानामप्यर्थमात्रविवक्षया तद् इति पुंस्त्वेन प्रतिनिर्देशः एवं यक्षरक्षांसीत्यत्रापि ज्ञेयं तेन विसृष्टां त्यक्तां प्रभां अहः दिवसरूपां संतीं देवयंतः क्रीडयंतः अहार्षुर्जगृहुः २१ अदेवानिति छेदः सजघनाद सुरान सृजतेति श्रुतेः अतिलोलुपान् स्त्रीलंपटान् अभिपेदिरे प्राप्ताः २२ परापतत् अपलायत् २३ भक्तेच्छानुरूपमात्मानं दर्शयतीति तथा

पा१ देवताः प्रभया या या दीव्यन् प्रमुखतोऽसृजत् तेऽहार्षुर्देवयंतो विसृष्टां तां प्रभामहः २१ देवोऽदेवाञ्जघनतः सृजति स्मातिलोलुपान् त एनं लोलुपतया मैथुनायाभिपेदिरे २२ ततो हसन् स भगवानसुरैर्निरपत्रपैः अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् २३ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिं अनुग्रहाय भक्तानामनुरूपात्मदर्शनं पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः ता इमा यभितुं पापा उपाक्रामंति मां प्रभो २४ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः त्वमेकः क्लेशदस्तेषामनासन्नपदां तव २५ सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः विमुंचात्मतनुं घोरामित्युक्तो विमुमोच ह २६

तमुपव्रज्य २४ पाहीति द्वाभ्यां प्रार्थितवान् यभितुं मैथुनेन धर्षयितुं २५ लोकानां जनानां तव अनासन्नो अनाश्रितो पादौ यैः तेषां २६ विविक्तं असंदिग्धं अध्यात्मदर्शनं परचित्तज्ञानं यस्य हरेः घोरां कामकश्मलां स्वतनुं विमुंचेति उक्तवानिति शेषः इत्युक्तः अब्जजः तां तनुं विमुमोच सर्वत्र तनुत्यागो नाम तत्तन्मनोभावत्यागो विवक्षितः ग्रहणं च तत्तद्भावापत्तिरिति द्रष्टव्यं २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६४

साहोरात्रयोः संधिरभवदिति श्रुतेः सोनेन विसृष्टा तनुः सायंतनी संध्या मुमोच सा च कामोद्रेकवेला असुरा अराजस
त्वात् स्त्रीलंपटाः अनंतरं तां संध्यामेव स्त्रियं कल्पयित्वा तां संमोहं प्राप्ता इत्याह तामिति त्रिभिः नूपुराभ्यां क्वणती चर
णांभोजे यस्याः मदेन विह्वले लोचने यस्याः कांचीकलापेन विलसद्दुकूलं तेन छन्नं रोधः कटितटं यस्याः तां २८॥
अन्योन्यश्लेषया उपमर्दनेन हेतुना उत्तुंगौ निरंतरौ पयोधरौ यस्याः सुद्विजां सुदती स्निग्धहासा लीलावलोकने

तां क्वणच्चरणांभोजां मदविह्वललोचनां कांचीकलापविलसद्दुकूलच्छन्नरोधसं २८॥
अन्योन्याश्लेषयोत्तुंगनिरंतरपयोधरां सुनासां सुद्विजां स्निग्धहासलीलावलोकनीं २९
गूहंतीं व्रीडयात्मानं नीलालकवरूथिनीं उपलभ्यासुरा धर्म सर्वे संमुमुहुः स्त्रियं ३० अहो रूपमहो
धैर्यमहो अस्या नवं वयः मध्ये कामयमानानामकामेव विसर्पति ३१ वितर्कयंतो बहुधा तां संध्यां प्र
मदाकृतिं अभिसंभाव्य विश्रंभात् पर्यपृच्छन् कुमेधसः ३२ कासि कस्यासि रंभोरु को वार्थस्तेऽत्र भा
मिनि रूपद्रविणपण्येन दुर्भगान्नो विबाधसे ३३

च यस्याः २९ गूहंतीं वस्त्रांचलेनावृण्वानां नीलानामलकानां वरूथः स्तोमो विद्यते यस्याः हे धर्म तां स्त्रियमुपलभ्य अमन्वा राम
३० समूढानां विभावेनाक्रममाह अहो इति ३१ अभिसंभाव्य मत्वा विश्रंभात् प्रणयात् कुबुद्धयास्तां पप्रच्छुः ३२ ६४
कासीति त्रिभिः कासि जात्या कस्य वा कन्या हे भामिनि कोपने रूपमेव द्रविणं अनर्घ्यवस्तु तदेव पण्यं क्रयार्हं तेन नो दुस
मर्पणेन बाधसे ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंज्ञातकुलादिप्रश्नेनयावाकाचिद्भवदिष्ट्याइहंतावद्भद्रेजातंयत्तवदर्शनं किंनुकेवलंनोमनः उत्सुकोपि विधि
भा०२ मध्यासि २४ क्षुभितचित्तानांवाक्यंहेशालिनिश्लाघ्ये एकत्रनजयतिनस्थिरोभवति यद्वानेकत्रअन्नेकेगतिवि
लासेषुजयतिसर्वोत्कर्षेणवर्तते पतन्तंतंगंउच्चलंतंकंदुकंत्यहतोः सैन्यायाभर्त्ताङ्गीततवचकेशमध्येविषादइति
श्राम्यति शंतामंथरंचप्रसरति सुशिरवासमूहः शोभनः केशोकलापस्तेपाठांतरेसुशिरवस्ताःशोभनानुकेशान्

यावाकाचित्त्वमवलेदिष्ट्यासंदर्शनंतव उत्सुकोपीक्ष्यमाणानांकंदुकक्रीडयामनः २४ नै
कत्रेतजयतिशालिनिपादपद्मंप्रत्यामुहुः करतलेनपतंतंगं मध्यविषादतिष्ठहस्तेनभार
भीतेवशांतेवदृष्टिरमलासुशिरवासमूहः २५ इतिसायंतनींसंध्यामसुराःप्रमदायत्तौ प्रलोभयं
तोंजगृहुमत्वाभूदधियस्त्रियं २६ प्रहस्यभावगंभीरंजिघ्रंत्यात्मानमात्मना कांत्याससर्ज
भगवानुगंधर्वाप्सरसांगणान् २७ विससर्जतनुंतांचज्योत्स्नांकांतिमतींप्रियां एतएवचाद
दुःशीत्याविश्वावसुपुरोगमाः २८ सृष्ट्वाभूतपिशाचांश्चभगवानात्मतंद्रिणा दिग्वाससोमुक्तकेके
शान्वीक्ष्यचामीलयदृशौ २९ जगृहुस्तंहिसृष्टांतांतंद्रभाणारव्यांतनुंप्रभोः निद्रामिंद्रियविक्ले
दोययाभूतेषुदृश्यते ४०

वकीर्यमाध्यन्नसमूहंत्वधानेति अत्रच अस्तंगच्छन्सूर्यएवपतन्तंगः मधविच्छेदोविषादः तारकान्पादद्दिः तमएवकेवाड
लासमूहः २५ प्रमदेवाचरंतीस्त्रियंमत्वाजगृहुः २६ प्रहस्यात्मानमात्मनाजिघ्रंत्याकांत्यासौंदर्येणप्रसहहसनमा
त्मावघ्राणंचसौंदर्यानुभावाचातुर्यविकारः २७ ज्योत्स्नांचंद्रिकारूपां तएवगंधर्वादिगणाः विश्वावसुःपुरोगमामु

गिरिषु ३८ आसमन्ताद्दिशाम्आकाशमनन्तनां अश्मसु हिकेशान्तं

भ्रमोत्तिनिमीलितवान् ३९ इंद्रियाणांविक्लेदः स्वापापानांति प्रच्छन्ना ४०

मध्य १

येनेंद्रियविक्लेदनहेतुना उच्छिष्टाः असतः धर्षयंति भ्रंशनानुकुर्वंति तं भूतादिगुणं उन्मादं प्रचक्षते तद्बीजं भिकानिद्रो
न्मादहेतुत्वेन भूतादीनि तत्तनूना च चानुविध्यमुक्तं ४० ऊर्जस्वंतं बलवंतं परोक्षेण अदृश्यरूपेण ४१ आत्मनः सर्गाय
स्मात्तं यत्तु येन कायेन संप्रदानत्वनिमित्तेन कवयः कर्मकोविदाः साध्येभ्यः पितृभ्यश्च स्वपितृरूपेभ्यः वितन्व
ते श्राद्धादिना हव्यकव्यं च ददति ४२ तिरोधानेन दृश्यत्वेन सह व्यंतर्धानशक्त्या ४३ प्रत्यात्म्येन प्रतिबिंबेन आत्माभा

६५ योनोच्छिष्टान् धर्षयंति तमुन्मादं प्रचक्षते ४० ऊर्जस्वंतं मन्यमान आत्मानं भगवानजः साध्यान् गणान्
पितृगणान् परोक्षेणासृजत्प्रभुः ४१ त आत्मसर्गं तं कायं पितरः प्रतिपेदिरे साध्येभ्यश्च पितृभ्यश्च
कवयो यद्वितन्वते ४२ सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत् तेभ्योऽददात्तमात्मानमंतर्द्धा
नाख्यमद्भुतं ४३ स किन्नरान् किंपुरुषान् प्रत्यात्म्येनासृजत्प्रभुः मानयन्नात्मनात्मानमात्मा
भासं विलोकयन् ४४ ते तु तज्जगृहू रूपं त्यक्तं यत्परमेष्ठिना मिथुनीभूय गायंतस्तमेवोष
सि कर्मभिः ४५ देहेन वै भोगवता शयानो बहुचिंतया सर्गेऽनुपचिते क्रोधादुत्ससर्ज ह तद्वपुः
४६ येऽहीयंतामुतः केशा अहयस्तेंऽग जज्ञिरे सर्पाः प्रसर्पतः क्रूरा नागा भोगोरुकंधराः ४७

संप्रतिबिंबं आत्मना आत्मनो मानः प्रतिबिंबदर्शिनः सुंदरस्य शिरःकंपादिचेष्टा अत एव तत्स्रष्टारो मिथः संमानेन तत्स्य मिथु राम
नीभावः ४४ तत्प्रतिबिंबरूपं कर्मभिः तत्पराक्रमानुवर्णनैः ४५ भोगः आभोगो विस्तारः पद्मादिप्रसरणं तद्वता देहेन ६५
अनुपचिते अवृद्धिं प्राप्ते तु भोग क्रोधादियुक्तं ४६ अमुतः अमुष्मात् ये केशा अहीयंत प्रच्युताः ते अहयो जाताः
प्रसर्पतः पांथाकुंचनैः प्रचलतो अमुष्मात् सर्पाः अत एव आगान् भव विद्र विनागाः ति वेगवंत इत्यर्थः भोगवंतो जात

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदामन्यमानोभूत्तदामनून्ससर्ज ४८ तेभ्यः स्वीयंपुरुषंपुरुषाकारंपुरंदेहं अत्यसृजत् दृष्ट्वातान्मनून् ४९ नेत्व
याकृतंसुकृतत्वामाहुः यस्मिन्मनुसर्गे क्रियाग्निहोत्राद्याः अतोस्मिन्सर्गेचवयंसाकंसह अन्नंहविभागादि अदामभक्ष
यामेह ब्रह्मन् कार्यसृष्टिमुक्त्वा ऋषीणांसृष्टिमाह तपसेति विद्याउपासनायोगोत्रासनादिः सुसमाधिः वैराग्यंच

संस्थानैंमन्यमानः कृतकृत्यमिवात्मभूः तदामनून्ससर्जांते मनसालोकभावनान्
४८ तेभ्यः सोत्यसृजत्स्वीयंपुरंपुरुषमात्मवान् तान्दृष्ट्वायेपुरासृष्टाः प्रशशंसुः प्रजा
पतिं ४९ अहोएतज्जगत्स्रष्टः सुकृतंबततेकृतं प्रतिष्ठिताः क्रियायस्मिन्साकमन्नम
दामहे ५० तपसाविद्ययायुक्तोयोगेनसुसमाधिना ऋषीनृषिर्हृषीकेशः ससर्जाभि
मताः प्रजाः ५१ तेभ्यश्चैकैकशः स्वस्यदेहस्यांशमदादजः यत्तत्समाधियोगर्द्धितपोवि
द्याविरक्तिमत् ५२ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेविंशतितमोध्यायः ॥२०॥
विदुरउवाच स्वायंभुवस्यचमनोर्वंशः परमसंमतः कथ्यतांभगवन्यत्रमैथुनेनैधिरेप्र
जाः १

योदियुक्तः समाधिः तेनचयुक्तः हृषीकेशः स्ववशेंद्रियः सनुऋषिर्ब्रह्मा ऋषीन्प्रजाः ससर्ज ५१ किंतद्दे
हस्यांशमदादित्यतआह यदिति समाधिश्च योगर्द्धिश्च तपश्च विद्याच विरक्तिश्च विद्यंते यस्मिन्तत् ५२
इतितृतीयेविंशोध्यायः एकोविंशेतपोविद्यायोषितेनतुविष्णुना कर्दमस्यमनोः पुत्र्याविवाहघटनोच्यते १
एधिरेएधांचक्रिरे १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मं महीं च यथा जुगुपतुः ररक्षतुः तन्मे वदेति तृतीयेनान्वयः १ २ योगलक्षणैर्यमादिभिर्युक्तायां कतिधा वीर्यं
ससर्ज कति पुत्रानुत्पादयामासेत्यर्थः ४ मनोः कन्यां आकूतिं प्रसूतिं च भार्यां लब्ध्वा यथा भूतानि ससर्ज तच्च वदे
ति चकारस्यार्थः ५ सहस्राणां समा दश दश सहस्राणि संवत्सराणीत्यर्थः ६ ततस्तस्मिंस्तपसि क्रियायोगेन
पूजाप्रकारेण संप्रपेदे सिषेवे प्रपन्नेभ्यो भक्तेभ्यो वरदातारं ७ शाब्दं वेदैकवेद्यं यद्ब्रह्म तन्मयं वपुर्दधत् तं प्रत्यात्मा

६६ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै यथा धर्मं जुगुपतुः सप्तद्वीपवतीं महीं २ तस्य वै दुहिता ब्रह्मन् देव
हूतीति विश्रुता पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ३ तस्यां स वै महायोगी युक्तायां योगलक्षणैः
ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ४ रुचिर्यो भगवान् ब्रह्मन् दक्षो वा ब्रह्मणः सुतः यथा ससर्ज
भूतानि लब्ध्वा भार्यां च मानवीं ५ श्रीमैत्रेय उवाच प्रजाः सृजेति भगवान् कर्दमो ब्रह्मणोदितः स
रस्वत्यां तपस्तेपे सहस्राणां समा दश ६ ततः समाधियुक्तेन क्रियायोगेन कर्दमः संप्रपेदे हरिं भक्त्या
प्रपन्नवरदाशुषं ७ तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्व ५२
पुः ८ स तं विरजमर्काभं सितपद्मोत्पलस्रजं स्निग्धनीलालकव्रातवक्त्राब्जं विरजांबरं ॥ ९॥
किरीटिनं कुंडलिनं शंखचक्रगदाधरं श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणं १०

तं दर्शयामास ८ स कर्दमस्तं खेऽवस्थितं दृष्ट्वा मूर्ध्ना क्षितावपतत् गीर्भिरभ्यगृणात् इति चतुर्णामन्वयः
पद्मोत्पले दिनरात्रिविकासे सितानां पद्मानामुत्पलानां च स्रक् यस्य तं स्निग्धा नीलाश्च ये अलकाः तेषां ॥ ६६
व्रातो वक्त्राब्जे यस्य ९ श्वेतोत्पलं क्रीडनं यस्य मनःस्पर्शि मनस्यानंदजनकं स्मितमीक्षणं यस्य तं ॥ १०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वक्षसि श्रीर्यस्य कौस्तुभः कंधरायां यस्य शीतिरिव स्वभावः स्वनः सिद्धो धर्मो यस्य तथाविध आत्मा मनो यस्य ११ त्वाम्
ते परमानंदं धिगम्य वरकामुके अथापि कृपणं मानुग्रहाणवरदानतः तेवेति हर्षे हे इड्य नो स्माभिः समग्रसत्त्वनि
धेस्तवदर्शनात् अथाक्ष्णोः सांसिध्यसाफल्यमुद्दिष्ट सेवितं त्वद्दर्शनमेव महाफलमित्युपपादयति यस्य तवदर्शनं
सङ्गिनुत्तरोत्तरमापादितप्रकर्षैर्जन्मभिः रूढयोगा योगेष्वेपि १२ स कामभक्तानुविगर्हयन्नाह यइति हे ईशा यस्य
पिस्युः तेषां कामानां ल्लवायये वन्मायया न स्तुच परत्त एवोपासते त्वं गुतेषां तान् कामान पिरा सि दहासि १२

विन्यस्तचरणांभोजमंसदेशो गुरुत्मतः दृष्ट्वा रवेव वस्थितं वक्षः श्रियं कौस्तुभकंधरं ११ जात
हर्षोपतन्मूर्ध्नो क्षितौ ल्लग्नमनोरथः गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्मा कृतांजलिः १२ आपि
रेवाच जुष्टं वताद्याखिलसत्त्वराशेः सांसिध्यमक्ष्णोस्तवदर्शनान्नः यद्दर्शनं जन्मभिरीड्य
सद्भिराशासते योगिनो रूढयोगाः १२ ये मायया ते हतमेधसस्त्वत्पादारविंदं भवसिंधुपो
तं उपासते कामल्लवाय तेषां रासीश कामान्निरयेपि ये स्युः १३ तथा स च्चाहं परिवोढुका
मः समानशीलां गृहमेधधेनुं उपेयिवान् मूलमशेषमूलं दुराशयः कामदुघां घ्रिय
स्य १४ प्रजापतेस्ते वचसाऽधीश तंत्या लोकः किलायं कामहतोऽनुबद्धः अहं च लोकानुगतो
वहामि बलिं च शुक्लानिमिषाय तुभ्यं १५

यः स कामान्निर्दहामि सोहमपि नादृशएवेत्याह तथेति गृहमेधो गृहाश्रमः तत्र धेनुं त्रिवर्गदोग्ध्रीं भार्यां परिवोढुकाम
परिणेतुमिच्छन् कामदुधां घ्रिपस्य कल्पद्रुमस्य तव मूलं मेघ्रितं उपेयिवान् उपगतोस्मि न मुक्ता मान्यर्थमन्यत्किं
मण्युपास्य तां न यतः अशेषस्य पुरुषार्थस्य मूलमतो देव १४ ननु तर्हि मुक्त्यर्थमेव किं न भजसि अनधिकारादित्याह
हे धीश यस्त्वप्रजापतिस्त स्य तव वचसा तंत्या अयं कामहतो लोकः प्रभुबद्धः हे शुक्ल धर्ममूर्ते अहं च किल
लोकानुगतः अतस्तुभ्यं बलिं हरामि वहामि कर्मेमयोत्वदाज्ञामनुवर्ते अनिमिषाय कालात्मने तदर्थं भार्यां च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनिमिषायेति अनेन कालात्मकात्तुत्वत्तो भीताः कर्मकेराभीत्युक्तं एवंतु भयं त्वद्भक्तानां नास्तीत्याह द्वाभ्यां लोकान् कामा
भिभूतान् तान् अनुसृतान् पशून् अविवेकिसत्यपि पुनः कर्मजडान् सादृशान् हित्वा अनादृत्य येनत्वच्चरणच्छत्रमातप
२३ त्रं श्रिताः तानेवाह त्वद्गुणानां वादः कथा स एव सीधुः सुरा ऽऽरोविस्मारकत्वात् पीयूषं रुचिकरत्वात् तेन निर्यापिता
विलापिता देहधर्माः क्षुत्पिपासादयो यैः एषामित्युत्तरेणान्वयः १६ नत्वयन्तु त्रिनाभिकाल्ले चक्रेण तु जगदा
च्छिद्य आकृष्य धावदपि एषां त्वद्भक्तानामायुराच्छिद्य धावन्न भवति कथंभूतं अजरे ब्रह्मणि अक्षस्तन्द्रे भ्रमिः
भ्रमणं भ्रमदिति वक्तव्ये अतिभ्रमणशीलत्वात् उपचारेण भ्रमिरित्यभेदनिर्देशः अधिकमासेन सह त्रयोद

लोकांश्च लोकानुगतान्पशूंश्च हित्वाश्रितास्ते चरणातपत्रं परस्परं त्वद्गुणवादसीधुपी
यूषनिर्यापितदेहधर्माः १६ नतेऽजराक्षभ्रमिरायुरेषां त्रयोदशारं त्रिशतं षष्टिपर्व ष
ण्नेम्यनन्तच्छदि यत्त्रिणाभि करालस्रोतो जगदाच्छिद्य धावत् १७ एकः स्वयं सन् जगतः
सिसृक्षया द्वितीययात्मन्नधि योगमायया सृजस्यदः पासि पुनर्ग्रसिष्यसे यथोर्णना
भिर्भगवन्स्वशक्तिभिः १८

शमासा अरा यस्य त्रिशतं षष्टिश्चाहोरात्राः पर्वाणि यस्य शतशब्दे विभक्तेरलुगार्षः षड् ऋतवो नेमयो यस्य अन
न्ताः क्षणलवादयः छदाः पत्राणि पत्राकाराधाराः सन्ति यस्य त्रीणि चातुर्मास्यानि नाभयः आधारभूतानि य
स्य यानि यस्य करालं स्रोतः ताग्रवेगं एतैर्विशेषणैः संवत्सरात्मकं चक्रेण कालमिति द्रष्टव्यं १७ ननु निरुपाधिमु
दासीनं मां किं याचसे तथापि मायया विश्वसृष्ट्यादिकर्तृत्वात् त्वमेव याच्य इत्याह स्वयमेक एव सन्नपि आत्मन्य
धि अन्तर्यायोगमायया हेतुनायाः स्वशक्तयः सत्वाद्याः ताभिः अधि विश्वं स्वव्यतिरिक्तसाधनानपेक्षत्वे दृष्टान्तः
यथेति १८

६७

राम
६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यपि मयि कत्वाङ्क्रेभ्यो विषयसुखं दातुं नेच्छसि तथाप्यस्मदभिप्रायानुसारेण तत्संपादयेत्याह नैतदिति हे अधीश नोस्माकं
भजतां भूतसूक्ष्मरूपं पदं शब्दादिविषयसुखं मायया तनुषे विस्तारयसीति यत् एतत्तव यद्यपीप्सितं न भवति तथाप्यस्मद
नुग्रहायास्तु अणत्वयापाकरणानंतरमेवापवर्गाय भवत्वित्यर्थः यर्हि यतः मायया परिच्छिन्न इव लसंत्या तुलस्या
युक्तस्त्वं विलक्षितोसि एवंभूतस्य तव दर्शनं यतो मुक्तिभुक्तिप्रदमित्यर्थः १९ तं त्वां भुक्तिप्रदं नमामि मुक्तिदत्वे
हेतुः अनुभूत्या ज्ञानेन उपरतः क्रियार्थः कर्मफलभोगो यस्मिन् भोगदत्वे हेतुः स्वमायया अवर्तितं लोकतंत्रं विश्वो या १

नैतद्धताधीशपदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या
तनुवा विलक्षितः १९ तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्त्तितलोकतंत्रं नमाम्यभीक्ष्णं नम
नीयपादसरोजमल्पीयसि कामवर्षं २० ऋषिरुवाच इत्यव्यलीकं प्रणुतोब्जनाभस्तमावभाषे व २४
चसामृतेन सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २१ श्रीभगवानुवाच
विदित्वा तव चैत्यं मे पुरैव समयोजि तत् यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः २२ नैव जातु मृ
षैव स्यात् प्रजाध्यक्ष मदर्हणं भवद्विधेष्वतितरां मयि संगृभितात्मनां २३ प्रजापतिसुतः सम्राण्म
नुर्विख्यातमंगलः ब्रह्मावर्त्तं योधिवसन् शास्ति सप्तार्णवां महीं २४ स चेह विप्र राजर्षिर्महिष्या शतरूपया
आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः

प्रकरणं येन अतः सकामैर्निष्कामैश्च नमनीयं पादसरोजयुगं यस्य तं तत्र अल्पीयसि सकामे पुंसि भजने चाकामानव
र्षतीति तथा तं २० अमृतेन सुखकरेण प्रेमस्मिताभ्यामीक्षणेन विभ्रमंती भ्रूर्यस्य तं २१ चैत्यं हार्दं भावं ममया समयोजि सं
घटितं यदर्थमेवाहं समर्चितः तत् २२ मयि संगृभितः संगृहीतः एकाग्रीकृत आत्मा चित्तं येषां यन्मदर्हणं त्वादृ
शेषु अतितरां सर्वथा मृषा निःफलं न स्यात् २३ विख्यातं मंगलं अभ्युदयस्तदाचारादिलक्षणं यस्य २४ हे विप्र महिष्या सह २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६ पुत्र्यस्त्वां भार्यायां समाहितं अभिसंधानेन नास्ति तेन त्वं एव धूः राजकन्या २७ ते वीर्यं आत्मनि धृतं धृतं या प्रसविष्यति सा भजिष्य
ति वीर्यं वीर्यप्रसूता सुकन्या सु आत्मजा सा आत्मनः पुत्रान् आधास्यति २८ निदेशं आज्ञां उशत्तमाः शुद्धसत्त्वः तीर्थपात्रं तेन
दानं लक्ष्यं तन्मयि समर्पितं सर्वकर्मफलं इत्यर्थः २९ गार्हस्थ्ये दयां हि त्वा सन्न्यस्तेन अभयं दत्वा मयि आत्मानं जगत् अस
हएकीभूतं इक्ष्यसि ३० त्वद्वीर्येण सह देवहूत्यां अवतीर्य इति शेषः ३१ अल्पसूत्र इक्षुजायते आविर्भवतीति प्रत्यग

आत्मजाम सितापांगीं वयःशीलगुणान्वितां मृगयन्तीं पतिं दास्यत्यनुरूपायते प्रभो २६ स
माहितं ते हृदयं यत्र मासान्परिवत्सरान् सा त्वां ब्रह्मन्नृपवधूः काममाशु भजिष्यति २७ या त आ
त्मभृतं वीर्यं नवधा प्रसविष्यति वीर्ये त्वदीये ऋषय आधास्यत्यंजसाऽऽत्मनः २८ त्वं च स
म्यगनुष्ठाय निदेशं म उशत्तमः मयि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे २९ कृत्वा दयां
६८ च जीवेषु दत्वा चाभयमात्मवान् मय्यात्मानं सह जगत् द्रक्ष्यस्यात्मनि चापि मां ३० स
हाऽहं स्वांशकलया त्वद्वीर्येण महामुने तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्त्वसंहितां ३१ मैत्रेय उ०
एवं तमनुभाष्याथ भगवान्प्रत्यगक्षजः जगाम बिंदुसरसः सरस्वत्या परिश्रितात् ३२ निरीक्ष
तस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन् पत्ररथेंद्रपक्षैरुच्चारितं स्तोम
मुदीर्णसाम ३३ अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः आस्ते स्म बिंदुसरसि तं कालं
प्रतिपालयन् ३४

वे। क्षजः सरस्वत्या नद्या परिश्रितात् परिवेष्टितात् ३२ अशेषैः सर्पोमंत्रादि सिद्धेश्वरैः अभिष्टुतः सिद्धमार्गः वैकुंठमार्गो यस्य राम
यद्वा अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यते इति सिद्धमार्गश्च स यथा पत्ररथेंद्रो गरुडस्तस्य पक्षैरुदीर्णमभिव्यक्तं ६८
सामाकर्णयन् बृहद्रथंतरे पक्षाविति श्रुतेः उच्चारितं स्तोमं च समाधारभूतानामृचां समुदायं शृण्वन् स्तोमं आम्नेति
अनेः समास पाठः उच्चारितस्तोमः स्तोत्रीयसमुदायो यस्य साम्न इति ३३ तं कालं परत्वे इत्युक्तं प्रतीक्षमाणः ३४

त्रि ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौनकौंभाः सौवर्णाः परिकरा यस्मिन् तं रथं मारुह्य दुहितरं चारोप्य वरान्वेषणार्थं पर्यटन् ३६ हे सुधन्वन् विदुर
पत्न्या सह ३७ तत्प्रवेशमात्रेण परमानंदं प्राप्त इति दर्शयितुं आश्रमं वर्णयति यस्मिन्नित्यादिभिः सप्तभिः श्लो
कैः प्रयत्नेकर्हेमे ३८ शिवमारोग्यं अमृतवत्स्वादुजलं यस्मिन् ३९ कूजंतः पुण्या मृगा द्विजाश्च येषु तैः पुण्यद्रुमल

मनुः स्यंदनमास्थाय शातकौंभपरिच्छदं आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीं ३६ त
स्मिन्सुधन्वन्नहनि भगवान्यत्समादिशत् उपायादाश्रमपदं मुनेः शांतव्रतस्य तत् ३७
यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः कृपया संपरीतस्य प्रपन्नेर्पितया भृशं ३८ तद्वै
बिंदुसरो नाम सरस्वत्या परिप्लुतं पुण्यं शिवामृतजलं महर्षिगणसेवितं ३९ पुण्यद्रु
मलताजालैः कूजत्पुण्यमृगद्विजैः सर्वर्तुफलपुष्पाढ्यं वनराजिश्रियान्वितं ४० मत्तद्विज
गणैर्घुष्टं मत्तभ्रमरविभ्रमं मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ४१ कदंबचंपकाशो
ककरंजबकुलासनैः कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ४२ कारंडवैः प्लवैर्हंसैः कुररैर्ज
लकुक्कुटैः सारसैश्चक्रवाकैश्चकोरैर्वल्गुकूजितं ४३ तथैव हरिणैः क्रोडैः श्वाविद्गवय
कुंजरैः गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभि

तानां जालैः समूहैर्युक्तं ४० घुष्टं नादितं मत्तभ्रमराणां विभ्रमो विनोदो यस्मिन् मत्ता बर्हिण एव नटास्तेषामाटोपो नृत्य
संभ्रमो यस्मिन् आह्वयंतः मिथो मत्ताः कोकिला यस्मिन् कदंबादिभिर्वृक्षैरलंकृतं ४२ कारंडवादिभिः पक्षिभिः २२
वल्गु यथा तथा कूजितं ४३ हरिणादिभिर्वृतं तत्र क्रोडः शूकरः श्वावित् शल्लकः मर्कः मर्कटः नाभिषाः गोपुच्छाः हरि
वानरः सिंहा वा नाभिः कस्तूरीमृगः ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हुता: हुताशनो ब्रह्मचारियोग्योयेन ४५ उग्रो सुकुयो योगो यस्य तेन वपुषा विद्योतमानं ४६ तस्य भगवतो व्याहृतं भाषणमेव
अमृतकला अमृतमयस्य चंद्रस्य कला तन्मयं पीयूषं तस्य श्रवणेन च अनातिक्षामं तपसा क्लेशं संतमप्यकृशं प्रांशु सुन्नतं
४७ उपसंसृत्य समीपं गत्वा मलिनं दर्शनीय पुरुषेच क्रिया अर्ध्यार्थं अनेन तत्र्हणं महार्हत्वेन न तु अरसंस्कृतं आणि निर्विकी
यथा मलिनं दृश्यते तद्वत् ४८ उटजं पर्णशालां प्राप्त पुरः पाद समीपे प्रणतं आशीर्भिरभिनंद्य सपर्यया पूजया प्रसन्न

६८ प्रविश्य तत्रार्थवरमादिराजः सहानुजेनु: ददर्श मुनिमासीनं तस्मिन् हुतहुताशने ४५ विद्यो उ।
तमानं वपुषा तपस्युग्रयुजा चिरं नातिक्षामं भगवतः स्निग्धापांगावलोकनात् ४६ तद्व्याहृतामृ
तकलापीयूषश्रवणेन च प्रांशुपद्मपलाशाक्षं जटिलं चीरवाससं ४७ उपसंसृत्य मलिनं यथा
र्हणमसंस्कृतं अथोटजमुपायांतं तं देवं प्रणतं पुरः ४८ सपर्यया पर्यगृह्णात् आशीर्भिरनु धा।
कंपया गृहीतार्हणमासीनं संयंतं प्रणयान् मुनिः ४९ स्मरन् भगवदादेशमित्याह श्ल
क्ष्णया गिरा नूनं चंक्रमणं देव सतां संरक्षणाय ते ५० विधाय चासतां यस्त्वं हरेः शांति
हि पालिनी योर्कहृग्नी द्वावात्मनां यम धर्म प्रचेतसां ५१ रूपाणि स्थानमाधत्से तस्मै शुक्ला
यै नमः नयद्वारथमास्थाय जैत्रं मणिगणार्पितं विस्फुरज्जोर्च्चंडकोदंडोरथनत्रासयन्नग्यान्

कृतं सत्कृतवान् ४९ ते चंक्रमणं पर्यटनं हि यस्मात् ५ मनुस्त्वं विष्णुं प्रणमति यद्यपि स्थानेन न तु तत्कार्यावसरे शुक्लायति
स्मैव ५० नप दे निपंचानामयमर्थः यद्यपि धर्मरक्षार्थं सर्वेतः पर्यटनं सावप्रसंगात् प्यागमन संभवति तथापि विशेष
कार्यं चेदस्ति तत्कथ्यतामिति जैत्रं जयप्रदं मणिगणार्पितं तस्मिन् रथमारुह्य तेपिदा भुवो मंडलेन पर्यटमितदा तत्र
णाभिघ्नरान्नितिचयाणामत्वयः विस्फूर्जित नादं कुर्वन् चंडकोदंड

७२।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वसैन्यस्य चरणेोक्षुण्णं संघट्टितं ५३ वर्णाश्रमाणां निबंधनं येषां तत्रस्थैः ५४ निरंकुशो नेमिनिमित्तभ्रंशो शयानेन निर्ज्जितं ५५
निर्व्यलीकेन सहर्षेण प्रतिपद्यामहे स्वीकुर्महे ५६ तृतीये एकविंशः २१ द्वाविंशे कर्द्दमाया द्वाद्य यथादिष्टे हि विष्णुनाः स्वाभ
नुट्ठे हितं रदेवहूतिमित्युपवर्ण्यते १ एवमाविष्कृताशेषाणां गुणकर्मणां च उदयत उत्कर्षो यस्य स सम्राट् मनुः सव्रीड धानां २
इव स्वकीर्त्तिश्रवणात् प्रत्याख्यानशंकया वा तं मुनिमुवाच उपारतं निवृत्तिनिरतं १ महीयाकन्या त्वया परिणेय

स्वसैन्यचरणक्षुण्णं वेपयन्मंडलं भुवः विकर्षन् बृहतीं सेनां पर्यटस्यंशुमानिव ५३ तेदेवसेतवः सर्वे वर्णा
श्रमनिबंधनाः भगवद्रचिता राजन् भिद्येरन्बत दस्युभिः ५४ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभि
शयाने त्वयि लोकोयं दस्युग्रस्तो विनंक्ष्यति ५५ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः तद्वयं निर्व्य
लीकेन प्रतिपद्यामहे हृदा ५६ इति श्रीभागवते महापुराणे तृतीयस्कंधे एकविंशतिमोऽध्यायः
मैत्रेय उवाच एवमाविष्कृताशेषगुणकर्मोदयो मुनिं सव्रीड इव तं सम्राडुपारतमुवाच ह १
मनुरुवाच ब्रह्मासृजत्स्वमुखतो युष्मानात्मपरीप्सया छंदोमयस्तपोविद्यायोगयुक्तानलंपटान्
२ तत्त्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात् हृदयं तस्य हि ब्रह्म क्षत्रमंगं प्रचक्षते ३ अतो ह्य
न्योन्यमात्मानं ब्रह्म क्षत्रं च रक्षतः रक्षति स्माव्ययो देवः स यः सदसदात्मकः ४

ति विज्ञापयिष्यन् युष्मदस्मत्संबंधस्तावदीश्वरेण पूर्वमेव घटित इत्याह ब्रह्मेति सार्द्धाभ्यां आत्मनः परीप्सया पर्याप्तुमि
च्छया छंदोमयस्यात्मनः पर्याप्तिः पालनं वेदप्रवर्त्तनं तस्य इच्छया युष्मान् ब्राह्मणान् २ तत्त्राणाय ब्राह्मणपाल
नाय ब्रह्म ब्राह्मणजातिः क्षत्रं क्षत्रजातिः ३ एवं सदेव एव रक्षति स्म कोसौ यः सदसदात्मकः सर्वात्मकः तथा

श्रीभागवतटीका ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र।

तं विज्ञापयितुमेव तद्दर्शनादिकमभिनंदति विनिविभिः ५ ६ अनुग्रहोनुशासनादिरूपएव उशतीः उशत्यः ७ विज्ञाप
यतिस भवानिति सप्तभिः दुहितृस्नेहेन परिक्लिष्टआत्मा यस्य आवितं विज्ञापनं ८ प्रियभ्रुतोत्तानपादेः स्वैरोतिपु
त्रिकाकरणशंकानिरस्ता समसुतेति क्षत्रकन्यानवयोग्येति दर्शितं १० प्रतीच्छस्वीकुरु ११ उपपन्नस्य स्वतः प्रा

७० तवसंदर्शनादेवच्छिन्नामेसर्वसंशयाः यत्स्वयंभगवान्प्रीत्याधर्मंमाहरिरक्षिषोः ५ दिष्ट्यामेभगवानुद्दृष्टो
दुर्दर्शोयोकृतात्मनां दिष्ट्यापादरजस्पृष्टंशीर्ष्णामेभवतःशिवं ६ दिष्ट्यात्वयानुशिष्टोहंकृतश्चानुग्र
होमहान् अपावृतैःकर्णरंध्रैर्जुष्टादिष्ट्योशतीर्गिरः ७ सभवान्दुहितृस्नेहपरिक्लिष्टात्मनोमम
श्रोतुमर्हसिदीनस्यश्रावितंकृपयामुने ८ प्रियव्रतोत्तानपदोःस्वसेयंदुहितामम अन्वि
च्छतिपतिंयुक्तंवयःशीलगुणादिभिः ९ यदातुभवतःशीलश्रुतरूपवयोगुणान् अशृणोन्ना
रदादेषात्वय्यासीत्कृतनिश्चया १० तत्प्रतीच्छद्विजाग्र्येमांश्रद्धयोपहृतांमया सर्वात्मनानु
रूपांतेगृहमेधेषुकर्मसु ११ उद्यतस्यहिकामस्यप्रतिवादोनशस्यते अपिनिर्मुक्तसंगस्यका
मरक्तस्यकिंपुनः १२ यउद्यतमनादृत्यकीनाशमभियाचते क्षीयतेतद्यशःस्फीतंमानश्चावज्ञ
याहतः १३ अहंत्वाशृणवंविद्वन्विवाहार्थंसमुद्यतं अतस्त्वमुपकुर्वाणःप्रत्तांप्रतिगृहाणमे
१४ ऋषिरुवाच बाढमुद्वोढुकामोहंप्रमेत्ताचतवात्मजा आवयोरनुरूपोसावाद्योवैवाहिकोवि
धिः १५

प्राप्तस्य विषयस्य प्रतिवादः प्रत्याख्यानं १२ कीनाशं कृपणं अवज्ञया पराभवमानेन १३ यस्य सावधिर्ब्रह्मचर्यं स उ
पकुर्वाणः प्रत्तां मया दत्तां १४ अप्रत्ता चेति मय्येव कृतनिश्चयत्वात् कस्मैचित् प्रतिश्रुता च न भवतीत्यर्थः आद्यः प्रथ
मः ततः पूर्वविवाहाभावात् मुख्य इति वा १५ राम ७०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूयान्‌ भवेत्‌ प्रतीतः गृभ्णामि ते सौभगत्वाय हस्तं मया पत्येत्यादि मंत्र प्रसिद्धः स्वयांगकांत्यैव श्रियं भूषणादि शोभां १६
यां विलोक्य न्यपतत्‌ संमोहेन विमूढं व्याकुलं चेतो यस्य क्वणंत्यौ अंघ्रिभ्यां शोभा यस्याः १७ तां ललनानां ललामं भूष
णभूतां असेवितो श्रियश्चरणो यैः तैरदृष्टां द्रष्टुमप्ययोग्यां उच्चपदः उत्तानपादस्य अभियातां स्वयं प्राप्तां १८
भजिष्ये स्वीकरिष्ये यावदपत्योत्पत्तिस्तावद्गृहस्थो ततः परं सन्यास इति भाषा वेधस मयः तमेवाह यावत्‌ आत्म

कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः क एव ते तनयां नाद्रियेत स्वयैव कांत्या
क्षिपतीमिव श्रियं १६ यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीं विश्वावसुर्न्यपत
त्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः १७ तां प्रार्थयंतीं ललनाललाममसेवितश्रीचरणै
रदृष्टां वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियातां १८ अतो भजिष्ये समयेन सा
ध्वीं यावत्तेजो विभृयादात्मनो मे अतो धर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान्बहु मन्ये विहिंस्रा
न् १९ यतोऽभवद्विश्वमिदं विचित्रं संस्थास्यते यत्र च वावतिष्ठते प्रजापतीनां पतिरेष मह्यं परं प्र
माणं भगवाननंतः २० स उग्रधन्वन्नियदेवावभाष आसीच्च तूष्णीमरविंदनाभं धियोपगृह्णन्स्मि
तशोभितेन मुखेन चेतो लुलुभे देवहूत्याः २१

नो मम च तेजो गर्भं विभृयात्‌ यद्वा ममात्मनो देहात्‌ च्युतं तेजो वीर्यं विभृयादिति अतः परं पारमहंस्य ज्ञानं तस्मिन्‌ मुख्या
न्‌ शुक्लेन विष्णुना साक्षात्‌ प्रकर्षेण उक्तान्‌ अविहिंस्रान्‌ हिंसारहितान्‌ शमादीन्‌ बहु यथा भवति एवमनुष्ठेयान्मन्ये १९
ननु तव पितुः प्रजापते राज्ञा सृष्टौ वधनं सन्यासेन तत्राह यत इति संस्थास्यते च लयं यास्यति वावतिष्ठत एवार्थे कारणत्रया
पाकरणानंतरं सन्यास एव मादृशानां भगवतोक्त इत्यर्थः २० हे उग्रधन्वन्‌ लुलुभे मुने मुखेन प्रलोभ्यते स्म यद्वा मु
खेन प्रलोभितवान्‌ २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टि॰ प्रत्युदीयुः

समनुः अनु अनंतरं महिष्या अध्यवसितं निश्चयं ज्ञात्वा २२ पारिबर्हान् विवाहकाले प्रदेयान् भूषाः भूषणानि च वासांसि च परिच्छदान् गृहोपकरणानि च २३ प्रत्तां प्रदत्तां सदृक्षाय सदृशाय गतव्यथः विगता यस्य औत्कंठ्येनोन्मथितः क्षुभितः आशयो यस्य २४ तस्या विरहं सोढुं हे अंब हे वत्से इति ब्रुवन् संधिरार्षः शिखाः केशान् आसिंचत् २५ २६ ऋषिकुल्ये हितायाः उभयोः सुरोधसोः शोभनतटयोः २७ अभिप्रेत्य ज्ञात्वा ब्रह्मावर्तादेशात् प्रजाः पतिं प्रत्युज्जग्मुः २८ कासौ ब्रह्माव रा

सोऽनुज्ञात्वा व्यवसितं महिष्या दुहितुः स्फुटं तस्मै गुणगणाढ्याय ददौ तुल्यां प्रहर्षितः २२ शतरूपा महाराज्ञी पारिबर्हान् महाधनान् दंपत्योः पर्यदात् प्रीत्या भूषावासः परिच्छदान् २३ प्रत्तां दुहितरं सम्राट् सदृक्षाय गतव्यथः उपगुह्य च बाहुभ्यामौत्कंठ्योन्मथिताशयः २४ अशक्नुवंस्तद्विरहं मुंचन् बाष्पकलां मुहुः आसिंचदंब वत्सेति नेत्रोदैर्दुहितुः शिखाः २५ आमंत्र्य तं मुनिवरमनुज्ञातः सहानुगः प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः २६ उभयोर्ऋषिकुल्यायाः सरस्वत्याः सुरोधसोः ऋषीणामुपशांतानां पश्यन्नाश्रमसंपदः २७ तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजापतिं गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः २८ बर्हिष्मती नाम पुरी सर्वसंपत्समन्विता न्यपतन्यत्र रोमाणि यज्ञस्यांगं विधुन्वतः २९ कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः ऋषयो यैः पराभाव्य यज्ञघ्नान्यज्ञमीजिरे ३०

तदित्यपेक्षायामाह यत्र बर्हिष्मती नाम पुरीति सापि कुत्र यत्र यज्ञस्य यज्ञवराहस्य रोमाणि न्यपतन्निति यत्रेति सर्वत्र राम
संबध्यते २९ बर्हिष्मती नामनिरुक्तिं ब्रुवन् प्रसंगाद्दर्शस्य श्रैष्ठ्यमाह द्वाभ्यां कुशाः काशाश्चामनुशश्वत् नित्यं हरि ७१
तवर्णा येषां यज्ञघ्नान् राक्षसादीन् पराभवं नीत्वा यज्ञं विष्णुं ३०

७१

प्रसूषेष्वनुबद्धे नहदास्टण्वनुहरेः कथांः

सन्नद्द स्पर्धः यतोल्लध्वबान्

यज्ञविस्मु यज्ञ इति यत्रायज्ञनु भुवंस्थानंलब्धेति ह्नु अन्त्ययां नंल्लध्वबानुं नंयज्ञंपुरुषं इति वाराहवपुरादपिभूमिः श्रेष्ठा तत्रापितत्स्था नं श्रेष्ठमित्युक्तं भवति ३१ प्रस्तुतमाह यांवर्हिष्मतीनामपुरीं समावसत्पूर्वं यस्यामुषितः तस्यां निर्विश्य भवनं प्रविश्य सनुभो गानन्वभुंक्त इत्यन्वयः अन्येषां धर्मादीनामविरोधेन ३२ प्रत्यूषेषु अनुषक्तं संगीयमानासत्कीर्तिर्यस्य तथापि स्वयं हरेरे वकथाः श्रृण्वन् भोगानन्वभुंक्त ३३ योगमायासु ऐच्छिकभोगरचनासु यद्यतः आभंशयितुं अभिभवितुं ३४ अतः या इयदपि भ्रंश्यतुं

कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवं ३१ बर्हिष्मतीनाम
विभुर्यां निर्विश्य समावसत् तस्यां प्रविष्टो भवनं तापत्रयविनाशनं ३२ सभार्यः सप्रजः कामान्
बुभुजेऽन्याविरोधतः संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः ३३ निष्णातं योगमायासु
मुनिः स्वायंभुवं मनुं यदाभ्रंशयितुं भोगा न शेकुर्भगवत्परं ३४ अयातयामास्तस्यासन्
यामाः स्वान्तरयापनाः शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ३५ स एवं स्वान्तरं नि
न्ये युगानामेकसप्ततिं वासुदेवप्रसंगेन परिभूतगतित्रयः ३६ शारीरा मानसा दिव्या वैया
से ये च मानुषाः भौतिकाश्च कथं क्लेशा बाधन्ते हरिसंश्रयं ३७ यः पृष्टो मुनिभिः प्राह धर्मा
न्नानाविधाञ्छुभान् नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ३८ श्रीरामजयराम

तोयामोयस्य पक्षस्यान्नस्यं तद्गतसारं भवति अतोन्यदपिगतसारं यातयाममुच्यते अयातयामाः अगतसाराः आसन् स्वां
तरं तदीयमन्वन्तरं यापयंति नयंतिये यामाः कालावयवाः कुर्वतः स्ववाक्येरूपनिवध्नतः ३५ परिभूतं गतित्रयं जाग्रदादि
सात्विकादि वायेन ३६ दिव्याः स्वान्तरिक्षाः मानुषाः शत्रुप्रभावाः भौतिकाः शीतोष्मादिप्रभावः वैयासि विदुर ३७ तस्य ज्ञाने

नित्यमाह यदति वर्णाश्रमाणां धर्मान् ३९

तस्यपदपत्यंदेवहूतिः तस्योदयंप्रभावं ३१ तृतीयेत्रयोविंशः त्रयोविंशेतपोयोगनिर्मितेनसर्वसंपदि विमानेकामगेविज्ञान
योरतिंदुहितयैते प्रस्थितेगमनेकृतेसति १ दंभंकपटं अघंनिषिद्धाचरणं तेजीयांसंश्रेतितेजस्विनं ३ दैवाद्गरीयसः दैवा
दपिगुरुतरात् दैवमपिअन्यथाकर्तुंसमर्थादित्यर्थः ४ व्रतचर्ययाकर्शितां तथापिभूयसाकालेनातिक्षामामित्यर्थः ५

एतत्तेआदिराजस्यमनोश्चरितमद्भुतं वर्णितंवर्णनीयस्यतदपत्योदयंशृणु ३१ इतिश्रीभागवतेम
हापुराणेतृतीयस्कंधेद्वाविंशतितमोध्यायः श्रीमैत्रेयउवाच पितृभ्यांप्रस्थितेसाध्वीपतिमिंगितकोवि
दा नित्यंपर्यचरत्प्रीत्याभवानीवभवंप्रभुं १ विश्रंभेणात्मशौचेनगौरवेणदमेनच शुश्रूषयासौहृदे
मानं ✓ नवाचामधुरयाचभो २ विसृज्यकामंदंभंचद्वेषंलोभमघंमदं अप्रमत्तोद्यतानित्यंतेजीयांसमतोषयत्
७२ ३ सवैदेवर्षिवर्यस्तांमानवींसमनुव्रतां दैवाद्गरीयसःपत्युराशासानांमहाशिषः ४ कालेनभूयसा रा५
क्षामांकर्शितांव्रतचर्यया प्रेमगद्गदयावाचापीडितःकृपयाब्रवीत् ५ तुष्टोहमद्यतवमानविमा
नदायाःशुश्रूषयापरमयापरयाचभक्त्या योदेहिनामयमतीवसुहृत्सदेहोनावेक्षितःसमुचि
तःक्षपितुंमदर्थे ६ येमेस्वधर्मनिरतस्यतपःसमाधिविद्यात्मयोगविजिताभगवत्प्रसादाः तानेवते
मदनुसेवनयावरुद्धान्दृष्टिंप्रपश्यवितराम्यभयानशोकान् ७

सुहृत्प्रियःमदर्थेक्षपयितुंनावेक्षितःनगणितःसमुचितः श्लाघ्योपिमत्सेवयासक्तयाउपेक्षितइत्यर्थः ६ तपश्चस राम
माधिश्चविद्याचतदुपासनाताभिःयुक्तःआत्मयोगः चित्तैकाग्र्यंतेनविजिताःप्राप्ताभगवत्प्रसादाःदिव्याभोगाः तानेवते ७२
अविरुद्धान्त्वयापिवशीकृतान् प्रपश्यते दिव्यांदृष्टिंवितरामि यया दृश्याद्रक्ष्यसि ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनं

अन्ये पुनर्भोगाः किमपि अतितुच्छा इत्यर्थः। तत्र हेतुः भगवत उरुक्रमस्य या भ्रूः तस्या उद्विजृंभः वक्रीभावः तेन विभ्रंशिता अर्थरचना
मनोरथा येषु निजधर्मेण पातिव्रत्येन दुह्यन्ते इति तथा तान् दुरधिगान् दुःप्रापान् नृपा वयमिति या विक्रिया स्तब्धता ता भोगविकृतयः
ताभिः ८ अखिलयोगमाया अविद्या अन्नानु दुपासना तासु विचक्षणं निपुणमेवं ब्रुवाणं पतिमवेक्ष्य गताधिर्निश्चिन्ता जाता संप्र
ग ॰ श्रयो विनयः प्रणयः प्रेम ताभ्यां विह्वलया गिरा ईषद्व्रीडा सहितो यो वलोकस्तेन विलसद्धसितमाननं यस्याः सा आह जगाद ९
दंतीति हे वृषद्विज द्विजश्रेष्ठ हे भर्तः त्वयि एतत्सर्वं राद्धं सिद्धमेव तदहमेवमिजानामि किंतु यस्त्वया समयो भिहितः सतावङ्क्या
त्सकृदिति गर्भसंभवमात्रपर्यन्त इत्यर्थः यस्मात् गरीयसि श्रेष्ठ भर्तरि हेतुभूते स्त्रीणां प्रसवो गुणः महान् लाभः समासे या पोऽगरीय

अन्ये पुनर्भगवतो भ्रुव उद्विजृंभविभ्रंशितार्थरचनाः किमुरुक्रमस्य सिद्धासि भुंक्ष्व विभवान्निजधर्मदोहान् दि
व्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ८ एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्षणमवेक्ष्य गताधिरासी
त्। संप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाह ९ देवहूतिरुवाच राद्धं बत द्विजवृषै
तदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः यस्तेऽभ्यधायि समयः सकृदंगसंगो भूयाद्गरीयसि गुणः प्र
सवः सतीनां १० तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैव मे कर्शितोऽतिरिरंसयात्मा सिद्ध्येत ते कृतमनोभवधर्षिताया दीनस्तदी
शभवनं सदृशं विचक्ष्व ११ श्रीमैत्रेय उ॰ प्रियायाः प्रियमन्विच्छन् कर्दमो योगमास्थितः विमानं कामगं क्षत्तस्तर्ह्ये
वाविरचीकरत् १२ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतं १३

सि पत्यौ सति सतीनां पतिव्रतानां गुणः प्रसवः गुणविस्तारो भवति अतः पुत्रोत्पत्त्या मम गुणविस्तारे जाते पश्चाद्बहुकं सर्वं भवत्विति भावः १० अंगसंगार्थं
च प्रथममितिकर्तव्यं तावत्संपादयेत्याह हे ईश तत्र अंगसंगे इतिकृत्यं साधनं यथोपदेशं कामशास्त्रानुसारेण उपशिक्ष संजानीहि उपकल्पय
इत्यर्थः येन साधनेन अंग भाजनपानादिना अतीव रंतुमिच्छया कर्शितो दीनश्च मे मम एष आत्मा देहः सिद्ध्येत रतिसमर्थो भवेत् कथंभूतायाः ते
त्वयैव कृतः क्षोभितो यो मनोभवस्तेन धर्षितायाः तद्गुणेनानुरूपं भवनं च विचक्ष्व चिन्तय विचारयेति यावत् ११ तर्हि तत्क्षणमेव आविरचीकरत् आ
विर्भावयांबभूव १२ तदेव वर्णयति सर्वकामदुघं इति त्रिभिः सर्वैश्च रत्नैः समन्वितं सर्वर्द्धीनां सर्वसंपदां य उपचयस्तदुदर्कः उत्तरोत्तर

दि दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपकरणं परिकरः पट्टिका अल्पविस्तारः पट्टवस्त्रविशेषाः पताका विस्तृताः ताभिः १४ विचित्राणि माल्यानि पुष्पाणि यासु मंजुषथा भवत्येवं
सिंजंतः षड्पदा येषु यासु ताभिः स्रग्भिः १५ उपर्युपरि विरचितगृहेषु कशिपुभिः शय्याभिः कांतकमनीयं पर्यंकादिभिः कांतं १६ द्वाः मुक्ता
रेषु विद्रुमनिर्मितादेहल्यो उदुंबरस्तया भांतिशोभितं वज्रखचितकपाटयुक्तं इंद्रनीलमयेषु शिखरेषु प्रासादाग्रभागेषु १८ चक्षुष्मंत
इवेषपद्मरागाग्रकोशैः यद्वा चक्षुष्मद्विवेकः पद्मरागांशैः विचित्रैर्वितानैर्वितानसमूहैः १९ कृत्रिमानपिहंसादीनुस्वानुस्वज्ञानीया

७३ दिव्योपस्करणोपेतं सर्वकालसुखावहं पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं १४ स्रग्भिर्विचित्रमाल्याभिर्मं
जुसिंजत्षडंघ्रिभिः दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं १५ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् क्षि
प्तैः कशिपुभिः कांतं पर्यंकव्यजनासनैः १६ तत्रतत्र विनिक्षिप्तनानाशिल्पोपशोभितं महामरकतस्थल्या
जुष्टं विद्रुमवेदिभिः १७ द्वाःसु विद्रुमदेहल्या भातं वज्रकपाटमत् शिखरेष्विंद्रनीलेषु हेमकुंभैरधिश्रि श्री
तं १८ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः १९ हंसपारा
वतव्रातैस्तत्रतत्र निकूजितं कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च २० विहारस्थानविश्रामसंवेशप्रा
ङ्गणाजिरैः यथोपजोषं रचितैर्विस्मापनमिवात्मनः २१ ईदृग्गृहं तत्पश्यंतीं नातिप्रीतेन चेतसा सर्वभूताश
याभिज्ञः प्रावोचत्कर्दमः स्वयं २२ निमज्ज्यास्मिन् ह्रदे भीरु विमानमिदमारुह इदं शुक्लकृतं तीर्थमाशि
षां यापकं नृणां २३ सा तद्भर्तुः समादाय वचः कुवलयेक्षणा सरजं बिभ्रती वासो वेणीभूतांश्च मूर्द्धजान्
२४

न्मन्यमानैः स्वान्तत्राधिरुह्याधिरुह्य निकूजितं २० विहारस्थानं क्रीडाप्रदेशः विश्रामः शयनगृहं संवेशः उपभोगस्थानं प्रांग
२१ णं गृहाद्बहिः अजिरं प्राकाराद्बहिः यथोपजोषं यथासुखं आत्मनः स्वस्य मायाविनोऽपि विस्मयजनकमिव २१ नातिप्रीतेन मलिनदे
हत्वात् परिचारिकाभावाच्च अस्मिन् ह्रदे बिंदुसरसि आरुह अधिरोह शुक्लेन विष्णुना कृतं आनंदबिंदुनिपातेन नयापकं प्रापकं २३ ७३
समादाय आदृत्य सरजं मलिनं २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ स

शवलो विवर्णो स्तनौ यस्मिन् तत् सरस्वत्याः शिवानि जलानि आशेरते यस्मिन् शिवाजलाशया जलचरा यस्मिन्न् इ निवा २५ सा तत्र

निमग्ना सती विस्मयं ददर्श तमाह सांतः सरसीति दशभिः उत्पलगंधयः २६ स्त्रियः प्रोचुः नवकर्मकरीः परिचारिका वयं अस्मान

ज्ञापयेति २७ तत अस्त्रानेन स्नानेयोग्येन तैलादिना २८ पराआनि उत्कृष्टानि वरीयांसि तत् स्त्रियाणि दीप्तिमंति च पानेपेयं अस्तत्

स्वादु आसवं स्वादुकं २९ आदर्शे स्वमात्मानं ददर्श तिशिशेषः आत्मानं विशिनष्टि चतुर्भिः कृतं स्वस्त्ययनं मंगलं यस्य पुंस्त्वमात्मश

सा तद्वत्तु समादाय वचः कुवलयेक्षणा सरजं विभ्रती वासो वेणीभूतां अमूर्द्धजान् २४ अंगाच मलपंकेन संछन्नेश

नं १ चलस्तनी आविवेश सरस्वत्याः सरः शिवजलाशयं २५ सांतः सरसि वेश्मस्थाः शतानि दश कन्यकाः सर्वाः किशोरवयसा

ददर्शोत्पलगंधयः २६ तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः वयं कर्मकरीः तुभ्यं शाधि नः करवाम किं २७

स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीं दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः २८ भूषणानि पराद्ध्यानि वरी ८४

यांसि द्युमंति च अन्नं सर्वगुणोपेतं पानं चैवामृतासवं २९ अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरं विरजं कृत

स्वस्त्ययनं कन्याभिर्बहुमानितं ३० स्नातं कृतशिरस्नानं सर्वाभरणभूषितं निष्कग्रीवं वलयिनं कूजत्कांच

ननूपुरं ३१ श्रोण्योरध्यस्तया कांच्या कांचन्या बहुरत्नया हारेण च महार्हेण रुचकेन च भूषितं ३२ सुदंतं सुभ्रुवं

श्लक्ष्णस्निग्धापांगेन चक्षुषा पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखं ३३ यदा सस्मार ऋषभमृषीणां दयितं

पतिं तत्र चास्ते सह स्त्रीभिर्यत्रास्ते स प्रजापतिः ३४ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रवृतं तदा निशाम्य तद्योगगतिं संश

यं प्रत्यपद्यत ३५

द सामानाधिकरण्यात् ३० विरजमित्यस्य प्रपंचः स्नातं तु हर्ल्यक्षालितं कृतं शिरःस्नानमभ्यंगो येन भूषितत्वमेवाह निष्कपदकं ग्रीवायस्य ३१

वहे निरतानि यत्तानया तु रुचकेन मंगलद्रव्येण कुंकुमादिना तदुक्तं विश्वप्रकाशे रुचके मंगलद्रव्ये ग्रीवाभरणे दंतयोरिति ३२ सुदंतं सुभ्रुवं

चक्षुषेति च ज्ञातव्यवचनानि एतैर्लसत् शोभमानं मुखं यस्य कथं भूतेन चक्षुषा श्लक्ष्णो मनोहरः स्निग्धः अपांगो नित्रांतो यस्य पद्मकोशो

नस्पर्द्धते इति पद्मकोशस्पृक् तेन ३३ दृष्ट्वा च यदा पतिं सस्मार तदा यत्रासौ तत्रैव स्वयमाप्यास्ते ३४ आत्मानं निशाम्य दृष्ट्वा तां च तस्य योगग

सुमुनिर्विवाहानुप्राकृयहात्मनो रूपं तदेव पुनर्विभ्रती संवीतो प्राहृतोरुच्चिरोत्सानो यस्याः पाठान्तरेणनु रूपविशेषणं ३६ शोभनेवा
ससोयस्याः जातोभावः प्रेमयस्य हे अमित्रहन् जितकाम ३७ तस्मिन्नू विमानमुनिर्विभ्राजे नत्नु सोमहिमास्वातंत्र्ययस्य उपचीर्णे
शुभ्रापितवपुर्यस्य विकासितकुमुदगणवान् अपीच्यातिसुंदरः पूर्णचंद्रवन्मुनिः नभइव विमानेतारोडुवताः स्त्रियः कुमुदानी
वतांसोतत्राणोनिर्जय ३८ तेन विमानेनश्राट् लोकपालानांविहारायस्मिन्कुलाचलेंद्रे मेरोतस्यद्रोणीषु दरीषु अनंगस्यसखायामा

सतांसकृतमलल्लानांविभ्राजतीमद्रवंवत् आत्मनो विभ्रतीरूपंसंवीतानुच्चिरस्तनी ३६ विद्याधरीसहस्रेण सेव्यमाना
सुवासः संजातभावाविमानंतदारोहयद् मित्रहन् ३७ तस्मिन्नलुप्तमहिमाप्रिययानुरक्तो विद्याधरीभिरुपचीर्णव
पुर्विमानेवभ्राजउ केचकुमुद्गणवाौणीपोड्यस्ताराभिरादृतइवोडुपतिर्नभस्थः ३८ तेनाष्टलोकपविहारकुलाच
लेंद्रद्रोणीष्वनंगसखमारुतसोभगासु सिद्धैर्नुतोद्युधुनिपातशिवस्वनासुरेमेचिरं धनदवल्ललनावरूथी ३९
७४ वैश्रंभकेसुरसनेनंदनेपुष्पभद्रके मानसेचैत्ररथ्येचसरेमेरामयारतः ४० भ्राजिष्णुना विमानेनकामगेनमहि
यसा वैमानिकानत्यशेतेचरन्लोकान्यथानिलः ४१ किंदुरापादनं तेषां पुंसामुद्दामचेतसां येराश्रितस्ती
र्थपदश्चरणोव्यसनात्ययः ४२ प्रेक्षयित्वाभुवोगोलं पत्न्यैयावान्स्वसंस्थया बह्वाश्चर्यं महायोगी स्वाश्रमाय
न्यवर्तत ४३ विभज्यनवधात्मानंमानवीसुरतोत्सुकां रामांनिरमयन्रेमेवर्षपूगान्मुहूर्तवत् ४४ तस्मिन्विमानउ
त्कृष्टांशय्यांरतिकरीश्रिता नबाबुध्यततंकालंपत्यापीच्येनसंगता ४५ एवंयोगानुभावेनदंपत्योरममाणयोः
शतंव्यतीयुःशरदःकामलालसयामनाक् ४६

रतः शीतसुगंधमंदानिलः तेनसोभगं सौभाग्यं सौंदर्यं यासु सिद्धैर्नुतः स्तुतः सन् द्युधुनिर्गंगा तस्याः पातेन शिवः स्वनोयासुतासुरेमेल राम
लनावरूथीस्त्रीरलसमूवोहेन ३९ विश्रंभकादिषुदेवोद्यानेषु मानसचसरसि रतः प्रीतः सन् ४० अत्यशेत अतिक्रम्य स्थितः ॥४० ७४
उद्दामचेतसांधीराणांव्यसनंसंसारः तस्यात्ययोयस्मात् ४१ प्रेक्षयित्वादर्शयित्वा गोलंमंडलं स्वसंस्थया द्वीपवर्षादिरचनयायाः
वान्तावंतंवहुन्याश्चर्याणियस्मिन् ४३ विभज्यनवधानवप्रमदेनात्मानंकृत्वा ४४ ५ शरदः संवत्सराः मनाकु ईषदिवव्यतीयुः ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मना स्वदेहार्द्धरूपेण अतिप्रीत्या भावयन् तथा सति सद्रूपत्वं भवेदिति नो धाता न वधा सर्वसंकल्पविदिति तस्याः वक्रपत्यसंकल्पं जानन्नि
त्यर्थः विभुस्तथा कर्त्तुं समर्थः आत्मविदिति च तस्यामनासक्तत्वात् स्त्रियो जाता इति भावः पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रि
या इति स्मृतेः ४७ अतः अनंतरमेव सद्यः एकस्मिन्नेवाहनि चात्रूणि सर्वाण्यंगानि यासां ४८ प्रव्रजिष्यंतं आलक्ष्य वितर्कैः स्मयमाना
वहिः अंतस्तु विक्लवेन आकुलेन विद्रूयता संतप्यमानेन हृदा उवाचेत्युत्तरेणान्वयः ४९ न रवाणेव मणाय ततः श्रीः शोभा यस्य तेन
वा। पद्मभुवं लिखंती तिदुरंत चिंताच्च क्षणं ५० उपाहसंपादितवान् अभयमिति भावि नो देव्या त्वं मो रात्र्य यद्भयत्तन्निवर्तयेत्यर्थः ५१

त्मना। तस्यामाधत्त तेन तां भावयन्नात्मवित् नो धा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ४७ अतः सा सुषुवे सद्यो देवहूतिः
स्त्रियः प्रजाः सर्वास्ताश्चानुसर्वांगयोत्कोहितोत्पलगंधयः ४८ पतिं सा प्रव्रजिष्यंतं तदालक्ष्योशती सती स्म
यमाना विक्लवेन हृदयेन विद्रूयता ४९ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया उवाच ललितां वाचं
निरुध्याश्रुकलां शनैः ५० सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतं अथापि मे प्रपन्नाया अभयं दातुमर्ह
सि ५१ ब्रह्मन् दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनं ५२ ए
तावतालं कालेन व्यतिक्रांतेन मे प्रभो इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ५३ इंद्रियार्थेषु स
ज्जंत्या प्रसंगस्त्वयि मे कृतः अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ५४ राम राम राम राम राम॥

ननु देवं निवेदयति तु भ्यं तवदुहितृभिः स्वयमेवात्मनः समा योग्याः पतयो विमृग्याः इति दैन्यं प्राप्य संसारभयमुररीकृत्याह कच्चि
दिति विशोकाय ज्ञानोपदेशाय स्त्रीभिः आणाणनपाकारणात् किंचित्कालं त्वदवस्थानेन ब्रह्मविन्पुत्रः कश्चित् किं स्यादित्यर्थः
५२ विषयान् भुंक्ष्व किं ब्रह्मविद्यायेति चेत्तत्राह एतावता अलं पूर्यतां परित्यक्तः परः आत्मा यथा तस्याः मम ५३ स्वकृतमनुशो
चत्याह इंद्रियार्थेष्विति चतुर्भिः मे मया परं भावं त्वं ब्रह्मविदिति ५४

तवं।

धर्मद्वारा विरागायनकल्पतेत द्वा १

र्प्रसंगः कथमभयायास्तुतत्राह संगइति अधियाअज्ञानेन ५५ स्वभावतः प्रवृत्तेयस्यकर्मो धर्मोर्थनकल्पते धर्मोभिसुखंनभवेत् न
चापिनिष्कामंधर्मद्वाराचतीर्थपदस्यहरेः सेवार्थनपर्यवस्येदित्यर्थः ५६ नमुमुक्षयमोक्तुमिच्छांनकृतवत्यस्मि ५७ इतित्रेतीये
त्रयोविंशः चतुर्विंशतितमेजन्मकपिलस्याहतत्पितुः प्रव्रज्यांतमनुज्ञाप्यमोक्षायविमोक्षः शालिनीश्लाघ्यांशुक्लेनाभिव्या २:३

७५ संगोयस्संसृतेर्हेतुरसत्सुविहितोधिया सएवसाधुषुकृतोनिःसंगत्वायकल्पते ५५ नेहयत्कर्मधर्मायनवि
रागायकल्पते नतीर्थपदसेवायैजीवन्नपिमृतोहिसः ५६ साहंभगवतोनूनंवंचितामाययादृढं यत्त्वांविमु
क्तिदंप्राप्यनमुमुक्षेयबंधनात् ५७ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलेयोपाख्यानेत्रयोविंशतितमो
ध्यायः श्रीमैत्रेयउवाच निर्वेदवादिनीमेवंमनोर्दुहितरंमुनिः दयालुःशालिनीमाहशुक्लाभिव्याहृतं २।५
स्मरन् १ ऋषिरुवाच माखिदोराजपुत्रीत्थमात्मानंप्रत्यनिंदिते भगवांस्तेक्षरोगर्भमदूरात्संप्रपत्स्यते २ धृत
व्रतासिभद्रंतेदमेननियमेनच तपोद्रविणदानैश्चश्रद्धयाचेश्वरंभज ३ सत्वयाराधितःशुक्लोवितन्वन्मा
मकंयशः छेत्ताते हृदयग्रंथिमौदर्योब्रह्मभावनः ४ श्रीमैत्रेयउवाच देवहूत्यपिसंदेशंगौरवेणप्रजापतेः
८३ सम्यक्श्रद्धायपुरुषंकूटस्थमभजद्गुरुं ५ तस्यांबहुतिथेकालेभगवान्मधुसूदनः कार्दमंवीर्यमापन्नोजज्ञे
ग्निरिवदारुणि ६ अवादयंस्तदाव्योम्निवादित्राणिघनाघनाः गायंतितंस्मगंधर्वानृत्यंत्यप्सरसोमुदा ७
पेतुःसुमनसोदिव्याःखेचरैरपवर्जिताः प्रसेदुश्चदिशःसर्वाअंभांसिचमनांसिच ८

हंतसत्वाहंस्वांशकलोयमित्यादि १ इत्थंमाखिदःखेदंमाकार्षीआत्मानंप्रतिअहंभाग्यहीनेति अदूरात्शीघ्रं २ दमेनइंद्रियसंयमेन नि
यमेनस्वधर्मेणतपःसिद्धविणदानानिचैतैः ३ हृदयग्रंथिंविज्ञानात्मकंअहंकारलक्षणंबंधंछेत्ताछेत्स्यति औदर्यःपुत्रःसन्ब्रह्मभाव ७५
यतिउपदिशतीतितथा ४ श्रद्धायविश्वस्य ५ बहुतिथेबहुतरेकालेतिक्रांते ६ घनाघनाइत्येकंपदंवर्षंतोमेघाः गायंतिस्मनृत्यंतिस्म ७ अ
वर्जितायुक्ताः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिश्रितं परिवेष्टितं ९ आगत्य किं कृतवानित्याह भगवंतमिति द्वाभ्यां तत्त्वानां संख्यानं यस्मिन् तस्य सांख्यस्य विज्ञप्त्यै विशेषेण ज्ञापना
य भगवंतं जातं विद्वान् अजो ब्रह्मा स्वराट् स्वतः सिद्धज्ञानः १० तस्य चिकीर्षितं सभाजयन् पूजयन् प्रहृष्यमाणैरसुभिरिंद्रियैरुपलक्षि
तः कर्दमं चेदमभ्यधादिति द्वयोरन्वयः चकारादेवहूतिं च ११ तत्त्वयेति पंचभिः कर्दमं प्रत्याह अपचितिः पूजा हे तात यत्समोत निष्क
पटं सम्यग्गृहीतवान् १२ अनुमन्येत तियन् एतावत्येव १३ अनेकधा प्रभावैर्वंशो बृंहयिष्यंति वर्द्धयिष्यंति १४ ऋषिमुख्येभ्यो मरीच्यादि

तः कर्दमाश्रमपदं सरस्वत्या परिश्रितं स्वयंभुः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ९ भगवंतं परं ब्रह्म सत्वेनां
शेन शत्रुहन् तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् १० सभाजयन् विशुद्धेन चेतसा तच्चिकीर्षितं प्रहृष्य
८३ माणैरसुभिः कर्दमं चेदमभ्यधात् ११ ब्रह्मोवाच त्वया मेपचितिस्तात कल्पिता निर्व्यलीकतः यन्मे संजगृहे वाक्यं भ
वान् मानद मानयन् १२ एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः बाढमित्यनुमन्येत गौरवेण गुरोर्वचः १३ इ
मा दुहितरः सत्यस्तव वत्स सुमध्यमाः सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा १४ अतस्त्वमृषिमुख्येभ्यो य
९५ थाशीलं यथारुचि आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि १५ वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया भू
२८ तानां शेवधिं देहं बिभ्राणं कपिलं मुने १६ ज्ञानविज्ञानयोगेन कर्मणामुद्धरन् जटाः हिरण्यकेशः पद्माक्षः प
द्ममुद्रापदांबुजः १७ एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः अविद्यासंशयग्रंथिं छित्वा गां विचरिष्यति ॥
१८ अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः लोके कपिल इत्याख्यां गंता ते कीर्तिवर्द्धनः १९ श्री
मैत्रेय उवाच तावाश्वास्य जगत्स्रष्टा कुमारैः सहनारदः हंसो हंसेन यानेन त्रिधामपरमं ययौ २० ॥

भ्यः १५ पुत्रस्तु साक्षादीश्वर इत्याह वेदाहमिति सेवधिं निधिं सर्वाभीष्टदं १६ देवहूतिं प्रत्याह त्रिभिः ज्ञानं शास्त्रोक्तं विज्ञानं परोक्षं च
ते एव योगस्तु पायस्तेन कर्मणां जटाः मूलानि वासनास्तु उद्धरन् उत्पाटयिष्यन् पद्ममुद्रायुक्ते पदांबुजे यस्य १७ हे मानवि अविद्या स्वरू
पाज्ञानं संशयं मिथ्याज्ञानानि तन्मयं तेष्वहं दं यत्र ग्रंथिं १८ सुसंमतः सुपूजितः सन् गंता प्राप्स्यति १९ कुमारैः सह तेन सह नारदः
सहितश्च मरीच्यादीनु विवाहार्थमवस्थाप्य नैष्ठिकैस्तैः पंचभिः सहितो हंसो ब्रह्मा ययौ त्रिधाम त्रिलोकीयं धाम स्वर्गः तस्य परा का

श्रीभाग० टी० ३ ८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शतधृतौ ब्रह्मणि २१ २२ युक्तां योग्यां अयच्छत् अप्रादात् वितन्यते सम्यक् क्रियते शांत्यधिष्ठात्रीं देवतामित्यर्थः समलालयत् संतोषितवान्
हर २४ निमंत्र्य पृष्ट्वा नंदिं हर्षं प्राप्ताः संतः २५ स च मुनिः त्रियुगं विष्णुं विविक्ते रहसि २६ पापच्यमानानां निरये संसारे स्वीयैरमंगलैः पापैः २७ ॥ ह१
कुतः सर्वा देवताः प्रसन्नाः इति ज्ञातं अत्र लब्ध्या लाभादित्याह द्वाभ्यां बहुषु जन्मसु विपक्वेन सुसिद्धेन सम्यक् योगो भक्तियोगस्तस्मिन्स
माधिरैकाग्र्यं तेन शून्यागारेषु विविक्तस्थानेषु यत्पदं २८ हेलनं अवज्ञां लाघवं न गणय्य अगणयित्वा उचितमवतीर्णेति दिसा

गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः २१ मरीचये कलां प्रादादनसूयामथा
त्रये श्रद्धामंगिरसेऽयच्छत्पुलस्त्याय हविर्भुवं २२ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीं ख्यातिं च भृगवेऽयच्छद्
वसिष्ठायाप्यरुंधतीं २३ अथर्वणेऽददाच्छांतिं यया यज्ञो वितन्यते विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत् २४
ततस्त ऋषयः क्षत्तः कृतदारा निमंत्र्य तं प्रातिष्ठन्नंदिमापन्नाः स्वं स्वमाश्रममंडलं २५ स चावतीर्णं त्रियुगमाज्ञाय विबु
धर्षभं विविक्त उपसंगम्य प्रणम्य समभाषत २६ अहो पापच्यमानानां निरये स्वैरमंगलैः कालेन भूयसा नूनं
प्रसीदंतीह देवताः २७ बहुजन्मविपक्वेन सम्यग्योगसमाधिना द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदं २८ स ए
व भगवानद्य हेलनं न गणय्य नः गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः २९ स्वीयं वाक्यमृतं कर्तुमवती
र्णोसि मे गृहे चिकीर्षुर्भगवान्ज्ञानं भक्तानां मानवर्द्धनः ३० तान्येव तेऽभिरूपाणि रूपाणि भगवंस्तव यानि यानि
च रोचंते स्वजनानामरूपिणः ३१ त्वां सूरिभिस्तत्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं ऐश्वर्यवैराग्ययशोव
बोधवीर्यश्रिया पूर्तमहं प्रपद्ये ३२

हे यस्त्वं स्वानां भक्तानां पक्षं पुष्णासि इति तथा सः २९ एतत्स्वं पंचयति द्वाभ्यां स्वयमेवावतीर्णोसि स्ववाक्यं तव पुत्रो भविष्यामीति राम
यत् तत्सत्यं कर्तुं ज्ञानं ज्ञानसाधनं सांख्यं च विचिकीर्षुः सन् ३० यानि तवालौकिकानि चतुर्भुजादिरूपाणि तान्येव ते अभिरूपाणि यो ७६
ग्यानि च स्वजनानां रोचंते मनुष्यसदृशरूपाणि तान्यपि ते रोचंत इत्यर्थः अरूपिणः प्राकृतरूपरहितस्य ३१ अभिवादार्हे पादपीठं य
स्य ऐश्वर्यादिभिः पूर्तं पूर्णं ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐश्वर्यादिकं विग्रहेणैवाह परं परमेश्वरं तत्र हेतुः स्वच्छंदाः स्वाधीनाः शक्तयो यस्य तं एवाह प्रधानं प्रकृतिरूपं पुरुषं तदधिष्ठातारं महांतं म
हत्तत्त्वरूपं लोकात्मकं तत्पालात्मकं चाग्न्यादेवमात्मयाप्रधानादिरूपतामुक्ता विरुद्धत्वान्निःप्रपंचतामाह आत्मानुभूत्या चिच्छक्त्या अनुगतः
स्वस्मिन् लीनः प्रपंचो यस्य तं कविं सर्वज्ञं प्रधानाद्याविर्भावलयसाक्षिणमित्यर्थः ३३ समुदितः सम्यग्मुक्तः सन् आस्माभिपृच्छे यत्किंचिद य ३
पुत्र २ त्तिं पृच्छामीत्यर्थः त्वया रूपेणावतीर्णो निनिमित्तानि ऋणानि देवादिरूपाणि यस्य सः आप्तकामश्च अहं परिव्राजकानां सन्यासिनां पदवीमा
र्गं आश्रितः सन् त्वां युंजन् स्मरन् विचरिष्यामीति ३४ अहं तावदनुज्ञानोपदेशाय चलकृहे वतीर्णः अतस्तावद्गेहे वसतोपि मुक्तिः सुलभैवेत्य

परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदशक्तिं कपिलं प्रपद्ये ३३
आस्माभिपृच्छेऽद्य पतिं प्रजानां त्वयावतीर्णर्ण उताप्तकामः परिव्रजत्पदवीमास्थितोहं चरिष्ये त्वां हृदि युंजन् वि
शोकः ३४ श्रीभगवानुवाच मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके अथाजनि मया तुभ्यं यदवोचमृतं मुने ॥
३५ एतन्मे जन्म लोकेस्मिन् मुमुक्षूणां दुराशयात् प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ३६ एष आत्मपथो
व्यक्तो नष्टः कालेन भूयसा तं प्रवर्तयितुं देहमिमं विद्धि मया भृतं ३७ गच्छ कामं मयापृष्टो मयि सन्यस्तकर्म
मृत्युम १ णा ॥ जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३८ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयं आत्मन्येवात्मना वीक्ष्य विशो
कोभयमृच्छसि ३९

एव च स्वयं गंतव्यमेवेत्याग्रहः तथापि मामेवानुस्मरन् गच्छेत्यारोपनाह मयेति षड्भिः सत्यलौकिकेषु वेदे लोके च लोकस्य प्रमाणमभिदर्शयति वैदिके लौकिके १
यत् त्वस्माकं पुत्रो भविष्यामीत्युक्तवान् अथ अतएव तत् ऋतं यथा भवति तथा मया जनि जन्म स्वीकृतं ३५ दुराशयात् लिंगात् मुमुक्षूणा
मुनीनामात्मदर्शने संमताय तत्त्वानां प्रसंख्यानाय विविच्य निरूपणाय ३६ नन्वयमात्मज्ञानमार्गः पूर्वसिद्ध एव नेदानीं पूर्ववत्प्रव
र्त्तनीयः तत्राह एष इति अव्यक्तः सूक्ष्मः ३७ कामं यथेच्छं आपृष्टः अनुज्ञातः यद्वा यथा त्वं गंतुं मां पृष्टवान् तथा त्वं स्वेच्छानु ममापि त य ३
मापृष्टः इत्यर्थः मयि संन्यस्तानि समर्पितानि कर्माणि येन अविद्यायां मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति श्रुतेः ३८ ततश्च मां परमपरमात्मानं
आत्मनि स्वस्मिन् आत्मना मनसा अन्वीक्षमाणो निर्भयं मोक्षं प्राप्स्यसि ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्रेत्वहत्वेशमनीमुन्मूलनी भयंतरिष्यति परमानंदंच प्राप्स्यतीति चकारार्थः ४० समुदितः सम्यगुक्तः सन्तृतं प्रदक्षिणीकृत्य ४१ ॥
मुनीनां व्रतं मौनमहिंसालक्षणं ४२ सदसतः परं यत्तस्मिन्ब्रह्मणि गुणावभासके निर्गुणे एकभक्त्या अव्यभिचारिण्या भक्त्या अनु
भाविते न अपरोक्षीकृते ४३ अंगो देहादिष्वहंकाररहितः अत एव निर्द्वंद्वः शीतोष्णाद्यनाकुलः समदृक् भेदाग्राहकः किंतु
स्वदृक् स्वयमेव पश्यन् प्रत्यक्प्रवणा प्रशान्ता विक्षेपरहिता धीर्यस्य ४४ तदेवं विधिकल्पितोपाधिनिवृत्तिमुक्त्वा परमेश्वरप्राप्तिं त्रि २
माह वासुदेव इति त्रिभिः प्रतीचा जीवस्यात्मनि लब्धः आत्मा विनिर्णयनात् मुक्तबंधनमज्ञानं यस्य ४५ लब्धात्मतामेवाह आत्मानमि
७७

मातृ आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणां वितरिष्ये यया चासौ भयं चातितरिष्यति ४० मैत्रेय उवाच एवं समुदितस्ते
न कपिलेन प्रजापतिः दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ४१ व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः निःसंगो
व्यचरत् क्षोणीमनग्निरनिकेतनः ४२ मनो ब्रह्मणि युंजानो यत्तत्सदसतः परं गुणावभासे विगुण एकभक्त्यानुभावि
ते ४३ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् प्रत्यक्प्रशान्तधीर्धीरः प्रशान्तोर्मिरिवोदधिः ४४ वासुदेवे भग
वति सर्वज्ञे प्रत्यगात्मनि परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ४५ आत्मानं सर्वभूतेषु भगवन्तमवस्थितं अपश्यत्स
र्वभूतानि भगवत्यपि चात्मनि ४६ इच्छाद्वेषविहीनेन सर्वत्र समचेतसा भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ४७
इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये चतुर्विंशतितमोऽध्यायः शौनक उवाच कपिलस्तत्त्वसंख्या
ता भगवानात्ममायया जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां १

ति ४६ तदेवं तेन भागवती गतिः प्राप्ता पाठान्तरे स एव तां गतिं प्राप्त इति ४७ तृतीये चतुर्विंशः पंचविंशे जनन्याः पृष्टो बंधविमोचनं आ ७७
हावाह परं भक्तिलक्षणं कपिलः सुतः १ कपिलेनापितामात्रगूढभावनियंत्रिता योगमार्गे कथमेतत्षास्तुदमुद्राद्यते धुना उक्ता
नुवादपूर्वकं कापिलेयाख्यानं शृणोति कपिल इति त्रिभिः तत्त्वानां संख्याता गणकः सांख्यप्रवर्तक इत्यर्थः अज एव स्वयं जातः आत्मप्रज्ञप्त
ये आत्मतत्त्वज्ञापनाय १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुंसामध्ये वृषभेण: हेतुस्य उत्तमस्येत्यर्थः सर्वयोगिनामध्ये वरिमा: वरस्य भावो वरिमा भवति प्रधानोयं निर्देशः वरिष्ठस्येत्यर्थः यद्वा वरीयस्त्वा
दित्यर्थः विश्रुतो कीर्त्तिश्च सर्व इंद्रियाणि भूरिश्रुत्वेन तृप्यंति श्लोकेन श्रवणेन दिव्यति योतत इति तथा तस्य यद्वा भूरि बहुशः श्रुतो
देवो येन तस्यापि मे श्रसव इति संबंधः २ स्वानां छंदन इच्छया आत्मा देहा यस्य सः यद्यत्कर्म विधत्ते तानि तानि कर्माणि कीर्त्तनार्हा
णि अनुकीर्त्तय ३ यथा त्वं मां प्रचोदयसि एवं प्रचोदितः सन्नुत्तथा तत्व श्रोतुसारेण आन्वीक्षिक्यां आत्मविद्यायां ४ विंदुसरे विंदुस

नृयस्य वृषभेण । पुंसां वरिमा । सर्वयोगिनां विश्रुतो श्रुतदेवस्य भूरि तृप्यंति मे सवः १ यद्याहि धत्ते भगवान् स्वच्छंदात्मात्ममाय
या तानि मे श्रद्दधानस्य कीर्त्तन्यान्यनुकीर्त्तय २ श्रीसूत उवाच द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा प्राहेदं विदुरं प्रीत्या आ
न्वीक्षिक्यां प्रचोदितः ३ श्रीमैत्रेय उवाच पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया तस्मिन्बिंदुसरेऽवात्सीद्भगवान्कपि
लः किल ५ तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनं स्वसुतं देवहूत्याह धातुः संस्मरती वचः ६ निर्विण्णा नितरां भूमन्नस ले ४
दिंद्रियतर्षणात् येन संभाव्यमानेन प्रपन्नांधं तमः प्रभो ७ तस्य त्वं तमसोंधस्य दुःपारस्याद्य पारगं सच्चक्षुर्जन्मना
नामंते लब्धं मे त्वदनुग्रहात् ८ य आद्यो भगवान्पुंसामीश्वरो वै भवान्किल लोकस्य तमसांधस्य चक्षुः सूर्य इवोदि =दि ३
तः ९ अथ मे देव संमोहमपाक्रष्टुं त्वमर्हसि योऽवग्रहोऽहं ममेतीत्येतस्मिन्योजितस्त्वया १० तं त्वा गताहं शरणं शर
ण्यं स्वभृत्यसंसारतरोः कुठारं जिज्ञासयाहं प्रकृतेः पुरुषस्य नमामि सद्धर्मविदां वरिष्ठं ११ श्रीराम श्रीराम

रसि ५ तत्त्वमार्गस्याग्रं पारं दर्शयतीति तथा एष मानवि ते गर्भं प्रविश इत्यादि धातुर्वचः ६ असतामिंद्रियाणां तर्षणात् विषयाभिलाषा
त् निर्विण्णाश्रांतास्मि येन संभाव्यमानेन भ्रूयमाणेन ७ पारं गमयतीति पारगं त्वमेव श्रेष्ठं चक्षुर्मयालब्धं त्वदनुग्रहाज्जन्मनामं
ते भाव्ये सृति ८ तत्प्रपंचयति य इति स भगवान् चक्षूरूप उदितः सूर्यो यथा ९ अपाक्रष्टुं अपनेतुं कोसौ संमोहः तमाह एतस्मिन्
देहादौ त्वयैव योजितो योऽहं ममेत्यवग्रहः द्वितीय इतिशाब्दः तत्कार्यरागादिग्रहणार्थः १० प्रकृतेः पुरुषस्य च जिज्ञासया त्वामहं शरणंग
तासतीनमासीत्यन्वयः कुठारं छेत्तारं ११
आग्रहः ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपवर्गवर्द्धनं मोक्षरतिजनकं ईषत्स्मितेन शोभितमाननं यस्य १२ आध्यात्मिकः आत्मनिष्ठः यत्र यस्मिन् १३ ४ तत्र सर्वांगेन पुण्यं चित्त
संयमाधीनमिति दर्शयन्नाह चेत इति अस्यात्मनो जीवस्य गुणेषु विषयेषु पुंसि परमेश्वरे वा वाशब्दश्चशब्दार्थः १५ यथा च चित्तस्य
मे पुरुषार्थसिद्धिस्तद्दर्शयति अहमिति त्रिभिः मलैर्वर्जितं विरहितं यदा शुद्धं मनो भवति मनःशुद्धेर्ज्ञापकमाह अदुःखमिति १६ निरं
तरं निर्भेदं अणीमानं सूक्ष्मं अखंडितमपरिछिन्नं १७ हतौजसं क्षीणबलं १८ मनःशुद्धौ च भक्तिरेवांतरंगं साधनमित्याह नेति १९

मैत्रेय उवाच इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्द्धनं धियाभिनंद्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशो
भिताननः १२ श्रीभगवानुवाच योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य च १३
तमिमं ते प्रवक्ष्यामि यमवोचं पुरानघे ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणं १४ चेतः खल्वस्य बंधाय मुक्तये चात्म
नो मतं गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये १५ अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः वीतं यदा मनः शुद्धमदुःख
७८ मसुखं समं १६ तदा पुरुष आत्मानं केवलं प्रकृतेः परं । निरंतरं स्वयंज्योतिरणिमानमखंडितं १७ ज्ञानवैराग्ययुक्ते
न भक्तियुक्तेन चात्मना परिपश्यत्युदासीनं प्रकृतिं च हतौजसं १८ न युज्यमानया भक्त्या भगवत्यखिलात्मनि सदृ
श्रीभा ४ शोस्ति शिवः पंथा योगिनां सिद्धये १९ प्रसंगमजरं पाशमात्मनः कवयो विदुः स एव साधुषु कृतो मोक्षद्वारमपा
वृतं २० तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनां अजातशत्रवः शांताः साधवः साधुभूषणाः २१ मय्यनन्ये
न भावेन भक्तिं कुर्वंति ये दृढां मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः २२ मदाश्रयाः कथा मृष्टाः शृण्वंति कथयंति
च तपंति विविधास्तापा नैतान्मद्गतचेतसः २३ त एते साधवः साध्वि सर्वसंगविवर्जिताः संगस्तेष्वथ ते प्रार्थ्यः संगदो
षहरा हि ते २४

अस्य सर्वस्यापि सत्संगो मूलमित्याह प्रसंगमिति अपावृतं निरावरणं २० साधूनां लक्षणमाह तितिक्षव इति चतुर्भिः साधवः साशा राम
उ, स्त्रानुवर्तिनः साधुशीलं तदेव भूषणं येषां २१ २ एतानुक्तलक्षणान् तापा आध्यात्मिकादयो न तपंति न व्यथयंति कुतः मद्गतं चेतो ये ७८
षां तान् २३ येतोपि तेभिप्रयंते ते साधव इत्यर्थः २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरसिंमू

सत्संगस्य भक्त्यंगतामुपपादयति सतामिति वीर्यस्य सम्यक् वेदनं यासु ताः वीर्यसंविदः हृत्कर्णयोः रसायनाः सुखदाः तासां जोषणात् सेवनात् अपवर्गो विद्यानिवृत्तिः वर्त्मेव यस्मिन् हरौ प्रथमं श्रद्धा ततो रतिः ततो भक्तिः अनुक्रमिष्यति क्रमेण भविष्यतीत्यर्थः २५ ततः किमत आह भक्त्येति मम रचनायाः सृष्ट्यादिलीलायाः अनुचिंतया या भक्तिस्तया ऐंद्रियात् सुखात् जातविरागः सन् दृष्टश्रुतात् ऐहिकामुष्मिकात् ततो यत्नेन युक्तः सन् चित्तस्य ग्रहणे यतिष्यति ऋजुभिः भक्तिप्रधानत्वात् नायासैः २६ तदेव प्रकृतेर्गुणानामसेवया ज्ञानादिभिश्च अयं जीव

सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति
२५ भक्त्या पुमान् जातविराग ऐंद्रियात् दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्य यत्तो ग्रहणे योगयुक्तो यतिष्यते ऋजुभि
र्योगमार्गैः २६ असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मा
नमिहावरुंधे २७ श्रीदेवहूतिरुवाच काचित्त्वय्युचिता भक्तिः कीदृशी मम गोचरा यया पदं ते निर्वाणमंजसा
स्त३ न्वाश्नवा अहं २८ यो योगो भगवद्बाणो निर्वाणात्मंस्त्वयोदितः कीदृशः कति चांगानि यतस्तत्त्वावबोधनं
२९ तदेतन्मे विजानीहि यथाहं मंदधीर्हरे सुखं बुध्येय दुर्बोधं योषा भवदनुग्रहात् ३० श्रीमैत्रेय उवाच
विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः तत्त्वाम्नायं यत्प्रवदंति सांख्यं प्रोवाच वै भक्तिवितान
योगं ३१

इहैव देहे मामेवावरुंधे प्राप्नोति २७ काचिदिति कास्विदित्यर्थः उचिता योग्या तत्रापि मम स्त्रियाः कीदृशी गोचरा योग्या निर्वाणं मोक्षात्मकं ते तव पदं स्वरूपं अन्वाश्नवै अनंतरमेव सर्वात्मना प्राप्स्यामि अंजसा विति पाठे अहं त्विति संबंधः २८ भगवद्बाणाः यो भगवंतं लक्ष्यीकरोतीत्यर्थः यतः यस्माद्योगात् २९ विजानीहि विशेषेण ज्ञापय सुखं अनायासेन ३० इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहत्वहेतुः यत्र यस्यां तन्वा देहेनाविर्भूतः तत्त्वान्याम्नायंते अनुक्रम्यंते यस्मिन् कितं तु सांख्यं प्रवदंति तं प्रोवाच भक्तिवितानं च योगं च ३१

श्व९

भा० तृ० काचित्त्वयुक्तिाभक्तिरिति पृष्टस्सुत्तमांभक्तिंलक्षयति गुणाविषयाः लिंग्यतेज्ञायतेतैः तेषांदेवानांद्योतनात्मकानामिंद्रियाणांतदधिष्ठात
णांवामनेवसत्वमूर्तौहरावेवायावृत्तिः साभक्तिः सिद्धेर्मुक्तेरपिगरीयसीत्युत्तरेणान्वयः कथंभूताअनिमित्तानिष्कामा स्वाभाविकी
अयत्नसिद्धा तेषामेवविधत्वेहेतुमाह गुरोरुच्चारणमनुश्रूयतइत्यनुश्रवोवेदः तद्विहितमानुश्रविकंतत्देवकर्मयेषां अतएव
एकंएकेरूपमविक्षिप्तमनोयस्यपुंसः शुद्धसत्वस्येत्यर्थः ३२ मुक्तिश्चप्रासंगिकीभवत्येवेत्याह याभक्तिः कोशंलिंगशरीरंजरयति
क्षपयतिस्वप्रयत्नंविनैवसिद्धेर्द्दृष्टांतः निगीर्णंभुक्तमन्नंअनलोजाठरोयथाजारयतीति ३३ भक्तेर्गरिष्ठत्वमेवोपपादयति॥

७९

श्रीभगवानुवाच देवानांगुणलिंगानामानुश्रविककर्मणां सत्वएवैकमनसोवृत्तिः स्वाभाविकीतुया
३२ अनिमित्ताभागवतीभक्तिः सिद्धेर्गरीयसी जरयत्याशुयाकोशंनिगीर्णमनलोयथा ३३ नैका
त्मतांमेस्पृहयंतिकेचित् मत्पादसेवाभिरतामदीहाः येऽन्योन्यतोभागवताः प्रसज्यसभाजयंते
ममपौरुषाणि ३४ पश्यंतितेमेरुचिराण्यंबसंतः प्रसन्नवक्त्रारुणलोचनानि रूपाणिदिव्यानिवरप्रदानि
साकंवाचंस्पृहणीयांवदंति ३५ तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः हृतात्मनो
हृतप्राणांश्चभक्तिरनिच्छतोमेगतिमण्वींप्रयुंक्ते ३६

नैकात्मतामितिपंचभिः एकात्मतांसायुज्यमोक्षं मदर्थमिहाक्रियायेषां प्रसज्यआसक्तिंकृत्वापौरुषाणिवीर्याणि ३४ प्र
सन्नानिवक्त्राण्यरुणानिलोचनानिचयेषु तैर्मेरूपैः साकंसह नित्यपरमेश्वरानुभवसुखंभक्तावधिकमितिभावः ३५ आत्मा
नंदस्वरूपभावीत्याहतैरितिदर्शनीयामनोहराअवयवामुखनेत्रादयोयेषुतैः हृताआत्माचित्तंयेषांहृताश्चप्राणाः प्राणाश्च
द्रियाणियेषांतान् भजतः अनिच्छतः इच्छाहीनानामपिअणिगतिंमुक्तिंप्रयुंक्तेप्रापयति कैः साधनैर्हृतात्मनः उदारैर्विलासादिभिः

नवविलासलीलाकोमलामनोहरंसकैर्मधुरभाषणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभूत्यादिकं च तत्राधिकमित्याह अथो अविद्यानिवृत्त्यनंतरं विभूतिं सत्यलोकादिगतां भोगसंपत्तिं अणिमाद्यष्टांगमैश्वर्यं अनुप्रवृत्तं भक्ति मनुसृतमेव प्राप्तमपि भागवतीं च श्रियं वैकुंठस्थां संपत्तीं अस्पृहयंतीति यद्यपि न स्पृहयंती इत्यर्थः तथापि तु लोके वैकुंठे अश्नुवंते प्राप्नुवंत्येव ३७ नन्वेवं न हि लोकत्वाविशेषात् स्वर्गादिवद्धाकृ भोगानां कदाचिद्विच्छिन्नाशः स्यात् तत्राह हे शांतरूपे यद्वा शांतशुद्धसत्वं तद्रूपे वैकुंठे मत्पराः कदाचिदपि न नंक्ष्यंति भोग्यहीना न भवंति अनिमिषो मे हेतिः मदीयं कालचक्रं नोल्लेढि तान्न ग्रसतीत्यत्र हेतुर्येषामिति सुतइव स्नेहविषयः सखेव विश्वासास्पदं गुरुरिवोपदेष्टा सुहृदिव हितकारी इष्टं देवमिव पूज्यः एवं सर्वभावेन मां ये भजंति तान्मदीयं कालचक्रं न ग्रसतीत्यर्थः ३८ एवंभूतां तु मुक्तिं एकांतभक्तेभ्यो ददामीत्याह इममिति द्वाभ्यां उभयायिनं लोकद्वयगामिनं आत्मानं सोपा

अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं श्रियं भागवतीं चास्पृहयंति भद्रां परस्य मे ते अश्नुवते तु
लोके ३७ न कर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मेऽनिमिषो लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च स
खा गुरुः सुहृदो दैवमिष्टं ३८ इमं लोकं तथैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह ये रायः पशवो
गृहाः ३९ विसृज्य सर्वानन्यांश्च मामेवं विश्वतोमुखं भजंत्यनन्यया भक्त्या तान्मृत्योरतिपारये ४० ना
न्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् आत्मनः सर्वभूतानां भयं तीव्रं निवर्त्तते ४१ वर्षतींद्रो दहत्यग्निर्म
मृत्युश्चरति मद्भयात् ४२ मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात्

धिकं आत्मानमनु ये सुतकलत्रादयः ये च पश्वादयः रायः धनानि ३९ अन्यांश्च परिग्रहानुत्सृज्य संसारात् अतिपारये अतितारयामि ४० अभक्तानां तु न कथंचिदपि मोक्ष इत्याह नेति मद्भगवतोन्यत्र भगवतो मत्तो विना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेन सामर्थ्य निरपेक्षत्वं हितकारित्वं चोक्तं ४१ ऐश्वर्यं स्फुटयति मद्भयादिति श्रुति अभीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ४२ राम राम राम राम राम राम राम राम राम रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मज्जनादेव मोक्ष इत्यत्र सदाचारं प्रमाणयति ज्ञानेनेति ४३ उपसंहरति एतावानिति मय्यर्पितं सन्मनः स्थिरं भवतीति यत् एतावानेव ४४
तृतीये पंचविंशः ॥ षड्विंशे तु प्रकृत्यास्तु विवेकायापवर्ण्यते सांख्येन सर्वभावानां जन्मलक्षणभेदतः धात्रा पुत्राय यत्प्रोक्तं क्षत्रे मित्रासु-
तेन यत् मात्रे सांख्यं तदध्यात्मप्राधान्येनाह तत्त्वविदिति तत्त्वाम्नायं यत्प्रवदंति सांख्यमित्यत्र सांख्यं भक्तियोगश्चेति त्रयमुपक्षिप्तं
तत्र भक्तिमुक्त्वा नु इदानीं सांख्यमाह अथेति ननु मुक्तिरात्मज्ञानादेव न तु तत्त्वलक्षणज्ञानात् तमेव विदित्वातिमृत्युमेतीति श्रु-
तेः अत आह ज्ञानमिति आत्मदर्शनरूपं ज्ञानं अत एव हृदयग्रंथिभेदनं अहंकारनिवर्तकं निःश्रेयसप्रयोजनाय यदाहु

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ४३ एतावानेव लोके-
स्मिन् पुंसां निःश्रेयसोदयः तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ४४ इति श्रीभागवते महापुराणे
तृतीयस्कंधे कापिलयोगः पंचविंशतिमोध्यायः श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि तत्त्वानां ल-
८० क्षणं पृथक् यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं य-
दाहुर्वर्णये तत्ते हृदयग्रंथिभेदनं २ अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः प्रत्यग्धामा स्वयंज्योति-
र्विश्वं येन समन्वितं ३

तत्ते वर्णयामि तत्त्वलक्षणादेव विविक्तात्मज्ञानं भवतीति भावः २ तत्र पुरुषं लक्षयति अनादिरिति आत्मैव पुरुषः कोसावात्मा
प्रत्यक् प्रतिलोमं धाम स्फूर्तिर्यस्य क्षणिकपक्षं व्यावर्तयति अनादिरिति संसारित्वपक्षं व्यावर्तयति प्रकृतेः परः अन्यः अस- राम
गः ज्ञानादिगुणत्वं वारयति निर्गुणः मीमांसकाद्यभिमतं ज्ञानविषयत्वं वारयति स्वयंज्योतिः अनेनैव प्राभाकराभिमतं ८०
ज्ञानाधारत्वेन स्फुरणमपि निरस्तं स्वयंज्योतिष्ट्वे हेतुः विश्वं येन समन्वितं प्रकाशत इति शेषः एतैरेव हेतुभिः पुरुषस्य प्रकृतेः परत्व-
मपि सिद्धं ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रावरणशक्त्यंश एव जीवोपाधिरविद्या विक्षेपशक्त्यंश एव माया पारमेश्वरी पुरुषोऽपि जीवेश्वररूपेण द्विविधः तत्र यः प्रकृत्यविवेकेन संसरति स जीवः यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स परमेश्वरः तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकारमाह स एष इति पंचभिः सूक्ष्मां अव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलया तु पगतां यदृच्छयैवाभ्यपद्यत स्वीकृतवान् ४ तस्या लीलामाह गुणैरिति ज्ञानगूहेति आवृणोतीति ज्ञानगूहा तया तथा च श्रुतिः अजामेकां लोहित

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः यदृच्छयैवोपगतामभ्यपद्यत लीलया ४ गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया ५ एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ६ तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतं भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ७ श्रीरामजयरामजयजयराम

शुक्लकृष्णां बह्वीः प्रजां जनयंतीं सरूपां अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति मुमुहे आत्मानं विस्मृतवान् ५ पराभिध्यानं प्रकृत्यध्यासः तेन प्रकृतेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते ६ तदिति कर्तृत्वमननमेव अस्य पुरुषस्य साक्षीमात्रत्वादकर्तुरेव सतः कर्मभिः बंधः ईशस्याप्यपरतंत्रस्यैव कर्मवशात् भोगपारतंत्र्यं निर्वृतात्मनः सुखात्मकस्यैव संसृतिः जन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेव तत्सर्वं भवतीत्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमुक्तं तत्सामानाधिकरण्येनैव कर्तृत्वादि दर्शितं तत्स्यैव तदंगीक्रियतां नेत्याह कार्येति शरीरं कारणमिंद्रियं कर्तारो देवता वर्गः तत्कर्तृत्वा
त्वे पुरुषस्य प्रकृतिं कारणं विदुः कूटस्थस्य स्वतो विकाराभावात् प्रकृतिपरिणामभूते देहादावहंकारकृतमेव कर्तृत्वादिकमित्यर्थः
भोक्तृत्वे तु पुरुषं कारणं विदुरिति अस्यायं भावः यद्यप्यहंकारगतमेव कर्तृत्वादि भोक्तृत्वं च तथापि विकारस्य जडावसानत्वादुपा यं३
धिप्राधान्यं भोगस्य चिदवभासत्वादुपहितप्राधान्यमिति ८ तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं जगत्कारणमी
श्वरं तत्प्रकृतिं च पृच्छति प्रकृतेरिति अस्य विश्वस्य सदसत् स्थूलं सूक्ष्मं च कार्यं यदात्मकं तयोः प्रकृतिपुरुषयोः ९ तत्र

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परं ८ देवहू
तिरुवाच प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ९ ॥
~१ श्रीभगवानुवाच यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशेषं विशेषव
त् १० पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ११
महाभूतानि पंचैव भूरापोऽग्निर्मरुन्नभः तन्मात्राणि च तावंति गंधादीनि मतानि मे १२

प्रकृतिं लक्षयति यत्प्रधानं तदेव प्रकृतिं प्राहुः किं तत्प्रधानं स्वतो विशेषं विशेषवत्तु विशेषाणामाश्रयः तर्हि किं तद्ब्रह्म त्रिगुणं न। राम
किं महत्तत्त्वादि न अव्यक्तं अकार्यं किं कालादि न सदसदात्मकं कार्यकारणरूपं किं जीवप्रकृतिः नानित्यं १० अन्येषां त ८१
त्त्वानां लक्षणं वक्तुं तानि गणयति पंचभिरित्यादि संख्याभेदेन एतच्चतुर्विंशतिकं एतानि चतुर्विंशतिर्यस्मिन् गणे तं गणं
प्राधानिकं प्रधानकार्यात्मकं ब्रह्म विदुः ११ एतद्विवृणोति महाभूतानीति त्रिभिः तावंति पंचैव १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ त्र अंतरात्मकमंतःकरणं लक्षणरूपयाव्यवच्छेदिकया १४ यावन्मयाप्रोक्तः एतावानेवसंख्यातः तत्रशेषः कालेनगुणनंतरमाह यः कालः सः पं
चविंशकः प्रकृतेरेवावस्थाविशेषइत्यर्थः १५ एकेतुपौरुषंपुरुषस्येश्वरस्य प्रभावंविक्रमंकालमाहुः तमेवकालंद्वेधालक्षयतियतोभयं
ति कस्यप्रकृतिंईयुषः प्राप्तस्यअतएवदेहेअहंकारेणविमूढस्यअनेनसंहारकत्वेनलक्षितः १६ सएवहिहेतुत्वेनलक्षयतिप्रकृतेरिति
१७ कोसौभगवानुत्तमाह अंतः सर्वप्राणिनांयः पुरुषरूपेणः नियंतृत्वेनसमन्वेतिसम्यक्तदधिकाररहितएवानुस्यूतावर्तित ब

२१ इंद्रियाणिदशश्रोत्रंत्वग्दृग्रसननासिकाः वाक्करौचरणौमेढ्रंपायुर्दशमउच्यते १३ मनोबुद्धिर
हंकारश्चित्तमित्यंतरात्मकं चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया १४ एतावानेवसंख्यातोब्रह्म
णःसगुणस्यह सन्निवेशोमयाप्रोक्तोयः कालःपंचविंशकः १५ प्रभावंपौरुषंप्राहुः कालमेकेयतोभ
यं अहंकारविमूढस्यकर्तुःप्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि चेष्टायतः
सभगवान्कालइत्युपलक्षितः १७ अंतःपुरुषरूपेणकालरूपेणयोबहिः समन्वेत्येषसत्वानांभग
वानात्ममायया १८

हिश्चकालरूपेणएषभगवान् यद्वायःपुरुषइतिप्रसिद्धः कालः सपंचविंशः एकेतुपुरुषस्यप्रभावंकालमाहुः प्र भावस्य
वलक्षणीयत्वइति पुरुषस्यैवकालत्वेहेतुः प्रकृतेरिति उभयथाविवक्षायांहेतुः अंतरितिशेषंसमानं तदेवंप्रकृतेश्चतुर्विंशतिभे
दाः जीवेश्वरयोश्चैक्यविवक्षयां अतः पंचविंशतितत्त्वानिभवंतितयोर्भेदविवक्षायांचषड्विंशतिर्भवंति १८ राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं तत्त्वानामुत्पत्तिपूर्वकं लक्षणान्याह दैवादित्यादिना एतावान्संख्येत्यतः प्राक्तनेन ग्रंथेन तत्र चित्तस्योत्पत्तिपूर्वकं लक्षणमाह
चतुर्भिः दैवात् जीवादृष्टात् क्षुभिता धर्मा गुणा यस्याः योनौ अभिव्यक्तिस्थाने प्रकृतौ वीर्यं चिच्छक्तिं सा प्रकृतिर्महत्तत्त्वमसूत॥
महतः स्वरूपमाह हिरण्मयं प्रकाशबहुलत्वे विश्वं अहंकारादिप्रपंचं अहंकारादिप्रपंच आत्मगतं स्वस्मिन् सूक्ष्मरूपेण
स्थितं व्यंजयन्महान् तमोपिबत् कूटस्थः लयविक्षेपशून्यः आत्मानं प्रस्वापयतीति तथा यत्पूर्वं प्रलये महांतं प्रकृतौ विला समये २
पयामासेत्यर्थः २० प्रसंगाच्चतुर्व्यूहोपासनेनाह यत्तदिति सर्वागमप्रसिद्धत्वमाह स्वच्छं विशदं शांतं रागादिरहितं भगवतः

दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयं १९
विश्वमात्मगतं व्यंजन् कूटस्थो जगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः २० यत्त
त्स्वच्छं गुणं सत्त्वं शांतं भगवतः पदं यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकं २१ स्वच्छत्वमवि
कारित्वं शांतत्वमिति चेतसः वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा २२ राम राम॥

पदमुपलब्धिस्थानं अत एव वासुदेवाख्यं यदाहुः अयमर्थः अधिभूतरूपेण तस्यैव महानिति संज्ञा अध्यात्मरूपेण चित्तमि राम
ति उपास्यरूपेण वासुदेव इति अधिष्ठाता तु तस्य क्षेत्रज्ञः एवमहंकारः संकर्षणोपास्यः रुद्रोधिष्ठाता मनस्तु निरुद्धोप ८२
पास्यः चंद्रोधिष्ठाता बुद्धिः प्रद्युम्नोपास्यः ब्रह्माधिष्ठातेति ज्ञातव्यं २१ स्वच्छत्वं भगवद्बिंबग्राहित्वं अविकारित्वं लयविक्षेपरा
हित्यं अपां प्रकृतिः फेनतरंगादिरहितावस्था परा भूसंसर्गात् प्राकृती सा यथा मधुरा स्वच्छा शान्ता च तद्वदित्यर्थः २२

श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु १

अहंकारस्योत्पत्तिपूर्वकं लक्षणमाह महत्तत्त्वादिति चतुर्भिः क्रियाशक्तिर्यस्य सः क्रियाशक्तिः त्रैविध्यमाह वैकारिक इति तस्य कार्यमा
ह यतः यस्मात् मनआदीनां भवः उत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाह सहस्रशिरसमिति २५ कर्तृत्वं देवतादिरूपेण करणत्वमिंद्रियरू
पेण कार्यत्वं भूतरूपेण शांतत्वादिकं तेषु कारणगुणत्रयरूपेण २६ मनसस्तूत्पत्तिपूर्वकं लक्षणमाह वैकारिकादिति द्वाभ्यां संकल्प
श्चिंतनं विकल्पो विशेषचिंतनं यस्य मनसः संकल्पविकल्पाभ्यां कामसंभवो वर्त्तत इति कामरूपाश्चिर्लक्षणेनो(त्वे)क्तानतुअधुन्नाम्नेहात्म तिः

२१ महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत २३ वैकारिकस्तैजसश्च
तामसश्च यतो भवः मनसश्चेंद्रियाणां च भूतानां महतामपि २४ सहस्रशिरसं साक्षाद्यमनंतं प्रचक्षते ॥
कार्यत्वं चे ३ संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयं २५ कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणं शांतघोरविमूढत्वमिति चा स्यादह
हंकृतेः २६ वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत यत्संकल्पविकल्पाभ्यां वर्त्तते कामसंभवः २७ यद्विदुर्ह्यनि विकल्पा
रुद्धाख्यं हृषीकाणामधीश्वरं शारदेंदीवरश्यामं संराध्यं योगिभिः शनैः २८ तेजसात्तु विकुर्वाणाद्बुद्धि
स्तत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः २९ संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च ॥
स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० श्रीरामजयराम जयजयराम श्रीराम राम राम

तस्य संकल्पादिकार्यत्वाभावात् उपास्यव्यूहस्य चानिरुद्धस्योक्तेः २७ शारदं शरत्कालीनं इंदीवरं नीलोत्पलं तद्वत् श्यामं यत् शनैः संराध्यं
वशीकर्तुं योग्यं दुर्ग्रहत्वात् २८ बुद्धेरुत्पत्तिपूर्वकं लक्षणमाह तैजसादिति द्वाभ्यां हे सति द्रव्यस्फुरणरूपं विज्ञानमिति चित्तव्यावृत्त्यर्थमु
क्तं इंद्रियाणामनुग्रह इति सविकल्पकज्ञाने हृषीकाणामधीश्वरमिति यदुक्तं तत्तु निर्विकल्पकज्ञाने २९ द्रव्यस्फुरणमेव प्रपंचः सं
शयादिः विपर्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापो निद्रा प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति पातंजलोक्तेः ३० ॥

इंद्रियाणामुत्पत्तिमाह तैजसानीति तैजसादहंकाराज्जातानि ज्ञानेंद्रियाणां वैकारिकत्वशंकाव्युदासार्थमेवकारः द्विविधान्यपींद्रियाणि तैजसा
न्येवेत्यन्वयः तत्र हेतुः प्राणस्येति हि यस्मात्प्राणस्य क्रियाशक्तिः बुद्धेश्च विज्ञानशक्तिता अतः प्राणस्य तैजसत्वात् क्रियाशक्तिमतामिंद्रि
याणां तैजसत्वं तथा बुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणां तैजसत्वमित्यर्थः ३१ तन्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतो
त्पत्तिं तल्लक्षणं चाह तामसादिति पंचदशभिः श्रोत्रं तु शब्दगमित्यादिभिर्विषयोत्पत्त्यनंतरं तत्संबंधमात्रं कथ्यते न तूत्पत्तिः प्रागेवो
त्पन्नत्वात् शब्दं गच्छति प्राप्नोतीति शब्दगं ३२ शब्दस्य लक्षणमाह अर्थाश्रयत्वमर्थवाचकत्वं द्रष्टुर्लिंगत्वं कुड्यांतरितस्य वक्तुर्ज्ञापकत्वं अ० १

तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३१ तामसाच्च
२३ विकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगं ३२ अर्थाश्रयत्वं शब्दस्य द्र
ष्टुर्लिंगत्वमेव च तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३३ भूतानां छिद्रदातृत्वं बहिरंतरमेव च
प्राणेंद्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणं ३४ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः स्पर्शोऽभव
त्ततो वायुस्त्वक् स्पर्शस्य च संग्रहः ३५ मृदुत्वं कठिनत्वं च शैत्यमुष्णत्वमेव च एतत्स्पर्शस्य स्पर्शत्वं
तन्मात्रत्वं नभस्वतः ३६

द्रष्टुर्लिंगत्वं लिंगं पद्रष्टृदृश्ययोरिति नभसस्तन्मात्रत्वं सूक्ष्मत्वं शब्दस्य लक्षणमित्यन्वयः ३३ छिद्रदातृत्वमवकाशदातृत्वं बहि
रंतरं व्यवहारास्पदत्वं आत्मात्मनः प्राणादीनां धिष्ण्यत्वमाश्रयत्वं नाड्यादिछिद्ररूपेण वृत्तिः कार्यमेव लक्षणं एवमुत्तरत्रापि एकेन राम
श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणमित्यनुसंधेयं ३४ काशीत्वक्स्पर्श २३
स्य संग्रहः सम्यग्ग्रहणं यया पुंस्त्वं नियतलिंगत्वात् यद्वा स्पर्शस्य संग्रहस्ततो भवतीति शेषः ३५ शब्दतन्मात्रादित्यादि त
न्मात्राणामुत्तरोत्तरान्वयार्थमुक्तं स्पर्शत्वं स्वरूपलक्षणमित्यर्थः नभस्वतो वायोस्तन्मात्रत्वं च ३६

वृत्तिलक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेलनं

भा० टी०

चालनं वृक्षशाखादेः व्यूहनं तृणादेः प्राप्तिः संयोगः द्रव्यस्य गंधवतो घ्राणं प्रति तथा शीतोष्णादिमतः स्पर्शनं प्रति श
ब्दस्य श्रोत्रं प्रति नेतृत्वं सर्वेंद्रियाणामात्मनमुपादत्लकर्त्वं कर्मणां कार्येणाभिलक्षणं भावेस्युः कर्मैवाभिल
क्षणमिति विग्रहेतु करणे ३७ द्रव्याकृतिर्वं द्रव्यस्याकारसमर्पकत्वं गुणतादृव्यापसर्जनतया प्रतीतिः शब्दस्य
गुणत्वात्तेनैवप्रतीतिः अप्रत्यक्षद्रव्यस्य स्पर्शादेरपि स्वातंत्र्येणैव प्रतीतिः रूपस्य तु नैवमिति तस्मात् विशेष
उक्तः व्यक्तिसंस्था त्वं द्रव्यस्य यासंस्थासंनिवेशः सैवसंस्थाय स्या परिणामतया प्रतीतिरित्यर्थः तेजस स्तेज

चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः सर्वेंद्रियाणामात्मत्वं वायोः कर्माभिलक्षणं ३७ वायोश्च
स्पर्शतन्मात्राद्रूपं दैवरितादभूत् समुत्थितं ततस्तेजश्चक्षू रूपोपलंभनं ३८ द्रव्याकृतित्वंगु
णताव्यक्तिसंस्थात्वमेवच तेजस्त्वं तेजसः साधिरूपमात्रस्यवृत्तयः ३९ द्योतनं पचनं पानं
मदनं हिममर्दनं तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेवच ४० रूपमात्राद्विकुर्वाणात्तेजसोदै
वचोदितात् रसमात्रमभूत्तस्मादंभोजिह्वारसग्रहः ४१ कषायो मधुरस्तिक्तः कट्वम्लइति
नैकधा भौतिकानां विकाराणां रसएको विभिद्यते ४२ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोद
नं तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्विमाः ४३ श्रीराम राम राम राम राम राम राम

त्वमसाधारणत्वं ३९ द्योतनं प्रकाशनं पचनं तंदुलादेः क्षुत्तृट् अशनायापिपासा च तनुद्वारेण पानं अदनं च ४० जि
ह्वारसनेंद्रियरसोगृह्यते नयेतिरसग्रहः यद्वारसग्रहस्ततो भवतीतिशेषः ४१ कषायादिषु लवणोपि द्रष्टव्यः
भौतिकानां संसर्गि द्रव्याणां यएकोमधुरएव ससमेवमनेकधाभिद्यते सरसइत्यर्थः क्लेदनं आर्द्रीकरणं पिंडनं
मृदादेः पिंडीकरणं तृप्तिः तृप्तिहानत्वं प्राणनं जीवनं आपोमयः प्राणइतिश्रुतेः आप्यायनं तृडैस्कोप्यनि
वर्तनं उदनं मृदूकरणं उंदनमितिपाठेपि सएवार्थः भूयस्त्वं कूपादावुद्धृतस्यापि पुनःपुनः उद्गमः ४३ टी० २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंधः गंधघ्राणो ति ४४ करंभो मिश्रगंधः यथा व्यंजनादीनां दधि घृत हिंग्वादि संस्कारः पूति दुर्गंधः सौरभ्यं कर्पूरादेः शांतः शतपत्रादेः उग्रो लशुनादेः संसर्गिणां द्रव्यावयवानां वैषम्यात् एवं विभिद्यते स गंधः इत्यर्थः ४५ ब्रह्मणो

१३ भावनं प्रतिमादिरूपेण साकारतापादनं स्थानं जलादि विलक्षणं यावतेनैरपेक्ष्येण स्थितिः धारणं जलाद्या धारत्वं सतामाकाशादीनां विशेषेण मवच्छेदकत्वं सर्वेषां सत्वानां प्राणिनां तद्गुणानां च पुंस्त्वादीनां उद्भेदः परिणामविशेषैः प्रकटीकरणं ४६ श्रोत्रादीनां शब्दादि ग्राहकत्वमुक्तं तेषां चलक्षणं तदेवत्याह पंचभिः श्लो

रसमात्राद्विकुर्वाणाद्दंभसो दैववोदिता‌त् गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ४४ करंभ पूति

८४ सौरभ्य शांतोग्राम्लादिभिः पृथक् द्रव्यावयववैषम्याद्गंधएको विभिद्यते ४५ भावनं ब्रह्मणस्थानं धा

रणं सद्विशेषणं सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं ४६ नभोगुणविशेषोर्थो यस्य तच्छ्रोत्रमुच्यते

वायोर्गुणविशेषोर्थो यस्य तत्स्पर्शनं विदुः ४७ तेजोगुणविशेषोर्थो यस्य तच्चक्षुरुच्यते अंभो

गुणविशेषोर्थो यस्य तद्रसनं विदुः ४८ भूमेर्गुणविशेषोर्थो यस्य स घ्राण उच्यते परस्य दृ २२

श्यते धर्मो ह्यपरस्मिन्समन्वयात् अतो विशेषो भावानां भूमावेवोपलक्ष्यते ४९ एतान्यसं

हत्य यदा महदादीनि सप्त वै कालकर्मगुणोपेतो जगदादिरुपाविशत् ५०

म्भा २ कोर्हि नभसो गुणविशेषः धर्मः शब्दो यस्यार्थो विषयः ४७ गुणविशेषशब्दस्यावर्त्यं दर्शयति परस्य कारणस्य धर्मः

सत्वादिः अपरस्मिन्कार्ये वार्ध्यादौ कारणान्वयाद्दृश्यते अतो भावानामाकाशादीनां विशेषो गुणः सर्वो विश राम

ब्दादिर्भूमावेवोपलभ्यते च गुणां तत्रान्वयात् जलादिषु यथा त्रय मेवन सर्वः आकाशे त्वन्यान्वया भावादेक ८४

एवेति ४९ एवं कारणसृष्टिमाह सार्द्धैस्त्रिभिः एतान्यसंहत्य असंमिलितानि यदा स्थितानि तदा जगदादिरीश्वरः

मुक्ताकार्यस्योत्पत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा०न्तु० अनुविष्टेभ्यः क्षुभितेभ्यः युक्तेभ्यः मिलितेभ्यः यस्मादंडादसौ विराट्पुरुषः इति शेषः ५१ २ भागवतोक्तरूपमिति
पुरुषाभेदाभिप्रायेण तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादिति नवभिः उत्थाय औदासीन्यं विहाय
तमाविश्य अधिष्ठाय माहात्म्यमासीद्देवस्य खंछिद्रं ५२ वाण्या सह वह्निरभवत् प्राविशत् नासिनिरभिद्यतां च

ततस्तैनानुविष्टेभ्यो युक्तेभ्योंडमचेतनं उत्थिते पुरुषो यस्मादुदतिष्ठदसौ विराट् ५१ एतदंडं विशेषा
ख्यं क्रमवृद्धैर्दशोत्तरैः तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ५२ यत्र लोकवितानोऽयं रूपं भगवतो
हरेः हिरण्मयादंडकोशादुत्थाय सलिलेशयात् ५३ तमाविश्य महादेवो बहुधा निर्बिभेद खं ॥
व्याख्या४ निर्बिभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् ५४ वाण्या वह्निरथो नासे प्राणोतो घ्राणएतयोः घ्राणाद्वा
युरभिद्येतामक्षिणी चक्षुरेतयोः ५५ तस्मात्सूर्यो न्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः निर्बिभे
विराजस्त्वग्रोमश्मश्वादयस्ततः ततश्चौषधयश्चासन् शिश्नं निर्बिभिदे ततः ५६ रेतस्तस्मादा
पश्चासन्निरभिद्यत वै गुदं गुदादपानोऽपानाच्च मृत्युर्लोकभयंकरः ५७ हस्तौ च निरभिद्येतां ब
लं ताभ्यां ततः स्वराट् पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ५८ नाड्योऽस्य निरभिद्यंत ता
भ्यो लोहितमाभृतं नद्यस्ततः समभवन्नुदरं निरभिद्यत क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयो
रभूत् ५९

टीकाः प्राणेनान्तरुक्तः स्मृतः सन् घ्राणः एतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणादनंतरं वायुश्च प्राणोऽनड
निर्विशेषणं सर्वेन्द्रियेष्वपि द्रष्टव्यं निर्बिभिदे ततः अन्वभिद्येतामिति पाठद्वयेप्येकएवार्थः ततो दिशः प्राविशत् ५५
आदिशब्देनकेशाः ५६ स्वराडिंद्रः हरिर्विष्णुः ५७ आमृतं जातं ५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुद्ध्यादिषु हृदयमेवाधिष्ठानं गिरांपतिर्ब्रह्मा ६० चेतसः क्षेत्रज्ञः अन्वयव्यतिरेकाभ्यां क्षेत्रज्ञं विवेक्तुं सर्वेषां पुनः प्रवेश
माह ६१ एवं एतइतिनवभिः विराड्देहस्य व्यष्टिदेहे दृष्टांतत्वेन दर्शयन् सांख्यानुकथनस्य प्रयोजनमाह यथेति

अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं मनसश्चंद्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः ६० अहंकारे ततो स्त
रुद्रश्चित्तं चैत्यस्ततो भवत् एते ह्यभ्युत्थिता देवा नैवास्योत्थापने शकन् ६१ पुनराविविशुः खानि तमु
त्थापयितुं क्रमात् वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ६२ घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा
विराट् अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ६३ श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विरा
ट् त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ६४ रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् गुदं
मृत्युरपानेन नोदतिष्ठत्तदा विराट् ६५ हस्ताविंद्रो बलेनैव नोदतिष्ठत्तदा विराट् विष्णुर्गत्यैव
८७ चरणौ नोदतिष्ठत्तदा विराट् ६६ नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् क्षुत्तृड्भ्यामुदरं सिं
धुर्नोदतिष्ठत्तदा विराट् ६७ हृदयं मनसा चंद्रो नोदतिष्ठत्तदा विराट् बुद्ध्या ब्रह्मापि हृदयं नोदति
ष्ठत्तदा विराट् ६८ रुद्रोभिमत्या हृदयं नोदतिष्ठत्तदा विराट् चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्य
दा ६९ विराट्तदैव पुरुषः सलिलादुदतिष्ठत यथाप्रसुप्तं प्राणेंद्रियमनोधियः ७० प्रभवंति पुरुषं ३
थाप २ विनायेन नोत्पियितुमोजसा तमस्मिन्प्रत्यगात्मानं धिया योगप्रवृत्तया भक्त्या विरक्त्या ज्ञानेन
विविच्यात्मनि चिंतयत् ७१ इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये षड्विंशति
मोध्यायः

दाभ्यां ७० प्रथमं परमेश्वरे भक्तिस्ततोन्यत्र विरक्तिः ततो योगप्रवृत्ता धीः एकाग्रचित्तं तया ज्ञानेन प्रत्यगा राम
त्मानं क्षेत्रज्ञं अस्मिन्नात्मनि कार्यकरणसंघाते विविच्य चिंतयेत् ७१ तृतीये षड्विंशः २६ राम राम ८७

न २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तविंशे ततः सम्यग्बहुसाधनयोगतः। पुंप्रकृत्योर्विवेकेन मोक्षरीतिर्निरूप्यते १ विवेकज्ञानेन मोक्षमुपपादयितुं शुद्धस्य
वपुरुषस्य पूर्वोक्तं प्रकृत्यविवेकतः। संसारमनुस्मारयति प्रकृतिस्थोपीति त्रिभिः देहस्थोपि नाज्यते न लिप्यते गुणैः। न
क्तेः। सुखदुःखादिभिः निर्गुणत्वात् कर्तृत्वं ततो विकारित्वं तस्मात् २ अनिर्वृतः सन् प्रकृतिसंगस्ततेः। सन्मिश्रयो
निषु देवतिर्यङ्नरादिषु संसारपदवीं प्राप्नोति ३ ननु तर्ह्यवास्तवत्वात्कीरतेः किं तन्निर्वृत्तिः प्रयासेन तत्राह अर्थे ही
ति यतो विषयध्यानमनर्थहेतुः अतो मनो नियंतव्यमित्याह ४ अत एवेति असतामिंद्रियाणां पथि विषयमार्गे सद ३

श्रीभगवानुवाच प्रकृतिस्थोपि पुरुषो नाज्यते प्राकृतैर्गुणैः अविकारादकर्तृत्वान्निर्गुणत्वाज्जला
र्कवत् १ स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जते अहंक्रियाविमूढात्मा कर्तास्मीत्यभिमन्यते २ तेन सं
सारपदवीमवशोभ्येत्यनिर्वृतः प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थे ह्यविद्यमानेपि
संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ४ अत एव शनैश्चित्तं प्रसक्तमसतां
पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ५ यमादिभिर्योगपथैरभ्यसंछ्रद्धयान्वितः। म
यि भावेन सत्येन मत्कथाश्रवणेन च ६ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः। ब्रह्मचर्येण मौनेन
स्वधर्मेण बलीयसा ७ यदृच्छयोपस्थितेन संतुष्टो मितभुङ्मुनिः। विविक्तशरणः शांतो मैत्रः करुणः
आत्मवान् ८ सानुबंधे च देहेस्मिन्नकुर्वन्नसदाग्रहं ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ९

तीव्रेणाढेन विरक्त्या च तीव्रया भक्तिविरक्त्योस्तीव्रत्वे कारणानि वर्णयन् ज्ञानेन मोक्षप्रकारमाह षड्भिः यमादिभिर्योगमा
र्गैश्चित्तमभ्यसन् पुनःपुनरेकाग्रीकुर्वन् आत्मानमुपलभ्य सर्वोनुस्मृतमहं यं परमात्मानं प्रत्यपद्यत इति षष्ठेनान्वयः ६ स
त्येन निष्कपटेन भावेन प्रेम्णा अप्रसंगतः संगत्यागेन बलीयसा ईश्वरार्पितेन ७ विविक्तशरणः एकांतवासी ८ असदाग्रहे अहं
ममता प्रकृतेः पुरुषस्य दृष्टं तत्त्वं येन तेन ज्ञानेन ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवृत्तानि बुध्यवस्थानानि जाग्रदादीनि यस्य सः अतएव दूरीभूतमन्यदर्शनं यस्य आत्मना अहंकारावच्छिन्नेन आत्मानं शु
मात्सट्नूसुद ३ द्धमुपलभ्य एकस्यैवावच्छेदानवच्छेदाभ्यां करणत्वं कर्मत्वं दृष्टांतमाह चक्षुषा चक्षुरवच्छिन्नेनार्केण गगनस्थमर्कमिव
१० एवमात्मानं पश्यन् मुक्तलिंगं निरुपाधिकं असति मिथ्याभूते अहंकारे सदाभासं समर्पणाभासमानं प्रतिपद्यो
ति शुद्धजीवस्वरूपाद्विशेषमाह। सतः कारणस्य प्रधानस्य बंधुमधिष्ठानं असतः कार्यस्य चक्षुरिव प्रकाशकं"
सर्वेषु कार्यकारणत्वनु स्यूतं अद्वयं परिपूर्णं ११ अहंकारोपहितेन शुद्धब्रह्मप्रतिपत्तिं सदृष्टांतमाह यथेति जले स्थि
तः आभासः सूर्यप्रतिबिंबो यदा गृहांतर्वर्तिभित्तौ स्फुरति तदा गृहकोण स्थितेषु पुरुषै भित्त्यादौ स्थले स्थितेन

६६

निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः। उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्मदृक्॥ १० मुक्तलिंगं
सदाभासमसति प्रतिपद्यते। सतां बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं॥ ११ यथा जलस्थ आभासः
स्थलस्थेनावदृश्यते। स्वाभासेन तथा सूर्यो जलस्थेन दिवि स्थितः। १२ एवं त्रिवृदहंकारो भूतेंद्रि
यमनोमयः। स्वाभासेन लक्षितोऽनेन सदाभासेन सदृश्यदृक्॥ १३ भूतसूक्ष्मेंद्रियमनोभूतादिष्विह
निद्रया लीनेष्वसति यस्तत्र विनिद्रो निरहंक्रियः। १४ श्रीरामजयराम जयजयराम श्रीराम

स्वाभासेन सूर्यप्रतिबिंबेन यथा प्रथमं जलस्थ आभासो वदृश्यते लक्ष्यते गगनस्थस्य गृहस्थप्रतिबिंबोपयोगानु वा
र्थे तथा शब्दः यथा चेत्यर्थः यथा च जलस्थेन दिवि स्थितः सूर्यो लक्ष्यते १५ एवं भूतेंद्रियमनोमये देहे द्रिंमनोभिरव ५२
च्छिन्नः स्वाभासः आत्मप्रतिबिंबः त्रिगुणोऽहंकारः सतो ब्रह्मण आभासोऽयमिति तेन रूपेण लक्षितः अहंकारस्था
भासं विना विषयाभासानुपपत्तेः अनेन चाहंकारेण सदाभासवता सत्यदृक् परमार्थज्ञप्तिरूप आत्मा लक्षित इत्यर्थः १६ ५६
इदानीं सुषुप्तिसाक्षित्वेन शुद्धात्मप्रतिपत्तिमनुभवतो दर्शयति त्रिभिः भूतादिषु असति असत्तुल्ये व्याकृते निद्रया
लीनेषु सत्सु यस्तत्र तदा विनिद्रो निरहंक्रियस्तमात्मानं प्रतिपद्यत इति तृतीयेनान्वयः। १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि तदा विनिद्रोऽसावस्ति तर्हि जाग्रत्स्वप्नयोरिव स्फुटः किन्नावभासते तत्राह पूर्वं सद्द्रष्टृत्वेन सविकल्पत
या स्फुटं प्रतीतः सुषुप्ते तु अनुभूतादेरहंकारविषयस्य लीनत्वात् तद्विषयेऽहंकारे नष्टे सति स्वयमनष्टोऽपि मृषैवात्मानं
यं॰ ३ नष्टवन्मन्यमानः अन्यस्य नाशेनात्मनः नष्टतुल्यत्वे दृष्टान्तः नष्टवित्तो यथा आतुरो विवशः नष्टवद्भवतीत्यर्थः॥१५
ननु सुषुप्ते न किंचिदनुभूयते नैवं सुखमहमस्वाप्सं न किंचिदवेदिषमिति विशेषज्ञानं विना केवलस्यात्मनः
प्रतिसंधानादित्याह एवमिति ननु प्रतिसंधाने साहंकारस्य प्रतीतेः कथं निरहंक्रियत्वं तत्राह साहंकार
स्य द्रव्यस्य कार्यकरणसंघातस्य अनुग्रहः प्रकाशकः अवस्थानं च द्रव्यविशेषणं तथाहंकारस्यापि दृश्य [illegible]

मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा नष्टेऽहंकरणे द्रष्टा नष्टवित्त इवातुरः॥१५ एवं प्रत्य
वमृश्यासावात्मानं प्रतिपद्यते साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः॥१६ श्रीदेवहू
तिरुवाच पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् अन्योन्यापाश्रयत्वाच्च नित्यत्वा
दनयोः प्रभो॥१७ यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः॥ अपां रसस्य च यथा तथा बु
द्धेः परस्य च॥१८ अकर्तुः कर्मबंधोऽयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं ते
ष्वतः कथं॥१९ क्वचित्तत्त्वावमर्शेन निवृत्तं भयमुल्बणं अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवति
ष्ठते॥२०

त्वाच्च तद्द्रष्टा आत्मा तद्व्यतिरिक्तः तमात्मानमित्यन्वयः॥१६ भक्तिविरक्तिभ्यां सत्यपि विवेके प्रकृतिपुरुषयोः परस्प
रत्यागाभावात् कथं मुक्तिरिति पृच्छति पुरुषमिति चतुर्भिः॥१७ व्यतिरेकाभावमात्रे दृष्टान्तः यथा व्यतिरेकतो भा
वः सत्ता नास्ति गंधस्य कदाचिदपृथग्दर्शनात् दृष्टान्तान्तरं अपामिति बुद्धेः प्रकृतेः पुरुषस्य परस्य॥१८ ततः किम
त आह अकर्तुरिति यद्गुणा आश्रया यस्य सः तेषु प्रकृतेर्गुणेषु सत्सु पुरुषस्य कैवल्यं कथं॥१९ अत एव क्वचिन्निवृत्त

वंधमात्रं।

भा॰ नृ॰ टी॰ २

नशक्नोति संबंधहेतुः किंतु गुणबुध्या न हासक्तिः न निवृत्तोस्त्यां मोक्षो घटेन कश्चिदुक्तवस्तु साधनं कैवल्यादिस्यभि
प्रेत्य साधनातिशयकथयन् परिहरंति त्रिभिः २१ निमित्तं फलं तन्न निमित्तं प्रवर्तकं यस्मिन् निष्कामेन धर्मेण अ
मलात्मना निर्मलेन मनसा श्रुतेन कथाश्रवणेन संभृतया पुष्टया २२ दह्यमाना अभिभूयमाना तिरोहिता
भवति २३ एवं च सति पुनरुद्भवो नास्तीत्याह भुक्तभोगायस्याः नित्यशः सदा दृष्टदोषायस्याः अत एव परि
त्यक्तासक्तेः ईश्वरस्य अपरतंत्रस्य स्वमहिम्नि स्थितस्य स्वानंदं प्राप्तस्य २४ अविवेकावस्थायामनर्थहेतुरपि
विवेकानंतरं न भवतीति सदृष्टांतमाह यथेति द्वाभ्यां प्रस्वापः स्वप्नः वैकृतेन अथानुविभर्ति पुंस्त्वमिति प्रतिबुद्धस्य

श्रीभगवानुवाच अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना तीव्रया मयि भक्त्या च श्रुतसंभृतया
चिरं २१ ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना २२ प्रकृतिः
पुरुषस्येह दह्यमाना त्वहर्निशं तिरोभवित्री शनैरग्नेर्योनिरिवारणिः २३ भुक्तभोगा परित्यक्ता
दृष्टदोषा च नित्यशः नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च २४ यथा ह्यप्रतिबुद्धस्य प्रस्वापो
बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते २५ एवं विदिततत्त्वस्य प्रकृतिर्मयि मानसं
युंजतो नापकुरुत आत्मारामस्य कर्हिचित् २६ यदैवमध्यात्मरतः कालेन बहुजन्मना सर्वत्र
जातवैराग्य आब्रह्मभुवनान्मुनिः २७ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निःश्रेयसं स्व
संस्थानं कैवल्याख्यं मदाश्रयं २८

८७

संस्कारवशेन स्फुरन्नपि २५ २६ उपसंहरति यदैवमिति त्रिभिः बहुनि जन्मानि यस्मिन्काले २७ प्रति
बुद्धार्थः विदितात्मतत्त्वः कैवल्याख्यं स्वसंस्थानं देहादिव्यतिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निरतिशयानंदं
२८
विदितं तत्त्वं येन तस्य प्रकृतिर्नापकुरुते नापकारं करोति अत्र तद्दीपिकागतं लिख्यते अयमाशयः यथा बहवः कामक्रोधादयः काले
स्त्रियं दृष्ट्वा मृत्युं च नेत्रैः तेषां च सा कामादिजननद्वारेणानर्थकारी किंचित् यथा च तेषां मध्ये कस्यचित्परमेश्वरप्रसादात् रोमचर्मास्थिरक्तमांसा
स्थिमलमूत्रघटितामंगुलिकेयम् हो वत अनया पुरुषार्थाद्विच्छिन्नो धिङ्मामिति वैराग्यं जो भवति तस्य सा पुनः कामादिजननेनानर्थं
नजनयति।

एवं सकलसंसारदायीयं प्रकृतिः श्रीनारायणप्रसादात् गुरूपदिष्टध्यानाभ्यासार्थं
ज्ञानेनाहं ब्रह्मास्मीति परिपूर्णब्रह्मात्मत्वेनात्मानं पश्यतः प्रकृति
चानर्थकारिणीं जानतो न पुनः प्रवृत्तिरपकरोतीति॥ राम ८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यर्हि यदा एवं निर्विषयं भवति अत एव मुक्ताश्रयं च ध्येयसंबंधं विना ध्यानस्यैव स्थानासंभावात् न च पूर्ववत् ब्रह्मादि
विषयः स्यात् यतस्तत्र विरक्तः परमानंदानुभवेन अतो निर्वाणं लयं गच्छति तन्निरूपतां परित्यज्य ब्रह्माकारेण परिण
मत इत्यर्थः यथा चिज्ज्वाला आश्रयविषयापगमे महाभूतज्योतिःस्वरूपेण परिणमते अत्र अस्यां दशायां अव्यवधाने
ध्यातृध्येयविभागशून्यं एकं अखंडं आत्मानमनुगतमीक्षते अत्र हेतुः प्रतिनिवृत्तोपयुक्तो गुणप्रवाहो देहाद्युपा
धिर्यस्य ३५ न च सुप्तस्येव इव पुनः संसरतीत्याह सोपि स एव पुरुषः तस्मिन्नपि हि निःस्वरूपे अवसितः अवसं
नं निष्ठां प्राप्तः कया मनोनिवृत्त्या चरमया विचारहितया तिसुप्ताहिरोपः न त्वत्र अविद्यास्ति न स्थितिः अत्र हेतुः प
तया योगाभ्यासरूपया इत्यर्थः नन्वेवमपि सुखदुःखयोरात्मधर्मत्वे कुतोऽस्य कैवल्यं तत्राह दुःखयोः सुखदुःखयो

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः आत्मानमत्र पुरुषोऽव्यवधा
नमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५ सोप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यव
सितः सुखदुःखबाह्ये हेतुत्वमप्यसति कर्तरि दुःखयोर्यत्स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः ३६
देहं च तं न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत्स्वरूपं दैवादपेतमथ दैववशादुपेतं
वासो यथा परिकृतं मदिरामदांधः ३७ देहोपि दैववशगः खलु कर्म यावत् स्वारंभकं प्रतिसमीक्ष
त एव सासुः तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३८ श्रीराम

हेतुत्वं भोक्तृत्वं यत्पूर्वमासीत्तदपि असति अविद्याकृते कर्तरि अहंकारे विधत्त निष्ठमेव पश्यतीत्यर्थः यत उपलब्धप
रात्मकाष्ठः अपरोक्षीकृतात्मतत्त्वः ३६ तस्य जीवन्मुक्तिमाह देहं च तमिह भोक्तृचरमः उक्तलक्षणः सिद्धो देहमपि न विपश्य
ति कुतः सुखदुःखे आसनादुत्थितं उत्थाय तत्रैव स्थितं ततः स्थानादपेतं ततो दैववशात्पुनरप्युपेतं वा न विपश्यति
यतः स्वरूपं प्राप्तः यतो देहात्स्वरूपमध्यगमत्तं देहमिति वा सतोप्यननुसंधाने दृष्टांतः वासः परिकृतं कटितटे परिवि
ष्टितं स्थितं गतं वा मदिरामदांधो यथा न पश्यतीति ३७ ननु तर्हि देहस्य कथं प्रवृत्तिर्निवृत्तिर्जीवनं च तत्राह देहोपी
ति दैवं पूर्वसंस्कार स्तद्वशेन गच्छन् यावत्स्वारंभकं कर्म प्रतिनावयति समीक्षते जीवत्येव सासुः सेंद्रियः ननु तर्हि तस्मि

न्पुनः संगः स्यादुतत्राह तं देहं स्वाप्नं देहादिपुंसस्य पंच पुत्रादि
हितं पुनर्न भजते अहं ममेति नाभिमन्यते आरूढः प्राप्तः समाधिपर्यंतो यो
गो येन अत एव प्रतिबुद्धवस्तु आत्मतत्त्वं येन सः ३८

जै २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० तृ०

प्रतिबोधप्रकारमाह षड्भिः यथेति अतिस्नेहवशादात्मत्वेनाभिमतादपि पुत्रादेर्मर्त्यः पित्रादिः पृथक् एवं देहादेर्द्रष्टा ३९ पृथग
वस्थानाभावेपि भेदं सदृष्टान्तमाह यथोल्मुकादुद्दानीज्वलनः काष्ठात् स्वसंभवात् अग्नेः संभूतात् आत्मत्वेनाग्नेः स्व
रूपत्वेनाभिमतादपि अत्यंताविवेकिनो हि धूमेप्यग्न्यभिमानोस्ति उल्मुकात्पूर्वं सिद्धादपि तद्दाहकः प्रकाशकोग्निः
पृथगेव ४० भूतादेर्दृष्टान्तेभ्यः पृथक् तस्मादपि जीवसंज्ञिताद्ब्रह्मसंज्ञितः पृथक् तथा प्रधानादपि तत्प्रवर्त्तको भगवा
न्पृथगित्यर्थः ४१ उपाधितो विवेकमुक्त्वा तस्यैक्यमाह सर्वेति भूतेषु चतुर्विधेषु तदात्मतां ४२ धर्मभेदस्या

२९१ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ३९ यथो यथा २
ल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात् अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ॥ ४०
भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ४१
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ईक्षेतानन्यभावेन भूतेष्विव तदात्मतां ४२ स्वयो
निषु यथा ज्योतिरेकं नाना प्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३ तस्मादि
मां स्वां प्रकृतिं दैवीं सदसदात्मिकां दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ४४ इति श्रीभाग
वते महापुराणे तृतीयस्कंधे कापिलेये साधनानुष्ठानं अष्टाविंशतितमोध्यायः ॥ २८
देवहूतिरुवाच लक्षणं महदादीनां प्रकृतेः पुरुषस्य च स्वरूपं लक्ष्यतेमीषां येन तत्पारमार्थिकं १

कांड्षु १ प्यौपाधिकत्वं सदृष्टान्तमाह स्वयोनिषु ज्योतिरग्निः गुणवैषम्यात् दीर्घह्रस्वादिभेदात् प्रकृतौ देहे ४३ स्वां स्वस्य जी तृ० गम
वस्य बंधहेतुं दैवीं ईश्वरस्य विभूतिं शक्तिं पराभाव्य तत्प्रसादेनैव जित्वा स्वरूपेण ब्रह्मत्वेनावतिष्ठते ४४ इति तृतीये २९१
ष्टाविंशः ॥ एकोनत्रिंशके भक्तियोगस्तु बहुधोच्यते कालस्य च बलं घोरा संसृतिश्च विरक्तये उक्तानुवादपूर्वकं मा
र्गभेदान् पृच्छति द्वाभ्यां लक्षणं महदादीनां यथा सांख्येषु तथा कथितं येन लक्षणेन तत्पारमार्थिकं परस्परं विभ
क्तमित्यर्थः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्मूलंप्रचक्षते।

योभक्तियोगोमूलंप्रयोजनंयस्य[illegible]कथितं तस्यभक्तियोगस्यमार्गंप्रकारंविस्तरतोमेब्रूहियेनसंसृतीनांत्र्या यद्धेतोः
ख्यानेनविरक्तोरागोभवेत् २ ईश्वररूपस्यमहाप्रभावस्य तेतवदात्मकस्य यद्भयात्कुशलंपुण्यंकुर्वंति ४ अचक्षुषः अ
ज्ञस्य अतोमिथ्याभूतेदेहादावभिमतिरहंकारोयस्य अन१ कर्मस्वनुविद्धया आसक्तयाधिया श्रांतस्य अतएवत्व

यथासांख्येषुकथितंयन्मूलंतत्प्रचक्षते भक्तियोगस्यमेमार्गंब्रूहिविस्तरशःप्रभो २ विरागो
येनपुरुषोभगवन्सर्वतोभवेत् आचक्ष्वजीवलोकस्यविविधाममसंसृतीः ३ कालस्येश्वररूपस्य
परेषांचपरस्यते स्वरूपंवतकुर्वंतियद्धेतोःकुशलंजनाः ४ लोकस्यमिथ्याभिमतेरचक्षुषश्चिरं
प्रसुप्तस्यतमस्यनाश्रये श्रांतस्यकर्मस्वनुविद्धयाधियात्वमाविरासीःकिलयोगभास्करः ५
मैत्रेयउवाच इतिमातुर्वचःश्लक्ष्णंप्रतिनंद्यमहामुनिः आवभाषेकुरुश्रेष्ठप्रीतस्तांकरुणार्दि
तः ६ भगवानुवाच भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यते स्वभावगुणमार्गेणपुंसांभा
वोविभिद्यते ७ अभिसंधाययद्धिंसांदंभंमात्सर्यमेववा संरंभीभिन्नदृग्भावंमयिकुर्यात्स
तामसः ८ विषयानभिसंधाययशऐश्वर्यमेववा अर्चादावर्चयेद्योमांपृथग्भावःसराजसः ९

नाश्रये अपारेतमसिसंसारे चिरंप्रसुप्तस्यलोकस्यप्रबोधनायत्वंयोगप्रकाशकोभास्करः किलाविर्भूतोसि ॥५॥
श्लक्ष्णंसुंदरं ६ मार्गैःप्रकारविशेषैः तानेवाह स्वभावभूतायेगुणास्तेषांमार्गेणवृत्तिभेदेनभावः अभिप्रायः फलं
संकल्पभेदाद्भक्तिभेदइत्यर्थः ७ अभिसंधायसंकल्प्य संरंभीक्रोधी भिन्नदृक्भेददर्शी योभावंभक्तिंकुर्यात्स
त्रिविधोपितामसः ८ पृथग्भावःभेददर्शी ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मनिर्हारं पापक्षयं परस्मिन्परमेश्वरे तदर्पणं कर्मार्पणं भगवत्प्रीतिमुद्दिश्येत्यर्थः । यष्टव्यमिति विधिसिद्धिमुद्दिश्येत्यर्थः
भेददर्शित्वे अस्त्रीदावचेनैवात्रिविधापि समाने १० तदेवं तामसादिभक्तिषु त्रयस्त्रयो भेदाः तासु यथोत्तरं श्रेष्ठं एवं च श्र
वणकीर्तनादियानवधापि प्रत्येकं नव नव भेदाः । तदेवं सगुणा भक्तिरेकाशीतिभेदाः निर्गुणापि भक्तिरेकविधैवेत्याह
मद्गुणश्रुतिमात्रेणेति द्वाभ्यां अविच्छिन्ना संतता ११ अहैतुकी फलानुसंधानशून्या अव्यवहिता भेददर्शनरहिता च मद्गुण
श्रुतिमात्रेण मयि पुरुषोत्तमे मनोगतिरिति या भक्तिः सा निर्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः लक्षणं स्वरू

६२ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं यजेद्यष्टव्यमिति वा पृथग्भावः स सात्विकः । १०
मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गंगांभसोंबुधौ ११ ल
क्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे १२ सालो पा ३
क्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः १३ स
एव भक्तियोगाख्य आत्यंतिक उदाहृतः । येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते १४ ॥

पं १२ भक्तानां निःकामत्वं कैमुत्यन्यायेनाह सालोक्यं मया सह एकस्मिँल्लोके वासः सार्ष्टिः समानैश्वर्यं
सामीप्यं निकटवर्तित्वं सारूप्यं समानरूपत्वं एकत्वं सायुज्यं उत अपि दीयमानमपि न गृह्णन्ति कुतस्त
त्कामनेत्यर्थः १३ किमिति तर्हि भजन्ते भक्तेरेव परमफलत्वादित्याह स एवेति ननु त्रैगुण्यरहितत्वाद्ब्रह्मप्राप्तिः
परमफलं प्रसिद्धं सत्यं तत्तु भक्तावानुषंगिकमित्याह येन भक्तियोगेन मद्भावाय ब्रह्मत्वाय १४ श्रीराम ९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभूतायाभक्तेः साधनान्याह पंचभिः निषेवितेनसम्यगनुष्ठितेन अनिमित्तेनस्वधर्मेण नित्येनैमित्तिकेन महि
यसा शुद्धादियुक्तेनक्रियायोगेनपंचरात्राद्युक्तपूजाप्रकारेण शस्तेननिःकामेन १५ मद्धिष्ण्यंमत्प्रतिमादि तस्य
दर्शनादिभिः सत्वेनधैर्येण असंगमेनवैराग्येण १६ १७ १८ मद्धर्मणः भगवद्धर्मानुष्ठातुः पुरुषस्य आशयश्चित्तं १९
प्रयत्नं विनैवप्राप्नोतिदृष्टांतः वातोरथः प्रापकोयस्यगंधस्य आशयात्स्थानात् अवृंक्ते आत्मसात्करोति अविका

निषेवितेनानिमित्तेनस्वधर्मेणमहीयसा क्रियायोगेनशस्तेननातिहिंस्रेण नित्यशः १५ मद्धिष्ण्य
दर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषुमद्भावनयासत्वेनासंगमेनच १६ महतांबहुमानेनदीना
नामनुकंपया मैत्र्याचैवात्मतुल्येषुयमेननियमेनच १७ आध्यात्मिकानुश्रवणान्नामसंकीर्त्त
नाच्चमे आर्जवेनार्यसंगेननिरहंक्रिययातथा १८ मद्धर्मणोगुणैरेतैः परिसंशुद्ध आशयः
पुरुषस्यांजसाभ्येतिश्रुतमात्रगुणंहिमां १९ यथावातरथोघ्राणमावृंक्तेगंधआशयात् एवंयोग
रतंचेतआत्मानमविकारियत् २० अहंसर्वेषुभूतेषुभूतात्मावस्थितः सदा तमवज्ञायमांमर्त्यः
कुरुतेर्चाविडंबनं २१ योमांसर्वेषुभूतेषुसंतमात्मानमीश्वरं हित्वार्चांभजतेमौढ्याद्भस्मन्येवजु
होतिसः २२ द्विषतः परकायेमांमानिनोभिन्नदर्शिनः भूतेषुबद्धवैरस्यनमनः शांतिमृच्छति ॥२३
अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे नैवतुष्येर्चितोर्चायांभूतग्रामावमानिनः २४ श्रीराम

रिसमंयच्छति २० चित्तशुद्धिश्चसर्वभूतात्मदृष्ट्यैवभवतीतिवक्तुंकेवलंप्रतिमादिनिष्ठान्निंदन्नाह अहमितिस
प्तभिः अर्चैवविडंबनमनुकरणं अर्चायांपूजाविडंबनमितिवा २१ अवज्ञापेक्षाद्वेषनिंदाः क्रमेणचतुर्भि
निषिध्यंते २१ हित्वात्युपेक्ष्य २२ २३ द्रव्यैरुत्पन्नयाक्रियया भूतग्रामावमानिनः तन्निंदकस्य २४ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ तृ॰ ३

तर्हि किमर्चादावर्चनेनमनर्थकमेवेनेत्याह अर्चादाविति सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत् कर्माविरो
धेन यथावकारी अनेन कर्मनिष्ठाया अपि स एवावधिरित्युक्तं भवति २५ अन्तरा अन्तरं भेदं उत् अपि अरमल्पं अ
ल्पमपि भेदं यः पश्यतीत्यर्थः यद्वा अन्तरा मध्ये उदरं शरीरं मृत्युरहं तस्य भयं विदधे करोमि २६ अथ अतः सर्वभू
तेषु कृतालयं कृतावासं तत्र हेतुः भूतानामात्मानं मैत्र्या मित्रतया अभिन्नेन चक्षुषा समदर्शनेन २७ तत्रापि य
थोत्तरं मानाद्यतिशयः कर्तव्य इति वक्तुं तारतम्यमाह जीवा इति सार्द्धैः षड्भिः अजीवानां अचेतनेभ्यः ततः
तेष्वपि प्राणभृतः प्राणवृत्तिमन्तः सचित्ताः ज्ञानवन्तः इन्द्रियाणां वृत्तयो येषु इन्द्रियवृत्तयः वृक्षाणामपि सूक्ष्माः

१९३

अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं २५ आत्म
नश्च परस्यापि यः करोत्यंतरोदरं तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं २६ अथ मां
सर्वभूतेषु भूतात्मानं कृतालयं अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा २७ जीवाः
श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ततः सचित्ताः प्रवरास्ततश्चेंद्रियवृत्तयः २८ तत्रापि
स्पर्शवेदिभ्यः प्रवरा रसवेदिनः तेभ्यो गंधविदः श्रेष्ठास्ततः शब्दविदो वराः २९ रूपभेद
विदस्तत्र ततश्चोभयतोदतः तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ३० ततो वर्णाश्च च
त्वारस्तेषां ब्राह्मण उत्तमः ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ३१ श्रीराम श्रीराम

संत्येव तथा हि महाभारते मोक्षधर्मेषु स्मर्यते तस्मात्पश्यंति पादपाः तस्माज्जिघ्रंति पादपा इत्यादि तनुषु प्रभूता
नुस्पर्शनेंद्रियवृत्तिर॰ २८ अतस्तेभ्यः स्पर्शवेदिभ्यो रसवेदिनो मत्स्यादयः श्रेष्ठाः गंधविदो भ्रमरादयः शब्दविदः
सर्पादयः २९ रूपभेदविदः काकादयः उभयतोदंता येषां अपादेभ्यस्तेभ्यो बहुपादः तेभ्य अनुष्पादा इत्यर्थः द्विपात
मनुष्यः ३० ततः तेषु वर्णाः ३१

राम
१९३

संशयछेत्ता मिमांसकः ततोपि केवलात्स्वधर्मकृत् मुक्तसंगस्य लक्षणं आत्मनो धर्ममदोग्धा निष्काम इत्यर्थः ३२ अर्पिता अशे
षाः क्रियाः अर्थाः तत्फलानि आत्मा देहश्च येन अतएव निरंतरः अर्थवहितः अकर्तुः कर्तृत्वाभिमानशून्यात् ३३ जीवानां
कलया परिच्छिन्नेन अंतर्यामितया प्रविष्ट इति हेतुरित्यर्थः ३४ उक्तं भक्तियोगं पूर्वोक्तेन नाष्टांगयोगेन सहोपसंहरति भ
क्तियोगश्चेति हे मानवि पुरुषं परमेश्वरं ३५ यदन्यत्सृष्टं जीवस्य संसृतौ कालस्य स्वरूपं वाच्यं इति तदाह एतदिति सा
र्द्धेन एतत्सर्वनियंतृ यद्भगवतो रूपं कीदृशं प्रधानपुरुषात्मकं परं तद्व्यतिरिक्तं च एतद्दैवं दैवमित्यभिधीयते कि

अर्थज्ञात्संशयछेत्ता ततः श्रेयान्स्वकर्मकृत् मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ३२
तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरंतरः मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः ३३
न पश्यामि परं भूतमकर्तुः समदर्शनात् मनसैतानि भूतानि प्रणमेद्बहु मानयन् ३४
ईश्वरो जीवकलया प्रविष्टो भगवानिति भक्तियोगश्च योगश्च मया मानव्युदीरितः ३५
ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् एतद्भगवतो रूपं ब्रह्मणः परमात्मनः ३६
परं प्रधानं पुरुषं दैवं कर्मविचेष्टितं रूपभेदास्पदं दिव्यं काल इत्यभिधीयते भूतानां मह
दादीनां यतो भिन्नदृशां भयं ३७

दृशं कर्मणो विचेष्टितं नानासंसृतिलक्षणं यस्मात्तत् दैवप्रेरितकर्मकृताः संसृतयो विविधा इत्यर्थः एतदेव भगवतो
रूपं काल इति चाभिधीयते ३६ कीदृशं रूपभेदस्य वस्तूनामन्यथात्वस्य आस्पदं आश्रयः कारणं उक्तं हि कालाद्गुणव्य
तिकर इति वक्ष्यते च गुणव्यतिकरः काल इति दिव्यं अद्भुतप्रभावं तदेवाह भूतानामिति यावत्समाप्ति महदादीनां त
त्तदभिमानिनां जीवानां ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भयहेतुत्वमाहयइति भूतैरेवभूतान्यत्तिसंहरति अधियज्ञः फलदाता कलयतांवशीकुर्वतां ३८ ४० यद्यस्माद्भीताः
४१ यतोभीताः सरितः स्रवंति इंधेदीप्यते सहगिरिभिर्भूः ४२ अदोनभःयन्नियमात्तस्याज्ञया महानात्महत्त
अहंकारात्मकं। त्वं अंकुरात्मकं स्वदेहंलोकत्वेन तनुतेविस्तारयति ४३ गुणाभिमानिनागुणनियंतारोदेवाब्रह्मादयः अस्यवि

योंतः प्रविश्यभूतानिभूतैरत्त्यखिलाश्रयः सविष्ण्वाख्योधियज्ञोसौकालः कलयतांप्रभुः ३८
नचास्यकश्चिद्दयितोनद्वेष्योनचबांधवः आविशत्यप्रमत्तोसौप्रमत्तंजनमंतकृत् ३९ यद्भ
याद्वातिवातोयंसूर्यस्तपतियद्भयात् यद्भयाद्वर्षतेदेवोभगणोभातियद्भयात् ४० यद्वनस्प
१५४ तयोभीतालताश्चौषधिभिःसह स्वेस्वेकालेभिगृह्णंतिपुष्पाणिचफलानि ४१ स्रवंति च
सरितोभीतानोत्सर्पत्युदधिर्यतः अग्निरिंधेसगिरिभिर्भूर्नमज्जतियद्भयात् ४२ नभोद
दातिश्वसतांपदंयन्नियमाददः लोकंस्वदेहंतनुतेमहान्सप्तभिरावृतं ४३ गुणाभिमानि
नोदेवाः सर्गादिष्वस्ययद्भयात् वर्ततेनुयुगंयेषांवशएतच्चराचरं ४४ सोनंतोंतकरःका
लोनादिरादिकृदव्ययः जनंजनेनजनयन्मारयन्मृत्युनांतकं ४५ इतिश्रीभागवतेम
हापुराणेतृतीयस्कंधएकोनत्रिंशत्तमोध्यायः श्रीराम श्रीराम श्रीराम श्रीराम श्री

श्वस्यसर्गादिषुवर्त्ततेअनुयुगंवारंवारमित्यर्थः ४४ जनेनपित्रादिनाजनंपुत्रादिजनयन्नादिरेतत् मृत्यु राम
नाअंतकमपिमारयन्नंतकरः स्वयंत्वनादिरनंतोव्ययश्च ४५ इतितृतीयएकोनत्रिंशत्तमोध्यायः ६७ ६७ १५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिंशेनुकाय कांतादिलालनाकुलचेतसां कामिनां तामसीं पापां धोरां गतिमुदीरयति कालप्रभाववर्णनपूर्वकं वैराग्याय विचित्रकर्मकृतां संसृतिमध्यायत्रयेण प्रपंचयति तस्येत्यस्य बलिनः कालस्य बलिने तिवा पाठः १ काल्यमानः विचाल्यमानोपि वायोर्विक्रमं यथा मेघपंक्तिर्न वेद १ विक्रममेवाह यं यमर्थं दुःखेन प्रयासेनापादत्ते आपादयति तं तं भगवान् कालो धुनोति विनाशयति यत्कृते यन्निमित्तं २ शोके हेतुः यद्यस्मात्सानुबंधस्य कलत्रा

कपिल उवाच तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं काल्यमानोपि बलिनो वायोरिव घनावलिः १ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे तं तं धुनोति भगवान् पुमान् शोचति यत्कृते २ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ३ जंतुर्वै भव एतस्मिन् यां यां योनिमनुव्रजेत् तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ४ नरकस्थोपि देहं वै न पुमांस्त्यक्तुमिच्छति नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणबंधुषु निरूढमूलहृदय आत्मानं बहु मन्यते ६ संदह्यमानसर्वांग एषामुद्वहनाधिना करोत्यविरतं मूढो दुरितानि दुराशयः ७ आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनां च मायया रहो रचितयालापैः शिशूनां कलभाषिणां ८

दिसहितस्य देहस्य संबंधीनि गृहादीनि वसु द्रव्यं अनुक्तसमुच्चयार्थ अकारः ३ दुर्मतित्वं दर्शयन् दुःखं प्रपंचयति जंतुरिति चतुर्दशभिः ४ नारक्यां नारकोहारादिजीनायां ५ निरूढमूलं प्रसृतमनोरथं हृदयं यस्य बहुमन्यते कृतार्थोहमिति श्लाघते ६ उद्वहनादिना पोषणचिंतया ७ दुराशयत्वमाह आक्षिप्त आत्मा इंद्रियाणि च यस्य कया
३१ असतीनां पुंश्चलीनां मया परिहासिरचितया संभोगादिरूपया मधुरभाषिणां शिशूनामालापैश्च सुखच्छन्न

श्रि ३

पु१

दि१ कूटः विद्यशाद्यावहुलाधर्मायेषु दुःखप्रधानेषु ए येषांपोषणेनाधीयातितानू पुष्णाति शेषभुगिति भोगोपितस्यदुर्ल
भइत्यर्थः १० वार्त्तायांजीविकायांनिःसत्वः अशक्तः परार्थपरत्वे ११ अकल्पः असमर्थः १२ पूर्ववयथाआद्रियंतेतथा
आदरंनकुर्वंति कीनाशाः कृपणाः कृषिवलागाजरंवृद्धंवलीवर्द्दमिव १३ म्रियमाणाः पुष्यमाणः १४ अवमत्याऽ

६५ गेहेषु कूटधर्मेषु दुःखतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारंसुखवन्मन्यतेगृही ए अर्थैरा
पादितैर्गुर्व्याहिंसयेतस्ततश्चतान् पुष्णातियेषांपोषेणशेषभुग्यात्यधःस्वयं १० वार्त्तायां
लुप्यमानायामारब्धायांपुनःपुनः लोभाभिभूतोनिःसत्वःपरार्थेकुरुतेस्पृहां ११ कुटुंब
भरणाकल्पोमंदभाग्योवृथोद्यमः श्रियाविहीनःकृपणोध्यायन्श्वसितिमूढधीः १२ एवं
स्वभरणाकल्पंतत्कलत्रादयस्तथा नाद्रियंतेयथापूर्वंकीनाशाइवगोजरं १३ तत्राप्यजात
निर्वेदोम्रियमाणःस्वयंभृतैः जरयोपात्तवैरूप्योमरणाभिमुखोगृहे १४ आस्तेवमत्योपन्य
स्तंगृहपालइवाहरन् आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः १५ वायुनोत्क्रमतोत्तारः
कफसंरुद्धनाडिकः कासश्वासकृतायासःकंठेघुरघुरायते १६ शयानःपरिशोचद्भिःपरिवी
तःस्वबंधुभिः वाच्यमानोपिनब्रूतेकालपाशवशंगतः १७ एवंकुटुंबभरणेव्यापृतात्माजितेंद्रि
यः म्रियतेरुदतांस्वानामनुवेदनयाऽस्त

ज्ञयान्यन्यस्तंसमीपप्रक्षिप्तं गृहपालःश्वा आहरन्भुंजानः आमयावीरोगी १५ उत्तारोवहिर्निर्गतनेत्रः ९५
कोफेनसंरुद्धानाडयोमार्गभूतायस्य कासश्वासाभ्यांकृतोआयासोयस्यघुरघुरइतिशब्दंकरोति १६ परिवीतः
परिवेष्टितः वाच्यमानः बंधोवांतत्याहूयमानः १७ अस्तधीर्नष्टमतिः १८ श्रीराम श्रीराम॥७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनस्य पुण्यपापाभ्यां द्विगती तत्र पापगतिमाह यमदूताविल्यादि यावत्समाप्तिसंरंभसंक्रोधमीक्षणं ययोस्तौ दृष्ट्वा १९
आहृत्य निरुध्य २० तयोस्तर्जनैर्निर्भिन्नहृदयं यस्य आर्तस्सन् चलतीति द्वितीयेनान्वयः २१ क्षुत्तृड्भ्यां परितान्वयात्त्रः २२
तप्ता वालुका यस्मिन् निर्गतश्चाश्रमो विश्रामस्थानमुदकं च यस्मिन् २२ यमसादनं नीतो भवति २३ तत्रैवं विशेष

यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति १९ यातनादेह
आवृत्य पाशैर्बध्वा गले बलात् नयतो दीर्घमध्वानं दंड्यं राजभटा यथा २० तयोर्निर्भिन्नहृदयस्तर्ज
नैर्जातवेपथुः पथि श्वभिर्भक्ष्यमाण आर्तो घं स्वमनुस्मरन् २१ क्षुत्तृट्परीतो कंदवान् त्वानिलैः
संतप्यमानः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोपि निराश्रमोदके २२ त
त्र तत्र पतन् श्रांतो मूर्छितः पुनरुत्थितः पथा पापीयसानीतस्तमसा यमसादनं २३ योजनानां सह
स्राणि नवतिं नव चाध्वनः त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः २४ आदीपनं स्वगा
त्राणां वेष्टयित्वोल्मुकादिभिः आत्ममांसादनं क्वापि स्वकृत्तं परतोपि वा २५ जीवतश्चांत्राभ्यु
द्धारः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं २६ कृंतनं चावयवशो
गजादिभ्यो भिदापनं पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः २७ यास्तामिस्रांधतामिस्रा
रौरवाद्याश्च यातनाः भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः २८

मार्ग अध्वनः संबंधिनी योजनानां नवतिं नव च सहस्राणि पापाधिक्ये द्वाभ्यां वा नीतः सन् २४ यातनः संक्षेपतो द
र्शयति चतुर्भिः आदीपनं प्रज्वलनं प्राप्नोति स्वेन कृत्तं अन्येन वा कृत्तं छिन्नं यत्स्वस्य मांसं तस्य भक्षणमित्यर्थः
२५ आत्मनो वैशसं पीडां २६ भिदापनं भेदप्रापणं २७

रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेतदसंभावितं अत्रापिदृश्यमानत्वादित्याह अत्रैवेति २९ उभयं कुटुंबं स्वदेहं च ३० पापार्जितं धनं भुंजते बहवः
कर्तैव नरकं यातीत्याह एकइति भूतद्रोहेण यद्भृतं तेन तत्स्थूलं कलेवरं वा इहैव हित्वा कुशलादितरत् पापं तदेव
पाथेयं भोग्यं यस्य ३१ ननु पापमपि विहाय गच्छतु तत्राह दैवेनेति तस्य कुटुंबपोषणस्य शमलं पापं दैवेनईश्व
रेण प्रापितं भुंक्ते ३२ ननु कुटुंबपोषणं विहितमेव तत्राह केवलेति तमसो नरकस्य चरमं पदं स्थानं ३३ पुन

अत्रैव नरकः स्वर्गइति मातः प्रचक्षते याया तनार्वै नारक्यस्ताइहाप्युपलक्षिताः २९ एवं कु
टुंबं बिभ्राण उदरंभर एव वा विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृशं ३० एकः प्रपद्य
ते ध्वांतं हित्वेदं स्वकलेवरं कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ३१ दैवेनासादितं त
स्य शमलं निरये पुमान् भुंक्ते कुटुंबपोषस्य हृतवित्त इवातुरः ३२ केवलेन ह्यधर्मेण
कुटुंबभरणोत्सुकः याति जीवोंधतामिश्रं चरमं तमसः पदं ३३ अधस्तान्नरलोक
स्य यावतीर्यातनादयः क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ३४ इति श्रीभागव
ते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने कर्मविपाकः त्रिंशत्तमोऽध्यायः ३०
श्रीभगवानुवाच कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःक
णाश्रयः १

र्ध ६

मनुष्यशरीरप्राप्तिप्रकारमाह नरलोकस्य मनुष्यदेहस्य प्राप्तेरधस्तात् अर्वाक् यावत्यो यातनाः आदिशब्देन स्वैरस्कं राम
रादियोनयश्च याः ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापाः शुचिः सन् अत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ३४ इति र्ध ६
तृतीये त्रिंशत्तमोऽध्यायः एकत्रिंशे विमिश्रेस्तु पुण्यपापैर्विहांतरा मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः १
पुनरत्राव्रजेदित्युक्तं तदेव विशेषतो दर्शयति कर्मणा पूर्वकृतेन तदेव मीश्वरः तदेव नेत्रं नेतृ प्रवर्तकं यस्य स प्रविष्टो भवति १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि

कलिलं शुक्रशोणितमिश्रितं भवति बुद्बुदं वर्तुलाकारं कर्कंधुर्बदरीफलं तदाकारं कठिनं पेशी मांसपिंडाकारं अंडं वा यान्यत
रे १ वा अंकुशादीनां अंगानां विग्रहो विभागः लिंगं च छिद्राणि चेत षामुद्भवः २ जरायुणा गर्भवेष्टनेन वीतः प्रावृतः ४॥
मातुर्जग्धेन भक्षितेनान्नेन पानादिना अपृथक् धमनी धातवो यस्य जंतूनां संभवो यस्मिन् तस्मिन् समये गर्भे शेते तथा च
मार्कंडेयपुराणे नाडी वाप्यायनी नाम नाभ्यां तस्य निबध्यते स्त्रीणां तथांत्रसुषिरे सा निबद्धोपजायते क्रमेण भुक्त

कललं त्वेकरात्रेण पंचरात्रेण बुद्बुदं दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं २ मासेन तु शिरो द्वा
घं २ भ्यां बाह्वंघ्र्याद्यंगविग्रहः नखलोमास्थिचर्माणि लिंगछिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवः
सप्त पंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ४ मातुर्जग्धान्नपानाद्यै
रेधद्धातुरसंमते शेते विण्मूत्रयोर्गर्ते स जंतुर्जंतुसंभवे ५ कृमिभिः क्षतसर्वांगः सौकुमार्या
द्य तिक्षणं मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६ कटुतीक्ष्णोष्णलवणरूक्षाम्लादि
भिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ७ उल्बेन संवृतस्तस्मिन्नंत्रैश्च बहि
रावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ८ अकल्पः स्वांगचेष्टायां शकुंत इव पंजे ॥ २
रे तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विंदते ९

पीतानि स्त्रीणां गर्भोदरे तथा तेनाप्यायितदेहोसौ जंतुर्वृद्धिमुपैति वै ५ तत्रत्यैः कृमिभिः खादद्भिः सौकुमार्यात्
कोमलत्वेन क्षतानि सर्वांगानि यस्य ६ उल्बणैः दुःसहैः सर्वेष्वंगेषु उत्थिता वेदना यस्य अंत्रैः त्वंतरेण चया ७
उल्बेन जरायुणा भुग्नं कुटिलीभूतं पृष्ठं शिरोधरा ग्रीवा यस्य ८ दैवात् पूर्वकर्मवशात् लब्धा स्मृतिर्येन सः दी
र्घं दुरंतमनुच्छ्वासं यथा भवति तथा तत्र स्थितः सन् ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूतिहेतुभिर्वातैर्वेपितः सोदरः समानोदरजन्मा विष्ठाभूः कृमिरिव १० नाथमानो याचमानः उपतप्यमान इति वा त्रा
षिः देहात्मदर्शी भीतः पुनर्गर्भवासात् सप्तवध्रियो वंधनभूता धातवो यस्य सः विक्लवया ११ उपसन्नं जगद्रक्षितुं आकुलया २
स्वेच्छया गृहीतनानामूर्तेर्भगवतश्चरणारविंदमकुतोभयं सोहं शरणं व्रजामि भुवि चलत् दिति श्रीकृष्णावता
राभिप्रायेण असतो मे अनुरूपा योग्या येनेदृशी गर्भवासलक्षणा गतिर्दर्शिता तस्य १२ ननु कोसौ यं व्रजसि शरणं १

९७

आरभ्य सप्तमान्मासाल्लब्धबोधोपि वेपितः नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः १०
नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांजलिः स्तुवीत तं विक्लवया वाचा येनोदरेर्पि
तः ११ जीव उवाच तस्योपसन्नमवितुं जगदिच्छयात्तनानातनोर्भुवि चलच्चरणार
विंदं सोहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोनुरूपा १२ यस्त्व
त्र बद्ध इव कर्मभिरावृतात्मा भूतेंद्रियाशयमयीमवलंब्य मायां आस्ते विशुद्धमवि री २
कारमखंडबोधमातप्यमानहृदयेवसितं नमामि १३

चे १
को वा तव तस्य विशेषः येन स एव सेव्यत्वमित्यपेक्षायामाह अत्र मानुषे देहे भूतेंद्रियाशयमयीं देहा
कारपरिणतां मायामवलंब्य आश्रित्य कर्मभिरावृतः स्वरूपे इव यः आस्ते सोहं यस्तु अत्रैवास्ति तं न बद्ध इव
मामि कथंभूतमित्यपेक्षायां तु शब्दोक्तविशेषं दर्शयति आतप्यमाने हृदये अवसितं प्रतीतं एवमप्यवि १४
कारं कुतः विशुद्धं निरुपाधिकं कुतः अखंडबोधो यस्य तं १३ श्रीराम श्रीराम श्रीराम श्रीराम
तो १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु त्वमपि वस्तुतः शुद्ध एव असंगो ह्ययं पुरुष इत्यादि श्रुतेः तत्कथं युवयोरयं विशेषः तत्राह यः पंचभिर्भूतैः रचिते शरीरे
अयथा मिथ्यैव छन्नः न वस्तुतः यतस्तेन शरीरेण रहितः असंगः अनोऽयथैव इंद्रियगुणार्थ चिदात्मकः इंद्रियाणि गु
णाः अर्थाश्च चिदाभासश्च तदात्मकः सोहं तं वंदे कथंभूतं तेन शरीरेण अविकुंठो महिमा यस्य तं अकुंठितपाठे
गुंठो३ अवसन्नो गुंठनमावरणं यस्य स महिमा यस्य तस्येत्यर्थः तत्र हेतुः प्रकृतिपुरुषयोः परं नियंतारं कुतः ऋषिं सर्वज्ञं विद्या
शक्तिमित्यर्थः विद्याविद्याकृतो विशेष इति भावः १४ ननु तेनैतावायं बंधो निवर्त्तिष्यते किं परमेश्वरवंदनेन तत्राह
यस्य मायया नष्टस्मृतिः सन् संसारसंबंधिनि पथि तदभिश्रमेण तत्कृतेन क्लेशेन चरन्नयं जीवः महतस्तस्यैव

यः पंचभूतरचिते रहितः शरीरे छन्नोऽयथेंद्रियगुणार्थ चिदात्मकोहं तेनाविकुंठमहिमा
ऋषिंतमे नं २ नं वंदे परं प्रकृतिपूरुषयोः पुमांसं १४ यन्माययोरुगुणकर्मनिबंधनेस्मिन् सांसारिके पथि च
रंस्तदभिश्रमेण नष्टस्मृतिः पुनरयं प्रवृणीत लोकं युक्त्या कया महदनुग्रहमंतरेण १५
ज्ञानं यदेतदधात्कतमः स देवस्त्रैकालिकं स्थिरचरेष्वनुवर्तितांशः तं जीवकर्मप
दवीमनुवर्त्तमानास्तापत्रयोपशमनाय वयं भजेम १६ श्रीराम श्रीराम श्रीराम

ईश्वरस्यानुग्रहं विना पुनः कया युक्त्या लोकं निजस्वरूपं प्रवृणीत संभजेत अभिश्रमे हेतुत्वेन पंथानं विशिनष्टि
उरूणि गुणनिमित्तानि कर्माणि निरंतरं बंधनानि यस्मिन् ईश्वरस्य प्रसादं विना ज्ञानाभावान्न एव संभवेद् इ
त्यर्थः १५ ईश्वर एव ज्ञानद इत्युपपादयन्नाह यदेतत् त्रैकाल्यविषयं ज्ञानं तत् तं विना कतमोऽस्मद् धात्
न कोपि किंतु स देव ईश्वर एव ननु अन्यः प्रकृष्टो जीवो दधातु तत्राह जीवरूपां कर्मपदवीं अनुवर्त्तमाना वयमि
ति तद्व्यतिरेकेण न कोपि समर्थ इत्यर्थः अन्यस्यात्रासंभवमुक्त्वा तस्य संभावमाह स्थिरेषु चरेषु च अंतर्यामिरूपो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृ॰टि

खदुःखं विज्ञापयन्नाह देहीति अन्यदेहविवरे मातुरुदरकुहरे योऽसृग्विण्मूत्रकूपः तस्मिन्पतितः तत्र जठराग्निना भृ
शं तप्तो देहो यस्य अत एव कृपणधीः इतो विवरात् विवसितुं निर्गंतुं इच्छन् स्वमासान् गणयन् अहो सोऽकदा नु अहो निर्वा अ २
स्यते १७ तत्कृतमुपकारं स्मरन्नाह येनेदृशीं गतिं ज्ञानं भवादृशेनेति निरुपमेनेत्यर्थः स्वकृतेनैव स्वयं तुष्यतु अं
जलिमात्रं विना तत्कृतोपकारे प्रत्युपकारं कः कुर्यादित्यर्थः १८ ईदृशीं गतिमित्यनेन आत्मंतरविलक्षणं ज्ञानं
प्रापितवानित्युक्तं तदेव वैलक्षण्यमाह पश्यतीति अयमपरः पश्वादिः सप्तवध्रीः जीवः स्वदेहे शारीरके कारीरभ

देहन्यदेहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्तदेहः इच्छन्नितो विवसितुं गणय
न्स्वमासान्निर्वास्यते कृपणधीर्भगवन्कदा नु १७ येनेदृशीं गतिमसौ दशमास्य ईश संग्रा
हितः पुरुदयेन भवादृशेन स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्रति विनांजलिमस्य
३७८ कुर्यात् १८ पश्यत्ययं धिषणया ननु सप्तवध्रीः शारीरके दमशरीर्यपरः स्वदेहे यत्सृष्टयास
तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतं १९ सोहं वसन्नपि विभो बहुदुःखवासं गर्भा
न्न निर्जिगमिषे बहिरंधकूपे यत्रोपयातमुपसर्पति देवमाया मिथ्या मतिर्यदनु संसृतिचक्रमे
तत् २०

वे सुखदुःखं केवलमनुपश्यति अहं पुनर्यत्सृष्टया धिषणाया यायद्दत्तेन विवेकज्ञानेन दमशरीरी दमइत्युपलक्षणं शमद
मादियुक्तशरीरवानु आसं अभवं तमेवं च पुराणं अनादि पुरुषं पूर्णं बहिश्च हृदि च पश्ये पश्यामीत्यन्वयः कथं अपरोक्ष
तया प्रतीतं चैत्यमिव अहंकारास्पदं भोक्तारमिवेत्यर्थः १९ विवेकज्ञानफलं संसारोद्वेगमनुवदन् मोक्षमार्गमे
वाध्यवस्यति सोहमिति द्वाभ्यां हे विभो बहुदुःखवासं यथा भवति तथा गर्भे वसन्नपि सोहं गर्भाद्बहिर्न निर्गंतुमि
च्छामि तत्र हेतुः अंधकूपप्रायेयत्र बहिरुपयातं प्राणिनं देवस्य तव माया उपसर्पति व्याप्नोति यदनु यां मायां
मनु मिथ्यामतिर्देहे अहंबुद्धिः संसृतिचक्रं च कलत्रपुत्रादिसंबंधादुपसर्पतीति २० श्रीराम श्रीराम
हे। राम १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व२ व्यसनं दुःखं यथा मे या भविष्यथ २

तस्मादेवं वस्थितोपि विगतविक्लवः अव्याकुलः सन् सुहृदा आत्मना सारथिना पथा बुद्ध्यैव आत्मानं तमसः संसारा
दुद्धरिष्यामि अनेककर्धं नानागर्भवासरूपं मे न तन्न भविष्यति तथा कान्तमेव साधनसामग्रीं तत्र हत्वा पसादि
तो हृदयं प्रापितो विष्णोः पादो येन मया सः २१ दशमासाः परिच्छेद कायस्येति पूर्वेक्षणोपलक्षणं ऋषिर्जीवः प्रसूतिः२
सद्यः तत्क्षणमेव अर्वाचीनमवाङ्मुखं सूतिहेतुर्मारुतः क्षिपति नुदति २२ अवसृष्टः अधः क्षिप्तः सन् २३

तस्मादहं विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव भूयो यथा व्यसनमेतदने
करंध्रं मा मे भविष्यदुपसादितविष्णुपादः २१ श्रीकपिल उवाच एवंकृतमतिर्गर्भे दशमास्यः स्तुवन्नृ स्य२
षिः सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः २२ तेनावसृष्टः सहसा कृत्वावाक्शिर आतुरः ११
विनिःक्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः २३ पतितो भुव्यसृङ्मूत्रे विष्ठाभूरिव चेष्टते रोरूय
यति गते ज्ञाने विपरीतां गतिं गतः २४ परच्छंदं न विदुषा पुष्यमाणो जनेन सः अनभिप्रेतमा
पन्नः प्रत्याख्यातुमनीश्वरः २५ शायितोशुचिपर्यंके जंतुः स्वेदजदूषिते नेशः कंडूयनेंगा
नामासनोत्थानचेष्टने २६ तुदंत्यामत्वचं दंशा मशका मत्कुणादयः रुदंतं विगतज्ञानं कृमयः
कृमिकं यथा इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च २७ श्रीराम श्रीराम श्रीराम श्रीरा

रोरूयति रोरूयते २४ परस्य छंदं अभिप्रायम् अविदुषा अनभिप्रेतं स्तन्यार्थं रोदनेन उदरव्यथां प्रकल्प्य निंबरसपा
पा२ नं उदरव्यथां रोदने स्तनपानमित्यादि २५ आसनोत्थानचेष्टनेवानीशः सन् रोपत्रपयति इत्यनुषंगः २६ आमा
कोमलत्वग्यस्य तं विगतं गर्भे ज्ञातं ज्ञानं यस्य शैशवं पंचवर्षाणि ततः पौगंडं यौवनात् अर्वाक् तत्र अध्ययनादि दुःखं १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यौवनं दुःखमाह सार्द्धैस्त्रिभिः अलब्धाभीप्सितत्वेन शुचार्पितः व्याप्तः अज्ञानाद्दिद्धोद्दीप्तो मन्युर्यस्य सः देहेन सह
वर्द्धमानेनाभिमानेन मन्युना च विग्रहं विरोधं करोति आत्मनो नाशाय २८ अज्ञानं प्रपंचयति भूतैरार
ति॰ ब्धे देहे सः असदाग्रहो अहं ममेति मतिं करोति २९ तदर्थं देहार्थं यत् येन कर्मणा बद्धो यो देहः अनुयाति पुनः पुन

६६ अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः सह देहेन मानेन वर्द्धमानेन मन्युना क
रोति विग्रहं कामी कामिष्वंताय चात्मनः २८ भूतैः पंचभिरारब्धे देहे देह्यबुधोऽसकृत्॥
म २ अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं २९ तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं यो
नुयाति ददत् क्लेशमविद्याकर्मबंधनः ३० यद्यसद्भिः पथि पुनः शिश्नोदरकृतो॥
द्यमैः आस्थितो रमते जंतुस्तमो विशति पूर्ववत् ३१ सत्यं शौचं दया मौनं बुद्धिः श्री
र्ह्रीः यशः क्षमा शमो दमो भगश्चेति यत्संगाद्याति संक्षयं ३२ तेष्वशांतेषु मूढेषु खंडितात्म
भा॰ स्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३३ न तथास्य भवेन्मोहो बंधश्चा
न्यप्रसंगतः योषित्संगाद्यथा पुंसो तथा तत्संगिसंगतः ३४

गयाति अनुवर्त्तत इति वा कुतः अविद्याकर्मभ्यां बंधन इति तथा ३० यद्यसद्भिरास्थितः अधिष्ठितः सन् तेषां प
थि रमते सन्मार्गं आस्थितोऽपि यद्यसद्भिः सह रमत इति वा तर्हि यातनादेहे आरुह्य त्यादि पूर्वोक्तप्रकारेण
म २ नरकं विशति ३१ असत्संगं निंदति सत्यमिति त्रिभिः ३२ खंडितात्मसु देहाद्यात्मबुद्धिषु योषितां क्रीडामृ ११५
गवदधीनेषु ३३ यथा च योषित्संगिनां संगतो बंधः तथान्यप्रसंगतो न भवेत् ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योषित्संगस्यानर्थहेतुतां प्रपंचयति प्रजापतिरिति सप्तभिः रोहिद्भूतां मृगीरूपां सतीं ऋक्षरूपी मृगाकारः सन् हतत्रपो निर्लज्जः ३५ तेन ब्रह्मणा सृष्टा मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि देवमनुष्यादयः तेषु को नु पुमानखंडितधीः अनाकृष्टमनाः ३६ दिशां जयिनः शूरानपि ३७ प्रतिलब्धः आत्मलाभो येन स मुमुक्षुर्योगी प्रमदाः निरयद्वारं वदंति योगिनः ३८ शनैः शुश्रूषादिमिषेणोपयाति या योषिद्रूपा माया तां मृत्युं प्रतिकूल

प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोन्वधावदृक्षरूपी हतत्रपः ३५
तत्सृष्टसृष्टसृष्टेषु को न्वखंडितधीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया ३६
बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां या करोति पदाक्रांतान् भ्रूविजृंभेण केवलं ३७
संगं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्मलाभो वदंति या निरयद्वारमस्य ३८ योपयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ३९ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसंगतः प्राप्तो वित्तापत्यगृहप्रदं ४० तामात्मनो विजानीयात्पत्यपत्यगृहात्मकं दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४१

मीक्षेत ३९ मुमुक्षुः स्त्रियं प्रेत्य तद्देवाहयामितिद्वाभ्यां ऋषभायतीं पुरुषवदाचरंतीं या मम माया वित्तादिप्रदं पतिं मन्यते स्त्रीसंगतः अंतकाले स्त्रीध्यानेन स्त्रीत्वं प्राप्तो जीवः ४० तां पत्यादिरूपं मृत्युं विजानीयात् मृगयोर्लुब्धकस्य गायनमनुकूलत्वेन प्रतीयमानमपि यथा मृगस्य मृत्युः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी०३ तदेवं जीवस्य संसृतिः प्रपंचिता नतु प्रवर्त्तस्य कर्मवशेन लोकाल्लोकांतरगमनं जन्ममरणे चोक्ते तत्रैवं शंक्यते ननु व्या
पकस्य कथं लोकाल्लोकांतरगमनं नित्यस्य च कथं जन्ममरणे भोगेन कर्मक्षये च सति जन्ममरणे चेष्यते तर्हि कुतः
पुनरपि तस्य कर्मसंभव इति तत्र लोकाल्लोकांतरगमनं कर्म च संभवतीत्याह देहेनेति जीवस्योपाधितया भूतेन
जातेन जीवेन लिंगदेहेन लोकांतरमनुव्रजन् अविरतं कर्माणि करोति तानि कर्माणि समस्तमाप्तिरुक्ता ४२ जन्मम
अनु०ग०३ रणसंभवमाह जीवाजीवोपाधिलिंगदेहः अस्यात्मनः अनुवर्त्ति भूतेंद्रियमनोमयः स्थूलभूतादिविकारः देहः
न२ भोगायतनं तयोर्निरोधः कार्यायोग्यतानिदेस्य जीवस्य मरणमुच्यते आविर्भावस्तु संभवो जन्मोच्यते ४३ एतदेव
प्रपंचेन स्पष्टयति द्रव्योपलब्धिस्थानस्येति गोलकादेर्द्रव्येक्षायां नु पदर्शने काचकामलादिदोषेण यदायोग्यता

देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् भुंजान एव कर्माणि करोत्यविरतं पुमान् ४२ जीवस्यानुगतो
१०० देहो भूतेंद्रियमनोमयः तन्निरोधोस्य मरणमाविर्भावस्तु संभवः ४३ द्रव्योपलब्धिस्थानस्य द्रव्ये
क्षायोग्यता यदा तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं ४४ यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यता
यदा तदेव चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ४५ तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः बुध्वा जी
वगतिं धीरो मुक्तसंगश्चरेदिह ४६

भवति तदेव चक्षुरिंद्रियस्याप्ययोग्यता अनयोस्थानचक्षुषोर्यदायोग्यता तदेव द्रष्टुर्जीवस्य द्रष्टृत्वायोग्यता
एवं स्थूलदेहे विकल्पे लिंगस्येव कल्पितदेवजीवस्य मरणं न स्वतः इत्यर्थः ४४ क्वचिद्देके श्लोकोऽधिकः पठ्यते
तत्रायमर्थः द्रव्योपलब्धिस्थानस्य स्थूलशरीरस्य द्रव्येक्षायां यदायोग्यता तत्पंचत्वं मरणं अहंमानात् इदमेवा
हमित्यभिमानेन द्रव्यस्य स्थूलशरीरस्य दर्शनमुत्पत्तिः अक्ष्णोर्गोलकयोः द्रव्यावयवस्य तु पादे दर्शनेऽयोग्यताशे
षं समानं ४५ यस्मान्न वस्तुतो जीवस्य जन्मसर्णादि तस्मात्तु मरणात्संत्रासो न कार्यः जीवेन च कार्पण्यं देन्यं कार्यं राम
न १००

क्ते

ननु सर्वथा मुक्तसंगत्वे कथं जीवितं अत आह सम्यक् पश्यति विचारयतीति सम्यक् दर्शना तया बुद्ध्या मायाविरचिते लोके कलेवरं न्यस्य निक्षिप्य तस्मिन्नासक्तिं त्यक्त्वा चरेदित्यर्थः तृतीये एत्रिंशः द्वात्रिंशे सात्विके धर्मैः धूमादिगतिकीर्त्यते तत्त्वज्ञानविहीनस्य ततश्च पुनरागतिः तदेवं पापकर्मणां गतिरुक्ता इदानीं काम्यकर्मणां गतिमाह अथेति चतुर्भिः यो गृह एवावसन् स्वान् धर्मान् दोग्धि दोहमाह काममर्थं च तान् दुग्ध्वा धर्मान् भूयः पिपर्ति पूरयति अनुतिष्ठति १ सोपि भगवदाराधनरूपाद्धर्मात् पराङ्मुखः सन् प्राकृतानपि देवान् पितॄंश्च

सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया मायाविरचिते लोके चरेन्न्यस्य कलेवरं ४८ इति श्री भागवते महापुराणे तृतीयस्कंधे कापिलेयोपाख्याने जीवगतिर्नामैकत्रिंशत्तमोऽध्यायः कपिल उवाच अथ यो गृहमेधीयान् धर्मानेवावसन् गृहे काममर्थं च धर्मान् स्वान् दोग्धि भूयः पिपर्ति तान् १ स चापि भगवद्धर्मात् काममूढः पराङ्मुखः यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयान्वितः २ तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान् गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यति ३ यदा चाहींद्रशय्यायां शेतेनंतासनो हरिः तदा लोका लयं यान्ति त एते गृहमेधिनां ४ ये स्वधर्मान्न दुह्यन्ति धीराः कामार्थहेतवे निःसंगा न्यस्तकर्माणः प्रशांताः शुद्धचेतसः ५ निवृत्तिधर्मनिरता निर्ममा निरहंकृताः स्वधर्माख्येन सत्वेन परिशुद्धेन चेतसा ६

यजते २ ततः किं तत्राह तेषां श्रद्धया आक्रांता व्याप्ता मतिर्यस्य पित्रर्थं देवार्थं च व्रतं नियमो यस्य सोमपाः तत्र सोमं पिबतीत्यर्थः ३ लोके तिष्ठत्यपि पुण्यक्षयात् प्रागनुक्त्वा लोकानामपि लयमाह यदा च अहरहः ४ भगवद्धर्मनिष्ठानां तु प्राप्तिमेव गतिमाह त्रिभिः ये तु कामार्थप्रयोजनाय स्वधर्मान् न दुह्यन्ति न दुहन्ति निःसंगाः अनासक्ताः न्यस्तानि ईश्वरे समर्पितानि कर्माणि यैः ५ ६ प्र

ढ

प्रलये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०९३ विश्वतोमुखं परिपूर्णं पुरुषं यान्ति तथा च श्रुतिः सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मेति प्रकृतिं उपादानकारणं उ
त्पत्त्यन्तभावनं निमित्तकारणं ७ परमेश्वरदृष्ट्या हिरण्यगर्भोपासकानामपि क्रमेण तत्प्राप्तिमाह द्विपरार्द्धावसान इति त्रिभिः परस्य
हिरण्यगर्भस्य परिचिन्तकाः परमेश्वरदृष्ट्या हिरण्यगर्भोपासकाः ८ क्ष्मादीनि पञ्च महाभूतानि मनश्च इंद्रियाणि च अर्थाश्च
शब्दादयः भूतादिश्च अहंकारः एवमादिभिः परिवृतं युक्तं ब्रह्मांडं प्रतिसंहर्तुमिच्छुः सन् अव्याकृतमीश्वरं पराख्यं द्विप

सूर्यद्वारेण ते यान्ति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्योत्पत्त्यन्तभावनं ७ द्विपरार्द्धावसाने यः
प्रलयो ब्रह्मणस्तु ते तावदध्यासते लोकं परस्य परचिंतकाः ८ क्ष्माम्भोऽनलानिलवियन्मनइंद्रि
यार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं पराख्यमनु
१०१ भूय परः स्वयंभूः ९ एवं परेत्य भगवंतमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः तेनैव सा
कममृतं पुरुषं पुराणं ब्रह्म प्रधानमुपयांत्यगताभिमानाः १० अथ तं सर्वभूतानां हृत्पद्मेषु कृताल
यं श्रुतानुभावं शरणं व्रज भावेन भामिनि ११ श्रीराम ॥ श्रीराम श्रीराम ~~श्रीराम~~ श्रीराम

रार्द्धलक्षणं कालं ९ परेत्य दूरं गत्वा भगवंतं हिरण्यगर्भमनुप्रविष्टा ये योगिनः अमृतं परमानंदरूपं प्रधानं उत्कृष्टं ब्रह्म तेन राम
नैव सहोपयान्ति न तु पूर्वं यतस्तदा अगताभिमानाः तथा च श्रुतिः ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचारे परस्यान्ते कृतात्म १०१
नः प्रविशन्ति परं पदमिति १० भगवदुपासकास्तु साक्षादेव तं प्राप्नुवंतीति न तु क्रमेण अतस्त्वं साक्षात्तमेव भजेत्याह अथ तस्माद्भा
वेन प्रेम्णा ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावद्भगवद्भक्तानां निरन्तरमेव तत्प्राप्तिः भगवद्भेदेन हिरण्यगर्भोपासकानां तु क्रमेणेत्युक्तं भेदेनोपासने तु ब्रह्मादयोप्यावर्तन्ते कि
मुतान्य इत्याह आद्य इति चतुर्भिः यो वेदगर्भः सोपि गुणव्यतिकरे जाते यथापूर्वं ब्रह्मपदाधिकृतः सन् प्रजायते॥ नैकवलं स एव
कः किंतु ऋषिभिर्मरीच्यादिभिर्योगेश्वरादिभिश्च सह १२ जन्मनि हेतुद्वयं भेददृष्ट्याभिमानेन कर्तृत्वादिति च यथापूर्वत्वे हेतुः निः
संगेन निःकामेन कर्मणेति किं कृत्वा प्राजापत्यं प्रथमपारमेष्ठ्यमैश्वर्यं निषेव्य पश्चात्प्रलये सगुणं गुणाधिष्ठातारं प्रथमावतारं पु
पुरुषं १३ संसृत्य प्राप्य १४ काले ते पि ऋषिप्रमुखाः स्वकर्मनिमित्तमैश्वर्यं निषेव्य पुरुषं च संसृत्य यथापूर्वं स्वस्वाधिकारेण पुन इति तृतीयेनान्वयः

आद्यस्थिरचराणां यो वेदगर्भः सहर्षिभिः। योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः। १२ भेददृष्ट्याभिमानेन निःसं
गेनापि कर्मणा कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम्। १३ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना जाते गुण
व्यतिकरे यथापूर्वं प्रजायते १४ ऐश्वर्यं पारमेष्ठ्यं च तेपि धर्मविनिर्मितं निषेव्य पुनरायान्ति गुणव्यतिकरे सति
१५ ये त्विहासक्तमनसः कर्मसु श्रद्धयान्विताः। कुर्वन्त्यप्रतिसिद्धानि नित्यान्यपि च कृत्स्नशः। १६ रजसा
कुंठमनसः कामात्मानोजितेंद्रियाः। पितॄन्यजंत्यनुदिनं गृहेष्वभिरताशयाः। १७ त्रैवर्गिकास्ते पुरुषा
विमुखा हरिमेधसः। कथायां कथनीयोरुविक्रमस्य मधुद्विषः। १८ श्रीराम जय राम जय जय राम॥

तायां नीत्यन्वयः १५ यदा ब्रह्मोपासकानामपि भेददर्शनाभिमानाभ्यामेवं मावृत्तिः तदा काम्यकर्मिणां किंवक्तव्य[illegible]त्याह त्रिंद मि
न्नाह षड्भिः ये त्विह कर्मस्वासक्तमनसः संतः अप्रतिषिद्धानि काम्यानि नित्यानि च कर्माणि कृत्स्नानि कुर्वन्ति ते अर्यमणो दक्षि
णेन यथा धूममार्गेण पितृलोकं व्रजन्तीति पंचमेनान्वयः मध्ये तन्निंदा १६ ० हरेरिति संसारं मेधा यस्य कथनीया उरवो विक्रमा यस्य
तस्य मधुद्विषः कथायां विमुखाः संतो ये त्रैवर्गिकाः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये चाच्युतस्य कथासुधां हित्वा असतां गाथाः शृण्वंति ते नूनं दैवेन विहिता इत्यन्वयः १९ पितृलोकात्पुनः प्रजामनु पुत्रादिषु प्रजायंते
गर्भाधानादारभ्य श्मशानांताः क्रियाः कुर्वंतः यथा न्यकारिण इत्यर्थः २० कथं प्रजायंते तत्राह ततस्ते पुनरिमं लोकं प्रति पतंति विभ्रंशि भ्रं २
तोदया भोगसाधनं येषां २१ परमेष्ठिनं परमेश्वरं प्रीत्या तस्य गुणा नाश्रयंते या भक्तिस्तया २२ भक्तेन च ज्ञानवैराग्ये स्वत एव भवतः इ
त्याह वासुदेव इति २३ तदेवोपपादयति यदा अस्य भक्तस्य चित्तं भगवद्गुणानुरागेण तस्मिन्नेव निश्चलं सत् इंद्रियवृत्तिभिर्विषय

१०२

नूनं दैवेन विहिता ये चाच्युतकथासुधां हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः १९ दक्षिणेन पथार्यम्णः
पितृलोकं व्रजंति ते प्रजामनु प्रजायंते श्मशानांतक्रियाकृतः २० ततस्ते क्षीणसुकृताः पुनर्लोकमिमं प्र
ति पतंति विवशा देवैः सद्यो विभ्रंशितोदयाः २१ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं तद्गुणाश्रयया भ
क्त्या भजनीयपदांबुजं २२ वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं
२३ यदास्य चित्तमर्थेषु समेष्विंद्रियवृत्तिभिः न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत २४ स तदैवात्मनात्मा
नं निःसंगं समदर्शनं हेयोपादेयरहितमारूढं पदमीक्षते २५ ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान्
दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते २६ एतावानेव योगेन समग्रेणेह योगिनः युज्यतेऽभिमतो ह्यर्थो यदसंग
स्तु कृत्स्नशः २७

मर्थेषु न गृह्णाति २४ तदैवात्मनात्मानं स्वप्रकाशमीक्षते कथंभूतं समं च तद्दर्शनं च ततः कुतः निःसंगं संगाद्वैषम्यं भवति निःसंग
त्वे हेतुः हेयोपादेयरहितं ततः कुतः पदं स्वरूपमित्यारूढं परमानंदोहमिति निश्चयं प्राप्तमित्यर्थः २५ समेष्वर्थेष्वित्युक्तं तदेव साम्यं दर्शय १०२
ति ज्ञानमात्रमेव परं ब्रह्मादिशब्दैः प्रसिद्धं दृश्यादिभिः दृश्यद्रष्टृकरणरूपैः पृथक् प्रतीयते ज्ञानमात्रत्वेन सममेवेत्यर्थः २६ न
नु ज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाधनसाध्येन योगेन प्राप्यते तत्राह एतावानिति युज्यते प्रपंचसंगच्युत प्राप्यते २
म एव योगफलमित्यर्थः २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कथं प्रत्यक्षादिप्रतीतः प्रपंचो व्युदसितुं शक्यते प्रतीतेर्भ्रांतत्वादित्याह ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिधर्मी यस्य तेनार्थरूपेण ज्ञानरूपं निर्गुणं ब्रह्मैव भाति न त्वर्थः पृथगस्तीत्यर्थः २८ अर्थरूपत्वमेवाह महत्त्वदर्शयति यथेति अहंरूपः अहंकारः स च त्रिवृत् त्रिगुणात्मकः पुनश्च भूतरूपेण पंचविधः इंद्रियरूपेणैकादशविधश्च स्वराट् जीवरूपः तस्य जीवस्य वपुरंडं जगच्च यतस्तेभ्यो महदादिभ्यस्तथा अवभाति २९ ननु गर्हितजनैः किमित्येवं न प्रतीयते तत्राह एतदिति ३० उक्तमेवार्थं सुखप्रतिपत्त्यर्थं संक्षेपेणानुवदति इतीति हे गुर्वि पूज्ये ३१ अनेन च ज्ञानयोगेन भगवानेव प्राप्यो यथा भक्तियोगेनेत्याह ज्ञानयो

ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा २८ यथा महानहंरूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरंडं जगद्यतः २९ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः समाहितात्मा निःसंगो विरक्त्या परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्त्वं प्रकृतेः पुरुषस्य च ३१ ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२ यथेंद्रियैः पृथग्द्वारैरर्थो बहुगुणाश्रयः एको नानेयते तद्वद्भगवान् शास्त्रवर्त्मभिः ३३ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

गश्च मन्निष्ठो भक्तिलक्षणः अयोयोगः तयोर्द्वयोरप्येक एवार्थः प्रयोजनं कोसौ भगवच्छब्दलक्षणं ज्ञापको यस्य तदुक्तं गीतासु ते प्राप्नुवंति मामेव सर्वभूतहिते रता इति ३२ ननु ज्ञानयोगस्य आत्मलाभः फलं शास्त्रेणावगम्यते भक्तियोगस्य तु भजनीयेश्वरप्राप्तिः कुतः स्वरूपैकार्थत्वमित्याशंक्य दृष्टांतेनोपपादयति यथा बहूनां रूपरसादीनां गुणानामाश्रयो गुडक्षीरादिः एक एवार्थो मार्गभेदप्रवृत्तैरिंद्रियैर्नाना प्रतीयते चक्षुषा शुक्ल इति रसनेन मधुर इति स्पर्शनेन शीत इत्यादि तथा भगवानेव तत्तद्रूपेणावगम्यते ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ तृ॰ ३ शास्त्रमार्गेणैव प्रपंचयति क्रिययेति त्रिभिः क्रियया पूर्त्तरूपया क्रतुभिर्यागैः मर्शनैर्मीमांसा आत्मेंद्रियजयो निषिद्धवर्ज्जं ३४॥
उभयचिह्नेन सकामनिष्कामलक्षणेन तमेवाह य इति ३५ सकामधर्मप्राप्यं स्वर्गाद्यपि भगवत एव सगुणं स्वरूपमिति भावः एभिर्वर्त्मे
भिः स्वदृक् स्वप्रकाशः ३६ तदेवं ज्ञानयोगमुपसंहृत्य तस्य च भक्तियोगेन समानार्थत्वमुक्त्वा भक्तियोगमुपसंहरति प्रावोचमिति
द्वाभ्यां चतुर्विधं त्रिगुणनिर्गुणभेदेन अंतर्धावति उत्पत्तिनिधनादि करोति ३७ अंगहे मातः ३८ उपदेशानधिकारिणो दर्शयति नै

क्रिययाक्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेंद्रियजयेनापि सन्यासेन च कर्मणां ३४ योगेन विविधांगेन भ
क्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ३५ आत्मतत्वावबोधेन वैराग्येण दृढेन वा ईयते
भगवानेभिः सगुणो निर्गुणः स्वदृक् ३६ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं कालस्य चाव्यक्तगतेर्यो
१०३ ऽन्तर्धावति जंतुषु ३७ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः यास्वंग प्रविशन्नात्मा न वेद गतिमात्मनः ३८॥
नैतत्खलायोपदिशेन्नाविनीताय कर्हिचित् न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ३९ न लोलुपायोप
दिशेन्न गृहारूढचेतसे नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ४० श्रद्दधानाय भक्ताय विनीतायानसू
यवे भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ४१ बहिर्जातविरागाय शांतचित्ताय दीयतां निर्मत्सराय शुचये
यस्याहं प्रेयसां प्रियः ४२ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे
४३ इति श्रीभागवते महापुराणे तृतीयस्कंधे द्वात्रिंशोध्यायः श्रीराम श्रीराम श्रीराम श्रीराम श्री॥

तदिति द्वाभ्यां खलाय परोत्कर्षासहाय स्तब्धाय भिन्नाय दुराचाराय धर्मध्वजाय दंभिकाय ३८ ३९ अधिकारिणमाह श्रद्दधानाये राम
ति द्वाभ्यां ४१ ४२ एतच्छ्रवणकीर्तनस्यापि मत्पदप्राप्तिरेव फलमित्याह य इति अपेरर्थे च कारः सोऽपि मत्पदवीमेति इति निश्चितं १०३
४३ इति तृतीये द्वात्रिंशः ॥ ७ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयस्त्रिंशेतु तस्यैव कपिलस्योपदेशतः ज्ञानभावनतन्मातुर्जीवन्मुक्तिरुदीर्यते विस्रस्तं मोहरूपं पटलमावरणं यस्याः सा तत्त्वान्येव विषयः १॥ स्पतवजठराब्जा
तेनांकिता सिद्धिः सांख्यं ज्ञानं तस्य भूमिस्तं प्रवर्त्तकं १ अथेति वाक्यांतरे अजोपि तव वपुः केवलं दध्यौ न तु दृष्टवान् सच स्वयं साक्षात् तः सन्नानेव
नु ननु तव सर्गादिकर्त्ता कश्चिदस्ति स एवं भूतस्त्वं मया कथं जठरेण धृत इति त्रयाणामन्वयः कथंभूतं वपुः सन्नुक्तो नत्रहेतुः अंतः विश्वस्यसर्गा
सलिले शयानं कीदृशं भूतानि इंद्रियाणि च अर्था शब्दादयः आत्मा च मनः एतन्मयं पंचतत्वात्मकमित्यर्थः कुतः गुणानां प्रवाहो यस्मिन् दिविधत्ते २

मैत्रेय उवाच एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रण
म्य तुष्टाव तत्त्वविषयांकितसिद्धभूमिं १ देवहूतिरुवाच अथाप्यजोंतः सलिले शयानं भूतेंद्रियार्थात्ममयं वपु
स्ते गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं यज्जठराब्जजातः २ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्त
वीर्यः सर्गाद्यनीहोवितथाभिसंधिरात्मेश्वरोतर्क्यसहस्रशक्तिः ३ स त्वं भृतो मे जठरेण नाथ कथं नु यस्यो
दर एतदासीत् विश्वं युगांते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ४ त्वं देहतंत्रः प्रशमाय पाप्मनां नि
देशभाजां च विभो विभूतये यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ५

नु ननु कुतः अशेषस्य कार्यकारणस्य बीजं कारणं २ कथं भूतो भवान् सर्गादि विधत्ते गुणप्रवाहरूपेण विभक्तं वीर्यं शक्तिर्येन सः शक्तिद्वारेण वि
विधत्तेतत्रा धत्ते न साक्षादित्यर्थः यतः अनीहा निः क्रियः तर्हि कथं शक्तिद्वारेणापि सर्गादि विधानं अवितथाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते
हर आत्मनां संज्ञीचानामीश्वरः जीवानां भोगार्थमित्यर्थः ननु कथं विचित्रान् भोगान् एक एव विदध्यात् अतर्क्याः सहस्रमपरिमिताः शक्तयो यस्य
प्र३ ३ किंच प्रलये यस्योदरे एतद्विश्वमासीत् स त्वं मया जठरेण कथं भृतः ननु शिशो मयि किमेतदुच्यते तत्राह वटपत्र इति अंघ्रिं पादांगुष्ठं पिब ध्रि३
तीत्यंघ्रिपानः इत्थमपि शिशुत्वं न हि देवमायाइति भावः ४ अथवा न त्वं मया अपत्यांतरवज्जठरे धृतः किं तु वाराहाद्यवतारवदिच्छयैवाविर्भू
तोसीत्याह त्वं देहतंत्रो देहपरिकरः स्वीकृतमूर्त्तिरसि पाप्मानां दुष्टानां निदेशभाजां आज्ञानुवर्त्तिनां विभूतये समृद्धये आत्मपथोपलब्धये
ज्ञानमार्गप्रदर्शनाय ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न८

अतस्त्वद्दर्शनादहं कृतार्थास्मीति किंमुत्यन्यायेनाह यन्नामधेयस्य श्रवणमनुकीर्त्तनं च तस्मात् क्वचित्कदाचिदपि श्वादनमत्तीति श्वादः यः श्वपचः सो
पि सवनाय सोमयोगाय कल्पते योग्यो भवति अनेन पूज्यत्वं लक्ष्यते ६ तदुपपादयति अहो वतेत्याश्चर्यं यस्य जिह्वाग्रे तव नाम वर्त्तते स श्वपचो
पि अतः अस्माद्देवहेतोर्गरीयान् पूज्यः स्मार्द्धर्त्तेते अत इति चाकृत इत्यत आह त एव तपस्तेपुः कृतवंतः जुहुवुः होमं कृतवंतः सस्नुः तीर्थेषु स्ना
ताः आर्याः त एव सदाचाराः ब्रह्मवेदमनूचुः अधीतवंतः त्वन्नामकीर्त्तने तपआद्यंतर्भूतमतस्ते पुण्यतमा इत्यर्थः यद्वा जन्मांतरे तैस्तपो होमा
दि सर्वं कृतमिति त्वन्नामकीर्त्तनेन महाभाग्यादेव गम्यत इत्यर्थः ७ प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्यं संचिंत्यं वे

यन्नामधेयश्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् श्वादोपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्श
नात् ६ अहो वत श्वपचोतो गरीयान् यज्जिह्वाग्रे वर्त्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणंति
ये ते ७ तं त्वामहं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वतेजसा ध्वस्तगुणप्रवाहं वंदे विष्णुं कपिलं वेद
गर्भं ८ श्रीमैत्रेय उवाच मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे आस्थितेन परां काष्ठामचिरादवरोत्स्यसि
१० श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः येन मामभयं याया मृत्युमृच्छंत्यतद्विदः ११ श्रीमैत्रेय उवा
च इति प्रदर्श्य भगवान् सतीं तामात्मनो गतिं स्वमात्रा ब्रह्मवादिन्या कपिलोनुमतो ययौ १२ सा चापि तनयो
क्तेन योगादेशेन योगयुक् तस्मिन्नाश्रम आपीडे सरस्वत्याः समाहिता १३ अभीक्ष्णावगाहकपिशान् जटिला
न् कुटिलालकान् आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृशं १४ प्रजापतेः कर्दमस्य तपोयोगविजृंभितं
स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि १५

दगर्भं यस्य सः ८ अविक्लवया गंभीरया वाचा ९ नेन वसुसेव्येन सुखं सेव्येन मम या उदितेन आस्थितेन अनुष्ठितेन परां काष्ठां जीवन्मुक्तिं अव
रोत्स्यसि प्राप्स्यसि १० ययायास्यसि अतद्विदः संतमत्तं विद्वांसः ११ अनुमतो १२ सरस्वत्या आपीडपुष्पमुकुटतुल्ये सरस्वत्या परितो वेष्टिते विं
दुसरसि समाहिता बभूव १३ कथंभूता सती समाहिता तदाह अभीक्ष्णं त्रिषवणमवगाहस्नानं तेन कपिशान् पिशंगान् अत एव कुटिलान्
केशान् तथा आत्मानं च देहं चीरधारिणं कृशं च बिभ्रती सती १४ प्रजापतेः कर्दमस्य तपोयोगाभ्यां विजृंभितं मिति शायितं स्वगार्हस्थ्यं हित्वा पुत्र

म३ अनुज्ञातः ३ न२ मुकुटेने ३

१०४

१०४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र गार्हस्थ्ये क्षीरफेननिभाः मृदुः शुभ्राः शय्याः आस्तरणानि भांति हेमघटितानि सितिकाः स्वर्णमयाः परिकराः आसनानि पीठादीनि सुस्पर्शा
न्यास्तरणानि येषु १६ । ७ बहुभिरमरद्रुमैः रम्यं १८ यत्रोद्याने प्रविश्य आत्मानं देवहूतिरिति १९ आखंडलइंद्रः तस्य पत्न्यो योषितः तासाम
पि इक्षितं तं संप्राप्तुमिच्छंतमं गृहं हित्वा तं त्वा अभिमानं त्यक्त्वा २० सुहृद्वियोगस्य दुःसहतामाह वनमिति नष्टे वत्से वत्सला गौरिवाभू
२१ विरहकृतं ध्यानफलमाह निस्पृहा निर्वासना वत्स विदुर २२ ततः स्वसुतः कपिलो यदाह तद्भागवतोरूपं ध्यायती तदा आत्मा

पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः आसनानि च हैमानि सुस्पर्शास्तरणानि च १६ स्वच्छस्फटिककुड्ये
षु महामारकतेषु च रत्नप्रदीपा आभांति ललनारत्नसंयुताः १७ गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः कूजद्वि २२
हंगमिथुनं गायन्मत्तमधुव्रतं १८ यत्र प्रविष्टमात्मानं विबुधानुचरा जगुः वाप्यामुत्पलगंधिन्यां कर्दमेनोपल
लितं १९ हित्वा तदीप्सिततममप्याखंडलयोषितां किंचिच्चकार वदनं पुत्रविश्लेषणातुरा २० वनं प्रव्रजिते प
त्याव पत्यविरहातुरा ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला २१ तमेव ध्यायती देवमपत्यं कपिलं हरिं बभू
वाचिरतो वत्स निस्पृहा तादृशे गृहे २२ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं सुतः प्रसन्नवदनं समस्तव्य
स्तचिंतया २३ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना २४

नं च विश्वतोमुखं सर्वगतं ध्यायती ब्रह्मण्येवास्थितमनिर्वचनमेव तिष्ठति सर्वस्यैवानुषंगः केन ध्यायती विशुद्धेन आत्मना मनसा २३ विशु
मान्या द्धीकरणमाह भक्तिप्रवाहरूपेण योगेन वैराग्येण च युक्तानुष्ठानेन जातं यत् युक्तानुष्ठानं च गीतासूक्तं युक्ताहारविहारस्य यु
क्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहेति ब्रह्महेतुना ब्रह्मत्वापादकेन २४ तु

ज्ञानेनेनच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०तृ० विश्वतोमुखत्वेहेतुः स्वानुभूत्या स्वरूपप्रकाशेन तिरोभूतं मायागुणे विशेषणं परिच्छेदो यस्य कथंभूतेब्रह्मणि आत्मानं जीवानां संश्र
ये भगवति तस्याः जीवन्मुक्तिमाह सोर्द्धैस्त्रिभिः २५ तदा च निवृत्ता जीवापत्तिर्जीवभावो यस्याः तस्या भावस्तत्वं तस्मात् विगत
क्लेशा प्राप्तनिर्वृतिश्चसती आत्मानं देहं न सस्मारेत्युत्तरेणान्वयः २६ ननु तथापि गुणानां विद्यमानत्वात्कथमस्मरणं तत्राह नि

विशुद्धेन तदात्मानमात्मना विश्वतोमुखं स्वानुभूत्या तिरोभूतमायागुणविशेषणं २५ ब्रह्मण्य
वस्थितमतिर्भगवत्यात्मसंश्रये निवृत्तिजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढस
माधित्वात्परावृत्तगुणभ्रमा नसस्मार तदात्मानं स्वप्नेदृष्टमिवोत्थितः २७ तद्देहः परतः पोषोऽप्य
क्लेशः स्वाध्यसंभावात् वभौ मलैरवच्छन्नः सधूम इव पावकः २८ स्वांगं तपोयोगमयं मुक्तकेशं ग
तांवरं दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः २९ एवं सा कपिलोक्तेन मार्गेणाचिरतः परं आ-
त्मानं ब्रह्मनिर्वाणं भगवंतमवाप ह ३० तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं नाम्ना सिद्धपदं
यत्र सा संसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् स्रोतसां प्रवरा सौम्य सिद्धि
दा सिद्धसेविता ३२

१०५

त्यारूढोत्यन्तप्रतिष्ठः समाधिर्यस्याः तस्य भावस्तत्वं तस्मात्परावृत्तः शांतो गुणनिमित्तो भ्रमो यस्याः सा २७ परतः पराभिरेव कर्दमसृष्ट
विद्याधरीभिः पोषः पोषणं यस्य आधिर्मनोग्लानिः तदसंभावात् क्लेशः मलैरवच्छन्नोपि वभौ २८ दैवगुप्तं श्वापदादिकर्मपालितं
२९ निर्वाणं नित्यमुक्तं ३० हे वीर विदुर ३१ हे सौम्य तस्यास्तन्मर्त्यं शरीरं सरिदभूत् कथंभूतं योगेन विधुता विलीना मार्त्या दैहिका
धातुमला यस्य ३२ राम १०५

उपेयुषीप्रसादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰टी॰

कपिलोपि यथा पित्रुक्तं तथा देवहूतिं प्रपञ्च्य पितिकपिलोपीति त्रिभिः समनुज्ञाप्य अनुज्ञां संप्रार्थ्य ३३ दत्तमर्हणं अर्घं निकेतनं च यस्मै ३४ ॥
उपशांत्यर्थं समाहितः आस्ते ३५ प्रकरणार्थमुपसंहरति एतदिति गवत्वया ३६ एतच्छ्रवणकीर्त्तनफलमाह यइति सुपर्णके-

कपिलोपि महायोगी भगवान्पितुराश्रमात् मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ ३३
सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ३४
१०६ आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः त्रयाणामपि लोकानामुपशांत्यै समाहितः ३५
एतन्निगदितं तात यत्पृष्टोहं तवानघ कपिलस्य च संवादो देवहूत्याश्च पावनः ३६
य इदमनुशृणोति योभिधत्ते कपिलमुनेर्मतमात्मयोगगुह्यं भगवति कृतधीः सुपर्णकेता-
वुपलभते भगवत्पदारविंदं ३७ इतिश्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये
त्रयस्त्रिंशतमोध्यायः ३३

तौ गरुडध्वजे उपलभते प्राप्नोति ३७ इति श्रीभागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां तृतीयस्कंधे त्रिश राम
श्रीराम जयराम जय जय राम ॥ श्री श्रीत्रयस्त्रिंशतमोध्यायः ३३ श्रीराम जयराम जय जय राम श्रीराम श्रीराम श्री॥ १०६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीयस्कंदसमाप्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतचतुर्थस्कंध
आरभ१ ५७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च०

श्रीगणेशायनमः श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय ॥ एकेकत्रिं
शताध्यायैर्विसर्गस्कंधेतुर्येत्र विसर्गस्त्रीश्वराधीनैर्ब्रह्मसन्तानैर्मन्वादिभिः कृतः १ तत्रतु प्रथमेध्याये मनुकन्यान्वयाः पृथक् व
र्ण्यंते यत्र यज्ञादिमूर्तिभिः प्रभवो हरेः मनुकन्यान्वयं विस्तरेण वक्तुमाह मनोस्त्विति चकारात् देवहूतेर्नुशब्दा
दन्यतोः पितुर्लाभः सुचितस्तादृशोयितुमाह। पुत्रिकाधर्ममाश्रित्येति अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां

मैत्रेयउवाच मनोस्तुशतरूपायांतिस्रः कन्याश्चजज्ञिरे आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुताः १
आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः २ प्रजापतिः
सभगवान्रुचिस्तस्यामजीजनत् मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना ३ यस्तयोःपुरुषः
साक्षाद्विष्णुर्यज्ञस्वरूपधृक् यास्त्रीसादक्षिणाभूतेरंशभूतानपायिनी ४ आनिन्येस्वगृ
हंपुत्र्याःपुत्रंविततरोचिषं स्वायंभुवोमुदायुक्तोरुचिर्जग्राहदक्षिणां ५ तांकामयानांभगवा
नुवाहयजुषांपतिः तुष्टायांतोषमापन्नोजनयद्द्वादशात्मजान् ६ श्रीराम श्रीराम श्रीराम

तां अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति भाषाबंधेन कन्यादानं पुत्रिकाधर्मः स च भ्रातृकायां कन्यायां पु राम
त्रार्थिना एव प्रसिद्धस्तथापि पुत्रबाहुल्यकामस्तथा कृतवानित्याह भ्रातृमतीमपि २ मिथुनं पुरुषं स्त्रियं चा जि २ १
समाधिना ईश्वरध्यानेन ३ भूतेर्लक्ष्म्या अंशभूता अनपायिनी विवाहेन विरुद्ध इति भावः ४ यजुषां यज्ञानां मंत्रा
णां वा पतिर्विष्णुः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विषट् द्वादश। ७ प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह तुषिता इति द्वाभ्यां मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः।
ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते इति वक्ष्यति तत्र स्वायंभुवो मनुः तुषिता देवाः मरी...प्रमुखाः सप्तर्षयः।
यज्ञो हरेरवतारः स एव सुरगणेश्वरः इंद्रः ८ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तदेवं यज्ञस्य दो
७। ष्णा षड्विधं तयोः पुत्रपौत्रनप्तॄणां वंशैरनुवृत्तं व्याप्तं पालितं मन्वंतरं ९ श्रुतप्रायं बाहुल्येन श्रुतं तत्

तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः। इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ७
मनुपुत्रौ २ तुषिता नाम ते देवा आसन् स्वायंभुवांतरे मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ८ प्रियव्रतोत्ता
नपादौ महौजसौ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदंतरं ९ देवहूतिमदात्तात कर्दमायात्मजां मनुः त
त्संबंधि श्रुतप्रायं भवता गदतो मम १० दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः प्रायच्छद्यत्कृतः स
र्गस्त्रिलोक्यां विततो महान् ११ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः तासां प्रसूतिप्रसवं प्रोच्य
मानं निबोध मे १२ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा कश्यपं पूर्णिमानं च ययोरापूरितं जग
त् १३ पूर्णिमासूत विरजं विश्वगं च परंतप देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः १४ अत्रेः प
त्न्यनसूयात्रीन् जज्ञे सुयशसः सुतान् दत्तं दुर्वाससं सोममात्मेशब्रह्मसंभवान् १५ विदुर उवाच
त्य अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतकारिणः किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो १६

सांशानामश्रुतत्वात्तद्ग्रहणं ९। ११ प्रसूतिप्रसवं पुत्रपौत्रादिभिर्विस्तारं १२ ययोर्वंशैरिति १३ कश्यपस्य वंशं षष्ठे वक्ष्य नापू
ति द्वितीयस्य वंशमाह पूर्णिमेति देवकुल्यां नाम कन्यां चाहरेः पादक्षालनात् जन्मांतरे या दिवः सरिद्गंगा १४ आत्मेशब्रह्म संभवान् विष्णुरुद्रब्रह्मणामंशैः संभवान् १५ किंचिदिति १६
अमूर्त अत एव देवकुल्या देवकुलयोग्यतां

भा०च० अक्षं नाम कुलाद्रिं तपसि स्थितः सन् १७ तस्मिन् कुलाद्रौ प्रसूनानां स्तवकाः येषु पलाशाशोकेषु तेषां काननेन निर्विंध्यानाम मुनेः २
नद्यास्तस्याः स्रवद्भिर्वाभिः रुद्घुष्टेनादित्ते १८ प्राणायामाख्याएधः संदीपकाः यस्य तेन मुक्तो निर्गतेनाग्निना तप्यमानं समी
स: ३ क्ष्य तदाश्रमपदं ययुरित्यन्वयः १९ २१ अप्सरः प्रमुखैः वितायमानं विस्तार्यमाणं यशो येषां ते २२ तेषां प्रादुर्भा
वः प्राकट्यं तस्य संयोगः संनिधिः तेन विद्योतितं मनो यस्य उत्तिष्ठन् उत्कर्षेण तिष्ठन् २३ अर्हणं पुष्पादिकं

मैत्रेय उवाच ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदांवरः सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः १७ त
स्मिन्प्रसूनस्तवकपलाशाशोककानने वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः १८ प्राणायामेन संय
म्य मनो वर्षशतं मुनिः अतिष्ठदेकपादेन निर्द्वंद्वोऽनिलभोजनः १९ शरणं तं प्रपद्येऽहं य एव जगदीश्वरः
प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् २० तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना निर्गतेन मुने
२ र्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः वितायमानयशसस्तदाश्रमपदं
ययुः २२ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् २३ प्रणम्य
दंडवद्भूमावुपतस्थेऽर्हणांजलिः वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान् २४ कृपावलोकेन सै: ३
हसद्वदनेनोपलंभितान् तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युंजन्नस्ता
वीत्संहतांजलिः श्लक्ष्णया सूक्तया वाचा सर्वलोकगरीयसः २६ श्रीराम श्रीराम श्रीरामश्री

अंजलिर्यस्य उपतस्थे पूजयामास वृषाद्यारूढान् स्वैः स्वैश्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः कृपयावलो राम
कायस्मिन् हसद्वदनं चेतेन उपलंभितान् प्रसन्नत्वेन ज्ञापितान् तेषां रोचिषा दीप्त्या २५ श्लक्ष्णया मधु २
रया सूक्तया गंभीरार्थया २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुयुगं कल्पे कल्पे विभज्य गृहीतो देहो यैः ते प्रसिद्धा ब्रह्मविष्णुगिरिशाः । यूयं वः युष्मान् प्रणतोस्मि तेभ्यः सकाशादेक
एवस्मि मयात्रोपहूतः । शरणं प्रपद्येतमित्येकस्यैव निर्दिष्टत्वात्स च युष्माकं कइति युष्माभिरेव कथ्यतामित्यर्थः । २७ अस्य
विश्वंसृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ४२ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सू
त्रेण ससर्जिथाध्वरं त्वयैव लोकेवसिताश्च सेतवो यान् ब्राह्मणाः श्रद्दधते धृतव्रताः ४३
त्वं कर्मणां मंगलमंगलानां कर्तुः स्मलोके तनुषे स्वः परं च अमंगलानां च तमिस्रमुल्ब
णं विपर्ययः केन तदेव कस्यचित् ४४ नवै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिप
श्यतां तव भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेणरोषोऽभिभवेद्यथा पशुं ४५॥ श्री॥

सृष्टवानसि यद्वाहे धर्मार्थदुघा धर्माद्यभिपत्तये तत्प्राप्तये दक्षेण सूत्रेण निमित्तेनासृजः त्वयैव वर्णाश्रममर्यादाश्च
अवसिताः निबद्धाः निर्णीता इति वा श्रद्दधते श्रद्धया अनुतिष्ठंति ४३ सर्वकर्मफलदाताऽपि त्वमेवेत्याह हे मंगल
मंगलानां शुभानां कर्मणां कर्तुः स्वर्गं परं मोक्षं वा तनुषे अमंगलानामशुभानां कर्मणां कर्तुश्च तामिस्रं नरकं तनु
षे तत्र केनहेतुना तदेव तस्मिन्नेव कस्यचिद्विपर्ययो भवति ४४ तत्कोपोऽत्र हेतुरित्यसंभावितमिति किंतु पत्यायिना
न्या

नवम्यां नाशाः भिभवत्तासिवाहि
पद्धति क्षपाणाभिभवतितादि ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च० अतः यत पृथग्धियः भेददृशः अतः कर्मण्येव दृष्टिर्येषां दुष्ट आशयो येषां परेषामुदयेन संपदा अर्पिता हृदि रुक् येषां
अरुंतुदा मर्मभेत्तारः दैवेनैव वधो येषां तान् भवद्विधः निरूपमः साधुर्मावधीत् न हन्यात् ४६ प्रस्तुतसाधूनां
कृतमालोक्यानुग्रहमेव कर्तुमर्हसीत्याह द्वाभ्यां यस्मिन्निति यदा काले स्पृष्टधियो मोहितचित्ताः पृथग्दृशो भवं
ति तत्रापराधे साधवो हि अनुकंपया नंतरमेव परदुःखासहिष्णुतया चित्तप्रकंपेन कृपां कुर्वंति न तु क्रमं

पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशं परान्दुरुक्तैर्वितुदंत्यरुंतु
दास्तान्मावधीद्दैववधान्भवद्विधः ४६ यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्ट
धियः पृथग्दृशः कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमं ४७ भवां
१७ स्तु पुंसः परमस्य मायया दुरंतयाऽस्पृष्टमतिः समस्तदृक् तयाहतात्मस्वनुकर्मचेतः
स्वनुग्रहं कर्तुमिहार्हसि प्रभो ४८ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयासमाप्तस्य मनो प्र
जापतेः न यत्र भागं तव भागिनो ददुः कुयाज्विनो येन मखो निनीयते ४९ जीवताद्यज
मानोयं प्रपद्येताक्षिणी भगः भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् देवानां भग्नगा
त्राणामृत्विजां चायुधाश्मभिः भवतानुगृहीतानामाशु मन्योस्त्वनातुरं ५१ श्रीराम

वा १ कुतः दैवबलात् कृते धर्मे संभवेदेवमेवंभूतं कोपराधस्तेषामिति मत्वा हननं न कुर्वंतीत्यर्थः ४७ भवांस्तु अस्पृष्टम न १ राम ९७
तिः अतः समस्तदृक् सर्वज्ञः तया मायया हत आत्मा येषां तेषु इह अपराधे अनुग्रहं कर्तुमर्हसि ४८ एवं समान्येनो
क्त्वा प्रकृतमाह कुर्विति त्रिभिः त्वया हतस्य अत एवासमाप्तस्य प्रजापतेरध्वरस्य हे मनो यत्राध्वरे कुयाज्ञिकाः
तत १ भागिनोपि भागं न ददुः भागार्हत्वमाह येषां यज्ञो मखो निनीयते फलं प्राप्यते ४९ ५० हे मन्यो आनातुरमारोग्यमस्तु ५१
त्वे
अतएवकर्मानुगतयाचित्तेषु २

भागश्चनवास्तित्याह एष इति हे रुद्र यावदित्यर्थेपदित्यव्ययं यज्ञोक्तेनयावानुच्छिष्टः अवशिष्टोर्थः तावानेषत्वभागोस्तु हे ग १
रुद्रैतेभागानाध्ययेज्ञः कल्पतांसंपद्यतां ५२ चतुर्थषष्ठः सप्तमेविष्णुरुद्भुतः स्तोत्राद्दक्षभवादिभिः यज्ञंप्रवर्त्तया
मासदक्षेणेतिनिरूप्यते १ अजेनयानुनीतः प्रार्थितोभवस्तेनाभिहितं हेमहाबाहो विदुर १ अघमपराध २ स्वाप
राधंदीपहत्यानुगत्क्लान्ति दग्धशीर्षयस्यतस्यप्रजापतेः अजस्यमुखेनयास्मिनुतेनथाभूते शिरोस्तोवर्हिषः संबंधि
तंभागंमित्रनाम्नोदेवस्य २ प्रकर्षेणक्षतानि भग्ना

एषतेरुद्रभागोस्तुयदुच्छिष्टोध्वरस्यवै यज्ञस्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ५२ इतिश्रीभा
३५ गवतेमहापुराणेचतुर्थस्कंधेरुद्रसांत्वनंनामषष्ठोध्यायः श्रीमैत्रेयउवाच इत्यजेनानुनीतेन
भवेनपरितुष्यता अभ्यधायिमहाबाहोप्रहस्यश्रूयतामिति १ महादेवउवाच नाघंप्रजेशबाला ति २
नांवर्णयेनानुचिंतये देवमायाभिभूतानांदंडस्तत्रधृतोमया २ प्रजापतेर्दग्धशीर्ष्णो भवत्वज
मुखंशिरः मित्रस्यचक्षुषेक्षेत भागंस्वंबर्हिषोभगः ३ पूषातुयजमानस्यदद्भिर्जक्षतुपिष्ट
भुक् देवाःप्रकृतसर्वांगा येमउच्छेषणंददुः ४ बाहुभ्यामश्विनोःपूष्णोहस्ताभ्यांकृतबाहवः
भवंत्वध्वर्यवश्चान्येबस्तश्मश्रुर्भृगुर्भवेत् ५ मैत्रेयउवाच तदासर्वाणिभूतानिश्रुत्वामी
ढुष्टमोदितं परितुष्टात्मभिस्तातसाधुसाध्वित्यथाब्रुवन् ६ ततोमीढ्वांसमामंत्र्यशुनासीराः
३१ सहर्षिभिः भूयस्तेदेवयजनंमीढुद्वेधसाययुः ७

तंभागंमित्रनाम्नोदेवस्य ३ प्रकर्षेणक्षतानिभग्ना ति
न्यंगानियेषांतेभवंतु उच्छेषणंयज्ञावशिष्टं ४ येषांत्वंगानिविनष्टानितेतुअश्विनोर्बाहुभ्यांकृतबाहवः पूष्णोहस्ताभ्यांकृ
तहस्ताश्चभवंतु अध्वर्यवः अन्येचऋत्विजः बस्तस्यछागस्यश्मश्रूणिश्मश्रूणियस्य ५ मीढुष्टमः शिवः तेनोक्तं परितुष्टैश्चि
त्तैः ६ मीढ्वांसंशिवंत्वयागत्यसर्वंकार्यमित्यामंत्र्यसंप्रार्थ्य शुनासीरादेवाः सहमीढुषावेधसाचवर्त्तमानाः समीढु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च०

कार्त्स्न्येन तत्तत्त्वा विद्यादिसाधारण्यं विधाय ८ एवं पूर्वं वृषध्वजद्वेषेण कलिलः कलुषीकृत आत्मा यस्य सः तदा
शरत्कालीनो ह्रद इवामलो भवत् १० ११ यद्यपि यद्यपि विप्रलब्धः पराभूतो मया भवान् तथापि त्वयादंडो भ
तः शिक्षां कृतानतूपेक्षितोस्मि युक्तमेवैतदित्याह ब्रह्मबंधुषु च ब्राह्मणाभासेष्वपि तुभ्यं तव हरेश्चेति वांयु
वयोरवज्ञा उपेक्षा नास्ति १२ तत्र हेतुमाह विद्येति ब्रह्मो भूत्वा त्वमस्राक् असृजः किमर्थमात्मतत्त्वमवि

विधाय कार्त्स्न्येन वक्तुमित्याह भगवान् भवः संदधुः कस्य कायेन सवनीयपशोः शिरः ८ संधीय
मानेशिरसि दक्षो रुद्राभिवीक्षितः सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडं एवं तदा वृषध्वज
द्वेषकलिलात्मा प्रजापतिः शिवावलोकादभवच्छरद्ध्रद इवामलः १० भवस्तवाय कृतधी
र्नाशक्नोदनुरागतः औत्कंठ्याद्बाष्पकलया संपरेतां स्मरन् ११ कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलि
तः सुधीः शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः १२ दक्ष उवाच भूयाननुग्रह अहो भवता
कृतो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव
धृतव्रतेषु १३ विद्यातपोव्रतधरान्मुखतः स्म विप्रान् ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक् तद्ब्रा
ह्मणान् परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः १४ योसौ मयाविदित
तत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां अर्वाक्पतंतमर्हत्तमनिंदयापाद्दृष्ट्या
र्द्रया स भगवान् स्वकृतेन तुष्येत् १५

तुं यद्वा ब्रह्म वेदं आत्मतत्त्वं च अवितुं संप्रदायप्रवर्तनेन रक्षयितुमित्यर्थः तत्तस्मात् हे परम उत्कृष्ट। १४ अत्र च प्र
त्युपकारो नास्तीत्याह योसाविति अविदितं तत्त्वं दृशा अप्राप्ततत्त्वज्ञानेन तद्विगणय्य विस्मृत्य अर्हत्तमस्य निंदया
अर्वाग्धः पतंतं मां मया पातुं रक्षितवान् स्वकृतेनैव परानुग्रहेणैव तुष्येत् भया प्रतिकर्तुं शक्यमित्यर्थः १५

तांसुतां ४

१८

यामहं १

राम
१८

दे न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुमंत्रितोऽनुज्ञातः उपाध्यायसहितैः ऋत्विगादिभिः अनुवर्तयामास १६ वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्ध्यर्थमि तिरस्कृतत्र्
त्यर्थं ११ उपात्तहविषा अध्वर्युणा सह विशुद्ध्या युधाद ध्यो हे विशांपते विदुर १८ स्वया प्रभया तेषां तेजो मुष्णन् उपानी
२ । ततः समीपं प्रापितः स्तोत्रेण हृद्यार्थं तं वाजोपक्षोतहृतात् हृद्यार्थं तेरे पक्षा वितिरस्कृतो १९ तमेवानुवर्णयंति श्यामेति द्वा
भ्यां हिरण्यरशनायस्य निवस्त्रं लक्ष्यंते अर्कतुल्येन किरीटेन जुष्टः नीलालकाएव भ्रमरास्तैर्मंडितं कुंडलयुक्त

मैत्रेय उवाच क्षमाप्येवं समीढ्वांसं ब्रह्मणा चानुमंत्रितः कर्मसंतानयामास सोपाध्यायर्त्विगग्निभिः १६
यथा २ वैष्णवं यज्ञसंतत्यै त्रिकपालं द्विजोत्तमाः पुरोडाशं निरवपन् वीरसंसर्गशुद्धये १७ अध्वर्युणात्तहविषा
यजमानो विशांपते धिया विशुद्धया दध्यौ तथा प्रादुरभूद्धरिः १८ तदा स्वप्रभया तेषां द्योतयन्त्या दिशो
दश मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना १९ श्यामो हिरण्यरशनोऽर्ककिरीटजुष्टो नी
२७ लालकभ्रमरमंडितकुंडलास्यः शंखाब्जचक्रशरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः
२० वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वं पार्श्वभ्रमद्व्यजनचा
मरराजहंसः श्वेतातपत्रशशिनोपरि रज्यमानः २१ तमुपागतमालक्ष्य सर्वे सुरगणादयः प्रणे
मुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः २२ तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः मूर्ध्ना धृतांजलि
पुटा उपतस्थुरधोक्षजं २३
८
मास्यं यस्य केशवादिभिरायुधैर्भक्तरक्षार्थं व्यग्रैर्हिरण्मयैर्भुजैः पुष्पितः कर्णिकार इव शोभमानः भुजानां हिरण्मयत्वे रोहा १
केयूरकंकणमुद्रिकाद्यलंकारैः २० वक्षसि अधिश्रिता वधूर्लक्ष्मीर्यस्य सः उदारसावलोकप्रतापः कलया लेशे
न पार्श्वे उभयतो भ्रमती व्यजनचामरे चामरव्यजनेनाएव राजहंसौ यस्मिन् सः रज्यमानः शोभातिशयं नीयमानः २१
ब्रह्मेंद्रत्र्यक्षनायकामुख्याः प्रांते २२ हतरुचः तिरस्कृतप्रभाः सन्नजिह्वा गद्गदवाचः ससाध्वसाः तन्महिम्नाशु

३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च यस्यमहिमहिमानंप्रतितु अर्वागेववृत्तिर्येषांतेःपियथामतिगृणंतिस्म अस्तावनु स्मः प्रकरि कृतोऽनुग्रहार्थं विग्र
होयेनतं येह्यतेषां अर्वाक्त्वे निविहेतुः तेनु यस्य महिमाविभूतिमात्ररूपा इत्यर्थः २४ ततस्तावत् दक्षस्तौति प्रकारमाह
दक्षइति गृहीतमर्हणसादनोत्तमंयेनतं उत्तमपात्रे आसनमर्हणेषु समर्पितेषु प्रीत्या साहेणं पात्रं मेवयेन स्वय
गृहीतमित्यर्थः यद्वा कथं प्रपेदे गृहीतमर्हणसादनोत्तमंयथाभवति तथा गृहीत्वा प्रपेद इत्यर्थः गृहीत्वेति
पाठस्तुसुगमः गृणनुस्तावनु प्रपेदे शरणंजगाम दक्षस्यात्विकुसदस्यर्त्विग्भृगुब्रह्मेंद्रयोषितः अपयश्रुतथा
सिद्धायजमानीच लोकपाः योगिब्रह्माग्निदेवश्च स्तावनिजगदीश्वरं तथागंधर्वविद्याधरब्राह्मणश्चाष्टधा इ मतः २५ भा।

अप्यर्वाक्कृत्तयोयस्यमहित्वात्मभुवादयः यथामतिगृणंतिस्मकृतानुग्रहविग्रहं २४ दक्षोगृहीता तु।
हणसाद नोत्तमंयज्ञेश्वरंविश्वसृजांपरंगुरुं सुनंदनंदाद्यनुगैर्वृतंमुदागृणन्प्रपेदेप्रयतः
१९ कृतांजलिः २५ दक्षउवाच शुद्धंस्वधाम्न्युपरताखिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्य
मायां तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामास्तेभवानपरिशुद्धइवात्मतंत्रः २६

वलमा० ३। ननुसक्षात्परमेश्वरएवरुद्रः तस्यब्रह्मपुत्रत्वेन अर्जुकारमात्रेहंतकिमिति त्वया भेद दृष्ट्यासोऽवज्ञात इ
तिमांभगवानुआक्षिप्स्यतीत्याशंक्यप्राच्युतस्वरूपस्यजीवधर्मनाद्वांगेवविवसंगच्छतनान्यस्येत्याह शुद्धमिति
ननर् २ स्वधाम्निस्वस्वरूपेतिष्ठन् शुद्धे चिन्मात्रे चैतन्यघनः शुद्धत्वेहेतुः परतानित्यनीवृत्ताअखिलाबुध्यवस्थायस्मा राम
त् अतः एकभेद शून्यमत एवअभयं द्वितीयाद्वैभयंभवतीतिश्रुतेः जीवस्यापिवस्तुतएवंभूतत्वात्तद्व्यत्व्यस्य १९
एयोर्थमुक्तेमायांप्रतिषिध्य अभिभूयस्वतंत्रएवसनुतयामायया पुरुषत्वंमनुष्यनाथमुपेत्यतस्यांमायायां
तिष्ठन् अपरिशुद्धइवरागादिमानिवास्ते रामाद्यस्मोद्यवतारितथाप्रतीयते भवानित्यर्थः अन्येत्वविघोषा
धयामायाभिभूताः संसरंति आतस्तमेवशरणनरुद्राद यइतिभावः अतएवंमामेद दृष्टिं भगवानुवारयिष्यति
अहंब्रह्मा चसर्वश्च जगतः कारणंपरमित्यादिना २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋत्विजोपि स्वस्यापराधं परिहरंतः स्तुवंति भो अस्वंनं जनतु पाधिमलशून्य यद्यपि त्वमेव रुद्रादिदेवतारूपः तथापि नेदृशी
श्रा १ अस्यैपानुकर्मण्येव दुराग्रहधियः संतस्त्वत्तत्त्वं न विद्मः किंतु धर्मस्यापूर्वस्योपलक्षणभूतं निष्ठत्तत्त्वयोप्रतिपाद्य वी ३
कीदृशं १ मध्वराख्यं तत्त्वरूपमस्माभिर्ज्ञातं यदर्थं यस्य सिद्ध्ये अधिदैवं देवताधिकारेण अदोव्यवस्था अपूर्वव्यवस्था अत्र इयमेव
देवतानां नित्यत्वेव भूतानियमा इत्यर्थः यद्वा व्यवस्था इत्याख्यातं अडागमाद्यभाव आर्षः यदर्थं अदद्दं इंद्राद्याधिदेव
पविशेषणाख्यितवानसीत्यर्थः २७ सदस्यास्तु निरीश्वरे पि दक्षाध्वरे धनलोभेन स्वप्रवृत्तिमनुचिंत्यानुतप्ता विरक्ति
माशाशानाः स्तुवंति हे शरणद अश्रयप्रद उत्पत्य ध्वनि संसारमार्गवर्त्तमानो अज्ञानां सार्थः समूहस्ते पादौ कः त्व

ऋत्विज ऊचुः तत्त्वं न ते वयमनंजन रुद्रशापात् कर्मण्यवग्रहधियो भगवन् विदामः धर्मोपलक्ष
णमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदोव्यवस्थाः २७ सदस्या ऊचुः उत्पत्त्यध्वन्यशरण उ
रुक्लेशदुर्गेंतकोग्रव्यालान्विष्टे विषयमृगतृष्यात्मगेहोरुभारः द्वंद्वश्वभ्रे खलमृगभये शोक
दावे ज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः २८ रुद्र उवाच तव वरद वरांघ्रावा
शिषाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये यदि रचितधियं माविद्यलोकोपविद्धं
जपति न गणये तत्त्वत्परानुग्रहेण २९

सादरूपं निवासं कदा यास्यति अशरणे विश्रामस्थानशून्ये उरुक्लेशा एव दुर्गमस्थानानि यस्मिन् अंतकोग्रो व्यालस्तेना
पत्स्मिन् न्विष्टे लक्षीकृते विषयरूपा मृगतृष्णिका यस्मिन् आत्माहंकारास्पदं शरीरं ममत्वास्पदं गेहं च ते एव उरुभारो यस्य सः
द्वंद्वानि सुखदुःखादीनि एव श्वभ्राणि गर्त्ता यस्मिन् खला एव मृगव्याघ्रादयस्तेभ्यो भयं यस्मिन् शोक एव दावाग्निर्यस्मिन् ॥
कामेनोपसृष्टः पीडितः २८ श्रीरुद्रस्तु पूर्वं मम निंदां दुःसहामसौ इदानीं तु तां न गणयामीत्याह तवेति आशिषा कामेन
असक्तैर्निष्कामैः रचितधियं अभिनिवेशितचित्तं अविद्यविद्याहीनो लोकः यदि अपविद्धं जपति आचारभ्रष्टं जल्पति त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत एव असतः मायामयाद्व्यतिरिक्तोसि त्वं ४

भा०च० नः भृगुरुक्तः स्वभावतस्तत्वज्ञानहीना जीवाः अतो ज्ञानकृतं मम दुः श्रेष्टितं क्षमस्वेत्याह यन्माययेति आत्मन्नात्मनि श्रि
तं अनुगतं तव तत्वं न विदंति प्रणतानामात्मा बंधुश्च ३० ब्रह्मादयो न विदंतीति भृगुणोक्तेन ददृ सहमानो ब्रह्मा
तत्वज्ञानमाविष्कुर्वन्निवाह नैतदिति पदार्थभेदग्राहकैरिंद्रियैः गुणस्पंद इंद्रियस्य यद्वा ज्ञानार्थयोः कारणस्य" र्थः
स त्वाहिः ३१ इंद्रस्त्वा इंद्रियविषयः सर्वोऽपि मिथ्येति ब्रह्मणोक्तमसहमान आह इदं तवैव पुरुपपन्नमेव न तु प्रपंचवत् टपि१

भृगुरुवाच यन्मायया गहनयापहृतात्मबोधाः ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः ना
त्मन्श्रितं तव विदंत्यधुनापि तत्वं सोयं प्रसीदतु भवान्प्रणतात्मबंधुः ३० ब्रह्मोवाच"
नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः पुरुषो यावदीक्षेत् ज्ञानस्य चार्थस्य गुणस्य चा
श्रयो मायामयाद्व्यतिरिक्तो यतस्त्वं ३१ इंद्र उवाच इदमप्यच्युत विश्वभावनं वपुरानं
२० दकरं मनोदृशां सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ३२ पत्न्य ऊचुः"
यज्ञोयं तव यजनाय केन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात् तं नस्त्वं शवशयना
भशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि" ३३ श्रीराम श्रीराम श्रीराम श्रीराम"

वदनिर्वचनीयतयाऽनुपपन्नं सुराणां विद्विषः क्षपयंतीति तथोक्तैर्भुजदंडैरुपलक्षितं ३२ आर्विजो पत्न्यस्ता राम
वेति यज्ञोऽयं तव यजनाय त्वामुद्दिश्य केन ब्रह्मणा पूर्वं सृष्टः हे यज्ञात्मन् तं नोऽयं यज्ञं नलिनकांत्या ह्युग्गानुत्रेण पुनीहि २०
श्मशानं१ पवित्रं कुरु कथंभूतं यज्ञं शवाः शेरते यस्मिन्निति शवशयनं तद्धूहो भा प्रतीतिर्यस्य स चासौ शांतमेधश्च उपर
तोत्सवश्च मेधशब्देन पशुहिंसायुक्तस्वोत्सवो लक्ष्यते शवमुदकं तत्र शेते इति तथा पद्मं तन्नाभेति संबोधनं वा ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋषयस्त्वा कर्माण्यनुतिष्ठन्तस्तत्तुष्ट्येन तत्फलेन प्रयुज्यते भगवति तु न द्भावमाल्लक्ष्य विस्मितास्त्वावेति अनन्वितं अ
वर्द्धमानं यद्यस्मात् आत्मना स्वयं कर्माचरसि अनुतिष्ठसि न तु उपसे लिप्यसे यतः अत्र अन्ये विभूतये संपदे ईश्वरी ई १
लक्ष्मीमुपसेदुः भेजुः यद्वा यत इति सार्वविभक्तिकस्तसिः यामित्यर्थः भवांस्तु स्वयमेवानुवर्त्तमानां तां न मन्यते
य २ नाद्रियते ३४ सिद्धास्त्वत्कथासुखमभिनंदन्तः स्तुवंति अयं नो मनोगजः त्वत्कथैव मृष्टं शुद्धं पीयूषं तन्मयी
या नदी तस्यां अवगाढः प्रविष्टो दावाग्नितुल्यं संसारतापं न संस्मरति स्म न च ततो निर्गच्छति ब्रह्मसंपन्नवत् ब्रह्मले

ऋषय ऊचुः अनन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे विभूतये यत उपसे
दुरीश्वरीं न मन्यते स्वयमनुवर्त्ततीं भवान् ३४ सिद्धा ऊचुः अयं त्वत्कथामृष्टपीयूषनद्यां मनोवा
रणः क्लेशदावाग्निदग्धः तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ३५ यजमा नः ३
न्युवाच स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कान्तया त्राहि नः त्वामृतेऽधीश नां
गैर्मखः शोभते शीर्षहीनः कबन्धो यथा पुरुषः ३६ लोकपाला ऊचुः दृष्टः किं नो दृग्भिरसद्ग्रहैस्
त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यं मायाह्येषा भवदीया हि भूमन् यस्त्वं षष्ठः पंचभिर्भासि भूतैः ३७

कंधप्राप्न इव ३५ यजमानी दक्षपत्नी स्तौति ते स्वागतं भद्रमागमनं जातं हे अधीश यथा शिरसा हीनः कबंध या २
मात्रः पुरुषो नैः करचरणाद्यवयवैः शोभते नरपि न शोभते तथा त्वां विना केवलैः प्रजाद्यैरंगैर्मखो न शोभते
कुर्वी अतो नः श्रिया सह त्रायस्व रक्ष किं नु इत्यर्थः ३६ लोकपालास्त्वीश्वरत्वाभिमानारूढा भगवन्तं त्वमपश्यन्त ऊचुः
दृष्टः किं न दृष्ट इत्यर्थः कुतः असद्ग्रहैः पुरुषमाविष्टलिंगवादसत्यकोशरूपाभिः दृग्भिरिंद्रियैः अयं भावः
शुद्धविज्ञानां ते शुद्धसत्वमूर्त्तिर्भासि अतस्त्वमस्मदिंद्रियगोचरो न भवसि धिगस्मज्जीवितमिति ३७

अस्माकं तु बहिर्मुखेंद्रियाणां पंचभूतोपलक्षितो जीवविशेष इवावभासि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगेश्वराः तद्भेदेन भजतामनुग्रहं भाक्तं मन्यमानाः स्वामिभृत्यभावेन भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति हा
भा॰ च भ्यां प्रेयानिति विश्वात्मनि परब्रह्मणि त्वयि य आत्मनः पृथक्त्वेन नेक्षेत अमुतः अमुष्मादन्यः ते प्रेष्ठो नास्ति आत्म
नो जीवान् पृथक्त्वेनेक्षेतेति वा वत्सल भक्तप्रिय अनन्यवृत्त्या भक्त्या अव्यभिचारिभक्त्या भजतोऽनुगृहाण तथा निरि॰ तेषु ३
३८ अव्यभिचारिणी भक्तिः कथं स्यात् भजनीयानां बहुत्वादित्याशंक्याह जगदुद्भवादिषु दैवतो जी
पा॰ स्व॰ २ वादृष्टान् बहुधा भिद्यमाना गुणा यस्यास्तया मायया आत्मनि स्वस्मिन्पररचिता ब्रह्मादिभेदमतिर्येन तस्मै स्वसंस्थया
केवलस्वरूपावस्थानेन च विनिवर्तितो भेदभ्रमो गुणाश्च येन तव आत्मनि येन तस्मै ३९ शब्दब्रह्मस्तोत्रेण

योगेश्वरा ऊचुः प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य आत्मनः अथापि भक्त्ये
शतयोपधावतामनन्यवृत्त्यानुगृहाण वत्सल ३८ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्य
२१ मानगुणयात्ममायया रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रमगुणात्मने नमः ३९
ब्रह्मोवाच नमस्ते श्रितसत्वाय धर्मादीनां च सूतये निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ४०
अग्निरुवाच यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर आज्यसिक्तं तं यज्ञियं पंचविधं च पंच
भिः स्विष्टं यजुर्भिः प्रणतोऽस्मि यज्ञम् ४१

निर्गुणत्वं मस्ते इति श्रितं स्वीकृतं सत्वं येन अत एव धर्मादिफलप्रसवित्रे सत्वगुणत्वे च कस्य कथमित्याशंक्याह यस्य काष्ठां
तत्वं नाहं वेद्मि अपरे ब्रह्मादयश्च न विदुः तस्मै ४० अग्निस्तु यज्ञमूर्तिं प्रणमति यस्य तेजसा सुसमिद्धं प्रदीप्तं ते राम
जो यस्य सोऽहं प्रशस्ताध्वरे हविर्वहामि तं यज्ञियं यज्ञाय हितं पालकं यज्ञं यज्ञमूर्तिं पंचविधं पंचविधैस्तैरयके २१
के स एष यज्ञः पंचविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमइति पंचभिर्यज्ञमंत्रैः स्विष्टं सुपू
जितं तथा च श्रुतिः आश्रावयेति च अस्तु श्रौषडिति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजामहे इति पंचाक्षरं द्व्यक्षरो वषट्कार यजेति द्व्यक्षरं २
श्र॰ २ इति स्मृतिः चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव चाहूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदत्विति ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवास्तु सत्यं वपमितिदेवाः तथापि जगदाद्यंतयोस्त्वमेव नान्यः कश्चिदित्याहुः पुरेति कल्पायांमपलये विश्वं कार्यजा
तं उदरीकृत्य संहृत्य मेवाद्यः पुमान् उरगेंद्र एवाधिकं शायनं शय्या तस्मिन् शेषे शयनं करोषि सिद्धैर्जनलोकादिवा
सिभिः विमृशिता विचिंतिता अध्यात्मपदवी ज्ञानमार्गो यस्य स आद्य त्वं यइदानीमक्ष्णोः पथि विचरसि प्रत्यक्षो अव सि२
सि रक्षसि ४२ गंधर्वा अस्मरसस्तु वयं मिथाकेवलं सर्वानपि परमेश्वर त्वेनापश्लोकयामः त्वमेव तु परमेश्वरः
ह१ अन्ये तु त्वदंशांशा इत्याहुः अंशांशा इति हे विभूमन् नु मन्तनम क्रीडा भांडं क्रीडोपकरणं विश्वं ब्रह्मांडं यस्य तस्मै

देवा ऊचुः पुराकल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेंद्राधि
शयने पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यान
वसि नः ४२ गंधर्वा ऊचुः अंशांशास्ते देव मरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः॥
क्रीडाभांडं विश्वमिदं यस्य विभूमन् तस्मै नित्यं नाथ नमस्ते करवाम ४३ विद्याधरा ऊचुः
त्वन्माययार्थमभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः क्षिप्तोऽप्यस
द्विषयलालस आत्ममोहं युष्मत्कथामृतनिषेवक उद्व्युदस्येत् ४४ श्रीराम श्रीराम श्रीराम

तेन मनं कुर्मः ४३ विद्याधरास्तु केवलं विद्याभिः संपदः प्राप्येत अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्र
वणं विना नास्तीत्याहुः अर्थं पुरुषार्थसाधनं कलेवरं अभिपद्य प्राप्य त्वन्मायया अस्मिन् ममेत्याहमिति चाभिमा
नं कृत्वा इमम् आत्ममोहं युष्मत्कथामृतनिषेवकः उद्व्युदस्येत् परित्यजेत् नान्यः ननु स्वैः पुत्रादिभिः रुधि
क्षिप्तो दुःखितः सन् परित्यजेदेवेनेत्याहुः क्षिप्तोऽपि दुर्मतिः असत्सु विषयेषु लालसात् ध्मायस्यसः ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणाः स्तुवंति त्वमिति त्रिभिः सुदस्या... ऋत्विजश्च ४५ गां सृष्ट्वा रसायाः रसातलात् दंष्ट्रया त्र्युज्जहर्थ विशेषेणोद्धृ
तवान् सि योगिभिः स्तूयमानः हे त्रयीगात्र वेदमूर्त्ते यज्ञो याग सप्तपः स्त्रुहविः शेषः ऋतुस्तद्रूपीयशसंकल्परूप
इति वा यज्ञः क्रतुः कर्म यस्येति वा ४६ स त्वमस्माकं त्वद्दर्शनमाकांक्षतां प्रसीद अस्मै यज्ञमप्युद्धरेत्यर्थः न चाश
क्यं नु वेगतः यत स्तव नाम्नि कीर्त्यमान एव यज्ञविघ्नाः क्षयं यान्ति एवं प्रभावाय स्पत्तस्मै नमः ४७ इत्यनेन प्रकारे
२२ ण सर्वैः कीर्त्यमाने हे भद्र विदुर सन्निन्यप्रवर्त्तयामास ४८ सर्वात्मना यास सर्वभागभोक्तापि भगवान्निजांशं दत्त्

ब्राह्मणा ऊचुः त्वं क्रतुस्त्वं हुताशः स्वयं त्वं हि मंत्रसमीदर्भपात्राणि च त्वं सदस्यर्त्विजो दंपती देव
ताग्निहोत्रस्वधासोमआज्यपशुः ४९ त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेन्द्रो यथा
स्तूयमानो नदंल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः ४६ स प्रसीद त्वमस्माकमाकां
क्षतां दर्शनं ते परिभ्रष्टसत्कर्मणां कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यान्ति तस्मै
नमः ४७ मैत्रेय उवाच इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितं कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभाव
ने ४८ भगवान् स्वेन भागेन सर्वात्मा सर्वभागभुक् दक्षं बभाष आभाष्य प्रीयमाण इवानघ ४९
श्रीभगवानुवाच अहं ब्रह्मा च शर्वश्च जगतः कारणं परं आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ५०
आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचितां ५१
तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ५२ श्रीराम

त्रापि स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाण इव दक्ष माभाष्य संबोध्य बभाषे ४९ योऽहं जगतः कारणं आ
आ० १ त्मा वेश्वर श्च उपद्रष्टा साक्षी च स्वप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा च शर्वश्च इत्यन्वयः ५० कुत इत्यत आह अह
मेवात्ममायामधिष्ठाय जगत्सृष्ट्यादि कुर्वन् सर्व... क्रियोचितां संज्ञां धार...यामि ५१ तस्मिन् केवले द्वितीये समो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्वान्को भेदंन पश्यतीति सदृष्टांतमाह यथेति ५३ तस्मादेवमेकं पश्यन्नु कृतार्थो भवतीत्याह त्रयाणामेकोभावः स्वरूपं येषां
५४ स्वेनक्रतुना त्रिकपाले स्यात उभयतः अंगैः प्रधानेन च ५५ स्वेन भागेन यज्ञावशिष्टेन रुद्रेण वस्येत समाप्यते तेनेत्युदव
सानं तेन कर्मणा सोमपानितरानपि उपाधावदित्यनुषंगः ततश्च उदवस्य कर्म समाप्य अवभृथं तत्पयथा भवति तथा ७

यथापुमांन्नस्वांगेषुशिरःपाण्यादिषुक्कचित्‌ पारक्यबुद्धिंकुरुतएवंभूतेषुमत्परः ५३ त्रयाणामेकभावानां
योनपश्यतिवैभिदां सर्वभूतात्मनांब्रह्मन्सशांतिमधिगच्छति ५४ मैत्रेयउवाच एवंभगवतादिष्टः प्रजा
पतिपतिर्हरिं अर्चित्वाक्रतुनास्वेनदेवानुभयतोयजत्‌ ५५ रुद्रंचस्वेनभागेनह्युपाधावत्समाहि
तः कर्मणोदवसानेनसोमपानितरानपि उदवस्यसहर्त्विग्भिः सस्नाववभृथंततः ५६ तस्माअप्य
पी १ नुभावेनस्वेनैवावाप्तराधसे धर्मएवमतिंदत्वात्रिदशास्तेदिवंययुः ५७ एवंदाक्षायिणीहित्वासतीपूर्व
कलेवरं जज्ञेहिमवतःक्षेत्रेमेनायामितिशुश्रुमः ५८ तमेवदयितंभूयआवृंक्तेपतिमंबिका अन
न्यभावेकगतिंशक्तिःसुप्तेवपूरुषं ५९ एतद्भगवतःशंभोःकर्मदक्षाध्वरद्रुहः श्रुतंभागवताच्छिष्या
दुद्धवान्मेबृहस्पतेः ६० इदंपवित्रंपरमीशचेष्टितंयशस्यमायुष्यमघौघमर्षणं योनित्यदाक
र्ण्यनरोऽनुकीर्तयेद्धुनोत्यघंकौरवभक्तिभावितः ६१ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे
दक्षयज्ञसंधाननामसप्तमः ७

नवान्‌ ४६ स्वेनैवानुभावेनाप्तराधसे प्राप्तसिद्धये तस्मा अपि ५६ ५७ आवृंक्ते भजते स्म अनन्यभावानामेकेवगा
तिः यस्ता प्रलयकाले सुप्तशक्तिरीश्वरमिव ५८ ५९ बृहस्पतेः शिष्यान्मया श्रुतं ६० परंपवित्रंपः आकर्ण्य
तथानुकीर्तयेत्‌ सः आत्मनः परस्यापि अघं संसारव्यसनं सर्वदाधुनोति ६१ चतुर्थेसप्तमः श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

भा०४०

दक्षकन्यास्वेवंप्रासादक्षयज्ञकथितिता मनुपुत्रान्वये प्रासाध्रुवचर्याचपञ्चभिः १ अष्टमेगुरुदाराक्रोशोपमत्सरः ततः पुरात्
निर्गतेन ध्रुवेणाहतपसा तोषणं हरेः एवंतावत् मनुकन्यान्वयोक्तेश्च मरीच्यादीनां ब्रह्मपुत्राणां वंशा वर्णिताः तत्रावसि
ष्टं किं विदाहसनकाद्या इति नावसन्नाश्रिताः उर्द्ध्वरेतसो नैष्ठिकाः अतस्तेषां वंशो नास्ति ८९ अधर्मोऽपि ब्रह्मपुत्र
स्तस्य वंशमाह मृषेति चतुर्भिः दंभः परप्रतारणं माया तद्धुचितावष्टातयोः सोदरयो ... पि ... दांपत्यम धर्मांशत

श्रीमैत्रेय उवाच सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्द्ध्वरे
तसः १ मृषाऽधर्मस्य भार्यासीद्दंभमायां च शत्रुहन् असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः २ तयोः नि०
समभवल्लोभो निकृतिश्च महामते ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः ३ दुरुक्तौ
कलिराधत्त भयं मृत्युं च सत्तम तयोश्च मिथुनं जज्ञे यातना निरयस्तथा ४ संग्रहेण मयाख्यातः
२३ प्रतिसर्गस्तवानघ त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं ५ अथातः कीर्तये वंशं पुण्यकीर्ति
कुरूद्वह स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः ६ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ
सुरुचिसत्योः २ वासुदेवस्य कलया रक्षायां जगतः स्थितौ ७ जाये उत्तानपादस्य सुनीतिः सुरुचिः प्रेयसी पत्युर्नेत
रायत्सुतो ध्रुवः ८ एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत
तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता १०

तृ० पा एवमुपर्यपि अप्रजः अपुत्रः २ निकृतिः शठता ताभ्यां कलिश्च तस्याः स्वसा दुरुक्तिश्चेत्यर्थः ३ यातना तीव्रवेदना
४ प्रतिसर्गस्तु सर्ग एव यद्वा प्रतिसर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात्प्रतिसर्गत्वं एतच्छ्रुत्वा अधर्मवंशं पुण्यमिति वर्जनेन
द्वारा पुण्यहेतुत्वात् ५ मनोः पुत्रवंशं हरेरंशांशो ब्रह्मा तस्यांशाच्च देहाद्वा जन्म यस्य ६ जगतो रक्षायां स्थितौ ७ सुनीतिः सुरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गर्वात् किमेवाह त्रिभिः नेति नृपते धिष्ण्यमासनं नृपात्मजोपि भवान्नारोढुमर्हति ११ पुरुषमीश्वरं १३ मिषन्तं पश्यन्तं सन्न
वाचं कुंठितवाचं १४ उदूह्य आरोप्य अन्तः पुरजनमुखात् श्रुत्वा १५ शोक एव दावाग्निस्तेन दावाग्निगतालतेव स्थिता सा
बाला विलापं चकार १६ वृजिनस्य दुःखस्य अमंगलमपराधं परेषु मा मंस्थाः यद्यतः परेभ्यो दुःखं ददाति यः स दुःख

न वत्स नृपते धिष्ण्यं भवानारोढुमर्हति न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ११ बालोसि ब
त नात्मानमन्यस्त्रीगर्भसंभृतं नूनं वेद भवान्यस्य दुर्लभेर्थे मनोरथः १२ तपसाऽराध्य पुरुषं त
स्यैवानुग्रहेण मे गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनं १३ मैत्रेय उवाच मातुः सपत्न्याः स
दुरुक्तिविद्धः श्वसन्रुषा दंडहतो यथाहिः हित्वा मिषन्तं पितरं सन्नवाचं जगाम मातुः प्ररुदन्स
काशं १४ तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं निशम्य तत्पौरमुखान्नितान्तं सा
विव्यथे यद्गदितं सपत्न्या १५ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला वाक्यं स
पत्न्याः स्मरती सरोजश्रिया दृशा वाष्पकलामुवाह १६ दीर्घं श्वसन्ती वृजिनस्य पारमपश्यती बा
लकमाह बाला मामंगलं तात परेषु मंस्था भुंक्ते जनो यत्परदुःखदस्तत् १७ सत्यं सुरुच्याभिहितं ८४
भवान्मे यद्दुर्भगाया उदरे गृहीतः स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्मां १८
आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकं आराधयाधोक्षजपादपद्मं यदीच्छसेऽध्या
सनमुत्तमो यथा १९ यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः अजोऽध्यतिष्ठत्खलु पार
मेष्ठ्यं पदं जितात्माश्वसनाभिवंद्यं २०
व१ दत्ते मे बहुदुःखं भुंक्ते १७ दुर्भगाया मम यात्त उदरे गृहीतः तस्या एव स्तन्येन वृद्धश्च दुर्भगत्वमेवाह यां मामिडस्पतिः भूपतिर्भार्येति वोढुं
स्वीकर्तुं विलज्जते वाशब्दो हासोऽत्यपि १८ पितेर्भार्यात्वेन समा मात्रा मातुः सपत्न्यापि यदुक्तं तपसाऽराध्य पुरुषमित्यादि
तदातिष्ठ कुरु अध्यासनं यदीच्छसि १९ परिचर्य निषेव्य विश्वस्य विभावनाय पालनाय आत्ता स्वीकृता गुणाभिपत्तिः सत्वगु

तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिं ॥ अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं ॥ २२ ॥

भाग० च० एकमत्या सर्वान्तर्यामि दृष्ट्या २१ मृग्या यदब्जयोः पद्धतिर्मार्गो यस्य तमेवाश्रय शरणं व्रजन् ततो भजस्व नान्यस्मिन् निज धर्मैर्भाविते शोधिते २२ तमेव त्वयेनेन सूचितं सर्वात्मत्वं प्रपञ्चयति नान्यमिति हस्तगृहीतं दीपवत्पद्मं यथा इतरैर्ब्रह्मा दिभिः २३ संजल्पितं विलापं ततः अर्थस्य आगमो यस्मात्तथाभूतं वचः आकर्ण्य २४ २५ वि... स्मित इत्युक्तं तदेवाह अहो ते भावोपयस्य त... २ ग्र १

तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं २२ नान्यं ततः पद्मपलाशलोचनात् दुःखच्छिदं ते मृगयामि किंचन यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्यमाणया २३ श्रीमैत्रेय उवाच एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात् २४ नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य

२४ चिकीर्षितं स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना प्राह विस्मितः २५ अहो तेजः क्षत्रियाणां मानभंगम मृष्यतां बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः २६ नारद उवाच नाधुनाप्यवमानं ते सन्मानं चापि पुत्रक लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु २७ विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः २८ परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः दैवोपसा दितं यावद्वीक्ष्येश्वरगतिं बुधः २९ अथमात्रोपदिष्टेन योगेनावरुरुत्ससि यत्प्रसादं स वै पुंसां दुरा राध्यो मतो मम ३० मुनयः पदवीं यस्य निःसंगेनोरुजन्मभिः न विदुर्मृगयंतोऽपि तीव्रयोगसमाधि ना ३१

जः प्रभावः २६ ७ विकल्पे मानापमानविवेके सत्यपि भिन्ना न संति किंतु मोहकल्पिता एव इत्यर्थः कुतः यतः सुखदुःखं वा राम तन्निजकर्मभिरेव भवति यतः २८ उपशमोपदेशेन निवर्त्तयति परितुष्येदिति षड्भिः ईश्वरगतिं वीक्ष्य ईश्वरानुकूल्यं वि २४ नानोद्यमाः फलहेतवः इति ज्ञात्वा २९ दुष्करं अनवसमुद्यमं इत्याह अथेति ... याभ्यां यस्य प्रसादमवरोद्धुं प्राप्तुमिच्छ सि ३० निःसंगेन तीव्रयोगेन युक्तेन समाधिना मृगयन्तोऽपि यस्य पदवीं मार्गं न विदुः स दुराराध्यः ३१

स देवो दु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्यान् ३

ना ३

श्रेयसां काल इष्यते ३२ सुखदुःखयोर्मध्ये सुखे सति पुण्यं क्षीयते दुःखे सति पापं क्षीयते इत्यात्मानं तोषयन् तमसः
पारं मोक्षं प्राप्नोति ३३ किंच गुणैरधिकात्पुंसः इति ल्यब्लोपे पंचमी तं दृष्ट्वा प्रीतिं कुर्यान्न तु असूयामित्यर्थः अनुक्रोशं कृ-
पां लिप्सेत् न्यूनं तु तिरस्कारं समानं मैत्रीं न तु स्पर्धां ३४ क्षात्रं स्वभावं प्राप्तवतः अत एवाविनीतस्य दुर्वाक्यबाणैर्भिन्ने हृ-

• अतो निवर्ततामेष निर्बंधस्तव निष्फलः यतिष्यति भवान् काले श्रेयसां समुपस्थिते ३२ यस्य यद्दै-
व विहितं स तेन सुखदुःखयोः आत्मानं तोषयन् देही तमसः पारमृच्छति ३३ गुणाधिकान्मुदं
लिप्सेदनुक्रोशं गुणाधमात् मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते ३४ ध्रुव उवाच सोऽयं श-
मो भगवता सुखदुःखहतात्मनां दर्शितः कृपया पुंसां दुर्दर्शोऽस्मद्विधैस्तु यः ३५ अथा-
पि मेऽविनीतस्य क्षात्रं घोरमुपेयुषः सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि ३६ पदं त्रि-
भुवनोत्कृष्टं जिगीषोः साधु वर्त्म मे ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितं ३७ ॥
नूनं भवान् भगवतो योऽङ्गजः परमेष्ठिनः वितुदन्नटते वीणां हितार्थं जगतोऽर्कवत् ३८
मैत्रेय उवाच इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकं-
पया ३९ श्रीनारद उवाच जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते भगवान्वासुदेवस्तं भज तं
प्रवणात्मना ४० धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः एकं ह्येव हरेस्तत्र कारणं पादसेवनं
× ४१ स्नात्वानुसवनं तस्मिन् कालिंद्याः सलिले शिवे कृत्वोचितानि निवसन्नात्मनः कल्पितास-
नः ४३

तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि पुण्यं मधुवनं यत्र सां-
निध्यं नित्यदा हरेः ४२

दि न श्रयते न तिष्ठति ३६ अन्यैरनधिष्ठितं त्रिभुवनोत्कृष्टं पदं जिगीषोर्मे साधु वर्त्म मार्गं ब्रूहि ३७ अंगजः इति पाठे तु स्वांग- का
जातो यो नारदः स भवान् तत्र लिंगं वितुदन् वादयन् हिताय अटति ३८ निःश्रेयसस्य अभिप्रेतार्थस्य पंथाः कोऽसावित्य-
त आह भगवान् वासुदेवः अत एव तं भज ४० ४१ मधुवनाख्यं तटं छापत्रं मधुवने ४२ ॥ श्रीराम श्रीराम

ना १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च अध्यापनाद्यभावेऽपि आत्मनउचितानि योग्यानि देवतानमस्कारादीनि कुर्वन्नेति यमनियमाउक्तौ आसनकल्पनं च कुर्वा
दिभिः स्वस्तिकादिभिश्च ४३ प्राणेन्द्रियमनसां मलं वीतं यस्यं बुदस्येति प्राणायामप्रत्याहारौ धारणामाह अभिध्या
येदित्यादिषड्भिः गुरुणा धारिणा मनसा गुरुः श्रीहरिं ४४ सुरेषु सुंदरं ४५ रमणीयान्यंगानि यस्य आोष्ठं अईक्षणं अ
रुणे ओष्ठ ईक्षणे धारयतीति तथा तं अरुणं ओष्ठमीक्षणं च धारयतीति वा नतमसुखकरं यद्वान्दनमाधनं सर्वपु

प्राणायामेन निर्जिता प्राणेन्द्रियमनोमलं शनैर्बुदं स्याभिध्यायेन्मनसा गुरुणा गुरुं ४४ प्र
सादाभिमुखं शश्वत्प्रसन्नवदनेक्षणं सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरं ४५ तरुणं र
मणीयांगमरुणोष्ठेक्षणाधरं प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवं ४६ श्रीवत्सांकं घनश्या
मं पुरुषं वनमालिनं शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं ४७ किरीटिनं कुंडलिनं केयू
रवलयान्वितं कौस्तुभाभरणग्रीवं पीतकौशेयवाससं ४८ कांचीकलापपर्यस्तं लसत्कां
२५ चननूपुरं दर्शनीयतमं शांतं मनोनयनवर्द्धनं ४९ पद्मांनखमणिश्रेण्या विलसद्भ्यां समर्च
तां हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ५० स्मयमानमभिध्यायेत्सानुरागाव
लोकनं नियतेनैकभूतेन मनसा वरदर्षभं ५१ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः निर्वृत्या
परया तूर्णं संपन्नं न निवर्त्तते ५२ जपश्च परमो गुह्यः श्रूयतां मे नृपात्मज यः सप्तरात्रं प्रपठन्पुमान्
पश्यति खेचरान् ५३

(पुरुष १) षार्थनिधिमित्यर्थः ४६ पुरुषं लक्षणयुक्तं ४७ कौस्तुभस्याभरणं ग्रीवायस्य ४८ कांचीकलापेन पर्यस्तं परिवेष्टितं म
२८ नोनयनयोर्विर्द्धनं हर्षकरं ४९ हृत्पद्मकर्णिकायां धिष्ण्यं मध्यस्थानं तदाक्रम्य समुर्वृत्त्या आत्मनि मनसि स्थितं ५० ध्या
नमाह स्मयमानमिति नियतेन प्रागुक्तधारणया सुस्थिरेण अत एकभूतेन एकाग्रेण धारणोक्तानि विशेषणानि ध्या
नेऽपि द्रष्टव्यानि यद्वा यथोक्तमात्रमेवेतदुक्तमेकादेशस्कंधे नान्यानि चिंतयेदू ५१ सुस्मितं भावयन्मुखमिति ५१

राम २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ द्रव्याण्येवाह सलिलैरिति शस्तैर्दूर्वांकुरैः वन्यैरेवांशुकैः भूर्जत्वगादिभिः ५५ अधिष्ठानमाह लब्ध्वा संपाद्य द्रव्यमयीं शिला यलुदोमि २
दिभिर्निर्मितां पूजा साक्षुएवेह नाहसाद्धीभ्यां आभृतात्मा धृतचित्तः मितं वन्यं भुंक्ते इति तथा यत्करिष्यतीति तदानीं अ
वतार प्राचुर्याभावात् ५७ पूर्वसेविताः सेवनं कारिताः कार्यत्वेन विहिता इत्यर्थः मंत्रहृदयेन द्वादशाक्षरेण ५८ एवमुक्त

ॐ नमो भगवते वासुदेवाय मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः सपर्यां विविधैर्द्रव्यैर्देशकालविभा
गवित् ५४ सलिलैः शुचिभिर्माल्यैः वन्यैर्मूलफलादिभिः शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं ५५
लब्ध्वा द्रव्यमयीमर्चां क्षित्यम्ब्वादिषु वार्चयेत् आभृतात्मा मुनिः शांतो यतवाङ्मितवन्यभुक् ५६ स्वेच्छा
वतारचरितैरचिंत्यनिजमायया करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमं ५७ परिचर्या भगवतो यावत्यः
पूर्वसेविताः ता मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ५८ एवं कायेन मनसा वचसा च मनोगतं परिचर्य
माणो भगवान् भक्तिमत्परिचर्यया ५९ पुंसाममायिनां सम्यक् भजतां भाववर्द्धनः श्रेयो दिशत्यभिमतं
यद्धर्मादिषु देहिनां ६० विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा तं निरंतरभावेन भजेताद्धा विमुक्तये ६१
संसार्हितार्हे... इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं ६२ तपोवनं गते तस्मिन् प्र
विष्टोऽन्तःपुरं मुनिः अर्हितोर्हणो राज्ञा सुखासीन उवाच हे ६३ नारद उवाच राजन् किं ध्यायसे दीर्घं मु
खेन परिशुष्यता किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः ६४ राजोवाच सुतो मे बालको ब्रह्मन् स्त्रैणेना
करुणात्मना निर्वासितः पंचवर्षः सह मात्रा महान् कविः ६५ अप्यनाथं वने ब्रह्मन् मा स्मादंत्यर्भकं वृकाः
श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजं ६६
रीत्या मनोगतं यथा भवति तथा कायादिभिर्भक्तिमत्या परिचर्यया परिचर्यमाणो धर्मार्थकामेषु यदभिमतं तत् श्रेयो दिशतीति समर्हितं
द्वयोरन्वयः ५९ ६० विरक्तो भजेत् किमर्थं विमुक्तये ६१ हरेश्चरणाभ्यां चर्चितं मंडितं ६२ अर्हितं सत्कृत्य समर्पितं अर्हणं
मर्घादि यस्मै। ६३ किं वा न रिष्यते न नश्यतीति सविनर्कः प्रश्नः ६४ ६५ मात्रा सह निर्वासित इति तस्याप्यनाहृतत्वात् ६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० त्व०

मास्मार्दतिति किंचिन्न स्वादं नीत्यर्थः ६७ यस्य यशो जगत्प्रावृङ्क्ते व्याप्नोति ६८ विपुलयन् विस्तारयन् ७० अवो मधुवने किमक
या२ रोदित्यपेक्षायामाह तत्रेत्यादिना अभिषिक्तः स्नातः यस्याः प्राप्तः तां ७१ कपित्थानि च बदराणि च अशनं यस्य आत्मवृत्तिः देह
स्थितिः तदनुसारेण ७२ ७३ तृतीयं च आनयत् ईषद्देवनयत् पापाच्च दित्यन्वयः प्रतिमासमाहारसंकोचं तयोः तिरिके च

अहो मे बत दौरात्म्यं स्त्रीजितस्योपधारय योऽङ्के प्रेम्णारुरुक्षन्तं नाभ्यनन्दमसत्तमः ६७ नारद उवाच मा मा
२६ शुचः स्वतनयं देवगुप्तं विशांपते तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत् ६८ सुदुष्करं कर्म कृत्वा लोकपा
यं३ लैरपि प्रभो एष्यत्यचिरतो राजन् यशो विपुलयंस्तव ६९ श्रीमैत्रेय उवाच इति देवर्षिणा प्रोक्तं विश्रुत्य ज
गतीपतिः राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिन्तयत् ७० तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीं समा ७४
हितः पर्यचरदृष्यादेशेन पुरुषं ७१ त्रिरात्रान्ते त्रिरात्रान्ते कपित्थबदराशनः आत्मवृत्त्यनुसारेण मासं नि
श्री४ न्येऽर्चयन् हरिं ७२ द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने तृणपर्णादिभिः शीर्णैः कृ[illegible]तान्नोऽभ्यर्चयन्
विभुं ७३ तृतीयं चानयन्मासं नवमे नवमेऽहनि अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ७४ चतुर्थ
द्वादशे३ मपि वै मासं द्वादशे द्वादशेऽहनि वायुभक्षो जितश्वासो ध्यायन् देवमधारयत् ७५ पंचमे मास्यनुप्राप्ते जितश्वा
सो नृपात्मजः ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ७६ सर्वतो मन आकृष्य हृदि भूतेंद्रियाशयं ध्या
यन् भगवतो रूपं नाद्राक्षीत्किंचनापरं ७७ आधारं महदादीनां प्रधानपुरुषेश्वरं ब्रह्म धारयमाणस्य
त्रयो लोकाश्चकंपिरे ७८

दा१ कृतवानित्यर्थः ७४ ७५ ७६ भूतानि देहादीनि इंद्रियाणि च आशेरते यस्मिन् तन्मन आकृष्य ब्रह्म ध्यायन् ७७
७७ धारयमाणस्य सतः तस्य तेजः सोढुं अशक्नुवंतः कंपिताः २८ श्रीराम राम श्रीराम श्रीराम श्रीराम २६

तस्यांगुष्ठेन निपीडिता आक्रांता सती मही तत्र तदा अर्द्धं ननाम। स एमं श्लोके अर्द्धशब्दस्य नपुंसकत्वादंशांशिनोरभेदा
त्स्वैवं सामानाधिकारण्यं। इभेंद्रेणाधिष्ठिता तरीनौर्यथा पदे पदे सव्यतो दक्षिणतश्च नमति तद्वत् ७९ अनन्यदृष्ट्या ऐक्यमा
ह तस्मिन् ध्रुवे विश्वं विश्वात्मके विष्णु आत्मनः सकाशात् अनन्यया धिया आत्माभेददृष्ट्या अभिध्यायति सति किं स्तब्धा या
असुप्राणास्तनुद्वारं च निरुध्य विश्वमात्मैक्येन किं तत्स्वप्राणनिरोधक्रेते विश्वस्य प्राणनिरोधो जात इति भावः ८० एवं

यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही ननाम तत्रार्द्धमिभेंद्रधिष्ठिता त
रीव सव्येतरतः पदे पदे ७९ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुमनन्यया धि
या लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिं ८० देवा ऊचुः नैवं वि
दामो भगवन् प्राणरोधं चराचरस्याखिलसत्वधाम्नः विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता व
यं त्वां शरणं शरण्यं ८१ श्रीभगवानुवाच माभैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतिया
त स्वधाम यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ८२ इति श्रीभागवते
महापुराणे चतुर्थस्कंधे ध्रुवचरितेऽष्टमोऽध्यायः ॥ श्रीराम श्रीराम श्रीराम ॥ श्रीराम श्रीरा

प्राणनिरोधं कदाचिदपि न विद्मः अखिलसत्वधाम्नः सर्वप्राणिशरीरस्य तत्तस्माद्वृजिनात्क्लेशात् ८१ यतो वा
त्वा नु कोऽसौ बालः कथं च तस्मात् प्राणनिरोध इत्यत आह उत्तानपादस्य पुत्रो मयि विश्वरूपे संगतात्मा ऽयं प्रा
णावर्तते इति ८२ चतुर्थेऽष्टमः नवमे तु हरिं स्तौ बाल आप तस्माद्वरान् ध्रुवः प्रत्यागत्याकरोद्राज्यं पित्रा दत्तमिती
र्यते १

भा०च० एवंभगवद्वाक्येनगतभयाः सर्वे ध्रुवः योगविपाकेनतीव्रेण निश्चलयागरुडाधिरूढंपुरतः स्थितमपियदानेदंदृष्टिवान्तदासो
नापश्यन् तदाभगवतोत्तानः स्वरूपं दृष्ट्वा अतस्तिरोहितमुपलक्ष्यव्युत्थितः सन्नुर्द्ध्ववस्थं यादृगंतः स्फुरितंतादृशं॥२
आगतसाध्वसः जातसंभ्रमः विनमय्यअवनतंकृत्वा संभ्रममेवाह दृग्भ्यांप्रपिबन्निवपश्यन्नवंदत आस्येनचुंबन्नि
वभुजाभ्यामाश्लिषन्निवावंदतेत्यर्थः ३ विवक्षंतंतत्स्तुतिंकर्तुमिच्छंत अतद्विदंस्तोत्रादिकर्तुमज्ञानंत अस्यध्रुवस्य

मैत्रेयउवाच तएवमुत्सन्नभयाउरुक्रमेकृतावनामाः प्रययुस्त्रिविष्टपं सहस्रशीर्षापितोगरुत्मतामधो
र्वनंभृत्यदिदृक्षयागतः १ सवैधियायोगविपाकतीव्रयाहृत्पद्मकोशेस्फुरितंतडित्प्रभं तिरोहितंसह
सैवोपलक्ष्यबहिःस्थितंतदवस्थंददर्श २ तद्दर्शनेनागतसाध्वसः क्षिताववंदतांगंविनमय्यदंडवत्॥
दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येनभुजैरिवाश्लिषन् ३ सतंविवक्षंतमतद्विदंहरिर्ज्ञात्वास्य
सर्वस्यचहृद्यवस्थितः कृतांजलिंब्रह्ममयेनकंबुनापस्पर्शबालंकृपयाकपोले ४ सवैतदैवप्रतिपादि ले५ प्रतिपद्यतां
२७ तांगिरंदैवींपरिज्ञातपरात्मनिर्णयः तंभक्तिभावोभ्यगृणादसत्वरंपरिश्रुतोरुश्रवसंध्रुवक्षितिः
ध्रुवउवाच योंतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्तिधरःस्वधाम्ना अन्यांश्चहस्तच
रणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यं ६

शा०व्या० ना० हृद्यवस्थितत्वात् ब्रह्ममयेनवेदात्मकेनशंखेन ४ भगवताप्रतिपादितां गिरं प्रतिपद्येतिशेषः प्रतिपद्यतामितिपाठे तां राम
वेदात्मिकां परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयोयेनसः अतएवभक्त्याभावःप्रेमयस्य असत्वरंस्थैर्येण परितः
ध्रुवस्तुतिः३ श्रुतंविख्यातंउरुश्रवःकीर्तिर्यस्यतं ध्रुवाक्षितिःस्थानंयस्येतिभाविनिर्देशः ५ ईशानुग्रहंप्राप्तवागाद्यद्भुतंस्तौतिभिः २७
द्वादशाभिःसकावोः श्लोकैरस्तौत् ध्रुवः योमेप्रसुप्तांलीनांवाचंअन्यांश्चप्राणानिंद्रियाणिस्वधाम्नाचिच्छक्त्या
संजीवयतियतः अखिलाश्चक्षुरादिज्ञानेक्रियाशक्तीःधारयतितथा उपुरुषाय अंतर्यामिणे ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु वागादींद्रियशक्तिधरा ब्रह्मादयः प्रसिद्धा नाहमित्यत आह एक इति अनुविश्य पुरुषोंतर्यामी त्वमेक एव तस्या
मायायाः असत्सु गुणेष्विंद्रियादिषु स्थितः सन् तत्तद्देवरूपो नानेव भासि ननु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्ति
धरः कश्चिदस्तीत्यर्थः ७ अपि च किं च केऽप्यत्र ब्रह्मादयो ज्ञानादिशक्तिधरा न भवंतीति यस्मान्नु ब्रह्मणा
पि ज्ञानं त्वदधीनमेवेत्याह त्वद्दत्तया वयुनया ज्ञानेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वं अचष्ट अपश्यन् केथं
सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्वत् अतः आपवर्ग्यो मुक्तानां तेषामपि शरणं कृतविदा सर्वेंद्रियजीवनेन
त्वत्कृतमुपकारं जानता कथं विस्मर्यते एवं भूतं त्वामभजंतः कृतघ्ना इत्यर्थः येवमाहृताः कामाद्यर्थं भजंति

एकस्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं। सृष्ट्वानुविश्य पुरुषस्तद
ध्रु॰ रु॰ सद्गुणेषु नानेव दारुषु विभावसुद्विभासि ७ त्वद्दत्तया च पुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भ
वत्प्रपन्नः तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्त्तबंधो ८ नूनं विमुष्टमतय
स्तव मायया ते ये त्वां भवाप्यय विमोक्षणमन्यहेतोः अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति
यत्स्पर्शजं नरकेपि नृणां ९ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् पाद२
सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां विमानात् ॥१०॥ श्रीराम

तेऽपि मूढा इत्याह नूनमिति भवाप्ययो जन्ममरणे ताभ्यां मोक्षहेतुं त्वामन्यहेतोः कामाद्यर्थं भजंति ते नूनं विमुष्टम २।
ध्रु॰ तयः वंचितचित्ताः यतस्ते कल्पतरुं त्वामभ्यर्च्य कुणपतुल्ये देहे नोपभोग्यं सुखमिच्छंति न च [illegible]योग्यता दि
त्याह यत्स्पर्शजं विषयसंबंधजं तं सुखं तु नरकेपि भवति ९ ननु स्वर्गादिसुखं सकामैः प्राप्यते निष्कामभ
जनेन तन्न स्यादित्यत आह येति स्वमहिमनि निजानंदरूपेऽपि मा भूदेन भवतीत्यर्थः अंतकस्यासिना कालेन
लुलितात् खंडिताद्विमानात्पततां सा नास्तीति किमु वक्तव्यं १० श्री श्री श्री श्री श्री श्री श्री

भा०च० अतः कथाश्रवणाय सत्संगमिति देहीत्याह। भक्तिं त्वयि प्रवहतां सांतत्येन कुर्वतां ननु मोक्षं किं न याचसे अत आह येन मह
त्प्रसंगेनाञ्जसाऽयत्नत एव। उरूणि व्यसनानि यस्मिन्तं नेष्ये पारं गमिष्ये पारं गमिष्यामि भवद्गुणकथैवामृतं तस्य
स्य पानेन मत्तः सन् ११ कथामृत पानस्य माहात्म्यमाह तेऽत्यंतं प्रियमपि मर्त्यदेहं न स्मरंति नानुसंद
धते। ये च सुतादयः अदः मर्त्यमनु संबद्धाः तानपि केऽतेन स्मरंति ये कृतप्रसंगाः केषु भवदीयपदारविंदसौ
नेषु नेषु२ गंध्यलुब्धहृदयेषु येषां तु गोहे नान्येषां केवलं योगादिनिष्ठानां देहाभिमानानिवृत्तिं दर्शयति १२ नत्वेवं विद्वान्
पि त्वं किमित्यभिमानं वहसि अत आह। तिर्यगिति तिर्यङ्नगादिभिः परिचिन्नं व्याप्तं संतोऽसंतश्च विशेषा

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां येनांजसोऽल्बणमुरुव्यसनं
भवाब्धिं नेष्ये भवद्गुणकथामृतपानमत्तः ११ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चाऽन्वदः सुत
सुहृद्गृहवित्तदाराः ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृतप्रसंगाः १२ तिर्यङ्
२९ नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषं रूपं स्थविष्ठमज ते महदाद्यनेकं ना
तः परं परम वेद्मि न यत्र वादः १३ कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंत सखस्त
दंके यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे द्युमान्भगवते प्रणतोऽस्मि तस्मै १४ श्रीराम श्रीराम

यस्य महदादीन्यनेकानि कारणानि यस्य हे परम अजते इदं स्थविष्ठं विराड्रूपं केवलं वेद्मि अतः परमीश्वर स्व
रूपं न वेद्मि यत्र वादः शब्दव्यापारो नास्ति तद्ब्रह्मस्वरूपं च न वेद्मि अतोऽभिमानो न निवर्तत इति भावः १३ राम
तदेव भगवदनुकंपया चद्रूपं द्रष्टुं ज्ञातेश्वररूपमनुवर्णयन्नमस्करोति कल्पांत इति एतत् त्रैलोक्यं यः पुमान् २८
शेते स्वस्मिन्नेव दृक् ज्ञानं वहिर्यस्य योगनिद्रां रूढवान् अनंत सखः शेषसहायः तदंके शेषोत्संगे यस्य नाभिरिव
सिंधुः समुद्रः तस्मिन्रोहतीति तथा तस्मिन्कांचनलोकपद्मस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्मा भवति तस्मै
प्रणतोऽस्मीत्यर्थः १४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु ममापि स्वापाद्यवस्थावत्त्वे को जीवाद्विशेष इत्यत आह त्वं तु व्यतिरिक्तः जीवविलक्षणः अस्मे तिष्ठसि वैलक्षण्यमे
ध्रु॰ २ वाह त्वं नित्यमुक्तः जीवस्तु त्वत्प्रसादान्मुक्तः त्वं परिशुद्धः स तु मलिनः त्वं विबुद्धः स त्वज्ञः त्वमात्मा स तु जडः त्वं कूटस्थः
स तु विकारी त्वमादिपुरुषः स त्वादिमान् त्वं तु भगवान् स तु भगहीनः त्वं त्रयाणां गुणानामधीशः स तु परतंत्रः ॥
कुतः एतद्वैलक्षण्यं यद्यतः बुध्यवस्थितिं बुद्धस्थानामवस्थाः अखंडितया स्वदृष्ट्या विच्छित्त्याद्द्रष्टा पश्यन्नसि द्र
४॰ २ ष्टेति तृन्प्रत्ययान्तः अतो बुद्ध्यवस्थितिस्त्वयि तत्र तत्त्वभावः तथाभूत एव त्वं स्थितौ पालने अधिमखः यज्ञाधिष्ठाता
श्रीविष्णुः १५ तमेव ब्रह्मरूपेण ज्ञातं नमस्करोति यस्मिन्निति पतंति अकस्मादुद्भवंति विश्वस्य भावो यस्मात् एक

त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः यद्बुद्ध्यवस्थितिमखंडि
तया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से १५ यस्मिन् विरुद्धगतयो ह्यनिशं पतंति वि
द्यादयो विविधशक्तय आनुपूर्व्यात् तद्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्र
पद्ये १६ सत्याशिषो हि भगवंस्तव पादपद्ममाशीस्तथाऽनुभजतः पुरुषार्थमूर्तेः अप्येवमार्य भ
गवान् परिपाति दीनान् वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् १७ मैत्रेय उवाच ॥ अथाभिष्टुत
एवं वै सत्संकल्पेन धीमता भृत्यानुरक्तो भगवान् प्रतिनंद्येदमब्रवीत् ॥ १८ श्रीराम श्रीराम ॥

मखंडमाद्यमनादिं १६ सकामभजनादपि मोक्षमाशासान आह। हे भगवन् पुरुषार्थः परमानंदः स एवम्
र्तिर्यस्य तस्य तव पादपद्मं आशिषो राज्यादेः सकाशात् सत्या आशीः परमार्थफलं हि निश्चितं कस्य तथा तेन प्र
कारेण त्वमेव पुरुषार्थ इत्येवं निष्कामतया अनुभजतः यद्यप्येवं तथापि हे आर्य स्वामिन् दीनान् सकामान
भगवान् २ प्यस्मान् भवान् परिपाति संसारभयात् रक्षत्येव यतः अनुग्रहे हिताचरणे कातरः परवशः यथा नवप्रसूता वा व॰ २
श्रा धेनुः वत्सं क्षीरं पाययति वृकादिभ्यो रक्षति च तद्वत् १८ श्रीराम श्रीराम श्रीराम श्रीराम श्री श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं।

भा० ७० व्यवसितं संकल्पितं १९ तत्प्रयच्छ मे तु तत् किं तदित्यपेक्षायामाह नान्यैरिति साध्यं अभ्यां हे भद्र ध्रुवाक्षितिर्निवासो यस्मिन्
आहितमर्पितं २० धान्याक्रमणाय भ्राम्यमाणानां पशूनां बंधनकं भोमेढीतस्यां बलीवर्दसमूहवत् अर्वाग् अर्वाचीना कल्प
टी० ३ वासिनां परस्तादपि स्थास्यन्ति तत्र यत्र नाशोऽप्यनश्वरे धर्मोऽग्न्यादयो नक्षत्राणि पा० वनौकसः सप्तर्षयः यत्प्रदक्षिणा
कृत्य भ्रमंतश्चरंति २१ एतच्च राज्यानंतरं भविष्यतीत्याह प्रस्थित इति गुर्व्यं पृथ्वीं दत्वा वनं प्रस्थिते भावे क्तः वनं

श्रीभगवानुवाच वेदाहं ते व्यवसितं हृदि राजन्य बालक। तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत १९ नान्यै
रधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति। यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं २० मेढ्यां गोचक्रवत्स्था
स्नु परस्तात्कल्पवासिनां। धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः। चरंति दक्षिणीकृत्य भ्रमंतो
यत्सतारकाः २१ प्रस्थिते तु वनं पित्रा दत्वा गां धर्मसंश्रयः। षट्त्रिंशद्वर्षसाहस्रं रक्षिताव्याहतेंद्रि
यः २२ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः। अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति २३
२९ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः। भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि २४ ततो गं
तासि मत्स्थानं सर्वलोकनमस्कृतं। उपरिष्टादृषिभ्यस्त्वं यतो नावर्तते गतः २५ श्रीमैत्रेय उवाच
इत्यर्चितः स भगवानतिदिश्यात्मनः पदं। बालस्य पश्यतो धाम स्वमागाद्गरुडध्वजः २६ सोपि संक राम
ल्पजं विष्णोः पादसेवोपसादितं। प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरम् २७ श्रीराम २९

प्रति दीर्घगमने कृते सति रक्षिता रक्षिष्यसि २२ त्वया असंकल्पितमपि मह्यं तस्य तव भ्रातुर्होदं भविष्यतीत्याह त्व
द्भ्रातरीति सा मातृरुचिः प्रवेक्ष्यति २३ किंच इष्ट्वा मां यज्ञहृदयं प्रियामूर्तिर्यस्य तं २४ यतः स्थानात् २५ अति
दिश्य दत्वा २६ संकल्पजं मनोरथं पादसेवया प्रापितं संकल्पस्य निर्वाणं समाप्तिर्यस्मात् २७ श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० मायाविनः सकामस्य यत्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानं मनः असिद्धार्थं अप्राप्तमनोरथमिव थ १
कथममन्यत पुरुषार्थविदपि २८ ९९ तापमेवाह समाधिनेति सार्द्धैः षड्भिः नैके अनेके भवा यस्मिन् बहुजन्माभ
स्तेनेत्यर्थः प्रणामस्तुत्यादिसमये गरुडादिनृदस्य हरेः पादछायायां स्थितमात्मानं स्मरन्नाह छायामुपेत्येति स का ला १
ष्टपञ्चमिः भेदद्रष्टिः सन् हा कष्टमिति भावः ३० अनात्म्यं आत्मशून्यत्वं अज्ञत्वं भवछेत्तुर्मदंतपतून दयोचेमा

विदुर उवाच सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं लब्ध्वाप्यसिद्धार्थमिवैकजन्म
नाकथं स्वमात्मानममन्यतार्थवित् २८ मैत्रेय उवाच मातुः सपत्न्या वाग्वाणैर्हृदि विद्धस्तु तान् स्मरन्
नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् २९ ध्रुव उवाच समाधिनानैकभवेन यत्पदं विदुः सनं
८४ दाय ऊर्ध्वरेतसः मासैरहं षड्भिरमुष्य पादयोः छायामुपेत्यापगतः पृथक्मतिः ३० अहोवताव
ममानात्म्यं मंदभाग्यस्य पश्यत भवछिदः पादमूलं गत्वा याचे यदंतवत् ३१ मतिर्विदूषिता देवैः प
तद्भिरसहिष्णुभिः यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः ३२ दैवीं मायामुपाश्रित्य प्रसुप्त इव भि
न्नदृक् तप्ये द्वितीयेप्यसति भ्रातृभ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि
प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं भवछिदं मयाचेहं भवं भाग्यविवर्जितः ३४ श्रीराम

पदं

चिंतवानस्मि ३१ अज्ञत्वे कारणं संभवयतीति पतद्भिर्मदपेक्षया अधः प्राप्नुवद्भिः अतः एवासहनशीलैः ना मति १
नि धुना ऽप्येवमानंतः इत्यादि सत्यमपि नारदस्य वचो यो न गृहीतवानस्मि तस्य मे मतिर्दूषिता ३२ किंच दैवीमिति थिर
प्रसुप्तः स्वप्ने वपश्यन् द्वितीये असत्यपि भ्रांतेव भ्रातृव्यः शत्रुरिति द्दस्याहृद्रुजा हृदयशोकेन तप्ये तापमनुभवा
मि ३३ किंच मया प्रसाद्य यत्प्रार्थितं तद्व्यर्थं प्रार्थितमाह भवछिदमिति ३४ श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेवसदृष्टांतमाह स्वराज्यंनिजानंदंप्रयच्छतः सकाशादभिमानः क्षीणपुण्येनमयाभिक्षितः याचितः क्षीणे
भा०च नपुण्येनेतिवादृष्टांतेएवसंबधः यथाः धनः ईश्वरात् आवर्तिनः फलीकारान्तुसतुषानुद्धलकणान्याचतेतद्वत्
३५ एवंनिस्पृहत्वंतस्यप्युक्तमित्याह तस्यहास्यंविनाअन्यमर्थमात्मनोनैवेवाच्छंति यद्दत्तंयेवलद्धेनमनसा
सन्तुष्टिर्येषांते ३६ प्रसंगेनमाह श्रीकर्णेति संपरेत्यमत्वाआगतमाकर्ण्यपथा नश्रद्दधेविश्वासंनचकारा

स्वाराज्यंपच्छतोमोयान्मानोमिभिक्षितोवत ईश्वरात्क्षीणपुण्येनफलीकारानिवाः धनः ३५
मैत्रेयउवाच नवैमुकुंदस्यपदारविंदयोरजोजुषस्तातभवादृशाजनाः वांछंतितद्दास्यमृतेऽ
र्थमात्मनोयदृच्छयालब्धमनःसमृद्धयः ३६ आकर्ण्यात्मजमायांतंसंपरेत्ययथागतं राजान
श्रद्दधेभद्रमभद्रस्यकुतोममः ३७ श्रद्धायवाक्यंदेवर्षेर्हर्षवेगेनधर्षितः वार्त्ताहर्तुरतिप्रीतोहा
रंप्रादान्महाधनं ३८ सदश्वंरथमारुह्यकार्त्तस्वरपरिष्कृतं ब्राह्मणैःकुलवृद्धैश्चपर्यस्तोमात्यबं
३० धुभिः ३९ शंखदुंदुभिनादेनब्रह्मघोषेणवेणुभिः निश्चक्रामपुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४०
सुनीतिःसुरुचिश्चास्यमहिष्यौरुक्मभूषिते आरुह्यशिबिकांसार्द्धमुत्तमेनाभिजग्मतुः ४१ तं
तं४ दृष्ट्वोपवनाभ्याशआयांतंतरसारथात् अवरुह्यनृपस्तूर्णमासाद्यप्रेमविह्वलः ४२ परिरेभेंग
जंदोर्भ्यांदीर्घोत्कंठमनाःश्वसन् विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं ४३ अथाजिघ्रन्मुहु
र्मूर्ध्निशीतैर्नयनवारिभिः ४४ स्नापयामासतनयंजातोद्दाममनोरथः अभिवंद्यपितुःपादावाशीर्भि
श्चाभिमंत्रितः ननाममातरौशीर्ष्णासत्कृतःसज्जनाग्रणीः ४५ सुरुचिस्तंसमुत्थाप्यपादावनतमर्भकं

अभद्रस्यममभद्रंकुतइतिमत्वा ३७ एषाप्यचिरंतद्वृत्तिदेवर्षेर्वाक्यंश्रद्धाय ३८ ब्राह्मणादिभिःपरिवृतः ३९ ४० अस्य
राज्ञोमहिष्योमध्येउत्तमंनिधायशिबिकांमवशिबिकांनरविमानमारुह्य ४१ उपवनस्याभ्याशसमीपे ४२ विष्वक्सेनांघ्रिसंस्प
र्शेनहतमशेषमघंबधंनंच यस्य ४४ जातउद्दामोमहान्मनोरथोयस्य ४५ अभिमंत्रितःपितुराशीर्भिःसहेतनक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुरुच्याः प्रीतिर्नास्ति भाविनेत्याह यस्येति नमंति अनुसरंति आपो यथा स्वयमेव निम्नं देशमवतरंति ४७ उहनुः दधनुः ४९
हे वीर वीर सुतो ध्रुव मातुः अभिषिच्यमानाभ्यां स्तनाभ्यां पयसा हाश्रुभावः ५० चिरं नष्टः दर्शनमप्राप्तः रक्षिता
रक्षिष्यति ५१ ५२ एवमिति व्यवहितं पित्राक्षिप्त लालनं परामृश्य जनैः स्तूयमानः ५३ पुरं वर्णयति तत्र तत्र
निचगुभिः सरंदैः फलमंजरीयुक्तैः पूगानां पोतैर्बालैः दृष्टैः नदिधैः सरंदैः उपस्कृतं प्रतिद्वारमित्युत्तरेणान्वयः

यस्य प्रसन्नो भगवान् गुणैर्मैत्र्यादिभिर्हरिः तस्मै नमंति भूतानि निम्नमापइव स्वयं ४७ उत्तमश्च ध्रुवश्चोभावन्योन्यं
प्रेमविह्वलौ अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः ४८ सुनीतिरस्य जननी प्राणेभ्योपि प्रियं सुतं उपगुह्य जहावा-
धिं तदंगस्पर्शनिर्वृता ४९ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलिलैः शिवैः तदाभिषिच्यमानाभ्यां वीर वीर-
सुवो मुहुः ५० तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः ५१
अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा यदनुध्यायिनो वीरा मृत्युं जिग्युः सुदुर्जयं ५२ लाल्यमानं
जनैरेवं ध्रुवं सभ्रातरं नृपः आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरं ५३ तत्र तत्रोपसंक्लृप्तैः
लसन्मकरतोरणैः सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः ५५ चूतपल्लववासःस्रक्मुक्तादाम-
विलंबिभिः उपस्कृतं प्रतिद्वारमपांकुंभैः सदीपकैः ५६ प्राकारैर्गोपुरागारैः शातकुंभपरिच्छदैः
सर्वतोलंकृतं श्रीमद्विमानशिखरद्युभिः ५७ मृष्टचत्वररथ्याट्टमार्गचंदनचर्चितं लाजाक्षतैः पुष्प-
फलैस्तंदुलैर्बलिभिर्युतं ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च

५८
च१ ५४ चूतपल्लवाश्च वासांसि स्रजश्च मुक्तादामानि च तेषां विलंबिभिः लंबनैः स्थितेषु कुंभेषु ५५ गोपुरैः अगारैः च शातकुंभाः म१
परिच्छदाः परिकरा येषु विमानानामिव शिखरैः द्युतिर्येषां ५६ चत्वरं अंगणं रथ्या महामार्गाः अट्टः उच्चस्थापरि निर्मिता
भूमिका मार्गाः वीथयः मृष्टाः संमार्जिताः अवतारदेयाय यस्मिन् ५७ सिद्धार्थः श्वेतसर्षपः अक्षता यवाः ५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० पृथिव्याश्चौषधिबीजानि यस्मात्तानीति विश्वसितो निश्चितवान् १३ मृगायुनाद्रुता अनुगता मृगीव १४ १५ रोदसी द्यावा
पृथिव्यौ तयोरन्तरमन्तरिक्षं अनुपृष्ठतः उद्यतमायुधं येन तं १६ यो धर्म्मज्ञ इति मतः स भवान् योषां मां कथं म
निष्यन् हनिष्यति १७।१८ अजराहृतो धास्यसि भारयिष्यसि २१ बर्हिषि यज्ञे या भवती देवतान्तरूप

इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा १३ प्रवेप
मानाधरणी निशाम्योदायुधं च तं गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता १४ तामन्वधा
स्क वत्तद्वैन्यः कुपितोत्यरुणेक्षणः शरं धनुषि संधाय यत्र यत्र पलायते १५ सा दिशो विदि
शो देवी रोदसी चान्तरं तयोः धावन्ती तत्र तत्रैनं ददर्शानूद्यतायुधं १६ लोके नाविंदत त्राणं
वैन्यान्मृत्योरिव प्रजाः त्रस्ता तदा निववृते हृदयेन विदूयता १७ उवाच च महाभागं ध
४६ र्मज्ञापन्नवत्सल त्राहि मामपि भूतानां पालनेवस्थितो भवान् १८ स त्वं जिघांससे कस्माद्दीनामकृतकि
ल्बिषां अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः १९ प्रहरन्ति न वै स्त्रीषु कृतागःस्वपि जन्तवः किमुत
नु त्वद्विधा राजन् करुणा दीनवत्सलाः २० मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितं आत्मानं च प्रजाश्चे
मा कथमंभसि धास्यसि २१ पृथुरुवाच वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीं भागं बर्हिषि या वृं
च क्ते न तनोति च नो वसु २२ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः तस्यामेवं हि दुष्टायां दंडो नात्र न शस्य राम
ते २३ त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः २४
अमूषां क्षुत्परीतानामार्तानां परिदेवितं शमयिष्यामि मे बाणैर्भिन्नायास्तव मेदसा २५ ४६

णा भागं दत्ते भजेत वसुधान्यादिकं २२ गोपक्षे पाणां तु यवसं तृणं जग्धि अत्ति इत्यर्थः पयस्कं नैव दोग्धु धं अवति न
अत्रापराधे २३ आत्मनि देहे रुद्धानि मंदधे सर्वथा अन्नं भस्मादि इति यदा आह अमूषां प्रजानां मेदसा मांसेन २५

न

मिश्र२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदुक्तं पापां कथं हनिष्यसीति तत्राह पुमानिति तस्य वधोऽवध एव २६ यत्त्वोक्तं कथं मां धास्यसीति तत्राह त्वा
मिति तिलशस्तिलशः प्रमाणानि खंडानीत्येवंभूतामवस्थां नीत्वा २७ मन्युमयीं मूर्तिं बिभ्रतं कृतान्तं तुल्यत्वं मुख्य
त्वेन तु कृतान्तस्य मन्युमयी मूर्तिरिति २८ शुद्धसत्त्वतनुं देवमकस्मादितिदारुणं वीक्ष्यमाणं पृथुं पृथ्वी तुष्टाव
करुणोक्तिभिः मायया विन्यस्ता रचिता नानाघोरादितनवो येन गुणात्मनेन गुणाश्रयत्वेऽपि नियमानो यथावस्तुतः स्तो
निवृत्तो निरस्तो द्रव्यक्रियाकारकेषु अधिभूताध्यात्माधिदैवेषु विभ्रमोऽहंकारः तन्निमित्तोऽस्मयो रागद्वेषा

पुमान्योषिदुत क्लीब आत्मसंभावनोऽधमः। भूतेषु निरनुक्रोशो नृपाणां तद्वधोऽवधः॥ २६ त्वां स्त
ब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः। आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः॥ २७ एवं मन्युमयीं
मूर्तिं कृतान्तमिव बिभ्रतं। प्रणता प्राञ्जलिः प्राह मही संजातवेपथुः॥ २८ धरोवाच नमः परस्मै पुरु
षाय मायया विन्यस्तनानातनवे गुणात्मने नमः स्वरूपानुभवेन निर्धूतद्रव्यक्रियाकारकविभ्रमोर्म
ये २९ येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः। स एव मां हन्तुमुदायुधः स्वरा
डुपस्थितोऽन्यं शरणं कमाश्रये ३० य एतदादावसृजच्चराचरं स्वमाययात्माश्रयया वितर्क्यया।
तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांससि ३१ नूनं बतेशस्य समीहितं जनैस्त
न्मायया दुर्जययाकृतात्मभिः। न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ३२

दयस्य यस्मिन् तस्मै २९ अहो सर्वजीवाश्रयत्वेन सृष्टां मां कथं हन्तुं प्रवर्तसे इत्याह येन विधात्रा आत्मनां जीवानां
आयतनमहं विनिर्मिता यतो यस्यां मयि गुणसर्गस्य चतुर्विधभूतग्रामस्य संग्रहो यस्याः स्वराट् स्वतंत्रः ३० सृष्टिसंहार
कर्तृकोऽहमेवेति चेत् तथापि प्रजापालने प्रवृत्तस्य मद्वधोऽनुचित एवेत्याह एतदिति आत्माश्रयया जीवविषयि
ण्या ३१ अतो दुर्विज्ञेयमीश्वरचेष्टितमित्याह नूनमिति अकृतात्मभिः विक्षिप्तचित्तैः यः ईश्वरः स्वतंत्रः अकरोत्
ब्रह्माणं परतः इति तेन ब्रह्मणा चराचरमकारयत् यश्च स्वतः एकः परतो मायया अनेकः ३२

न२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं

ति१

भा०च० तस्माद् चिंत्यशक्तये केवलं नम इत्याह सर्गादि जन्मस्थितिभंगं अस्य जगतः अनुरुणद्धि आवृणोति करोति द्रव्याणि
४७ महाभूतानि क्रियाइंद्रियाणि कारकादेवाः चेतना बुद्धिः आत्मा अहंकारः तैः स्वशक्तिरूपैः समुन्नद्धाः समुत्क
टा निरुद्धाः शक्तयो यस्य ३३ प्राणिनां धारणार्थं मां रसातलादुद्धृत्य प्रजारक्षणे प्रवृत्तस्य मद्वधोन युक्त इति सक २२
रुणमाह द्वाभ्यां हे अज यस्त्वं भवान् स एव भवान् स्वनिर्मितं चराचरं जगत्सम्यक् स्थापयितुं आदिशूकरः सन्मां
स१ भ्रु अभ्युज्जहार ३४ एवं धराधरो वराहो अथ अपामुपस्थे उपरि मयि नावि आधारभूतायामवस्थिताः प्रजाः रक्षि

सर्गादि यो स्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः तस्मै समुन्नद्धनिरुद्धशक्तये
नमः परस्मै पुरुषाय वेधसे ३३ स वै भवानात्मविनिर्मितं जगद्भूतेंद्रियांतःकरणात्मकं वि
भो संस्थापयिष्यन्नज मां रसातलादभ्युज्जहारांभस आदिशूकरः ३४ अपामुपस्थे मयि
नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल स वीरमूर्तिः समभूद्धराधरो यो मां पयस्यु
ग्रशरो जिघांससि ३५ नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया न ज्ञायते मो
हितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ३६ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृ
थुविजयधात्रीनिग्रहः सप्तदशोऽध्यायः

तु मिषुः वीरमूर्तिः पृथुरूपः समभूत् य एवंभूतः स त्वं पयसि निमित्ते मां जिघांससीति विचित्रमित्यर्थः ३५
तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति वैमुत्यन्यायेन उपसंहरति नूनमिति तस्येश्वरस्य गुणसर्गरूपया मा
यया मोहितं चित्तमेव वर्त्म येषां मोहितानि चित्तवर्त्मानि येषामिति वा तैर्जनैरीश्वराणां हरिभक्तानामपि राम
ईहितं न ज्ञायते किं पुनः तस्य परमेश्वरस्य अतः परमेश्वरतद्भक्तेभ्यो नम एव केवलं वीराणां जि ४७
तेंद्रियाणां यशः कुर्वंतीति तेभ्यः यथा वीराणां यशो वर्द्धते तथा चेष्टतां अनुयथेष्टमिति भावः ३६ चतुर्थ

ये२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० अशादशेमहीवाक्यमाहवत्सपात्रादिभेदेन: पृथ्व्यादिभिस्तन्मध्ये ग्रासा चतुर्दशाध्यायेन १ हेअभिभोप्रभोयद्वा
मोदेवअभिमयंयथाभवत्येवंसन्नियच्छ श्रावितंविज्ञापितंमद्वाक्यंनारदो कर्त्तव्यइत्याहवुधोहिसर्वत्रसार धीर
मादत्ते २ मयिजीर्णा ओषधिरूपायणंग्रहणंनिवर्तुं उपायनसर्वे सिद्धतिनान्यथेत्याह अस्मिन्निति त्रि
भिः पुंसांश्रेयसःपुरुषार्थस्यप्रसिद्धयेअस्मिल्लोकेकृष्यादयः अमुष्मिंश्चलोके अग्निहोत्रादयोयोगाउपाया

मैत्रेयउवाच इत्थंपृथुमभिष्टुय रुषाप्रस्फुरिताधरं। पुनराहावनिर्भीतासंस्तभ्यात्मानमात्मना १
धरोवाच सन्नियच्छाभिभोमन्युंनिबोधश्रावितंचमे सर्वतःसारमादत्तेयथामधुकरोबुधः २ अ
स्मिल्लोकेथवामुष्मिन्मुनिभिस्तत्वदर्शिभिः दृष्टायोगाःप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धये ३ ताना
तिष्ठतियःसम्यगुपायान्पूर्वदर्शितान् अवरःश्रद्धयोपेतउपायान्विंदतेंजसा ४ ताननादृत्य
योविद्वानर्थानारभतेस्वयं तस्यव्यभिचरंत्यर्थाआरब्धाश्चपुनःपुनः ५ पुरासृष्टाह्योषधयोब्र
ह्मणायाविशांपते भुज्यमानामयादृष्टाअसद्भिरधृतव्रतैः ६ अपालितानादृताचभवद्भिर्लो
कपालकैः चोरीभूतेथलोकेहंयज्ञार्थेग्रसमोषधीः ७ नूनंताक्षीणामयिकालेनभूयसा त विरुध ३
~~सिनं~~ त्रदृष्टेनयोगेनभवानादातुमर्हति ८ वत्सकल्पयमेवीरयेनाहंवत्सलातव धोक्षेक्षीरमया
न्कामानअनुरूपंचदोहनं ९

दृष्टाःप्रयुक्ताअनुष्ठिताश्चपूर्वैर्दर्शितानन्अवरोर्वाचीनः ४ अविद्वान्दोषीतिवाव्यभिचरंतिनसिद्ध्यंतिं ५ सहेतु विद्वान १
कमुपायमाहपुरेतिषड्भिः ६ भवद्भिरितिराजसामान्याभिप्रायेण अपालिताचोराद्यनिवारणात् अनादृता सोर
चयज्ञादिप्रवर्तनाभावात् यज्ञार्थेअसंगलितवती अन्यथा धृतव्रतैः भुक्तानप्रियं तेनतेअयज्ञादेयोनसिद्धेन
नूइतिभावः ७ क्षीणाजीर्णाः ८ वत्सदोहनंपात्रंदोग्धारंचैषकल्पयधोक्षेप्रपूरयिष्यामि ९

दोह १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओजः इंद्रियशक्तिः ४ वर्ष लं२ द्रा२

भा०चं०

भूतानामभीप्सितमन्नं ऊर्जस्वत् बलप्रदं १० अपगते पित्रं तोवर्षतोयथा मे सर्वत्रावर्त्तेत ११ १२ प्रसंगादर्थान्तरमाह तेथति यथापृथुः एवं सर्वत्र वाक्ये परेपि सारमाददते प्रस्तुतमनुवर्त्तयति ततोन्ये वत्सपादयः पंच दुदुहुः पृ दू०

थुनाभावितां वशीकृतां १३ देवीं पृथ्वीं वाङ्मनः श्रवणं चैव ग्रहणादिंद्रियाणां पात्रं १४ सोममम्रतं वीर्यं म सोऽकगं सौदर्यं ।

नःशक्तिं बलं देहशक्तिं च तदेव पयः १५ सुरासवं च गात्रादिमद्यं १६ मधु वाङ्माधुर्य्यं तत्सहितं १७॥

४८ दोग्धारं च महाबाहो भूतानां भूतभावन अन्नमीप्सितमूर्जस्वद्भगवान्वांछते यदि १० समां च

कुरु मां राजन् देववृष्टं यथा पयः अपर्त्तावपि भद्रं ते उपावर्त्तेत मे प्रभो ११ इति प्रियं हितं वाक्यं भुव

आदाय भूपतिः वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः १२ तथापरे च सर्वत्र सारमाददते

बुधाः ततोन्ये च यथाकामं दुदुहुः पृथुभावितां १३ ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तम वत्सं बृह

स्पतिं कृत्वा पयः छंदोमयं शुचि १४ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन् हिरण्मयेन पात्रे

ण वीर्यमोजो बलं पयः १५ दैत्या दानवा वत्सं प्रह्लादमसुरर्षभं विधायादुदुहुन् क्षीरमयः

पात्रे सुरासवं १६ गंधर्वाप्सरसो धुक्षन् पात्रे पद्ममये पयः वत्सं विश्वावसुं कृत्वा गांधर्वं मधुसौभ

गं १७ वत्सेन पितरोर्य्यम्णा कव्यं क्षीरमधुक्षत आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः॥ ४८

१८ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीं सिद्धिं नभसि विद्यां च ये च विद्याधरादयः १९ अ

न्ये च मायिनो मायामंतर्द्धानाद्भुतात्मनां मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीं २० श्रीरामः श्री॥

अ० । कव्यं पितृणामन्नं आमपात्रे पक्वे मृन्मये अधुक्षत दुदुहुः १८ संकल्पनामयीं अणिमादिसिद्धिं ये विद्याधरादय

स्ते च तमेव वत्सं प्रकल्प्य नभस्येव पात्रे खेचरत्वादिरूपां विद्यां दुदुहुः १९ अन्ये च किंपुरुषादयः अंतर्द्धानेनाद्भु

तात्मनां संबंधिनीं मायां धारणामयीं संकल्पमात्रप्रभवां २०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतेशो रुद्रः स एव वत्सो येषां क्षतजं रुधिरं तदेवासवं २१ अहयो निःफणाः दंदशूका वृश्चिकादयः सर्पाः सफणाः त
एव कद्रुसंततिजा नागाः विलपात्रे मुखे २२ यवसं तृणं गावृषं रुद्रवाहं वृषभं मृगेन्द्रेण त्वतुरेणान्वयः २३ क्रव्यं मां
सं चरं कीटादि अचरं फलादि २४ अनुक्तसंग्रहार्थमाह सर्वे स्वजातौ मुख्यस्तेन वत्सेन २६ उपसंहरति एवमिति

यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः। भूतेशवत्सा दुदुहुः कपाले क्षतजासवं २१ तथाहयो दंद
शूकाः सर्पा नागाश्च तक्षकं। विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः २२ पशवो यवसं क्षीरं वत्सं कृत्वा
च गोवृषं अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः २३ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे
सुपर्णवत्सा विहगाश्चरं चाचरमेव च २४ वटवत्सा वनस्पतयः पृथग्रसमयं पयः। गिरयो हिमवद्वत्सा
नु ५ नानाधातून्स्वसानुषु २५ सर्वे स्ववत्समुख्येन स्वे स्वे पात्रे पृथक्पयः। सर्वकामदुघां पृथ्वीं दुदुहुः पृथु
भाविताः २६ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह २७
ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः २८ चूर्णय
न्स्वधनुःकोट्या गिरिकूटानि राजराट्। भूमंडलमिदं वैण्यः प्रायश्चक्रे समं विभुः २९ अथास्मिन्
भगवान्वैण्यः प्रजानां वृत्तिदः पिता। निवासान्कल्पयांचक्रे तत्र तत्र यथार्हतः ३० ग्रामान्पुरः प
त्तनानि दुर्गाणि विविधानि च। घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ३१ प्राक्पृथो
रिह नैवैषा पुरग्रामादिकल्पना। यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः ३२ चतुर्थस्कंधे पृथुविजये
ऽष्टादशोऽध्यायः १८

स्वन्नं अभीष्टमन्नं तमेव क्षीरभेदं दुदुहुः दोहः पात्रं २७ इमां पृथ्वीं धनुषोग्रेण गिरिशृंगाणि चूर्णयन् राजराट् राज्ञां
राजा २९ ३० ग्रामादयस्तु दिश्यन्याः पुरो हट्टादिमत्यः ता एव महत्यः पत्तनानि दुर्गाणि विविधानि यथाहयुहस्स
१ तिः ओदकपार्वतवार्क्ष्यैरिणधान्वनं तथेति घोषान् आभीराणां निवासान् शिबिरं सेनानिवेशस्थानानि ग
त्सहितानाकरान् स्वर्णादिस्थानानि खेटाः कर्षकग्रामाः खर्वटाः पर्वते प्रांतग्रामाः तांश्च ३२ चतुर्थस्य

व्रजाः गवां निवास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० उनविंशेश्वमेधाग हयापहरणात्पृथोः इंद्रं हंतुं प्रवृत्तस्य धात्रा वारणमुच्यते १ हयमेधशतेन निमित्तेन अदीक्षित
दीक्षितोभूत् शताश्वमेधसंकल्पमकरोदित्यर्थः ब्रह्मावर्ते सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं देवनिर्मितं देशं मत्रे २
ब्रह्मावर्तं प्रचक्षते १ आत्मनः स्वस्य कर्मातिशेत इत्यतिशयं अभिप्रेत्य ज्ञात्वा तदिति तं पृथोर्यज्ञमहोत्सवं न
ममर्षन सेहे २ अतिशयमेव दर्शयति यत्रेति सप्तभिः साक्षादन्वभूयत प्रत्यक्षेण दृश्यत ३ ४ सिद्धादयश्च
न्वी तं हरिमन्वीयुरित्यन्वयः ५ ६ धर्मदुघा हविर्दोग्ध्री धेनुः सती ७ ऊहुः वहंति स्म सर्वरसान् इक्षुद्राक्षा।

मैत्रेय उवाच अथादीक्षत राजा तु हयमेधशतेन सः ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती १ त
दभिप्रेत्य भगवान् कर्मातिशयमात्मनः शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवं २ यत्र यज्ञपतिः सा
क्षात् भगवान् हरिरीश्वरः अनुभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ३ अन्वितो ब्रह्मशर्वाभ्यां लो
कपालैः सहानुगैः उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः ४ सिद्धविद्याधरा दैत्या दानवा गुह्यका
४९ दयः सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः ५ कपिलो नारदो दत्तो योगेशाः सनकादयः तमन्वीयुर्भा
गवता ये च तत्सेवनोत्सुकाः ६ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती दोग्धि स्माभीप्सितानर्थान्
यजमानस्य भारत ७ ऊहुः सर्वरसान् नद्यः क्षीरदध्यन्नगोरसान् तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः धु २
८ सिंधवो रत्ननिकरान् गिरयोन्नं चातुर्विधं उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ९ इति
चाधोक्षजेशस्य पृथोस्तु परमोदयं असूयन् भगवानिंद्रः प्रतीघातमचीकरत् १० ८७ ८७ राम

४९ दिरसान् क्षीरं च दधि चान्नं च पानकादि गोरसान् तांश्च तां अभूरीणि विस्तृतानि वर्ष्माणि शरीराणि येषां ते फला
दि प्रासूयंत मधुश्च्युतो मधुस्राविणः संतः ८ चतुर्विधं भक्ष्यं भोज्यं चोष्यं लेह्यं च ९ अधोक्षज ईशो नाथो यस्य
परमुदयाभिवृद्धिर्यस्मिन् तत्कर्म्मासूयन् असहमानः प्रतिघातं विघ्नं चकारेत्यर्थः ॥ १० श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धर्मविभ्रमः धर्मेयि १ गो २
१२

पि २

वैन्ययज्ञपतिं विरुं यजमाने सति स्पर्द्धमान इंद्रस्तिरोहितः सन्नश्वमपहृतवान् ११ त्वरमानं धावंतं आमुक्तः प्र
तिमुक्तः अपिनद्धः आनद्धवत् सन्नद्धो वा मिर्णोः सज्ज इत्याहामरसिंहः पाषंडवेषं कवचमिव गृहीतवंतं इत्यर्थः ११ ग १
अधर्मे धर्मभ्रांतिकारी पाषंडं १२ १३ नमुंच निस्म हत्वं हंतु यज्ञहने [illegible]
म १

चरमेणाश्वमेधेन यजमाने यजुःपतिं वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ११ तमत्रिर्भगवाने
क्षत्त्वरमाणं विहायसा आमुक्तमिव पाषंडं यो धर्मे धर्मविभ्रमः १२ अत्रिणा चोदितो हंतुं पृथु
पुत्रो महारथः अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् १३ तं तादृशाकृतिं वीक्ष्य मेने धर्मं श
रीरिणं जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुंचति १४ वधान्निवृत्तं तं भूयो हंतवेऽत्रिरचोदयत्
जहि यज्ञहनं तात महेंद्रं विबुधाधमं १५ एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा अन्वद्रवदभि
क्रुद्धो रावणं गृध्रराडिव १६ सोऽश्वं रूपं च तद्धित्वा तस्मा अंतर्हितः स्वराट् वीरः स्वपशुमादा
य पितुर्यज्ञमुपेयिवान् १७ तत्तस्य चाद्भुतं कर्म्म विचक्ष्य परमर्षयः नामधेयं ददुस्तस्मै विजिता
श्व इति प्रभो १८ उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः चषालयूपतश्छन्नो हिरण्यरशनं विभुः
१९ अत्रिः संदर्शयामास त्वरमाणं विहायसा कपालखट्वांगधरं वीरो नैनमबाधत २० अत्रि
णा चोदितस्तस्मै संदधे विशिखं रुषा सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट् २१ वीरश्चाश्वमुपा
दाय पितृयज्ञमथाव्रजत् तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः २२ श्रीराम जयराम जय ३

यस्तं हतवंतं १४ ५ १६ तस्मै हित्वा तदर्थमुत्सृज्य १७ विचक्ष्य दृष्ट्वा १८ उपसृज्य सृष्ट्वा तेन छन्नः सन् चषाला
लोयूपाये निक्षिप्तः काष्ठकंटकः तेन युक्तात् यूपात् हिरण्यनिर्मिता रशना यस्य तं रशना या दृष्ट्वा तेन छन्नो गोन्यो
रसेनो महितमेवोद्धृत्य यूपाग्रान्नीतवानित्यर्थः १९ २० २१ अवद्यं निंदितं रूपं मंदप्रज्ञा जगृहुः २२ २३

विनुः समर्थः १

पाखंड नाम निरुक्त्या

भा० च०

स्मा १

तद्धि वेदेऽश्वप्रतियातीति [illegible] बहुवचनेन चान्यपि गृहीतानीत्युक्तं २३ तत्प्रभृति पाखंडमार्गाः प्रवृत्ता इत्याह
एवमिति तेन गृहीतेषु पुनर्विसृष्टेषु २४ नग्ना जैनाः रक्तपटा बौद्धाः आदिशब्देन कापालिकादयः तेषु धर्मेषु धर्मप्र
मेषु धर्म ऐवायमिति सज्जनं इति हेयोः रन्ध्रयः पेशलेषु आपाततो रम्येषु वाग्मिषु हेतुनिचतुरेषु २५ शक्रवधाभिसंधितं क प २
सति: २ प्र १ ताभिप्रायं चोदितात् शास्त्रविधाद न्यवधस्तव न युज्यते २७ तद्धि धनं वयं करिष्याम इत्याहुः वयमिह यज्ञनाशकं त्व
स्म

५० यानि रूपाणि जगृहे इंद्रो हयजिहीर्षया तानि पापस्य खंडानि लिंगं खंडमिहोच्यते २३ एवमिंद्रे हरत्य
श्वं वैन्ययज्ञजिघांसया तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणां २४ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु
प्रायेण सज्जते भ्रांत्या पेशलेषु च वाग्मिषु ।। २५ तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः इंद्राय कुपि
तो बाणमादत्तोद्यतकार्मुकः २६ तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुःप्रेक्ष्यमसह्यरंहसं नि
वारयामासुरहो महामते न युज्यते चान्यवधः प्रचोदितात् २७ वयं मरुत्वंतमिहार्थनाशनं ह्वयाम
हे त्वच्छ्रवसा हतत्विषं आयातयामोपहवैरनंतरं प्रसह्य राजन् जुहुवाम तेऽहितं २८ इत्यामंत्र्य क्र
तुपतिं विदुरास्यर्त्विजो रुषा स्रुग्घस्तान् जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत २९ न वध्यो भवतामिं
प २ १ द्रो यद्यज्ञो भगवत्तनुः यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ३० श्रीराम श्रीराम श्रीराम

कीर्त्यैव हतप्रभमिंद्रमाह्वयामहे कैः अयातयामैः अगतवीर्यैरुपह्वैः पराक्रांतमंत्रैः अनंतरं च तेन त्वाहितं जुहवामहे ५०
ष्याम इ २८ अभ्येत्य प्राप्य स्रुग्घस्तेषां तान् २९ यमिंद्रं यज्ञेन जिघांसथ यज्ञेन इष्टाः सर्वे सुराः यस्य तनवः स इंद्रो भगवतो
वधार्हो न भवतीय दस्माद्यज्ञो नामा यमिंद्रो भगवत्तनुः स प्रथम आकूत्यां रुचेर्यज्ञोऽभ्यजायत स यामैः सुरगणैः ।।पृ।।
रपात् स्वायंभुवांतरमित्युक्तत्वात् ३०

नं १ अवतारः ततः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रतुः २

अतो वत्रीयसानेन सर्व्वमेव कर्त्तव्यं अन्यथा भूपः पाषंडरक्षतीत्याशयेनाहमिंद्रेणानुष्ठितं महदन्याय्यं पश्यत किमित्यपे
क्षायामाह धर्मस्य व्यतिकरं विपर्ययं पाषंडपथं ३१ तर्हि किमत्र युक्तमित्यत आह पृथुकीर्त्तेरिति एकेनोनं शतं यस्मिन्
तादृशः क्रतुप्रयोगः पृथोर्भूयात् पृथुरिति पाठे एकोनशतं क्रतवो यस्य तादृशोपि महेंद्रात् पृथुकीर्त्तिर्भूयादित्यर्थः
तदेवमृत्विजः प्रत्युक्ताः पृथुं प्रत्याह अलमिति ३२ आत्मने वात्मने महेंद्राय रोषं कर्त्तुं नार्हसि तत्र हेतुः उभावपीति
३३ तथापि क्रतुसमाप्तिमेव ध्यायंतं प्रत्याह यस्मिन् यज्ञविघ्नचिंतां मास्मकृथाः यद्यस्माद्दैवहतं कार्यं कर्त्तुं ध्याय

तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः इंद्रेणानुष्ठितं राज्ञः कर्म्मैतद्विजिघांसता ३१ पृथुकीर्त्तेः पृ
थोर्भूयात्तर्ह्येकोनशतक्रतुः अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ३२ नैवात्मने महेंद्राय
रोषमाहर्त्तुमर्हसि उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ३३ मास्मिन्महाराज कृथाः स्म चिंतां नि
शामयास्मद्वच आदृतात्मा यद्ध्यायतो दैवहतं नु कर्त्तुं मनोतिरुष्टं विशते तमोधं ३४ क्रतुर्विरमता
मेष देवेषु दुरवग्रहः धर्मव्यतिकरो यत्र पाषंडैरिंद्रनिर्मितैः ३५ एभिरिंद्रोपसंसृष्टैः पाषंडैर्हारि
भिर्जनं हीयमानं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ३६ भवान्परित्रातुमिहावतीर्णो धर्मं जनानां
समयानुरूपं वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य ३७

तो मनः मुनिष्ठितं अतिरुष्टं सत् अंधतमो मोहं विशति ननु शांतिरलभेत ३४ अत एव क्रतुर्विरमतु ननिंद्रः किं न निवार्य्यते अ नव
त आह यतो देवेषु दुराग्रहो भवतीति यत्र क्रतौ ३५ इंद्रदुराग्रहकृतमनर्थं पश्येत्याह एभिरिति इंद्रेणोपसृष्टैरधिष्ठितैः हारि
भिश्चित्ताकर्षकैः य इंद्रस्ते अश्वं मुष्णातीति तथा यज्ञाय द्रुह्यतीति तथा तेन सृष्टैः ३६ ततो मम किमिति चेत्तत्राह भ
वानिति द्वाभ्यां सांख्ययोगादिनो सिद्धानां नानुरूपं धर्मं वेनस्यान्यायात् लुप्तं परित्रातुं तद्देहादिह्मीः कलेव मवतीर्णोसि ३७
त्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च०

अस्य विश्वस्योद्भवं विचार्य्यं येरुत्पादितो सि तेषां विश्वसृजां संकल्पिपीपृहि आर्षः प्रयोगः पूरयेत्यर्थः प्रचंडो यः पाषंडमा
र्गः स चैंद्री मायोपधर्मजननी तां जहि ३८ तथा कृत्वा यज्ञाय हे हित्वा वात्सल्यं स्नेहं च कृत्वा इंद्रेण सह संधानं च कृतवा
नु ३९ कृतमवभृथस्नानं येन स तस्मै ४० गुप्तानां वाक्यं तथेति ४२ चतुर्थे एकोनविंशः विंशेतु विष्णुना साक्षा

त्वनांसंकल्पं १

सत्वं विभूतये ह्यस्य भवं प्रजापते संकल्पनां विश्वसृजां पिपीपृहि ऐंद्रीं च मायामुपधर्ममातरं प्र
चंडपाषंडपथं जहि प्रभो ३८ श्रीमैत्रेय उवाच इत्थं स लोकगुरुणा समादिष्टो विशांपतिः त
था च कृत्वा वात्सल्यं मघोनापि च संदधे ३९ कृतावभृथस्नानाय पृथवे भूरिकर्मणे वरान्ददु
स्ते वरदा ये तद्बर्हिषि तर्पिताः ४० विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः आशिषो युयुजुः

५१

क्षत्तरादिराजाय सत्कृताः ४१ त्वयाहूता महाबाहो सर्व एव समागताः पूजिता दानमानाभ्यां दे
वर्षिपितृमानवाः ४२ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुविजये एकोनविंशोध्यायः १९
मैत्रेय उवाच भगवानपि वैकुंठः साकं मघवता विभुः यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत
१ श्रीभगवानुवाच एष तेकारषीद्भंगं हयमेधशतस्य ह क्षमापयत आत्मानममुष्य क्षंतुमर्ह
सि २ सुधियः साधवो लोके नरदेव नरोत्तमाः नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ३
पुरुषा यदि मुह्यंति त्वादृशा देवमायया श्रम एव परं जातो दीर्घया वृद्धसेवया ४ श्रीराम

राम
५१

तु पृथोर्यज्ञेनुशासनं वरदानप्रसंगेन प्रीतिश्चान्योन्यमीर्यते १ मघवता साकं इंद्रेण सह वर्त्तमानः १ आत्मा
नं त्वां क्षमां कारयतोमुष्य २ यर्हि यस्मात् कलेवरमात्मानं भवति अतस्तदभिमानेन भूतानि नाभिद्रुह्यंति ३ ४

अविद्यास्वरूपैज्ञानं ततः कामः ततः कर्म्मतैरारब्ध इति विद्वान् अत एव प्रतिबुद्ध आत्मज्ञ अस्मिन्नेवोषज्जते ५ तथापि पुत्रादिमम
त्वेन भूतद्रोहेणासंगो भवेत् तत्राह आसंकाइति ६ प्रतिबोधक्रमं विवृण्वन् देहानुषंगाभाव माह एकाइतिद्वाभ्यां असावात्मनो सार
अन्नमयादिछिन्नोप्यात्मा देहात्परो भिन्नः तत्र नव धावेत्त्वे क्षणेपन भेदं साधयति नवभिः पदैः देहोहि बाल्ययुवादि भेदादनेकः मलिनः अजडः अप्र
१ सगुण अस्वकारणभूतगुणादिभिरावृत अद्रष्टः आत्मा तु नैवं अतोभिन्नः ७ आत्मस्थं स्वस्मिन् स्थितं प्रकृतिस्थो सत्वेदस १
असौ अ... नोस्मृ १

काम १ अतः कायमिमं विद्वानविद्याकर्म्मभिः आरब्ध इतिनैवास्मिन् प्रतिबुद्धोनुषज्जते असंसक्तःशरी
स्पा २ रेस्मिन्नमुनोत्पादितेगृहे अपत्ये द्रविणे वापिकःकुर्यान्ममतांबुधः ६ एकः शुद्धः स्वयंज्योति
र्निर्गुणोसौगुणाश्रयः सर्वगोनावृतःसाक्षी निरात्मात्मात्मनःपरः ७ य एवं संतमात्मानमा
त्मस्थं वेद पुरुषः नाज्यते प्रकृतिस्थोपि तद्गुणैः समपि स्थितः ८ यः स्वधर्म्मेण मां नित्यं निराशी
श्रद्धयान्वितः भजते शनैकैस्तस्य मनोराजन्प्रसीदति ९ परित्यक्तगुणः सम्यग्दर्शनोविशदा
शयः शांतिंमे समवस्थानंब्रह्मकैवल्यमश्नुते १० उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनः
नां कूटस्थमिममात्मानंयोवेदाप्नोतिशोभनं ११ श्रीराम श्रीराम श्रीराम श्रीराम

पि
पिदेहस्थोनदिकारैर्न लिप्यते यतः समपि ब्रह्मणि स्थितः ८ इयमवस्था कस्यात्स्यात् इत्यपेक्षायामाह यः १९
स्वधर्म्मेणेतिचतुर्भिः ९ यर्हि विशदाशयः प्रसन्नमनाः तदा परित्यक्तगुणः सन् सम्यग्दर्शनो भूत्वा शांतिमश्न
नर तेशांतिमेवाह मे मम सम्यग्गोदासीन्येअवस्थानमेष ब्रह्मणेदेवकैवल्यमश्नुते १० सम्यग्दर्शनमेवाह उदासीन
मेवात्मानं द्रव्यज्ञानक्रियात्मनां देह ज्ञानक्रियात्मनां देहज्ञानकर्म्मेंद्रियमनसाम ध्यक्षमिव स्थिमात्मानंयोवेद ११
त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च०

कथं

स

संसारिणः कूटस्थत्वमत आह भिन्नं लिंगस्य गुणप्रवाहः संसारः भिन्नत्वे हेतुः द्रव्याद्यात्मकस्य तत्र चेतना चिदाभासः ११
अतो दृश्यासु प्राप्तासु हर्षशोकादि भिन्नं विक्रियते १२ त्वं च सूरि... अतो सुखदुःखे च सम सत्समानतन्नमम धर्मा
अतो दृश्यासु प्राप्तासु हर्षशोकादि भिन्नं विक्रियते १२ ... कथमेकेन मयाकर्तुं शक्यते तत्राह
धर्मादयस्य जितानीन्द्रियाणि आशय अर्थेन सह त्वं अखिललोकरक्षणं विधत्स्व कथमेकेन मयाकर्तुं शक्यते तत्राह
धर्मायस्य जितानीन्द्रियाणि आशयश्च येन सत्वं अखिललोकरक्षणं विधत्स्व कथमेकेन मया ...
मयेश्वरेण उपक्लृप्ताः संपादितायेऽखिलालोका अमात्यादयस्तैः संयुतः १३ ननु रक्षणं दंडादिसापेक्षमतस्ता
पान्यहापुण्यं करिष्यामीति निवेदनं आह अयइति यद्यस्मात्संप... परलोके प्रजाभिः कृतात्सुकृतात्षष्ठ
मंशं हरति अरक्षणाद्दोषमाह अन्यथा प्रजाभिर्हतं पुण्यं यस्य सः प्रजानामघमत्ति पापं भुंक्ते अन्वेषयस्य

भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः दृश्यासु संपत्सु विपत्सु सूरयोन
स्म: २ विक्रियंते मयि बद्ध सौहृदाः १७ समानो त्तमम धर्माधर्मः सुखवद्दुःखे च जितेंद्रियाशयः ११
मयोपक्लृप्ता अखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणं १३ अयः प्रजापालनमे
वराज्ञो यत्सांपरायसुकृतात्षष्ठमंशं हर्तान्यथा हृतपुण्यः प्रजानामरक्षिताकरहारो घम
त्ति १४ एवं द्विजाग्र्यानुमतानुवृत्त धर्मप्रधानोन्यतमो विनास्याः कृत्स्नेन कालेन गृहोपयाता
न्द्रष्टासि सिद्धाननुरक्तलोकः १५ व... रं च मत्कंचनमानवेंद्र वृणीष्व तद्गुणशील यंत्रि
तः नाहं मखेर्वै सुलभस्तपोभिर्योगेन वा यः समचित्तवर्ती १६

सा

या। विवरणं करहारः सन्नरक्षिता चेत् १४ एवं च मोक्षोप्यनायासेन भविष्यतीत्याह द्विजाग्र्याणामनुमतं आचं अनुवृत्त अपरं
तु २ परा प्राप्तो यो धर्मः स एव प्रधानं अर्थकामौ प्रासंगिकौ यस्य अन्यतमः अतिशयेनान्यधर्मादिष्वनासक्त इत्यर्थः
एकपद्यपाठे धर्मप्रधानाच्चन्यतमौ यस्येत्यर्थः अस्याः पृथिव्याः अविनाश्यनु अल्पेन कालेन गृहागतानुसनका
दीन्द्रक्ष्यसि अनुरक्तो लोको यस्मिन्सः १५ मत्तु मत्तः सकाशात् किंचन वरं वृणीष्व गुणाः शमादयः शीलं निर्म
त्सरादि स्वभावं सोऽरहं यं त्रितः वशीकृतः तद्धि हेतोः मखादिभिर्नाहं सुलभः यतः समचित्तेषु योगे वर्तिषु

६२

५२

५२

अर्थकामौ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ क्षमापयितुं पादयोः स्पृशन्तं स्वेन कर्मणाऽश्वापहरणेन व्रीडितं प्रेम्णा परिष्वज्य १८ भगवान् प्रस्थानाभिमुखोऽप्यनुग्रहेण
विलंबितः सन् प्रस्थप्रयाणोन्मुखं वानिति द्वयोरन्वयः कथंभूतः उपहृतं अर्पितं महंर्णयस्मै समुज्जिहानया समुद्गच्छ
न्त्या वर्द्धमानया भक्त्या गृहीतं चरणांबुजं यस्य १९ पद्मपलाशवदक्षिणी यस्य तथाभूतः सन् एनं पृथुं पश्यन् २० भग
वन्तस्तत्कृपः किंचिदुक्तवान् स्वभक्त्युद्रेकमाह स इति द्वाभ्यां वाष्पविन्दुकण्ठत्वेन तूष्णीमवस्थितः सन् अमुं हरिं हृदो

श्रीमैत्रेय उवाच स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् अनुशासित आदेशं शिरसा जगृहे हरेः १७
स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह १८ भगवानथ विश्वा
त्मा पृथुनोपहृतार्हणः समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः १९ प्रस्थानाभिमुखोऽप्येनमनुग्रह
विलंबितः २० पश्यन् पद्मपलाशाक्षो न प्रतस्थे सुहृत् सतां स आदिराजो रचिताञ्जलिर्हरिं विलोकि
तुं नाशकद् अश्रुलोचनः न किंचनोवाच स वाष्पविक्लवो हृदोपगुह्यामुम् अधाद् अवस्थितः २१ अथा
वमृज्याश्रुकला विलोकयन्न् अतृप्तदृग्गोचरमाह पूरुषम् पदा स्पृशन्तं क्षितिम् अंस उन्नते विन्यस्तहस्ताग्र
मुरंगविद्विषः २२ पृथुरुवाच वरान् विभो त्वद्वरदेश्वराद् बुधः कथं वृणीते गुणविक्रियात्मनाम् ये नारकाणा
मपि सन्ति देहिनां तानीश कैवल्यपते वृणे न च २३ न कामये नाथ तदप्यहं क्वचिन् न यत्र युष्मच्चरणाम्बुजा
सवः महत्तमान्तर्हृदयान् मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः २४

य१ पगूह्य आधात् धृतवान् २१ अश्रुप्रयोर्दृशोर्गोचरं विषयभूतं पदा क्षितिं स्पृशन्तमित्यनयं भावः नखलु देवाः पदा भुवं स्पृ
हारा२ शन्ति अंसः स्कंधः परवक्षोन्नतं हरिरात्मानं विस्मृतवानिवेति अतएव स्खलनं परिहर्तुं गरुडस्योन्नते स्कन्धे विन्यस्तं हस्ताग्रं येन
तं २२ वरदेश्वराणां ब्रह्मादीनां ईश्वरात् वरप्रदात्त्वत्तः सकाशात् बुधः कथं वरान् वृणी
न१ ते कीदृशान् गुणविक्रियः इति गुणविक्रियो हंकारः स एवात्मा येषां तेषां ब्रह्मादीनां संबंधिनः देहाभिमानिनां भोग्यानिति
न२ वा तथा चेत् बुध एवं भवतीत्यर्थः अनुशंसितत्वात् पीत्याह यइति बुध एवाहमपि न वृणे इति समुच्चयार्थः कारः २३ कैवल्य
पद इत्यसंबोधनात् कैवल्यं परित्यजतीति मार्गे कीत्याह महत्तमानां मनोहृदयानां मुखद्वारेण निर्गतो भगवत्पदाम्भोजमकरं

दोपगाः श्रवणादिसुखं यत्र नास्ति तादृशं चेत्तर्हि कैवल्यं तर्हि ... के चित्कदाचि
दपि न कामये सेन दाह यशः श्रवणपकर्णानामयुतं विधत्स्व ननु कोऽप्येवं न त्तत्त्वा
नु किमन्यच्चिंतयेत्याह एष मे वरः २४

दर्शितं कां
पप २

नेति

च २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टि२

भा०च० ननु तर्हि केवल्याभाववरागद्वेषाद्याकुलानां भक्तिसुखमपि न स्यादित्याशंक्याह स इति भवत्पदांभोजसुधायाः कणोल्लेशा
तत्संबंधी यो ऽनिलः स एव दूरादपि विधियसीः श्रवणमात्रमित्यर्थः विस्मृतं तत्त्ववर्त्म येः कुयोगिभिस्तेषामपि पुनः स्मृ
तिं आत्मज्ञानं वितरति अतोनेन खलु भक्तानां रागादिसंभवः अतो नो अस्माकं सारग्राहिणामेभिर्वरैरलं भक्तावेव मोक्षादि २३
सर्वसुखांतर्भावादिति भावः २५ ननु भक्तिर्मुक्तिफलैवत्यतः फलं विहाय साधनं भवतः कोमोयग्रह इत्याशंक्याह
हे सुश्रवः मंगलकीर्ते ते शिवं यशः सतां संगमे यः सकृदपि यदृच्छयापि उपशृणोति गुणज्ञः श्रीवत्सः पशुं विनान्यः

स उत्तमश्लोक महन्मुखच्युतो भवत्पदांभोजसुधाकणानिलः स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां
टि२ कुयोगिनां नो वितरत्यलं वरैः २५ यशः शिवं सुश्रव आर्यसंगमे यदृच्छया चोपशृणोति ते स
कृत् कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया २६ अथा भजे त्वाखिलपु
५३ रुषोत्तमं गुणालयं पद्मकरेव लालसः अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्व
च्चरणैकतानयोः २७

कथं विरमेत् गुणातिशयं सूचयति श्रीर्यत् यश एव प्रकर्षेण वृतवती गुणानां सर्वपुरुषार्थानां संग्रहं
स्वस्मिन्समाहारः तदिच्छया २६ अतो लक्ष्मीरिवान्यवरत्यागेन त्वामेवाहं भजे इत्याह अथेति लाल राम
सः उत्सुकः सन् कर्मणि क्रियमाणे यथेंद्रेण सह कलिः एवं भक्तावपि किं लक्ष्म्या सह कलिः स्यादिति
वितर्कयति एकस्मिन्पतौ स्पर्द्धमानयोरावयोः अपि किं कलिर्न स्यादिति काक्वा वितर्कः ननु पर्यायेण ५३
सेवायां न स्यात् नैवं कृत त्वच्चरणयोरेवैकस्तानः मनोविस्तारो याभ्यां तयोः २७ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म.स्क.४

भवतु वा कलिः तथाऽपि भजे यमेव त्वाह जगज्जनन्यां वैशसं विरोधः स्यादेव तत्र हेतुः यस्मात् कर्मणि नः समीहितं इच्छाभ
वति तथापीन्द्रविरोधमत्पक्षपातवल्लक्ष्म्या पितं वै पक्षपातादेव स्याहित्याह फल्गु तुच्छमपि तत्र बहु करोषि यतो दीनेषु
वत्सलः स्व स्वरूपानन्दस्वरूप एव तथा किं प्रयोजनं तां नाद्रियसे इत्यर्थः २८ यतस्त्वं दीनवत्सलः अतएव सा धन्या
अपि १ निष्कामाः अथ ज्ञानानन्तरमपि त्वां भजन्ति कथं भूतं मायागुणानां विभ्रमो विलासस्तस्योदयः कार्यं निर १

जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितं करोषि फल्गु अप्युरु दीनवत्सलः स्व एव धिष्ण्ये
ऽभिरतस्य किं तया २८ भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयं भवत्पदानुस्मरणादृते स
तां निमित्तमन्यद्भगवन्न विद्महे २९ मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजन्तमात्थ यत् वाचा नु तं
कर्म करोति मोहितः ४ त्या यदि ते जनोऽसितः कथं पुनः ३० त्वन्मायया ऽद्धा जन ईश खण्डितो यदन्यदाशास्त ऋतात्मनोऽबुधः य
था चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुं ३१ मैत्रेय उवाच इत्यादिराजेन नुतः स विश्वदृ
मदीयां ५ क् तमाह राजन्मयि भक्तिरस्तु ते दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजां ३२ तत्त्वं कुरु
मयाऽऽदिष्टमप्रमत्तः प्रजापते मदादेशकरो लोकः सर्वत्राप्नोति शोभनं ३३ श्रीमैत्रेय उवाच इति
वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद्वचः पूजितोऽनुगृहीत्वैनं गन्तुं चक्रेऽच्युतो मतिं ३४ देवर्षिपि
तृगन्धर्वसिद्धचारणपन्नगाः किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ३५ यज्ञेश्वरधिया राज्ञा वा
ग्वित्ताञ्जलिभक्तितः सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ३६

तोऽयस्मिन् तत् तं किमर्थं भजन्ति तत्राह भवत्पदानुस्मरणात्तु विनाऽन्यत्तेषां निमित्तं फलं न विद्मः २९ वरैः प्रलोभनं
च कृपालोस्तव न तु चित्तमित्याशयेनाह मन्य इति तुच्छ ही तेवाचा तन्त्या यदि जनोऽयं अबद्धः स्यात्तर्हि पुनः
पुनः फलेमोहितः सन् कथं कर्म करोति ३० त्वन्मायया खण्डितस्य त्वया पुनः षण्डनं न कर्तव्यं किंतु हितं चेष्टितव्यमित्या
ह त्वन्मायया ऋतात्मनः त्वत्तः खण्डितः पृथक्कृतो यद्यतोऽन्यत्पुत्रादिकमाशास्तेऽतः स्वयं अविज्ञापित एव हि

तं चाप्रिनुमर्हसि ३१ ३२ ३४ वाग्वित्ताञ्जलिभिर्भक्तिः पूजिताः संतः
वैकुण्ठानुगतोः पार्षदाश्च ३६

भा० ४

७ अदृष्टाय लोचनपथमतिक्रांताय संदर्शिन आत्मोपनतये भ ३८ चतुर्थे विंश एकविंशे तु पृथुना प्रजानामनुशासनं महास त्रे सुरादीनां महासदसि वर्ण्यते पुरस्य या वितुक्तं तत्पुरमनुवर्णयति मौक्तिकैरिति त्रिभिः १ चंदनागुरुयुक्तैस्तोयैराद्रो रथ्यादय स्तद्युक्तं तोरणैश्च हरितयवैः अंकुरैः २ तिलैवा अविभिर्दीपैः ३ सभ्रतानि अशेषाणि मंगलानि दध्यादीनि तैः सह

भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः हरन्निव मनोऽमुष्य स्वधाम प्रत्यगात्प्रभुः ३७ अदृष्टाय

५४ नमस्कृत्य नृपः संदर्शितात्मने वासुदेवाय देवानां देवाय स्वपुरं ययौ ३८ इति श्रीभागवते महापु

राणे चतुर्थस्कंधे विंशोऽध्यायः मैत्रेय उवाच मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः महासुर

भिभिर्धूपैर्मंडितं तत्र तत्र वै १ चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् पुष्पाक्षतफलैस्तोकैर्लाजै

रर्चिभिरर्चितं २ सवृंदैः कदलीस्तंभैः पूगपोतैः परिष्कृतं तरुपल्लवमालाभिः सर्वतः समलंकृतं

३ प्रजास्तं दीपबलिभिः संभृताशेषमंगलैः अभीयुर्मृष्टकन्याश्च मृष्टकुंडलमंडिताः ४ शंख

दुंदुभिघोषेण ब्रह्मघोषेण चर्त्विजां विवेश भवनं वीरः स्तूयमानो गतस्मयः ५ पूजितः पूजयामास

तत्र तत्र महायशाः पौरान् जानपदांस्तांस्तानुप्रीतः प्रियवरप्रदः ६ स एवमादीन्यनवद्यचेष्टितः

कर्माणि भूयांसि महान् महत्तमः कुर्वन् शशासावनिमंडलं यशः स्फीतं निधायारुरुहे परं पदं ५४

७ सूत उवाच तदादिराजस्य यशो विजृंभितं गुणैरशेषैर्गुणवत्सभाजितं क्षत्ता महाभागवतः स

दस्पते कौषारविं प्राह गृणंतमर्चयन् ८

अभिजग्मुः मृष्टा उज्ज्वलाः कन्याश्च ४ गतस्मयो निरहंकारः ५ प्रियान्वरान्प्रददातीति तथा ६ गुणैर्महान् अत

एव महत्तमः पूज्यतमः ७ गुणैः विजृंभितं उर्जितं गुणवद्भिः सभाजितं सत्कृतं यशो गृणंतमर्चयन्नाह सदस्पते

शौनक ८ स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लब्धान्यशेषसुराणामर्हणा नियेनसः किमकरोदिति शेषः ८ श्रवणोत्सुक्यमाविः कुर्वन् प्रार्थयते कोन्विति यस्य विक्रमः पृथ्वीदोहनं तस्योच्छिष्टं तुल्यं कामं तत्तस्य कर्म वद १० प्राचीनकर्मभिः प्रारब्धानेव बुभुजे न तु भोगान् अर्थं कर्माणि करोति तदपि भोगेन पुण्यक्षपणेच्छया न तु सुखासक्त्येत्यर्थः ११ अस्खलितः अप्रतिहतः आदेशः आज्ञा य

विदुर उवाच सोभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गां ९ कोन्वस्य कीर्त्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं १० मैत्रेय उवाच गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन् आरब्धानेव बुभुजे भोगान्पुण्यजिहासया ११ सर्वत्रास्खलितादेशः सप्तद्वीपैकदंडधृक् अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः १२ एकदासीन्महासत्रदीक्षा तत्र दिवौकसां समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम १३ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः उत्थितः सदसो मध्ये ताराणामुडुराडिव १४ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः १५ व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः आवर्त्तनाभिरोजस्वी कांचनोरुरुदग्रपात् १६

स्य सप्तसुद्वीपेष्वेक एव दंडं धारयतीति तथा किं सर्वत्रेत्याह ब्रह्मकुलव्यतिरेकेण अच्युतगोत्रप्रवर्त्तकतुल्यो ये पांचैष्णवानां तद्व्यतिरेकेण च १२ एकदा तस्य महासत्रदीक्षा आसीत् तत्र सत्रे देवादीनां समाज आसीदित्यर्थः १३ तस्मिन्नर्हेषु पूज्येषु स्वर्चितेषु सत्सु सदः सामध्ये उत्थितः सन् समंततः समैक्षतेति षष्ठश्लोकेनान्वयः १४ प्रांशुः उन्नतः पीनावायतौ च भुजौ यस्य कंजारुणे ईक्षणे यस्य शोभना द्विजाः स्मितं च यस्य १५ व्यूढं विस्तीर्णं वक्षो यस्य वलीभिस्त्रिवलीभिर्वल्गु सुंदरं दलवत् अश्वत्थपत्रमिवोपरि विस्तीर्णमधस्तात्संकुचितमुदरं यस्य आवर्ते चक्रे नाभिर्यस्य कांचनवदु

७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री १

भा०च० सूक्ष्मा श्वेते च कार्पासिता श्च स्निग्धा श्च मूर्द्धजा यस्य कंचुकवान् त्रिरेखांकितां कंधरां यस्य परिधाय वसित्वा उपवीयम्
न्तरीयं कृत्वा ११ नियमेन निमित्तेन प्रस्तानि त्यक्तानि भूषणानि येन सः अतएवं तेन रजनारहितत्वात् जितास्त्रेशेषगात्र
ना१ सुश्रीः स्वाभाविकी शोभा येन कृतानुचिन्तानि कर्माणि येन १८ शिशिरे संतापहरे स्निग्धे कमोनिके यास्तेः क्षिपाय य१ नारे१
स्य इदं वक्ष्यमाणं वाक्यमुक्तवांश्च चातुश्रोत्रप्रियं चित्राणि पदानि यस्मिन् श्लक्ष्णं प्रशस्तं मृष्टं शुद्धं गू०

सूक्ष्मश्च कार्पासितः स्निग्धमूर्द्धजः कंचुकंधरः महाधनं दुकूलाग्र्यं परिधायोपवीय च १७ यं
जिताशेषगात्रश्रीर्नियमेन्यस्तभूषणः रुक्मांगदधरः श्रीमान् कुशपाणिः कृतोचितः १८
शिशिरस्निग्धताराक्षः समेक्षत समंततः ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव चारुचि
त्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवं १९ राजोवाच सभ्याः शृणुत भद्रं वः साधवो य इहागताः
५५ स्तसु सन्तु जिज्ञासुभिर्धर्मो मा वेद्यः स्वमनीषितं २० अहं दंडधरो राजा प्रजानामिह योजितः रक्षिता
वृत्तिदः स्वेषु सेतुषु स्थापिताः पृथक् २१ तस्यैतदनुष्ठानाद्यदाहुर्ब्रह्मवादिनः लोकाः स्युः कामसं
दोहाः यस्य तुष्यति दिष्टदृक् २२ यस्तु द्वेरेकांराजा प्रजा धर्मेण शिक्षयन् प्रजानां शमलं भुंक्ते भगं च स्वं
जहाति सः २३

गंभीरार्थं अविक्लवं अव्याकुलं १९ भाषणे हेतुः धर्मं जिज्ञासुभिः पुंभिः सत्सु स्वमनीषितं मा वेद्यं वक्तव्यं राम
अतः प्रजानुशासनमिषेण जिज्ञासितव्यं क्रियते न युष्मान्प्रति धर्मप्रवचनमिति भावः २० इदानीं प्रजाः शिक्षयि
ष्यन् प्रजाशिक्षणं हि कं मम आवश्यकमित्याह अहमिति त्रिभिः पृथक् सेतुषु स्थापयिता २१ दिष्टदृक् प्राक्कर्म ५५
साक्षी ईश्वरो यस्य तुष्यति तस्य वेदवादिनो यान् लोकानाहुः प्रजारक्षणादनुष्ठानात्ते लोकाः स्युः कथंभूताः
कामानां सम्यग्दोहः प्रपूरणं येषु २२ अन्यथा त्वनिष्टं स्यादित्याह य इति शमलं पापं भगमैश्वर्यं २३

तत्तस्मात्हे प्रजाः भर्त्तुर्मम पिंडार्थं पिंडदानवत्परलोकहितार्थं स्वकार्यमेव कुरुत धर्ममेवानुतिष्ठत अधोक्षजे धीर्येषां तादृशाः
संतः वासुदेवार्पणदृष्ट्येत्यर्थः अनुग्रहः कृतो भवेदिति शेषः २४ शास्तुः शिक्षयितुः अनुज्ञातुः अनुमोदितुः प्रेत्य
परलोके यत्फलं तत्तुल्यं २५ कर्मकर्त्तव्यमित्यनुमोदामहे ननु वासुदेवेऽर्पणीयमिति निवे नादिभिस्तदंगीकारादित्येवं
हे ३ वादिनः शंके संबोधयन्नाह अर्हसत्तमाः यज्ञपतिर्नाम परमेश्वरः केषांचिन्मते तावदस्ति तथापि विप्रतिपन्नेनास्ति
द्धिरित्याशंक्य जगद्वैचित्र्यान्यथानुपपत्तिप्रमाणयति इहामुत्र च ज्योत्स्नावत्यः कांतिमत्यः भुवो भोगभूमयः शरीराणि
च २६ नन्विदं कर्मवैचित्र्यादेव संस्यति तथापि विद्वदनुभवेनेश्वरसिद्धिरित्याह मनोरिति त्रिभिः अस्मत्पितामह

तत्प्रजा भर्त्तृपिंडार्थं स्वार्थमेवानसूयवः कुरुताधोक्षजधियस्तर्हि मेनुग्रहः २४ यूयं तदनुमोदध्वं पितृदेव स्तं० ४
र्षयोमलाः कर्त्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलं २५ अस्ति यज्ञपतिर्नाम केषांचिदर्हसत्तमाः इहा
मुत्र च लक्ष्यंते ज्योत्स्नावत्यः क्वचिद्भुवः २६ मनोरुत्तानपादस्य ध्रुवस्यापि महीपतेः प्रियव्रतस्य राजर्षे
रंगस्यास्मत्पितुः पितुः २७ ईदृशानामथान्येषामजस्य च भवस्य च प्रह्लादस्य बलेश्चापि कृत्यमस्ति
गदाभृता २८ दौहित्रादीनृते मृत्योः शोच्यान् धर्मविमोहितान् वर्गः स्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना
२९ यत्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः सद्यः क्षिणोत्यन्वहमेधती सती यथा प
दांगुष्ठविनिःसृता सरित् ३०

स्यांगस्य २७ कृत्यमस्ति अस्य कर्मफलदात्रा भाव्यमिति तेषां मतमित्यर्थः २८ मृत्योर्दौहित्रादीन् वेनादीन् विना धर्मे विमोहि
तान् अत एव शोच्यान् ननु कर्मैव फलं दास्यतीति विधुदृशागतता वाह्येवता किं परमेश्वरेण तत्राह वर्ग इति वर्गोऽत्र त्रिवर्गः स्वर्गो धर्म
स्य फलं अपवर्गो मोक्षः तेषामैकात्म्यं तदाकारूप्यं तेन सर्वानुगतेन हेतुना तत्रापि प्रायेण हेतुः अयं भावः न तावज्जडस्य कर्मणः फ नो ३
लदातृत्वं घटते न चाचार्यदेवतानां स्वातंत्र्यं अन्तर्यामिश्रुतेः न च तेषां कर्मसाम्ये फलतारतम्यं क्वचिददसिद्धिश्च संभवति अतः
स्वतंत्रेण कर्तुमकर्तुमन्यथाकर्तुं समर्थेन परमेश्वरेण भाव्यमिति २९ किंच जीवानां मोक्षदः परमेश्वर एव नान्यो देवता सामं नो ३
पि जीवत्वाविशेषादित्याशयेनाह त्रिभिः यस्य पादयोः सेवायामभिरुचिस्तपस्विनां संसारतप्तानां अशेषैः जन्मभिः संचितं धि
यां मलं सद्यः क्षपयति तमेव भजतेति तृतीयेनान्वयः कथंभूता अन्वहं प्रतिदिनं वर्द्धमाना सती सा रुचि किंवत् यत्पादसंबंधस्य महिमा तदृष्टांते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वकर्मभिः यागादिभिः २

भा० च०

विनिर्धूताशेषा मनोमला यस्य असंगो वैराग्यं तेन विज्ञानस्य विशेषः साक्षात्कारः तदेव वीर्यं यस्य यस्यांघ्रिमूले कृताश्रयः
सन् ३१ आत्मवृत्तिभिरध्यापनादिभिः मनोवचः कायानां गुणैर्ध्यानस्तोत्रपरिचर्याभिः अमायिनः निःकपटात्संतः
कृ२ ननु यज्ञादिभिः सेव्ये किमस्मत्स्वं तथा भविष्यतीति तत्राह यथाधिकारमवावसिता निश्चिता समाप्ता वा ऽर्थसिद्धिर्येषां ३२ गा२
स्वकर्मभिर्यागादिभिर्भजतः स्फलं तत्र ब्रह्मार्पणं ब्रह्म हविरिति न्यायेन सर्वेषु यागेषु तत्फलेषु भगवद्दृष्ट्या कर्मकर्तृत्वं
गा२ न भिन्नदृष्ट्येति वक्तुं तेषां भगवद्रूपतामाह द्वाभ्यां असौ भगवानेव स्वरूपतो विशुद्धविज्ञानघनोऽपि अगुणो निर्विशेषोऽपि
प६ पि सन्निह कर्ममार्गे ऽनेकगुणः नानाविशेषणवान् अध्वरो यज्ञः संपद्यते यज्ञो वै विष्णुरिति श्रुतेः अनेकगुणत्वम

विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्यवान् यदंघ्रिमूले कृतकेतनः पुनर्न संसृतिं क्लेश
गा२ वहां प्रपद्यते ३१ तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः अमायिनः कामदुघांघ्रि
पंकजं यथाधिकारावसितार्थसिद्धयः ३२ असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणक्रियो
क्तिभिः संपद्यतेऽर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनः स्वरूपतः ३३ प्रधानकालाशयधर्मसंग्रहे श
रीर एष प्रतिपद्य चेतनां क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मकः ३४ अहो ममामी
धी१ वितरंत्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरं स्वधर्मयोगेन यजंति मामका निरंतरं क्षोणितले दृढव्रताः ३५

पा नि१ वाह पृथग्विधानि द्रव्यादीनि तैः तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अवघातादयः उक्तयो मंत्राः अ
र्थो ऽसाध्य उपकारः आशयः संकल्पः लिंगं पदार्थानां शक्तिः नाम ज्योतिष्टोमादिर्नामान्तरैः संपद्यते ३३ यागफल
स्यापि भगवद्रूपतामाह प्रधानेति एष विभुः परमानंदोऽपि शरीरे चेतनां विषयाकारां बुद्धिं प्रतिपद्य तदभिव्यंग्यानंद
रूपः सन् क्रियाफलत्वेन प्रतीयते एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः यथानलो दारुषु
स्थितस्तद्गुणात्मकः दारुधर्मदैर्घ्यवक्रत्वादिमानवभाति कथंभूते शरीरे प्रधानमव्यक्तं कालः क्षोभकः आ ५६॥
गा२ शयो वासना धर्मः दृष्टः तेषां संग्रहः संहतिर्जन्य इति तथाऽस्मिन् ३४ तदेवमप्रवृत्तान् भगवद्भजने प्रवर्त्य स्वतः प्रवृत्ता
नां प्रवृत्तिमभिनंदन्नद्दृष्टं पृति अहो इति वितरंति कुर्वंति ३५ श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं हरिभक्तिहेतोर्ब्राह्मणभक्तिं विधित्सन्माजात्वित्यष्टभिः महत्त्वश्चतात्कादृय श्चताभिर्यद्राजकुलस्य तेजः तत्तु त
स्मात्सकाशात् द्विजानां कुले अजितो देवता येषां वैष्णवानां तेषां च कुले मा जातु प्रभवतु कदाचिदपि प्रभावेन करोतु
कथंभूतं समृद्धिभिर्विनापि स्वयमेव तितिक्षादिभिर्देदीप्यमानं ३६ ब्राह्मणरक्षकत्वमाह यच्चरणाभिवंदनाद्धरिर्ल
क्ष्मीं यशश्च अवाप यत्सेवया ईश्वरस्तुष्यति तद्देवब्रह्मकुलं निषेव्यतामिति द्वयोरन्वयः ३७ हे लोकसंग्रहरू
पाया धर्मस्तत्परैः ३८ ननु ब्रह्मकुलेनैव नित्यं सेव्यमानेन सर्वे देवता मुखभूताग्नौ यज्ञाद्यनुष्ठानं न स्यात् न चतेन

माजातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च देदीप्यमानं जितदेवतानां कुले स्व
यं राजकुलाद्द्विजानां ३६ ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवंदनात् ॥
अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः ३७ यत्सेवयाशेषगुहाश
यः स्वराट् विप्रप्रिय स्तुष्यति काममीश्वरः तद्देवतद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकु
लं निषेव्यतां ३८ पुमान्लभेतानतिवेलमात्मनः प्रसीदतोत्यंतशमं स्वतः स्वयं यन्नित्यसं
बंधनिषेवया ततः परं किमत्रास्ति मुखं हविर्भुजां ३९ श्रीराम श्रीराम श्रीराम श्रीराम

विनाचित्तशुद्धिः न च तया विना मोक्षः स्यादित्याशंक्याह पुमानिति द्वाभ्यां यस्य ब्रह्मकुलस्य नित्यसंबंधेन निषेवया
पुमान्स्वयमेव ज्ञानाभ्यासादिकं विनापि अत्युत्तमं शमं मोक्षं लभेत कुतः यत्सेवया स्वत एव अनतिवेलं शी
घ्रं प्रसीदतः शुद्धात आत्मनश्चित्तात्ततः परं श्रेष्ठं देवानां किं मुखमस्ति ब्राह्मणाः सर्वे येव यज्ञादिफलं ज्ञानफलं
तत्सर्वं भवतीत्यर्थः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च० हरेरपि तद्देवपरं मुखमित्याह अश्नातीति इज्यानामिंद्रादीनां नामभिर्यस्य मुखे श्रद्धया हुतं हविरनंतो यथाऽश्नाति तथा
चेतनया रहिते हुताशने हुतं नाश्नाति कैर्हुतमश्नाति तत्त्वकोविदैः सर्वदेवमयं एतन्मूर्तिरेतद इति तत्त्वविद्भिः कु
त एवंभूतोऽसौ तत्राह पारमहंस्यं ज्ञानं तत्परा न हेति अधिकुर्वतीति पारमहंस्यपर्यो ता गावो वाचो यस्मिन्नुप
निषद्भिर्ज्ञानघनत्वेनोक्त इत्यर्थः यद्वा परमहंसानां ज्ञाननिष्ठानां गम्यः पारमहंस्यः परितो न गच्छंतीति गावो वाचो य
ज्ञानरूपः। स्मात्स पर्यगुः इंद्रियनियंता स चासौ स च पारमहंस्यपर्यगुः सर्वांतर्यामीत्यर्थः ४० न केवलं चेतनत्वेन हुताशनादिरो

अश्नात्यनंतः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः नवै तथा चेतनया बहिःकृते हुता
शने पारमहंस्यपर्यगुः ४० यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः समाधि
५७ ना बिभ्रति हार्थदृष्टये यत्रेदमादर्श इवावभासते ४१ तेषामहं पादसरोजरेणुमार्या वहेयाधि
किरीटमायुः यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजंति ४२ गुणायनं शीलधनं
सं३ कृतज्ञं वृद्धाश्रयं संवृणतेऽनुसंपदः प्रसीदतां ब्रह्मकुलं गवां च जनार्दनः सानुचरश्च मह्यम् ४३॥
मैत्रेय उवाच इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः तुष्टुवुर्हृष्टमनसः साधुवादेन साधवः ४४
पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ब्रह्मदंडहतः पापो यद्वेनोऽत्यतरत्तमः ४५ श्रीराम॥

पः किं नु वेदज्ञानादपीत्याह यदिति द्वयं ये ब्रह्म वेदं नित्यं बिभ्रति तेषामित्युत्तरेणान्वयः मंगलं नाम प्रशस्ताचरणं नित्य राम
मप्रशस्तस्य वर्जनं एतद्धि मंगलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः मौनमध्ययनविरोधिवार्तात्यागः समाधिना चित्तस्थैर्य ५७
ण अर्थदृष्टये वेदार्थमपि विचारयंतीत्यर्थः यत्र वेदे इदं विश्वं ४१ हे आर्याः आ आयुर्यावज्जीवं अधिकिरीटं मुकु
१२ टस्योपरि वहेयेति प्रार्थनायां लिङ् रेणुं ४२ गुणभजनस्य फलमाह गुणायनं अन्वनु संपदः संवृणते सम्यग्भजंतीति त
स्मात्प्रसीदतां प्रसीदतु गवां च कुलं ४३ ४४ साधुवादमाह पुत्रेणेति षड्भिः पद्यतः वेनोऽपि तमो नरकमत्यतरत् अतितीर्णवान् ४५ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४६ ४७ मुकुंदनाथः स्म त्वन्नाथस्त्वमेव मुकुंदनाथेत्येव पर्यवसितमित्यर्थः तत्र हेतुः यइति ४८ आजीविनां सेवका
नां आज्ञानुशासनं प्रजास्वनुरागः प्रकृतिः स्वभावः ४९ उपसादितः प्रापितः कर्मभिः आत्मनो ५० ईश्वरस्य
स्याविप्रादयोऽपि प्रणमंति नमइति ब्रह्माविश्य ब्राह्मणजातिमधिष्ठाय क्षत्रं क्षत्रियं विभर्ति क्षत्रं वा विश्य ब्रह्म
विभर्ति तदुभयं वा विश्य इदं विश्वं विभर्ति ५१ चतुर्थे एकविंशः द्वाविंशे तु परं ज्ञानं पृथवे हरिः शासनात् सनत्कुमा

हिरण्यकशिपुश्चापि भगवन्निंदया तमः विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ४६ वीरवर्य्य पितः
पृथ्व्याः समाः संजीव शाश्वतीः यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्तरि ४७ अहो वयं ह्यद्य पवित्रकी
र्त्ते त्वयैव नाथेन मुकुंदनाथाः य उत्तमश्लोकतमस्य विष्णोर्ब्रह्मण्यदेवस्य कथां व्यनक्ति ४८ नात्यद्भुत
मिदं नाथ तवाजीव्यानुशासनं प्रजानुरागो महतां प्रकृतिः करुणात्मनां ४९ अद्य नस्तमसः पारस्त्वयोप
सादितः प्रभो भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ५० नमो विवृद्धसत्वाय पुरुषाय महीयसे यो ब्र
ह्मक्षत्रमाविश्य विभर्तीदं स्वतेजसा ५१ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकविंशोऽध्यायः ॥ ७५(?)
मैत्रेय उवाच जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमं तत्रोपजग्मुर्मुनयश्चत्वारः सूर्यवर्चसः १ तांस्तु सिद्धे
श्वरान् राजा व्योम्नोऽवतरतोऽर्चिषा लोकानपापान्कुर्वाणान्सानुगोऽचष्ट लक्षितान् २ तद्दर्शनोद्गतान्प्रा
णान्प्रत्यादित्सुरिवोत्थितः ससदस्यानुगो वैन्य इंद्रियेशो गुणानिव ३ गौरवाद्यंत्रितः सभ्यः प्रश्रयान
तकंधरः विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ४

रो भगवान् पादिश्यादितीर्यते १ अर्चिषा लक्षितान् सनकादय इति ज्ञापितान् अचष्ट अपश्यत् २ तेषां दर्शनेनोद्गतान्
प्राणान्प्रात्युमिच्छुरिव अयंभावः उद्गुप्राणाः उत्क्रामंति पूनः स्थविर आयति प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिप
द्यतइति स्मृतेः श्रीणां स्वावर्त्ततेजसा क्षिप्राणां तामस्तुमर्छति अतः स्वयमनुद्गच्छतः प्राणहानिः स्यादिति भयादि
व ससंभ्रमं प्रत्युद्गमं चकारेति सदः सदस्यैरनुगैश्च वर्त्तमानः इंद्रियेशो जीवः गुणान् गंधादीन् प्रतियथोद्गच्छति सोत्सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृ२ गा२

भा०च० मार्जितं क्षालितं अलकबंधनं केशबंधनं यस्मात् मानयन्निव स्वयं चचार ५ भवस्याप्यग्रजत्वेन मान्यान् ६ प्रीतः प्राह स्तुत्वेन
देवप्रीतिपूर्वकं वचनमाह अहो इति दशभिः हे मंगलायनाः मंगलमयनं येषां मया किं मंगलमाचरितं यस्य मे योगिभि
रपि दुर्दर्शानां ७ ८ दुर्दर्शत्वमाह नैवेति सर्वदृशामात्मानं यथा सर्वदृग्याः न लक्षयंते येऽस्य विश्वस्य हेतवो महदा
दयो मन्वादयो वा यद्वा कथंभूतान् यस्य सर्वदृगात्मदर्शनस्य हेतवस्तान् ९ येषां साधूनां गृहाः अर्हणीयपूज्या

तत्पादशौचसलिलैर्मार्जितालकबंधनः तत्र शीलवतां वृत्तमाचरन्मानयन्निव ५ हाटकासन आ
सीनान्स्वधिष्ण्येष्विव पावकान् श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ६ पृथुरुवाच अहो आ
चरितं किमिमं मंगलं मंगलायनाः यस्य वो दर्शनं ह्यासीद् दुर्दर्शानां च योगिभिः ७ किं तस्य दुर्लभतर
५८ मिह लोके परत्र च यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सानुग ः ८ नैव लक्षयते लोको लोकान्
पर्यटतोऽपि यान् यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः ९ अधना अपि ते धन्याः साधवो गृहमेधि
नः यद्गृहा ह्यर्हवर्याम्बुतृणभूमीश्वरावराः १० व्यालालयद्रुमा वै तेऽप्यरिक्ताखिलसंपदः यद्गृहा
प स्तीर्थपादीयपादतीर्थविवर्जिताः ११ स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः चरंति श्रद्धया धी
रा बाला एव बृहंति वो १२ कच्चिन्नः कुशलं नाथा इंद्रियार्थार्थवेदिनां व्यसनावाप एतस्मिन् पतितानां स्व
कर्मभिः १३

नां वर्यावरणीयाः स्वीकारार्हाः अंबु आदयो येषु तादृशाः अंबु च तृणं च भूमिश्च ईश्वरो गृहस्वामी च अवराः भृत्यादयश्च राम
१० व्यालानामालये द्रुमा एव ते अरिक्ताः पूर्णाः अखिलाः संपदो येषु तादृशा अपि ये गृहाः तीर्थपादीयाः वैष्णवा ५८ यद्गृहा
स्तेषां पादतीर्थेन विवर्जिताः ११ स्वागतं भद्रं मागमनजातं यद्यस्मान् बाला एव भवंतो दृहंति व्रतानि चरंति य
द्वा येषां वो व्रतानि अन्ये बाला आचरंति १२ इंद्रियार्थमेवार्थं पुरुषार्थं ये विदंति तेषां नः व्यवसानान्यवाप्य
तेय स्मिन् तस्मिन् संसारे १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी० ४

ननु भगवतां कुशलं पृच्छ्यते लोकेन त्वात्मनस्तत्राह भवत्स्विति १४ ततस्मात्कृतविश्वासः सन् तपस्विनां संतप्ता-
नां सुहृदो युष्मानु पृच्छति १५ ननु त्वं त्वन्येषां गितुल्या यूयं किंतु साक्षाद्भगवानेवेत्याह व्यक्तं नित्रिते आत्मवतां धी-
राणां मात्मत्वेन प्रकाशमानः आत्मानं भावयतीति इमां पृथ्वीं चरति सूक्तं शोभनं वचनं सारं न्याय्यं सुष्ठु गंभी-
रार्थं मितमल्पाक्षरं मधु श्रोत्रप्रियं मुखप्रसत्त्या स्मयमान इव प्रीणयमानः १८ त्वयमपि पृथोः संगमे भिन्ने-
हूतिसंगम इति उभयेषां वक्तॄणां च श्रोतॄणां च येषां संभाषणसहितः संप्रश्नः सर्वेषां शं सुखं विस्तारयति १९
ये

भवत्सु कुशलप्रश्न आत्मारामेषु नेष्यते कुशलाकुशला यत्र न संति मतिवृत्तयः १४ तदहं कृतवि-
श्रंभः सुहृदो वस्तपस्विनां संपृच्छे भवतां अस्मिन् क्षेमः केनांजसा भवेत् १५ व्यक्तमात्मवतामात्मा
भगवानात्मभावनः स्वानामनुग्रहायेमां सिद्धरूपी चरत्यजः १६ श्रीमैत्रेय उवाच पृथोस्तत्सूक्त-
माकर्ण्य सारं सुष्ठु मितं मधु स्मयमान इव प्रीत्या कुमारः प्रत्युवाच ह १७ सनत्कुमार उवाच साधु
पृष्टं महाराज सर्वभूतहितात्मना भवता विदुषा चापि साधूनां मतिरीदृशी १८ संगमः खलु
साधूनामुभयेषां च संमतः यत्संभाषणसंप्रश्नः सर्वेषां वितनोति शं १९ अस्त्येव राजन् भव-
तो मधुद्विषः पादारविंदस्य गुणानुवादने रतिः सदा या विधुनोति नैष्ठिकी कामं कषायं मलमंत-
रात्मनः २०

तदेवं संगमं प्रश्नं चाभिनंद्यानुवादमुखेनैव मोक्षसाधनमुपदिशति अस्त्येवेति गुणानामनुवादने प्रश्नद्वा-
रेणानुवादप्रवर्त्तने श्रवण इत्यर्थः आत्मनो मनसो ऽस्थं कामात्मकं मलं विधुनोति कषायं धातुरागवदनि-
वर्त्यं २०

ता१

प्रकाशाय ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रति १

भा० च० चित्तशुद्धेश्च बहिर्वैराग्यमात्मनिश्चयश्च भवति न च ततोऽधिकं साधनमस्तीति शास्त्रेषु तयोरेव मोक्ष हेतुत्वनिश्चयादित्या
ह शास्त्रेष्विति सध्र्यग्विमृशेषु सम्यग्विचारवत्सु क्षेमस्य हेतुरेतावानेव सुनिश्चितः कोऽसौ आत्मव्यतिरिक्तेष्व बी २
संगो वैराग्यं आत्मनि च रतिः आत्मनो विशेषणं निर्गुणे ब्रह्मणीति २१ नन्वेतदेवातिदुर्लभमित्याशंक्योत्तमा ति ३
धिकारिणः श्रवणमात्रेण भवति अन्यस्य तु चित्तशुद्ध्यनुसारेण साधनतारतम्यतो वर्द्धमानया भक्त्या तत्प्राप्तिमाह सत्या १
सेति चतुर्भिः सा ब्रह्मणि रतिरसंगश्च श्रद्धादिभिः स्यादिति चतुर्थेनान्वयः जिज्ञासया तत्तद्विशेषबुभुत्सया पुण्य श्रु १

शास्त्रेष्वियानेव सुनिश्चितो नृणां क्षेमस्य सध्र्यग्विमृशेषु हेतुः असंग आत्मव्यतिरिक्त आत्म
नि दृढा रतिर्ब्रह्मणि निर्गुणे च या २१ सा श्रद्धया भगवद्धर्मचर्यया जिज्ञासयाऽध्यात्मिकयोगनि
५९ ष्ठया योगेश्वरोपासनया च नित्यं पुण्यश्रवःकथया पुण्यया २२ अर्थेन्द्रियारामसगोष्ठ्यतृष्णया त च ३
त्सम्मतानामपरिग्रहेण च विविक्तरुच्या परितोष आत्मनि विना हरेर्गुणपीयूषपानात् २३ अ
हिंसया पारमहंस्यचर्यया स्मृत्या मुकुन्दाचरिताग्र्यसीधुना यमैश्चाप्यनिंदया निरीहया द्वंद्वति
तिक्षया च २४
रकामैर्नियमै १

श्रवो यशो यस्य तस्य हरेः १ पुण्यया कथया च २२ अर्थारामा अर्थनिष्ठाः तामसाः इंद्रियारामाः कामनिष्ठा राज
साः तैः सह या गोष्ठी तस्यामतृष्णया तेषां च ये संमताः अर्थाः कामाश्च तेषामपरिग्रहेण विविक्ते विजने या रु
चिस्तया आत्मन्येव परितोषश्च सति स्यात् किंतु हरेर्गुणपीयूषपानाद्विना तस्मिन् सति विविक्तरुचिर्नका राम
र्या न चात्मनि परितोषः कार्य इत्यर्थः पारमहंस्यचर्यया उपशमादिप्रधानया स्मृत्या आत्महिता ५९
नुसंधानेन मुकुंदाचरितमेवाग्र्यसीधु श्रेष्ठममृतं तदाचरितस्मृतिसुखेनेत्यर्थः मार्गांतरस्यानिंदया नि
रीहया योगक्षेमार्थक्रियारहित्येन शीतोष्णादिद्वंद्वसहनेन २४ श्रीरामे श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं यत्त्वोक्तमपि कथं भक्त्यन्तरंगत्वेन पुनरुच्यते तत्राह हरिभक्ताः तेषां कर्णपूराः कर्णालंकारभूता ये हरेर्गुणाः तेषाम
भिधानेन सदसति कार्यकारणरूपे २५ भवत्वन्यत्रासंगो आत्मरतिस्त्वतः किमत आह यदा निष्ठाप्रासारतिर्भ
ज्ञा न २ वति गुरोः शुश्रूषयैवानुसन्नेवैराग्यपार्श्वेगेन अवीर्यं निर्वासनं सनु जीवस्य कोशमावरकं हृदयं पुमानुदहतीति क
थंभूतं पंचमहाभूतप्रधानं यद्वा अविद्यास्मितारागद्वेषाभिनिवेशाः पंचतदात्मकं उत्थितः प्रज्वलितोऽग्नि
योनिमरणिमिव यद्वा यदा रतिरवार्यानुग्रह अतदाज्ञानविरागयोर्वेगेनोत्थितः साक्षात्कारः अवीर्यं पुनः
प्ररोहक्षमं यथा न भवत्येवं हृदयं दहति शेषं समानं २६ ततः किमत आह दग्ध आशयो हृदयमुपाधिर्यस्य॥
अत एवमुक्ताः समस्ताः कर्तृगुणाः कर्तृत्वादयो येन आत्मनः सकाशाद्बहिर्घटादिः अंतः सुखदुःखादिर्नैव विच

हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन विजृंभमाणया भक्त्या ह्यसंगः सदसत्यनात्मनि स्यान्निर्गु
णे ब्रह्मणि चांजसा रतिः २५ यदा रतिर्ब्रह्मणि नैष्ठिकी पुमानाचार्यवान् ज्ञानविरागरंहसा दहत्य
वीर्यं हृदयं जीवकोशं पंचात्मकं योनिमिवोत्थितोऽग्निः २६ दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो
बहिरंतर्विचष्टे परात्मनोर्यद्व्यवधानं पुरस्तात् स्वप्ने यथा पुरुषस्तद्विनाशे २७ आत्मानमिंद्रिया
र्थं च परं यदुभयोरपि सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा २८ निमित्ते सति सर्वत्र जलादा
वपि पूरुषः आत्मनश्च परस्यापि भिदां पश्यति नान्यदा २९॥ श्रीराम श्रीराम श्रीराम श्रीराम

ष्टे न पश्यत्येव कुतः इत्यपेक्षायां द्रष्टृदृश्यप्रतीतिरंतःकरणहेतुत्वादित्याह परेति परात्मा द्रष्टा तयोर्यद्व्यवधानं भेद
के पूर्वमासीत् तस्य विनाशे सति यथा स्वप्ने राजाऽहमित्याद्यभिमानी सेनादिद्रष्टारं दृश्यं सैन्यं च स्वप्नावस्थानाशेन पश्य
तीति द्रष्टृदृश्यभेदप्रतीतेरंतःकरणहेतुत्वमन्वय व्यतिरेकाभ्यामुपपादयति आत्मानं द्रष्टारं इंद्रियार्थं द
श्यं उभयोरप्याशयोः परसंबंधहेतुमहंकारं च आशये अंतःकरणे सत्येव जाग्रत्स्वप्नयोः पश्यति अन्यदा सुषुप्तौ तदुक्तं
दृश्यानुरंजितं द्रष्टृ दृश्यं द्रष्टनुरंजितं अहंकृत्याभयं रक्तं तन्नाशे हेतुनाऽमनः इति २८ एकस्मिन्नात्मनि दृश्यादि
भेदप्रतीतिरौपाधिकी तिदृष्टांतेन स्पष्टयति लोके पिच सर्वत्र जलदर्पणादौ भेदनिमित्ते सत्येव आत्मनो बिंबभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं ज्ञानतो नाशो भवतु ततश्च किमित्यत आह ५

भाग० च० तदेवं चतुर्भिरसंगात्मरत्योर्मोक्षहेतुत्वमुक्तं इदानीमनात्मरतेः संसारहेतुत्वमाह इंद्रियैरिति चतुर्भिः ध्यायतां गुणारो
पणस्मरतां पुंसामिंद्रियाणि स्वैः स्वैर्विषयैः आकृष्यंते तैः मनः आकृष्यते विषयाशीनि प्राप्यते तेन बुद्धेः सकाशा
त् धर्मचेतनां विचारसामर्थ्यं हरति एतच्चाविवेकिनामनुभवसिद्धमिति दृष्टांतेनाह नीरजकुशादि स्तंबो यथा मूलैः स्तो२
यं ह्रदादपहरति तद्वत् ३० चित्तं चेतनो मनुतस्य मपहृतायामनुस्मृतिः पूर्वापरानुसंधानं भ्रश्यति एवं तद्रोधं ज्ञान
भ्रंशं आत्मन एव हेतोरात्मनोऽपह्नवं नाशं प्राहुः ३१ यदधिय मधिकृत्यान्यस्य विषयस्य प्रियतमत्वं आत्म

इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ३० भ्रश्यत्यनु
स्मृतिश्चित्तं ज्ञानभ्रंशः स्मृतिक्षये तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ३१ नातः परतरो लो
के पुंसः स्वार्थव्यतिक्रमः यदध्यन्यस्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ३२ अर्थेंद्रियार्थाभिध्यानं
६० सर्वार्थापह्नवो नृणां भ्रंशितो ज्ञानविज्ञानाद्येनाविशति मुख्यतां ३३ कुर्यात्कर्हिचित्संगं तमस्ती न
व्रं तितीरिषुः धर्मार्थकाममोक्षाणां यदत्यंतविघातकं ३४ तत्रापि मोक्ष एवार्थ आत्यंतिकतयेष्यते त्रैव
र्ग्योऽर्थो यतो नित्यं कृतांतभयसंयुतः ३५ परेऽवरे च ये भावा गुणव्यतिकरादनु नैतेषां विद्यते क्षेममीश
विध्वंसिताशिषां ३६

नश्यत्वात्मायस्यं सर्वं प्रियं भवतीति श्रुतेस्तस्यात्मनः स्वेनैव यो व्यतिक्रमोऽपह्नवस्तस्माद्यः स्वार्थनाशः अतः
परतः स्वार्थनाशो नास्ति ३२ कुत इत्यत आह अर्थस्याभिध्यानं इंद्रियार्थः कामस्तस्याभिध्यानं सर्वा राम
र्थनाशः ज्ञानं विज्ञानं च परोक्षापरोक्षं येन ध्यानेन मुख्यतां स्थावरतां ३३ अनात्मरतेरनर्थहेतुत्वमुक्त्वा
संगस्याप्याह नेति यदसंगः धर्मादीनां विघातकं तस्मिन् संगं तमः संसारं ३४ तुल्यवन्निर्देशात्पुरुषार्थगा ६०
साम्यभ्रांतिं वारयति तत्रापीति कृतांतः कालः ३५ भयसंयुतत्वमेवाह परे ब्रह्मादयः अवरे अस्मदाद
यः गुणक्षोभादनु पश्चाज्जायंते ईशः कालः तेन विध्वंसिता आशिषो येषां ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नौ १

यस्मादनात्मरतिरनर्थहेतुः तत्रस्मात्जगतां जंगमानां स्थं षां स्थावराणां च देहादिभिरात्मनाऽहंकारेण चावृ
तानां हृदि य आकाशि प्रकाशते तमेव हि कथं सोऽस्मीति सोऽस्मीति पाठः स एवाहं कोऽस्ति ततोऽन्यः से देहि त्यर्थः
ननु जीवो हृदि चकास्ति नान्यस्तत्राह क्षेत्रविदं जीवं तत्पतिं नियमयतीति क्षेत्रवित्तपः तस्य भावस्तत्ता तया य२
अंतर्यामिरूपेण यद्वा क्षेत्रवित्तेऽहं ममतास्पदे पातीति क्षेत्रवित्तपः तेन रूपेण जीवरक्षापारतंत्र्यात्तत्पा
न२ ति ननु कथं जीवं नियच्छति आविः प्रत्यक्षः तर्हि बुद्धिः न प्रत्यक् प्रतिलोमं चकास्ति बुद्धिरूपरागविष
याकारेण नह्यहंकारः न विश्वक् व्याप्तत्वेन सनु परिच्छिन्नः एवंभूतो यो भगवान् तमेवहीति २७ स्थावर
जंगमादीनां हृदि चकास्तीत्युक्तं तेषां सत्त्वेन तत्संबंधादीश्वरस्य मालिन्यं च प्रसक्तं निराकुर्वन्नुद्रिक्ते २८ भक्त्या

तत्त्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियासुधिषणात्मभिरावृतानां यः क्षेत्रवित्तपतया
हृदि विश्वगाविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि २७ यस्मिन्निदं सदसदात्मतया विभा
ति माया विवेकविधुति स्रजि वाहिबुद्धिः तं नित्यमुक्तपरिशुद्धविशुद्धतत्त्वं प्रत्यूढकर्मकलिल
प्रकृतिं प्रपद्ये २८ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं ग्रथितमुद्ग्रथयंति संतः त
द्वन्न रिक्तमतयो यतयोऽपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवं २९

तं प्रणमति यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टनिकृष्टभावेन कार्यकारणभावेन वा मायैव वि
भातीति तं प्रपद्ये मायात्वे हेतुः विवेकेन विधुतिर्निराकृतिर्यस्य तत्र स्रजि वेति वाशब्दो दृष्टांते नित्यमु
क्तो यतः परिशुद्धं तत्कुतः विशुद्धं तत्त्वं सत्यं अत एव प्रत्यूढा अभिभूता कर्मभिः कलिलामलिना प्र
२८३ कृतिर्येन तत्तमेवैहीति ज्ञानमुपदिष्टं तस्य दुष्करत्वेन भक्तिमुपदिशति द्वाभ्यां यस्य पादपंकजयोः
पलाशानि अंगुल्यः तेषां विलासः कांतिः तस्य भक्त्या सकाकर्माशयं अहंकाररूपं हृदये ग्रथितं कर्मभिर्ब नं२
द्धं ग्रथितं रिक्तानि विषयामतिर्येषां रुद्धः प्रत्याहृतः स्रोतोगण इंद्रियवर्गो यैः अरणं शरणं २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० ननुब्रह्मविदाप्नोतिपरमितिश्रुतेः कथंयतयोनकूपयंतीत्युच्यतेतत्राह कृच्छ्रइति अप्लवेशानंप्लवस्मरणहेतुः वं२
ईड ईशोयेषां तेषांमहानिहतरणेकृच्छ्रः क्लेशः नहिअसुखेनयोगादिनाइंद्रियषड्वर्गग्राहंभवार्णंतितीर्षंतिते
तस्मात् उडुपंप्लवं दुस्तरार्णवमित्यर्थः यद्वाअर्णोशब्देवकाराभावआर्षःदुस्तरोदकरूपंसंव्यसनमित्यर्थः ४०
आत्ममेधसाब्रह्मविदादर्शिताआत्मनोगतिस्तत्वंयस्मैसः ४१ ब्रह्मन्नितिसंबोधनंप्राधान्यादेकस्ययूयमि

कृच्छ्रोमहानिहभवार्णवमप्लवेशांषड्वर्गनक्रमसुखेनतितीर्षंति तत्त्वंहरेर्भगवतोभजनीयमं यं१
घ्रिंकृत्वोडुपंव्यसनमुत्तरदुस्तरार्णं ४० श्रीमैत्रेयउवाच सएवंब्रह्मपुत्रेणकुमारेणात्ममेधसा
दर्शितात्मगतिःसम्यक्प्रशस्योवाचतंनृपः ४१ श्रीराजोवाच कृतोमेऽनुग्रहःपूर्वंहरिणाऽर्ता
६१ नुकंपिना तमापादयितुंब्रह्मन्भगवन्यूयमागताः ४२ निःपादितश्चकार्त्स्न्येनभगवद्भिर्घृ
णालुभिः साधूच्छिष्टंहिसर्वंमेआत्मनासहकिंददे ४३ प्राणादाराःसुताब्रह्मन्गृहाश्चस
परिच्छदाः राज्यंमहीबलंकोशइतिसर्वंनिवेदितं ४४ सेनापत्यंचराज्यंचदंडनेतृत्वमे
वच सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति ४५ स्वमेवब्राह्मणोभुंक्तेस्वंवस्तेस्वंददाति
च तस्यैवानुग्रहेणान्नंभुंजतेक्षत्रियादयः ४६

त्युक्तिःसर्वान्प्रति ४२ आत्मनादेहेनसहसर्वराज्यादिकंमदीयंसाधूच्छिष्टंसाधुभिःस्वीयंसन्मह्यंप्रसाद राम
रूपेणदत्तं अतस्तत्रममस्वत्वाभावात् गुरुदक्षिणार्थंकिंददे नहिपित्रादत्तंमोदकादितस्मैदानरूपेणप्र
त्यर्प्यते ४३ निवेदनंतुतदीयस्यैवसमर्पणंयथाभृत्याराज्ञेसेवारूपेणतांबूलादिकंसमर्पयंति तथाम ६१
याऽपिसर्वंनिवेदितंस्वीकुरुतेत्याह प्राणाइति ४४ आत्मनःस्वत्वाभावंप्रपंचयति सेनापत्यंचेतिद्वा
भ्यां ४४ वस्तेपरिधत्ते अन्नमात्रंकेवलंभुंजतेनतुदानस्वतंत्राः ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यपि स्वस्वेव सर्वस्वेनापि न गुरोः प्रत्युपकर्तुं शक्यमित्याह येरिति आत्मवादे अध्यात्मविचारे एकांततः निश्चयेन
नियमिभिर्यदवद्भिः तेनित्यमनल्पकं तुणाः स्वकृतेनैव दीनोद्धरणकर्मणानुष्यंतु कोनामतत्कृतमुपकारं प्रतिस्व १३
यमुपकरोति उदकपात्रमंजलिं विना मयाजलिर्यतस्यावद्ध इत्यर्थः यद्वा विनोदपात्रं उपहासास्पदं प्रत्युपकारप्रद
नोजनानामुपहासास्पदं भवेदित्यर्थः ४७ खेः भुवन् आकाशमार्गेणाद्भुताः ४८ धुर्यो मुख्यः अध्यात्मशिक्षया स

पैरीदृशी भगवद्योगनिरात्मवादः एकांततो नियमिभिः प्रतिपादितानाः गुष्यंत्वदत्र कैतुणाः स्वकृतेन नित्यं को
नि॰ ८ नामतत्प्रतिकरो विनोदपात्रं ४७ तस्यात्मयोगपतयः आदिराजेन पूजिताः शीलेन हीयं शसंतः खेऽभूवन्नि
षतान्तणा ४८ येनस्य धुर्यो महतां संस्थितो ध्यात्मशिक्षया आप्तकाममिवात्मानं मेनात्मन्यः च स्थितः
४९ कर्माणि च यथाकालं यथादेशं यथाबलं यथाचितं यथाचितमकरोद्ब्रह्मसात्कृतं ५० फलं ब्रह्मणि वि
न्यस्य निर्विसंगः समाहितः कर्माध्वंसं च मन्वान आत्मानं प्रकृतेः पर ५१ गृहेषु वर्तमानोऽपि स साम्रा
ज्यश्रियाऽन्वितः नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ५२ एवमध्यात्मयोगेन कर्माण्यनुसमाचरन् पु
त्रानुत्पादयामास पंचार्चिष्मानुसमान् ५३ विजयाश्वं धूम्रकेशं हर्यक्षं द्रविणं वृकं सर्वेषां लोकपा
नां दधारैकः पृथक्गुणान् ५४ गोपीथाय जगत्सृष्टेः काले स्वे स्वेऽच्युतात्मकः मनोवाग्वृत्तिभिः सौम्यैर्गु
णैः संरंजयन्प्रजाः ५५ राजेत्यधान्नामधेयं सोमराज इवापरः सूर्यवद्विसृजन्गृह्णन्प्रतापंश्च भुवोवसु
५६ दुर्द्धर्षस्तेजसा वाग्निर्महेंद्र इव दुर्जयः तितिक्षया धरित्रीवद्द्यौरिवाभीष्टदो नृणां ५७ श्रीरामः॥

स्थितिरेकाग्रतायात्मन्येव स्थितः सन्नमेने ४९ ब्रह्मसात्कृतं ब्रह्मण्यर्पितं यथा भवति ५० निर्विषंगः कर्मस्वनासक्तः
कर्माध्वंसं कर्मसाक्षिणमुदासीनं मन्वानोऽकरोदिति पूर्वेणैवान्वयः ५१ नासज्जत् तु तेरणवा ५१ अर्चिषि भार्यायां ५३ ५४ ५५
सामश्वासौ राजा च स इव भुवोवसुधनं गृह्णन् विसृजन् आसीत् सूर्यवत् राज्ञः प्रपत्नीमाज्ञाकरणं ५६ अग्निरिव दुर्द्धर्षः
योः स्वर्ग इव ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० समुद्रोयथागांभीर्येणेतावानितिनवुध्यतेतथाः सावभिप्रायतोदुर्बोधः अचलराट् मेनुरिव ५९ सर्वात्मासर्वसंचार
शक्तिर्वलादिभिर्मातरिश्वेव भूतराट् श्रीरुद्रः ६० अजोब्रह्मेव आत्मवत्वे जितेंद्रियत्वे भक्त्यादिभिः परार्थोद्यमेचा
लनेवतुल्यः निरुपमः पुंभिः सत्पुरुषैः रामः सीतापतिर्यथासतांकर्णरंध्रेषुप्रविष्टः ६१ चतुर्थेद्वाविंशः ॥२१॥
त्रयोविंशेसभार्यस्यवनेनित्यसमाधिनः विमानमधिरुह्याथवैकुंठगतिरीर्यते प्रवयसं० दृष्ट्वात्मपावनम

वर्षतिस्मयथाकामैः पर्जन्यइवतर्प्पयन् समुद्रइवदुर्बोधः सत्वेनाचलराडिव ५८ धर्मराडिवशि
क्षायामाश्चर्येहिमवानिव कुवेरइवकोशाढ्योगुप्तार्थोवरुणोयथा ५९ मातरिश्वेवसर्वात्मावलेनस
हसौजसा अविषह्यतयादेवोभगवान्भूतराडिव ६० कंदर्प्पइवसौंदर्येमनस्वीमृगराडिव ॥ वात्स
ल्येमनुवन्नृणां प्रभुत्वेभगवानजः वृहस्पतिर्ब्रह्मवादे आत्मवत्वेस्वयंहरिः भक्त्यागोगुरुविप्रेषु
विष्वक्सेनानुवर्तिषु क्रियाप्रश्रययशीलाभ्यामात्मतुल्यः परोद्यमे कीर्त्योर्ध्वगीतयापुंभिस्त्रैलो
क्येतत्रतत्रह प्रविष्टः कर्णरंध्रेषुस्त्रीणांरामः सतामिव ६२ इतिश्रीभागवतेमहापुराणेचतुर्थ
स्कंधेपृथुचरितेद्वाविंशोध्यायः मैत्रेयउवाच दृष्ट्वात्मानंप्रवयसमेकदावैन्यआत्मवान् आ
त्मनावर्द्धिताशेषस्वानुसर्गः प्रजापतिः १ जगतस्तस्थुषश्चापिवृत्तिदोधर्मभृत्सतां निष्पादितेश्वरादेशोयदर्थमिहजज्ञिवान् २ आत्मजेष्वात्मजांन्यस्यविरहाद्रुदतीमिव प्रजासुविमनस्वकः सदारः
गात्तपोवनं ३ तत्राप्यदाभ्यनियमोवैखानससुसंमते आरब्धउग्रतपसियथास्वविजयेपुरा ४

गादितितत्रीयेनान्वयः स्वकृतोऽनुसर्गः अन्नादिसर्गः पुरग्रामादिसर्गश्च वर्द्धितः स्वानुसर्गोयेननिष्पादितईश्व
रादेशः प्रजापालनादिर्येन जज्ञिवान्जातः २ आत्मजांपृथ्वीविमनः सुचिंतातुरास्तु सदारः सभार्यः ॥३॥
अदाभ्यांविघ्नैर्नाशयितुमशक्यानियमायस्य वानप्रस्थानांसुसंमतेउग्रेतपसिआरब्धः प्रवृत्तः कर्त्तरिक्तः स्वस्यधरांमंडलस्य

विजितेवस्ववानस्त्रावकमकरनिवृत्तं ४

राम
६२

अ०२३:

उग्रं तपो दर्शयति कंदमूलेति त्रिभिः क्वचित्कदाचित् ५ चतुर्दिक्षु चत्वारोऽग्नयः उपरि सूर्य इति पंचानां तापः संतापो
यस्य स पंचतपाः आसारं सहत इत्यासारषाट् शिशिरे ऋतौ स्थंडिलेशयः भूमिशयनः सर्वदा ६ ७ तेन तपसा क्रमानुसि
द्धेन शनैः प्राप्तेन ध्वस्तानि कर्माणि यस्य अतः अमलः आशयो यस्य छिन्नानि च बंधनानि वासना यस्य ८ ९ १० परिक
तस्य १ र्मणा परिचर्यया शुद्धसत्त्वः आत्मा मनो यस्य ज्ञानमभूत् कीदृशं येन निजमुपाधिं जीवकोशं हृदयग्रंथिं संशयानां

कंदमूलफलाहारः शुष्कपर्णाशनः क्वचित् अब्भक्षः कतिचित्पक्षान् वायुभक्षस्ततः परं ५ ग्रीष्मे पंचत
पा वीरो वर्षास्वासारषाण्मुनिः आकंठमग्नः शिशिरे उदके स्थंडिलेशयः ६ तितिक्षुर्यतवाग्दांत ऊ
र्द्ध्वरेता जितानिलः आरिराधयिषुः कृष्णमचरत्तप उत्तमं ७ तेन क्रमानुसिद्धेन ध्वस्तकर्मामलाशयः
प्राणायामैः संनिरुद्धषड्वर्गः छिन्नबंधनः सनत्कुमारो भगवान् यदाहाध्यात्मिकं परं योगं तेनैव पुरुष
तू ५ मभजत्पुरुषर्षभः ८ भगवद्धर्मिणः साधोः श्रद्धया यततः सदा भक्तिर्भगवति ब्रह्मण्यनन्यविषयाऽभव
त् ९ तस्याऽनया भगवतः परिकर्मशुद्धसत्त्वात्मनस्तदनुसंस्मरणानुपूर्त्या ज्ञानं विरक्तिमदभून्निशित
नयेन चिच्छेद संशयपदं निजजीवकोशं ११ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेऽच्छिनदिदं
वयुनेन येन तावन्न योगगतिभिर्यतिरप्रमत्तो यावद्गदाग्रजकथासु रतिं न कुर्यात् १२

ना १ असंभावनैर्हीनां पदमाश्रयं चिच्छेद कीदृशेन अनया भक्त्या निशितेन कथंभूतया तस्य भगवतः संस्मरणेनानुपूर्तिर्य
स्याः तया निशितेन ११ किंच छिन्ना अन्यधीर्देहात्मबुद्धिर्यस्य यतोऽधिगतात्मगतिः अतएव निरीहः योगसु
सिद्धिषु निस्पृहः येन वयुनेन ज्ञानेन इदं संशयपदं चिच्छेद तत् तत्याज अत्यक्तवान् तत्प्रयत्नादप्युपरराम इत्यर्थः
तस्य योगसिद्धिष्वपि निस्पृहत्वं युक्तमेवेत्याह तावन्नाप्रमत्तः किंतु प्रमत्तो भवतीति तस्य श्रीकृष्णकथारतत्वान्नता
सुलभो जागदित्यर्थः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० १३ देहत्यागप्रकारमाह संपीड्येति त्रिभिः पायुं गुदं संपीड्य अतिमुक्तासनं सूचितं संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु मध्यतः सव्यं दक्षिणगुल्फेन मुक्तासनमितीरितं मूलाधाराद्वायुमुत्सारयन् ऊर्ध्वं नयन् नाभ्यामास्थापयतः कोष्ठेष्ववस्थाप्य अयूयुजदित्युत्तरेणान्वयः कोष्ठानवं [illegible] नह हृदादीनां हृदं कंठ शीर्षं भ्रूमध्यं तस्मिन् तं वायुं पा

नमा १

एवं स वीरप्रवरः संयोज्यात्मानमात्मनि ब्रह्मभूतो दृढं काले तत्याज स्वं कलेवरं १३ संपी
शनैः २ ड्य पायुं पार्ष्णिभ्यां वायुमुत्सारयन् नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरः कंठशीर्षणि १४ उ
सन २ त्सर्पयंस्तु तं मूर्ध्नि क्रमेणावेश्य निस्पृहः वायुं वायौ क्षितौ कायं तेजस्तेजस्ययूयुजत्
६३ १५ खान्याकाशे द्रवं तोये यथास्थानं विभागशः क्षितिमंभसि तत्तेजस्यदो वायौ न
भस्यमुं १६

पाठांतरे एवमसन् प्राणानुत्सर्पयन् क्रमेण मूर्ध्नि ब्रह्मरंध्रमावेश्य ततो देहारंभकपंचभूतानि समष्टिभू राम
तेषु विलापितवान् तदाह वायुं वायोश्चायूयुजत् एकीकृतवान् कायं देहगतं कठिनांशं क्षितौ खानि इंद्रि ६३
यच्छिद्राणि द्रवांशं तोये तदेवं देहं प्रविलाप्याधिष्ठितीयात्मप्रतिपत्त्यर्थं महाभूतानामपि लयमाह क्षितिमंभ
स्येकीकृतवान् तत् अंभः अदस्तेजः अमुं वायुं १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं नाम सा अहंकारकार्यस्याकाशपर्यंतं लयमुक्त्वा सात्विकराजसाहंकारकार्याणां लयमाह इंद्रियेषु मन इति देवाना
मप्युपलक्षणं सविकल्पज्ञानेन मनसः इंद्रियैराकर्षणात्तेषु लयाभिधानं न तु कार्यत्वात् तदुक्तं गीतासु इंद्रियाणां हि
चरतां यन्मनोऽनुविधीयत इति इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मन इति इंद्रियेषु नभ इति पाठेऽप्ययमर्थः भूता
दीनां मतेन नभश्श्रोत्रेषु च केषांचिन्मानसं आनुमानिकत्वमतः अपीन्द्रियव्यापारोऽस्त्येव नभोगुणश्शब्दः श्रोत्रग्रा
ह्यः अत इंद्रियग्राह्यत्वादिंद्रियेषु नभो विलापितमिति तानींद्रियाणि पथोद्भवं उद्भवोऽहंकारस्तत्र लाभः सेच विषया

इंद्रियेषु मनस्तानि तन्मात्रेषु यथोद्भवं भूतादिनाऽमून्युत्क्षिप्य महत्यात्मनि संदधे १७ तं सर्वगु
णविन्यासं जीवे मायामये न्यधात् तं चानुशयमात्मस्थमसावनुशयी पुमान् १८ ज्ञानवैराग्य
वीर्येण स्वरूपस्थोऽजहात्प्रभुः १८ अर्चिर्नाम महाराज्ञी तत्पत्न्यनुगता वनं सुकुमार्यतदर्हा
च यत्पद्भ्यां स्पर्शनं भुवः १९ अतीव भर्तुर्व्रतधर्मनिष्ठया शुश्रूषया चार्षदेहयात्रया नाविंदतार्तिं
परिकर्षितापि सा प्रेयस्करस्पर्शनमाननिर्वृतिः २० श्रीराम जय राम जय जय राम श्रीराम ॥

पृथु०

धीन इति श्रोत्रादीनां विशेषणं शब्दादिषु लयः यद्वा तन्मात्रकार्याण्येवेंद्रियाणि मनोऽप्यपंचीकृतपंचतन्मात्र
कार्यं अहंकारिकत्वाभिधानं तदधीनत्वविवक्षयेत्यविरोधः भूतादिनाऽहंकारेण प्रागवशिष्टेन भः सहितानींद्रिया
णि उत्क्षिप्य परतानीत्वा भूतादौ क्षिप्त्वा तेन सह महत्तत्वे संदधे इत्यर्थः १ सर्वे ये गुणानां कार्याणां विन्यासः स्थिति
र्यस्मिन् तं महांतं मायामये मायोपाधिप्रधाने जीवे तं चानुशयमुपाधिं यः एवमनुशयी पुमान् जीवः असौ पृथुः ब्र
ह्मणि स्थितः सन्तज्जहादित्यर्थः १८ वनप्रवेशमारभ्य राज्ञ्याः कथामाह अर्चिर्नामेति चतुर्भिः अनुगता अनुजगाम अतद
र्हा तदपि नार्हति या किं पद्भ्यां भुवः स्पर्शनमिति यत् १९ भर्तुर्व्रतं यद्यमिशयनादि तस्मिन् धर्मे या निष्ठा तया आर्षे
ण मियमापि देहयात्राकंदमूलादि तृत्ति स्तयाच आर्तिं दुःखं न प्राप तत्र हेतुः प्रेयस्करेण स्पर्शनमानमतो

४४ पृथु

८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च०

पृथिव्याः पत्युर्दुहितृत्वं तु तस्या देवतारूपेण विपन्नं नष्टम् अखिलं चेतनादिकं यस्मिन् तथाभूतं देहमालक्ष्य पत्युर्देहं चिता
मारोपयत् ॥ २१ ॥ कृत्यं तत्कालोचितं विधाय कृदिन्याजले आप्लुता स्नाता सती भर्तुरुदकं दत्वा दिवि स्थितान् दिक्षु स्थि
तान्नत्वा वह्निं त्रिः प्रदक्षिणीकृत्य ॥ २२ देवैः सहिता २३ गृणंति स्मत्र भाषंते ॥ २४ २६ भगवान् अच्युतगम्य

६४

देहं विपन्नाखिलचेतनादिकं पत्युः पृथिव्या दयितस्य चात्मनः आलक्ष्य किंचिच्च विलप्य सा
सती चितामथाऽरोपयदद्रिसानुनि २१ विधाय कृत्यं ह्रदिनीजलाप्लुता दत्वोदकं भर्तुरु
२२ दारकर्मणः नत्वा दिविस्थांस्त्रिदशांस्त्रिः परीत्य विवेश वह्निं ध्यायती भर्तृपादौ २२ विलो
क्यानुगतां साध्वीं पृथुं वीरवरं पतिं तुष्टुवुर्वरदा देवैर्देवपत्न्यः सहस्रशः २३ कुर्वत्यः कुसुमा
सारं तस्मिन्मंदरसानुनि नदत्स्वमरतूर्येषु गृणंति स्म परस्परं २४ देव्य ऊचुः अहो इयं वधू
र्धन्या या चैवं भूभुजां पतिं सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव २५ सैषा नूनं व्रजत्यूर्ध्वम
नुवैन्यं पतिं सती पश्यताऽस्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा २६ तेषां दुरापं किं त्वन्यन्म
र्त्यानां भगवत्पदे भुवि लोलायुषो ये वै कर्म्य साधयंत्युत २७ स वंचितो बतात्मध्रुक्कृ= नै २
च्छ्रेण महता भुवि लब्ध्वाऽपवर्ग्यं मानुष्यं विषयेषु विषज्जते २८ श्रीराम श्रीराम श्रीराम

तेऽनेनेति तथा तैर्नैष्कर्म्यं ज्ञानं ये च चंचलायुषोऽपि साधयंति तेषामन्यद्देवादिपदं किं नु दुर्लभं न किंचिदि
त्यर्थः २७ अभक्तेश्चाह स इति स वंचितः इति यत आत्मानं द्रुह्यति योऽपवर्गसाधनं मानुष्यं लब्ध्वाऽपि विषये
ष्वासक्तिं याति २८

६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशांपश्वादीनांवैश्यादीनांवापतिः स्यात् ३२ ३६ यद्यपिवह्निफलानिभवंति तथाःपिमुक्तान्यसंगएवश्रवणादि

श्रीमैत्रेयउवाच इत्थंनीर्वि ःमरस्त्रीपुपतिलोकंगतावधूः यंवाआत्मविदांधुर्योवैन्यःप्रापाच्यु
ताश्रयः २९ इत्थंभूतानुभावोसौपृथुः सभगवत्तमः कीर्तितंतस्यचरितमुद्दामचरितस्यते ॥ ३०
यइदंसुमहत्पुण्यंश्रद्धयाःवहितःपठेत् श्रावयेच्छृणुयाद्वापिसपृथोःपदवीमियात् ३१
ब्राह्मणोब्रह्मवर्चस्वीराजन्योजगतीपतिः वैश्यःपठन्विट्पतिःस्याच्छूद्रःसत्तमतामियात् ३२
त्रिःकृत्वइदमाकर्ण्यनरोनार्यथवादृताः अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः ३३ अस्पष्टकी
र्तिःसुयशामूर्खोभवतिपंडितः इदंस्वस्त्ययनंपुंसाममंगल्यनिवारणं ३४ धन्यंयशस्यमायुष्य
स्वर्ग्यंकलिमलापहं धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः ३५ श्रद्धयैतदनुश्राव्यंच
तुर्णांकारणंपरं विजयाभिमुखोराजाश्रुत्वैतदभियातियान् ३६ वलिंतस्मैहरंत्यग्रेराजानःपृ
थवयथा मुक्तान्यसंगोभगवत्यमलांभक्तिमुद्वहन् ३७ वैन्यस्यचरितंपुण्यंश्रृणुयाश्रावयेत्
पठेत् वैचित्रवीर्याभिहितंमहन्माहात्म्यसूचकं ३८ अस्मिन्कृतमतिमर्त्यःपार्थवींगतिमाप्नु
यात् अनुदिनमिदमादरेणश्रृण्वन्पृथुचरितंप्रथयन्विमुक्तसंगः भगवतिभवसिंधुपोत
भा. २१ पादेसचनिपुणांलभेतगतिमनुष्यः ३९ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपृथुचरितेत्र
योविंशोध्यायः

कुर्यात् ३७ महतोभगवतोमाहात्म्यस्यसूचकं पार्थवींपृथुसंवंधिनीं पार्थिवीमितिवापाठः ३८ प्रथयन्
कीर्तयन् भवसिंधोःपोतःपादोयस्य ३९ इतिश्रीभागवतभावार्थदीपिकायांश्रीधरस्वामिविरचितायांचतु
र्थेत्रयोविंशोध्यायः ॥

भा० च एकादशभिरध्यायैः पृथोश्चरितमीरितं प्रचेतसामथाष्टाभिस्तन्मध्ये पंचभिः पितुः १ चतुर्विंशे प्रपौत्रात्तु पृथोः प्राचीनब
र्हिषः प्रचेतसां जनिस्तेभ्यो रुद्रगीतं च वर्ण्यते अधिराज आसीदित्यर्थः यवीयोभ्यः कनिष्ठेभ्यः काष्ठा दिशः १ तुर्यां चतु
र्थीं २ शक्राल्लब्ध्वा पृथोरश्वमेधे अश्वविजयावसरे ३ अपत्यत्रयमेवाह पावक इति पुरा पः शापस्तस्मान्मनुष्येषू
त्पन्नाः संतः योगगतिं अग्नित्वं प्राप्ताः ४ नभस्वत्यां अन्तर्धानस्य भार्यायां अन्तर्धानविशेषणं य इति एतेन शक्रादन्तर्द्धा

श्रीमैत्रेय उवाच विजिताश्वोऽधिराजाऽसीत्पृथुपुत्रः पृथुश्रवाः यवीयोभ्योऽददात्काष्ठा भ्रातृभ्यो भ्रातृवत्सलः १
हर्यक्षायादिशत्प्राचीं धूम्रकेशाय दक्षिणां प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः २ अन्तर्धानगतिं भाग्यो
शक्राल्लब्ध्वान्तर्धानसंज्ञितः अपत्यत्रयमाधत्त शिखंडिन्यां सुसंमतं ३ पावकः पवमानश्च शुचिरि
त्यग्नयः पुरा वशिष्ठशापादुत्पन्नाः पुनर्योगगतिं गताः ४ अंतर्धानो नभस्वत्यां हविर्धानमविंदत यः
६५ इंद्रमश्वहर्तारं विद्वानपि न जघ्निवान् ५ राज्ञां वृत्तिं करादानदंडशुल्कादिदारुणां मन्यमानो दीर्घसत्र
व्याजेन विससर्ज ह ६ तत्रापि हंसं पुरुषं परमात्मानमात्मदृक् यजंस्तल्लोकतामाप कुशलेन समा
धिना ७ हविर्धानाद्धविर्धानी विदुरासूत षट्सुतान् बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतं ८ बर्हिष
त्सुमहाभागो हाविर्धानिः प्रजापतिः क्रियाकांडेषु निष्णातो योगेषु च कुरूद्वह ९ यस्येदं देवयज
नमनुयज्ञं वितन्वतः प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलं १० श्रीराम श्रीराम श्री

नगतिलाभे कारणमुक्तं ५ संचान्तर्धानो राज्ञां वृत्तिं करादानादिभिर्दारुणां परपीडात्मिकां मन्यमानो विससर्ज ६ हंसं...स्वा
नी १ नं लोकामितिहंसः तं पुरुषं पूर्णं कुशलं पुण्यं तद्रूपेण समाधिना ७ ८ हविर्धानी हविर्धानस्य पुत्रः योगेषु च प्राणायामादि
षु क्रियाकांडे निष्णातत्वमाह यस्येति इदं वसुधातलं देवयजनं यज्ञवाटं वितन्वतः यत्र क्व यज्ञः कृतः तत्समीप एव राम
यज्ञान्तरं कुर्वतः सतः अत एव प्राचीनबर्हिरित्युच्यते १० श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री ६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ१

समुद्रस्य कन्यां देवदेवेन ब्रह्मणोपदिष्टां शतद्रुतिं नाम किशोरीं बालां ११ परिक्रमंतीं प्रदक्षिणं गच्छंतीं शुकीमिव ति
एवं व्याख्यायंते सप्तर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः कामसंतप्तोऽभूत् तत्र तद्भार्या स्वाहा नाम सप्तर्षिभार्यारू
पधारिणी सती रमयामास रमयित्वा वनं द्रुता शुकीरूपेण शरस्तंभे निधाय गतेत्यतः तां यथा सप्तर्षिभार्याकांक्षया भां२
घ१ ग्निः कामितवान् तद्वदिति स्कांदे शिवंवि पांठस्ताकर्णेन धारामिवेत्यर्थः १२ सूर्यया नेवाटयेव च विबुधादयो विजिता

उ१ सामुद्रीं देवदेवोक्तामुपयेमे शतद्रुतिं यां वीक्ष्य चारुसर्वांगीं किशोरीं सुष्ठ्वलंकृतां ११ परिक्रमंतीमुद्वाहे च
कमेऽग्निः शुकीमिव विबुधासुरगंधर्वमुनिसिद्धनरोरगाः १२ विजिताः सूर्यया दिक्षु क्वणयंत्यैव नूपुरैः
प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् १३ तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः पित्राऽ
दिष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् १४ दशवर्षसहस्राणि तपसार्चंस्तपःस्पतिं यदुक्तं पथि दृष्टे
न गिरिशेन प्रसीदता तं ध्यायंतो जपंतश्च पूजयंतश्च संयताः १५ विदुर उवाच प्रचेतसां गिरित्रेण
यथाऽऽसीत्पथि संगमः यदुताह हरः प्रीतस्तन्नो ब्रह्मन् वदार्थवत् १६ संगमः खलु विप्रर्षे शिवेनेह
शरीरिणां दुर्लभो मुनयो दध्युरसंगाद्यमभीप्सितं १७ आत्मारामोऽपि यस्त्वस्य लोककल्पस्य राधसे
शक्त्या युक्तो विचरति घोरया भगवान् भवः ॥१८॥

अभिभूताः तत्र नूपुरैः पादाक्षणायंत्यैव ध्वनिमात्रेणेत्यर्थः १३ तुल्यं नाम व्रतमाचारश्च येषां धर्मस्नाताः धर्मपार
गाः १४ तपसा तपसां पतिं हरिमार्चन् अर्चयामासुः १५ १६ मुनयोऽपि संगत्यागेन सुमिष्टं यद्ध्युरेव केवलं न
तु प्रापुः तेन शिवेन १७ ननु मुनीनां किं तज्ज्ञानेन घोरत्वादित्याशंक्याह आत्मारामोऽपि लोकरचनयाः पालनाय १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ४० गुर्वाज्ञाकारिणां शिवदर्शनं स्व तदेव भवतीत्याशयेनाह प्रचेतस इति १९ समुद्रमुपसमुद्रमिति चिन्मूर्तेरुपाधिके वे
तिकमेव वचनीयः प्रसन्नास्सलिलाशयामत्स्यादयो यस्मिन् २० नीलोत्पलादीनामाकारं जन्मस्थानं उत्पलाम्भो
जकल्हाराणि रात्रिदिनसंध्याविकासिनी इंदीवरं नीलोत्पलं तस्य पुनरुक्तिः प्राचुर्यज्ञापनार्थं हंसादिभि
र्निकूजितं २१ मत्तानां भ्रमराणां सौस्वर्येण हृष्टरोमाणो लतांघ्रिपाः यस्मिन् पद्मकोशरजो दिक्षु विक्षिपता
पवनेनोत्सवो यस्मिन् २२ तत्र मृदंगपणवादिवाद्यमनुपश्चाद्दिव्यमार्गं भेदेमनोहरं गांधर्वगानमाकर्ण्य वि

श्रीमैत्रेय उवाच प्रचेतसः पितुर्वाक्यं शिरसादाय साधवः दिशं प्रतीचीं प्रययुस्तपस्यादृतचेतसः १९
समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः महन्मन इव स्वच्छं प्रसन्नसलिलाशयं २० नीलरक्तोत्पलां
भोजकह्लारेंदीवराकरं हंससारसचक्राह्वकारंडवनिकूजितं २१ मत्तभ्रमरसौस्वर्यहृष्टरोमल
तांघ्रिपं पद्मकोशरजो दिक्षु विक्षिपत्पवनोत्सवं २२ तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरं वि
६६ सिस्म्यू राजपुत्रास्ते मृदंगपणवाद्यनु तर्ह्येव सरसस्तस्मान्निष्क्रामंतं सहानुगं उपगीयमानम स्कं० ४
मरप्रवरं विबुधानुगैः २४ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनं प्रसादसुमुखं वीक्ष्य प्रणेमु
र्जातकौतुकाः २५ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः धर्मज्ञान्शीलसंपन्नान्प्रीतः प्रीता
नुवाच ह २६ श्रीरुद्र उवाच यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितं अनुग्रहाय भद्रं व एवं मे दर्श
नं कृतं २७ यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् भगवंतं वासुदेवं प्रपन्नः स प्रियो हि मे २८

स्मयं प्राप्ताः पणवान्तरं मृदंगपणवादिश्रवणानंतरं तेषां ध्वनिमपि रस्तुर्विदितेत्यर्थः २३ २४ तेच त्रिलोचनं वीक्ष्य राम
जाताश्चर्याः प्रणेमुरित्युत्तरेणान्वयः तप्तहेमराशिसदृशकांतिः शिति नीलः कंठो यस्य तं २६ वेदिषदः चिकीर्षितं भ ६६
गवदाराधनं विदितं २७ अनुग्रहकारणमाह यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतं रंहसः सूक्ष्मात्त्रि
गुणात्प्रधानात् जीवसंज्ञितात् पुरुषाच्च परं प्रकृतिपुरुषयोर्नियंतारमित्यर्थः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि तस्य महत्त्वमत्वादित्याह स्वधर्मनिष्ठः पुमान्वहुभिर्जन्मभिर्विरिञ्च्यतां प्राप्नोति ततोपि पुण्यातिशयेन मामेति ॥
भागवतस्तु अथ देहान्ते अव्याकृतं प्रपंचातीतं वैष्णवं पदमेति यथाहं रुद्रो भूत्वा आधिकारिकवद्वर्तमानः विवु
धा देवा आधिकारिकाः कल्पात्यये अधिकारान्ते लिंगभंगे सत्येष्यंति २९ अथ भागवता यूयं मे प्रियाः भव
द्भिरपि मयि प्रीतिः कार्येत्याशयेनाह मदन्यो भागवतानां च प्रेयान्नास्ति ३० अत इदं जप्तव्यं श्रूयतामिति विविक्त रु॰ २

स्वधर्म्मनिष्ठः शतजन्मभिः पुमान् विरिंच्यतामेति ततः परं हि मां अव्याकृतं भागवतोऽथ वैष्ण
वं पदं यथाऽहं विवुधाः कलात्यये २९ अथ भागवता यूयं प्रियाः स्थ भगवान् यथा न मद्भागव
तानां च प्रेयानन्योऽस्ति कर्हिचित् ३० इदं विविक्तं जप्तव्यं पवित्रं मंगलं परं निःश्रेयसकरं
चापि श्रूयतां यद्वदामि वः ३१ मैत्रेय उवाच ॥ इत्यनुक्रोशहृदयो भगवानाह तान् शिवः ॥
वद्धांजलीन् राजपुत्रान् नारायणपरो वचः ३२ श्रीरुद्र उवाच जितं त आत्मविद्धुर्यस्व
स्तये स्वस्तिरस्तु मे भवताराधसा राद्धं सर्वस्मा आत्मने नमः ३३

मम संकीर्णं यथा भवति ३१ स स्पृष्टो ब्रह्मणा हृष्टा पुत्रेभ्यः प्रोक्तमिष्टं देवतान्तं प्राह प्रचेतोभ्यः कृपया भगवांछिवः ३२
हे जितं तवोत्कर्षः आत्मविदां धुर्याणां स्वस्तये शोभनसत्तोपस्वानंदलाभायेत्यर्थः अतो मे स्वस्तिः स्वानंदसत्ता
स्तु ननु ममोत्कर्षो मदर्थ एव किं न स्यात् तत्राह भगवताराधसा स्वानंदरूपेण राद्धं सिद्धं त्वं परमानंदरूपेण
वनित्यसिद्ध इत्यर्थः अत एवंभूताय आत्मने तुभ्यं नमः सर्वस्मै सर्वरूपाय च ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च० सर्वरूपत्वं प्रपंचयन्प्रणमति सोऽर्द्धैर्दशभिः पंकजं लोकात्मकं नाभौ यस्य तस्मै कारणात्मने नमः कारणत्वं दर्शयन्नाह भूतानां प्राणिनां
यदुपाधयः भूतानि सूक्ष्माणि तन्मात्राणि इंद्रियाणि च तेषामात्मने नियंत्रे अतः कारणचतुष्टयाधिष्ठातृत्वेन प्रण २१
मति चतुर्भिः श्लोकार्द्धैः वासुदेवाय चित्ताधिष्ठात्रे कूटस्थाय निर्विकाराय चित्तस्य कूटरूपत्वात् ३ ४ अहंकाराधिष्ठा संकर्षणाय ३
त्रे सूक्ष्माय अव्यक्ताय दुरंताय अनंताय अंतकाय मुखाग्निना लोकदाहकाय विश्वस्य प्रकृष्टबोधो यस्मात्
५१ अंतरात्मने बुद्ध्यधिष्ठात्रे हृषीकाणामीशो यदिंद्रियं मनः तदात्मने स्वयंरूपेण प्रणमति परमहंसाय पूर्णाय ५१

नमः पंकजनाभाय भूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवाय शांताय कूटस्थाय स्वरोचिषे २४ संकर्षणा
स्२१ य सूक्ष्माय दुरंतायांतकाय च ॥ नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने २५ नमो नमोऽनिरुद्धाय
हृषीकेशेंद्रियात्मने ॥ नमः परमहंसाय पूर्णाय निभृतात्मने २६ स्वर्गापवर्गद्वाराय नित्यं शुचि स्प २
षदे नमः ॥ नमो हिरण्यवीर्याय चातुर्होत्राय तंतवे २७ नम ऊर्ज इषे त्रय्याः पतये यज्ञरेतसे
तृप्तिदाय च जीवानां नमः सर्वरसात्मने २८ सर्व [illegible] सत्वात्मदेहाय विशेषाय स्थवीयसे ॥
नमस्त्रैलोक्यपालाय सह ओजोबलाय च २९ ॥

यत्तेजसा विश्वव्यापिना निभृतात्मने क्षयरहित पूर्णाय २६ स्वर्गापवर्गद्वाराय च शुचिर्नित्यः करणेनिषीदतीति
शुचिषत् तस्मै हंसः शुचिषदिति श्रुतेः हिरण्यं वीर्यं यस्य तस्मै अग्निरूपाय चातुर्होत्रं कर्म तस्मै तत्साधनाय
त्वर्थः कुतः तंतवे विस्तारकाय २ सोमरूपमाह ऊर्जे पितॄणामन्नाय इषे देवानामन्नाय यज्ञरेतसे सोमाय स रम
हि पितॄणां देवानां चान्नं एवंरूपाय त्रय्याः पतये हरये नमः सूर्याग्निसोमत्वेन तेजस्त्वमुक्त्वा जलत्वमाह सर्व ६८
रसात्मने जलरूपाय २८ विशेषाय पृथ्वीरूपाय सर्वेषां सत्वानां प्राणिनां य आत्मानस्तेषां देहाय स्थवीय
से विराड्देहाय च त्रैलोक्यपालाय वायवे सह ओजादि रूपाय महिमाणरूपेण त्रैलोक्यं पालयति सह आदि
धर्मो च २९ ॥
य १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नभसे आकाशाय अर्थानां लिंगाय ज्ञापकाय शब्दगुणत्वात् अंतर्बहिरात्मने अंतर्बहिर्व्यावहारालंबनाय एवं महाभू
तरूपत्वमुक्त्वा अमुष्मै स्वर्गाय भूरिवर्चसे एषवैज्योतिष्मंतंपुण्यलोकपातीति श्रुतेः ४० प्रवृत्ताय निवृत्ताय च कर्मणे
य२ पितृदेवाय यथाक्रमं पितृदेवप्राप्तिफलाय अधर्मफलरूपाय च मृत्यवे ४१ हे ईश आशिषां कारणात्मने सर्वकर्म
प्र२ फलदात्रे मनवे सर्वज्ञाय मंत्रात्मकायेतिवा विष्णुत्वेन प्रणमति बृहते धर्माय परधर्मात्मने कृष्णाय ४२ रु प्र२
द्ररूपेण प्रणमति मीढुषे रुद्राय अहंकृत महंकारस्तदात्मने सर्वकर्तृकेरणकर्मशक्तित्रयसमेतास्तस्मै ४३॥

अर्थलिंगाय नभसे नमोंतर्बहिरात्मने नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ४० प्रवृत्तायनि
वृत्ताय पितृदेवाय कर्मणे नमो धर्मविपाकाय मृत्यवे दुःखदाय च ४१ नमस्त आशिषामीश
मनवे कारणात्मने नमो धर्माय बृहते कृष्णायाकुंठमेधसे ४२ पुरुषाय पुराणाय सांख्ययोग
श्वराय च शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने चेतआकूतिरूपाय नमो वाचो विभूतये ४३
दर्शनं नो दिदृक्षूणां देहि भागवतार्चितं रूपं प्रियतमं स्वानां सर्वेंद्रियगुणांजनं ४४ स्निग्धप्रा
वृड्घनश्यामं सर्वसौंदर्यसंग्रहं चार्वायतचतुर्बाहुसुजातरुचिराननं ४५ श्रीराम श्रीराम॥

ब्रह्मत्वेन प्रणमति चेतो ज्ञानं आकूतिः क्रियातद्रूपाय वाचो विविधा भूतिः सृष्टिर्यस्मात् तस्मै ४३ एवं
नमस्कृत्य दर्शनं प्रार्थयते दर्शनमिति नवभिः भागवतैः सत्कृतं दर्शनं देहीत्यस्य विवरणं रूपमित्यादि प्रद
य२ र्शयेत्यंतः स्वानां भक्तानां प्रियतमं रूपं प्रदर्शयेति नवमेनान्वयः सर्वेषामिंद्रियाणां ये गुणा विषयास्तेषा
मंजनं व्यंजकं सर्वेंद्रियविषयविषयरूपमित्यर्थः सर्वेंद्रियाणि स्वगुणैरनक्ति रंजयतीति वा ४४ स्निग्धः
प्रावृषि यो घनस्तद्वत् श्यामं सर्वेषां सौंदर्याणां संग्रहो यस्मिन् चारव आयताश्च बाहवो यस्मिन् सुजातं
यथा चितं सवावयवेषु चिरमाननं यस्मिन् ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰च॰ पद्मकोशमध्येयानि पल्लाशानि तद्वदक्षिणी सुकपोलमास्यं यस्मिन् ॥ समौ कर्णौ विभूषणं यस्य कुंडलयोरेव क्ष्यमा
णत्वात् ॥४॥ प्रीत्या प्रहसिता विवापांगो यस्मिन् ॥४॥ स्फुरंति किरीटादीनि यस्मिन् शंखादिमन् उत्तमर्द्धि लक्ष्मीः
पक्षा एते रत्नमाला ऋद्धिः उत्कर्षो यस्यास्तितन् ॥४॥ सो भग युक्तो ग्रीवा येन ॥ सिंहस्य स्कंधपरितः प्रसरंतः केसर धे ३
एव लिषः तादृशीः सर्वतः ॥ त्विषा विचित्रः सो भो ग्रीवः कौस्तुभो यस्मिन् ॥ यद्वा सिंहस्य वयोस्कंधौ तयात्वि
षः कुंडल हारादि हीप्ति विभित्र दितिः प्रथम विशेषणं सोभगयुक्ता ग्रीवा येन कौस्तुभा यस्मिन् ॥ श्रियाहनु भूतयाक्षि

पद्मकोशपल्लाशाक्षं सुंदरभ्रुसुनासिकं ॥ सुद्विजं सुकपोलास्यं सम कर्णविभूषणं ॥४॥ प्रीति
किजा १ प्रहसितापांगमलकै रूपशोभितं ॥ लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलं ॥४॥ स्फुरत्किरीटवल
यहारनुपुरमेखलं ॥ शंखचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ॥४॥ सिंहस्कंधत्विषा विभ्र
त्सौभगग्रीवकौस्तुभं ॥ श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ॥४॥ सुरेरेचकसंविग्न
वलिवल्गु दलोदरं ॥ प्रतिसंक्रामयद्विश्वं नाभ्यावर्तगभीरया ॥ श्यामश्रोण्यधिरोचिष्णु दुकूलस्व
र्णमेखलं ॥ समचार्वंघ्रिजंघोरु निम्नजानुसुदर्शनं ॥५१॥

प्रत्तिरस्कृतो निकषाश्मा स्वर्णरेषांकितो निकषपाषाणो येन तादृशेनोरसा उल्लसच्छोभमानं ॥४॥
श्वासोच्छ्वासाभ्यां संविग्ना श्चंचलाव लयस्ताभिर्वल्गु दलवदश्वत्थपत्रसदृशम् उदरं यस्मिन् ॥ प्रति
संक्रामयन् इव तो निर्गतं तेनेव ह्यारप्रापुनः प्रवेशयदिव ॥ ५ ॥ श्यामश्रोण्यां अधिकरोचिष्णु य
त्पीतं दुकूलं तत्र स्वर्णमयी मेखला यस्मिन् ॥ अंघ्री च जंघे च ऊरू च निम्ने अनुन्नते जानुनी च स
मे श्चारुणि येन शोभनं दर्शनं यस्य समाश्चारवोंघ्र्यादयो यस्मिन् निम्नजानुनी यस्मिन् शोभनं दर्शनं यस्येति राम ६८
पदत्रयं ५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदा दीपथानीयेन यद्वा एवंभूतेन पदोपलक्षितं रूपं पदं शरणं प्रदर्शयेत्यर्थः शरदि पत्नपद्मं तस्य पलाशानां दलानां रोचि
र्यस्य तेन नखद्युतिभिर्नोऽन्तर्भवमघमज्ञानं विधुन्वता स्वीयं रूपं पदं शरणं प्रदर्शय अपास्तप्रक्षादादीनां साध्व
सं येन तत् हे गुरो यतस्त्वमेव तमोजुषामज्ञानां मार्गप्रदर्शको गुरुः ५२ अतिदुर्लभं भक्तिमिदं मया प्रार्थित
मिति स्तौति वा हे एतद्रूपमनुध्येयं ध्यानार्हमेव न तु प्रत्यक्षतः प्राप्यमित्यर्थः ५३ न हि किं केनापि न प्राप्यते तत्रा
ह भवानिति दुर्लभत्वमेवाह स्वर्गराज्यं यस्य तस्यापि अभिमतः स्पृहणीयः किं च एकान्तेन य आत्मविदां तस्यापि

पदा शरत्पद्मपलाशरोचिषा नखद्युभिर्नोऽन्तरघं विधुन्वता प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो
मार्गगुरुस्तमोजुषां ५२ एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सतां यद्भक्तियोगोऽभयदः स्वधर्म
मनुतिष्ठतां ५३ भवान्भक्तिमता लभ्यो दुर्लभः सर्वदेहिनां स्वाराज्यस्याप्यभिमत एकान्तेनात्म
विद्गतिः ५४ तं दुराराध्यमाराध्य सतामपि दुरापया एकान्तभक्त्या को वाञ्छेत्पादमूलं विना
बहिः ५५ यत्र निर्विष्टमरणं कृतान्तो नाभिमन्यते विश्वं विध्वंसयन् वीर्यशौर्यविस्फूर्जितभ्रु
वा ५६ क्षणार्द्धेनापि तुलये न स्वर्गं नापुनर्भवं भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ५७

गतिर्गम्यः ५४ अतस्त्वद्व्यतिरेकेण न किंचिद्वाञ्छामीत्याह तं त्वामेकान्तभक्त्या आराध्य बहिः स्वर्गादिसु
खं ५५ तत्र हेतुः यत्र पादमूले शरणं प्रविष्टं कृतान्तः कालो ममायं वध्य इति नाभिमानं करोति किं कुर्वन्
वीर्यं प्रभावः शौर्यमुत्साहः ताभ्यां विस्फूर्जितया क्षुभितया भ्रुवा विश्वं विध्वंसयन्नपि ५६ त्वत्पादमूले प्र
कुंचितया२ ५२ विष्टस्य कृतान्तभयाभावः कियानयं लाभः यतो त्वद्भक्तसंग एव सकलपुरुषार्थश्रेणीशिरसि नरीनर्ती
त्याह भगवतस्तव संगिनां संगस्य क्षणार्द्धेनापि न स्वर्गं तुलये समं न गणयामि न वा पुनर्भवं मोक्षं मर्त्या
नामाशिषो राज्याद्याः किमुत ५७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰च॰ अथ अतो हेतोः अनघोऽघहरांघ्रिर्यस्य तस्य तव कीर्तिर्यशः तीर्थं गंगा तयोः क्रमेणांतर्बहिः स्नानाभ्यां विधूतः तेषां
पाप्मा येषां अत एव भूतेष्वनुक्रोशः कृपा सुसत्त्वं रागादिरहितं चित्तं शीलं चार्जवादि विद्यते येषां संगमोऽस्माक
३१ के स्यात् एष एव नस्तवानुग्रहः ५८ न त्वज्ञानं च त्वद्भक्तसंगादेव भवतीत्याह न यस्येति येषां सतां भक्तियोगेना
नुगृहीतं शुद्धं सद्यस्य चित्तं वाह्यार्थविक्षिप्तं न भवति तमोरूपायां गुहायां च नाविशत् लयं न प्राप तत्र तदा समु
निस्तव गतिं तत्त्वं पश्यति ५९ कीदृशं तत्त्वं तदाह यत्रेति ६० जगत उपादानत्वं लक्षितं निमित्तत्वेनापि तद्देवलक्षि नसेन १

अथानघांघ्रेस्तव कीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मानां भूतेष्वनुक्रोशसुसत्त्वशीलिनां स्यात्सं
य१ गमोऽनुग्रह एष नस्तव ५८ न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् यद्भक्तियो
६९ गानुगृहीतमंजसा मुनिर्विचष्टे ननु तत्र ते गतिं ५९ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् तत्त्वं
ब्रह्म परं ज्योतिराकाशमिव विस्तृतं ६० यो माययेदं पुरुरूपयाऽसृजद्बिभर्ति भूयः क्षपयत्यविक्रियः यद्भे प३
दबुद्धिः सदिवात्मदुःस्थया त्वमात्मतंत्रं भगवन्प्रतीमहि ६१ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः सा
१२६ धु यजंति सिद्धये भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च त एव कोविदाः ६२

यत्राह य इदं विश्वं सदिव परमार्थमिवासृजत् कथंभूतया मायया भेदबुद्धिर्यस्यां भवति तयात्मनि त्व राम
३२ यि दुःस्थया स्वकार्यं कर्तुमसमर्थया तं त्वां निरस्तभेदं प्रतीमहि जानीमः ६१ यद्यपि त्वमेव निर्भेदं ब्रह्म त ६९
थापि प्रागुक्तं साकारं तव रूपं ये इदं यजंति त एव वेदागमतत्त्वज्ञा इत्याह क्रियाकलापैर्यैः कर्मयोगिनः
पूजयंति त एव कोविदाः न त्वन्ये वाहत्य केवलज्ञानप्रवृत्ताः वेदे च आगमे कथंभूतमिदं भूतेंद्रियांतःक
रणैः स्वतंत्रैर्यदुपलक्ष्यते नियन्तृरूपं तत् ६२ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तु भिन्नमपि भेदं कुर्वन्तः सन्तः कथं ते कोविदाः न हि ते भेदं क्रियन्ते त्वयैव क्रीडार्थं चेतनाचेतनात्मको भेदः कृत इत्याह त्व
मिति आद्यस्त्वमेक एव सुप्ता मायाख्या शक्तिर्यस्य पश्चात्तया शक्त्या रजः सत्वतमसा हेतुभूतया यतो रज आदेः
महानहंकारः खं च मरुदग्निर्वार्धराश्च वा उदकं सुराश्च ऋषयश्च भूतगणाश्च एवमिदं जगद्यतो भवति ते हि भि
द्यत इत्यन्वयः ६३ एतदुपपादयति सृष्टमिति जरायुजाण्डजस्वेदजोद्भिज्जरूपेण चतुर्विधं स्वांशेन प्रविष्टः
अथो इति हेतोः पुरस्यान्तः सन्तमंशं चिदाभासं पुरि शयानात्पुरुषं विदुः न हि किमीश्वरमेव संसारिणं विदुः

त्वमेक आद्यः पुरुषः सुप्तशक्तिस्तया रजःसत्त्वतमो विभिद्यते महानहं खं मरुदग्निवार्धराः सुरर्ष
यो भूतगणा इदं यतः ६३ सृष्टं स्वशक्त्येदमनुप्रविष्टश्चतुर्विधं पुरमात्मांशकेन अथो विदुस्तं पु
रुषं सन्तमन्तर्भुंक्ते हृषीकैर्मधु सारघं यः ६४ स एष लोकानतिचण्डवेगो विकर्षसि त्वं खलु का
लयानः भूतानि भूतैरनुमेयतत्त्वो घनावलीर्वायुरिवाविषह्यः ६५ प्रमत्तमुच्चैरिति कृत्यचिं
तया प्रवृद्धलोभं विषयेषु लालसं त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमन्तकः
६६

२१ नेत्याह सारघं मधुमक्षिकास्ताभिः सृष्टं मधिव क्षुद्रकं विषयसुखं च अविद्यावृतः सन्नयो भुंक्ते तं जीवं विदुः तथा
च श्रुतिः तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति निर्णीतं च गुहां प्रविष्टावात्मानौ हि तद्दर्श
नादित्यत्र ६४ न तु सर्वनियन्तुः कुतः संसार इत्याह यः स्वशक्त्येदं सृष्टवान् स एष त्वं खलु भूतैरेव भूतानि
मेघपंक्तिं वायुरिव कालयन् विचालयन् लोकान् विकर्षसि संहरसि अनुमेयतत्त्वः अलक्ष्यस्वरूपः ६५ विक
र्षणप्रकारमाह प्रमत्तमिति इति कृत्य एवमेवमिदं कर्तव्यमिति चिन्तया उच्चैः प्रमत्तं तत्र हेतुः विषयेषु लालसं अत्य
न्तकामुकं प्राप्तेष्वपि विषयेषु प्रवृद्धलोभं अन्तकस्त्वमभिपद्यसे आक्रामसि क्षुधा लेलिहानः जिह्वया सृक्किणी स्पृशन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० अतः करुत्वपदाब्जं त्यजेत् पंडित इत्यर्थः कथंभूतः परत्वाः स्रमाणोः नारे हे स्तेन व्ययमानेकाचनं शरीरं यस्य सः यदस्मा
के गुरुत्वज्ञानं नित्ति संभिति सर्वेषां स्त्रीह णांवाक्यविशंकयानाशशंकया विनोपपन्नेद्वित्ति हेट विश्वासेन मनत्व आर्चे अ०१
तिस्म ६७ उपसंहरति अथेति रुद्र भयेन ध्वस्तं नकुतश्चिद् भयं यस्मात् तादृशीं गतिरसि ६८ ६९ ७० योगादे

कस्त्वत्पदाब्जं विजहाति पण्डितो यस्तेऽवमानव्ययमानकेतनः । विशंकयाऽस्मद्गुरुरर्चति स्म यद्विनोपप
त्तिं मनवश्चतुर्दश ॥ ६७ अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चिताम् । विश्वं रुद्रभयध्वस्तमकुतश्चि
द्भया गतिः ॥ ६८ इदं जपत भद्रं वो विशुद्धा नृपनन्दनाः । स्वधर्ममनुतिष्ठन्तो भगवत्यर्पिताशयाः ॥
६९ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितं । पूजयध्वं गृणन्तश्च ध्यायन्तश्चासकृद्धरिं ॥ ७० यो
गादेशमुपासाद्य धारयन्तो मुनिव्रताः । समाहितधियः सर्व एतदभ्यसतादृताः ॥ ७१ इदमाह पुरास्मा ६५
७० कं भगवान्विश्वसृक्पतिः । भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां ॥ ७२ ते वयं नोदितास
र्वे प्रजासर्गे प्रजेश्वराः । अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ॥ ७३ अथेदं नित्यदा युक्तो ज
पन्नवहितः पुमान् । अचिराच्छ्रेय आप्नोति वासुदेवपरायणः ॥ ७४ श्रेयसामिह सर्वेषां ज्ञानं निः
श्रेयसं परं । सुखं तरति दुःपारं ज्ञाननौर्व्यसनार्णवं ॥ ७५ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवं । अ
धीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ ७६ विंदते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरं । मद्गीतगीतात्

शं नो मेत स्तोत्रमुपासाद्य पाठतः प्राप्य मनसा धारयन्त अभ्यासेन जपत ७१ विश्वसृजां पतिर्ब्रह्मा ७२ सि राम
सृक्ष्मः सृष्टवंतः ७३ युक्तः एकाग्रचित्तः ७४ ज्ञानमेव नौर्यस्य ७५ योऽधीयानो भवति ७६ असावमु ७०
ष्मात् हरेः असत्वरम् अस्थिरः सन् मद्गीतं स्तोत्रं तेन गीतात् स्तोत्रात् एक एव वल्लभः प्रिय आश्रयस्तस्मात् ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कल्मषस्पसि ७८ तपश्चरत तपसोचिड्श्रितंप्रास्पथ ७९ चतुर्थेचतुर्विंशः प्रचेताः सुतौस्त्रिनारदोधृणी प्रा प्रस्य सुत १
चीनबर्हिषंध्यात्मपारोक्ष्यणाहपंचभिः पुरंजनकथाव्याजात्पंचविंशेतुनारदः आत्मनोबुद्धिसंगेन विविधा
माहसंसृतिं प्रचेताः सुतपस्तोप्रतप्यमानेषुनारदः पुरंजनकथाकूटं प्राह प्राचीनबर्हिषे १ २ प्रचेतासु

इदंयः कल्पउत्थायप्रांजलिःश्रद्धयान्वितः शृणुयाच्छ्रावयन्मर्त्योमुच्येतकर्मबंधनेः ७८ गीतं
मेयदंनरदेवनंदनाः परस्यपुंसः परमात्मनस्तवं जपंतएकाग्रधियस्तपोमहच्चरध्वमेतेन
तस्राश्स्पथश्रितं ७९ इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेचतुर्विंशोध्यायः श्रीमैत्रेयउवा
च इतिसंदिश्यभगवान्बार्हिषदैरभिपूजितः पश्यतांराजपुत्राणांतत्रैवांतर्दधेहरः १ रुद्रगीतं
भगवतःस्तोत्रंसर्वेप्रचेतसः जपंतस्तेतपस्तेपुर्वर्षाणामयुतंजले २ प्राचीनबर्हिषंक्षत्तः कर्मस्वा
सक्तमानसं नारदोध्यात्मतत्वज्ञः कृपालुःप्रत्यबोधयत् ३ श्रेयस्त्वंकतमद्राजन्कर्मणात्मनई
हसे दुःखहानिःसुखावाप्तिःश्रेयस्तन्नेहचेष्यते ४ राजोवाच नजानामिमहाभागपरंकर्मोप
विद्धधीः ब्रूहिमेविमलंज्ञानं येनमुच्येयकर्मभिः ५ गृहेषुकूटधर्मेषुपुत्रदारधनार्थधीः नपरं
विंदतेमूढोभ्राम्यन्संसारवर्त्मसु ६ श्रीनारदउवाच भोभोप्रजापतेराजन्पशून्पश्यत्वयाध्वरे संज्ञा प्रस्कं १
पितान्जीवसंघान्निर्घृणेनसहस्रशः ७

तपश्चरत्सुनारदःप्राचीनबर्हिषंबोधितवान् अतः प्रचेतसांकथामसमाप्यैवतत्पितुर्हितमाह प्राचीनबर्हिष
मिति ३ श्रेयः फलंईहसेइच्छसि इहकर्मणितदुभयंनेष्यतेविचारकैः ४ परं श्रेयोमोक्षं कर्मभिरपविक्षिप्ताधी टी २
यस्य ५ किंच गृहेषुस्थितः पुत्रादिष्वेवपुरुषार्थधीर्यस्य ६ कर्मफलेषुवैराग्यमुत्पाद्यब्रह्मविद्यामुपदेष्टुं
योगानुभावेनयज्ञेपशून्प्रत्यक्षंप्रदर्शयाह भोभोइति संज्ञापितान्मारितान् ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि २

भा० च० एते त्वां संपरेतं मृतं संप्रतीक्षंते वैशसं त्वत्कृतां पीडां स्मरंतः तत्र अयःकूटैर्लोहयंत्रमयैः शृंगैः छिंदंति छेत्स्यंति ८ अ
त्र अस्मिन् संकटे निस्तारकममुमितिहासं कथयिष्यामि ९ तत्र जीवस्य विषयासक्त्या संसारः स चेश्वरानुग्रहेण निव
र्तत इति वक्तुं विपर्ययगृहीतस्य साक्षाद्बोधयितुमशक्तेः राजवृत्तांतमिवाह आसीदिति पुरंजन इत्यादिना स्वयमेव तः
पंचमेध्याये व्याख्यास्यति तथापि सुखग्रहणाय यथोपयोगं किंचित्किंचिद्व्याख्यास्यामः तत्र कर्मभिः पुरंजनय स्य चि १

सं १ एते त्वां संप्रतीक्षंते स्मरंतो वैशसं तव संपरेतमयःकूटैः छिंदंत्युत्थितमन्यवः ८ अत्र ते कथयिष्येऽमु
मितिहासं पुरातनं पुरंजनस्य चरितं निबोध गदतो मम ९ आसीत्पुरंजनो नाम राजा राजन्
बृहच्छ्रवाः तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १० सोऽन्वेषमाणः शरणं बभ्राम पृथि
वीं प्रभुः नानुरूपं यदाविंदद्भूत्स विमना इव ११ न साधु मेने ताः सर्वा भूतले यावतीः पुरः का
७१ मान् कामयमानोसौ तस्य तस्योपपत्तये १२ स एकदा हिमवतो दक्षिणेष्वथ सानुषु ददर्श नवभिर्द्वा
र्भिः पुरं लक्षितलक्षणां १४

नीति पुरंजनो जीवः न विज्ञातं नाम यस्य न च विज्ञातं चेष्टितं यस्य स ईश्वरस्तस्य सखा यद्वा विज्ञातं चेष्टितं जी
अ२ वप्रेरणादिलक्षणं यस्य जीवपारतंत्र्यस्यानुभवसिद्धत्वात् १० शरणं भोगायतनं देहं ११ यावत्यः पुरः ताः तस्य
तस्य कामस्योपपत्तये प्राप्तिसाधनं न मेने नगवादिदेहानामैहिकपारलौकिकभोगभोग्यत्वाभावात् तथा च श्रु
तिः ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति १२ राम
हिमवतो दक्षिणेषु सानुषु कर्मक्षेत्रे भारतवर्षे पुरं मनुष्यशरीरं लक्षितानि दृष्टानि सर्वाणि लक्षणानि ७१
यस्याः अर्धपंगुत्वादिदोषरहितामित्यर्थः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामनुवर्णयति त्रिभिः अत्र किंचित्किं विलासाद्दश्यमचलत्वं कथोसौंदर्याय प्राकारादीनि वर्ण्यन्ते परिखैव रीतिः पुंस्त्व
मार्ष अक्षाणि गवाक्षाः त्वगादयः शरीरावयवाः प्राकारादिपुरावयवत्वेन रूप्यन्ते स्वर्णादिशृंगैः शिखरैर्युक्ता नि २
येगृहास्तैः संकुलामिति आधाराधिदैवकाणि चराज्ञसादि स्वभावाविवक्षिता: १४ नीलादिभिः लौ
प्राह स्पर्शस्थलीयसां अरुणमाणिक्यं स्थलीहृदयं नाडीनीलादिभावनेनरूप्यते तत्तद्विषयवासनाव नि ४
भोगवतीं नागानां पुरीमिव १५ सभासमाजस्थानं चत्वरं चतुः रथ्या राजमार्गः आक्रीडायतनं द्यूतादि पृष्ठ: २
स्थानं आपणाहट्टः तैः चैत्यं जनानां विश्रामस्थानं ध्वजपुपताकाः ताभिश्चयुक्ते १६ अत्र च विषय

प्राकारोपवनाद्यालपरिखेरक्षत्तारणेः स्वर्णारोप्यायसैः शृंगैः संकुलां सर्वतोगृहैः १४ नीलस्फ
टिकवैडूर्यमुक्तामरकतारुणैः लौप्रहर्म्यस्थलीदीप्तां श्रिया भोगवतीमिव १५ सभाचत्वररथ्या
भिराक्रीडायतनापणैः चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः १६ पुर्या स्फुवाह्योपवने
दिव्यद्रुमलताकुले नदद्विहंगालिकुलकोलाहलजलाशये १७ हिमनिर्झरविप्रुषमक्षोसुमा
करवायुना चलत्प्रवालविटपनलिनीतटसंपदि १८ नानारण्यमृगव्रातैरनावाधे मुनिव्र
तैः आहतमन्यत पांथीयत्र कोकिलकूजितैः यदृच्छयागतां तत्र ददर्श प्रमदोत्तमां १९

पि २ निश्चबुद्धियोगेनजीवस्य देहसंबंधइति विवक्षया विषयवर्गं वाह्योपवनत्वेनरूपयति तद्विशेषान् स्वकुचं
दनादीन् दिव्यद्रुमलतादिभावनाशेषः कथालंकारः वाह्योपवने प्रमदां ददर्शेति चतुर्थेनान्वयः नद
तां विहंगालिकुलानां कोलाहलोयेषु तेजलाशयायस्मिन् १७ हिमनिर्झराणां विप्रुषो बिंदवः तद्वता कुसु
माकरसंबंधिनावायुना चलंतः प्रवालाविटपाः शाखाश्च येषां ते वृक्षैर्नलिनीनां सरसीनां तटेषु संपत्
समृद्धिर्यस्मिन् १८ अनावाधेनलूतवाधरहिते मुनिव्रतेरहिंस्रैः आत्मानमाहतमन्यत यत्र तत्र प्रमदो
त्तमां विषय विवेकवतीं बुद्धिं ददर्श यदृच्छयागतामिति तयोः संबंधस्य दुर्निरूपत्वं दर्शयति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ च॰ तामनुवर्णयति सोऽहं श्रुतिभिः दशभिर्ज्ञानकर्मेंद्रियैः ऐकेकश्येस्कंरातं अनंताद्युत्तयस्तासांनायकेः पुतिभिः
सह पाठांतरे नापिकास्त्रियायेषांतेः २० पंचशीर्षोणिद्युत्तयोयस्यतेन अहिनाप्राणेन प्रतिहारेण पालकेन गुप्ता
टी॰ २ ऋषभभर्त्तारं २१ गंधज्ञानादिभिर्बुद्ध्यवयवेः सुनासत्वादिरूपेण समविन्यस्तारचितौ कर्णौ ताभ्यांकुंडलशोभां
दधतीं २२ अन्नमयं हि सौम्य मन इति यत्कृष्णंतदन्नस्येत्यादि श्रुत्यनुसारेण श्यामामित्युक्तं नूपुरेः कर्णाभ्यां
पुरणपादांगुलीयकानामप्युपलक्षणं बहुवचनेन २३ व्यजितकेशोरयोवनापक्रमोयाभ्यां समौ न्यस्तौ च २४

मत्न्यैर्दशभिरायांतीमेकैकशतनायकेः २० पंचशीर्षाहिनागुप्तांप्रतिहारेणसर्वतः अन्वेष
माणामृषभमंप्रोढांकामनूपिणीं २१ सुनासांसुदतींबालांसुकपोलांवराननां समविन्यस्तकर्णा
भ्यांविभ्रतींकुंडलश्रियं २२ पिशंगनीवींसुश्रोणिंश्यामांकनकमेखलां पद्भ्यांक्वणद्भ्यां
चलंतींनूपुरैर्देवतामिव २३ स्तनौव्यंजितकेशोरौसमवृत्तौनिरंतरौ वस्त्रांतेननिगूहंतींव्रीड
यागजगामिनीं २४ तामाहललितंवीरः सव्रीडस्मितशोभनां स्निग्धेनापांगपुंखेन स्पृष्टः
प्रेमोद्भ्रमद्भ्रुवा २५ कात्वंकंजपलाशाक्षी कस्यासीह कुतः सति इमामुपपुरींभीरु किंचिकी
र्षसिशंस मे २६ कएतेनुपथायेतएकादशमहाभटाः एताबाललनाः सुभ्रु कोऽयंतेऽहिःपुरःसरः
२७
तामाहेतित्रयाः संवादोक्तिः संबंधस्तादृशीय अपांगएवपुंखोमूलप्रांतोयस्यकटाक्षस्यबाणस्यतेनस्पृष्टोवि राम
भू॰ २ द्धः प्रेमात्तद्भ्रमंती भ्रुः धनुस्थानीयायस्मिन् तेन २५ कुतः स्थानादिहागतासि हेसति पुर्याः समीपस्थाउ
पपुरीभूः तामालक्ष्यकिंकर्तुमिच्छसीत्यर्थः २६ तवयेऽनुपथाः अनुवर्त्तिनस्तेको एकादशमहाभटाः इह वक्ष्य ७२
सुने॰ १ वक्ष्यमाणेयपुरुषौ बुद्धिर्मनसः पृथगुपादानंबुद्धिपरिचारकेंद्रियसहायतयातत्परिचारकत्वविवक्षया २७

९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं कः किं पतिं धर्मं विचिन्वती अथवा भवानीपतिं शिवं विचिन्वती किं वाक्‌ सरस्वतीपतिं ब्रह्माणं रमापतिं विष्णुं मु
निरिव संयतासती कथं भूतं पतिं त्वं दंघ्रिकामेनेव त्वङ्क्रनयातं दंघ्रिकामनेयं व प्राप्ताः समस्ताः कामा येन तं २८
हे वराक्‌ आसां मध्ये त्वमन्यतमाऽपि न संभवसि यतोऽभूत् विसृक्‌ नहि त्वत्ताभ्युवसृशीति वीरचरेण मया परं वैकुंठं
२९ यद्यस्मात्तव पांग भविरं च ज्ञितमिद्रियं मेनायस्यं तं मामामनोभवो बाधते अथ तस्मात् तु गृहाण सव्रीडं यच्छ्री
वेन प्रेमणा स्मितं तेन विभ्रमेनोपाभ्युः न या तपस्स्थः प्रेरितः ३० पद्रीडया सं मुखं न भवति तेदानेन मुनीयम

त्वं कः भर्वान्यः स्यथवा ग्रमापतिं विचिन्वती किं मुनिश्चद्रेहावेने त्वं दंघ्रिकामाप्तसमस्तकामं कं प प्रको
शः पतिः करा ग्रातु २८ नासां च्चारा वन्यं तमा भु विसृक्‌ पुरीमिमां वीरचरेण सा के अर्हस्पलं के तुं मद
त्र कं मेणा लोकं परं श्रीरिव यज्ञपुंसा २९ यदेषमापांग विरं वड्डितं द्रिंयं सव्रीड भाव स्मित च विभ्रम
ड्डुवा त्वया पस्स्थो भगवान्मनोभवः प्रवाधते ऽथानुगृहाण शोभने ३० त्वं दाननं सुभ्रु सुगारलोचनं
मौलिविनीलालकं चूर्द संस्तृतं उन्नीय मे दर्शय वल्गु वाचकं यद्रीडया नाभिमुखं शुचि स्मिते ३१ इ
त्थं पुरंजनं नारी याचमानमधीरवत्‌ अभ्यनंदत तं वीरं हसंती वीर मोहिता ३२ न विदाम वयं सम्य
क् कर्तारं पुरुषर्षभ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतं ३३ इहाद्य संतमात्मानं विदाम नतः
ततः परं येनेयं निर्मिता वीर पुरी शरणमात्मनः ३४ एते सरवायः सख्यो मे नरा नार्यश्च मानद सु
प्तायां मयि जागर्ति नागोऽयं पालयन्पुरीं ३५

शोभनं भ्रुवौ यस्मिन्‌ सुचारु शोभनं कनीनिके लावेनयस्मिन्‌ व्यालं विनादीर्घायिनीलाश्चलकास्तपांच्दे नसं
छन्नं वल्गूनि वाचकानि वाक्यानि यस्मिन्‌ ३१ हे वीर सापि तं दृष्ट्वा मोहिता सनीत माह ३२ यत्स्पष्टं कस्यासि त्वं नेन
कस्य पुत्री गोत्रे जेति का त्वमिति त्वं किं नामासीति तन्नाह आत्मनो मम परस्य तवापि कर्तारं सम्यग्न विद्मः गोत्रं ना
म च यत्कृतं भवति तं च न विद्मः ३३ आत्मनो मम शरणमियं पुरी येन निर्मिता तं च न विद्मः ३४ यत्स्पष्टं कारणं अनुप

न ४

[illegible] ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० आस्तां नामगोत्रादि यदर्थं गतोसि एतदिष्ट्या भद्रं ते ताववनु ग्राम्यान् इंद्रियग्रामाहीन् उद्वहिष्यामि संपादयिष्यामि स्व
बंधुभिः सखीभिश्च ३६ समाः संवत्सरान् मनुष्यदेह प्रवत्सराच्छतमित्युक्ते ३७ अथेति स्वभावतो न्निवृत्तिर्निद्रापूर्व
कं तत्संगमभिनंदति पंचभिः त्वत्तोऽन्यं कं नु रमेय अरतिज्ञं नैष्ठिके अकोविदं अनिषिद्धसुखत्यागिनं संपरा ६२
यो मृत्युस्तदनभिमुखं परलोकचिंताशून्यं अश्वस्तनविदं श्वोऽदकर्तव्यमिति हि लोकचिंताशून्यं पशुतुल्य
३८ अत्रगार्हस्थ्ये प्रजानंदः पुत्रसुखं अमृतं मोक्षः केवलिनो यतयः ३९ गृहाश्रमे इति पतू एनतू क्षेमोऽहि श

दिष्ट्याऽऽगतोसि भद्रं ते ग्राम्यान्कामानभीप्ससे । उद्वहिष्यामि तांस्तेहं स्वबंधुभिररिंदम ३६ इमां त्वम
धितिष्ठस्व पुरीं नवमुखीं विभो । मयोपनीतान्गृह्णानः कामभोगाञ्शतं समाः ३७ को नु त्वदन्यं रमये
६३ दरतिज्ञमकोविदं । असंपरायाभिमुखमश्वस्तनविदं पशुं ३८ धर्मो ह्यत्रार्थकामौ च प्रजानंदोऽमृतं य ६४ स्कं ४
७३ शः । लोका विशोका विरजा यान्न केवलिनो विदुः ३९ पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह । क्षेम्यं वद
ति शरणं भवेऽस्मिन्यद्गृहाश्रमः ४० का नाम वीर विख्यातं वदान्यं प्रियदर्शनं । न वृणीत प्रियं प्राप्तं माह
शी त्वादृशं स्वयं ४१ कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज । योऽनाथवर्गा
धिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुं ४२ श्रीनारद उवाच । इति तौ दंपती तत्र समुद्य स
मयं मिथः । तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ४३

रणमाश्रयं वदंति ४० भोगिभोगयोः सर्पदेहाकारयोस्तव भुजयोर्यत्र सज्जेत न एवंभूतं कस्याः स्त्रियाः मनः स्यात् न राम
कस्या अपि यो भवान् अनाथवर्गाः दीनास्तेषामाधिं अत्यर्थं अपोहितुं सर्वत्र चरति केनापोहि ७३
तुं घृणयोद्धतः अतिशयितो यः स्मितपूर्वकोऽवलोकस्तेन ४२ समुद्य समुदीर्य समाः संवत्सरान् ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र जाग्रदवस्थां संक्षेपेणाह उपगीयमान इति सुषुप्त्यवस्थामाह हृदिनीं हृदयाकाशं स्वापस्थानं शुचौ निदाघे ४४
इदानीं नवद्वारप्रदर्शनपूर्वकं जाग्रदवस्थां प्रपंचयति सप्तेति यावदध्यायसमाप्ति तस्याः पुरस्तु उपरि कृताः द्वारः सप्त
सप्त कृता इति पाठे संवृताः नेत्रे नासिके श्रोत्रे मुखं चेति सप्त अधो द्वे द्वारौ गुदलिंगे यः कश्चनेति आत्मनः सम्यग् ना २
विज्ञानादनियन्तृत्वात् ४५ तासु सप्तसु पंच द्वारः पौरस्त्याः पूर्वदिग्भवाः ४६ खद्योतवदल्पप्रकाशत्वाद्वामनेत्रं
आविः प्रकटं मुखं यस्याः सा बहुप्रकाशाद्दक्षिणनेत्रलक्षणा तस्माद्दक्षिणे एकत्र आत्मनो वीर्यवत्त्वादिति

उपगीयमानो ललितं तत्र तत्र च गायकैः । क्रीडन्परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ४४ सप्तो
परि कृता द्वारः पुरस्तस्यास्तु द्वे अधः । पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ४५ पंच द्वारस्तु
पौरस्त्या दक्षिणैका तथोत्तरा । पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ४६ खद्योताविर्मुखी च प्राग्
द्वारावेकत्र निर्मिते । विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ४७ नलिनी नालिनी च प्राग्द्वा
रावेकत्र निर्मिते । अवधूतसखस्ताभ्यां विषयं याति सौरभं ४८ मुख्या नाम पुरस्ताद्द्वास्तयापण
बहूदनौ । विषयौ याति पुरराड्रसज्ञविपणान्वितः ४९

श्रुतेः स्वानुभवाश्च नेत्रप्रकाशाधिक्यं एकत्र संलग्ने विभ्राजितं रूपं द्युमत्सखः चक्षुः सहितः ४७ नल
नालिनी २ नाल शब्दो च्छिद्रवचनो नाडी नलिनी नालिनी च वामदक्षिणनासिके अत्रापि संज्ञाभेदादेव कार्यं न्यूनाधिक्यं पूर्ववत्
ज्ञेयं अवधूतो वायुः अधिष्ठितः प्राणः सौरभं गंधः ४८ मुख्या प्रधाना आस्यं आपणो भाषणं बहूदनः अन्नं
बहुविधं द्वौ एकाद्येन इत्यनुक्तिः परोक्षवादस्त्वाय रसज्ञः रसनेंद्रियं विपणो वागिंद्रियं ताभ्यामन्वितः ४९

भा० च०

७४

दक्षिणेनेतिस्वनुस्त्रीयानि तु दक्षिणस्यां दिशीत्यस्मिन्नर्थे येमेनयप्रत्ययो ऽव्ययसंज्ञः एवमुत्तरेणेति अयमर्थः पंचानां विषया
णामन्यतो नवगतानां प्रकाशनायोक्तमिति पंचालं शास्त्रं श्रवणकाले च वक्त्राधिक्याद्दक्षिणः कर्णः प्रथमं प्रवर्तते शास्त्रं च प्र
थमं श्रोतव्यं कर्मकांडमित्यतो वक्ता साम्येन प्रवृत्तसंज्ञस्य कर्मकांडस्य दक्षिणकर्णेन श्रवणमिष्यते ततस्तदर्थमनुष्ठायपि
तृभिराहृतः पितृलोकप्रापके पितृयाने प्रपद्यते तदनेन प्रकारेण पितॄणामाह्वानमनेन भवतीति पितृहूर्दक्षिणः कर्णः
एवं तद्विपरीत्येनोत्तरः कर्णो देवहूः तथा च व्याख्यास्यति पितृहूर्दक्षिणः कर्णउत्तरो देवहूः स्मृतः प्रवृत्तं च निवृत्तं च शा

पितृहूर्नृपपुर्या द्वार्दक्षिणेन पुरंजनः राष्ट्रं दक्षिणपंचालं याति श्रुतिधरान्वितः ५० देवहूर्नाम पुर्या द्वा उत्तरेण
पुरंजनः राष्ट्रमुत्तरपंचालं याति श्रुतिधरान्वितः ५१ आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः ग्रामकं ना
म विषयं दुर्मदेन समन्वितः ५२ निरृतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः वैशसं नाम विषयं लुब्धकेन
समन्वितः ५३ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ अक्षण्वतामधिपतिस्ताभ्यां याति करो
ति च ५४ स यर्ह्यंतःपुरगतो विषूचीनसमन्वितः मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम् ॥ ५५ ॥
एवं कर्मसु संसक्तः कामात्मा वंचितोऽबुधः महिषी यद्यदीहेत तत्तदेवान्ववर्तत ५६ क्वचित्पिबंत्यां पिबति मदिरां
मदविह्वलः अश्नंत्यां क्वचिदश्नाति जक्षत्यां सह जक्षिति ५७ क्वचिद्गायति गायंत्यां रुदत्यां रुदति क्वचित्
क्वचिद्धसंत्यां हसति जल्पंत्यामनुजल्पति ५८ ॥

तंत्रं पंचालसंज्ञिकं पितृयानं देवयानं श्रोत्राख्येन धरा वृद्धेनेति ५० ५१ असुराइंद्रियारामास्तेषामियमासुरी शिश्नद्वाः
ग्रामकं ग्रामस्थजनानां कं सुखं व्यवायं दुर्मदेन गुह्येंद्रियेण ५२ निरृतिर्नाम गुदः मृत्युद्वारत्वात् वैशसं मलविसर्गं
लुब्धकेन पायुनात्तेनात्रोचतेस्य दुःखप्राप्तेर्लुब्धकसाम्यं ५३ अमीषां मध्ये निर्वाक्पादः पेशस्कृतो हस्तौ ताभ्यां वंधो
क्तिद्वाभावात् स्वतो ज्ञानक्रियाशक्त्यभावाच्च अक्षण्वतामिंद्रियवतां देहानामधिपतिः पुरंजनः स्वगिंद्रियस्यानु
क्तिः सर्वव्याप्तभावात् ५४ अंतः पुरं हृदयगतः विषूचीनं सर्वतो मुखं मनः मोहप्रसादहर्षास्तमः सत्वरजःकार्याणि
जाया बुद्धिः आत्मजा इंद्रियपरिणामास्तदुद्भवं ५५ ५६ जक्षंत्यां भक्षयंत्यां ५७ ५८

टू २

सामि २

का यो

आसीनामासीनं ५९ सर्वोऽसंगत्वादिलक्षणा प्रकृतिः स्वभावो वंचितो यस्य सर्वथा प्रकृत्या वंचित इति वा नेच्छन्नपि अनिच्छ
न्क्लैब्यात् पारवश्यात् ६२ इति चतुर्थे पंचविंशः॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणं। किंतु सद्बुद्धित्यागयोगाभ्यासं
स्मृतिः साप्रपंच्यते तदेव मात्मन उपाधिकृतां सुषुप्त्यवस्थां जाग्रदवस्थां चोक्त्वेदानीं स्वप्नावस्थामाह स एकदेति द
शभिः महानिष्वासो धनुः कर्णवत्त्वभोक्तृत्वाद्यभिनिवेशो यस्य स रथमारुह्य पंचप्रस्थं वनं मृगादिति तृतीयेनान्वयः
रथं तदानीमेव विध्वंसं स्वप्ने देहं जाग्रद्देहस्य ज्ञातसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात् पंचज्ञानेंद्रियाण्यश्वा यस्य। आ ४८

क्वचिद्धावति धावंत्यां तिष्ठंत्यामनुतिष्ठति अनुशेते शयानायामन्वास्ते क्वचिदासतीं ५९ क्वचिच्छृणो
ति … तिशृण्वंत्यां पश्यंत्यामनुपश्यति क्वचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित् ६० क्वचिच्च शो त२१ जि२
चतीं जायामनुशोचति दीनवत् अनुहृष्यति हृष्यंत्यां मुदितामनुमोदते ६१ विप्रलब्धो महिष्यैवं स
र्वप्रकृतिवंचितः नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ६२ इति श्रीभागवते महापुराणे
चतुर्थस्कंधे … पुरंजनोपाख्याने पंचविंशोऽध्यायः॥ श्रीनारद उवाच॥ स एकदा
महेष्वासो रथं पंचाश्वमाशुगं द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरं १ एकरश्म्येकदमनमेक
२। नीडं द्विकूबरं पंचप्रहरणं सप्तवरूथं पंचविक्रमं २

शुगं शीघ्रगतिं हि अहंताममते ईषादंडिके यस्य द्वे पुण्यपापे चक्रे यस्य एकं प्रधानमक्षो यस्य त्रयो गुणा वेणवो ध्वजा
यस्य पंचप्राणा एव बंधुराणि बंधनानि यस्य १ एकं मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्दमनः सूतो यस्य तेन चरंतं च एकं हृ
दयं नीडं रथिन उपवेशस्थानं यस्मिन् द्वौ शोकमोहौ कूबरौ युगबंधनस्थानं यस्य पंच शब्दादयो विषयाः प्रक्रियंते
प्रक्षिप्यंते यस्मिन् अस्य व्याख्यानं भविष्यति पंचेंद्रियार्थप्रक्षेप इति सप्त धातवो वरूथा रक्षार्थं चर्मावरणानि य
स्य पंच कर्मेंद्रियाणि विक्रमा गतिप्रकारा यस्य २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च० हेमोपस्करं सौवर्णाभरणं स्वर्णवर्माणं वर्म कवचं चरन् जागुणान्वितः। आक्षेपषुधिः इषुधिर्निषंगः। अनंतवासनो हं कारोपाधिः एका-
दशी मनोरूपश्च मृनाथः सेनापतिर्यस्य वासनामयस्य मनसः प्रग्रहत्वात् संकल्पविकल्पात्मकस्पष्टहृदस्त्वेन व
क्ष्यमाणस्य मनाथत्वमिति विभागः। पंचशब्दादयो विषयाः प्रस्थाः सानवो यस्मिन् तद्वनं भजनीयं देशमगात् ३ आ
त्मा गृहीता इषवो रागादिरूपाः कार्मुकं च भोगाद्यभिनिवेशरूपं येन जायां विवेकवतीं बुद्धिं विहाय अनन्[illegible]
कु० ना० २ हीत्याग हेतुः मृगया इति मृगा विषयाः तेषु व्यसनं भोगासक्तिः तेन लाल्लसाऽतिस्पृहा यस्य ४ रागादिभिः वनेषु भ-
गो० १ जनीयदेशेषु वनेचरान् भजनीयविषयान् प्रहरन् आत्मसात्कुर्वन् कथापक्षे तु स्पष्टमेव ५ तत्वासुरीं वृत्तिं

हेमोपस्करमारुह्य स्वर्णवर्माऽक्षेपषुधिः एकादशचमूनाथः पंचप्रस्थमगाद्वनं ३ चचार मृगयां तत्र दृ
प्त आत्तेषुकार्मुकः [illegible] विहाय जायामतदर्हां मृगव्यसनलालसः ४ आसुरीं वृत्तिमाश्रित्य घोरात्मा
निरनुग्रहः न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ५ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यान् पशून् वने याव
दर्थमलं लुब्धो हन्यादिति नियम्यते ६ य एवं कर्म नियतं विद्वान् कुर्वीत मानवः कर्मणा तेन राजेन्द्र ज्ञा
ना१ नेन स लिप्यते ७ अन्यथा कामकारेण कुर्वाणो निबध्यते गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः ॥८॥

माश्रित्येति किमिति मृगया निंद्यते कथापक्षे तावद्राज्ञां विहितैव सा अध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एवे राम ना२
त्याशंक्याह तीर्थेष्विति त्रिभिः अयं भावः न हि मृगयाऽविधीयते रागप्राप्तत्वात् किंतु नियम्यते प्रवृत्तिः संकोच्यते नि
यममेव षड्भिर्दर्शयति यद्यलं अर्थं लुब्धो रागी सन् हन्यात्तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिदृष्टेषु प्रख्या
ना२ तेष्वेव न नित्यश्राद्धादिषु तत्रापि राजैव मेध्यानेव वन एव यावदुपयोगमेवेति एवं जीवस्य विषयसेवाऽपि यावदुप
योगं न यथेष्टमिति नियम एवेत्यर्थः ६ अतो नावश्यकत्वमित्याह य इति एवं नियतं कर्म विद्वान् तेन तूपलक्षणेन
नान्येन वा कर्मणैवमनुष्ठितेन यत्तु ज्ञानं भवति तेन ज्ञानेन हेतुना सोऽनुष्ठाता न लिप्यते ७ अन्यथा नियमाल्लंघनेन अ

नः केचिद्धनस्मभोगाकांक्षिणः सात्मानं हि केचिदश्वादिप्रमुखैः
नात्रश्रमणावाहिपतितोऽधोगच्छति ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रासंगिकं परिसमाप्य पुनर्मृगयामेवानुवर्त्तयति तत्रेति चित्रा वाजाः पक्षा येषां तैः विप्लवो नाशः करुणात्मनां कृपालु-
नां दुःसहः ९ । १० तदेवं स्वप्नावस्थादर्शिता इदानीं पुनरपि विविकवत्त्वावुआरममाणस्य पुत्रादिसंततिं प्रप-
चयिष्यन् कथासौंदर्याय तस्याः प्रणयकुपितायाः अनुनयं प्रस्तावसहितमाह तत इत्यारभ्याध्यायसमाप्ति

तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः विप्लवोऽभूद्दुःखितानां दुःसहः करुणात्मनां ९ ॥ श-
शान्वराहान्महिषान्गवयान्रुरुशल्लकान् मेध्यानन्यांश्च विविधान्विनिघ्नन् श्रममध्यगात् १० त-
तः क्षुत्तृट्परिश्रान्तो निवृत्तो गृहमेयिवान् कृतस्नानोचिताहारः संविवेश गतक्लमः ११ आत्मानमर्ह-
यांचक्रे धूपालेपस्रगादिभिः साध्वलंकृतसर्वांगो महिष्यामादधे मनः १२ तृप्तो हृष्टः सुदृप्तश्च कंद-
र्पाकृष्टमानसः न व्यचष्ट वरारोहां गृहिणीं गृहमेधिनीं १३ अंतःपुरस्त्रियोऽपृच्छद्विमना इव वेदिष-
त् अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा न तथैतर्हि रोचंते गृहेषु गृहसंपदः १४ यदि न स्या-
द्गृहे माता पत्नी वा पतिदेवता व्यंगे रथ इव प्राज्ञः को नामासीत दीनवत् १५ क्व वर्त्तते सा ललना मज्जंतं
व्यसनार्णवे या मामुद्धरते प्रज्ञां दीपयंती पदे पदे १६ रामा ऊचुः नरनाथ न जानीमस्त्वत्प्रिया यद्व्य-
वस्यति भूतले निरवस्तारे शयानां पश्य शत्रुहन् १७ पुरंजनः स्वमहिषीं निरीक्ष्यावधुतां भुवि तत्सं-
गोन्मथितज्ञानो वैक्लव्यं परमं ययौ १८ सांत्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता प्रेयस्याः स्नेहसं-
रंभलिंगमात्मनि नाभ्यगात् १९

आईयिवान् आगतः कृतं स्नानमुचित आहारश्च येन स संविवेश शय्यामाश्रितः ११ । १२ गृहमेधिनीं सात्विकीं बुद्धिरा-
हे२ सां तु अग्रे वर्त्तमानो नापश्यत् १३ वेदिषत् प्राचीनबर्हिः अंतःपुरस्त्रियः तत्सखीः सेश्वरीणां स्वामिनीसहितानां — तत्सखीः २
१७ यथापुरेत्यादि पृथक्वाक्यं १४ व्यंगे चक्रादिहीने १५ । १६ निरवस्तारे आस्तरणरहिते १७ अवधुतां त्यक्तदेहादरां
तत्संगेनोन्मथितं व्याकुलं ज्ञानं यस्य १८ प्रेमसंरंभः प्रणयकोपः तस्य लिंगं कुटिलदृष्ट्यादि स्वस्मिन्न लक्षितवान् १९

हि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० उत्संगमारोप्यलालितं २० कृतमागो अपराधो येषु तेषु आत्मसा कृत्वा अस्मदधीनाय मिति मत्वा शिक्षार्थं दं
डं न कुर्वंति ते भृत्या मंदभाग्याः २१ यतः परमो ऽनुग्रहो दंडः यस्मात् दंडितो विषादं ति सो ऽज्ञ इत्याह वाल्क इति वधूक्ते
स्य शिक्षाकारणं अमर्षणं क्रोधी २२ हे सुदति हे सुभ्रु हे मनस्विनि सा त्वं मरमा के स्वामिनी अन्तः स्वानां मुरे
प्रदर्शय कीदृशं अनुरागभारेण व्रीडया यो विलंबो मंथरगतिर न विलसन् हसिताय वल्गो कायस्मिन् नीलो
अलकाए वाल्क यस्तं रूपस्कंभूषितं उच्चनासिकं वल्गुवाक्यं यस्मिन् तत् २३ हे रे वीर पत्नि वीरस्य मम भार्ये

अनुनिर्त्य पशनंकेवीरो नुनयकोविदः पस्पर्श पापादयुगलमाह चोत्संगलालिता २० नूनं त्वत्कृता
पुण्यास्तेभृत्या ये धीश्वराः शुभे कृतागाः मात्मसात्कृत्वाशिक्षां दंडेन युंजते २१ परमो ऽनुग्रहो दंडो भृ
त्येषु प्रभुणार्पितः वाल्को न वेद तन्नन्वि चं धुक्तत्य ममर्षणाः २२ सा त्वं मुखं सुदति भ्रू ऽनुरागभार सु२
व्रीडाविलंबविलसद्धसि गावलोकं नीलालकालि निरुपस्कृत मुन्नसंन्नस्वानां प्रदर्शय मनस्वि
नि वल्गुवाक्यं २५ तस्मिन्नुद्धेदमम महं तव वीरपत्नि यो ऽन्यत्र भूसुरकुलोत्कृतकिल्विषस्तं पश्य २३
नवीतभयमुन्मुदितं त्रिलोक्या मन्यत्र वै मुररिपोरितरत्र दासात् २४ वक्र्रो न ते वितिलकं मम
म१ लिनं विहर्षसंरंभभीममवि मृष्टपत्तरागं पश्य स्तनावपि शुचोपहतो सुजातौ विंवाधरं विगत
कुंकुमपंकरागं २५

यत्कृतापराधस्तस्मिन्नहं ब्राह्मणकुलादन्यत्र अन्यस्मिन् मुररिपुदासादितरत्र च दंडं दधे दंडं करोमि
कि तु नं विगतभयं तु उन्मुदितं त्रिलोक्यामन्यत्रैवलोकत्रयाद्बहिरपि न पश्यामि मत्कृपयाद्दवासो मरिष्यतीत्यर्थः राम ७३
२४ ते वक्र्रामितः पूर्वं कदाचिदपि वितिलकं न पश्यामि संरंभेण कोपावेशेन भीमं भयंकरं अविमृष्टं मनुक्षे ७८
लमपत्तरागस्नेह अन्यत्तथा ते सुजातौ शोभनौ स्तनावपि शोकाश्रभिरुपहतौ न पश्यामि तथा विंबफलो
काराधरं च विगतः कुंकुमपंकतुल्यस्तांबूलरागो यस्मात्ताद्दृशं न पश्यामि दासीकृतास्व जातमिति शेषः पा
अन१ ढांतरे एवं मुखं स्तनो च पश्यन् शरी न विद्यामीत्यन्वयः विगतः कुंकुमपंकरागो याभ्यामिति स्तनयोर्विशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्मात्कृतं किल्बिषमपराधो येन तस्य किल्बिषमेवाह स्वैरं स्वातंत्र्येण तामपृष्ट्वा मृगयां गतस्य देवोदेवने क्रीडां तां रतिं ददातीति देवरः कांतः तां कामवेगेन विस्रस्तं गतं पौंस्यं पौरुषं धैर्यं यस्य तं उशती कामयमाना श्लोकेन कर्तुं योग्य
अर्थे कान भजत २६ चतुर्थषड्विंशः सप्तविंशे प्रिया पुत्राद्यासक्त्या विस्मृतात्मनः कालकन्याद्युपाख्याने जरारोगा
द्युदीर्यते तदेवं जीवस्यानुनयादि कथा सौहार्देन तत्तदुपाधिवशप्रवृत्त्या तन्निमित्तां संसारपरंपरां निरूपयि
५८ तुमाह इच्छमिति अत्र चेत् प्रतिपदं कथं चिदध्यात्मपक्षेपि योजयितुं शक्यमेव श्रीनारदेन तु जीवस्य स्त्रीपुरुष

तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयाव्यसनातुरस्य का देवरं वशगतं कुसुमास्त्रवे
गविस्रस्तपौंस्यमुशतीन भजेत कृत्ये २६ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने ष
ड्विंशोध्यायः नारद उवाच इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः पुरंजनी महाराज रेमे रमय
ती पतिं १ स राजा महिषीं राजन् सुस्नातां रुचिराननां कृतस्वस्त्ययनां तृप्तामभ्यनंदुदुपागतां २
तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः न कालरंहो बुबुधे दुरत्ययं दिवानिशेति प्रमदा
परिग्रहः ३ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः तामेव वीरो मनुते परं यत
स्तमोभिभूतो न निजं परं च यत् ४ तयैवं रममाणस्य कामकश्मलचेतसः क्षणार्धमिव राजेंद्र व्यतिक्रांतं
नवं वयः ५

वासनादार्ढ्येन विचित्रा संसृतिर्भवतीत्येतावदेव कथातात्पर्यं दर्शितं केचित्तु मानुषः कश्चित् स्त्रीकश्चि ... न्नो भयमेध धी
देवा मनुष्यास्तिर्यञ्चो यथाकर्मगुणं भवन्तीति वदन्तः तत्रापि पुंस्त्वेन संसृतिर्ध्यायत्रयेण कृता ततश्चैकेनाध्यायेन स्त्रीत्वे
न संसृतिः प्रदर्शिता ईश्वरप्रासादलब्धज्ञानेन मोक्षश्चेत्युक्तं ततः सांदेव पथा पर्यायं व्याख्यानमिति पंचाध्यायार्थः प्रतीयत
प्रतिपदमध्यात्मयोजना तु दुर्घटा निःप्रयोजना वेति स्वप्रौढिप्रख्यापनमनादृत्य यथापर्यायमेव व्याख्यास्यामः सध्र्यक्
सम्यक् १ विभ्रमैर्विलासैः १ कृतस्वस्त्ययनं मंगलं कुंकुमसिंदूरादिभिर्येस्याः २ उपगूढः परिरब्धः परिरब्धा कंधरा तत्स्यायेन रे
हकांते अनुमंत्रैः अनुकूलैः गुह्यभाषणैः अपकृष्टा चेतना विवेको यस्य कालरंहः आयुर्व्ययं प्रमदैव परिग्रहो न ज्ञानसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुत्रानिंद्रियपरिणामान् ६ दुहितॄः तदनंतरं वुद्धिवृत्तीः पुत्रसंख्यात्व बाहुल्यमात्रविवक्षया दुहितृसंख्यातु पुत्रेभ्यो
न्यूनत्वेन गार्हस्थ्यसौंदर्यार्थं विराट् संम्राट् आयुषोर्द्धमित्यापाद्यपिकथा सौंदर्यार्थमेव पुरंजनके न्यायोत्पौ
रंजन्यः हे प्रजापते ७ दारैः परिणामानंतरं हितचिंताभिः वरैः उचितविषयभोगैः ८ पुत्राणां पुत्राः कर्माणि प

द्विता ३

७७

तस्यामजनयत्पुत्रान् पुरंजन्यां पुरंजनः। शतान्येकादश विराडायुषोर्द्धमथात्यगात् ६ दुहितॄ
र्दशोत्तरशतं पितृमातृयशस्करीः। शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते ७ स पांचालप
तिः पुत्रान् पितृवंशविवर्द्धनान्। दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ८ पुत्राणां चाभव
न्पुत्रा एकैकस्य शतं शतं। यैर्वै पौरंजनो वंशः पंचालेषु समेधितः ९ तेषु तद्रिक्थहारेषु गृहकोशा
नुजीविषु। निरूढेन ममत्वेन विषयेष्वन्वबध्यत १० ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः। दे
वान् पितॄन् भूतपतीन् नानाकामो यथा भवान् ११ युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः। आससा
द स वै कालो योऽप्रियः प्रिययोषितां १२ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप। गंधर्वास्तस्य
वलिनः षष्ट्युत्तरशतत्रयं १३ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः। परिवृत्त्या विलुंपंति स
र्वकामविनिर्मितां ॥ १४

पांचालेषु शब्दादिविषयेषु ९ तेषु पुत्रादिषु तेषामपि ये रिक्थहाराः पुत्रास्तेषु च १० युक्तेषु आत्महितेषु कर्मसु ख
नवहितस्य सेवे कालः जरासमयः १२ चंडवेगः संवत्सरेणावर्तमानेनोपलक्षितः गंधर्वा दिवसाः १३ गंधर्व्यो
रात्रयः तादृश्यः मैथुन्यः दिवसैर्मिथुनीभूय स्थिताः सिताश्चासिताश्च शुक्लाः कृष्णपक्षीयाः परिभ्रमणेन सर्वैः
कामैः सह विनिर्मितां पुरीमपहरंति १४

तारकीः १

४८

शिलाश्रा १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राजागरः प्राणः १५ विंशत्याचसह। १६ स्वसंवंधसंवधिनिप्राणे। १७ सएवमधुभुक् क्षुद्रसुखभोक्ता स्वपार्षदैरि
न्द्रियैः नाविदत् नालोचितवान् १८ कालस्यदुहिताजरा त्रितांनप्रत्यनंदत् नैच्छत् वर्हिष्मन् हे प्राचीनवर्हिः १९
पूरवेययातिपुत्रायेननष्टनासतीवरमदात् ययातिः शुक्रशापाज्जरांप्राप्यपुत्राननुवाचइमांग्रहीतेति तांज्येष्ठा

तेचंडवेगानुचराः पुरंजनपुरंयदा हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः १५ ससप्तभिःशतै
रेको विंशोकेनशतंसमाः पुरंजनपुराध्यक्षोगंधर्वैर्युयुधेबली १६ क्षीयमाणेस्वसंबंधेएक
स्मिन्बहुभिर्युधा। चिंतांपरांजगामार्त्तः सराष्ट्रपुरबांधवः १७ सएवपुर्यांमधुभुक्पंचाले
षुस्वपार्षदैः उपनीतंबलिंगृह्णन्स्त्रीजितोनाविदद्भयं १८ कालस्यदुहिताकांचित्त्रि
लोकींवरमिच्छती पर्यटंतीनबर्हिष्मन्प्रत्यनंदतकश्चन १९ दौर्भाग्येनात्मनोलोकेविश्रु
तादुर्भगेतिसा यातुष्टाराजर्षयेतुवृताऽदात्पूरवेवरं ॥२० कदाचिदटमानासाब्रह्मलोका
न्महींगतं वव्रेबृहद्व्रतंमांतुजानतीकाममोहिता मयिसंरभ्यविपुलमदाच्छापंसुदुःसहं स्थातु
मर्हसिनैकत्रमद्याञ्चाविमुखोमुने २२ ततोविहतसंकल्पाकन्यकायवनेश्वरं मयोपदिष्टमासा
द्यवव्रेनाम्नाभयंपतिं २३॥

अवारोनजग्रहुः पुरुस्तुजग्रहेतेनतायया निस्तः स्वराज्यंददौ वितिर्जरेवाऽदादित्युक्तं २० २१ प्रत्याख्यातवतिमयि
संरम्भक्रोधंकृत्वानैकत्रस्थातुमर्हसीतिशापमदात् २२ आधयोव्याधयश्चयवनास्तेषामीश्वरंभयनामानंवव्रे
२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० हे वीर त्वामीप्सितंपतिं वृणे न रिष्यति न नश्यति २४ लोकेनेति विदन्नप्यदृष्टयेन यावस्तेन चतु पनतं प्राप्तं न त्याज्यमा
नं यो न ददाति यश्च दीयमानं न इच्छति न गृह्णाति इमौ द्वौ कर्मसु तावनुशोचंति संतः २५ पुरुषेण कर्तव्यो धर्मः पौ
रुषः २६ देवगुह्यं मरणं तच्च प्राणिनां वैराग्यानुदयाय देवैर्गोप्यते २७ तुभ्यं त्वत्कृते आत्मसमाधिना ज्ञानदृष्ट्या

ऋषभं यवनानां त्वा वृणे वीरेप्सितं पतिं संकल्पस्त्वयि भूतानां कृतः किल न रिष्यति २४ द्वाविमा
वनुशोचंति बालावसदवग्रहौ यल्लोकशास्त्रोपनतं न राति न तदिच्छति २५ अथो भजस्व मां
भद्र भजंतीं मे दयां कुरु एतावान्पौरुषो धर्मो यदार्त्तान् अनुकंपते २६ कालकन्योदितवचो नि
७८ शम्य यवनेश्वरः चिकीर्षुर्देवगुह्यं सः सस्मितं तामभाषत २७ मया निरूपितस्तुभ्यं पतिरा ४
त्मसमाधिना नाभिनंदति लोकोयं त्वामभद्रामसंमतां त्वमव्यक्तगतिर्भुंक्ष्व लोकं कर्मवि
निर्मितं २८ याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि २९ प्रज्वारोयं मम भ्राता त्वं च मे भगि
नी भव चराम्युभाभ्यां लोकेऽस्मिन्नव्यक्तो भीमसैनिकः ३० इति श्रीभागवते महापुराणे च
तुर्थस्कंधे पुरंजनोपाख्याने सप्तविंशोऽध्यायः ॥ २७

याच्यमानोऽयं लोकस्त्वां नेच्छति अतोऽव्यक्तगतिः कुतः प्राप्तस्त्वलक्षितगतिः सती लोकमाक्रम्य भुंक्ष्व ॥ राम
एवं सर्वोपि लोकस्तव पतिः स्यादित्यर्थः २८ न चैवं त्वया शंकनीयं मां प्रतिकूलो लोकः कथं निष्पत्तीति यस्मात् ॥ ७८
नी० त्वमेव प्रजानाशं करिष्यसीत्याह याहीति यामदीयां पृतनां तया युक्ता २९ किंच प्रज्वार इति मारको
वैष्णवज्वरः माहेश्वरस्य व्याधेः पातित्वात् भीमाः घोराः सैनिकायस्य ३० इति चतुर्थे सप्तविंशः ॥ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अशं विशेत् तु वेदभ्यो ध्यानेन स्त्रीविचिन्तया स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते इदानीं तु पुरंजनस्य पुंदेहत्याग
पूर्वकं स्त्रीत्वप्रकारमाह सैनिका इत्यादि राजसिंहस्य वक्ष्यमाणत्वेन नादिष्टं दैवं कुर्वंति अधिकुर्वंतीति तथा
मर्त्यो रोहशकारिण इतिवा १ जरत्पं नग्नेन जीर्णप्राणेन पालिता २ द्वाभिः चक्षुरादिरोगरूपेण प्रविश्य ४

श्रीनारद उवाच सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः प्रज्वारकालकन्याभ्यां विचेरुरवनीमि
मां १ त एकदा तु रभसा पुरंजनपुरं नृप रुरुधुर्भौमभोगाढ्यां जरत्पंनगपालितां २ कालकन्यापि बु
भुजे पुरंजनपुरं बलात् ययाऽभिभूतः पुरुषः सद्यो निःसारतामियात् ३ तयोपभुज्यमानां वै यवनाः
सर्वतो दिशं द्वार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीं ४ तस्यां प्रपीड्यमानायामभिमानी पुरं
जनः अवापोरुविधांस्तापान् कुटुंबी ममताकुलः ५ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः न
ष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ६ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् पुत्रान्पौत्रानु
गामात्यान् जायां च गतसौहृदां ७ आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् दुरंतचिंतामापन्नो
न लेभे तत्प्रतिक्रियां ८ कामानभिलषन् दीनो यातयामांश्च कन्यया विगतात्मगतिस्नेहः पुत्रदारांश्च
लालयन् ९ गंधर्वयवनाक्रांतां कालकन्योपमर्दितां हातुं प्रचक्रमे राजा तां पुरीमनिकामतः १०
भयनाम्नोऽग्रजो भ्राता प्रज्वारः प्रत्युपस्थितः ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ११

कन्यया जरयोपगूढः सन् तत्प्रतिक्रियां न लेभे इति तृतीयेनान्वयः हृतैश्वर्यः उत्थानादिष्वशक्तेः ६ प्रतिकूलान् स्वम
पेक्षितविषयप्रापणात् अनादृतान् आदरमकुर्वाणान् स्वाधीनत्वाभावात् अनुगा इंद्रियाणि अमात्या इंद्रियदेवाः
गतसौहृदां अध्यवसायाभावात् ७ अरिभिर्विषयादिभिः दूषितान् ८ कालकन्यया यातयामान् निःसारानपि का
मान् अभिलषन् विगता आत्मनो गतिः पारलौकिकी ऐहिकी पुत्रादिस्नेहश्च यस्य स्नेहादिति वा पाठः ९ स राजा
पुरंजनो हातुं प्रचक्रमे उपक्रांतवानिति द्वयोरन्वयः अनिकामतः अनिच्छयापि १०|११

हेतुभ्रमया २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० का०

सपरिछदः भृत्यवर्गसहितः कुटुंबेनदीव्यतीतिकौटुंविकः कुटुंविन्यासंधिर्नात्रविवक्षितः सान्वयः पुत्रादिस
हितः १२ यवनेनरुपरुद्धान्यायतनानियस्यसपुरपालः १३ पुरुवहस्तैरुद्धेनेनतुरुवेपथुर्यस्यरक्षकोटरादिवस
पेः १४ कोटतपरुद्धेरुरोरादृद्युतस्तुतधनिचकार १५ दुहित्रादीनुद्ध्याविस्तुतेरणान्वयः ज्ञामयोऽत्रस्नुषाः स्व

७९ तस्यांसह्यमानायांसपोरः सपरिछदः कौटुंविकः कुटुंविनाऽनुयातप्यतसान्वयः १२ यवनोपरु
द्धायतनेनाग्रस्तायांकालकन्यया पुर्यांप्रज्वारसंभ्रष्टः पुरपालोऽन्वतप्यत १३ नगौकेसाविनुंतत्रापु
रुष्टोऽद्धोरुवेपथुः गंतुमैछत्ततोरक्षकोटरादिवसानत्याच १४ शिथिलावयवायर्हिंगंधूर्वेहंतपो
रुषः यवनेनरिभीराजन्नुपरुद्धाखेरादह १५ दुहितृः पुत्रपौत्रां श्वजामिजामातृघाषेदानु स्व
स्त्रावशिष्टंयत्किंचिद्गृहकोशपरिछदं १६ अहंमेमेतिरवोविष्टोऽस्यगृहेषुकुमतिर्गृहोदध्यात्प्रेम
दृष्टहीनोविप्रयोगार्तउपस्थिते १७ लोकांतरंगतवतिमय्यनाथाकुटुंविनी वर्तिष्यतेकथंत्वेषा
वालकाननुशोचती १८ नमय्यनाशितेभुक्तेनास्नातेस्नातिमत्परा मयिरुष्टेसुसंत्रस्ताभर्त्सि
तेयतवाक्भयात् १९ प्रबोधयतिमाविज्ञंमुषितेशोककर्शिता वर्त्मैतद्गृहमेधीयंवीरसुरपिने
ष्यति २०

टि० सत्वमात्रेणाविष्टभोगास्तप्रागवक्षीणाः १६ १७ ध्यानमेवाह १८ अनाशितेऽभोजिते भर्त्सितेभ
र्त्सनेनक्षतेयतवाअवति १९ अविज्ञंअविवेकिनंमामां मुषितेदेशांतरंगतेगृहमेधीयंवर्त्मगृहध ७९
र्मेअपिकिंनेष्यतिअनुवर्तयिष्यतियुक्तेमत्तयूयंतावीरसूः पुत्रवती किंचमद्विरहमसहमानोम
रिष्यत्येवेत्यर्थः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न विद्येत परमयनमाश्रेयो येषां परायणं॥ पुत्राः कन्याश्च यद्वा पराश्रया॥ कन्याः भिन्ना नौर्यथा २१ अनन्तदुःहेण
वस्तोन स्तस्य ब्रह्मत्वात् २२ एवं यदा क्षयं स्थानं नीयमानस्तदा अनुपथा॥ प्राणा इन्द्रियाणि च तथा च श्रुतिः॥ ''
तमनुक्रामन्तं प्राणो ऽनुक्रामति प्राणमनुक्रामन्तं सर्वे प्राणा अनुक्रामन्तीति २३ प्रकृतिं महाभूतान्मतां॥ २४
नाविदत्तु न स संसारपुरः पूर्वसखायं सन्तमीश्वरं २५ अदयालुं नो कामं कर्मसु येसञ्जप्ताः हेतोः अमी स्वपापकौ
येवा २६ शाश्वतीः समाः आर्तिमनुभूय॥ २७ अनंतकालेन भार्यामेव मनसा गृह्णानु स्मरंतु अनंतरं विदर्भ

कथं नु दारका हीनां दारकी वा परायणं॥ वर्तिष्यंते मयि गते भिन्ननावइवोदधौ २१ एवं कृपणया बुद्ध्या
शोचंतमतदर्हणं गृहीतुं कृतधीरिमं भयनाभ्यपद्यत २२ पशुवद्बद्ध्वैनं रूपनीयमानः स्वकं क्षयं '' मा२
अन्वद्रवन्ननुपथाः शोचंतो भृशमातुराः २३ पुरीं विहायोपगत उपरुद्धो भुजंगमः यदा तमेवानु
पुरीं विशीर्णा प्रकृतिं गता २४ विकृष्यमाणः प्रसभं यवनेन बलीयसा नाविदत्तमसाविष्टः स
खायं सुहृदं पुरः २५ तं यज्ञपशवोऽनेन संज्ञप्ता ये ऽदयालुना कुठारैश्चिच्छिदुः क्रुद्धाः स्मरंतो ऽ
मीवमस्य तत् २६ अनंतपारे तमसि मग्नो नष्टस्मृतिः समाः शाश्वतीरनुभूयार्तिं प्रमदासंगदूषितः
२७ तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि २८

स्य वेश्मनि प्रमदोत्तमा बभूव अतः परमास्मिन्प्रकरणे तावदेव प्रक्रांतोपयोगि विवक्षितं स्त्रीध्यानेन स्त्रीत्वप्रा
प्तावपि पतिव्रता ध्यानेन पूर्वदृष्टेन च धार्मिका विदर्भोऽस्य जन्माभूत् धार्मिकसंगेन च विष्णुदस्य भागवतेन मल
ध२ यध्वजेन संगो ऽभूत् ततो विष्णुभक्तिः ततो वैराग्यं ततस्तमेव भर्तृरूपं गुरुं पातिव्रत्यधर्मेण भजंती भगवत्प्रसाद
लब्धज्ञानेन मोक्षं स्मरति अन्यत्तु कथालंकारमात्रं तथापि किंचिद्व्यक्तिसामान्येनेह योजयिष्यामः विदर्भ
स्य विशिष्ट दर्भोपलक्षितस्य कर्मठस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च क्षत्रियाराजन्येषु
श्रेष्ठस्य वेश्मनि २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० मलयेन पलक्षितेद्दक्षिणोदेशो ध्वजइववद्दर्शनीयः सहि श्रीविष्णुभक्तिप्रधानोदेशः तत्रमुख्यः महाभागवतइत्यर्थः
पंडानिश्चयबुद्धिः तामहंतीतिपांड्यः सउपयेमे पुरंजनाभार्गवसंगंप्राप्तइत्यर्थः २९ आत्मजां श्रीकृष्णसेवा
रुचिं तत्संगेन भगवद्धर्मेरुचिराभूदित्यर्थः असितस्य श्रीकृष्णस्येक्षणंपयातां यवीयसः सप्तसुतान् श्रवणंकीर्त
नंविष्णोःस्मरणंपादसेवनं अर्चनंवंदनंदास्यमिति भक्तिप्रकारान् सख्यात्मनिवेदनयोस्तुपदार्थज्ञानोत्तरकालत्वा कीर्तना२
तस्यच भगवतैवोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुत्पत्तेः सप्तैवते भगवद्धर्मरुच्यानुद्धवादिषु ... जातमित्यर्थः
द्रविडभूमिपालकान् द्रविडभूमिहिंश्रवणादि भक्तिभिरर्बुसुरक्षिताऽस्तीतिप्रसिद्धं ३० अर्बुदमिति श्रवणा

उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः युधिनिर्जित्यराजन्यान्पांड्यः परपुरंजयः २९ तस्यांसजनयांचक्र न्यां१
आत्मजामसितेक्षणां यवीयसःसप्तसुतान्सप्तद्रविडभूभृतः ३० एकैकस्याभवत्तेषांराजन्नर्बुदमर्बुदम
बुदं भोक्ष्यतेयद्वंशधरैर्महीमन्वंतरंपरम् ३१ अगस्त्यःप्राग्दुहितरमुपयेमेधृतव्रतां यस्यांदृढच्यु
८० तोजातइध्मवाहात्मजोमुनिः ३२

दीनांप्रत्येकमनेकप्रकारात्अभवन्नित्यर्थः तदुक्तं भक्तियोगोवहुविधोमार्गैर्भामिनिभाव्यतइति येषांवंशधरैः यतः
ब्रा२ प्रवृत्तैःसंप्रदायभेदैः कृत्स्नामहीमन्वंतरंयावत् पर्यंतंभोक्ष्यतेअत्र विद्याकामकर्माण्योपिरक्षिष्यंते ३१ अगस्त्यः अगा
निनिः क्रियाणिगात्राणिस्त्यायतिसंघातपतीत्यगस्त्योमनः सप्राक्प्रथमजातांदुहितरंकृष्णसेवारुचिमुपयेमे त
स्यामनःकृष्णेदृढंरतिंववर्धेत्यर्थः धृतानिनियमदमादीनिव्रतानियया तांरतिं दृढेभ्यःसर्गलोकादिभोगेभ्योऽपि स४
विहा१ च्युतस्तद्रहितःकृष्णरतोऽमुत्रभोगविरागोजातइत्यर्थः सएवोपरमात्मकत्वान्मुनिः कथंभूतः इध्मवाहआ
त्मजोयस्यसः तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठं इत्यादिश्रुतिप्रसिद्धासमि राम
द्वहनोपलक्षितागुरूपसत्तिर्वैराग्यांभूदित्यर्थः नह्यविरक्तस्यगुरूपसत्तिःसंभवति केथापक्षियथाश्रुतम ८०
३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभज्यतनयेभ्यः १

श्रु २

*क्ष्मां विभज्य तत्र श्रवणादि भक्तिभेदं व्यवस्थाप्य ३३ इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सर्वेनो विरक्तस्य पत्निरेव गुरुः १ स्त्री
णां मितिवचनात् पतिसेवया गुरुसेवापि प्रकारं दर्शयितुमाह हित्वेत्यादिना मनोरथ इत्येतेन ग्रंथेन मदयतीति मदिरं
ईक्षणं यस्याः १ ३४ तत्र चंद्रवसा ताम्रपर्णी वटोदका नाम नद्यः तासां पुण्यैः सलिलैः १ उभयत्र अंतर्बहिः आत्मनो मलं क्षालयन् तप आस्थि
तः इत्युत्तरेणान्वयः ३५ अस्थिभिः मोक्षिप्य तः इत्यष्टिबीजं ३६ विद्ययात्मोपासनया पक्वकषायः १ दग्धकामादि वास

विभज्य तनयेभ्यः १ क्ष्मां राजर्षिर्मलयध्वजः आरिराधयिषुः कृष्णं स जगाम कुलाचलं ३३ हित्वा गृहा
न्सुतान्भोगान्वैदर्भी मदिरेक्षणा अन्वधावत पांड्येशं ज्योत्स्नेव रजनीकरं ३४ तत्र चंद्रवसा नाम ता
म्रपर्णी वटोदका तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ३५ कंदाष्टिभिर्मूलफलैः पुष्प
पर्णैस्तृणोदकैः १ वर्त्तमानः शनैर्गात्रकर्षणं तप आस्थितः १ ३६ शीतोष्णवातवर्षाणि क्षुत्पि
पासे प्रियाप्रिये सुखदुःखे इति द्वंद्वान्यजयत्समदर्शनः १ ३७ तपसा विद्यया पक्वकषायो नियमैर्य प३
मैः १ युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः १ ३८ आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः १
वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिं ३९ स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि विद्वान्स्वप्न इ
वामर्शसाक्षिणं विरराम ह ४०

नः १ [illegible]ः युयुजे आत्मनो ब्रह्मत्वं भावयामास अक्षाणींद्रियाणि अनिलः प्राणः आशयश्चि
त्तं विजिता अक्षादयो येन ३८ आस्ते स्म वर्षशतमिति ज्ञानस्याद्युः साधकतां दर्शयति अतएव भक्तिकृतत्वानित्याह
वासुदेवे रतिमुद्वहन् अन्यद्देहादिकं न वेद ३९ सा एवं वर्त्तमानः आत्मन्यात्मानं विद्वान् अन्यस्मादुपरराम कथं
विद्वान् व्यतिरिक्तत्वेन कुतः व्यापकतया देहादिप्रकाशकत्वेन ननु देहाद्याकारो विमर्शस्तत्साक्षित्वं कथं तेनापि निरा
कारात्मा १ तत्राह आमर्शस्यापि साक्षिणं अयं भावः विमर्शो नामांतःकरणवृत्तिः सा च जडत्वादात्मप्रकाशापेक्षेति यथा

व्यतिरिक्ततया देहादि २

जौगार २

स्वप्नमेवाखिलमिमीयादि प्रतीतो तद्व्यतिरिक्तमात्मानं वेत्ति
रघुना ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केनविद्वान् तत्राह साक्षाद्भगवता गुरुणोक्तेनेति सर्वतो मुखं यथा तथा स्फुरता अनवच्छिन्नेन ज्ञानेन ४१ तदेवाह पर इति
८१ ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मनः ईक्षणेन शोकादि निवृत्तिः अहमेव ब्रह्मास्मीत्यात्मनि ब्रह्मण ईक्षणं ब्रह्मपरोक्षनिवृत्तिः
ब्रह्मैवाहं न संसारीति ब्रह्मण्यात्मन ईक्षणे शोकादिनिवृत्तिः अहमेव ब्रह्मास्मीत्यात्मनि ब्रह्मण ईक्षणं ब्रह्मपरोक्षनिवृत्तिः
अनेन व्यतिहारेण ईक्षमाणः अस्मात्संसारात् उपरराम नन्वेवमपि जीवस्य कुतो ब्रह्मतापत्तिः ईक्षणस्यैव व्यवधा
यकत्वादित्याशंक्याह ईक्षां विहाय यद्बन्धनोऽनलवत्तस्याः स्वयमेवोपशान्तेरिति भावः ४२ ४३ तपेपतिप्रत्युः स

साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखं ४१ परे ब्रह्मणि
चात्मानं परं ब्रह्म तथात्मनि ईक्षमाणो विहायेक्षामस्मादुपरराम ह ४२ पतिं परमधर्मज्ञं वैदर्भी
मलयध्वजं प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता ४३ चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा
बभावुपपतिं शान्ता शिखा शान्तमिवानलं ४४ अजानती प्रियतमं यदोपरतमङ्गना सुस्थिरासन
मासाद्य यथापूर्वमुपाचरत् ४५ यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्चती आसीत्संविग्नहृदया
यूथभ्रष्टा मृगी यथा ४६ आत्मानं शोचती दीनमबन्धुर्विक्लवाश्रुभिः स्नापयित्वा विपिने सुस्वरं प्र
रोरुद सा ४७ उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलां दस्युभ्यः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि ४८ +

मीपे यथा पत्युः किंचिन्मात्रं न्यूनानां समानासनीव भावित्यर्थः उपाधिके चेति कर्मप्रवचनीययोगे द्वितीया शां
७वी १ तमङ्गारावस्थमनलमुपशान्तं शुद्धाङ्गीलता यथा भवतितद्वत् ४४ तदानीमपि सुस्थिरमासनं यस्य अत एवाजान
तीय दातदा यथापूर्वमसेवत ४५ पत्युरङ्घ्रिमर्चयन्ती यदा तस्मिन्नङ्घ्रावूष्माणं नापश्यत् ४६ अबन्धुः पतिरहिता अ
श्रुभिः सिच्य ४७ क्षत्रबन्धुभ्यः अधार्मिकक्षत्रियेभ्योऽपि ४८ अवनेयत्प्रवर्त्तयामास ४९ ८१
+ एवं विलपती बाला विपिनेऽनुगता पतिं पतिता पादयोर्भर्तू रुदत्यश्रूण्यवर्त्तयत् ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यांनिधायअग्निंदत्तवतीनाहिप्यत ५० पूर्वतरः अनादिरीश्वरः सखाब्राह्मणः सुवर्णावित् इतिश्रुतेः सामप्रियवाक्येनसांत्वयन् ५१ यस्ययंशोचसि अयंसशेते पूर्वंविवचर्थमयि स्थितत्वंनसख्यसुखं अनुभूतवानसि ५२ यद्यपिमांनजानासि तथापि आत्मानंत्वामविज्ञातसखं अविज्ञातः कश्चिन्ममसखाआसीदित्येवं किंस्मरसिसखेइति पुंस्त्वनिर्देशः पाकेनपुंस्त्वस्मरणायसख्यंस्मारयन् स्ववियोगकृतमनर्थमाह हित्वेतिसार्द्धैः षड्भिः पदंस्थानं ५३ हंसौ अहंत्वंचमानसे हृदयेअयनंययोः कथापक्षिमानसेसरसिस्थितौतौपक्षिणावभूतांजातौ अकोगृहं अंतरावियोगंविनावावाशब्दएवार्थः

चि १ चितिंदारुमयींचित्वातस्यांपत्युः कलेवरं आदीप्यचानुमरणेविलपंतीमनोदधे ५० तत्रपूर्वतरः कश्चित्सखाब्राह्मणआत्मवान् सांत्वयन्वल्गुनासाम्नातामाहरुदतींप्रभो ५१ कात्वंकस्यासिकोवायंशयानोयस्यशोचसि जानासिकिंसखायंमांयेनाग्रेविचचर्थह ५२ अपिस्मरसिचात्मानमविज्ञातसखंसखे हित्वामांपदमन्विच्छन्भौमभोगरतोगतः ५३ हंसावहंचत्वंचार्यसखायौमानसायनौ अभूतामंतरावौकः सहस्रपरिवत्सरान् ५४ सत्वंविहायमांबंधोगतोग्राम्यमतिर्महीं विचरन्पदमद्राक्षीः कयाचिन्निर्मितंस्त्रिया ५५ पंचाराममनवद्वारमेकपालंत्रिकोष्ठकं षट्कुलं पंचविपणंपंचप्रकृतिस्त्रीधवं ५६ पंचेंद्रियार्थाआरामाद्वारः प्राणानवप्रभो तेजोबन्नानिकोष्ठानि कुलमिंद्रियसंग्रहः ५७

प्राण १ सहस्रपरिवत्सरान्महाप्रलयोयावत् ५४ हेबंधोग्राम्यसुखमतिर्यस्याःस्त्रियामायया ५५ पंचारामाउपवनानियस्मिन् नवद्वाराणिछिद्राणियस्मिन् एकः प्राणः पालोयस्मिन्त्रीणिपृथिव्यप्तेजांसिकोष्ठानिप्रकारायस्मिन् षड्ज्ञानेंद्रियमनांसिअभीष्टविषयसमर्पकावणिजोयस्मिन् ५६ पंचविपणाहट्टाः कर्मेंद्रियाणियस्मिन् पंचभूतानिप्रकृतिःउपादानकारणंयस्यांस्त्रीबुद्धिरेवधवः पतिःस्वामिनीयस्मिन् ५ स्वयमेवमेश्लोकंव्याचष्टेपंचेंद्रियार्थाइति षट्कुलमिति ... एकपालमितिचस्पष्टत्वान्नव्याख्यातं ५७ कूलानि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु विदर्भदुहितृत्वादिकं प्रत्यक्षेण दृश्यमानं कथमित्यमानं वदसि तत्राह। २

भा॰ च॰ भूतान्येवं त्र्यय्याप्रकृतिरुपादानं यस्य स्त्रीधवमित्यस्य व्याख्यानं शक्तिरधीशा यस्य तद्दशा सन्नित्यर्थः ५८ स्पृ-
ष्टः अभिभूतः अश्रुतानविद्यमानश्रुतेश्रवणं स्मृतिर्यस्य ५९ तत्त्वमुपदिशति नत्वमिति चतुर्भिः सुहृत्पतिः नवद्वा-
रे पुरे यया रुद्धोसि तस्याः ६० पुमांसं पूर्वजन्मनि यदमन्यथाः इदानीं च सतीं श्रेष्ठां स्त्रियं यन्मन्यसे एषा माया
यत उभयमपि वस्तुतो नास्ति यस्मादावां हंसौ शुद्धौ तौ आवयोर्वक्ष्यमाणां गतिं स्वरूपं पश्य ६१ तत्त्वंपद-

विपणीस्तक्रियाशक्तिर्भूतप्रकृतिरव्यया शक्त्यधीशः पुमानत्र प्रविष्टो नावबुध्यते ५८ तस्मिंस्त्वं
रामया स्पृष्टो रममाणो ऽश्रुतस्मृतिः तत्संगादीदृशीं प्राप्तो दशां पापीयसीं विभो ५९
न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया ६० माया ह्येषा मया सृ-
ष्टा यत्पुमांसं स्त्रियं सतीं मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिं ६१ अहं भवान्न चान्यस्त्वं त्वमेवा-
८२ हं विचक्ष्व भोः न तौ पश्यंति कवयः छिद्रं जातु मनागपि ६२ यथा पुरुष आत्मानमेकमादर्शचक्षु-
षोः द्विधाभूतमवेक्षेत तथैवांतरमावयोः ६३ एवं स मानसो हंसो हंसेन प्रतिबोधितः स्वस्थस्त-
द्व्यभिचारेण नष्टामाप पुनः स्मृतिं ६४ बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितं यत्परोक्षप्रियो
देवो भगवान्विश्वभावनः ६५ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ऽष्टाविंशतितमोध्यायः

र्थयोः स्त्रीदंपत्योरैक्यमाह अहमेव भवानुपचारं वारयति न चान्य इति व्यतिहारोपदेशः उक्ताभिप्रायः छि- राम
द्रं मेतरं ६२ तर्हि कथमावयोरज्ञत्वसर्वज्ञत्वादिधर्मभेदस्तत्राह यथेति आत्मानं देहमादर्शे निर्मले महां- ८२
तं स्थिरं चावेक्षेत परस्य चक्षुषि च तद्विपरीतं विद्याविद्योपाधिकृतो धर्मभेद इत्यर्थः ६३ तद्व्यभिचारे-
णाईश्वरवियोगेन ६४ कथामात्रमिति बुद्धिं वारयति बर्हिष्मन्निति पारोक्ष्येण राजकथामिषेण तत्र हेतुः
यद्यस्मात् ६५ चतुर्थे ष्टाविंशः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊनविशेषपरोक्षार्थव्याख्यानेनोपसंहृतं स्त्रीसंगतो भवस्तिाशसंगान्मुक्तिरितिस्फुटं कवयः अध्यात्मविदः॥
व्यनक्ति लिंपतिचेतनीकरोतीत्यर्थः यद्वाव्यनक्ति प्रकटयति तत्तत्स्वकर्मणा पुरंजनयतीति पुरंजनपदं व्या
ख्यातं भवति एकद्व्यादयः पादा यस्य २ अविज्ञातनामा हेतू न आहृताः आहृता उक्तो यः स ईश्वरः अविज्ञा
तनामनिरुक्तिः यद्यस्मात्पुंभिर्नामादिप्रयोगेन न विज्ञायते ३ तत्र तेषु पुरेषु मध्ये ४ अक्षभिरिंद्रियैः ५॥

प्राचीनवर्हिरुवाच भगवंस्ते वचोस्माभिर्न सम्यगवगम्यते कवयस्तद्विजानंति न वयं कर्ममो
हिताः १ श्रीनारद उवाच पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं एकद्वित्रिचतुष्पादं
भा ३ वहुपादमपादकं २ योऽविज्ञाहृतस्तस्य पुरुषस्य सखेश्वरः यन्न विज्ञायते पुंभिर्नामभिर्वा क्रिया पु० १
गुणैः ३ यदाजिघृक्षन्पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् नवद्वारं द्विहस्तांघ्रि तत्रामनुत साधी
ति ४ बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतं यामधिष्ठाय देहेस्मिन् पुमान्भुंक्तेऽक्षभिर्गुणान्
५ सखाय इंद्रियगणा ज्ञानं कर्म च यत्कृतं सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः ६ बृहद्
बलं मनो विद्यादुभयेंद्रियनायकं पंचालाः पंच विषया यन्मध्ये नवखं पुरं ७ अक्षिणी नासि
के कर्णौ मुखं शिश्नगुदाविति द्वे द्वे द्वारौ वहिर्याति यस्तदिंद्रियसंयुतः ८ अक्षिणी नासिके
आस्यमिति पंच पुरः कृताः दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ९

पंचवृत्तित्वात्पंचशिराः सर्प इव प्राणः ६ एकादशमहाभटइत्यनेनैकादशो महाभटो नायक इत्युक्तं संदर्शयति वृ
हद्बलं यस्य तन्मनः नवखानि द्वाराणि यस्य ७ द्युमत्सखइत्यादेरर्थं संक्षेपेणाह यस्तदिंद्रियसंयुतः स आत्मा ताभि
र्बहिर्विहियातीति ८ पुरः पूर्वभागे कृताः ९

रूपं विभ्राजितं ... चष्टे चक्षुषेश्वरः ।

भा०च० नेत्रे इति रूपमिति चक्षुषेति वैद्योतादीनां व्याख्यानं शेषानुवादः ईश्वरः पुरंजनः १० नागेइ इति व्याख्या अवधु
नो तीत्यवधूतो वायुः नदानभेकनो ग्रासनसहे कस्थानत्वात् घ्राणा इव धूतः आस्यमिति व्याख्या रसज्ञ विप नें १
णा विनइत्यत्र रसज्ञेशब्दनिर्दिष्टस्य रसविदित्यनुवादः रसइ इति व्याख्या रसौन्द्रियमित्यर्थः विपणावागरस
विद्रसः इत्येवपाठः आर्षत्वान्न दोषः ११ अधः अन्ने १२ १३ ग्रामकमित्यस्यानुवादः ग्रामिणांरतिरिति न

पश्चिमेइत्यधोद्वारोगुदं शिश्नमिहोच्यते खद्योता विर्मुखी नाम्न्ये नेत्रे एकत्र विनिर्मिते ११ न
लिनी नालिनी नासे गंधः सौरभ उच्यते घ्राणोवधूतो मुखं चास्य विपणो वाग्रसविद्रसः ११ आपणो
व्यवहारोऽत्र चित्रमंधो बहूदनं पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः १२ प्रवृत्तं च निवृत्तं च शास्त्रं प
चालसंज्ञितं पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् १३ आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां
रतिः उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते १४ वैशसं नरकं पायुर्लुब्धकोऽधौ तु मे शृणु ह
स्तपादौ पुमानाभ्यां युक्तो याति करोति च १५ अंतःपुरं हृदयं विषूचिर्मन उच्यते तत्र मोहं प्रसा
दं वा हर्षं प्राप्नोति तद्गुणैः १६ यथा यथा विक्रियते गुणाक्तो विकरोति वा तथा तथोपद्रष्टात्मा तद्वृ
त्तीरनुकार्यते १७

गु
स्य आख्याव्यया इति १४ १५ विषूचीनपदार्थानुवादो विषूचिरिति तद्गुणो मनोगुणैः स्तामः सत्वरजोभि राम
सं२ १६ महिषीयच्छद्दोहे नत्पादेरर्थं गृह्णाह यथा यथा बुद्धिः स्वप्ने विक्रियते जायते विक्रियते जाग्रति
विकरोति वा इंद्रियाणि मयति तस्या गुणैः रक्तो लिप्त आत्मा तथा तथा तस्याः वृत्तीः दर्शनस्पर्शना च०३
द्याः केवलमुपद्रष्टैव सन् बलादनुकार्यते १७

परिणा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशुगमित्येतद्व्याचष्टे संवत्सरे स्यैवाप्रतिहतो रयो वेगः प्रतीतिनो यस्य स संवत्सररयः वक्रत्वादगतिः स्वप्नश
रीरादौ बुद्धौ वा विचित्रत्वेन देशान्तरगत्यभावात् पाठान्तरे संवत्सर आगन्तव्यं यस्य आ नाभावगतिर्यस्य
ति द्विकर्मेत्यस्य व्याख्या नारदेन कृता द्विचक्रे मित्यस्य व्याख्या द्विकर्मचक्र इति त्रिगुणध्वज इति
त्रिवेणुपदव्याख्या १८ पंचप्रहरणमित्येतद्व्याचष्टे पंचेंद्रियार्थप्रक्षेप इति १९ पंचेंद्रियैः सूनाविनोद

गंधर्वा

देहो रथस्त्विंद्रियाश्वः संवत्सररयोऽगतिः द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः १८ मनोर
श्मिर्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः १९ आकूतिर्विक्र
मो बाह्यो मृगतृष्णां प्रधावति एकादशेंद्रियचमूः पंचसूनाविनोदकृत् संवत्सरश्चंडवेगः
कालो येनोपलक्षितः २० तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः स्मृताः हरंत्यायुः परिक्रांत्या षष्ट्युत्तर
८२ शतत्रयं २१ कालकन्या जरा साक्षाल्लोकस्तां नाभिनंदति स्वसारं जगृहे मृत्युः क्षयाय यवने
श्वरः २२ आधयो व्याधयस्तस्य सैनिका यवनाश्चराः भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्व
रः २३ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः २४

परिचरा

मिवान्वीयन विषयेषु सेवां करोतीति पंचसूनाविनोदकृत् अनेनैव च ऽरमृगयामित्यादि व्याख्यातं २० परि
क्रांत्या परिभ्रमणेन २१ भगिनीत्वेन जगृहे लोकानां क्षयाय २२ चराः संचारिणः भूतानामुपसर्गपीडायामाशु
शीघ्रा मृत्युहेतुः रयो वेगो यस्य प्रज्वारस्येति प्रशस्त व्याख्या पाठान्तरे भूतावेका आरपः अनेनैव अरि भिन्नपतद्
इत्यादिपदं व्याख्यातं द्विविधः शीतोष्णरूपेण प्रवेशनिर्गमभेदात् २३ एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वं
कथातात्पर्यमाह एवमित्यादि विरमत्क्रमेणेत्यनेन आधिदैविकादिभिर्दुःखैः क्लिश्यमानामाह मिति दि

पु२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०६० अशनापिपासादीन् प्राणधर्मान् श्रवणादीनिन्द्रियधर्मान् कामादीन् मनोधर्मांश्च निर्गुणोऽप्यात्मन्यध्यस्य कामलवान् वि
षयसुखलेशान् ध्यायन् कर्मकृत् २५ ततः किमत आह यदेति द्वाभ्यां स्वदृक् स्वप्रकाशस्वभावोऽपि २६ शुक्लः सात्त्विकं
तथा २ कृष्णं तामसं लोहितं राजसं यथाकर्म जायते २७ तदेवाह शुक्लादिति द्वाभ्यां प्रकाशभूयिष्ठायेषु दुःखमुदर्के उत्तरं
फलं येषु क्रियया आयासो येषु तान् लोहितान् तमः शोकोत्कटो येषु तान् कृष्णादीनिति ज्ञेयं २८ नोभयं नपुंसके यथा

प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः शेते कामलवान् ध्यायन् ममाहमिति कर्मकृत् २५ यदा
त्मानमविज्ञाय भगवंतं परं गुरुं पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् २६ गुणाभिमानी स तदा
कर्माणि कुरुतेऽवशः शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते २७ शुक्लात्प्रकाशभूयिष्ठाँल्लो
कानाप्नोति कर्हिचित् दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान् क्वचित् २८ क्वचित्सुमानुषे
१८४ चित्रस्त्रीः क्वचिन्नो भयमेधधीः देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः २९ क्षुत्परीतो यथा दीनः
सारमेयो गृहं गृहं चरन्विंदति यद्दिष्टं दंडमोदनमेव वा ३० तथा कामाशयो जीव उच्चावचपथा भ्रम
न् उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ३१ दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु जीवस्य न
व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया ३२ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् तं स्कंधेन स आधत्ते त
था सर्वाः प्रतिक्रियाः ३३

रव१ कर्मगुणं कर्मगुणाननतिक्रम्य। २९ तेषु देववशेन सुखदुःखस्य प्राप्तिरिति सदृष्टान्तं प्राह द्वाभ्यां क्षुधा परीतो व्याप्तः राम
सारमेयः श्वा दंडं दंडेन ताडनं ३० कामव्याप्त आशयो यस्य। ३१ ननु तर्हि सुखस्य संभवात् दुःखस्य च प्रतीकार १८४
संभवान्न कोऽपि तापो हेय इत्यत आह दुःखेष्विति दुःखप्रतीकारस्यापि नास्ति स्याच्चेत्तस्य तस्य प्रतिक्रिया तथा दुःख
विविधेषु दुःखेषु मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति ३२ प्रतिक्रियाणामपि दुःखरूपत्वादिति स
दृष्टान्तमाह यथा हीति ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःखस्य मूलभूतानि तु कर्माणि प्रतिक्रियादि कर्मभिर्नैव निवर्त्तन्त इत्याह नैकान्तत इति । अयंतं सवासनं केवलं ज्ञानर-
हितं अविद्ययाऽपसृतं प्राप्तं । अतोऽविरोधान्न निवर्त्यं निवर्तकं वेति भावः । अत्र दृष्टांतः स्वप्नदृष्टौ प्रबोधं वि-
ना यथा तत्स्वप्नमत्यंतं न प्रतिकरोतीत्यर्थः । ३४ ननु तर्हि अज्ञानविलसितत्वेन संसृतिहेतोर्देहादेरप्यसत्वात्किं
तन्निवर्तनप्रयासेन तत्राह तर्ह्येवेति लिंगरूपेण उपाधिभूतेन ३५ तदेवं संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकार-
माह अथ तस्मात्पुरुषार्थभूतस्य आत्मनः यतो ज्ञानात्मनमोवा अनर्थपरंपरानुपासंसृतिर्भवति तस्यव्य-

नैकांततः प्रतीकारः कर्मणां कर्म केवलं द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ । ३४ अर्थे ह्यविद्यमा-
नेऽपि संसृतिर्न निवर्तते मनसा लिंगरूपेण स्वप्ने विचरतो यथा ३५ अथात्मनोऽर्थभूतस्य यतो
नर्थपरंपरा संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ३६ वासुदेवे भगवति भक्तियोगः
समाहितः सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ३७ सोऽचिरादेव राजर्षे स्यादच्युतक-
थाश्रयः शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः ३८ यत्र भागवता राजन् साधवो वि-
स्मा १ शदाशयाः भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ३९ तस्मिन्महन्मुखरिता मधुभिच्च-
रित्रपीयूषशेषसरितः परितः स्रवंति ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशो-
कमोहाः ४०

निव जि १ व्यवच्छेदो गुरुरूपवासुदेवभक्त्यैव ३६ ननु संसृतिर्वैराग्यपूर्वकात् ज्ञानादेव न तु भ[illegible] तरति शोकमात्मविदित्या-
दिश्रुतेः तत्राह वासुदेव इति सध्रीचीनेन समीचीनेन प्रकारेण ३७ नन्वसौ महाफलो भक्तियोगः कथं स्यात्
तत्राह सऽचिरादच्युतस्य कथमाश्रित्य वर्तमानो चिरात्स्यात् कस्य स्यात्तदाह शृण्वतः अधीयानस्य च ३८ कु-
तु २ त्र स्यात्तदाह यत्रेति भगवतो गुणानां कथनं श्रवणं च व्यग्रं व्यवहारे चेतो येषां ते ३९ ननु साधुसंगं विना स्वयमेव हरिकथा-
तार चिंतादिना भक्तिर्भविष्यत्यात्राह द्वाभ्यां तस्मिन्स्थाने महद्भिर्मुखरिताः कीर्तिताः मधुभिदश्चरित्रमेव पीयूषं तदेव
शिष्यत इति शेषाः तासु अशेषरीत्या हि तत्र शुद्धाम्बुते वाहिन्य इत्यर्थः अवितृषः अलंबुद्धिरहिताः संतः गाढैः सावधानैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च०

सत्संगमंतरेण स्वयमेव कथा चित्तेनाहो वालस्यादिना रसोवशाभावाच्च क्षुत्पिपासादिभिभूतस्य भक्तिर्न संभवतीत्याह
एतैरिति ४१ भगवदनुग्रहमंतरेण तु न कस्यापि ज्ञानसंभव इति किमुतान्यायेनाह च[illegible]तुर्भिः प्रजापतिपतिर्ब्रह्मा ४२ मु पति २
ह्वेत्यहं [illegible]नारदो ये ते येषां ते ४३ वाचांपतयोऽपि तपोविद्यासमाधिभिरुपायैः पश्यंतो विचिन्वंतोऽपि पश्यंतं सर्व
साक्षिणं न पश्यंति ४४ कुत इत्यत आह शब्दब्रह्मणि वेदे उरुविस्तारो यस्य अर्थतोऽपि पारशून्ये तस्मिन् वर्तमानाः

एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः । न करोति हरेर्नूनं कथामृतनिधौ रतिं ४१ प्रजाप
तिपतिः साक्षाद्भगवान् गिरिशो मनुः । दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः ४२ मरी
चिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः । भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः ४३ अद्यापि
वाचस्पतयस्तपोविद्यासमाधिभिः । पश्यंतोऽपि न पश्यंति पश्यंतं परमेश्वरं ४४ शब्दब्रह्म
णि दुष्पारे चरंत उरुविस्तरे । मंत्रलिंगैर्व्यवच्छिन्नं भजंतो न विदुः परं ४५ यदा यस्यानुगृह्णा
ति भगवानात्मभावितः । स जहाति मतिं लोके वेदे च परिनिष्ठितां ४६ तस्मात्कर्मसु बर्हिष्मन्न
ज्ञानादर्थकाशिषु । मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४७

मंत्राणां लिंगैर्वज्रहस्तत्वादिगुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिच्छिन्नमेवेंद्रादिरूपं तत्तत्कर्माग्रहेण राम यद्रा २
भजंतः परं परमेश्वरं न विदुः ४५ तर्ह्यन्यः को नाम कर्माग्रहं हित्वा परमेश्वरमेव भजेदत आह यदेति अनुगृ
ह्णाति अनुग्रहहेतुः आत्मनि भावितः सन् सः तदा लौकिके व्यवहारे वेदे च कर्ममार्गे परि[illegible] निष्ठितां म लो २
तिं त्यजति ४६ अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु पुरुषार्थबुद्धिं कृथाः प्रचुरो नायकवत् श्रोत्र
प्रियेषु न स्पृष्टं वस्तु यैः ४७

मा १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणि तद्वादिनो वदंति कथमस्पष्टवक्तृत्वमित्युच्यते तत्राह ये धूम्रधियाम
लिनबुद्धयः सकर्मकं कर्मपरं वेदमाहुस्ते अतद्विदः अवेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकमात्मतत्त्वं वेदता
त्पर्यगोचरं न विदुः यत्र देवोस्ति ४८ त्वं तु महामूर्ख इत्याह आस्तीर्येति बृहद्वधात् बहुपशुवधात् मानी म
हायज्वाहमित्यहंकारी अत एव स्तब्धः अविनीतः सन् कर्म नावैषि परं विद्यास्वरूपं तच्च न वेत्सि नारदः स्वयंके

२२

स्वं लोकं न विदुस्ते वै यत्र देवो जनार्दनः । आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥ ४८
आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं । स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्
परं । तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्यया ॥ ४९ हरिर्देहभृतामात्मा स्वयं प्रकृति
रीश्वरः । तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५० स वै प्रियतम आत्मा यतो न भयम
ण्वपि । इति वेद स वै विद्वान्यो विद्वान्स गुरुर्हरिः ॥ ५१ नारद उवाच । प्रश्न एवं हि संछि
न्नो भवतः पुरुषर्षभ । अत्र मे वदतो गुह्यं निशामय सुनिश्चितं ॥ ५२ श्रीराम श्रीराम

परं तत्त्वं यन्निरूपयति हरितोषयतीति हरितोषं यत्तदेव कर्म यया तस्मिन् हरौ मतिर्भवति सैव विद्या महा
फलत्वात् ४९ कुत इत्यपेक्षायां हरेः परमफलत्वं [illegible] दर्शयन्नाह हरिरिति देहभृतामात्मा ईश्वरश्च तत्र हे
तुः स्वयं स्वातंत्र्येण प्रकृतिः कारणं अतस्तस्य पादमूलमेव शरणं आश्रयः यतः यस्मिन् ५० न च तद्भजने अ
न्यभजनवद्दुःखं भयं चेत्याह स इति यो वेद स एव विद्वान् स गुरुरेव हरिश्च ५१ उक्तमुपसंहरति एवं भवतः प्र
श्नः संछिन्नः परिहृतः तदेवमात्मनो बंधमोक्षप्रकारं कथारूपेण कथितेपि नातिनिर्विण्णं चित्तं पुत्रागम
नं प्रतीक्षमाणं सत्क्षणमेव महाभयकंपितसकलगात्रं गेहान्निर्वासयितुं हरिणरूपकमाह अत्रेति वद

ना२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च०

क्षुद्रमल्पं चरतीति तत्तथा तं अलुकं सुमनसां पुष्पाणां शरणे आश्रमे वाटिकायां मिथित्वा मिथः परस्परं स्त्रि
यासह मिलित्वा तत्रैव रक्तं आसक्तं षडंघ्रयो भ्रमरास्तेषां गणाः तेषां सामसु गीतेषु लुब्धः कर्णो यस्य तं प
रेषां असुभिः प्राणैः तृप्यन्तीत्यसुतृपः तान् विगणय्य अगणयित्वा लुब्धकस्य बाणेन भिन्नं मृ
गं पाऽऽमृगयाऽन्वेषय ५३ श्लोकं प्रस्तोत योजयन् व्याचष्टे. सुमनोभिः समानो धर्मः परिणामे विरस
त्वं यासां स्त्रीणां मिथित्वेत्यस्य व्याख्या मिथुनीभूय स्त्रीभिः सहेति शेषः रक्तमित्यस्य व्याख्या तत्त्वभि

क्षुद्रं चरं सुमनसां शरणे मिथित्वा रक्तं षडंघ्रिगणसामसु लुब्धकर्णं अग्रे वृकानसुतृपोऽविग
णय्य यांतं पृष्ठे मृगं मृगय लुब्धकबाणभिन्नं ५३ क्षुद्रं सुमनःसमधर्मणां स्त्रीणां शरणआश्र
मे पुष्पमधुगंधवत् क्षुद्रतमं काम्यकर्मविपाकजं कामसुखलवं जैव्योपस्थादि विचिन्वंतं मिथु
नीभूय तदभिनिवेशितमनसं षडंघ्रिगणसामगीतवदतिमनोहरेषु वनितादिजनालापेष्वति
तरामतिप्रलोभितकर्णमग्रे वृकयूथवदात्मन आयुर्हरतोऽहोरात्रान्तान् कालविशेषानविगण
य्य गृहेषु विहरंतं पृष्ठत एव परोक्षमनुप्रवृत्तो लुब्धकः कृतांतोंतःशरेण यमिह पराविध्यति
तमिममात्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसीति ५४ सत्वं विचक्ष्व मृगचेष्टितमात्मनों
तश्चित्तं नियच्छ हृदि कर्णधुनीं च चित्ते जह्यंगनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं वि
रम क्रमेण ५५

निवेशितं मनो येन असुतृप इत्यस्य व्याख्या आयुर्हरत इति यांतमित्यस्य व्याख्या विहरंतमिति अंतः नालिका
यां गूढेन शरेण पराविध्यति दूरादेव नाशयति ५४ उपदेशसारमाह सइति विचक्ष्व विचारय अंतर्हृदि वि
लेकर्णयोः धुनीं नदीमिव बहिर्वृत्तिं चित्ते नियच्छ एतच्च सर्वं क्रियापदलक्षणार्थं गृहाश्रमं च जहि कीदृशं
असत्तमानां आत्मिकामुकानां यानि यूथानि तेषां गाथा वार्ता यस्मिन् जीवानां शरणमीश्वरं एवं क्रमेण सर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथानंतरं प्रस्तुतं पूर्वोक्तमर्थमनुवदति आत्मन्व्यवसितं विचारितं ब्रह्मन् हे नारद एतत्तु बर्हिषः कर्मासक्तेरुपाध्यायाः ये मम
द्र २ कर्मोपदेष्टारः आचार्यास्ते न जानंति ५६ अनवगते तैरुपाध्यायैः तेषां वाक्यविरोधेनात्मबुद्धेः संभावनात्तेषाम् ७२
हानु संशयः संछिन्नस्त्वया अत्र तु कश्चित्संशयावर्तते यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति ५७ संशयमाह द्वाभ्यां
कर्माणि येन देहेन करोति तमेव विहाय अमुत्र लोकांतरे कर्मोपस्थापितेनान्येन देहेन जुष्टानि उपभुक्तानि
निजीवोऽश्नुते प्राप्नोति ५८ इति वादः श्रूयते सोऽपि पुण्यकृतां लोकान्निति शरीरजैः कर्मदोषैर्याति स्थावरतां जै दे १
श्री १ नरः इति त्वया चोक्तेः शास्त्रतरनुभूयानि मिति एतच्च विकल्पं च भोक्तृदेहेन कृतनाशः कृताभ्यागमप्रसंगान्न संग

राजोवाच आत्मन्व्यवसितं ब्रह्मन् भगवान् यदभाषत नैतज्जानंत्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि ५६ प १
संशयोऽत्र तु मे विप्र संछिन्नस्तत्कृतो महान् ऋषयोऽपि हि मुह्यंति यत्र नेंद्रियवृत्तयः ५७ कर्माण्या
रभते येन पुमानिह विहाय तं अमुत्रान्येन देहेन जुष्टानि स यदश्नुते ५८ इति वेदविदां वादः श्रू
यते तत्र तत्र ह कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ५९ श्रीनारद उवाच येनैवारभते कर्म तेनै
वामुत्र तत्पुमान् भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं ६० शयानमिममुत्सृज्य श्वसंतं पुरुषो
यथा कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ६१

च्छत इति भावः संशयांतरमाह प्रोक्तं वेदांते कर्म क्रियते येन जनेन तज्ज्ञानं तत्क्षणादेव परोक्षं अदृष्टं सन्न प्रकाशते
अतः कर्मणो नष्टत्वान्नउपभोगोऽपि दुर्घट इति भावः ५९ प्रथमस्योत्तरं येनैवेति अव्यवधानेन कर्तृभोक्तृदेहविच्छेदं
विना स्थूलदेहनाशेऽपि मनःप्रधानस्य लिंगदेहस्यानाशान्न कोऽपि दोषप्रसंग इत्यर्थः ६० लिंगदेहविशिष्टस्य भो
क्तृत्वं स्वप्नदृष्टांतेन स्पष्टयति शयानमिमं जाग्रद्देहं श्वसंतं जीवंतं उत्सृज्य तदभिमानं त्यक्त्वा आत्मनि मन
सि संस्काररूपेणाहितं कर्म यथा भुंक्ते तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन देहेनान्येन वा पश्वादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च

ननुभवतु नाम लिंगविशिष्टस्यानेन दृष्टं तेन भोक्तृत्वं कर्तृत्वं गुरुदानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते
तत्राह ममैते पुत्रादयः असावहं ब्राह्मण इति ब्रुवन् मनसा पद्यद्गृहं गृह्णीयात्त नो देहो द्राङ् सिद्धं कर्म पु
मान् गृह्णीयात् येन कर्मणा एवमहंकारगृहीतेन पुनर्भवो भवति अन्यथा जन्मानुपपत्तेः अतो अभिमंतु
र्मनो विशिष्टस्यैव कर्तृत्वं अभिमानविषयस्य तु देहस्य पुत्रादिदेहवत् द्वारमात्रत्वमिति भावः ६२ यदुक्तं क
र्मणो नष्टत्वान्नामुत्रभोग इति तत्राह यथेति उभयैर्ज्ञानकर्मेन्द्रियैरिन्द्रियाणामीहितैः कदाचित्कर्मप्रवृत्तिभि
श्चित्तमनुमीयते सत्स्वपि सर्वेन्द्रियविषयसंबंधे युगपज्ज्ञानानुत्पत्तेः तदुक्तं अक्षपादेन युगपज्ज्ञानानुत्प

मैमैते मनसा यद्यदसावहमिति ब्रुवन् गृह्णीयात्तत्पुमान्राद्धं कर्म येन पुनर्भवः ६२ यथा
नुमीयते चित्तमुभयैरिन्द्रियेहितैः एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः ६३ नानुभूतं क्व चा
नेन देहेनादृष्टमश्रुतं कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि ६४ तेनास्य तादृशं राजन् लिंगि
नो देहसंभवं श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति ६५ मन एव मनुष्यस्य पूर्वरूपाणि शं
सति भविष्यतश्च भद्रं ते तथैव न भविष्यतः ६६

त्तिर्मनसो लिंगमिति एवं चित्तवृत्तिभिरपि पूर्वदेहजं कर्म लक्ष्यते तासामपि युगपदनुत्पत्तेः ६३ इतोपि कर्म लक्ष्य
त इत्याह नानुभूतमिति द्वाभ्यां अनेन वर्तमानेन देहेन कचित्कुत्र चिदपि यन्नानुभूतं अनुपभुक्तं अदृष्टं चाश्रु
तं चोपयुक्तं पूर्वदात्मकपाद्दकृत्यस्वकारं एतत्कदाचित्स्वप्नमनोरथादिषु आत्मनि मनसि लभ्येत ६४ तेन हेतुना
अस्य लिंगिनो वासनाश्रयस्य जीवस्य तादृशं तदनुभवादियुक्तं पूर्वदेहसंभवं श्रद्धत्स्व निश्चयेन मन्यस्व
न ह्यननुभूतोऽर्थो मनः स्प्रष्टुं मनसि स्फुरितुमर्हति ६५ किंच मनोरथैरेव पूर्वापराणि शुभाशुभनिमित्तानि
शरीराणि ज्ञायंत इत्याह मन एवेति भद्रं त इति सम्यगवधानार्थमाशिषाभिनंदति भविष्यतो ऽकल्प्यमाणस्य

८७

अननुभूतं २

नव ३

उप ३

नभविष्यतः नैवंत्वं शास्त्रतोऽपि भावीनि रूपाणि शंसति
मन एवोदार्यकार्पण्यादिवृत्तिभिः पूर्वमप्येवमेव भविष्यतीति
ज्ञापयतीत्यर्थः ६६

आसपश्याद्दृष्टेवेमेव १

राम

८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः दिवा नक्षत्राणि स्वशिरश्छेद इत्यादि तत्राह अदृ
ष्टमिति अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे निशाश्रयं नक्षत्रादिकं दिवा अभ्यंगादिक्रियाश्रयं स्वशिरश्छेद
नाश्रयं निद्रादिदोषेण हि प्रतीयत इत्यनुमंतव्यं परस्यापि तदनुपपत्तेरुत्कल्पत्वादिति भावः ६७ ननु दरिद्र
के चिदात्मानं महाराजं पश्यति राजा वरं कं आत्मानं पश्यति तत्कथं असंभावितं संगच्छते तत्राह सर्वइति आया
ति भोग्यत्वेन प्राप्नुवंति यांति च भोगानंतरं यदि च कश्चिद् मना भवतु तर्हि चेन्न स्यात् नत्वेवं दरसीत्याह सर्वे स
मनस इति अतः सर्वेषां मनस्कत्वान्मनसि च सर्वार्थानां क्रमेण प्रवेशान्मोत्पत्तिः दृष्टचरः कस्यापि कश्चिदर्थोऽ

अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते । यथा तथानुमंतव्यं देशकालक्रियाश्रयं ६७ सर्वे क्रमानुरोधे
न मनसींद्रियगोचराः । आयांति वर्गशोऽपायांति सर्वे समनसो जनाः ६८ सत्त्वैकनिष्ठे मनसि भगव
त्पार्श्ववर्तिनि । तमश्चंद्रमसीवेदमुपरज्यावभासते ६९ नाहं ममेति भावोऽयं पुरुषे व्यवधीयते
यावद्बुद्धिमनोक्षार्थगुणव्यूहो ह्यनादिमान् ७०

सोऽत्यर्थः ६८ तदेवं सर्वैरपि सर्वेऽर्थाः क्रमेण दृश्यंत इत्युक्तं इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्या
ह सत्त्वैकनिष्ठे भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसि इदं विश्वं तमः उपरज्यं संयोगमिव प्राप्यावभासं प्र
तीत्पूनर्हस्यापि कदाचित्प्रतीतौ दृष्टांतः चंद्रमसि तमः उपरज्यत मः राहुरिव तद्धि इदं शुद्धे मनसि सर्वे विषयस्फु
रणं योगिप्रत्यक्षमिति प्रसिद्धं ६९ तदेवं [illegible] स्थूलदेहनाशेपि लिंगस्यानाशाद्द्वन्यः कर्तान्यो भोक्तेति नास्ति
त्युक्तं तत्रैवं शंकेत ननु लिंगदेहस्य स्थूलदेहद्वारेणैव कर्तृत्वभोक्तृत्वे न तु केवलस्य तत्र कदाचित्स्थूलदे
हाभावे जीवस्य कर्तृत्वभोक्तृत्वाभावान्मुक्तिः प्रसज्येत तत्राह अहं ममेति भावः स्थूलदेहसंबंधः पुरुषे जी
वेन विच्छिन्नो भवति किं पर्यंतं तु आहीनो व्यूहः परिणामो लिंगं यावदस्ति अनादिमान् अनादिः सन् ७०

नव्यवधीयते

ते

देह ५ दोषे ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० च

असंप्रज्ञात

स्वापादावहंकाराद्यभावान्नविच्छेद इत्याशंक्याह द्वाभ्यां सुषुप्त्यादिषु उपतापइष्टवियोगादि दुःखेनेषु अहमितिज्ञानं ग
अहंकारः नेहेतनप्रकाशते प्राणान्वितनानाइंद्रियाणांविघातात् इंद्रियेरिंदकारास्यदेवस्य ग्रहणाद्धहंकारस्यु
रतिनान्वयेत्यर्थः ७१ अपोपक्षत्वात्तुप्राणायुतनानामितिशेषः यूनस्तारुण्यस्य पदे कादशविध एकादशेंद्रियैः स्पु
टं लिंगमहंकरणेन न दृश्यते गर्भादौ इतिशेषः सतोऽप्यनभिव्यक्तौ दृष्टांतः कुहूकामावास्यायांचंद्रमसो लि
गंरूपमिव ७२ तस्मादहंकारास्य स्थूलदेहस्याविच्छेदस्याभ्यतथोभावेऽपिसंसृतिनिवृत्तिर्नोक्तेत्याह अर्थे दा०

सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः नेहतेऽहमितिज्ञानं मत्स्युप्रज्वारयोरपि ७१ गर्भेवाल्येऽप्य
पोषकत्वादेकादशविधं तदा लिंगं न दृश्यते यूनः कुह्वां चंद्रमसो यथा ७२ अर्थेह्यविद्यमानेपि संसृ
तिर्ने निवर्त्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ७३ एवं पंचविधं लिंगं त्रिवृत्षोडशविस्तृतं
९८ एष चेतनया युक्तो जीव इत्यभिधीयते ७४ अनेन पुरुषो देहानुपादत्ते विमुंचति हर्षं शोकं भयं दुःखं सु
खं वानेन निंदति ७५ यथा तृणजलूकेयं नापयात्यपयाति च नत्यंजन्म्रियमाणोपि प्राग्देहाभि
मतिं जनः यावदन्यं न विंदेत व्यवधानेन कर्मणा ७६ मन एव मनुष्येन्द्र भूतानां भवभावनं ७७

हीति ७३ यावल्लिंगस्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपंचयति एवमिति सोऽर्द्धैस्त्रिभिः पंचविधं
पंचतन्मात्रात्मकं त्रिवृतं त्रिगुणं षोडशविकारात्मना विस्तृतं ७४ ७५ नन्वेकं देहं विसृज्य देहांतरप्रवेशा राम
त्पूर्वं मे देहनाशाद्वैतत्स्य तत्राह यथेति नापयाति पूर्वतृणस्थात्त्यागादपयाति च नत्तृणांतरधारणात् तथा ९८
नत्यजेत् ७६ अन्यं देहं कर्मणा आरब्धं देहारंभकाणां व्यवधानेन विच्छेदेन समाप्त्या ७६ प्रकरणार्थमुपसंहरति
मन एवेति भवभावनं संसारहेतुः ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं सति तदाह यदेति । चरितानुरूपभुक्तानुपतः कर्मणि सति तत्त्वसंगस्य कुतः कर्मेत्यत्राह अविद्यायां सत्यां अ
नात्मनो देहादेः कर्मणि बंधो भवति ७८ विश्वस्थित्यादयो यतो हरेर्भवति ७९ हंसयोर्जीवेश्वरयोः ८० पुत्राना
दिश्य तिपुत्राणां मादेशं मंत्रिणां मंत्रं कथयित्वा ८१ ८२ आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदं ९३

यदा क्षेत्र्यरितानुध्यायन्कर्माण्याचिनुते सकृत् । सति कर्मण्यविद्यायां बंधः कर्मण्यनात्मनः ७८
२१ अस्मात्तत्पश्यहार्थं भज सर्वात्मना हरिं । पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्यया यतः ७९ मैत्रेय उवाच ९२
भागवतमुख्यो भगवान्नारदो हंसयोर्गतिं । प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततोऽगमत् ८० प्राची
नर्बर्हीराजर्षिः प्रजासर्गाभिरक्षणे । आदिश्य पुत्रानगमत्तपसे कपिलाश्रमं ८१ तत्रैकाग्र
मना वीरो गोविंदचरणांबुजं । विमुक्तसंगोनुभजन्भक्त्या तत्साम्यतामगात् ८२ एतदध्यात्म
पारोक्ष्यं गीतं देवर्षिणानघ । यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ८३ एतन्मुकुंदयश
सा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचं । यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं ना
स्मिन्भवे भ्रमति मुक्तसमस्तबंधः ८४ अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतं । एवं स्त्रियाश्र
मः पुंसश्छिन्नोऽमुत्र च संशयः ८५ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकोनत्रिंशोऽध्यायः

८४ स्त्रीबुद्धिरात्मसहितस्याश्रमोऽहंकारः छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशयश्छिन्नः ८५
चतुर्थ एकोनत्रिंशः

श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० प्रसंगात्पंचभिः प्रोक्तं वृत्तं प्राचीनवर्हिषः वर्ण्यते च पुनर्द्वाभ्यां प्रस्तुतं तत्प्रचेतसां तत्र त्रिंशे तपस्तोष्टादिशात्स्तुधं
वुरासतः अ[?]ागत्य वार्क्षीमुद्वाह्य राज्यं चक्रुरिति ॥ यैः हरिं प्रतोष्य कां सिद्धिमापुः १ हे वार्हस्पत्य कस्यां विदिधा
याद्वृहस्पते मैत्रेयः शिष्य इति ज्ञातव्यं तेयदृच्छया गिरिशं प्राप्य तेस्य वै केवल्यनाथ प्रियस्य गिरिशस्य पार्श्व
वर्तिनस्तदनुगृहीताः संतो नूनं परं मोक्षं प्रापुरेव तत्राः पूर्वं तु इह अथवा परत्र किं प्रापुः २ रुद्रगीतजपन्
पाण्यज्ञेन तत्तपसा च पुरंजनं हरिं ३ तेषां कृच्छ्रं तपः क्लेशं रुचा कांत्या शमयन् शांतेन सत्वेन वपुषा आवि

विदुर उवाच यत्त्वयाभिहिता ब्रह्मन् सुताः प्राचीनवर्हिषः ते रुद्रगीतेन हरिं सिद्धिमापुः प्रपूर्य कां १ किं नो०
वार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्तिनः आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नू
नमथ प्रचेतसः २ श्रीमैत्रेय उवाच प्रचेतसोंतरुदधौ पितुरादेशकारिणः जपयज्ञेन तपसा पुरंज
नमतोषयन् ३ दशवर्षसहस्रांते पुरुषस्तु सनातनः तेषामाविरभूत्कृच्छ्रं शांतेन शमयन् रुचा
४ सुपर्णस्कंधमारूढो मेरुश्रृंगमिवांबुदः पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ५ काशि
ष्णुना कनकवर्णा विभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः अष्टायुधैरनुचरैर्मुनिभिः
सुरेन्द्रैरासेवितो गरुडकिंनरगीतकीर्तिः ६ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्द्धच्छ्रियापरि
वृतो वनमालयाद्यः वर्हिष्मतः पुरुष आह सुतान् प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः ७

२८ भृतः ४ सुपर्णस्कंधमारूढ इत्यादीनां वर्हिष्मतः सुतानाहेति तृतीयेनान्वयः ५ कनकमयेन वर्णवता विभूषणेन राम
भ्राजमानौ कपोलौ वदनं यस्य अष्टभिरायुधैः गरुडएव किंनरः तेन पक्षस्वनैर्गीता कीर्तिर्यस्य ६ पीनाश्च ते आ २८९
यताश्चाष्टौ भुजास्तेषां मंडलं समूहः तन्मध्यस्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शोभा यस्याः तया वनमालया
परिवृत आद्यः पुरुष आह पर्जन्यस्य नाद इव रुतं नादो यस्यास्तया वाचा सघृणो अवलोको यस्य ७

२८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वरं ।

यूयं मे नृपनंदना इत्यन्वयः सौहार्देन हेतुना अपृथक् धर्मो येषां ते च ते यूयं च अपृथग्धर्माणः परस्परं सौहृदेन तुष्टोऽहं ८ भ्रातृषु सौहृदं च भविष्यति ।
तेभ्यो दास्ये किं पुनः युष्मभ्यमिति शेषः १० अग्रहीष्ट गृहीतवंतः अथो उशती कीर्तिः लोकाननु लोकेषु भविष्यति यद्वा लोका
ननुभविष्यति द्रक्ष्यति व्याप्स्यतीत्यर्थः ११ आत्मनो वीर्येण संतानेन १२ पुत्रार्थं आदौ भार्यां संपादयति कंडोरिति त्रि
भिः तपो नाशार्थं इंद्रप्रेषितया प्रम्लोचया कंडुर्नाम ऋषिः बहुकालं रेमे सा च गता । स्वर्गं गच्छंती कंडोर्जातं गर्भं त्य

श्रीभगवानुवाच वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः सौहार्देनापृथक् धर्मास्तुष्टोऽहं सौहृदेन वः ८
योऽनुस्मरति संध्यायां युष्मानमनुदिनं नरः तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ९ ये तु मां रुद्रगीते
न सायं प्रातः समाहिताः स्तुवंत्यहं कामवरान् दास्ये प्रज्ञां च शोभनां १० यद्यूयं पितुरादेशमग्रहीष्ट मु

वि ४

दान्विताः अथो व उशती कीर्तिर्लोकाननुभविष्यति ११ भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः य एता
मात्मवीर्येण त्रिलोकीं पूरयिष्यति १२ कंडोः प्रम्लोचया लब्धा कन्या कमललोचना तां चापविद्धां
जगृहुर्भूरुहा नृपनंदनाः १३ क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीं देशिनीं रोदमानाया
निदधे स दयान्वितः १४ प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता तत्र कन्यां वरारोहां तामुद्वहत
माचिरं १५ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया १६

क्त्वा उत्पन्ना जगाम तदेतदुक्तं अपविद्धां त्यक्तां १३ सप्रसिद्धो वनस्पतीनां राजा सोमः अमृतस्राविणीं देशिनीं अंगुलीं नर्तनी
त्यास्यामुखे निदधे अनेन नाशेरा गर्भसंभवो नाम्नता हारेण च तस्याः लावण्यं लोकमस्वेदतां गंध्यादि च हितत्वं चोक्तं
१४ मामनुवर्तमानेन पित्रा नियुक्ताः संतः तत्र प्रजासर्गनिमित्तं तामुद्वहत १५ ननु बहूनां कथमेका भार्या स्यात्
तत्राह अपृथक् धर्मः शीलं च येषां तेषां वः पत्नी भूयात् अर्पितो भवत्सु आशयो यया धर्मशीलयोरैक्यात् मनसः
श्चात्र न दृष्टादृष्टविरोध इति भावः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्क०

९१

अहतौजसः अप्रतिहतबलाः संतः १७ पक्वगुणाः दग्धकामादिमल आशयो येषां अतः लोकद्वयभोगात् निर्विद्य मत्स्थानं प्रा
प्स्यथ १८ ननु गृहेषु प्रविष्टानामस्माकं तदासक्त्या बंधस्यावश्यकत्वात् कुतस्त्वद्भक्तिर्निर्वेदो वा तत्राह गृहेष्विति कुशलं मय्य
र्पितं कर्म येषां मद्वार्त्तया यापितो यामः कालो येषां १९ त्वद्वार्त्ताश्रोतॄणां गृहेनैव बंधः इति कुतस्तत्राह नव्यवदिति यस्
मात् कथाश्रवणाद्यज्ञः सर्वज्ञोहमीश्वरः ब्रह्मवादिभिः प्रवक्तृभिर्निर्मितं भूतैः श्रोतॄणां हृत् हृदयं नव्यवत् प्रति
पदं नूतनवत् श्रेयः प्राप्नोति ब्रह्मसाक्षात्कारो भवतीत्यर्थः ननु त्वत्कथाश्रवणकथं ब्रह्मसाक्षात्कारस्तत्राहे

दिव्यवर्षसहस्राणां सहस्रमहतौजसः भौमान्भोक्ष्यथ भोगान्वै दिव्यांश्चानुग्रहान्मम १७ अथ मय्यन
पायिन्या भक्त्या पक्वगुणाशयाः उपयास्यथ मद्धाम निर्विद्य निरयादतः १८ गृहेष्वाविशतां चापि पुंसां
कुशलकर्मणां मद्वार्त्तायातयामानां न बंधाय गृहा मताः १९ नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवा
दिभिः न मुह्यंति न शोचंति न हृष्यंति यतो गताः २० श्रीमैत्रेय उवाच एवं ब्रुवाणं पुरुषार्थभाजनं जना
र्दनं प्रांजलयः प्रचेतसः तद्दर्शनध्वस्ततमोरजोमला गिरागृणन्गद्गदया सुहृत्तमं प्र चेतस
ऊचुः नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय नमोवचोवेगपुरोजवाय सर्वाक्षमा
र्गैरगताध्वने नमः २२

योः हृदये तद्ब्रह्म तत्र हेतुः यतो गताः यं मां प्राप्ताः संतो मोहशोकहर्षान्न प्राप्नुवंति अतो मत्कथाश्रवणे
न नव्यवत् मम हृद्यो विभावाद्धृदयस्य च ब्रह्मसाक्षात्कार त्वाद्गृहेषु च सतामपि न बंध इत्यर्थः २० पुरुषार्थं भाजय
ति प्रापयतीति तथा तं २१ वेदैः सकलश्रेयःसाधनत्वेन निरूपितान्युदाराणि गुणाः आह्वयाः नामानि यस्य मनोवा
चसो वेगादपि पुरोऽग्रतो जवो वेगो यस्य मनोवचसोरगोचरायेत्यर्थः अत एव सर्वेषामक्षाणां मार्गैः अ . . त अ
नवगताध्वा यस्य तस्मै नमः २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वनिष्ठयास्वरूपस्थित्याशुद्धयाग्नः शांतायमनसिनिमित्तेसतिअपार्थंव्यर्थमेवविलसत् विस्फुरितंहृदयंदेहेनरूपंयस्मि
दि॰ न् गृहीतामायागुणैर्विग्रहो ब्रह्माद्यमूर्त्तयोयेन २३ स्वतस्त्वविशुद्धसत्वरूपायसंसारंहरतिमेधाज्ञानंयस्यतस्मै २४
२३ अणुंसूक्ष्ममहिमानंवेत्तीत्याय २६ यद्वा चरणौ धामितितन्मनसिनिधायाह रूपमिति समस्तानांक्लेशानांसंक्षेपायस्मा न२
त् नश्चाविःकृतंप्रकटितं अतोऽन्यत्किमनुकंपितं अनुकंपाइयमेवास्माकंपरमानुकंपेत्यर्थः २७ कुतइत्यत
आह हेअभद्ररंधनः अमंगलनाशन त्वयात्रविवक्षितः एतावदेवदीनेषुवत्सलैः प्रभुभिर्भाव्यंकार्यं किंत न१

शुद्धायशांतायनमः स्वनिष्ठयामनस्यपार्थंविलसद्धृदयाय नमोजगत्स्थानलयोदयेषुगृहीतमायागुण
विग्रहाय २३ नमोविशुद्धसत्वायहरयेहरमेधसे वासुदेवायकृष्णायप्रभवेसर्वसात्वतां २४ नमःकम
लनाभायनमःकमलमालिने नमःकमलपादायनमस्तेकमलेक्षण २५ नमःकमलकिंजल्क
पिशंगामलवाससे सर्वभूतनिवासायनमोणुंसूक्ष्महिमसाक्षिणे २६ रूपंभगवतात्वेतदशेषक्लेशसं
क्षयं आविःकृतंनःक्लिष्टानांकिमन्यदनुकंपितं २७ एतावत्त्वंहिविभुभिर्भाव्यंदीनेषुवत्सलैःय
दनुस्मर्यतेकालेस्वबुद्ध्याऽभद्ररंधन २८ येनोपशांतिर्भूतानांक्षुल्लकानामपीहतां अंतर्हितोंऽत
र्हृदयेकस्मान्नोवेदनाशिषः २९ आसावेववरोस्माकमीप्सितोजगतःपते प्रसन्नोभगवान्येषाम
पवर्गगुरुर्गतिः ३०

तदाहयदिति अस्मदीयाएतइतिबुद्ध्याउचितकाले अनुस्मर्यतइतियत् त्वयातद्रूपमपिदर्शितमितिभावः २८
येनानुस्मरणेनसमस्तानांतेषामुपशांतिःसुखंभवति किंच क्षुल्लकानामपिभूतानां अंतर्हृदये अंतर्हितः अंतर्या
मित्वेनस्थितोभवानीहतामिच्छतांतत्क्षुद्रोपासकानांनोस्माकमाशिषः कस्मात् नोनैवदजानात्येवेत्यर्थः २९
तथापिवक्तव्यंचेत्तर्हियेषामस्माकंभगवान्प्रसन्नः आसावेववरः भगवत्प्रसादएवास्माकमीप्सितोवरइत्यर्थः अप
वर्गगुरुर्मोक्षमार्गप्रदर्शकः गतिः अनन्यपुरुषार्थभूतः ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० यद्यप्येवं तथापि हे नाथ त्वत्तो वरमेकं वृणीमहे कथंभूतात्परतः कारणादपि परात् अक्षरात्परतः पर इति
श्रुतेः अनंतो यद्यपि त्वं दातुं समर्थः न वयं यानां त्वद्विभूतीनामंतोस्ति यतोऽनंतविभूतित्वादनंत इति गीयसे ३१
तथाऽपि यथा सारंगो भ्रमरः पारिजातं सुखेन लब्ध्वा सति सुलभमप्यन्यद्वृक्षांतरं न सेवते तथा वयमपि साक्षा
त्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्यर्थः यद्वा किमन्यत्तुच्छं किमर्थं वृणीमहि यद्वा यद्वृणीम ७२
हि तत् हि किं किं वृणीमहि अनेन त्वेन मनोरथानां अनवस्थानादित्यर्थः ३२ अत एतावदेव प्रार्थयामहे इत्या

वरं वृणीमहेथापि नाथ त्वत्परतः परात् नह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे ३१ पारिजा
जा२ तेऽंजसा लब्धे सारंगोऽन्यन्न सेवते त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ३२ यावत्ते मा
१५९ यया स्पृष्टा भ्रमाम इह कर्मभिः तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे ३३ तुलयाम लवे
नापि न स्वर्गं नापुनर्भवं भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ३४ यत्रेड्यंते कथा मृष्टास्तृ
ष्णायाः प्रशमो यतः निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ३५ यत्र नारायणः साक्षाद्भगवा
न्न्यासिनां गतिः संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ३६ तेषां विचरतां पद्भ्यां तीर्थानां पा २२
वनेच्छया भीतस्य किं न रोचेत तावकानां समागमः ३७ श्रीराम श्रीराम श्रीराम श्री

यो१ हुः यावदिति स्पृष्टाः व्याप्ताः संतः भगवति प्रसक्ताः संगो येषां संगोऽस्माकं स्यात् ३३ ननु राज्यभोगान् स्वर्गा राम तेषां१
पवर्गौ च विहाय किमिदं प्रार्थ्यते तत्राहुः तुलयामेति भगवत्संगिनां संगस्य लवेनापि ३४ सत्संगस्य श्रे १५९
ष्ठ्यं प्रपंचयंति यत्रेति त्रिभिः यत्र येषु यतः याभ्यः कथाभ्यः निर्वैरं वैराभावः ३५ ६ पद्भ्यां पावनेच्छया
संसाराद्भीतस्य ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्संगफलमस्माभिरेवानुभूतमित्याहुः वयं त्विति भवस्य प्रियः सखा तस्य भावस्य अत्यंतमचिकित्स्यस्य भव
स्य जन्ममृत्योः भिषक्तमं सद्वैद्यं त्वां गतिं प्राप्ताः ३८ वरांतरं वृणुते यन्न इति द्वाभ्यां नताः नमस्कृताः ३९
निरंधसां निरन्नानां अदभ्रं बहुकालं तव परितोषणाय भवत्विति वृणीमहे ४० अज्ञानामप्यस्माकं त्वत्स्तु
६१ तिर्नायुक्तेत्याहुः मनुरिति यस्य तव महिम्नो नष्टः पारः येः तेऽपि त्वां आत्मसमं स्वशक्त्यनुरूपं यथा स्तुवंति

वयं तु साक्षाद्भगवन् भवस्य प्रियस्य सख्युः क्षणसंगमेन सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं
त्वाद्य गतिं गताः स्म ३८ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या आर्या
नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ३९ यन्नः सुतप्तं तप एतदीश निरंध
सां कालमदभ्रमप्सु सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ४० मनुः स्वयंभूर्भ
गवान्भवश्च येऽन्ये तपोज्ञानविशुद्धसत्वाः अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्म
समं गृणीमः ४१ नमः समाय शुद्धाय पुरुषाय पराय च वासुदेवाय सत्वाय तुभ्यं भगवते नमः
४२ श्रीमैत्रेय उवाच इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः अनिच्छतां
यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ४३ अथ निर्याय सलिलात्प्रचेतस उदन्वतः
वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ४४ ततोऽग्निमारुतौ राजन्नमुंचन्मुखतो
रुषा महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ४५

अथो अतः वयमपि गृणीमः ४१ सत्वमूर्तये वासुदेवाय ४२ यानं स्वप्रयाणं अनिच्छतामपि सतां स्वधाम ययौ अन
पवर्गवीर्यः अकुंठितप्रभावः ४३ उदन्वतः सिंधोः सलिलान्निर्याय निर्गत्य गां स्वर्गं रोद्धुमिव उच्छ्रितैर्द्रुमै
र्गां महीं छन्नां वीक्ष्य द्रुमेभ्यः अकुप्यन् तदा हि प्राचीनबर्हिषः प्रव्रजितत्वादराजकेऽकर्षणाद्यभावात् द्रुमैर्भूमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैर्युक्तिभिः ४६ उज्जहुः समर्पयामासुः ४७ मारिषां वार्क्षीं अजनयोनिर्ब्रह्मणस्तस्माज्जातो दक्षः श्रीमहादेवस्या
वज्ञानात्पूर्वमजनयोनिर्जोपि ब्रह्मपुत्रोपि सन् क्षत्रियजातीयस्यामजनि जातः ४८ प्राक्सर्गे पूर्वदेहे कालेन वि
द्रुते दैवेनेश्वरेणचोदितः सन् दृष्टाः प्रजाः ससर्ज स दक्ष इति प्रसिद्धः ४९ स्वयानुचा प्रभया ये तेजउपादत्त
आच्छादितवान् पंचकर्मदक्षोदक्षमब्रुवन् ५० तमभिषिच्य अनादिर्ब्रह्मा प्रजासर्गरक्षायां युयोज स च र

भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्य पितामहः आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः ४६ त
त्रावशिष्टा ये वृक्षा भीता दुहितरं तदा उज्जहुस्ते प्रचेतोभ्य उपदिश्य स्वयंभुवा ४७ ते च ब्रह्मण आदे
शान्मारिषामुपयेमिरे यस्यां महदवज्ञानादजन्यजनयोनिजः ४८ चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गका
लविद्रुते यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ४९ यो जायमानः सर्वेषां तेजस्तेजस्विनां रु
चा स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ५० तं प्रजासर्गरक्षायामनादिरभिषिच्य च युयो
ज युयुजे न्यांश्च सर्वे सर्वप्रजापतीन् ५१ इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रिंशोध्यायः
श्रीमैत्रेय उवाच तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितं स्मरंत आत्मजे भार्यां विसृज्य प्रा
व्रजन्गृहात् १ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा प्रतीच्यां दिशि वेलायां सिद्धो भूद्यत्र जा
जलिः २

क्षो अन्यान्मरीच्यादीन्तत्तद्व्यापारेषु नियुक्तवान् ३१ चतुर्थ त्रिंशः एकत्रिंशे सुतो दक्ष धुस्त्यस्य वेन सतां नारदो
क्तेन मार्गेण मुक्तिरुक्ता प्रचेतसां ततः दिव्यवर्षसहस्राणां सहस्रस्यांते उत्पन्नविवेकज्ञाना स्तेउपायास्पथ
मध्याम निर्विद्य निर्यादत्त इत्यधोक्षजभाषितं स्मरंत आशु प्राव्रजन् १ ब्रह्मसत्रेण आत्मविमर्शेन दीक्षिताः
प्रतसंकल्पा वभूवुः सर्वेषु भूतेष्वात्मेति मेधा ज्ञानं यस्मिन् तेन केवलायां समुद्रतटे आजलिर्नाम ऋषिः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्जिता: प्राणमनोवचोदृशो येस्तानु शांतात्तपरतः समानाम्बत्वा धारादाराभ्यन्तर्जवो विग्रहो येषां ब्रह्मणि योजि
तआत्मा येः सुरासुरैरीड्यो ददृशिवान् २ ३ उत्थायनत्वं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा ४ ५ आदिष्टमु
पदिष्टं यदात्मतत्त्वं क्षपितं विस्मृतं ६ ७ इति प्रचेतोभिः पृष्टः ८ अहोगृहप्रश्नात्तयाह रिसेवां विनासर्वंजन्मादि कर्मा १

तान्निर्जितप्राणमनोवचोदृशो जितासनान् शांतसमानविग्रहान् परेमलेब्रह्मणि योजितात्मनः न १
सुरासुरेज्योददृशेस्मनारदः ३ तमागतंतउत्थायप्रणिपत्याभिनंद्यच पूजयित्वायथादेशंसु
खासीनमथाब्रुवन् ४ प्रचेतसऊचुः स्वागतंतेसुरर्षेद्य दिष्ट्यानोदर्शनंगतः तवचंक्रमणं
ब्रह्मन् अभयाययथारवेः ५ यदादिष्टंभगवताशिवेनाधोक्षजेनच तद्गृहेषुप्रसक्तानांप्रायशः
क्षपितंप्रभो ६ तन्नः प्रद्योतयाध्यात्मज्ञानंतत्त्वार्थदर्शनं येनांजसातरिष्यामोदुस्तरंभवसागरं
७ श्रीमैत्रेयउवाच इतिप्रचेतसांपृष्टो भगवान्नारदोमुनिः भगवत्युत्तमश्लोकआविष्टात्माब्रवी
न्नृपान् ८ श्रीनारदउवाच ९ तज्जन्मतानिकर्माणितदायुस्तन्मनोवचः नृणांयेनहविश्वात्मा
सेव्यतेहरिरीश्वरः ९ किंजन्मभिस्त्रिभिर्वेहशौक्लसावित्रयाज्ञिकैःकर्मभिर्वात्रयीप्रोक्तैः पुंसो
श्रियन १ पिविबुधायुषा १० श्रुतेनतपसावाकिंवचोभिश्चित्तवृत्तिभिः बुद्ध्यावाकिंनिपुणयाबलेनेंद्रियराध
सा ११

कंव्यर्थत्वमितितानुशोचन्नाह तज्जन्मेति चतुर्भिः येनाजन्मादेर्हरिसेवैवफलं अतस्तद्विहीनंसर्वंव्यर्थमित्य
र्थः एवंशुक्लसंबंधिजन्मविशुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेनतत्याज्ञिकंदीक्षयाविबुधानामि
वदीर्घायुषापि १० वचोभिः वाग्विलासैः चित्तवृत्तिभिः नानावधानसामर्थ्यैः इंद्रियाणांराधसापाटवेन ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च०

योगेन प्राणायामादिना सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण संन्यासवेदाध्ययनाभ्यामपि अन्यैरपि व्रत
वैराग्यादिभिः श्रेयःसाधनैः १२ नन्वेषां नानाफलसाधनानां हरिसेवाभावमात्रेण कुतो वैयर्थ्यं तत्राह श्रेयसां
फलानामात्मैव अवधिः पराकाष्ठा अर्थतः परमार्थतः आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः भवत्वात्मा अ
वधिः हरेः किमायातं तत्राह सर्वेषामपीति आत्मदः अविद्यानिरासेन स्वरूपाभिव्यंजकः ऐश्वर्येणापि नृप
णा बलिप्रभृतिभ्य इवात्मप्रदः प्रियश्च परमानंदरूपत्वात् १३ किंच नानाकर्मभिस्तत्तद्देवताप्रीतिनिमि

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः १२
श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः सर्वेषामपि भूतानां हरिरात्मात्मदः प्रियः १३
यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः प्राणोपहाराच्च यथेंद्रियाणां
तथैव सर्वार्हणमच्युतेज्या १४ यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले
भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः १५

त्तान्यपि फलानि हरिप्रीत्या भवंति केवलं तत्तद्देवताराधनेन तु न किंचिदिति सदृष्टांतमाह यथेति मूला
त्प्रथमविभागाः स्कंधाः तद्विभागा भुजाः तेषामपि उपशाखाः उपलक्षणं चैतत्पुष्पादयोपि तृप्यंति न
तु मूलमेकं विना स्वस्वनिषेचनेन प्राणस्योपहारो भोजनं तस्मादेव इंद्रियाणां तृप्तिः न तु तत्तदिंद्रियेषु पृ
थक् पृथगनुलेपनेन तथाऽच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः १४ कुतः सर्वमूलत्वाद्धरेरिति दृष्टां
तांतरमाह यथैव वारः जलानि वर्षाकाले सूर्यादुद्भवंति ग्रीष्मे तस्मिन्नेव प्रविशंति अस्याप्रसिद्धत्वेन दृ
ष्टांतांतरमाह यथा भूतानि भूमौ विनिर्गुणप्रवाहः चेतनाचेतनात्मकः प्रपंचः १५ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु हरेर्वगुणप्रवाह इत्युक्ते तदाधारत्वेन सोपाधिकत्वं हरेः स्यादित्याशंक्याह एतदिति एतदिश्वं विभ्रमास्तत्सर्वे न२।
शास्त्रप्रसिद्धं पदं परं सर्वोपाधिरहितं तद्रूपेनत्वान्नतः पृथगित्यर्थः नहि कथमन्यथा भानमित्यत्राह सक्तदिति सद्
केदाचित्तु विभातं स्फुरितं गंधर्वनगरवत् यथा सवितुः प्रभा क्षणं ततो भिन्ना यथा च जाग्रत्स्वप्नसुषुप्तयः द्रियाणि सु
रेति सुषुप्तौ तु सुषुप्तौ शक्तयो भवंतीत्यर्थः कथं भूतोसौ हरिः इत्यादीनां त्रिविधाहंकारकार्याणां तन्निमित्तस्य भे
दभ्रमस्य वात्पर्यायस्मात्सः यद्वा आत्मजाग्रत्सुषुप्तौ स्वप्ने सुप्ताः शक्तयोयेषां ते भवंति इत्यादि रूपस्य याभव

पं। एतत्पदं तज्जगदात्मनः सक्तद्विभातं सवितुर्यथा प्रभा यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञा
नभिदाभ्रमात्ययः १५ यथा नभस्यभ्रतमः प्रकाशा भवंति भूपा न भवंत्यनुक्रमात् एवं परे ब्रह्म
णि शक्तयस्त्वमूरजस्तमः सत्वमितिप्रवाहः १६ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरु
षं परेशं स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा १७ इत्ययासवैभूतेषु संतुष्टा
येनेकेन च सर्वेंद्रियापशांत्या च तुष्यत्याशु जनार्दनः १८

ति इत्यादि सवितुः प्रभेत्युक्तेर्दृष्टांत इति १६ स्वसंगहेरो कथं प्रपंचोत्पत्तिलयोगत्राह यथेति अभ्रतमः
प्रकाशा आगमापायिनो रजस्तमः सत्वस्थानीयाः हे भूपाः प्रचेतसः अमूः शक्तयः न भवंति लीयंते इति एवम
यं जगत्प्रवाहः १६ तेन सर्वकारणत्वेन हेतुना कालो निमित्तं प्रधानमुपादानं पुरुषः कर्ता एतत्रितयात्मक
त्वात्सर्वकारणं परमीश्वरं अद्धा साक्षाद्भजेध्वं कथं आत्मना एकभावेन १७ साधनमाह इत्यादिभिः शीघ्रं तु न अपि च
ष्यति १८
नेदं गूढोक्तेः पदं तस्मादुत्पन्नस्य जगदात्मन उपाधेः परं तदसं वं ये आधाराधेयभावे गगन गंधर्वनगरवज्ज्ञातव्यः नहि भ्रूस्यंत त्राह।
सत्त्वेज्ञानं दीपादिवद्विविधप्रज्ञानघनमित्यर्थः। यथा सवितुः प्रकाश इव सन्नातान्तरं यज्ञानाप उव्यक्तिपज्ञाना निता सत्तेजस
वैकारिकाहंकार नेदास्ति निमित्तोन्नेदन्मोजगद्रूद भ्रमलस्याश्रयो निवर्तते भवंति। किंलक्षणोहरिरित्यादी स्थलक्ष णं वातस्येदं
उव्यक्तिये सोहदिनोच्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० तेनानकलाचित्यजतीत्याह अपहतानिरस्ताः सकलाएषणाः कामायस्मात्तुसचा सावमलआत्मामनः तस्मि
न्सततं मनसिनिरंतरमेधितया भावनयोपहूतः सन्नक्षरोहरिः छिद्रवत्तत्रोत्थाकाशवत्तत्तोनसरतिनापया
तिहि किंकुर्वन् आत्मनोनिजजनवशगत्वंस्वभक्ताधीनत्वमयन् १९ सतामेववश्यः सोऽस्मत्तात्तुपूजा अवगाच्छत ३
मपिनगृह्णातीत्याहनेति कुमनीषिणांकुत्सितमतीनां अधनाअपि आत्मधनाभगवद्धनाः तेप्रियायस्य अ १

अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः निजजनवशगत्वमात्मनोऽयन्नसर
तिछिद्रवदक्षरः सतांहि १९ नभजतिकुमनीषिणांसइज्यांहरिरधनात्मधनप्रियोरसज्ञः
श्रुतधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु २० श्रियमनुचरतींतदर्थिनश्च
टी ४ द्विपदपतीन्विबुधांश्चयत्स्वपूर्णः नभजतिनिजभृत्यवर्गतंत्रः कथमममुद्विसृजेत्पुमान्कृत प २
ज्ञः २१ मैत्रेयउवाच इतिप्रचेतसोराजन्नन्याश्चभगवत्कथाः श्रावयित्वाब्रह्मलोकंययौस्वायं
भुवोमुनिः २२

रसज्ञः भक्तिसुखज्ञः केकुमनीषिणस्तानाह श्रुतादिनिमित्तैर्मदैर्येसत्सुपापंतिरस्कारंकुर्वंति २० भक्ता राम
धीनत्वंप्रपंचयन्नाह अनुवर्त्तमानामपिश्रियंतदर्थिनः सकामान्द्विपदपतीन्नरेन्द्रान्विबुधान्देवानपि टी ४
योनानुवर्त्तते यतः स्वेनैवपूर्णः अतः स्वभृत्य वर्गानुरक्तएव एवंभूतममुमीषदपिकथंपरित्यजेत् २१
प्रचेतसःकर्मभूतान् अन्याश्चनूनंमुनीनामित्यादि ध्रुवचरितान्याः संत्रेअ गायत् प्रचेतसामित्युक्तत्वात्
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०च० २३ प्रचेतसांनारदस्यचसंवादन्तुपितमितत्रारव्यानंतेऽभिहितं हरेःकीर्त्तनंयस्मिन्नुगतु २४ यएषवंशःसोनुवर्णितः २५ यःप्रियव्र

तेपितन्मुखनिर्यातंयशोलोकमलापहं हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः २३ एतत्तेऽभिहितंक्ष
त्तर्यन्मांत्वंपरिपृष्टवान् प्रचेतसांनारदस्यसंवादंहरिकीर्त्तनं २४ श्रीशुकउवाच यएषउत्तानपदोमा नर
नवस्यानुवर्णितः वंशःप्रियव्रतस्यापिनिबोधनृपसत्तम २५ योनारदादात्मविद्यामधिगम्यपुनर्म
हीं भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं २६ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजित
वादसत्कथां प्रवृद्धभावोश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः २७ श्रीविदुरउवाच
सोयमद्यमहायोगिन्भवताकरुणात्मना दर्शितस्तमसःपारोयत्राकिंचनगोहरिः २८ इत्यान
म्यतमामंत्र्यविदुरोगजसाह्वयं स्वानांदिदृक्षुःप्रययौज्ञातीनांनिर्वृताशयः २९ एतद्यःशृणुया
द्राजन्राज्ञांहर्यर्पितात्मनां आयुर्धनंयशःस्वस्तिगतिमैश्वर्यमाप्नुयात् ३० इतिश्रीभागव
तेमहापुराणेचतुर्थस्कंधेअष्टादशसाहस्र्यांसंहितायांप्राचेतसोपाख्यानेनामैकत्रिंशोध्या
यः ३१ ॥

तः २६ । ७ २८ स्वान्ज्ञातीन्दिदृक्षुः २९ राज्ञांचरितमितिशेषः ३० इतिश्रीभागवतेमहापुराणे भावार्थदीपिकायां ॥
चतुर्थस्कंधेएकत्रिंशः श्रीराम श्रीराम

अकिंचनैर्निरस्तदेहादिकैर्वैराग्यैर्नेतुंसकिंचनगः । ८

चतुर्थस्कंधसमाप्तं

॥ ६   ६ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमस्कंदप्रारंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० पं ॐ नमो भगवते वासुदेवाय ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय अथातः
२ पंचमस्कंधव्याख्या ऽनेकविशेषवान् प्रियव्रताद्यायो यत्र सप्रपंचः प्रपंच्यते षड्विंशत्याधुनाध्यायैः पंचमस्कंध ईर्यते लोकद्वीपा
दिमर्यादापालनाख्यमनेकधा २ पृथिव्युपर्यधोलोके मर्यादा त्रिविधा मता ३ भुवि द्वीपादिमर्यादाः पाल्यंते राजभिः पृथक् ४ भू
मेरूपरि देवाद्यैस्तलत्राधोसुरादिभिः तत्राध्यायैस्तु विंशत्या प्रियव्रतपुरःसरैः भुवो द्वीपादिमर्यादा पालिताइति वर्ण्यते ५ त्रिभिः
सूर्यादिभिर्ज्योतिश्चक्रादिष्विति कीर्त्यते अनंतो दिपुदेत्याद्यैः पालनं चतलास्त्रिभिः ६ तत्र तु प्रथमेध्याये ज्ञानिनो राज्य निर्वृतिः

राजोवाच प्रियव्रतो भागवतआत्मारामः कथं मुने गृहेरमत यन्मूलः कर्मबंधः पराभवः १ न
नूनं मुक्तसंगानां तादृशानां द्विजर्षभ गृहेष्वभिनिवेशोयं पुंसां भवितुमर्हति २

१
पुनश्च ज्ञाननिष्ठति प्रियव्रतकथोर्यते ७ वंशः प्रियव्रतस्यापि निबोधन्नृपसत्तम योनारदादात्मविद्यामधिगम्य पुन
र्महीं ८ भुक्त्वा विभज्य पुत्रेभ्य ईश्वरं समगात् पदमिति पूर्वस्कंधे प्रियव्रतस्य प्रथममात्मविद्या ततो गृहाश्रमः ॥ ततः स
र्वसंगत्यागेन मोक्ष इत्युक्तं तत्र विस्मितः पृच्छति प्रियव्रत इति भागवतः अत एवात्मारामः गृहे कथमरमत रमतां
को दोष इति चेत्तत्राह कर्मबंधः पराभवः स्वरूपतिरस्कारो यन्मूलो भवति यद्गृहं मूलं यस्य १ गृहेषु रतिश्चेत्
त्वा भिनिवेशात् स्यात् भागवतानां न संभवतीत्याह न नूनमिति २ श्रीराम श्रीराम श्रीराम श्रीराम ॥ ७ राम
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहासक्तिर्हि कुटुंबादिस्पृहया भवति सा चैतेषां नास्तीत्याह महतामिति उत्तमश्लोकपादयोश्छायाकामादिसंतापहारि
णी तया निर्वृत्तं चित्तं येषां तेषां स्पृहायुक्ता मतिर्नास्ति ४ दारादिष्वासक्तस्य मोक्षः श्रीकृष्णेस्खलितामतिश्चाभूदिति यत्तु॥
अयं च महान्संशय इत्याह संशय इति ५ अंगीकृत्य परिहरति बाढमिति बाढमभिनिवेशादिकं नास्तीति सत्यमेव॥

महतां खलु विप्रर्षे उत्तमश्लोकपादयोः। छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ४ संश
योऽयं महान्ब्रह्मन् दारागारसुतादिषु। सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ५ शुक
उवाच बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंदमकरंदरस आवेशितचेतसा
भागवतपरमहंसदयितकथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वंति

तथापि विघ्नवशात्तेषां प्रवृत्तिः पूर्वाभ्यासबलेन पुनर्निवृत्तिश्च संगच्छत इत्याह भगवतः श्रीमच्चरणारविंदम २१
करंदरसपोयार सक्तास्मिन्नावेशितं चेतो यैः तेपि केनचिदंतरायेण विघ्नेन विहतामपि स्वां पदवीं मार्गं न हि
न्वंति न त्यजंति कः भागवता एव परमहंसाः तेषां दयितस्य प्रियस्य हरेः कथा ६ श्रीराम श्रीराम श्री

नै

भा०५ प्रियव्रतस्य ग्रे ... तरायन्नूपाव भूवतिसप्रसंगमाह यर्हीत्यादिनाविमुक्तसंगः प्रक्रांति भजस्वेत्यनेन। यर्हि यदा वावेति प्रसिद्धौ
हेह इति च स्वपित्रा मनुना अवनितलपरिपालनाय याचामंत्रितो नियुक्तो नैवाभ्यनंदत् नेच्छत् अथ ह देवभगवानादि देवो
ब्रह्मा स्वभावनादवततारेत्यन्वयः उपामंत्रणे हेतुः आम्नाता राजशास्त्रेणोक्ताये प्रवराश्रेष्ठागुणास्तेषां गुणानामेकांतभा न २
जनत्वयानियतामार्यत्वेन अनिच्छायां हेतुः परमात्मसतत्त्व आत्मयाथार्थ्यमवगतं नारदेन सत्वथा अंताब्रह्मसत्रेण आ था २
त्मध्यानेन कार्येण दीक्षिष्यमाणः नियमं येहि यत्र ग्राग पिवासुदेवे निरं तरसमाधियोगेन चित्तैकाग्र्येण समावेशितः
एव
यर्हि वाव ह राजन् स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसावगतपरमात्मसतत्त्वो ब्रह्म
सत्रेण दीक्षिष्यमाणः अवनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रोपामंत्रितो भग
२ वति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनंदद्यद्यपि तद
प्रत्याम्नातव्यं तदधिकरण आत्मनोन्यस्मादसतोपि पराभवमन्वीक्षमाणः ७ अथ ह भगवानादि देव एतस्य
गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्रायः आत्मयोनिरखिलनिगमनिजगणपरिवे
ष्टितः स्वभवनादवततार ८ स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपू
ज्यमानः पथि पथि च वरूथशः सिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानो गंधमादनद्रोणीमवभासय
न्नुपससर्प ९
समर्पितः सकलकारकाणामिंद्रियाणां याः क्रियास्तासां कलापो येन सः यद्यपि तत्पित्रोक्तं
न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकारे सतोपि मिथ्याभूतादपि राज्यप्रपंचादात्मनः पराभवमालोचयन्नाभ्यनं
सू.२ दत् गुणविसर्गस्य गुणसृष्टेः परिबृंहणं समृद्धिस्तदनुचिंतया व्यवसितः सकलजगतामभिप्रायो येन तथा राज्ञा चार्थ मे
डलेश्वराणामभिप्रायो निश्चायकेनाहं न अविच्छेदेनिगमैर्निमज्जितैर्देहैर्निजगणैर्मरीच्यादिभिः परिवृतः सत्यलोकाद राम
वतीर्णः ८ स च ब्रह्मा तत्र तत्र उडुपतिश्चंद्रइव प्रकाशमानो गंधमादनस्य द्रोणीं दरीमवभासयन्नुपसर्पत्येन्वयः अमरप २
रिवृढैर्देवेंद्रादिभिः ९
त
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंसयानेनोपलक्षणेन एतं पितरमुपलभमानः मत्पितायमितिलक्षयन् पितापुत्राभ्यां सह कृतांजलिः सन् सहसैवाभ्यु मनुप्रियव्रताभ्यां
त्थायार्हणेन पूजयासेहोपतस्थे तुष्टाव प्रियव्रतं नारदामंदरद्रोण्यां नारदेन उपदेशितमनु श्रुत्वा तेनानुमार्गितोस्तीज्ञात्वे ति
२ १० हे भारत भगवानादिपुरुषो ब्रह्मापि तं प्रियव्रतमिति होवाचेत्यन्वयः तेन नारदोपनीतेऽर्हणे यस्य सः सूक्तवा
क्येन यथाचित्तवाक्येनातिशयेनोदितावर्णिताः गुणा गुणावताराः मुनयः सर्वोत्कर्षाश्रयस्य ११ प्रवृत्तिनिष्ठमहावाक्यं

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवंतं हिरण्यगर्भमुपलभमानः सहसैवाभ्युत्थायार्हणेन सह
पितापुत्राभ्यामवहितांजलिरुपतस्थे १० भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरा
मुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ११ श्रीभग
वानुवाच निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयं वयं भवस्ते तत एष महर्षिर्वहामः
सर्वे विवशा यस्य दिष्टं १२ न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा नैवार्थधर्मैः प
रतः स्वतो वा कृतं विहंतुं तनुभृद्विभूयात् १३

प्रतिकूलं मत्वा मय्यप्यसूयां करिष्यतीति शंकमानो नाहमेवं वदामि किंतु मन्मुखेन हरिरेव त्वामाज्ञापयतीति वदन् प्रवृत्ति
निवृत्तिरहस्यमाह निबोधेति नवभिः ऋतं सत्यमप्रमेयं देवमसूयितुं दोषारोपेण द्रष्टुं नार्हसि ततः तातः एष त्वद्गुरु
श्च महर्षिर्दिष्टमादिष्टमाज्ञां विवशा अस्वतंत्राः १२ विवशत्वमेवाह चतुर्भिः नेति तस्य कृतं तेन निर्मितं तनुभृज्जीवः तप
आदिभिर्विहंतुं अन्यथा कर्त्तुं न विभूयात् प्रभुर्न भवेत् मनीषया सामादिबुद्धिबलेन परतः बलवदाश्रयात् १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र देहयोगे तावत्पारतंत्र्यं प्रसिद्धमित्याह भवायेति भवो जन्म भवाद्यर्थं अव्यक्तेन ईश्वरेण दिष्टं दत्तं देहयोगं जनता जीव
समूहः सदा धत्ते नान्यथा कर्तुं शक्नोति अंग हे प्रियव्रत १४ कर्मकरणेपि पारतंत्र्यमाह यस्येति वाचि वेदलक्षणायां तंत्र्यां
दामन्यां गुणाः सत्वादयः तत्पूर्वकाणि च यानि कर्माणि तन्निबंधनैर्नामभिर्ब्राह्मणादिशब्दैः सुदुस्तरैः हे वत्स वयं सर्वेपि सुयो
जिताः निबद्धाः संतः तेभ्य ईश्वराय बलिं वहामः तदिच्छया कर्म कुर्मः नसि नासिकायां प्रोताः बद्धाः संतः चतुष्प
दो बलिवर्दाः यथा द्विपदे पुरुषाय १५ भोगेपि पारतंत्र्यमाह ईशेति ईशाद् ईश्वरेणाभिसृष्टं दत्तमेव अंग हे प्रियव्रत अ

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतां
ग धत्ते १४ यद्वाचि तंत्यां गुणकर्मनामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः सर्वे वहामो बलिमीश्वराय
प्रोता नसीव द्विपदे चतुष्पदः १५ ईशाभिसृष्टं ह्यवरुंध्महेंग दुःखं सुखं वा गुणकर्मसंगात् आस्थाय
तत्तद्यदयुंक्त नाथश्चक्षुष्मतांधा इव नीयमानाः १६ मुक्तोपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमा
नशून्यः यथानुभूतं प्रतियातनिद्रः किंत्वन्यदेहाय गुणान्न वृंक्ते १७

वरुंध्महे स्वीकुर्मः यथा स्वामिना दत्तमेव कारागारादि बलीवर्दाः भक्षयंति न स्वेच्छया तद्वत् ननु एवं वैषम्यमीश्वर
स्य नेत्याह गुणकर्मसंगात् नाथो यद्यद्देवतिर्यगादिलक्षणं देहं अयुंक्त योजितवान् तत्तदास्थाय स्वीकृत्य यथा अंधा
श्चक्षुष्मताच्छायामात्रपेक्षा नीयमानाः तेनैव गच्छंति तद्वत् १६ ननु तत्सर्वं अविदुषामेव न त्वात्मविदः इत्याशंक्या
ह मुक्तोपि यावत् प्रारब्धं कर्म तावत् यथा स्वप्ने अनुभूतं प्रतियातनिद्रो गतनिद्रः अभिमानशून्य एवानुस्मर
ति न हि भोगवासनया पुनर्जन्म भवेत् तत्राह किंतु देहांतरारंभकान् गुणान् कर्माणि वासनां न वृंक्ते न संभ
जते १७

ननु गृहे वर्तमानस्य भोगान् भुंजानस्य कुतो ऽभिमानाभावो मोक्षो वा अतस्तत्त्यागेन वनवास एव युक्तस्तत्राह भयमि
ति भयं संसारः स्यादेव प्रमत्तस्याजितेंद्रियस्य वनेष्वपि संगाक्षिप्यावनाद्वनांतरं गच्छतोपीत्यर्थः सहैव षट् सपत्नाः
सैत्रवा मनो बुद्धीद्रियाणि यस्य स तथाभूत एव वनेष्वपि यत आस्ते बुधस्तु जितेंद्रियत्वादात्मारामस्याव
द्यं रागादिदोषं १८ ननु गृहे रागादयः संभवंति न तु वन इत्याशंक्याह य इति यो विजिगीषमाणः सपूर्वं गृहेषु
स्थित्वा तेषामत्यंतनिरोधमकुर्वन् जेतुं यतेत ततः क्षीणेष्वरिषु कामं गृहेऽन्यत्र वा विचरेत् यतोऽत्येति ऊर्जितारीन् दु

व२

भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः। जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः
किं नु करोत्यवद्यं १८ यः षट्सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वं अत्येति दुर्गाश्रित ऊ
र्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् १९ त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितष
ट्सपत्नः। भुंक्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसंगः प्रकृतिं भजस्व २० श्रीशुक उवाच
इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावनतशि
रोधरो बाढमिति सबहुमानमुवाह २१

र्गाश्रित एवात्येति जयति पश्चाद्दुर्गेऽन्यत्र वा वर्तेत युध्येतेति पाठे प्रहरेदित्यर्थः १९ एतच्च गृहदुर्गाश्रयणं प्राप्तकाला
नां त्वं तु अब्जनाभस्यांघ्रिसरोजकोश एव दुर्गं तदाश्रितः अत एव निर्जितषट्सपत्नः तथापि पुरुषेणेश्वरेणाति दि
ष्टान् दत्तान् भोगांस्तावद्भुंक्ष्व पश्चाद्विमुक्तसंगः सन् प्रकृतिं स्वरूपं भजस्व आत्मनिष्ठो भवेत्यर्थः २० आत्मनोऽल्प
तोल्लघुतया यद्यप्यात्मनो यदनुशासनं चाद्य लघुतया गौरवेण बाढं तथा करिष्यामीत्यवनतकंधरः सन् जग्राह २१

अल्पतया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न२

भा०पं० मनुनासंतुष्टेनोपकल्पितापूजायस्यप्रियव्रतस्ययोगाःतेशाज्ञारदस्यचशिष्यनाशात्कुटिलमीक्षणंसंभवतितत्रानु
रत्नीत्याह अविषमंयथातथोर्योरभिसमीक्षमाणायोः संतोः आत्मनः सम्यगवस्थानंआवाङ्मनसतयोरविषयं क्ष
यंनिवासंपांगतेरअवाकुवाचामगोचरंकथंचिन्मनसा क्षयंविषयंअतः अव्यव तेव्यवहारशून्यंब्रह्मनिष्ठ टी२
तेप्रवर्त्तयनव्यवहारादिषमाः सनुव्यवहारातीतस्वरूपंचिंतयन्नंतर्हितइत्यर्थः २१ पुत्रराज्येभिषिच्यवनंया
स्यामीत्येवंयोमनोरथः सपरेणब्रह्मणेवप्रतिसंधितः संपादितोयस्यसः नारदस्यानुमतेनस्थापयित्वाश्र

भगवानपिमनुनायथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्म
समवस्थानमवाङ्मनसंक्षयमव्यवहृतंप्रवर्त्तयन्नगमत् २१ मनुरपिपरेणैवंप्रतिसंधितमनोर
थः सुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तयआस्थाप्यस्वयमितिविषमविषज विषय ३
४ रुणाया३ लाशयाउपरराम २२ इतिहवावसजगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोखिलज
गद्बंधध्वंसनपरानुभावस्यभगवतआदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभावेनपरिरंधि
तकषायाशयोवदातोपिमानवर्धनोमहतांमहीतलमनुशशास २४

तिविषमादुस्तरोयोविषयविषजलाशयोयाहेतस्यआशादिकुप्रवृत्तिवासनाभोगेच्छावातस्याउपरतोभूत् २१ य राम
स्यबंधहेकथमरमतनितित्राक्तेमुत्तरमुपसंहरतिइतिहवावइच्छेमवहिःअधिनिवेशितः प्रापितः कर्माधिका ४
रायस्यअखिलस्यजगतोबंधध्वंसनः परानुभावोयस्यतस्यपदंघ्रियुगलंतस्यानवरतध्यानंतदनुभावेनपरि
रंधितकषायादरागादिमलआशयोयस्यअतः अवदातः शुद्धोपिमहतांब्रह्मादीनामाज्ञापालनेनमानवर्द्धनः २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उइतिविस्मय इइतिप्रसिद्धो हवावतिनिश्रेय आत्मनासमानैःशीलादिभिरुदारानुमहतोदशपुत्रानुजनयामास २५ ता
नाह आग्नीध्रः इध्मजिह्वः यज्ञवाहुः महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः वीतिहोत्रः कविरितिअग्नी
नांनामानिएषांतु २६ अर्भभावात् वाल्यादारभ्य २७ तस्मिन्पारमहंस्याश्रमश्रीमच्चरणारविंदयोरविरतस्मरणेना

अथ दुहितरं प्रजापतेर्विश्वकर्म्मणउपयेमेवर्हिष्मतीनामतस्यामुहवावआत्मजानात्मसमानशील
गुणकर्मरूपवीर्योदारानुदशभावयांवभूवकन्यांचयवीयसीमूर्जस्वतींनाम २६ आग्नीध्र इध्मजिह्व
यज्ञवाहु महावीर हिरण्यरेतो घृतपृष्ठ सवन मेधातिथि वीतिहोत्र कवयइतिसर्वएवाग्निनामानः
एतेषांकविर्महावीरः सवनइतित्रयआसन्नूर्ध्वरेतसः २६ तेआत्मविद्यामर्भावादारभ्यकृ
तपरिचयाःपारमहंस्यमेवाश्रममभजन् २७ तस्मिन्नुहवाउपशमशीलाः परमर्षयः सकल
जीवनीकायावासस्य भगवतोवासुदेव स्यभीतानांशरणभूतस्यश्रीमच्चरणारविंदाविर
तस्मरणाविगलितपरमभक्तियोगानुभावेनपरिभावितांतर्हृदयाधिगतेभगवतिसर्वेषांभूता
नामात्मभूतेप्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषणसमीयुः अन्यस्यामपिजायायांत्रयःपु
त्राआसन्नुत्तमस्तामसोरैवतइतिमन्वंतराधिपतयः २८ श्रीरामजयरामजयजयराम॥

विगलितअखंडितायः परमाभक्तियोगस्तस्यानुभावनविशोधितांतःकरणेप्रतीतोयोभगवांस्तस्मिन्नात्म
नः स्वपदार्थस्यतादात्म्यंअविशेषाणविशेषादहाद्युपाधिस्तदंयोहेनप्रापुः २८ श्रीरामजयरामजय

भा ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्बुदं एतादृशानि वर्षाणामेकादशार्बुदानि जगतीं बुभुजे इत्यन्वयः। राज्ञो धर्मपालनवि
षयभोगाश्रमौ वैभोग्यं ततः नानापार्श्वेन तु धर्मपालनमाह अव्याहता इति। अखिलाः पुरुषकाराः पौरुषाणि येस्मात्तेन सारेण च
लेन संभृतौ पूर्णौ दोर्दण्डौ तत्पार्श्वयुगलं तेन अपीडिता आकृष्टा मौर्वीगुणास्तस्य तत्र तिलकारस्तेन च युद्धं विना विरमितानि
रस्ता धर्मप्रतिपक्षायेना भोगातिशयमाह बहिः स्मन्या इति स्वभार्यायाः। अनुदिनमेधमानेन प्रमादाद्रि इति श्रीपराभूयमान भि० २
विवेक इव अत एव विषयासक्तया आत्मानमनवबुध्यमान इव बुभुजे तत्र प्रमादः। प्रतिदृश्याह एषः। ततः प्रसरणमभु

एवमुपशमायनेषु स्वतनये प्रथजगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषका
रसारसंभृतदोर्दण्डयुगलापीडितमौर्वीगुणास्तनितविरमितधर्मप्रतिपक्षो वहिः स्मन्या अनुदिनमेधमा
नप्रमादप्रसरणयोषिण्या व्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबु
ध्यमान इव महामनाबुभुजे २८ यावदवभासयतिसुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधा
तलमर्धेन च प्रतपत्यर्द्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदे=
न्समजवनरथेनज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्याक्रामद्द्वितीय
इव पतंगः ३०

स्त्ञानादिक्रीडायां तस्मै योषितां योषित्स्वभावस्तु शृंगारानुभावप्रकाशाने ततो व्रीडया प्रमुषिताः संकोचिता हा
सावलोकाः ततो रुचिर क्ष्वेल्यादयः परिहासवाक्यादीनि तैः प्रभावातिशयमाह यावदवसुधातलं लो २
कालोकपर्यन्तमवभासयति मेरुप्रदक्षिणीकुर्वन्नादित्यस्तस्मिन्नर्द्धे तेवापल्लक्षितं प्रतपति प्रकाशयति अ
र्द्धेन चावच्छादयति तमसा आच्छादयति तदाहि द्वितीयः पतंगः सूर्य इव पर्यक्रामत् न चेदमसंभावितं यतो भग
वदुपासनेनोपचितः अतिपुरुषः पुरुषानतिक्रान्तः प्रभावो यस्य सः ३०

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

× मरणादिकालेयद्वानस्तयुगर्मकलावपि ४

येते प्रसिद्धास्तस्य रथचक्रायक्षता: परिखा जाता: ३१ उक्तयैनौयैते वक्तव्या: ३३ तेषां परिमाणं श्लोकत्रिशेष: पूर्वस्मात् द्वि
स्तारमानं उत्तरस्मात् द्विगुणेन विस्तारमानेन तत्त्वं सिंधुभ्योव बहि: समंततानुपरि क्लृप्तार चिता: ३४ सिंधुभ्यो बहिरेकैक
शो द्वीपा: एवं द्वीपानामपि बहि: सिंधव: इत्याह क्षारोदेति दधिमंडामथितं दधि एते सप्त जलधय: सप्तद्वीपानां परिखा इवा
भ्यंतरेति संक्षिप्ताय द्वीपास्ते समाना विस्तारतो बहि: नाना: पृथगसंकीर्णतया ३५ जिना: षड्गुणाइंद्रियाणि षड्भेयो

एवंकुर्वाणंप्रियव्रतमागत्यचतुराननस्तवाधिकारोयंनभवतीतिनिवारयामास ३१ येवाउहतद्रथचरणने
मिकृतपरिखास्तेसप्तसिंधवआसन् ३२ यतएवकृता: सप्तभुवोद्वीपाजंबुप्लक्षशाल्मलिकुशक्रौं
पूर्वस्मात् २ चशाकपुष्करसंज्ञा: ३३ तेषांपरिमाणंपूर्वस्मात्उत्तरउत्तरोसंख्यंयथाद्विगुणमानेनवहि: समंततउ
पक्लृप्ता: ३४ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोदधिमंडोदशुद्धोदा: सप्तजलधय: सप्तद्वीपपरिखा
इवाभ्यंतरद्वीपसमानाएकैकश्येनयथानुपूर्व्यंसप्तस्वपिवहिर्द्वीपेषुपृथक्पृथगुपकल्पिता: तेषु
जंबाद्विषुवर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधाति
थिवीतिहोत्रसंज्ञानुयथासंख्येनैकैकस्मिन्नेकमेवाधिपतिंविदधे दुहितरंचोर्जस्वतींनामो
शनसेप्रायच्छत् यस्यामासीद्देवयानीनामकाव्यसुताश्रहोस्वाश्चर्यराज्ञ: सामर्थ्यमितिपरिक्षिदभि
प्रायंज्ञात्वाभगवान्बादरायणिराह ३५ नैवंविध: पुरुषकारउरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणा
नांचित्रंविदुरविगत: सकृदादेदीतयन्नामधेयमधुनासजहातिबंधं ३६

नावे: तेषामेवंविध: पुरुषकारइतिनचित्रंनासंभावितंविदुरविगत: अंत्यजोपियस्योरुविक्रमस्यनामसकृदुच्चारयन्सद्य: स
अधुनातत्क्षणमेवबंधंसंसारंजह्यादितिपाठोप्ययमेवार्थ: तत्वमितिपाठेचंडालत्वंजहातिशुद्धोभवतीत्यर्थ: ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प०

तस्यपराक्रम मुपसंहरन्नुनिष्ठतिक्रममाह सएवमिति देवर्षिचरणयोरनुसेवनं उपसत्तिः तदनुपतितोयोगुणविसर्गो
राज्यादिप्रपञ्चः तत्संसर्गेणात्मनिमनसिनिर्वेदोयस्य ३७ मयाअसाध्वनुष्ठितंयद्यतोभिनिवेशितः तत्ततः अल्पमल्प
विषयेः विनोदमृगंमकेऽ ३८ परदेवतायाहरेः प्रसादेनाधिगतः प्राप्तःयआत्मप्रत्यवमर्शोविवेकस्तेननारदस्यप
दवीतदुपदिष्टमार्गमेवपुनरनुससारेत्यन्वयः किंकृत्वा अनुगतेभ्यः पुत्रेभ्यः इमांपृथ्वींविभज्यभुक्तोभोगायस्यास्तो

६ सएवमपरिमितबलपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृत्त
मिवात्मानंमन्यमानआत्मनिर्वेदइदमाह ३७ अहोअसाध्वनुष्ठितंयदभिनिवेशितोहमिन्द्रिये
रविद्याविरचितविषमविषयांधकूपेतदलमलममुष्यावनितायाविनोदमृगंमांधिग्धिगितिग
र्हयांचकार ३८ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः इमांयथादायंविभज्यभु पुत्रेभ्यः४
क्तभोगांचमहिषींमृतकमिवसहमहाविभूतिमपहायस्वयंनिहितनिर्वेदोहृदिगृहीतहरि
विहारानुभावोभगवतोनारदस्यपदवींपुनरेवानुससार ३९ तस्यहवाएतेश्लोकाः ४० प्रि
यव्रतकृतंकर्मकोनुकुर्याद्विनेश्वरं योनेमिनिम्नैरकरोच्छायांघ्नन्सप्तवारिधीन् ४१

चमहाविभूतिःसाम्राज्यसंपत्तत्सहितांमहिषींमृतशरीरमिवपरित्यज्यतत्रहेतुः हृदिनिहितोनिर्वेदोयेन राम
हृदितस्यउत्तरत्राप्यन्वयः हृदिगृहीतानिश्चितोहरिविहारस्तेनानुभावस्त्यागसामर्थ्यंयस्य ३९ तस्यमहिमो ६
पनिबंधनश्लोकाः पूर्वंसिद्धाः कथंजे यथावृत्तंतदप्येवश्लोकोभवतीति ४० कोनुकोनामकुर्यात् छायां
घ्नन्तमोनिरस्यन् ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...नू ॥२॥ जंबूद्वीपसौकोयासांभाः प्रजाः पुत्रव
त्पालयामास ४

भूसंस्थानं द्वीपैः कृतं सरिद्गिरिवनादिभिः सीमा चैव येन कृता भूतानां निर्वृत्त्यै सुखायाविवादाय ४१ भौमं पातालजं दिव्यं स्व
र्गजं मानुषं मर्त्यलोकजं महित्वं वैभवं योनिरयतुल्यं मेने पुरुषानुजनाविर्भूतभक्ताः एव प्रियायस्येति इति पंचमे प्र
थमः ॥ द्वितीये प्राक् आग्नीध्रचरितं स्त्रैणासमंतं पत्न्या हि पूर्वचित्त्याया नाभिमुख्यानजीजनत् अस्मिन्वंशप्रसि
द्धायमाग्नीध्रस्त्रैणपुंगवः विहसन्निवत्तस्पदं चरितं मुनिरब्रवीत् धर्मावेक्षणः धर्ममेवक्षमाणः इत्यर्थः २ पित्

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः सीमा च भूतनिर्वृत्त्यै द्वीपे द्वीपे विभागशः ४१ भौमं दिव्यं मा
नुषं च महित्वं कर्मयोगजं यश्चक्रे निरयोपम्यं पुरुषानुजनप्रियः ४२ इति श्रीभागवते महापु
राणे पंचमस्कंधे भुवनकोशे प्रियव्रतविजये प्रथमोऽध्यायः १ शुक उवाच एवं पितरि संप्रवृत्ते त
दनुशासने वर्त्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् २ स
च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिं आभृत
परिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयांबभूव ३ तदुपलभ्य भगवानादिपुरुषः सद
सि गायंतीं पूर्वचित्तिं नामाप्सरसमभियापयामास ४ श्रीरामजयराम जय जय राम श्रीराम ॥

लोककामः पुत्रकामः सुरवराणां या वनिता तासां आक्रीडाचलो मंदरः तस्य द्रोण्यां आभृतानि संपादितानि
परिचर्योपकरणानि पुष्पादीनि येन २ तदुपलभ्य ज्ञात्वा अभियापयामास संभोगार्थं प्रस्थापयामास ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं०

साचतदाश्रमोपवनमुपवश्यामीत्यन्वयः रमणीयत्वमेवाह विविधाश्च निविडाश्च ये विटपिनस्तेषां विषोटोस्तैः निक
टाः संश्लिष्टाः पुरदलताः स्वणावल्लसत्यत्वारूढास्खलद्विहंगामयूरादयः तेषां मिथुनैः प्रोच्यमानाभिः श्रु निभि
रुच्चार्यमाणाः षड्जादिस्वरैः प्रतिबोध्यमानायसलिलकुक्कुटादयः तेर्विविचित्रं यथा भवति तथा पङ्कजिनानां हित
श्रमलाजलाशयास्तेषु कमलानि तेषामाकरमुपवनं ५ सुललितगमनेयपदविन्यासोंगतो विलासायस्याः
कारस्तस्याश्चेत्यकवाक्यत्वाय रवणरवणेति ध्वनिं कुर्वतो रुचिरस्य चरणाभरणस्य स्वनेनामीलितनयनएवन

साचतदाश्रमोपवनमतिरमणीयं विविधनिविडविटपिविटपनिकटं पुरदलतारूढस्खलद्विहं
गमिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारंडवकलहंसादिभिर्विचि
७ त्रमुपपङ्कजितामलजलाशयकमलाकरमुपवश्याम ५ तस्याः सुललितगमनपदविन्यासग
तिविलासायाश्चानुपदं रवणरवणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः
समाधियोगनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य चक्षु ६ तामवाविदूरेम
धुकरीमिवसुमनसम्पुजिघ्रंती दिविजमनुजमनोनयनाह्लादं दुधैर्येगेति विहारविनयावलो
कंसुस्वराक्षरावयवेमनसिजकुसुमायुधस्य विदधतीं विवरं

लिनमुकुलितयोर्युगलं ईषद्विकचय्य किंचिदुन्मील्य चक्षुदंदर्श ६ तामेव देवीमकरध्वजस्यवशमुपनीतः स
नुजडवदितिहवक्ष्यमाणानुदश श्लोकानुवाच जाड्यानुकरणं चैवेदर्थ्यत्वस्य दशाकारार्थं दिविजानां देवानां
मनुजानां च यानिमनांसि नयनानि च तेषामाह्लाद दुधैर्येगत्यादिभिन्नेणां मनसिकामस्य विवरं प्रवेशद्वारं
विदधती गतिश्च विहारश्च क्रीडा विनययुक्ताचलोकश्च सुस्वराण्यक्षराणि च अवयवानेत्रादयस्तैः

संश्लिष्ट १

धै २

ना २
सुमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निजमुखाद्विगलितमक्लतमिवस्वादुन्यासवद्भवमादकंयत्सहासंभाषणंतस्मिन्नामोदोनिश्वासगंधस्तेनमदांधाय
मधुकरनिकरोसरुपरोधस्यावरणेनतेनभयाद्रुतःशीघ्रायःपदन्यासःतेनवल्गुस्पंदनंकिंचिच्चलनंस्तनसकल
याःकवकभाररसनायाश्चयस्याःतान्स्याःश्रवलोकनेनविघ्नावसरस्यदत्तावकाशस्य ७ कालेशैलेगिरावस्मिन्नुकिं
चिकीर्षसिमुनिवर्यइत्यादिपुंस्त्वेनसंबोधनाद्विजाज्ञानुकारार्थंनूनंभगवतःपरदेवताभूतस्यमायासित्वंवालक्ष्याहेहे
सुहृत्सखेविज्येनिर्गुणेधनुषीबिभर्षिकिंमान्मानोर्थंतवेवाभ्यांकिंकार्यमस्तिकिंवाप्रमत्तानजितेंद्रियान् मृगतुल्या

निजमुखविगलितामृतासवसहासंभाषणामोदमदांधमधुकरनिकरोपरोधेनद्रुतपदविन्या
सेनवल्गुस्पंदनस्तनकलशाकवरभाररसनांदेवीनदवलोकनेनविघ्नावसरस्यभगवतोमक
रध्वजस्यवशामुपनीताजडवद्दितिहोवाच ७ कात्वंचिकीर्षसिवकिंमुनिवर्यशैलेमायासि
कापिभगवत्परदेवतायाःविज्येबिभर्षिधनुषीसुहृदात्मनोर्थेकिंवामृगान्मृगयसेविपि
नेप्रमत्तान् ८ वाणाविमौभगवतःशतपत्रपत्रौशांतावपुंखरुचिरावतितिग्मदंतौकस्मै
युयुंक्षसिवनेविचरन्नविद्मःक्षेमायनोजडधियांतवविक्रमोस्तु ९

नस्मराहीन्मृगयसेनान्यशोकंत्तुधनुषीधारयसीत्यर्थः ८ कटाक्षौल्लक्ष्याहवाणाविमौशतपत्रेनेत्रकमले वा १
तएवपत्राणिपिच्छानियत्रयोःशांतोविभ्रमेणमंथरौपुंखाभ्यांविनापिरुचिरौयत्रतेयाकल्पितनेत्राभ्यांपरभा
गस्यपुंखस्थानीयस्याभावादतितिग्मावतीक्ष्णाग्रौदंतौअग्रभागोययोस्तौकस्मैप्रयोक्तुमिच्छसिनविद्मःअतो
भयादेतत्प्रार्थयामहेतवायंविक्रमोस्माकंक्षेमायास्तु ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पं० तदंगपरिमललोभेनानुगच्छतो भ्रमरानुद्दिश्याह शिष्या इति । अजस्रं सततं युष्मच्छिखाभ्यो विलुलिता विगलिता
सुमनसामभिताः शीर्णा लिता निकुसुमानि भजंतीत्यर्थः शुद्धत्वेनोपमा वेदशाखा इवेति १० नूपुरस्वनमाकर्ण्या
नूपुरयोः२ हवाचमिति युष्मं तव चरणपंजरयोस्तित्तिरीणां अंतर्गतरत्नानां परं केवलं वाचं शृणुमः कथंभूतं अत्र पाठांतरं हृष्ट
वल्कलाम्बुरवां अतिप्रकटतांच तांच पातं परिधानवस्त्रं नितंबकांतित्वन प्रकल्प्याह कदंबकुसुमस्परुचिर दीप्ति

शिष्या इमे भगवन्तः परितः पठंति गायंति सामसरहस्यमजस्रमीशा । युष्मच्छिखाविलुलिताः सु
मनोऽभिमृष्टाः सर्वे भजन्त्यपि गणा इव वेदशाखाः १० वाचं परं चरणपंजरतित्तिरीणां त्रस्यन्नूप
८ मुरवां शृणवाम तुभ्यं । लक्ष्याकदंबरुचिरं कविटंकबिंब यस्याम ल्लानपरिधिः क्वचवल्कले न
ते ११ किं संभृतं रुचिरयोर्द्विज शृंगयोस्तन्मध्ये कृशोदरवहसि यत्र दृशि स्थितामे पंकोरुणः सुर
२। भिरात्मविषाणई दृक् येन अमं सुगमसुरभीकरोषि १२

अंक विटंकबिंबे नितंबस्य सुंदरमंडलकल्पद्या पाठांतरे अंगेति संबोधनं मेखलामालक्ष्याह यस्यामल्लानप राम
रिधिर्वर्तते वस्त्रं नितंबकांतित्वन प्रकल्प्याह वस्त्रं मह्दृष्टु वपृच्छति क्वचेतवल्कलमिति ११ स्तनावालक्ष्याह
शृंगयोस्तन्व्याः किं संभृतं संपूर्णमस्ति मनोहरं किंचिद्वस्त्वस्ति तावत्तु जानामि यतो मध्ये कृशोपि कृशोदरावे ८
हसि यत्र च मे दृशि दृष्टिः स्थितासाश्लिष्टा लग्नास्ति अर्थे अथ पदद्वयं न घटते इति भावः स्तनगतं कुंकुममालक्ष्या
हयं कारुणः आत्मनस्तव विषाणं स्तनद्वहदृक् अत्यपूर्वं कुतइत्यात आह येन पंकेन १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकेस्मिन्नयनयोरञ्जनः अरसाइत्युत्तमपूर्वावयवो विभर्ति मनसत्तन्नयनो क्षोभकोत्तन्नयनेरितिपाठइत्यंभूतलक्ष
णो ललिताया वक्त्रेचवक्कज्जुतं विभर्ति किं तदाह रसामधुरालापः रासोविलासस्ताभ्यांसहितासुधास्य धरामृतस्त्रा
दितद्वानुस्मितनमादि १३ कावानवक्त्रेकत्रात्मनेदहस्यकृतिराहारः अंगहेसखे अद्नात्रवेणागुह विरिति
तत्संबंधीगंधावाति आगच्छतिइतिनावल्लभिप्रायं अदनाद्दहिरंगभातीतिपाठः ममतावद्धोऽजनाद्दहिर्भूतेवत्तु
निर्भातीत्यर्थः यतः त्वविह्मोः कत्वासि विह्मुश्चनाश्नाति अनश्नन्नन्योभिचाकशीति इतिश्रुतेः विह्मोःकत्वासी उ१

लोके प्रदर्शयसुहृत्तमतावकेमेयत्रत्यइत्युत्तमुरसावयवावपूर्वौ अस्माद्दिधस्यमनत्तन्नयनोवि
भर्तिवक्कज्जुतं सरसंरासमसुधादिवक्त्रे १३ कावात्मदृष्टिरदनाद्दविरंगवाति विह्मोः कत्वास्य
निमिषान्मकेरोवकर्णौ उद्विग्नमीनयुगलं क्विजपत्तिशोभाविरासन्नभृंगनिकरं सरइन्मुखं वत्त १४
योसौत्वयाकरसरोजहृतः पतंगो दिक्षु भ्रमन् भ्रमततज्जयतेक्षिणीमे मुक्तोनतेस्मरसि वक्त्रे
जगावनत्थं कटेशानिलोहरतित्वं पदप्रणीविं १५ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

त्यत्रहेतुः तवचकर्णौ विस्तीर्णौ रिवानिमिषान्मकेरो अनिमिषार्वं नेत्रंविनानिमेषशून्योत्तमसंतोमकेरोतदाकार
कुंडलेयया ताः तोकिंचनवमुखं हि सरइन्मुसरइवत्तेहवाह उद्विग्नंचंचलंमीनयुगलमिवनेत्रद्वयंयस्मिन् द्विजा नो २
दंतास्तेषांपंक्त्याशोचिःशोभायस्मिन् सरसितु द्विजाहंसाः आसन्नो भृंगनिकरः वकेशस्तोमः परिमललुब्ध
भृंगस्तोमोवायस्मिन् १४ पतगः कंदुकः भ्रमतोभ्रमच्छिन्नस्यमेक्षिणीतज्जयतेचंचलतानयति चक्रेकेशस
महे मुक्तावधनेनस्मरसिनसंभालयसिकिं कटेशाधूर्तानीवींहरतीत्यनेनस्मरसिकिं १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपलब्धं प्राप्तं मह्यं मम मे हे मम मित्र मया सह तपश्चर्तुमर्हसि किंच सेवे भवभावनः संसृतिविस्तारको ब्रह्मा मे प्रसीदति ॥
त्वां भार्यां कल्पयतीत्यर्थः १६ द्विजेंद्रदेवेन प्रसन्नेन दत्तं द्वक्कमनश्चलं अस्त्रतु नापयाति हि चाश्लिंगियतको चित्तं ततो माव

रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धं । चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा
प्रसीदति स वै भवभावनो मे १६ न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन् मनो दृगपि नो न विया
ति लग्नं । मां चारुशृंग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरंतु शिवाः सचिव्यः १७ इति लल
नानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामा
स १८ सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनाः तेन सहायु
तायुतपरिवत्सरोपलक्षणं कालं जंबूद्वीपपतिना भौमस्वर्गभोगान् बुभुजे तस्यामु
ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभ
द्राश्वकेतुमालसंज्ञान् नव पुत्रानजनयत् १९ सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवाप
हाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे २० आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव सं
हननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जंबूद्वीपवर्षाणि बुभुजुः २१

दयितेन नेतुमर्हसि सचिव्य रत्नवसख्यापि शिवा अनुकूलाः सत्यो मां प्रतिसरंतु अनुवर्त्तंतां
यद्वा एतावत्पर्यंतं मे याः सचिव्यः सख्यः शिवाः फेरवः ताः प्रतिसरंतु निर्यांतु यद्वा वनवासे सहचर्यो हि रे
एयः शिवाः प्रतिसरंतु प्रदक्षिणं गच्छंतु १७ ग्राम्यपुवैदग्ध्यं यस्याः १८ बुद्ध्यादीनां द्वंद्वैकवत् १९ सूत्वा प्र
सूय उपतस्थे अभजत् २० औत्पत्तिकेनैव स्वभावेन संहननं दृढांगत्वं २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामानांभोगेः अधिअधिकंमन्यमानः श्रुतिभिर्विदितोंतेः कर्मभिरवाप्तंधप्राप २२ मादयंतेमोदंते २३ इतिएवंभूता ४
संज्ञायासांताः परिणावितवंतः पंचमेद्वितीयः तृतीयेऋषितेनाभेः परंमंगलमीर्यते यस्ययज्ञेप्रीतेः सनुपुत्रो
नामा १ ऋषभोहरिः १ नाभिराग्नीध्रसुतः अपुत्रयामेरुदेव्याभार्ययासह २ प्रवर्ग्येसंज्ञेषुकर्मसुक्रियमाणेषुद्रव्यादेयः

स
आग्नीध्रोराजात्ततः कामानामप्सरसएवानुदिनमधिमन्यमानस्तस्याः सलोकतांश्रुतिभिरवारुं
ध २२ यत्रपितरोमादयंते सम्परेतेपितरिनवभ्रातरोमेरुदुहितॄर्मेरुदेवीप्रतिरूपांउग्रदंष्ट्रींलतांरम्यांश्यामांनारींभद्रांदेववीथीमितिसंज्ञानवोदवहन् २३ इतिश्रीभागवतेपंचमस्कं
धेआग्नीध्रवर्णनंद्वितीयोध्यायः शुकउवाच नाभिरपत्यकामोऽप्रजयामेरुदेव्याभगवं
तंयज्ञपुरुषमवहितात्माऽयजत् १ तस्यवावश्रद्धयाविशुद्धभावेनयजतः प्रवर्ग्येषुप्रचरत्सु
द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्यादुराधिगमोपिभगवान्भागवतवात्सल्यत
तयासुप्रतीकआत्मानमपराजितंनिजजनाभिप्रेतार्थविधित्सयागृहीतहृदयोहृदयंगमं श्रीराम श्री
मनोनयनानंदनावयवाभिराममाविश्चकार ३ श्रीराम श्रीराम श्रीराम श्रीराम

संपसा १
उपाया १ सम्यग्योगोस्तिषांउपपत्त्यादुराधिगमोदुःप्रापोपिभागवतेषुकृपालुतयासुप्रतीकःशोभनावयवः सन्नात्मानंआवि
श्चकारअपराजितंस्वतंत्रंनिजभक्तानांयेऽभिप्रेतार्थास्तेषांविधित्सयागृहीतमाकृष्टंहृदयंचित्तंयस्यहृदयंगमं
न्या १ सुखकरं येनामनोनयनान्यानंदयंतितैः अवयवास्तैरभिरामंसुंदरं ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं स्व॰ ११

भा॰ पु॰ अथेहत्यादि निपातबाहुल्यं वाक्यालंकाराय आविष्कृतं भुजानां युगलद्वयं चतुष्टयं येन हिरण्मयं तेजोमयं पुरुषेषु विशिष्य
तडिति तथा पुरुषोत्तममित्यर्थः अर्हणेनार्घ्येण संहापतस्थुः अभजन्नित्यन्वयः विलसन् श्रीवत्सावलालामं
स्क॰ चिह्नं यस्य दरवरो वनरुहं पद्मं अब्जे रिचक्रं अम्लानमणिः कौस्तुभः एवमादिभिः स्फुटकिरणाः प्रवरा मणयः तन्म
यानि यानि मुकुटादीनि अंगानां भूषणानि तैर्विभूषितं बहुमानेन दृष्टाः अथ माइवोत्तम धनं निधि ४ अर्हसीत्यादि

अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयांबरधरमुरसि विलसच्छ्री
वत्सललामं दरवरवनरुहवनमालाधूर्यम्लानमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रव
रमणिमयमुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषितमृत्विक्सद
१० स्यगृहपतयो धनाइवोत्तमधनमुपालभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ४
अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां ५ नमोनमइत्येतत्सदुपशिक्षितं ६ कोहिपु
मान्प्रकृतिगुणव्यतिकरमतिरनीशईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृति
भीरूपनिरूपणं ७ ५८

परि॰ नानिगदेन स्तुवंतीह अर्हत्तमेऽपूर्णोपि वं अनुपथानां भक्त्यानामस्माकं अर्हणां मुहुः स्वयमेव स्वीकर्तुमर्हसि ॥५ राम
ननु वयं स्तोतुं शक्ताः इत्याहुः नमोनमइत्येतदेवास्माकं सद्भिः परिशिक्षितं बहुप्रयत्नदुर्ज्ञेयत्वात् ६ तदेवाहुः कोहि रु २१०
वीति प्रकृतिगुणानां व्यतिकरः प्रपंचस्तस्मिन्नवमतिर्यस्य अतएवेश्वरस्य अर्वाक्तनाभिस्त्वामसंख्यातिशीतिभिः
प्रपंचांतर्गताभिः नामच रूपं च आकृतिश्च आकारस्ताभिस्तव स्वरूपनिरूपणं कर्तुं को नाम पुमानर्हति ७

अतएवानीशानाम् अक्षतिप्रकृतिपुरुषयोः परस्य २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपिक्केना हिति २ अथ शुद्ध पल्लवा

भा०१० संद्यतावन्मात्रमेवाहेतिनाधिकमित्याहुः सकलजननिकायस्य दृजिनं निरसंपतीतितथोक्तं शिवतमाः प्रवराः श्रेयगुणगणा
स्ता स्पर स्तेषामेकोदेशस्यकथनाद्धिना ८ वाङ्मनसागोचरापित्वं भक्तानां सुखाराध्य एवेत्याहुः हे परमपरिजनेरणुरागेण विर
सं २ चितायेचावलशद्वाग्रक्षराक्षरस्तुतयः सलिलंच सितकिशलयाः शिलिनिपाठ शिलंकुरादिमंजरीएवमादिभिः
संभृतयासंपादितयापूजयापरितुष्यसि ९ अथतिप्रकरणांतर अन्यथानुअनयाइज्यया यागेनापिवृनुभारभ

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनाद्दते ८ परिजना
नुरागविरचितशबलसंशब्दसलिलसितकिशलयतुलसिदूर्वांकुरैरपिसंभृतयासप
र्ययाकिलपरमपरितुष्यसि ९ अथानयापिनभवतइज्ययासभारभरयासमुचितम
र्थमिहापलभामहे १० आत्मनएवानुसवनमञ्जसाव्यतिरेकेणबोभूयमानाशेषपुरु
षार्थस्वरूपस्य ११ किंतुनाथाशिषआशासानामेतदभिसंराधनमात्रंभवितुमहेति १२
परम २ तद्यथाबालिशानांस्वयमात्मनः श्रेयः परमविदुषांपरमपुरुषप्रकर्षकरुणयास्वमहिमानंचापव
र्गाख्यमुपकल्पयिष्यन्स्वयंनापचितएवेतरवदिहापलक्षितः १३

स्प २
अपेक्षितं रयाअनेकांगसमृद्धयापिभगवतः समुचितमर्थं प्रयोजनंनेवपश्यामः तत्रहेतुः आत्मनः स्वतएवअनुसवनंसर्वदा
अंजसासाक्षात्तुबोभूयमानाअतिशयेनभवंतोयेअशेषाः पुरुषार्थाः तेस्वरूपंयस्यपरमानंदस्य ११ नंचैवंसत्यपि
गा यानर्थमित्याहुः किंत्विति सकामानामस्माकमेवैतनुउपयुज्यतेनैवतेस्यर्थः १२ स्वोपयोगमेवप्रदर्शयंतितद्यथेति ता २
परमेश्वोपिपरमपुरुषः प्रकर्षयुक्तयाकरुणयाउपकल्पयिष्यन्संपादयिष्यनुचकाराशु कामितंचनापचितः अनप
चितः अपूजितएवपूजानपेक्षीवानुस्वयमेवोपलक्षितः इष्टासिद्धेतरवनुसापेक्षवत् १३ श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पं

११

यद्यपित्वंवरान्दातुमाविर्भूतोसितथाहेअर्हत्तमराजर्षेर्बर्हिषियज्ञेनिजपुरुषाणांलब्धनामस्माकंईक्षणविषयोभवानुपहि
यदाआसीत्तदाद्यमेववरःसंजातः१४ दर्शनस्यदुर्लभतामाहुः असंगर्णवैराग्येणनिशितंयत्ज्ञानंतेनविधूताअशे
षामलायेषांअतोभवानइवस्वभावोयेषांतानेवाहुः आत्मारामाणामेवंभूतानांमुनीनामपिपरममंगलायनंगुणग

अथयमेव वरोह्यर्हत्तमयर्हिबर्हिषिराजर्षेर्वरदर्षभोभवान्निजपुरुषेक्षणविषयआसीत् १४
असंगनिशितज्ञानानलविधूताशेषमलानांभवत्स्वभावानामात्मारामाणांमुनीनामनवर
गुण३ तपरिगुणितगुणगणपरममंगलायनगुणगणकथनोसि १५ अथकथंचित्स्खलनक्षुत्पतनजृंभ
णदुरवस्थानादिषुविवशानांनस्मरणायज्वरमरणदशायामपिसकलकश्मलनिरसनानितवगुणकृतनाम यज्वर३ मरण
धेयानिवचनगोचराणिभवंतु १६ किंचायंराजर्षिरपत्यकामःप्रजांभवादृशीमाशासानईश्वर
माशिषांस्वर्गापवर्गयोरपिभगवंतमुपधावतिप्रजायामर्थप्रत्ययोधनदमिवाधनःफलीकरणं

णकथनमेवननुदर्शनंयस्यअतोनवरतंपरिगुणिताअभ्यस्तागुणगणायस्येतिसंबोधनं १५ दर्शनेनैवकृता
र्थाअपिवरमेकंप्रार्थयेतेअथेति स्मरणायविवशानांत्वांस्मर्तुमशक्तानांनः १६ अन्यच्चप्रार्थनीयमस्तीत्याहुः
किंचेति आशिषांमहिकीनांस्वर्गापवर्गयोरपीश्वरंत्वांउपधावतिप्रजायामेवपुरुषार्थइतिप्रत्ययोयस्य अध
नोयथाफलीकरणंतुषकणादिकमाशासानोधनदमुपधावति ॥१७ श्रीरामनारायणवासुदेवश्रीरामराम ११

सएवअनलः२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना२

भा०पं० इदं च नातिचित्रमित्याहुः इह संसारेनेपराजितया मायया नवसितपदव्या अलक्षितमार्गया अपराजितः को वेह नको
पि अवसितयाः नावृत मतिः कः अन्यत एव विषयाणामेव विषतस्य रयावेगो स्तेरनावृता प्रकृतिर्यस्य सकः यद्यनुपासितम
हच्चरणः १ यतस्त्वन्मायामोहितस्यैव मायाया घटइत्यर्थः १८ अदभ्रकर्तरि हे बहुकार्यकारिन् अल्लीयसे कार्याय
ह्वं यदस्माभिरिह समाहूतो सि तत्र प्रजायामर्थधीर्येषां मदानां नो यद्देवहेलनं अवज्ञानं तत्सर्वानु प्रति तव साम्य नेपा० ३

कोवा इहेतेपराजितोपराजितया माययानवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृ
तिरनुपासितमहच्चरणः १८ यदु ह वाव पुनरदभ्रकर्त्तरिह समाहूतस्तदर्थधियां मदानां नस्त
द्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषां इति निगदेनाभिष्टूयमानो भगवानन्नि
मिषर्षभो वर्षधराभिवादिताभिवंदितचरणः सदयमिदमाह १९ श्रीभगवानुवाच अहो बताह
मृषयो भगवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति
ममाहमेवाभिरूपः कैवल्यात् २० अथापि ब्रह्मवादानां मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेव
कुलं २१ ततआग्नीध्रीयेंशकलयावतरिष्याम्यात्मतुल्यमनुपलभमानः इति निशामयन्त्या मेरु
देव्याः पतिमभिधायान्तर्दधे भगवान् २२

नेह गुणा प्रतिवोढुं सोढुं अर्हसि इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरा भारतवर्षपतिना भिस्तैनाभि[illegible]वादिता
ये ऋत्विजस्तैरभिवंदितौ चरणौ यस्य १९ असुलभत्वे हेतुः ममाहमेवाभिरूपः सदृशः कैवल्यात् अद्विती
यत्वात् २० द्विजेषु देवाइव ब्राह्मणास्तेषां कुले २१ आग्नीध्रीये नाभेः पतिनाभिं २२ श्रीराम श्रीराम श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० पं०

हे विष्णुदत्त तस्य भगवतो धायेनेन तां पुरमेरुदेव्यां शुक्लाया शुद्धसत्वमूर्त्यावततारे केषां धर्मानुवातरसनानां दिग्वाससां
पाषंडिन्यानृत्यर्थमाह श्रमणानां तपस्विनां ऋषीणां ज्ञानिनां गुरु ऊर्ध्वमंथिनां नैष्ठिकब्रह्मचारिणां पंचमेतत्तीयः
चतुर्थादित्रिभिः प्रोक्तमृषभस्य हितं महतां लोकार्थं येन सत्कर्मनैष्कर्म्यं च निदर्शितं चतुर्थे शतपुत्रस्य राज्यं तस्या
पवर्गोऽतिं यस्य राज्ये जनः सर्वः संतोषामृतनिर्वृतः १ अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु च आनु

वर्हिषि तस्मिन्नेवं विष्णुदत्त भगवान्परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरु
श्रमणानां २ देव्यां धर्मान्दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्द्धमंथिनां शुक्लया तनुवाऽवततार २० इति
श्रीभागवते पंचमस्कंधे ऋषभदेवाविर्भावस्तृतीयोध्यायः शुक उवाच अथ ह तमुत्पत्त्यैवा
भिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभाव
कं भरतस्यदयायथा भवत्येवं अवलोकायस्याः तिपरिजनावलोकः श्रियमुपचर्यैतेयतोमधुद्विषः सेवायामनुरक्तमेनो

× यो दुस्त्यजान्दारादीन् विष्ठामिव जहौ तस्यार्षभस्येति संबंधः दुस्त्यजत्वे हेतुः हृदिस्पृश इति भूमनोज्ञान् सा गो हेतुः
उत्तमश्लोके लालसा लंपटत्वं यस्य यः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेवानुरागमेवाह यज्ञायेति यज्ञरूपाय धर्मपतये यज्ञादिफलदात्रे विधौ नैपुण्यं यस्य तस्मै धर्मानुष्ठात्रे योगोऽष्टांगस्तस्मै सांख्यज्ञानं
शिरः प्रधानं फलं यस्य तस्मै योगाय प्रकृतीश्वराय मायानियंत्रे अत एव नारं जीवसमूहः स अयनमाश्रयो यस्य तस्मै सर्वजीवनि
यंत्रे एवं कर्मज्ञानदेवताकांडैः प्रतिपादिताय हरये नम इत्युदारं उच्चैः सम्यगुच्चारितवान् मृगत्वं मृगदेहमपि हास्यन् त्यक्ष्यन्नपि प
रं भूतस्य तस्य तदुचितमिति भावः तस्यानुवर्त्मनार्हतीति वा संबंधः भरतचरितश्रवणादिफलमाह इदमिति भागवतैः सभाजिता
अवदाताः अदुष्टा गुणाः कर्माणि च यस्य तस्य भरतस्यानुचरितं योऽनुशृणोति आत्मन एव सकाशात् सर्वा आशिष आशास्ते लब्ध

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय नारायणाय हरये नम इत्युदारं हास्यन्मृगत्व
मपि यः समुदाजहार ४४ इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं
स्वर्ग्यं चानुशृणोत्याख्यास्यत्यभिनंदति च सर्वा एवाशिष आत्मन आशास्ते न कांचन परत इति ४५ इति श्रीभाग
वते महापुराणे पंचमस्कंधे जडभरतोपाख्याने ब्राह्मणरहूगणसंवादे चतुर्दशोऽध्यायः श्रीशुक उवाच भरतस्या
सु ५ त्मजः १ सुमतिर्नामाभिहितो यमु ह वाव केचित्पाखंडिन ऋषभपदवीमनुवर्त्तमानं चानार्या अवेदसमा
म्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यंति २ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत्
अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः ३ य आत्म
विद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ४ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्नि
ज्याकोविदाः सूनवः ५ प्रतिहर्तुः स्तुत्यामजभूमानावजनिषातां भूम्न ऋषिकुल्यायामुद्गीथः ६

तत एव भ्रंशो निनुक्तां चिदपि परस्मादपेक्षत इत्यर्थः ४५ इति पंचमे चतुर्दशः एवमष्टभिरध्यायैर्भरतस्योक्तमीहितं ततः पंचदशे
तस्य कीर्त्यते वंशो जानपाः १ ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्तमानं यदृच्छया विशेष १ यद्वा यं सुमतिमेव वेदसमाम्नातां देवतां क
ल्पयिष्यंति बुद्धाय साक्षाद्देवतां णोः इति मिस्प तद् इत्यर्थः २ ततनृपः देवताजितः पुत्राः ३ आत्मविद्यां च बहुभ्य आख्याय ख्याः
स्वयं तेनैव संशुद्धः अनुसस्मार अपरोक्षतयानुभूतवान् ४ प्रतिहर्त्रादयस्त्रयः उद्गातृप्रतिहर्त्रादयो यज्ञे निपुणाः सूनव आसन् ५ अजनि
प

इह यज्ञः पुत्रः ७ जगतो रिरक्षया गृहीतं सत्त्वं येन तस्य विष्णोः कलांशः सन् ८ महापुरुषत्वमेवाह सं वै इति धर्मस्तस्य हि
विधः अभिषिक्तत्वात् प्रजापालनादिरूपः एकः गृहस्थत्वादिरूपादिरपरः द्विविधोपि भगवति सर्वात्मनार्पितः सन्
परमार्थलक्षणस्तेन परिभाविता संस्कृता अतो विशुद्धा मतिर्यस्य अत एवापरतमनात्मदेहाद्युद्भावाय स्पतस्मिन्
आत्मनि चिंति स्वयमेवापलभ्यमानब्रह्मणि आत्मानुभावायस्य तादृशोपि निरभिमान एव अवनीमंडलं गुप्तः पालयामास ९ कर्मभिर्गेयं कः प्रतियाति अनुकरोति न कोपि अत्र हेतुः यज्वादिरूपः भगवत्कलां गायन्तो अन्यः कोइत्यनु

त्रियु ४६ ततस्तु प्रस्तावो देवकुल्यायां प्रस्तावाद्विरोत्यायां हृदयज आसीद्विभुः विभोरत्यां च पृथुसेनस्तस्मान्नक्तो आ
कूत्यां जज्ञे नक्ताद्गयपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत ७ साक्षाद्भगवतो विष्णोर्जगद्रिरक्षि
षया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्षणेन महापुरुषतां प्राप्तः ८ स वै स्वधर्मेण प्रजापालनपोषण
प्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपर
मार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितविशुद्धमति
आत्मनि रुपरतानात्म्ये स्वयमुपलभ्यमानब्रह्मात्मानुभवोपि निरभिमान एवावनिमजूगुपत् ९ तस्येमां गाथां पा
ण्डवेय पुराविद उपगायन्ति ९ गयं नृपः कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता समागत
श्रीः सदसस्पतिः सतां सत्सेवकोन्यो भगवत्कलामृते १० यमभ्यषिंचन् परया मुदा सतीः सत्याशि
सरि दि षो दक्षकन्याः यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ११

पंगः अभिमानी सर्वतो मानास्पदं मनस्वी वा समागता संप्राप्ता श्रीर्येन यमिति वा सतां सदसः सभायाः पतिः सतां से
पि २ वकः यज्ञा यज्वादिरूपो भगवत्कलामृते गयं कोन्यः प्रतियातीत्यन्वयः १० सतीः सत्यः सत्या आशिषो यासां ता दक्षक
न्याः श्रद्धा मैत्री दयस्याद्याः निराशिषोपि यस्य प्रजानामाशिषः कामान् धरा दुदुहे तस्य गुणा एव वत्सस्तेन स्नुतमुधो ४६
यस्याः यद्वत्स्नातात्तं गयं कः प्रतियातीति संबंधः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६८ छंदांसि वेदास्तानदिहितकर्मणां वादुदुहुः युधिप्रत्यंचिताः पोताः प्रतिभुजिताः नृपायस्य बलिमाजहुरर्पयामासुः धर्मेण
पालनेन दक्षिणाभिश्च यदा प्रत्यंचिता विप्राः तदा परत्र लोकांतरे आशिषां धर्मफलानां षष्ठमंशमाजहुः पुण्यं षष्ठभागमा
दत्तेत्यायेन परिपालयन् इति स्मृतेः ११ उरुसोमपीथे बहुसोमपाने अध्वरे मघोनि इंद्रे माद्यति मदं प्राप्नुवति सति श्रद्धा

छंदांस्यकामस्य च यस्य कामान् दुदूहुराजहुरथो बलिं नृपाः प्रत्यंचिता युधि धर्मेण विप्राय दाशिषां षष्ठमं
शं परेत्य ११ यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे श्रद्धाविशुद्धाचलभक्तियोगस
मर्पितेज्याफलमाजहार १२ यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंचात् प्रीयेत सद्यः
स हि विश्वजीवः प्रीतिः स्वयं प्रीतिमगाद्गयस्य १४ गयाद्गयंत्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा
बभूवुः चित्ररथादूर्णायां सम्राडजनिष्ट ततउत्कलायां मरीचिर्मरीचेर्बिंदुमत्यां बिंदुमानुदपद्यत त
स्मात्सरघायां मधुर्नामाभवत्तस्य सुमनसि वीरव्रतस्ततो भोजायां मंथुप्रमंथू जज्ञाते मंथोः सत्याया
भौमनः ततो दूषणायां त्वष्टाजनिष्ट त्वष्टुर्विरोचनायां विरजः विरजस्य शतजित्प्रवरं पुत्रशतं क
न्या च विषूच्यां किल जातं तत्रायं श्लोकः १५ प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः अकरोदत्य
लं कीर्त्या विष्णुः सुरगणं यथा इति श्रीभागवते पंचमस्कंधे प्रियव्रतवंशानुकीर्तनं पंचदशोऽध्या

याविशुद्धोयाचलो भक्तियोगस्तेन समर्पितमिज्याफलमाजहार अर्हणामिव प्रत्यक्षतः स्वीकृतवानित्यर्थः १२ यस्य भ
गवतः प्रीणनात् देवादीनां देहं कं तत्सद्यः प्रीयेत प्रीतिं गच्छति स विश्वजीवः सर्वात्मा स्वयं प्रीतिरूपएव बर्हिषि यज्ञ पं
गयस्य हस्फुटं प्रीतिमगात् गतः प्राप्तः अस्मीति प्रत्यक्षं प्रीतिमगात् प्राप्तोस्मीति प्रत्यक्षं प्रीतिमाविष्कृतवानित्यर्थः १४ सुमन
सि स्त्रियां १५ कीर्त्या नितरायेन अलमकरोत् भूषितवान् पंचमपंचदशः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प० मेरोर्द्वीपसिंधूनां हिमानं विवक्षुस्तद्रूपतः स्पष्टं प्रवक्तुमारभ्यापंचाध्यायीतः परं षोडशे ध्यस्तथा चोर्ध्वं परितः सन्निवे
शानां मेरोस्थितिर्महीकंजकर्णिकेवोपवर्ण्यते प्रियव्रतचरित्रोक्ता वुक्ता द्वीपादि कल्पना तद्विशेषविजिज्ञासुः कथांत
परिपृच्छति १ उक्त इति किं पर्यंतमुक्तमाहाह यावदादित्यस्तपति प्रकाशयति यत्र यत्र चासौ शुक्लाक्तं हम्यपक्षीया
नक्षत्रगणैः सह चंद्रमा वा दृश्यते तावत् २ यतः येभ्यः सिंधुभ्यः एतस्याः भुवः सूचितः संक्षेपतो दर्शितः ३ जि
विसुस

राजोवाच उक्तस्त्वया भूमंडलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चंद्रमावा
सह दृश्यते तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिंधव उपक्लृप्ताः २ यत एतस्याः सप्तद्वीप
विशेषविकल्पस्त्वया खलु भगवान् सूचितः एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासा जि ३
मि ३ भगवतो गुणमये स्थूलरूप आवेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ४ ऋषिरुवाच न
वै महाराज भगवतो मायागुणविभूतेः [illegible] काष्ठां मनसा वचसा वाधि
गंतुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्या रूपमान २
मः ५ यो वायं द्वीपः कुवलयकमलकोशाभ्यंतरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करप कमल
त्रं ६
× तं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशि ४ ४७

शासायाः फलमाह भगवत इति ४ सोयो या गुणविभूतिस्तस्याः काष्ठांश्यंतं रूपं सन्निवेशः लक्षणं चिह्नं ५ कुव
लयं भूमंडलं तस्य कोशाः सप्तद्वीपाः तेष्वभ्यंतरं कोशाः प्रथमो जंबुद्वीपः नियुतयोजनविशालः लक्षयोजनवि
तदेव कमलं स्तीर्णः ६ ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसेकमिसर्थः म२

नवयोजनसहस्रं आयामो येषां आयामोत्र विस्तारः एतच्च भद्राश्वकेतुमालव्यतिरिक्तेषु द्रष्टव्यं तयोस्तु चतुस्त्रिं प्रसेकं
शद्योजनसहस्रायामत्वात् केचित्तु नीलनिषधयोः संलग्नयोः समुद्रप्रवेशात् मंगीकृत्य तयोरपि मध्ये संकुचि म२
तत्वेन नवसहस्रायामत्वं संपादयन्ति सन्निवेशस्तु वायुनोक्तः धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे दीर्घाणि त
त्र चत्वारि चतुरस्रमिलावृतमिति ७ नाभ्यां मध्ये द्वीपस्यायामो लक्षयोजनप्रमाणस्तावानुच्छ्रयस्तमुन्नाहः उ
च्छ्रायो यस्य मूले षोडशयोजनसहस्रविततः तावता षोडशयोजनसहस्रप्रमाणेन चतुरशीतिसहस्रमानेति

म२

यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ७ यस्य
मी२ मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपाया
मसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले
षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो
वर्षाणां२ रम्यकहिरण्मयकुरूणां मर्यादागिरयः [illegible] प्रागायताः उभयतः क्षारोदावधयो द्विसह
स्रपृथव एकैकशः पूर्वस्माद् उत्तरोत्तरः दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ८

त्पूर्वस्मा

मो

च नवहिरण्यस्येणएवंलक्षयोजनमाहः उत्तरोत्तरेणेला[illegible]वृतस्योत्तरोत्तरतः क्रमेण नीलादयस्त्रयो मर्यादागिर
यः पूर्वतो दीर्घाः क्षारोदपर्यावधि येषां द्विसहस्रयोजनविस्तीर्णाः दशांशाहीयद्धिकायो भागेन दैर्घ्य एव ह्रस
नत्र२ न्ति [illegible] पृथुत्वं वा यथोक्तं विष्णुपुराणे लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे इति एतच्च स्थूलदृष्ट्योक्तं
तयोरपि प्रथोवत्मध्यमत्वाभावेन लक्षणप्रमाणत्वाभावात् ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मपि १

भा०पं० अयुतयोजनोत्सेधः उच्छ्रायो येषां अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः नीलादिपृथुत्वं तेषां द्रष्टव्यं यथासंख्यं मर्यादा
गिरय इति शेषः १० आनीलं निषधायतेत्युत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ पूर्वपश्चिमौ विस्तीर्णौ भव
विषयो० तः तावच केतुमालभद्राश्वयोः सीमानं कुर्वाणौ एवं सति पूर्वापररेखायां इलावृतं वेष्टितौ मेरुमध्ये ततः पूर्वापर २२
चे० तो गिरिद्वयं वर्षद्वयं नातः किंचित् दक्षिणोत्तररेखायां तु त्रयं इलावृतं वेष्टितौ मध्ये मेरुः उभयतः श्रीगोत्री
वर्णानि० णौ गिरयः अनन्तकं यं सर्वतो लक्षप्रमाणत्वं जंबुद्वीपस्य उच्यते मेरोः षोडशसहस्राणि सर्वतः स्थितत्वात् इला

एवं दक्षिणेन इलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः अयुतयोजनोत्सेधा हरि
वर्षकिंपुरुषभारतानां यथासंख्यं तथैव इलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनौ आनीलनिषधायतौ २२
द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ११ मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्य
४८ युतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः १२ चतुर्ष्वेतेषु चूतजम्बूकदम्ब
न्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शत

ष्टनस्याष्टादश अन्येषां षण्णां चतुःपञ्चाशत् गिरीणां द्वादशो गिरिः एवं दक्षिणोत्तररेखायां तावल्लक्षं पूर्वापररेखायाम
पि सुमेरोरिलावृतस्य च चतुस्त्रिंशत् गिर्योश्चतुर्णां पार्श्वयोः हि षष्टिसहस्राणि पूर्वापरवर्षयोः समुद्रे वर्षे द्रष्ट
व्यानि अन्तानविरोधः ११ अयुतयोजनप्रमाणे विस्तारोन्नाहौ येषां विस्तीर्णमूर्ध्नो मेरोरष्टभवात् पूर्वपश्चिमो
गिरिदक्षिणोत्तरविस्तारो दक्षिणोत्तरश्च पूर्वापरविस्तारो द्रष्टव्यः सर्वतो दशसहस्रविस्तारो गोकारत्वात् गम
तत्तोपात् पूर्वेण लावृतमुप चयमित्यादि विरोधः स्यात् १२ अधिसहस्रमेकादशशतानि उन्नाहो येषां तावत्य ४८
माणा विटपविततिर्येषां शतयोजनैर्विस्तारो येषां १३ परिणाहो

कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

× गिरिशिखरस्थूलानि फलान्यमृतकल्पानि निपतंति॥ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबह
लारुणरसो ✓

यदुपस्पर्शिनोपसेविनः १४ ललामाभूषणं सुरललनानां भूषणभूताः श्रेष्ठायाः स्त्रियः तासां यूथस्य पतयः सह संभूयेय
योजन पुविहरंति १५ एकादशशतयोजनोत्तुंगो योदेवचूतस्तस्य शिरसः सकाशात् फलप्रमाणं चोक्तं वायुपुराणे अरत्नीनां शता
न्यष्टौ वैकषष्ट्यधिकानि च फलप्रमाणमाख्यातं महर्षिभिस्तत्वदर्शिभिरिति १६ अतिमधुरश्चासौ स्वतः सुरभि

रुदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धार
चभवंति २ यंति देवोद्यानानि चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति १४ येष्वमरपरिवृढाः सह सुरलल
नाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति १५ मंदरोत्संग एकादश
च ४ शतयोजनोत्तुंगदेवचूतशिरसोदनारुणोदानामनदी मन्दरगिरिशिखरान्निपतंती पूर्वेणेलावृतमि गिरि
लावृतमुपप्लावयति १७ एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभ
कायनिभानां रसेन जंबूनदीनाम मनदी मेरुमंदरशिखरादयुतयोजनादवनितले निपतंती
दक्षिणेनात्मानं यावदिलावृतमुपस्यंदति १८ १९ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसे
नानुविध्यमाना च वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जांबूनदं नाम सुवर्णं भवति
वि १ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयंति २० टक १

सुगंधिश्चनच १ अर्धेन्येषां गंधैरधिवासीतः बहलश्चारुणश्च रसः स एव उदमुदकं तेन १७ यदुपजोषणात् परस्परसंप्रसेवनात्
१८ अनस्थिप्रायाणामतिसूक्ष्मबीजानां यत्र निपतंति सूक्ष्मबीजानां यत्र निपतंति तत आरभ्यात्मानं दक्षिण
तः सर्वमिलावृतं व्याप्य वहतीत्यर्थः १९ तावत्सर्वतः रोधसास्तटयोः २०

+ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सच

ख्या

भा०५० आयामोत्रव्यामोवाङ्कोः सकरयो स्तिर्यगंतरमित्युक्तलक्षणः पंचायामाः परिणाहाः स्थौल्यमयासाः इत्यर्थः केचित्तु पंचव्या

मपरिणाहा इत्येव पठंति २१ निचीनाग्रधामुखाः १२ चतुर्दिक्षु मेरुमूलात् योजनसहस्रोत्सेधाः परितः परिधिषु इवत्र

याप्र परिणाहाः पंचम समतालाः

यस्तु महाकदंबः सुपार्श्व निरूढैस्तस्य कोटरेभ्यो विनिःसृताः पंचायामधुधाराः सुपार्श्व

शिखरात् पतंत्यापरेणात्मनमित्यावृतमनुमोदयंतिया सुपयुंजानानां मुखनिर्वासितोवायुः शतं

व३ योजनमनुवासयति २१ एवं कुमुदनिरूढो यः शतवल्शोनाम वटस्तस्य स्कंधेभ्यो निचीनाः पयो

दधिघृतमधुगुडान्नाद्यंबरशय्यासनाभरणादयः सर्वएव कामदुघा नदाः कुमुदाग्रात्पतंत

स्तमुत्तरेणेलावृतमुपयोजयंति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वे

४र्ए दर्दौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवंति यावज्जीवं सुखं निर

तिशयमेव कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनिवासकपिलशं

पिंगलितिरायो खवैडूर्यजारुधिहंसर्षभनागकालंजरनारदादयो मेरोः कर्णिकाइवकेसरभूता मूलदेशेप

रितउपक्लप्ताः २२ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं

पृथुतुंगौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्त

रतस्त्रिशृंगमकरौ अष्टभिरेतैः परिसृतोग्निरिवपरितश्चकास्ति कांचनगिरिः

ठरदेवकूटादयस्तिष्ठंतिअतोष्टादशयोजनसाहस्रप्रमाणमत्रोक्तं वेष्मवादिषु परिमाणादियत्तु पुनरन्यथावर्णितं

पुराणेषु १

[illegible] ४र्ए

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्या

यथादिशं प्राच्यादिदिक्षु यथारूपं इंद्रादिवर्णानतिक्रमेण तुरीयमानेन सार्द्धद्विसहस्रप्रमाणेन नामानि पुराणांतराज्ज्ञातव
व्यानि यथा केमेरोनव पुराणीत्सु मेना तुल्यमरावती तेजोवती संयमनी तथा कृष्णांगणा परा श्रद्धावती गंधवती तथा
चान्या महोदया यस्य शोभावती ब्रह्मणः पुरी हीनां यथाक्रममिति पंचमे षोडशः ततः सप्तदशे गंगागमनं तत्र चतुर्दिशं इ
लावृते च रुद्रेण संकर्षणनिषेवणं यज्ञलिंगस्य वल्ल यज्ञलिंग त्रिविक्रममूर्तेर्यस्य विक्रमतः दक्षिणेन पदा भुवं क्रो

ह्लिमां मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शात
कौंभीं वदंति २९ तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरो
ऽष्टावुपक्लृप्ताः ३० इति श्रीभागवते पंचमस्कंधे भुवनकोशीनामवर्णने षोडशोऽध्यायः श्रीशुक०
तत्र ह भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहवि
वरेणांतः प्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजि
ता०१ ताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानातिम उ०
हता कालेन युगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार १

वामपादांगुष्ठ वा वामपादमुत्क्षिपतः नखेन निर्भिन्नमूर्द्ध्वं उपरिभागो यस्यांडकटाहस्य तस्य विवरेणांतः प्रविष्टा या बाह्यजल
धारा सा दिवो मूर्द्धनि ध्रुवस्थाने अवततारेत्यन्वयः तस्य चरणपंकजस्यावनेजनेन क्षालनेनारुणं रक्तं च तत्कुंकुमं तदेव
अ०२ किंजल्कस्तेन परंजिता एवाखिलस्य जगतोऽघमलापहमुपस्पर्शनं यस्याः तथाप्यमलासन्मलसंगशून्या
साक्षाद्भगवत्पदीति यद्यनुपलक्षितं जाह्नवी भागीरथीत्याद्युपलक्षणांतररहितं वचो नाम तेनाभिधीयमाना२
नत्विष्णुपद्या समये भगवत्पदीति नामप्रसिद्धा
मांतराणि जातानि॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कोसौ दिवोमूर्द्धानमाह यदिति ३ किंतद्विष्णुपदंतत्राह यत्रेतिवीरव्रत। दृढसंकल्पः अस्मत्कुलदेवतायाहरेश्चरणारविंदो
दकमितिहेतोः परमादरेणविभर्तीत्यन्वयः कथंभूतः सन् प्रतिक्षणं वर्द्धमानेन भगवद्भक्तियोगेन दृढमत्यंतं क्लि
द्यमानान्तर्हृदयंयस्य अतएव औत्कंठ्ये। नविवशमामीलितंयल्लोचनयुगलंतदेवकुमलंतेनाभ्यांविगलितममलंवाष्पंतस्यकलयासहाभिव्यज्यमानरोम

५०

यत्तद्विष्णुपदमाहुः २ यत्रहवाववीरव्रतऔत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारवि
दोदकमितियामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदयऔत्कंठ्यवि
वशामीलितलोचनयुगलकुड्मलविगलितामलवाष्पकलयाभिव्यज्यमानरोमपुलककु
अ लकोऽधुनापिपरमादरेणशिरसाविभर्ति ४ ततः सप्तर्षयस्तत्प्रभावाभिज्ञाइयंननुतपस
आत्यंतिकीसिद्धिरेतावतीतिभगवतिसर्वात्मनिवासुदेवेऽनुपरतभक्तियोगलाभेनैवोप
त्मः क्षितान्यार्था गतयोमुक्तिमिवागतांमुमुक्षवइवसबहुमानमद्यापिजटाजूटैरुद्वहंति ५
ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमावार्यब्रह्मस
यां दनेनिपतति ६

१ पुलकानांकुलंयस्य ४ ततः सप्तऋषयः तस्यागंगायाः प्रभावाभिज्ञाः संतोजटाजूटैरुद्वहंतीत्यन्वयः एतावत्येव
नातोधिकास्तीत्यभिप्रायवंतः तत्रहेतुः भगवतिसततंभक्तियोगलाभेनैवउपेक्षिताअन्येपुरुषार्थाआत्मज्ञानंचयैः
कामिवकइवधारयंतिप्रत्यक्षंमुक्तिमिवचतामागतांमुमुक्षवोजनाइवेति ५ अथानेकसहस्रकोटीनांविमानानाम
नीकैः संकुलेनदेवयानेननाकाशमार्गेणवतरंती सप्तर्षिभ्योवागिवप्रायः कर्मणांगतिरितिचतोवागिवसंकुल ५०
त्वमुक्तंआवार्यआप्लाव्यमेरुमुर्द्धब्रह्मसदनेनिपतति ६ गीः
रु।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिस्पंदती अभितो गच्छंती ७ केसराचला नाम केसरसमानो ह्यायतास्तु प्रथमं तेषामादि शिखरेषु पतति ततस्तेभ्यो धोधः प्रस्रवंती स्रवंती ८ माल्यवच्छिखरात् केतुमालाभिमुखं निपतंती चक्षुः ९ चक्षुसंज्ञा एवं गिरिशिखरादिति कुमुदशिखरादुच्चलिता नीलशिखरं तदप्यतिहाय शृंगवतः शृंगात् अधोधः प्रस्रवंती १० अतिरभसतररंहसा अस्खलितो

ततउच्चलिता नीलगिरि शिखरं

मुख्यशृंगेषु

तत्र चतुर्द्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदंती नदनदीपतिमेवाभिनिविशति सीतालकनंदा चक्षुर्भद्रेति ७ सीता तु ब्रह्मसदनात्केसराचलादि गिरिशिखरेभ्यो धोधः प्रस्रवंती गंधमादनमूर्द्धसु पतित्वांतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ८ [illegible] एवं माल्यवच्छिखरान्निष्पतंती ततो नुपरतवेगा केतुमालमभि चक्षुः [illegible] प्रतीच्यां दिशि सरित्पतिं प्रविशति ९ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृंगवतः शृंगादवस्यंदमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि लवणार्णवं प्रविशति १० तथैवालकनंदा दक्षिणेन तु ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिरभसतररंहसा लुठयंती भारतमभिवर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति ११ अन्ये च नदा नद्यश्च वर्षे वर्षे संति बहुशो मेर्वादि गिरिदुहितरः शतशः तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशंति १२ न २

दि अतरवेगेन ११ बहुशः बहुविधा मेर्वादिगिरीणां दुहितरस्तत्प्रसूताः १२ दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशंति १३

यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥

ऋष्यहेमकूटात् हिमकूटादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पं० अयुतं पुरुषमानेनायुर्वर्षाणि येषां वज्रवद्दृढं संहननं शरीरं तस्मिन् बलं वयो मोदास्तैः प्रमुदितानि यानि महासौरतानि मिथुना(नि) इ०रा०१
नि तेषां व्यवायापवर्गे संभोगावसाने एकवर्षशेषे आयुषि धृत एकोगर्भो याभिः तानि कलत्राणि यत्र त्रेतायुगसमः विष
यसुखाकर्षोत् त्रेतायुगे हि सर्वे ध्याननिष्ठाः द्वापरे तु सुदुःखबहुलाः १४ यत्र ह येषु देवपतयः स्वैः स्वैः सेवकगण
षु मुख्यैः कृतमहोपचाराः सन्तः स्वैरं विहरन्तीत्यन्वयः कुसुमस्थानेषु सर्वेषु ऋतुषु कुसुमस्तवकादीनां श्रियासमृद्धा

वर्ष २

एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमु
दितमहासौरतमिथुनव्यवायापवर्गे धृतैककगर्भकलत्राणां त्रेतायुगसमः कालो वर्त्तते १४ यत्र ह
देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्त्तुकुसुमस्तवकफलकिसलयश्रियानानम्य
मानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चाम
५१ लजलाशयेषु विकचविविधनववनरुहामोदमदमुदितराजहंसकलहंसजलकुक्कुटकारंड
वसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रवि
नोदैः सुललितसुरसुंदरीणां कामकलिलसहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरंति विला
१५

त्वंतं नम्यमानविटपाः तदा श्रिता लताश्रयेषु तैर्विटपिभिरुपशुंभमानानि शोभमानानि रुचिराणि काननानि ये राम
न२ पुं तथाश्रमायतनेषु वर्षगिरिद्रोणीषु च तथामलेषु जलाशयेषु च विकचानि विविधानि नवानि यानि वनरुहा न२ ५१
णि नीरजानि तेषामामोदेन प्रमुदितै राजहंसादिभिर्मधुकनिकराणां चाकृतिभिर्जातिविशेषैरुपकूजितेषु २२
कामेन कलितैः क्षुधितैर्विलासादिभिराकृष्टमनोदृष्टिश्रयेषां ते १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवस्वपिवर्षेषु येपुरुषास्तेषां तदनुग्रहाय मयासौ वक्ष्यमाणानुग्रहश्च तदर्थं आत्मतत्त्वव्यूहेन स्वमूर्त्तिसमूहेन सन्निधीयते स
न्निहितो भवति १६ अपरः अर्वाचीनः पश्चान्नवमस्कंधे १७ भवानीनाथाः स्वामिनो येषां तैः स्त्रीगणानामर्बुदसहस्रैरवरुध्य
आत्मनः २ मानः सेवकैः सेव्यमानः प्रकृतिं कारणं आत्मनि समाधिध्यानं यस्य तेन रूपेण तद्वक्ष्यमाणं मंत्रादिकं अभिगृणन् जपन् १८
सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात् स्वयं तु अव्यक्ताय प्रमेयाय १९ हे भजन्य भजनीय त्वां त्वां परमीश्वरं भजे इ

नवस्वपिवर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि स
न्निधीयते १६ इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनि
ते मित्तज्ञः यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि १७ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरव
रुध्यमानो भगवतश्चतुर्मूर्त्तेर्महापुरुषस्य तुरीयां तामसीं मूर्त्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामा
त्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधावति १८ श्रीभगवानुवाच ॐ न
मो भगवते महापुरुषाय सर्वगुणसंख्यानायानंतायाव्यक्ताय नम इति १९ भजे भजन्यार
णपादपंकजं भगस्य कृत्स्नस्य परं परायणं भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभाव
मीश्वरं २०

५५

त्यन्वयः अरणं शरणं पादपंकजं यस्य कृत्स्नस्य भगस्य ऐश्वर्यादि षाड्गुण्यस्य परमयनमाश्रयं भक्तेषु अलमत्य
र्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन भवापहं संसारहरं भक्तो विस्तीर्णभावत्वात् तथात्वं अर्थाद् भक्ते
ष्वितिद्रष्टव्यं २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इश्वरत्वमुपपादयन् तामसत्वेन प्रसक्तमनादरं वारयति न यस्येति निरीक्ष्यमाणस्यापि दृष्टिर्मायागुणे विषये स्त्रितदृवि
भिः करणैः अणु अपि ईषदपि नाज्यते न लिप्यते किमर्थं निरीक्ष्यमाणस्य ईशे ईशनाय नियमनाय ईशेन मोहं संपदा
दित्वा कोपविक्षिप्तः अत्रैव धर्म्मे दृष्टांतः यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति अत आत्मन इंद्रियाणां
जिगीषुर्जेतुमिच्छुर्मुमुक्षुः तं कोऽनमन्येत नाद्रियेत २१ ननु सुरामद्याभ्यां मत्तस्य कुतो दृष्टिर्नाज्यते तत्राह असतो
दृक् दृष्टिर्यस्य तस्य स्वमायया क्षीवो मत्तइव यो भयंकरः प्रतिभाति मध्वासवाभ्यामाताम्रलोचन इव नागव

नयस्यमायागुणचित्तवृत्तिभिर्निरीक्षतोह्यण्वपिदृष्टिरज्यते ईशेयथानोजितमन्युरंहसां क
स्तंनमन्येतजिगीषुरात्मनः २१ असद्दृशोयः प्रतिभातिमाययाक्षीवेवमध्वासवताम्रलो
चनः ननागवध्वोर्हणईशिरेह्रियायत्पादयोः स्पर्शनधर्षितेंद्रियाः २२ यमाहुरस्यस्थि
५२ ति । तिजन्मसंयमंत्रिभिर्विहीनंयमनंतमृषयः नवेदसिद्धार्थमिवक्वचित्स्थितंभूमंडलंमूर्द्ध
सहस्रधामसु २३

धू विमोहनेन तथा प्रतिभानं युक्तमित्याह नेति पादार्चने यस्य पादयोः स्पर्शनेन धर्षितं मोहितमिंद्रियं मनो यासां
ता ह्रियाल्लज्जया भुजाद्यर्हणे न ईशिरे न शेकुः के स्तं न मन्येतेति पूर्वेणान्वयः २२ अस्य विश्वस्य स्थितिजन्म
संयमहेतुं यमाहुः अत एव त्रिभिः स्थित्यादिभिर्विहीनं अनंतं यमाहुः ऋषयो मंत्राः छंदोनुरोधेन दीर्घपाठ ऋ राम
अकारादेव मात्रोल्लक्ष्मीः सा च ऋषय अत्यर्थः अनंतत्वं दर्शयति मूर्द्ध सहस्रमेवा धामानि स्थानानि तेषु क्व ५२
चिदेकदेशे स्थितं भूमंडलं यो न वेद सिद्धार्थ सर्षपमिव तस्मैनम इति चतुर्थेनान्वयः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रजन्महेतुत्वंमहदादिद्वारेणप्रपंचयतिपस्यगुणानिर्मितामहान्नामविग्रहश्चासीत विज्ञानंसत्वंधिष्ण्यमाश्रयोयस्यसः
तस्यचित्तरूपेणेनसत्वप्रधानत्वात्सएवकिलाधिदेवोवासुदेवाभेदविवक्षयाभगवानजोब्रह्मायत्संभवः यस्माद्वल
संभवः णोश्चाहमहं त्रिवृतात्रिगुणेनस्वतेजसास्वविभूतिरूपेणाहंकारेणवैकारिकंदेवतावर्गंतामसंभूतवर्गमैद्रियंइंद्रिय
वर्गंचसृजामि २४ किंचएतेवयंमहदादयः सर्वेयस्यानुग्रहादिदंब्रह्मांडसृजामः कथंभूताः यस्यमहात्मनोवशेस्थि

यस्याद्यआसीद्गुणविग्रहोमहान्विज्ञानधिष्ण्योभगवानजः किल यत्संभवोहंत्रिवृतास्वते
जसावैकारिकंतामसमैद्रियंसृजे २४ एतेवयंयस्यवशेमहात्मनः स्थिताःशकुंताइवसूत्रयं
त्रिताः महानहंवैकृततामसेंद्रियाः सृजामसर्वेयदनुग्रहादिदं २५ यन्निर्मितांकर्ह्यपिक
र्मपर्वणींमायांजनोयंगुणसर्गमोहितः नवेदनिस्तारणयोगमंजसातस्मैनमस्तेविलयो
दयात्मने २६ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभुवनकोशवर्णनेसप्तदशोध्यायः १७

ताः संतः यतः सूत्रेणक्रियाशक्त्यायंत्रिताः प्रोताः शकुंताः पक्षिणइवलौकिकेनसूत्रेण वयमित्युक्तंकेतेत्यतआहमहान
तेर२ अहंकारः वैकृतादयः पूर्वोक्तवर्गाः २५ स्थितिलयहेतुत्वंदर्शयन्प्रणमति यन्निर्मितामेतांमायामेवायंजनोऽजोवेद श्यर२
नेत्युक्तंनिस्तारयोगमुपायंकर्हिचिदपिनवेदेतिस्थितिहेतुत्वंदर्शितं कीदृशींकर्माण्येवपर्वाणिग्रंथयः तानितयति
प्रापयतीतितथातां प्रलयहेतुत्वमाहविलीयतेस्मिन्निति विलयः उदेत्यस्मादितिउदयः तस्यविलयश्चोदयश्चा
त्मास्वरूपंयस्यतस्मैनमः २६ इतिपंचमेसप्तदशः १७ अष्टादशेतत्तोमेरोः पूर्वादिक्रमतस्त्रिषु त्रिषुचोत्तरवर्षेषुसेव्य
सेवकवर्णनं १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पं०

८१

भद्रश्रवाः वृषपतिः तस्य कुलपतयः सेवकमुख्याः १ भद्रश्रवस ऊचुरिति प्राणभन्तुपं धर्मोनिवत्नु गणलक्षणयोर्योगा न
त्तुगणिषु लिंगसमवायन्यायेन बहुवचनं ३ अयं जनो मिषन्नपि पश्यन्नपि घ्नतं हिंसन्तं न पश्यति नालोचयतीति भ
वि, गद्विचेष्टितमेव तच्चित्रम् अदर्शने लिंगं पुत्रं पितरं वा मृतं निर्हृत्य दग्ध्वा स्वयं तदुर्भयं धनं जिजीविषति जीवितुमि
च्छति जिजीविषुरिति पाठः शुद्धः ८ मामंजस्यं किं धर्मार्थं न हि यतः असत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्या
यन् ४ नन्वविद्वान् पश्यति किमत्र चित्रं तत्राह नश्वरं वदंति नमशास्त्रतः पश्यंति च समाधौ हे अज तथापि मायया मु

श्रीशुक उवाच तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य
प्रियां तनुं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदमभिगृणन्त उपधावन्ति १ श्रीभ
द्रश्रवस ऊचुः ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति २ अहो विचित्रं भगवद्विचेष्टितं घ्नं
जनोयं हि मिषन्न पश्यति ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषु ३ वदंति वि
श्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः तथापि मुह्यन्ति तवाज मायया सुविस्मितं कृ
त्यमजं नतोस्मि तं ४ विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरंगीकृतमप्यपावृतः युक्तं न चित्रं त्वयि
कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः

चेन१ ह्यंतिएतत् कृत्यं चेष्टितं सुविस्मितं अतिविचित्रं अतः शास्त्रादिश्रमं विहाय तं त्वामजं अंजसा नमामि ५ इदमपरं चित्रवत् प्रतीय नतोऽस्मि
मानमपि तत्वयि न चित्रमित्याह विश्वोद्भवादि कर्म अकर्तुरपि अपगतावृतेः आवरणं यस्मात्तादृशस्यापि ते अंगी
कृतं वेदेन तत्वयि तन्न चित्रं यतो मायया सर्वात्मनि कार्यस्य कारणे अस्मिन् कर्मयुक्तं वस्तुतः सर्वव्यतिरिक्ते निरुपाधौ व अ१५३
नास्त्येव तत्कर्तृत्वं च युक्तं ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमेश्वरत्वेनस्तुत्वाप्रस्तुतावर्णांचरितमाहेवदानीति नमस्योदेव्यत्रूपेणतिरस्कृतान् अपनीतान् नाचतुरंगश्चन्दरंगौतद्रूपो
विग्रहायस्यकवयेप्रह्लणतदर्थे अविततथहितायसत्यसंकल्पाय ७ उत्तरत्रप्रह्लादचरित्रेमहापुरुषस्यगुणानांभाज
नमाश्रयः दैत्यदानवकुलस्यतीर्थीकरणेशीलमाचरितंचयस्यफलसंकत्वेनव्यवधानशून्यभ्यासावनन्याव्याप अ्या३
भिचारीयाभक्तियोगस्तेनउपास्तेसवेते ७ तेजसामपितेजसेआविराविः अतिप्रकटोभव वीप्सावा कर्माशयान्

वेदान्युगान्तेतमसातिरस्कृतान्रसातलाद्योनृतुरंगविग्रहः प्रत्याददेवैकवयेभियाचेतेतस्मैनमस्तेवि
ने तथेहितायेति ७ हरिवर्षेचापिभगवान्नरहरिरूपेणास्तेतद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयि
तंरूपंमहापुरुषगुणभाजनोमहाभागवतोदैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोव्यव
धानानन्यभक्तियोगेनसहतद्वर्षपुरुषैरुपास्ते इदंचोदाहरति ७ ॐनमोभगवतेनरसिंहायन
मस्तेजस्तेजसेआविराविर्भववज्रनखवज्रदंष्ट्रकर्माशयान्रंधयरंधयतमोग्रसग्रसस्वाहा ॐ अभयमभयमात्म
हाहौंक्ष्रौं ८ स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायंतुभूतानिशिवंमिथोधियामनश्चभद्रंभ निभूयिष्ठाः
जतादधोक्षजेआवेश्यतांनोमतिरप्यहैतुकी १० मागारदारात्मजवित्तबंधुषुसंगोयदिस्यात्
भगवत्प्रियेषुनः यःप्राणवृत्त्यापरितुष्टआत्मवान्सिध्यत्यदूरान्नतथेंद्रियप्रियः ११

कर्मवासनाःकर्माशयानितिपाठः रागादीन्निरस्यनिर्देहमपिष्ठाः भूयाः ८ विश्वस्यखलोपिप्रार्थनेखलस्यापिभवेत्तत्र
असाधुपीडांविनानस्यात् अतोन्योन्यमंगलचेष्टापतोभूतानामन्योन्यघातंविनानभवेदित्याशंक्याह खलःप्रसीदतु अतो
येत्यज्यंतुभूतानिचमिथःशिवमेवध्यायंतुतेषांमनश्चभद्रमुपशमादिकंभजतुनोस्माकमपिमतिः अहैतुकीनिष्कामा अपिशब्दात्भक्ता
यदि सती १० नः संगःक्वापिमास्यात्कथंचित्स्यात्तर्हिआगारादिषुमास्यात् किंतुभगवत्प्रियेष्वेवआगारादिषुसंगे नांचमतिः
दोषमाह यइति इंद्रियप्रियः गृहाद्यासक्तः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰प॰ भगवत्प्रियसंगगुणमाह यषां भगवत्प्रियाणां संगाल्लब्धं मुकुंदविक्रमं श्रुतिभिः संस्पृशतां सेवकानां पुंसां अंतर्गतोऽजो मानसं सेवमानानां
मलं हरतीति कथंभूतं विक्रमं निजमसाधारणं वीर्यं वैभवं प्रभावातिशयो यस्य तीर्थं गंगादि मुहुः संस्पृशतोऽंगजं मलं के
वलं हरति तान् कोवा न सेवेतान्वयः ११ मानसमलापगमफलमाह यस्येति अकिंचना निष्कामा मनःशुद्धिहेतुर्भक्तिर्भव
ति तत्र अन्वयः सर्वदेवाः सर्वैर्गुणैः धर्मज्ञानादिभिः सह तत्र सम्यगासते नित्यं वसंति गृहासक्तस्य हरिभ ३
क्तिरहितस्य भवात्कुतो महतां गुणा ज्ञानवैराग्यादयो भवंति असति विषयसुखे मनोरथेन बहिर्धावतः १२ ननु हरि

सं १ यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं हरत्यजोंतः श्रुतिभिर्गतोंगजं कोवै न सेवेत मु
कुंदविक्रमं ११ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः हरावभक्तस्य कुतो महद्गु
५४ णा मनोरथेनासति धावतो बहिः १२ हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितं
हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां १३ तस्माद्रजोरागविषादमन्युमानस्पृहाभ
यदैन्याधिमूलं हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयं १४

विमुखस्य गृहासक्तस्यापि लोके महत्त्वं दृश्यते तत्संगत्वं तु उपहासास्पदमिति सहेतुकमाह हरिर्हीति यथा झषाणां
मीनानां आत्मेप्सितं तोयं तथा आत्मा तेन विना भावात् महानिति प्रसिद्धोपि गृहे यदि सज्जते तदा दंपतीनां मिथुनानां क्षुद्रादिष्वपि राम
प्रसिद्धं वयसैव केवलं यन्महत्त्वं तद्वत्तस्य भवति न तु ज्ञानादिना मिथुनेषु तेषु पूज्यमानेषु स्त्रीभ्यः पुंसां महत्त्वं यथा तथा ५४
१३ यस्मादेवं तस्मात् गृहं हित्वा अकुतोभयं नृसिंहपादं भजतेत्यसुरानुपदिशति कीदृशं गृहं रजस्तमआदि रागो अभिनिवे
शः रजआदीनां मूलं कारणं अत एव संसृतीनां जन्ममरणादीनां चक्रवालं मंडलं अविच्छेदं यस्मात् १४

जीवना ८

बालमिथुनेष्वप्यच्युत मिथुनानां महत्वं ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केतुमालेपिकामदेवस्वरूपेणास्तइतिशेषः किमर्थंआस्तेलक्ष्म्याइति प्रजापतेः संवत्सरः संवत्सरोवैप्रजापतिरि
तिश्रुतेः तस्यदुहितॄणांरात्र्यभिमानिन्योदेवताः पुत्राणांदिवसाभिमानिनांदेवतानांतेषांचप्रियचिकीर्षयापुरुषा
युषावर्षशतेनयान्यहोरात्राणितैःपरिसंख्यानंगणनायेषांषट्त्रिंशत्सहस्त्राणीत्यर्थः यासांदुहितॄणांमहा
पुरुषस्यमहास्त्रंचक्रंतस्यतेजसा १६ रमांरमयन्स्वीयाणींद्रियाणिरमयतेकेनसाधनेनरमयन् गत्या ह
अतीवसुललितयागत्यायाविलासस्तेनविलसितारुचिराहासलेशामंदस्मितंतत्सहितावलोकांविलोको
तयाकिंचिदुत्तं भितंचुचुंगितंसुंदरंयद्भ्रूमंडलंतेनसुभगंवदनारविंदंतस्यश्रियाचतद्दिवसाधिष्ठा

केतुमालेभगवान्कामदेवस्वरूपेणलक्ष्म्याः प्रियचिकीर्षयाप्रजापतेर्दुहितॄणांपुत्राणांचतद्वर्ष
पतीनांपुरुषायुषाहोरात्रपरिसंख्यानानांयासांगर्भामहापुरुषमहास्त्रतेजसोद्विजितमनसांवि
वि॰ ध्वस्ताव्यसवः संवत्सरांतेनिपतंति १६ अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोक
लीलयाकिंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रियारमांरमयन्निंद्रियाणिरमयते १७ तद्भ
गवतोमायामयंरूपंपरमसमाधियोगेनरमादेवीसंवत्सरस्यरात्रिषुप्रजापतेर्दुहितृभिरुपेताहःसु
चतद्भर्तृभिरुपास्तेइदंचोदाहरति १८ ॐ ह्रां ह्रीं ह्रूं ॐ नमोभगवतेहृषीकेशायसर्वगुणविशेषैर्विलक्षि
तात्मनेआकूतीनांचित्तीनांचेतसांचविशेषाणांचाधिपतयेषोडशकलायच्छंदोमयायान्नमयाय
सर्वमायायसहसेबलायकांतायकामायनमस्तेउभयत्रभूयात् १९
ओजसे।
वि॰
मनमयाय।

तद्भिरुपेता १८ सर्वैर्गुणविशेषैः श्रेष्ठवस्तुभिर्विलक्षितालक्षीकृतआत्मायस्यआकूतीनांक्रियाणांचित्तीनांज्ञानानां
चेतसांसंकल्पाध्यवसायादीनांविशेषाणांचतद्विषयाणांषोडशकलाअंशाः एकादशेंद्रियपंचविषयलक्षणायस्य
छंदोमयायवेदोक्तकर्मप्राप्यायअन्नमयायआन्नोपष्टंभेत्वात्अमृतमयायपरमानंदाविकारत्वात्सर्वमयायसर्व

र्वा

भा॰५॰ त्वकामेनैव त्वत्सेवकत्वात् अहं कृतार्थास्मि अन्यकामनया तु ग्रमहेयं तेन परिपूर्णमनोरथा॥ स्मुरित्याह स्त्रिय इति स्वत
एव हृषीकाणामीश्वरं पतिं संतं त्वामाराध्यया: स्त्रियोन्यं पतिं पतिकामानां हि कामाराधनं तेषु प्रसिद्धं तासामपत्या आर्थयंति॰
दीनि न पतयो न पातुं शक्ताः॥२०॥ आस्तां पतय एव न भवंतीत्याह स वा इति स च एवंभूतः पतिः स्वयं भवति क एव नान्यः
यो भवानात्मलाभात्परमन्यदधिकं न मन्यते इतरथान्याधीनसुखस्य न स्वतंत्रता अस्वतंत्रत्वे च मंडलेश्व त्रेना
राणां मिथो मिथो भयं स्यादित्यर्थः॥२१॥ किंच निष्कामभजनेन प्राप्तिर्णा एव सर्वकामा भवंति सकामभजनेन तु कामितमा
त्रं न नित्यं चेत्याह या स्त्री तस्य ते लक्षणस्य पादसरोरुहस्यार्हणं पूजामेव कामयेत् न फलांतरं सा खिलेषु कामे ते

स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेन्यं तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि
५५ यतो स्वतंत्राः॥२०॥ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं स एक एवेतरथा मिथो भ
यं नैवात्मलाभादधिमन्यते परं॥२१॥ या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा तदे
व रासीप्सितमीप्सितोर्चितो यद्भग्नयाच्ञा भगवन्प्रतप्यते॥२२॥ मत्प्राप्तयेजेशसुरासुरादयः स्तप्यंत उ
ग्रं तप ऐंद्रियेधियः ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोजित॥२३॥

पुत्वं प्रदाः सर्वान्कामान्प्राप्नोतीत्यर्थः॥ ईप्सितमीप्सितः फलांतरमायुरपेक्षितः सन्नर्चितश्चेत्तु तर्हि तदेवे
केरासि ददासि किंच यद्यतः फलभोगानंतरं भग्नयाच्ञा याचितार्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोति हि तु स्वं प्रा तम
प्नोति न ददासि न तु नित्यं॥२२॥ ननु ममार्हणं कुतः सर्वकामप्राप्तिः त्वमेव हि कामार्थिभिः सेव्यसे अत आह मत्प्राप्तये ५८
ब्रह्मादयस्तपस्तप्यंते कुर्वंति कथंभूताः ऐंद्रियसुखे धीर्येषां ते अलुक्समासः तथापि भगवत्पादपरायणात् ऋते मां
न विंदंति मत्कटाक्षविलसिता विभूतीर्लभंत इत्यर्थः यतस्त्वय्येव हृदयं यस्याः सा हे त्वत्परतंत्रा त्वदनुवर्तिन्येव

ला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं तद्रूपां प्रार्थयते सत्वमिति यत्त्वज्जनं विना न कश्चिदपि पुरुषार्थः सत्वं त्वदिति त्वया यत्करांबुजं सात्वतानां भक्तानां
शीर्ष्णि श्वधायिष्यपयान्यस्तं तन्ममापि शीर्ष्णि निधेहीति शेषः। कथंभूतं वदितं सर्वकामवर्षि तेन सङ्गिस्तु तेन च ममपि तवाना
रेदेः यतः हे वरेण्य मां वृथ्ण्यसि लक्ष्म्या विभर्षि श्रहो चित्रमेतत् मयि केवलमादरमात्रं भक्तेषु तु परमात्मरूपा श्रनईश्वर
यतः स्पर्तवैमायया ईहितं तत्को वितर्कयितुं समर्थः २४ सत्वाय सत्वप्रधानाय मुख्यतमाय प्राणाय सूत्रात्मने २५ अंतरु स्त्वनीव

सत्वं ममापश्युतशीर्ष्णि वदितं करांबुजं यत्वधायि सात्वतां। विभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहि
तमुहितुं प्रभुरिति २४ रम्यकेच भगवतः प्रियतमं मात्स्यमवतारं रूपं तदर्षपुरुषस्य मनोः प्राक्प्रदर्शि
तं स इदानीमपि महता भक्तियोगेनाराधयति इदं चोदाहरति २४ ॐ नमो भगवते मुख्यतमाय नमः
सत्वाय प्राणाय ॐ जसे सहसे बलाय महामत्स्याय नमइति २५ अंतर्बहिश्चाखिललोकपालकैर
रु: दृष्टरूपो विचरस्युरुस्वनः स ईश्वरस्त्वं य इदं वशेनयन्नाम्नायथा दारुमयीं नरः स्त्रियं २६ यंलोकपालाः
किलमत्सरज्वरा हित्वा यतंतोपि पृथक्समेत्य च पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्य
ते २७

दाम्भिकोनां दोयस्य यइदं विश्वं ब्राह्मणादीनाम्ना विधिनिषेधात्मकेन तन्त्रेपणं वशे नयन् नियमितवान् सत्वमीश्वरः तथाच
श्रुतिः तस्य वाकृतंतिनामानि दामानीति २६ न विद्युद्दयाचरान्नयंति लोकपालत्वात् कुतो हं तत्राह यमिति मत्सर
एवज्वरो येषां तेषं हित्वा द्विपदश्चतुष्पदः सरीसृपं जंगमं स्थाणु स्थावरं च यदत्र दृश्यते तत् किंचिदपि पातुं न शक्ताः स
त्वमेव प्राणरूपेण पालकईश्वरश्चेत्यर्थः तथाच श्रुतिः नो श्रहि सन्नाह मुख्यमस्मोत्यादि २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवतारचरितमाह भवानिमां क्षोणिमिमां यामनुनाससहमत्सहितां धृत्वेत्यध्याहारः ॥ ऊर्मिमालावति प्रलयार्णवे तु रुतुं ऊजसा क्रम
ने विचरनियद्धापानुमित्यस्यानुषंगः क्षोणीपातुं क्रमेने तु त्सहन इत्यर्थः ॥ पतः अजः कीदृशीं ओषधीनां च वीरुधां नि
५६ धिं आश्रयभूतां तस्मै नमः ॥ जंगमानां प्राणमूलात्मने नियंत्रे २८ नास्त्रियन्मां तां प्रियतमां २९ अकूपाराय कू वर्षीयसे
र्मायसर्वेः संपूर्णः सत्वगुणो विशेषणं यस्य ॥ नउपलक्षितं स्थानं यस्य चारिचरत्वात् च भेण वरीयसे कालानवछि

भवान् युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिं मया सहोरु क्रमतेज ओजसा
तस्मै जगत्प्राणगणात्मने नम इति २८ हिरण्मयेपि भगवान्निवसति कूर्मतनुं बिभ्राणः तस्य तत्
प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मंत्रमिमं चानुजपति २९
ॐ नमो भगवते अकूपाराय सर्वसत्वगुणविशेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे
नमो भूम्ने नमो नमोऽवस्थानाय नमस्ते ३० यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं बहुरूपरूपितं॥
संख्यान यस्यास्त्ययथोपलंभनात्तस्मै नमस्तेऽव्यपदेशरूपिणे ३१

नाय भूम्ने सर्वगताय अवस्थानाय आधाराय ३० निजमाययार्पितं प्रकाशितं मेतत् यत् दृश्यं स्वरूपं दृश्यं पृथिव्या
निरूपितं दि येस्य वरूपं यतः पृथक् नास्ति कथंभूतं बहुभीरूपैरूपितं यस्य च संख्या नास्ति कुतः अयथामिथ्योपलंभ वो
नात् नहि मरीचिकाजलमेतावदिति प्रसंख्यातुं शक्यते अव्यपदेशरूपिणे अनिरुक्तप्रपंचाकाराय ३१ ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संख्यायया तत्वदृशापनीयते तस्मै नमः २

रिक्को१

वह द्रूपत्वं दर्शयन् तस्य स्वराहत्यतिरेकमाह जरायुजेति द्वीपग्रहर्क्षेत्यभिधेयस्त्वमेवैकः नत्वद्यतिरेकोस्तिसर्वंखल्वि
दं ब्रह्मेति श्रुतेः ३२ सप्रपंचतामभ्युपेत्य तन्निरासेन प्रणामति यस्मिन्निति असंख्येया अनंता विशेषा येषां तानि नामानि
रूपाण्याकृतयश्च यस्य तादृशे यस्मिंस्त्वयि कविभिः कपिलादिभिरियं चतुर्विंशत्यादि संख्या कल्पिता सतीयया
तत्त्वदृशा यत्तत्त्वज्ञानेनापनीयते तस्मै तसांख्यासिद्धांतरूपाय नमः परमार्थज्ञानरूपायेत्यर्थः ३३ एषा भूरुपधाव

जरायुजं स्वेदजमंडजोद्भिदं चराचरं देवर्षिपितृभूतमैंद्रियं द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षे
त्यभिधेय एकः ३२ यस्मिन्नसंख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयं संख्यानिदर्शनाय त इति ३३
उत्तरेषु कुरुषु भगवान्यज्ञपुरुषः कृतवराहरूप आस्ते तंतु देवी हैषा भूः सह कुरुभिरस्खलितभक्ति
योगेनोपधावति इमां च परमामुपनिषदमावर्तयति ३४ ॐ नमो भगवते मंत्रतत्त्वलिंगाय यज्ञक्रत
वे महाध्वरायमहापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ३५ यस्य स्वरूपं कवयो विपश्चितो
गुणेषु दारुष्विव जातवेदसं म ~~~~~~ ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ३६
थ्नं

निहत्यन्वयः ३४ मंत्रैस्तत्त्वेन लिंग्यते इति तथा तस्मै यज्ञाश्च यूपाः क्रतवः सयूपाः तद्रूपाय अत एव महांतोध्व
राः अवयवभूता यस्य कर्मणाः शुक्लाय शुद्धाय यज्ञानुष्ठात्रे त्रियुगाय कृतयुगे यज्ञाभावात् यद्वा कलियुगे छन्नत्वात्
३५ कवयो विद्वांसः विपश्चितो निपुणाः गुणेषु देहेंद्रियादिषु म ~~ न्तिविचिन्वंति म ~~ विवेकसाधनेन मनसा थ्ना२
क्रियार्थैः कर्मभिस्तत्फलैश्च गूढं अप्रकाशमानं दिदृक्षवः एवं मथनेन ईरितः प्रकटितः आत्मा स्वरूपं यस्य तस्मै
नमः ३६
थ्नं२

ययी२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प० मथुनेमेवदर्शयन्नाहद्रव्यंविषयः। क्रियाइंद्रियव्यापारः हेतुर्देवता अयनंदेहः इशः कालः। कर्त्ताहंकारः। एतेमायायागुणैः
कार्यरूपलक्षणैर्वस्तुत्वेननिरीक्षितायआत्मानेतस्मै अन्वीक्षयाविचारेण अंगैर्यमनियमादिभिरतिशयात्मानिश्चय
वतीबुद्धिः। येषांतेनिरस्तामायायानिमित्तात्याकृतिर्यस्मात्तस्मैनमः ३७ तदेवनिर्गुणरूपेणतथापरमेश्वररूपेणव
र्णयन्निकरोतीति यस्येक्षितुर्जीवार्थमीक्षितं अल्पंतानिच्छायाईक्षणायोगात् स्वार्थंतुनक्षितं विश्वस्थित्यादि

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने अन्वीक्षयांगातिशयात्मबुद्धिभि
र्निरस्तमायाकृतयेनमोनमः ३७ करोतिविश्वस्थितिसंयमोदयंयस्येप्सितंनेप्सितमीक्षितु
५७ र्गुणैः। मायायथायोभ्रमेत्तदाश्रयंग्राव्णोनमस्तेगुणकर्मसाक्षिणे ३८ प्रमथ्यदैत्यंप्रतिवा
रणंमृधेयोमांरसायाजगदादिशूकरः। कृत्वाग्रदंष्ट्रेनिरगादुदन्वतः। क्रीडन्निवेभःप्रणता
स्मितंविभुमिति ३९ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेकोशवर्णनेअष्टादशोध्यायः॥१८
भुव

सगुणैर्मायाकरोतितस्याजडत्वेऽपीश्वरसंनिधानात्प्रवृत्तिंदर्शयन्नाह अयोयथात्मौहग्रावाणोऽयस्कांतसंनिधि राम
मात्रेभ्रमतितदाश्रयंतदभिमुखंसन्नुगुणानांकर्मणांजीवादृष्टानांचसाक्षिणेतस्मैनमः ३८ अवतारचरितमा ५७
ह प्रमथ्येति योजगतामादिकारणभूतः शूकरः मांपृथ्वींअग्रदंष्ट्रे दंष्ट्राग्रेकृत्वारसातलादारभ्यउदन्वतः प्रल
यार्णवात् इभोगजइवनिरगात् तत्रअप्रतिगजंगुल्मैदैत्यंप्रमथ्य क्रीडन्स्थितः तंविभुंप्रणतास्मीत्यन्वयः ३९
इतिपंचमेअष्टादशः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उनविंशेकिंपुरुषेभारते चोपवर्ण्यते सेव्यसेवकभावश्चभारतश्रेष्ठ्यमेवच १ भक्तोचासौभगवांश्चतस्यकथां २ आ
र्योणांलक्षणानिशीलव्रतंचयस्मिन् उपशिक्षितात्मनसंयतचित्तायउपासितानुसृतोलोकोयेनसाधुवादः सा
धुत्वप्रसिद्धिः तस्यानुकषणायनिकषोश्मवन्निर्द्धारस्थानायपरमस्मै नम इत्यर्थः ३ श्रीरामंपरमार्थरूपेणप्रणमति
यदेकं वेदान्तेषुप्रसिद्धंतत्त्वंतत्प्रपद्येत कथंभूतंविशुद्धश्चासावनुभवश्चसएवमात्रास्वरूपयस्य विशुद्धत्वेहेतुः

श्रीशुकउवाच किंपुरुषेवर्षेभगवंतमादिपुरुषंलक्ष्मणाग्रजंसीताभिरामंरामंतच्चरणसन्नि
कर्षोभिरतः परमभागवतोहनूमानसहकिंपुरुषैरविरतभक्तिरुपास्ते आर्ष्टिसेनेनसहगंध
वैरनुगीयमानांपरमकल्याणींभर्तृभगवत्कथांसमुपशृणोतिस्वयंचेदंगायति २ ॐनमोभ
गवतेउत्तमश्लोकायनमः आर्यलक्षणशीलव्रतायनमउपशिक्षितात्मनेउपासितलोका
यनमः साधुवादनिकषणायनमोब्रह्मण्यदेवायमहापुरुषायमहाराजायनमइति ३ यत्तद्वि
शुद्धानुभवमात्रमेकंस्वतेजसाध्वस्तगुणव्यवस्थं प्रत्यक्प्रशांतंसुधियोपलंभनंह्यनामरूपंनि
रहंप्रपद्ये ४

प्रशांतं तत्रापिहेतुः स्वतेजसास्वरूपप्रकाशेन ध्वस्तागुणानांविविधाजाग्रदाद्यवस्थायस्मिन् अनुभवमात्रत्वेहेतुः
प्रत्यक् दृश्यादन्यत्वात् तत्कुतः अनामरूपं ननुवस्तुनएवंभूतस्यापिजीवस्याज्ञकसर्वविपर्ययो दृश्यते तत्राहनि
रहं अहंकाराभावात्‌नतथाविपरीत्यमित्यर्थः ननुश्रीरामस्यरूपं नैवंप्रतीयते तत्राह सुधियापुंसाउपलभ्य
त इत्युपलंभनं शुद्धचित्तेनब्रह्मत्वेनैवोपलभ्यत इत्यर्थः ४

वि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प०

कथं तर्हि दशरथपुत्रत्वं तत्राह विभोर्मर्त्यावतारस्तु रक्षसो रावणस्य वधाय तस्य मनुष्यादन्यतोवध्यत्वात् न केवलमेवा
वत् किंतु इह संसारे स्त्रीसंगादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः अन्यथा स्वस्वरूप
रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसनानि कुतः स्युः ५ विषयासक्त्यभावेन व्यसनानर्हत्व
मुपपादयति नैवेति स भगवान् त्रिलोक्यां क्वापि सक्तः यत आत्मवतां धीराणामात्मा सुहृत्तमः अतो न स्त्रीकृतं
मोहं प्राप्नुयात् न लक्ष्मणं च विदेव दूतेन श्रीरामसमंत्रयता विज्ञापितं अत्रागतः स यावत् ध्यास्यति तदैव द्वारि स्थि

मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः कुतोऽन्यथा स्याद्रमतः स्व आत्मनः
५८ सीताकृतानि व्यसनानीश्वरस्य ५ नैवै स आत्माऽऽत्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवा
न्वासुदेवः न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ६ न जन्म नूनं म
५.२ हतो न सौभगं न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये
ष्प२ बत लक्ष्मणाग्रजः ७ सुरोऽसुरो वाप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमं भजेत रामं सु
मनुजाकृतिं हरिं य उत्तराननयत्कोशलान् दिवमिति ८

नी२

तं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं लक्ष्मणं हंतुमुद्यतोऽवशिष्टवाक्यात्त्याजनं च न युक्तमित्यर्थः ६ अतः राम
श्रीराम एव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादि किंतु भक्तिरेवेत्याह न जन्मेति महतः पुरुषाज्जन्म
ति महतः श्रीरामस्य वा सौभगं सौंदर्यं वाक्कृतिर्जातिः यद्यस्मात् जन्मादिभिर्विसृष्टानप्युपेक्षितानपि नो वनचरान् ५८
क्ष्म वत अहो लक्ष्मणस्याग्रजोऽपि सख्ये सखित्वे कृतवान् ७ तस्मात्सुरो वाऽसुरो वान्योऽपि यः कोऽपि श्रीरामं सर्वप्रकारेण भजेत सु
कृतज्ञम् अल्पीयस्यापि भजने बहु मानिनं उत्तरान् कोशलान् अयोध्यावासिनः ८

सर्ग

वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपचितैर्धर्मादिभिरात्मोपलम्भं प्रतियेन तत्तपश्चरति नमस्तु उपशमइन्द्रियाणां संयमः उपरमो निरहंकारता आत्मावता मनु
ग्रहायनस्वार्थं इश्वरत्वात् एवं भगवदनुभावउपवर्णनेयेन पंचरात्रेण तत्सावर्णमनोः उपसरतिसेवते १० उपरतानां
त्माय निरहंकाराय ११ असंतो आसो विविक्तो असाक्षी च तस्मै नमः असक्तत्वं दर्शयति अस्यविश्वस्य सर्गादिषु कर्तृ
पियानबध्यते अहंकर्तेति नमन्यत विविक्तत्वमाह देहगतोपि देहिकैः क्षुत्पिपासादिभिर्यो न हन्यते साक्षित्वमाह यस्य द्रष्टु

नाभिभूयते १

भारतेपि वर्षे भगवान्नरनारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलम्भनमनुग्र
हायात्मवतामनुकंपयातपोव्यक्तगतिश्चरति एवं तं भगवान्नारदो वर्णाश्रमवतीभिः प्रजाभिर्भगवत्प्रोक्ता
भ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सांख्यं वर्णरूपं वक्ष्यमाणं परमभक्तिभावेनोपसरति इदं चा
भिगृणाति १० ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमो किंचनवित्ताय ऋषिऋषभाय न
रनारायणाय परमहंसाय परमगुरवे आत्मारामाधिपतये नमो नम इति गायति चेदं कर्तास्य सर्गा
दिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते तस्मै नमो सक्तविविक्त
साक्षिणे ११ इदं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान्जगाद यत् यदंतकाले त्वयि नि
र्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः १२

भारतीय
श्लो २

रपि सतो दृष्टिर्गुणो हेयैर्न दूष्यते न विक्रियते १२ योगकौशलं निरूपयन् योगं प्रार्थयते इदमिति त्रिभिः हे योगेश्वर हिर
ण्यगर्भो यद्योगनैपुण्यं जगाद इदमेव तत् किं जन्मप्रभृति भक्त्यां तु कालेपुमान्त्वयि मनो धारयेदिति यत् कथंभूतः स
न् उज्झितदुःकलेवरं तदभिमानो येन १२ श्री श्री श्री श्री श्री श्री श्री श्री श्री श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दि०

भा०पु० अन्यथा तस्य शास्त्राभ्यासो श्रम एवार्थः स्यात् हे ऐहिकामुष्मिककामेषु लंपटो मुखे सुतादिषु योगक्षेमं चिंतयन् कुत्सितस्य कलेवरस्यात्ययानुमन्त्यो शंकितः तथा विद्वानपि सन् पुमान् शंकितः तस्य परम् तः श्रम एव १४ यस्मादि दुष्पापमेव देव्यो न

५९ यथेहि कामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन् शंकितो विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलं १४ यन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्मायया हं ममतामधोक्षज भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमिति १५ भारतेप्यस्मिन्वर्षे सरिच्छैलाः संति बहवः मलयो मंगलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमान् ऋक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोमुखइंद्रकीलः कामगिरिरिति चान्ये शतसहस्रशः शैलास्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः १७ एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशंति चंद्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुंगभद्रा कृष्णवेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिंधु अंधः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधवती सप्तवती सुषोमा शतद्रुश्चंद्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः १८

नो० तस्मात् हे प्रभो अधोक्षज त्वमेव योगं विधेहि कीदृशं त्वयि स्वभावं सहजवासनारूपं येन योगेन वयं त्वन्मायया नः कुकलेवरार्पितां अहं ममतां शीघ्रं भिंद्याम त्यजेम सुदुर्भिदां उपायांतरैः सर्वथात्यक्तुमशक्यां १५ उक्तारू नवदस्मिन्नपि वर्षे सरितः शैलाश्च संति १६ नितंबप्रभवाः तेभ्यः संभूताः १७ आत्मना च देहेनाप्युपस्पृशंति १८ ५९

पुरुषैः १ स्व १ स्वा २

लब्धजन्मभिः पुरुषैः सात्विकादिसंकल्पेन कर्मणा दिव्यादिगतय आत्मनि विधीयंते साध्यंते हि यस्मात्सर्वा एव गतयः कर्मा
नुसारेण सर्वेषां भवति १९ यथावर्णं यथाविधानं मोक्षप्रकारः संन्यासवनस्थादिना देवेति क्रमेणास्मिन्नेव वर्षे नृणाम्
अपवर्गश्च भवति एतच्च कर्मादिदेहसाधनसंभवाभिप्रायेणोक्तं न त्वन्यत्रापवर्गाभावेन तदुपपत्तिर्वादरायणादि
संभवादिति देवानामपि मोक्षस्य सूचितत्वात् २० अपवर्गस्वरूपमाह योसाविति अनात्म्ये आत्मनि भवमात्म्यं रागा

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकग
तयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयंते १९ यथावर्णविधानमपवर्गश्चापि भवति पि २
२० योसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमि
त्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेण यदा हि महापुरुषपुरुषप्रसं
गः २१ एतदेव हि देवा गायंति अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः
यैर्जन्म लब्धं नृषु भारताजिरे मुकुंदसेवौपयिकं स्पृहा हि नः २३

दि तद्रहितेऽनिरुक्ते वाचामगोचरेऽनिलयनेऽनाधारे अनन्यनिमित्तोऽहेतुको भक्तियोग एव लक्षणं स्वरूपं यस्य
कथंभवति नानागतीनां निमित्तं याविद्याग्रंथिस्तस्या रंधनं छेदनं तद्द्वारेण महापुरुषा विष्णुभक्तास्तैः प्रकृष्टः
यो १ संगो यदा भवति तदा २१ एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायंति २२ अमीषामेभिः उतो स्वित् अथवा स्व पुरुष २
यमेव साधनं विनैव हरिरेषां प्रसन्नो भूतः एवं भूतस्य पुण्यस्य दुष्करत्वात् भारताजिरे भारताङ्गणे नः केवलं स्पृहा
यैर्वयं तु एतन्मुकुंदसेवोपयोगि नृषु जन्म न लेभे २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु १

भा॰प॰ स्पृहा मे वा हकिमित्यादि सप्तभिः दुष्करैः क्रत्वादिभिर्नः फल्गुना तुच्छेन द्युजयेन स्वर्गादि प्राप्त्या किं न किंचित् फलं कुतः
यत्र नारायणपादपंकजस्मृतिर्नास्ति प्रमुष्टा तिशायिता इंद्रियाणां सुत्सवात् भोगात् प्रमुष्टा भूत् २४ क्षणमल्पायुषं यपा मेवा २
चरत्वेहतुः मर्त्येनापि देहेनापि क्षणेनैव कालेन कृतं कर्म सन्न्यस्य हरेः पदं सम्यग्यांति २५ अतो यत्र वैकुंठकथामृतनद्या ति २

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना न यत्र नारायणपादपंकजस्मृतिः प्रमुष्टा
तिशयेंद्रियोत्सवात् २४ कल्पायुषां स्थानजयात् पुनर्भवात् क्षणायुषां भारतभूजयो वरः क्षणेन म
र्त्येन कृतं मनस्विनः सन्न्यस्य संयांत्यभयं पदं हरेः २५ न यत्र वैकुंठकथासुधापगा न साधवो भा
गवतास्तदाश्रयाः न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न वै स सेव्यतां २६ प्राप्ता नृ
९॰ जातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां न वै यतेरन्नपुनर्भवाय ते भूयो वनौका
इव यांति बंधनं २७ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुतः एकः पृथङ्नाम
भिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः २८

न संति तदाश्रयाः कथापगाश्रयाः महांतोन्हसाधून् उत्सवा येषु ताः दृशा यज्ञेशस्य मखाः पूजाः स सुरेशस्य ब्रह्मणोपि लोको न से राम
व्यतां २६ अमुमुक्षून्नराचिंदंति प्राप्ता इति ज्ञानं च तदर्थाः क्रिया अनुष्ठानि द्रव्याणि च तेषां कलापेन संभृतां पूर्णां अपुन ९॰
वनौकाइव ३ र्भवाय मोक्षाय वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनः पतित तस्मिन्नेव वृक्षे प्रमत्ता विहरंति तद्विधं यथा तद्ध्येतत
द्वत् २७ अहो भारतवर्षीयाणां भाग्यमित्याह यैरिति अमेयवान् इष्टं निवेदयामि इत्येवं भागशो निरुप्तं पृथक् कृष्णेन कथं विधि
ना प्रकारेण मंत्रेण च वस्तुतः चरुपुरो डाशादि भेदेनेंद्रदेवतामुद्दिश्य त्यक्तं च [illegible] ममेदमिति स्वीकृत्य त्या निरुप्तं
गानंतरं अश्नाति सर्वथः पृथगिंद्रादिनामभिराहुतः आहूतः आशिषां प्रभुः स्वयं पूर्णोपि हरिः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पं० तत्रापि निष्कामाः कृतार्था इत्याह। सत्यमिति। अर्थितः सन् अर्थितं ददाति इति सत्यं तथापि परमार्थदो न भवति यस्मात् पु पं २
२७ नर्येन दत्तानन्तरं पुनरर्थिता भवति ननु नार्थितं अत्र किमपि न दद्यादित्याशंक्याह अनिच्छतामपि निष्कामानां तु इच्छापि नो २
धानं आच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव संपादयति २७। स्विष्टस्य सम्यगर्जनस्य सुकृतस्य

सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः। स्वयं विधत्ते भजतामनिच्छतामिच्छापिधा
नं निजपादपल्लवं २७ यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनं तेनाज
नाभे स्मृतिमज्जन्म नः स्यात् वर्षे हरिर्यद्भजतां शं तनोति ३० श्रीशुक उवाच जंबूद्वीपस्य च राजन्नु च २
पद्वीपानष्टौ हैक उपदिशंति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पि
तान् तद्यथा स्वर्णप्रस्थश्चंद्रशुक्ल आवर्तनो रमणको मंदरहरिणः पांचजन्यः सिंहलो लंकेति र ३
एवं तव भारतोत्तम जंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णितः इति श्रीभागवते महापुराणे पं यथोपदेशा २
चमस्कंधे जंबूद्वीपवर्णनं नामैकोनविंशतितमोऽध्यायः॥ १९ ॥ छ ॥ छ ॥

भा०पं० १ सम्यक् प्रवचनस्य सुकृतस्यान्यस्य कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं यदि किंचिदस्ति तेनाजनाभे वर्षेऽस्मा
केजन्म स्यात् कीदृशं स्मृतिमत् हरिरेव सेव्य इत्यनुसंधानयुक्तं यतो हरिर्भजतां शं सुखं तनोति २१ पंचमे ए स २
कोनविंशः। विशेषः प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः लोकालोकस्थितिं चांते वहिर्भागादिमानतः॥१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यि ३

भा॰प॰ तावतालक्षविस्तारेण २ परिक्षिप्तः परिवेष्टितः ४ उपास्ते तिष्ठति ४ आकलय्य समर्प्य ५ अभिज्ञाताः प्रसिद्धाः
सप्तैव अन्ये च पर्वतानद्यश्च सहस्रशः संतीत्यर्थः मानसोत्तरस्य मंडलाकारत्वात्किं तेन प्लक्षादिपंचद्वीपेषु व
र्षोद्वयस्तिर्यगेरवाकारावुभयतोऽसंस्पृशः इतिगम्यते अन्यथा सप्तविभागासंभवाच्चैवंसप्तवर्षाणां पूर्वादिक्रमे ः स म वर्ष ३

श्रो १

ऋषिरुवाच अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते जंबूद्वीपो
विस्तार २ यं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जंब्वाख्येन लवणोदधिरपि ततो द्वि
गुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन ३ प्लक्षो जंबूप्रमाणो द्वीपा
ख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः तस्याधिपतिः प्रियव्रतात्मज इध्म
६२ ३ जिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम स ५ नो॰
य म ४ शिवं यवसं सुभद्रं शांतं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभि
राम॰स्कं॰ ज्ञाताः मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशै
३ लाः अरुणा नृम्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरेति महानद्यः ६ यासां ज
लोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो
विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते राम

मोक्षेश्च ६ जलोपस्पर्शनेन विधूतं रजस्तमश्च येषां हिंसादयो ब्राह्मणादिस्थानीयाः विबुधोपमसंदर्शनं ला ६१
मस्वेदादिरहितं रूपं प्रजननं मैथुनात्पादनं च येषां ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुष।

विगीता अपि द्वीपमंत्राचाख्यायते प्रत्नस्य पुराणस्य विष्णोर्यद्रूपं तत्स्वर्यई महि शरणं व्रजेम कथंभूतं सत्यादीनां मात्मा
नं अधिष्ठातारं तत्र सत्यमनुष्ठीयमानो धर्मः ऋतं प्रमीयमानो धर्मः ब्रह्मणस्तद्बोधकस्य वेदस्य तस्य शुभफलस्य २

प्रत्नस्य विष्णो रूपं यत्तत्सत्यस्यर्तस्य ब्रह्मणः अमृतस्य च मर्त्यो अस्मर्यमात्मानमीमहि ८ ष्लक्षादि
षु पंचसु पुरुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति सर्वेषामौत्पत्तिकी सिद्धिरविशेष
णावर्तते ष्लक्षस्तु समानेनेक्षुरसोदेनावृतो यथा तथा द्वीपापि शाल्मलो द्विगुणविशालः समानेन
सुरोदेनावृतः परिवृंक्ते यत्र ह वै शाल्मली ष्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छं
दस्तुतः पतत्रिराजस्य सा द्वीपहूतये उपलक्ष्यते तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसु
तेभ्यः सप्तभ्यस्तन्नामानि सप्तवर्षाणि व्यभजत् सुरोचनं सौमनस्यं रमणकं देववर्हं पारिभद्रमा
प्यायनमविज्ञातमिति तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः सुरसः शतशृंगो वामदेवः कुंदः
कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति अनुमतिः सिनीवाली सरस्वती कुहू रजनी नंदा राकेति त
द्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषुंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते ११
स्वगोभिः पितृदेवेभ्यो विभजन् शुक्लकृष्णयोः अथः प्रजानां सर्वासां राजा सोमो न आस्त्विति ११

मर्त्यो अमृ भक्तस्य लरे

स्य ८ सुपर्णोसि गरुत्मां त्रिवृत्ते शिर इत्यादि श्रुतेः छंदोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छंदस्तुतस्तस्य द्वी
पस्य हूतये व्यपदेशाय ११ स्वगोभिः स्वरश्मिभिः अथः अन्नं सोमो नो राजा आस्तु अभिमुख्येन भवतु हे स्व
धेति स्वविवक्षया संधभावः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पं॰ एवंसुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीप इत्यन्वयः सुरैषणानि सुकोमलशिखाणि रोचिषा ॥ हे जातवेदः त्वं साक्षात् परस्पत्र
ह्मणो हेर हव्यवाद सि त्वत्तो देवानां यज्ञेन पुरुषं हरिमेव यज अंगानां नामादत्तेऽग्निस्समर्पयेत्यर्थः २२ उप

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्त
द्वीपाख्यापको ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्य
रेतो नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत वसुवसुदानदृढरुचि
नाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनामभ्यः तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैवावच
क्रश्चतुःशृंगः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविंदा श्रुत
विंदा देवगर्भा घृतच्युता मंत्रमालेति ॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्ताः कु
शलकसंज्ञा भगवंतं जातवेदसरूपिणं कर्मकौशलेन यजंते १२ परस्य ब्रह्मणः साक्षाज्जातवेदो
सि हव्यवाट् देवानां पुरुषांगानां यज्ञेन पुरुषं यजेति १३ तथा बहिः क्रौंचद्वीपो द्विगुणः समानेन
क्षीरोदेन परित उपक्लृप्तः वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौंचो नाम पर्वतराजो द्वीपनाम
निर्वर्तक आस्ते १४ योसौ गुहप्रहरणोन्मथितनितंबकुंजोपि क्षीरोदेनाभिषिच्यमानो भगवता
वरुणेनाभिगुप्तो विभयो बभूव १५ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि
सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याणय
शस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लो
हितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो व
र्द्धमानो वेष्टितः यथा कुशद्वीपो घृतोदेन वृतः १३ गुहस्य कार्तिकेयस्य प्रहरणेनायुधेनोन्मथितनितंबाः कुंजानि यस्य १४

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स्क०५

आपोमयं अम्मयं १६ हे आपः पुरुषवीर्याः ईश्वराद्लब्धसामर्थ्या भवथ अतएव भूर्भुवः स्वः त्रैलोक्यं पुनंत्यः ता भवत्योनोऽस्माकं स्पृष्टा
स्पर्शेनं कुर्वत्यो भुवः शरीराणि पुनंतु यतः आत्मना स्वरूपेण वा अमीव घ्नीः पापहंत्र्यः १७ दध्नो मंडरसः सएवंमुदकं यस्य १८

रति
घी
अभयामृतो कौ आर्यका तीर्थवती रूपवती पवित्रवती शुक्लेति १५ यासामंभः पवित्रममलमुपयुंजानाः पु
रुषर्षभद्रविणदेवसंज्ञावर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते १६ आपः पुरुषवीर्याः स्थ
पुनंतीर्भूर्भुवः स्वः ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति १७ एवं परस्तात्क्षीरोदात्परित उपवे ति
शितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमंडोदेन परीतः १८ यस्मिन् शाको नाम महीरु
हः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगंधस्तं द्वीपमनुवासयति तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना
मेधातिथिः सोपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजववेपमानधूम्रा २
नीकचित्ररेफबहुरूपविश्वाधारसंज्ञान्निधाप्याधिपतीन् स्वयं भगवत्यनंत आवेशितमतिस्तपो
वनं प्रविवेश एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृंगो बलभद्रः शतकेसरः सह १८
स्रस्रोतो देवपालो महानस इति अनघायुर्दा उभयस्पृष्टिरपराजिता पंचपदी सहस्रस्रुति
निजधृतिरिति तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवंतं वाय्वात्मकं प्राणा
यामविधूतरजस्तमसः परमसमाधिना यजंते १९ अंतः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः
अंतर्यामीश्वरः साक्षात्पातु नो यद्वशे इदं २०

यस्य पर्णान्यंतः खरस्पर्शानि बहिर्मृदुस्पर्शानि स शाको नाम वृक्षः १९ आत्मकेतुभिः प्राणादिवृत्तिभिः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वलनशिखावदमलानां कनकपत्राणां अयुतानामयुतानि यस्य तत् २१ देवानामहोरात्राभ्यां उत्तरदक्षिणायनाभ्यामि
त्यर्थः २२ ब्रह्मरूपिणं कमलासनमूर्त्तिं सकर्मकेन ब्रह्मसालोक्यादिसाधनेन २३ कर्ममयं कर्मफलरूपं ब्रह्मलिंग

एवमेव दधिमंडोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समंतत उपकल्पितः समानेन स्वादू
न दकेन समुद्रेण बहिरावृतो यस्मिन् बृहत् पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः
६२ कमलासनस्याध्यासनं परिकल्पितं तद्द्वीपमध्ये मानसोनामैक एवार्वाचीन पराचीन नर ३
या वर्षयोर्मर्यादाचलो ऽयुतयोजनोच्छ्रायायामः २९ यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपाला
नामिंद्रादीनां यदुपरिष्टात् सूर्यरथस्य मेरुं परिक्रमतः संवत्सरात्मकं चक्रं अहोरात्राभ्यां परिभ्रमतः देवानां
प्य परिभ्रमति तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणकधातकिनामा
नौ वर्षपती नियुज्य स स्वयं पूर्वजवत् भगवत्कर्मशील एवास्ते तद्वर्षपुरुषा भगवंतं ब्रह्म
रूपिणं सकर्मकेन कर्मणाराधयंति इदं चोदाहरंति २३ यत्तत्कर्ममयं लिंगं ब्रह्मलिंगस
मर्चयेत् भेदेनैकात्मेहं तत्तस्मै भगवते नमः इति २४ ततः परस्ताल्लोकालोकनामाचलो लोका
एकांतमद्वयं शांतं लोकयोरंतराले परित उपक्लेप्तः २५
क्षिप्तः

तियस्मात् एकस्मिन्नेव परमेश्वरे ऽंतो निष्ठा यस्य तत् अतएव वस्तुतो द्वैतं २४ ततः शुद्धोदात् परस्ताल्लोकः सूर्याद्यालो ६३
कवान् देशः अलोकस्तद्बहिः तयोरंतराले मध्यतयो विभागार्थमित्यर्थः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अर्द्धं पुष्करद्वीपेनेप सत शुद्धोदः षण्णवतिलक्षाणि २ सार्द्ध ९

ततः परस्तादित्युक्तं तदेव क्रियंतांतरेणान्यपेक्षायां तदंतर्वर्तिनीं भूमिमाह यावन्मानसोत्तरं मेर्वंतरं सार्द्धसप्तलक्षोत्तरं कोटि
२ च परिमितं तावती भूः शुद्धोदात् परतो नास्ति तत्र प्राणिनोपि संति ततः कांचनी भूमिरन्यास्तीत्यर्थः सा च एकोनचत्वारिंशल्लु
क्षोत्तरकोटाष्टकपरिमिता ज्ञेया "एवं हि सति मेरुतो लोकालोकपर्यंतमंतरं सार्द्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भव
त्रि २ ति एतदेव शेषवत्तत्रोक्तं कोटिद्वयं द्वीपं यात्रात्सलक्षा गतः परं पंचाशल्लक्षसहस्राणि सप्तद्वीपाः ससागराः ततो हि ममयी
भूमिर्देशकोटावरा तेन देवानां क्रीडनार्थाय लोकालोकमातः परं इति अत्र चतुर्दशकोटित्वं पूर्वोक्तभूम्या सह द्रष्टव्यं॥

न्य ४

यावन्मानसोत्तरमेर्वोरंतरं तावती भूमिः कांचन्यादर्शतलोपमा यस्यां प्रहिताः पदार्थो न कथंचित्
पुनः प्रत्युपलभ्यंते तस्मात्सर्वसत्त्वपरिहृतासीत् लोकालोकइति समाख्यायते तेनाचलेन लो आ २
स्यां कालोक अश्रांतरावर्तिनावस्थाप्यते २६ स लोकत्रयांतपरितइ श्वरेणाविहितः २७ यस्मात्सूर्यो
दीनां ध्रुवापवर्गाणां गभस्तयोर्वाचीनां भवितुमुत्सहंते तावदुन्नहनायामः २८ एतावांल्लोक
सं विन्यासो मानलक्षणसंस्थाभिर्विचिंतितः कविभिः स तु पंचाशत्कोटिगुणितस्य भूगोलकस्य
तुरीयभागोयं लोकालोकाचलः २९ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरु
णाधिनिवेशिता ये द्विरदपतयः ऋषभः पुष्करचूडो वामनोपराजित इति सकललोकस्वस्ति
हेतवः ३०

सर्वसत्त्वपरिहृतेति देवव्यतिरेकेणेति द्रष्टव्यं देवानां क्रीडनार्थायेत्युक्तत्वात् २६ लोकत्रयस्यांते परितो मर्यादानुपाविहि ७
तः २७ यस्मात्प्रेति बंधकात् सूर्यश्चादिर्येषां ध्रुवापवर्गाणां येषां ग्रावितन्वानाः समंतात् प्रकाशयंतः परतागंतुं न शक्नुव
ति तावदुन्नहनमुत्सेधः तदेनं नूपश्चायामः विस्तारो यस्य ध्रुवादप्युद्धृतत्वात् त्रिलोकीमर्यादाभूतः इत्यर्थः २८ सो
यं तु लोकालोकाचलः तुरीयभागः चतुर्थांशः द्वादशकोट्यः मेरोरकत इति द्रष्टव्यं २९ आशासु दिक्षु योधिनिवेशिताः ते

ज्योतिर्गणानां ४ रश्मीँल्लोकानामवितन्वानानन्नसावि पराचीना ४

सार्द्ध ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वांशाभूतानां १

भा० प तेषां दिग्गजानां स्वविभूतीनां महेंद्रादीनां च विविधवीर्योपबृंहणाय सकललोकस्वस्तये च भगवानुत्तस्मिन्नास्ते इत्यन्व
य: किंकुर्वन् आत्मन: स्वस्य यद्विशुद्धं सत्वं तत्सा धारयमानै: आविष्कुर्वन् कीदृशं धर्मज्ञानादिभिरुपबृंहं महासिद्धयश्चोप
लक्षणं यस्य तेनु दोर्दंडैरुपलक्षित: स नु महाविभूते: परमैश्वर्यस्य पतिरात्मगुणैकोपेवमूर्त्या समंतादास्ते २१ नत्वंतर्योमिणार्म

स्थिति २

सू० १ ननु परिश्रितास्ते चतस्राशासु आत्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतय: ऋषभ: पुष्कर
चूडो वामनोपराजित इति सकललोकस्थितिहेतव: ३० तेषां स्वविभूतीनां लोकपालानां विविध
नरम १ वीर्योपबृंहणाय भगवान् महापुरुषमहाविभूतिपतिरंतर्याम्यात्मनो विशुद्धसत्वं धर्मज्ञानवैराग्यै
श्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभि: स्वपार्षदप्रवरै: परिवारितो निजवरायुधोप
६४ पुन शोभितैर्दोर्दंडै: संधारयमाणस्तस्मिन् गिरिवरे समंतात्सकललोकस्वस्तय आस्ते ३१ आ
एवं १ कल्पमेवं वेषं गतो आत्मयोगमायाविरचितविविधलोकयात्रागोपीथायेत्यर्थ: ३२ योन्तर्वि
स्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं ३३ यद्बहिर्लोकालोकाचलात् तत: परस्ताद्योगेश्वर
गतिं विशुद्धामुदाहरंति ३४

तस्मिन्नेव सर्वं कर्तुं शक्यं किं तस्य बहि: समंतात् अवस्थानेनेत्याशंक्य तस्यार्थं स्वयमेव व्याचष्टे आकल्पमिति आ राम
त्मना योगमायया विरचिताया विविधलोकयात्राया: गोपीथाय रक्षणाय एष भगवानेवं भूतं आकल्पं वे ६४
स्या १ षं गत: लीलया प्राप्त इति समंतात् आस्ते इत्यन्वय: ३२ अलोकपरिमाणं च मेरोरेकैत: सार्द्धद्वादशकोट्य: ३२ ततो लो
कालोकात् अर्वाक् लोका: तदापरस्तात् विशुद्धा द्विजपुत्रस्यानयनेर्जुनस्य श्रीकृष्णेन प्रदर्शिता ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्तारेणोक्तैर्ब्रह्मांडपरिमाणं सर्वतो निरूपयति अंडमध्यगत इति । किं तन्मध्यं तदाह द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदंतरं
मध्यस्थानं सर्वतः पंचविंशतिकोट्यः स्युः ३५ अंडमध्यावस्थानेन कारणेन तन्नाम निर्वचनेनाह मृतेंडे चेतनोपि एष सूर्यो वै
राजन् रूपेणाप्रस्मात् प्रविष्टः ३६ किंच सूर्येणैव विभज्यंते दिशः खमंतरिक्षं मिदात्र्यापि विभागः स्वर्गापवर्गौ भोग
मोक्षदेशौ नरसोकांसि श्वभ्रतलादीनि ३७ उपासनार्थमाह देवादीनां सूर्य आत्मा दृगीश्वरः नेत्राधिष्ठाता इति च

अंडमध्यगतः सूर्यो द्यावाभूम्योर्यदंतरं सूर्यांडगोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः ३५ मृतेंड एष
एतस्मिन् यदभूत्ततो मार्तंड इति व्यपदेशः हिरण्यगर्भ इति यद्धिरण्यांडसमुद्भवः ३६ सूर्येण हि
ऽध्यं २ विभज्यंते दिशः खं द्यौर्मही भिदा स्वर्गापवर्गौ नरकारसौकांसि च सर्वशः ३७ देवतिर्यङ्मनु
ष्याणां सरीसृपसवीरुधां सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ३८ इति श्रीभागव
ते महापुराणे पंचमस्कंधे समुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणं विंशतितमोध्यायः ७ ७
एतावानेव भूवलयस्य सन्निवेशः परिमाणतो व्याख्यातः एतेन हि दिवो मंडलमानं तद्विद उ
पदिशंति १ यथा द्विदलयोर्निष्पावादीनां ते अंतरेणांतरीक्षं तदुभयसंधितः २

पंचमे विंशे एवमध्यायविंशत्या भूमेर्यादा निरूपिता अतः परं द्युमर्यादा पालनैस्त्रिभिरुच्यते एकविंशे च
कालचक्रेण भ्रमतोन्वहं स्वर्गलोकाराशिसंचारे लोकयात्रा निरूप्यते १ एतावानु विस्तारेण कोट्यः पंचाशदुक्तास्ते
षेः पंचविंशतिः २ द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मानमुद्दिश्यते तद्वत् ते अंतरेण तयोर्मध्ये तदुभयसंधि
ने

[illegible]

श्रीशुक उवाच
प्रमाणलक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५४॥

उदगयनादिसंज्ञाभिः मंदक्षिप्रसमगतिभिः यथाकालमारोहणादिस्थानेषु आरोहणाद्यभिपद्यमानः मकरादिषु
अहोरात्राणि दीर्घह्रस्वमानानि विधत्ते ४ तत्प्रपंचयति यदेति अत्र तावद्वैषम्याभावात् समानानीत्युक्तं सर्वथासाम्य
स

यन्मध्यगतो भगवांस्तपतांपतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा ३ स एष
उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावस्थानेषु य वरोहणा२ समा२
थासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ४ य
६५ दामेषतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवंति ५ यदा वृषभादिषु पंचसु राशि दा२
षु चरति तदाहान्येव विवर्द्धंते ह्रसंति च मासि मास्येकैका घटिका रात्रिषु ६ यदा वृश्चिका
दिषु पंचसु वर्त्तते तदाहोरात्राणि विपर्ययाणि भवंति ७

तु एकरूप्यं वा अहोरात्रस्य ५ यद्यपि वृषभमिथुनयोरेव क्रांतवृद्धिः कर्कटादिषु ह्रासः तथापि रात्र्यपेक्षया अधिक राम
वपि२ त्वात् वर्द्धंत इत्युक्तं एवं रात्रिवृद्ध्यादिना अपेक्षया ह्रसंतीत्युक्तं एकैकेति स्थूलदृष्ट्योक्तं वृद्धिह्रासयोः प्रतिमासं मा ६५
वैषम्यात् ६ विपर्ययाणीति अहानि न्यूनानि रात्रयो अधिका इत्यर्थः ७ ॥ श्रीराम श्रीराम श्रीरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतत्व

तो विकेशत्रिकहासकालमाहयावदिति ~ एवं मंदादिगतिभिर्नवकोदयइति मेरोरभयतो मानसोत्तरस्यांत विस्तारेण पंच २२
दशलक्षाधिकेकोटित्रयपरिमितं तेन दंपरिमंडलमानमुन्नेयं एवं पंचाद्दशाभिर्घटिकाभिरित्यादि विषपित्रे रात्रिंगणा
तेनतन्मानमुन्नेयं अत्रापेक्षितो विशेषः पुराणांतराद्वगम्यः तत्रारोहणादि स्थानानि वायुपुराणदर्शितानि
सर्वेग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः स्थानं जरद्गवं मध्यं तथैरावतमुत्तरं वैश्वानरं दक्षिणतो निर्दिष्टमिह त

यावद्दक्षिणायनमहानि वर्द्धन्ते यावदुदगयने रात्रयः ~ एवं नवकोदयः एकपंचाद्दशलक्षिणाच
योजनानां मानसोत्तरगिरिपरिवर्तिनोस्योपदिशंति ७ तस्मिन्नैंद्रीः पुरीः पूर्वस्मान्मेरोर्देवधा
नींनाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभा
वरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीभूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयवि ति
शेषेण मेरोश्चतुर्दिशं ११

त्वतः इति तदेवमध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैः नागवी
थी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयं आर्षभी गोवीथी जरद्गवी चेति वै पुनर्मध्यममार्गे वीथीत्रयं अजवी
थी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयं तदप्युक्तं तत्रैव अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता
रोहिण्यार्द्रा मृगशिरा गजवीथ्यभिधीयते पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता एतास्तु वीथयस्तिस्र उत्त
रोमार्ग उच्यते तथा द्वे चापि फाल्गुन्यौ मघा चैवार्षभी मता ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृगवी
थीचातिष्यकृत थार

वार्षभी [..]मता हस्ता चित्रा तथा स्वाती गोवीथी तित्रुराहृता ज्येष्ठाविशाखानुराधावीथी जारद्गवी मता एता
स्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता श्रवणं च धनिष्ठा च मार्गी
शतभिषा मता वैश्वानरी भाद्रपदे रेवती चेति कीर्तिता एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते याम्या
६६ भरणाश्वादित्याश्च दितिर्देवता का पुनर्वसुः मार्गी मृगवीथी एवं स्थिते उत्तरायणे ध्रुवेण युगाक्ष कोटि
निबद्ध वायुपाशाहृत्याकर्षणे रथस्यारोहणे तदाभ्यंतर मंडल प्रवेशागतिमाद्यं भवति दिनवृद्धिः रात्रिह्रास
श्च दक्षिणायने च पाशप्रेरणाद् अवरोहणे बहिर्मंडल प्रवेशागतिशीघ्रं भवत्यहोरात्रयोर्विपर्ययो भव
म ति वैषुवतु पाशसाम्यात् समावस्थाने मध्यमंडल प्रवेशागति साम्यं भवत्यहोरात्रयोः साम्यमिति तथा
च पुराणांतरं आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ तदाभ्यंतरतः सूर्यो भ्रमते मंडलानि तु ध्रुवे
ण मुच्यमानेन पुनारश्मियुगनतु तथैव बाह्यतः सूर्यो भ्रमते मंडलानि चेति तदेतदुक्तं यदा तु
मेषतुलयोरित्यादिना उदयास्तादिकं वक्तुमाह तस्मिन्मानसोत्तरे मेरोः पूर्वतः ऐंद्रीं पुरीमुपदि
शतीत्यनुषंगः तासु पुरीषु उदयादीन् उपदिशति चतुर्दिशमित्युक्तः ये मेरोर्दक्षिणे देवा ये तेषां मैंद्रीमा ६६
येउत्तरे तेषां वारुणीमारभ्य रभ्य पूर्वोदयः येषां श्रीमंतेषां याम्यामारभ्य येषां पूर्वे तेषां सोम्यामारभ्य ११ तत्रस्थानां मेरुस्थानां १२

तत्रस्थानां दिवसमध्यगत एव सन्नादित्यः सप्ति
सप्त्यन च चक्रं दक्षिणं न करोति १२ श्री राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रा० २

सव्येनेतिनक्षत्राभिमुखतयाखगत्यामेरुंवामतः कुर्वन्नपिप्रदक्षिणावर्त्तप्रवहाख्यवायुभ्राम्यमाणज्योतिश्चक्रवशा
त्तुप्रत्यहंप्रदक्षिणंकरोति अतश्चक्रगतिवशाददितिदूरतोभूसंलग्नस्यदर्शनंउदयः आकाशमारूढस्यदर्शनंमध्या
ह्नः भूमिप्रविष्टस्यचादर्शनंस्तमयः गतोतीवदूरगमनेनिशीथइति समुद्रतीरस्थदृष्ट्याचक्रभ्रमणवाएवंकेदेत्यपः
तिसायंप्रविशन्ति श्रुतिव्यवहारानवस्तुतः तदुक्तंवैष्णवे उदयास्तमनेचैवसर्वकालंतुसंमुखे दिशास्वशेषासुतथा
मैत्रेयविदिशासुच येर्यत्रदृश्यतेभास्वान्सतेषामुदयस्मृतः तिरोभावंचयत्रैतितत्रैवास्तमनंरवेः नैवास्तमन

यत्रोदितिनस्यहसमानसूत्रनिपातेनिम्लोचति १३ यत्रक्वचनस्पंदनाभितपतितस्यहैषसमान
ने२ सूत्रनिपातप्रस्वापयतितत्रगतेनपश्यंतियेस्तमनुपश्यरनु १४ यदाचैआः पुर्याःप्रचलतिपंचद
शाभिर्घटिकाभिः याम्यांसपादकोटिद्वयंयोजनानांसार्द्धद्वादशलक्षाणिसाधिकानिचोपया
ति १५ एवंततोवारुणींसौम्यांमैंद्रीचपुनस्तथान्येचग्रहाः सोमादयोनक्षत्रैःसहज्योतिश्चक्रे
समभ्युद्यंतिसहवाभिनिम्लोचंति १६ एवंमुहूर्तेनचतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानिसौ
न रोरथस्त्रयीमयोसौचतसृषुपरिवर्त्ततेपुरीषु १७

स्य मनमकेस्यनोदयःसर्वदासतः उदयास्तमनाख्यंहिदर्शनादर्शनंरवेः शक्रादीनांपुरेतिष्ठन्स्पृशत्येषपुरत्रयं विकर्णौ
द्वौविकर्णस्थस्त्रीनुकोणानद्वेपुरेतथा इति अतएवतंत्रेप्योक्तं सर्वेषांद्वीपवर्षाणांमेरुरुत्तरतस्थितइति यत्रायत्रापि
स्थितिसवितुस्यप्राचीतस्यचवामतोमेरुस्तिष्ठतीति १३ यथोक्तमुदयास्तमनादिनियमंदर्शयति यत्रोदेतीत्यादिनास्य
देनस्वेदोऽमनप्रस्वापयतिनिशीथंकरोतियेस्तमनुपश्यरनुप्रस्वापनसेमानेसमानसूत्रस्था १४ साधिकानिपंच
विंशतिसहस्त्राधिकानि १५ सहवासहेचयद्यपिवस्तुतः स्पृयस्यापिनक्षत्रैःसहेवोदयास्तमयोतथापितत्साहि
तस्य

[marginal note, vertical:] ...स्याद्द्विलोनानि मासोनवत्याभ्यासाद्वियुतानि ...मुहूर्तेः १६ ...तसुमानाश्रीमुहूर्तेः १७

पर्वोः मध्य
यः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पं०

सूक्ष्मसोन।

द्वादशमासा अरा यस्य षड्ऋतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य तस्य क्रतु इतरभागो यस्य मानसोत्तर
गिरौ लक्षाद्द्वितु परि वायुबद्धं भूमाविति द्रष्टव्यं चक्रं वातावद्धमिति मंतव्यं अन्यथा युक्तमात्रो द्ध्रायस्य चाक्षम न्त्र २
नसोत्तरस्य मेरोश्चतुरशीतिसहस्रोच्छ्रायात्वात् अक्षस्य सा मा नु पपत्तेः १९ तस्मिन्नक्षे चक्रे प्रांते कृतमूलः
निबद्धपूर्वभागः प्रथमाक्षो मेरोर्मानसोत्तरांतो सार्द्धसप्तलक्षाधिकसार्द्धकोटिप्रमाणः तस्य तुर्यमाणेन सा
र्द्धसप्तविंशत्रिंशत्सहस्राधिकेकोनचत्वारिंशल्लक्षमानेन ध्रुवे कृतः वायुपाशेन निबद्धः उपरिभागो यस्य २०

प्रथमोक्षः मेरोः मानसोत्तरपर्यंतमित्यर्थः॥

ण्वे। यस्यैकं चक्रं द्वादशारं षण्णेमि त्रिनाभि संवत्सरात्मकं समामनंति १८ तस्याक्षो मेरोर्मूर्द्धनि कृतो मा
नसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयंत्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति १९॥
तस्मिन्नक्षे कृतमूलो द्वितीयोक्षस्तुर्यमानेन सम्मितस्तैलयंत्राक्षवद्ध्रुवे कृतोपरिभागः २०
६७
रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान् रवेर्रथयुगः २१ यत्र हया दि
श्छंदोनामानः सप्तारुणयोजिता वहंति देवमादित्यं पुरस्तात्सवितुरुरुणः पश्चाच्च नियुक्तः सौ स२ पु२
त्यकर्मणि किलास्ते २२ तथा वालिखिल्या ऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्त २
वाकाय नियुक्ताः संस्तुवंति तथान्ये च ऋषयो गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवाः २३ राम
६७
नीडं तत्प्रवेशस्थानं यायत्स्यादि छंदो नामानः अरुणेन योजिताः संतो देवं वहंति २१ पुरस्तात्स्थितोपि पश्चात्प्रत्यक्
मुखश्चास्ते यद्वा यत्सूर्यस्य पुरः तस्यैव पश्चिमत्वात् पश्चादित्युक्तं अश्वस्थाने चवायुनोक्तं सप्ताश्वरूपछंदांसि व
हंतेवामतो रविं चक्रपक्षनिबद्धानि चक्रेचाक्षः समाहितः इति २२ सूक्तवाकाय सुभाषिताय २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐकैकशश्चतुर्दशहंद्वशः सप्तगणाः संतो मासि मास्युपासत इत्यन्वयः २४ गव्यूतिः क्रोशद्वयं सगव्यूत्युत्तरं यथा भवति २५
इति पंचमे एकविंशः द्वाविंशे सोमशुक्रादिस्थानमाहात्म्यांतरं तत्र गत्यनुसारेण इष्टानिष्टत्वं तथा च एणां १ राशीना
भा॰ मभिमुखं प्रदक्षिणं चापवर्णितं सव्येन चलनं तु दक्षिणेन करोतीति विवदतो अमुष्य वयं कथमनुमीमहि एतत् कथं

इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवंतं सूर्यमात्मानं पृथक्कर्मभिर्द्वंद्वश उपासते २४
लक्षोत्तरसार्द्धनवकोटियोजनपरिमंडलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजना
नि स भुंक्ते २५ इति श्रीभागवते पंचमस्कंधे ज्योतिश्चक्रवर्णने एकविंशोध्यायः राजोवाच ॥
१ यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रद
क्षिणं भगवतोपवर्णितं अमुष्य वयं कथमनुमीमहीति २ स होवाच यथा कुलालचक्रेण
भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशांतरेष्वप्युपलभ्यमानत्वादेवं नक्षत्ररा
प्र ८ शिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां त
दाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रांतरे राश्यंतरे चोपलभ्यमानत्वात् ३ स एष भग
वानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं
कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसंतादिष्वृतुषु यथोपजोषमृतु

टी॰ गुणान् विदधाति ४ कर्म
आस्याम विरुद्धाविदित्यर्थः २ चक्रवशात्स्वतश्च गतिद्वयमविरुद्धमिति परिहारार्थः ३ तत्र कालनियमेन कर्मणो
विशुद्धेः साद्गुण्यस्य निमित्तमात्मानं विभज्य विजिज्ञास्यमानो विचार्यमाणः यथोपजोषं यथाभागं गुणानुशीतो
ष्मादीन् ४
सूत
कांतु

दि २

भा॰प॰ वर्णाश्रमाचारानुवर्तिनः पुरुषाः त्रय्याश्रयोगैः कर्मभिरिंद्रादिरूपं योगवितानैः श्रध्यानादिभिरंतर्यामिरूपं पूज्य २
यंतः ५ स एव खगत्या मासादिव्यवहारकारणं इत्याह स एष लोकानामात्मा द्यावापृथिव्योरंतरेण मध्ये तन्नभो
रात्रिभि वलयं अंतरीक्षं तस्य मध्ये यत्तु कालचक्रं तद्गतः मेषादिभिः संज्ञा येषां चैत्रवैशाखादिसंज्ञास्तु चांद्रमासा नां ६

तमेनमिह पुरुषास्त्रय्याविद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैः
श्रद्धया यजंतोंजसा श्रेयः समधिगच्छंति ५ अथ स एष आत्मा लोकानां द्यावापृथिव्योर
तरेणनभोवलयस्य कालचक्रगतो द्वादश मासान् भुंक्ते राशिसंज्ञान् संवत्सरावयवान् ६ उपदिशंति ४
मासः पक्षद्वयं सपादर्क्षद्वयं दिवानक्तं चेति वदंति ७ यावता षष्ठमंशं भुंजीत स वै ऋतुरित्यु
पदिश्यते संवत्सरावयवः ८ अथ च यावतार्द्धेन नभोवीथ्यां प्रचलितं कालमयनमाचक्ष २
६८ च ते अथ यावन्नभोमंडलं सह द्यावापृथिव्योर्मंडलाभ्यां कार्त्स्न्येन स ह भुंजीत तं कालं सं
वत्सरं परिवत्सरमिद्वावत्सरमनुवत्सरमिति भानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति १० वत्सरमि

महा॰ मासमाह पक्षद्वयं मास इति चांद्रेण मासेन नर्क्षपादर्क्षद्वयं सौरेण दिवानक्तं च अहोरात्रमिति पित्र्येण ७ राम
षष्ठमंशं राशिद्वयं ८ मंडलाभ्यां सह भुंजीत सह स हि सूर्यः यदा शुक्लप्रतिपदि संक्रांतिर्भवति तदा सौर चां ६८
प॰ द्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः सौरमानेन वर्षे षड् दिनानि वर्द्धंते चांद्रमानेन षट् संहरंतीति गच्छंति २
द्वादश दिनव्यवधानात् उभयोरग्रे यत्पश्चाद्भावो भवति एवं पंचवर्षाणि तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः
षष्ठः संवत्सरो भवति गदेवमवांतरभेदेन संवत्सरादिपंचकं समामनंति ९
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

सोमादीनामपि स्थानं कार्यं वाह एवं चंद्रमा इति अर्कगभस्तिभ्यः मंडलत्रेभ्यः सपादर्क्षाभ्यां सपाददिनद्वयेन १० सर्वे
षां जीवनिवहानां प्राणः अन्नमयत्वात् अमृतमयत्वाच्च अत एव जीवनहेतुत्वात् जीवः ११ दक्षिणेनैव नेतुं तेषां पृथग
न्यागनिरस्तीत्यर्थः कालायने कालचक्रे उत्तराषाढाश्रवणसंधावभिजिन्नामनक्षत्रं फलविशेषेण पृथक्कल्पि

२४

एवं चंद्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मा
सभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते अथ चापूर्यमाणाभिरपक्षी
यमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्रा
णो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते स एष षोडशकलः पुरुषो भगवान्मनोमयोऽन्नम
योऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वम
य इति वर्णयंति ११ तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव काला
यन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः तत उपरिष्टादुशना द्विलक्षयोजनत
उपलभ्यते १२ पुरतः पश्चात्सहैव चार्कस्य शैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति लो
कानां नित्यदानुकूल एव प्रायेण वर्षयंश्चारेणानुमीयते १३ स वृष्टिविष्टंभग्रहोपशमनः
उशनसा बुधो व्याख्यातः १४ तत उपरिष्टाद्द्विलक्षयोजने बुधः सोमसुत उपलभ्यमानः प्रायेण शु

नी

तेनेन सह तथा च श्रुतिः अभिजिन्नामनक्षत्रं उपरिष्टादाषाढानामधस्ताच्छ्रोणाया इत्यादि १२ पुरतः सूर्येण भोक्ष्यमाण
नक्षत्रं पश्चाद्भुक्ते सहैव भुज्यमाने चारेण क्रमस्थनक्षत्राद्यतिक्रमेण १३ दृष्टिविष्टंभस्तंभनं यस्माद्ग्रहात्तमुप
शमयतीति तथा १४ बुधो व्याख्यातः पुरतः पश्चात्सहैव वा चरतीति १५ किंचिद्विशेषमाह तत इत्यादिनाऽस्त्रांसंश
तिसूचयति १६

अत्र कलाभिः अमराणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ पं॰

अघशंसः दुःखसूचकः यदि न वक्रेणाभिवर्त्तेत नहि त्रिभिस्त्रिभिः पक्षैः १७ यदि न वक्रः स्यात्तर्हि परिवत्सरं १८ पंचमे द्वाविंशः
त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयत्वतः शिशुमाररूपेण हरेरास्थितिरुच्यते १ यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव

अत ऊर्ध्वमंगारकोपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन्भुंक्ते यदि न
वक्रेणाभिवर्त्तेत प्रायेणाशुभग्रहोऽघशंसः ततउपरिष्टाद्द्विलक्षयोजनान्तरगतो भगवान्बृहस्पतिरेके
कस्मिन्राशौ परिवत्सरं परिवत्सरं प्रचरति १७ यदि न वक्रः स्यात्प्रायशोनुकूलो ब्राह्मणकुलस्य ततउपरिष्टाद्यो

परीवत्सरं २

जनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिंशत्त्रिंशन्मासान्विलंबमानः सर्वानेवानु
पर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशांतिकरः ततउत्तरस्मादृषयएकादशलक्षयोजनां

६९

तर उपलभ्यंते यएव लोकानां शमनुभावयंतो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रामंति १८
इति श्रीभागवते पंचमस्कंधे ज्योतिश्चक्रानुवर्णने द्वाविंशतिमोध्यायः श्रीशुकउवाच अथतस्मा
त्परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्विष्णोः परमं पदमभिवदंति २ यत्र महाभागवतो ध्रुवऔत्तान
पादिरग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदा
नीमपि कल्पजीविनामाजीव्यउपास्ते ३ तस्य महानुभावस्य पवर्णितः सहि सर्वेषां ज्योतिर्गणानां
ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्व

राम ६९

रेणविहितः शश्वदवभासते ४ यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मंडलानि चरंत्येवं भगणा ग्रहादयएतस्मि
उपास्तेतिष्ठतीत्यन्वयः समकालमेवयुग्भिः तद्गतिनिमित्तैर्नक्षत्ररूपैर्मेढीस्तंभे वृषभाद्याक्रमणपशवो बलीवर्दाः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्मसारथिः सहायो येषां ५ ईश्वराधारत्वानुपपत्तिशंकेयं नास्तीति वक्तुं मतांतरमाह केचिदिति ज्योतिरनीकं ज्योति-
श्चक्रं योगधारणायां स्थितमिति शेषः ६ लांगूले श्वयाद् अधोभागे ७ उदगयनानि अभिजिदादीनि पुनर्वस्वंतानि चतु-

नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगा-
नुगृहीताः कर्मनिर्मितगतयो भुवि न पतंति ५ केचनैतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो
वासुदेवस्य योगधारणायामनुवर्णयंति ६ यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपक-
ल्पितः तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता च कट्यां सप्तर्षयः ७ तस्य दक्षिणा विधाता
उ वर्ते कुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयंति ८ दक्षिणायना-
नि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसंनिवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति
ज = पृष्ठे त्वजवीथी आकाशगंगा चोदरतः पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योः आर्द्राश्लेषे च दक्षिण चे
वामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवा-
मयोर्लोचनयोर्धनिष्ठामूलं च दक्षिणवामयोः कर्णयोः मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वा-
मपार्श्ववंक्रिषु युंजीत ९

मूलपूर्वाषाढा उ
त्तराषाढा ०

र्दश दक्षिणपार्श्वे ८ दक्षिणायनानि पुष्यादीनि उत्तराषाढांतानि चतुर्दश वामपार्श्वे ९ एतदेव स्थाने विशेषेण विभज्य द-
र्शयति पुनर्वसुपुष्यौ इत्यादिना पुनर्वसुरुदगयनस्यांत्यं नक्षत्रं पुष्यो दक्षिणायनस्याद्यं आर्द्राश्लेषे तयोर्निरंतरे अभि-
जिदुत्तराषाढे उत्तरदक्षिणायनयोराद्यंतनक्षत्रे श्रवणपूर्वाषाढे धनिष्ठामूले च तयोरप्युत्तरपूर्वे मघादीनि यानि अ-
नुराधांतानि दक्षिणायनान्यष्टानि वामपार्श्ववंक्रिषु वामपार्श्वास्थिषु १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०५ मृगशीर्षादीनि प्रातिलोम्येन पूर्वाभाद्रपदांतानि यान्युदगयननक्षत्राणि अष्टाविंशत्युत्तरपार्श्वे ११ शतभिषज्ज्येष्ठे उत्तरदक्षि
णायनयोर्योर्विशिष्टे स्कंधयोः १२ यमोनक्षत्ररूपः तथा नारायणोऽश्विनौ च ककुदि गलपृष्ठशृंगे १३ ज्योतिषां लो
काय आश्रयाय कालचक्रात्मपाय नमो धीमहि इति मंत्रेण पतिष्ठेत १४ मंत्रकर्ता पूर्वोक्तिमंत्रं जपतः १५ इति पंचमे त्रयो

वं०त्रि०१ तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वेषु प्रातिलोम्येन युंजीत ११ शतभिषाज्येष्ठे स्कंधयोर्दक्षि
णवामयोर्न्यस्येत् १२ उत्तराहनावगस्त्यः अधराहनौ यमः मुखेषु चांगारकः शनैश्चर उपस्थे बृहस्पतिः
ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो
राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमह
७० रहः संध्यायां प्रयतो वाग्यतो निरीक्ष्यमाण उपतिष्ठेत १३ नमो नमो ज्योतिर्लोकाय कालायनाया
निमिषां पतये महापुरुषायाभिधीमहीति १४ ग्रहर्क्षताराममयमाधिदैविकं पापापहं मंत्रकृ
तां त्रिकालं नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापं १५ इति श्रीभागवते ज्योति स
श्चक्रानुवर्णनं त्रयोविंशोध्यायः श्रीशुक उवाच अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रव
च्चरतीत्येके १ योसावमरत्वं ग्रहत्वं चालभत भगवदनुकंपया स्वयमसुरापसदः सैहिकेयो ह्यतद
र्हः तस्य तात जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः २ यददस्तरणेर्मंडलं प्रतपतस्तस्माद्विस्तरतो योजनायुतमा राम

विशः एवं त्रिभिर्भूमर्यादापालनं वर्णितं तथा अधो भुवनमर्यादापालनं त्रिभिरध्यायैः चतुर्विंशे राहुस्वर्भान्वादिस्थि से ७०
तिक्रमात् अतलादिबिलस्वर्गमर्यादाः संप्रवर्णिताः १ सूर्यमारभ्य ध्रुवांतसन्निवेशान्निरूप्येदानीं सूर्यादधस्तान्निरूप
यति अधस्तादिति स्वर्भानुः राहुः अलभत लेभे सिंहिकायाः पुत्रः २ ग्रहणं वक्तुमाह यददः प्रतपतस्तरणेर्मंडलं ४

CC-0. In Public Domain,Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नि२ त२ च२

अमृतपानेनमध्यप्रवेशेनतयोर्व्यवधानंकरोतीतितथा अतएवैताभ्यांस्वचिंतानुवैरमनुबध्नातीतितथा ५ भगवतंचक्रंपरिवर्त्त
मानंपरिभ्रमत्तुंअभिमुखंमुहूर्त्तमवस्थितःसन् ६ इतिएवंअनर्होदेवस्थानमुपरागंवदंति तत्रअमृतचक्रगतिभ्यांसर्वयासा

द्वादशसहस्रंसोमस्यत्रयोदशसाहस्रंराहोः ४ यः पर्वणितद्व्यवधानकृतवैरानुबंधः सूर्याचंद्रमसावभिधाव
ति ५ तन्निशाम्योभयत्रापिभगवतोरक्षणायप्रयुक्तंसुदर्शनंनामभागवतंदयितमस्त्रंतत्तेजसादुर्वि
ण२ षहंमुहुःपरिवर्त्तमानमभ्यवस्थितोमुहूर्त्तमुद्विजमानश्चकितहृदयआरादेवनिवर्त्तते ६ तदुपराग म२
मितिवदंतिलोकाः ७ ततोधस्तात्सिद्धचारणविद्याधराणांसदनानितावन्मात्रएव ८ ततोधस्ता
द्यक्षरक्षःपिशाचप्रेतभूतगणानांविहाराजिरमंतरिक्षंयावद्वायुःप्रवहतियावन्मेघाउपलभ्यं स२
ते ९ ततःअधस्ताच्छतयोजनांतरेणेयंपृथिवीयावद्धंसभासश्येनसुपर्णादयःपतत्रिप्रवराउत्पतंति
उपवर्णितंभूमेर्यथासन्निवेशावस्थाने १० अवनेरधस्तात्सप्तभूविवराएकैकशोयोजनायु
तांतरेणायामविस्तारेणोपक्लृप्ताः अतलंवितलंसुतलंतलातलंमहातलंरसातलंपातालमि ति ११
ति

ननुसर्वस ग्रासो हे ग्रासोस्तिदूरांतरत्वात् ७ तावन्मात्रयोजनायुते ८ अंतरिक्षंग्रहहीनंतस्यावधिमाहयावद्वायुःप्रवाति तस्याप्यवधि
माहयावन्मेघाः ९ पृथिव्याउपरिभूलोकावधिमाहयावद्धंसादयः पार्थिवाविकाराः १० योजनायुतांतरेणप्रत्ये
कमुच्छ्रिताः आयामायाःकटाहस्पृगावहिस्तारेण ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निदक्षिण

भा०५ मृगशीर्षादीन्यौ प्रातिलोम्येन पूर्वाभाद्रपदांतानि पानुदगयननक्षत्राणि अश्रतान्युत्तरपार्श्वे ११ शतभिषाज्येष्ठे उत्तरदक्षि
णायनयोर्यथावशिष्टे स्कंधयोः १२ यमोनक्षत्रानृपः तथानारायणोश्विनोच ककुदिगल पृष्ठशृंगे १३ ज्योतिषांलो
कायश्राश्रयायकालचक्रात्मपायनमोधीमहि इतिमंत्रेणोपतिष्ठेत १४ मंत्रस्तत्पूर्वोक्तमंत्रंजपतः १५ इतिपंचमेत्रयो

वं०टी०१ तथैवमृगशीर्षादीनि उदगयनानि दक्षिणपार्श्वेषु प्रातिलोम्येनयुंजीत ११ शतभिषाज्येष्ठस्कंधयोर्दक्षि
णवामयोर्न्यस्येत् १२ उत्तराहनावगस्त्यः अधराहनोयमः मुखेचांगारकः शनैश्चर उपस्थे बृहस्पतिः
ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो
राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणा एतद्वै हवै भगवतो विष्णोः सर्वदेवतामयं रूपमह
रहः संध्यायां प्रयतो वाग्यतो निरीक्ष्यमाण उपतिष्ठेत १३ नमो नमो ज्योतिर्लोकाय कालायना
७० यानिमिषांपतये महापुरुषायाभिधीमहीति १४ ग्रहर्क्षताराभयमाधिदैविकं पापापहं मंत्रकृ
तांत्रिकालं नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापं १५ इतिश्रीभागवते ज्योति
श्चक्रानुवर्णनं त्रयोविंशोध्यायः श्रीशुक उवाच अधस्तात्सवितुर्योजनायुते स्वर्भानुर्नक्षत्रव
च्चरतीत्येके १ योसावमरत्वं ग्रहत्वं चालभत भगवदनुकंपया स्वयमसुरापसदः सैंहिकेयो ह्यत
दर्हः तस्य तात जन्मकर्माणि चोपरिष्टाद्वक्ष्यामः ३ यददस्तरणेर्मंडलं प्रतपतस्तद्विस्तारतो योजनायुतमा राम

विशः एवं त्रिभिर्द्युमर्यादापालनं वर्णितं तथा अधोभुवनमर्यादापालनं त्रिभिरध्यायैः चतुर्विंशे राहुस्वर्भान्वादिस्थि ७०
तिक्रमात् अतलादिबिलस्वर्गमर्यादाः सप्त वर्णिताः १ सूर्यमारभ्य ध्रुवावत्सन्निवेशं निरूप्येदानीं सूर्यादधस्तान्निरूप
यति अधस्तादिति स्वर्भानुः राहुः अलभतेत्यत्र सिंहिकायाः पुत्रः २ ग्रहणवत्कुमाह यददः प्रतपन्तरणेर्मंडलं ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभि२ त२ च२

ऽमृतपानेनमध्यप्रवेशेनतयोर्व्यवधानंकरोतीतितथा अतएवैताभ्यांसूचितानुवैरमनुबध्नातीतितथा ५ भगवतेचक्रेणपरिवर्त्ति
मानंपरिभ्रमतुं अभिमुखमुक्तेमवस्थितःसन् ६ इतिएवंअतरादेवस्थानमुपरागंवदंति तत्रेत्रमुवक्रगतिभ्यांसर्वथास

द्वादशसहस्रंसोमस्यत्रयोदशसाहस्रंराहोः १ यः पर्वणितद्व्यवधानकृतवैरानुबंधः सूर्याचंद्रमसावभिधाव
ति ५ तन्निशाम्योभयत्रापिभगवतोरक्षणायप्रयुक्तंसुदर्शनंनामभागवतंदयितमस्त्रंतत्तेजसादुर्वि
प२ षहंमुहुः परिवर्त्तमानमभ्यवस्थितोमुहूर्त्तमुद्विजमानश्चकितहृदयआरादेवनिवर्त्तते ६ तदुपराग म२
मितिवदंतिलोकाः ७ ततोधस्तात्सिद्धचारणविद्याधराणांसदनानितावन्मात्रएव ८ ततोधस्ता
द्यक्षरक्षःपिशाचप्रेतभूतगणानांविहाराजिरमंतरिक्षंयावद्वायुःप्रवहतियावन्मेघाउपलभ्यं स२
ते ९ तदधस्ताच्छतयोजनांतरेणेयंपृथिवीयावद्धंसभासश्येनसुपर्णादयःपतत्रिप्रवराउत्पतंति
उपवर्णितंभूमेर्यथासन्निवेशावस्थानं १० अथातोधस्तात्सप्तभूविवराएकैकशोयोजनायु
तांतरेणायामविस्तारेणोपक्लृप्ताः अतलंवितलंसुतलंतलातलंमहातलंरसातलंपातालमि
ति ११
ति

ननुसर्वस ग्रासो

हेग्रासोस्तिदूरांतरत्वात् ७ तावन्मात्रयोजनायुते ८ अंतरिक्षंग्रहहीनंतस्यावधिमाहयावद्वायुःप्रवाति तस्याप्यवधि
माहयावन्मेघाः ९ पृथिव्याउपरिभूलोकावधिमाहयावद्धंसादयः पार्थिवाविकाराः १० योजनायुतांतरेणप्रत्ये
कमुच्छ्रिताः आयामायाः कटाहस्यतावद्विस्तारेण ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामान्येन विवरणोवर्णयतिएते षित्यादिना अथानलइत्यतःप्राक्तेनेनग्रंथेनाएतेषुदेत्यादयोनिवसंतीत्यन्वयः कथंभूतेषु अ
धिकः कामभोगश्च ऐश्वर्यानंदश्च भूतिः संततिर्विभूतिश्च संपत्तिः ताभिः सुसमृद्धा भवनादयोयेषु नित्यप्रमुदिताः अनुरक्ता
अकलत्रादयोयेषा नप्रतिहतः कामोयेषा मायया विनोदोयेषा १२ हेमोहराजयेषु मयेन निर्मिताः पुराश्चकासतीत्यन्व
यः कथंभूताः नानायमणिप्रवरास्तेषां प्रवेकामुख्यास्तैर्विरचितैर्विचित्रैर्भवनादिभिः तथाविवरेश्वराणांगृहोत्तमैश्च
समलंकृताः कीदृशगृहोत्तमैः नागाश्च असुराश्च मिथुनभूताः पारावतादयश्चैतैराकीर्णाः कृत्रिमाभूमयोयेषुतैः १३ पाठांतरे नानासुर
श्रीभि०१ उद्यानानिचातितरामरलोकश्रियंअतिशायितानियेषुचकासतीत्यन्वयः काभिः येषांकुसुमफलस्तबकाः सुभग मिथुनशुकोप
७१ श्र०२

एतेषु हि विलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानंदभूतिविभूतिभिः सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्य
दानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायावि
नोदानिवसंति १२ येषु महाराज मयेन मायाविना विनिर्मिताः पुरोनानामणिप्रचरप्रवेकविरचितविचित्रभ
वनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्वि
विटप२ वरेश्वरगृहोत्तमैः समलंकृताश्चकासति १३ उद्यानानिचातितरांमर्णइंद्रियानंदिभिः कुसुमफलस्तवकसुभ
गकिसलयावनतरुचिरविटपिनां लतांगालिंगितानांश्रीभिः समिथुनविविधविहंगमजलाशयानाममे
लजलपूर्णानांझषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकल्हारनीलोत्पललोहितशतपत्रादिवन
ना षुकृतनिकेतानामेकविहाराकुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि १४
यत्रहवावनभयमहोरात्रादिभिः कालविभागैःरुपलक्ष्यते १५

किसलयानिचतैरचनतारुचिराविटपायेषांतेषांविटपिनांलतानांमंगेःरालिंगितानांश्रीभिःतथासमिथुनाश्चक्रवाकादिमिथु
च नसहितायेविविधाविहंगास्तद्युक्तानांजलाशयानांश्रीभिः कीदृशानांअमलजलैःपरिपूर्णानांपुनरपिकेरतिशयितानि झष
कुलोल्लंघनेनक्षुभितयज्जलाशयानांनीरंतस्मिन्यानिनीरजादीनितेषांवनेषुकृतंनिकेतनंयैस्तेषांअर्थात्पक्षिणांएकोः
रवडीयाविहारस्तेनाकुलाश्चतेमधुकराश्चविविधस्वनादयश्चतेयेइंद्रियोत्सवाश्चतैश्च यत्राः समिथुनेत्यादेरुत्तरेणवसं
बंधः मनइंद्रियानंदिभिरितिस्वनादीनांविशेषणं तत्रनीरजंसामान्येनकमलंलोहितंशतपत्रंचतद्विशेषः अहोरात्रादिभि
७१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्लमः श्रमः ग्लानिरनुत्साहः १६ कल्याणानां मंगलरूपाणां १७ यस्मिन् भगवत्तेजसि प्रविष्टे पुंसवनानि गर्भाः आचतुर्थाद्भवेत्स्त्रावः
पातः पंचमषष्ठयोरिति स्त्रावपातौ ज्ञेयौ १८ सवर्णे रतास्स्वैरिण्यः कामिन्यस्त्वसवर्णेपि रताः पत्यतिरिक्तचंचलाः पुंश्चल्यः १९ बिलाय
ने बिलापतनं साधयित्वा संभोगसमर्थं कृत्वा स्वस्य असाधारणा विलासास्तत्पूर्वकाः अवलोकास्तेनानुरागयुक्तं स्मितं तेन संला

:न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिश्चाधयो व्याधयो वलीपलितजरादयश्च
३ देहवैवर्ण्यदौर्गंध्यस्वेदक्लमो ग्लानिरिति वयोवस्थाश्च भवंति १६ न हि तेषां कल्याणानां प्रभवति कुतश्च
स,२ नमृत्युर्विना भगवत्तेजश्चक्रापदेशात् १७ यस्मिन् प्रविष्टे सुरवधूनां प्रायः पुंसवनानि भयादेव स्रवंति
पतंति च अथातले मयपुत्रासुरो बलो निवसति १८ येन ह वा इह सृष्टाः षण्णवति मायाः याः काश्चना त्रयः १
द्यापि मायाविनो धारयंति यस्य च जृंभमाणस्य मुखतः स्त्रीगणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्च
ल्य इति १९ यावै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरा
गस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयंति २० यस्मिन्नुपयुक्ते पुरुष ईश्वरोहं सिद्धोहमिति धस्तात्
अयुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदांध इव २१ ततो वितले हरो भगवान् हाटके
श्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूय आस्ते यतः प्रवृ
व१ त्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण २२ यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिब
ति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयंति २३

पमुपगूहनं चत्वरादिभिः २० यस्मिन् रसे उपयुक्ते सेविते २१ भवयोः भवस्य भवान्याश्च २२ चित्रभानुरग्निः तेन निष्ठ्यूतं फू
त्कृत्य त्यक्तं असुरेंद्राणामवरोधेषु पुरुषीभिः स्त्रीभिः २३ अंतःपुरेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० १० सुतले च बलिरधुनाप्यास्त इत्यन्वयः कथंभूतः महेन्द्रस्य प्रियं कर्तुमिच्छता प्रथमं पराक्षिप्तमपह्नुतं लोकत्रयं यस्य सः
सन्० २ पुनर्भगवतोनुकंपयैव च तत्र प्रवेशितः कीदृशेनार्यया हितः सकाशात् बटुवामनरूपेण तत्र प्रकाशमानेन २४ केचित्तु सुतलराज्य
भूमिदानफलं मन्यंते तन्निराकरोति नो एवेति यद्दिव्यनिलयविवरस्थानैश्वर्यं न भूमिदानस्य साक्षात्कारः फलं नेम

रोच १ ततोधस्तात्सुतलम् उदाहरन् त्रिभिः पुण्यश्लोकाविति नात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादि
तेर्लेभे कार्ये तेन भूत्वा बटुर्भवामनरूपेण पराक्षिप्तस्वलोकत्रयो भगवदनुकंपयैव पुनः प्रवेशितः
इंद्रादिष्वविद्यमानया सुसमृद्धया श्रियाभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवंतमाराधनीयमप
गतसाध्वसश्चास्तेऽधुनापि २४ नो एवैतत्साक्षात्काराद् भूमिदानस्य यत्तद्भगवत्यशेषजीवनिका
७२ यानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्रे उपपन्ने परया श्रद्धया परमादरसमाहि
तमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्दिव्यनिलयैश्वर्यं २५ यस्य ह वाव क्षुतपतनप्रस्ख
लनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबंधनमंजसा विधुनोति २६ यस्यैव प्रतिबा
धं तुमुमुक्षवोऽन्यथैवोपलभंते २७

वर्त्येषु कुत इत्यपेक्षायां एवंभूतस्य दानस्य साक्षादपवर्गहेतुत्वात् इत्याह यत्तत्प्रसिद्धं दानं तस्य न दे षाह भगवत्यशेष राम
जीवनिकायानां जीवभूतश्चासावात्मभूतश्च सर्वजीवनियंता च सावात्मारामश्चेत्यर्थः तस्मिन्संप्रतिपादितस्य २५ ७२
ना० २ किंच यस्य नाम क्षुत्प्रद्रोदिषु विवशोपि सकृदपि गृणन् कर्मबंधं विधुनोति २६ कथंभूतं यस्य प्रतिबाधनं विहमुमुक्ष
वोपलंभनाय निवृत्त्यर्थं योगसांख्यादिक्लेशाननुभवंतीत्यर्थः तं कर्मबंधमेवेति २७

न्यथैनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

भकृस्यत२ तत्रस्मिन्भगवतो भगवद्भक्तानां ज्ञानिनां च यथायथं आत्मनैव समर्पितस्य भूमिदानस्य तत्फलमिति पूर्वेणैव संबंधः २१
किंच न देभगवदनुकंपाफलमपि किं विकातस्य तरायमात्रमित्याह नेति भगवानमुष्य अमुनैवानुगृहीतवान् २९ गत्रहे
तुः यद्यदेति आत्मन ईश्वरस्यानुस्मृतिर्मुमुक्षोर्गीतिनथानदुक्तो वासुदेवमनोयस्य जपहोमार्चनादिषु तस्यांतरायोमैत्रैदेवेंद्रत्वादि य
केपदमिति ३० तस्यैकांतभक्तिसप्रपंचमाह यत्तदितिप्रसिद्धं इतिवक्ष्यमाणमुवाचेत्यन्वयः कथंभूतः अनधिगतोऽन्यउपा
ऽस्मा योयेन तेन भगवताऽपौरवोच्छलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य स समुक्त्पवतिमुक्तोपदेः अपविद्धः प्रक्षिप्तोपि

च

मास्म तद्भगवतां सर्वेषां आत्मवतां स्मृदं आत्मनो मे २८ नैवं भगवान्नूनममुष्यानुजग्राह २९ यदुत पुनरा
न्या त्मस्मृतिमोषणं मायामयभोगैश्वर्यमेवाततनुतेति ३० यत्तद्भगवतानधिगतान्योपायेन याञ्चाच्छ
गुरु लेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च संयतिमुक्तोगिरिदर्यां चापविद्ध इति होवाच ऽस्य३
३१ नूनं बतायं भगवानर्थेषु न निष्णातो योसाविंद्रो यस्य सचिवो मंत्राय वृत एकांततो बृहस्पतिस्त
मतिहाय स्वयमुपेंद्रेणात्मानमयाचत ३१ आत्मन एवाशिषो नाऽवतदास्यमतिगंभीरवयसः॥ वय२
कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदं

सनु ३१ वंचेतिखेदे भगवान् विज्ञानपियासाविंद्रः यस्यैकांतेन बृहस्पतिः सचिवः सहायः यतो मंत्रार्थं वृतः सोपि
पुरुषार्थेषु नूनं न निष्णातः न निपुणः यत उपेंद्रेण द्वारभूतेन तमुमिंद्रं विहायात्मानं लोकत्रयं आयाचत तं मंत्रप्र या२
दं बृहस्पतिमतिक्रम्येतिवा ३२ तस्मिन्प्रसन्ने स एव वरणीयो न लोकत्रयं यतस्तदतितुच्छमित्याह अतिगं
भीरमनंतरं यायस्य तस्य कालस्य यन्मन्वंतरं तेन परिवृत्तं विपर्यस्तं लोकत्रयमिदं कियत् ३३

वयो नै मां२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पं॰ अहादश्च एक एवार्थेषु निम्मान इत्याह यस्यानुदास्यमिति स्वपितरि तु परेतं मृते सति स्वपित्र्यं पदं भगवता दीयमानं पि म॰
खलु भगवतः परमन्यमिति ज्ञात्वाननुजग्राहेत्यर्थः ३४ ननु त्वमति धीरः कुतस्त्वमेवं बहुमन्यसे तत्राह तस्यानुपथं अनु
वर्त्म अमर जिता अक्षीणाः कषाया रागादयो यस्य परिहीनो भगवदनुग्रहो यस्य स को वा तु पगं गमिष्यतीति ३५
अथ श्रीशुकोक्तिः नन्वेवंभूत अहदलिः न हितस्य च चरितं विस्तरेण कथ्यतां तत्राह तस्यचरित्ररनु चरितं तु परिश्रु

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे न तु स्वपित्र्यं यदुताकुतोभयं दीयमानं भगवतः परमिति पदं
खलु भगवता परेते स्वपितरि ३४ तस्य महानुभावस्यानुपथमहर जितकषायः को वास्मद्विधः परिहीन
भगवदनुग्रह उपजिगमिषतीति ३५ तस्यानुचरितमुत्तरस्माद्विस्तरिष्यते ३६ यस्य भगवानखिल
७३ जगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकंपितहृदयो येनांगुष्ठेन पदा दशकंधरो
योजनायुतायुतं दिग्विजय उच्चाटितः ३७ ततो धस्मात्तस्मात्तले मयो नाम दानवेंद्रस्त्रिपुराधि
पतिर्भगवता पुरारिणा त्रिलोक्याः शं चिकीर्षुणा निर्दग्धपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविना
माचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ३८ श्रीराम श्रीराम श्रीराम॥

दृष्टमस्कंधे विस्तरिष्यते ३६ यस्य द्वार्यवतिष्ठते निजजनेषु अनुकंपितं कृतानुकंपं हृदयं यस्य द्वारपालकमेदर्शी राम
यतियेन श्रीनारायणेन वल्ल्हो विशनू दशकंधर उच्चाटितः केन पदा तत्राप्यंगुष्ठेनैव ३७ यथाह रिणा स्वभ ७३
क्तो वलिः सुतले निहितः सुखमास्ते एवं महादेवभक्तोपि मयः तस्मात्तले सुखमास्त इत्याह तत इति लब्धपदं स्थानं
येन महीयते पूज्यते ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैकशिरसां अनेकफणानां गणोस्ति एतत्प्रपंचयति कुहकेति महाभोगवंतो महाकायाः पुरुषवाहाद्गरुडाद्वोहना(?) २९ विबुधप्रत्यनीकाः देवशत्रवः सकललोकपितॄ केषु अनुभावोयस्य तस्य स्वतेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां बिलेशयाः सर्पा इव ४० इंद्रदूत्या प्रयुक्ताभिर्मंत्ररूपाभिर्वाग्भिः एवं हि वैदिकमाख्याने पणिभिरसुरैर्निगूढा गा अन्वेष्टुं शरमां देवशुनीं इंद्रेण प्रहितां संधिमिच्छंतः पणयः प्राहुः किमिच्छंती सरमेत्यादि ॥

ततोधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादि प्रधाना महाभोगवंतः पतत्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति ३९ ततोधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव निवसंति ४० ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ४१ ततोधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसंति ४२ येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ४३ इति श्रीभागवते पंचमस्कंधे विवरणे नरा

सा च संधिमनिच्छंतीं इंद्रस्तुतिपूर्वकं तानतिपरुषमाह हता इंद्रेण पणयः पौलिय धर्ममित्यादि तेन च तदुक्त्वा बिभ्यती ति ४१ महाभोगिनः महाफणाः पंचादिसंख्यानि शीर्षाणि येषां शीर्षाणि गिरि तेषां शीर्षाणामित्यर्थ इति पंचमच रायं ४८
महान् अमर्षः क्रोधो येषां गुर्विशः

पंचविंशे ततोधस्तादाहशेषस्यसंस्थितिं संजिहीर्षोरिदंकालेयत्ररुद्रसमुद्भवः १ कोसावनंतः सात्वतीयाः सात्वततंत्रनिष्ठा-
श्चतुर्व्यूहोपासनेयंसंकर्षणइत्याचक्षते तथाख्यानेहेतुः द्रष्टृदृश्ययोरहंदृश्ययोः सम्यक्कर्षणंएकीकरणंयेनतत्कुतः १ःः
अहमित्यभिमानोलक्षणंचिह्नमधिष्ठातृयस्य अहंकाराधिष्ठानत्वाद्दृग्दृश्यसंकर्षणात्संकर्षणइत्यर्थः २ अनंत-

श्रीशुक उवाच तस्यमूलदेशेत्रिंशद्योजनसहस्रांतर आस्तेयावैकलाभगवतस्तामसीस-
माख्यातानंतइतिसात्वतीयायद्रष्टृदृश्ययोः संन्निकर्षणंअहमित्यभिमानलक्षणंसंकर्ष-
णइत्याचक्षते २ यस्येदंक्षितिमंडलंभगवतोऽनंतमूर्तेः सहस्रशिरसएकस्मिन्नेवशी-
र्षणिध्रियमाणंसिद्धार्थइवलक्ष्यते ३ यस्यहवाइदंकालेनोपसंजिहीर्षतोऽमर्षविर-
चितरुचिरभ्रमद्भ्रुवोरंतरेणसंकर्षणोनामरुद्रएकादशव्यूहस्त्र्यक्षस्त्रिशिखंशूल-
मुत्तंभयन्नुदतिष्ठत् ४ यस्यांघ्रिकमलयुगलारुणविशदनखमणिखंडमंडलेष्वहिप-
तयः सहसात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानिपरिस्फुरत्कुंडलप्रभा-
मंडितगंडस्थलान्यतिमनोहराणिप्रमुदितमनसः खलुविलोकयंति ५

त्वमाहयस्येदमितियस्यद्रष्टानांसएवभगवाननंतइत्युत्तरेणान्वयः ३ तामसत्वमाहयस्येदंविश्वंउपसंहर्तुमि-
च्छतः अमर्षेणविरचितेरुचिरेकुटिलेभ्रुकुटीभ्रमंत्यौभ्रुवौतयोर्मध्येउत्तंभयन् उन्नमयन् ४ सुभगत्व-
माहयस्यांघ्रिकमलयुगेअरुणाविशदाअनिशंदर्पणमणयोः तेषांखंडः समूहस्तस्यमंडलेषुदर्पणोपाधि-
परिस्फुरत्कुंडलानिप्रभयामंडितानिगंडस्थलानियेषुतानि ५

म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न३ ते२ ते२

चारुणि अंगवलये विलसिता अतेविशदा अविपुला अधवलासुभगा रुचिरा भुजाएव रजतस्तंभास्तेष्वगुरुचंदनकुंकुमानां पंकएवानुलेपस्तेनावलिंपमानास्तेषामभिमर्षणेनोन्मथिते हृदयेमकरध्वजस्यावेशेन रुचिरं चललितंच स्मितंयासांताः तस्यानुरागेण चमदेन च मुदिते चउन्मदेन विघूर्णिते प्रचलिते अइषदरुणे करुणावलोकयुक्ते नयनेयस्मिंस्तत् वदनारविंदं विलोकयंति ६ अमर्षः सहनं रोषः क्रोधः उपसंहृतस्तयोर्वेगोयेन ७ उपासनार्थमाह सुरादिभि

यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्षणोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल विलोकयंति ६ सएव भगवाननंतोनंतगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ७ ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदि कृतसुभगसुंदरभुजो भगवान्माहेंद्रो वारणेंद्र इव कांचनीं कक्षामुदारलीलो बिभर्त्ति ८ — नी२ — स्वस्तयआस्ते

ध्यायमानश्चिंत्यमानः अनवरतंमदेन मुदितश्चासौ विकृतविह्वलेलोचनेयस्य सुललितेन मुखरिकामृतेनवचनामृतेन स्वपार्षदान्विबुधयूथपतींश्चाप्यायमानः हर्षयन् नीलेवाससीयस्य एकमेवकुंडलंयस्य हलस्यककुदि पृष्ठे कृतौन्यस्तौ सुभगाश्चसुंदरौ चभुजौयेन उदारालीलायस्य नपरिम्लानोरागः कांतिर्यस्यां नवतुलसीकायाश्चामोदमध्वासवेन सुरभिमधुरसेन माद्यतांमधुकराणांव्रातास्तेषांमधुरगीतेनश्रीर्यस्यास्तांमालांकक्षांवरत्रां ८ — तस्या२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संश्लोकयामासवर्णयामास ॥ असज्जगतउत्पत्त्यादिहेतवोगुणायस्येक्षयाकल्पाःस्वस्वकार्यसामर्थ्योआसन्यस्यानु
रूपंध्रुवंअनंतंअकृतंचअनादित्रहेतुःयदेकमेवसत्तुआत्मन्आत्मनिनानाकार्यप्रपंचमधात्तस्यब्रह्मरू
पस्यवर्त्मेतत्स्वंजनःकथमुहवेदनवेदेत्यर्थः १० नहिंकथमसौमुमुक्षुभिःसेव्यतेतत्राह मूर्त्तिमिति यत्रेदंसद
सद्विभातिसनोस्माकंभक्तानांबहुकृपयासंशुद्धंसत्वंमूर्त्तिंबिभार्तस्वजनानांस्पादितानुवर्त्तीकर्तुंकृतायस्यली मनां १

मनां १

यएषएवमनुश्रुतोभिध्यायमानोमुमुक्षूणांदिकालकर्मवासनाग्रथितमविद्यामयंहृदयग्रंथिं
सत्वरजस्तमोमयमंतर्हृदयंगतआशुनिर्भिनत्ति ८ तस्यानुभावानुभगवान्स्वायंभुवोना
रदःसहतुंबुरुणासभायांब्रह्मणःसंश्लोकयामास ॥ उत्पत्तिस्थितिलयहेतवोस्यकल्पाः
सत्वाद्याःप्रकृतिगुणायदीक्षयासन् यद्रूपंध्रुवमकृतंयदेकमात्मन्नानाधात्कथमुह
वेदतस्यवर्त्म १० मूर्त्तिंनःपुरुकृपयाबभारसत्वंसंशुद्धंसदसदिदंविभातियत्र यल्ली
लांमृगपतिराददेनवद्यामादातुंस्वजनमनांस्युदारवीर्यः ११

लांमृगपतिःसिंहआददेअशिक्षत्नुःउदाराणिवीर्याणियस्यतस्मादन्यंमुमुक्षुःकामाश्रयेतनुइत्युत्तरेणान्व
यःयद्वाकृपयेत्यत्रहेतुःयद्यस्मात्स्वजनानांमनांस्यादातुंलीलामाददेमृगपतिरिवोदारवीर्यःयद्वामृ
गपतइतिमृगाःकामप्रदाःतेषांपतिर्मुख्यः ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच आस्तां तस्य रूपध्यानं पृथुधारणं तज्जपनं वा तन्नामोच्चारमेवातिचित्रमित्याह यस्य नाम यदि पतितो महापात
कपि अनुकीर्तयेत् तर्हि संशुध्येदिति किंच वक्तव्यं यतोसावपन्नृणामशेषमंहः सद्यो हंति कथमनुकीर्तयेत्
अन्यतः श्रुतं वा अकस्माद्वा आर्तो वा सन् प्रलंभनाद्वा परिहासोक्तस्मात्तु शेषादन्यं १२ गिर्यादि सहितं भू

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा हन्त्यंहः सपदि नृणा
मशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ११ मूर्द्धन्यर्पितमणुवत्सहस्रमूर्द्ध्नो भूगोलं
सगिरिसरित्समुद्रसत्वं आनंत्यादनुमितविक्रमस्य भूम्नः को वीर्याण्यपि गणयेत्स
क्ष्मां हस्रजिह्वः १२ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः मूले रसायाः स्थित
आत्मतंत्रो यो लीलया स्थौ स्थितये बिभर्ति १४ एता ह्येवेह नृभिरुपगंतव्या गतयो यथा
कर्मविनिर्मिता यथोपदेशमनुवर्णिताः कामान् कामयमानैः १५ एतावतीर्हि राजन्
पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये कि
मन्यत्कथयाम इति १६ इति श्रीभागवते पंचमस्कंधे विवरतलोपवर्णने पंचविंशोध्यायः

नि २ गोलं सत्वादि प्राणिनः सहस्रजिह्वोपि को गणयेत् १३ दुरंतवीर्यं बलं यस्य उरवो गुणा अनुभावश्च यस्य स
च सचरसायां भूमेर्मूले स्थितः तिष्ठति आत्मतंत्रः आत्माधारः १४ उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति
एता ह्येव कामान् कामयमानैर्नृभिरुपगंतव्या इत्यन्वयः १५ तत्प्रपंचः एतावतीः एतावत्यः विपाकगतयः फल

[illegible]

भा०पं० षड्विंशेतुततोधस्तात्नरकस्थितिरुच्यते पापिनांयत्रदंड्येतयमदूतैर्यथायथं १ पुंसांगतयः उच्चावचाविसदृशाः इतिभो
गवैचित्र्यमुक्तंतदेतत्कुतइतिपृच्छतिमहर्षइति २ कर्मणांसमानत्वेपिश्रद्धावैचित्र्यात्फलवैचित्र्यमितिपरिह
रतित्रिगुणत्वादितिसात्विक्याश्रद्धयाकर्त्तुःसुखित्वंराजस्याःदुःखित्वंसुखित्वंचतामस्याःमूढत्वं तत्रापितासांश्रद्धानांता दुःखित्वं २
रतम्यात्सुखादितारतम्यंसर्वेषामित्यर्थः प्रतिषिद्धंप्रतिषेधःतदेवलक्षणंप्रमाणयस्यअधर्मकर्त्तुःश्रद्धावैसादृश्यं

राजोवाच महर्षएतद्वैचित्र्यंलोकस्यकथमिति शुकउवाच २ त्रिगुणत्वात्कर्त्तुःश्रद्धयाकर्मगतयःपृ
निसरस्य ३ थग्विधाः सर्वाएवसर्वस्यतारतम्येनभवंति ३ अथेदानींप्रतिषिद्धलक्षणस्याधर्मस्यकर्त्तुःतथैवश्रद्धया
वैसादृश्यात्कर्मफलंभवति ४ याह्यनाद्यविद्ययाकृतकामानांतत्परिणामलक्षणाःसृतयःसहस्र मनंतरा ३
७६ शःप्रवृत्तास्तासांप्राचुर्येणानुवर्णयिष्यामःराजन् ५ राजोवाच नरकानामभगवन्किंदेशविशेषाः अथ
वाबहिस्त्रिलोक्याआहोस्विदंतरालइति ६ ऋषिरुवाच अंतरालएवत्रिजगत्यास्तुदिशिदक्ष
िणस्यां अधस्ताद्भूमेरुपरिष्टाज्जलाद्यायात् यस्यामग्निष्वात्तादयःपितृगणादिशिस्वानांगोत्रा
णांपरमेणसमाधिनासत्याएवाशिषआशासानानिवसंति ६ यत्रहवावभगवान्पितृराजोवै
स१ वस्वतःस्वविषयंप्रापितेषुपुरुषेषुजंतुषुसंपरेतेषुयथाकर्मावद्यंदोषमेवानुल्लंघितभगवच्छास

राम नमसःस्यारतस्यात् ४ अत्रापिकारणंदर्शयन्नाह अनाद्यविद्याकृतानांकामानांसृतयोनरकास्तासांताः अथेदानींताःप्राचु
किं र्येणानुवर्णयिष्यामइत्यन्वयः ५ भूमाववदेशविशेषाः त्रिलोक्याब्रह्मांडाद्बहिर्वाआवरणेषुमध्ये अंतरालेभूमिव्यति ७६
रिक्तेः ६ कर्मदोषमनतिक्रम्यदोषमेवदमंपापफलंदंडंकरोति नउल्लंघितंभगवच्छासनंयेन ७ ॥ ७६ ॥ वा ७६

१ अंतरालएवत्रिजगत्याः तर्हिकस्यांदिशि दक्षिणस्यां कुत्रहि भूमेरधः उपरिष्टादंउज्जस्तीनांमध्ये
उत्तरायस्य गर्भोदकस्य त्रिलोकीगर्भोदकयोर्मध्येइत्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मतां नरकाणामष्टाविंशतिमाह किंचेति ७ पापभेदेन गतं नरकयातनाभेदं प्रपंचयति यस्त्वित्यादिना ८ यात्यमानः पीड्यमा

गणयंति

तत्र हैके नरकानेकविंशतिं प्राहुः अथ तांस्ते राजन्नामरूपलक्षणतोनुक्रमिष्यामः तामिस्रोंध
तामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं शूकरमुखमंधकूपः कृमिभोज २१
भ्र २ नः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः
सारमेयादनमवीचिरयःपानमिति ७ किंच क्षारकर्दमो रक्षोगणभोजनः शूलप्रो
तो दंदशूकोऽवटनिरोधनः पर्यावर्त्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभू
मयः ७ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स कालपाशबद्धो यमपुरुषैरतिभयान
कैस्तामिस्रे नरके बलान्निपात्यते ८ अनशनानपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो यातनादिभि ८
जंतुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तामिस्रप्राये १० एवमेवांधतामिस्रे यस्तु
पर३ वंचयित्वा पुरुषं दारादीनुपयुंक्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टि
श्च भवति यथा हि वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति ११ यस्त्विह वा एत
स्व दहमिति ममेदमिति भूतद्रोहेण केवलं कुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तद
शुभेन रौरवे निपतति १२

नः एकदैवेत्येकदैव। पुरुषं पतिं वंचयित्वा ११ एतच्छरीरमहमिति इदं धनादि ममेति मत्वा स्वं च कुटुंबमेव च पुष्णाति तेन।
अशुभेन १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु। तथा। सज्ञा

भा०पं० रुरवो भूत्वेति कर्मोपयवत्तथा परिणामं प्राप्येत्यर्थः अतितीक्ष्णस्य भारशृंगारख्यस्य सत्त्वस्य व्यपदेशः १४ क्रव्येणानि मित्तेनमां
सार्थमित्यर्थः १५ प्राणतः सजीवान् उपरंधयति पचति १६ अपकरुणं निष्कृपं १७ खलसमेदस्रो १८ ॥

ये त्विह यथैवामुना विहिंसिता जंतवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तमेव विहिंसंति तस्मा
द्रौरवमित्याहुः १३ रुरुरिति सर्पादतिक्रूरसत्त्वापदेशः १४ एवमेव महारौरवः यत्र निपातितं पुरुषं
नाम क्रव्यादा रुरवस्तं क्रव्येण घातयंति यः केवलं देहंभरः १५ यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राण
त उपरंधयति १६ तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्ततैले उप
नरके रंधयंति १७ यस्त्विह वै पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके अयुतयोजनपरिमंडले ताम्रमये
नि तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेभिनिवेशितः क्षुत्पिपासाभ्यां दह्यमानो
७७ अवतिष्ठति तर्बहिःशरीर आस्ते शेते चेष्टते परिधावति च यावंति पशुरोमाणि तावद्वर्षसहस्राणि यस्त्वि
१प हैव निजवेदपथादनापद्यपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरंति १८ तत्र हासावितस्ततो
धावमान उभयतो धारैस्तालवनासिपत्रैश्छिद्यमानसर्वांगो हा हतोस्मीति परमया वेदनया
मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखंडानुगतं फलं भुंक्ते १९ यस्त्विह वै राजा राजपुरुषो वा
उये दंड्ये दंडं प्रणयति ब्राह्मणे वा शरीरदंडं स पापीयान्नरकेऽमुत्र शूकरमुखे निपतति तत्रातिबलै
खंड विनिष्पिष्यमाणावयवो यथैवेह क्षुद्रदंड्यआर्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतः

स्वधर्महा स्वधर्मत्यागी १९ स्वनयन् रुदन् कश्मलं मोहमुपगतो भवति अदृष्टदोषास्तेनोपरुद्धाः संतो यथा कश्म
लमुपगताः तद्वत् २०

[illegible]

म
च
न पाखंडं चोपगत
राम
७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरेण कल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैस्तैरविवेकिभिः तेषां पुरुषेण
ब्राह्मणादिस्वभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिना २१ अभिद्रुग्धा हिंसिताः ।
विहता निद्रा नृपा निर्वृत्तिर्यस्य न लब्धमवस्थानं येन तत्तमसि परिक्रामति २२ यत्किंचन भक्ष्यादिकमुपनतं प्राप्तं तदसंवि

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपर
व्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति २१ तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षि
सरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धाः तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहत
निद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः २२ यस्त्विह वा असंविभज्याश्ना
ति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति २३ भ
तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्र
त्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते २४ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वा
पहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैस्त्व
चि निष्कुषंति २५

भज्य न निर्मिताः पंचयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः २३ कृमिभोजनः कृमीनेव भुंजानः यावत्तत्
यावन्नियोजनानि तावत्कृमिकुंडं तावन्ति वर्षाणि यावद्धा तत्पापमित्यर्थः अप्रत्तमसंविभक्तं अप्रहुतं वाग्नौ तेन तथा सः
अनिर्वेशमकृतप्रायश्चित्तं २४ निष्कुषंति छिंदंति २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पंच॰ तिग्मयातप्तया शूर्म्या प्रतिमया २६ सर्वाभिगमः पश्वाद्युपगंता २७ सत्कुलीनाः संतः क्षितीयां तत्पाठे सेतुविशेषणं २८ नेही

यस्त्विह वै अगम्यां स्त्रियं अगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कषया ताडयंतस्तिग्मया शूर्म्या लो
हमय्या पुरुषमालिंगयति स्त्रियं च पुरुषरूपया शूर्म्या २६ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये
वर्तमानं वज्रकंटकशाल्मलीमारोप्य निष्कर्षंति २७ ये त्विह वै राजन्या राजपुरुषा वा अपाषंडा धर्म
सेतून् भिंदंति ते संपरेत्य वैतरण्यां निपतंति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोग रध्या ५
णैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्म
रंत उपतप्यंते २८ विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यंते २९
७८ येत्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरंति ते चापि प्रेत्य पूय न
विण्मूत्रश्लेष्ममलापूर्णार्णवे निपतंति तदेवातिबीभत्सितमश्नंति ३० येत्विह वै श्वगर्दभपतयो ब्रा
ह्मणादयो मृगयाविहारा अतीर्थेषु मृगान्निघ्नंति तानपि संपरेतान् लक्ष्यभूतान् यमपुरुषा
इषुभिर्विध्यंति ३१ येत्विह वै दांभिका दंभयज्ञेषु पशून् विशसंति तानमुष्मिँल्लोके वैशसे नर
के पतितान्निरयपतयो यातयित्वा विशसंति ३२ यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पायय राम
ति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः (सं)पाययंति ३२ ७८

विशिनष्टि विण्मूत्रेति २९ पशुचर्यां स्वेच्छाचारं ३० अतीर्थे विहितादन्यत्र विध्यंतीति प्राणरोधो दर्शितः ३१ निर
यपतयो यमपुरुषाः ३२ लोला भक्षमाह यस्त्विहेति रेतः पानं कारयति ३३ (नि)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विप्र खं२ व्र२

यमदूता येश्वानः सरभसं ससंभ्रमं २४ द्रव्यविनिमये क्रयविक्रययोर्दाने निरवकाशे निरालंबे २५ अवीचिशब्दार्थमाह पुनरि
ति वीचिस्तरंगः तद्रहितत्वादवीचिः २६ यो वीचिस्तत्कलत्रं वा सुरां पिबति अन्यो पिवा व्रतस्थः सन् राजन्यो वैश्यो

राजानो

येत्विह वै दस्यवोग्निदा गरदा ग्रामान्सार्थान्वा विलुंपंति राजभटा वा तांश्चापि परेत्तान् यमदूता
वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति २४ यस्त्विह वै अनृतं वदति साक्ष्ये द्र
चि२ व्यविनिमये वा कथंचित्स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमू
लं र्ध्नः संपात्यते २५ यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाण स्यो
शरीरो न म्रियमाणः पुनरारोपितो निपतति २६ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपी अयच
थस्तत्कलत्रं वा सुरां व्रतस्थोपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये
वन्हिना द्रवमाणं कार्ष्णायसं निषिंचंति २७ यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोवि
द्याचारवर्णाश्रमवतो वरीयसो न बहुमन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेवाक्शिरा
निपातितो दुरंतायातना ह्यश्नुते २८

वा सोमपीथः कृतसोमपान इत्यन्वयः तयोः सोमस्थाने फलचमसविधानात् सोमपाननिषेधात् तथा च श्रुतिः
न्यग्रोधस्तिभिराहृत्य ताः संपिष्य दधन्युपसृज्य तमस्मै भक्षं प्रयच्छेन्न सोममिति २७ पूर्वमपि मृतक एव सन् मृत्वा २८
स्ति म्र स म्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०५ पुरुषमेधेन हिंसया भैरवादीन् यजन्ते याश्च स्त्रियस्तासां मांसं पः रक्षोगणा भूत्वा यथेह ते पुरुषादाः संतः पूर्वं मनुष्ये

येत्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून्खादन्ति तांश्च ते पशव इव निहता य
मसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक्पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमा ष्य
णा यथेह पुरुषाः येत्विह वा नागसोऽरण्ये ग्रामे वा वैश्रम्भिकैरुपसृतानुपविश्रम्भ्य जिजीविषून् शू
लसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मा
८० नः क्षुत्तृड्भ्यां चाभिहताः कंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमाना आत्मशमलं स्म
७९ रन्ति ४० येत्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दंदशूकास्तेपि च प्रेत्य नरके दंद
२६ शूकाख्ये निपतन्ति यत्र दंदशूकाः पंचमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ४१
येत्विह वा अंधावटकुसूलगुहादिषु भूतानि निरुंधन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्नि ग ८
ना धूमेन निरुंधन्ति ४२ यस्त्विह वा अतिथीनभ्यागतान्वा गृहपतिरसकृदुपगतमन्युर्दिधक्षु
रिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुंडा गृध्रकंककाकवटादयः राम
प्रसह्योरुबलादुत्पाटयन्ति ४३
७९
ततद्वतद्वृत् ३९ वैश्रम्भकैर्विश्वासमूषकान् ४१ सगरेण सविषेण ४२ अतिथयोऽज्ञातपूर्वा अभ्यागतास्ताज्ञातपूर्वास्ता
न् पापेन चक्रीकृतेन ४३ × विश्वासोपायैः कपविस्रंभ्य विश्वास्य ४० बिलेशयान् × १

सो घ

अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आढ्याभिमति धनगर्वितः अहंकृतिः श्रेष्ठोहमितिमानी तिर्यक्प्रेक्षणं यस्य सर्वतः मृत्योरपि धनं चोरयिष्यतीति
विशंकमानः परिशुष्यमाणहृदयवदनं यस्य अनवगतः अप्राप्तः ४४ तस्यार्थस्य उत्पादनादिभिः समल
रक्षणीति तथा ४५ परिवर्तयंति सूत्रप्रोतान् कुर्वंति ४६ इतरत्र स्वर्गादौ ४७ इह मर्त्यलोके पुनर्भवेषु जन्मनिमित्तं ४८

यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोभिविशंकी अर्थव्ययविनाशचिंतया परिशुष्यमा
णहृदयवदनो निर्वृतिमनवगतो ग्रहइवार्थमभिरक्षति ४४ स चापि प्रेत्य तदुत्पादनोत्कर्षणसं
रक्षणशमलग्रहः सूचीमुखे नरके निपतति ४५ यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायक
इव सर्वतोंगेषु सूत्रैः परिवर्तयंति एवंविधा नरका यमालये संति शतशः सहस्रशः तेषु सर्वे
षु सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति ४६ तथैव धर्मानुव
र्तिन इतरत्र ४७ इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति ४८ निवृत्तिलक्षणमार्ग आदावेव व्या
ख्यातः एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते ४९ यत्तद्भगवतो नाराय
णस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्राव
यति स उपगेयं भगवतः परमात्मनो अग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ५० श्रुत्वा स्थूलं
सूक्ष्मे रूपे भगवतो यतिः स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ५१ भूद्वीपवर्षसरि
दद्रिनभः समुद्रपातालदिङ्नरकभागणलोकसंस्था गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं
वपुः सकलजीवनिकायधाम ५२ इति श्रीभागवते महापुराणे पंचमस्कंधे अष्टादशसाहस्र्यां संहि

सकलानां जीवनिकायानां धाम आश्रयभूतं वपुः ५२ इति श्रीभागवते महापुराणे पदभावार्थदीपिकायां श्रीधरस्वामिविर
चितायां पंचमस्कंधस्य पदभावार्थदीपने षड्विंशोध्यायः ॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमस्कंदसमाप्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षष्ठस्कंदप्रारंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ पुण्यारण्येन सिंहे कनाम सिंहो विराजते यन्नादतः पलायंते महाकल्मषकुंजराः॥ १ विसर्गसंभवान्जीवानुख
नु२ मर्यादासुसंस्थितान् विष्णुः पात्यखिले कृपेरितैर्यं पंचमे स्थितं २ अध्यायैकोनविंशत्या षष्ठे पापान्मुच्यते अतिलंघितमर्याद
भक्तोरक्षणलक्षणं ३ अजामिलो मनुष्येषु महापापापयात्यचितः॥ विश्वरूपादिघाती च तथा देवेषु वासवः॥ ४ अजामिलस्य
भक्तो वै विष्णुदूतैर्निरूपितं संकेतभगवन्नामपुत्रस्नेहानुषंगजं इंद्रोपि भगवद्भक्तः सख्येनापींद्रसेवकः तदधीनसुरेश्व
येशत्रु निजयजीविनः ६ तत्रादौ त्रिभिरध्यायैरजामिलकथोच्यते विश्वरूपकथा षड्भिरिंद्रदोषात्तयोच्यते ७ इंद्रस्यैवनु
दोषात्त्यक्त्वाख्यानं ततोऽष्टभिः द्वाभ्यां च मरुदाख्यानमेवं प्रकरणक्रमः ८ तत्रादौ प्रथमे विष्णुदूतैः पापविमोचने
तोलापरस्थापनायोक्तयाम्येदूर्मोदिलक्षणं ९ अथ षष्ठस्कंधव्याख्यायते पूर्वोक्तानुवादपूर्वकं नैमित्तिकानरकप

राजोवाच निवृत्तिमार्गः कथित आदौ भगवता यथा क्रमयोगोपलब्धेन ब्रह्मणा यदसंसृ
तिः॥ १ प्रवृत्तिलक्षणश्चैव त्रैगुण्यविषयो मुने योऽसावलीनप्रकृतेर्गुणसर्गः पुनः पुनः॥ २

रिहारोपायं पृच्छति निवृत्तिमार्गइति षड्भिः आदौ द्वितीयस्कंधे वैश्वानरं याति इत्यादिना भगवता त्वया यथा
यथावत् यदा येन मार्गेण क्रमेण योगोऽर्चिरादिप्राप्तिः तेनोपलब्धा ब्रह्मणा सह असंसृतिर्मोक्षो भवति
ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति वचनात् १ त्रैगुण्यं स्वर्गा
दिसुखं तदेव विषयः प्राप्यं यस्य न लीना प्रकृतिर्यस्य तस्य पुंसः पुनर्गुणसर्गः भोगार्थं देहारंभकः सो मार्गो पुनः २
हे मुने द्वितीये स च कथितः तृतीये दक्षिणेन यथा यमाः पितृलोकं व्रजंति इत्यादिना २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनं

अनुवर्णिताः निरंतराध्यायेऽव्याख्यात अनुर्थ्यस्यादौ यतः यस्मिन् ३ द्वीपादीन् भागतो लक्षणतो मानतश्च धरामंडलसंस्था स्य १
नं ज्योतिषां विवराणां च इदं भूसंस्थानं विभुर्यथा सृजत् तथा व्याख्यातमित्यर्थः ५ नानाउग्रयातनायुक्तान् नरकान्
यथा येनापायेन नरई याति न गच्छेत् तन्मे अधुना व्याख्यातुमर्हसि ६ तत्र तावत् महत्त्वात् कृतप्रायश्चित्तं विना नरकान् यथायथानन् २
निवारयत्याह न चेदिति द्वाभ्यां मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसः स्तेयादेः इहैवापचितिं प्रायश्चित्तं न कुर्या
च्चेत् तर्हि पुरुषः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति मे मया ये भवता कीर्तिताः तिग्मा दारुणा यातनायुक्तान् ७ यस्मा

अधर्मलक्षणा नानानरकाश्चानुवर्णिताः मन्वंतर अव्याख्यात आद्यः स्वायंभुवो यत्र ३ प्रियव्र
तोत्तानपदोर्वंशस्तच्चरितानि च द्वीपवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ४ धरामंडलसंस्थानं
भागलक्षणमानतः ज्योतिषां विवराणां च यथेदमसृजद्विभुः ५ अधुनेह महाभाग यथैव नरका
न्नरः नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ६ श्रीशुक उवाच न चेदिहैवापचितिं यथांहसः
कृतस्य कुर्यान्मनउक्तिपाणिभिः ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ७
तस्मात्पुरैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना दोषस्य दृष्ट्वा गुरुलाघवं यथा भिष
क् चिकित्सेत रुजां निदानवित् ८

दृष्टं तस्मात्तापस्य निष्कृतौ प्रायश्चित्ते यतेत कदा मृत्योः पुरैव तत्रापि अविपद्यता अम्रियमाणेनात्मना देहेन यद्वा
अविपत् विपत्तिरहितो यावत् यतात्मना असंयतेन तु मनसा तत्रापि आशु अन्यथा अतीव चिरकालेन तु द्विगुणं व्रतम्
हे गी द्विबे गुणपापकेः तत्र च पापस्य महत्त्वमल्पत्वं चावेक्ष्य तदनुरूपं प्रायश्चित्तं यतेत रुजां रोगाणां निदानविद्यथा वैद्यस्त
दनुरूपं चिकित्सेत तद्वत् ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ष० अत्र चोदयति द्वाभ्यां दृष्टश्रुताभ्यां राजदंडादिश्रुतेन नरकपातादिना ताभ्यामात्मनः पापस्य हितं जानन्नपि भूयः प्रायश्चित्तानंतरं करोति ष२
अथोऽन्तः कारणान्न द्वादशाब्दादिकं प्रायश्चित्तं तेन समूलस्य दोषस्यानिर्हृतत्वात् निरुत्तो वा पुनश्च पापप्ररोहाद्योगादि
क्वचिन्नि २ तिभावः ९ किंचित्कदाचिदभद्रात्पापान्निवर्त्तते क्वचित्तदेव पुनराचरति यथा कुंजरः स्नातोऽपि रजोभिरात्मानं मलि
नीकरोति तथा पापस्य पुनर्दुर्निवारत्वेन नरकपातस्यावश्यंभावित्वात् प्रायश्चित्तमपार्थमिति १० परिहरति कर्मणेति

राजोवाच दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं करोति भूयो विवशः प्रायश्चित्तमथो क
थं ९ क्वचिन्निवर्त्ततेऽभद्रात्क्वचिच्चरति तत्पुनः प्रायश्चित्तमथोऽपार्थं मन्ये कुंजरशौचवत्
१० बादरायणिरुवाच कर्मणा कर्मनिर्हारो न ह्यात्यंतिक इष्यते अविद्वदधिकारित्वात्प्रा
यश्चित्तं विमर्शनं ११ नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंति हि एवं नियमकृद्राजन् शनैः
क्षेमाय कल्पते १२

इत्यादि प्रायश्चित्तेन कर्मणा पापस्य निर्हारो नाशः आत्यंतिकः समूलो न हीष्यते अविद्वानधिकारी यस्मिन्
तस्य भावस्तत्त्वं तस्मात् अंतोऽविद्यायानाशाभावान्नेष्टोऽपि तस्मिन् पापे तत्संस्कारेण पापांतरस्य पुनः राम
पुनः प्ररोहो भवेत्येव किं तर्हि मुख्यं प्रायश्चित्तं तदाह प्रायश्चित्तमदाह प्रायश्चित्तं तु विमर्शनं ज्ञानं ११
तत्तु नित्यमप्रमत्तः शनैर्लभते नान्य इति सदृष्टांतमाहानेति पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो २
न बाधंते तथा नियमादिकर्त्ता क्षेमाय तत्त्वज्ञानाय समर्थो भवति १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का०१ एतदेव विशदयति द्वाभ्यां तपसेति ऐकाग्र्यं मनसश्चेंद्रियाणां च तप इत्यपरमं तप इति स्मृतेः ब्रह्मचर्येणाष्टांगेन तदुक्तं स्मरणं
कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः विपरी
तं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति शमो मनसो नियमनं दमो बाह्येंद्रियाणां त्यागो दानं यमो हिंसादिः नियमो जपादि
भिः॥ १३ ॥ अस्यापि दुष्करत्वान्मुख्यमेवान्यत्प्रायश्चित्तमाह केचिदित्यनेनैवंभूता भक्तिप्रधाना विरला इति दर्शय
ति केवलया तपआदिनिरपेक्षया वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् किंत्वन्येषामश्रद्धया तत्राप्रवृत्तेरर्थात्सि
द्धपर्यवसानादनुवादमात्रं १५ एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह न तथेति पूयेत शुध्येत तत्पुरुषनिषेवया तद्भक्त

स्प० तपसा ब्रह्मचर्येण शमेन च दमेन च त्यागेन सत्यशौचाभ्यां यमेन नियमेन च १३ देहवाग्बुद्धिजं धी
रा धर्मज्ञाः श्रद्धयान्विताः क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः १४ केचित्केवलया भक्त्या वा
सुदेवपरायणाः अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः १५ न तथा ह्यघवान् राजन् पूयेत तप
आदिभिः यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया १६ सध्रीचीनो ह्ययं लोके पंथाः क्षेमोऽकुतोभयः
सुशीलाः साधवो यत्र नारायणपरायणाः १७ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं न निः
पुनंति राजेंद्र सुराकुंभमिवापगाः १८

समीचीनः १ र्पिताः प्राणा येन १६ तत्र हेतुः सध्रीचीनो ऽयं पंथा भक्तिमार्गः यतः क्षेमः क्षेमत्वे हेतुः न कुतश्चित् विघ्नादेर्भयं य
स्मिन् तदेवाह सुशीलाः लोकपालवः साधवो निष्कामाः यत्र धर्मनिष्ठा अतो न ज्ञानमार्ग इव असहायतो निमित्तभयं
नापि कर्ममार्ग इव मत्सरादियुक्तेभ्यो भयमिति भावः भक्तेरन्यनिरपेक्षत्वमुक्तं १७ तदुक्तं ढौकिनीतु भक्तिं विना न शो
धयंतीत्याह प्रायश्चित्तानीति महतामप्यशोधकत्वे दृष्टांतमाह सुराकुंभमापगा इवेति १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपित्राब्दः प्रत्येकं सकृदपि किं पुनरभ्यासेन। मनः संज्ञायाः सकृदप्यंतःकरणं किं पुनस्त्रिचत्वारि कात्स्र्न्येन बुद्धिः। पादारविंदयोरपि किं पुनः सर्वस्मिन्
तौ निवेशितं बलादपि किं पुनः स्वतो निविष्टं तद्गुणेष्वपि रागि किं पुनस्तस्वरूपे यैरिति निसामान्यवाचि व्यासर्वनामव्याप्य नो निवेशितेजो
निदेशादिविशेषानपेक्षे नेति गम्यते येन निवेशितं बलादपि तेन च क्वापि निरोधः

भा०१० भक्तिः स्वल्पापि पुनात्येवेत्याह सकृदिति तस्य गुणेष्वनुरागमात्रमस्ति न तु ज्ञानं येषां तेषां मनः तावत्तेव चीर्णं निःकृतं प्रायश्चि
त्तं यैः १९ इममर्थमितिहासेनोपपादयति अत्रेति इमं वक्ष्यमाणम् २० कान्यकुब्जे पुरे दास्याः पतिर्नाम्नाजामिलः २१ बंदीग्र
हणाक्षैः कैतवैः छलैर्वचनादिभिः अहं तं जीविकां बिभ्रत् पुष्णन् यातयामास पीडयामास २२ आयुषः संबंधी

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यंति हि ची
र्णनिष्कृताः १९ अत्र चोदाहरंतीममितिहासं पुरातनं दूतानां विष्णुयमयोः संवादस्तं निबोध मे २० का
न्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः २१ बंध्यक्षैः कै
श्री ८ तवैश्चौर्यैर्गर्हितां वृत्तिमास्थितः बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः २२ एवं निवसतस्तस्य
लालयानस्य तत्सुतान् कालोऽत्यगान्महान् राजन्नष्टाशीत्यायुषः समाः २३ तस्य प्रवयसः
३ पुत्रा दश तेषां तु योऽवमः बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं २४ स बद्धहृदयस्तस्मिन्
र्भके कलभाषिणि निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं २५ भुंजानः प्रपिबन् खादन् बालकं ल२
स्नेहयंत्रितः भोजयन्पाययन्मूढो न वेदागतमंतकं २६ स एवं वर्तमानोऽज्ञो मृत्युकाल उपस्थिते मतिं
चकार तनये बाले नारायणाह्वये २७

महान् कालोऽत्यगात् सकियानित्यपेक्षायामाह अष्टाशीत्या संख्यायायुक्ताः समाः संवत्सराः २३ प्रवयसः वृद्धस्य ३
२४ बद्धहृदयं येन जरठो वृद्धः २५ एतस्य तदुपलालनादि श्रीनारायणनामोपचारमाहात्म्येन तत्कृतिरेवाभ
दिति सिद्धांतोपयोगित्वेनापि द्रष्टव्यं २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० वक्त्राणि तुंडानि मुखानि येषां ऊर्ध्वानि रोमाणि येषां तान् २८ श्रावितेन ह तुं गतं जीवितेन २९ हरिकीर्तनं निशम्यापतन् यतस्ता
न् भर्तुर्नाम ३० पुरःसराः भृत्याः ३१ श्रसन्तं यन्नं निषेधथ ३२ वयं युष्मान् जानीमः इति नः कथं कार्यं यतः लोके किङ्करा
रूपा यूयमित्याहुः सर्वे इति साईभ्यां त्वक्संत्यः पुष्करमालाः संति येषां ३४ नूतनं नवं वयो येषां निषंगः इषुधिः धनुर्निषं

षष्ठस्कन्ध १ स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषान् वक्रतुण्डान् ऊर्ध्वरोम्णः आत्मानं नेतुम् आगतान् २८ दूरे क्रीडनकासक्तं
पुत्रं नारायणाह्वयं प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः २९ निशम्य म्रियमाणस्य मुखतो
हरिकीर्तनं भर्तुर्नाम महाराज पार्षदाः सहसापतन् ३० विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलं
यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ३१ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः के यूयं प्र
तिषेद्धारो धर्मराजस्य शासनं ३२ कस्य वा कुत आयाताः कस्मादस्य निषेधथ किं देवा उपदेवा
यूयं किं सिद्धसत्तमाः ३३ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः किरीटिनः कुण्डलिनो लस
त्पुष्करमालिनः ३४ सर्वे च नूतनवयसः सर्वे चारुचतुर्भुजाः धनुर्निषंगासिगदाशंखचक्राम्बु
जश्रियः ३५ दिशो वितिमिरालोकाः कुर्वन्तः स्वेन रोचिषा किमर्थं धर्मपालस्य किंकरान्नो निषेध
थ ३६ श्रीशुक उवाच इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः तान् प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गि
रा ३७ विष्णुदूता ऊचुः यूयं वै धर्मराजस्य यदि निर्देशकारिणः ब्रूत धर्मस्य नस्तत्त्वं यच्च धर्मस्य लक्षणं ८१

गदादिभिः श्रीः शोभा येषां ते ३५ वितिमिरः आलोकः प्रकाशो यासु तथाभूता दिशः कुर्वंतः भवतां मे गदनुचि
तमित्याहुः किमर्थमिति ३६ प्रहस्य इदं आदिशन् श्रुत्वा पापं चोराणां वारमक्रिया धर्मराजस्य किंकराः इत्यन्तं तवदत्ती
ति विस्मयेन प्रहस्य तान् प्रत्यूचुः मेघस्येव निर्ह्रादो ध्वनिर्यस्याः तया ३७ तत्त्वं स्वरूपं लक्षणं प्रमाणं ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०५०

वेदेनालक्षितोऽर्थो२ कथं स्विदित्येकेन प्रकारेण स्थानं विषयः कारिणः कर्मिणः नृणामिति नराणामेव न पश्वादयः तेष्वपि कतिचिदित्येवं पृष्टे
वेदेन प्रणिहितो विहितो धर्मः वेदप्रमाणक इत्यर्थः अनेन यद्वेदप्रमाणकः स धर्मः यो धर्मः स वेदप्रमाणक इ
ति स्वरूपं प्रमाणं चोक्तं यथाह जैमिनिः चोदनालक्षणोऽर्थो धर्म इति व्याख्यानं च भेदः इयमेकेन सूत्रेण ६२
रु२ अन्यथाभ्यां निष्पन्न इति अपृष्टस्याप्यधर्मस्य स्वरूपं लक्षणं चेह स्थानकथनायाह तद्विपर्ययः यो
वेदनिषिद्धः सोऽधर्मः निषेधश्च तस्मिन्प्रमाणमित्यर्थः वेदस्य प्रामाण्यहेतुः वेदो नारायण इत्यादिकृतः स एव सा
क्षादित्युपचारः स्वयंभूरिति च निश्वासमात्रेण स्वयमेव भवतीति तथा च श्रुतिः अस्य महतो भूतस्य

कथं स्विद्ध्रियते दण्डः किं वास्य स्थानमीप्सितं दण्ड्याः किं कारिणः सर्वे आहो स्वित्कतिचिन्नृणां
३९ यमदूता ऊचुः वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः वेदो नारायणः साक्षात्स्वयंभूरिति
४ शुश्रुम ४० येन स्वधाम्न्यमी भावा रजःसत्त्वतमोमयाः गुणनामक्रियारूपैर्विभाव्यन्ते यथा
तथं ४१ सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः कं कुः कालो धर्म इति ह्येते दैहस्य
साक्षिणः ४२

निश्वसितमेतद्यदृग्वेद इति ४० कोऽसौ नारायणस्तत्राह येन स्वधाम्नि स्वस्वरूपे अमी भावाः प्राणिनः गुणाः
शान्तत्वादयः नामानि ब्राह्मण इत्यादीनि क्रियाश्चाध्ययनाद्याः रूपाणि वर्णाश्रमादयः तैर्विभाव्यन्ते वि राम
विच्यन्ते यथा तथं यथावत् स नारायणः ४१ तथाप्यधर्मोऽनेन कृत इति कुतो ज्ञायते तत्राह सूर्य इति अह ४
कं१ नी अहश्च रात्रिश्चान्तः कं कुः पृथ्वी देहस्य जीवस्य यथाह आदित्यचन्द्रावनिलो नलश्च द्यौर्भूमिरापो
अहश्च१ हृदयं यमश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वरत्नफलदानारोहरंतंनेप्रमाणान्ड्तिरोपः

कारिणः कर्मिणः १

स्थानमाहुः एतैर्निमित्तभूतैर्विज्ञातः दंड्यानाहुः सर्वइति ४३ विपरीतानि च भद्राणयपि कर्मिणां संभवंतियत स्तेषागु णासंगोऽस्तियदि कश्चित्कर्त्तास्यात्तर्हितस्याभद्राणिनस्युः नत्वेतदस्तीत्याहुः नहिदेहवानकर्मकृदस्तीति अतः सर्वकर्मिणः कर्मिणांचपापस्यावश्यंभाविवात्तेनसर्वदंडमर्हतीत्यर्थः ४४ कथंस्वित्प्रियतेदंडइत्यस्योत्तरं येन

यम १ नि धर्मोवेति दृष्टांतः अधर्मानुसारेणदंडःधर्मानुसारेणसुखंचदित्यर्थः ४५ नकेवलंसूर्यादयएवज्ञापकाः किंत्वर्था पत्तिरपीत्याहुः यथेति देहेवप्रवराः इहजन्मनिशांतघोरमूढत्वेनचसुखिदुःखिमिश्रत्वेनवाधार्मिकत्वादिनाव त्रैविध्यंभूतेषुयथोपलभ्यते तथान्यत्रजन्मांतरेनुमीयतेत्रैविध्यान्यथानुपपत्त्या कल्प्यते ४६ वर्त्तमानजन्म

एतैरधर्मोऽभिज्ञातःस्थानंदंडस्ययुज्यते सर्वंकर्मानुरोधेनदंडमर्हतिकारिणः ४३ संभवंतिहिभद्रा णिविपरीतानिचानघाः कारिणांगुणसंगोऽस्तिदेहवान्नह्यकर्मकृत् ४४ येनयावान्यथाधर्मो धर्मोवेहसमीहितः सएवतत्फलंभुंक्तेतथातावदमुत्रवै ४५ यथेहदेवप्रवरास्त्रैविध्यमुपल भ्यते भूतेषुगुणवैचित्र्यात्तथाऽन्यत्राऽनुमीयते ४६ वर्त्तमानोऽन्ययोःकालोगुणाभिज्ञापकोयथा एवंजन्माऽन्ययोरेतद्धर्माधर्मनिदर्शनं ४७ मनसैवपुरेदेवः पूर्वरूपंविपश्यति अनुमीमांसतेपूर्वंमनसाभगवानजः ४८

नापूर्वोपरजन्मधर्माधर्मज्ञानंभवतीतिसदृष्टांतमाहुः वर्त्तमानोवसंतादिकालः अन्ययोर्भूतभविष्योर्वासं तयोर्येगुणाःपुष्पफलादयः तेषामभिज्ञापकोयथा एवमेतज्जन्मअन्ययोर्भूतभाविजन्मनोर्धर्माधर्मौनिदर्श यतीतितथा ४७ अयंचधर्माधर्मज्ञानप्रकारोन्येषांधर्मराजस्तुमनसैवसर्वंपश्यतीत्याहुः पुरेसंयमिन्यांस्थि तएवदेवोयमः देहेस्थितोऽतर्यामीवाजीवस्यपूर्वरूपंधर्माधर्मादियुक्तंविशेषेणपश्यति अनुअनंतरमपूर्वंतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जीवस्त्वीश्वरेणोपस्थापितं वर्त्तमानं देहं पश्यति न तु पूर्वमपरं चेत्याह ॥ यथेति अज्ञः अविद्योपाधिर्जीवस्तत्कर्मैव प्राचीन
कर्माभिव्यक्तं वर्त्तमानं भवदेहाख्यं पश्यति अहमिति मन्यते पूर्वमपरं वा न वेद अत्र हेतुः नष्टजन्मनां स्मृतिर्यस्य अत्र दृष्टा (मेव ३)
न्तः तमसा निद्रया युक्तो यथा स्वप्ने अभिव्यक्तं देहाख्यं पश्यति न तु जाग्रद्देहादि पूर्वं स्वप्नादि गतं वा न वेदित्यर्थः ॥ ४९ ॥ एवंभूत
स्य जीवस्य संसारं प्रपंचयति पंचभिः श्लोकैः पंचभिः कर्मेंद्रियैः स्वार्थान् उपादानादीन् पंच शब्दादीनूर्ध्वं च पंचभिर्ज्ञा (विषयान् २)
(एकस्तु १) नेंद्रियैः षोडशेन मनसा सह सप्तदशः षोडशोपाध्यंतर्गतोऽपि स्वयं त्वेक एव सर्वेंद्रियविषयप्रतिसंधानात् त्रीन्

(५) यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि । न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा ॥ ४९ ॥ पंचभिः कुरुते स्वार्था
न् पंच वेदाथ पंचभिः । एकस्तु षोडशेन त्रीन् स्वयं सप्तदशोऽश्नुते ॥ ५० ॥ तदेतत् षोडशकलं लिंगं शक्तित्रयं
महत् । धत्तेऽनुसंसृतिं पुंसि हर्षशोकभयार्तिदम् ॥ ५१ ॥ देह्यज्ञोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते ।
कोशकार इवात्मानं कर्मणाऽच्छाद्य मुह्यति ॥ ५२ ॥ नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते
(आत्मा:) ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात् ॥ ५३ ॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत । यथायोनि
योनि यथाबीजं स्वभावेन बलीय

(परतंत्र:) ज्ञानकर्मेंद्रियमनो विषयान् प्राप्नोति ५० तदेतल्लिंगशरीरं शक्तित्रयं गुणत्रयकार्यं महत् अनादि पुंसि जीवे अन्वनु
संसृतिं धत्ते ५१ नेच्छन्नपि अनिच्छन्नपि अनेनैव कर्माणि कार्यते कोशकारः कीटविशेषः मुह्यति निर्गमोपायं
न जानाति ५२ कार्यत इत्यत्रानुभवं प्रमाणयति नहीति गुणैर्गुणकार्यै रागादिभिः स्वाभाविकैः पूर्वकर्मसं (५)
स्कारोद्भूतैः ५३ कर्मवशेन च तदनुरूपो देहो भवतीत्याह लब्ध्वेति अव्यक्तं अदृष्टं निमित्तं लब्ध्वा व्यक्ताव्यक्तं
तदनुरूपं स्थूलसूक्ष्मं च शरीरं भवति यथा योनि मातृसदृशं यथा बीजं पितृसदृशं स्वभावो वासना शु
क्रशोणितयोरेकत्वेऽपि कर्मवासनया मातृपितृसदृशो देहो भवतीत्यर्थः ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संसारचक्रमुपसंहरंतो मुक्तिप्रकारमाहुः एषइति ईशसंगात् परमेश्वरभजनात् ५५ तदेवसामान्यतो धर्मादिनिर्णयमु
क्त्वा प्रस्तुतस्याजामिलस्याधर्मप्रपंचपर्यंतादं अस्त्वमाहुः अयंहीतियावदध्यायसमाप्ति तत्रद्वाभ्यांतत्पूर्ववृत्तांतानु
वादः अन्यायातिरेकप्रदर्शनार्थः शीलंसुस्वभावः वृत्तंसदाचारः गुणाः क्षमादयः तेषामालयः ५६ निरहंकृतो नि
रहंकारः ५७ आवृत्तः वनात्परावृत्तः ५८ भुजिष्यया भोगस्त्रिया दास्या मैरेयं मधुपैष्टीं सुरां पीत्वा मदेना घूर्णिते

एषप्रकृतिसंगेनपुरुषस्यविपर्ययः आसीत्सएवनचिरादीशसंगाद्विलीयते ५५ अयंहिश्रुतसंपन्नः शी
लवृत्तगुणालयः धृतव्रतोमृदुर्दांतः सत्यवान्मंत्रविच्छुचिः ५६ गुर्वग्न्यतिथिवृद्धानांशुश्रूषुर्निरहं
कृतः सर्वभूतसुहृत्साधुर्मितवागनसूयकः ५७ एकदाऽसौवनंयातः पितृसंदेशकृद्द्विजः आदा
यतत आवृत्तः फलपुष्पसमित्कुशान् ५८ ददर्शकामिनंकंचिच्छूद्रंसहभुजिष्यया पीत्वाचमधुमैर
यंमदाघूर्णितनेत्रया ५९ मत्तयाविश्लथन्नीव्याव्यपेतंनिरपत्रपं क्रीडंतमनुगायंतंहसंतमनया वि
तिके ६० दृष्ट्वातांकामलिप्तेनबाहुनापरिरंभितां जगामहृच्छयवशंसहसैवमोहितः ६१ स्तंभ
यन्नात्मनाऽऽत्मानंयावत्सत्वंयथाश्रुतं नशशाकसमाधातुंमनोमदनवेपितं ६२ तन्निमित्तस्म
न१ रव्याजग्रहग्रस्तोविचेतनः तामेवमनसाध्यायन्स्वधर्माद्विरराम ह ६३

घूर्णिते नेत्रे यस्याः ५९ विशेषेण श्लथं नीवी यस्याः तया सह व्यपेतं स्वाचाराद्भ्रष्टं ६० कामोद्दीपकेन चंदं कामलिप्तेन१
गरागेण हरिद्रादिना लिप्तेन ६१ सत्वं धैर्यं श्रुतं शास्त्रज्ञानं तद्बलेन स्तंभयन्नपि मदनेन कंपितं मनः समाधातुं न
क्षमोऽभूत् ६२ तद्दर्शनमेव निमित्तं यस्य स्मरस्य व्याज [illegible] यह स्तेन ग्रस्तः विचेतनो गतस्मृतिः ६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ष्ठ० यावतासमयेण ६४ त्वं भितापरिणितां ६५ ६६ अघ्यद्रूपमायुर्यस्यमेवन्तदीयमूत्रादिकमत्तीनिर्मलान् ६७ अष्टकानिर्वे
दो अष्टकन प्रायश्चित्तं अस्यैवचहितार्थेनेष्याम इत्याहुः यत्रेति ६८ षष्ठस्कंधे प्रथमोऽध्यायः द्वितीये विष्णुदेवैर्याम्यान्नाम
माहात्म्यमद्भुतं श्रावयित्वाद्विजो विष्णोर्लोकं नीतइतीर्यते नयकोविदाः न्यायनिपुणाः १ धर्मदृशा सभाधर्मःस्प म ३

तामेवतोषयामास पित्र्येणार्थेन यावता ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ६४ विप्रां स्वभार्या
मप्रौढां कुले महति लम्भितां विससर्ज चिरात्पापः स्वैरिण्यापांगविद्धधीः ६५ यतस्ततश्चोपनिन्ये
न्यायतोऽन्यायतो धनं बभारास्याः कुटुंबिन्याः कुटुंबं मंदधीरयं ६६ यदसौ शास्त्रमुल्लंघ्य स्वैरचार्य
तिगर्हितः अवर्तत चिरं कालमघायुरशुचिर्मलात् ६७ तत एनं दंडपाणेः सकाशं कृतकिल्बिषं नेष्यामोऽ
कृतनिर्वेशं यत्र दंडेन शुद्ध्यति ६८ इति श्रीभागवते महापुराणे षष्ठस्कंधे प्रथमोऽध्यायः बादरायणिरुवाच
६ एवं ते भगवद्दूता यमदूताभिभाषितं उपधार्याथ तान् राजन् प्रत्याहुर्नयकोविदाः १ विष्णुदूता ऊचुः
अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा २ प्रजानां पित
रो ये च शास्तारः साधवः समाः यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ३ यद्यदाचरति श्रेयानितर
स्तत्तदीहते स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ४ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः स्वयं धर्म
मधर्मं वा न हि वेद यथा पशुः ५ स कथं न्यर्पितात्मानं कृतमैत्रमचेतनं विश्रंभणीयो भूतानां सघृणो द्रोग्धुमर्ह राम
ति ६

शंति नेत्याहुः यत्र सभायां ये धर्मदृशः तेषां तां सभां २ पितरः पितृवत्पालकाः शास्तारः अनुशिक्षकाः वैषम्यमदंड्य
दंडनं ३ एतत्प्रवर्तितमधर्मं मन्या अपि करिष्यंतीति महत्कष्टमभूदित्याहुः यद्यदिति श्रेयान् श्रेष्ठः ४ विश्वस्तत्वा
दपीत्याहुः यस्येति द्वाभ्यां निर्वृतो निश्चितः ५ विश्वासेन नितरामर्पित आत्मा येन तं विश्रंभणीयः विश्वसनीयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीतनमर्तुं

खादिरोयूपो भवतीति अंगत्वेन। खादिरं वीर्यकामइ तिस्वथकृत्वेन तदुत्तरं न चैतेऽर्थवादाइति। वायव्यं श्वेतमालभेत भूति कामः एतस्य विधित्वे। वायुर्वै क्षेपिष्ठा देवता एतस्य विधिशेषत्वादर्थवादत्वं। विरोधे गुणवादः स्यादनुवादोवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः। आदित्यो यूपो भवति। यजमानः प्रस्तरः। अग्निर्हिमस्य भेषजं। वज्रहस्तः पुरंदरः क्रमेण।

द्वादशाक्षरी ३

ननु तस्य पापिनो दंडे किमर्थमाक्रोश क्रियते तत्राह। अयंहीति यद्यस्मात् विवशोपि हरेर्नाम व्याजहार उच्चारितवान् नकेवलं प्रायश्चित्तमात्रं हरेर्नाम अपितु स्वस्त्ययनं मोक्षसाधनमपि सकृदुच्चारितं येन हरिरित्यक्षरद्वयं परिकरस्तेन मोक्षायगमनं प्रतीतिस्मृतेः। ७ ननु कर्मसाद्गुण्यकारं हरेर्नाम नियुक्तं यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमित्यादि वचनात् स्वातंत्र्येण त्वघनिवर्तकं हरेर्नाम कथं स्यात्तत्राह। एतेनैवेति अघोनो मघवत्सुहृदपत्यरूपं यत्र आह इति छेदः। आहपत्र आभासमात्रं चतुरक्षरं यन्नाम जगाद येनैव केवलेन चतुरक्षरमिश्रेणाधिकं वेदर्शितं कथंजगद नारायण आयः आगच्छ इत्येवं विक्रोशतरूपेण पुत्राह्वानेन। अयं भावः कर्मांगत्वेपि

अपवर्ग: २

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः। ७ एतेनैव ह्यघोनोस्य कृतं स्यादघनिष्कृतं यदा नारायणायेति जगाद चतुरक्षरं ८ राम

हरिनाम्नः खादिरत्वादिवत्संयोगपृथक्त्वेन सर्वप्रायश्चित्तार्थत्वं युक्तमेव तथाहि अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिभिः पुराणैस्तावत्संहसांशनाम्नः स्वातंत्र्यमवगम्यते न चैतदर्थवाद इति शंकनीयं विधिशेषत्वाभावात् न च विध्यश्रवणादनुशेषताकल्पनीया यायदांभ्र याः श्रीकपालोभवतीत्यादिवदप्रार्थत्वेन विधिकल्पनापपत्तेः मंत्रेषु च मर्त्तास्त्रिमर्त्यस्यतेभूरिनाममनामहे विप्रासोजातवेदसः अस्यजानंतोनाम चिद्विवक्तनेत्यादिषु नाम्नस्संकीर्त्तनादिसर्वधर्माधिक्यमवगम्यते उपपादितं च मंत्रार्थवादनामपि स्वार्थप्रामाण्यं देवताधिकरणे तस्मात् श्रीनारायणनामाभासमात्रेणैव सर्वाघनिःष्कृतं कृतं स्यादिति ८

कर्मणः
एकस्य तु उभय
प्रत्वे संयोग
पृथक्त्वं स्यात्

धर्म ३

तद्दु पर्यपि ... महस्ते विष्णो सुमतिं भजामहे। अस्यार्थः। मर्त्ताः मर्त्याः मरणधर्माणः विप्रासः विप्राः ते वयं जमर्स्य विष्णोः स्य जानंते नाम भूरि तपोदानादिभ्योधिकं नाम देय

अ श्री समर्थो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कामकृतानां बहूनां महापातकानां सहस्रशः आवर्तितानां द्वादशाब्दादिकोटिभिरप्यनिवर्त्यानां कथमेकमेव प्राय
श्चित्तं स्यात् तत्राह स्तेन इति द्वाभ्यां ९ सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव तत्र हेतुः यतो नामव्याहरणात् तद्विषया नामोच्चा
रकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति १० श्रेष्ठत्वमेवोपपादयति नेति द्वाभ्यां ब्रह्मवा
दिभिरुक्तैर्व्रतादिभिर्निष्कृतैस्तथा न शुद्ध्यति उदाहृतैरुच्चरितैर्यथा नामपदैरित्युक्तेन नमामीत्यादिक्रियायोगोपि
नापेक्षित इति दर्शितं किंच तन्नामपदोच्चारणं तु उत्तमश्लोकस्य गुणानां चोपलम्भकं भवति ननु कृच्छ्रचान्द्रायणादि चेत्ता
पनिवृत्तिमात्रापेक्षिणामित्यर्थः ११ नैकान्तिकं नात्यन्तशोधकं तन्निष्कृते यस्मिन् कृतेपि असत्पथे पापमार्गे मनो धावति

स्तेनः सुरापो मित्रध्रुक् ब्रह्महा गुरुतल्पगः स्त्रीराजपितृगोहन्ता ये च पातकिनोपरे ९ सर्वेषामप्यघवता
मिदमेव सुनिष्कृतं नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः १० न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्य
त्यघवान् व्रतादिभिः यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकं ११ नैकान्तिकं तद्धि कृते
पि निष्कृते मनः पुनर्धावति चेदसत्पथे तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्वभावनः
१२ अथैनं मापनयत कृताशेषाघनिष्कृतं यदसौ भगवन्नाम म्रियमाणः समग्रहीत् १३ रामराम

चेत् कर्मणां पापानां निर्हारमात्यन्तिकं नाशमिच्छतां हरेर्गुणानुवाद एव प्रायश्चित्तं यतोसौ खलु सत्वभावनः चि
त्तशोधकः १२ अथैनं तस्मादेनं मा अपमार्गेण नयत कृतमशेषाणामघानां निष्कृतं येन यद्यस्मात् समग्रहीत् सम्पू
र्णमुच्चारितवान् नामैकदेशेनाप्यलमिति भावः म्रियमाण इत्यनेन पुनः पापान्तरासंभव उक्तः ननु तत्कालत्वमेव वि
वक्षितं तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात् न चैवं विधिं विना काकतालीयनामोच्चारणं पापाप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वयं पुत्रनामाग्रहीत् ननु भगवन्नाम तत्राह । सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं परिहासेन कृतं स्तोभं गीतालापपूरणार्थं कृतं हेलनं किं विष्णुनेति सावज्ञमपि चैवं वैकुंठनामोच्चारणं १३ ननु नापसंकल्पपूर्वकं वैकुंठनामाग्रहीत् किंतु पुत्रस्नेहपरवशः सन् तत्राह । पतित इति अवशेनापि यो हरिरित्याह स यातनां नार्हतीति पुमानित्यनेन नात्र वर्णाश्रमादिनियम इत्युक्तं अवशत्वमेवाह पतितः प्रासादादिभ्यः स्खलितो मार्गे भग्नः भग्नगात्रः संदष्टः सर्पादिभिः तप्तो ज्वरा

सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा वैकुंठनामग्रहणमशेषाघहरं विदुः १३ पतितः स्खलितो भग्नः संदष्टस्तप्त आहतः हरिरित्यवशेनाह पुमान्नार्हति यातनाः १४ गुरूणां च लघूनां च गुरूणि च लघूनि च प्रायश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः १५ श्रीराम श्रीहरि राम

दिना आहतो दंडादिना १४ ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं न त्वल्पं नामग्रहणमात्रं पापतारतम्येन कृच्छ्रादितारतम्यवत् तत्राह द्वाभ्यां गुरूणां पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यवस्था हरिनाम्नस्तु नैष व्यवस्थोक्ता विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् न च सुराबिंदुपानं महापातकं त्व स्मरणं च नाम्नस्तु प्रायश्चित्तं स्मरणस्याय भेत्तिभारः १५

न ह्वा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ष० कि चैतैस्तपोदानादिभिस्तान्यघान्येव पूयंते न तु शंपति अधर्मोज्ञानं मलिनं तुतस्य पापकर्तुर्हृदयं यद्वा तेषामघानां हृदयस्थसूक्ष्म
रूपसंस्कारांश्च न शुध्यति तदपीशांघ्रिसेवया कीर्तनादिना शुध्यतीत्यर्थः अयं भावः महांत्यपि पापानि सकृदुच्चारितेनैव
नाम्ना नश्यंति सकृत्प्रवर्तितेन दीपेनेव गाढध्वांतानि तदा तस्यानुपापांतरस्यानुत्पत्तिः दीपधारणइव तमोऽंतरस्य तत्र
वासनाक्षयात् हृदयशुद्धिः एतदर्थमेव तत्र तत्र आवृत्तिविधानं पापक्षयश्च भवति स्मरतां च महर्निशमित्यादिषु तदेवा
त्राप्युक्तं गुणानुवादः खलु सत्वभावनः तदपीशांघ्रिसेवयेति च अतो सकृत् हरिनाम्नैव सर्वपापक्षयः वासनाक्षयस्तु
महापुरुषदर्शनादिभिरिति १६ तथापि पापप्रायश्चित्तमिदमिति ज्ञात्वा नोच्चारितमिति चेत् तत्राहुः अज्ञानादि

नैस्तान्यघानि पूयंते न तपोदानजपादिभिः नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया १६ अज्ञानाद
थवा ज्ञानादुत्तमश्लोकनाम यत् संकीर्तितमघं पुंसो दहेदेधो यथानलः १७ यथागदं वीर्यतम
९ मुपयुक्तं यदृच्छया अजानतोऽप्यात्मगुणं कुर्यान्मंत्रोऽप्युदाहृतः १८ श्रीराम श्रीराम श्री

ज्ञानाद १ ति बाल्केनापि प्रक्षिप्तोग्निर्यथा काष्ठराशिं दहति तद्वत् १७ ननु इदमपि पर्षदनुपदिष्टं श्रद्धाहीनं च कथं प्रायश्चि रि १
तं स्यात् तत्राहुः यथेति अगदमौषधं वीर्यवत्तममिति वक्तव्ये वीर्यतममित्युक्तं यदृच्छया श्रद्धादिहीनं उपयुक्तं
पर्षन्मुखेन नोपदि भक्षितं पर्षन्मुखं वा ज्ञानतोऽपि स्वगुणमारोग्यं कुर्यात् मंत्रोऽपि नामात्मकस्तथा स्वकार्यं कुर्यादेव न हि व
ष्टमपि इ स्तुशक्तिः श्रद्धादिकमपेक्षत इत्यर्थः तदुक्तं विष्णुधर्मेषु हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः अनि राम
च्छयापि संस्पृष्टो दहत्येव हि पावकः इति १८ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदत्रयप्रतिपाद्यं

या॰ तंविप्रममूमुचन्मोचयामासुः १९ प्रत्युदिताः निराकृताः संतः यातागत्वायमराजाययथावत्कथयामासुः २० दर्शनेनोत्सवो
यस्य २१ विवक्षुं वक्तुमिच्छंतंज्ञात्वा २२ त्रैविद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यमदूतानां धर्मं कृष्णदूतानां च भागवतं भगवत्प्र
णीतं शुद्धं निर्गुणं धर्ममाकर्ण्य नितरां भक्तिमानासीदित्युत्तरस्यानुषंगः २३ अनुतापं प्रपंचयति अहो इति त्रिभिः

या॰ शुक उवाच एवं सुविनिर्णीय धर्मं भागवतं नृप तं याम्यपाशान्निर्मुच्य विप्रं मृत्योरमूमुचन् १९ इति प्रत्युदि
ताः याम्या दूता यात्वा यमांतिके यमराज्ञे यथा सर्वमाचचक्षुररिंदम २० स पाशाद्विनिर्मुक्तो गतभीः प्र
कृतिं गतः ववंदे शिरसा विष्णोः किंकरान्दर्शनोत्सवः २१ तं विवक्षुमभिप्रेत्य महापुरुषकिंकराः स
तत्रैवांतर्दर्शनेन घाः ४ हसा पश्यतस्तस्य तत्रांतर्दधिरेऽनघाः २२ अजामिलोऽप्यथाकर्ण्य दूतानां यमकृष्णयोः धर्मं भाग
वतं शुद्धं त्रैविद्यं च गुणाश्रयं २३ भक्तिमान्भगवत्याशु माहात्म्यश्रवणाद्धरेः अनुतापो महानासीत्
स्मरतोऽशुभमात्मनः २४ अहो मे परमं कष्टमभूदविजितात्मनः येन विप्लावितं ब्रह्म वृषल्यां जायताऽ
त्मना २५ धिङ्मां विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलं हित्वा बालां सतीं योऽहं सुरापीमसतीमगां २६ वृ
द्धावनाथौ पितरौ नान्यबंधू तपस्विनौ अहो मयाऽधुना त्यक्तावकृतज्ञेन नीचवत् २७ सोऽहं व्यक्तं पति
ष्यामि नरके भृशदारुणे धर्मघ्नाः कामिनो यत्र विंदंति यमयातनाः २८ श्रीराम श्रीराम श्रीराम

येन आत्मना मया वृषल्यां पुत्ररूपतया जायमानेन ब्रह्म ब्राह्मण्यं जातिः विप्लावितं नाशितं २५ दुःकृतं दोषकर्तारं कुलस्य
कज्जलं कलंकं २६ नास्त्यन्यो बंधुः पुत्रादिर्ययोः तपस्विनौ संतप्तौ अधुना तत्क्षणमेव २७ २८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ष०४० इदानींतस्यविमर्शपूर्वकंमोक्षक्रममाह किमिदमितिषड्भिः साक्षात्प्रत्यक्षमिहजाग्रत्येवदृष्टं २९ येमांव्यमोचयन्तेचक्वगताः नतुस्वप्ने ॥ व्यकर्षयन् ।
३० यद्यप्यहमस्मिन्जन्मनिदुर्भगःपापीयान् अथापिजन्मांतरेनूनंपुण्यवानित्याह विबुधोत्तमदर्शनइतिनिमित्तसप्त

किमिदंस्वप्नआहोस्वित्साक्षाद्दृष्टमिहाद्भुतं क्वयाताअद्यतेयेमांव्यकर्षन्पाशपाणयः २९ अथते
क्वगताःसिद्धाश्चत्वारश्चारुदर्शनाः व्यमोचयन्नीयमानंबध्वापाशैरधोभुवः ३० अथापिमेदुर्भगस्य
विबुधोत्तमदर्शने भवितव्यंमंगलेनयेनात्मामेप्रसीदति ३१ अन्यथाम्रियमाणस्यनाशुचेर्वृष
लीपतेः वैकुंठनामग्रहणंजिह्वावक्तुमिहार्हति ३२ क्वचाहंकितवःपापोब्रह्मघ्नोनिरपत्रपः
क्वचनारायणेत्येतद्भगवन्नाममंगलं ३३ सोऽहंतथायतिष्यामियतचित्तेंद्रियानिलः यथानभू
यआत्मानमंधेतमसिमज्जये ३४ विमुच्यतमिमंबंधमविद्याकामकर्मजं सर्वभूतसुहृच्छांतो
मैत्रःकरुणआत्मवान् ३५ मोचयेग्रस्तमात्मानंयोषिन्मय्यात्ममायया विक्रीडितोययैवाहं
क्रीडामृगइवाधमः ३६ ममाहमितिदेहादौहित्वाऽमिथ्यार्थधीर्मतिं धास्येमनोभगवतिशुद्धंत
त्कीर्तनादिभिः ३७ इतिजातसुनिर्वेदःक्षणसंगेनसाधुषु गंगाद्वारमुपेयायमुक्तसर्वानुबंधनः
३८

मीतेषांदर्शनार्थंपूर्वेणमंगलेनमहतापुण्येनभवितव्यंयेनदर्शनेन ३१ अन्यथापूर्वपुण्यंविनाकथंभूतंवैकुंठनामग्रह ९
तेवशीक्रियते जिह्वेतिग्रहणं ३२ ब्रह्मघ्नःविप्रत्वनाशकः ३३ अमिथ्याभूतोऽर्थेधीर्यस्यतथाभूतःसन्देहादौमम
पति। माहमितिहित्वाधास्ये ३७ मुक्तंसर्वमनुबंधनंपुत्रादिस्नेहोयेनसः ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्याहृतइंद्रियग्रामोयेन ऽर्थे गुणेभ्योदेहेंद्रियादिभ्यः आत्मानंवियुज्यविशोध्य आत्मसमाधिनाचित्तैकाग्र्येण भगवतोधा
म्निरूपे ४० तस्मिन्भगवद्धाम्नितपारतानिश्चलाधीर्यस्यसः तस्मिन्कालेद्राक्षीदितिवाऽपुरः पुरतः ततश्चप्रागुपलब्धान ६१
वतानुपलभ्यप्रत्यभिज्ञायववंदे ४१ २ उपसंहरतिएवमितिद्वाभ्यांविप्लाविताः सर्वेधर्मायेन हतंव्रतंस्वदारनियमोयस्य ४४

वादरायणिरुवाच सतस्मिन्देवसदनआसीनोयोगमास्थितः प्रत्याहृतेंद्रियग्रामोयुयोजमनआत्म
नि ऽर्थे ततोगुणेभ्यआत्मानंवियुज्यात्मसमाधिना युयुजेभगवद्धाम्निब्रह्मण्यनुभवात्मनि ४० य
र्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः उपलभ्योपलब्धान्प्रागववंदेशिरसाद्विजः ४१ हित्वाकले
वरंतीर्थेगंगायांदर्शनादनु सद्यःस्वरूपंजगृहेभगवत्पार्श्ववर्तिनां ४२ साकंविहायसाविप्रोमहापु
रुषकिंकरैः हैमंविमानमारुह्ययेयौयत्रश्रियःपतिः ४३ एवंसविप्लावितसर्वधर्मादास्याःपतिः
पतितोगर्ह्यकर्मणा निपात्यमानोनिरयेहतव्रतः सद्योविमुक्तोभगवन्नामगृह्णन् ४४ नातःपरं
कर्मनिबंधकृंतनंमुमुक्षतांतीर्थपदानुकीर्त्तनात् नयत्पुनःकर्मसुसज्जतेमनोरजस्तमोभ्यांक
७२ लिलंततोन्यथा ४५ यएवंपरमंगुह्यमितिहासमघापहं शृणुयाच्छ्रद्धयायुक्तोयश्चभक्त्यानुकीर्त्तयेत्
नवैसनरकंयातिनेक्षितोयमकिंकरैः यद्यप्यमंगलोमर्त्योविष्णुलोकेमहीयते ४७ म्रियमाणोहरेर्नाम
गृणन्पुत्रोपचारितं अजामिलोप्यगाद्धामकिंपुनःश्रद्धयागृणन् ४८ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधे
द्वितीयोध्यायः

कर्मनिबंधस्यपापमूलस्यकृंतनंछेदकमतःपरंनास्ति कस्मात्परंतीर्थपदस्यानुकीर्त्तनात् तत्रहेतुः यत्यतोऽनुकीर्त्तनात् ततोनुकी
र्त्तनादन्यथाप्रायश्चित्तांतरैःरजस्तमोभ्यांकलिलंमलिनमवतिष्ठतियत् तन्मनः ४६ नवेक्षितोभवति ४७ म्रियमाणःअवशत्वेन
श्रद्धाविहीनोपि ४८ षष्ठेद्वितीयोध्यायः

भा॰ष॰१० तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः सांत्वयित्वा स्वदूतांस्तान् वैष्णवे किंकरीकृताः विस्मृते निर्णीतं शास्त्रार्थं यममुखेन द्रढ
यितुं तृतीयाध्यायारंभः तत्र यदुक्तं यमराज्ञे यथा सर्वमाचचक्षुरिति ततः किं तत्र वृत्तमिति पृच्छति निशम्येति मुरारेर्नैदे
टि ३ शिकैः किंकरैरेवं हतान् अतएव हता आज्ञा यस्य यस्य वशवर्ती अयं जनः सोपि तान् प्रति किमाह १ अश्रुताश्रुतपूर्वमेतदित्याह
यमस्येति हे ऋषे यमस्य दंडभंगः कुतश्चन कस्माच्चिदपि श्रुतपूर्वो नासीत् एतत् एतस्मिन्नर्थे यद्वा न श्रुतपूर्वो एतत् यम
चे १ दूतनिराकरणं चासीत् अतः सर्वस्यापि लोकस्य संशयो वर्तते तं त्वत्तो न्यो न छिनत्तीति मे निश्चितं अतः कथयेति शेषः २

राजोवाच निशम्य देवः स्वभटोपवर्णितं प्रत्याह किं तान् प्रति धर्मराजः एवं हताज्ञो विहतान्मुरारेर्नैदेशिकै
र्यस्य वशे जनोयं १ यमस्य देवस्य न दंडभंगः कुतश्चनर्षे श्रुतपूर्व आसीत् एतन्मुने वृश्चति लोकसं
शयं न हि त्वदन्य इति मे विनिश्चितं २ शुक उवाच भगवत्पुरुषै राजन् याम्याः प्रतिहतोद्यमाः पतिं वि
१० ज्ञापयामासुर्यमं संयमिनीपतिं ३ यमदूता ऊचुः कति संतीह शास्तारो जीवलोकस्य वै प्रभो त्रैवि
ध्यं कुर्वतः कर्म फलाभिव्यक्तिहेतवः ४ यदि स्युर्बहवो लोके शास्तारो दंडधारिणः कस्य स्यातां न
वा कस्य मृत्युश्चामृतमेव वा ५

भगवतः पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः ३ कति संतीत्याक्षेपोक्तिः त्रैविध्यं त्रिविधं स्वार्थे ष्यङ्
यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः तदर्थं च कर्मफलस्याभिव्यक्तिहेतवः कति संतीति ४ संतु बहवः को
दुः ३ बाधस्तत्राह यदीति मृत्युः दुःखं अमृतं सुखं तेषां विप्रतिपत्तेरिति उभे कस्यचिन्न कस्यापि परस्परकार्यविरोधेनोभयो स्या॰ ३ राम
रपि प्रतिबंधात् एको मन्यते नु कस्य वा न स्यातां एकः सुखं कर्तुमिच्छति दुःखं चान्यः एको मन्यते नतयोः परस्परका १०
र्यानुमर्दनेनोभयोरपि प्राप्तेः कस्य वा ते उभे अपि न स्यातामित्यर्थः ५ राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु बहूनां कर्मिणां व्यवस्थया बहवः शास्तारो भवंतु तथा सति नायं दोषः स्यात्तत्राहुः बहूनां कर्मिणां व्यवस्थया शास्तृ बहुत्वे शास्तृ
त्वं स्यात् घटेत न किंतु तदा यत्सर्वेशस्तरि मुख्यं शास्तृत्वं तदेकदेशे तु उपचार मात्रमेव स्यात् यथा चक्रवर्तिन एव मुख्यं शास्तृत्वं
मंडलवर्तिनामुपचार मात्रं निरंकुशत्वाभावात् ६ यस्मादेवं शास्तृ बहुत्वं न घटते अतस्त्वमेक एव शास्ता शुभाशुभ विवि
ति १ नक्तीं तथा ७ विप्रलंभिता वंचिता लंघितेत्यर्थः ८ तदेवाहुः नीयमानमिति ९ ते तव तान् यदि नोऽस्माकं क्षमं हितं मन्य

किंतु शास्तृ बहुत्वे स्याद्बहूनामिह कर्मिणां शास्तृत्वमुपचारो हि यथा मंडलवर्तिनां ६ अतस्त्वमेको भू
तानां सेश्वराणामधीश्वरः शास्ता दंडधरो नृणां शुभाशुभ विवेचनः ७ तस्य ते विहितं दंडं न लो
के वर्त्तते धुना चतुर्भिरद्भुतैः सिद्धैराज्ञा ते विप्रलंभिता ८ नीयमानं तवादेशादस्माभिर्यातनागृहा
न् व्यमोचयन्पातकिनं छित्वा पाशान्प्रसह्य ते ९ तांस्ते वेदितुमिच्छामो यदि नो मन्यसे क्षमं ॥
नारायणेत्यभिहिते मा भैरित्याययुर्द्रुतं १० श्रीबादरायणिरुवाच इति देवः स आपृष्टः प्रजासं
यमनो यमः प्रीतः स्वदूतान्प्रत्याह स्मरन्पादांबुजं हरेः ११ यम उवाच परो मदन्यो जगत
स्तस्थुषश्च ओतं प्रोतं पटवद्यत्र विश्वं यदंशतोऽस्य स्थितिजन्मनाशा नस्योतवद्यस्य वशे च लोकः १२
से अन्यथाऽज्ञानतस्तदवज्ञानतो वाप्यनर्थः स्यात् अत क्वाहि तेषां प्रभावः यतो नारायणायेति केवलमभिहिते मा भयं कुर्विति
वदंतः शीघ्रमागताः १० संयमयति तथा ११ मत्तोऽन्यो जगतः तस्थुषश्च परोऽधीश्वरोऽस्ति अहं तु जंगमानामेव तत्रापि
नृणामेव तत्रापि पापिनामेव तत्किंकरः स तु ईश्वरः स तु सर्वेश्वरः कोऽसौ यत्र यस्मिन् विश्वमोतं प्रोतं च तंतुषु ति
र्यक्तंतुषु पटवत् यस्यांशभ्यो विष्णुब्रह्मरुद्रेभ्यो अस्य स्थित्यादयो भवंति यस्य च वशे लोको वर्त्तते नसि नासिकायां
प्रोतबलीवर्दवत् १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰ एतत्प्रपंचयति ब्राह्मणादिनामभिर्वाचीयां निजायां तंत्र्यां दामन्यां जनं यो बध्नाति दामभिर्गाः बलीवर्दानिव तद्ईमे जीवाः
नामकर्मभिर्निबंधैर्बद्धाः यस्मै बलिं वहंति यदधीनाः कर्म कुर्वंतीत्यर्थः १३ यस्य च लोकाद्दुर्विज्ञेयत्वमाह अहमि
ति द्वाभ्यां अस्पृष्टरजस्तमस्कैः ईहितं अभिप्रेतं चेष्टितं वा न विदुः स्पृष्टमायाः मायया स्पृष्टाः ततस्तेभ्योन्ये न विदुरिति
किं पुनर्वक्तव्यं १४ १५ तन्मायामोहितत्वान्न जानंतीत्युक्तं अविषयत्वाच्चेत्याह यमिति गोभिरिंद्रियैर्हृदा चि

यो नामभिर्वाचि जनान्निजायां बध्नाति तंत्र्यामिव दामभिर्गाः यस्मै बलिं त इमे नामकर्मभिर्निबंधब
द्धाश्चकिता वहंति १३ अहं महेंद्रो निरृतिः प्रचेताः सोमोग्निरीशः पवनोर्को विरिंचिः आदित्य
विश्ववसवोथ साध्या मरुद्गणा रुद्रगणाः ससिद्धाः १४ अन्ये च ये विश्वसृजोमरेशा भृग्वादयोस्पृ
११ ष्टरजस्तमस्काः यस्येहितं न विदुः स्पृष्टमायाः सत्वप्रधाना अपि किं ततोन्ये १५ यं वै न गोभिर्मन
सासुभिर्वा हृदा गिरा वासुभृतो विचक्षते आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्त
तः परं १६ तस्यात्मतंत्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः प्रायेण दूता इह वै मनोहरा
श्चरंति तद्रूपगुणस्वभावाः १७ ॥

यन्मनो न मनुते त्तेन न विचक्षते न पश्यंति यद्वा चानभ्युदितं यन्मनसा न मनुत इत्यादि श्रुतेः आत्मानं जीवानां आत्मानं द्रष्टारं आ राम
कृतयो रूपाणि चक्षुर्यथा कर्मभूतं न जानंति ततः परमाकृतीनां प्रकाशकं नहि प्रमाता प्रमाणस्य विषय इति भावः ११
एवंभूतः परमेश्वरोस्तीति पूर्वेणैव संबंधः १६ भवत्वेवंभूतोन्यः परमेश्वरः येन पुनरस्मान्निभेत्स्य पापिनो रक्षित
वंतस्ते के तानाह तस्येति द्वाभ्यां तस्यैव रूपगुणाः प्रभावादयः स्वभावः भक्तवात्सल्यादिर्येषां ते १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नया: गुह्यं अतीन्द्रियं मोक्षप्रकाशकं विशुद्धं शुद्धांतःकरणेनाप्यमानं अत एव दुर्बोधं यज्ज्ञात्वा अमृतं मोक्षं अश्नुते प्राप्नोति ॥ ४

स्मात् २

विष्णोर्भूतानि भृत्याः दुर्दर्शानि द्रष्टुमशक्यानि लिंगानि रूपाणि येषां तानि तद्भक्तिमतः विष्णुभक्तान् परेभ्यः शत्रुभ्यः
सर्वतः अग्न्यादिभ्यश्च रक्षंति १८ ननु विष्णुभक्ताश्चेत् कथम धर्मपक्षपातं कृतवंतः तत्राह धर्ममिति आपयोर्भगवाद
यः १ १९ ननु कोपि चेन्न जानाति तस्य सत्त्वे किं प्रमाणं तत्राह स्वयंभूरिति कुमारः सनत्कुमारः वयमित्यात्मानमेव बहु
मन्यमानो निर्दिशति २० २१ तमेव धर्ममाह एतावानिति २२ न चात्र प्रमाणं वक्तव्यं दृष्टत्वादित्याह नामोच्चारणेति
येनैव केवलेन सकृदुच्चारितेन २३ ननु नामाभासेन कथं सर्वपापक्षयः श्रद्धाभक्त्यादरपि विधानात् तथाहि माघ
प्रातः स्नानं भक्त्यादुःखग्रामाद्विमुच्यत इति अनुदिनमिदमादरेण शृण्वन्निति श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः

भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च १८
धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः १९
स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं २० द्वादशैते विजानीमो धर्मं भाग
वतं भटाः गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते २१ एतावानेव लोकेस्मिन् पुंसां धर्मः परः स्मृतः भक्तियोगो भगव
ति तन्नामग्रहणादिभिः २२ नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः अजामिलोपि येनैव मृत्युपाशादमुच्यत २३
एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां विक्रुश्य पुत्रमघवान् यदजामिलोपि नारायणेति
म्रियमाण इयाय मुक्तिं १ २४

जन्मकर्मगुणानां च तदर्थेऽखिलं च स्थितामित्याद्यास्मिन्नेव पुराणे तत्र तत्र पठ्यते पुराणांतरे च पापक्षयश्च भवति स्मरतां च महर्निश
मिति अन्यत्र च तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विध्यैकांतिकं निष्कृतमित्यादिना सम्यक् कीर्तनादेव
मन्यते किंच तथा सति किमिति मन्वादयो द्वादशाब्दादीनि स्मरेयुः तस्मादिदमनुपपन्नमिव तत्राह एतावतेति भगवतो गुणा
नां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यत् एतावता पुंसामघनिर्हरणाय पापक्षयमानाय अलं समर्थं योग्यं नास्ति क्लेश
दोषनिवारणे तथाहामरसिंहः अलं भूषणपर्याप्तिशक्तिवारणवाचकमिति उपयोगाभावमेवाह अजामिलो महापातकय
रिं अघवान् सुचिरपि म्रियमाणः स्वस्थचित्तोपि मुक्तिमवाप न तु अघनिर्हरणमात्रं अतो नामाभासेनापि सर्वपापक्षय इत्येवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ष॰३॰ यन्नूक्तंव्यर्थंतर्हिद्वादशाब्दादिस्मरणमिति तत्राह प्रायेणेति महाजनोमन्वादिः अयंभावः यथामृतसंजीवनौषधिमजानंतो
वैद्योरोगनिर्हरणायत्रिकटुकनिंबादीनिस्मरंति तथाचस्वयंभूशंभुप्रमुखद्वादशव्यतिरेकेणायंमहाजनोनितिगुह्यमिदमज्ञा
त्वाद्वादशाब्दिकंस्मरंतीति किंच माययादेव्याअलंमोहितमतिर्यजनः मधुमधुरंयथाभवत्येवंपुष्पितायां पुष्पस्थानीयैर
र्थवादैर्मनोहरायांत्रय्यांजडीकृताअभिनिविष्टमतिर्यस्य अतोमहत्येवकर्मणियुज्यमानानाल्पेप्रवर्त्तते दृश्य
तेहिप्राकृतस्यलोकस्यमहतिमंत्रादौश्रद्धाअल्पेचाश्रद्धा तस्मादस्यग्राहकोनोस्तीतिनोक्तिः यद्वास्वाधीनः सिद्धा नै १

प्रायेणावेदतदिदंनमहाजनोऽयंदेव्याविमोहितमतिर्बतमाययालं त्रय्यांजडीकृतमतिर्मधुपुष्पिता
यांवैतानिकेमहतिकर्मणियुज्यमानः २५ एवंविमृश्यसुधियोभगवत्यनंतेसर्वात्मनाविदधतेखलु
भावयोगं तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः २६ तेदेवसिद्धप
१२ रिगीतपवित्रगाथाः येसाधवःसमदृशोभगवत्प्रपन्नाः तान्नोपसीदतहरेर्गदयोदभिगुप्तान्नै
षांवयंनचवयःप्रभवामदंडे २७

स्यतावत्श्वश्रृगालादिनिवारणायतंयथानप्रयुंज्यते तथाऽतितुच्छत्वात्पापस्यनततन्निरसनायपरमंमंगलंह राम
रेर्नामस्मरंति यद्वा नाममाहात्म्यज्ञानेसर्वमुक्तिप्रसंगादित्येषादिकंग्रंथविस्तारभयात्तुनातिप्रपंच्यते २५ १२
त्रुक्ति॰पो॰२ भावयोगंअमीषांपातकेनस्यादेवायदिस्यात्तदुरुगायस्यवादः कीर्तनं २६ तदेवंधर्मतत्वंनिर्णीयभृत्याननुशा
स्तिनइति येभगवंतंप्रपन्नाः तेदेवैः सिद्धैः अपरिगीतापवित्रगाथाः वर्णितपवित्रकथाः अतस्तान्नोपसी
दतत्समीपमपिनगच्छतावयं कालोपिनप्रभवति २७ राम राम राम राम राम राम राम
राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताने वाह १ केनहिदंडार्थमानेयाइत्यत्राह तानिति द्वाभ्यां असतः दुष्टान् मुकुंदपादारविंदयोर्योमकरंदस्तद्रसस्तस्माद्विमुखा
न् कथंभूतान् निःकिंचनैरजस्रंजुष्टान् तेषां ज्ञापकमाह निरयवर्त्मनिगृहधर्मेऽशून्यगृहे वद्धात्तृष्णायेस्तान् २८
किंच जिह्वेत्यादि येषांजिह्वान्वाधन्वेयः नकृतंविष्णुकृत्यंभगवत्प्रणत्यादि यैः २९ भगवंतंक्षमापयन्निवेदयति त ग

ता १ तानानयध्वमसतो विमुखान्मुकुंदपादारविंदमकरंदरसादजस्रं निःकिंचनैः परमहंसकुलैरसंगैर्जुष्टा
द्गृहे निरयवर्त्मनिबद्धतृष्णान् २८ जिह्वानवक्तिभगवद्गुणनामधेयं चेतश्चनस्मरतितच्चरणारवि ता २
दं कृष्णायनोनमतियच्छिरएकदापितानानयध्वमसतोऽकृतविष्णुकृत्यान् २९ तत्क्षम्यतांस
भगवान्पुरुषः पुराणोनारायणः स्वपुरुषैर्यदसत्कृतंनः स्वानामहोनविदुषांरचितांजलीनां क्षांतिर्गरीयसिनमः पुरुषायभूम्ने ३०
श्रीशुक उवाच २ तस्मात्संकीर्तनंविष्णोर्जगन्मंगलमंहसां महता
मपिकौरव्यविद्ध्यैकांतिकनिष्कृतिं ३१ शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः यथासुजा
तयाभक्त्याशुद्ध्येन्नात्मावतादिभिः ३२ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीरा०

अयंभावः नः स्वपुरुषैरस्म दीयैरज्ञानेनास्थितैः स्वीयैरेवपुरुषैर्यद्यस्मादसत्कृतमन्याय्यंकर्मतस्मात्स्वयमेवक्षम्यतांसहतांग ता १
स्वानांस्वीयानांनः नविदुषांअज्ञानांअहोगरीयसितस्मिन्क्षांतिर्युक्तेत्याहहइतिपाठे स्वीयानांमाहात्म्यमविदुषांनः क्षमां
कारोत्वित्यर्थः ३० तस्मादित्यादिश्लोकान्तिः जगतामपिमंगलरूपं ३१ ऐकांतिकत्वमेवाह शृण्वतामिति व्रतादिभिस्तथान
शुद्ध्यत् ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ४४ एतदुपपादयति कृष्णांघ्रिपद्मयोर्मधुलिडिति आस्वादयतीति तथा मधुलिट् तु तत्त्वेन विसृष्टा ये मायागुणा विषयास्तेषु पुनर्न रमते न सज्जते।
अन्यस्तु तन्मध्वास्वादरहितः अत एव कामाभिभूतः सन्नात्मनो रजः पापं प्रमार्ष्टुमपि कर्मैव प्राय। अतस्तत्र पमोहितय
तः कर्मणः पुनरपि रजः पापं स्यादेव कुंजरशौचवत् सत्त्वशोधकत्वाभावात् ३३ नैव विस्मितधियो बभूवुः किंतु स
त्यमुक्तमित्येवं मेनिरे ततः प्रभृति शंकमानाः अस्माभिः पहन्मादिनिशंकां वहंतः तद्दृष्टमपि विभ्यति स्म पाठं
तरेतु विस्मितधियो जाताः नेच ततः प्रभृति विभ्यति स्मेत्यर्थः ३४ कुंभे सम्भवोऽगस्त्यो मलये पर्वते आसीनोऽप्यग्राहरि

कृष्णांघ्रिपद्ममधुलिड् न पुनर्विसृष्टमायागुणेषु रमते वृजिनावहेषु अन्यस्तु कामहत आत्मरजः प्रमा
र्ष्टुमीहेत कर्म यत एव रजः पुनः स्यात् ३३ इत्थं स्वभर्तृगदितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिं
५९ करास्ते नैवाच्युताश्रयजनं प्रतिशंकमाना द्रष्टुं च बिभ्यति ततः प्रभृति स्म राजन् ३४ इति श्रीभागवते
महापुराणे षष्ठस्कंधे तृतीयोऽध्यायः ३ राजोवाच देवासुरनृणां सर्गो नागानां मृगपक्षिणां सामासिक
स्त्वया प्रोक्तो यस्तु स्वायंभुवेंऽतरे १ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

मर्चयन् पुनः पुनः विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थः ३५ षष्ठे तृतीयः चतुर्थादित्रिभिर्विश्वसृष्टिजन्मविवक्षया राम
प्रचेतः सुतदक्षस्य वंशस्यावस्यतेऽत्र चतुर्थे तु प्रजासृष्ट्यै दक्षेणाराधनं हरेः तपसा हंसगुह्याख्यस्तोत्रेण च वनि १३
रूप्यते प्रसक्तानुप्रसक्तेन स्वायंभुवसुतान्वयं नामप्रभावमाकर्ण्य वंशमास्संबुभुत्सते देवासुरेति द्वाभ्यां सा
मासिकः संक्षिप्तायः प्रोक्तः तृतीयस्कंधे १

इतिहासमिमं मत्वां भगवान्कुंभसंभवः ॥ कथयामास मलय आसीनो हरिमर्चयन् ॥ ३५ ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यासं विस्तारं तेत्वतः यया शक्त्या यथा ससर्ज्ज तां शक्तिं तं च प्रकारं च ज्ञातुमिच्छामि अनुसर्गमनुवृत्तं सर्गं २ ३ दक्षादिरूपेण स
सर्ज्जेति वक्तुं दक्षजन्मप्रकारमाह यदेति प्राचीनवर्हिषः पुत्रा यदा समुद्रमध्यादुन्मग्ना निर्गताः तदा गां पृथ्वीं द्रुमैर्वृतां २१
ददृशुः नारदोपदेशात् प्राचीनवर्हिषो निवृत्त्या अजैरीकर्षणनिरूप्याद्यभावात् ४ तपसा दीपितो मन्युर्येषां तेषां द्रुमा

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा अनुसर्गं यया शक्त्या ससर्ज्ज भगवान्परः २ सूत उवाच इति संप्र
श्नमाकर्ण्य राजर्षेर्वादरायणिः प्रीतस्तं च महायोगी जगाद मुनिसत्तमाः ३ शुक उवाच यदा प्रचेतसः
पुत्रा दश प्राचीनवर्हिषः अंतःसमुद्रादुन्मग्ना ददृशुर्गां द्रुमैर्वृतां ४ द्रुमेभ्यः क्रुध्यमानास्ते तपो
दीपितमन्यवः मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ५ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कु
रूद्वह राजोवाच महान्सोमो मन्युं प्रशमयन्निव ६ न द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ
विवर्द्धयिषवो यूयं प्रजानां पतयः स्मृताः ७ अहो प्रजापतिपति भगवान्हरिरव्ययः वनस्पती
नोषधीश्च ससर्ज्जोर्ज्जमिषं विभुः ८ अन्नं चराणामचरा ह्यपदः पादचारिणां अहस्ता ह
स्तयुक्तानां द्विपदां च चतुष्पदः ९ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः प्रजासर्गाय
हि कथं वृक्षान्निर्दग्धुमर्हथ १० आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं पित्रा पितामहेनापि जु

एणं दग्धुमिच्छया ताभ्यां वाय्वग्निभ्यां दह्यमानांस्तान्द्रुमान्वनस्पतीनां राजा सोम उवाच न द्रुमेभ्य इति नवभिः ६
हे महाभागाः विवर्धयिषवो वर्द्धयितुमिच्छवः ७ प्रजापतीनां पतिः दक्षप्रभृत्यपेक्षया नु चितः पितामहः अहो इति त्रिभिः
ऊर्ज्जं भक्ष्यं इषमन्नं ८ ९ १० आतिष्ठत आश्रयत सतां मार्गमुपशमं पित्रादिभिर्जुष्टं ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ष४० प्रजानांप्रजापतिरेवंबधुः अतस्तज्जीविकानाशेनकर्त्तव्यइतिदृष्टांतंपंचकेनाह लोकानांवालानांमातापितरौ अज्ञा
नांज्ञानदोगुधएवसुहृत् १२ ईश्वराधिष्ठानत्वाच्चभूतद्रोहोनयुक्तइत्याह अंतर्देहेषितिव १ युष्माभिः १३ आका
कमि १ शादेहे समुत्पतितं अशोकास्मिन्नित्यर्थः आत्मविचारेणयोनियच्छतु १४ रिवलानांशेषाणांव १ युष्माकंच शिवमस्त्वाद्य
लोकानांपितरौबंधुर्दृशांपक्ष्मस्त्रियाः पतिः पतिः प्रजानांभिक्षूणांगृहेष्वज्ञानीबुधः सुहृत् १२ अंतर्दे
हेषुभूतानामात्मास्तेहरिरीश्वरः सर्वंतद्धिष्ण्यमीक्षध्वमेवंवस्तोषितोह्यसौ १३ यः समुत्पतितं
देहेआकाशान्मन्युमुल्बणं आत्मजिज्ञासयायच्छेत्सगुणानतिवर्त्तते १४ अलंदग्धैर्द्रुमैर्दीनैः खि
लानांशिवमस्तुवः वार्क्षीह्येषावराकन्यापत्नीत्वेप्रतिगृह्यतां १५ इत्यामंत्र्यवरारोहांकन्यामाप्सरसीं
नृप सोमोराजाययौदत्त्वातेधर्मेणोपयेमिरे १६ तेभ्यस्तस्यांसमभवत्दक्षः प्राचेतसः किल यस्यप्र
१४ जाविसर्गेणलोकाआपूरितास्त्रयः १७ यथाससर्जभूतानिदक्षोदुहितृवत्सलः रेतसामनसा
चैवतन्ममावहितः शृणु १८ मनसैवासृजत्पूर्वंप्रजापतिरिमाः प्रजाः देवासुरमनुष्यादीन्नभस्स्थ
लजलौकसः १९ तमबृंहितमालोक्यप्रजासर्गंप्रजापतिः विंध्यपादानुपव्रज्यसोचरत्दुष्करंतपः २०
प२ तत्राघमर्षणंनामतीर्थंपापहरंपरं उपस्पृश्यानुसवनंतपसातोषयद्धरिं २१ अस्तौषीद्धंसगुह्ये
नभगवंतमधोक्षजं तुभ्यंतदभिधास्यामिकस्यातुष्यद्यतोहरिः २२
रक्षणार्थं तदीयांकन्यांददातिवार्क्षीति हे सः पालितां १५ आमंत्र्यसांत्वयित्वा आप्सरसीं अप्सरसः प्रम्लोचायाः सु राम
तां १६ दुहितृवत्सलइतितस्यकन्याविंशतिस्युक्तंममम १९ १८ प्रजापतिर्दक्षः १९ अबृंहितं असंवृद्धं १४
विंध्यस्यपादानुसन्निहितपर्वतान् २० २१ हंसगुह्यारव्येनस्तोत्रेणकस्यदक्षस्य २२ ॥ श्रीराम श्रीराम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परायसर्वात्मायनमोदधेनमनंकरोमि परत्वेहेतुः अवितथानुभूतिः विच्छित्तिर्यस्य अतोगुणत्रयाभासोजी
वोनिमित्तंमायाचतयोर्वंधवनियत्र एवमपिगुणषुतत्वबुद्धियेषांतेजीवेरदृष्टधामस्वरूपंयस्य नत्रहेतुः निवृत्तंमा
नंयस्मात्पाठांतरेनिवृत्तमानमवधिश्रयस्मात् नहिकेनचित्तस्यसिद्धिः अतआह स्वयंभुवेस्वप्रकाशाय २३
अदृष्टधामत्वंदर्शयन्नाह नेति पुरुषःसखाजीवः अस्मिनपुरेदेहेवसन्नपित्रैवसंवसतः सख्युरेस्यसख्यक

प्रजापतिरुवाच नमःपरायावितथानुभूतयेगुणत्रयाभासनिमित्तबंधवे अदृष्टधा
म्नेगुणतत्वबुद्धिभिर्निवृत्तमानायदधेस्वयंभुवे २३ नयस्यसख्यंपुरुषोवेत्तिसख्युः
सखावसन्संवसतःपुरेस्मिन् गुणोयथागुणिनोव्यक्तदृष्टस्तस्मैमहेशायनमस्क
रोमि २४ देहोऽसवोऽक्षामनवोभूतमात्रानात्मानमन्यंचविदुःपरंयत् सर्वपुमान्वे
दगुणांश्चतज्ज्ञोनवेदसर्वज्ञमनंतमीडे २५ श्रीरामनारायणवासुदेव ॥ श्री

रणप्रवर्तकत्वादिकंनवेत्तिनजानातितस्मैकुतः व्यक्तदृष्टःरूपंचद्रष्टुः नहिद्रष्टाद्रश्योभवतीति प्रथमांतपाठेव्यक्ते
प्रपंचएवदृष्टिर्यस्यसः गुणोविषयोगुणिनोविषयिणइंद्रियादेःसख्यंप्रकाशकत्वंयथानवेत्तितद्वत् २४ ननु
गुणज्ञत्वान्नजानातिजीवस्तच्चनतेनः किमितिनजानातिअतआह देहइति देहश्चासवश्चप्राणाः [illegible] ऐ
क्षाणिंद्रियाणिमनवःअंतःकरणानि भूतानिच मात्राअतन्मात्राणिआत्मानंस्वस्वरूपंदृश्यंअन्यंइंद्रियव
र्गतयाःपरंदेवतावर्गंचनविदुःपुमान्जीवस्तुसर्वमेतत्त्रयंचेदगुणांश्चतन्मूलभूतान्वेदेतज्ज्ञोपिसन्यंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ष

७३

अद्वैधामत्वमुक्त्वास्वप्रकाशत्वमाह यदामनसत्तत्परामः समाधिः नसुषुप्तौ विलयः नचजागृत्स्वप्नयोरिव विक्षेपः तदाह
७१ नामरूपप्रपञ्चस्य तापयनन्तथातस्मात् उपरमे हेतुः दृष्टदर्शने स्मृतिश्चतयोः संप्रमोषात् नाशात् तदायः केवलेन स्वरूपज्ञानेन
प्रतीयते तस्मै हंसाय शुद्धाय शुचिशुद्धमनः सद्मप्रतीतिस्थानं यस्य तस्मै नमः २६ एवंभूतः केषां प्रतीयते इत्यपेक्षायामा
ह मनीषिणः द्वित्वाभ्यां विवेकिनां यं निष्कर्षन्ति विविच्य ध्यायन्ति सनिर्वाणसुखानुभूतिर्मम प्रसीदत्वामिति द्वयोरन्व
यः एवं निष्कर्षतां प्रतीयते इति भावः किमिति निष्कर्षन्ति स्वशक्तिभिर्गूढं अप्रकाशमानं कतिभिर्नवभिः पुनश्च त्रि
९५ वृद्भिः त्रिगुणाभिः सप्तविंशत्युपाधिभिर्गूढं अष्टाविंशतिः कर्षतीत्यर्थः यद्वा नवभिः प्रकृतिपुरुषमहदहंकार

यदा परो मामनसो नामरूपप्रपञ्चस्य दृष्टस्मृतिसंप्रमोषात् य ईयते केवलया स्वसंस्थया
हंसाय तस्मै शुचिसद्मने नमः २६ मनीषिणोऽन्तर्हृदि संनिवेशितं स्वशक्तिभिर्नवभिश्च
त्रिवृद्भिः वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निःकर्षन्ति गूढं २७ सवै ममाशेषवि
शेषमायानिषेधनिर्वाणसुखानुभूतिः ससर्वनामा सच विश्वरूपः प्रसीदतां निरुक्ता ७१
त्मशक्तिः २८

पंचतन्मात्रारूपाभिः त्रिवृद्भिः त्रिगुणात्मिकाभिः चकारात्षोडशविकाररूपाभिश्च कथंभूतं निःकर्षन्ति मनी
षयांतर्हृदि संनिवेशितं निश्चलीकृतं पांचदश्यं पंचदशसामिधेनीमंत्रैः प्रकाश्यं अलौकिकं वह्निमिवाहंका
रास्पदादात्मनोन्यं परमात्मानं निष्कर्षन्तीत्यर्थः २७ अशेषा विशेषा यस्याः तस्याः मायायाः निषेधन निर्वाण ९५
सुखस्यानुभूतिर्यस्य अप्रसक्तनिषेधासंभवात् प्रसक्तिमाह सएव सर्वनामा सएव विश्वरूपः इति तद्रूपत्वे
पिवास्तवत्वाभावात् निषेधः संभवतीत्याह अनिरुक्ता आत्मनिशक्तिर्माया यस्य सः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि [illegible] केवलया स्वसंस्थया प्रतीयते तर्हि सर्वनामत्वं विश्वरूपत्वं चानुपपन्नं वागाद्यगोचरत्वादित्याशंक्य
सर्वैर्नामभिर्वाच्यं प्रत्यक्षादिदृश्यं तस्य स्वरूपं वस्तुतो मा भूत् तथापि मायया घटत इति श्लोकत्रयेणापवादयन्नम
स्करोति यद्यदिति यद्यद्वचसा निरुक्तं अभिहितं धिया निरूपितं व्यवसितं अक्षभिर्वा इंद्रियैर्निरूपितं गृहीतं तदन्य
पि मनसापि निरूपितं संकल्पितं यस्य स्वप्रकाशत्वं तस्य तत् स्वरूपं मा भूत् स्वरूपत्वाभावे हेतुः हि यस्मात्तद्गुणाना
मेव रूपं पाठान्तरे गुणैर्व्यवच्छिन्नं स तु गुणव्यतिरिक्तः यतो गुणानामपायविसर्गाभ्यां प्रलयोत्पत्तिभ्यां लक्ष्यत इति तथा
चेतनाधिष्ठानं विना तयोरसंभवात् यद्वा यस्य स्वरूपं मा भून्न भवति तस्मिन्नमद् इति लक्ष्यते नान्वयः २९ तदेवं वस्तु
तो गुणस्वरूपत्वाभावमंगीकृत्य अनिरुक्तात्मशक्तिरित्यनेन योगितमायया सर्ववाच्यत्वेन विश्वरूपत्वमाह य

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसोत यस्य मा भूत्स्वरूपं गुणरूपं हि
तत्स गुणापायविसर्गलक्षणः २९ यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते का
र्यते च परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं ३०

स्मिन्नधिकरणे यतो पादानात् येन करणेन यस्य संबंधि यस्मै संप्रदानाय यद्दीप्सिततमं यः कर्ता कुरुते स्वतंत्रः
कार्यते चान्येन प्रयोज्यकर्त्ता तद्ब्रह्मेति प्रत्येकं संबंधः अत्र च सप्तभिर्यच्छब्दैः सप्तविभक्त्यर्था दर्शिताः यथेति च
क्रियाकारकसंबंधप्रकारवाचिनामव्ययानामर्थाः कुरुते कार्यते इति स्वार्थपरार्थक्रियान्वयश्च सर्वेषां दर्शितः
वशब्देन भावकर्मादिविहितप्रत्ययार्था संगृहीताः तद्ब्रह्मेवेति कुतस्तत्राह तद्धेतुस्तेषां कारणं तत्कुतः सर्वेभ्यः
प्राक्प्रसिद्धं ननु प्रह्लादयस्तु हेतवः श्रूयंते अत एव च दृश्यते तत्कथं ब्रह्मैव तद्धेतुः तत्राह परेषामवरेषां च हेतूनां प
रमं कारणं ननु सर्वकारणत्वे तस्य किं नाम सहकारि भवेत्तदानीमन्यस्याभावात् सत्यं निरपेक्षमेव तत्कारणमित्या

न्या

ति ४

भा०१० न त्वेवं ब्रह्मत्वे द्विश्वस्य हेतुः तर्हि न कदाचिदपि नाद्यर्शनाजगदिति वदंतो मीमांसकाः कुतोऽत्र विवदंते तैश्चान्ये स्वभाववादिनः
२८ संवदंते तेन चेतेन तत्त्वविज्ञैर्बाधितोऽपि कुतः पुनः पुनर्मुह्यंतीति तत्राह यस्य मायाविद्याद्याः शक्तयो विवादस्य च संवि
वादस्य भुवः स्थानानि भवंति तस्मै नमः ३१ ननु किं तद्ब्रह्म यस्य शक्तयो विवादादिभुवो भवंतीत्यत्राह अस्तीति योगा
उपासनाशास्त्रं तत्र हि विराड्रूपेणोपासनायां पातालं पादौ कमस्तीत्युपास्यत्वेन विधीयते नास्तीति सांख्यज्ञानशास्त्रं
तत्र ह्यपाणि पादः अचक्षुः अश्रोत्रमित्यादिना पादादि नास्तीति निषिध्यते तयोर्योगसांख्ययोर्यत्किंचित्सममनु
वर्तमानं अवेक्षितं प्रतीतं तद्देहेतु ब्रह्म विवादेष्वविवादास्पदं ब्रह्मेत्यर्थः विवादं स्फुटयति भिन्नौ अस्ति नास्तीत्येवं
भूतो विरुद्धो धर्मौ ययोः तयोर्भिन्नविषयत्वे विरोधो न स्यादित्युक्तं कस्थयोरित्युक्तं एकविषययोः कुतः वस्तुनिष्ठयोः

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भू
९६ म्ने ३१ अस्तीति नास्तीति च वस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः अवेक्षितं किंचन योगसांख्य
योः समं परं ह्यनुकूलं बृहत्तत् ३२ योऽनुग्रहार्थं भजतां पादमूलमनामरूपो भगवाननंतः नामानि
रूपाणि च जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु ३३

पादादिविधिप्रतिषेधयोरेकवस्तुनिष्ठत्वात् समत्वे हेतुः परं हि यतो विधिप्रतिषेधयोरविषयः तयोः पादादि
विषयत्वात् तर्हि तथाऽविषयस्य सद्भावे किं प्रमाणं तदाह अनुकूलं अधिष्ठानं विना पादादिकल्पनायोगा राम
त्तदवधिं विना तन्निषेधायोगाच्च तयोरुपपादकत्वेन सिद्धमित्यर्थः तस्मै नम इति पूर्वस्यानुषंगः ३२ ननु तस्य ९६
नमस्यस्य नमस्कारकाले भक्तात्राह इति पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोऽपि जन्मभिर
वतारविशुद्धोर्जितसत्वानि रूपाणि कर्मभिर्नामानि च यो भेजे तनुं कुतः भगवान् चिदैश्वर्यैः स मह्यं प्रसीदतु ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतु त्वादृशाः सकामाः गणेशादीन् प्रार्थयंते त्वं तु तान्विहाय किमिति भगवंतमेव प्रार्थयसे तत्राह प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपास
नामार्गैर्यथाशयं तत्तद्वासनानुसारेण यो देहगतो ऽतर्यामी तत्तद्देवतारूपेण विविधो भाति यथा वायुः पार्थिवं चंपकादिगं
धभेदमाश्रित्य नानागंधवान्विभाति रेणोर्गुणं धूसरत्वादिकमाश्रित्य नानारूपवान् प्रतीयते तद्वत्तस्य तत्तद्देवतारू
पेण फलदातृत्वात् स ईश्वर एव मम मनोरथं सत्यं करोतु किं मंतर्गडुभिर्देवतांतरैरित्यर्थः तदुक्तं गीतासु यो यो यां यां
८१ तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं स तया श्रद्धया युक्तस्तस्याराधनमीहते लभ

यः प्राकृतैर्ज्ञानपथैर्जनानां यथाशयं देहगतो विभाति यथानिलः पार्थिवमाश्रितो गुणं स ईश्व
रो मे कुरुतान्मनोरथं ३४ शुक उवाच इति स्तुतः संस्तुवतः स तस्मिन्नघमर्षणे आविरासी
त्कुरुश्रेष्ठ भगवान् भक्तवत्सलः ३५ कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः चक्रशंखासिच
र्मेषु धनुःपाशगदाधरः ३६ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः वनमालानिवीतांगो लस निर
त्श्रीवत्सकौस्तुभः ३७ महाकिरीटकटकः स्फुरन्मकरकुंडलः कांच्यंगुलीयवलयनूपुरांग
दभूषितः ३८

ते च ततः कामानुमेयं एव विहितानुहितानिति ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति चेति ३४ संस्तुवतो दक्ष
८२ स्य भगवान्प्रत्यक्षो ऽभूत् ३५ तं वर्णयति सार्धैस्त्रिभिः सुपर्णस्यांसे स्कंधे कृतौ पादौ येन प्रलंबा अष्टौ महांतो भुजा
यस्य चक्राद्यष्टायुधधरः ३६ प्रसन्ने वदने ईक्षणे च यस्य वनमालया निवीतं कंठादिपादांतं व्याप्तमंगं यस्य लस
तो श्रीवत्सकौस्तुभौ यस्य ३७ महांति किरीटकटकानि यस्य स्फुरंती मकरकुंडले यस्य कांच्यादिभिर्विभूषितः॥
वलयमत्र पादभूषणं द्रष्टव्यं कटकस्योक्तत्वात् ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०७० त्रैलोक्यमोहने श्रीपुरुषोत्तमाख्यं सुरयूथपैः लोकपालैः ३९ ४१ आपूरितानि मनोद्वाराणि इंद्रियाणि यैर्यथा ह्रदिन्यो नि
ई र्झरैः पूर्यंते न था महानदी पूर्णत्वेनाह्निनिकटवाहगादीनां न किंचिदुद्वपुः शंका भूदित्यर्थः यद्यप्यसौ नात्रोक्तस्तथापि चित्तज्ञ
इदं वक्ष्यमाणमाह ४२ भावं भक्तिं गतः प्राप्तः ४३ यत्तु यस्त ते तपः अस्य विश्वस्य उद्बृंहणं वृद्धिकरं मत्स्तोहं प्रीतः मत्तप सो लो

त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः वृतो नारदनंदाद्यैः पार्षदैः सुरयूथपैः ३९ स्तूयमानोऽनुगा
यद्भिः सिद्धगंधर्वचारणैः रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ४० ननाम दंडवद्भूमौ प्रहृष्टात्मा प्र
जापतिः न किंचनोदीरयितुमशकत्तीव्रया मुदा ४१ आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः तं तथा
वनतं भक्तं प्रजाकामं प्रजापतिं चित्तज्ञः सर्वभूतानामिदमाह जनार्दनः ४२ श्रीभगवानुवाच प्राचे
१७ तस महाभाग संसिद्धस्तपसा भवान् यच्छ्रद्धया मत्परया मयि भावं परं गतः ४३ प्रीतोऽहं ते प्रजानाथ
यत्तेऽस्योद्बृंहणं तपः ममैष कामो भूतानां यद्भूयासुर्विभूतयः ४४ ब्रह्मा भवो भवंतश्च मनवो विबुधेश्व
राः विभूतयो मम ह्येता भूतानां भूतिहेतवः ४५ श्रीरामजयरामजयजयराम श्रीराम श्रीराम ॥श्री

कस्मद्धर्थं त्वं त्वत्प्रीतः किंकारणं तत्राह ममेति भूतानां विभूतयः समृद्धयो भूयासुरिति यत्तु एष एव मम कामः ॥ राम
अतो मत्कामपूरणादेवाहं प्रीतोऽस्मीत्यर्थः ४४ भूतिविस्तारप्रयत्नांगत्वाच्चिनोति वेत्याह ब्रह्मेति भवंतः प्रजाप १७
तयः भूते रुद्भवस्य हेतवः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते विश्वसृ॰ अर्थेन त्वत्तपसाऽहं धीनइत्युक्तं तदेवतपः स्तौवन् प्रसंगादन्यान्यपि लोकवृद्धिकराणि विद्यादीनि स्तौति तपः य
मनियमादिसहितं ध्यानं मेहृदयं विद्यासांगमंत्रजपः साध्यानं तनोतीति तनुर्देहः क्रिया ध्यानादि विषयः पुत्रा
पारोभावनाशब्दवाच्यस्तेन हि ध्यानादिकमाक्रियतइत्यास्तेति जाताः सुनिष्पन्नाः कतवोंगानि शिरोवाणत्वघ
स्त्वचर्मः ग्रीवा उपसदः चक्षुषी आज्यभागाविस्यादि श्रोतः धर्मः कोबोद्यपूर्वं आत्मामनः हृदयाश्रयत्वात्॥

तपोमेहृदयं ब्रह्मतनुर्विद्याक्रियाः स्मृताः॥ अंगानि कृतवो जाता धर्मश्चात्मा सवः सुराः॥ ४६
वासमे २ अहमेवायनं तस्मिल्लींचांतरं बहिः॥ संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः॥ ४७ मय्यनंत
गुणेऽनंते गुणतो गुणविग्रहः॥ यदासीत्तत एवाद्यः स्वयंभूः समभूदजः॥ ४८ संवेयदाम
हादेवा मम वीर्योपवृंहितः॥ मेने खिलमिवात्मानमुद्यतः सर्गकर्मणि॥ ४९ अथमेऽभि
नव १ हितो देवः तपोऽतप्यत दारुणं॥ संचविश्वसृजो युष्मान्ये नादाऽव सृजद्विभुः॥ ५०

सुरा यज्ञभुजस्त एव प्रसवः प्राणाः संतर्पणीयत्वात्॥ ४६ तपसः संतानवृद्धिहेतुत्वं दर्शयितुं हितीयततीयौ त्वोमि
तिहासमाह चतुर्भिः अहमेवेति बस्वंतरव्याप्तत्वात्॥ आसमेवेति क्रियांतरव्याप्तेति॥ अंतरं गृहकं बहिर्ब्राह्मं
संज्ञानमात्रं चैतन्यमात्रं अव्यक्तं इंद्रियवृत्तिभिरनभिव्यक्तं अतएव प्रसुप्तमिव विश्वतः सर्वत्र॥ ४७ गुणतो
मायातः गुणमयो याविग्रहो ब्रह्मांडं ततः तदेव अजः अयोनिजः॥ ४८ खिलमसमर्थमिव॥ ४९ मेमयातपतपत्व

सटीकं मत्स्यपुराणं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संततिवृद्ध्युपायमाह एषेति अंगेहे दक्ष। पंचजनाख्यस्य प्रजापतेः ५१ मिथुनस्य योग्यव्यवायो रतिः स एव धर्मो यस्य स त्वं तथा
भूतायां तस्यां ५२ मायया निमित्तभूतया स्त्रिया सह मिथुनीभूय भविष्यंति पुत्रादिरूपेणोत्पत्स्यंते ५३ ॥४॥ षष्ठे चतुर्थे ॥४
पंचमे नारदेनाथ वाचः कूटैरुक्ता नाशितान् सुतानाकर्ण्य दक्षोऽमुं शशापेति निरूप्यते १ अपृथग्धर्मशीलाः एकाचारस्व

एषा पंचजनस्यांग दुहिता वै प्रजापतेः असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ५१ मिथुनव्यवाय
धर्मस्त्वं प्रजासर्गमिमं पुनः मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ५२ त्वत्तोऽधस्तात्प्रजाः
सर्वा मिथुनीभूय मायया मदीयया भविष्यंति हरिष्यंति च मे बलिं ५३ श्रीशुक उवाच इत्युक्त्वा मि
षतस्तस्य भगवान्विश्वभावनः स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः ५४ इति श्रीभागवते महा
पुराणे षष्ठस्कंधे चतुर्थोऽध्यायः ४ श्रीशुक उवाच तस्यां स पांचजन्यां वै विष्णुमायोपबृंहितः
हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः १ अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा नृप पित्रा प्रो
क्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं २ तत्र नारायणसरस्तीर्थं सिंधुसमुद्रयोः संगमो यत्र सु
महन्मुनिसिद्धनिषेवितं ३ तदुपस्पर्शनादेव विनिर्धूतमलाशयाः धर्मे पारमहंस्ये च प्रोत्प
न्नमतयोऽप्युत ४ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः प्रजाविवृद्धये यत्तान्देवर्षिस्तान्ददर्श

भावाः २ तत्र प्रतीच्यां दिशि सिंधोर्नद्याः समुद्रस्य च यत्र संगमस्तत्रस्थं नारायणसरो नाम तीर्थं प्रययुरि
त्यन्वयः सुमहत् अतिविस्तीर्णं ३ विनिर्धूतो मलो रागादिर्यस्मात् स आशयो येषां तान् शुद्धसत्त्वानपि ४
पित्रादेशेनाज्ञया प्रजाविवृद्धये यत्तानुद्युक्तान् ददर्श ५ श्रीराम श्रीराम श्रीराम श्रीराम श्री १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहो मोक्षमार्गोधिकारिणः संतिएते प्रवृत्तिनिष्ठैः कर्मभिर्नश्वरैः निर्गिरूपयानान्निरूढार्थैः वाक्यैरुपदिशति स्म तदाह
उवाचेति चतुर्भिः पालकाः संतोपि वालिशा अज्ञाः यूयं कथं प्रजाः स्रक्ष्यथ वर्तनि रवेद वालकाइति पाठे वालिश
त्वे हेतुः ६ एक एव पुरुषो यस्मिन्न तद्राष्ट्रं अदृष्ट्वेत्यनुषंगः विलं चेत्यादि द्वितीयांतानां अविज्ञाय कथं सर्गं करिष्यथेति
सर्वत्रैवान्वयः ७ पंचपंचानां पंचविंशतिरंकुरो गृहं क्षौरपं अद्भुतरूपविभिः वज्रश्च निर्मितमिवातितीक्ष्णं द्वं

ऊचुश्चाऽथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः अदृष्ट्वांतं भुवो यूयं वालिशा वत बालकाः ६ तथैक
पुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं ७ नदीमुभयतो वाहां प
पंचपंचाद्भुतं गृहं क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ८ कथं स्वपितुरादेशमविद्वांसो विपश्चि
तः अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ९ श्रीशुक उवाच तन्निशम्याऽथ हर्यश्वा औत्पत्ति
कमनीषया वाचः कूटं तु देवर्षेः स्वयं विमम्रुशुर्धिया १० भूः क्षेत्रं जीवसंज्ञं यदनादि निज
बंधनं अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ११

चेत्यर्थः स्वयं स्वतंत्रं भ्रमि भ्रमणस्वभावं ८ विपश्चितः सर्वज्ञस्य स्वपितुरादेशमात्मनो ऽनुरूपमविद्वांसो ऽजानंतः पूर्वोक्तं
चैकपुरुषराष्ट्रमित्याद्यविज्ञाय अहो कथं सर्गं करिष्यथेत्यन्वयः ९ वाचः कूटं परोक्षवादेनार्थांतरमिश्रितं प्रतीयमानं वचनं ७२
औत्पत्तिकी सहजा मनीषा विचारशक्तिर्येषां तया धिया स्वयमेव विमम्रशुः विचारितवंतः १० नारदोक्त दशवाक्यानां
तैर्विमृश्य निर्णीतानर्थानाह दशभिः अदृष्ट्वांतं भुव इत्यत्र भूशब्दार्थमाह भूरिति क्षेत्रं तत्र जीवसंज्ञं लिंगशरीरं
यत् निजबंधनमात्मनो बंधकारणं अंतशब्दार्थमाह निर्वाणं नाशं असद्भिः मोक्षानुपयोगिभिः कर्मभिः किं भवेन्न किमपि ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु।

भा०प० एकपुरुषमित्यस्यार्थमाह एक एवेति तुर्यः सर्वसाक्षी स्वाश्रयः स्वाधारः अभवंनित्युक्तो असद्भिः ईश्वरासमर्पितैः
कर्मभिः १२ विलंचाहष्ट निर्गमं इत्यस्यार्थमाह पुमान् स्वाप्राप्य विलस्वर्गपातालं गत इव। नैवेति नावर्त्तेत तत्प्रत्य
क् धामज्योतिःरूपं ब्रह्म अविदः अविदुषः असद्भिः नश्वरस्वर्गादिसाधनैः कर्मभिः १३ बहुरूपास्त्रियमित्यस्यार्थ
माह नानारूपेति स्वैरिणी पुंश्चलीव विमोहैः केः रजआदिगुणैः अन्विता तन्निष्ठान्तस्य अवसानं विवेके अगतस्य अ
प्राप्तस्य। असद्भिः शांतैः १४ पुंश्चलीपतिमित्यस्यार्थमाह तस्याः संगेन भ्रंशितमैश्वर्यं स्वातंत्र्यं यस्य। कुत्सि

एक एवेश्वरस्तुर्यो भगवान् स्वाश्रयः परः तमदृष्ट्वाऽभवं पुंसः किमसत्कर्मभिर्भवेत् १२ पुमांन्नैवेति
यत्प्राप्य विलस्वर्गं गतो यथा प्रत्यग्धामाऽविद इह किमसत्कर्मभिर्भवेत् १३ नानारूपात्मनो बुद्धिः
१९ स्वैरिणीव गुणान्विता तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत् १४ तत्संगभ्रंशितैश्वर्यं संसरंतं कु
भार्यवत् तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत् १५ सृष्ट्यप्ययकरीं मायां वेलाकूलांतवेगिनीं ::
मत्तस्य तामविज्ञस्य किमसत्कर्मभिर्भवेत् १६

ते। ता भार्या यस्य तद्वत् तस्यागतीः सुखदुःखलक्षणाः संसरंतं गच्छं जीवमबुधस्य अजानतः असद्भिः बुद्ध्यविवेकप्रा
प्तैः १५ नदीमुभयतोवाहमित्यस्यार्थमाह सृष्ट्यप्यय करोतीत्युभयतः प्रवाहो दर्शितः वेलाकूलं प्रवाहपतितानां राम
निर्गमस्थानं तत्पोषिघादि तस्यांतसमीपे वेगिनी निर्गमप्रतिबंधाय क्रोधाहंकारादिभिः कृतवेगा मत्तस्य तद् १९
गेन विवशस्य अतएव तां तथाभूतां मविज्ञस्य अविचारयतः असद्भिर्मायिकैः यद्वा वेलाकूलं समुद्रस्य व्यवहार
स्थानं तस्य समीपे समुद्रस्येव्हि क्रोसाभ्यां यथा उभयतोंतर्बहिः कृतवेगा नदी भवति एवं समुद्रतुल्यस्यात्मनो व्य
वहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः वेगिनीमिति पाठे वेगवतीं १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचपंचेत्यस्यार्थमाह पंचविंशतितत्वानां पुरुषोऽन्तर्यामी अद्भुतदर्पणं आश्चर्यरूप आश्रयः अध्यात्मं कार्यकारणसंघाताधि
ष्ठातारं तमबुधस्यात्रसक्तिः मिथ्या स्वातंत्र्यं हंतेः १७ धो चिद्रंसमित्यस्यार्थमाह ऐश्वरं ईश्वरप्रतिपादकं विविक्तं पदं वि
ज्ञानरूपं पंचसांख्येन गिर्हंसपद व्याख्यानं बंधमोक्षावनुदर्शयतीति तथा अनेन नित्राः कथा यस्येति व्याख्यातं तदुत्सृज्य
स२ अनभ्यस्य अज्ञाय अविदुषोऽकृर्वहि सुखेः १८ क्षौरपव्यमित्यस्यार्थमाह कालचक्रमिति भ्रमिः भ्रमणात्मकं
तीक्ष्णमिति निःकर्षयदिति च क्षौरपव्यपद व्याख्यानं तदबुधस्य अत एव फलस्यानित्यत्वबुद्धा काम्यकर्मानु

म१ पंचविंशतितत्वानां पुरुषोद्भुतदर्पणं अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् १७ ऐश्वरं शास्त्र
मुत्सृज्य बंधमोक्षानुदर्शनं विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् १८ कालचक्रं भ्रमि तीक्ष्णं
सर्वं निष्कर्षयज्जगत् स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भवेत् १९ शास्त्रस्य पितुरादेशं यो न वेद नि
वर्तकं कथं तदनुरूपाय गुणविश्रंभ्युपक्रमेत् २० इति व्यवसिता राजन् हर्यश्वा एकचेतसः प्रययुस्तं
परिक्रम्य पंथानमनिवर्तनं २१ स्वरब्रह्मणि निर्भातहृषीकेशपदांबुजे अखंडं चित्तमावेश्य लोकाननु
चरन्मुनिः २२

ष्ठाने वैगुण्यवाहुल्यादसक्तिः १९ स्वपितुरादेशमित्यस्यार्थमाह शास्त्रस्य स्वपितुर्द्वितीयजन्महेतोः तदनुरूपाय नि
वृत्यनुरूपाय निवर्त्तकमादेशं यो न वेद स कथं गुणविश्रंभी गुणमयप्रवृत्तिमार्गे विश्वासवान् सन् उपक्रमेत् सृष्ट्यादौ
प्रवर्त्तेत २० मोक्षेश वाक्यबुद्धीनां जीवमायांतरात्मानं शास्त्रकालोपदेशानामज्ञाने किमु कर्मभिः इति वाच्यः कूटसं
ग्रह श्लोकः इति व्यवसिताः एवं निश्चितवंतः एकचेतसः एकमत्ययुक्ताः तं नारदं प्रदक्षिणीकृत्य अपुनरावृत्ति
मार्गं प्रययुः २१ निर्भातः साक्षात्कृतो यो हृषीकेशः तस्य पदांबुजे अनुचरन् अन्वचरदित्यर्थः २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० नारदमदर्शनेन स्वधर्मभ्रंशं वा शीलेन शालंते शोभंत इति तथा तेषां कः दक्षः सुप्रजास्त्वं सत्पुत्रत्वं शुचां शोकानां स्था
नं २३ अजेन ब्रह्मणा सहस्रिणः सहस्रसंख्यान् २४ ५ परमं ब्रह्म प्रणवं वक्ष्यमाणं मंत्रं वा २६ इडस्पतिं वाचां
मंत्राणां पतिं विष्णुमाराधयामासुः २७ विशुद्धसत्वाश्रयाय परमहंसाय नमो धीमहि २८ प्रतिसर्गे धीर्येषां तान्

नाशं निशम्य पुत्राणां नारदाच्छीलशालिनां अन्वतप्यत कः शोचन् सुप्रजास्त्वं शुचां पदं २३ सभूयः
ने२ पांचजन्यायामजेन परिसांत्वितः पुत्रानजनयद्दक्षः शवलाश्वान् सहस्रिणः २४ ते च पित्रा समादि
ष्टाः प्रजासर्गे धृतव्रताः नारायणसरो जग्मुर्यत्र सिद्धाः स्वपूर्वजाः २५ तदुपस्पर्शनादेव विनिर्धूत
मलाशयाः जपंतो ब्रह्म परमं तेपुस्तत्र महत्तपः २६ अब्भक्षाः कतिचिन्मासान् कतिचिद्वायु
१० भोजनाः आराधयन्मंत्रमिममभ्यसंत इडस्पतिं २७ ॐ नमो नारायणाय पुरुषाय महात्मने
विशुद्धसत्वधिष्ण्याय महाहंसाय धीमहि २८ इति तानपि राजेंद्र प्रतिसर्गधियो मुनिः उपेत्य ना
रदः प्राह वाचः कूटानि पूर्ववत् २९ दाक्षायणाः संशृणुत गदतो निगमं मम अन्विच्छतानुपद
पं० भाह १ वीं भ्रातॄणां भ्रातृवत्सलाः ३० भ्रातॄणां प्रायणं भ्राता योऽनुतिष्ठति धर्मवित् स पुण्यबंधुः पुरुषो मरुद्भिः स
हमोदते ३१

वाचः कूटानि अहष्यं तं भुव इत्यादीनि पूर्वोक्तानि प्राह २९ हे दाक्षायणाः संशृणुत त्वादि पुनरन्यदपि राम
प्राह निगममुपदेशं अन्विच्छत अवलोकयत ३० प्रायणं प्रकृष्टं गमनं पुण्यमेव बंधुर्यस्य मरुद्भिर्भ्रातृवत्सले २०
हेवैः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाकरणं विनानुमहाननर्थ एवेत्याह । ऋणैरिति । जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन दे
वेभ्यः प्रजया पितृभ्यः ५

अमोघदर्शनं यस्य हे मारिष आर्य ३२ सध्रीचीनं समीचीनं प्रतीचीनं प्रत्यग्वृत्तिलभ्यं अनुपथं अनुगुणं पंथानं पश्चिमा
यामिनीः गताः रात्रयः इव ३३ पुत्राणामपारमहः सनिःशमुपश्रुत्य दक्षोपि प्रायशः अविरतः स्यादिति तदनु शेहार्थं देवर्षिस्ताम्
१३ श्वगतः । नदीमुपलभ्य दक्ष आह साधोरिव लिंगं वेषो यस्य तेन त्वया नो अस्मदीयानामर्भकाणां असाधु अकारि हंत नदे
वाह साधूनां स्वधर्मप्रवृत्तानां भिक्षाया मार्गः संप्रदर्शितः ३६ ननु सम्यासीनो मार्गः साधुरेव मोक्षहेतुत्वात् तत्र ऋण
त्रयापित्तभ्यः एषवानृणानां पुत्रीयज्वा ब्रह्मचारी वासीनि अतो । ऋणैरमुक्तानां नन मीमांसितानि विचारितानि

एतावदुक्त्वा पर्यैयो नारदोऽमोघदर्शनः । तेपि चान्वगमन्मार्गं भ्रातॄणामेव मारिष ३२ सध्रीचीनं प्र
तीचीनं परस्यानुपथं गताः । नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीरिव ३३ एतस्मिन् काल उत्पातान्
बहून् पश्यन् प्रजापतिः । पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत् ३४ चुक्रोध नारदायासौ पुत्रशोक
विमूर्च्छितः । देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः ३५ दक्ष उवाच अहो असाधो साधूनां सा
धुलिंगेन नस्त्वया । असाध्वकार्यर्भकाणां भिक्षोर्मार्गः प्रदर्शितः ३६ ऋणैस्त्रिभिरमुक्तानाममी
मांसितकर्मणां । विघातः श्रेयसः पापलोकयोरुभयोः कृतः ३७

कर्माणि यैस्तेषां नावदृणविमोको नास्ति तदुत्तरकाले भाविता अपुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षि
ऋणात् विमुक्तिर्नास्ति अतः हे पाप विषयभोगत्यागात् इहलोके श्रेयसो विघातः कृतः । मोक्षानधिकारित्वाच्च पर
लोकेपि श्रेयसो विघातः कृत इत्यर्थः । तथा च मनुः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् अनपाकृत्य मोक्षं तु सेव

भागवतस्कंधे ६

भा०ष०

१३ स्कंदश्च कृत्तिकासुतः अग्नेः पुत्रः पाणिमानुरइति अग्निभूरिति च प्रसिद्धः ततः स्कंदात् १४ आकृतीपतिः शिल्पाचार्य्यः ततो
विश्वकर्मणः चाक्षुषो मनुरासीत् १५ उषा भार्या अथ आतपात् पंचयामो दिवसो जातः अत एव रात्रिस्त्रियामा प्रदोष
प्रत्युषयोर्दिवसस्यावयवत्वात् १६ भूतस्य द्विभार्यस्य वंशमाह सरूपेति १७ महानित्येवमेकादश रुद्रास्ते रुद्रस्य पा [illegible]

२२ अर्कस्य वासना भार्या पुत्रास्तर्षादयः स्मृताः अग्नेर्भार्या वसोर्धारा पुत्रा द्रविणकादयः १३ स्कंदश्च कृत्ति
कापुत्रो ये विशाखादयस्ततः दोषस्य शर्वरीपुत्रः शिशुमारो हरेः कला १४ वस्तोरांगिरसीपुत्रो विश्वक
र्माकृतीपतिः ततो मनुश्चाक्षुषोभूद्विश्वसाध्या मनोः सुताः १५ विभावसोरसूतोषा व्युष्टं रोचिषमा
तपं पंचयामोथ भूतानि येन जाग्रति कर्मसु १६ सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः रैवतोजो
भवो भीमो वाम उग्रो वृषाकपिः १७ अजैकपादहिर्बुध्नो बहुरूपो महानिति रुद्रस्य पार्षदाश्चान्ये घो
राः प्रेतविनायकाः १८ प्रजापतेरंगिरसः स्वधा पत्नी पितॄनथ अथर्वांगिरसं वेदं पुत्रत्वे चाकरोत्सती
१९ कृशाश्वोर्चिषि भार्यायां धूमकेतुमजीजनत् धिषणायां वेदशिरो देवलं वयुनं मनुं २० तार्क्ष्यस्य
विनता कद्रूः पतंगी यामिनीइति पतंग्यसूत पतगान् यामिनी शलभानथ २१ सुपर्णासूत गरुडं सा
क्षाद्यज्ञेशवाहनं सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः २२

र्षदाः प्रेतादयः अन्ये च अन्यस्यां जाताः १८ अंगिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति स्वधा ना
म पत्नी पितॄन् पुत्रत्वे करोत् अथ सती च अथर्वांगिरसं नाम वेदं १९ कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये तयोर्वंशमाह कृशा

२२

२२

रोहिण्यामेव प्रेमातिशयेनान्यासामुपेक्षणात् कुपितस्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन्नतास्वनपत्यो ऽ
ऽभूत् दक्षं प्रसाद्य कलाः काला एव लेभे न त्वपत्यानि कथंभूताः क्षयके कृष्णपक्षे हिताः खंडिताः सतीः पाठांतरे क्षये सति पुन

कृत्तिकादीनि नक्षत्राणींदोः पत्न्यस्तु भारत दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः पुनः प्रसाद्य तं सोमः
कलाः लेभे क्षये दिताः २३ शृणु नामानि लोकानां मातॄणां शंकराणि च २४ अथ कश्यपपत्नीनां य
त्प्रसूतमिदं जगत् अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला मुनिः क्रोधवशा ताम्रा सुरभिः सरमा
तिमिः २५ तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप २६
ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः दंदशूकादयः सर्पा राजन् क्रोधवशात्मजाः २७ इलाया
भूरुहाः सर्वे यातुधानाश्च सौरसाः अरिष्टायाश्च गंधर्वाः काष्ठाया द्विशफेतराः २८ सुता दनोरेकष
ष्टिस्तेषां प्राधानिकान् शृणु द्विमूर्धा शंबरोऽरिष्टो हयग्रीवो विभावसुः २९ अयोमुखः शंकुशिराः
स्वर्भानुः कपिलोऽरुणः पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः ३० धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च ७४
दुर्जयः स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली ३१
वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः उपदानवी हयशिरा पुलोमा कालका तथा ३२ उपदा
नवीं हिरण्याक्षः क्रतुर्हयशिरां नृप पुलोमां कालकां च द्वे वैश्वानरसुते तु कः उपयेमेऽथ भगवान्
कश्यपो ब्रह्मचोदितः ३३

रेधिताः तैनैव वर्धिताः सतीः २३ २५ अस्पष्टत्वेन सुगमत्वाद्यथाकथंचित्क्रमेण तासां वंशानाह तिमेरित्यादिना २६ २७ सौरसाः
सुरसा [illegible] याः पुत्राः २८ प्रधानिकान् मुख्यान् षष्टादश शृणु २९ ३१ वैश्वानरो दनोः पुत्रः तस्य सुताः ३२ कः प्रजापतिः
कश्यप उपयेमे दानवीपरिणयने हेतुः ब्रह्मणा चोदित इति ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ष० तयोः षष्टिसहस्राणि निवातकवचाः पुत्रा जाताः ३४ तांस्त्वर्गगतान् सन्तं ते पितामहोऽर्जुनो जघान ३५ राहुर्ज्येष्ठो यस्य ३६
असूयत अजनयत् भुवि वर्त्तमाना ३९ ततः विवस्वतः ४० चर्षणयः कृताकृतज्ञानवंतः येषां तेषां कर्म तेन निषेधा वुक्तो यत्र
येषु आत्मानुसंधानविशेषेण मानुषी जातिः आपकल्पिता तथा च श्रुतिः पुरुषत्वे चाविस्तरामात्मेति ४१ कुपितेन हरिणा इति

पौलोमाः कालकेयाश्च दानवा युद्धशालिनः तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता जघान स्वर्गतो राजन्
एक इन्द्रप्रियंकरः ३४ विप्रचित्तिः सिंहिकायां शतं चैकमजीजनत् राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः ३५
अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः यत्र नारायणो देवः स्वांशेनावातरद्विभुः ३६ विवस्वानर्यमा पूषा त्व-
ष्टाथ सविता भगः धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ३७ विवस्वतः श्राद्धदेवं संज्ञासूयत वै मनुं मिथु-
५५ नं च महाभागा यमं देवं यमीं तथा सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ३८ छाया शनैश्चरं लेभे सावर्णिं च
मनुं ततः कन्यां च तपतीं या वै वव्रे संवरणं पतिं ४० अर्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः यत्र वै मानु- ५४
२३ षी जातिर्ब्रह्मणा चोपकल्पिता ४१ पूषानपत्यः पिष्टादो भग्नदंतोऽभवत्पुरा योऽसौ दक्षाय कुपितं जहास विवृ-
न२ तद्विजः ४२ त्वष्टुर्दैत्यात्मजा भार्या रचना नाम कन्यका सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्यवान् ४३ तं
वव्रिरे सुरगणा स्वस्रीयं द्विषतामपि विमतेन परित्यक्ता गुरुणांगिरसेन यत् ४४ इति श्रीभागवते महा-
पुराणे षष्ठस्कंधे षष्ठोऽध्यायः राजोवाच यस्य हेतोः परित्यक्ता आचार्येणात्मनः सुराः एतदाचक्ष्व भगव-

म१ शिष्यः विवृतद्विजः प्रकटितदंतः सन् ४२ ३ यद्यदा विमतेन अवज्ञानेन बृहस्पतिना परित्यक्ताः तदापि द्विषतां शत्रूणां भागि- राम
नेयमपि विश्वरूपं पौरोहित्ये वृतवंतः ४४ षष्ठषष्ठः सप्तमे विश्वरूपोऽसौ पौरोहित्ये वृतः सुरैः गुरुणा संपरित्यक्तैः पौरो- २३
हित्यमथाकरोत् यस्य हेतोः कस्माद्धेतोः आत्मनः शिष्याः सुराः परित्यक्ताः एतं मम अपराधं १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० दी। संइंद्रोयंसंप्राप्तंवाचस्पतिंनाभ्यनंदतनाह्वयवान् नदासश्चांगिरसः ततोनिर्गत्यलक्ष्मींस्वगृहमायपावित्यप्तानाम
त्वयः अनाहरेहेतुमंददर्शयितुंनविशिनष्टि त्रिभुवनैश्वर्यमदेनोल्लंघितः सतांपथायेनसः १ परिश्रितः परिवृ
तः २ ३ ४ आस्थानसमानस्मिन्नध्यासने सिंहासनेनदास्थितः ५ पारमेष्ट्यमहाराजचिन्हैः आसनस्पांइस्थि

श्रीबादरायणिरुवाच इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः मरुद्भिर्वसुभीरुद्रैरादित्यैर्भुभिर्नृप नै।
१ विश्वेदेवैश्चसाध्यैश्चनासत्याभ्यांपरिश्रितः सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः २ विद्याध
राप्सरोभिश्चकिंनरैः पतगोरगैः निषेव्यमाणोमघवानूस्तूयमानश्चभारत ४ उपगीयमानोललि
तमास्थानाध्यासनाश्रितः पांडुरेणातपत्रेण चंद्रमंडलचारुणा ५ युक्तश्चान्यैः पारमेष्ट्यैश्चा
मरव्यजनादिभिः विराजमानः पौलोम्यासहार्द्धासनयाभृशं ६ सयदापरमाचार्यंदेवानामा
त्मनश्चह नाभ्यनंदतसंप्राप्तंप्रत्युत्थानासनादिभिः ७ वाचस्पतिंमुनिवरंसुरासुरनमस्कृतं
नोच्चचालासनादिंद्रः पश्यन्नपिसमागतं ८ ततोनिर्गत्यसहसाकविरांगिरसः प्रभुः आययौ
स्वगृहंतूष्णींविद्वान्श्रीमदविक्रियां ९ तर्ह्येवप्रतिबुद्धेंद्रोगुरुहेलनमात्मनः गर्हयामाससं
दसिस्वयमात्मानमात्मना १० अहोबतममासाधुकृतंवैदभ्रबुद्धिना यन्मयैश्वर्यमत्तेनगुरुः
सदसिकात्कृतः ११

आसनात्। तयापौलोम्यासहविराजमानःसन् ६ उत्थानादिनानाभ्यनंदत ७ नचोच्चचालआसनात् एवंस्थितोपिकोंचि राम
न्नचलितवान् श्रीमदेनयाविक्रियातांविद्वानुजानन् ८ प्रतिबुध्यअनुस्मृत्य १० ममकृतंकर्मअहोअसाधुयथास्मा
त् दभ्रबुद्धिनाअल्पमतिनामयाकात्कृतः तिरस्कृतः ११

विबुधानां सात्विकानां देवानामीश्वरोऽप्यहं १२ ननु सिंहासनस्थो राजा [illegible] त्थानं न कुर्यादिति निग्रहो भवदिति तत्राह यइति द्वा
भ्यां धिषणमासनं १३ कुपथं दिशंतीति कुपदिशंतीति कुपथदेष्टार स्तेषां वचः अश्ममयः प्लवो येषां ते यथा मज्जंति तेऽश्मप्लवमनु
मज्जंति तद्वत् १४ अगाधागंभीरा धिषणा यस्य तं निशठः शाठ्यहीनः सन् १५ अधिकया आत्ममायया १६ गुरोः संज्ञा

को गच्छेत्पंडितो लक्ष्मीं त्रिविष्टपपतेरपि यया ऽहमासुरं भावं नीतो ऽद्य विबुधेश्वरः १२ ये पारमेष्ठ्यं धिष
णमधितिष्ठन्न कंचन प्रत्युत्तिष्ठेदिति ब्रूयुर्धर्मं ते न परं विदुः १३ तेषां कुपथदेष्टॄणां पततां तमसि ह्यधः ११ स्प
ये श्रद्दध्युर्वचस्ते वै मज्जंत्यश्मप्लवा इव १४ अथाहममराचार्यमगाधधिषणं द्विजं प्रसादयिष्ये निशठः
शीर्ष्णा तच्चरणं स्पृशन् १५ एवं चिंतयतस्तस्य मघोनो भगवान्गृहात् बृहस्पतिर्गतो दृष्टां गतिमध्या
त्ममायया १६ गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान्स्वराट् ध्यायन्धिया सुरैर्युक्तः शर्म नालभ
तात्मनः १७ तच्छ्रुत्वैवासुराः सर्वे आश्रित्यौशनसं मतं देवान्प्रत्युद्यमं चक्रुर्दुर्मदा आततायि
नः १८ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ब्रह्माणं शरणं जग्मुः सहेंद्रा नतकंधराः १९
तांस्तथाभ्यर्दितान्वीक्ष्य भगवानात्मभूरजः कृपया परया देव उवाच परिसांत्वयन् २० ब्रह्मो
वाच अहो बत सुरश्रेष्ठा ह्यभद्रं वः कृतं महत् ब्रह्मिष्ठं ब्राह्मणं दांतमैश्वर्यान्नाभ्यनंदत २१ ११

ज्ञानोपायं परीक्षमाणोपि नाधिगतः अप्राप्तः सन् १७ आततायिनः उद्यतास्त्राः १८ निर्भिन्नान्यंगानि ऊ
रवो बाहवश्च येषां १९ २० वो युष्माकं कृतं कारणं महदभद्रं तदाह ब्रह्मिष्ठमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परेभ्यः शत्रुभ्यो वः पराभव इति यत् अयं तस्य अनयस्य अन्यायस्य संबंधी फलं नृप आसीत् उक्तं च ब्राह्मणं कुलसंप
रमस्कार २ न्नं भक्तं विद्यामहात्मनः आचार्यं वीक्ष्य नो नित्यं शठस्तुष्टं सदुःखैः परिभूयते इति स्वयमेव वैरिणां हेतुरीयते भ्यः २१ गुरुनि
रस्कारं विद्यापं च यापं च प्रकारणमित्यसुरदृष्टांतेनाह मघवन्निति द्विषतः शत्रून् काव्यं भार्गवं गुरुमेव संप्राप्य चि
तानुपचितत्वमेवाह आददीरन्नुरगीयुः २३ अभेद्यामंत्रा येषां अनुशिक्षितार्थाः शिष्यायत्तः विद्यागोविंद

स्ववैरिभ्यः १ तस्यायमनयस्यासीत्परेभ्यो वः पराभवः प्रक्षीणेभ्यः समृद्धानां च यत्सुराः २२ मघवन्द्विषतः पश्य प्रक्षी
३४ णान्गुर्वतिक्रमात् संप्रत्युपचितान्भूयः काव्यमाराध्य भक्तितः आददीरन्निलयनं ममापि भृगुदेवताः
२३ त्रिविष्टपं किं गणयंत्यभेद्यमंत्रा भृगूणामनुशिक्षितार्थाः न विप्रगोविंदगवीश्वराणां भवंत्यभद्राणि
नरेश्वराणां २४ तद्विश्वरूपं भजताशु विप्रं तपस्विनं त्वाष्ट्रमथात्मवंतं सभाजितोऽर्थान्स विधास्य
ज्यपरिष्व ४ तेवो यदि क्षमिष्यध्वमुतास्य कर्म २५ श्रीशुक उवाच त एवमुदिता राजन्ब्रह्मणा विगतज्वराः ऋषिं त्वा
ष्ट्रमुपव्रज्येदमब्रुवन् २६ देवा ऊचुः वयं तेऽतिथयः प्राप्ता आश्रमं भद्रमस्तु ते कामः संपाद्यतां तात
पितॄणां समयोचितः २७ पुत्राणां हि परो धर्मः पितृशुश्रूषणं सतां अपि पुत्रवतां ब्रह्मन् किमुत
ब्रह्मचारिणां २८ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः भ्राता मरुत्पतेर्मूर्तिर्माता साक्षा
त्क्षितेस्तनुः २९ दयाया भगिनी मूर्तिर्धर्मस्यात्मातिथिः स्वयं अग्नेरभ्यागतो मूर्तिः सर्वभूता
निचात्मनः ३०

गावश्च ईश्वरा अनुग्राहकाः येषां तेषामेव अभद्राणि न च भवंति अन्येषां तु भवंति २४ तेन स्मात् अथ अनंतरमेव भजत अस्य
कर्म अस्मत्पक्षपातं २५ उदिता उक्ताः २६ अतिथिना पितॄणां च प्रशंसार्थमाहुः आचार्य उपनीय वेदाध्याप
कः ब्रह्मणो वेदस्य मूर्तिः २९ धर्मस्यात्मा मूर्तिरतिथिः स्वयं साक्षात् आत्मनः श्री विष्णोः यद्वा आत्मनः स्व

षष्ठस्कंधे भागवतटीका: कौशिकी ९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प०

पेरेभ्यः पराभवएवावृत्तितो २१ संदेशामाह। दुर्लभमहदिति २२ ननूपाध्यायेत्वकनिष्ठस्यममाभिवंदनंकरिष्य
थ तद्वगर्हितंतत्राह। नेति अर्थेषुप्रयोजननिमित्तंयेविशानामभिवादनंननिंदति किंच छंदोभ्यः मंत्रेभ्यो
नत्वा। न्यत्रवयोज्येष्ठस्यकारणं ननुमंत्रेषुअंतोऽस्मभ्यंमंत्रदानात्त्वमेवज्येष्ठोभविष्यति यद्वा छंदोभ्योन्यत्रैव

तस्मात्पितॄणामार्तानामार्तिंपरपराभवं तपसापनयंस्त्वंतत्संदेशंकर्तुमर्हसि २१ वृणीमह
त्वोपाध्यायंब्रह्मिष्ठंब्राह्मणांगुरुं यथांजसाविजेष्याम। सपत्नांस्तवतेजसा २२ नगर्हयंतिह्य
र्थेषुयविष्ठांघ्र्यभिवादनं छंदोभ्योन्यत्रनब्रह्मनुवयोज्यैष्ठस्यकारणं २३ ऋषिरुवाच॥
अभ्यर्थितः सुरगणैः पौरोहित्येमहातपाः सविश्वरूपस्तानाह प्रसन्नः श्लक्ष्णयागिरा
२५ २४ विश्वरूप० विगर्हितंधर्मशीलैर्ब्रह्मवर्चउपव्ययं कथंनुमद्विधोनाथालोकेशाः
भियाचितं प्रत्याख्यास्यतितच्छिष्याः सएवस्वार्थउच्यते २५ अकिंचनानांहिधनंशि
लोंछनंतेनहनिर्वार्तितसाधुसत्क्रियः कथंविगर्ह्यंनुकरोम्यधीश्वराः पौरोधसंह
ष्यतियेनदुर्मतिः २६

२१ दानुविहायवयोवज्येष्ठस्यकारणंनभवतिकिंतुवेदएवकारणंतत्साम्येतुवयः वेदज्ञत्वानुत्वमेवज्येष्ठइत्यर्थः २३ २४
निंदितमपीदंयुष्मदाज्ञाभंगभयेनकरिष्यामीत्याह सार्द्धेन विगर्हितंपौरोहित्यंधर्मशीलैः अधर्महेतुत्वात्॥
उपव्ययंपर्व किंचब्रह्मवर्चसस्योपव्ययकरं प्रत्याख्यातुंचमादृशोनार्हतीत्याह कथंत्विति तेषांशिष्याः शिक्षणार्हाः सएव प्रत्या
सिद्धस्यब्रह्मवर्चसस्य ख्यानाभावएवहिशिष्यस्यस्वार्थउच्यते २५ ननुपौरोहित्येनधनलाभाद्धर्मः सिद्ध्येत अन्यथानिर्धनस्यकु
३ तोधर्मः अतएवतेनलोकोहृष्यतितत्राह अकिंचनानांशिलोंछनंहिधनं क्षेत्रेस्वामिनापेक्षितकणिशोपादा

राम

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैसस्तेना: २

किंपेहंतन्यार्पितमल्पमेवस्वत्वधिकान्निकरिष्यामीत्याह भवतामिति ३७ समाधिनापरमोद्यमेन ३८ वैश्मप्या श्रीनारायण
कवचात्मिकया ३९ असुरचमूः ४० षष्ठस सप्तमः अष्टमे विश्वरूपस्तु वर्मनारायणात्मकं इंद्रायप्राहयेनेंद्रोगुप्तोदैत्यान

तथापिनप्रतिब्रूयांगुरुभिः प्रार्थितंकियत् भवतांप्रार्थितंसर्वंप्राणैरर्थैश्चसाधये ३७ शुकउवाच
तेथैवंप्रतिश्रुत्यविश्वरूपोमहातपाः पौरोहित्यंवृतश्चक्रेपरमेणसमाधिना ३८ सुरद्विषां
श्रियंगुप्तामौशनस्यापिविद्यया आछिद्यादान्महेंद्रायवैष्णव्याविद्ययाविभुः ३९ ययागुप्तःसह
स्राक्षोजिग्येसुरचमूर्विभुः तांप्राहसमहेंद्रायविश्वरूपउदारधीः ४० इतिश्रीभागवतेमहापु
राणेषष्ठस्कंधेसप्तमोऽध्यायः राजोवाच ययागुप्तःसहस्राक्षःसवाहान्रिपुसैनिकान् क्री
डन्निवविनिर्जित्यत्रिलोक्याबुभुजेश्रियं १ भगवंस्तन्ममाख्याहिवर्मनारायणात्मकं यथातता
यिनःशत्रून्येनगुप्तोऽजयन्मृधे २ शुकउवाच वृतःपुरोहितस्त्वाष्ट्रोमहेंद्रायानुपृछते
नारायणाख्यंवर्माहतदिहैकमनाःशृणु ३ विश्वरूपउवाच धौतांघ्रिपाणिराचम्यसपवित्रउ
दङ्मुखः कृतस्वांगकरन्यासोमंत्राभ्यांवाग्यतःशुचिः नारायणपरंवर्मसंनह्येद्भयआगते ४
पादयोर्जानुनोरूर्वोरुदरेहृद्यथोरसि मुखेशिरस्यानुपूर्व्यादोंकारादीनिविन्यसेत् ५

थाजयत्त्रिलोक्याःसंबंधिनींश्रियं १ २ ३ मंत्राभ्यामष्टाक्षरद्वादशाक्षराभ्यांकृतःस्वांगेषुकरयोश्चन्यासोयेननारा
यणमयंपरंवर्मसंनह्येतवक्ष्यमाणं ४ मंत्राष्टाक्षरेणपादाद्यष्टांगेषुन्यासमाह पादयोरितिसार्धेनप्रणवसंपुटितमोंकारा
दैकैकमक्षरंविन्यसेत् ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० विपर्ययं यथाभवत्येवं शिरस्यादिपादांतं वा विन्यसेत् उत्पत्तिन्यासं संहारन्यासं कुर्यात् इत्यर्थः ६ द्वादशाक्षरे सोङ्कारः प्रणवा
दिंकारांतमिति प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यंतमंगुलीषु परि शिष्टमक्षरचतुष्टयमंगु
ष्ठयोरायतनपर्वसु न्यसेत् मंत्रांतरन्यासमाह न्यसेदिति ७ षकारेण कारयोर्विश्लेषेण षडक्षराणि हृदयादिषु न्यसेत्

य१ ॐ नमो नारायणायेति विपर्ययमथापि वा कन्यासं ततः कुर्यात् द्वादशाक्षरविद्यया ६ प्रणवादियकारांतमंगु
ल्यंगुष्ठपर्वसु न्यसेद्धृदयं ओंकारं विकारमनु मूर्द्धनि ७ षकारं तु भ्रुवोर्मध्ये णकारं शिखया दिशेत् वे
कारं नेत्रयोर्युंज्यात् नकारं सर्वसंधिषु ८ मकारमस्त्रमुद्दिश्य मंत्रमूर्त्तिर्भवेद्बुधः सविसर्गं फडंतं तेन
२६ त्सर्वदिक्षु विनिर्दिशेत् ९ ॐ विष्णवे नम इति आत्मानं परमं ध्यायेत् ध्येयं षट्शक्तिभिर्युतं विद्या
टी२ तेजस्तपोमूर्त्तिमिमं मंत्रमुदाहरेत् १० ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे
दरारिचर्मासिगदेषुचापपाशान् दधानोष्टगुणोष्टबाहुः ११ जलेषु मां रक्षतु मत्स्यमूर्त्तिर्यादोगणे
भ्यो वरुणस्य पाशात् स्थलेषु मायावटुवामनोव्यात् त्रिविक्रमः खेवतु विश्वरूपः १२ श्रीराम

८ मकारमस्त्रमुद्दिश्य ध्यात्वा तन्मकारास्त्रं मः अस्त्राय फडित्येवं दिग्बंधे विनिर्दिशेत् ध्येयमीश्वरं तु परमात्मानं ध्या राम
टी२ येत् षट्शक्तिभिः ऐश्वर्यादिभिर्भगवच्छब्दवाच्याभिः विद्यावैतेजश्चतपश्च मूर्त्तिर्यस्य तं इमं वक्ष्यमाणं नारा २६
यणकवचाख्यं अष्टगुणः अणिमाद्यैश्वर्ययुक्तः १० यादसां गणाः एवं वरुणस्य पाशस्तस्मात् ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आटवीआजिमुखंसंग्रामोपग्रह आदिर्येषांतेषुसंकटस्थानेषु १२ असौप्रसिद्धोवराहोमामध्वनिरक्षतु यज्ञस्वयव
त्नेपःकल्प्यतेनिरूप्यतइतितथा उन्नीताउद्धृताधरायेनसः अद्रिकूटेषुगिरिशिखरेषुरामोजामदग्न्यः १३ उग्रध
र्मादभिचारादिलक्षणात् हासात्गर्वात्नरः अवतु दत्तात्रेयः अयोगात्योगभ्रंशात् १४ पथिदेवानां
हेलनंनमस्कारमकृत्वागमनंतस्मात् पुरुषार्चनस्यांतरात् देवपूजाछिद्रात् द्वात्रिंशदपराधरूपान्नारदः १५

दुर्गेष्वटव्याजिमुखादिषुप्रभुः पायान्नृसिंहोसुरयूथपारिः विमुंचतोयस्यमहाट्टहासंदिशोविनेदु
र्न्यपतंश्चगर्भाः १२ रक्षत्वसौमाध्वनियज्ञकल्पः स्वदंष्ट्रयोन्नीतधरोवराहः रामोद्रिकूटेष्वथवि
प्रवासेसलक्ष्मणोव्याद्भरताग्रजोस्मान् १३ मामुग्रधर्मादखिलात्प्रमादान्नारायणः पातुनर
श्चहासात् दत्तस्त्वयोगादथयोगनाथःपायाद्गुणेशःकपिलःकर्मबंधात् १४ सनत्कुमारोवतु
कामदेवाद्धयशीर्षामांपथिदेवहेलनात् देवर्षिवर्यःपुरुषार्चनांतरात् कूर्मोहरिर्मांनिरयाद
शेषात् १५ धन्वंतरिर्भगवान्पात्वपथ्यात् द्वंद्वाद्भयादृषभोनिर्जितात्मा यज्ञश्चलोकादवता
ज्जनांतात्बलोगणात्क्रोधवशादहींद्रः १६ द्वैपायनोभगवानप्रबोधाद्बुद्धस्तुपाषंडगणात्प्र
मादात् कल्किःकलेःकालमलात्प्रपातुधर्मावनायोरुकृतावतारः १७

लोकाज्जनापवादात्यज्ञः जननिमित्तोयोंऽतस्तदुपघातात्तस्माद्बलभद्रः अवतात् कृतांतादितिपाठेकृतांतात्कालात्रक्षतुक्रो
धवशात्सर्पाणांगणादहींद्रःशेषः १६ कालमलप्रभूतात्कलेः कल्किः धर्मावनाय धर्मरक्षणायकृतःमहान्कृतोऽवता
रोयेन १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० दिनस्यषट्सुभागेषुक्रमेणप्रातरादिसंज्ञेषु रात्रेश्चप्रदोषादिसंज्ञेषुरक्षाप्रार्थनंमांकेशवइतित्रिभिः आसंगवंसंगवमभिव्याप्य
१८ त्रिधामाब्रह्मादित्रिमूर्तिः श्रीमाधवः शेषप्रदोषआद्यरात्रआईरात्रिपर्यंतेकाले निशीथचएकएवपद्मनाभोःवतु १९ अ प्रतिसंध्यं २
परात्रेईशः श्रीवत्सधामावतु प्रत्युषईशः श्रीजनार्दनः श्रीदामोदरः प्रभातेश्रीविश्वेश्वरोःतुसंध्यं २० युगांतानलवत्
तिग्मातीक्ष्णानेमिर्यस्यतत्चक्रंभगवताप्रयुक्तंसत् अरिसैन्यंदंदग्धिअतिशयेनदहति तस्यायंस्वभावएवनतुतस्माद्या

मांकेशवोगदयाप्रातरव्याद्गोविंदआसंगवमात्तवेणुः नारायणःप्राह्णउदात्तशक्तिर्मध्यंदिनेविष्णुररींद्र
पाणिः १८ देवोःपराह्णेमधुहोग्रधन्वासायंत्रिधामाःवतुमाधवोमां दो षहृषीकेशउतार्द्धरात्रे
निशीथएकोःवतुपद्मनाभः १९ श्रीवत्सधामाःपररात्रईशःप्रत्यूषईशोःसिधरोजनार्दनः दा
२० मोदरोःव्यादनुसंध्यंप्रभातेविश्वेश्वरोभगवान्कालमूर्तिः २० चक्रंयुगांतानलतिग्मनेमि
भ्रमत्समंताद्भगवत्प्रयुक्तं दंदग्धिदंदग्ध्यरिसैन्यमाशुकक्षंयथावातसखोहुताशः २१ गदे
निर्घिंदि शनिस्पर्शनविस्फुलिंगेनिष्पिंढ्यजितप्रियासि कूष्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णयचूर्ण
यारीन् २२ त्वंयातुधानप्रथमप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् दरेंद्रविद्रावयकृष्णपूरितो
भीमस्वनोरेर्हृदयानिकंपयन् २३

र्थनीयमित्यर्थः यद्वा देहःधीतिल्लोएमध्यमपुरुषः अत्रत्वमेवभगंचक्रमितिस्वरूपमुक्त्वासंबोध्यप्रार्थ्यते अतिशयेनद राम
हेति कक्षंशुष्कतृणं २१ अशनिवत्स्पर्शोयस्यांतेविस्फुलिंगायस्याः तस्याःसंबोधने हेगदेत्वमजितस्यप्रियासि अहं २७
अच्युतस्यदास ॥ अतःकूष्मांडादीन् निष्पिंढि निष्पिंढि संचूर्णयसंचूर्णय। अरींश्चचूर्णयचूर्णयसर्वत्रवीप्सा अतिशीघ्रंत्वा
यहेदरेंद्र पांचजन्यत्वंयातुधानादीन् विद्रावयविद्राय। विप्रग्रहाः ब्रह्मराक्षसाः येऽन्येचघोरदृष्टयस्तान् ॥ २३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिग्मा धारा यस्य हे तिग्मधार असिवर खड्ग श्रेष्ठ त्वं मम अरिसैन्यं छिंधि छिंधि शतं चंद्राकाराणि मंडलानि यस्मिन् हे शतचंद्र चर्म नु अघो
नामघवतां द्विषां चक्षूंषि छादय पापचक्षुषां च तमः प्रदर्शनात् चक्षुंषि हर २४ यत् येभ्यो भयं अंहोभ्यः पापेभ्यः २५ श्रेयः प्रतीपकाः
सं १ दुष्टव्याघातकाः २६ स्तोत्राणि बृहद्रथंतरादि सामानि तैः स्तोभ्यत स्तूयत इति स्तोमः छंदोमयो वेदमूर्तिः सुपर्णो सिगरुत्मा
स्तो १ नित्यादि श्रुतेः एकपद्यपाठ स्तोमाः गीति पूरकाक्षराणि स्तोत्रं मतिपाठ सामा धार भूतत्वात् स्तोमः २७ नामानि च रूपाणि

त्वं तिग्मधारासिवरारिसैन्यमीश प्रयुक्तो मम छिंधि छिंधि चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघो
नां हर पापचक्षुषां २४ यन्नो भयं ग्रहेभ्यो भूत् केतुभ्यो नृभ्य एव वा सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंहोभ्य
एव वा २५ सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात् प्रयांतु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः २६
गरुडो भगवान् स्तोत्रस्तोभ्यः छंदोमयः प्रभुः रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः २७ सर्वा
पद्भ्यो हरेर्नामरूपयानायुधानि नः बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः २८ यथा हि भग
वान् एव वस्तुतः सदसच्च यत् सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः २९ तथैकात्म्यानुभावानां विक
ल्परहितः स्वयं भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ३० तेनैव सत्यमानेन सर्वज्ञो भगवा
न् हरिः पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ३१ विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भ
स्वनेन ~ गवान्नारसिंहः प्रहापयंल्लोकभयं स्वनेन जस्साग्रस्त
६८१ यानानि च वाहनानि आयुधानि च नो वुध्यादीनां तु पार्षद भूषणाः पार्षदमुख्याश्च पांतु २८ सच्च असच्च मूर्तामूर्तं य
त् तत् सर्वं जगत् २९ ऐकात्म्यस्यानुभावो नु ध्यानं येषां तेषां विकल्पो भेदस्तद्रहितोपि ३० सत्यमानेन सत्यभूतेन प्रमाणे
न ३१ पुनरपि श्रीनृसिंह एव प्रार्थ्यते विदिक्ष्विति पावित्यनुषंगः यद्वा नारसिंहः प्रह्लादः स्वनेन श्रीनृसिंहेनामागते

भा०१० दंशितः कैचितः ३३ सोपिसाध्वसाङ्ग्यान्विमुच्यते ३४ तस्यनुभयंनभवेदेव ३५ एतद्विद्याप्रभावमितिहासेनाह इमा
मितिसार्द्धैस्त्रिभिः मरुधन्वनिनिरुदकेदेशेश्वभ्रेनविघायाः क्षेत्रतीर्थानपेक्षत्वंदर्शितं ३६ यत्रद्विजस्यक्षयोदिह

मघवन्निदमाख्यातंवर्मनारायणात्मकं विजेष्यस्यंजसायेनदंशितोसुरयूथपान् ३३ एतद्धार
यमाणस्तुयंयंपश्यतिचक्षुषा पदावासंस्पृशेत्सद्यः साध्वसात्सविमुच्यते ३४ नकुतश्चिद्भयं
तस्यविद्यांधारयतोभवेत् राजदस्युग्रहादिभ्योव्याघ्रादिभ्यश्चकर्हिचित् ३५ इमांविद्यांपुरा
कश्चित्कौशिकोधारयन्द्विजः योगधारणयास्वांगंजहौसमरुधन्वनि ३६ तस्योपरिवि गगना५
२८ मानेनगंधर्वपतिरेकदा ययौचित्ररथस्त्रीभिर्वृतोयत्रद्विजक्षयः ३७ गगनान्न्यपतत्सद्यः
सविमानोह्यवाक्शिराः सवालिखिल्यवचनादस्थीन्यादायविस्मितः प्रास्यप्राचीसरस्व
त्यांस्नात्वाधामस्वमन्वगात् ३८ श्रीशुकउ० यइदंशृणुयात्कालेयोधारयतिचादृतः तंनम
स्यंतिभूतानिमुच्यतेसर्वतोभयात् ३९ एतांविद्यामधिगतोविश्वरूपाच्छतक्रतुः त्रैलोक्यल
क्ष्मींबुभुजेविनिर्जित्यमृधेसुरान् ४० इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेनारायणवर्म
नामाष्टमोध्यायः

स्यागः तस्योपरिसद्यः तत्क्षणंमेवगगनान्न्यपतत् पाठांतरे स्त्रीगनाभिः सह वालिखिल्योपदेशात्तस्यास्थीनि राम
प्रास्यप्रक्षिप्यविस्मितः सन्स्वधामंगंधर्वलोकंजगाम ३८ ३९ अधिगतः प्राप्तः सन् ४० इतिषष्ठेऽष्टमः ॥ छ ॥ २८

नन्वेमं विश्वरूपेतु हंते शक्रेण कोपतः। त्वष्ट्राचोत्पादिते तन्त्रे भीतैर्दैवैर्हरिः स्तुतिः। सोमस्य पीथं पानं यस्मिन् एवं सुरापीथं अन्नम
त्तीत्यन्नादं अत्र विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत्यादि श्लोकैरनुसंधेया १ तस्यासुरपक्षपातमाह सवाइति द्वा
भ्यां प्रत्यक्षं प्रकटं यथा भवति तथा सविनयं देवेभ्यो हविर्भागं इन्द्राय इदं अग्नये इदमित्युच्चैरवदत अत्र हेतुः यस्य पितरो देवाः
२ असुरेभ्यस्तु परोक्षं गुप्तं भागं ददौ तदेवाह देवान्यजमानोऽसावसुरान्प्रति भागमवहत् २ ४ तं वारयितुं समर्थः तथा

सुरापीथं १ शुकउवाच तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत सोमपीथँमन्नादमिति शुश्रुमः १ सवैबर्हिषि
देवेभ्यो भागं प्रत्यक्षमुच्चकैः अवदद्यस्य पितरो देवाः सप्रश्रयं नृप सएव हि ददौ भागं परोक्षम
सुरान्प्रति २ यजमानोऽवहद्भागं मातृस्नेहवशानुगः तद्देवहेलनं तस्य धर्मालीकं सुरेश्वरः
आलक्ष्य तरसा भीतस्तच्छीर्षाण्यच्छिनद्रुषा सोमपीथं तु यत्तस्य शिर आसीत्कपिञ्जलः ४ ॥
कलविङ्कः सुरापीथमन्नादं यत्स तित्तिरिः ब्रह्महत्यामञ्जलिना जग्राह यदपीश्वरः ५ संवत्स
रान्ते तदघं भूतानां स विशुद्धये भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः ६ भूमिस्तुरीयं जग्रा
ह खातपूरवरेण वै ईरिणं ब्रह्महत्याया रूपं भूमौ प्रदृश्यते ७ श्रीराम श्रीराम श्रीराम श्री

पिञ्जलः ५ संवत्सरं तथैव स्थित्वा संवत्सरान्ते भक्ताकोशाभीतः सन् भूतानां मध्ये विशुद्धये लोकापवादपरिहाराय स
धं २ हरिरिन्द्रो भूम्यादिभ्यस्तदघं विभज्य ददौ ६ तुरीयं चतुर्थं भागं खातस्य गर्तस्य पूरणं तेन वरेण यदि खातं पूरणं स्वत स्य पुरः २
एव भविष्यति तर्हि ग्रहिष्यामीत्येवं भाषाबंधेन जग्राहेत्यर्थः ईरिणमुषरं अत एवोषरेऽध्ययनादि निषिध्यते ७ ॥
ख १ ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० छेदे सति पुनर्विरोहः प्ररोहो भवतीति वरेण निर्यासरूपेण ब्रह्महत्याया दृश्यत्वात् निर्यासान् भक्ष्यः ॥ शश्वत्कामवरेण पाव
त्यसवंगर्भानुपपत्तेनैव संभोगवरेण अत एव रजोदर्शनेन तत्संगादि न कार्यं एवं द्रव्यभूयावरेण यस्मिन् द्रव्ये क्षीरादावा
पो मिश्रीभवेयुः तस्य भूयस्त्वसाधिक्यं स्यादिति वरेण यद्वा स्वरूपैव निर्हरोदकमादिना भूयस्त्ववरेण द्रवभूयइति पाठ श्री२
प्ययमेवार्थः यद्वा द्रवभूयस्त्वं सांसिद्धिकद्रवत्वेन वरेण अस्य विभागस्य विश्वरूपवेत्वाद्रुइत्यस्यां अनुक्तो ॥
तद्विभागफलमाह तत्पापं हरतीति निराकरोति कः क्षिपन् वुद्वुदादिजलात् बहिः प्रक्षिपन्नित्यर्थः यद्वा क्षिपन् जलं पा

१ वरेण तुर्यं छेदविरोहणं जगृहुर्द्रुमाः तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ॥ शश्वत्कामवरेणांहस्तृ
रीयं जगृहुः स्त्रियः रजोरूपेण तासु ब्रह्महा मासि मासि प्रदृश्यते एवं द्रव्यभूयोवरेणांऽपस्तुरीयं जगृहुर्म श्री लि२
२९ लं तासु बुद्बुदफेनाभ्यां दृश्यते तद्धरति क्षिपन् १० हतपुत्रस्ततस्त्वष्टा जुहावेंद्राय शत्रवे इंद्रश
त्रो विवर्द्धस्व मा चिरं जहि विद्विषं ११ अथाऽन्वाहार्यपचनादुत्थितो घोरदर्शनः कृतांतइ
वलोकानां युगांतसमये यथा १२

पं हरति आहरति गृह्णातीत्यर्थः अयं च तस्माद्द्विषो न परिच्छ्याइत्यादि श्रुत्यर्थउक्तः पाठांतरे हरिकिल्विषं इद्रपापं राम
१० इंद्राय इंद्रं हंतुं शत्रवे शातयितुमिच्छतां दाह इंद्रशत्रो विवर्द्धस्वेति अत्र चेंद्रशत्रुपदस्याद्युदात्तत्वात् बहुव्रीहिप्रकृ २९
त्या पूर्वपदमिति स्मृतेः बहुव्रीहिलक्षणापत्त्या इंद्र एव तस्य शत्रुरभूत् तदुक्तं श्रुत्या यदब्रवीत् स्वाहेंद्रशत्रुर्वर्द्धस्वे
ति तस्मादस्येंद्रः शत्रुरभवदिति तथा च शिक्षायां मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वा
ग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति ११ अन्वाहार्यपचनाद्दक्षिणाग्नेः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं वीक्ष्य वित्रस्ता लोका दश दिशो विदुद्रुवुरिति पंचमेनान्वयः कथंभूतं विघ्नकुं समंततः इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानं १
दग्धशैलप्रतीकाशं रुक्मवर्णं संध्याभ्रानीकवद्वर्चो दीप्तिर्यस्य तं १३ तप्तताम्रवत् शिखाः श्मश्रूणि च यस्य मध्याह्नार्क
वदुग्रे लोचने यस्य १४ रोदसी व्याप्य स्थितमित्यर्थः १५ दरीवत् गंभीरेण वक्त्रेण मुहुर्मुहुः जृंभमाणमित्यन्वयः कथंभूते
वक्त्रेण १ न नभस्तलं पिबता अक्ष्णा जिह्वया लिहता भुवनत्रयं ग्रसता १६ महता विस्तीर्णेन रौद्रा दंष्ट्रा यस्मिन् १७ वृत्रं

विघ्नं विवर्द्धमानं तमिषुमात्रं दिने दिने दग्धशैलप्रतीकाशं संध्याभ्रानीकवर्चसं १३ तप्तताम्रशिखाश्म
श्रुं मध्याह्नार्कोग्रलोचनं १४ देदीप्यमानं त्रिशिखं शूलमारोप्य रोदसी नृत्यंतमुन्नदंतं च चाल
यंतं पदा महीं १५ दरीगंभीरवक्त्रेण पिबता च नभस्तलं लिहता जिह्वया ऋक्षाणि ग्रसता भुवन
त्रयं १६ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः वित्रस्ता दुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश १७
येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्तिना स वै वृत्र इति प्रोक्तः पापः परमदारुणः १८ तं नि
जघ्नुरभिद्रुत्य सगणा विबुधर्षभाः स्वैः स्वैर्दिव्यास्त्रशस्त्रौघैः सोऽग्रसत्तानि कृत्स्नशः १९
ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्ततेजसः प्रत्यंचमादिपुरुषमुपतस्थुः समाहिताः २० श्री०

नाम निर्वक्ति येनावृता इति त्वाष्ट्री मूर्तिर्यस्य तपसः तेन तथा च श्रुतिः स इमांल्लोकानावृणोत् यदिमांल्लोकानावृणो
वृत्रस्य २ त् तद् वृत्रस्य वृत्रत्वमिति १८ अग्रसत् भक्षितवान् १९ ग्रस्तं तेजो येषां प्रत्यंचं अंतर्यामिणं त्रिभुवनस्य तेन व्याप्तत्वात् क्वा
पिगमनासंभवात् तत्रैव स्थित्वा तुष्टुवुरित्यर्थः महाभयपरित्राणमन्यतो न भवेदिति हरिमेव प्रपद्यंते सुराः शरणम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग· ५० वाय्वादीनि पंचमहाभूतानि तैर्निर्मितास्त्रयो लोकास्तेषामधिपतयः ब्रह्मादयश्चा तैतेर्वाचीनावयं च सर्वेयस्मैअंतकाय कालो

योद्विजंतः संतावलिं हरामअस्य सोऽपि यस्माद्बिभेति ततः परमेश्वरोद्य नोऽस्माकं अरणं शरणं रक्षणमस्तु २१ तत एवे

त्यवधारणे हेतुमाहुः अविस्मितं निरहंकारं कुतूहलशून्यं वा कुतः शांतरागादिशून्यं तत्र कुतः स्वेनैव लाभेन परिपू

र्णो कामं तत्र कुतः समंततः पाधिपरिच्छेदशून्यं एवं भूतं परमेश्वरं विनाऽन्यं परं यः शरणार्थमुपसर्पति सहि बालिशोऽ

ज्ञः यतोऽसौ शुनोलांगूलेन पुच्छेन समुद्रमतितितर्त्तिं अतितरितुमिच्छतीत्यर्थः यथा तेन समुद्रतरणं न भवति

देवा ऊचुः वाय्वंबराम्यपसलिलयस्त्रिलोका ब्रह्मादयो ये वयमुद्विजंतः हरामयस्मैवलिमंत

कोऽसौ बिभेति यस्माद्दरणं ततो नः २१ अविस्मितं तं परिपूर्णकामं स्वेनैव लाभेन समं प्रशांतं

स२ विनोपसर्प्पं परं हि बालिशः श्वलांगुलेनाऽतितितर्त्तिसिंधुं २२ यस्योरुशृंगे जगतींस्व

नावं मनुर्यथाबध्य ततोरदुर्गं सएव नस्त्वाष्ट्रभयाद्दुरंतात् त्राताऽश्रितान् वारिचरोऽपि

नूनं २३ पुरास्वयंभूरपिसंयमांभस्युदीर्णवातोर्मिरवैः कराले एकोऽरविंदात्पतितस्ततार

तस्माद्भयाद्येनसनोऽस्तुपारः २४

तथा निरीश्वराश्रयेण न व्यसनार्णवतरणं न भवतीति भावः २२ महाभये स एव रक्षक इति दृष्टमित्याहुर्यस्येति

द्वाभ्यां यस्यमहाशृंगे जगतीं पृथ्वीमेव स्वनावं बध्वा मनुः सत्यव्रतो यथावत् दुर्गसंकटं ततार सएव वारिचरो म

त्स्यमूर्त्तिः नोऽस्मानप्याश्रितान् सतः नूनं त्राता रक्षिष्यति २३ संयमांभसि प्रलयोदके उदीर्णैः कृतैः वातैर्य

ऊर्मयस्तेषां रवैः करालेभयंकरे अरविंदान्नाभिकमलात्पतितप्रायः एकोऽसहाय एव तस्मात् भयाद्येन त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच वयंभगवंतेवसृष्टाः पालिताश्चवह्नुशः अतस्तमेवशरणंप्रजामेत्याह॥ यएकइतित्रिभि॥ येनानुगृहीता॥सं
तोविश्वंसृजामः ननुयूयमेवस्त्रष्टार॥ नान्योयुष्माकमनुग्राहकोऽस्तितस्यादर्शनात्तत्राह॥ अस्मत्त॥पुर॥पूर्व
मेवांतर्यामितयासमीहमानस्यापियस्यलिंगंरूपंनपश्यामतत्रहेतुः पृथक् पृथगीशाइत्येभिमानिन॥ २५ दे
स्प१ वादिषुउपेंद्रपरशुराममत्स्यरामादितनुभिः कृतावतार॥ सनुआत्मसात्कृत्वापातिच २६ आत्मभूतंदेवंतच

य१ यएकईशोनिजमायान॥ससर्जयेना नुसृजामविश्वं वयंनयस्यापिपुरःसमीहत॥ पश्यामलिंगं
पृथगीशमानिन॥ २५ योनःसपत्नैर्भृशमर्द्यमानानृदेवर्षितिर्यङ्‌नृषुनित्यएवकृतावतार॥
स्तनुभिःस्वमायया कृत्वात्मसात्पातियुगेयुगेच २६ तमेवदेवंवयमात्मदेवतंपरंप्रधानं
पुरुषंविश्वमन्यं व्रजामसर्वेशरणंशरण्यंस्वानांसनोधास्यतिशंमहात्मा २७ श्रीशुक॰
इतितेषांमहाराजसुराणामुपतिष्ठतां प्रतीच्यांदिश्यभूदाविःशंखचक्रगदाधर॥ २८ आ
त्मतुल्यैःषोडशभिर्विनाश्रीवत्सकौस्तुभौ पर्युपासितमुन्निद्रशरदंवुरुहेक्षणं २९ दृ
ष्ट्वातमवनौसर्वेईक्षणाह्लादविक्लवाः दंडवत्पतिताराजन्शनैरुत्थायतुष्टुवुः ३० य

कुतः विश्वंविश्वात्मकं तथापिविकारंवारयति अन्यंविश्वात्मत्वेहेतुः परंकारणं ननुप्रधानंपुरुषश्चविश्वस्यका
रणंतत्राहुः प्रधानंपुरुषंच तदात्मकोऽपिसएवेत्यर्थः सएवनःशंविधास्यति २७ प्रतीच्यांदिशिहृदिप्रथम
माविर्भूतः पुनश्चतेषुरोदृष्ट्वाइक्षणाह्लादेनविवशाअवनौदंडवत्पतिताः संतः शनैरुत्थायतुष्टुवुरित्य
न्वयः २८ कथंभूतंश्रीवत्सकौस्तुभौविनास्वतुल्यैःषोडशाभिःसुनंदादिभिःपरितःसेवितंउन्निद्रश

भा॰५॰ यज्ञो वीर्यं स्वर्गादिफलजननाय सामर्थ्यं यस्य तस्मै नमः वयसे उत तते फलपरिच्छेदककालात्मने पित्रादिघातकेषु देत्येषु
अंतस्थसिंहत्वाकृतये न एवं भूतैः प्रभावैः सुपुरुहूतये शोभनबहुनाम्ने २१ ननु मम गुणातीतं रूपं विहाय गुणोपाधिकं यु
ष्ववीर्यत्वादि किमिति वर्ण्यते तत्राहुः यत्तु वगुणात्रयस्येशितुः नियंतुस्त्रिगुणात्मिकानां तिसृणां गतीनां परमं पदं नि
र्गुणं स्वरूपं तत् विसर्गस्यार्वाचीनः इदानीतनः हे धातः वेदितुं नार्हति अतः केवलं तस्मै तेन नमोस्त्वि मिताक्षराणि
उ१ प्रधानि नमीयते हरेर्गुणाः इति पद्येरतुष्यंतः संयोगयेन तुष्टुवुः भक्तुद्रेकेणा बहुधा संबोधयंतो दुर्ज्ञेयत्वं प्रपंचयंति

देवा ऊचुः नमस्ते यज्ञवीर्याय वयसे उत ते नमः नमस्ते ह्यस्तचक्राय नमः सुपुरुहूतये २१ यत्ते
गतीनां तिसृणामीशितुः परमं पदं नार्वाचीनो विसर्गस्य धातर्वेदितुमर्हति २२ ॐ नमस्तेस्तु भगवन्ना
३१ रायण वासुदेवादिपुरुष महापुरुष महानुभाव परममंगल परमकल्याण परमकारुणिक केवल जग
दाधार लोकैकनाथ सर्वेश्वर लक्ष्मीनाथ परमहंसपरिव्राजकैः परमेणात्मयोगसमाधिना प
धा२ रिभावित परिस्फुटया पारमहंस्यधर्मेणोद्घाटिततमः कपाटद्वारे चित्तेपावृत आत्मलोके स्वय
मुपलब्धनिजसुखानुभवो भवान् १ दुरवबोध इव तवायं विहारयोगो यदशरणोऽशरीर इदमनवेक्षि
तास्मत्समवायः आत्मनैवाविक्रियमाणेन सगुणमगुणः सृजसि पासि हरसि २ गुणाः
सुरीलितः १

न१ भगवन्नित्यादिना परमं मंगलं शुद्धो धर्मो यस्मिन् आत्मयोगेनाष्टांगेन यः समाधिः चित्तैकाग्र्यं तेन परिभावितः परिस्फु
टीपुः पारमहंस्यधर्मो भगवद्भजनं तेन उद्घाटितं तमोरूपं कपाटं यस्मिन् तस्मिन् द्वारभूते चित्ते अपावृते प्रकटे आ
त्मलोके प्रत्यग्रूपे स्वयमेवोपलब्धमभिव्यक्तं यन्निजसुखं तदनुभवरूपो भवान् १ ननु केवलानुखरूपत्वे मम
सृष्ट्यादिकर्तृत्वं कथं तत्राहुः दुःखबोध इव तवायं विहारयोगो यद्यस्मात् अशरणो निराश्रयः इदं विश्वं स्रजन

क्रि५ अयोगः १ भव२

राम ३१

[illegible] ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्ज्ञेयत्वांतरमाहुः अथतंत्रेति यथेहदेवदत्तो गृहादिनिर्मायातत्र स्वकृत शुभाशुभयोः फलमुपदत्तेपेवंभवा
गा१ न्नप्यस्वरूपोजीवरूपेणगुणविसर्गपतितः सन्नुपाददाति यद्वासमंजसंअप्रच्युतदर्शनंचिच्छक्तिर्यस्यसभवा
नुदास्तेउदासीनः साक्षितयावर्ततइति ३ तदेवंविरोधेनदुर्ज्ञेयत्वमुक्त्वातत्परिहारेणज्ञानप्रकारमाहुः न
हीति विरुध्यतइति विरोधउभयंनविरुद्धमित्यर्थः नत्वन्यदृष्टांतेनत्वयिविकल्पोयुज्यतेअतर्क्यैश्वर्य
त्वादित्याहुः भगवतीति अपरिमितागुणागणायस्य तस्मिन्नीश्वरेस्वतंत्रेन अवगाह्यमतर्क्यंमाहात्म्यं
ति१ यस्यतस्मिन् विकल्पएवंवाएवंवेति वितर्कः किमत्रयुक्तमितिविचारइत्थमेव तत्रप्रमाणाभासाः

अथतत्रभवान्किंदेवदत्तावदिहगुणविसर्गपतितः पारतंत्र्येणस्वकृतकुशलाकुशलफलमुपाद
दाति आहोस्विदात्मारामउपशमशीलः समंजसदर्शनउदास्तइतिहवावनविदामः ३ न
हिविरोधउभयंभगवत्यपरिगणितगुणगणईश्वरेअनवगाह्यमाहात्म्येअर्वाचीनविकल्प
वितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलांतः करणाश्रयदुरवग्रहवादिनांविवाद
नवसरेउपरतसमस्तमायामयेकेवलएवात्ममायामंतर्धायकोन्वर्थोदुर्घटइवभवति
स्वरूपद्वयाभावात् ४ समविषममतीनांमतमनुसरसियथारज्जुखंडः सर्पादिधियां ५

तदनुग्राहकाः कुतर्कोअर्वाचीनावस्तुस्वरूपासंस्पर्शिनोयेविकल्पादयस्तेयेषुशास्त्रेषुतैः कलिलंव्या
कुलंअंतःकरणमाश्रयोयस्यदुरवग्रहस्यतेनवादिनांविवादस्यानवसरेअगोचरेननुअज्ञामात्रेमैवंतत्
युक्तिरुच्यतांतत्राहुः परतोमायामयेः संसारोयस्मिन्नुतस्मिन्केवलेप्यात्ममायांमध्येनिधायकोन्वर्थः
केवलत्वादिर्निसंभवतियदिवस्तुतः केवलत्वादिभवेत्तर्हि विरोधः स्यात् ननुतदेवास्त्वित्याहुः स्वरूपद्वया
भावादिति ४ अनुग्रहनिग्रहादिकर्तृत्वान्मतिभेदेनत्वन्मायया त्वयिस्फुरतीत्याहुः समोविषमश्चेम
तु१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प० न देवं विरोधं परिहरत इति श्रीनंगर पार्थमाकृ॰ एवं हि नानारूपेणाप्रतीतः वस्तुस्वरूपः सद्रूपः सर्वेषां गुणानां विषया
णामाभासैः प्रकाशैरुपलक्षितः ननु ते जीविताविपलक्ष्यते न सर्वप्रत्यगात्मत्वात् सर्वजीवान्तर्यामित्वात् जडत्वादात्मा
ध्यासेन जीवस्यापि जडप्रायत्वात् तेन विना प्रकाशाइति भावः पर्यवशेषितः नेतिनेतीत्यादिश्रुतिभिः ६ अत एव
त्तिरेव परमपुरुषार्थ इत्याहुः अथहेति पर्यावर्त्तइत्यन्तेन यस्मादेवंभूतस्त्वं परमेश्वरः अथ ह वाव अत एव हि हे मधु
उ॰ मथन परमभागवता एते त्वत्पदाम्भोजासेवां कथं मुहुर्मुहुर्विसृजन्तीत्यन्वयः हि यस्मात् स्वार्थे पुरुषार्थे कुशलाः ३७

सएव हि पुनः सर्ववस्तु निवस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात्
सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ६ अथ ह वाव तव महिमामृतरससमुद्रवि
३२ प्रुषा सकृदवलीढया स्वमनसि निष्यंदमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुख
लेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निरंत
रनिर्वृतमनसः कथमुह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्व
च्चरणांबुजानुसेवां विसृजंति न यत्र पुनरयं संसारपर्यावर्त्तः ७

निपुणाः अत एव आत्मा त्वमेव प्रियः सुहृच्च येषां ते साधवो रागादिशून्याः तत्र हेतुः तव महिमैवामृतरससमुद्रस्तस्य राम
विप्रुषा बिंदुमात्रेण सकृदपि लीढया आस्वादितया स्वमनसि निष्यंदमानं अतिशयेन स्रवत् यन्निरंतरं सुखं तेन ३२
विस्मारिता दृष्टश्रुता विषयाः सुखलेशाभासा येषां ते अत एव भगवति त्वयि नितरां निरंतरं निर्वृतं च मनो ये
षां ते यत्र यस्यामनुसेवायां सत्यां ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१४०

प्रस्कंतं विज्ञापयंति त्रिभुवनेत्यादिनायावत्समाप्ति त्रिभुवनमात्मास्वरूपं भवनंचयस्य त्रिभुवनस्यात्माभवनं
चेतिवा त्रयाविक्रमायस्य त्रिनूलोकान्नयतीतितथा त्रयाणांलोकानांमनोहरोनुभावोयस्य एवंचतुर्द्धासंबो
ध्याहुः तेषामनुपक्रमसमयः उद्यमकाः लोनभवतीतिमत्वा हेदंडधरपूर्वयथादंडंदधर्थधृतवानसि एवमे
नंत्वाष्टमपिजहि यदिमन्यसेहंतुंयदीच्छसि ८ प्रथमंतावत्तूत्वदीयानामस्माकंअंतस्तापंशमयितुमर्हसि

त्रिभुवनात्मभवनत्रिविक्रमत्रिनयनत्रिलोकमनोहरानुभावत्वंवविभूतयोदितिजदनु
जादयश्चापितेषामनुपक्रमसमयोऽयमितिस्वात्ममाययासुरनरमृगमिश्रितजलच
राकृतिभिर्यथापराधंदंडंदंडधरदधर्थएवमेनमपिभगवानूजहित्वाष्टुमुतयदिमन्यसे ८
अस्माकंतावकानांतवनतानांततततामहतवचरणनलिनयुगलध्यानानुबद्धहृदय
निगडानांस्वलिंगविवरणेनात्मसातूकृतानामनुकंपानुरंजितविशदरुचिरशिशिर
स्मितावलोकेनविगलितमधुरमुखरसामृतकलयाचांतस्तापमनघाऽर्हसिशमयि
तुं ९

तावकानामित्यत्रहेतुः हेपितः हेपितामहत्वचरणनलिनयुगलध्यानेनैवानुबद्धोहृदयेनिगडःशृंख
लायेषां स्वलिंगेविवरणेननिजमूर्त्तिप्रकटनेनस्वीकृतानां केनअनुकंपयानुरंजितंसानुरागंचतद्वि
शदंरुचिरंचशिशिरंचास्मितंतत्सहितेनावलोकेन तथानुःकंपयेवविगलितामधुरामुखरसःप्रिया
वाक्सेवामृतकलातयाच ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रत्यगात्मान्तर्यामीतरूपेणच बहिरपि प्रधानरूपेण

भा॰ १० किंचास्मदभिप्रायस्त्वयाज्ञायत एव किमत्रास्माभिर्विज्ञापनीयमित्याहुः अथेहे भगवन्नुत वास्माभिरिह किया
न्वार्थविशेषो विज्ञापनीयः स्यादित्यन्वयः यथा हिरण्यरेतसोऽग्नेः सादेशभूतैर्विस्फुलिंगादिभिः प्रकाशो न क्रि
यते तथा तवास्माभिः कार्यार्थप्रकाशनं न कार्यमित्यर्थः अत्रेह तु गर्भाणि विशेषणानि अखिलजगतामुत्पत्त्या
दिषु निमित्तायमानया दिव्यमायया विनोदो यस्य अत एव सर्वजीवनिकायानामंतर्हृदयेषु ब्रह्मस्वरूपेण

अथ भगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनो
दस्य सकलजीवनिकायानामंतर्हृदयेषु बहिरपि च प्रत्यगात्मस्वरूपेण प्रधानरूपेण
च यथादेशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः सर्वप्रत्ययसाक्षि
ण आकाशशरीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वार्थविशेषो विज्ञापनी
यः स्यात् विस्फुलिंगादिभिरिव हिरण्यरेतसः १० अतएव स्वयं तदुपकल्पयास्माकं भग
वतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृ
यं१ तानां वयं यत्कामेनोपसादिताः ॥

देशकालदेहावस्थानविशेषान्तदुपलब्ध्यानुभवतः कथं तेषामुपादानतयोपलंभकतयाच उपादानस्योपलंभ राम
कर्तयेतिवा अतएव सर्वेषां प्रत्ययानां बुध्यादीनामपि साक्षिणः साक्षित्वे हेतुः आकाशवदलिप्तं शरीरं स्वरू ३३
पं यस्य अलिप्तत्वे हेतुः स्वयं साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः शुद्धसत्त्वमूर्तेश्च १० अत एव सर्वज्ञत्वादे
व वयं यत्कामेन यस्य कार्यस्य कामेनोपसादिताः प्रापिताः तदस्माकं कार्यं स्वयमेवोपकल्पय संपादयेति चर
णमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैर्यः संसारपरिश्रमः तस्योपशमकरीमुपसृतानां प्राप्तानां ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वं भक्तेभ्यः केभ्योपि तत्तत्कामं शकामाभ्यादिति स्वकामं कथयति अथोनंतरमेव १२ शीघ्रं तद्ध्यायपुनः प्रणमंति हंसाय शुद्धाय हरये आर्त्तिहरायते नमः शुद्धत्वे हेतवः हृन्निलयाय हृदयाकाश निकेतनाय निरीक्षकाय बुद्ध्यादि साक्षिणे कृष्णाय सदानंदरूपाय कृषि भूर्वाचकः शब्दाणश्च निर्वृत्तिवाचकः तयोरैक्यं परब्रह्म कृष्णइत्यभिधीयतइति निरुक्तेः आर्त्तिहरत्वे हेतवः मृष्टं चिरयशोयस्य निरूपकमायश्चादिभूत्याय समृद्भिः संगृह्यतइति तथा तस्मै भवपांथः भवरूपपथिवर्त्तमानः तस्य जनस्य निजाश्रमासौ संसा

अथोईशजहि त्वाङ्घ्रयसंत भुवनत्रयं यस्तानियेन नः कृष्णेन जास्य स्वायुधानिव १२ हंसाय दहनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरूपक्रमाय सत्संग्रहाय भवपांथ निजाश्रमाप्तावंत परिष्टगत्तये हरये नमस्ते १३ शुक उवाच अथैवमीडितो राजन् सादरं त्रिदशैर्हरिः स्वमुपस्थानमाकर्ण्य प्राहतानभिनंदितः १४ श्रीभगवानुवाच प्रीतोहं वः सुरश्रेष्ठा मदुपस्थानविद्यया आत्मैश्वर्यस्मृतिः पुंसा भक्तिश्चैव यया भवेत् १५ किं दुरापं मयि प्रीते तथापि विबुधर्षभाः मय्येकांतमति र्नान्यन्मत्तो वाञ्छति तत्त्ववित् १६ न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक् तस्य तानिच्छतो यच्छेत् यदिसो

रस्यांतपरिष्टासर्वतः प्रजितात्वन्मागतिः फलंयस्तस्मै १२ अभिनंदितः संतोषितः १४ मदीयमुपस्थानं स्तोत्रं तत्सहितया विद्यया ज्ञानेन आत्मनऐश्वर्यमसंसारित्वं तस्यस्मृतिर्यया न हि विरोधउभयमित्यादिनाकर्त्तृत्वभोक्तृत्वे हेमायिकत्वोक्तेः भक्तिश्च यया भवति १४ अथ तु भगवन्नित्यादिनोक्तेः सर्वोत्कर्षोक्तेर्भक्तिमभिनंदति कोमिति १६ यदुक्तं देवैः स्वयं तदुपकल्प्यतास्माकमित्यादि तत्संपादनं कृपालोर्ममानुचितमित्याशयेनाह

दिनाविद्याभां गुणादिविषयपुनर्भवहेतोः

विषयत्व चाविद्याऽऽदाय ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०६० कर्मनवक्तिप्रवृत्तिमार्गंनवक्तिहि अपथ्यंयथानरातिनददातिभिषक्तमः सद्वैद्यः १८ एवंतत्वकथनेनानेनोन्नित्वमुपदि
ष्टमित्यतदभिप्रायमनुसरन्नाहमघवन्निति विद्याव्रतेतस्तपसांचसारंदृढंगात्रंशरीरंयाचतयाचध्वं १९ तत्रतदीयं
विद्यातिशयमाह सवाइतिद्वाभ्यां एवंत्वत्रप्रसिद्धाकथा निशाम्याथर्वणेनदक्षंप्रवर्ग्यब्रह्मविद्ययोः दध्यंचसमु
पागम्ययतमूचतुरश्विनौभगवन्नौदेहिनौविद्यामिति अश्वौत्वामसचाब्रवीत् कर्मण्युपस्थितोद्यहंपश्चाद्वक्ष्यामिगच्छ
तांतयोर्निर्गतयोरेवशक्रआगत्यतंमुनिमुवाचभिषजौविद्यांमावदीः रविवेनामुने यदिमहाक्यमुल्लंघ्यब्रवीषि
सहैतेसवत्तेशिरः छिंद्यानसंदेहइत्युक्त्वासययौहरिः इन्द्रेगतेतथाभ्येत्यनासत्यावूच्यतुर्द्विजं तत्सुखादिंद्रगादि

स्वयंनिश्रेयसंविद्वान्नवक्त्यज्ञायकर्महि नरातिरोगिणोऽपथ्यंवांछतोहिभिषक्तमः १८
३४ मघवन्यातभद्रंवोदध्यंचमृषिसत्तमं विद्याव्रततपः सारंगात्रंयाचतमाचिरं १९ सवाअ
धिगतोदध्यङ्अश्विभ्यांब्रह्मनिष्कलं यद्वाअश्वशिरोनामतयोरमरतांव्यधात् २०

तंशक्रत्वाताबूचतुःपुनः आवांतवशिरः छित्वापूर्वमश्वस्यमस्तकेसंधास्यावस्तेनाश्वमुखेनविद्यांचनौद्विज ते
स्मिन्निंद्रेणासंछिन्नेपुनः संधायमस्तकं निजंतेदक्षिणांदत्वागमिष्यावोयथागतं एतच्छ्रुत्वाततोवाचदध्यङ्कु
थर्वणोस्तयोः प्रवर्ग्यंब्रह्मविद्यांचसत्कृतोऽसत्यशंकितइति ततश्चायमर्थः दध्यङ् निष्कलंशुद्धंब्रह्मअधि राम
गतः ज्ञातवान् ततोऽश्विभ्यांप्रादादित्युत्तरस्या ३४
नुषंगः उपदिदेशेत्यर्थः कथंभूतंब्रह्मयद्वेह अश्वशिरसाप्रोक्तत्वादश्वशिरोनामप्रसिद्धं तयोरमरतांजीव
न्मुक्ततांव्यधात् तथाचश्रुतिः अश्वस्यशीर्ष्णाप्रयदीमुवाचेति २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्तास्तकं वर्मे श्रीनारायणकवचं च अधिगतइ निपूर्वस्यानुषंगः तत्रहेतुः यद्यस्मात् त्वष्टा प्रादात् किंत
नूयत् त्वष्टा विश्वरूपाय पुत्राय प्रादात् कीदृशाय तुभ्यं ततो विश्वरूपात् अधीः धृतवानसि तदेवं विद्यया
सार गात्रं याच धर्मित्यर्थः २१ ननु प्रख्यदेहं कथं दास्यति तत्राह युष्मभ्यमंगानि अस्थीनि याचितः सन्
दास्यति यतो धर्मज्ञः विशेषतो अश्विभ्यां शिष्यप्रीत्या दास्यति अस्थीनीत्येनेनहेय तद्दर्शितेनैरस्थि

दध्यङ्ङाथर्वणस्त्वष्ट्रेवर्माभेद्यमदात्मकं विश्वरूपाय यत्प्रादात्त्वष्टायत्त्वम
धास्ततः २१ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोंगानि दास्यति ततस्तैरायुध
श्रेष्ठो विश्वकर्मविनिर्मितः येनवृत्रशिरोहर्त्तामत्तेजउपबृंहितः २२ तस्मि
न्विनिहतेयूयं तेजोस्त्रायुधसंपदः भूयः प्राप्स्यथभद्रं वोनहिंसंति च मत्परा
न् २३ इतिश्रीभागवते महापुराणे षष्ठस्कंधे नवमोऽध्यायः श्रीबादरायणि
रुवाच इंद्रमेवंसमादिश्य भगवान् विश्वभावनः पश्यतामनिमेषाणां तत्रैवांत
र्दधेहरिः १ तथाऽभियाचितोदेवैरृषिराथर्वणोमहान् मोदमानउवाचेदं प्रह

भिर्विश्वकर्मणा विनिर्मितः आयुधश्रेष्ठो वज्रो भविष्यतीति शेषः येनभवान् वृत्रस्यशिरोहर्त्ताहरिष्यति मम
आयुधानि २ तेजसा उपबृंहितः सन् २२ तेजःअस्त्राण्यस्त्राणि च संपदः अभूयः प्राप्स्यथ महाकायास्त्रिभुवनग्रासीस
एवास्मान्हन्यादिति शंकाकुलचित्तान्प्रत्याह मत्परानपिनहिंसंति अतोयुष्माकं भद्रंभवति २३
षष्ठेनवमः दशमेकेशवादिष्टदध्यङ्ङस्थिजवज्रधृक् युध्यतवृत्रेणसासुरणसनिर्जरैः १ २
इंद्रो १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोहमानएवतन्मुखाद्धर्मंश्रोतुकामः प्रत्याचक्षाणइवोवाच। अपीतिद्वाभ्यां हेदारकाः अपिकिंसंस्थायाम
त्यांयोभिद्रोहोदुःखंतन्नजानीथ ३ आत्मोदेहः वयंजानीमएव किंतु श्रीविष्णुरेस्मन्मुखेनयाचतइति त्वंतत्रा
ह। याचेतविष्णवेऽपिदातुंकुतस्सहेत ४ पुण्यश्लोकैरीड्यानिकर्माणियेषां याचकायदिवदन्तहिनयाचेत
चेत यदीश्वरः दानसमर्थश्च तर्हि सोऽपिनेतिनाह अन्नायथातवसंकटेवयंस्वार्थपरानजानीमः एवंप्रत्या

३५ अपिष्टंदारकाश्र्ययंनजानीथशरीरिणां संस्थायांयास्त्वभिद्रोहोदुःसहश्चेतनापहः ३ जिजी
विषूणांजीवानामात्माप्रेष्ठइहस्थितः। कउत्सहेततंदातुंभिक्षमाणायविष्णवे ४ देवानुन्नु
किंनुतत्दुस्त्यजंब्रह्मन्पुंसांभूतानुकंपिनां भवद्विधानांमहतांपुण्यश्लोकेड्यकर्मणां ५ ने
नुस्वार्थपरोलोकोनवेदपरसंकटं यदिवेदनयाचेतनेतिनाहयदीश्वरः ६ धर्मंवः श्रोतु
कामेनयूयंमेप्रत्युदाहृताः एषवः प्रियमात्मानंत्यजंतंसंत्यजाम्यहं ७ योध्रुवेणात्म
नानाथानधर्मंनयशः पुमान् ईहेतभूतदययासशोच्यः स्थावरैरपि ८ एतावानव्ययोधर्मः
पुण्यश्लोकैरुपासितः योभूतशोकहर्षाभ्यामात्माशोचतिहृष्यति ९ अहोदैन्यमहोकष्टं
पारक्यैः क्षणभंगुरैः यन्नोपकुर्यादस्वार्थैर्मर्त्यस्वज्ञातिविग्रहैः १० श्रीराम श्रीराम

अ० षिलवाच४

चक्षाणस्त्वमस्मत्संकटंनजानासीतिभावः ६ मेमयाप्रत्युदाहृताः प्रयुक्ताः मांत्यजंतंत्यक्तायांतंआत्मानंदे
हं ७ अध्रुवेणात्मनादेहेनहेनाथाः ८ भूतानांशोकेनशोचतिहर्षेणहृष्यतियआत्मास्वयंतस्ययोधर्मः एता
वानेवाव्ययइत्यर्थः ९ पारक्यैः श्वशृगालादिभक्ष्यैः अस्वार्थैः आत्मोपयोगशून्यैः स्वचित्तैः ज्ञातयः पुत्रा
दयः विग्रहादेहः तैर्नोपकुर्यादितियत् १० ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग०षष्ठ० कृतंव्यवसितंनिश्चयोयेन आत्मानंक्षेत्रज्ञंसन्नयन्नैक्यंकुर्वन् तनुंजहौ ११ यताअक्षादयोयेन तत्वंपरंपश्यतीतितथाध्वस्ता
निगतानिबंधनानियस्य १२ अथेंद्रः अशोभतेत्युत्तरेणान्वयः मुनेः शक्तिभिः अस्थिभिर्निर्मितं उत्सिक्तः उर्जितः

शुकउवाच एवंकृतव्यवसितोदध्यङ्ङाथर्वणस्तनुं परेभगवतिब्रह्मण्यात्मानंसंनयंजहौ ११ यताक्षा नि१
ह्रू.ध्वस्त२ सुमनोबुद्धिस्तत्वदृग्ध्वस्तबंधनः आस्थितःपरमंयोगंनदेहंबुबुधेगतं १२ अथेंद्रोवज्रमुद्यम्यनिर्मितंविश्वकर्म मा२
लि णामुनेः शक्तिभिरुत्सिक्तोभगवत्तेजसान्वितः १३ वृतोदेवगणैःसर्वैर्गजेंद्रोपर्यशोभत स्तूयमा
नोमुनिगणैस्त्रैलोक्यंहर्षयन्निव १४ वृत्रमभ्यद्रवच्छक्तमसुरानीकयूथपैः पर्यस्तमोजसारा
जन्क्रुद्धोरुद्रइवांतकं १५ ततःसुराणामसुरैरणःपरमदारुणः त्रेतामुखेनर्मदायामभव
त्प्रथमेयुगे १६ रुद्रैर्वसुभिरादित्यैरश्विभ्यांपितृवह्निभिः मरुद्भिरृभुभिःसाध्यैर्विश्वेदेवै
र्मरुत्पतिं १७ दृष्ट्वावज्रधरंशक्रंरोचमानंस्वयाश्रिया नामृष्यन्नसुराराजन्मृधेवृत्रपुरःसराः
१८ नमुचिःशंबरोनर्वाद्विमूर्द्धाऋषभोसुरः हयग्रीवःशंकुशिराविप्रचित्तिरयोमुखः १९
पुलोमावृषपर्वाचप्रहेतिर्हेतिरुत्कलः दैतेयादानवायक्षारक्षांसिचसहस्रशः २० सुमा
मालि२ लिप्रमुखाःकार्तस्वरपरिच्छदाः प्रतिषिध्येंद्रसेनाग्रंमृत्योरपिदुरासदं २१ अभ्यर्दयन्नसं
भ्रांताःसिंहनादेनदुर्मदाः गदाभिःपरिघैर्बाणैःप्रासमुद्गरतोमरैः २२

मुनेःसक्थिभिरितिवापाठः १३ १४ असुरानीकानांयूथपैःपर्यस्तंपरिवृतं रणःसंग्रामः प्रथमेचतुर्युगेत्रेतायुग
समुखेआरंभे १६ नामृष्यन्नासहंत १८ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०५०

शतघ्नीश्च चतुर्हस्तालोहकंटकसंचिता भुशुंडीसर्वतोलोहकंटकानुक्रमोन्नतेत्यभिधानं २३ पुंखोमूलदे
शः एकस्य मूलदेशमनुतस्मिलग्नाः परस्य पुंखोयथाभवतितथा नभस्थेघनैर्ज्योतींषिवत्तैर्नतेषा
तदप्राप्तिः संचिता २४ तामिवाहनतइति शस्त्राणामस्त्राणांचयानिवर्षाणितेषामोघाः तासेदुःनप्रा
पुः सिद्धपथमाकाशं २५ क्षीणान्यस्त्राणिशस्त्राणिचयेषांगिरिशृंगद्रुमैकपक्षेश्च २६ तानिंद्र
सेनिकानुशस्त्राणामस्त्राणांचपुंगैः समूहेरक्षतानूक्षतेशून्यान् स्वस्तिमतः सुखिनःद्रुमादिभि

शूलैः परश्वधैः खड्गैः शतघ्नीभिर्भुशुंडिभिः सर्वतोवाकिरंछस्त्रैरस्त्रैश्चविबुध
र्षभान् २३ नतदृश्यंतसंछन्नाःशरजालैःसमंततः पुंखानुपुंखपतितैर्ज्योतींषिवघन
भोघनैः २४ नतेशस्त्रास्त्रवर्षौघाह्यासेदुःसुरसैनिकान् छिन्नाःसिद्धपथेदेवैर्लघु
हस्तैःसहस्रधा २५ अथक्षीणास्त्रशस्त्रौघागिरिशृंगद्रुमोपलैः अभ्यवर्षन्सुरबलं
चिच्छिदुस्तांश्चपूर्ववत् २६ तानक्षतान्स्वस्तिमतोनिशाम्यशस्त्रास्त्रपूगैरथतेत्रनाथाः
द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरिंद्रसैनिकान् २७ सर्वप्रयासाअभवन्
विमोघाःकृताःकृतादेवगणेषुदैत्यैः कृष्णानुकूलेषुयथामहत्सुक्षुद्रैःप्रयुक्ताऊषतीर्
रूक्षवाचः २८ तेस्वप्रयासंवितथंनिरीक्ष्यहरावभक्ताल्पयुद्धदर्पाः पलायनायाजि

अथ अविक्षतान्निशाम्यदृत्रोनाथोयेषांतेतत्रसुभीताः २७ कृताःकृताःपुनःपुनःकृताःकृष्णाःनुकूलायेषांतेषु
१२ देवगणेषुरूर्षतीःरूषाभ्यःअकल्याणःरूक्षाःपुरुषावाचोयथामहत्सुक्षोभकर्यानभवंतितेहत २८
हतासुद्धदर्पायेषांत्यातःपरैर्गृहीतःसारोधैर्ययेषांते अतिप्रसिद्धाअपिनिंदेत्याएवतेइत्यस्यापोनरुक्त्यं

३६

रोरु

राम
३६

सूक्ष्मप्रतिमनोरथः २९ ... पलायनायाजिमुखाद्विसृष्टं

पलाहरावभ ... मनोरथः पलायनाय ... युद्धात्

प्रधावतः पलायमानान् प्रेक्ष्य आदौ देववती त्रेण भयेन पलायितं भग्नं च तत् हतं सैन्यं तत् च प्रेक्ष्य एतत् वक्ष्यमाणं च भाषे
३० तदेव विशिनष्टि कालोपपन्नां भवसरो चितां मनस्विनां चिरां हे मय हे अनघ नु मेवाचं शृणुत ३१ ततो
मृत्योः इह यशः लोकं स्वर्गं च यदि स्यात् अथ तर्हि अमुं मृत्युं युक्तं समीचीनं प्राप्तवा ३३ ब्रह्मसंधारणया कले
वरं जह्यात् इति यत् स एको मृत्युः वीरशयने भूमौ अनिवृत्तः अपराङ्मुखः मनुजह्यात् इति यत् स चैकः तौ
द्वाविह शास्त्रसंमतौ मृत्यू तथा च स्मृतिः द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ परिव्राड्योगयुक्तो अर
णे चाभिमुखो हतः इति ३४ षष्ठे दशमः एकादशे तु वृत्रस्य युद्ध्यमानस्य वज्रिणा भक्तिज्ञानवर्णनादृकौ स्वित्रा

वृत्रः असुरांस्तान् अनुगान् मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत् पलायितं प्रेक्ष्य बलं च भग्नं भयेन
तीव्रेण विहस्य वीरः ३० कालोपपन्नां रुचिरां मनस्विनां उवाच वाचं पुरुषप्रवीरः हे विप्रचि
त्ते नमुचे पुलोमन् मयानर्वञ्छम्बर मे शृणुध्वं ३१ जातस्य मृत्युर्ध्रुव एष सर्वतः प्रतिक्रिया
यस्य न चेह क्लृप्ता लोको यशश्चाथ ततो यदि ह्यमुं को नाम मृत्युं न वृणीत युक्तं ३२ द्वौ सं
मताविह मृत्यू दुरापौ यद्ब्रह्मसंधारणया जितासुः कलेवरं योगरतो विजह्याद्यदग्र
णीर्वीरशये निवृत्तः ३४ इति श्रीभागवते महापुराणे षष्ठस्कंधे दशमोध्यायः शुक उवा०
त एवं शंसतो धर्मं वचः पत्युश्चमूपतेः नैवागृह्णन्त भयत्रस्ताः पलायनपरा नृप १ वि
शीर्यमाणां पृतनामासुरीमसुरर्षभः कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् २ दृ
ष्ट्वा तप्यत संक्रुद्ध इंद्रशत्रुरमर्षितः तान्निवार्यौजसा राजन् निर्भर्त्स्येदमुवाच ह ३

वाचोनुवर्णिनाः शंसतः कथयतः पत्युर्वचः १ कालानुकूलैः कालानुवर्तिभिः काल्यमानां विद्राव्यमाणां २ अ
मर्षितः असहमानः तांस्त्रिदशान्निवार्य निर्भर्त्स्य इदं वक्ष्यमाणमुवाच ३

व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰१० तदाहद्वाभ्यां मातुरुच्चरितैः पुरीषप्रायैः प्रथमांतपाठे देवानां संबोधनं पृष्ठतो हतैः दैत्यैः किं न किंचिन्न यशो ना
पिधर्मः तदेवाह नहीति ४ प्रधनसंग्रामे सारं धैर्यं हे स्फल्लुकाः स्फारः मात्रलक्षणमात्र अग्रे तिष्ठता न चेद्दिह
लोकभोगस्पृहास्ति सुरगणान् रिपून् सुमहान् प्राणो बलं यस्य येन विचित्तसो बभूवुः ६ वृत्रस्य विस्फोटनेन

किं वः उच्चरितैर्मातुधावद्भिः पृष्ठतो हतैः नहि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनां ४ यदि वः
प्रधने श्रद्धा सारं वा क्षुल्लका हृदि अग्रे तिष्ठत मात्रं मेन चेद्ग्राम्यसुखे स्पृहा ५ एवं सुरगणान् क्रुद्धो
भीषयन् वपुषा रिपून् व्यनदत्सुमहाप्राणो येन लोका विचेतसः ६ तेन देवगणाः सर्वे वृत्रवि
स्फोटनेन वै निपेतुर्मूर्छिता भूमौ यथैवाशनिना हताः ७ ममर्द पद्भ्यां सुरसैन्यमातुरं निमी=
लिताक्षं रणरंगदुर्मदः गां कंपयन्नुद्यतशूलओजसा नालं वनं यूथपतिर्यथोन्मदः ८ विलो
३७ क्य तं वज्रधरोऽत्यमर्षितः स्वशत्रवेऽभिद्रवते महागदां चिक्षेप तामापततीं सुदुःसहां जग्रा
ह वामेन करेण लीलया ९ स इंद्रशत्रुः कुपितो भृशं तया महेंद्रवाहं गदयोरुविक्रमः ज
घान कुंभस्थल उन्नदन्मृधे तत्कर्म सर्वे समपूजयन्नृप १० ऐरावतो वृत्रगदाभिमृष्टो विघू
र्णितोऽद्रिः कुलिशाहतो यथा अपासरद्भिन्नमुखः सहेंद्रो मुंचन्नसृक्सप्तधनुर्भृशार्तः ११
न सन्नवाहाय विषण्णचेतसे प्रायुंक्त भूयः स गदां महात्मा इंद्रोऽमृतस्यंदिकराभिमर्शवीत
व्यथक्षतवाहावतस्थे १२
४समनो॰२ नादेन ७ उद्यतशूलं येन नालं नलानां वनं उन्मत्तो मदो यस्य स यूथपतिर्गजो यथा मर्दयति ८ स सुध रामस॰ ३७
नुः प्रमाणे हेशः ११ सन्नो वाहो यस्य तस्मै न प्रायुंक्त अमृतस्पंदी अमृतस्रावी यः स्वकरः तेनाभिमर्शः स्पर्शस्ते
न वीतव्यथा गत दुःखः क्षतो वाहो यस्य इंद्रस्य तथाभूतः उवतस्थे १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहत्रः हे नृपेंद्र स्त्राहवकाम्यया युद्धाय यावस्थितं भ्रातृहणं भ्रातरं विश्वरूपहंतारं नृशंसं क्रूरं तं देवाहं पापं तस्य क
न२ र्मस्मरन् १३ यो ब्रह्महा ब्राह्मणं हतवान् विशिषं च गुरुं ममच भ्रातरं स भवान् अग्रतः समवस्थितः एतद्दिष्ट्या भद्रं ज्ञात
दिष्ट्येत्यच्यमानं दीर्घाहेऽस्य सत्तम। ममशूलेन निर्भिन्नं दृषत्तुल्यं हतु हृदयं यस्य तेन त्वया निमित्तभूतेन अद्य अ
चिरादेव भ्रातुर्नृणं हे दैत्य एतद्दिष्ट्या १४ स्वर्गकामो यं भवान् श्रेष्ठ भ्रातृ स्वर्गकामो याज्ञिकः पशोरिवेतिवा
१५ तं त्वामस्पृष्टवह्निमदग्धदेहं समदंतिवर्त्तमानसामीप्यवर्त्तमानवन्निर्देशः १६ अन्येपियन्ज्ञाइहत्वा

सतं नृपेंद्राहवकाम्यया रिपुवज्रायुधं भ्रातृहणं विलोक्य स्मरं श्च तत्कर्म नृशंसमंहः शोकेन
मोहेन हसन् जगाद १२ वृत्र उवाच दिष्ट्या भगवान्मे समवस्थितोरिपुर्यो ब्रह्महा गुरुहा भ्रा
तृहा चादिष्ट्याऽनृणोऽद्याहमसत्तम त्वया मच्छूलनिर्भिन्नदृषद्धृदाचिरात् १४ योनोग्रजस्या
त्मविदो द्विजातेर्गुरोरपापस्य च दीक्षितस्य। विश्रभ्य खड्गेन शिरांस्यवृश्चत् पशोरिवाऽकरु
णः स्वर्गकामः १५ श्रीह्रीदयाकीर्त्तिभिरुज्झितं त्वां स्वकर्मणा पुरुषादैश्च गर्ह्यं कृच्छ्रेण मच्छूल
विभिन्नदेहमस्पृष्टवह्निं समदंति गृध्राः १६ अन्येऽनुयेत्वेह नृशंसमज्ञा यदुद्यतास्त्राः प्रहरं
शानत्रि २ ति महं तैर्भूतनाथान् सगणान्निशूलनिर्भिन्नगलैर्यजामि १७ अथो हरे मे कुलिशेन वीर
हर्त्ता प्रमथ्यैव शिरो यदीह तत्रानृणो भूतबलिं विधाय मनस्विनां पादरजः प्रपत्स्ये १८

त्वां नृशंसमनुमुह्य मुद्यतास्त्राः संतो यदि प्रहरंति तैर्भूतनाथान् भैरवादीन् यक्ष्यामि कथं भूतैः निशाततीक्ष्णीकृतं यन्म
मत्रिशूलं तेन निर्भिन्ना गलायेषां तैः १७ अथो अथ वा हे रे भोः इंद्र यदि भवान् एव मम शिरो हर्त्ता हरिष्यति तत्र तथा सति अ
नृणो विमुक्तकर्मबंधः सन् तेभ्यो बलिं देहेन विधाय मनस्विनां पादरजः प्रपत्स्ये धीराणां पदं प्राप्स्यामि १८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प० जीवितादपि मृत्युरेव मम अभिमत इत्याशयेनाह सुरेशेति नहिनोषि न हि क्षिपसि गदेव विफलो यास्यतीति संशयं मा कार्षीः कृपणार्थः प्रयोजनं यस्याः सा याच्ञा यथा निः फला तथा न स्यात् १९ अमोघत्वे हेतुं वदन् तं प्रोत्साहयति नन्विति तेजितस्तीक्ष्णीकृतः शत्रुं मां जहि विष्णुना यंत्रितः प्रेरितः २० हननेन मम पीडा स्यादित्यपि मा संशयिष्टा इत्याह अहमिति संकर्षणो मत्पतिर्यथाह तथा तदीयचरणारविंदे मनः समाधाय मुनेर्योगिनो गतिमहं यास्यामि, तव वज्रस्य रंहसा लुलितः छिन्नो ग्राम्यपाशो विषयभोगलक्षणो यस्य अपविद्धलोकः

सुरेश कस्मान्न हिनोषि वज्रं पुरः स्थिते वैरिणि मय्यमोघं मा संशयिष्ठा न गदेव वज्रः स्यान्नि-
ष्फलः कृपणार्थेव याच्ञा १९ नन्वेष वज्रस्तव शक्र तेजसा हरेर्दधीचेस्तपसा च तेजितः
३८ तेनैव शत्रुं जहि विष्णुयंत्रितो यतो हरिर्विजयः श्रीर्गुणास्ततः २० अहं समाधाय मनो य-
१८ थाह संकर्षणस्तच्चरणारविंदे त्वद्वज्ररंहोलुलितग्राम्यपाशो गतिं मुनेर्याम्यपविद्धलो-
कः २१ पुंसां किलैकांतधियां स्वकानां याः संपदो दिवि भूमौ रसायां न राति यद्द्वेष उद्वेग आ- उदे३
धिर्मदः कलिर्व्यसनं संप्रयासः २२ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य श-
क्र ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिंचनगोचरोऽन्यैः २३ श्रीराम श्रीराम श्री

त्यक्तदेहः २१ तर्हि भगवान् संकर्षणः स्वभक्ताय मह्यमेव स्वर्गादिसंपदो दास्यतीत्यपि मा संशयिष्टा इत्याह पुंसा- राम
मिति स्वर्गभूमौ रसातले च याः संपदस्ताः किल निश्चितं न राति न ददाति तत्र हेतुः यत् याभ्यो द्वेषादयो भ- ३८
वंति २२ तर्हि स्वभक्तस्य किं विधत्ते तत्राह त्रैवर्गिको धर्मार्थकामविषयो य आयासस्तस्य विघातं विधत्ते
तत आयासोपरमात् अनुमेयः न त्वैश्वर्यादिना अतः सम्यक् भगवत्प्रसादाभावात् संपदो न विपत्तीति

वी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमिंद्रायस्वामिप्रायंनिवेद्यभगवंतंप्रार्थयते अहमितितवपादावेवएकेमूलमाश्रयोयेषांतेषांदासानाम
नुदासः भूयोभवितास्मि विघ्नाभिभवंय असुपतेः प्राणनाथस्यत्तवगुणान्ममममनःस्मरतु वागपि
२२ तानेवकीर्त्तयतुकायस्तेवववकर्मकरोतु २४ ननुकिंदास्येतुभ्यंमहाफलानिदास्यामितत्राह नाकपृ
ष्ठंध्रुवपदं ब्रह्मलोकादिकंच हेसमंजसनिखिलसौभाग्यनिधेत्वात्वांविरहय्यपृथक्कृत्येत्यनकां

अहंहरेतवपादैकमूलदासानुदासोभवितास्मिभूयः मनःस्मरेतासुपतेर्गुणांस्ते
गृणीतवाक्कर्मकरोतुकायः २४ ननाकपृष्ठंनचपारमेष्ठ्यंनसार्वभौमंनरसाधिप
त्यं नयोगसिद्धीरपुनर्भवंवासमंजसत्वाविरहय्यकांक्षे २५ अजातपक्षाइवमा
तरंखगाःस्तन्यंयथावत्सतराःक्षुधार्त्ताः प्रियंप्रियेवव्युषितंविषण्णामनोरविंद
क्षदिदृक्षतेत्वां २६ ममोत्तमश्लोकजनेषुसख्यंसंसारचक्रेभ्रमतःस्वकर्मभिः त्व
न्मायया त्मात्मजदारगेहेष्वासक्तचित्तस्यननाथभूयात् २७ इतिश्रीभागवतेमहापु
राणेषष्ठस्कंधेएकादशोध्यायः

क्षेनेच्छामि २५ तर्हिकिमिच्छसितत्राह अजातपक्षाःखगाःधृकादिभिःपीडितायथामातरंयथास्वदाम्ना
बद्धाःबालवत्साःस्तन्यंयथाचव्युषितंदूरदेशंगतंप्रियंकामेन विषण्णाप्रियायथामेमनस्तापत्रयपी
डितंकर्मभिर्वद्धंचकामादिभिर्विषण्णंचत्वांदिदृक्षतेद्रष्टुमिच्छतीत्यर्थः २६ उत्तमश्लोकस्यतवज
नेषुभक्तेष्वेवसख्यंभूयात् त्वन्माययादेहादिष्वासक्तचित्तस्यभूयोपितेष्वासक्तिर्नभूयात् २७ षष्ठ

टीकायां ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० हाहेशे तिविषणेनस्वयमुत्साहितेनतु महेंद्रेणमहायुद्धेवृत्रस्यवध ईर्यते १ महापुरुषंश्रीविष्णुंअसुर
त्वयोरके १ युगांताग्निवत् कठोराजिह्वाशिखायस्यतत् आविध्यभ्रामयित्वा २ ततःखेआपतत् आगच्छ
त् आगच्छत् विचलत्परिभ्रमत् यह अउल्कानुग्रहोल्केवतत् दुःप्रेक्ष्यंशतंपर्वाणियस्यतेनउर
गराजोवासुकिः तस्यभोगोदेहस्तदाकारं ३ हनौकपोलप्रांतेअमरेभैरावतंच ४ ५ पुनश्चतमाहव

आषिरुवाच एवंजिह्वासुर्न्वपेदह्मांजोभृत्सुवरं विजयान्मन्यमानः शूलंप्रगृह्याभ्यपतत्
सुरेंद्रयथामहापुरुषेकैटभासुः १ ततोयुगांताग्निकठोरजिह्वमाविध्यशूलंतरसासुरेंद्रः
क्षिप्त्वामहेंद्रायविनद्यवीरोहतोसिपापेतिरुषाजगाद २ खआपततद्विचलद्ग्रहोल्केव
न्निरीक्ष्यदुःप्रेक्ष्यमजातविक्लवः वज्रेणवज्रीशतपर्वणाछिनद्भुजंचतस्योरगराजभो
गं ३ छिन्नैकबाहुःपरिघेणवृत्रःसंरब्धआसाद्यगृहीतवज्रं हनौततोडिंद्रमथामरेभं
वज्रंचहस्तान्न्यपतन्मघोनः ४ वृत्रस्यकर्मातिमहाद्भुतंतत्सुरासुराश्चारणसिद्धसंघाः
अपूजयंस्तत्पुरुहूतसंकटंनिरीक्ष्यहाहेतिविचुक्रुशुर्भृशं ५ इंद्रोनवज्रंजगृहेविल
जितश्च्युतंस्वहस्तादरिसंनिधौपुनः तमाहवृत्रोहरआत्तवज्रोजहिस्वशत्रुंनविषादे
कालः ६ युयुत्सतांकुत्रचिदाततायिनांजयः सदैकत्रनचैवपरात्मनां विनैवमुत्पत्ति
लयस्थितीश्वरंसर्वज्ञमाद्यंपुरुषंसनातनं ७ लोकाःसपालायस्यमेश्वसंतिविवशावशे

३६ त्रोहहेरइंद्र ६ सदाजयोनैवकिंतुकुत्रचिज्जयः एकत्रकुत्रचिन्नैवयस्मात्कुत्रचिदपियुयुत्सतांसदाजयोनैव
किंवैकदाचिदेवेत्यर्थः परोदेह आत्मायेषांपराधीनात्मनामितियावत् आद्यमनादिंसनातनंनित्यं ७ परा
वै०२ धीनत्वमेवाहलोकाइतिसप्तभिः यस्यवशास्थिताः स्वयंविवशाःसंतःश्वसंतिचेष्टंते द्विजाःशिवाजालेन

जयः एकत्रकुत्रचित् पक्षिणः

कालकालयत्तिमिभगवानद्दहजयाति कारण ३९

राम ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्जज आदिरूपं कालं तं हेतुमज्ञाय अविज्ञाय जडं सत्तमात्मानं देहं हेतुं मन्यते ९ १० ननु स्वारंभकप्रधानपुरुषादि
तंत्राणीति युक्तं तत्राह पुरुष इति व्यक्तं महत्तत्वं आत्मा अहंकारः ११ ननु स्वकर्मद्वारा जीव एव सृष्ट्यादिहेतुरि
ति मीमांसका मन्यंते तत्राह एवमविद्वान् अनीशमेवात्मानमीश्वरं स्वतंत्रं मन्यते ननु पित्रादयस्त्रष्टारो दृश्यं
ते व्याघ्रादयस्त्संहर्तारस्तत्राह भूतैरिति स्वयं ईश्वरः १२ ननु त्वया पराजितस्य मम जयादिशंकैव नास्ति किमि

ॐ जः सहो बलं प्राणममृतं मृत्युमेव च तमज्ञाय जनो हेतुमात्मानं मन्यते जडं ९ यथा दारुमयी ना
री यथा यंत्रमयो मृगः एवं भूतानि मघवन्नीशतंत्राणि विद्धि भो ११ पुरुषः प्रकृतिर्व्यक्तमात्मा भूतेंद्रि
याशयाः शक्नुवंत्यस्य सर्गादौ न विना यदनुग्रहात् ११ अविद्वानेवमात्मानं मन्यतेऽनीशमीश्वरं भू
तैः सृजति भूतानि ग्रसते तानि तैः स्वयं १२ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्य याः भवंत्येव
हि तत्काले यथानिच्छोर्विपर्ययाः १३ तस्मादकीर्तियशसोर्जयापजययोरपि समः स्यात्सुखदुः
खाभ्यां मृत्युजीवितयोस्तथा १४ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः तत्र साक्षिणमात्मानं
यो वेद स न बध्यते १५ पश्य मां निर्जितं शत्रो वृक्णायुधभुजं मृधे घटमानं यथाशक्ति तव प्राण
जिहीर्षया १६ प्राणग्लहोऽयं समर इष्वक्षो वाहनासनः अत्र न ज्ञायतेऽमुष्य जयोऽमुष्य पराज
यः १७

ति मां बलात् युद्धे प्रवर्तयसि तत्राह आयुरिति तत्काले जयादिकाले विपर्ययाः अकीर्त्यादयः १३ यस्मादेवं सर्व
मीश्वराधीनं तस्मात्समः स्यात् हर्षविषादहीनो भवेत् १४ समदृष्टावुपायमाह सत्वमिति हर्षादिभिर्न बध्यते १५
हर्षविषादनिवृत्त्यै तवाहमेव गुरुरित्याह पश्येति वृक्णमायुधं भुजश्च यस्य १६ अनियतत्वं द्यूतरूपकेणाह समर

भा०४० गतालीकं निःकपटं १८ भक्तः सेवितवानसि १९ २१ नस्यनव स्वातकोदके। गर्त्तादित्युल्लोपेमे। स्वर्गादिभिः
किं २२ युद्धानां संग्रामाणां पतीमुख्यो २३ हे मारिष श्रेष्ठ राजन् २५ उत्कृत्तं मूलं ययोस्ताभ्यां रक्तं स्रवतीति
तथा गात्रं पर्वतः २६ कृत्वा धरामित्यादे जेयासंतितत्तीयेनान्वयः नभोवक्त्रं भीरिण वक्त्रेणलेलिह १८

श्रीशुक उ॰ इंद्रस्तत्रवचः श्रुत्वा गतालीकमपूजयत् गृहीतवज्रः प्रहसंस्तमाह गतविस्मयः १९
अहो दानव सिद्धोसि यस्य ते मतिरीदृशी भक्तः सर्वात्मनात्मानं सुहृदं जगदीश्वरं १९ भवानता
र्षीन्मायांवैवैष्णवीं जनमोहिनीं यद्विहायासुरं भावं महापुरुषतां गतः २० खल्विदं महदाश्च
र्यं यद्रजः प्रकृतेस्तव वासुदेवे भगवति सत्वात्मनि दृढामतिः २१ यस्य भक्तिर्भगवति हरौ निःश्रेय
सेश्वरे विक्रीडतोमृताम्भोधौ किं क्षुद्रैः खातकोदकैः २२ श्रीशुक उवाच इति ब्रुवाणावन्योन्यं
धर्मजिज्ञासया नृप युयुधाते महावीर्याविंद्रवृत्रौ युधांपती २३ आविध्य परिघं वृत्रः का
र्ष्णायसमरिंदमः इंद्राय प्राहिणोद्घोरं वामहस्तेन मारिष २४ स तु वृत्रस्य परिघं करं च कर
भोपमं चिच्छेद युगपद्देवो वज्रेण शतपर्वणा २५ दोर्भ्यामुत्कृत्तमूलाभ्यां बभौ रक्तस्रवोसुरः
छिन्नपक्षो यथा गोत्रः खाद्भ्रष्टो वज्रिणा हतः २६ कृत्वाधरां हनुं भूमौ दैत्यो दिव्युत्तरां हनुं
नभोगंभीरवक्त्रेण लेलिहोल्बणजिह्वया २७ दंष्ट्राभिः कालकल्पाभिर्ग्रसन्निव जग
त्त्रयं अतिमात्रमहाकाय आक्षिपन् तरसा गिरीन् २८ गिरिराट् पादचारीव पद्भ्यां निर्जर
४१ यन्महीं जग्रास स समासाद्य वज्रिणं सहवाहनं २९ महाप्राणो महावीर्यो महासर्प इव द्विपं
वृत्रग्रस्तं तमालक्ष्य सप्रजापतयः सुराः ३० हा कष्टमिति निर्विण्णाश्चुक्रुशुः समहर्षयः

गिरीन् १ सर्पः तद्वत् उल्बणया जिह्वया २७ कालकल्पाभिः ग्रसन् चालयन् २८ निर्जरयन् चूर्णयन् २९ महाप्राणो महाब

४० ४०

राम ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पु कृतं २

महापुरुषेणाकवचनरूपेण श्रीनारायणेन सन्नद्धो दंशितः योगबलेन मायाबलेन च ३२ बलभित् इंद्रः उच्चकर्त्त
विरेव ३४ तस्य कंधरं आशुवेग अतिवेगवान् ज्योतिषां सूर्यादीनां अयनेन दक्षिणोत्तरगतिरूपसंवत्सरयोः
हर्गणः षष्ठ्युत्तरशतत्रयात्मकः तावताहर्गणेन वार्त्रहत्यवृत्रहत्यायोग्ये काले न्यपातयत् यद्वा स्वार्थे तद्धितः

महापुरुषसन्नद्धो योगमायाबलेन च ३२ भित्वा वज्रेण तत्कुक्षिं निष्क्रम्य बलभित् विभुः उच्चकर्त्त शिरः
शत्रोर्गिरिशृंगमिवौजसा ३३ वज्रस्तु तत्कंधरमाशुवेगः कृतन्समंतात्परिवर्त्तमानः न्यपातयत्ता
वदहर्गणेन यो ज्योतिषामयनेन वार्त्रहत्ये ३४ तदा च खे दुंदुभयो विनेदुर्गंधर्वसिद्धाः समहर्षि
संघाः वार्त्रघ्नलिंगैस्तमभिष्टुवाना मंत्रैर्मुदा कुसुमैरभ्यवर्षन् ३५ वृत्रस्य देहान्निःक्रांतमा
त्मज्योतिररिंदम पश्यतां सर्वलोकानामलोकं समपद्यत ३६ इति श्रीभागवते महापुरा
णे षष्ठस्कंधे वृत्रवधो नाम द्वादशोऽध्यायः . श्रीशुक॰ वृत्रे हते त्रयो लोका विना शक्रेण
भूरिद सपाला ह्यभवन् सद्यो विज्वरा निर्वृतेंद्रियाः १ देवर्षिपितृभूतानि दैत्या देवानुगाः
स्वयं प्रतिजग्मुः स्वधिष्ण्यानि ब्रह्मेशेंद्रादयस्ततः २ राजोवाच इंद्रस्यानिर्वृतेर्हेतुं श्रोतुमि
च्छामि भो मुने येनासन् सुखिनो देवा हरेर्दुःखं कुतोऽभवत् ३

वृत्रहत्यायां वृत्रहननार्थं परिवर्त्तमान इत्यर्थः ३४ वार्त्रघ्नलिंगैर्मंत्रैः वृत्रहंतुर्वीर्यप्रकाशकैः वार्त्रहत्या
यशवसेप्रत्तनाषासायवत्योधस्तामिंद्रमभिष्टुवानाः अभिष्टुवंतः ३५ अलोकं लोकातीतं भगवंतं २६
षष्ठो द्वादशः त्रयोदशे तु वृत्रस्य ब्रह्महत्यामहाभयात् चिरं नष्टो वितः शक्रो विष्णुनेति निरूप्यते १ अ
निर्वृतः शक्रेण सह स्वास्वयमेव प्रतिजग्मुः २ वार्त्रहत्यायाः इंद्रेण तत्सर्वमयं पश्यद्धिति श्रुतिः प्रथमगाय
त्रीत्रिष्टुभो इंद्रो वृत्रहा देवता वार्त्रहत्याय वृत्रो यन शवसा बलेन हन्यतेऽत्र वार्त्रहत्यं शवसे सर्व वार्त्रहत्या

प्रथमसमाप्तनोपाख्यानाः मरणमाः त्यत
शवसा श्रीभिमुखेन यत्नासहबलवत्सेप्ततनामहायामरहत्ति
भिनार्थः ईदृशो श्रावत्स्रीयामासिन्वयामः महद्धा ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पु० तस्य हरेरिंद्रस्य दुःखे हेतुं वक्तुं प्रस्तावकथामाह वृत्रविक्रमेत्यादिना अर्थयन् प्रार्थयंत वृत्रहत्यैव धातू ब्राह्मणवधाक्री
तः सन् ४ एनः पापं विभक्तं विभज्य गृहाण मां इर्मिशो धयामि ५ ॥ वृषाकपिमिंद्रं १० तयादिवादिभिः कारितयास्मि

शुक उ॰ वृत्रविक्रमसंविग्नाः सर्वे देवाः सहर्षिभिः तद्वधाय प्रार्थयन्निंद्रं नैच्छद्भीतो वृहद्व्रतान् ४ इंद्र उवाच ॥
स्त्रीभूजलद्रुमैरेनो विश्वरूपवधोद्भवं विभक्तमनुगृह्णन् क्लिष्ट्वा हन्यां कमाद्ध्यहं ५ शुक उ॰ ऋषयस्त
दुपाकर्ण्य महेंद्रमिदमब्रुवन् याजयिष्याम भद्रं ते हयमेधेन मा स्म भैः ६ हयमेधेन पुरुषं परमात्मान
मीश्वरं इष्ट्वा नारायणं देवं मोक्ष्यसेपि जगद्वधात् ७ ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाघवान् ॥
श्वादः पुल्कसको वापि शुध्येरन् यस्य कीर्तनात् ८ तमश्वमेधेन महामखेन श्रद्धान्वितोस्माभि
४१ रनुष्ठितेन हत्वापि सब्रह्मचराचरं त्वं न लिप्यसे किं खलनिग्रहेण ९ शुक उ॰ एवं संचोदि
तो विप्रैर्मरुत्वानहनद्रिपुं ब्रह्महत्या हते तस्मिन्नाससाद वृषाकपिं १० तयेंद्रः स्मासहत्तापं नि
र्वृतिर्नामुमाविशत् ह्रीमंतं वाच्यतां प्राप्तं सुखयंत्यपि नो गुणाः ११ तां ददर्शानुधावंतीं चां
डालीमिव रूपिणीं जरया वेपमानांगीं यक्ष्मग्रस्तामसृक्पटां १२ विकीर्य पलितान् केशांस्ति
ष्ठ तिष्ठेति भाषिणीं मीनगंध्यसुगंधेन कुर्वतीं मार्गदूषणां १३ नभो गतो दिशः सर्वाः सहस्रा
क्षो विशांपते प्रागुदीचीं दिशं तूर्णं प्रविष्टो नृप मानसं १४ श्रीराम श्रीराम श्रीराम श्रीरा

स०१ त्यवधारणे इंद्र एवतापमसहत् ना ॥ पः अमुमिंद्रं निर्वृतिर्नाविशत् ननु धैर्यादिगुणयुक्तस्य कुतो निर्वृतिः तत्राह व १(?) राम ४१
ह्रीमंतं वाच्यतां निंद्यतां ११ यक्ष्मग्रस्तां क्षय रोगव्याप्तां १(२) मीनस्येव गंधो यस्य स मीनगंधिः स चासौ असु श्व
श्वासवायुस्तस्य गंधेन १३ प्रागुदीचीं दिशं गतः सन् तूर्णं मानसं सर ॥ १४

असहत १   ऊधिराक्लवस्त्रां २   प्रविष्टः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नअरं २

सइंद्रः सहस्त्रवर्षाणिपुष्करनालस्यतंतूनावसत् कथंभूतं नलब्धोभोगोयेनसः कुतः यत् यस्मात् इह जलेव
सत् अग्निदूतः अस्वयं अग्नेः अस्वदूतस्यहविर्भागोन्नानुजलप्रवेशासंभावादलब्धभोगइत्यर्थः पाठां
तरेनलब्धोयेनभोगायेनसः १५ त्रिणाकेंद्रः स्वयस्मिन्त्रितिनाकः पुण्यलोकः तृतीयेनाके स्वर्गेननु
मनुष्यस्यकुतः स्वर्गराज्यंतत्राह विद्यादिभिरनुभावः स्वर्गपालनसामर्थ्यंयस्यसः तर्हितस्मिन्
सतिकथमिंद्रस्यपुनः स्वर्गप्राप्तिस्तत्राह सनहुषः संपदैश्वर्याभ्यांयोमदस्तेना धाब्बुद्धिर्यस्यसः
इंद्रपत्न्याशच्यातिरश्वांगतिसर्पयोनिंनीतः उ पायेनप्रापितः एवंव्याख्यायते नहुषः किलकदा

सञ्चावसत्पुष्करनालतंतून् अलब्धभोगायदिहाग्निदूतः वर्षाणिसाहस्रमलक्षितोंतः
सचिंयन्ब्रह्मवधात्विमोक्षं १५ तावत्रिणाकंनहुषः शशासविद्यातपोयोगवलानु
भावः ससंपदैश्वर्यमदांदधबुद्धिर्नीतस्तिरश्वांगतिमिंद्रपत्न्या १६ ततोगतोब्रह्म
गिरापहूतऋतंभरध्याननिवारिताघः पापस्त्वदिग्देवतयाहृतौजास्तंनाभ्यभूदेभि
तेविष्णुपत्न्या

चिदिंद्राणीमुवाच इंद्रस्तावदहंअतस्त्वंमांभजेति तयाचाविदितवृत्तांतावृहस्पतिस्ता मुवाचाब्राह्म
णवाह्यशिविकामारुह्यागंतव्यांभजिष्यामीतिब्रूहि ततोसौब्रह्मशापात्पतिष्यतीति तयावितथोक्तौ
नहुषोगस्त्यादीन्शिविकांवाहयामास तदावशीध्रुसर्पसर्पेत्यगस्त्यपदापस्पर्शेतेनकुपितेनसर्पो
भवेतिशप्तोमहासर्पः अजगरः अभूदिति १६ ततः इंद्रः स्वर्गंगतः प्राप्तः कथंभूतः ब्रह्मगिराब्राह्मणवा
क्येनापहूतः सन्ऋतंभरः सत्यपालकोहरिः तस्यध्यानेननिवारितमघंयेनप्राक् अपितुपायोब्रह्म

वधस्त्वमिंद्रनाम्न्यभूत्तस्यापि भवनाकोरागत्कुतः दिग्देवतयाप्रा
गुदीच्यां दिशि स्थितया श्रीरुद्राणा अवितत्राक्षितं संतं १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा १

भा० षष्ठ पुरुषस्य हरेराराधनं यस्मिंस्तेन १८ सर्वदेवमय आत्मा मूर्त्तिर्यस्य तस्मिन् वेदमयात्मनीति वा पाठः ब्रह्मवादिभि
र्वितते।नुष्ठिते अश्वमेधे महेंद्रेणाज्यमाने पुरुषे सति १९ तेनैव पुरुषेणैव शून्याय नीतः नाशित इत्यर्थः २०
अधिष्ठातायज्ञायनं तं २१ पाठादिविधातुमाख्यानं स्तौति इदमिति प्रक्षाल्यतेनेनेति प्रक्षालनं तीर्थपद

तं च ब्रह्मर्षयोभ्येत्य हयमेधेन भारत यथावद्दीक्षयां चक्रुः पुरुषाराधनेन ह १८ अथेज्य
माने पुरुषे सर्ववेदमयात्मनि अश्वमेधे महेंद्रेण वितते ब्रह्मवादिभिः १९ स वै त्वाष्ट्रवधो
भूयानपि पापचयो नृप नीतस्तेनैव शून्याय नीहार इव भानुना २० स वाजिमेधेन यथो
४२ दितेन वितायमानेन मरीचिमिश्रैः इष्ट्वाधियज्ञं पुरुषं पुराणमिंद्रो महानास विधूतपापः
२१ इदं महाख्यानमशेषपाप्मनां प्रक्षालनं तीर्थपदानुकीर्त्तनं भक्त्युच्छ्रयं भक्तजनानुवर्ण
नं महेंद्रमोक्षं विजयं मरुत्वतः २२ पठेयुराख्यानमिदं सदा बुधाः शृण्वन्त्यथो पर्वणि पर्वणी
५८ द्रियं धन्यं यशस्यं निखिलाघमोचनं रिपुंजयं स्वस्त्ययनं तथायुषं २३ इति श्रीभागवते म
हापुराणे षष्ठस्कंधे इंद्रविजयो नाम त्रयोदशोऽध्यायः १३

पदस्यानुकीर्त्तनं यस्मिन् भक्तेरुच्छ्रयो यस्मिन् भक्तजनानामनुवर्णनं यस्मिन् महेंद्रस्य मोक्षो यस्मिन् मरु राम
त्वतो विशेषेण जयो यस्मिन् २२ इंद्रियं तत्पाठं चकार इंद्रसंबंधी शिवा आयुषं आयुष्यं २३ षष्ठे त्रयोदशः १ ४२
वृत्रस्य ज्ञानभक्त्यादि श्रुत्वा पृष्टः परीक्षिता हेतुमाह चतुर्भिस्तत्प्राग्जन्मचरितैः कैश्चिभिः १ चतुर्दशे तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री १

रजश्चतमश्च स्वभावोयस्य १ २ भक्तेर्दुर्लभत्वंप्रपंचयतित्रिभिः पार्थिवैरजोभिः परमाणुभिः समाः संख्याताः अनं
ताइत्यर्थः जंतवोजीवाः तेषांमध्येयेकेचनेकतिपयश्रेयोधर्मंमीहंतेकुर्वंति ३ मुच्येतगृहादिसंगाद्विमुच्यतेतसि
ध्यतितत्त्वंजानाति ४ ६ नेन्द्रभियात्कृष्णंशरणंगतइत्याहपौरुषेणेति ७ ८ यथायथावच्छृणु ९ १० भार्या

परीक्षितउवाच रजस्तमःस्वभावस्यब्रह्मन्वृत्रस्यपाप्मनः नारायणेभगवतिकथमासीद्दृढामतिः १
देवानांशुद्धसत्वानामृषीणांचामलात्मनां भक्तिर्मुकुंदचरणेनप्रायेणोपजायते २ रजोभिःसमसं
ख्याताःपार्थिवैरिहजंतवः तेषांयेकेचनेहंतेश्रेयोवैमनुजादयः ३ प्रायोमुमुक्षवस्तेषांकेचनैव
द्विजोत्तम मुमुक्षूणांसहस्रेषुकश्चिन्मुच्येतसिध्यति ४ मुक्तानामपिसिद्धानांनारायणपरायणः
सुदुर्लभःप्रशांतात्माकोटिष्वपिमहामुने ५ वृत्रस्तुसकथंपापःसर्वलोकोपतापनः इत्थंदृढमतिः
कृष्णआसीत्संग्रामउल्बणे ६ अत्रनःसंशयोभूयान्श्रोतुंकौतूहलंप्रभोयःपौरुषेणसमरेस
हस्राक्षमतोषयत् ७ सूतउ० परीक्षितोथसंप्रश्नंभगवान्बादरायणिः निशम्यश्रद्दधानस्यप्र
तिनंद्यवचोब्रवीत् ८ शुकउ० शृणुष्वावहितोराजन्इतिहासमिमंयथा श्रुतंद्वैपायनमुखा
न्नारदाद्देवलादपि ९ आसीद्राजासार्वभौमःशूरसेनषुवैनृप चित्रकेतुरितिख्यातोयस्यासी
त्कामधुग्मही १० तस्यभार्यासहस्राणांसहस्राणिदशाभवन् सांतानिकश्चापिनृपोनलेभेतासु
संततिं ११ रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः संपन्नस्यगुणैःसर्वैश्चिंतावंध्यापतेर
भूत् १२

सहस्राणांदशसहस्राणिकोटिरित्यर्थः सांतानिकःस्वयंसंतानार्होऽपिपुत्रोत्पादनसमर्थोपितासुसंततिं
नलेभेसर्वास्तावंध्याएवदैवयोगेनमिलिताइतिभावः ११ तदेवाहवंध्यापतेरिति १२ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०४४ उपासीदत् तस्यसमीपंउपविवेश समाहितः संयतः १५ १६ अपिकिं अनामयमारोग्यंस्वस्तिशुभं प्र
कृत्यधीनमेवहि राज्यमिति सद्दृष्टान्तमाह यथामहदाद्याभिः सप्तभिः प्रकृतिभिः पुमान् जीवोनि
त्यंगुप्तोभवति नतुतद्व्यतिरेकेणक्षणमपितिष्ठति तथाराजापिसप्तभिः स्वाम्यमात्यौजनपददुर्ग
द्रविणसंचयाः दंडोमित्रंचतस्येताः सप्तप्रकृतयोमताइत्युक्तलक्षणाभिर्नित्यंगुप्तःसन् १७ आ

ननस्यसंपदः सर्वामहिष्योवामलोचनाः सार्वभौमस्यपृच्छ्रेयमभवन्प्रीतिहेतवः १३ त
स्येकदानुभवनमंगिराभगवानृषिः लोकाननुचरन्नेतानुपागच्छद्यदृच्छया १४ तंपूजयि
त्वाविधिवत्प्रत्युत्थानार्हणादिभिः कृतातिथ्यमुपासीदत्सुखासीनंसमाहितः १५

नंसमाहितः १५ महर्षिस्तमुपासीनंप्रश्रयावनतंक्षितौ प्रतिपूज्यमहाराजंसमाभा
ष्येदमब्रवीत् १६ अंगिराउवाच अपितेनामयंस्वस्तिप्रकृतीनांतथात्मनः यथाप्रकृ
तिभिर्गुप्तःपुमान्राजाचसप्तभिः १७ आत्मानंप्रकृतिष्वद्धानिधायश्रेयआप्नुयात् रा
ज्ञातथाप्रकृतयोनरदेवाहिताधयः १८ अपिदाराःप्रजामात्याभृत्याःश्रेण्योऽथमंत्रि
णः पौराजानपदाभूयाआत्मजावशवर्त्तिनः १९

त्मानंप्रकृतिषुअद्धासाक्षान्निधायतदनुवर्त्तिनंकृत्वाश्रेयोराज्यसुखंप्राप्नुयादित्यर्थः स्वामीगुरुः स्वयं
वामंत्रसहायोमित्रंकर्मसहायोऽमात्यइतिभेदः प्रकृतीनांचसुखंराजाधीनमेवत्याहनरदेवतथा" हरे राम
प्रकृतयोऽपिराज्ञाआहिताधयः निहितानिक्षिप्ताः धनेः समृद्धाभवंति पाठांतरे आसमंततोहिताध ४३
योनिरस्तमनोदुःखाभवंतीत्यर्थः अमात्याअश्रेण्यअसमयेविशेषणसंघशावर्त्तमानाःवणिकुप्रभृत
यः पौराःपुरवासिनःजानपदाःतत्तद्देशाधिकारिणः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवमनः स्ववशेवानवेत्यर्थात् पृच्छति यस्यात्मामनः अनुवशः अनुवर्तीअधीनः स्यात्तुतस्यवशगाइमेसर्वेभवं
ति किंचलोकाश्चतस्यवलियच्छंति २० आत्माभवानुआत्मनानप्रीयतेनमुष्यति तत्किंपरत्तोवास्वतोवाअ
लब्ध कामत्वालक्ष्ये २१ विदुषासर्वज्ञेनापि २२ अलब्धकामत्वंकथयन्पुत्रंयाचते भगवन्निति चतुर्भिः २३ ४

यस्यात्मानुवशश्चेत्स्यात्सर्वेतद्वशगाइमे लोकाःसपालायच्छंतिसर्वेबलिमतंद्रिताः २० आत्मनः
प्रीयतेनात्मापरतःस्वतएवा लक्षयेऽलब्धकामंत्वांचिंतयाशबलंमुखं २१ एवंविकल्पितोराज २२
न्विदुषामुनिनापिसः प्रश्रयावनतोऽप्याह प्रजाकामस्ततोमुनिं २२ चित्रकेतुरुवाच भगव
न्किंनविदितंतपोज्ञानसमाधिभिः योगिनांध्वस्तपापानांबहिरंतःशरीरिषु २३ तथापिपृच्छतो
ब्रूयांब्रह्मन्नात्मनिचिंतितं भवंतोविदुषश्चापिचोदितस्त्वदनुज्ञया २४ लोकपालैरपिप्रार्थ्याः
साम्राज्यैश्वर्यसंपदः ननंदयंत्यप्रजंमांक्षुत्तृट्कामभिवापरे २५ ततःपाहिमहाभाग
वैःसहगतंतमः यथातरेमदुस्तारंप्रजयातद्विधेहिनः २६ श्रीशुकउवाच इत्यर्थितःसभ विभुः २
गवान्कृपालुर्ब्रह्मणःसुतः श्रपयित्वाचरुंत्वाष्ट्रंत्वष्टारमयजद्विभुः २७ ज्येष्ठाश्रेष्ठाचयाराज्ञो
महिषीणांचभारत नाम्नाकृतद्युतिस्तस्यैयज्ञोच्छिष्टमदाद्द्विजः २८ अथाहनृपतिंराजन्
भवितैकस्तवात्मजः हर्षशोकप्रदस्तुभ्यमितिब्रह्मसुतोययौ २९

अप्रजमपुत्रं क्षुत्तृट्क्षामन्नपानकामं अपरेस्त्रक्चंदनादयोयथानसुखयंति २५ पूर्वैःपित्रादिभिःसहगतं
प्राप्तंतमः नरकंप्रजयायथात्तरेमतथाविधेहि २६ २७ यज्ञोच्छिष्टंयज्ञशेषं २८ जन्मनाहर्षंमरणेनचशोकं
प्रदास्यतीतितथा इतिएवमुक्त्वाययौ २९ ३०
७१

शूरसेनानामीशस्यतेजसावीर्येणयोगर्भः सववृधे ३१ जातकंजातकर्म ३३ अर्बुदंदशकोट्यः वेदेनुकोटिरेवार्बुदं नियु
तंचाप्रयुतंचार्बुदंचेतिप्रयुतानंतरनिर्देशात् ३४ धन्यंधनकरं आयुष्यंआयुःकरं ३५ ३६ मोहस्यसमुद्भवायस्मिन्

सापितत्प्राशनादेवचित्रकेतोरधारयत् गर्भंकृत्तिकाग्निर्देवीकृत्तिकाग्निरिवात्मजं ३१ तस्याअनुदिनं
गर्भः शुक्लपक्षइवोडुपः ववृधेशूरसेनेशतेजसाशनैर्नृप ३१ अथकालउपावृत्तेकुमारः समजाय
त जनयन्शूरसेनानांशृण्वतांपरमांमुदं ३२ हृष्टोराजाकुमारस्यस्नातः शुचिरलंकृतः वाचयि
त्वाशिषोविप्रैः कारयामासजातकं ३३ ववर्षकाममन्येषांपर्जन्यइवदेहिनां धन्यंयशस्यमायु
ष्यंकुमारस्यमहामनाः ३५ कृच्छ्रलब्धेऽथराजर्षेस्तनयेनुदिनंपितुः यथानिःस्वस्यकृच्छ्राप्त
धनेस्नेहोऽन्ववर्द्धत ३६ मातुस्त्वतितरांपुत्रेस्नेहोमोहसमुद्भवः कृतद्युतेः सपत्नीनांप्रजा
कामज्वरोभवत् ३७ चित्रकेतोरतिप्रीतिर्यथादारेप्रजावति नतथान्येषुसंजज्ञेबालंलाल
यतोऽन्वहं ३८ ताःपर्यतप्यन्नात्मानंगर्हयंत्योभ्यसूयया आनपत्येनदुःखेनराज्ञश्चानादरे
णच ३९ धिगप्रजांस्त्रियंपापांपत्युश्चागृहसंमतां सुप्रजाभिःसपत्नीभिर्दासीमि
वतिरस्कृतां ४० दासीनांकोनुसंतापःस्वामिनःपरिचर्यया अभीक्ष्णंलब्धमानानांदास्या
दासीवदुर्भगाः ४१ एवंसंदह्यमानानांसपत्न्याःपुत्रसंपदा राज्ञोऽसंमतवृत्तीनांविद्वेषोब
लवानभूत् ४२ विद्वेषनष्टमतयःस्त्रियोदारुणचेतसः गरंददुःकुमारायदुर्मर्षान्नृपतिं
प्रति ४३

प्रजाकामप्रजाज्वरस्तापः ३७ दारइत्येकवचनमार्षं ३८ आनपत्येनअपुत्रत्वनिमित्तेन ३९ नगेहेसंमतांनबहुम
तां यद्वा गृहिण्यवगृहेनभार्येतिसंमतामित्यर्थः ४० दास्यादासीयथातथावयंदुर्भगाः ४१ नसंमताप्रवृत्तिर्जीवनं

४४

राम
४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४४ धात्रीं स्तनदायिनीं ४५ उत्क्षिप्तेन तारके कनीनिके ययोस्ते लोचने यस्य तं ४६ । ७ विभ्रष्टाः शिरोरुहा अंबरे च यस्याः
४८ ताम् असपत्न्योपि अत्यसितः अतंकः मृत्युहेतुर्यस्य तं ४९ अनुगताः प्रकृतयो मत्पादयोर्यस्य सोऽनुप्रकृतिः

कृतद्युतिरजानंती सपत्नीनामवद्यमहत् सुप्तएवेति संचिंत्य निरीक्ष्य व्यचरद्गृहे ४४ शयानं सुचिरं बाल
मुपधार्य मनीषिणी पुत्रमानय मे भद्रे इति धात्रीमचोदयत् ४५ सा शयानमुपव्रज्य दृष्ट्वा चोत्तारलो
चनं प्राणैर्वियात्मभिस्त्यक्तं हतास्मीत्यपतद्भुवि ४६ तस्यास्तदाकर्ण्य भृशातुरं स्वनं भृत्यः कराभ्यामु
रश्चैव करपि प्रविश्य राज्ञी त्वरयात्मजांतिके ददर्श बालं सहसा मृतं सुतं ४७ पपात भूमौ परिरुद्ध
या शुचा मुमोह विभ्रष्टशिरोरुहांबरा ततो नृपांतःपुरवर्त्तिनो जना नराश्च नार्यश्च निशम्य रोद
नं ४८ आगत्य तुल्यव्यसनाः सुदुःखितास्ता अव्यलीकं रुरुदुः कृतागसः आत्मा मृतं पुत्रमल
क्षितांतकं विनष्टदृष्टिः प्रपतन्नुपस्खलन्नृपति ४९ स्नेहानुबंधे धितया शुचा भृशं विमूर्छितो नुप्र
कृतिर्हि जैरतः पपात बालस्य स पादमूले मृतस्य विस्रस्तशिरोरुहांबरः ५० दीर्घं श्वसन् बाष्प
कलोपरोधतो निरुद्धकंठो न शशाक भाषितुं पतिं निरीक्ष्याश्रु शुचार्पितं तदा मृतं च बालं सुतमे
कसंततिं ५१ जनस्य राज्ञी प्रकृतेश्च हृद्रुजं सतीद धाना विललाप चित्रधा स्नानहृद्यं कुंकुमगंध
मंडितं निषिंचती सांजनबाष्पबिंदुभिः ५२ विकीर्य केशान्विगलत्स्रजः सुतं शुशोच चित्रं कुर
रीव सुस्वर ५३

बाष्पकलाभिः अश्रुबिंदुभिरुप रोधतः संरुद्धत्वेन निरुद्धः कंठो यस्य गुरुशुचार्पितं बहुशोकेन व्याप्तं एकमेव सं
ततिरूपं ५१ ५२ विगलंत्यः स्रजो येभ्यः तान् केशान् ५३ श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०७० आत्मसृष्टरप्रतिरूपं अननुरूपं चेष्टसे तदेवाह नु अहो परे वृद्धे जीवति अपरस्य बालस्य या मृतिस्तत् तद्
हि वृद्धस्य सृष्टिसामर्थ्याभावे बालचमृते सृतितवसृष्टिर्नष्टा स्यादित्यर्थः सांप्रतं स्वसृष्टेर्विपरीतोऽसी
तिचेत्तत्राह विपर्ययश्चेद्विपरीतोऽसि चेत्तु न हि त्वं प्राणिनामति दुःखकारी [illegible] रिर्बांधवः नित्यः परः शत्रुरसि टी०२
स्व१ ननु तृप्यात्त्वित्यर्थः ५४ ननु जीवकर्मानुसारेण जन्मादि कुर्वेनाममकोपराधस्तत्राह नहीति पुत्रेजी

त०१ अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे परे नु जीवत्यपरस्य या
मृतिर्विपर्ययश्चेत् त्वमसि ध्रुवः परः ५४ न हि क्रमश्चेदिह मृत्युजन्मनोः शरीरिणा
मस्तु तदात्मकर्मभिः यः स्नेहपाशो निजसर्गवृद्धये स्वयं कृतस्ते तमिमं विवृश्चसि ५५
४५ त्वं तात नार्हसि च मां कृपणामनाथां त्यक्तुं विचक्ष्व पितरं तव शोकतप्तं अंजस्तरेम
भवताऽप्रजदुस्तरं यत् ध्वांतं न याह्यकरुणेन यमेन दूरं ५६ उत्तिष्ठ तात त इमे शिश
वो वयस्यास्त्वामाह्वयंति नृपनंदन संविहर्तुं सुप्तश्चिरं ह्यशनया च भवान्परीतो भुं
क्ष्व स्तनं पिब शुचो हर नः स्वकानां ५७
वृद्धेष्वेव पितामियते पितरि जीवत्येव पुत्रो जायत इति क्रमो नास्ति कर्माधीनत्वादिति चेत्तर्हि आत्मकर्मभि राम
रेव तज्जन्मादिकमस्तु किं त्वया कृतेन ननु मयेश्वरेण विना जडैः कर्मभिरिदं कथं सिध्येत् भवतु नाम त ४५
थापि निजसर्गवृद्धये त्वया यः स्नेहपाशः कृतस्तमिमं स्वयमेव विवृश्चसि छिनत्सीत्यादिक्रोशंति
नन्वेवंविधं दुःखं दृष्ट्वाऽकस्मिन्नपि पुत्रादिषु स्नेहं करिष्यतीति भावः अप्रजदुस्तरं अकारुणेन सह ५६ अ

अप्रजानां दुस्तरं १

भा०१० तनूजेहपुत्र नाहंप्रथमंत्वत्पार्श्वमागतास्तीत्तवमुग्धस्मितंवक्त्रंदृढंदर्शनदृष्टवत्यस्मि इदानीमपिगिरानशृणोमितर्हि
किंअपुनरन्वयः पुनरागमनंयथानभवतितथागतोसि ५८ ६१ षष्ठेचतुर्दशः ततः पंचदशेचित्रकेतोःशोका
पनोदनंकृतंतत्त्वोपदेशेननारदेनांगिरोयुक्ता मृतकोपांतशवसमीपे १ त्वंचास्यवंधूनांकेतमःस्वंशेत्रजान्नृपा
या अयंपुत्रःअहंचास्यपितेतिचेन्नु तत्राहतुः पुरेति येपूर्वजन्मनिपित्रादिरूपेणसंयुक्ताआसन् तएवमरणेन

नाहंतनूजदृशेहतमंगलांतेमुग्धस्मितंमुदितवीक्षणमाननाब्जं किंवागतोस्यपुनरन्वयमन्य
लोकंनीतोघृणेननशृणोमिकलागिरस्ते ५८ श्रीशुकउवाच ॥ विलपंत्यामृतंपुत्रमितिचित्र
विलापनैः चित्रकेतुर्भृशंतप्तामुक्तकंठोरुरोदह तयोर्विलपतोः सर्वेदंपत्योस्तदनुव्रताः रु
रुदुःस्मनरानार्यः सर्वमासीदचेतनं ६० एवंकश्मलमापन्नंनष्टसंज्ञमनायकं ज्ञात्वांगिरा
नाममुनिराजगामसनारदः ६१ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेचतुर्दशोऽध्यायः ॥
श्रीशुकउवाच ऊचतुर्मृतकोपांतपतितंमृतकोपमं शोकाभिभूतंराजानंबोधयंतौस
दुक्तिभिः १ कोयंस्यात्तवराजेंद्रभवान्यमनुशोचति त्वंचास्यकोत्रमःसृष्टौपुरेदानीमतः
परं २ यथाप्रयांतिसंयांतिस्रोतोवेगेनवालुकाः संयुज्यंतेवियुज्यंतेतथाकालेनदेहिनः
३

वियुक्ताः संतोवर्तमानजन्मनिकदाचित्तस्यैवान्यस्यवापुत्रादयोभवंति तेजन्मांतरेतस्यैवान्यस्य
वाकलत्रादयः शत्रुमित्रादयोवाभवंति अतोनायंनियमइतिभावः २ तमेवाभिप्रायंप्रकटयति
यथेति स्रोतसः प्रवाहस्यवेगेनयथा प्रयांतिवियुज्यंते संयांतिसंयुज्यंते तथाकालवेगेनदेहि
नोजीवाअपि ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०प० तथापि तावंतं कालं मम पुत्रो नाभूत् वार्द्धके जातो मृत इति दुःखमिति चेत्तत्राह ४ यथा धानासु बीजेषु धानाः बीजांतराणि भ
वंति कासुचित्कदाचिन्न भवंति नोत्पद्यंते न रंधयंति च न तु भवं त्ये वति ष्ठंत्येवेति वा नियमः ॥ एवमेव भूतानि पुत्रादि रूपाणि
भूतेषु पित्रादिषु अतो धानानां जन्यजनकत्वेपि यथा पितृपुत्रादिभावो नास्ति एवमत्रापीति न शोकः कार्य इति
भावः ईशमायाप्रेरितानामेव भवनमभवनं न वेक्षणं ४ तस्य च सर्वसाधारणत्वान्न पुत्र एव शोच नियइत्याह तु
वयं चेति तुल्यकाला वर्त्तमानकालीनाः जन्मनः प्राक् मृत्योः पश्चाच्च यथा न संति एवमधुनापि न संति भो राज
न् आद्यंतयोरसत्वात्स्वप्नवदित्यर्थः असत्वे कथं प्रतीतिः कथं वाहमस्य जनक इत्याद्यभिमानस्तत्राह तु ४ ॥

यथा धानासु वै धाना भवंति न भवंति च एवं भूतेषु भूतानि चोदितानीशमायया ४ वयं च त्वं
च ये चेमे तुल्यकालाश्चराचराः जन्ममृत्योर्यथा पश्चात्प्राक् नैवमधुनापि भोः ५ भूतैर्भू
तानि भूतेशः सृजत्यवति हंत्यजः आत्मसृष्टैरस्वतंत्रैरनपेक्षोपि बालवत् ६ देहेन दे
हिनो राजन्देहाद्देहोभिजायते ॥ बीजादेव यथा बीजं देह्यर्थ इव शाश्वतः ७ देहदेहिविभागो
यं मविवेककृतः पुरा जातिव्यक्तिविभागोयं यथा वस्तुनि कल्पितः ८

भूतैरिति ईश्वरेण मायया सृष्टत्वात्प्रतीतिः निमित्तमात्रत्वेनैव च भूतानामयमभिमान इति भावः नन्वीश्वरस्य
सृष्ट्यादिभिः साध्यमस्ति चेत्तु अपूर्णकामता प्राप्ता नास्ति चेत् कुतः प्रवृत्तिस्तत्राह तु ४ अनपेक्षोपि बालवल्लीलया
सृष्ट्यादिभिः साध्यमस्ति चेत्तु...
करोतीति ६ अयं च जन्मादिव्यवहारो देहानामेव न त्वात्मन इत्याह तु देहिनः पितुर्देहेन देहिनः पुत्रस्य देहो
मातुर्देहिनो देहाद भिजायते। यथा बीजादेव बीजं जायते देही तु शाश्वत एव अर्थो भूम्यादिर्यथा तद्वत् ७ ॥
७२ ननु ईश्वरदेहप्रतियोगित्वात् देह्यपि न शाश्वतः स्यात् तत्राह तु ४ देहदेहिनोरयं परस्परप्रतियोगिविभागः पुरा
अनादिः अविवेककृतः अज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशेषः तयोर्विभागो यथा वस्तुनि सन्मात्रे कल्पि

तः परमपक्षमित्यादिवनानिरूप्यबालवाद्ध ८

राम
४६

४६

अधिनाम्लानवक्त्रो ८ १० उन्मत्तस्यैव लिंगं येषां ते ११ ५ ममश्शुरक्षके कोबोधे समर्थो विनिवा अतो युवाभ्यां ज्ञानदीपः

श्रीशुक उवाच एवमाश्वासितो राजा चित्रकेतुर्द्विजोक्तिभिः प्रमृज्य पाणिना वक्त्रमाधिम्लानमभाषत ९
राजोवाच कौ युवां ज्ञानसंपन्नौ महिष्ठौ च महीयसां अवधूतेन वेषेण गूढाविह समागतौ १० चरंति
ह्यवनौ कामं ब्राह्मणा भगवत्प्रियाः मादृशां ग्राम्यबुद्धीनां बोधायोन्मत्तलिंगिनः ११ कुमारो नारद ऋ
भुरंगिरा देवलो ऽसितः अपांतरतमो व्यासो मार्कंडेयोथ गौतमः १२ वसिष्ठो भगवान् रामः कपिलो बा
दरायणिः दुर्वासा याज्ञवल्क्यश्च जातुकर्ण्यस्तथारुणिः १३ रोमशश्च्यवनो दत्त आसुरिः सपतंजलिः
ऋषिर्वेदशिराः धौम्यो मुनिः पंचशिखस्तथा १४ हिरण्यनाभः कौशल्यः श्रुतदेव ऋतध्वजः एते परे
च सिद्धेशाश्चरंति ज्ञानहेतवः १५ तस्माद्युवां ग्राम्यपशोर्मम मूढधियः प्रभू अंधे तमसि मग्नस्य ज्ञा
नदीपउदीर्य्यतां १६ अंगिरा उवाच अहं ते पुत्रकामस्य पुत्रदो ऽस्म्यंगिरा नृप एष ब्रह्मसुतः सा
क्षान्नारदो भगवान् ऋषिः १७ इत्थं त्वां पुत्रशोकेन मग्नं तमसि दुस्तरे अतदर्हमनुस्मृत्य महापुरुषगो
५८ चरं १८ अनुग्रहाय भवतः प्राप्तावावामिह प्रभो ब्रह्मण्यो भगवद्भक्तो नावसीदितुमर्हति १९ तदैव
ते परं ज्ञानं ददामि गृहमागतः ज्ञात्वा ऽन्याभिनिवेशं ते पुत्रमेव ददाम्यहं २० अधुना पुत्रिणां तापो
भवतैवानुभूयते एवं दारा गृहा रायो विविधैश्वर्यसंपदः २१ शब्दादयश्च विषया अचला राज्य वि
भूतयः महीराज्यं बलं कोशो भृत्यामात्याः सुहृज्जनाः २२

प्रवर्त्यतां १६ ७ महापुरुषगोचरत्वाहरिभक्तो १८ ९ तदैव यदा पूर्वमागतोस्मि २१ रायः अर्थाः २२ चला अनित्याः
किंच महीति २२

एतेषां ऋषिमुख्यानां कौ युवां ज्ञानपारगौ ।।
कथ्यतां कृपया मह्यं नाहं ज्ञाना सिद्धुरितः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे शूरसेन इमे सर्वेऽपि शोकादिप्रदाः किंच आगमापायित्वेन गंधर्वनगरतुल्याः गंधर्वनगरं ह्यकस्मादेव क्व
चिदायाति चापयातीति प्रसिद्धं तदेवमनित्यत्वे शोकादिहेतुत्वं चागमापायित्वं चोक्तं मिथ्यात्वमप्याह स्व
प्नश्च मायाच मनोरथश्च यथा तद्वत् २३ मनोभवाः मनोमात्रविजृंभिताः अत्र हेतुः अर्थेन तात्त्विकस्वरूपेण
विनैव दृश्यमानाः न तु नः यस्मात् क्षणांतरे दृश्यंते न तात्त्विकत्वे हि क्षणांतरे बाधो न स्यात् अतो मनोमात्रवि
जृंभितं तत्त्वेन स्वप्नादिवन्मिथ्याभूता इत्यर्थः नन्वेते पुण्यापुण्यफलता इति मीमांसकाः प्राहुस्तत्कुतो मनोभवत्वं

सर्वेऽपि शूरसेनेमे शोकमोहभयार्तिदाः गंधर्वनगरप्रख्याः स्वप्नमायामनोरथाः २३ दृ
श्यमाना विनार्थेन न दृश्यंते मनोभवाः कर्मभिर्ध्यायतो नानाकर्माणि मनसोऽभवन्
२४ अयं हि देहिनो देहो द्रव्यज्ञानक्रियात्मकः देहिनो विविधक्लेशसंतापकृदुदाहृतः
२५ तस्मात्स्वस्थेन मनसा विमृश्य गतिमात्मनः द्वैते ध्रुवार्थविश्रंभं त्यजोपशममाविश
नारद उवाच एतां मंत्रोपनिषदं प्रतीच्छ प्रयतो मम यां धारयन् सप्तरात्राद्द्रष्टा संकर्षणं विभुं

तत्राह कर्मभिः कर्मवासनाभिः अर्थान् ध्यायतः पुंसो मनस एव निमित्तात् कर्माण्यभवन् पाठांतरे क
र्माणि तत्तममभिध्यायत इत्यर्थः कर्मणोऽपि मनोभवत्वात्तत्साध्या अर्था अपि मनोभवा एवेति भावः २४
तदेवं ममतास्पदानां दुःखादिहेतुत्वमुक्तं तत्र देहसंबंधो मूलमित्याह अयं हीति हीत्यवधारणे अयं
द्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मरूपो देह एवं देहिनः देहिनो देहोऽहमिति मन्यमा
नस्य देहिनो जीवस्य विविधान् क्लेशान् संतापांश्च करोतीति तथा स्वस्थेनाव्यग्रेण गतिं तत्त्वं ध्रुवो
यमर्थ इति विश्रंभं विश्वासं प्रणयं वा त्यज ततश्चोपशममाविश आश्रय २६ अंगिरसापदिष्टं तत्त्वं
परमेश्वरप्रसादं विना न प्राप्यत इति तत्प्रसादाय मंत्रविद्यां नारद उपदिशति एतामिति उपनिषदं

४८

राम ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतुलं च तत् अनधिकं च समानाधिकशून्यं परं महिमानं प्राप्नुः उपैति उपैष्यति २८ षष्ठे पंचदशः षोडशे तत्सु
तो तस्यैव विशोकाः सत्यं तं नृप आदिदेश महाविद्यां नारदः शेषं तोषिणीः आदौ तावत्पुत्रमुखेनैव पितृपु
त्रादि संबंधा मिथ्येति दर्शयितुं योगबलेन तमेव ज्ञातीनां दर्शयित्वा जीवात्मनि त्याधर्मणा २ शेषम व नू२
२१ शिष्टमायुः स्त्रि अपमृत्युना मृतत्वादित्यर्थः तदेव कलेवरं प्रविश्योत्थितो जीव उवाच यथा अंतराल

यत्पादमूलमुपसृत्य नरेंद्र पूर्वे शर्वादयो भ्रममिमं द्वितयं विसृज्य सद्यस्तदीयमतुलान
धिकं महित्वं प्रापुर्भवानपि परं नचिरादुपैति २८ इतिश्री भागवते महापुराणे षष्ठस्कं
धे पंचदशोऽध्यायः शुक उ० अथ देवऋषि राजन् संपरेतं नृपात्मजं दर्शयित्वेति
होवाच ज्ञातीनामनुशोचतां १ नारद उवाच जीवात्मन् पश्य भद्रं ते मातरं पितरं च ते ॥
सुहृदो बांधवास्तप्ताः शुचा त्वत्कृतया भृशं २ कलेवरं समाविश्य शेषमायुः सुहृद्वृ
तः भुंक्ष्व भोगान् पितृप्रत्तान् अधितिष्ठ नृपासनं ३ जीव उवाच कस्मिन् जन्मन्यमी
मे पितरो मातरोऽभवन् कर्मभिर्भ्राम्यमाणस्य देवतिर्यङ्नृयोनिषु ४ बंधुज्ञात्य
रिमध्यस्थमित्रोदासीनविद्विषः सर्व एव हि सर्वेषां भवंति क्रमशो मिथः ५

प्रेतशरीरे स्थित्वेति ज्ञेयं ३ ४ मयि मृते पुत्रदृष्ट्या शोकः शत्रुदृष्ट्या हर्षः किं न क्रियत इत्याशयेन संबंधस्या
नियतत्वमाह बंधवो विवाहादिभिः संबंधिनः ज्ञातयः सपिंडाः अरयो घातकाः मित्राणि रक्षकाः मध्यस्थाः उभयव्य था२
तिरिक्ताः विद्विषाद्वयादिनिमित्तेन द्वेषिणः उदासीनास्तु अतिरिक्ता इति भेदः ५ २९ ३०

भा० ष०

प्रु १

कर्मभिर्भ्राम्यमाणत्वे दृष्टांतः यथा पण्यानि क्रयविक्रयाद्युह्यमाणानि कर्तृषु व्यवहर्तृषु परिभ्रमंति एवं जीवो पि योनि
षु जनकेषु ६ एकस्मिन्नपि जन्मनि संबंधस्यानियतत्वे सदृष्टांतमाह द्वाभ्यां नित्यस्य जीवत्वतो ऽपि अर्थस्य पश्वा
देः अनित्यः अनियतः विक्रयादिना संबंधनिवृत्तेः ७ एवं योनिगतः पित्रादिसंबंधं प्राप्तो ऽपि स जीवो नित्यः
देहजन्मादिना तस्य जन्माद्यभावात् अत एव वस्तुतो निरहंकृतः अहमस्य पुत्र इत्यभिमानशून्यः यत्र पि
त्रादिसंबंधिनि यावद्युपलभ्यते कर्मवशेन वर्तते तावदेव तस्य पित्रादेः तत्तस्मिन् स्वत्वं ननु विक्रयाद्यन्त
रकालमपि अर्थेनैव संबंधः यदुक्तं कलेवरं समाविश्यति तत्र तस्मिन् कलेवरे ममेदमिति स्वत्वं निवृत्तमिति सदृ

४८ यथा वस्तूनि पण्यानि हेमादीनि ततस्ततः पर्यटंति नरेष्वेवं जीवो योनिषु कर्तृषु ६ नित्यस्यार्थस्य सं
बंधो ह्यनित्यो दृश्यते नृषु यावद्यस्य हि संबंधो ममत्वं तावदेव हि ७ एवं योनिगतो जीवः स नित्यो
निरहंकृतः यावद्यत्रोपलभ्येत तावत्स्वत्वं हि तस्य तत् ८ एष नित्यो व्ययः सूक्ष्म एष सर्वाश्रयः स्व
दृक् आत्ममायागुणैर्विश्वमात्मानं सृजते प्रभुः ९

ष्टांतमाह नित्यस्य चिरकालावस्थायिनो ऽर्थस्य सुवर्णादेः योनिगतो देहं प्रविष्टः यत्र देहे तस्य जीवस्य तस्मिन्
देहे स्वत्वं न तु मरणानंतरकालमपीत्यर्थः शेषं समानं ८ जीवस्य नित्यत्वं साधयति एष नित्यः तत्र हेतुः अव्ययः अ
पक्षयशून्यः तत्कुतः सूक्ष्मः जन्मादिशून्यः तत्कुतः सूक्ष्मः जन्मादिशून्यः तच्च कुतः सर्वाश्रयः जन्मादिमतो
देहादेराश्रयः ननु देहादिरूपः यतः स्वदृक् स्वप्रकाशः सर्वाश्रयत्वमुपपादयति आत्ममायागुणैरात्मा
नमेव विश्वं विश्वात्मकं सृजति न त्वात्मानं स्वयमकुरुतेति श्रुतेः उपादानकारणत्वात्सर्वाश्रय इत्यर्थः
जीवस्य वस्तुतो ब्रह्मत्वाद्ब्रह्मण एव विद्धक्तिविशिष्टस्येश्वरत्वेन स्रष्टृत्वाज्जीवः सृजतीति वाचोयुक्तिः ९

राम ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदुक्तं सुहृत्त्वं इति सुहृदो वा धवास्त्वमाइति च न तत्राप्याह नह्यस्येति तत्र हेतुः एकः सुहृदादिसंगरहितः तत्कृतयोः गु
णदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनां याः सर्वा धियः विचित्रा बुद्धयः तासां द्रष्टा साक्षी १० यच्चोक्तं भुंक्ष्व भो
गानित्यादि तत्राप्याह नादत्त इति गुणं सुखं दोषं दुःखं क्रियाफलं च राज्यादिकं उदासीनत्वे हेतुः परावरदृक्का
रणस्य कार्यस्य च साक्षी न तु भोक्ता यतः ईश्वरः देहादिपारतंत्र्यशून्यः अत एवंभूतस्य मम च युष्माकं च संबंधा

नह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोपि वा एकः सर्वधियां द्रष्टा कर्तॄणां गुणदोषयोः १० नादत्त आ
२२ त्मा हि गुणं न दोषं न क्रियाफलं उदासीनवदासीनः परावरदृगीश्वरः ११ बादरायणिरुवाच इत्युदी
र्य गतो जीवो ज्ञातयस्तस्य ते तदा विस्मिता मुमुचुः शोकं छित्वात्मस्नेहशृंखलां १२ निर्हृत्य ज्ञातयो ज्ञाते
र्देहं कृत्वोचिताः क्रियाः तत्यजुर्दुस्त्यजं स्नेहं शोकमोहभयार्तिदं १३ बालघ्न्यो व्रीडितास्तत्र बालहत्या
हतप्रभाः बालहत्याव्रतं चेरुर्ब्राह्मणैर्यन्निरूपितं यमुनायां महाराज स्मरंत्यो द्विजभाषितं १४
सइत्थं प्रतिबुद्धात्मा चित्रकेतुर्द्विजोक्तिभिः गृहांधकूपान्निःक्रांतः सरःपंकादिव द्विपः १५ का
लिंद्यां विधिवत्स्नात्वा कृतपुण्यजलक्रियः मौनेन संयतप्राणो ब्रह्मपुत्राववंदत १६ अथ तस्मै
प्रपन्नाय भक्ताय प्रयतात्मने भगवान्नारदः प्रीतो विद्यामेतामुवाच ह १७ नमस्तुभ्यं भगवते वा
सुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च

भावाच्छोकं मा कुरुतेति वाक्यार्थः ११ ३ द्विजभाषितं अंगिरसा प्रोक्तं पुत्रादीनां दुःखहेतुत्वं स्मरंत्यः पुत्र
कामनाशून्या निर्मत्सराः सत्य इति भावः १४ निबिडपंकतुल्ये गृहे विहाय निःक्रमणमिति धीरस्यत्वस्ये
वयोग्यं नान्यस्येति सदृष्टांतमाह सरःपंकाद्द्विपो गजइवेति १५ कृतो पुण्यजलक्रिया पितृतर्पणा
द्यायेन संयतप्राणो नियतेंद्रियः १६ १७ नमो धीमहि ध्याये मा मनसा नमस्यामि इत्यर्थः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० १० निवृत्ता द्वैतदृष्टिर्यस्मात् १९ न्यस्ता निरस्ताः शक्त्यूर्मयः मायानिमित्ता रागद्वेषादयो येन २० मनसा सह वचसि
अप्राप्योपरते सति य एक एव प्रकाशते वचसीति सर्वेन्द्रियोपलक्षणं सोऽस्मानव्यात् सदसत्परः कार्यकारणयोः का
रणं २१ तदेवाह यस्मिन्निदं कार्यकारणं तिष्ठति अप्येति चायतश्च जायते मृन्मयेषु घटादिषु मृज्जातिर्मृन्मा
त्रमिव सर्वानुस्यूतं यत् तस्मै २२ ननु सर्वानुस्यूतं चेत् जातिवत् प्रतीयेत कथं मनोवचसोरप्राप्तिस्तत्राह यन्ने
सव्योमवद्विततमपि असवः प्राणाः क्रियाशक्त्या न स्पृशन्ति मनआदीनि च ज्ञानशक्त्या न विदुः तद्ब्रह्म नतोऽस्मि
८१ २३ तेषां तज्ज्ञाने हेतुमाह देहेन्द्रियादयोऽमी यदंशाविद्धाः यच्चैतन्यांशेनाविष्टाः सन्तः कर्मसुखविषयेषु प्र

नमो विज्ञानमात्राय परमानंदमूर्तये आत्मारामाय शांताय निवृत्तद्वैतदृष्टये १९ आत्मानंदानु
भूत्यैव न्यस्तशक्त्यूर्मये नमः हृषीकेशाय महते नमस्तेऽनंतमूर्तये २० वचस्युपरतेऽप्राप्य य ए
को मनसा सह अनामरूपश्चिन्मात्रः सोऽव्यान्नः सदसत्परः २१ यस्मिन्निदं यतश्चेदं तिष्ठत्य
४९ प्येति जायते मृन्मयेष्विव मृज्जातिस्तस्मै ते ब्रह्मणे नमः २२ यन्न स्पृशंति न विदुर्मनोबुद्धीन्द्रिया
सवः अंतर्बहिश्च विततं व्योमवत्तन्नतोऽस्म्यहं २३ देहेंद्रियप्राणमनोधियोऽमी यदंशविद्धाः
प्रचरंति कर्मसु नैवान्यदा लोहमिवाऽप्रतप्तं स्थानेषु तद्द्रष्टृपदेशमेति २४

चरन्ति जाग्रत्स्वप्नयोः अन्यदा सुषुप्तिमूर्छादौ नैव प्रचरंति यथाऽप्रतप्तं लोहं न दहति अतो यथा लोहमग्निश
लेयवद्दाहकं सदग्निं विना न दहति एवं ब्रह्मगतज्ञानक्रियाशक्तिभ्यां प्रवर्तमाना देहादयस्तान्न स्पृशंति न वि
जी २ दुश्चेति भावः जीवस्तर्हि द्रष्टा स्यान्नानुनेत्याह स्थानेषु जाग्रदादिषु द्रष्टृसंज्ञां तद्देवेति प्राप्नोति नान्यो जी
वानामास्ति नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः यद्वा द्रष्टृपदेशं द्रष्टृसंज्ञं जीवमपि तद्देव एति जानाति ननु जी

पदेशांडङ्ग २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ नारदस्य प्राधान्यनिर्देशः।

सकलायेसात्वतपरिवृढाः तेषांनिकरस्समूहस्तस्यकरकमलानांकुड्मलेर्मुकुलैरुपलालितंचरणारविंदयुग
लंयस्यतस्यसंबोधनं परमउत्कृष्टपरमेष्ठिन्सर्वेश्वर पूर्वंसनारदोंगिराश्चाजगमेत्यंगिराः प्राधान्येनाक्तोः
चित्रकेतोःपुत्रप्रदत्वेनतस्यपृथक् उक्तत्वात् इहतुनारदोंगिरसा।कंययाविति [illegible] तदुपदे
शेनतस्यैवैराग्यात्पते। प्रभोहेसमर्थ २६ यथायथावद्धारयामास २७ विद्याधराधिपत्यंचावांतरफलंलेभे
अप्रतिहतमस्खलितं १८ कतिपयैरहोभिः विद्ययाइद्धेनदीप्तेनमनसागतिर्यस्य २९ मृणालवद्गौरं शिति

ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसकलसात्वतपरिवृढनिकरकरकमलकुड्म
लोपलालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते २५ श्रीशुकउवाच भक्तायैतांप्रपन्नायविद्यामा
दिश्यनारदः ययावंगिरसासाकंधामस्वायंभुवंप्रभो २६ चित्रकेतुस्तांविद्यांतांयथानारदभाषितां।।
धारयामाससप्ताहमब्भक्षःसुसमाहितः २७ ततश्चसप्तरात्रांतेविद्ययाधार्यमाणया विद्याधराधि
पत्यंसलेभेप्रतिहतंनृप २८ ततःकतिपयाहोभिर्विद्ययेद्धमनोगतिः जगामदेवदेवस्यशेषस्यचर
णांतिकं २९ मृणालगौरंशितिवाससंस्फुरत्किरीटकेयूरकटित्रकंकणं प्रसन्नवक्त्रारुणलोचनंवृतं
ददर्शसिद्धेश्वरमंडलैःप्रभुं ३० तद्दर्शनध्वस्तसमस्तकिल्बिषःस्वच्छामलांतःकरणोऽभ्ययान्मु
निः प्रवृद्धभक्त्याप्रणयाश्रुलोचनःप्रहृष्टरोमाऽनमदादिपूरुषं ३१ श्रीराम श्रीराम श्रीराम।।

वाससंनीलांबरंस्फुरंतिकिरीटादीनियस्य कटित्रंकटिसूत्रंप्रसन्नानिवक्त्राणियस्यअरुणानिलोचना
नियस्यतंवृतंच ३० इत्याचतमादिपुरुषंअभ्ययात्शरणंगतः अनमन्ननामकथंभूतः तस्यदर्शनेनध्व
स्तंकिल्बिषंयस्य स्वच्छममलंचांतःकरणंयस्य [illegible] यस्यप्रणयेनाश्रुयुक्तेलोचनेयस्य
समस्तं

स्तोतुं।

भा०ष० तंप्रसमीडितुंचिरंनैवाशकन्नशशाक तत्रहेतुः उत्तमश्लोकस्यपादाब्जयोर्विष्टरमासनंउपमेहयन् अभिषिं

चन् प्रेम्णाउपरुद्धः अखिलानांवर्णानांनिर्गमउच्चारणंयस्यसः ३२ मनीषयाबुद्ध्यामनः समाधायेतद्बभा

माणोबभाषेप्रतिलब्धावाग्येन सात्वतशास्त्रोक्तोविग्रहोयस्यतं ३३ अन्यान्प्रेमजानंदनिघ्नतान्स्वामि

सेवकान् अभिनंदन्नुमुदस्तौतिदशभिःपंचभिर्विभुंहे अजित अन्यैरजितोऽपिभवान् साधुभिर्भ

क्तैर्जितः स्वाधीनएवकृतः यतोभवानतिकरुणः तेपिचनिष्कामाअपिभवताजिताः यो भवान् अका

मात्मनामात्मानमेवददाति ३४ ननुभक्तैरेवजितइतिकथं स्पर्द्धमानैरपिस्रष्ट्रादिकर्तृभिरन्यैरीश्वरैर्जि

स उत्तमश्लोकपदाब्जविष्टरंप्रेमाश्रुलेशैरुपमेहयन्मुहुः प्रेमोपरुद्धाखिलवर्णनिर्गमोनैवाश

कत्तंप्रसमीडितुंचिरं ३२ ततःसमाधायमनोमनीषयाबभाषएतत्प्रतिलब्धवागसौ नियम्यसर्वेंद्रिय

५० बाह्यवर्तनंजगद्गुरुंसात्वतशास्त्रविग्रहं ३३ चित्रकेतुरुवाच अजितजितःसममतिभिःसाधुभि

र्भवान्जितात्मभिर्भवताविजितास्तेऽपिचभजतामकामात्मनांयआत्मदोऽतिकरुणः ३४ तववि

भवःखलुभगवन्जगदुदयस्थितिलयादीनिविश्वसृजस्तेंशांशास्तत्रमृषास्पर्द्धंतिपृथ

गभिमत्या ३५ परमाणुपरममहतोस्त्वमाद्यंतांतरवर्तीत्रयविधुरः आदावंतेचसत्वानांयद्

ध्रुवंतदेवांतरालेपि ३६

यस्संभवात्तत्राह तवेतिजगतउदयादीनितवैवविभवः विभवनंमहिमालीलेतियावत् आदिशब्देनप्रवेश

नियमादीनि विश्वसृजस्तुब्रह्मादयोनेश्वराः किंतु तवांशांशायःपुरुषः तस्यांशाः तत्रएवंस्थितेपिपृथक्पृ

थगीश्वरावयमित्यभिमानेनमृषैवस्पर्द्धंते ३५ तमेवस्रष्ट्रादिकर्तृत्वेनदुपपादयतिपरमाणुःसूक्ष्मंमूलं

कारणंपरममहत्अंतिमंकार्यंतयोस्त्वमेवाद्यंतांतरवर्तीआदावंतेचअंतरेमध्येचवर्तितुंशीलंयस्यसः

अतएवत्रयविधुरःआद्यंतमध्यशून्याभावः तेचत्वयासृज्यंतेनतुभावाः कुतइत्याह सत्वानांसत्वेनप्रती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुराजकुलं । विषयकामेनापि त्वत्सेवा मोक्षफलैवेत्याह । कामधियः ६

एवं ध्रुवत्वेन कालतः परिच्छेदाभावमुक्त्वा देशतोऽप्यपरिच्छेदमाह क्षित्यादिभिरिति पूर्वस्मात् दशगुणमुत्त
रैरधिकैरावृतः यत्र त्वयि अणुकल्पः पतति परिभ्रमति ततस्मादनंतस्त्वं ३७ यस्मादेवं परमेश्वरस्त्वमेव अ
न्ये देवास्त्वद्विभूतयः अतस्त्वां विहाय विषयकामनया अन्योपासका अतिमंदा इत्याह विषयेषु तृट् तृष्णा
येषां ते नराकाराः पशवः कुतः ये विभूतीरिंद्राद्या उपासते न तु परं त्वां ततः किं तत्राह तेषामिति तद्धेतु
उपास्यनाशानंतरं यथा राजकुलं नाशानंतरं यथा तत्सेवकानां आशिषो नश्यंति तद्वत् अयं च पर
वि । मोऽवधिः मध्येऽपि नश्यंत्येव ३८ विषयकामनापि हे परम त्वयि रचिता कृता अतः तु न रोहंति दहति

क्षित्यादिभिरेष किलावृतः सप्तभिर्दशगुणोत्तरैरंडकोशः । यत्र पतत्यणुकल्पः सहांडकोटिकोटि त १
भिस्तदनंतः ३७ विषयतृषो नरपशवो य उपासते विभूतीर्न परं त्वां तेषामाशिष ईश तदनु विन
यथा २ श्यंति यथा राजकुलं ३८ कामधियस्त्वयि रचिता न परम रोहंति यथा करंभबीजानि ज्ञानात्मन्यगु
णमये गुणगणतोऽस्य द्वंद्वजालानि ३९ जितमजित तदा भवता यदाह भागवतं धर्ममनव
य १ द्यं निष्किंचना ये मुनय आत्मारामा यमुपासतेऽपवर्गाय ४०

करं । रोत्पत्तेयन भवंति भवीजानि भर्जितबीजानि यथा यतोऽस्य जीवस्य गुणगणादेव द्वंद्वसमूहा भवंति अ
तः कामनापि निर्गुणस्य तव भजनाद्वै नैर्गुण्यं भवतीत्यर्थः ३९ फलकामनयापि त्वदाराधनं
यदा मोक्षहेतुः तदा किं वक्तव्यं भगवद्धर्ममाहात्म्यमिति वक्तुं तत्संप्रदायप्रवर्तकत्वेन च भगवंतं
स्तौति जितमिति यदा भवान् भागवतं धर्ममाह तदा हे भगवन् त्वया जितं सर्वोत्कर्षेण स्थितं त
त्र हेतुः ये निष्किंचनाः सनत्कुमारादयो मुनयः यं भवंतं अपवर्गाय सेवंते तेन भवता जितं यं धर्मं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० अनवद्यतामेवाह विषममतिर्यत्रयस्मिन् भागवते धर्मेनास्ति यदन्यत्र यथान्यस्मिन् काम्य धर्मेनसुसोऽपिवेदो
क्तत्वात् नवद्य एवेतत्राह विषमधियाशत्रुमरणादिकामनयारचिंताय‍ः सत्यविशुद्धः रागद्वेषादिमत्वात्
४२ क्षयिष्णु अनशुरफलत्वात् अधर्मबहुलश्च हिंसादिबाहुल्यात् तदुक्तं शवरस्वामिभिः उभयमिह
चोदनायालक्ष्यते अर्थो नेर्थश्चेत्यादि ४१ एतत्प्रपंचयति कः क्षेमः किंकुशलं तेन किंचित् निजपर
योः स्वस्यपरस्यच स्वपरद्रुहा स्वस्मैपरस्मैचद्रुह्यतीतिस्वपरध्रुक् तेन यतः स्वद्रोहात् अत्य

विषममतिर्नयत्रनृणांत्वमहमितिममतवेतिचयदन्यत्र विषमधियारचिंताय‍ः सत्यविशु
द्धः क्षयिष्णुरधर्मबहुलः ४१ कः क्षेमोनिजपरयोः कियानर्थः स्वपरद्रुहा धर्मेणस्व
५१ द्रोहात्तवकोपः परसंपीडयाचतथाधर्मः ४२ नव्यभिचरतितवेक्षायया ह्यभिहितोभा
गवतोधर्मः स्थिरचरसत्वकदंबेषु पृथग्धियायमुपासतेत्वार्याः ४३ नहिभगवन्नघ ४४
टितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयः यन्नामसकृच्छ्रवणात् पुल्कसकोऽपिविमुच्य
तेसंसारात् ४४
तकायं क्लेशात् तवकोपः पीडासंभवति तदुक्तं गीतासु कर्षयंतः शरीरस्थंभूतग्राममचेतसः मांचैवांतः
शरीरस्थंतान्विद्ध्यासुरनिश्चयानिति तथापरसंपीडयाऽधर्मः चशब्दात्तवकोपश्च अतस्त्वयारागाधर्म राम
पिकथंविहितमार्गेप्रवर्त्तयितुं काम्यधर्मोऽभिहितानतत्वदृष्ट्या ४२ भागवतधर्मेणतुनद्रोहइत्याह नव्य ५२
४२ भिचरतिनपरमार्थंजहातितवईक्षाहष्टिः अव्यभिचारहेतुः स्थितिरित्थावरजंगमप्राणिसमूहेषु समबु
द्ध्याभागवतायंधर्मसेवंत ४३ एवंभूतस्यभागवतधर्मप्रवर्तकस्य तवदर्शनात् सर्वपापक्षयो भवेत्तीतिकिं मितिव्यात नहीति ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोहं कृतार्थोऽस्मीत्याह अथेति अतो हेतोः तावावलोकनेन परिमृष्टा निरस्ता आशये चित्ते मलाः येषां ते त्वद्दर्श
नं च मम नारदोपदेशेन जातमित्याह सुरर्षिणेति ४५ यथा चाहं पूर्वमतिमूढ आसं यथा च नारदेनानुगृही
तोऽस्मि तत्सर्वांतर्यामिणस्तव मया किं प्रकाशनीयमित्याह विदितमिति विज्ञाप्यं प्रकाशनीयं
कियदिव न किमपीत्यर्थः सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत् ४६ उक्तलक्षणं भगवंतं प्रणमति

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरर्षिणा यदुदितं तावकेन कथ
मन्यथा भवति ४५ विदितमनंत समस्तं तव जगदात्मनो जनैरिहाचरितं विज्ञाप्यं परमगु
रोः कियदिव सवितुरिव खद्योतैः ४६ नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय
दुरवसितात्मगतये कुयोगिनां भिदा परमहंसाय ४७ यं वै श्वसंतमनु विश्वसृजः श्वसं
न३ तिं यं चेकितानमनु चित्तय उच्चकंति भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवते
ऽस्तु सहस्रमूर्ध्ने ४८ श्रीशुक उवाच संस्तुतो भगवानेवमनंतस्तमभाषत विद्याध
रपतिं प्रीतश्चित्रकेतुं कुरूद्वह ४९ श्रीभगवानुवाच यन्नारदांगिरोभ्यां ते व्याहृतं मे
नुशासनं संसिद्धोसि तया राजन्विद्यया दर्शनो

नम इति द्वाभ्यां सकलस्य जगतः स्थित्यादीनामीशाय समर्थाय दुरवसिता अविज्ञाता आत्मगतिर्निजतत्वं
यस्य तस्मै केषां कुयोगिनां केन भिदा भेददृष्ट्या ४७ श्वसंति चेष्टंते चेकितानं पश्यंतमनु चित्तयः
ज्ञानेंद्रियाणि उच्चकंति सानंदं पश्यंति ४८ ४९ मेनुशासनं मद्विषय उपदेशः तेन च तया च विद्यया

भा०प० तद्बोधनार्थं स्वयमप्युपदिशति अहमित्यादिना सर्वभूतान्यहमेव भूतानामात्मा भोक्ताऽप्यहमेव भोक्तृ
भोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः यतोऽहं भूतभावनः भूतानां प्रकाशकः कारणं च ननु शब्द
ब्रह्मप्रकाशके परब्रह्म कारणं च प्रकाशकं च सत्यं तत्रोभयमेव तनू पद्येत्याह शब्दब्रह्मेति शाश्वत्यौ
टि३ ५१ अतः स्वमेव पश्येत्याह लोके भोग्ये प्रपंचे भोक्तृत्वेनाततमनुगतमात्मानं लोके चात्मनि भोग्यत्वेन संततं व्या
प्तं तदुभयं च मया कारणात्मना व्याप्तं मयि चैवोभयं कृतं कल्पितं स्मरेदिति तृतीयेनान्वयः पश्येदित्यध्याहा
र्यं वा ५२ ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्य स्व

अहं वै सर्वभूतानि भूतात्मा भूतभावनः शब्दब्रह्म परं ब्रह्म ममोभे शाश्वती तनू ५१ लोके वि
ततमात्मानं लोकं चात्मनि संततं उभयं च मया व्याप्तं मयि चैवोभयं कृतं ५२ यथा सुषुप्तः
५२ पुरुषो विश्वं पश्यति चात्मनि आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ५३ एवं जागरणादी
नि जीवस्थानानि चात्मनः मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ५४

प्नगत जाग्रदादि दृष्टान्तेन संभावयन्नाह यथेति द्वाभ्यां यथा स्वप्ने सुप्तो विश्वं गिरिवनादिरूपं देशान्तरस्थ
मात्मन्येव पश्यति स्वप्नमध्ये सुषुप्तिस्वप्ने च पश्यतीत्यर्थः तथा स्वप्न एवोत्थितः सन् आत्मानमेकदेशस्थं राम
शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति ५३ एवं प्रसिद्धान्यपि जागरादीनि जीवावस्थानानि जीवो ५२
पाधिबुद्धेरवस्था आत्मनो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारं अत एव परं तदवस्थारहितमात्मा
नं स्मरेत् ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ११०

ननु तेषां द्रष्टारमिति कथमुच्यते स्वापे दृश्याभावेन तद्द्रष्टृत्वाभावात् तत्राह येनेति प्रसुप्तः पुरुषो जीवः येन रूपेण तदा स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेद तमात्मानं ब्रह्म मामेवेहि तदा स्वापसुखयोरसंवेदने सुखमहमस्वाप्समिति स्मृतेरसंभवात् ५५ ननु स्वरूपसाक्षिणा दृष्टं कथं जागृदवस्थः स्मरेत् नह्यन्येन दृष्टमन्यः स्मरति तत्राह उभयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसंदधतः तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत च एकैकापायेप्यनपायात् तज्ज्ञानं परं ब्रह्मात्मा तदेव न तु भिन्नमित्यर्थः अतो बाल्ये दृष्टस्य यौवने स्मृतिवदवस्थांतरेऽपि स्वापानंदयोः

येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा सुखं च निर्गुणं ब्रह्म तमात्मानमवेहि मां ५५ उभयं
स्मरतः पुंसः प्रस्वापप्रतिबोधयोः अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परं ५६ यदेतद्विस्मृ
तं पुंसो मद्भावं भिन्नमात्मनः ततः संसार एतस्य देहाद्देहो मृतेर्मृतिः ५७ लब्ध्वेह मानुषीं यो
निं ज्ञानविज्ञानसंभवां आत्मानं यो न बुध्येत न क्वचित्क्षेममाप्नुयात् ५८ स्मृत्वेहायां परिक्ले
शं ततः फलविपर्ययं भयं चाप्यनीहायां संकल्पाद्विरमेत्कविः ५९ श्रीरामराम राम॥

स्मरणं घटत इति भावः तदेवंभूतं ब्रह्मात्मानमवेहीत्यनुषंगः ५६ विपक्षे दोषमाह यदेतद्यदि एतन्मयि भावं मत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशात् भिन्नं भवति तदा एतस्य पुंसः संसारो भवति संसारस्वरूपमाह देहाद्देहं जन्मांतरं पुनर्जन्म मृतेरनंतरं मृतिश्चेति यान्यंतरेऽपि भोगादिसंपादनं शक्यं ज्ञानार्थं तु अत्रैव यतितव्यमित्याह लब्ध्वेति ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवो यस्यां तां ५८ वैराग्यार्थमाह ईहायां प्रवृत्तिमार्गे तत ईहातः अनीहायां निवृत्तिमार्गे तु अभयं मोक्षो भवतीति च स्मृत्वा फलसंकल्पाद्विरमेत् पाठांतरे

[illegible] फलविपर्ययं [illegible]

राम

भा०४० एन हि दृष्टेणेति सुखायेति त्रिभिः दुःखस्यानिवृत्तिः सुखस्याप्राप्तिः ६० विज्ञा॰ उद्यमे प्रवीणा वयमित्यभिमानवतां
स्थानत्रयविलक्षणां तुरीयां बुधा ६१ दृष्टश्रुताभिर्मात्राभिरैहिकामुष्मिके विषये। स्वेनतेजसा विवेकबलेन
६२ न चातः परः पुरुषार्थोऽस्तीत्याह एतावानिति योगेन नैपुण्येयस्याः सा बुद्धिर्येषां परस्यात्मन एकदर्शनमि

सुखाय दुःखमोक्षाय कुर्वाते दंपती क्रियाः। ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ६० एवं विपर्ययं
बुधान्नृणां विज्ञाभिमानिनां आत्मनश्च गतिं सूक्ष्मां स्थानत्रयविलक्षणां ६१ दृष्टश्रुताभिर्मात्राभि
र्निर्मुक्तः स्वेन तेजसा ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत् ६२ एतावानेव मनुजैर्योगनैपुण्य
बुद्धिभिः स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ६३ त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम
ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यति ६४ शुक उ० आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः
५३ पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे हरिः ६५ इति श्रीभागवते महापुराणे षष्ठस्कंधे षोडशोध्या
यः शुक उ० यतश्चांतर्हितोनंतस्तस्यै कृत्वा दिशे नमः। विद्याधरश्चित्रकेतुश्चचार गगने चरः
१ स लक्षं वर्षलक्षाणामव्याहतबलेंद्रियः। स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः २ कुला
चलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु रेमे विद्याधरस्त्रीभिर्गापयन्हरिमीश्वरं ३

तियन्नु एतावानेव ६३ ५ इति षष्ठे षोडशः। ततः सप्तदशेऽमोघमहर्द्धिप्राप्यं खेचरन्। विहस्य गिरिशं शापाद्दुर्माया राम
हृत्रतामगतः। यतः यस्यांतस्यै दिशे नमः नमनं कृत्वा। स विद्याधरस्त्रीभिर्हरिं गापयन् रेमे इति द्वयोरन्व ५३
यः अव्याहतं बलमिंद्रियपाटवं च यस्य नानाविधाः संकल्पेनैव सिद्धयो यासु तासु ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अकस्माद्द्भुतैश्वर्यगर्वात्प्राचीनकर्मतः आसुरीं योनिमापन्नो भवानीशापतः स तु तदाह एकदेत्यादिना अंकीकृ
तां उत्संगे नैकीकृत्य देवीं बाहुनाऽऽलिंग्य स्थितं तं उवाच जहास च तस्यान्तिके स्थितः सन् ५ धर्मं वक्ता वदति शरी
रिणां मध्ये मुख्यश्च भार्यया मिथुनीभूय चास्ते ६ ७ अगाधा गंभीरा धीर्यस्य सः ९ न तस्य वीर्यप्रभावं विद्

एकदा स विमानेन विष्णुदत्तेन भास्वता गिरिशं ददृशे गच्छन् परीतं सिद्धचारणैः ४ आलिंग्यांऽकीकृ
तां देवीं बाहुना मुनिसंसदि उवाच देव्याः शृण्वंत्या जहासोच्चैस्तदंतिके ५ चित्रकेतु० एष लोक
गुरुः साक्षात् धर्मं वक्ता शरीरिणां आस्ते मुख्यः सभायां वै मिथुनीभूय भार्यया ६ जटाधरस्ती
व्रतपा ब्रह्मवादीसभापतिः अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा ७ प्रायशः प्राकृताश्चा
पि स्त्रियं रहसि बिभ्रति अयं महाव्रतधरो बिभर्ति सदसि स्त्रियं ८ भगवानपि तच्छ्रुत्वा प्रहस्या
गाधधीर्नृप तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः ९ श्रीशुक उवाच इत्यतद्वीर्यविदुषि
ब्रुवाणे बह्वशोभनं रुषाह देवी धृष्टाय निर्जितात्माभिमानिने १० पार्वत्युवाच अयं किमधु
नाल्लोके शास्ता दंडधरः प्रभुः अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत् ११ न वेद धर्मं
किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यति
वर्तिनं हरं १२ एषामनुध्येयपदाब्जयुग्मं जगद्गुरुं मंगलमंगलं स्वयं यः क्षत्रबंधुः परिभूय सू
रीन् प्रशास्ति धृष्टस्तदयं हि दंड्यः १३

न तस्मिन् निर्जितात्माभिमानिने जितेंद्रियोऽहमित्यभिमानवते ५ इति रुषा क्रोधेनाह विरुद्धं प्रकर्षेण करोतीति वि
प्रकृत् अतिवर्तिनं शास्त्रमतिक्रम्य वर्तमानशीलं ये नो निषेधंति निवारयंति १२ एषां ब्रह्मादीनामनुध्येयप
दाब्जयुग्मं यस्य तं मंगलमंगलं परमधर्ममूर्तिं सूरीन् परिभूय अज्ञानू कृत्वा ३ जगद्गुरुं यः प्रशास्ति तस्मात् १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ष॰ ननु हरिभक्तो न दंडार्ह इति चेत्तत्राह नायं साधुभिः परिसेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति। यतः संभावितात्म
हमधिक इति दृप्तो ऽसि मतिर्यस्य अत एव स्तब्धः अनम्रः मदेकस्व यं दंडार्हं निश्चिस न प्रसाद १४ पुत्र यथा भूयो
महतां किल्बिषमपराधं न कर्ता न करिष्यसि तथा याहीत्यर्थः १५ सर्वैरपि प्राचीनकर्मप्राप्तमेव १७ अयं च सं
सारे चक्रस्वभाव एव न चित्रं इत्याह संसारचक्र इति १८ अत एवात्र मम च तव च न कोपि दोष इत्याह नैवेति

नायमर्हति वैकुंठपादमूलोपसर्पणं संभावितमतिः स्तब्धः साधुभिः पर्युपासितं १४ अतः पापी
यसीं योनिमासुरीं याहि दुर्मते यथेह भूयो महतां न कर्ता पुत्र किल्बिषं १५ श्रीशुक उवाच एवं
शप्तश्चित्रकेतुर्विमानादवरुह्य सः प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत १६ चित्रकेतुरुवा
५४ प्रतिगृह्णामि ते शापमात्मनोंजलिनांबिके देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत् १७ च सर्वदा ग॰ ध्यै॰ ४
संसारचक्र एतस्मिन् जंतुरज्ञानमोहितः भ्राम्यन् सुखं च दुःखं च भुंक्ते सर्वत्र १८ नैवात्मा न परश्चा
पि कर्ता स्यात्सुखदुःखयोः कर्तारं मन्यतेऽप्राज्ञ आत्मानं परमेव च १९ गुणप्रवाह एत
स्मिन् कः शापः को न्वनुग्रहः कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा २० एकः सृ
जति भूतानि भगवानात्ममायया एषां बंधं च मोक्षं च सुखं दुःखं च निष्कलः २१ श्री

एवं तावत्सुखदुःखादिकं सर्वमीशकृत्योक्तं १९ इदानीं तदपि वस्तुतो नास्तीत्याह गुणानां मायामयानां प्र राम
वाहे संसारे २० ननु मायागुणानां चेदयं प्रवाहस्तर्हि तेषां जडत्वाद्बंधमोक्षाद्यनुभवो न स्यात्तत्राह ५४
एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति एषां बंधादिकं च सृजति निष्कलः स्व
यं बंधादिशून्यः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंभूतविषमस्रष्टेशोनस्यकिंकारणंप्रियादिवैषम्याभावादित्याशंक्ययद्यपिप्रियाद्योनसंतितथाऽपित
त्कर्मवशात्सर्वंघटतइत्याह नतस्येतिद्वाभ्यां प्रतीपः अप्रियः नज्ञातिर्बंधुश्चेत्यर्थः तत्रहेतुः सर्वत्रस
मस्य तत्कुतः निरंजनस्यनिःसंगस्य अतएवतन्निमित्तंदुःसुखरागोनास्ति रागानुबंधोरोषःकुतः स्या
त् २२ यद्यप्येवंतथाऽपितस्यशक्तयामाययायोविसर्गः पुण्यपापादिलक्षणंकर्मएषांशरीरिणांसुखा

नतस्यकश्चिद्दयितःप्रतीपोनज्ञातिर्बंधुर्नपरोनचस्वः समस्यसर्वत्रनिरंजनस्यसुखेनरागःकु
तएवरोषः २२ तथापितच्छक्तिविसर्गएषांसुखायदुःखायहिताहिताय बंधायमोक्षायचमृ
त्युजन्मनोः शरीरिणांसंसृतयेऽवकल्पते २३ अथप्रसादयेनत्वांशापमोक्षायभामिनि॥
यन्मन्यसेह्यसाधूक्तंममतत्क्षम्यतांसति २४ श्रीशुकउवाच इतिप्रसाद्यगिरिशौचित्रके
तुररिंदम जगामस्वविमानेनपश्यतोःस्मयतोस्तयोः २५ ततस्तुभगवान्रुद्रोरुद्राणीमि
दमब्रवीत् देवर्षिदैत्यसिद्धानांपार्षदानांचशृण्वतां २६ दृष्टवत्यसिसुश्रोणिहरेरद्भुतक
र्मणः माहात्म्यंभृत्यभृत्यानांनिस्पृहाणांमहात्मनां नारायणपराःसर्वेनकुतश्चनबिभ्यति स्य १
स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः २८

ष्ट्यर्थमवकल्पतेसमर्थोभवति यथोक्तंगीतासु भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितइति २३ अथ
तस्मात्हेभामिनिकोपनेत्वांकेवलंप्रसादयामिननुशापमोक्षाय नहिकिंप्रसादनेनाऽतआह मसा
नः केसाध्वपिअसाधुर्वोक्तंमन्यसेतत्तुत्वयाक्षम्यतां २४ गिरिशौभवानीशंकरौप्रसाद्यास्मयतोर्विस्मयं
कुर्वतोः सतोः २५ २८ स्वर्गादिष्वपितुल्योर्थःप्रयोजनमितिद्रष्टुंशीलंयेषांतेतथा २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० तत्रतदुक्तमेवंहेतुमाह द्वाभ्यां देहिनांसुखदुःखमित्यादिद्वंद्वानिईश्वरस्यलीलयामाययाभवंति २८ तेषुचगु
णदोषविकल्पइत्येवमित्यन्वयः इष्टानिष्टभेदइवयः स्फुरतिसआत्मन्यर्थभेदः सुखादिभेदः पुंसः स्वप्नेयथा
६।२ अविवेककृतोभवति स्रजिवत्सर्पमालादिभिर्यथा तथैवकृतइत्यर्थः स्रग्वदितिवक्तव्येस्रजिवदित्यार्षं
पाठांतरंतुसुगमं ३० अतोभागवतानांनिस्पृहत्वमुचितमेवेत्याह वासुदेवइति ज्ञानवैराग्ययोर्वीर्यंबलंयेषां

देहिनांदेहसंयोगात्द्वंद्वानीश्वरलीलया सुखंदुःखंमृतिर्जन्मशापोऽनुग्रहएवच २९ अवि
वेककृतः पुंसोह्यर्थभेदइवात्मनि गुणदोषविकल्पश्चभिदेवस्रजिवत्कृतः ३० वासुदेवेभगव
तिभक्तिमुद्वहतांनृणां ज्ञानवैराग्यवीर्याणांनेहकश्चिद्व्यपाश्रयः ३१ नाहंविरिंच्योनकुमारना
५५ रदौनब्रह्मपुत्रामुनयः सुरेशाः विदामयस्येहितमंशकांशकानतत्स्वरूपंपृथगीशमानिनः
३२ नह्यस्यास्तिप्रियः कश्चिन्नाप्रियः स्वःपरोपिवा आत्मत्वात्सर्वभूतानांसर्वभूतप्रियोह
रिः ३३ तस्यचायंमहाभागश्चित्रकेतुः प्रियोऽनुगः सर्वत्रसमदृक्शांतोह्यहंचैवाऽच्युत
प्रियः ३४ तस्मान्नविस्मयः कार्यः पुरुषेषुमहात्मसु महापुरुषभक्तेषुशांतेषुसमदर्शिषु
३५ शुकउ० इतिश्रुत्वाभगवतः शिवस्योमाभिभाषितं बभूवशांतधीराजन्देवीविगतवि
स्मया ३६

तेषांव्यपाश्रयः विशिष्टबुध्याआश्रयणीयोऽर्थोनास्ति ३१ अस्यचहरिदासत्वेनतत्प्रभावत्वेनतत्स्वभावत्वा राम
न्नेतच्चित्रमितिवक्तुंहरेर्माहात्म्यमाह नाहमितिद्वाभ्यां ईहितमभिप्रायंलीलांवा यद्वावयंनविद्मस्तार्थातस्य ५५
स्वरूपमंशकांशकाअपिसंतः पृथगीशमानिनोनविदुरेव ३२ अतएवहरिरपिसर्वेषांभूतानांप्रियः ३३
अहंचैवाच्युतस्यप्रियः तस्मान्ममास्मिन्क्रोधोनाभूदितिभावः ३४ ३६ ६।२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्व। प्रतिशापं दातुमलं तमः समर्थतमोपि ३७ ॰ असुरजातेः असुरभावेनोत्पत्तेः भगवतिमतेश्च ३९ ४० एतत्पृ
ते ४१ षष्ठे सप्तदशः आदित्यानां चतुर्थस्य त्वष्टुर्वंशप्रसंगतः प्रोक्तमिंद्रकृतं विश्वरूपहत्त्व वधादिकं अ
दितेः पंचमादीनां पुत्राणामन्वयोक्तितः अष्टौ दितेर्गर्भे शक्रेण मरुतां मितिः त्वष्टुर्वंशमनुक्रम्य स
आदिसानां प्रसंगं यथाक्रमं अथान्येषां वंशानाह मुनीश्वरः दक्षकन्यान्वयानुकथने अदित्याः द्वादशपुत्राः दक्ष
२ विवस्वानर्यमा पूषा त्वष्टाथ सविता भगः धाता विधाता वरुणो मित्रः शक्र उरुक्रम इति तत्र अ

इति भागवतो देव्याः प्रतिशप्तुमलं तमः मूर्ध्ना सं जगृहे शापमेतावत्साधुलक्षणं ३७ जज्ञे त्व
ष्टुर्दक्षिणाग्नौ दानवीं योनिमाश्रितः वृत्र इत्यभिविख्यातो ज्ञानविज्ञानसंयुतः ३८ एतत्ते स
र्वमाख्यातं यन्मां त्वं परिपृच्छसि वृत्रस्यासुरजातेश्च कारणं भगवन्मतेः ३९ इतिहासमि
मं पुण्यं चित्रकेतोर्महात्मनः माहात्म्यं विष्णुभक्तानां श्रुत्वा बंधाद्विमुच्यते ४० य एतत्प्रा
तरुत्थाय श्रद्धया वाग्यतः पठेत् इतिहासं हरिं स्मृत्वा स याति परमां गतिं ४१ इति श्रीभा
गवते महापुराणे षष्ठस्कंधे सप्तदशोऽध्यायः श्रीशुक उवाच पृश्निस्तु पत्नी सवितुः सा
वित्रीं व्याहृतीं त्रयीं अग्निहोत्रं पशुं सोमं चातुर्मास्यं महामखान् १ सिद्धिर्भगस्य भार्यां
गा महिमानं विभुं प्रभुं आशिषं च वरारोहां कन्यां प्रासूत सुव्रताः २ धातुः कुहूः सिनीवाली
राका चानुमतिस्तथा सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् अग्नीन्पुरीष्यानाधत्त क्रि
यायां समनंतरः ३

ध्यायांतमारभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्येदानीं सवितुर्वंशमाह। पृश्निस्त्विति सा
वित्रीमित्यादिषु प्रासूतेत्युत्तरस्यानुषंगः पशुं पशुयागं महामखान्पंच यज्ञान् १२ धातुर्भार्या कुहूः सा
यं पुत्रं प्रासूत एवं सिनीवाली दर्शमित्यनुक्रमात् समनंतरो विधाता क्रियायां भार्यायां पुरीष्यानग्नीन्पं

प्रोक्ताः २

ह्र: २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० वर्षणी वरुणस्य भार्यासीत् पूर्वं ब्रह्मणः पुत्रो भृगुर्यस्यां पुनर्जातः वाल्मीकिर्वरुणस्यैव पुत्रः भवत् एतौ वरुणस्या
स्मा० ८ साधारणौ पुत्रौ ४ तथोत्सर्गो द्वयो मित्रस्यासाधारणः तयोरेव साधारणौ द्वौ पुत्रौ चाह अगस्त्यश्च वसिष्ठश्च ऋषी
मित्रावरुणयोरभवतां युक्त उभावपि कुंभे रेतः सिषिचतुः तत्र ह जातौ विषितौ नमोभिः कुंभे रेतः सि
षिचतुः समानमिति श्रुतः द्रुतं स्कन्नं ५ ८ पश्चात् अष्टमस्कंधे एवं अथेति कश्यपस्यादितौ पुत्राणां द्वा
दशादित्यानां संततिमुक्त्वा दितेः पुत्रान् कथयामीत्यर्थः हिरण्यकशिपु हिरण्याक्षश्चेति अथमे द्वाते

चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः वाल्मीकिश्च महायोगी वल्मीकादभवत्किल ४
अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोरृषी रेतः सिषिचतुः कुंभे उर्वश्याः संनिधौ द्रुतं ५ रेवत्यां
मित्र उत्सर्गमरिष्टं पिप्पलं व्यधात् पौलोम्यामिंद्र आधत्त त्रीन् पुत्रानिति नः श्रुतं ६ जयंत
५६ मृषभं तात तृतीयं मीढुषं प्रभुः ७ उरुक्रमस्य देवस्य मायावामनरूपिणः कीर्तौ पत्न्यां बृ
हच्छ्लोकस्तस्यासन् सौभगादयः ८ तत्कर्मगुणवीर्याणि काश्यपस्य महात्मनः पश्चाद्वक्ष्या
महेऽदित्यां यथैवावततार ह ९ अथ कश्यपदायादान् दैतेयान् कीर्तयामि ते यत्र भागवतः
श्रीमान् प्रह्लादो बलिरेव च १० दितेर्द्वावेव दायादौ दैत्यदानववंदितौ हिरण्यकशिपुर्नाम हि
रण्याक्षश्च कीर्तितौ ११ हिरण्यकशिपोर्भार्या कयाधुर्नाम दानवी जंभस्य तनया दत्ता सुषुवे च ५४
तुरः सुतान् संह्रादं प्रागनुह्रादं ह्रादं प्रह्रादमेव च तत्स्वसा सिंहिका नाम राहुं विप्रचित्तिनोऽग्र
हीत् १३ शिरोऽहरद्यस्य हरिश्चक्रेण पिबतोऽमृतं संह्रादस्य कृतिर्भार्यासूत पंचजनं ततः १४
ह्रादस्य धमनिर्भार्यासुत वातापिमिल्वलं योऽगस्त्याय त्वतिथये पेचे वातापिमिल्वलः १५ राम
द्वे० तौ च कीर्तितौ तृतीयस्कंधे ११ १२ विप्रचित्तिर्दानवात् राहुं सकाशाद्राहुं पुत्रमग्रहीत् संह्रादात् सूत १४ योऽमपरू ५६
पं वातापिं पेचे च तमिल्वलः यः पेचे तं च वातापिं चासूतेत्यन्वयः १५ ट

पुण्यकीर्तिः १८ ततोबलेः सकाशादभवत् तस्यबलेरनुभावः सुश्लोक्यः गुणाकीर्त्यर्हः। यद्वा अनुभाव्यतेसद्भिः स्तूयतइत्यनु
भावंसुश्लोकंयं यज्ञाइतिशेषः। १९ तस्यगणेषु मुख्यतांप्राधान्यं २० सात्मतांसमानरूपतां २१ सात्म्यंदेवत्वं प्रापि
बहु २ ताः २२ २ आहततसादरं। अल्पंमिताक्षरं अर्थवत् अर्थयुक्तं सत्रमयनमाश्रयोयस्यहे सत्रायणशौनक २४
पार्ष्णिग्राहेणपृष्ठतः सहायेन २५ भ्रातृहंतारंइंद्रंमारयित्वासुखिनीस्यामितिचिंतयामासदितिः उल्वणत
रं अक्लिन्नहृदयंकठिनचित्तं २६ ननुराजास्वदेहरक्षार्थमन्येषांघातंकरोत्येव किमत्रचित्रंतत्राह क्रोमी

अनुह्लादस्यसूर्म्यायांबाष्कलोमहिषस्तथा विरोचनस्तुप्राह्लादिर्देव्यांतस्याऽभवद्बलिः॥ १८ बाण
ज्येष्ठंपुत्रशतमशनायांततोभवत् तस्यानुभावः सुश्लोक्यः पश्चाद्देवाभिधास्यते १९ बाणआराध्य
गिरिशंलेभेतद्गणमुख्यतां यत्पार्श्वेभगवानास्तेह्यद्यापिपुरपालकः॥ २० मरुतश्चदितेःपुत्राश्च
त्वारिंशन्नवाधिकाः॥ तआसन्नप्रजाःसर्वेनीताइंद्रेणसात्मतां २१ राजोवाच कथंतआसुरंभावम
पोह्यौत्पत्तिकंगुरो इंद्रेणप्रापिताःसात्म्यंकिंतत्साधुकृतंहितैः॥ २२ इमेश्रद्दधतेब्रह्मनृषयोहि
मयासह परिज्ञानायभगवंस्तन्नोव्याख्यातुमर्हसि २३ सूतउवाच तद्विष्णुरातस्यसबादरायणि
र्वचोनिशम्याहृतमल्पमर्थवत् सभाजयन्सन्निभृतेनचेतसाजगादसत्रायणसर्वदर्शनः॥ २४ श्रीशु
कउवाच हतपुत्रादितिःशक्रपार्ष्णिग्राहेणविष्णुना मन्युनाशोकदीप्तेनज्वलंतीपर्यचिंतयत्
२५ कदानुभ्रातृहंतारमिंद्रियाराममुल्बणं अक्लिन्नहृदयंपापंघातयित्वाशयेसुखं २६
कृमिविड्भस्मसंज्ञासीद्यस्येशाभिहितस्यच भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः २७

मे, तिईशःप्रभुरित्यभिहितस्यापियस्यपूर्वेषांराज्ञांदेहस्यमरणोत्तरंत्रिदिनावस्थितस्यकृमयइतिश्वादिभिर्भक्षि
तस्यतुविष्ठेति दग्धस्यभस्मेतिसंज्ञाआसीत् तत्कृतेतस्यदेहस्यार्थंयोभूतेभ्योद्रुह्यतिसकिंस्वार्थंवेदनवेदेवत
त्रहेतुः यतोभूतद्रोहान्निरयोभवति २७

नं ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰१० दे॰ इदंब्रह्मादिकं ध्रुवंनित्यं आशासानस्य मन्यमानस्य अनतुन्नदं उद्धं खलं चेतो यस्य तस्येंद्रस्य यो मदस्तस्य शोष
कः पुत्रोमेयनहेतुना भूयात् भवेत् २८ भर्तुः प्रियाचरणमेवेति भावेन साभर्तुः प्रियमसकृदाचचार २९ ३०
विवशः स्त्रीपरतंत्रः सनु बाढं तवमनोरथं पूरयिष्यामीतियदाहतन्नचित्रं ३१ तत्रहेतुमाह विलोक्येति पं
कांतभूतानिनिःसंगानि मैथुनेन सृष्टिरहितानि अथ स्वदेहार्द्धमेव स्त्रियं चक्रे ३२ एवं स्त्रियाशुश्रूषितः सनु ३३

आशासानस्य तस्येदं ध्रुवमुन्नद्धचेतसः मदशोषक इंद्रस्य भूयाद्येन सुतो हि मे २८ इति भावेन सा
भर्तुराचचारासकृत्प्रियं शुश्रूषयानुरागेण प्रश्रयेण दमेन च २९ भक्त्यापरमया राजन् मनो
ज्ञैर्वल्गुभाषितैः मनो जग्राह भावज्ञा सुस्मितापांगवीक्षणैः एवं स्त्रिया जडीभूतो विद्वानपि
विदग्धया बाढमित्याह विवशो न तच्चित्रं हि योषिति ३१ विलोक्यैकांतभूतानि भूतान्यादौ प्र
५८ जापतिः स्त्रियं चक्रे स्वदेहार्द्धं यया पुंसां मतिर्हृता ३२ एवं शुश्रूषितस्तात भगवान्कश्यपः
स्त्रियाः प्रहस्य परमप्रीतो दितिमाहाभिनंद्य च ३३ कश्यप उवाच वरं वरय वामोरु प्रीत
स्तेहमनिंदिते स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः ३४ पतिरेव हि नारीणां दैवतं प
रमं स्मृतं मानसः सर्वभूतानां वासुदेवः श्रियः पतिः ३५ स एव देवतालिंगैर्नामरूपविक
ल्पितैः ईज्यते भगवान्पुंभिः स्त्रीभिश्च पतिरूपधृक् ३५

इह च कारात्परत्र च अगमः अप्राप्यः ३४ ननु परमेश्वरे सुप्रीते सर्वकामप्राप्तिरिति प्रसिद्धं तत्राह पतिरे राम
वेति ननु मनसि स्थितः श्रीवासुदेव एव लक्ष्मीपतिः परं दैवमिति प्रसिद्धं सत्यं स एव स्वाधिकारेण रूप ५८
भेदैः पूज्यत इत्याह मानस इति सार्द्धेन देवतालिंगैः मूर्तिभिरुपलक्षितैः तान्येवाह नामरूपादि रूपव

(right margin, written sideways, partly legible:) ...वाहितामां विविधं कालितैः २५

३७ इंद्रहणं इंद्रहंतारं अमृत्युं मृत्युशून्यं। येनं इंद्रेण विष्णुना सहायेन घातितौ ३८ ४० स्वभावमनुवर्त्तमानाया
योषितः कोतिक्रमोऽपराधः ४१ स्वभावमेवाह द्वाभ्यां शरत्पद्मस्य वो त्सवो विकाशो यस्मिन् श्रवणे श्रुती
तयोरमृतं क्षुरधारोपमं चित्तं ४२ स्वाशिषात्मनो स्वार्थकामनयाऽत्यंतमप्रेष्ठत्वेन प्रतीयमानानां ४३ तत्रेद
मुपकल्प्यते योगं भवति अयं भावः वेत्स्यं व्रतं तां वदुपदेक्ष्यामि तेनैवास्याः शुद्धचित्तायाः इंद्रघ्नो धाति

तस्मात्पतिव्रतानार्याः श्रेयस्कामाः सुमध्यमे यजेतेनन्यभावेन पतिमात्मानमीश्वरं ३६ सोहं त्वयाऽर्चि
तो भद्रे ईदृग्भावेन भक्तितः तत्ते संपादये कामं असतीनां सुदुर्लभं ३७ दितिरुवाच वरदो यदि मे ब्रह्म
न् पुत्रमिंद्रहणं वृणे अमृत्युं मृतपुत्राहं येन मे घातितौ सुतौ ३८ निशम्य तद्वचो विप्रो विमनाः पर्य
तप्यत अहो अधर्मः सुमहानद्य मे समुपस्थितः ३९ अहो अर्थेंद्रियारामो योषिन्मय्येह मायया ग
त ५
हीतचेताः कृपणः पतिष्ये नरके ध्रुवं ४० कोऽतिक्रमोऽनुवर्तन्त्याः स्वभावमिह योषितः धिङ् मां बताबु
धं स्वार्थे यदहं त्वजितेंद्रियः ४१ शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतं हृदयं क्षुरधाराभं स्त्री
णां को वेद चेष्टितं ४२ नहि कश्चित्प्रियः स्त्रीणामंजसा स्वाशिषात्मनां पतिं पुत्रं भ्रातरं वाप्यघ्नंत्यर्
थे घातयंति च ४३ प्रतिश्रुतं ददामीति वचस्तन्न मृषा भवेत् वधं नार्हति चेंद्रोपि तत्रेदमुपक
ल्प्यते ४४ इति संचिंत्य भगवान् मारीचः कुरुनंदन उवाच किंचित्कुपित आत्मानं च विगर्हयन्
४५ कश्यप उवाच पुत्रस्ते भविता भद्रे इंद्रहा देवबांधवः संवत्सरं व्रतमिदं यद्यंजो धारयिष्यसि
४६

वर्त्तिष्यते पुत्रस्त्वमर्त्यो भविष्यति दीर्घकालत्वेन व्रतस्य कथंचिद्गुणेप सतीद्रस्य वधोऽपि न भविष्यतीति
४४ ५ हे भद्रे अंजः यथावद्यदि धारयिष्यसि तर्हींद्रहा भविष्यति वेगुणे पुनर्देवबांधवो भविष्यति वेत्स्यवता
व्रतस्य कथंचिद्वैगुण्येऽपि मनिसर्वथा विकल्पाभावात् ४६

फ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानि १

भा० ष० कार्याण्यावश्यकानि व्रतं यानि निघ्नंति नावश्यकानि च निषिद्धानि किंत्वभ्यनुज्ञातानि सर्वाण्यपि ब्रूहि ४७ तत्रे
केत्रिशन्निषेधानाह नहिंस्यादिति पंचभिः न शप्तान्नाक्रोशेत् यदमंगलं कपालास्थ्यादिकं तन्न स्पृशेत् ४८ ॥
नाप्सु प्रविश्य स्नायात् दूर्वैर्विधृतां स्रजं पुनर्न धारयेत् ४९ भोजने पंच निषेधानाह नोच्छिष्टमिति चंडिकान्नं भद्र

दितिरुवाच धारयिष्ये व्रतं ब्रह्मन् ब्रूहि कार्याणि यानि मे यानि चेह निषिद्धानि न व्रतं घ्नंति यान्युत ४७
कश्यप उवाच नहिंस्यान्नृतजातानि निनशं पन्नान्न नृतं वदेत् नछिंद्यान्नखरोमाणि न स्पृशेत् यदमंगलं ४८
नाप्सु स्नायान्न कुप्येत न संभाषेत दुर्जनैः नवसीताधौतवासः स्रजं च विधृतां क्वचित् ४९ नोच्छिष्टं
चंडिकान्नं च सामिषं वृषलाहृतं भुंजीतोदक्ययादृष्टं पिबेदंजलिना त्वपः ५० नोच्छिष्टाऽस्पृष्ट
५८ सलिला संध्यायां मुक्तमूर्द्धजा अनर्चितासंयतवाग्नासंवीता बहिश्चरेत् ५१ नाधौतपादाऽप्र
यता नार्द्रपान्नोदकशिराः शयीत नाऽपराङ् नान्यैर्न नग्ना न च संध्ययोः ५२ धौतवासाः शु
चिर्नित्यं सर्वमंगलसंयुता पूजयेत् प्रातराशात् प्राक् गोविप्रान् श्रियमच्युतं ५३ स्त्रियो वीरव
तीश्चार्चेत्स्रग्गंधबलिमंडनैः पतिं चार्च्योपतिष्ठेत ध्यायेत्कोष्ठगतं च तं ५४ सांवत्सरं पुंसवनं
व्रतमेतदविप्लुतं धारयिष्यसि चेत्तुभ्यं शक्रहा भविता सुतः ५५ बाढमित्यभिप्रेत्याथ दितीरा भ्यु
जन्महामनाः कश्यपं गर्भमाधत्त व्रतं चाञ्जो दधार सा ५६ श्रीराम जय राम जय जय राम राम ५८

काल्ये निवेदितं पिपीलिकादिदूषितं वा अंजलिना त्वपानपिबेत् ५० गृहाद्बहिर्निर्गमे सप्त निषेधानाह नो
च्छिष्टेति अनर्चिता मंडनहीना असंवीता अप्रावृता ५१ शयने षण्निषेधानाह नाधौतपादेति नापराह्ने पश्चि
माशिराः ५२ कार्याण्याह धौतवासा इति द्वाभ्यां प्रातराशात् प्रथमभोजनात् ५३ वीरवतीर्जीवद्भर्तृकाः स्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिरिंद्रो व्रतस्याच्छिद्रं प्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः साधुवेषः मृगहा लुब्धको यथा मृगवंचनाय मृगवेषो भव
तितद्वत् ५९ केन मे शिवं स्यादिति चिंतां प्राप्तः ६० अस्पृष्टवारिश्चासावधौतांघ्रिश्च ६१ निद्रया अपहृतं चे

मातृस्वसुरभिप्रायमिंद्र आज्ञाय मानद शुश्रूषणेनाश्रमस्थां दितिं पर्यचरत्कविः ५७ नित्यं
वनात्सुमनसः फलमूलसमित्कुशान् पत्रांकुरमृदोऽपश्च काले काल उपाहरत् ५८ एवं त
स्या व्रतस्थाया व्रतछिद्रं हरिर्नृप प्रेप्सुः पर्यचरन् जिह्मो मृगहेव मृगाकृतिः ५९ नाध्यगच्छ
द्व्रतछिद्रं तत्परोऽथ महीपते चिंतां तीव्रां गतः शक्रः केन मे स्याच्छिवं त्विह ६० एकदा सा तु सं
ध्यायामुच्छिष्टा व्रतकर्शिता अस्पृष्टवार्य्यधौतांघ्रिः सुष्वाप विधिमोहिता ६१ लब्ध्वा तदंतरं शक्रो
निद्रापहृतचेतसः दितेः प्रविष्ट उदरं योगेशो योगमायया ६२ चकर्त सप्तधा गर्भं वज्रेण
कनकप्रभं रुदंतं सप्तधैकैकं मा रोदीरिति तान् पुनः ६३ ते तमूचुः पाद्यमानाः सर्वे प्रांज
लयो नृप नो जिघांससि किं इंद्र भ्रातरो मरुतस्तव ६४ मा भैष्ट भ्रातरो मह्यं यूयमित्याह
कौशिकः अनन्यभावान् पार्षदानात्मनो मरुतां गणान् ६५ न ममार दितेर्गर्भः श्रीनिवा
सानुकंपया बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान् ६६ सकृदिष्ट्वादिपुरुषं पुरु
षो याति साम्यतां संवत्सरं किंचिदूनं दित्या यद्धरिरर्चितः ६७ श्रीराम श्रीराम ॥ श्री ॥

तो यस्याः ६२ मारोदीरित्युपलालयन्निव तान् पुनः सप्तधा चकर्त चिच्छेद ६३ ६४ कौशिक इंद्रः गणान् सप्तगणान्
[illegible] वै मरुत इति श्रुतेः ६६
सप्तगणा

सर्वैः सह ६८ ७१ दित्या निःकपटमुक्तः सन् इंद्रोपि निःकपटमेवाह । अंबेति लब्धमंतरं येन अर्थएव बुद्धिर्यस्य ७२

सञ्ज्ञैर्विद्रणापंचाशद्देवास्ते मरुतोभवन् व्यपोह्य मातृदोषं ते हरिणा सोमपाः कृताः ६८ दिति
रुत्थायददृशेकुमारानन लप्रभान् इंद्रेण सहितान् देवी पर्यतुष्यदनिंदिता ६९ अथेंद्र
माह ताताहमादित्यानां भयावहं अपत्यमिच्छंत्यचरं व्रतमेतत्सुदुष्करं ७० एकः संकल्पितः
पुत्रः सप्त सप्ताऽभवन्कथं यदि ते विदितं पुत्र सत्यं कथय मा मृषा ७१ इंद्र उवाच अंब तेहं व्यवसि
तमुपधार्यागतोऽतिकं लब्धांतरोऽछिदं गर्भमर्थबुद्धिर्न धर्मवित् ७२ कृत्तो मे सप्तधा गर्भ आ
सन् सप्त कुमारकाः तेपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे ७३ ततस्तत्परमाश्चर्यं वीक्ष्या
ध्यवसितं मया महापुरुषपूजायाः सिद्धिः काप्यानुषंगिकी ७४ आराधनं भगवत ईहमाना नि
राशिषः ये तु नेच्छंत्यपि परं ते स्वार्थकुशलाः स्मृताः ७५ आराध्यात्मप्रदं देवं स्वात्मानं जगदी
श्वरं को वृणीत गुणस्पर्शं बुधः स्यान्नरकेपि यत् ७६ तदिदं मम दौर्जन्यं बालिशस्य महीय
सि क्षंतुमर्हसि मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ७७ शुक उ० इंद्रस्तयाभ्यनुज्ञातः शुद्धभावेन
तुष्टया मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ७८ एवं ते सर्वमाख्यातं यन्मां त्वं परिपृच्छ
सि मंगलं मरुतां जन्म किं भूयः कथयामि ते ७९ इति श्रीभागवते महापुराणे षष्ठस्कंधेऽष्टा
दशोऽध्यायः

५९

७३ ४ अपि परं मोक्षमपि ७५ गुणस्पर्शं विषयभोगं बुधः को वृणीत यद्यस्मान्नरके
पि स्यात् महीयसि हे महत्तमे मृतः सन् उत्थितः ७७ ७९ षष्ठेऽष्टादशोध्यायः श्रीराम श्रीराम श्री

राम
५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊनविंशे व्रतं यत्प्रोक्तं कश्यपेन दितेर्व्रतं तदेव विस्तरेण लोकहिताय हरितोषणं तत्सप्रकारमिति शेषः १ मार्गशिरे
मासे शुक्लपक्षे आदितः प्रतिपदि २ अनुमन्त्र्य पृष्ट्वा शुक्ले दन्ते यस्याः सा शुक्लोदती धौतदन्ता अलंकृतासु ए २
ती पूजयेत् ३ आदौ तावन्नमस्कारमंत्रानाह त्रिभिः तेनु त्वं पर्याप्तं भव सर्वं न किंचिदन्येन तेनमस्ति अतः ४ के
वलं ते तुभ्यं नमोऽस्तु पर्याप्तो हेतवः निरपेक्षाय हे पूर्णकाम महाविभूतिपतये लक्ष्मीपतये सकला ४

राजोवाच व्रतं पुंसवनं ब्रह्मन् भवता यदुदीरितं तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति १ श्रीशुक उ
शुक्ले मार्गशिरे पक्षे योषिद्भर्तुरनुज्ञया आरभेत व्रतमिदं सार्वकामिकमादितः २ निशाम्य मरुतां
दतीशुक्ले ३ जन्म ब्राह्मणाननुमंत्र्य च स्नात्वा शुक्लो वसीतालंकृताम्बरे पूजयेत्प्रातराशात्प्राक् भगवंतं श्रिया
सह ३ अलं ते निरपेक्षाय पूर्णकाम नमोऽस्तु ते महाविभूतिपतये नमः सकलसिद्धये ४ यथा
त्वं कृपया भूत्या तेजसा महिमौजसा जुष्ट ईश गुणैः सर्वैस्ततोऽसि भगवान् प्रभुः ५ विष्णुपत्नि
महामाये महापुरुषलक्षणे प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ६ ॐ नमो भगवते म
हापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्बलिमुपहराणीति अनेनाः
र्य २ हरहर्मंत्रेण विष्णोरावाहनार्घपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदी ७ ॐ नमो भगव
पहाराणु २ पोपचारांश्च समाहित उपाहरेत् हविःशेषं तु जुहुयादनले द्वादशाहुतीः ८ भक्त्या सम्पूज
ते महापुरुषाय महाविभूतिपतये स्वाहेति श्रियं विष्णुं च वरदावाशिषां प्रभवावुभौ

सिद्धयोऽणिमाद्या यस्मिन् तस्मै ४ भोईश यथा यथावत् त्वं कृपादिभिर्जुष्टः अन्येश्च सत्यसंकल्पत्वादिभिः सर्वैर्गुणैः त स्याः २
ततस्त्वमस्मात् ५ महापुरुषस्य परमेश्वरस्य च लक्षणानि निरपेक्षत्वादीनि यस्याः संबोधनं ६ पूजामंत्रमाह ॐ नम ८
इंगिह विः शेषमुपहारावशिष्टं ७ होममंत्रमाह दर्शयति आमिति प्रकर्षेण भवतस्ताभ्यामिति प्रभवौ
पा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०९० ९ १० इज्यायज्ञास्तिनिवर्त्तकः पुरुषव्यापारो भावनाख्यः क्रिया लौकिकी ११ प्रत्ययो नाम रूपयोः प्रकाशः अपाश्रयः
तयोराधारः १२ १४ महापुरुषेनेत्यसाईश्वरबुद्ध्या उपनमेत् भजेत् १५ पतिश्च स्वयं प्रेमशीलः सन् पत्न्याः क

प्रणमेद्दंडवद्भूमौ भक्तिप्रह्वेण चेतसा दशवारं जपेन्मंत्रं ततस्तोत्रमुदीरयेत् ११ युवां तु विश्वस्य
प्र२ विभू जगतः कारणं परं इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया १० तस्या अधीश्वरः साक्षा
क्रियेयं२ त्वमेव पुरुषः परः त्वं स[र्व]यज्ञ ईज्येयं फलभुग्भवान् ११ गुणव्यक्तिरियं देवी व्यंजको गुणभुग्भ
वान् त्वं हि सर्वशरीर्यात्मा श्रीशरीरेंद्रियाशया नामरूपे भगवति प्रत्ययस्त्वमपाश्रयः १२
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ तथा म उत्तमश्लोक संतु सत्या महाशिषः १३ इत्यभि
६० ष्टूय वरदं श्रीनिवासं श्रिया सह तन्निःसार्योपहरणं दत्वाचमनमर्चयेत् १४ ततस्तुवीत
स्तोत्रेण भक्तिप्रह्वेण चेतसा यज्ञोच्छिष्टमव घ्राय पुनरभ्यर्चयेद्धरि १५ पतिं च परया भ
क्त्या महापुरुषचेतसा १५ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलः स्वयं पतिः बिभृयात्सर्वकर्म्मा
णि पत्न्या उच्चावचानि च १६ कृतमेकतरेणापि दंपत्योरुभयोरपि पत्न्यां कुर्यादनर्हाया
पतिरेतत्समाहितः १७ विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात्कथंचन विप्रान् स्त्रियो वीरव
तीः स्रक्गंधबलिमंडनैः अर्चेदहरहर्भक्त्या देवं नियममास्थिता १८ उद्वास्य देवं स्वधा राम
म्नि तन्निवेदितमग्रतः अद्यादात्मविशुद्ध्यर्थं सर्वकामर्द्धये तथा १९ ६०

र्माणि बिभृयात् तदनुकूलो भवेदित्यर्थः १६ यतः दंपत्योर्मध्ये एकतरेण कृतमुभयोरपि भवति १७॥
न विहन्यात् न विच्छिंद्यात् १८ १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वादशमासानित्युक्तिः कदाचित्तन्मध्ये मलमासः स्यात्तेन सह द्वादशसंख्यायां सत्यां शुद्धस्यैकस्य त्यागः स्यात्
हायनमित्युक्ते तन्मध्ये पातितस्तस्यापि प्रसंगः स्यात् तदुभयं वारयितुमुभयमित्युक्तं उपचरेत् श्वोभूते
प्रभाते सति २१ पयसि श्टतेन पक्वेन पाकयज्ञविधानेन पार्वणस्थालीपाकविधानेन २२ २३ सुप्रजा सत्पुत्रसे मू१
त्पुत्रत्वमित्यर्थः वाग्यतः मनूशेषं २४ ५ अवीरा विधवा धनेश्वरी सैंपियासुर्भगा सा सुभगा भगवति २६

एतेन पुंसवनविधिना मासान् द्वादश हायनं नीत्वाथोपरेमे त्वसाध्वी कार्तिके चरमे हनि २० श्वोभूते प्यूपस्पृ
मू२ श्यापः कृष्णमभ्यर्च्य पूर्ववत् २१ पयःशृतेन जुहुयात् चरुणा सह सर्पिषा पाकयज्ञविधानेन द्वादशैवाहु
तीः पतिः २२ आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः प्रणम्य शिरसा भक्त्या भुंजीत तदनुज्ञ
या २३ आचार्यमग्रतः कृत्वा वाग्यतः सह बंधुभिः दद्यात् पत्न्यै चरोः शेषं सुप्रजास्त्वं सुसौभगं २४ ए
तच्चरित्वा विधिवत् व्रतं विभोरभीप्सितार्थं लभते पुमानिह स्त्री त्वेतदास्थाय लभेत सौभगं श्रियं प्रजां जीव
पतिं यशो गृहं २५ कन्या च विंदेत समग्रलक्षणं पतिं त्ववीरा हतकिल्बिषां गतिं मृतप्रजा जीवसुता ध
नेश्वरी सुदुर्भगा सुभगा रूपमग्र्यं २६ विंदेद्विरूपा विरुजा विमुच्यते य आमयावींद्रियकल्पदेहं ए
तत्पठन्नभ्युदये च कर्मण्यनंततृप्तिः पितृदेवतानां २७ तुष्टाः प्रयच्छंति समस्तकामान् होमावसा
ने हुतभुक् श्रीहरिश्च राजन्महन्मरुतां जन्म पुण्यं दितेर्व्रतं चाभिहितं महत्ते २८ इति श्रीभाग
वते महापुराणे षष्ठस्कंधे पुंसवनव्रतकथनं नामैकोनविंशोऽध्यायः श्रीराम श्रीराम श्रीराम

यः आमयावी रोगी स विरुजा विशिष्टया रुजा विमुच्यते इंद्रियैः सहितं कल्पं देहं च विंदेदिति शेषः पठतु यावर्तेत
टी२ तस्य पितॄणां देवतानां चानंततृप्तिर्भवतीत्यर्थः २७ उपसंहरति राजन्निति महत्पुण्यं जन्म महद्व्रतं च षष्ठस्कंध
निगूढार्थपदभावार्थदीपिका सङ्क्षिप्ते समतामेषा यति श्रीधरनिर्मिता १ इति श्रीधरस्वामिविरचितायां भागव
तभावार्थदीपिकायां षष्ठस्कंधे एकोनविंशोऽध्यायः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ष०

भागवतषष्ठस्कंधसमाप्तं॥ ९०

६१

राम
६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतसप्तमस्कधः
प्रारभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा·स·

श्रीगणेशायनमः स्वभक्तपक्षपातेनतद्विपक्षविदारणं नृसिंहमद्भुतंवंदेपरमानंदविग्रहं १ ऊतिः पंचदशाध्यायैःसप्त
मेवर्ण्यतेधुना ऊतिश्चवासनाप्रोक्तातत्तत्कर्मानुसारिणी २ अशुभाश्चशुभाश्चेतिद्विधासाहेतुभेदतः अशुभा
महतांकोपाच्छुभामहदनुग्रहात् ३ हरेर्द्वारपयोर्यद्वद्वैकुंठेवसतोरपि चतुःसनरुषाविष्टौहिपापाशुभवासना
४ यथाहिदैत्यगर्भेपिप्रह्लादस्यसतःस्थिरा नारदानुग्रहाद्दासविष्णोःसाङ्गिवासना ५ स्वभक्तेचसदाविष्णु
र्द्विषंतमपिरक्षति तृतीयेप्यवज्ञास्याद्वक्रोदात्मसात्पुनः ६ अनामनीषिणा यतः कार्यामहदनुग्रहइत्ये
तदर्थभक्तानामत्रलक्षणमुच्यते ७ तत्रादौदशभिर्दैत्यतत्पुत्रमतिभेदतः महत्कोपानुकंपोत्थवासनाभेद

राजोवाच समः प्रियः सुहृद्ब्रह्मन्भूतानांभगवान्स्वयं इंद्रस्यार्थेकथंदैत्यानवधीद्विषमोय न१
था १ नह्यस्यार्थःसुरगणैःसाक्षान्निःश्रेयसात्मनः नैवासुरेभ्योविद्वेषोनोद्वेगश्चागुणस्य
१ हि २ इतिनःसुमहाभागनारायणगुणान्प्रति संशयःसुमहान्जातस्तद्भवांश्छेत्तुमर्हति ३

उच्यते ८ सहासनाचयुज्येतकर्मभिःशुद्धचेतसः परस्तपंचभिस्तस्मात्क्रियतेधर्मनिर्णयः ९ तत्र
तुप्रथमेध्यायेहिरण्यकशिपोःसुतेविष्णुभक्तेविरोधस्तद्विप्रशापजईर्यते १० यदुक्तंप्रवेस्कंधांतेहत
पुत्रादितिःशक्रपार्ष्णिग्राहेणविष्णुनामन्युनाशोकदीप्तेनज्वलंतीपर्यचिंतयदितितत्त्वदृष्टावाविष्मिनःप
रीक्षित्पृच्छतिसमइतित्रिभिः नहिसमस्यसुहृदश्चवैषम्यंनामास्ति नचप्रियस्यप्रीतिकर्तृत्ववैषम्यंयु राम
क्तमित्यर्थः १ किंचयस्यस्वयंप्रयोजनंसिद्धंतिसनतस्यपक्षपातोभवति येभ्योबिभेतितान्द्वेष्टिनाहंतिनचतु १
तद्वास्तीत्याहनहीति निःश्रेयसंपरमानंदएवात्मास्वरूपंयस्यासुरेभ्यश्चद्वेगोभयंनास्ति अ
तोविद्वेषोपिनास्त्येव तत्रहेतुःअगुणस्येति २ अतोनारायणस्यगुणान्अनुग्रहनिग्रहादीन्प्रति तत्रसंशयः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतस्य प्रह्लादस्य माहात्म्यं ४ कृष्णाय व्यासाय कृष्णं मुनिं नत्वेत्यर्थः ५ यस्मात्प्रकृतेः परः अतो निर्गुणः। अत
एवाजः अतएव अव्यक्तः रागद्वेषादिनिमित्तभूतं क्रियादिरहितः सोपि स्वमायागुणं सत्वादिकं आविश्य अ
धिष्ठायवाध्यात्मति यद्वा देवासुरादीनां या परस्परं बाध्यबाधकतां गतः प्राप्तः। तत्र हेतुर्जीवद्वारेत्यर्थः। ६
तत्र गुणानां स्वीयत्वे सति प्राकृतपुरुषवद्विषमः स्यान्न तु तदस्तीत्याह सत्वमिति ननु स्वेच्छया गुणाधिष्ठाने
नापि पक्षपातिवैषम्यं स्यादेव न तस्य कालकृतत्वादित्याह न तेषामिति सोऽर्हन उल्लासो वृद्धिः ७ सत्वस्य
स्य जयकाले देवादीनृषींश्च अभजत् तत्तद्देहं प्रविश्य वर्द्धयतीत्यर्थः। रजसो जयकाले तमसो जयकाल इत्य

शुक उवाच साधु पृष्टं महाराज हरेश्चरितमद्भुतं यत् भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनं ४ गीय
ते परमं पुण्यमृषिभिर्नारदादिभिः नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ५ निर्गुणोऽपि ह्यजो
ऽव्यक्तो भगवान् प्रकृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतां गतः ६ सत्वं रजस्तम इति प्र
कृतेर्नात्मनो गुणाः न तेषां युगपद्राजन् ह्रास उल्लास एव वा ७ जयकाले तु सत्वस्य देवर्षीन् र
जसोऽसुरान् तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ८ ज्योतिरादिरिवाभाति संघाता
न्न विविच्यते विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ९

न्वयः तस्य कालस्यानुगुणः सन् ८ समस्यापि निमित्तभेदान्नैव वैषम्यं दृष्टं ततः ज्योतिर्यथा काष्ठादिषु जलं यथा पा
त्रेषु आकाशं यथा घटादिषु तथा नानारूपश्चाभाति ननु तर्हि तद्देव विवेकेन प्रतीयते तत्राह संघातात् सुरा
दिदेहात् न विविच्यते न पृथक्प्रतीयते तर्हि तान् भजतीति कुतो ज्ञायते तत्राह विदन्तीति आत्मस्थं परमात्मा
नं कवयो निपुणाः मथित्वा कार्यदर्शनलिंगेन विचार्य जानन्ति अन्ततः स्वभावकर्मादिवादनिषेधेन विदन्तीति
पाठे लाभापि ज्ञानमेव आत्मापि ज्योतिरादिरिवेति दृष्टं यथा हि सूर्यकान्तादौ दाहदर्शनात् ज्योतिर्ज्ञायते यथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० ननु एवं मायागुणावेशेनैतद्वैषम्यं न स्वाभाविकमित्युक्तं न हि गुणपारतंत्र्यादनीश्वरत्वमाशंक्याह यदा आत्मनो जीवस्य भो-
गाय पुरः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुः
सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति १० यदा सिसृक्षुरित्यादि निर्दिष्टं शातृप्रती-
तं कालं परतंत्रं वारयन्नु प्रधानपुरुषपारतंत्र्यमपि वारयति कालमिति हे नरदेव प्रधानपुंभ्यां निमित्तभूताभ्यां
सत्यकृत् अमोघकर्ता ईश्वरस्तयोः सहकारित्वेनाश्रयभूतं चरंतं वर्तमानं कालं स्वयमेव सृजति स्वचेष्टारूपत्वा-

यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमा-
णस्तम ईरयत्यसौ १० कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत् य एष राजन्नपि का-
ल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान्प्रमिणात्यु-
२ रुश्रवाः ११ अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे १२
दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ वासुदेवे भगवति सायुज्यं चेदिभूभुजः १३ तत्रासीनं
सुरऋषिं राजा पांडुसुतः क्रतौ पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं १४ युधिष्ठिर उवाच
अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः १५ एतद्वेदितु-
मिच्छामः सर्व एव वयं मुने भगवन्निंदया वेनो द्विजैस्तमसि पातितः १६

कालस्य न तत्पारतंत्र्यमित्यर्थः तथापि प्रकृते किमायातं तत्राह य एष कालः स सत्त्वमेधयति अतो हि तेन ईशिता राम
सूर्थः पि ईश्वरोपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीव तत्प्रत्यनीकान्सुरप्रतिपक्षान् प्रमिणोति हिनस्त्येवस्य-
न्वयः उरुश्रवः कीर्तिर्यस्य सः कालशक्तिक्षोभितगुणगतवैषम्यं संनिधिमात्रेण तदधिष्ठातरि स्फुरतीति प्रकरणा- २
र्थः ११ इदानीं सायुज्यं न सुरपक्षपातेन किंतु ब्राह्मणशापेनासुरीं योनिं प्राप्तयोरनुग्रहार्थमेवेति च तत्रेति-
तिहासमुपक्षिपति अत्रैवेति दृष्ट्वेत्यादि हि तस्मात्पृष्टेत्यवधे चैद्यं भूभुजः शिशुपालस्य १३ ४ एकांतभक्तानामपि दि:
दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदद्भुतं हि १५ तस्य तु वेनवत् नरकपातप्रवाचितं इत्याह भगवन्निंदयेति तमसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दमघोषस्य सुतः शिशुपालः कलभाषणात् बाल्यकोमलभाषणमारभ्य संप्रति अधुनापि अमर्षी क्रोधी मत्सरी वा १७ श्वित्रः कुष्ठः १८ दुरवग्राह्यं दुःप्रापं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यं ईयतुः अभक्तस्यापि इदं तव वक्रत्वं यस्य तस्मिन् लयं सायुज्यं तज्ज्ञानकप्रामाण्येन सिद्धवन्निर्देशः १९ एतन्नु अद्भुततमं हि अत एव एतन्न भ्राम्यति भ्राम्यति भगवान् सर्वज्ञ स्त्वं ब्रूहि २० आभाष्य संबोध्य सीदंति निषीदंत्यस्यामिति सदः सभा तस्याः सदः सदसः शृण्वंत्याः सत्याः कथाः प्राहेत्यन्वयः २१ भगवन् निंदकस्य नरकपातेन भाव्यमिति वदंस्तव कोऽभिप्रायः भगवत्पीडाकरत्वेन वा तदभावेपि सुरापानादिवन्निषिद्धनिंदाचरणाद्वा तत्र तावद्देहाभिमानकृतनिंदानिमित्तत्वात् पीडादेर्न भगवत्यस्ति तदभावान्न पीडाश

दमघोषसुतः पाप आरभ्य कलभाषणात् संप्रत्यमर्षी गोविंदे दंतवक्त्रश्च दुर्मतिः १७ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः १८ कथं तस्मिन् भगवति दुरवग्राह्यधामनि पश्यतां सर्वलोकानां लयमीयतुरंजसा १९ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणं २० श्रीशुक उ० राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः २१ नारद उ० निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं प्रधानपरयो राजन्नविवेकेन कल्पितं २२ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा वैषम्यमिह भूतानां ममाहमिति पार्थिव २३ यन्निबद्धोभिमानोयं तद्वधात्प्राणिनां वधः तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते २४ श्रीरामनारायणवासुदेव ॥

कस्मादित्याह सार्धैस्त्रिभिः निंदनं दोषकीर्तनं न्यक्कारस्तिरस्कारः निंदनस्तवेत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितं २२ तदभिमानेन भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथान यस्य तु तेन न्वयः दंडस्ताडनं पारुष्यं निंदा तयोर्हेतुभूतयोर्हिंसा पीडा च भवति २३ यस्मिन्निबद्धोयमभिमान स्तस्य देहस्य वधाद्धधः अयं यथा तथा यस्याभिमानो नास्ति अतोस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते अभि मानाभावहेतुः कैवल्यात् अद्वितीयत्वेनाभिमतव्याभावात् वैषम्याभावहेतुः अखिलात्मनः सर्वात्मन इति तद्दि

ने २

ने ३

निषिद्धनिंदाचरणाद्वा इतिकर्तव्यस्य हिंसा

दमकर्तुः पर्यानीतिनाह्यपरस्यपि

दंडकर्तुर्नियंतुः २४ किमिति किं न केनापि २

भा०स० यस्माद्भगवतो निंदादिकृतं वैषम्यं नास्ति तस्माद्येनकेनाप्युपायेन ध्यायतस्तेनैव निंदादिकृतपापस्यापि नाशात्तत्सायुज्यं
युक्तमित्याशयेनाह तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगेनेत्यर्थः । युञ्ज्यान्मनः इति शेषः
यस्माद्देतत्स्वरूपोपायः पृथक् नेक्षते ततश्च वैरानुबंधः श्रेष्ठ इत्याह यथेति न तथा भक्तियोगेनापीति २५ २६ अत्र दृष्टांतः ।

तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक् २५ यथा वैरानुबंधेन
मर्त्यस्तन्मयतामियात् न तथा भक्तियोगेन इति मे निश्चिता मतिः २६ कीटः पेशस्कृता रुद्धः कुड्या
यां तमनुस्मरन् संरंभभययोगेन विंदते तत्सरूपतां २७ एवं कृष्णे भगवति मायामनुज ईश्वरे वैरे
ण पूतपाप्मानस्तमापुरनुचिंतया २८ कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः आवेश्य
तदघं हित्वा बहवस्तद्गतिं गताः २९ गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः संबंधाद्वृष्ण
२ यः स्नेहाद्यूयं भक्त्या वयं विभो ३० कतमोपि न वेनः स्यात्पंचानां पुरुषं प्रति तस्मात्केनाप्युपा
येन मनः कृष्णे निवेशयेत् ३१ मातृष्वस्रेयो वश्चैद्यो दंतवक्त्रश्च पांडव पार्षदप्रवरौ विष्णोर्विप्र
शापात्पदच्युतौ ३२ युधिष्ठिर उवाच कीदृशः कस्य वा शापो हरिदासाभिमर्शनः अश्रद्धेय इवा
भाति हरेरेकांतिनां भवः ३३

कीटः पेशस्कृता भ्रमरेण संरंभो द्वेषः भयं च स एव योगस्तेन २७ वैरेण यानुचिंता तयैव पूतः पाप्मा येषां ते राम
तं प्रापुः २८ तदघं कामादिनिमित्तं पापं हित्वा २९ ३० न हि वेनः किमिति नरके पातितः तीव्रध्यानाभावात्पं २
चम एवेत्यत्र फलितमित्याह कतमोपीति पुरुषे श्रीहरिं प्रति पुरुषपुरुषस्य कामासंभावात् भयादिभिश्चिंतयतां पं
चानां मध्ये न कतमोपीत्युक्तं ३१ तदेवमितिहासप्रस्तावकथामुक्तो श्रीकृष्णे शिशुपालस्य वैरानुबंधे को हेतुरि
त्यपेक्षायां तमेवेतिहासं वक्तुमाह मातृष्वस्रेय इति वैकुंठगात्प्रच्युतो ३२ हरिदासोऽभिमृशतीति अभिमर्शनः तथा
अश्रद्धेयः अनादरणीय इव असंभवात् भवो जन्म ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असंभवमेवाहंजन्मेहतुर्भूतैः प्राकृतैर्देहेंद्रियासुभिर्हीनानांशुद्धसत्त्वमयदेहानामित्यर्थः। प्राकृतदेहसंबंधेनसंबद्ध
मेतदाख्यानमाख्यातुमर्हसि ३४ प कथंभूताः पंचवाषड्वाहायनानियेषांतेच अर्भाबालाः तद्वद्भाभांतियेषांतेपू
र्वेषांमरीच्यादीनामपिपूर्वजाः दिग्वाससः दिगंबराः अतः शिशून्मत्वा ३६ वासमपिनार्हथः कुतः पुनस्तत्सेवामितिच
कारार्थः हेबालिशौ अतोहेतोः आशुयातं ३७ वांयुवयोस्त्रिभिर्जन्मभिः लोकायस्वस्थानप्राप्तयेकल्पतां

देहेंद्रियासुहीनानांवैकुंठपुरवासिनां देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३४ नारदउवाच एकदा
ब्रह्मणः पुत्राविष्णोर्लोकंयदृच्छया सनंदनादयोजग्मुश्चरंतोभुवनत्रयं पंचषड्ढायनार्भाभाः पूर्वेषाम ज्ञा
पिपूर्वजाः दिग्वाससः शिशून्मत्वाद्वाःस्थौतान्प्रत्यषेधतां ३६ अशपन्कुपिताएवंयुवांवासंनचार्हथः
रजस्तमोभ्यांरहितंपादमूलंमधुद्विषः पापिष्ठामासुरींयोनिंबालिशौयातमाश्वतः ३७ एवंशप्तौस्व
भावनात्पतंतौतौकृपालुभिः प्रोक्तौपुनर्जन्मभिर्वांत्रिभिर्लोकायकल्पतां ३८ जज्ञातेतौदितेःपु
त्रौदैत्यदानववंदितौ हिरण्यकशिपुर्ज्येष्ठोहिरण्याक्षोनुजस्ततः ३९ हतोहिरण्यकशिपुर्हरिणा
ध सिंहरूपिणा हिरण्याक्षोधरोद्धारेबिभ्रत्सौकरंवपुः ४० हिरण्यकशिपुः पुत्रंप्रह्लादंकेशवप्रियं तं
जिघांसुरकरोन्नानायातनांमृत्युहेतवे ४१ तंसर्वभूतात्मभूतंप्रशांतंसमदर्शनं भगवत्तेजसास्पृष्टं
नाशक्नोद्धंतुमुद्यमैः ४२ ततस्तौराक्षसौजातौकेशिन्यांविश्रवःसुतौ रावणःकुंभकर्णश्चसर्वलोकोप
तापनौ ४३

ता
तावुत्तावयंशापः समाप्स्यतामितिपुनः प्रोक्ताविल्यर्थः ३८ ४९ धरोद्धारेनिमित्तभूतेसति घातितः ४० हिरण्यकशि
पोर्वधकारणंसूचयति हिरण्यकशिपुः पुत्रमिति ४१ सर्वभूतानामात्मभूतं कुतः समंब्रह्मैवपश्यतीति तथातं
अतः प्रशांतंद्वेषादिरहितं अतएवभगवत्तेजसास्पृष्टं व्याप्तं उद्यमैः शस्त्रप्रहारादिभिः विश्रवसः सुतौ ४३

GC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यहन्यत् हतवानित्यर्थः तर्हि तदेव कथनीयमित्युत्सुकं प्रत्याह रामवीर्यमिति कृष्णचक्रेणाहतमंहो ययोस्तौ तयोः
पापमेव हतेन तु तावित्यर्थः ४५ ॥ येन कारणेन प्रह्लादस्याच्युतात्मता अच्युते कचित्तत्वं गदपि ब्रूहीति शेषः ४७ इ
ति सप्तमे प्रथमः द्वितीये विष्णुरोषेण लोके विश्लाघ्य दानवैः तेऽनुतप्तात्त्पुत्रादीनि तिहासैरसान्त्वयत् भगवद्द्वेषण

तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात्प्रभो ४४ तावेव क्षत्रि
यौ जातौ मातृष्वस्रात्मजौ तव अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ४५ वैरानुबंधतीव्रेण
ध्यानेनाच्युतसात्मतां नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ४६ युधिष्ठिर उवाच विद्वे
षो दयिते पुत्रे कथमासीन्महात्मनि ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ४७ इति श्री
भागवते महापुराणे सप्तमस्कंधे नारदयुधिष्ठिरसंवादे प्रथमोऽध्यायः नारद उवाच भ्रा
तर्येवं विनिहते हरिणा क्रोडमूर्तिना हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा १ आह चेदं रु
षा घूर्णः संदष्टदशनच्छदः कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमंबरं २ करालदंष्ट्रोग्र
दृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ३ भो भो दानवदैतेया द्वि
मूर्धंस्त्र्यक्ष शंबर शतबाहो हयग्रीव नमुचे पाक इल्वल ४ विप्रचित्ते मम वचः पुलोमन् शकुनाद
यः शृणुतानंतरं सर्वे क्रियतामाशु मा चिरं ५ सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् पार्ष्णिग्रा
हेण हरिणा समेनाप्युपधावनैः ६

वत्तद्वेषेऽपि कारणमित्याशयेनाह भ्रातरीत्यादिना १ एवं देवपक्षपातेन कोपेन तत्र अतिशयेन ज्वलद्भ्यां को
पाग्निधूमेनेव धूम्रमंबरं निरीक्षमाणः २ करालदंष्ट्राभिर्युक्तया उग्रया दृष्ट्या दुःप्रेक्ष्यं भ्रुकुटीयुक्तं मुखं
यस्य सः ३ समेनापि उपधावनैर्भजनैः निमित्तभूतैः पार्ष्णिग्राहेण सता ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंत्यक्तः स्वभावः समत्वं येन तस्य घृणेः क्षुद्रे तेजोमयस्यापि माययावनोकसः वराहरूपस्य सतः अस्थिरा
त्मनः अव्यवस्थितचित्तस्याकुतः योयो भजति तंतं भजमानस्य अनुसरतः ७ तस्मा रुधिरेण यावत्तर्पयिष्यामि ता पी २
वद्यूयं भुवं यातेति तृतीयेनान्वयः ८ ननु देवस्तद्धः कारितः अत आह किंन हन्यतेत्तत्राह तस्मिन्कूटके
पटे अहितेशत्रुपक्षे कूटमोहितेयस्मात्तेवा नष्टे अदृष्टे सति दिवाः शुष्यंति स्वयमेवनाशयिष्यंति कुतः वि श १

तस्यत्यक्तस्वभावस्य घृणेर्मायाविनोकसः भजंतं भजमानस्य बालस्येवास्थिरात्मनः ७ म
स्य १ त्खड्गभिन्नग्रीवस्य भूरिणा रुधिरेण वै रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ८ तस्मिन्
कूटे हिते नष्टे कृत्तमूले वनस्पतौ विटपा इव शुष्यंति विष्णुप्राणा दिवौकसः ९ तावद्यात
भुवं यूयं विप्रक्षत्रसमेधितां सूदयध्वं तपोयज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रि
यामूलो यज्ञो धर्ममयः पुमान् देवर्षिपितृभूतानां धर्मस्य च परायणं १० यत्रयत्र द्विजा गा
वो वेदा वर्णाश्रमः क्रियाः तंतं जनपदं यात संदीपयत वृश्चत ११ इति स्वभर्तुर्निर्देशमादाय
व्र २ शिरसा हृताः तथा प्रजानां कदनं विदधुः कदनप्रियाः १२ पुरग्रामव्रजोद्यानक्षेत्रारामाश्र
माकरान् खेटखर्वटघोषांश्च ददहुः पत्तनानि च १३

भुरेव प्राणा येषां ते ९ तपोयज्ञादियुक्तान्सूदयध्वं घातयत १० ननु तेः किमपराद्धं तत्राह विष्णुरिति द्विजानां क्रि
या अनुष्ठानं मूलं यस्य सः यत्तासोयज्ञो धर्ममयश्च परायणं परमश्चाश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वा
त् मामेनाद्वेत्यत्तदा अपणात्वं तेवध्या इति भावः १० तस्मात्परं मंत्रं शृणुतेत्याह यत्रयत्रेति वृश्चत छिंदत कुरुत ११ २
पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामाः कृत्रिमं वनं आश्रमं रे २
ऋषीणां स्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोषः आभीराणां वासः पत्त

मं ३ संदीपयत दहत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खनित्रैः खननसाधनैः आजीव्यानुपजीव्यानु शरणानि गृहान् १४ विप्रकृतेनोपद्रुते यज्ञभागानामभावात् दिवं परि
त्यज्य १५ तदेवं प्रजानां कदनं हननं विधुन्वानेषु स्वयं स्वर्गराज्यादिसाधपितृन तपस्विनः कामः प्रथमं यत्स्थानचानु तदाह हि
रण्यकशिपुरित्यादिना कटोदकं प्रेताय प्रदेयमुदकं आदिशब्दात्प्रेतश्राद्धादिकं च १६ १७ हे वधू इति भ्रातृभा
र्यां संबोधयति १९ भवतु नाम तस्य श्लाघ्यावधः तथाप्यस्माकं तावद्दुःखं नापैति चेत्तत्राह भूतानामिति दैवेन प्रा
चीनकर्मणा एकत्र नीतानां संयोजितानां पुनश्च स्वैः स्वैः कर्मभिरुन्नीतानां वियोजितानां २० एवं लोकदृष्ट्या शोकं

केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः प्रादहन्शरणा
न्यप्रजानांज्वलितोल्मुकैः १४ एवंविप्रकृते लोके दैत्येंद्रानुचरैर्मुहुः दिवं देवाः परित्यज्य भुवि चेरुरलक्षि
ताः १५ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः कृत्वा कटोदकादीनि भ्रातृपुत्रानसांत्वयत् १६ शकुनिं
शंबरं धृष्टिं भूतसंतापनं वृकं कालनाभं महानाभं हरिश्मश्रुमथोत्कचं १७ तन्मातरं रुषाभानुं दितिं च ज
ननीं गिरा श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वरः १८ हिरण्यकशिपुरुवाच अंबांब हे वधूः पुत्रावी
रं मार्हथ शोचितुं रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः १९ भूतानामिह संवासः प्रपायामि
व सुव्रते दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः २० नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्प
रः धत्तेऽसावात्मनो लिंगं मायया विसृजन्गुणान् २१ श्रीराम श्रीराम राम राम राम॥

१नित्येति निर्वार्यतत्त्वदृष्ट्या वारयति नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः निर्मलः सर्वगतः सर्वज्ञश्च सर्वत्र हेतुः॥ सर्ववित्
परः देहादिव्यतिरिक्तः अतो मृत इति शुद्ध इति मलिन इति वियुक्त इति अज्ञ इति शोको न कार्य इत्यर्थः कथं त
र्हि तस्य संसारः तत्राह धत्त इति आत्मनो मायया स्वाविद्यया लिंगं धत्ते गुणानुच्चावचानु देहान्सुखदुःख ५
दीन्वा विशेषेण सृजन्स्वीकुर्वन् लिंगशरीरोपाधिः संसार इत्यर्थः २१ राम राम रामराम रामराम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्सदृष्टांतं प्रपंचयति यथेति चतुर्भिः तरवः प्रतिबिंबिताः उपाधिधर्मोपहिता भवंतीति दृष्टांतमुक्त्वा ग्राहकधर्मो ग्राहे
भवतीति दृष्टांतमाह चक्षुषेति २१ अविकल्पः परिपूर्ण एव तत्साम्यतां मनः समतामित्यर्थः २२ लिंगे भावना देहा
हाभिमानः एष आत्मनो विपर्यासः अन्यथाभावः तमेवाह प्रियैर्वियोगः अप्रियैर्योगश्च कर्मणश्च संसृतिः अनानाग
र्भेषु प्रवेशः २४ ततश्च संभव उत्पत्तिः विवेकस्यास्मृतिः अननुसंधानं २५ अत्रापि शोके हेतुं विनाशे ऽथ वायं शोक

यथांभसा प्रचलिता तरवोऽपि चला इव । चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः २१ एवं गुणैर्भ्रा
म्यमाणो मनस्यविकलः पुमान् । याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव २२ एष आत्मविपर्या
सो ह्यलिंगे लिंगभावना । एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः २४ संभवश्च विनाशश्च शोक
श्च विविधः स्मृतः । अविवेकश्च चिंता च विवेकास्मृतिरेव च २५ अत्राप्युदाहरंतीममितिहासं पुरातनं ।
यमस्य प्रेतबंधूनां संवादं तं निबोधत २६ उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः । सपत्नैर्निहतो युद्धे ज्ञा इति ४
तयस्तमुपासत २७ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं । शरनिर्भिन्नहृदयं शयानमसृगाविलं
२८ प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदं । रजःकुंठमुखांभोजं छिन्नायुधभुजं मृधे २९ उशी
नरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः । हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मुहु
स्तत्पदयोरुपापतन् ३०

इत्यस्मिन्नर्थे प्रेतस्य कस्यचिद्यमस्य बांधवानां तेषां च २६ उपासन तत्समीपमागत्यास्थिताः २७ विशीर्णं रत्नमयं
कवचं यस्य विभ्रष्टानि आभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेन आविलं लिप्तं
२८ प्रकीर्णाः केशा यस्य रभसा संरंभेण दष्टौ दच्छदौ ओष्ठौ येन रजसा कुंठं आच्छन्नं मुखांभोजं यस्य छि
न्नमायुधं भुजश्च यस्य २९ तस्य पादयोरुपसमीपं आसमंतात् ३० अपतन् ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स०

१ विलापमेवाह अहो इति द्वाभ्यां अकरुणत्वमेवाह दृशामगोचरादर्शायेन भवान् प्रणीतो गमितः तेन विधात्रा
त्वमधुना शुचां विवर्द्धनः कृतोसीत्यन्वयः ३२ त्वया सुहृत्तमान विना वयं कथं स्याम भवेम जीवेम अतः हे वीर य
त्र त्वं यास्यसि तत्र त्वं अनुयानं अनुगमनं तव पादयोः शुश्रूषां कुर्वतीनामस्माकं दिशादेहि ३३ निर्हारं दाहं धन
यनं अस्तं आस्ताचलं प्रति ३४ परिदेवितं रोदनं स्वपृयोमेवा श्रात्यश्राव्वा ३४ तत्र स्वयमेवोपागताय मस्तो
नाह अहो इत्यादिना वयसा असमन्ताधिनां कानामपि लोकस्य विधिजन्ममरणादिप्रकारं विपश्यतामपि

रुदंत्यउच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्त्रैः कुचकुंकुमारुणैः विस्रस्तकेशाभरणाः शुचं नृणा
सृजंत्य आक्रंदनया विलेपिरे ३१ अहो विधात्राकरुणेन नः प्रभो भवान् प्रणीतो दृगगोचरां दशां
उशीनराणामसि वृत्तिदः पुराकृतोधुना येन शुचां विवर्द्धनः ३२ त्वया कृतज्ञेन वयं महीपते क
थं विना स्याम सुहृत्तमेन ते तत्रानुयानं तव वीर पादयोः शुश्रूषतीनां दिश यत्र यास्यसि ३३ एवं व
६ विलपतीनां वै परिगृह्य मृतं पतिं अनिच्छतीनां निर्हारमर्को स्तं संन्यवर्त्तत ३४ तत्र ह प्रेतबंधूना
माश्रुत्य परिदेवितं आह तान्बालको भूत्वा यमः स्वयमुपागतः ३५ यम उवाच अहो अमीषां
वयसाधिकानां विपश्यतां लोकविधिं विमोहः यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचंत्यपा र्मा
र्थं ३६ अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिंतयामः अभक्ष्यमाणा अबला वृकादिभिः स रक्षिता
रक्षति यो हि गर्भे ३७

विमोहमेवाह यत्र यस्मात् अव्यक्तादागतः तत्रैव गतं मपार्थं शोचंति तदुक्तं गीतासु अव्यक्तादीनि भूता- राम
नि व्यक्तमध्यानि भारत अव्यक्तनिधनान्येव तत्र का परिदेवनेति किंच स्वयमपि सधर्माः मृतेन सह ६
समानो मृत्युलक्षणो धर्मो येषां तथा भूता अपि ३६ अबला दुर्बला अपि वृकादिभिरभक्ष्यमाणा
वयं तत्र हेतुः यो गर्भे रक्षति स एव हि विश्वरक्षिता रक्षति ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संहारे संग्रहे

ननुतस्यरक्षणेकिंप्रयोजनंनकिंचिदपि किंतुक्रीडैवकेवलमित्याहयईशः इदंविश्वंसृजतिरक्षतिसंहरतिच भोत्र
बलाः तस्यबिलातुश्वराचरंक्रीडासाधनमाहुः अतःसएवनिग्रहेपालनेप्रभुः ३८ प्रभुत्वमेवान्वयव्यतिरेकाभ्यां
दर्शयतिपथीति दिष्टेनदैवेनेश्वरेणारक्षितं तेनेश्वरेणविहतं अस्पृहतः तेनापेक्षितः ३९ तदेवमात्मनोजन्मम
रणादिकमंगीकृत्यईश्वराधीनत्वान्नशोकःकार्यइत्युक्तं इदानींतुदेहानामेवजन्मादिनत्वात्मनइत्याहत्रिभिः
भूतानिदेहाः निजयोनिः स्वकारणभूतलिंगशरीरंतन्निमित्तैःकर्मभिः भवंतिजायंतेनभवंतिनश्यंतिच सर्वशःदेवा
दिदेहा अपि तत्रहतदा प्रकृतौदेहस्थितोप्यात्मातस्यागुणैः देहधर्मैर्जन्मादिभिर्नबध्यतेनयुज्यते यतः अन्यतमा

यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्यवलुंपतेचयः तस्यावलाः क्रीडनमाहुरीशितुश्वराचरंनिग्र
हसंग्रहेप्रभुः ३८ पथिच्युतंतिष्ठतिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति जीवत्यनाथोपितदी
क्षितोवनेगृहेपिगुप्तोस्यहतोनजीवति ३९ भूतानितैस्तैर्निजयोनिकर्मभिर्भवंतिसर्वशः नतत्रहा
त्माप्रकृतावपिस्थितस्तस्यागुणैरन्यतमोनिबध्यते ४० इदंशरीरंपुरुषस्यमोहजंयथापृथग्भौतिके
मीयतेगृहं यथोदकैः पार्थिवतैजसैर्जनः कालेनजातोविकृतोविनश्यति ४१ श्रीरामजयराम॥ कालेनजनवंती ३

देहादत्यंतविलक्षणः ४० नन्वहंकृशःस्थूलइत्यादौनैवलक्षण्यंप्रतीयतेतत्राह इदंमोहजंअविवेकादात्म
त्वेनजातंवस्तुतस्तुपृथगेवायतः ईयतेदृश्यतेभौतिकंच यथागृहमित्यन्वयः अत्रैवप्रयोगः द्रष्टुरभौतिका
च्चपुरुषात्शरीरंभिन्नंदृश्यत्वात् भौतिकत्वाच्च यथान्यंतदाविवेकिनेआत्मत्वेनाभिमतमपिगृहंततःपृथक्
तद्वदिति भौतिकत्वानुमानंविवृण्वन्नात्मनोजन्माद्यभावमुपसंहरति यथाओदकैःपरमाणुभिर्जातोबुद्बु
दादिःयथाचपार्थिवैर्जातोघटादिःयथाचतैजसैर्जातः कुंडलादिर्विनश्यति तथातैरेवत्रिविधैःपरमा
णुभिर्जातोजनोदेहएवविकृतःसन्विनश्यतिनत्वात्मेत्यर्थः ४१ राम राम राम राम राम रामराम

परिणतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तद्वयमाह यथेति अनलो दारुष्वेव स्थितोऽपि दाहकत्वेन भिन्न एव प्रतीयते तथा च देहग
तोऽप्यनिलो नासिकादिषु पृथक् स्थित एव प्रतीयते देहस्थत्वेऽप्यात्मनस्तद्धर्मयोगाभावे दृष्टान्तमाह यथा नभो न स
ज्जते क्वापि संगं न प्राप्नोति तथा पुमानपि सर्वेषां गुणानां देहेंद्रियादीनामाश्रयः तेष्वाश्रितो वा परः पृथगेवेत्यर्थः ४२
किंच हे मूढाः यमनुशोचथ सोऽयं युष्मत्कृतां सुयज्ञः शेते किमिति शोचथ न तेन तावन्तं कालमसौ शृणोति प्रत्युत्तरं
प्रतिवक्ति च इदानीं तस्यादर्शनान्मृत इति शोचामहे इति चेत् स तु शोचनीयो न भवति प्रागपि तस्यादर्शनादित्याह
यः श्रोतेति ४३ ननु मुखनासिकासंचारी प्राणः श्रोता वक्ता च दृष्ट एव नासौ श्रोता न वक्ता चाऽचेतनत्वादित्या

यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक् स्थितः। यथा नभः सर्वगतं न सज्जते तथा
पुमान्सर्वगुणाश्रयः परः ४२ सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ यः श्रोता योऽनुवक्तेह न स
दृश्येत कर्हिचित् ४३ न श्रोता नानुवक्तायं मुख्योऽप्यत्र महानसुः यस्त्विहेंद्रियवानात्मा स चा
न्यः प्राणदेहयोः ४४ भूतेंद्रियमनोलिंगान्देहानुच्चावचान्विभुः भजत्युत्सृजति ह्यन्यस्तच्चा
पि स्वेन तेजसा ४५ श्रीरामजयराम जयजयराम श्रीरामजयराम जयजयराम ॥ श्रीरा०

ह न श्रोतेति महान्सर्वेंद्रियचेष्टाहेतुः अत एव मुख्यः प्राणो वै मुख्य इति श्रुतेः कस्तर्हि वक्ता श्रोता च तत्रा
ह यस्त्विह देहेंद्रिये स तत्तदर्थद्रष्टात्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव सचेतनः ४४ ननु चेतन
स्य तर्हि देहधर्मोपलब्धिः कुतस्तत्राह भूतेंद्रियमनोभिर्लिंग्यन्ते
वेऽप्यन्यत्वे चेतनस्यापि कुशः स्थूलः काणो बधिर इत्यादि देहधर्मोपलब्धिः कुतस्तत्राह भूतेंद्रियमनोभिर्लिंग्यते
लक्ष्यत इति तथा तान्देहान्तेभ्योऽन्यस्तु भजति अहमिति मन्यते तर्हि कथं मोक्षस्तत्राह तच्च भजनं स्वेन तेजसा
विवेकबलेन उत्सृजत्यपि हि इत्यनुभवं प्रमाणयति ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वदृशाऽऽत्मज्ञानेनच्छिन्नाः संशया मिथ्याज्ञानानि यस्य लिंगादि निर्गमे लिंगशरीरनाशे सतीत्यर्थः २९ तदा तु अणि
मादि सिद्धयोंतरायत्रूपा भवंति ता सुयोगेनोपचिता सु समृद्धासु न योगादन्यो हेतुर्यासां ता सु यदा सिद्धस्य तेन वि
षज्जेत अंग हे मातः अथ तदा अंतमंतिकं नीतो याहं तत्संबंधिनी यत्र यस्यां गतो मृत्योर्हासो न भवति विषक्तो तु सि
द्धोपि मया वशीकृत इति मृत्योर्हासो गर्वो भवतीत्यर्थः ३० तृतीये सप्तविंशः अष्टाविंशे तु तोष्टांगयोगेन ध्यान

प्राप्नोतीहांजसा धीरः स्वदृशाच्छिन्नसंशयः यद्गत्वा न निवर्तेत योगी लिंगविनिर्गमे २९ य
दा न योगोपचितासु चेतो मायासु सिद्धस्य विषज्जतेंग अनन्यहेतुष्वथ मे गतिः स्यादात्यंति
की यत्र न मृत्युहासः ३० इति श्रीभागवते महापुराणे तृतीयस्कंधे कापिलेये सप्तविंशति
मोध्यायः श्रीभगवानुवाच योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे मनो येनैव वि
धिना प्रसन्नं याति सत्पथं १ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनं दैवाल्लब्धेन संतोष
आत्मविच्चरणार्चनं २ ग्राम्यधर्मनिवृत्तिश्च मोक्षधर्मे रतिस्तथा मितमेध्यादनं शश्वद्विवि
क्तक्षेमसेवनं ३ अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरु
षार्चनं ४ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः प्रत्याहारश्चेंद्रियाणां विषयान्मनसा हृदि

शोभिना सर्वोपाधिविनिर्मुक्तस्वरूपज्ञानमार्ये ते १ भक्तिः संक्षेपतः प्रोच्य सांख्यमाख्याय विस्तरात् अथाहे वक्ष्ये वैयो
गमष्टांगं कपिलो हरिः २ सबीजस्य सालंबनस्य प्रसन्नं सत् तत्र यमनियमानाह त्रिभिः क्षरहृयाधिकैः शक्त्या स्व
धर्माचरणं २ ग्राम्यस्त्रैवर्गिको धर्मः तस्मान्निवृत्तिः मितं च तन्मेध्यं शुद्धं च तस्यादनं तत्र मितं नाम द्वौ भागौ पूरये
दन्नैस्तोयेनैकं प्रपूरयत् मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदिति स्मृतिप्रसिद्धं विविक्तं विजनं क्षेमं निर्बाधं तत्सेव

नयसेवनं ३ यावनार्थं प्रयोजनं तावन्मात्रस्य परिग्रहः श्रामता
देहंगमानाहितिभिः मनोश्रासनस्य जयात्स्थैर्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वधिष्ण्यानी प्राणस्थानानां मूलाधारादीनां मध्ये एकस्मिन् देशे मनसा सह प्राणस्य धारणं आत्मनो मनसः समाधानं
आत्माकारता ६ अन्यैश्च श्रवणादिभिः पथिभिरुपायैः ७ आसनादीनि प्रपंचयति शुचाविति यावत्समाप्ति ७
आसने कुशाजिनचेलोत्तरं प्रतिष्ठाप्य स्वस्तिकासनेन यथासुखमिति वा सममभ्यसेत् प्राणामिति शेषः ऊरूजंघां
तराधाय पादाग्रे जानुमध्ये योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः ८ बाह्यवायोरंतः प्रवेशनं पूरकः प्रवे
शितस्य धारणं कुंभकः धृतस्य बहिर्निःसारणं रेचकः प्रतिकूलेन रेचकं कुंभकं पूरकः यद्वा इडया पूरयेत् पिंगलया पू

८८ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं वैकुंठलीलाभिध्यानं समाधानं तथात्मनः ६ एतैरन्यैश्च
पथिभिर्मनो दुष्टमसत्पथं बुध्या युंजीत शनकैर्जितप्राणो ह्यतंद्रितः ७ शुचौ देशे प्रतिष्ठाप्य विजिता
सन आसनं तस्मिन् स्वस्तिसमासीन ऋजुकायः समभ्यसेत् ८ प्राणस्य शोधयेन्मार्गं पूरकुंभक
रेचकैः प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलं ९ मनोचिरात्स्याद्विरजं जितश्वासस्य योगि
नः वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं १० प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषा
न् प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान्गुणान् ११ यदा मनः स्वं विरजं योगेन सुसमाहि
तं काष्ठां भगवतो ध्यायेत् स्वनासाग्रावलोकनः १२ प्रसन्नवदनांभोजं पद्मगर्भारुणेक्षणं ११
नीलोत्पलदलश्यामं शंखचक्रगदाधरं १३ श्रीराम श्रीराम श्रीराम ॥ श्रीराम ॥ श्री॥

यद्वा इडया रेचनमिति एवं प्रतिकूलेन वा शब्दश्चार्थे स्थिरं सत्पुनरपि चंचलं यथा न भवति तथा शोधयेत् ९ ध्मातं संतप्त
मित्यर्थः लोहं सुवर्णं यथा मलं त्यजति तथा मनो विरजं स्यात् ततश्चाचंचलं स्यादिति भावः १० प्राणायामादीनां समाधौ
द्वारकार्यमाह प्राणायामैरिति दोषान् वातश्लेष्मादीन् संसर्गान् विषयसंगान् अनीश्वरान् रागादीन् वायुना स
ह मनसः स्थिरीकरणं धारणा स्थिरस्य वृत्तिसंततिर्ध्यानं वृत्तिनिरोधः समाधिरिति भेदः ११ सुसमाहितं स्थि
रं जातं काष्ठां कालां मूर्तिमित्यर्थः स्वनासाग्रावलोकनं यस्य नीलोत्पलचलनयविक्षेपयोः परिहाराय १२ ध्येयं

इति माह मनुभिः प्रसन्नवदनांभोजं यस्य तेष्वपि हितिषुभिता
विपः पकाभविदकण्ड श्रोणिकेन पस्य नीलोत्पलदलश्यामं ९३ मः

रेचनं पिंगलया

८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लसत्पंकजस्य किंजल्कवत्पीते कौशेये वाससी यस्य श्रीवत्सो लांछनं वक्षसि यस्य भ्राजत्कौस्तुभेनामुक्ता संश्लिष्टा
कंधरा यस्य १४ मत्तद्विरेफाणां कलया मधुरध्वनिर्यस्यां तया परीतं व्याप्तं १५ परार्ध्यानि श्रेष्ठमूल्यानि हारादीनि य
स्य कांचीगुणेनोल्लसंती श्रोणिर्यस्य भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य भक्तानां मनो नयनानि वर्द्धय
ति हर्षयतीति तथा १६ अपीच्यामतिसुंदरं भक्तिविषयं दर्शनं यस्य कैशोरे तारुण्यवयसि संस्थितं भृत्यानामनुग्र सं १

लसत्पंकजकिंजल्कपीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं १४ मत्तद्वि
रेफकलया परीतं वनमालया परार्ध्यहारवलयकिरीटांगदनूपुरं १५ कांचीगुणोल्लसच्छ्रो
णिं हृदयांभोजविष्टरं दर्शनीयतमं शांतं मनोनयनवर्द्धनं १६ अपीच्यदर्शनं शश्वत्सर्वलोक
नमस्कृतं संतं वयसि कैशोरे भृत्यानुग्रहकातरं १७ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करं
ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः १८ स्थितं व्रजंतमासीनं शयानं वा गुहाशयं प्रेक्षणीये नं ४
हितं ध्यायेच्छुद्धभावेन चेतसा १९ तस्मिंल्लब्धपदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयु
ज्यादंगे भगवतो मुनिः २० संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरुहलांछनाढ्य
मुत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारं २१

हे कातरे व्यग्रे १७ कीर्तन्यं कीर्तनार्हं तीर्थं यशो यस्य पुण्यश्लोकानां बलिमुखानामपि यशस्करं समग्राण्यंगानि यस्मिन् न च्य
नपयैति २ वते नापयाति १८ प्रेक्षणीयमीहितं लीला यस्य १९ तदेवं समग्रध्यानमुक्त्वा एकैकावयवध्यानमाह तस्मिन् लब्धं
पदं स्थितिर्येन तच्चित्तं विलक्ष्य विशेषेण लक्षीकृत्य एकत्र एकैकस्मिन्नंगे इत्यर्थः तदेव पादादिक्रमेणाह त्रयो
दशभिः सम्यक् चिंतयेत् पादतले रेखात्मकानि वज्रादीनि लांछनानि तैराढ्यमुक्तं उत्तुंगाः रक्ताः विलसंतो नखाः
तेषां चक्रवालं मंडलं तस्य ज्योत्स्नाभिराहतं महतां ध्यातृणां हृदये अंधकारं येन एवं च सर्वमुपादेयविशेषं ध्येयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७१

किंच यस्मिन् शौचेन क्षालनेन निःसृताया सरित्प्रवराया गंगाया उदकेन तीर्थेन संसारतारकेण मूर्द्धि अधिकृतेन धृतेन शिवोपि शिवो भूत् अत्यधिकं सुखं प्राप्तवान् इत्यर्थः ध्यातुर्मनसि शमलशैलः पापपर्वतः तस्मिन् निसृष्टं निक्षिप्तं वज्रमिव यत् यद्वा शमलशैले निसृष्टस्वलांछनं तत्पदवज्रं येन तत् २२ विभोजानुद्वयं तत्पयेतेजघाद्वयं अखिलस्य विधातुर्ब्रह्मणो जनन्या लक्ष्म्या संलालितं स्पर्शेन चातुर्येण संसेवितं संसारित्वमिव प्रतीतिं वारयति अभवस्येति हृदि कुर्यात् ध्यायेत् २३ सुपर्णस्य भुजयोः अधि उपरि तुंजसा वलस्य निधी आधारो अतसिकायाः कुसुमवत्तोत्या वभासमा

स्कंधयोः १

यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोभूत् ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविंदं २२ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः ऊर्वोर्निधाय करपल्लवरोचिषा यत्संलालितं हृदि विभोरभवस्य कुर्यात् २३ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ व्यालंबिपीतवरवाससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबं २४ नाभिह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं २५ वक्षोधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानं कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्यान्मनस्यखिललोकनमस्कृतस्य २६

८९

कांचिकलापः १ नो व्यालंबि आगुल्फं लंबमाने पीतांबरवाससि तस्मिन् वर्तमानो यः तेन परिरंभः संश्लेषो विद्यते यस्य तद्विभोर्नितंबबिंबं च हृदि कुर्यादिति पूर्वेणैवान्वयः २४ अमुष्य हरेर्नाभिह्रदं ध्यायेत् कथंभूतं भुवनानां कोशस्य समूहस्य गुहा आधिष्ठानं यदुदरं तत्र स्थितं यत्र नाभिह्रदे आत्मयोनेर्ब्रह्मणो धिषणं धिष्ण्यं अखिललोकात्मकं पद्मं व्यूढं

२१

द्युमणिमरकतमणिः २ स्थितं तथा हरिन्मणी आश्चर्याविव यौ स्तनौ तयोर्द्वयं ध्यायेत् विशदहाराणां मयूखैर्गौरं श्वेतं २५ ऋषभस्य श्रेष्ठस्य महाविभूतेर्महालक्ष्म्या अधिवासस्थानं वक्षः कंठं च मनसि कुर्यात् कथंभूतं कंठं कौस्तुभमणेर्योभूषणार्थे धृतः तस्य अधिकं भूषणमर्थः प्रयोजनं यस्य कौस्तुभमणिमेव स्वयमलंकुर्वतमित्यर्थः पुंसां स्मर्तॄणां द्रष्टॄणां च मनो

राम
८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्णिक्तानि उक्तानि तानि वहु बल्लयान् अंगदानि येषु अधिश्रिता लोकपाला येषु दशशतारं चक्रं न संस्येर्ज्जायस्य
हस्तकरसरोरुह राजहंसम् इव २७ अर्थो यथा भद्रः याद्वारस्तेषां शोणितं मेव कर्दमस्तेन दिग्धां लिप्तां अस्य
कंठमालां मणिं च स्मरेत् मधुव्रतानां वरूथस्य गिरा उपघुष्टां नादितां चैत्यस्य जीवस्य तत्त्वं तदुक्तं वैस्मरेव आ
त्मानं मस्य जगतो निर्लेपं मगुणं मत्त्वं विभर्ति कौस्तुभमणिं स्वरूपं भगवान् हरिरिति २८ भृत्यस्य अनुकंपिता
अनुकंपाया धीत यया गृहीता मूर्तिर्येन तस्य विस्फुरन्तौ मकरकुंडले येन यावलिके तेन प्रचलेलेनन विद्योतितौ

बाहूंश्च मंदरगिरेः परिवर्तनेन निर्णिक्तबाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारम लो।
सह्यतेजः शंखं च तत्करसरोरुहराजहंसं २७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धा
मरातिभटशोणितकर्दमेन मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिम
स्य कंठे २८ भृत्यानुकंपितधियेह गृहीतमूर्तेः संचिंतयेद्भगवतो वदनारविंदं यद्विस्फुर
न्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारनासं २९ यच्छ्रीनिकेतमलिभिः परि
सेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टं मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनो
मयमतंद्रित उल्लसद्भ्रु ३० तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टम
क्ष्णोः स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विततभावनया गुहायां ३१

अमलौ कपोलौ यस्मिन् तत् उदारा उन्नता नासा यस्मिन् तत् २९ यत् स्वस्यया भूत्या शोभया अलिभिः परिसेव्यमानं
मीनद्वयाश्रयं च श्रीनिकेतनं पद्मम् अधिक्षिपत् तत् कुंतलैर्लोनाम् अधिक्षिपः नेत्रद्वयेन मीनद्वय
मिति द्रष्टव्यं अब्जवन्नेत्रे यस्मिन् निरुपमानां नरे उल्लसंत्यो भ्रुवो यस्मिन् मनोमयं मनसा विभावितं ३० कृपया
अधिकमित्यर्थः अक्ष्णोः निसृष्टं प्रमुक्तं स्निग्धस्मितेनानुगुणितं संयुक्तं विपुलः प्रसादो यस्मिन् गुहायां हृदि ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रापि त्वत्तः शोकस्य सर्वयोनिषु वा तुल्या संसारस्याप्यनादित्वादे अश्रुमेत् सागरः अपि सं यो भवे
युरिति

अवनतानां अखिललोकानां तीव्रशोकेन यान्यश्रूणि तेषां सागरं विशोषयतीति तथा तं हरेर्हासं अत्युदारं भ्रू-
मंडलं च ध्यायेत् कथंभूतं निजमायया मकरध्वजस्यापि संमोहनाय रचितं मुनिकृते मुनीनामुपकाराय मुनीनां
संमोहने प्रवृत्तं कामं भ्रूभंगेन मोहयितुमित्यर्थः मंदहासध्यानं मोहं विस्मापयेत् प्रहसितं तु ध्येहे सितं ध्यायेत् कीदृ- मुक्तास्फुटहासध्या
शं ध्यानानां अयनं आश्रयं नितिसुंदरतया प्रयत्नं विनैव ध्यानस्य विषयभूतं सौंदर्यमेवाह बहुलया अधिकया अधरो-
ष्ठस्य भासा कांत्या आरुणायितानि अरुणीभूतानि तनवः सूक्ष्मा द्विजा एव कुंदमुकुलानि तेषां पंक्तिः स्फुरति यस्मिन् तत् देहकु-
६० हरे हृदयाकाशे अवसितस्य ज्ञानस्य प्रभेदः सन्न भक्त्या आर्द्रया तस्मिन्नेवार्पितं मनो येन सः न पृथक् द्रष्टुमिच्छेदिति विक्ते द्रष्टुं

हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं संमोहनाय रचितं निज-
माययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य ३२ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणा-
यिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरेवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथग्दि-
दृक्षेत् ३३ एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् औत्कंठ्यबा-
ष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ३३ श्रीराम श्रीराम श्री

नेच्छेत् न चित्तं विचालयेदित्यर्थः ३३ समाधिमाह एवमिति द्वाभ्यां निर्बीजः सबीजश्चेति द्विविधो योगः
तत्र निर्बीजं योगं यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति गीतायुक्त-
के मार्गेण क्रियमाणोपि दुष्करः समाधिः सबीजस्तु सुकरः तत्र हि परमानंदमूर्तौ हरौ ध्यायमाने यत्नत एव चि-
त्तोपरमो भवति तदुक्तं हृत्यात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मे गतिमण्वीं प्रयुंक्ते इति अतः सर्वोपक्षिप्तः
योगस्य लक्षणं वक्ष्ये सबीजस्येति तदेवायत्नसिद्धत्वं दर्शयति एवं ध्यानमार्गेण हरौ प्रतिलब्धो भावः प्रेमा ये-
न तया भक्त्या द्रवद् हृदयं यस्य प्रमोदादुत्पन्नानि पुलकानि यस्य औत्कंठ्यं प्रवृत्ताश्रु कलया च मुहुरर्द्यमानः
आनंदसंप्लवे निमज्जमानः दुर्ग्रहस्य भगवतो ग्रहणे बडिशं मत्स्यवेधनमिवाग्रभूतं चित्तमपि ध्येयाद्वियुंक्ते तदा र

पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुविवेकानंतरमप्याहारादिकर्मसुप्रवृत्तेर्बंधः स्यादेवेत्यतआह यावल्लिंगशरीरेणान्वितः तदभिमानवानात्माभवतिता
वदेवतस्यतत्कर्मनिबंधनंबंधहेतुर्भवति ततोविपर्ययः देहधर्मभाक्त्वं ततः क्लेशश्चानुवर्त्ततानतु लिंगाभिमाननि
वृत्तेपि यत्तोऽयंमायायोगः विपर्ययादिः माययायुज्यतइतितथा नपरमार्थइत्यर्थः ४६ ननुसुखदुःखादीनांत्मा न २
धनानांचसत्यत्वप्रतीतेः कुतोमायामयत्वं तथाचबहवोवादिनः सत्यत्वमेववदंतीत्यतआह वितथोमिथ्याभूतो
यमभिनिवेशः कोसौ गुणेषुतत्कार्येषुसुखादिषुअर्थो परमार्थइतिदृक् वचश्चेतियत्तुसः कुतइत्यतआह यथे
ति ४७ उपसंहरति अथतस्मात् नित्यमात्मानं अनित्यंदेहंवा नद्विदः नित्यमनित्यंचजानंतः नन्वेवमुपदेष्टा

यावल्लिंगान्वितोह्यात्मातावत्कर्मनिबंधनं ततोविपर्ययः क्लेशोमायायोगोनुवर्त्तते ४६ वित
थाभिनिवेशोयंयद्गुणेष्वर्थदृग्वचः यथामनोरथःस्वप्नःसर्वमैंद्रियकंमृषा ४७ अथनित्यमनि
त्यंवानेहशोचंतितद्विदः नान्यथाशक्यतेकर्तुंस्वभावःशोचतामिति ४८ लुब्धकोविपिनेक
श्चित्पक्षिणांनिर्मितोंतकः वितत्यजालंविदधेतत्रतत्रप्रलोभयन् ४९ कुलिंगमिथुनंतत्र
विचरत्समदृश्यत तयोःकुलिंगीसहसालुब्धकेनप्रलोभिता ५० सासज्जतशिचस्तत्याम हिषी
कालयंत्रिता कुलिंगस्तांतथापन्नांनिरीक्ष्यभृशदुःखितः स्नेहादकल्पः कृपणः कृपणांपर्यदे
वयत् ५१

रोपिशोचंतोदृश्यंते तत्राह नान्यथेतिज्ञानदार्ढ्याभावात् स्वभावोननिवर्त्ततइत्यर्थः ४८ स्वयंस्वधर्मात्प्रपाति
यदुक्तंतत्रेतिहासमाह लुब्धकइत्यादिना पक्षिणामंतकईश्वरेणनिर्मितः सन्यत्रयत्रतान्प्रलोभयन्जालं तत्रतत्र २
विस्तार्यविशेषणधृतवान् पाठांतरेतेषामामिषादिभिः प्रलोभनंकृतवानित्यर्थः ४९ कुलिंगः कंदभक्षीप
क्षिपक्षिविशेषः कुलिंगयोर्मिथुनं ५० शिचस्तस्यांजालस्यसूत्रे असज्जत बंधंप्राप आपन्नां आपदंप्राप्तां ५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० आकरुणया सर्वतोनुकंपया ५२ आत्मनो देहस्यार्द्धेन विधुरायुषा भार्याशून्यजीवितेनानेन नु दुःखं यथा भवत्येवं जी
वता किं प्रयोजनं अतो मामपि कामं नयत्वित्यन्वयः ५३ न जाताः पक्षा येषां तान् कथं बिभर्मि पोष्यामि मे प्रजा मा
तरं प्रतीक्षंते ५४ शाकुनिकः पक्षिहंता विलीनः सन् ५५ आत्मापायं स्वमृत्युं ५६ अयथोत्थितं मिथ्येवाविर्भू
ति

करुणया। अहो अकरुणो देवः स्त्रियां यो विभुः कृपणां मानुशोचंत्या दीनया किं करिष्यति ५२ कामं नयतु मां दे
वः किमर्द्धेनात्मनो हि मे दीनेन जीवता दुःखमनेन विधुरायुषा ५३ कथं त्वजातपक्षांस्तान्मातृ
हीनान्बिभर्म्यहं मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ५४ एवं कुलिंगं विलपंतमारात्प्रिया
वियोगातुरमश्रुकंठं स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ५५ एवं यूयम
८ पश्यंत्य आत्मापायमबुद्धयः नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ५६ हिरण्यकशिपुरुवा
च बाल एवं प्रवदति सर्वे विस्मितचेतसः ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं ५७ यम
एतदुपाख्याय तत्रैवांतरधीयत ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ५८ ततः शोचत
मा यूयं परं चात्मानमेव च क आत्मकः परो वात्र स्वीयः पारक्य एव वा स्वपराभिनिवेशेन विज्ञा ना २
न नेन देहिनां ५९ नारद उवाच इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा पुत्रशोकं क्षणात्त्यक्त्वा
तत्त्वे चित्तमधारयत् ६० इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वितीयोऽध्यायः २ श्रीराम

तं ५७ सांपरायिकं परलोककृत्यं ५८ अशोचतेति पाठे अडागम आर्षः स्वः पर इत्यभिनिवेशाद्वा ज्ञानं ते राम
न विना ५९ सस्नुषा स्नुषया सहिता ६० सप्तमे द्वितीयः २ तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः आगत्य ८
विस्मितस्तेन संस्कृतः वरानदात् १
स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं साधूनां कदनेन दानवानां दिश्य वंधूनां शोकं तत्त्वनिरूपणेनापनीय यत्कृतवांस्तदाह हिरण्यकशिपुरित्यादिना अ
प्रतिद्वंद्वं प्रतिपक्षहीनं एकराजं एकमेव राजानं व्यधित्सत कर्त्तुमैच्छत् ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादांगुष्ठे
नाश्रितावनिर्येन २ जटानां दीधितिभिः कांतिभिः अंशुभिः रश्मिभिः प्रलयकर्त्तार्क इव रेजे पूर्वं यैरव
क्षिप्ताः संतो विचेरुस्ते देवाः पुनः स्वानि स्थानानि भेजिरे ३ विष्वगीरितः सर्वतः प्रसृतः सन् ४ द्वीपैरद्रिभिश्च

नारद उवाच हिरण्यकशिपू राजन्नजेयमजरामरं आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत ॥ १ ॥ स तेपे
मंदरद्रोण्यां तपः परमदारुणं ऊर्द्ध्वबाहुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः २ जटादीधितिभी रेजे सं
वर्तार्क इवांशुभिः तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे सांकेति तस्य मूर्ध्नः समुद्भूतः
सधूमोऽग्निस्तपोमयः तिर्यगूर्द्ध्वमधो लोकानतपद्विष्वगीरितः ॥ ४ चुक्षुभुर्नद्युदन्वंतः सद्वी
पाद्रिश्चचाल भूः निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं
ययुः सुराः धात्रे विज्ञापयामासुर्देवदेव जगत्पते ६ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ॥ त
स्य चोपशमं भूमन्विधेहि यदि मन्यसे लोका न यावन्नंक्ष्यंति बलिहारास्तवाभिभो ७ तस्यायं कि
ल संकल्पश्चरतो दुश्चरं तपः ॥ श्रूयतां किं न विदितस्तवाथापि निवेदितं ८

सहिता भूश्चचाल ५ ६ तव बलिहाराः करप्रदाः पूजाकारिणः इति वा अभिभो भवतीत्यभिभूः हे अभि
भो सर्वाधिपते पाठांतरे भो इति संबोधनं अभितो यावन्नं नंक्ष्यंतीति संबंधः ७ ब्रह्मणस्तस्मिन्नुद्वेगमुत्पाद
यितुं तत्संकल्पमाहुः तस्येति चतुर्भिः अथाप्यस्माभिर्निवेदितं त्वया श्रूयतां ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

तपोयोगयोः समाधिनानिष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोके यथा आध्यास्ते अधितिष्ठति एवं तथैवात्मनः
साधयिष्यामि ननु ब्रह्मणा अतिदीर्घायुषा तपस्तस्थानं साधितं अन्यः कुतः साधयेत् तत्राह कालात्मनो रिति
यद्यथायुषोऽल्पत्वं न देहो वारं वारं म्रियते तथापि कालस्यात्मनश्च नित्यत्वात् बहुभिर्जन्मभिस्तपस्तस्थानं सा
धयिष्याम्येवेति १० वर्द्धमाननेनतियदुक्तेस्तस्य फलमाह अन्यथेति सुरासुरादिव्यत्ययेन अयथापूर्वं पुण्यपाप
दिव्यत्ययेन इदं जगद्विधास्यामि वेदवादिभिः ध्रुवादिपदैः किं प्रयोजनं अतस्तदेव साधयिष्यामि ११ इति

स एवं चराचरमिदं तपोयोगसमाधिना अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनं एवं तदहं वर्द्धमा
नेन तपोयोगसमाधिना कालात्मनोश्च नित्यत्वात् साधयिष्ये यथात्मनः १० अन्यथेदं विधास्येहमय
थापूर्वमोजसा किमन्यैः कालनिर्द्धूतैः कल्पान्ते वेदवादिभिः ११ इति शुश्रुम निर्बन्धतपः परममा
स्थितः विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर १२ तव सानं हि जगतां पारमेष्ठ्यं जगत्पते भवाय श्र
यसे भूत्यै क्षेमाय विजयाय च १३ इति विज्ञापितो देवैर्भगवानात्मभूर्नृप परितो भृगुदक्षाद्यैर्य
यौ दैत्येश्वराश्रमं १४ न ददृशे प्रतिच्छन्नं वल्मीकतृणकीचकैः पिपीलिकाभिराचीर्णमेदस्त्वङ्
मांसशोणितं १५ तपन्तं तपसा लोकान्यथाभ्रापिहितं रवि विलक्ष्य विस्मितः प्राह प्रहसन्हंसवाहनः
१६

त्वत्पदापहरणेन स्यनिर्बंधं शुश्रुम अतएवासौ तपः परममास्थितः यदत्र युक्तं तत् अनंतरमेव विधत्स्व १२ अ
न्यथा तवस्थानं त्रिशोस सति साधूनामनिष्टं स्यादित्याशंच तत्र आह तव पारमेष्ठ्यमिदमासनं हि जानानां गवां च भ
वाय उद्भवाय श्रेयसे सुखाय भूत्यै च अभ्युदयाय क्षेमाय तत्परिपालनाय विजयाय तल्लोपाय १३ १४ वाल्मीका
दिभिः प्रतिच्छन्नं प्रथमं न ददर्श पश्चाल्लक्ष्यं विहितलक्ष्यं तत् प्राहेति द्वयोरन्वयः आचीर्णं समंततः क्षितं मेदश्च
त्वक् मांसं च शोणितं च यस्य १५ अभ्रैरापिहितं छन्नं रविमिव विलक्ष्य १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ हृत्सारं धैर्यं हंशो मेसिका विशेषैर्भक्षितो देहो यस्य १८ निरंबुः निषिद्धमंबु १ येन सः १९ तेऽनेनव्यवसायेनैवताव
ज्जितोऽहं तपोनिष्ठेन भवतानु सुतरां जितः २० अमर्त्यं मम दर्शनं फलं भवति २२ आदौ भवतीत्यादिभवः १ आ

ब्रह्मोवाच उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः १७
अद्राक्षमहमेतं ते हृत्सारं महदद्भुतं दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते १८ नैतत्पूर्वर्षयश्चक्रु
र्न करिष्यन्ति चापरे निरंबुर्धारयेत्प्राणान्को वै दिव्यसमाः शतं १९ व्यवसायेन तेनेन दुष्करेण मनस्वि
नां तपोनिष्ठेन भवता जितोऽहं दितिनंदन २० ततस्त आशिषः सर्वा ददाम्यसुरपुंगव मर्त्यस्य ते
अमर्त्यस्य दर्शनं नाफलं मम २१ नारद उवाच इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः
कमंडलुजलेनौक्षद्दिव्येनाऽमोघराधसा २२ स तत्कीचकवल्मीकात्सहओजोबलान्वितः
सर्वावयवसंपन्नो वज्रसंहननो युवा उत्थितस्तप्तहेमाभो विभावसुरिवैधसः २३ स निरी
क्ष्यांबरे देवं हंसवाहमवस्थितं ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः २४ उत्थाय प्रांजलि
प्रह्व ईक्षमाणो दृशा विभुं हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयागृणात् २५ हिरण्यकशिपुरु
वाच कल्पांते कालसृष्टेन योऽधेन तमसावृतं अभिव्यनग्जगदिदं स्वयंज्योतिः स्वरोचि
षा २६

क्षतं प्रोक्षितवान् २२ वज्रवत्संहननं अंगदार्ढ्यं यस्य तप्तस्य हेम्न इव आभा यस्य २३ तस्य दर्शनमेव महानुत्सवो
यस्य २४ हर्षेण अश्रूणि पुलकोद्भेदश्च यस्य २५ अंधेन निबिडेन तत्र हेतुः कालसृष्टेन प्रतिप्रकृतिक्षेपेण
ध्वांतेन तेन तमसावृतं जगत् यः १ अभिव्यनक् अभिव्यक्तमकरोत् २६ गुपा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जगत्प्रकाशात्मत्वं २ महत्त्वं परमे श्वरत्वं २

भा० स० यश्च त्रिगुणात्मनाइदं स्रजति अवति लुंपति च तस्मै रजः सत्वतमसां धाम्ने आश्रयाय महते परायपरमेश्वरायनम
इतिद्वयोरन्वयः २७ अत्र च स्व प्रकाशत्वं तत्कारणत्वं तत्स्रष्ट्यादि कर्तृत्वं चेति षड्गुणत्वमुक्तं तदेव प्रपंचयन्नमस्करो
ति नमइत्यादिचतुर्भिः बीजाय कारणाय तत्र हेतुः आधाय ज्ञानतत्रिः विज्ञानविषयाकारं ज्ञानं ते मूर्तिर्यस्य तस्मै
अनेन स्वप्रकाशकत्वं जगत्प्रकाशकत्वं च दर्शितं बीजायेति निमित्तत्वमुक्तं उपादानत्वं चाह प्राणादयोये विकारा स्त्व २
स्तैरूपैर्व्यक्तिः कार्याकारं ईयुषे प्राप्तवते २८ एवमात्मना त्रिवृत्ता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितं महत्वमीश्वर ते २
त्वं चाह त्वमेव जगतो जंगमस्य तस्थुषः स्थावरस्य ईशिषे नियंता भवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण

आत्मनात्रिवृता चेदं सृजत्यवति लुंपति रजःसत्वतमो धाम्ने पराय महते नमः २७ नमआधाय बीजाय
ज्ञानविज्ञानमूर्तये प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्ये स्प २
न पतिः प्रजानां चित्तस्य चित्तैर्मनइंद्रियाणां पतिर्महान्भूतगुणाशयेशः २९ त्वं सप्ततंतून्वितनोषि नो ३
१० त्वान्त्रय्या चातुर्होत्रकविद्यया च त्वमेक आत्मात्मवतामनादिरनंतपारः कविरंतरात्मा ३०
त्वमेव कालो निमिषो जनानामायुर्लवाद्यवयवैः क्षिणोषि कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोक
स्य च जीव आत्मा ३१
अतस्त्वं प्रजानां पतिः तासां चित्तस्य चित्तैश्च तत्परिणामभूताया अनेन तायामनसश्च तन्नियम्यानामिंद्रियाणां च पतिः अ
तस्त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दादिविषयाणां आशयानां तद्वासनानामीशः अत एव सर्वत्वं दर्शि ६
तं २९ इदानीं यज्ञप्रवर्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह त्वमेव सप्ततंतून् अग्निष्टोमादियज्ञान् विस्तारय
होतारो ४ सि कथं त्रय्या तन्त्वावेदत्रयरूपया कथंभूतया चत्वारो यत्र चातुर्होत्रकं कर्म तद्विषययाविद्यया आत्म त्वं प्राणिनामा नाम
त्मभूतस्त्वमेवांतरात्मोपरुद्धं तेयामि कुतः यतः कविः सर्वज्ञः तत्कुतः एकः अखंडः तत्र हेतुः अनादिः अनंतपार श्चेति ना
स्यंतः कालतः पारं च देशतो यस्य सः ३० कालरूपेण संहर्तृत्वमाह त्वमेवेति लवाद्यैरवयवैः क्षिणोषि क्षपयसि तद्देवस्थ
दिकर्तृत्वेऽपि निर्विकारत्वमेवाह कूटस्थ इति तत्र हेतवः आत्मा ज्ञानरूपः परमेष्ठी परमेश्वरः अजः जन्मशून्यः महान्
अपरिछिन्नः किंच जीवलोकेऽपकर्मवशाज्जन्मादिभि [illegible] विक्रियन्ते त्वं तु तस्य जीवः जीवन

अनेजत्स्थावरंच व्यतिरिक्तं नास्ति बोधकं शास्त्रं व्यतिरिक्तमसीतिचेत् न यतः विद्यावेदोपवेदादिवि
द्यास्थानानिकलाश्च तदंगानि

भा०स० ननु गतस्तत्राह त्वमसीति कुतोऽन्यतिरिक्तं यदि किंचिद्भवेत्तर्हि तस्मात्तवजन्मादि विकारो नियम्यत्वादिकं वासंभवेत् ननु त्व
तः परं कारणं अपरं कार्यं तत्र चैजत् जंगमं ... त्वं वे तत्तनव ननु त्वद्व्यतिरिक्ताः तत्कुतः यतः त्वमेव हतु ब्रह्मवासी तदपि
कुतः तत्राह हिरण्यरूपं ब्रह्मांडं गर्भे यस्य सः त्रिपृष्ठः त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः अक्षरात्परतः
परइत्यादिश्रुतेः २२ ननु ब्रह्मांडशरीरस्य जीवस्य ममकुतो ब्रह्मत्वं कुतो वा ब्रह्मांडगर्भत्वादित्तत्राह व्यक्तं कार्य
मिदं नवशरीरं अव्यक्तं सत्यमिति वा येन शरीरेण त्वमिंद्रियप्राणमनसां गुणान् विषयान् भुंक्षे किंच पारमेष्ठ्य

त्वत्तः परं नाऽ परमप्यनेजदेजच्च किंचिद्व्यतिरिक्तमस्ति विद्याः कलास्ते तनवश्च सर्वा हिरण्य
गर्भोऽसि बृहत्त्रिपृष्ठः २२ व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं भुं
क्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः २३ अनंताव्यक्तरूपेण येने
दमखिलं ततं चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः २४ यदि दास्यस्यभिमतान्व
रान्मे वरदोत्तमात् भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो २५ नांतर्बहिर्दिवा नक्तमन्य
स्मादपि वायुधैः न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि २६

परमेश्वर्ये धामनि स्वरूपे स्थितएव भुंक्षे न तु स्वरूपतिरोधानेन अतस्त्वमव्यक्त आत्मा निरुपाधिर्ब्रह्मैव
पुराणपुरुषश्चेत्यर्थः २३ ननु ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य तत्राह हे अनंत येन त्वया अव्यक्तेनेम
नोवचनागोचरेण रूपेणेदं विश्वं ततं व्याप्तं तस्मै तुभ्यं भगवते अचिंत्यैश्वर्याय नमः भगवत्त्वे हेतुः चिद
क्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्ताय इति २४ २५ अन्यस्मात् त्वत्सृष्टव्यतिरिक्तादपि आयुधैर्मा भूत् २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नु२

भा॰स॰ असुभिः प्राणैः असुमद्भिः सप्राणैः यथा आत्मनस्तवास्ति तथा अप्रतिद्वंद्वतादिकं देहीति शेषः ३७ तपसा योगेन च प्र
भावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ३८ सप्तमे तृतीयः चतुर्थे वरान् लब्ध्वा विजि
त्य अखिललोकपालान् विष्णुद्वेषेण तान् सर्वान् दैत्येंद्रः समपीडयत् शतधृतिर्ब्रह्मा १ मम मत्तः यद्यपि यद्यपि इमे दुर्ल

सुरा॰ असुभिर्वासुमद्भिर्वा सुरमहोरगैः अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां ३७ सर्वेषां लोकपालानां
महिमानं यथात्मनः तपोयोगप्रभावानां यन्न रिष्यति कर्हिचित् ३८ इति श्रीभागवते महापुरा
णे सप्तमस्कंधे तृतीयोऽध्यायः नारद उवाच एवं वृतः शतधृतिर्हिरण्यकशिपोरथ प्रादा
त्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् १ ब्रह्मोवाच तातेमे दुर्लभाः पुंसां यान् वृणीषे वरान्मम
तथापि वितराम्यंग वरान् यदपि दुर्लभान् २ ततो जगाम भगवानमोघानुग्रहो विभुः पूजि
तोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ३ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः भगवत्यकरोद्द्वे
षं भ्रातुर्वधमनुस्मरन् ४ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासुरान् देवासुरमनुष्येंद्रगं
धर्वगरुडोरगान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् यक्षरक्षः पिशाचेशा प्रेतभूतपतीनथ ६
सर्वसत्वपतीन् जित्वा वशमानीय विश्वजित् जहार लोकपाला॰ त्रैलो
देवोद्यानश्रियाजुष्टम [illegible] ॥ महेंद्रभवनं साक्षान्निर्मितं विश्वकर्मणा

भा॰२ अमोघोऽनुग्रहो यस्य ३ यद्दर्थं तत्पसं प्रतीतदाह एवमित्यादिना ४ सर्वेषां सत्त्वानां प्राणिजातानां ये ये पतय राम ११
स्तान् ७ त्रिविष्टं स्वर्गं अध्यास्ते स्म अधिष्ठितवान् तत्र च महेंद्रभवनमध्युवास अधिवसति स्म ८ श्रीराम॥

पं

नां स्थानानि सह तेजसा ७॥२

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख। त्रि। रु।

अखिलसमृद्धियुक्तमेवाहयंत्रैर्त्तिभिः ९ मुक्तादामानि परिच्छदाः परिकरायासां १० सुदतीः सुदत्यः ११ ऊर्जितमधि
कं चंडतीव्रंशासनं यस्य १२ अंगहेराजन् तरुणं धिनात्वगंगं धनमधुना असुरयामेतनाअनलएवविदत्ते विघूर्णि

यत्रविद्रुमसोपानामहामारकताभुवः। यत्रस्फटिककुड्यानिवैडूर्यस्तंभपंक्तयः ९ यत्रचित्रवितानानि
पद्मरागासनानि च पयःफेननिभाः शय्यामुक्तादामपरिच्छदाः १० कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य
इतस्ततः रत्नस्थलीषुपश्यंतिसुदतीःसुंदरंमुखं ११ तस्मिन्महेंद्रभवनेमहाबलोमहामनानिर्जित
लोकएकराट् रेमेऽभिवंद्यांघ्रियुगःसुरादिभिः प्रतापितैरूर्जितचंडशासनः १२ तमंगमत्तंमधु
नोरुगंधिनाविवृत्तताम्राक्षमशेषधिष्ण्यपाः। उपासतोपायनपाणिभिःविनात्रिभिस्तपोयोग
बलौजसांपदं १३ जगुर्महेंद्रासनमोजसास्थितंविश्वावसुस्तुंबुरुरस्मदादयः गंधर्वसिद्धाऋ
षयोऽस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्चपांडव। १४ सएववर्णाश्रमिभिःक्रतुभिर्भूरिदक्षिणैः इज्यमा
नोहविर्भागानग्रहीत्स्वेनतेजसा १५ अकृष्टपच्यातस्यासीत्सप्तद्वीपवतीमही तथाकामदुघाद्यौ
स्तुनानाश्चर्यपदंनभः १६ रत्नाकराश्चरत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः क्षारसीधुघृतक्षौद्रदधि
क्षीरामृतोदकाः १७ शैलाद्रोणीभिराक्रीडंसर्वर्तुषुगुणान्द्रुमाः दधारलोकपालानामेकएवपृथ रू।
ग्गुणान् १८

तेनाम्लेअक्षिणीयस्यतंअशेषधिष्ण्यपाःसर्वलोकपालाः उपायनयुक्तैःपाणिभिरुपासनत्रिभिर्ब्रह्मविष्णुरु
द्रैर्विनापदंआश्रयभूतं १३ उपासनप्रकारमाहजगुरिति १४ १५ १६ तस्मानेध्यः तु हुः वहंतिस्मरत्नौघेनै
वाहक्षारेति १७ आक्रीडं क्रीडास्थानं गुणान्पुष्पफलादीन् सचलोकपालानांपृथग्विधान्गुणान् आ
वर्षणदहनशोषणादिनेकएवदधार १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० निर्जिताः ककुभो येन यथोपजोषं यथाप्रीति १९ २३ अरूपा वक्त्रादिरहिता २४ मम दर्शनं श्रवणं सर्वेषां श्रेयसां उपपत्त
ये प्राप्तये २५ ननु देवादिविद्वेषस्य विनाशो नास्ति ब्रह्मचर्येणार्जितत्वात् तत्राह निर्वैरायेति सर्वमहं सहे तन्म

स इत्थं निर्जितककुबेकराड्विषयान्प्रियान् यथोपजोषं भुंजानो नातृप्यदजितेंद्रियः १९ एवमैश्व
म२८ र्यमत्तस्य दृप्तस्योच्छास्त्रवर्त्तिनः कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः २० तस्योग्रदंडसंविग्नाः
सर्वे लोकाः सपालकाः अन्यत्रालब्धशरणाः शरणं ययुरच्युतं २१ तस्यै नमोस्तु काष्ठायै यत्रा
त्मा हरिरीश्वरः यद्गत्वा न निवर्त्तन्ते शांताः सन्यासिनोमलाः २२ इति ते संयतात्मानः समाहितधियो
मलाः उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः २३ तेषामाविरभूद्वाणी अरूपा मेघनिस्वना सं
१२ नादयंती ककुभः साधूनामभयंकरी २४ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः मद्दर्शनं हि
भूतानां सर्वश्रेयोपपत्तये २५ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् तस्य शांतिं करिष्यामि
कालं तावत्प्रतीक्षत २६ यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स वा आशु वि
नश्यति २७ निर्वैराय प्रशांताय स्वसुताय महात्मने प्रह्रादाय यदा द्रुह्येद्धनिष्येपि वरोर्जितं २८
नारद उवाच इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः निवर्त्तंत गतोद्वेगा मेनिरे चासुरं हतं न्य२
२९ तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः प्रह्लादोभून्महांस्तेषां गुणैर्महदुपासकः ३०

उक्ते द्रोहमिति भावः २८ असुरं च हतं मेनिरे तदानीं तत्र द्वेषस्य प्रवृत्तत्वादिति भावः २९ तमेव द्वेषं व राम
क्तुं प्रह्लादे सुतस्य महत्वमाह तस्येत्यादिना गुणैर्महानभूत् गुणेनैवाह महदुपासक इत्यादिना ३० १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमेवं देयं वक्तुं मोदैः सुतस्य महत्वमाह तस्येत्यादिना गुणैर्महानभूत् गुणानेवाह महदुपासक इत्यादिना ३० सत्यसंधा
प्रतिज्ञा यस्य एक एव प्रियश्च सुहृत्तमश्च ३१ सन्नता आर्याणामंघ्रयो येन ईश्वर इति भावना यस्य ३२ व्यसनेषु
नोद्विग्नं चित्तं गुणेषु विषयेषु निस्पृहः यतस्तेषु अवस्तुदृक् दांता इंद्रियादयो यस्य रहित आसुरो भावो मत्सरा

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः। प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ३० ब्रह्मण्यः शी
लसंपन्नः सत्यसंधो जितेंद्रियः। आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ३१ दासवत्सन्नतार्यांघ्रिः
पितृवद्दीनवत्सलः भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः विद्यार्थरूपजन्माढ्यो मानस्तंभवि
वर्जितः ३२ नोद्विग्नचित्तो व्यसनेषु निस्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् दांतेंद्रियप्राणशरी
रधीः सदा प्रशांतकामो रहितासुरोऽसुरः ३३ यस्मिन्महद्गुणा राजन्गृह्यंते कविभिर्मुहुः। न तेऽ
धुनापिधीयंते यथा भगवतीश्वरे ३४ यं साधुगाथासदसि रिपवोऽपि सुरा नृप प्रतिमानं प्रकुर्वंति कि च
मुतान्ये भवादृशाः ३५ गुणैरलमसंख्येयैर्माहात्म्यं तस्य सूच्यते वासुदेवे भगवति यस्य नैसर्गिकी
रतिः ३६ न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया कृष्णग्रहगृहीतात्मा न वेद जगदीदृशं ३७
आसीनः पर्यटन्नश्नंछयानः प्रपिबन्ब्रुवन् नानुसंधत्त एतानि गोविंदपरिरंभितः ३८ श्री

दिर्यस्य सः असुरोपि सन् अधुनापि ते गुणा नापिधीयंते तिरोहिता न भवंति ३४ साधुगाथासदसि साधुकथाप्रसं
गवत्यां सभायां प्रतिमानं दृष्टांतं ३५ सूच्यते मया केवलं द्योत्यते सुकथ्यत इति वा ३६ नैसर्गिकत्वे लिंगान्याह
न्यस्तक्रीडनक इति षड्भिः तन्मनस्तया तदेकचित्तत्वेन ३७ एतानि आसनादीनि गोविंदेन परिरंभितः आत्मनो
एकीकृतः ३८

कु ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰ नदति रौदिति वैकुंठस्य चिंतया शबलात्पातिश्चाक्षिप्तानि चित्तानि यस्यात्तस्य चिंतयाश्चाह्लादो यस्य ३९ उत्कंठः मुक्त
कंठः सन् अनुचकार तच्चेष्टादिके स्वयं कृतवान् संस्पर्शेन तज्ञावापत्तिः तेन निर्वृतः अस्पंदः स्थिरः प्रणयेन
नयः आनंदः तेन सलिलं तेन युक्ते आमीलितेऽर्द्धनिमीलिते ईक्षणे यस्य ४० आत्मनः परो निर्वृतिं तत्त्वतु दुःसं
गेन दीनस्यान्यस्यापि मनः शमं शांतत्वं धात् ४२ अद्ये द्रोहमकरोत् ४३ प्रथमाध्यायोक्तप्रश्नमेवार्थं मतेति समं पनपु
क्वचिद्रुदति वैकुंठचिंताशबलचेतनः क्वचिद्धसति तच्चिंताह्लाद उद्गायति क्वचित् ३९ नदति क्व
चिदुत्कंठो विलज्जो नृत्यति क्वचित् क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ४० क्वचिदुत्पुलक
स्तूष्णीमास्ते संस्पर्शनिर्वृतः अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४१ स उत्तमश्लोकप
दारविंदयोर्निषेवयाऽकिंचनसंगलब्धया तन्वन् परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनस्य
मनः शमं व्यधात् ४२ तस्मिन्महाभागवते महाभागे महात्मनि हिरण्यकशिपू राजन्नकरोदघमात्म
जे ४३ युधिष्ठिर उवाच देवर्षे एतदिच्छामो वेदितुं तव सुव्रत यदात्मजाय शुद्धाय पित्रादात्सा
धवे ह्यघं ४४ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः उपालभंते शिक्षार्थं नैवाघमप
रो यथा ४५ किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो
पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ४६ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्थो ऽध्यायः ४

न‍ः पृच्छति देवर्षे इति तव वक्तुः तव वाक्यमिति वा साधवे अघमदात् साधो द्रोहं कृतवानिति यत्तद्वेदितुं ४४ उपालंभेत
आक्षिपंति अघं तु नैव कुर्वंति अपरः शत्रुरिव ४५ अनुवशान् अनुकूलान् साधून् अपगतदोषान् गुरुः पितेव दे
वता येषां तान् उद्दिश्य अघं न कुर्वंतीति किमु वक्तव्यमित्यर्थः पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पित्रा कृतो द्वेषः पुत्र
स्य मरणार्थं प्रयोजितः प्रवर्तित इति यत् एतत् कौतूहलं विधम अपाकुरु यतो यस्मात्पुत्राय यो द्वेषः स पितुर्मरणा

१३

राम
१३

प्रयोजितः अपाकुरुतत्कौतूहलं विधमस्व ४६ सप्तमस्कंधे चतुर्थोऽध्यायः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमे गुरुतो धीतं त्यक्त्वा विष्णुमुपेतो रतं घातयन् द्विषसपर्यायै सुतं दैत्यो न चाशकत् ॥ भगवद्भक्तेरेव विद्वेषकारणमिति वक्तु
नी॰ माह पौरोहित्यायेत्यादि काव्यः शुक्रः ॥ अतस्तस्य सुतौ तत्र न्यवसतामिति शेषः ॥ १ ॥ पाठ्यानन्यासुरबालकानिति वान्वयः ॥
अनुश्रवणानंतरं तथैव पपाठ च किं तु तन्न साधु मेने तत्र हेतुः स्वःपरइत्यसद्ग्रहो मिथ्याभिनिवेश एव आश्रयो यस्य तत्

नारद उवाच पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः ॥ षंडामर्कौ सुतौ तस्य दैत्यराजगृहांति
के ॥ १ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदं पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ य
त्तत्र गुरुणा प्रोक्तं शुश्रुवेनुपपाठ च न साधु मनसा मेने स्वपरासद्ग्रहाश्रयं ॥ ३ एकदासुरराट् पुत्र
मा॰ मंकमारोप्य पांडव पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ प्रह्लाद उवाच तत्साधु मन्ये ऽसुरवर्य
देहिनां सदा समुद्विग्नधियामसद्ग्रहात् हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५
नारद उवाच श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः ॥ जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥ ६
सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः ॥ विष्णुपक्षैः प्रतिछन्नैर्न भिद्येतास्य धीर्यथा ॥ ७ गृहमा नै २
नीतमाहूय प्रह्लादं दैत्ययाजकाः प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ॥ ८ वत्स प्रह्लाद
भद्रं ते सत्यं कथय मा मृषा बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९

त् ३ ४ हे असुरवर्य असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशाद्धेतोः सम्यगुद्विग्ना धीर्येषां वनं गतः सन् हरिमाश्रये
तेति यत् तदेवाहं साधु मन्ये कथंभूतं गृहं हित्वा आत्मनः पातः अधः पातनिमित्तं कुतः अंधकूपवन्मोहावहं ५ पर
पक्षविश्रंभसमाहिताः परिनिष्ठिताः हासमेवाह बुद्धिरिति ॥ विष्णुपक्षैर्भागवतैर्हेतुभूतैः ननु त्वं द्वे हे कुतस्तां प्रवेश
सत्या तथापि प्रतिछन्नैर्वेषांतरग्राच्छन्नैः ॥ ७ दैत्ये गृहमानीतं बालान्सर्वान् अति अतिक्रम्य तुभ्यं तव ॥ ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि॰ २ बुद्धीनां २

भा॰स॰ अहोमायामोहिताभवंतोमामाक्षिपंतीत्याशयेननावदाह परःस्वश्चेतिमिथ्याभिनिवेशोयदीययामाययेयकृतः ननुवा
स्तवः अतएवतयामोहितैर्भवतामिवदृष्टोमेभ्रमः तस्मैअचिंत्यमायेश्वरायनमः ११ अहोकिमेतदल्पप्रसितवबुद्धि
भेदोयतोजातस्तत्कथंपरमाक्षिप्तःसन् तत्प्रसादादेवत्युत्तरमाह सइतित्रिभिः सभगवान्यदाअनुव्रतः अनुकूलोभ
वतितदापशूनामिवबुद्धिर्भेदगताअसतीमिथ्याविषयाविभिद्यतेअभिन्नात्मनिष्ठाभवति १२ भेदस्यासत्वंदर्शी

बुद्धिभेदःपरकृतउताहोतेस्वतोभवत् भण्यतांश्रोतुकामानांगुरूणांकुलनंदन १० प्रह्लादउवाच परः
स्वश्चेत्यसद्ग्राहःपुंसांयन्माययाकृतः [illegible] विमोहितधियांदृष्टस्तस्मैभगवतेनमः ११ सयदा
नुव्रतःपुंसांपशुबुद्धिर्विभिद्यते अन्यएषतथान्योहमितिभेदगताऽसती १२ सएषआत्मास्वप
१४ रेत्यबुद्धिभिर्दुरत्ययानुक्रमणोनिरूप्यतेमुह्यंति यद्वर्त्मनिवेदवादिनोब्रह्मादयोह्येषभि
नत्तिममति १३ यथाभ्राम्यत्ययोब्रह्मन्स्वयमाकर्षसन्निधौतथामेभिद्यतेचेतश्चक्रपा
णेर्यदृच्छया १४ नारदउवाच एतावद्ब्राह्मणायोक्त्वाविरराममहामतिःतंनिर्भर्त्स्यकुपितःसुदीनो

यत्राह सएषपरमात्मैवस्वःपरइतिच अविवेकिभिर्निरूप्यतेयुक्तंचैतत् यतः यस्यवर्त्मनिजिज्ञासायां राम
ब्रह्मादयोऽपिमुह्यंति तत्रहेतुः दुरत्ययंदुर्घटमनुक्रमणंअनुचरितमनुवर्णनंवायस्यसः १३ ननुनिर्विका १४
रस्यकथंमतिभेदकत्वंतत्राह यथाअयोलोहंआकर्षस्यायस्कांतस्यसमीपेस्वयमेवभ्रमतिचेतश्चक्र
पाणेःसन्निधिरेवकुतोजातस्तत्राह यदृच्छयेति कस्यचित्पादानादेःफलमेतदितिनज्ञायतइत्यर्थः १४ रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेत्रकशाउपायानां मध्ये चतुर्थः दण्डः अस्य दुर्बुद्धेः उदितः उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्यांगारवन्नाशहे-
तोः १६ तत्कुतस्तत्राह दैतेया एव चंदनद्रुमास्तेषां वने अयं कंटकद्रुमः तुल्यो जातः तदेवाह यस्य हेतुर्यवनस्य मू-
लोन्मूलने परशुः स्थानीयस्य विष्णोरयमर्भक एव नालायितो नाल इवाचरत् यथा परशोः छेदके बबुरादि-
निमित्तो दंडः सहकारी तं विनाच्छेदनासंभवात् तथायं विष्णोरेतस्य मूलच्छेदहेतुर्जात इत्यर्थः १७ इति तं प्रल्हादं

आनीयतामरे वेत्रमस्माकमयशस्करः। कुलांगारस्य दुर्बुद्धेश्चतुर्थोस्योदितो दमः। १६ दैतेय-
चंदनवने जातोयं कंटकद्रुमः। यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः। १७ इति तं विवि-
धोपायैर्भीषयंस्तर्जनादिभिः। प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनं। १८ तत एनं गुरु-
र्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं। दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतं। १९ पादयोः पतितं बालं प्र-
तिनंद्याशिषासुरः। परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं २० आरोप्यांकमवघ्राय मूर्द्ध-
न्यश्रुकलांबुभिः। आसिंचन्विकसद्वक्त्रमिदमाह युधिष्ठिर। २१ हिरण्यकशिपु° नूच्यतां ता- प्रह्लादा३
त स्वधीतं किंचिदुत्तमं। कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान्। २२ प्रह्लाद उवाच श्रवणं
कीर्तनं विष्णोः स्मरणं पादसेवनं। अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं २३

भीषयन् धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास १८ ज्ञातं ज्ञेयमुपायानां च चतुष्टयं येन तं ज्ञात्वा दैत्येंद्रं प्रति"
मात्रा मृष्टं स्नपितं १९ २२ पादसेवनं परिचर्या अर्चनं पूजा दास्यं कर्मार्पणं सख्यं विश्वासादि आत्मनिवेद-
नं देहसमर्पणं यथा विक्रीतस्य गोवाश्वादेर्भरणपालनादिचिंता न क्रियते तथा देहं तस्मै समर्प्य तच्चिंताविवर्जनमित्यर्थः
इति नवलक्षणा नियस्या सा अधीता न च भगवति विष्णौ भक्तिः क्रियेत तां सा चार्पितैव सती यदि क्रियेत न तु कृता

सती पश्चादर्प्येत तदुत्तममधीतं मन्ये न त्वस्माद्गुरोरधीतं शिक्षितं
वा तथाविधं किंचिदस्तीति भावः २३

दि॰ क्षितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰ मित्रत्वेनवर्त्तमानस्यापितवविरोधाचरणंनासंभावितमित्याह संतिहीति दुष्टमैत्रीमित्रत्वेयषांते रोगइति ब्रह्महाक्ष
यरोगीस्यात्सुरापःश्यावदंतकः स्वर्णहारीतुकुनखीदुश्चर्मागुरुतल्पगइत्यादिस्मृत्युक्तः पातकिनांरोगायुस्य
तितथातेषामघंविद्वेषादिकमुदेतीत्यर्थः २७ मत्प्रणीतंमयापाठितंनोस्मभ्यंकटुकुत्सितंदोषंमास्मअदाः
अडागमआर्षः मयिदोषारोपंमाकृथाइत्यर्थः इंद्रशत्रोइतिनहिब्राह्मणपुत्रकोपंचितइतिभावः २८ गुरुमुखी

इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा क्रियेतभगवत्यद्धातन्मन्येऽधीतमुत्तमं २४ निशम्यै
तत्सुतवचोहिरण्यकशिपुस्तदा गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः २५ ब्रह्मबंधोकिमेतत्ते
विपक्षंश्रयतासता असारंग्राहितोबालोमामनादृत्यदुर्मते २६ संतिह्यसाधवोलोकेदुर्मैत्राश्छ
द्मवेषिणः तेषामुदेत्यघंकालेरोगःपातकिनामिव २७ गुरुपुत्रउवाच नमत्प्रणीतंनपरप्र
९५ णीतंसुतोवदत्येषतवेंद्रशत्रो नैसर्गिकीयंमतिरस्यराजन्नियच्छमन्युंकददाःस्ममानः
२८ नारदउवाच गुरुणैवंप्रतिप्रोक्तोभूयआहासुरःसुतं नचेद्गुरुमुखीयंतेकुतोऽभद्रा
सतीमतिः २९ प्रह्लादउवाच मतिर्नकृष्णेपरतःस्वतोवामिथोभिपद्येतगृहव्रतानां अदांत
गोभिर्विशतांतमिस्रंपुनःपुनश्चर्वितचर्वणानां ३०

गुरुवाक्यजनिताहेभद्र २९ आस्तामियंवार्त्ताभवादृशानांविषयासक्तानामत्रानधिकारादित्याशयेनाह
मितिरिति परतः गुरोः स्वतोवामिथोवाअन्योन्यतः नाभिपद्येतनसंपद्येत केषांगृहएवव्रतंसं राम
कल्पइतिकृत्यचिंतायेषांअतएवअदांतैरनुपरतैर्गोभिरिंद्रियैर्हेतुभूतैः तमिस्रंसंसारंविशतांन ९५
त्रचर्वितस्यैवचर्वणंयेषां ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स०

ननु श्रीकृष्णस्य परमानंदरूपत्वात्तत्प्रपितन्निष्ठा एव किं न स्युः तदज्ञानादित्याह नेति येदुराशयाः विषयवासितांतःकरणाः तेहि विष्णुं न विदुः तत्र हेतुः स्वस्मिन्नेवार्थः पुरुषार्थो येषां तेषां गतिं गम्यं ननु तेपि गुरूपदेशाद्विष्णुं ज्ञास्यंतीति तत्राह बहिर्विषयेष्वर्थो येषां ते बहिरर्थास्तानेव गुरुत्वेन मन्यते शीलं येषां ते अतः अंधैरुपनीयमाना अंधा यथा पथानभिविदुः किंतु गर्तेपतंति तथा ते ईशस्य तंत्र्यां दीर्घरज्ज्वां वेदलक्षणायां उरूणि दामानि ब्रह्मणादि नामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवंतीत्यर्थः तदुक्तं विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः

नेते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः अंधा यथांधैरुपनीयमाना वाचीशतंत्र्यामुरुदाम्नि बद्धाः ३१ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो यदर्थः महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत यावत् ३२ इत्युक्तोपरते पुत्रे हिरण्यकशिपू रुषा अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ३३ आहामर्षरुषाविष्टः कषायीभूतलोचनः वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः ३४ अयं मे भ्रातृहा सोयं हित्वा स्वान् सुहृदोऽधमः पितृव्यहंतुर्यः पादौ विष्णोर्दासवदर्चति ३५ श्रीराम श्रीराम श्रीराम श्री

वारुणादिपाशैर्बद्धाः ते कथमीशं जानीयुरिति ३१ ननु च एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिप्रतिपादितं विष्णुं कथं न विदुः कुतो वा तेषां तत्र प्रवेशस्तत्राह नैषां मतिरिति निष्किंचनानां निरस्तविषयाभिमानानां महतां पादरजसा अभिषेकं यावन्न वृणीत तावत् श्रुतिवाक्यैर्जातापि मतिरुरुक्रमस्यांघ्रिं न स्पृशति न प्राप्नोति असंभावनादिभिर्विहन्यत इत्यर्थः अनर्थस्य संसारस्यापिगमो यदर्थः यस्याः अंघ्रिस्पर्शिन्याः मतेरर्थः प्रयोजनं महदनुग्रहाभावान्न तेषां निश्चयो नापीह मोक्षस्तेषामित्यर्थः ३२ निरस्यत निरास्यत् ३३ अमर्षोऽसहनं तेन सहिता या रुषा आविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य सः हे नैर्ऋताः ३४ वध्यत्वे हेतुः यतोयं

राक्षसाः कौ.निरु ४

चिक्षेप २

भा०स० अहो विष्णुरथ विश्वसनीयं किमिति स्वीकृतवानित्याह विष्णोर्वेति अहात् तज्जहौ ३६ ननु स्वीयमपत्यं च कथं वध्यस्तत्रा-
ह परोप्यौषधमिव हितकृच्चेत्तर्ह्यपत्यमेव ज्ञेयः सुतः स्वदेहजोपि अहितश्चेत् आमय इव आस्तां ममतास्पदस्य
कथा अंगमपि च यत् चरणादि तदप्यात्मनोऽहितं चेत् छिंद्यादेवेत्यर्थः ३७ अतः सर्वैरुपायैर्हंतव्यः संभोजो भोज-
नं भोजनादिषु विषादिप्रयोगैरित्यर्थः यद्दुष्टमिंद्रियं मुनेः शत्रुः तिग्मा तीक्ष्णा दंष्ट्रा येषां करालान्यास्यानि ये-

विष्णोर्वासाध्वसौ किं नु करिष्यत्यसमंजसः सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ३६ परो-
प्यपत्यं हितकृद्यथौषधं स्वदेहजोप्यामयवत्सुतोऽहितः छिंद्यात्तदंगं यदुतात्मनोऽहितं शेषं
१६ सुखं जीवति यद्विवर्जनात् ३७ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरः शत्रुर्मु-
नेर्दुष्टमिवेंद्रियं ३८ नैरृतास्ते समादिष्टा भर्त्रा वै शूलपाणयः तिग्मदंष्ट्रकरालास्यास्ता-
म्रश्मश्रुशिरोरुहाः ३९ नदंतो भैरवं नादं छिंधि भिंधीति वादिनः आसीनं चाहनन् छू-
लैः प्रह्रादं सर्वमर्मसु ४० परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि युक्तात्मन्यफला आस-
न्नपुण्यस्येव सत्क्रियाः ४१ प्रयासेऽपहते तस्मिन् दैत्येंद्रः परिशंकितः चकार तद्वधोपायान्निर्ब-
धेन युधिष्ठिर ४२

षां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ३९ ४० परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य त-
स्मिन् तेषां प्रहारादि निष्फला जाताः तत्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये अविषये भगवति नि- राम
रतिशयैश्वर्ये अखिलात्मनि शास्त्रादीनामपि नियंतरि एवंभूते परे अपुण्यस्य निर्दैवस्य सत्क्रिया म- १६
होद्यमा इव ४१ ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिचाराः कृत्यादयः अवपातनानि गिरिगिरिशृंगादधः पातनानीति॥ अवरोहिषुसन्निरोधेऽग्र ४३ पर्वताक्रमणे॥
पर्वतानां तदुपरिक्षेपैः वहुवचनेनरभिचाराद्यावृत्तिं दर्शयति तद्हननं कर्तुं नाभ्यपद्यत न प्रापनाशक्तो दित्यर्थः
४४ चिंतामेवाह एषइति त्रिभिः ममयाऽसाधुपुरुषं यथा भवति तथोक्ता॥ असद्दैर्मैरपकारैः अभिचारैर्वा
अविदूरेवर्तमानोऽपि वालोप्ययं अजडधीः निर्भयचित्तः मेऽनार्य्यमन्यायंशत्रुत्वान विस्मरति अजीगर्तस्य
मध्यमपुत्रः शुनःशेपोनामपितृभ्यांहरिश्चंद्राय विक्रीतः सनुयथा तयोरपकारमविस्मरं स्ता द्विपक्षंविश्वामि

दिगाजेंद्रं दंष्ट्रकेंद्रैरभिचारावपातनैः॥ मायाभिस्संनिरोधेऽग्र गरदानैरभोजनैः॥ ४३ हि
मवाद्यग्निसलिलैः पर्वताक्रमणैरपि नशशाकयदाहंतुमपापमसुरः सुतं चिंतांदीर्घे
तमांप्राप्तस्तत्कर्तुं नाभ्यपद्यत ४४ एषमेवक्ष्व साधृक्ताव धापायाऽनिमित्ताः तैस्तैर्द्रोहै
रसद्वर्मैर्मुक्तः स्वेनैव तेजसा ४५ वर्तमानोविदूरेवैवालोप्यजडधीरयं नविस्मरति मे
नार्यं शुनःशेपइवप्रभुः ४६ अप्रमेयानुभावोयमकुतश्चिद्भयोऽमरः॥ नूनमेतद्विरोधे
नमृत्युर्मेभविता नवा ४७ इतितच्चिंतयाकिंचिन्म्लानश्रियमधोमुखं शंडामर्कावौ
शनसौविविक्तइतिहोचतुः ४८ जितंत्वयैकेनजगत्त्रयंभ्रूकेवोर्विजृंभणात्रस्तसमस्तधिष्ण्यप नेत
स्यचिंत्यतवनाथचक्ष्महे नवैशिशूनागुणदोषयोःपदं ४९
त्मामाश्रित्यगोत्रांतरमापन्नस्तद्वत्सःयद्वोस्वभावापरित्यागदृष्टांतः शुनःशेषःपुच्छमिवेति ४६ अप्रमेयः अपरिमेयोनु
भावोयस्य नकुतश्चिद्भयंयस्यानवामविता अन्यथामृत्युर्नेविभविष्यतीत्यर्थः॥ ४७ औशनसौउशनसःपुत्रौ निति
शौविविक्तेएकांते ४८ भ्रकेवोर्विजृंभणेनैवत्रस्ताधिष्ण्यपायस्मिन् तस्यचिंत्यनचक्ष्महेनपश्यामःपदं मालंवनेने

वासिनि यथा लिङ्गनाद्दंसाद्दाविघ्नाः पदविभिन्नानां विभावयत्यर्थः॥ ४९

भा० स०

तथापि स्नुबंधनमस्योचितमित्याहतुः इमंत्विति यावद्गुरुरागमिष्यति तावद्बधानि धेहि ततः किं अत आहतुः बुद्धिश्च
समीचीना वयसा भवतीति ५० अनुज्ञाय तथेत्यंगीकृत्य ५१ ततश्चतौ प्रह्लादाय धर्मादिकमूचतुः प्रश्रित आस
वनत अतस्मै यथावत् त्रिवर्गमनुशिक्षितमपि साधु न मेने तां शिक्षां च यतो द्वंद्वे रागद्वेषादिषु विषयेषु आरम
णाय येषां तैरुपवर्णितां ५३ परावृत्तः अन्यत्रगतः सन् उपहूतः संधिः पादपूरणार्थः ५४ क्रीडार्थं कृतः क्षणः

इमंतु पाशैर्वरुणस्य बध्वा निधेहि भीतो न पलायते यथा बुद्धिश्च पुंसो वयसार्यसेवया याव
द्गुरुर्भार्गव आगमिष्यति ५० तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् धर्मो ह्यस्योपदेष्ट
व्यो राज्ञां यो गृहमेधिनां ५१ धर्ममर्थं च कामं च नितरां चानुपूर्वशः प्रह्लादायोचतू रा
जन् प्रश्रयावनताय च ५२ यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितं न साधु मेने तच्छि
क्षां द्वंद्वारामोपवर्णितं ५३ यदाचार्यः परावृत्तो गृहमेधीयकर्मसु वयस्यैर्बालकैस्तत्र
सोपहूतः कृतक्षणैः ५४ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः उवाच विद्वां
स्तन्निष्ठां कृपया प्रहसन्निव ५५ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः बाला अदूषित
९७ पर्युपासन राजेंद्र तन्न्यस्तहृदयेक्षणाः तानाह करुणो मैत्रो महाभागवतोऽसुरः ५७ इति श्रीभा
गवते महापुराणे सप्तमस्कंधे पंचमोऽध्यायः

कृतोत्सवैः लब्धावसरैरिति वा येषां निष्ठा जन्ममरणादिलक्षणं विद्वान् ५५ द्वंद्वरामाणामीरितैरीहितैः अनदूषिता
धीर्येषां यतो बालाः ५६ तस्मिन्न्यस्तं हृदयमीक्षणं च येषां ५७ सप्तमे पंचमः ५ ५ ५ रामु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षष्ठे गुरुगृहस्थेषु प्रह्लादो दैत्यबालकान् अनुकंप्य परं तत्त्वं नारदोक्तमुपादिशत् निरर्थकक्रियालोपैरायुर्व्ययमजान
तो प्रह्लादः सदयं प्राह धर्मं भागवतं कृती कौमार इत्यादिना इहैव मानुषजन्मनि धर्मानाचरेत् यतोऽर्थदमेतत् ॥
तत्र कौमार एवायतः तदप्यध्रुवं न चैवं भूतं जन्मान्तरायतः दुर्लभं तत्र धर्मानेवाचरेत् न सुखार्थप्रयासान्
दिस्य तत्र भागवतानेव न काम्यान् १ इह भागवतानेव धर्मानाचरेत् तदुपपादयति यथा हीति चतुर्भिः इह पुरुषस्य विष्णोः
पादोपसर्पणमेव यथा अनुरूपं योग्यमित्यर्थः यद्यस्मात् एष प्रिय इत्यादि २ भोगाद्यमेः कथं त्याज्य इति चेत्तत्र

प्रह्लाद उवाच कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह दुर्लभं मानुषं जन्म तदप्यध्रुव
मर्थदं १ यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् २
सुखमैन्द्रियकं दैत्या देहयोगेन देहिनां सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः ३ तत्प्रयासो
न कर्तव्यो यत आयुर्व्ययः परं न तथा विंदते क्षेमं मुकुंदचरणांबुजं ४ ततो यतेत कुशलः क्षे
माय भयमाश्रितः शरीरं पौरुषं यावन्न विपद्येत पुष्कलं ५ पुंसो वर्षशतं ह्यायुस्तदर्द्धं चाजिता
त्मनः निःफलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ६ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंश
तिः जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ७ दुरापूरेण कामेन मोहेन च बलीयसा शेषं गृहे
षु सक्तस्य प्रमत्तस्यापयाति हि ८

देहसुखमिति सर्वत्र पश्वादावपि दैवात्पूर्वादृष्टादेव ३ अतस्तदर्थप्रयासो न कर्तव्यः यतः प्रयासात् परं केव
लं आयुषो व्यय एव यतस्तु तथा तेन प्रकारेण क्षेमं न प्राप्नोति ४ भयमाश्रितः संसारं प्राप्ताः पुरुषरूपं शरीरं या
वत्पुष्कलं शक्तिमन्न तु विपद्येत् अक्षमं न भवेत् न नश्येदिति वा तावदेव क्षेमाय यतेत ५ आयुर्व्ययक्रममा
ह पुंस इति त्रिभिः यद्यस्मात् शेते ६ विंशतिवर्षाणि आयुर्याति ७ दुरापूरेण दुःखैः समंतादापूर्यमाणेन ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यौवनेन गृहासक्तोपि पश्चाद्विरक्तः सन् क्षेमं यास्यतीत्याशंक्य न तत्संभवं दर्शयन् कौमार एवाचरेदित्येतदुपपादयति कोगृहेष्विति सप्तभिः एवं यस्यार्थस्यासुभिः क्रीणाति प्राणहानिमंगीकृत्यापि तस्कारादिर्यं साधयति तं स्मिन्नर्थे हृत्स्मा कोनु विसृजेत् १० किंच कथमित्यादि प्रियायाः संगादिकं स्मरणं कथं त्यजेदिति तृतीयेनान्वयः मंत्रान् हिते शिक्षालापान् सुहृत्सु च संगं तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च संगं तेष्वनुरक्तो

को गृहेषु मान् सक्तमात्मानमजितेंद्रियः स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं एवं कोन्वर्थ तृष्णां विसृजेत्प्राणेभ्योपि य ईप्सितः यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् १० कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ११ पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ गृहान् मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२ त्यजेत्कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औपस्थ्यजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं विहतं प्रमत्तः सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः १४

चिंतयस्य ११ ताः श्वशुरगृहे स्थिताः हृदयाः हृदयंगमाः मनोज्ञाः उरवः परिच्छदा येषु तान् वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः १२ कोशस्कृत् कोशस्कारिकीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणीहमानः ननु पितृप्तकामो पि दोषदर्शनेन विरक्तः सन् त्यजेत् तत्राह औपस्थ्यं चेशश्च्यं जैह्व्यं च सुखं तदेवाधिकं मन्यमानः अतो दुरंतो मोहो यस्य स कथं विरज्येत विरक्तः स्यात् १३ दुरंतमोहत्वं दर्शयन्नाह कुटुंबपोषणाय वियत् क्षीयमाणं निजमायुः पुरुषार्थं च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोपि न निर्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स०

५

प्रस्तुतं चौर्यं करोतीत्याह वित्तेष्विति नित्यमभिनिविष्टचेतां यस्य सः परवित्तहर्तुः प्रेत्य नरकलक्षणं दुःखं च दंडादिरूपं दो
षं यद्यपि विद्वान् अथाप्यऽशांताभिलः परवित्तहरत्येव १५ तदेवं कामग्रहग्रस्तमा नित्यादि सप्तभिः श्लोकैरुपपा
दितं गृहादिषु प्रसक्तस्य वैराग्याद्यसंभवमुपसंहरति विद्वानपीति स्वलोकाय आत्मपरामर्शाय न कल्पते किंतु
विमूढाय यथा तथा विद्वानपि तमः अभिनिवेशमेव प्रपद्यते तत्र हेतुः यद्गृहीति स्वीयमिदं पारक्यमिदमिति विभि
न्नो भावो भावना यस्य सः १६ तस्मात्कौमार एव भागवतान्धर्मान् आचरेदिति सहेतुकमुपसंहरति यतः के

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः प्रेत्येह वाथाप्यजितेंद्रियस्तदशांत
कामो हरते कुटुंबी १५ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन्स्वलोकाय न कल्पते वै यः स्वी
यपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः १६ यतो न कश्चित्क्व च कुत्र चिद्वा दीनः
स्वमात्मानमलं समर्थः विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः १७ त
तो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु उपेत नारायणमादिदेवं स मुक्तसं
गैरिषितोऽपवर्गः १८ न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः आत्मत्वात्सर्वभूतानां सि

श्चिदपि स्वमात्मानं मोचितुं न समर्थः ततो नारायणमुपेत शरणं यात तत्तु तेरणान्वयः असामर्थ्ये हेतुः अलं दीनो
लंपटः अतः कामादृशियासां तासां विहारे क्रीडायां निमित्ते क्रीडामृगः विहारमिति पृथक्पाठे तासां विहारसा
धनमात्मानं यत्र तासां क्रीडामृगाः सइत्यन्वयः किंच यत्र यस्य निगडः शृंखला तुल्यो विसर्गः पुत्रादिरूपो भ
वति १७ विदूरात् दूरतः संगं परिहृत्य यद्वा अविदूरात् शीघ्रमुपेतेत्यन्वयः यस्मात्स एवापवर्गः इष्टितः इष्टः १८
बालानामस्मोकं तेन जनमशक्यमिति चेत्तत्राह नहीति बह्वायासः अपि प्रयासः १९

नारायण

भा० स०

आत्मत्वात् सर्वत्रप्रसिद्धत्वादित्येवंहेतुद्वयमुपपादयति परावरेष्विति त्रिभिः ब्रह्मा अंते येषां स्थावरआदिर्येषां तेषु जीवे
षु भौतिकेषु अजीवेषु घटादिषु महत्सु च भूतेष्वाकाशादिषु २० गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ
च परः ब्रह्मस्वरूपः २१ कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः मायेत्याह प्रत्यगात्मा द्रष्टा भोक्ता तत्त्वे च तत्र २
रूपेण व्यापकत्वेन तया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यत्वेन निर्देश्यो मायया ईयते इत्युत्तरेणान्व
यः वस्तुतस्तु स्वयं अविकल्पितः निर्देश्योपि सन् यद्वा अनिर्देश्योपि एवं निर्देश्यः सन् विकल्पित ईयते

परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु भौतिकेषु विकारेषु भूतेष्वथ महत्सु च २० गुणे
षु गुणसाम्ये च गुणव्यतिकरे तथा एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः २१ प्रत्यगा
त्मस्वरूपेण दृश्यरूपेण च स्वयं व्याप्यव्यापको निर्देश्यो ह्यनिर्देश्यो विकल्पितः २२
केवलानुभवानंदस्वरूपः परमेश्वरः माययांतर्हितैश्वर्य ईयते गुणसर्गया २३ त
स्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं भावमासुरमुन्मुच्य यया तुष्यत्यधोक्षजः २४ तु
ष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः धर्मादयः किम
गुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः २५ श्रीराम श्रीराम श्रीराम

त्यन्वयः २२ यंतः केवलोनुभवात्मक आनंद एव स्वरूपं यस्य ननु स एवं चेत् सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्युपल
भ्येत तत्राह गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया अंतर्हितमैश्वर्यं येन सः २३ यस्मादेवं तस्मात्सर्
वेषु यथा चित्तं दयां सौहृदं च कुरुत यया दयया अनुन्मुच्य सत्यज्य २४ ततः किमत आह तुष्टे च तत्र तस्मिन् किं
मलभ्यं तथापि गुणपरिणामो द्वेवा ह्य स्वसिद्धा अपि यतः सिद्धाय धर्मादयः तैः किं अगुणेन च मोक्षेण कां
क्षितेन किं तमुपगायतां नोस्माकं मकांक्षितस्यापि तस्य सिद्धेः यद्वा मा भून्मोक्षः तस्य चरणयोः सारं जुषां स

तत्र

१९५ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु च धर्मादेः पुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वेन सत्यएवाभिहितः तत्राह धर्मोर्थः कामश्चेति यस्त्रिवर्गः
तदर्थं च ये ईक्षाद्याश्चाभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदंमौ तर्कदंडनीतिश्च विविधा च वार्त्ता
जीविका तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वांतर्यामिणः परस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सत्यं
मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेवापह्नाति तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यपु
न निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः तदुक्तं भगवता त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवा

धर्मार्थकाम इति योभिहितस्त्रिवर्ग ईक्षात्रयीनयदमौ विविधा च वार्त्ता मन्ये तदेतदखिलं
निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः २६ ज्ञानं तदेतदमलं दुरवापमाह
नारायणो नरसखः किल नारदाय एकांतिनां भगवतस्तदकिंचनानां पादारविंदरज
विज्ञान साप्लुतदेहिनां स्यात् २७ श्रुतमेतन्मया पूर्वं ज्ञानं संयुतं धर्मं भागवतं शुद्धं नारदाद्देव
दर्शनात् २८ दैत्यपुत्रा ऊचुः प्रह्लाद त्वं वयं चापि नर्त्तेऽन्यं विद्महे गुरुं एताभ्यां गुरुपुत्राभ्यां
बालानामपि हीश्वरौ २९ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः छिंधि नः संशयं
सौम्य स्याच्चेद्विस्रंभकारणं ३० इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादानुचरिते

भवार्जुनेति २६ तेषां विश्वासार्थं गुरुसंप्रदायमाह ज्ञानमिति यत्र नारदः श्रोता तत्र कुतो मादृशानामधिकार इ
ति माशंकीत्याह भगवत एकांतभक्तानां यत्पादरजस्तेन आप्लुतानां स्नातानां देहिनां सर्वेषामपि तत् ज्ञानं
स्यात् न तूत्तमानामेवेति नियमः २७ अत एव मयापि नारदात् विज्ञानसंयुतं अनुभवपर्यंतं धर्मं च श्रुतं २
तत्रातिविस्मिताः पृच्छंति प्रह्लादेति एताभ्यामृते अन्यगुरुं न विद्मः एतदागमनात्पूर्वमेवाह नारदस्याश्रवणा
द इति चेत्तत्राहुः बालानामपि अति शिशूनामस्माकमेतावीश्वरौ नियंतारौ अतः स्वान्यत्र गमनं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितं प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये अश्रौषीन्नारदादेतन्मया गर्भ
इतीरितुं तत्र तावत्कथामाह पंचेः षोडशभिः सुधीः अस्माकं पितरि हिरण्यकशिपौ १ स्वकृतेनैव पापेन पापो
सोऽभक्षि भक्षित इति हर्षेण वदंतो युद्धोद्यमं चक्रुः २ । ५ राज्ञः शिबिरं आवासं व्यलुंपन् सर्वस्वापहारेण ना
शितवंतः ६ । ७ अनागसं निरपराधां नेतुं नार्हसीति प्राह ८ अविषह्यं दुःसहं अतः अनया प्रसवपर्यंत

२०

नारद उवाच एवं दैत्यसुतैः पृष्टो महाभागवतोसुरः उवाच स्मयमानस्तान्स्मरन्मदनुभा
षितं १ प्रह्लाद उवाच पितरि प्रस्थितेस्माकं तपसे मंदराचले युद्धोद्यमं परं चक्रुर्विबुधा
दानवान्प्रति २ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः पापेन पापोभक्षीति वादिनो वा
सवादयः ३ तेषामतिबलोद्योगं निशम्यासुरयूथपाः बध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो
दिशः ४ कलत्रमित्रपुत्राप्तान्गृहान्पशुपरिछदान् नावेक्षमाणास्त्वरिताः सर्वे प्राणप
रीप्सवः ५ व्यलुंपन् राजशिबिरममरा जयकांक्षिणः इंद्रस्तु राजमहिषीं मातरं मम चाग्र
हीत् ६ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ७ प्रा
ह मैनां सुरपते नेतुमर्हस्यनागसां मुंच मुंच महाभाग सतीं परपरिग्रहां इंद्र उवाच आ
स्तेस्या जठरे वीर्यमविषह्यं सुरद्विषः आस्यतां यावत्प्रसवं मोक्ष्येर्थपदवीं गतः ९ नारद०
अयं निःकिल्बिषः साक्षान्महाभागवतो महान् त्वया न प्राप्स्यते संस्थामनंतानुचरो ब
ली १०

मत्रास्यतां ततश्च अर्थश्च पदवीं मार्गं गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामीत्यर्थः ९ साक्षात्स्वगुणैरे
व महान् न तु पित्रादिसंबंधात् त्वया हंतुं भूतेन संस्थां मृत्युं न यास्यति तत्र हंतव्यो निःकिल्बिष इत्यादि यः १०

राम २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंतस्यप्रियायाहंसर्वाप्रियोयस्यतस्यममभक्त्याणंनाप्रदक्षिणीकृत्य ११ इहाप्यनामित्याहनिरोषः १२ अं
तिसमीपे १३ अंतर्वत्नीगर्भिणी इच्छयाभर्त्तुरागमनानंतरंप्रसूतये एवमपिस्वगर्भस्यक्षेमाय १४ ते
स्याः शोकशांत्ये धर्मस्यतत्वंभक्तिलक्षणंज्ञानमात्मात्मविवेकः तदुभयंप्रादात् ईश्वरः समर्थः १५
१६ भूयात्भवेत् वैशारदीस्वार्थेतद्धितः देहाद्यहंकारच्छेदनिपुणेत्यर्थः कासौवैशारदीधीरित्य

इत्युक्तस्तांविहायेंद्रोदेवर्षिंमानयन्ययौ अनंतप्रियभक्त्यैनांपरिक्रम्यादिवंययौ ११
ततोनोमातरमृषिः समानीयनिजाश्रमं आश्वास्येहोष्यतांवत्सेयावत्तेभर्त्तुरागमः
१२ तथेत्यवात्सीद्देवर्षेरंतिसाप्यकुतोभया यावद्दैत्यपतिर्घोरात्तपसोनन्यवर्त्तत १३
ऋषिंपर्यचरत्तत्रभक्त्यापरमयासती अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूतये १४ ऋ
षिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः धर्मस्यतत्वंज्ञानंचमामप्युद्दिश्यनिर्मलं
१५ तत्तुकालस्यदीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ऋषिणानुगृहीतंमांनाधुना
प्यजहात्स्मृतिः १६ भवतामपिभूयान्मेयदिश्रद्दधतेवचः वैशारदीधीःश्रद्धातः स्त्रीबा
लानांचमेयथा १७ जन्माद्याः षडिमेभावादृष्टादेहस्यनात्मनः फलानामिववृक्षस्यका

पेक्षायांनारदोक्तमेवदेहात्मविवेकप्रकारमाहजन्मेतिदशभिः जन्माद्याः जायते अस्तिवर्द्धतेविपरि
णमते अपक्षीयतेनश्यतीत्येवंभूताइमेषड्भावाविकाराः वृक्षस्येवयथाफलानांदृश्यंते तद्वदा
त्मनितेथवास्थितादेहस्यदृष्टाइत्यर्थः ईश्वरोविकारसमर्थामूर्त्तिर्यस्यतेन १८

छा ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० तदेवं देहधर्मैस्तैर्देहलक्षणैरनात्मनो देहात्मदर्शिनः इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहंकारादिकं त्याज
यति आत्मा नित्यः अविनाशी वा अरेयमात्मेति श्रुतेः अव्ययः अपक्षयशून्यः यो वै तदक्षरं परमे व्योमन्
इति श्रुतेः शुद्धः निरवद्यं निरंजनमिति श्रुतेः एकः एकमेवाद्वितीयमिति श्रुतेः क्षेत्रज्ञः विज्ञातारमरे केन
विजानीयादिति श्रुतेः आश्रयः यस्मिन् द्यौः पृथिवी चांतरिक्षमिति श्रुतेः अविक्रियः निष्कलं निष्क्रियं लं२
शांतमिति श्रुतेः स्वदृक् आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः अनीक्षत लोकान्नु सृजा इति श्रुतेः हेतुः
सइमान्

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः अविक्रियः स्वदृग्घेतुर्व्यापकोऽसंग
नावृतः १९ एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः अहं ममेत्यसद्भावं देहादौ
२१ मोहजं त्यजेत् २० स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात्
क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत २१

व्यापकः सत्यं ज्ञानमनंतमिति श्रुतेः असंगी असंगो ह्ययं पुरुष इति श्रुतेः अनावृतः पूर्णस्य पूर्णमा
दाय पूर्णमेवावशिष्यत इति श्रुतेः परैः श्रेष्ठैः विवेकसमर्थैः देहादौ विद्वान् असद्भावं मिथ्याबुद्धिं २० त्यजेत् राम
नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवेन ब्रह्मताप्राप्तिः कथं स्यात् यतोऽहंकारादिकं त्यजेदित्यपे २१
क्षायां तत्प्राप्तिप्रकारं सदृष्टांतमाह स्वर्णकर क्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैः धमनाद्युपायै
पाया२ स्तदभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् आत्मयोगैः आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मता अध्यात्म
वित् आत्माधिकृत कार्यकारणसंघातज्ञाता २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पृष्टा १

भा०स०

अथात्मविवेकमात्मप्रायमाह अष्टाविति त्रिभिः मूलप्रकृतिः महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ त्रयः
सत्वादयः ते च प्रकृतिगुणत्वेन तु भिन्नाः एकादशेंद्रियाणि पंचमहाभूतानि चेति षोडश पुमानात्मा एकः
प्रोक्तः कपिलादिभिराचार्यैः एकत्वे हेतुः एषु साक्षित्वेनान्वयात् तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः
प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति २२ जगत् जंगमं तस्थुः स्थावरं अत्रैव सं
घातात्मके देह एवमन्वयः अन्वेष्टव्यः मुराके चेतदित्याह नेति नेतीत्यन्यापोहेन क्रियमाणस्वयमेव अत्यज
जन् अनात्मवर्गात्पृथगुपलभ्यमान इत्यर्थः मणिषु सूत्रमिव सर्वेष्वनुस्यूतत्वेनान्वयः अत एव म

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् २२
देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् २३
अन्वयव्यतिरेकेन विवेकेनोशतात्मना सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४
बुद्धेर्जागरणं स्वप्नसुषुप्तिरिति वृत्तयः ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः परः २५
एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः स्वरूपमात्मनो बुध्येद्गंधैर्वायुमिवान्वयात्
२६

एभ्यः सूत्रस्येवैकैकव्यतिरिक्तैः अनयोर्द्वैतं तेनयाविवेकः पूर्वोक्तो वा तेन उशता शुद्धेनात्मना मन
सा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः यतो वा इमानि भूतानि जायंत इत्यादि श्रुत्युक्तैः सर्गादिभिरनुसं
धानेनेत्यर्थः विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैर्मृग्यत इति श्रवणान्वयः २४ विमर्शप्रकार
माह बुद्धेरिति द्वाभ्यां अध्यक्षः साक्षी २५ अतः एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितो क्षिप्तैः आत्म
धर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्मक
त्वात् कर्मकर्तृत्वाच्च तस्यां अवस्थाः आत्मानुबुध्यत्वयात् भवेद्व स्वभावानि वभातिनत्तवतेइत्यात्म

नः स्वरूपं बुद्ध्येन जानीयादित्यर्थः अत्र दृष्टांतः कुसु
मधर्मं गंधिस्त्वहा अयं वायुमिव २६

नविरुत्तिः ३ विसं

तवैता २

भा०स० ननु तर्हि यथा कुसुमोपाधिकोपि वायोर्गंधो विवेकज्ञानेन न निवर्त्तते एवमात्मनः संसारो न निवर्त्तेत इत्या
शंक्याह एतदिति द्वारः बुद्धिर्द्वारं कारणं यस्य तद्वस्तुद्वारको वा न स्वतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैः निबध्यत इ
इष्यते ति तथा स चाज्ञानमूलः अतो अपार्थो मिथ्याभूतोऽपि स्वप्नवदर्प्यते वायोस्तु गंधवद्द्रव्यसंबंधस्य वास्तव धरे
त्वात् हि षमो दृष्टांतः २७ यस्मादेवं निमित्तनिर्घटितत्वं तस्मात् बीजमज्ञानं तस्य निर्हरणं दहनं किंतत् योगः
कथंभूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा २८ तदेव ज्ञानप्रकारमुक्त्वोपत्साधनं धर्मस्य

एतत्तु द्वारो हि संसारो गुणकर्मनिबंधनः अज्ञानमूलोऽपार्थोपि पुंसः स्वप्न इवार्प्यते २७ त वेष्यते
२२ स्माद्भवद्भिः कर्त्तव्यं कर्मणां त्रिगुणात्मनां बीजनिर्हरणं योगः प्रवाहोपरमो धियः २८ तत्रो
पायसहस्राणामयं भगवतोदितः यदीश्वरे भगवती यथा यैरंजसा रतिः २९ गुरुशुश्रू
षया भक्त्या सर्वलब्धार्पणेन च संगेन साधुभक्तानामीश्वराराधनेन च ३० श्रद्धया तत्कथा
यां च कीर्त्तनैर्गुणकर्मणां तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१ हरिः सर्वेषु
भूतेषु भगवानास्त ईश्वरः इति भूतानि मनसा कामैस्तैः साधु मानयेत् ३२ एवं निर्जित
षड्वर्गैः क्रियते भक्तिरीश्वरे वासुदेवे भगवति यया संलभते रतिं ३३ श्रीराम श्री

तदेवं नारदोक्तमेवाह तत्रेति पंचभिः यद्वा मे यथानुष्ठितं वार्त्तिरिति यत् अयमुपायो भगवतोक्तः तथा राम
हि गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति २२
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादि २९ तत्रैवांतरंगान् धर्मानाह गुरोः शुश्रूषया
भक्त्या प्रेम्णा सर्वेषां लब्धानामर्पणेन च ३० तस्य लिंगानां मूर्त्तीनामीक्षणमर्हणं वा दिर्येषां वंदना
दीनां तैः ३१ २ निर्जितः षट्कः कामक्रोधलोभमोहमदमत्सराणामिंद्रियाणां वा वर्गो यैः ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवद्भक्तेर्लिंगान्याह निशम्येति त्रिभिः गुणानतुल्यान् वात्सल्यादीन् अतिहर्षेण उद्गताः पुलकाः अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कंठः उद्गायति ३४ ५ तस्य भाव आशयादिः तस्य भावो भावना तेनानुकृतौ आशयाकृती मनः शरीरे यस्य निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः सम्यग्गतिं प्राप्नोति ३५ ततः किम् तत्राह अधोक्षजस्यालंभं मनसा स्पर्शं पाठांतरे तस्याश्रयणं अशुभः रागादियुक्त आत्मा मनो यस्य संसृतिचक्रशातनं तन्निवर्त्तकं बुधा विदुः तदेव ब्रह्मनिर्वाणं लयो मोक्षः तदात्मकं सुखं विदुः हृदीश्वरं

निशम्य कर्माणि गुणाननतुल्यान्वीर्याणि लीलातनुभिः कृतानि यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ३४ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ३५ तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः निर्दग्धबीजानुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजं ३६ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ३७ कोऽतिप्रयासोऽसुरबालका हरेरुपासने स्वे हृदि छिद्रवत्सतः स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ३८ रायः कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः सर्वेऽर्थकामाः क्षणभंगुरायुषः कुर्वंति मर्त्यस्य कियत्प्रियं चलाः ३९

मंतर्यामिणं ३७ भक्तिरशक्येति च न मंतव्यमित्याह क इति छिद्रवत् आकाशवत् विषयाणामुपादनैरर्जनैः किं तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे शूकरादिसाधारण्यापत्तेरित्यर्थः न चैवमामादो पो नरके तस्य दोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ३८ अनर्थकं च विषयार्जनमित्याह राय इति अर्थाः क्षणभंगुरमायुर्यस्य तदुक्तमितिहासेषु धनं हि पुरुषो लोके पुरुषं धनमेव वा अवश्यमेकस्त्यजति तस्मात्किं धने प०

भा॰म॰

यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपपन्नं च तत्तेसुखं स्वःपदास्पदमित्यं च श्रुतः स्वर्गादिभोगा अपि न सेवा हाइत्याह एवं ही तिक्षयिष्णुत्वे हेतुः क्रतुभिः कृताइति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतेश्च अत एव पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्धादिसत्त्वात् न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन् ४० किंच यद [illegible] र्थाय त्संकल्प्य अतः संकल्पितात् विपर्यासं विपरीतं फलं अमोघं अवश्यं प्राप्नोति ४१ तदेव दर्शयति सुखायेति ईहया इच्छया कि

एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः तस्माददृष्टश्रुतदूष
णं परं भक्त्यैव कीर्तय तां भजतामत्र द्वेय ४० यदर्थं इह कर्माणि विद्वन्मान्य सक्तैनरः के
रोत्यूतो विपर्यासममोघं विंदते फलं ४१ सुखाय दुःखमोक्षाय संकल्प्य इह कर्मणः
सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ४२ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः
स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ४३ किमु व्यवहितापत्यदारागारधनादयः रा
ज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः ४४ किमेते रात्मनस्तुच्छैः सह देहेन नश्वरैः
अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४५ निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुर
निषेकादिष्ववस्थासु क्लिश्यमाने

यथावायः पूर्वमनीहयाहेतोः सुखेनावृतो व्याप्त आसीत् स ईहया दुःखमाप्नोत्येव ४२ किंच कामा
न्भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यः न त्वात्मीयः भंगुरश्च ४३ किमु देहात् व्यवहिताः
अपत्यादयो ममता विषयाः पारक्या इति वक्तव्यं ४४ किंच स्वयं पुरुषार्थरूपस्य किमेतैरित्याह
नैवैरित्याह किमेतैरिति ४५ भोगावसराभावाच्चेत्येव कोऽपयोग इत्याह निरूप्यतामिति प्राचीने १ के

मैः किं ऽपमानमपकामिभिः किंयाज्ञषेडसिवास्पा १ ४६

२३

राम
२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कर्मसु समाप्तेषु भोगावसरः स्यात् तत्राह कर्माणीति नवेदं कर्मतत्फलं देहादिकं च परमार्थ इत्याह उ
भयं कर्म च देहं च अविवेकतः अज्ञानेनैव तनुते ४७ यदपाश्रयः यदधीनः ४८ भूतानां प्राणिनां जीव
संज्ञितः अन्तर्यामी ४९ असुराणामस्माकमत्र नाधिकार इत्यपि न वाच्यमित्याह देव इति पंचभिः ५०
अमलया निष्कामया विडंबनं नटनमात्रं ५२ ५३ अच्युततां अच्युततां ५४ अध्यायद्वयोक्तमुपसंह

कर्माण्यारभते देही देहेनात्मानुवर्तिना कर्मभिस्तनुते देहमुभयं त्वविवेकतः ४७ तस्मा
दर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः भजतानीहयात्मानमनीहं हरिमीश्वरं ४८ स
र्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ४९
देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव च भजन्मुकुंदचरणं स्वस्तिमान्स्याद्यथा वयं ५०
नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता ५१ न दानं
न तपो नेज्या न शौचं न व्रतानि च प्रीयतेऽमलया भक्त्या हरिरन्यद्विडंबनं ५२ ततो हरौ भ
गवति भक्तिं कुरुत दानवाः आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ५३ दैतेया यक्षरक्षांसि
स्त्रियः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः संति ह्यच्युततां गताः ५४ एतावानेव लोके
ऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकांतभक्तिर्गोविंदे यत्सर्वत्र तदीक्षणं ५५ इति श्रीभागवते मह
पुराणे सप्तमस्कंधे दैत्यानुशासनं नाम सप्तमोऽध्यायः नारद उवाच अथ दैत्यसुताः सर्वे श्रु
त्वा तदनुवर्णितं जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं १

इति एतावानिति तदीक्षणं गोविंदहृष्ट्यास मानानं ५५ सप्तमे सप्तमः अष्टमे तु रुषा सूनुं निघ्नन् दैत्यो हतः स्व
यं आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः अतः कृपासुधापूर्णो बहिः क्रोधो नृकेसरी दैत्येंद्रमारिभा

भागवत ८

भा॰स॰ एकांतसंस्थितांप्रत्यग्दिष्टांयथायथावत् २ सचहंतुंमनोदधे कथंभूतः कोपस्यावेशेनोद्रेकेनचलगात्रं वपुर्यस्यसः ३ क्षिप्त्वातिरस्कृत्य पापेनसरोषेण तिरश्चीनेनवक्रेण ४ ५ मदात्मन् अल्पबुद्धेमदाज्ञोल्लंघिनंत्वामद्ययमालयंनेष्यामि ६ अभीतवत् किंबलंयस्यसः किंबलः ७ ८ वशंप्रणीताइत्य

अथाचार्यसुतस्तेषांबुद्धिमेकांतसंस्थितां आलक्ष्यभीतस्त्वरितोराज्ञआवेदयद्यथा २ श्रुत्वा तदप्रियंदैत्योदुःसहंतनयानयं कोपावेशचलद्गात्रःपुत्रंहंतुंमनोदधे ३ क्षिप्त्वापरुषयावाचाप्रह्लादमतदर्हणं आहेक्षमाणःपापेनतिरश्चीनेनचक्षुषा ४ प्रश्रयावनतंदांतंबद्धांजलिमवस्थितं सर्पःपदाहतइवश्वसन्प्रकृतिदारुणः ५ हेदुर्विनीतमंदात्मन्कुलभेदकराधम

२४ स्तब्धंमच्छासनोद्वृत्तंनेष्येत्वाद्ययमक्षयं ६ क्रुद्धस्ययस्यकंपंतेत्रयोलोकाःसहेश्वराः तस्यमेऽभीतवन्मूढशासनंकिंबलोत्यगाः ७ प्रह्लादउवाच नकेवलंमेभवतश्चराजन्सवैबलंबलिनांचापरेषां परेऽवरेमीस्थिरजंगमायेब्रह्मादयोयेनवशंप्रणीताः ८ सईश्वरःकालउरुक्रमोसावोजःसहःसत्वबलेंद्रियात्मासएवविश्वंपरमःस्वशक्तिभिः सृजत्यवत्यत्तिगुणत्रयेशः ९ जह्यासुरंभावमिमंत्वमात्मनःसमंमनोधत्स्वनसंतिविद्विषः ऋतेऽजितादात्मनउत्पथेस्थितात्तद्धिह्यनंतस्यमहत्समर्हणं १० राम २४

तत्रहेतुःसईश्वरइति उरवःक्रमाःपादविक्षेपायस्यबहुपराक्रमइतिवा ओजआदिरूपःसत्वंधैर्यं बुद्धिर्वा ९ मद्भर्तुरसौकथंममापिसएवबलंस्यादतआहजहीति आत्मनःस्वस्यस्वभावंत्यजत्यतः अजितादात्मनोमनसश्चरंविनाअन्यविद्विषानसंभवंति किंचतद्धिहितंदेवहि साम्येनमनसो द्वि

संलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयादिग्विजये सर्वे जिताः॥ अतः सांप्रतं न संतीति सत्यमित्यन्वितं तत्राह दस्यूनिति एके भवादृशा मदाः॥ पुरा आदौ लुं
पतः सर्वस्वं हरतः॥ षडिंद्रियलक्षणान्छ त्रूनविजित्य अजितात्म दशदिशः॥ स्वयं जिता मन्यंते साधोस्तु जित
चित्तस्य देहिनां समस्य विदुषः॥ स्वाज्ञानकल्पितापरे शत्रवः कुतः स्युः ११ व्यक्तं निश्चितं विक्लवाः॥ अनन्विताइत्यर्थः॥

दस्यून्पुरा षण्नविजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश॥ जितात्मनो ज्ञस्य समस्य देहिनां साधोः॥ स्वमो
हप्रभावाः कुतः॥ परे ११ हिरण्यकशिपुरुवाच व्यक्तं त्वं मर्तुकामोसि योतिमात्रं विकत्थसे मुमूर्षूणां हि
मंदात्मन्ननु स्युर्विक्लवा गिरः॥ १२ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः॥ क्वासौ यदि स सर्वत्र क
स्मात्स्तंभे न दृश्यते १३ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते गोपायेत हरिस्त्वाद्य यस्ते श
रणमीप्सितं १४ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः॥ खड्गं प्रगृह्योत्पतितो व
रासनात्स्तंभं तताडातिबलः स्वमुष्टिना १५ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडक
टाहमस्फुटत् यं वै स्वधिष्ण्योपगतं त्वजादयः॥ श्रुत्वा स्वधामात्ययमंग मेनिरे १६ स विक्रम
न्पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं अंतः॥ सभायां न ददर्श तत्पदं वितत्रसुर्येन सु
रारियूथपाः॥ १७

१२ हे मंदभाग्य यद्यसौ वृत्तिर्हि क्वास्ति प्रह्लाद आह सर्वत्रास्ति हिरण्यकशिपुराह तर्हि कस्मात्स्तंभे ना
स्ति प्रह्लादस्तत्स्तंभं निरीक्ष्यमाणेन मस्य न्नाह दृश्यत इति १३ हिरण्यकशिपुस्तं तमपश्यन्नाह सोहमिति १४
प्रह्लादेन मूर्ध्नि बद्धांजलिना निरीक्ष्यमाणं स्तंभं ताडितवान् १५ १६ तत्पदं तस्य ध्वनेराश्रयं १७ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० भगवांस्तदाऽदृश्यस्तदृश्योबभूवकिमर्थंनिजभृत्येनप्रह्लादेनयज्ज्ञापितंदृश्यतइतितत्सत्यंविधातुंकर्तुं तथाऽखिलेषु
भूतेषुस्वात्मनोव्याप्तिंचसत्यांकर्तुंस्तंभेऽदृश्यतततकिमर्थंभौतिकेषुच भावेषुभूतेषु अथ महत्सु च। भगवानास्तइति
न२ तेनैवभृत्येनभाषितंसत्यंकर्तुंतथाऽत्यद्भुतंदैत्यघातकमतिघोररूपमुद्वहन्नुदधत् ततकिमर्थंनिजभृत्यैःसनका
दिभिःशापानंतरमनुतप्तैस्त्रिभिर्जन्मभिःशापमोक्षोभवितेतितत्सत्यंकर्तुं तथाऽत्यद्भुतंब्रह्मरुद्रादृष्टमश्रु
तंचरूपमुद्वहन् तच्चेनमृगाकारं नचमनुष्याकारं तद्वहन्सभायामध्येऽदृश्यततकिमर्थंनिजभृत्येनहिर
ण्यकशिपुनाब्रह्माणंप्रतियद्भाषितं भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्ममप्रभोइति तथा नांतर्बहिरिति ननरै

सत्यंविधातुंनिजभृत्यभाषितंव्याप्तिंचभूतेष्वखिलेषुचात्मनः अदृश्यताऽत्यद्भुतरूपमुद्वहन्स्तंभेसभा
यांनमृगंनमानुषं १८ ससत्वमेवंपरितोविपश्यन्स्तंभस्यमध्यादनुनिर्जिहानं नायंमृगोनापिनरो
२५ विचित्रमहोकिमेतन्नृमृगेंद्ररूपं १९ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री श्रीश्री

र्नमृगैरितिच। ब्रह्माणाच्चनिजभृत्येनतथास्त्वितियद्भाषितंतत्सत्यंकर्तुं नहितद्ब्रह्मसृष्टंभूतंनचनरोवामृगोवा। नचस
भागृहस्यांतः नचप्राणाग्रावत्बहिः एवंतद्भयंभाषितंसत्यंकर्तुं यच्चहिरण्यकशिपुनाभाषितंनूनमेतद्धिरोधेनमृ राम
त्युर्मेभवेदिति तथा अयमकुतश्चिद्भयोऽमरइति तच्चनारदेननिजभृत्येनप्रतिभाषितंअयंमहात्मासंस्थानंप्रा २५
प्स्यति अनन्तानुचरइत्यनेनस्वस्यभक्तपक्षपातित्वंचयद्भाषितंतच्चसत्यंकर्तुंअदृश्यत चकार। निजभाषितप्र
तिं कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यतीति तथातेषामहंसमुद्धर्तामृत्युसंसारसागरादित्यादि तच्चसत्यंकर्तु
मदृश्यतेतिद्रष्टव्यं अलमतिविस्तरेण १८ सदैत्यः एवंध्यनिश्चित्यतदाऽयंसत्वप्राणिविशेषंसर्वतोविलो
कयन्स्तंभस्यमध्यान्निर्गच्छन्नृमृगेंद्रयोर्मिश्रंरूपमहोकिमेतदितिमीमांसितवाननिशेषः १९
न२।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैवमल्लभयानकेन नृसिंहरूपेमीमांसमानस्यायतः सन्नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्त
द्रूपमनुवर्णयति त्रिभिः प्रतप्तं चामीकरं स्वर्णमिव पिंगानि चंडानि लोचनानि यस्मिन् सटाजटाः केशराः केसरा
णि स्फुरद्भिः सटाकेशरैः जृंभितं सावोपमाननं यस्मिन् २० करालाः तुंगाः दंष्ट्रा यस्मिन् करवालः
खड्गं तद्वत् चंचला क्षुरांतवत्तीक्ष्णा चजिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्वणं स्तब्धं तुंग शंकुव
दूर्ध्वौ कर्णौ यस्मिन् गिरिकंदरवदद्भुतं व्याप्तं प्रसृतमास्यं नासा च यस्मिन् हनुकपाल प्रांतं तयोर्भेदेन विदारणेन भीषणं २१ दिविस्पृशत्कायो यस्मिन् अलुक्समासः अदीर्घा कृशा पीवरा च स्थूला ग्रीवा यस्मिन्

मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलंभयानकं प्रतप्तचामीकरचंडलो
चनं स्फुरत्सटाकेशरजृंभिताननं २० करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटी
मुखोल्वणं स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतं व्यात्तास्यनासं हनुभेदभीषणं २१ दिविस्पृशत्का
यमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजा
नीकशतं नखायुधं २२ दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवं प्रायेण मेऽयं
हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किं २३

उरु विशालं वक्षःस्थलं यस्मिन् तच्च तच्च अल्पं मध्यं उदरं यस्मिन् चंद्रांशुवद्गौरैस्तनूरुहैर्लोमभिः छु
रितं व्याप्तं विष्वक् सर्वतः प्रसृता भुजा एव अनीकानि सेनाः तेषां शतानि यस्मिन् नखा एवायुधानि
यस्मिन् २२ दुरासदं प्राप्तुमशक्यं सर्वाणि च निजानि चक्रादीनि इतराणि वज्रादीनि तान्येवायुधप्रवेका
णि श्रेष्ठानि तैर्विद्राविताः दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थितं पूर्वं वर्णयित्वान्वयः तदा
विमर्शप्रयोजनं विमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह सप्तभिः प्रायेण महामायाविना हरिणा मे अयं

एवंभूतोऽपि च धर्मस्तु हेतुभूतः चिंतितः तथाप्यनेन समुद्यतेन किं न किंचित् स्यादित्येवं ब्रुवन्नभ्युपगतमित्यन्वयः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स०

तदासौ सुरो नृसिंहस्यौजसि दीप्ते पतितः सन्नलक्षितः अदृष्टोभूत् २५ सत्वधामनि सत्वप्रकाशे हरौ पतित
स्यात्मा मयस्यादर्शनं तद्धि चित्रं न भवतीत्यत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो अपि अ० २
बतीत स्मिन्नु विक्रमन्तं तत्र स्तनः प्रहरन्तो हस्तादुत्कलितः निःसृतः तदा अमराः सर्वधिष्ण्यपाः असाधु अमन्यन्त देवाः ३

एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुञ्जरः अलक्षितोग्नौ पतितः पतङ्ग
मो यथा नृसिंहौजसि सोसुरस्तदा २५ न तद्धि चित्रं खलु सत्वधामनि स्वतेजसा यो नु पु
२६ राऽपिबत्तमः ततोभिपद्याभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया २६ तं वि
क्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत् स तस्य हस्तोत्कलित
स्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः २७ असाध्वमन्यन्त हृतौकसोमरा घनच्छ
दा भारत सर्वधिष्ण्यपाः तं मन्यमानो निजवीर्यशङ्कितं यद्धस्तमुक्तो नृहरिं महासुरः
पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे २८ तं श्येनवेगं शतचन्द्रव
र्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं ज

तद्धृतान्योकांसि स्थानानि येषां ते तद्भिया घनच्छदाः मेघान्तरिताः सन्तः २७ यस्य हस्तात्स्वयं मुक्तः राम
तं नृहरिं स्ववीर्याच्छङ्कितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तं आसज्जत अभ्यपद्यतेत्यन्वयः २८ श्ये २६
नस्येव वेगो यस्य तं शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः अच्छिद्रं यथा भवत्येवं सुपर्यधश्चरन्तं अट्टहास
मवाह खरं तीव्रं उत्स्वनेन महाशब्देनोल्बणं भयंकरं तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निःसरंतं १

ग्रहणादर्शनः बालो यथा आखुं मूषकं विदारणे दृष्टांतः अहिं गरुड इवेति विषक्रूरं सर्वतः स्फुरंतां ग्रहणेनातुरं विवशां इंद्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन न क्षता त्वगपि यस्य द्वारि सभायां नांतर्बहिः ऊरसु रो निपात्य न भूमौ न चांबरे नखैर्नखैर्न त्वसुभिरसुमद्भिर्वा एवं दिवा न नक्तं परिहाराय संध्यायामिति द्रष्टव्यं ३० दैत्यवध मुक्त्वा नृत्यवधमाह द्वाभ्यां संरंभेण दुःप्रेक्षाणि करालानि लोचनानि यस्य अस्रुजारक्तास्यलवैर्बिंदुभि रक्ताः सिक्ताः अतएव अरुणाः केशराः आननं च यस्य सः कइवा द्विपहत्यया गजवधेन हरिः सिंहो यथा

विषक्तुस्फुरंतं ग्रहणातुरं हरिर्बालो यथाखुं कुलिशाक्षतत्वचं द्वार्यूरौ निपात्य ददार लील
यानखैर्यथाहिं गरुडो महाविषं ३० संरंभदुःप्रेक्ष्यकरालोचनो व्यात्ताननांतं विलिहन्स्व
जिह्वया असृक्स्रवाक्तारुणकेशराननो यथात्रमाली द्विपहत्यया हरिः ३१ नखांकुरोत्पाटितहृ
त्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् अहन्सतो नखरैः स्वपाणिभिर्दोर्दंडयूथानुपथा
लसहस्रशः ३२ सटावधूताजलदाः परापतन् ग्रहा अरुद्दृष्टिविमुष्टरोचिषः अंभोधयश्च
सहसा विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचक्रुशुः ३३ द्यौः साध्वसे क्षिप्तविमानसंकुलाप्य
त्सर्पत क्ष्मा च पदातिपीडिता शैलाः समुत्पेतुरमुष्य रंहसा गतेतेजसा खं ककुभानरंजिरे
३४

एवंभूतस्तस्यानुचरान् अहनित्युत्तरेणान्वयः ३१ नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य तं दोर्दंडानां यूथानि यस्य सः तमनुपथायिषां तानां अन्यानपि तत्पक्षपातिन इत्यर्थः ३२ दैत्यवधव्यग्रस्य नृहरेरौद्रोपमाह द्वाभ्यां सटाभिरवधूताः प्रकंपिताः परापतन् व्यशीर्यंत तस्य दृष्ट्या विमुष्टरोचिषः यस्य तिरस्कृतप्रभाः अभवन् निर्निशेषं दिगिभा दिग्गजाः ३३ तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः संकुला व्याप्ता सती द्यौरुत्सर्पत स्वस्थानात् प्रकर्षे

मं४

भा॰स॰

खभर्त्येश्वर्य्येमाश्रूर्ये मिवमत्ताकोल हल्लेनत्स्यासेनउपविष्टंभयात्कोपिनबभाजनासेवत नलक्षितोहिरथः प्र
तियाङ्घ्रोयेन ३५ लोकत्रयस्यमस्तकज्वरंशिरोव्यथवदुः सह प्रहर्षस्यवेगेनउत्कलितानिविकसितान्यान
नानियासांताः न्देहरिवक्षुः ३६ नाकिनांविमानावलिभिः सुराणामानकाः पटहाः नेर्जघ्निरेवादिताः
स्त्रियोप्सरसोननृतुः ३७ गंधर्वाश्चरसश्चचारणाश्चत्यर्थः ३८ नरशार्दूलत्वंपुरुषोत्तमं ब्रह्मादयोन

२७ ततः सभायामुपविष्टमुत्तमेमन्त्रपासने संहृततेजसंविभुं अलक्षितोहैरथमत्यमर्षिणांप्रचंड
वक्त्रं नबभाजकश्चन ३५ निशाम्यलोकत्रयमस्तकज्वरंतमादिदैत्यंहरिणाहतंमृधे
प्रहर्षवेगोत्कलिताननामुहुः प्रसूनवर्षैर्ववृषुःसुरस्त्रियः तदाविमानावलिभिर्नभस्त
लंदिदृक्षतांसंकुलमासनाकिनां सुरानकादुंदुभयोथजघ्निरेगंधर्वमुख्याननृतुर्जगुः
स्त्रियः ३७ तत्रोपव्रज्यविबुधाब्रह्मेंद्रगिरिशादयः ऋषयः पितरः सिद्धाविद्याधरमहोर
गाः ३८ मनवः प्रजानांपतयोगंधर्वाप्सरचारणाः यक्षाः किंपुरुषास्तातवेतालाः सि
द्धकिन्नराः ३९ तेविष्णुपार्षदाः सर्वेसनंदकुमुदादयः मूर्ध्निबद्धांजलिपुटाः आसीनंती
व्रतेजसं ईडिरेनरशार्दूलंनातिदूरचराः पृथक् ४० ब्रह्मोवाच नतोस्म्यनंतायदुरंत
शक्तयेविचित्रवीर्यायपवित्रकर्मणे विश्वस्यसर्गस्थितिसंयमान्गुणैः स्वलीलयासंद
धतेव्ययात्मने ४१

सिंहस्यशंकयाकुलचेतसः आरादेवागत्यस्पदतःश्लोके पृथक्पृथक् ४० अनंतायअनंतप्रसादयि
तुनतोस्मिअनंतत्वेहेतुः दुरंताः शक्तयोयस्यातत्कुतः विचित्राणिवीर्याणिप्रभावायस्यतत्किमर्थंपवि
त्राणिशोधकानिकर्माणियस्यविचित्रवीर्यत्वमेवाह विश्वस्यतिसदधेसम्यकुकुर्वतेएवमपिअव्यया

राम
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुद्रस्तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते सहस्रयुगान्तस्तव कोपस्य कालः। कोपायोगपूर्वाय मि-
त्याह अल्पकः अत्यल्पः अतः कोपानिवृत्त्या प्रह्लादं मा हिंसीरित्याह तत्सुतमिति यद्वा अत्र कालस्य यं कोपोऽ-
स्य भक्तस्य रक्षणार्थ इति चेत्तर्हि इदानीं कोपस्त्वया संपादनीय इत्यर्थः। ४२ इंद्रस्तु नास्माकं हविर्भागादिलो-
भः पुरुषार्थः किंतु त्वत्परिचर्यैव भवता पुनरनेन नारसिंहेण स्वकार्यमेव साधितं तत्तस्य च सिद्धत्वादुपसंहे-
नं क्रोधमित्याशयेनाह हे परम नोऽस्माकं स्वायत्तारक्षता भवता स्वीयाय एव भागादेत्याद्यत्याहृता। अग्नयो

श्रीरुद्र उवाच कोपकालो युगान्तस्ते हतोऽयमसुरोऽल्पकः। तत्सुतं पाह्युपसृतं भक्तं
ते भक्तवत्सल ४२ इंद्र उवाच प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्या-
क्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां
ते मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किं ४३ ऋषय ऊचुः त्वं नस्तपः परम
मात्थ यदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज तद्विप्रलुप्तममुनाद्य शरण्य
२ पालरक्षागृहीतवपुषा पुनरन्वमंस्थाः

मिणस्तवैव यज्ञेषु भोक्तृत्वात् अस्मदीयं हृदयकमलं च त्वद्गृहमेव तावत्त्वयैतं भयहेतुत्वेनास्मिन्नसुरे-
निपिधे नित्यं स्थितं दैत्येनाक्रान्तं व्याप्तं सत् प्रत्यबोधि भयापाकारणेन विकाशनीतं तवैश्वर्ये क्वये-
श्वर्यसाधनमन्यर्थमयमुद्यम इति चेत्तत्राह कालग्रस्तमिति ते तव हे नारसिंह नरस्य सिंहस्य
चाकाराभ्यां आविर्भूत ४३ ऋषयस्तु तपः प्रवर्तनेनास्माकं महाननुग्रह इत्याहुः त्वं न इति हे त्वं नो यदात्म-
परमध्यानलक्षणं तपः परमं त्वहेतुः आत्मनस्तव तेजः प्रभावरूपं तद्देवा आहुः येन तपसा आत्मवि-

लीनमिदं विश्वं ससर्ज सृष्टवानसि तत्तु अमुना दैत्येन वि-
प्रलुप्तं कुंठितं सत् हे शरण्यपाल अद्य रक्षार्थं गृहीतेनाननवव-
पुषा पुनरपि तपः कुरुतेत्यनुज्ञातवानसि तोऽस्माकं तेन महत्तु नार
श्लोकचतुर्थपादस्यानुषंगः ४४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स०

पितरस्तु श्राद्धोद्धरणेन परमोपकारिणं प्रणमंति श्राद्धानि श्रद्धायुक्तानि पिंडादीनि नोस्माकं पुत्रैर्दत्तानि प्रसभं
बलान् स्वयमधिकृत्य बुभुजे किंच तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् तानि तस्योदरादाच्छाद्यार्च्छत् आ
हृतवान् कथंभूतान् नखैर्विदीर्णा वपा यस्य तस्मान्नृवपाविदारणस्य तदुक्त पिंडोद्धरणमेव फलमिति भा
वः ४५ योगसिद्धां गतिं अणिमादिसिद्धिं नाना अनेकदर्पो यस्य तं तस्मै तुभ्यं त्वामुद्दिश्य ४६ वि
द्यां अंतर्द्धानादिलक्षणां अनुराद्धां संप्राप्तां संख्ये युद्धे ४७ रत्नानि फणामुस्थितानि चेतत्तमाः स्त्रि

पितर ऊचुः श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽपि तिलांबु सभ्य तस्योदरा
न्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ४५ सिद्धा ऊचुः यो नो गतिं योग
२८ सिद्धामसाधुरहार्षीद्योगतपोबलेन नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह
४६ विद्याधरा ऊचुः विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः स येन संख्ये प
शुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ४७ नागा ऊचुः येन पापेन रत्नानि स्त्रीरत्नानि हृ
तानि नः तद्वक्षःपाटनेनासां दत्तानंद नमोस्तु ते ४८ मनव ऊचुः मनवो वयं तव निदेशका
रिणो दितिजेन देव परिभूतसेतवः भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि
किंकरान् ४९ प्रजापतय ऊचुः प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः राम
स एष त्वया भिन्नवक्षा नु शेते जगन्मंगलं सत्वमूर्त्तेव २८

यः आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं पाटनं तेरस्माकं दत्त आनंदो येनेति ४८ नृसिंहनावलोकिताः
संतो मूर्द्धि बद्धांजलयो मनवः ऊचुः वर्णाश्रमधर्ममर्यादा येषां ते अनुशाधि अनुशिक्षय ४९ प्रजापतयः पितृदेव
लोकिताः प्रोचुः हे परेश त्वया अभिसृष्टाः प्रजेशाः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो वाचयं येन नि
षिद्धाः सतः प्रजा न सृजामः स एष भिन्नवक्षाय ... नु निश्चितम् अतः शेते अतः परं प्रजाः स्रक्ष्याम इति

वयं धर्मपालकाः परिभ्रताः सेतवो २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विस्मिति३

गंधर्वाः स्वापितं देवलोकिताः प्राहुः। हे विभो वयं येन त्वदीयाः। नटा नर्तकाः येनात्मने गायकाश्च येन स्वाधीनाः।
कृताः। कथंभूतेन वीर्यं शौर्यं शौर्यबलं शक्तिः नाम्पामोजः प्रभावो यस्य तेन इमां दशां सन्निं उ चित्तमत्तादि
त्याहुः ५१ भवापवर्गं संसारनिवर्त्तकं आश्रयेण हेतुः यद्यस्मात्साधूनां हृदि भयजनकत्वेन शेते तिष्ठतीति
स एषोऽसुरस्त्वया समापितः। अन्तं नीतः। ५२ मनोज्ञैः। कर्मभिः। रनुचरेषु मुख्याः। पञ्चतां मृत्युं हे पंचविंश च

गंधर्वा ऊचुः। वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः। स एष नीतो भवता दशा
मिमां किमुत्पथस्थः कुशलाय कल्पते ५१ चारणा ऊचुः। हरे तवाङ्घ्रिपंकजं भवापवर्गमाश्रिताः।
यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ५२ यक्षा ऊचुः। वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञै
स्त इह दितिसुतेन प्रापिता वाहकत्वं स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंच
तां पंचविंश ५३ किंपुरुषा ऊचुः। वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः। अयं कुपुरुषो नष्टो धिक्कृ
तः साधुभिर्यदा ५४ वैतालिका ऊचुः। सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभा
महे यस्तामनैषीद्वशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथामयः ५५ किंनरा ऊचुः। वयमी
श किन्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः। भवता हरे स वृजिनोऽवसादि
तो नरसिंह नाथ विभवाय नो भव ५६

तुर्विंशतितत्त्वनियामक ५३ किंपुरुषास्त्वत्तो न्यूनं के वयं वराका इत्याहुः। वयं किंपुरुषाः। तुच्छप्राणिनः त्वं तु
महानुग्रभावः पुरुषः न त्वयं महान् दैत्यो हत इति किंवर्ण्यत इत्याशंक्याकि यदेतादित्याहुः। अयमि
ति ५४ सभासत्रेषु यज्ञेषु ते व्याहताः। एतादिष्ट्या भद्रं कृतं ५५ अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनुनि
रनुकारिताः अतः परं नः। विभवाय समृद्धये भव ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० नोऽस्माकं भक्तानां शरणद आश्रयप्रदः सर्वेषां लोकानां शर्म मंगलं भेतद्भुतं रूपमद्यैव दृष्टं न तु पूर्वं विधिकरः किंक
रः ५७ इति सप्तमे अष्टमः। नवमे ब्रह्मणाभिर्मोत्या चोदितो ऽसुरबालकः। कोपं प्रशमयन् स्तोत्रैर्नृसिंहमतिभी
षणं। ज्ञयो ऽप्यनुग्रह एवायं स्व भक्तानां नृकेशरी वरं वयोति तानीमन्यैषामुग्रविग्रहः ३ इत्याद्यागमात्को भक्तानुकंपि

॥विष्णुपार्षदा ऊचुः॥ अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म। सोऽयं ते विधिक
र ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे प्र
ल्हादानुचरिते दैत्यराजवधो नामा ऽष्टमो ऽध्यायः॥ नारद उवाच॥ एवं सुरादयः सर्वे ब्रह्म
रुद्रपुरःसुराः॥ नोपैतुमशकन् मन्युसंरंभं सुदुरासदं १ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्म
२९ हदद्भुतं॥ अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शंकिता २ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंति
के तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ३ तथेति शनकै राजन् महाभागवतोऽर्भकः उ
पेत्य भुवि कायेन ननाम विधृतांजलिः ४ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया
परिप्लुतः॥ उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहि वित्रस्तधियां कृताभयं ५ श्रीरा

तामाह एवमिति सप्तभिः एवं दूरत एव स्थिता स्तुवंतः मन्युना संरंभ आवेशो यस्य तं उपगंतुं नाशक्नुवन् १ राम
८२ महदद्भुतं रूपं दृष्ट्वा किंतु सतीतं नोपजगाम अद्भुतत्वे हेतुः अदृष्टेति २ उपेहि उपगच्छ ३ ४ काल एवा २९
हिस्तस्मात् वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत् ५ श्रीरामजयराम जयजयराम श्रीराम श्रीराम

हं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्य करस्पर्शेण धूतं निरस्तम् अखिलम् अशुभं यस्य सपदि तत्क्षणमेव अभिव्यक्तं अपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञा
नं यस्य निर्वृतः सन् हृदि दधौ हृष्यंती रोमांचिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृत् यस्य अश्रुणी लोचनयोर्यस्य पर
न३ मपुरुषार्थं यद्ध्यानसाधनत्वेनेत्यर्थः ६ सुसमाधिमेवाह तस्मिन्नेव न्यस्ते हृदयमीक्षणे येनेति ७ स्वस्मिन्निव २
समस्तेषु तत्कृपामत्वा हृष्ट्वा प्रह्लादः स्तौति सत्यं द्वि चत्वारिंशता हरिं तत्र तावदात्मनो भगवत्कृतावनाधिकारमिवारां स्या
धिकार संभावयन्नाह ब्रह्मादय इति पंचभिः मुनयो मननशीलाः सिद्धा ज्ञानिनोपि कथंभूताः सत्वैक

स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः तत्पादपद्मं हृदि निर्वृतो दधौ
हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ६ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः प्रेमगद्गद
यावाचा तन्न्यस्तहृदयेक्षणः ७ प्रह्लाद उवाच ब्रह्मादयः सुरगणा मुनयोथ सिद्धाः सत्वै
कतानमतयो वचसां प्रवाहैः नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरि
प२ रुग्रजातेः ८ मन्ये धनाभिजनरूपतपः श्रुतौजस्तेजः प्रभावबलपौरुषबुद्धियोगाः
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय ९

स्मिन्स्तोते विस्तारो यस्याः सा मतिर्येषां ते तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वक्ष्यमाणैर्गुणैरपि
यमाराधयितुं न पिप्रुः न पूर्णाः न शक्ता इत्यर्थः स हरिर्मम कथं तोषं प्राप्तुमर्हेति तत्र हेतुः उग्रा घोरा आ
सुरी जातिर्यस्य ८ एवं हरितोषणे स्वस्यायोग्यतामाशंक्य योग्यतासंभावयति मन्य इति द्वाभ्यां अभिजनः स
त्कुले जन्म रूपं सौंदर्यं श्रुतं पांडित्यं ओजः इन्द्रियनैपुण्यं तेजः कांतिः प्रभावः पौरुषमुद्यमः बुद्धिः प्रज्ञा
योगः अष्टांगः एते धनादयो द्वादशापि गुणाः परमस्य पुंसः आराधनाय न भवंति हि यतः केवलया भक्त्यैव न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स०

एवं मत्वैव केवलया हरेस्तोषः संभवतीत्युक्ते इदानीं भक्तिं विना नान्यत्किंचित्तोषहेतुरित्याह विप्रादिति पूर्वो
क्ता धनादयो द्विषट् द्वादशगुणास्तैर्युक्तात् विप्रादपि श्वपचं वरिष्ठं मन्ये यद्वा सनत्सुजातोक्ता द्वादश धर्मा
ज्ञानं च ३ दयागुणा द्रष्टव्याः तदुक्तं सत्यं च दमश्च श्रुतं च ह्यमात्सर्यं ह्रीस्तितिक्षाऽनसूया यज्ञश्च दानं च धृतिः शम
श्च महाव्रता द्वादश ब्राह्मणस्येति सनत्सुजातश्लोकव्याख्याने ज्ञानं तत्वार्थसंवेदनं दमो मनसो दमः ॥
श्रुतमध्यात्मशास्त्रश्रवणं ह्रीरकार्यकरणापरतिः बहिःकरणापरतिरिति केचित् एतज्ज्ञानां ब्राह्मणेभ्यो
धनादित्यागः भूताभयदानं वा धृतिर्विषयसन्निधावपीन्द्रियनिग्रहः शमः अंतःकरणापरतिरिति केचित्
एतज्ज्ञानादयो गुणा महाव्रताः परमपुरुषार्थसाधनभूता ब्राह्मणस्योक्ताः कथंभूतात् विप्रात् अरविंदनाभ
स्य पादारविंदाद्विमुखात् कथंभूतं श्वपचं तस्मिन्नरविंदनाभे अर्पिता मन आदयो येन तं ईहितं कर्म वरि

विप्रात् द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखाच्छ्वपचं वरिष्ठं मन्ये तदर्पितमनोव
३० चनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः ॥१०॥ नैवात्मनः प्रभुरयं निजलाभपूर्णो मा
नं जनादविदुषः करुणो वृणीते यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य
यथा मुखश्रीः ॥११॥

ष्ठत्वे हेतुः स एवंभूतः श्वपचः सर्वं कुलं पुनाति भूरिमानो गर्वो यस्य स तु
विप्र आत्मानमपि न पुनाति कुतः कुलं यतो भक्तिहीनस्य तद्गुणा गर्वायैव भवंति न तु शुद्धये अतो हीन इ
तिभावः ॥१०॥ तर्हि किं धनाद्यर्पणेन सम्मानेन प्राकृत इव भगवानपेक्षते नेत्याह नैवेति अयं प्रभुरीश्वरः अवि
दुषोऽल्पकाज्जनात् मानं पूजामात्मनोऽर्थे न वृणीते नेच्छति यतो निजलाभेनैव पूर्णः तर्हि किं पूजां नेच्छ
त्येव तत्राह करुणः कृपालुः अतो वृणीते च तत्र हेतुः यद्यदिति यं यं मानं यद्वा यत्तु यस्मात् यद्यत् धनादि
ना भगवते मानं विदधीत तत्तदेवात्मने भवति नान्यत् यथा मुखस्यैव तिलकादिश्रीः शोभा प्रतिबिंबस्य भ

वति तद्गुणाद्धानोपि वकोर्द्धभाव्यमानादिति ११

राम
३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवं भगवानु भक्त्यैव तुष्यति तस्मादहं नीचोऽपि विगतविक्लवः गताशंकः सन्नुईश्वरस्य महिमहिमानंस
नर र्वप्रयत्नेन स्वमनीषानुसारेणानुवर्णयामि अज्ञानतोपि स्तोतिकरणे हेतुमाहायेनैव महिम्ना अनुवर्णितेन
अविद्यायासंसारमनुप्रविष्टः पुमान् पूयेत शुद्ध्येत तन्महि अन्यस्य तथा शोधकस्याभावादित्यर्थः ॥ १२ ॥ नदे
वमात्मनः स्तोतावनधिकारं परिहृत्येदानीं तेस्तवनं कोपोपसंहारं प्रार्थयते सर्वेहीति द्वाभ्यां भोईश ब्र
मौउ हिजंतो विश्वपतेः सर्वे ब्रह्मादयः सत्वमूर्त्तेस्तव विधिकराः त्वन्नियोगकर्त्तारो भक्ता एव नान्ये न च वय
मसुराइव वैरभावेन ते भक्ताः किंतु श्रद्धयैव नव स्वैरं रवतारैर्विविधक्रीडनै अस्य विश्वस्य क्षेमादि

तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषं । नीचोऽजयागुण
विसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥ १२ ॥ सर्वेह्यमी विधिकरास्तव सत्वधा
म्नो ब्रह्मादयो वयमिवेश न चोद्विजंतः । क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडि
तं भगवतो रुचिरावतारैः ॥ १३ ॥ तद्यच्छ मन्युमसुरश्च हतस्त्वयाऽद्य मोदेत साधुरपि वृ
श्चिकसर्पहत्या । लोकाश्च निर्वृतिमिताः प्रतियंति सर्वे रूपं नृसिंह विभयाय जनाः स्मर

प्रयोजनाय न तु भयोत्पादनाय ॥ १३ ॥ तत्तस्मादेषां परि भयपरिहाराय मन्युं यच्छ उपसंहरायदर्थं अयं मन्युः
सर्वासुरस्य साधुनां संतोषार्थं अवधि हतः अतः परं क्रोधनकार्याभावात्तं नियच्छ ननु न्वस्येषां वधेन साधुः
किं मोदेत तत्राह वृश्चिकादेः परोपद्रवकारिणो न्यतः एव जातया हत्या वधेन तस्यैव साधुरपि जातमितिसाधु
रपि मोदेत नैव तहि बहुनां सुखावहत्वादमुं क्रोधं नत्यजामीति चेत्तत्राह लोकाश्च निर्वृतिं इताः प्राप्ताः
संतः संतः प्रतियंति क्रोधोपहारं प्रतीक्षते तेन हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत्तत्राह रूपमिति

विभयाय भयनिवृत्त्यै येणतद्रूपस्मरणं देव भयानिवृत्तेर्न मन्यु
धारणेन कृत्यमस्तीत्यर्थः ॥ १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰ त्वं चेद्बिभेषि तर्हि त्वस्यामीनिंचेत् तत्राह नाहमिति भोऽजित ते अस्माद्रूपात् अहं न बिभेमि कथंभूतात् आ(श्री)
स्यं च जिह्वा च अर्कसदृशे नेत्रे च भ्रुकुटि नार भस आटोप अनु यादंष्ट्रा अस्य एतानि अतिभयानकानि यस्मि
नू तस्मात् आन्त्रमय्यः स्रजो यस्मिन् तत् आन्त्रस्रक् तस्मात् क्षतजाक्ताः केशरा यस्मिन् शंकुवद् ऊर्ध्वौ न३
कर्णौ यस्मिन् तत्तस्मात् निर्ह्रादेन भीता दिगिभा यस्मिन् अरीन् भिंदंतीत्यरिभिदस्तीक्ष्णानि नखाग्राणि य २

नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् आंत्रस्रजः क्ष
तजकेशरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ त्रस्तोस्म्यहं कृपणवत्सल
२२ दुःसहोग्रसंसारचक्रकदनाद्ग्रसतां प्रणीतः बद्धः स्वकर्मभिरुशत्तम तेंघ्रिमूलं प्रीतोप
वर्गमरणं ह्वयसे कदा नु १६ यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाग्निना सकल
३१ योनिषु दह्यमानः दुःखौषधं तदपि दुःखमतद्धियाहं भूमन् भ्रमामि वद मे तव दास्य
योगम् १७

स्मिन् एवंभूतादपि ते रूपादहं न बिभेमि १५ महद्भयं त्वन्यदस्तीत्याह त्रस्तोऽस्मीति दुःसहं यदुग्रं संसा
रचक्रे कदनं दुःखं तस्मात् अहं त्रस्तोऽस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन्प्रणीतः नि राम
क्षिप्तोऽस्मि हे कृपणवत्सल हे उशत्तम कदा नु त्वं प्रीतः सन् अपवर्गभूतं शरणं त्वदंघ्रिमूलं प्रति ह्वयसे ३२
मामाह्वास्यसि १६ दास्यसि तिमत्प्रीतिरिति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावा
त्वं प्रवर्तकमुपदिश इति प्रार्थयते यस्मात् प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शो
काग्निना सकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह दुःखस्यौषधं प्रतीकारः त
दपि दुःखमेव एवमपि अतद्धियादेहाद्यभिमानेन मुह्यन् भ्रमामि अतः हे भूमन् विभो मे तव दास्यरूपं यो

ननु दास्ययोगेन प्रवृत्तस्यापि त्वदंतरायभूतानां पूर्वोक्तनानादुःखानां कुतः परिहारः तत्राह सोहं त्वद्दासः सन्नु
नृसिंह तव लीलाः कथा अनुगृणन् अनु दुर्गाणि महादुःखान्यंजसा नितरां मितरामि नगणयिष्यामीत्यर्थः तत्र
हेतुः गुणैः रागादिभिर्विशेषेण प्रमुक्तः सन्नु तत्कुतः तेपदयुगमेवालयो येषां भक्तानां त एव हंसा ज्ञानिनः
तैः संगो यस्य मम सोहं कथंभूतस्य कथाः तत्राह प्रियसख्यादिकृतो ज्ञाताः विरिंच्येन गीताः तत्संप्रदायप्रवृत्ताः
तथा चाथर्वणी श्रुतिः देवा ह वै प्रजापतिमब्रुवन् इत्यादि दास्यप्रवृत्तस्य भगवदनुग्रहेण सत्संगः ततो
वीतरागतया भगवद्गुणानुवर्णनं ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः १८ ननु दुःखप्राप्तस्य तत्प्र
तीकारो लोके प्रसिद्ध एव किं महदास्यादिना तत्राह बालस्येति नृसिंह तप्तस्य तत्प्रतिविधिः दुःख

सोहं प्रियस्य सुहृदः परदेवतायाः लीलाकथास्तव नृसिंह विरिंचगीताः अंजस्तितर्म्य
नुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालय हंससंगः १८ बालस्य नेह शरणं पितरौ
नृसिंह नार्त्तस्य चागदमुदन्वति मज्जतो नौः तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्ता
वद्विभो तनुभृतां त्वदुपेक्षितानां १९

प्रतीकारः इह लोके योंजसा इष्टः स त्वयोपेक्षितानां नावदेव क्षणमात्रं भवन्नात्यंतिकः न हि बा
लस्य पितरौ शरणं रक्षकौ विहन्न भवतः ताभ्यां बाल्यमानस्यापि तस्य दुःखदर्शनात् केचिदजीगर्त्ता
दिषु ताभ्यां भवत्यहद्धदर्शनाच्च न चार्तस्य रोगिणः अगदमौषधं शरणं कृतेप्यौषधे मृत्युदर्शनात्
न च उदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सह मज्जनदर्शनात् अतस्त्वमेव शरणमित्यर्थः
अथ चैवं काक्का व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह तावत् प्रसिद्धः स खलु उपेक्षितानां किमंजसेष्टः
अपि तु नष्ट एव यद्वा यस्मात् इह प्रतिविधिरिष्टः किमंजसा नैवांजसेत्यादि यद्वा बालस्येत्यादि पूर्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰सं॰ ननुकश्चित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोपिदृश्यतएवेत्याशंक्यतत्रापितत्तद्रूपेणत्वमेवरक्षक
इत्युररीकृत्यतत्स्पष्टसर्वात्मतामाहयस्मिन्निति अपरोवार्वाचीनः पित्रादिः परोब्रह्मादिर्भावः केनोतत्तेनको
रेकेयद्यत्करोतितत्सर्वंभवतएवस्वरूपंनतुपृथक् यस्मिन्नधिकरणेयतोनिमित्तात् यर्हियस्मिन्का
ले येनकरणेन येनहेतुकर्त्रासंचोदितः यस्यसंबंधि यस्मादपादानाद्यस्मैसंप्रदानायय
द्यत्तमः यः कर्तेत्येवंसप्तविभक्त्यर्थाः यथायेनप्रकारेणेतिक्रियाविशेषणभूतानामव्ययानामर्थः
पृथक्स्वभावः सत्वादिप्रकृतिः करोतिउत्पादयति किंकरोतिरूपांतरंनयतीति २॰ अतोन्य
स्यरक्षकस्याभावात्संसारिणश्चनित्यमुक्तस्त्वमेवमांशरणागतंरक्षेतिप्रार्थ्यतेमायेतिद्वाभ्यां

यस्मिन्यतोयर्हियेनचयस्ययस्माद्यस्मैयथायदुतापरस्त्वपरः परोवा भावः करोतिपृथ
क्स्वभावःसंचोदितस्तदखिलंभवतःस्वरूपं २॰ मायामनःसृजतिकर्ममयंबली
यःकालेनचोदितगुणानुमतेनपुंसः छंदोमयंयदजयार्पितषोडशारंसंसारचक्र
मजकोतितरेत्वदन्यः २१ सत्वंहिनित्यविजितात्मगुणःस्वधाम्नाकालोवशीकृतविसृ
ज्यविसर्गशक्तिः चक्रेविसृष्टमजयेश्वरषोडशारेनिष्पीड्यमानमुपकर्षविभोप्रपन्नं २२

त्वंहंशस्यपुंसोनुमतेनईक्षणरूपेणानुग्रहेणमनः मनःप्रधानंलिंगंमायासृजतिकथंभूतं
कालेनचोदिताःक्षोभिताःगुणाः यस्याः कथंभूतंमनः कर्ममयंकुर्वन्नपंबलीयः दुर्जयंछंदोमयंवेदोक्त
कर्मप्रधानंच अजयाजीवस्याविद्ययाभोगार्थमर्पिताः षोडशअराविकारायस्मिन् यदेवंभूतंसंसा
रचक्रात्मकंमनःतत्करोतितरेत्भोजत्वदन्यःत्वत्तःपृथक्स्थितःत्वामभजन्नित्यर्थः ननुममापिमाय
संबंधात्कर्तृत्वाद्यविशेषात्त्वत्तःकोविशेषअतआहसइतिस्वधाम्नाचिच्छक्त्यानित्यविजितआत्मनाबुद्धि

गुणाः येन सहितं वर्ग्यतः कालः मायाप्रेरकः अतएव वशी
कृतो विसर्ज्ञानां कार्याणां विसर्गसाधनानां च शक्तयो येन
अतः इक्षुदंडवन्निष्पीड्यमानं मां उपकर्षस्व समीपं नय॥ २२

ननु लोकपालानां भोगान् भुंक्ष्व पित्र्यं वा राज्यमिदं हास्यामि किमिति संसाराद्द्विजसे तत्राह दृष्टा इति त्रिभिः ॥
श्रियः संपदः विभावः रूपः आयुरादयो दृष्टा इति काका तुच्छत्वमुक्तं तदेवाह ये अस्मत्पितुः कोपहासवि
जृंभितभ्रूभंगमात्रेणा विध्वस्ताः स च त्वया निरस्तः ॥ २३ ॥ यस्मादेवं तस्मादाशिषो भोगानज्ञः तत्परिपाकं विद्वा
नहं ऐंद्रियं इंद्रियैर्भोग्यं ब्रह्मणो भोगमभिव्याप्य किमपि नेच्छामि ते कालात्मना उरुविक्रमेण विलुलि
तान् विध्वस्तान् णिमादीनपि ॥ २४ ॥ किंच वर्त्तमानकालेऽपि न भोगा हीत्याह कुत्रेति श्रुतिश्रवणं

दृष्टा मया दिवि विभो ऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयं ।
ये ऽस्मत्पितुः कुपितहासविजृंभितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २३ ॥
तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैंद्रियमाविरिंच्यात् । नेच्छा
मि ते विलुलितानुरुविक्रमेण कालात्मनोपनय मां निजभृत्यपार्श्वं ॥ २४ ॥ कुत्राशिषः
श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः । निर्विद्यते न तु जनो
यदपीति विद्वान् कामानलं मधुलवैः शमयन् दुरापैः ॥ २५ ॥ श्रीराम श्रीराम श्री

देव सुखं यासु ताः मृगतृष्णिकावन्मिथ्याभूता आशिषः क्व अशेषाणां रुजां रोगाणां विरोहः उद्भवः ३७१
स्थानं क्व च इदं कलेवरं एवं च तु सर्वोऽपि जनः किं न विरज्यते तत्राह यद्यपि इति एवं विद्वान् अयं जनस्त
थापि न निर्विद्यते विरक्तो न भवति कुतः कामएवानलः तं मधुतुल्यैः सुखलवैः दुःसाध्यैरपि शमयन्
कामाग्निशमनव्यग्रस्य निर्वेदेऽप्यवकाशो नास्तीत्यर्थः ॥ यद्वा अचिंत्यमिदं त्वन्मायाचेष्टितमिति भा
वः ॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० तर्हि त्वं कथं निर्विण्णोसि अनर्हेपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह क्वेति रजसैवप्रभवो जन्म यस्य सः
सप्तम्यंतं वा कुलविशेषणं तमोधिके यस्मिन्न् तस्मिन् सुराणां कुले जातोऽहं क्व क्व च त्तवानुकंपा नाभिवाह
ब्रह्मादीनां शिरसि येनैवार्पितः सपद्मवत् सकलसंतापहरः करः प्रसादः पुरुषार्थरूपो मे शिरस्यर्पित
इति यत्तया अनुकंपयेतिवा २६ न च त्वयीदं मतिचित्रमित्याह नैषेति एते ब्रह्मादयस्तु त्तमा अयमसुरो
६१ नीचइत्येषापरावरमतिः जंतोः प्राकृतस्य यथा तथा भवतो न भवेत्स्यात् अत्र हेतुः जगतः आत्मनः सुहृ
दश्च तर्हि सर्वत्र मत्प्रसाद एकरूपः किं न स्यात्तत्राह संसेवयातु वे प्रसादो भवति तत्र च सेवानुरू
पं तत्तदिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे दृष्टांतः सुरतरुर्यथा सेवकस्यैव

३३ क्वाहं रजः प्रभव ईश तमोऽधिकेस्मिन् जातः सुरेतरकुले क्व तवानुकंपा न ब्रह्मणो न तु भवस्य
नवै रमाया यन्मेर्पितः शिरसि पद्मकरः प्रसादः २६ नैषा परावरमतिर्भवतो ननु स्याज्जंतोर्यथाऽ
त्मसुहृदो जगतस्तथापि संसेवया सुरतरोरिव ते प्रसादः सेवाऽनुरूपमुदयो न परावरत्वं २७
एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसंगात् कृत्वाऽऽत्मसात्सुरर्षिणा
भगवन्गृहीतः सोहं कथं नु विसृजे तव भृत्यसेवां २८

संकल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न परावरत्वं अत्र कारणमिति शेषः २७ एतच्च त्व राम ३३
न२ त्कृपया मया प्राप्तमिति त्वत्कृत्य पार्श्वमेव मा द्रक्ष्य इत्याशयेनाह एवमिति यथा त्वं प्रानुकंपितोस्मि एवं नार
देनात्मसात्कृत्वा पूर्वमनुगृहीतः सोऽहं कथं नु त्वत्कृत्यसेवां विसृजामि कथंभूतोऽनुगृहीतोस्मि प्रभव
एवाहियुक्तः कूपस्तस्मिन् कामानभितः कामयमानं जनं निपतितं मनु तत्प्रसंगात्प्रपतंतं योऽहं नोदेवं त्वत्कृ
त्यस्य श्रीनारदस्यानुग्रहेण त्वया अत्यंतमनुकंपितोऽस्मि अयमेव च मम परमोऽनुग्रहः न पुनरिदमिति

न२

श्रीमद्भागवत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचेदं त्वयामदनुग्रहार्थंकृतंकिंतुस्वार्थमित्याह भोऽअनंतयेदेतन्मत्प्राणारक्षणमांहंतुमुद्यतस्य मत्पितुर्वध
अंतदुभयंस्वभृत्यऋषिवाक्यमृतंविधातुमित्यहंमन्ये कुतः यद्यस्मात् असतः अयुक्तं विधित्सुः खड्गंप्रगृ
ह्यावोचत् किंमदपरोमद्व्यतिरिक्तःईश्वरः स्थितः हि त्वामिदानीमवतु तवकेशिरोहंहरामीति पा
ठांतरः प्यथमेवार्थः यद्यदाअवोचत् तदा मत्प्राणारक्षणमितिवान्वयः एतच्चसत्यविधातृ निजभृत्य
भाषितमित्यत्रैव वक्तुधाव्याख्यातं २९ नचेदं पक्षपातेन रक्षणं देत्यहं नेनेचत्वयि स्वाभाविकं किंतु

मत्प्राणारक्षणमनंतपितुर्वधम्अमंस्य स्वभृत्यऋषिवाक्यमृतंविधातुं खड्गं प्रगृह्य यद
वोचदसहिधित्सुस्त्वामीश्वरो मदपरोऽवतु केहरामि २९ एकस्त्वमेव जगदेतद
मुष्ययत्वमाद्यंतयोः पृथगवस्यसिमध्यतश्च सृष्ट्वागुणव्यतिकरं निजमाय
येदं नानेवतैरवसितस्तदनुप्रविष्टः ३० श्रीराम श्रीराम श्रीराम श्रीराम श्री

मायागुणोपाधिकं सर्वात्मके त्वयिस्वतस्तदयोगादित्याह एकइति एतच्चजगत्त्वमेवैकः यद्यतः अ
मुष्याद्यंतेच पृथगवस्यसि विरामंकरोषि सन्मात्रतयाकारणत्वेनावंवतिष्ठसइत्यर्थः अतोमध्यतश्च
त्वमेव कुतस्तर्हि भेदप्रतीतिस्तत्राह निजमाययागुणपरिणामात्मकमिदंजगत्सृष्ट्वा तदनुप्रवि
ष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेवलक्ष्यकइवहं तैरवच्छअवसितः प्रतीतः तदुक्तंस्कंधेयांपत्रोमे निर्गुणा
पित्सृजो व्यक्तो भगवान्प्रकृतेः परः स्वमायागुणमाविश्य बाध्यबाधकतांगतइत्यादिना ३० श्री

पित्वेनवृच २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० ननुयद्येतज्जगदहमेवत हिंजगतोवैषम्येऽपिकिंनस्यादित्यत आह त्वंवेत्वमेवइदंसदसत्कार्यकारणात्मकंजग
त्ननुत्वत्तःपृथक्भवान्कस्ततोऽन्यः आद्यंतयोःपृथगवस्थानात्यस्मादेवंअतोऽयमात्मीयोऽयंपरइतियाबुद्धिः
सा अपार्थासैवकार्यकारणाभेदंदृष्टांतेनसाधयति यद्यतःयस्यजन्मईक्षणंप्रकाशश्च यस्मिन्निधनंच
स्थितिश्च तदेतत्तदेव अष्टिर्बीजंकारणंतरुःकार्यंतयोर्यथावसुकालमात्रत्वं अयमर्थः कालशब्देननी
लत्वासाधारणगुणयोगात्पृथ्वी वसुशब्देनवसुमात्रभूतंसूक्ष्मंतत्रतरोर्यथापृथ्वीमयबीजमात्रत्वं तस्य
चयथाभूतसूक्ष्ममात्रत्वं एवंसर्वमपिकार्यकारणात्मकंजगत्परमकारणात्मकमेवेतितथाचपार

त्वंवाइदंसदसदीशभवांस्ततोन्योमायायदात्मपरबुद्धिरियंह्यपार्था यद्यस्यजन्मनिधनं
स्थितिरीक्षणंचतद्वैतदेववसुकालवदष्टितर्वोः ३१ न्यस्येदमात्मनिजगद्विलयांबुमध्ये
३४ शेषेत्मनानिजसुखानुभवोनिरीहः योगेनमीलितदृगात्मनिपीतनिद्रस्तुर्येस्थितोनतुतमो
नगुणांश्चयुंक्षे ३२

मर्षंसत्वंतदनन्यत्वमारंभणशब्दादिभ्यइति श्रुतिश्च वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति ३१
तत्रतावदेतत्पृथगवस्थानंदर्शयतिन्यस्येति इदंजगत्आत्मनाआत्मनैवात्मनिनिक्षिप्यसुखमेवानुभवन्निः १२ राम
क्रियःसन्प्रलयोदकमध्येशयनंकरोषिननुहिकिंजीवस्येवममापितमोवृत्तिरूपानिद्राऽस्तिनहिनहियो ३४
गएवनुनहिंदैत्यभावात्साम्यान्निद्राच्युतइत्याह योगेनमीलितदृशायेनआत्मनास्वरूपप्रकाशेननि
पीतानिद्रायेन यस्तुर्येअवस्थात्रयातिरिक्तेस्वरूपेस्थितस्त्वं नतुसुप्तइवात्मनातमोयुंक्षेनयोजयसि
नपश्यसि नजाग्रत्स्वप्नयोरिवगुणान्विषयांश्चेत्यर्थः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं कारणत्वेनाद्यावपि पृथगवस्थानं दर्शयन्मध्यतस्त्वमेवेत्येतत्प्रपञ्चयति चतुर्भिः यस्त्वमशेषः तस्यै
व ते इदं जगत् वपुः स्वरूपं नान्यस्य यतस्त्वं मध्यतोपि तस्याः कथंभूतस्य निजया कालशक्त्या संचोदि
ताः प्रकृतेर्धर्माः सत्वादयो येन। स्वरूपत्वे हेतुः अनंतशयनानुशेषपर्यंकात् विरमत्समाधिर्यस्य त
स्य तव नाभेः सकाशाद् काणवादके महाब्जं लोकपद्मं अभूत् कथंभूतं आत्मनि त्वय्यवगूढं सत्

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढं अंभस्यनंतशय
नाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जं २३ तत्संभवः कविरतोऽन्य
दपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिंत्य नाविंददब्दशतमप्सु निमज्ज
मानो जातेंऽकुरे कथमु होपलभेत बीजं २४ सत्वात्मयोनिरतिविस्मित आश्रि
तोब्जं कालेन तीव्रतपसा परिशुद्धभावः त्वामात्मनीश भुवि गंधमिवातिसूक्ष्मं
भूतेंद्रियाशयमये विततं ददर्श २५

स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव २३ तदेवं कारणत्वेनानुगतः सन्मध्यतस्त्वमेव वर्तसे
इत्युक्तं तदेव शुद्धसत्वस्य ब्रह्मणोऽनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह तस्मिन्नब्जे संभ
वो यस्य सः कविर्ब्रह्मा अतः पद्मादन्यदपश्यन् बीजमुपादानकारणभूतं त्वां स्वस्मिन्व्याप्तं संतमपि
नाविंदत युक्तं चैतत् उह अहो अंकुरे जाते सति बीजं तदनुगतं कारणं पृथक् कथं नाम पुमान्पश्ये
त् २४ भवदुपासनया तु त्वां स्वस्मिन्नेव दृष्टवानित्याह सत्विति परावस्थामाश्रितः सन् तीव्रेण तपसा

तौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रि ८

भा०स० अनेनसन्मात्ररूपेणोपादानतयादर्शनमुक्तं ईश्वरत्वेनचद्रष्टृत्वात्कर्तार्थोभवतीत्याह एवंअनेनप्रकारेणस
या०नि२ हस्राणमपरिमितानिवदनादीनितैराढ्यंसमृद्धं मायामयंमायाप्राधानंसताप्रपंचेनोपलक्षितःसन्निवेशः
पादादिरचनायस्य ३५ तदाचभवांस्तस्यानुग्रहवानित्याह तस्मादितिहयग्रीवमूर्तिबिभ्रत्सन् रजस्तमो
स्यौ२ रूपौमधुकैटभौ २ हत्वातस्मैश्रुतिगणान्समर्पितवानुतत्रहेतुः सत्वमि ३७ एकस्त्वमेवत्यादिभिरष्टभिः
श्लोकैः यदुक्तंपक्षपातेनरक्षणंतद्विपक्षवधश्चसत्वोपाधिकोननुस्वतइतितदुपसंहरतिइत्थमिति

एवंसहस्रवदनांघ्रिशिरःकरोरुनासाद्यकर्णनयनाभरणायुधाढ्यं मायाम
यंसदुपलक्षितसन्निवेशंदृष्ट्वामहापुरुषमापमुदंविरिंचः ३६ तस्मैभवान्हय
शिरस्तनुवंहिबिभ्रद्वेदद्रुहावतिबलौमधुकैटभाख्यौहत्वानयच्छ्रुतिगणांश्च
रजस्तमश्चसत्वंतवप्रियतमांतनुमामनंति ३७ इत्थंनृतिर्यगृषिदेवझषावतारै
र्लोकान्विभावयसिहंसिजगत्प्रतीपान् धर्ममहापुरुषपासियुगानुवृत्तं छ
न्नःकलौयदभवस्त्रियुगोथसत्वं ३८ नैतन्मनस्तवकथासुविकुंठनाथसंप्रीय
तेदुरितदुष्टमसाधुतीव्रं कामातुरंहर्षशोकभयैषणार्तंतस्मिन्कथंतवग

हमि१ विभावयसि पालयसि हंसि घातयसि कलौतुनतथाकरोषि यतस्तदात्वंछन्नोभवः यतः त्रिष्वेवयुगेष्वावि राम
र्भावात्सएवंभूतस्त्वंत्रियुगइतिप्रसिद्धः ३८ तदेवंभगवतस्तत्त्वंनिरूप्यस्वस्यचतत्रचित्तौदार्यमपराधानि ३५
वेदयन्प्रार्थयतेनैतदितित्रिभिः असाधुबहिर्मुखंतीव्रंदुर्द्धरंहर्षशोकभयैरेषणात्रयेणचार्तंदुः
खितमपितवकथासुनसंप्रीयतेतस्मिन्नेवंभूतेमनसिसतिकथंतवगतिंविचारयामि ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ

किंच जिह्वेति । प्रासतीभोऽच्युत मामां यतो मधुरादि रसस्तत् आकर्षति उदरं तु क्षुधासंतप्तं सद्
एवं यत्किंचिदाहारमात्रं प्रति च । चपला दृक् क्वचन । कर्मशक्तिः कर्मेन्द्रियाणि लुनंति त्रोटयंति ४० न
केवलं मामेव क्लिश्यति अतः सर्वजनं पालयेति प्रार्थयते एवमिति भवः संसार एव वैतरणी य
महारणेति तस्यामन्योन्यतो या जिजन्मादीनि तेभ्यो भीतिभीतं स्वपरेषां च विग्रहे यथा यथा पूर्व वैरं
मैत्रं च यस्य एवंभूतं जनं पश्यन्नुत्वं हे पारचर तस्मात्पारस्थित नित्यमुक्त हंतेति अहो कष्टमिति य
मनुकंपा । पीपृहि पारय मूढमद्यापालय ४१ । एकेन मया कथं सर्वो जनस्तारणीय इति चे

जिह्वैकतोऽच्युत विकर्षति माऽवितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् । घ्राणोऽ
न्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ४० एवं स्वकर्मप
तितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतं । पश्यन् जनं स्वपरविग्रह
वैरमैत्रं हंतेति पारचर पीपृहि मूढमद्य ४१ कोन्वत्र तेऽखिलगुरो भगवन् प्रयास
उत्तारणेऽस्य भवसंभवलोपहेतोः । मूढेषु वै महदनुग्रह आर्तबंधो किं तेन ते प्रि
यजनाननुसेवतां नः ४२

तत्राह कोन्विति । अत्र सर्वजनोत्तारणे प्रयासः न कोपि कुतः अस्य विश्वस्य भवसंभवलोपानां उत्प
त्तिस्थितिसंहाराणां हेतोः ततोपि किमेतत् दुष्करमिति भावः उ चितं चैतदित्याह मूढेष्विति तांच
त्वदीयाश्चेत्तारयिष्यामि इदं मदुराग्रह मा भूत् तथा इति चेत् तत्राह तव ये प्रियजनाः भक्ताः ताननुसे
वमानानां नोऽस्माकं तेन तदुत्तारणेन किं कोऽतिप्रयासो मुख्याले को हरेः कोन्वत्र तेऽखिलगुरो भ
गवन् प्रयास इत्यक्षादिस्त्वमुपमंत्र्य मिथो नारायणो मीनान सरभ मकरादपनीय मायाम् ४२

या २

नृ२

भा०स० वत्स प्रह्लाद दुरंतात्तावन्नारयिष्यामि तावदेव कृतार्थः स्याः किमनेनानुनिर्बंधेनेत्युक्ते तत्राह नैवेति हे परसर्वोत्त वि
म त्वद्वीर्यगायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोऽहं भवद्वैतरण्याः नोद्विजे किंतु मूढान् शो
चामि नानेवाह ततो महामृताद्विमुखं चेतो येषां प्रत्युत इंद्रियार्थनिमित्तं यन्मायासुखं तदर्थं भ
रं कुटुंबादिभारमुद्वहतः ४३ त्वं तावन्मुक्तिं गृहाण तावता त्वेशा मुनय उपदेक्ष्यंतीति चेत्तत्राह
प्रायेणेति न विमुमुक्षे विमुक्तिं नेच्छामि तथान्यं कमपि प्रार्थये मामेव किमिति निर्बध्नासीति चेद
तत्राह त्वत्तोऽन्यमेषां शरणं न पश्यामि ४४ नन्वेते स्त्रीसंभोगादिना सुखिनस्तान्कृप

नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः शोचे ततो वि
३६ मुखचेतस इंद्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ४३ प्रायेण देव मुनयः
वि३ स्वविमुक्तिकामा मौनं चरंति विजने न परार्थनिष्ठाः नैतान्विहाय कृपणान्विमुमुक्ष एको
नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ४४ यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन दि२
करयोरिव दुःखदुःखं तृप्यंति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं
विषहेत धीरः ४५

एक्षि त्राह यदिति करयोः कंडूयनेन संघर्षणेन दुःखमनु दुःखं यस्मिन् तद्धि दुःखत्वादेव तत्तेनानि राम
र्विद्यमुच्यते ननु तत्राह कृपणाः कामुकाः बहुदुःखभाजोऽपि इह गृहमेधिसुखे न तृप्यंति श्रवणमि ३६
ति न मन्यंते कंडूतिवत्कामस्य दुःसहत्वात् ननु केचित्कंडूतिमपि सहंते कामं चेत्यत्राह त्वत्प्रसा
दात्तु कश्चिद्धीर एवं मनसिजं कामं विषहेत न तु सर्वं अत्रापि कंडूतिवदिति दृष्टांतः ४५ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु मौनादिभिर्मोक्षसाधनैः सुलभैर्भवतः तेषामपि मुक्तिस्तत्राह मौनेति हे पुरुष अंतर्यामिन् ये मौनादयो दश आपवा-
र्ग्याः अपवर्गहेतवः प्रसिद्धाः रहः विविक्तवासः ननु प्रायशः अजितेन्द्रियाणां इंद्रियभोगाय अर्थार्थं विक्रीतत्वे-
न वार्त्ताः जीवनोपायाः भवंति दांभिकानां वार्त्ता अपि भवंति वा न वा दंभस्यानियतफलत्वात् ४६ ननु ज्ञानं तु भ-
क्तिविलासः कथं मौनादिभिर्न भवत्येवेत्याह रूपे इति त्रिभिः बीजांकुराविव प्रवाहापन्ने इमे सदसती कार्यका-
रणे एव ते रूपे तूपलक्षणे भूते वेदेन सृष्टे प्रकाशिते न चान्यत् स्वसमवेतं गोत्वादिकमिव देवदत्तादेः कुतः

मू० मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः प्रायः परं पुरुष ते
त्वजितेंद्रियाणां वार्त्ता भवंत्युत न वात्र तु दांभिकानां ४६ रूपे इमे सदसती तव वेदसृष्टे बी-
जांकुराविव न चान्यदरूपकस्य युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमि-
२२ व दारुषु नान्यतः स्यात् ४७ त्वं वायुरग्निरवनिर्वियदंबुमात्राः प्राणेंद्रियाणि हृदयं-
चिदनुग्रहश्च सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरु-
क्तम् ४८

अरूपकस्य प्राकृतरूपादिशून्यस्य अतः युक्ताः संयताः एवं भक्तियोगेन प्रत्यक्षं त्वामुभयत्र कार्ये कारणे चा-
नुगतं पश्यंति मंथनेन दारुषु वह्निमिव नान्यतः स्यात् ज्ञानमिति शेषः यद्वा ज्ञानप्रकारमेवाह एतदुभ-
यमन्यतः प्रधानपरमाण्वादेर्न स्यात् सांख्यतन्त्रादिभ्यः अतस्त्वमेव कारणत्वात् सर्वत्रानुस्यूत इति ४७
तदेवाह त्वं वायुरिति हृदयं मनः चित् चित्तं अनुग्रहः अहंकारः देवता वा सर्वं वा सगुणः स्थूलः विगुणः सू-
क्ष्मः मनश्च वचश्च मनोवचः तेन निरुक्तं प्रकाशितं किमपि त्वत्तोऽन्यन्नास्ति ४८ राम श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० अभक्तास्त्वस्मिन्ननुगतमपि त्वां न जानंतीत्याह नैत इति नैते गुणाद्यभिमानिनो देवाः आद्यंतवंतः जडोपाधित्वात् अनाद्यंतं निरुपाधित्वां न विदंति हि यस्मात् सुधियो विद्वांस एवं विचार्य शब्दात् अध्ययनादि व्यापारादुपरमंति त्वां स्वसमाधिना पासंत इत्यर्थः तथा च श्रुतिः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे इति नानुध्यायन्बहूं

पुनस्य। छब्दान्वाचो विग्लापनं हि तदिति च स्मृतिश्च यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य चेत्यादि ४९ उपसंहरति तदिति हे अर्हत्तम नमः स्तुतिकर्म पूजाः प्रणिपात स्तुतिः सर्वकर्मार्पणं

नैते गुणा न गुणिनो महदादयो ये सर्वे मनः प्रभृतयः सहदेवमर्त्याः आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधियो विरमंति शब्दात् ४९ तत्तेऽर्हत्तम नमः स्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायां संसेवया त्वयि विनेति षडंगया किं भक्तिं ज
३८ नः परमहंसगतौ लभेत ५० नारद उवाच एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः
प्रल्हादं प्रणतं प्रीतो यतमन्युरभाषत ५१ श्रीभगवानुवाच प्रल्हाद भद्र भद्रं ते प्रीतोऽहं ते
सुरोत्तम वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणां ५२ माममप्रीणत आयुष्मन्दर्शनं दुर्ल
भं हि मे दृष्ट्वा मां न पुनर्जंतुरात्मानं तप्तुमर्हति ५३

नि कर्म च परिचर्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडंगया सम्यक् संसेवया विना परमहंसानां ग राम
तौ प्राप्यं त्वयि जनः कथं भक्तिं लभेत यस्मादेवं भक्तिं विना न मोक्षः न च भक्तिः संसेवया विना अतः प्राक् प्रार्थि ३८
२८ तं दास्ययोगमेव देहीति प्रकरणार्थः ५० एतावता वर्णिता गुणा यस्य यतमन्युः उपसंहृतकोपः ५१ कामान्पूरय
तीति तथा यद्वा पुरुषार्थप्रवाहोऽस्मीत्यर्थः अप्रीणतः तोषं अप्राप्नुवतः पूर्णकाम त्वेन शोचितुं ५३
य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रीणंतितोषयंति ५४ एकांतित्वात् निरुपाधिभक्तत्वात् ५५ सप्तमेनवमेः दशमेत्वनुग्राह्यामुं भक्तमंतर्हितेहरौ प्र
संगाद्धरिणारुद्र हतोनुग्रहईर्यते तत्सर्वंवरजातं १ उत्पत्त्या स्वभावेनैवासक्तोमी तेषांकामानांसंगाद्भीतः २
ननुकिमहं भक्तेःप्रलोभयामि नहिकिंतुवरंवृणीष्वेतिवदतस्तवाभिप्रायोऽन्यएवेत्याह भृत्यलक्षणंतिहृद
यस्थग्रंथिवद्बंधकेषु अन्यथाऽनर्थसाधनेप्रवर्त्तनेनघटेतेत्यर्थः ३ कथमेवं भृत्यलक्षणंज्ञातंस्यादत

प्रीणंतिह्यथमांधीराः सर्वभावेनसाधवः श्रेयस्कामामहाभागाः सर्वासामाशिषांपतिं ५४
नारदउवाच एवंप्रलोभ्यमानोपिवरैर्लोकप्रलोभनैः एकांतित्वाद्भगवतिनैच्छत्तानसुरोत्तमः
५५ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रल्हादानुचरितेभगवत्स्तवोनामनवमोऽध्यायः ९
नारदउवाच भक्तियोगस्यतत्सर्वमंतरायतयार्भकः मन्यमानोहृषीकेशंस्मयमानमुवाच
ह १ प्रल्हादउ० मामांप्रलोभयोत्पत्त्याऽऽसक्तंकामेषुतैर्वरैः तत्संगभीतोनिर्विण्णोमुमुक्षुस्त्वा
मुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तंकामेष्वचोदयत् भवान्संसारबीजेषुहृदयग्रंथि
षुप्रभो ३ नान्यथातेऽखिलगुरोघटेतकरुणात्मनः यस्तआशिषआशास्तेनसभृत्यःसवै
वणिक् ४ आशासानोनवैभृत्यः स्वामिन्याशिषआत्मनः नस्वामीभृत्यतःस्वाम्यमिच्छ
न्योरातिचाशिषः ५ अहंत्वकामस्त्वद्भक्तस्त्वंचस्वाम्यनपाश्रयः नान्यथेहावयोरर्थोराज

त्राहयइति नेत्वत्र ननुकामनयापिसेव्यसेवकयोः स्वामिभृत्यभावःप्रसिद्धःसत्यंसोपाधिकोसोननुत्ताविकड
त्याह स्वामिन्यात्मनःआशिषआप्रेक्षमाणोनैवभृत्यः भृत्यहेतुकामात्मनःस्वाम्यमिच्छन्योरातिप्रददाति
सचनैवस्वामी ४ आवयोस्तुतादृशोसावित्याह अहंत्विति अनपाश्रयोनिरभिसंधिः अन्यथाकामाद्यनभिस

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स० ननु तथापि परमोदारस्य मम संतोषार्थं किमपि तृष्णीं घेति चेत्तत्राह यदीति कामांकुराणां असंरोहं अनुत्पत्तिं भवतः सकाशात् ६ ननु कामोत्पत्तौ को दोषस्तत्राह इंद्रियादीनि यस्य जन्मना नश्यंतीति आत्मा देहः ७ कामाभावे गुणमाह विमुंचतीति भगवत्त्वाय त्वत्समानैश्वर्याय तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ८ निर्दोषान् कामान् दातुमिच्छंतं प्रत्याख्यास्यन्नमस्य-

यदि रासीश मे कामान्वरांस्त्वं वरदर्षभ कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ६ इंद्रियाणि म-
नः प्राण आत्मा धर्मो धृतिर्मतिः ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यंति जन्मना ७ विमुंचति य-
दा कामान्मानवो मनसि स्थितान् तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते ८ ॐ नमो भगवते
३८ तुभ्यं पुरुषाय महात्मने हरयेऽद्भुतसिंहाय ब्रह्मणे परमात्मने ९ नृसिंह उवाच नैकांति-
नो मे मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः अथापि मन्वंतरमेतदत्र दैत्येश्व-
राणामनुभुंक्ष्व भोगान् १० कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं
सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ११ श्रीराम श्रीराम श्रीराम ॥

न्निते नम इति सत्यमेकांतभक्तस्त्वं तथापि मदाज्ञाकरणीयेत्याह नेति मे एकांतिनः कदाचिदपि इहामुत्र राम
च मत्त आशिषो न वांछंत्येवं तथाप्येतन्मन्वंतरमात्रं भोगान् भुंक्ष्व १० ननु तर्हि बंधः स्यादित्यत आह कथा ३८
इति द्वाभ्यां सर्वेषु भूतेषु संतमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व तत्र हेतुर्नैव कर्मणा बंध-
स्यान्नेत्याह योगेन मय्यर्पणेन कर्म हि त्वत्यजन् यजस्व ११ श्रीराम जयराम जयजयराम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबंधः सन् लोकानुग्रहार्थं कीर्त्तिं च वितत्य मां प्राप्स्यसि कुशले
न पुण्यपूरणेन पापं हित्वेति विभीषामात्रं अन्यथा तस्य राज्यप्रवृत्तेः ननु तस्य प्राचीनं पापमस्ति तदधिगमे तत्र
पूर्वोत्तरयोः अश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् सुकृतदुःकृते विधुनुत इति श्रुतेः ज्ञानेनैव दग्धं प्रारब्धपापाभि ७२
प्रायं तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचनानुपपत्तेः न चासौ विद्वानिति वाच्यं भगवतैव कृता
र्थत्वस्यानंतरं वक्ष्यमाणत्वात् अतएव योगेन कर्म हित्वेति नोक्तं इदमपि लोकसंग्रहार्थं कर्म्माणि प्रकुर्वीतेत्यस्या

भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा कीर्त्तिं विशुद्धां सुरलोकगीतां वि
तायमामेष्यसि मुक्तबंधः १२ य एतत्कीर्त्तयेन्मह्यं त्वया गीतमिदं नरः त्वां च मां च स्मर
न्काले कर्म्मबंधाद्विमुच्यते १३ प्रह्लाद उवाच वरं वरय एतत्ते वरदेशान्महेश्वर यदनिं
दत्पिता मे त्वामविद्वांस्तेज ऐश्वरं १४ विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुं भ्रातृ
हेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् १५ तस्मात्पिता मे पूयेत दुरंतात् दुस्तरादघात्
पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल १६ श्रीभगवानुवाच त्रिःसप्तभिः पिता पूतः पितृ
भिः सह तेऽनघ यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः १७ ६

नुहृग्मात्रायेति सर्वमनवद्यं १२ किंच य इति त्वां च मां च इदं मच्चरितं च स्मरन्नरः त्वत्तोऽतत्वः कीर्त्तयेत् सोऽ
पि कर्म्मबंधाद्विमुच्यते कुतस्तावबंधशंकेत्यर्थः १३ ईश्वराज्ञाप्राप्तकर्माधिकारः सन्पितुर्निष्कृतिं प्रार्थयते य
त्रिभिः वरं वरणीयमेतदपरं तृणोतीत्यन्तः १४ विद्धः अमर्षेण क्रोधेन आशयो यस्य १५ तेऽपांगेन संदृष्टः अतः पूर्व
न तथापि भो कृपणवत्सल कार्पण्येन प्रार्थय इत्यर्थः १६ यद्यपि कश्यपो मरीचिर्ब्रह्मा च ते तिरस्त्रिपितुस्त्रय एव पू
७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० यद्यस्मात् सम्यगुत्तमस्त्राचारो येषां ते किं कदाप्यपि देशाः तत्तुल्या वंशा अपूर्यन्ते शुद्धा भवंति १८ ननु त्वद्भक्तानां
मयं महिमेति न चित्रं अहं तु तादृशान भवामीति चेत् तत्राह सर्वात्मनेति द्वाभ्यां मद्भावेन मद्भक्त्या विगता
स्पृहा येषां १९ त्वामनुगता ये केचित् पुरुषाः ते एवंलक्षणाः संतो मद्भक्ता भवंति अतो भवान्मे भक्तानां स
र्वेषां प्रतिरूपधृक् उपमानास्पदं श्रेष्ठः खल्वित्यर्थः मदंगस्पर्शनेन सर्वशः पूतस्य ते पितुः पापं शोकेव

यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शिनः साधवः समुदाचारास्ते पूयंत्यपि कीकटाः १८ स
र्वात्मना न हिंसंति भूतग्रामेषु किंचन उच्चावचेषु दैत्येंद्र मद्भावनगतस्पृहाः १९ भवंति पुरु
षा लोके मद्भक्तानामनुव्रताः भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् २० कुरु त्वं प्रेतका
३९ र्याणि पितुः पूतस्य सर्वशः मदंगस्पर्शनेनांग लोकान्यास्यति सुप्रजाः २१ पित्र्यं च स्थानमातिष्ठ य
थोक्तं ब्रह्मवादिभिः मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः २२ नारद उवाच प्रह्लादोपि उ
तथा चक्रे पितुर्यत्सांपरायिकं यथाह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः २३ प्रसादसुमुखं
दृष्ट्वा ब्रह्मा नरहरिं हरिं स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः २४ ब्रह्मोवाच देवदे
वाखिलाध्यक्ष भूतभावन पूर्वजा दिष्ट्या ते निहतः पापो लोकसंतापनोऽसुरः २५ योसौ लब्धवरो
मत्तो न वध्यो मम सृष्टिभिः तपोयोगबलोन्नद्धः समस्तनिगमानहन् २६ दिष्ट्यास्य तनयः
साधुर्महाभागवतोऽर्भकः त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोऽधुना २७ एतद्वपुस्ते भगव

नास्ति केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु २० वेदवादिभिरुक्तो मनतिक्रमात्परः सत्कर्माणि कुरु २२ मम राम ३९
सृष्टिभिर्मया सृष्टैर्भूतैः समस्तान्निगमान् धर्मानित्यर्थः अहन् हतवान् स त्वया हतः २६ एतदिष्ट्या समितः
सम्यक् प्राप्तः २७ सर्वतः संत्रासात् गोप्तृ रक्षकं २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंवरस्त्वयानप्रेदेयःक्रूरोनिसर्गःस्वभावोयेषांत्रमत्तंक्षीरं ३३ शिशुपालदंतवक्रयोर्द्विषतोःश्रीकृष्णसा
युज्यंकथमितियत्पृष्टंतदेवत्तयो१ पूर्वजन्मकथनादिभिरुपपादितमुपसंहरतिएवमितिसप्तभिः१ दितेःपुत्र
त्वंप्रापितौविप्रशापेणतस्यतस्यानुषंग ३४ ५ तत्छिन्नौश्रीरामंचितयं[illegible]तौ ३५ करूषजोदंतवक्रःहरेःसायु

नृसिंहउवाच मैवंवरोऽसुराणांतेप्रदेयः१ पद्मसंभव वरःक्रूरनिसर्गाणामहीनाममृतंयथा ३९
नारदउवाच इत्युक्त्वाभगवान्राजंस्ततश्चांतर्दधेहरिः१ अदृश्यः१सर्वभूतानांपूजितःपरमेष्ठिना ४०
ततःसंपूज्यशिरसाववंदेपरमेष्ठिनं भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः१ ४१ ततःकाव्या
दिभिःसार्द्धंमुनिभिःकमलासनः१ दैत्यानांदानवानांचप्रह्लादमकरोत्पतिं ४२ प्रतिनंद्यततोदे
वाःप्रयुज्यपरमाशिषः१ स्वधामानिययूराजन्ब्रह्माद्याः१प्रतिपूजिताः ४३ एवंचपार्षदौविष्णोः
पुत्रत्वंप्रापितौदितेः१ हृदिस्थितेनहरिणावैरभावेनतौहतौ ४४ पुनश्चविप्रशापेनराक्षसौ
तौबभूवतुः कुंभकर्णदशग्रीवौहतौतौरामविक्रमैः ४५ शयानौयुधिनिर्भिन्नहृदयौरामसाय
कैः१ तच्चित्तौजहतुर्देहंयथाप्राक्तनजन्मनि ४६ ताविहाथपुनर्जातौशिशुपालकरूष
जौ हरौवैरानुबंधेनपश्यतस्तेसमीयतुः१ ४७ एनःपूर्वकृतंयत्तद्राजानः१कृष्णवैरिणः१ जहु
स्त्वंतेतदात्मानःकीटःपेशस्कृतोयथा ४८ यथायथाभगवतोभक्त्यापरमयाऽभिदा नृपा
श्चैद्यादयः१सात्म्यंहरेस्तच्चिंतयाययुः ४९ आख्यातंसर्वमेतत्तेयन्मांत्वंपरिपृष्टवान् दमघोष

ज्यंसमीयतुः ३७ कृष्णनिंदादिनापूर्वकृतंचयत्एनःपापंतत् ध्यानेनतदात्मानः१संतोजहुः तदात्मत्वेदृष्टांतःकीट
पेशस्कृतोध्यानेनयथातदात्माभवतीति अभिदाभेददर्शनशून्यया हरेः१सात्म्यंसारूप्यं ३८ प्रह्लादचरितार्थमु
पसंहरतियथेतिचतुर्भिः१ ३९ ४०

अवतारः श्रीनृसिंहरूपस्तस्य कथा आख्याने निःशेषः ॥ ४१ प्रह्लादस्यानुचरितमित्यादेः समाम्नातमित्यनेना
न्वयः अस्य त्वनेनोक्तिसर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं ॥ ४२ अनेन कृतं हरेर्गुणकर्मानुवर्णनं
चेत्यर्थः परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४३ आध्यात्मिकं आत्मानात्मवि
वेकादि ॥ ४४ एतच्छ्रवणादिफलमाह य इति द्वाभ्यां एतच्छ्रुत्वा यः कीर्तयेत् ॥ ४५ एतत्तु एतां मृगेंद्रस्यव लीलां नाम

एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ॥ अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४१ प्रह्लाद
स्यानुचरितं महाभागवतस्य च भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४२ सर्गस्थित्यप्य
येशस्य गुणकर्मानुवर्णनं परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४३ धर्मो भागवतानां च
४० भगवान्येन गम्यते आख्यानेऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४४ य एतत्पुण्यमाख्यानं
विष्णोर्वीर्योपबृंहितं कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥ ४५ एतद्य आदिपुरुषस्य मृ
गेंद्रलीलां दैत्येंद्रयूथपवधं प्रयतः पठेत दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वानुभाव
मकुतोभयमेति लोकं ॥ ४६ यूयन्नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति येषां
गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिंगं ॥ ४७ श्रीराम श्रीराम श्रीराम श्रीराम

वाह दैत्येंद्रस्य यूथपालांच वधं यः शुचिः सन्पठेत् पुण्यमनुभावं प्रभावं मतिनिः अयं वा लोकं वैकुंठं ॥ ४६ राम
अहो प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मंदभाग्या इति विषादं नुत्तं प्रत्याह यूयमिति त्रिभिः येषां युष्मा ४०
कं गृहान् मुनयो भियंति सर्वतः समायांति लोकस्य हेतोः एषु गृहेषु नराकारं गूढं सत् आलक्ष्माख्यं परं ब्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कृष्णोस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह सवाइति सोयं ब्रह्मैव स कथंभूतः महद्भिर्विमृग्यं यत्कैवल्य
निर्वाणसुखं निरुपाधिः परमानंदः तदनुभूतिरूपः वः युष्माकं तु खल्वयं प्रियः सुहृदित्यादि विरूपो भवति वि
धिकृद्गुरुः आज्ञानुवर्त्ती ४८ ननु परं ब्रह्मचेत्कथं घष्टसहस्रस्त्रीषु रतिः कथं वा धर्माद्याचरणं तस्येत्यत आह
न २ नयस्य रूपं तत्त्वं भवादिभिरपि धिया खलु आवस्तुतया इदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमे
व प्रसन्नः अस्माकं तु मौनादिसाधनैः स्वत्प्रसादः प्रार्थनीय एवेत्याह मौनेनेति स एष सात्वतां पतिः ४९

स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः प्रियः सुहृद्वः खलु मातुलेयः आ
त्मार्हणीयो विधिकृद्गुरुश्च ४८ न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपव
र्णितं मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ४९ स एष भगवा
न्राजन्व्यतनोद्विहतं यशः पुरा रुद्रस्य देवस्य मयेनानंतमायिना ५० राजोवाच क
स्मिन्कर्मणि देवस्य मयोहन्जगदीशितुः यथा चोपचिता कीर्त्तिः कृष्णेनानेन कथ्यतां
५१ नारद० निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः मायिनां परमाचार्यं मयं शरणमा
ययुः ५२

प्रसीदतु नहि प्रकाशस्य गेहेषु परं ब्रह्म वसति न च तद्दर्शनाय मुनयस्तत्र गृहानभियंति न च तस्य मातुलेया
दिरूपेण वर्त्तनं न च स्वयमेव प्रसन्नं अतो यूयमेव लोकेऽपि अस्मत्तोपि भूरिभागा इति भावः ५१ नन्वन्ये
दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् स एवंभूत ईश्वरोऽप्यस्य तत्त्वं न जानातीति कथमित्यपेक्षायां तस्यापि
तेन साहाय्याद्वासोप्रभावान्केवलस्येति वक्तुमाख्यानमुपक्षिपति स एष इति ५० राज्ञा युधिष्ठिर उवा
च जगदीशितुर्देवस्य कीर्त्तिः कस्मिन्कर्मणि मयाहतवान् अनेन श्रीकृष्णेनोपबृंहितैः संवर्द्धितैः ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स॰ हेमाचंरोप्याचायसांचिनितिस्त्र॰ पुरानिर्मायते भ्योदत्तावितिशाप॰ दुर्लक्ष्येत्र पायसंयोगोगमनागमनेयासांदु
विनवर्याः परिच्छदायासु ५३ असुराणांसेनापनयः पूर्ववैरस्मरंन॰ ५४ अस्त्रमिमंत्रितं शार्ङपुरषुव्यमुंच्यत ५६ स्त्रं अनलिमंत्रितं

सनिर्मायपुरस्तिस्त्रोहेमारोप्यायसीर्विभु॰ दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छदाः॰ ५३ ताभि
स्तेऽसुरसेनान्यास्लोकांस्त्रीस्त्रिश्वरान्नृप स्मरंतो नाशयांचक्रुः॰ पूर्ववैरमलक्षिताः॰ ५४ ततस्ते
सेश्वरालोकाउपासाद्येश्वरंविभो त्राहिनस्तावकान्देवविनष्टांस्त्रिपुरालयैः॰ ५५ अथानुग
ह्यभगवान्माभैष्टेतिसुरान्विभुः॰ शरंधनुषिसंधायपुरेष्वस्त्रंव्यमुंचत ५६ ततोग्निवर्णाइष
रव५ वउत्पेतुः सूर्यमंडलात् यथामयूखसंदोहानाहश्यंतपुरायतः॰ ५७ तैस्पृष्टाव्यसवः॰ सर्वे=
निपेतुस्सपुरौकसः॰ तानानीयमहायोगीमयः॰ कूपरसे॰ क्षिपत् ५८ सिद्धामृतरसस्पृष्टा
वज्रसारामहौजसः॰ उत्तस्थुर्मेघदलनाविद्युतोइवदैत्यः ५९ विलोक्यभग्नसंकल्पंवि
मनस्कंवृषध्वजं तदायंभगवान्विष्णुस्तत्रोपायमकल्पयत् ६० वत्सआसीत्तदाब्रह्माभ्व
यंविष्णुरयंहिगोः॰ प्रविश्यत्रिपुरंकालेरसकूपामृतंपपौ तेऽसुराह्यपिपश्यंतोनन्यषेध
न्विमोहिताः ६१ तद्विज्ञायमहायोगीरसपालोनिंदजगौ स्वयंविशोकः॰ शोकार्तान्स्मरन्
दैवगतिंचता ६२

ततः शरान्सूर्यमंडलान्मयूखसंदोहाः रश्मिसमूहाइवयत्तः॰ येभ्यः॰ ५७ कूपरसेस्वयंनिर्मितकूपामृ रास ४१
ते वज्रसाराः॰ वज्रवत्दृढांगाः॰ महौजसोमहाबलाः॰ मेघदलनाः॰ मेघभेदिनोविद्युत्रूपावह्नयइव
५९ ६० कालेमध्याह्ने ६१ ६२
रव२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनो वा अन्यस्य वा द्वयोरपि वा देवेन दिष्टमुपकल्पितं अपोहितुं परिहर्तुं इह कश्चिदपीश्वरः समर्थो
नास्ति ६३ असौ श्रीकृष्णः प्रधानं संग्रामस्य साधनं ६४ ५ अभिजितिमध्याह्ने ६६ विमानशतानि सुकु
लानि संकीर्णानि येषां तैर्दिवा व्हयः ६७ आदि त आरभ्य स्कंधार्थां निगमयति एवं विधानीति ६८ नर्त्त
कीनराकारमात्मनो विडंबमानस्य अनुकुर्वतः ६९ सप्तमे दशमः एकादशेन्द्रणा धर्माः साधारण्येन

देवासुरा नरा अन्ये वा न ईश्वराः सीह कश्चन आत्मनोऽन्यस्य वा दिष्टं दैवेनापोहितुं द्वयो ६३
अथासौ शक्तिभिः स्वाभिः शंभोः प्राधनिकं व्यधात् धर्मज्ञानविरक्त्यद्धितपोविद्याक्रियादि
भिः ६४ रथं सूतं ध्वजं वाहान् धनुर्वर्म शरादि यत् सन्नद्धो रथमास्थाय शरं धनुरुपाददे ६५ १
शरं धनुषि संधाय मुहूर्त्ते भिजितीश्वरः ददाह तेन दुर्भेद्या हरोथ त्रिपुरान्नृप ६६ दिवि दुंदु
भयो नेदुर्विमानशतसंकुलाः देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः अवाकिरन् जु
गुहृष्टा ननृतुश्चाप्सरोगणाः ६७ एवं दग्ध्वा पुरस्तिस्रो भगवान् पुरहा नृप ब्रह्मादिभिः स्तू
यमानः स्वधाम प्रत्यपद्यत ६८ एवंविधान्यस्य हरेः स्वमायया विडंबमानस्य नृलोकमा
त्मनः वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किं ६९ इति श्रीभागव
ते महापुराणे सप्तमस्कंधे युधिष्ठिरसंवादे नारदसंवादे त्रिपुरविजयो नाम दशमोऽध्यायः
शुक उ॰ श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः युधिष्ठिरो दैत्य
पतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयं
भुवः १
वर्णिताः विशेषेण च वर्णानां मुख्यामुख्या आश्रयाश्रितां तद्देवदशभिर्ज्ञानभक्तियोगावुदीरितौ अथ
भिः पंचभिरध्यायैः कर्मयोगोऽनुवर्ण्यते २ दैत्यपतेः प्रह्लादस्य साधूनां सभासु सभाजितं सत्कृतं ईहितं
चरितं श्रुत्वा पुनर्नारदं पप्रच्छ कथं भूतस्येहितं महत्तमानामग्रण्यः मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स०

पर

श्रवणे च्छायं हेतुः यत्नूयत्तो धर्मात् परज्ञानं भक्तिंच विंदति २ ३ ननु स्मृतिकोर्दि भेत्तक्त एव तत्राह नारायणइ ति अजस्य श्रीनारायणाय त्तस्यैव मुखाद्युक्तं ५ तन्मुखादात्मनः श्रवणं संभावयनु विशिनष्टि यइ ति ६ प्रथ मं तावद्धर्मे प्रमाणमाह धर्मस्य मूलं प्रमाणं स्मृतं च स्मृतिः तद्विदां वेदविदां येन चात्मा मनः प्रसीदति तुष्य

श्लो० ति तथा च याज्ञवल्क्यः श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः सम्यक् संकल्पजः कामो धर्ममूलमिदं

युधिष्ठिर उवाच भगवछ्रोतुमिच्छामि नृणां धर्मं सनातनं वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं १

भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः सुतानां संमतो ब्रह्मंस्तपोयोगसमाधिभिः २ नारायण न २

४२ परा विप्रा धर्मगुह्यं परं विदुः करुणाः साधवः शांतास्त्वद्विधा न तथा परे ४ नारद उवाच नत्वा

भगवते जायलोकानां धर्महेतवे वक्ष्ये सनातनं धर्मं नारायणमुखाच्छ्रुतं ५ योऽवतीर्यात्म

नोंशेन दाक्षायण्यां तु धर्मतः लोकानां स्वस्तये ऽध्यास्ते तपो बदरिकाश्रमे ६ धर्ममूलं हि भ

गवान्सर्ववेदमयो हरिः स्मृतं च तद्विदां राजन्येन चात्मा प्रसीदति ७ सत्यं दया तपः शौचं ति

तिक्षेक्षा शमो दमः अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं ८ संतोषः समदृक्सेवा ग्रा

म्येहोपरमः शनैः नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनं ९ श्रीराम श्रीराम श्रीराम

स्मृतमिति मनुश्च वेदोखिलो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति राम

२ तत्र तावन्नरमात्रसाधारणं धर्ममाह सत्यमिति पंचभिः तपएकादश्युपवासादि ईक्षा युक्तायुक्तविवेकः ४२

शमो मनसः संयमः यमो बाह्येंद्रियाणां त्यागो दानं स्वाध्यायो यथोचितजपः ८ संतोषो यदृच्छालाभेन तुष्टिः

समदृक् शांतमहतां सेवा ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः विपर्ययेहेक्षा निःफलक्रियाणामीक्षणं मौनं तथा

८२

आत्मेति देवतेति च बुद्धिः १० अस्य श्रीकृष्णस्य श्रवणादयो नव भक्तयस्तैर्युक्तं ११ एवं त्रिंशल्लक्षणवान् १२ इदानीं वर्णधर्मान्विवक्षुर्द्विजानां लक्षणमाह संस्कारा मंत्रवंतो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः ननु शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात् नेत्याह अजो ब्रह्मा यमेवंभूतसंस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मंत्रवत्संस्कारयुक्तं जगाद न चोपनयनवंतं अतो नासौ द्विजः तथा च स्मृतिः विवाहमात्रसंस्कारं शूद्रोपि लभतां सदा नकेनचित्समसृजच्छंदसा तं प्रजापतिरिति श्रुतिश्च गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव १०
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं ११
नृणामयं परो धर्मः सर्वेषां समुदाहृतः त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति १२
संस्कारा यत्राविच्छिन्नाः स द्विजोऽजो जगाद यं इज्याध्ययनदानानि विहितानि द्विजन्मनां जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः १३

राजन्यं जगत्या वैश्यं न केनचिच्छंदसा शूद्रमिति अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वात् तु उपनयनस्य तु सर्वथा निषेधान्न तस्य द्विजत्वमित्यर्थः पाठांतरे चेदिकादयः इति गर्भाधानादय इत्यर्थः एवं द्विजानामावश्यकान् धर्मानाह इज्येति जन्मना विशुद्धेन कुलेन कर्मणा वा आचारेण अवदातानां शुद्धानां कुलीनानां दुराचाराणां चैतानि विहितानीत्यर्थः ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य वर्णधर्म एव आश्रमभेदकृत विशेषाभावात् १३ नु२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह विप्रस्येति सार्द्धैः सप्तभिः विप्रस्य षट्कर्माणि विहितानीत्यनुष
ङ्गः तत्र त्वध्यापनं याजनं प्रतिग्रह इति जीविका। यथाह मनुः षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याज
नाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्या
ध्यापनं चापद्यनुजानाति वक्ष्यति चानंतरमेव क्षत्रेण राजन्यमिति श्रूयते अश्वपतिकैकयप्रभृतीनां क्षत्रि
याणामुपदेष्टृत्वादि प्रजापालने धिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह राज्ञ इति आदिशब्देन इतिदंड शुल्का

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः। राज्ञो वृत्तिः प्रजागोप्तुर विप्राद्वा करादिभिः १४
४३ वैश्यस्य वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः। शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भ
वेत् १५ वार्ता विचित्रा शालीनयायावरशिलोंछनं विप्रवृत्तिश्चतुर्द्धेयं श्रेयसी चो
त्तरोत्तरा १६ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः। ऋते राजन्यमापत्सु सर्वेषामपि स
मत्तेनप्र र्वशः १७ ऋतामृताभ्यां जीवेत्तु मृतेन वा सत्यानृताभ्यां जीवेत्तु न श्ववृत्त्या कथंचन। १८ श्री

दि १४ वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य सः। शूद्रस्य द्विजशुश्रूषा विहिता स्वामिनो द्विजस्य तु शुश्रूषा
वृत्तिश्च भवेत् १५ विप्रस्य मुख्यानुकल्पभेदेन वृत्त्यंतराण्याह वार्ता विचित्रा कृष्यादिरूपा। शालीनि धार्ण्ये
विनैव प्राप्तमयाचितं यायावरं प्रत्यहं धान्ययाञ्चा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं
उंछनं आपणादिपतितकणोपादानं शिलोंछनं द्वयमेकीकृत्य चतुर्द्धेत्युक्तं श्रेयसी उत्तमा १६ वृत्ति
ष्वेवव्यवस्थां दर्शयन्नापद्वृत्तीराह जघन्यो नीचः उत्तमां अध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्यापि

प्रता
राम
४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

श्लोकंव्याचष्टे ऋतमिति १९ तयोस्त्वद्वर्जनेहेतुमाह सर्ववेदमयइति २० वर्णानामभिव्यंजकरूपांधर्मान्ना
ह शमइतिचतुर्भिः अच्युतात्मत्वं श्रीविष्णुपरत्वं २१ शौर्यंयुद्धोत्साहः वीर्यंप्रभावः तेजःप्रागल्भ्यं २२ ३
अमंत्रयज्ञः नमस्कारेणैवपंचयज्ञानुष्ठानं तथाचयाज्ञवल्क्यः नमस्कारेणमंत्रेणपंचयज्ञान्नहा

ऋतमुञ्छशिलंप्रोक्तममृतंयदयाचितं मृतंतुनित्ययाञ्चास्यात्प्रमृतंकर्षणंस्मृतं
सत्यानृतंतुवाणिज्यंश्ववृत्तिर्नीचसेवनं १९ वर्जयेत्तांसदाविप्रोराजन्यश्चजुगु
प्सितां सर्ववेदमयोविप्रः सर्वदेवमयोनृपः २० शमोदमःतपःशौचंसंतोषःक्षां
तिरार्जवं ज्ञानंदयाच्युतात्मत्वंसत्यंचब्रह्मलक्षणं २१ शौर्यंवीर्यंधृतिस्तेजःत्या
गश्चात्मजयःक्षमा ब्रह्मण्यताप्रसादश्चरक्षाचक्षत्रलक्षणं २२ देवगुर्वच्युतेभ
क्तिस्त्रिवर्गपरितोषणं आस्तिक्यमुद्यमोनित्यंनैपुण्यंवैश्यलक्षणं २३ शूद्रस्य
सन्नतिःशौचंसेवास्वामिन्यमायया अमंत्रयज्ञोह्यस्तेयंसत्यंगोविप्ररक्षणं २४
स्त्रीणांचपतिदेवानांतच्छुश्रूषानुकूलता तद्बंधुष्वनुवृत्तिश्चनित्यंतद्व्रतधारणं २५
संमार्जनोपलेपाभ्यांगृहमंडलवर्तनैः स्वयंचमंडितानित्यंपरिमृष्टपरिच्छदा
२६ कामैरुच्चावचैःसाध्वीप्रश्रयेणदमेनच वाक्यैःसत्यैःप्रियैःप्रेम्णाकालेका

पयेदिति २४ स्त्रीधर्मानाह स्त्रीणामितिपंचभिः पतिरेवदेवोयासांतस्यपत्युःशुश्रूषाचतदनुकूलता
च तस्ययद्व्रतंनियमस्तस्यधारणं एतच्चतुष्टयंपतिव्रतानांलक्षणंधर्मश्च २५ किंच संमार्जनोपलेपाभ्यां
सिसा[illegible]भजेदित्युत्तरेणान्वयः परिमृष्टानिवर्तनादिनानिर्मलीकृताःपरिच्छदागृहो
पकरणानियया २६ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० किंच संतुष्टा यथालाभेन तावन्मात्रभोगा ऽप्यलोलुपा दक्षा अनलसा प्रियासत्या च वाग्यस्याः स
वैत्रापि अप्रमत्ता अवहिता अपतितं महापातकशून्यं यथाह याज्ञवल्क्यः आशुद्धेः संप्रतीक्ष्यो
हि महापातकदूषितइति २८ तत्परा सती भजेत् श्रीर्हरिमिव हर्यात्मना पत्या सह २९ प्रतिलोम
वृत्तिमाह॥ जानां वृत्तिरिति तत्र तातु कुलकृता कुलपरंपराप्राप्ता परंपराप्राप्तमपि चौर्यहिंसादिकं च प्र
तिषिध्यति अचोराणामपापानां चेति अत्र प्रदर्शनार्थं का अंत्य प्रतिलोमजविशेषानाह अंत्यजे

संतुष्टालोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् अप्रमत्ता शुचिः स्निग्धा पतिं त्वप
तितं भजेत् २८ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा हर्यात्मना हरेर्लोके प
४४ त्या श्रीरिव मोदते २९ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् अचौरा
णामपापानामंत्यजांत्येवसायिनां ३० प्रायः स्वभावविहितो नृणां धर्मो युगे
युगे वेददृग्भिः स्मृतो राजन् प्रेत्य चेह च शर्मकृत् ३१ वृत्त्या स्वभावकृतया
वर्त्तमानः स्वकर्मकृत् हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ३२

ति रजकश्चर्मकारश्च नटो बुरुड एव च कैवर्त्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः अंतेवसा गम
यिनश्चांडालपुल्कसमातंगादयः तेषां परंपराप्राप्तेव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ३० अथ ४४
दपि परधर्मो नीचोऽपि स्वधर्म एव श्रेयानित्याह प्राय इति स्वभावेन सत्वादिना धर्मः शर्मकृत् प्रहस्याविहि ३
सुखहेतुः स्मृतः कैः वेद एव दृक् चक्षुर्येषां तैः भगवता चोक्तं श्रेयान् स्वधर्मो विगुणः परधर्मात्स्व
नुष्ठितादिति ३१ ननु स्वाभाविकस्य कर्मणो बंधहेतुत्वात्कथं सुखहेतुत्वं तत्राह वृत्त्येति ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकाम्यानिकर्माणिकुर्वतस्तत्फलभोगपरस्यकथंनैर्गुण्यंस्यात् तदुक्तंपूर्वोदनेत्रैापस्म्यज्ञंखैव हं
हुमन्यमानःकथंविरज्येत दुरंतमोहइत्यादितत्रसदृष्टांतमाहउप्यमानमितिद्वाभ्यां पुनःसत्यं
सस्यप्रसवाय ३३ कामाभ्यासैरितिवासनानिरूपणायमिमिनुगनु अयंभावःउत्कटवासनाविषयस्यसे ह
सेवकामत्यागसंभवाद्दुर्दान्तेनियमनबहुशःकामान् भुंजानस्यैवनिस्पृहेनिमित्तिकोविरभुद्दुचेतस
स्तद्दोषदर्शनेनययातिसौभरिप्रमुखानामिवशनैःशनैःविरागोभवति यथासवीर्यक्षेत्रंशनैर्निर्वीर्यं

उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात् नकल्पतेपुनःसूत्यैउप्तंबीजं
चनश्यति ३३ एवंकामाशयंचित्तंकामानामतिसेवया विरज्येतयथाराजन्ना
ग्निवत्कामबिंदुभिः यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकं यदन्यत्रापिदृश्येत
तत्तेनैवविनिर्दिशेत् ३५ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेयुधिष्ठिरना
रदसंवादेसदाचारनिर्णयनामएकादशोध्यायः श्रीराम श्रीराम श्रीराम॥

यथासवीर्यंक्षेत्रंशनैर्निर्वीर्यंसवति॥

भवति "यथाचप्रज्वलितोग्निर्नघृतबिंदुभिःशाम्यति महताघृतपूरेणशाम्यत्येवतद्वत् प्रकृतं
क्षेतस्कोकामारएवनिवृत्युपदेशामंदवासनानामधिकारेण तदुक्तंतत्रैव बालानद्दूषितधियाद
हुरामरितिहितोरिति अतःसर्वमनवद्यं ३४ शमादिभिरेवब्राह्मणादिव्यवहारोमुख्यःनजातिमात्रा
दित्याहयस्येति यद्यदिअन्यत्रवर्णान्तरेपिदृश्येततद्वर्णान्तरंतेनैवलक्षणनिमित्तेनैववर्णेनविनि
र्दिशेन्नतुजातिनिमित्तेनेत्यर्थः ३५ इतिसप्तमएकादशः श्रीराम श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स० द्वादशेवर्णिते धर्मो ब्रह्मचारिवनस्थयोः चतुर्णामाश्रमाणांचसाधारण्येनकथन वर्णादीनां धर्मोऽनुक्तः इ
दानीमाश्रमधर्मोऽभिधीयंते तत्रास्मिन् द्वादशे ब्रह्मचारिवनस्थयोरसाधारणाश्चतुर्णां साधारणाश्चोच्यंते
त्रयोदशे यतिनांधर्माः चतुर्दशे गृहस्थस्य पंचदशे सर्वधर्मसारसंग्रहः ब्रह्मचारी गुरुकुले वसन् गुर्वा
दीनुपासीत तत्त्वतस्तेनान्वयः १ ब्रह्मगायत्रीजपनं संध्यात्रयमप्युपासीत उभे संध्ये तु यतवाक् भवेत् सा

नारद उवाच ब्रह्मचारी गुरुकुले वसन् दांतो गुरोर्हितं आचरन् दासवन्नीचो गुरौ सुदृढसौ
हृदः १ सायंप्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् संध्ये उभे च यतवाग्जपन् ब्रह्म समाहितः
२ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः उपक्रमेऽवसाने च चरणौ शिरसा नमेत् ३ मे
४५ खलाजिनवासांसि जटादंडकमंडलून् बिभृयादुपवीतं च दर्भपाणिर्यथोदितं। ४ साय
प्रातश्चरेद्भैक्षं गुरवे तन्निवेदयेत् भुंजीत यद्यनुज्ञातो नोचेदुपवसेत्क्वचित् ५ सुशीलो मितभु
ग्दक्षः श्रद्दधानो जितेंद्रियः यावदर्थं व्यवहरेत् स्त्रीषु स्त्रीनिर्जितेषु च ६ वर्जयेत्प्रमदागाथा
मगृहस्थो बृहद्व्रतः इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजना
दिकं गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ८ नन्वग्निः प्रमदा नाम घृतकुंभसमः पुमान् सु
तामपि रहो जह्यादन्यदा यावदर्थकृत् ९

यंशतः संध्याकालनिमित्तं मौनं कुर्यादित्यर्थः २ गुरोश्चरणेनानमेत् ३ यथोदितं पलाशादंडो ब्राह्मणस्येत्यादि नियममन राम
तिक्रम्य जटाधारणं तु केशप्रसाधनाभावमात्रं ५ यावदर्थं यथोपयोगमेव ६ बृहद्व्रतः ब्रह्मचर्यवान् गृहस्था ४५
व्यतिरिक्तः सर्वापि गाथामपि तत्र हेतुः इंद्रियाणि बलवंति संयतस्यापि मनो हरंतीति ७ ८ न कारयेदित्य
त्र हेतुः नत्विति रहः एकांते अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकांतावसरे वा यावदर्थं तदुक्तं कु
वर्जयेत् २ र्यात् ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुमिथ्यावादतिकृत्स्नमलत्वात्स्वयंत्यक्तप्रायंस्यादिजत्वादिनिकायमतिनिर्बंधस्तत्राह कल्पयित्वेति आत्मनास्वरूप
साक्षात्कारेणइदंदेहद्वयादिआभासमात्रंकल्पयित्वानिश्चित्ययावदसौजीवईश्वरः स्वतंत्रोनभवतुतावद्द्वैतं
अहंपुमान्नियत्स्त्रीत्यादिभेदाननविरमेत् ततः किमतआह ततोहिद्वैतानुविपर्ययः गुणाध्यासेनभोग्यताबुद्धिः। अ
तोऽजेत्याद्येवेत्यर्थः। एतत्सर्वंसुशीलत्वादिकं गृहस्थस्यविशेषमाह गुरुवृत्तिरिति ११ अंजनादीनामामिषांता
नांद्वंद्वं अंजनंशरीरस्य अभ्यंजनंशिरसः स्त्रियश्च अवलेखांचित्रकर्मस्त्रीणांकुचादौलेखनं वातनि

कल्पयित्वात्मनायावदाभासमिदमीश्वरः। द्वैतंतावन्नविरमेत्ततोह्यस्यविपर्ययः १० यदेतत्सर्वंगृहस्थ
स्थसमाम्नातंयतेरपि गुरुवृत्तिर्विकल्पेनगृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवले
२१ खामिषंमधु स्रग्गंधलेपालंकारांस्त्यजेयुर्येधृतव्रताः १२ उषित्वैवंगुरुकुलेद्विजोधीत्यावबुध्य
च त्रयींसांगोपनिषदंयावदर्थंयथाबलं १३ दत्वावरमनुज्ञातोगुरोः कामंयदीश्वरः। गृहंवनं
वाप्रविशेत्प्रव्रजेत्तत्रवावसेत् १४ अग्नौगुरावात्मनिचसर्वभूतेष्वधोक्षजं भूतैः स्वधामभिः
पश्येदप्रविष्टंप्रविष्टवत् १५ एवंविधोब्रह्मचारीवानप्रस्थोयतिर्गृही चरन्विदितविज्ञानः परंब्रह्मा
धिगच्छति १६ वानप्रस्थस्यवक्ष्यामिनियमान्मुनिसंमतान् यानातिष्ठन्मुनिर्गच्छेदृषिलोकमि
हांजसा १७

रीक्षणंवा अत्राभ्यंगादिस्वरूपेणनिषिध्यते क्वचित्तुकथंचिदापदिप्राप्तमपिस्त्रीकर्दकेनिषिद्धमितिभेदः १२ अंगैः शि
क्षादिभिरुपनिषद्भिश्चसहितांत्रयीमधीत्य अवबुध्यच तदर्थंचविचार्य यावदर्थंस्वाधिकारानुसारेण १३
यदीश्वरः शक्तः तर्हिगुरोः काममपेक्षितंवरंदत्वायथाधिकारंगृहस्थाद्याश्रमंस्वीकुर्यात् तत्रैववावसेत् नैष्ठिकः
स्यादित्यर्थः १४ स्वधामभिः स्वाश्रयैः भूतैर्जीवैः सहतन्नियंतृतया १५ चरन्नेवंसमाचरन् विदितविज्ञानंविज्ञेयं
नसः १६ ऋषिलोकेमहर्लोके १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स० अकृष्टे अकृष्टसस्यं अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः। अर्कपक्वं फलादि आहरेत् अश्नीयात् १८ वन्यै
र्नीवारादिभिः कालचोदितान् नित्यान् पुराणं पूर्वसंचितं १९ हिमादीन् सहत इति तथा २० केशादीन् मलवद्भिः
प्रक्षालनेन धारयन् कमण्डल्वादीन् आदधत् २१ कृच्छ्रतः तपःक्लेशाद्यथा बुद्धिर्न नश्येत्तथा चरेत् २२ द्वादशा
ब्दानन्तरमपि यदि धर्मानुष्ठाने शक्तस्तर्हि वनएव वसेत् यदि तु ज्ञानाभ्यासयोग्यस्तर्हि संन्यसेदित्युत्तरा

नकृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः। अग्निपक्वमथामं वा अर्कपक्वमुताहरेत् १८ वन्यैश्च
रुपुरोडाशान्निर्वपेत्कालचोदितान्। लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् १९ अग्न्यर्थमेव
शरणमुटजं वाद्रिकन्दरं। श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयं २० केशरोमनखश्मश्रुम
४६ लानि जटिलो दधत्। कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् २१ चरेद्वने द्वादशाब्दानष्टौ
वा चतुरो मुनिः। द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः। २२ यदाऽकल्पः स्वक्रियायां व्याधि
भिर्जरयाथवा। आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकं २३ आत्मन्यग्नीन्समारोप्य सं
न्यस्याहंममात्मतां। कारणेषु न्यसेत्सम्यक्संघातं तु यथार्हतः। २४ खे खानि वायौ निश्वा
सांस्तेजस्यूष्माणमात्मवान्। अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवं २५

ध्यायं वक्ष्यति तदुभयरहितस्य तु यत्कर्तव्यं तदाह यदा अकल्पः असमर्थः आन्वीक्षिक्यां ज्ञानाभ्यासे २३ अनश राम
नादि करिष्यतः पूर्वकृत्यमाह आत्मनीत्यादि यावत्समाप्ति यथार्हतः यथायोग्यं स्वस्वकारणेष्वाकाशादिषु सं ४६
घातं देहं न्यसेत् प्रविलापयेत् २४ तदेव विभज्य दर्शयति खे आकाशे खानि देहगतच्छिद्राणि आत्मवा
न् धीमान् शेषं अस्थिमांसादि कठिनांशं २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०सं०

एवंस्थूलशरीरस्यलयमुक्त्वा लिंगशरीररूपस्याध्यात्मादित्रयस्यलयमाह वाचमित्यादिनातत्रयद्यपियथोक्त्वेंलयेस्पयुक्तत्वादध्यात्मादीनांस्वस्वकारणेषुराजसाहंकारादिषुलयोवाच्यः तथापिहंतेषांलयं भावेनयमहितीयात्मप्रतिपत्तिपरतियथाकथंचित्त्रियभावेदेवतानांप्रवर्त्तकत्वेनप्राधान्यादिंद्रियतद्विषययोर्देवतासुलयः कथ्यतेतवक्तव्यसहितांवाचमग्नौन्यसेत् एवंसर्वत्रपदानिपादौवयसोविहंमो २६ सनादनशब्देन

वाचमग्नौसवक्तव्यामिंद्रेशिल्पकरावपि पदानिगत्यावयसिरत्यापस्थंप्रजापतौ २६ मृत्यौपायुंविसर्गंचयथास्थानंविनिर्दिशेत् दिक्षुश्रोत्रंसनादंनस्पर्शमध्यात्मनित्वचं २७ रूपाणिचक्षुषाराजन्ज्योतिष्यभिनिवेशयेत् अप्सुप्रचेतसाजिह्वांघ्रेयैर्घ्राणंक्षितौन्यसेत् २८ मनोमनोरथैश्चंद्रेबुद्धिंबोध्यकवैःपरे कर्माण्यध्यात्मनारुद्रेयदहंममताक्रिया सत्वेनचित्तंक्षेत्रज्ञेगुणैर्वैकारिकंपरे २९ अप्सुक्षितिमपोज्योतिष्यदोवायौनभस्यमुं कूटस्थेतच्चमहतितदव्यक्तेक्षरेचतत्

३०

प्रतारणार्थमेवोपवेशयामास २० उपसंचरैः बहुमान प्रियवाक्यादिना तान् अतिक्रम्यातिक्रम्य गमनेन

सा त्वसुराणां सुधादानं सर्पाणामिव दुर्नयं मत्वा जातिनृशंसानां न तां व्यभजदच्युतः १९ कल्प
यित्वा पृथक् पंक्तीरुभयेषां जगत्पतिः तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु २० दैत्यान्
गृहीतकलशो वंचयन्नुपसंचरैः दूरस्थान् पाययामास जरामृत्युहरां सुधाम् २१ ते पाल
यंतः समयमसुराः स्वकृतं नृप तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया २२ तस्यां
कृतातिप्रणयाः प्रणयापायकातराः बहुमानेन चाबद्धा नोचुः किंचन विप्रियं २३ देवलिं
गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च सूचितः २४ चक्रेण क्षु
रधारेण जहार पिबतः शिरः हरिस्तस्य कबंधस्तु सुधयाप्लावितोऽपतत् २५ शिरस्त्वमर
तां नीतमजो ग्रहमचीक्लृपत् यस्तु पर्वणि चंद्रार्कावभिधावति वैरधीः २६ पीतप्रायेऽमृ
ते देवैर्भगवान् लोकभावनः पश्यतामसुरेंद्राणां स्वरूपं जगृहे हरिः २७

दूरस्थानपि देवान् २१ तस्यां कृतः स्नेहो यैः स्त्रिया सह विवादस्य जुगुप्सया २२ कृतः अतिप्रणयः स्नेहो यैः प्र
णयापायेन कातराः भीताः एतेन ताव[illegible]पणाः पूर्वं किंचित्स्थितवंतु यूयं तु धीराः क्षणं प्रतीक्षध्वमित्यादि बहुमा
नेन च आबद्धाः नियंत्रिताः समयपालनादिभिः षड्भिरेतैः कारणैः अप्रियं किंचिदपि नोचुः किंतु तूष्णीमासन्
सन् २३ देवपंक्तौ चंद्रार्कयोर्मध्ये प्रविष्टः सोमममृतममपिबत् २४ हरिस्तस्य शिरो जहार अप्लावितः असं

[illegible]

२३

हरिभक्तानामेवामृतं फलं नान्येषामित्येवमाख्यानतात्पर्यमाह एवमिति समा देशादयो येषां हेतुर्मंदराद्रिः अ
र्थः समुद्रे स्थितं वस्त्वधात्वादि विविधः कल्पः फलं केषांचिज्जातं केषांचिन्नेति वैचित्र्यं येषां ते फलवैषम्यं वा नावृभि
वृत्तिरित्यर्थः तदेवाह तत्रेतेषु यस्य पादपंकजरजःश्रयणाद्देवा अमृतं फलमापुः स एव सेव्य इत्यर्थः यत्तदा
नित्यसंबंधात् २७ एतदेवोपपादयति यदिति असुः प्राणः वसु धनं प्राणादिभिर्देहात्मजादिषु नृभिर्य
द्युज्यते प्रयुज्यते देहाद्यर्थं यत्क्रियत इत्यर्थः तदसत्तद्व्यर्थं भवति कुतः पृथक्त्वात् भेदाश्रयत्वात् शाखावानि
षेचनवत् तैरेव प्राणादिभिरीश्वरोद्देशेन यत्क्रियते तत्तु सन्महाफलं भवति कुतः अपृथक्त्वात् ईश्वरस

एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः तत्रामृतं सुरगणाः फलमंज
सापुर्यत्पादपंकजरजःश्रयणान्न दैत्याः २८ यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु
नृभिस्तदसत्पृथक्त्वात् तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् २९
इति श्रीभागवते महापुराणेऽष्टमस्कंधेऽमृतमथने नवमोध्यायः शुकउवाच इति दानवदैतेया
नाविंदन्नमृतं नृप युक्ताः कर्माणि यत्ताश्च वासुदेवपराङ्मुखाः १ साधयित्वामृतं राजन्पायपि
त्वा स्वकान्सुरान् पश्यतां सर्वभूतानां ययौ गरुडवाहनः २

सर्वत्रानुगतत्वात् तत्र दृष्टांतः यत्तरोर्मूलनिषेचनं तत् यथा सर्वस्य स्कंधशाखादेरपि भवति यद्वा त्वं[illegible] २९
प्रपंचस्य पृथक्त्वं पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत्क्रियते तदसत् अपृथक्त्वं पर्यालोच्य [illegible] ईश्वरदृष्ट्या
तैरेव तदेव वा यत्क्रियते तत्सद्भवति निःशेषं समानं २९ अष्टमे नवमे देशाद्यमत्सरादैत्यैरारब्धे नामृधे
सुरैः दैत्यमायाविषण्णेषु देवेष्वाविर्बभौ हरिः १ तदेव सममृतावाप्तिर्नाभक्तानामिति तारितम् भक्तिमत्त्व
रतः प्राणाहानिः पुनरुदीर्यते २

५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० आ० ४ रणः संग्रामः उदन्वतः समुद्रस्येव घोषसितैरिव बभूव ५ अन्योन्यं समासाद्य निजघ्नुः ६ १२ चित्र ध्वजपटादिभिश्च वीरा

णां मालाभिश्च राजभिर्देवदानववीराणां ध्वजिन्यो यादसां मालाभिः सागरा विवेरजतुरिति त्रयाणामन्वयः पादे

सपत्नानां पराभवं द्विट्‌ध्वांते दितिनंदनाः अमृष्यमाणा जेतुं देवान्प्रत्युद्यतायुधाः ३ ततः सुरगणाः सर्वे

सुधया पीत्तये धिताः प्रतिसंयुयुधुः शक्रैर्नारायणपदाश्रयाः ४ तत्र देवासुरा नाम रणः परमदा

रुणः रोधस्युदन्वता राजंस्तुमुलो रोमहर्षणः ५ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे समासा

द्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानां भेरीडमरिणां महान् हस्त्यश्वरथप

त्तीनां नदतां निस्वनोऽभवत् ७ २ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः हया हयैरिभाश्चेभैः स

२४ मसज्जन्त संयुगे ८ उष्ट्रैः केचिदिभैः केचिदपरे भिययुः खरैः केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरि

वै० ५ भिर्भटाः ९ गृध्रैः कंकैर्बकैरन्ये श्येनभासैस्तिमिंगिलैः शरभैर्महिषैः खड्गैर्गोवृषगवयारुणैः १० शि

वाभिराखुभिः केचित्कृकलासैः शशैर्नरैः बस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ११ २ चित्रध्व

जपटै राजन्नातपत्रैः सितामलैः महाधनैर्वज्रदंडैर्व्यजनैर्बार्हचामरैः १२ वातोद्धूतोत्तरोष्णी

षैरर्चिभिर्वर्मभूषणैः स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः १४ देवदानववीराणां ध्व

जिन्यो पांडुनंदन रेजतुर्वीरमालाभिर्यादसामिव सागरौ १५ श्रीराम श्रीराम श्रीरा राम २४

भिरिति वासितैरमलैरातपत्रैश्च बार्हैश्च चामरैश्च व्यजनैः १३ वातेनोद्धूतेरुत्तरीयैः उष्णीषैश्च सूर्य

रश्मिभिः सुतरां स्फुरद्भिः १४ ५

अन्ये जलस्थलखगैः सत्वैर्वि[illegible]क्षत

विग्रहेः॥ सेनयोरुभयोराजन्विविशुस्तेऽग्रतोऽग्रतः ४

असुराणांयाचमूः तस्याः पतिः सबलिर्यानमास्थितः १६ १७ उदयेउदयगिरिशिखरेस्थितः चंद्रइवविरेजे
इतित्रयाणामन्वयः १८ २० २४ स्रवंतिप्रस्रवणानियस्मिन्निति मदधारासाहस्रं २५ नानावाहादि

वैरोचनोबलिः संख्येसोसुराणांचमूपतिः यानंवैहायसंनामकामगंमयनिर्मितं १६ सर्वसां
ग्रामिकोपेतंसर्वाश्चर्यमयंप्रभो अप्रतर्क्यमनिर्देश्यंदृश्यमानमदर्शनं १७ आस्थितस्तद्विमा
नाग्र्यंसर्वानीकाधिपैर्वृतः बालव्यजनछत्राग्र्यैरेजेचंद्रइवोदये १८ तस्यासन्सर्वतोयानैर्यू
थानांपतयोसुराः नमुचिः शंबरोबाणोविप्रचित्तिरयोमुखः १९ द्विमूर्द्धाकालनाभोथप्र
हेतिर्हेतिरिल्वलः शकुनिर्भूतसंतापोवज्रदंष्ट्रोविरोचनः २० हयग्रीवः शंकुशिराः कपि
निसुंभो ६ लोमेघदुंदुभिः तारकश्चक्रदृक्शुंभोजंभउत्कलः २१ अरिष्टोरिष्टनेमिश्चमयश्चत्रि
पुराधिपः अन्येपौलोमकालेयानिवातकवचादयः २२ अलब्धभागाः सोमस्यकेवलं
क्लेशभागिनः सर्वएतेरणमुखेबहुशोनिर्जितामराः २३ सिंहनादविमुंचंतः शंखान्द
ध्मुर्महारवान् दृष्ट्वासपत्नानुत्सिक्तान्बलभित्कुपितोभृशं २४ ऐरावतंदिक्करिणमारूढःशु
शुभेस्वराट् यथास्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५ तस्यासन्सर्वतोदेवानानावाहध्व
प्प२ जायुधाः लोकपालाःसहगणैर्वाय्वग्निवरुणादयः २६ तेन्योन्यमभिसंसृत्यक्षिपंतोमर्मभि
र्मिथः आह्वयंतोविशंतोग्रेयुयुधुर्द्वंद्वयोधिनः २७ युयोधबलिरिंद्रेणतारकेणगुहोस्यत
वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेतिना २८ यमस्तुकालनाभेनविश्वकर्मामयेनवै शंबरो
युयुधेत्वष्ट्रासवित्रातुविरोचनः २९

नियंषांतेदेवाअसुराश्च २६ मिथोयुयुधुः २७ द्वंद्वान्येवाहयुयुधेतिसप्तभिः अस्यतेआस्यत् अयुध्यतेत्यर्थः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनादीनि २

भा०टी०
सर्याद्देवृएकएवशतेनबलिसुतेः बाणोऽप्यष्टायिषातेः ३० निशुंभशुंभाभ्यांदेवी ३१ ६ आरोहंतीत्यारोहा
वाह्याः तेः सहिताअन्यच्चवाहाः सर्वतुंकवल्लगजादयउक्ताः कथंभूतानि छिन्नाबाह्वादयोयेषां छिन्नानि गी

अपराजितेननमुचिरश्विनोवृषपर्वणा सूर्योबलिसुतैर्देवोबाणोऽप्यष्टःशतेनच ३० राहुणाच
तथासोमोपुलोम्नायुयुधेऽनिलः निशुंभशुंभयोर्देवीभद्रकालीतरस्विनी ३१ वृषाकपिस्तुजं
भेनमहिषेणविभावसुः इल्वलःसहतावापिर्ब्रह्मपुत्रैररिंदम ३२ कामदेवेनदुर्मर्षेणकाल
मालिभिःसह बृहस्पतिश्चोशनसानरकेणशनैश्चरः ३३ मरुतोनिवातकवचैःकालेयैर्वस
वोमराः विश्वेदेवास्तुपौलोमैरुद्राःक्रोधवशैःसह ३४ तएवमाजावसुराःसुरेंद्राद्वंद्वेनस
हत्यचयुध्यमानाः अन्योन्यमासाद्यनिजघ्नुरोजसाजिगीषवस्तीक्ष्णशरासितोमरैः ३५
२५ छि० ४ भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैःशक्त्युल्मुकैःप्रासपरश्वधैरपि निस्त्रिंशभल्लैःपरिघैःसमुद्ग प० ४
रैः सभिंदिपालैश्चशिरांसिचिच्छिदुः ३६ गजाःसरंगाःसरथाःपदातयःसारोहवाहा
हाविविधाविखंडिताः निकृत्तबाहूरुशिरोधरां घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः
३७ तेषांपदाघाततथांगचूर्णितादायोधनादुल्वणउत्थितस्तदा रेणुर्दिशःखंचद्युमणिं
चछादयन्न्यवर्तततत्सृक्स्रुतिभिःपरिप्लुतात् ३८

राम २५
येषां ३७ तेषांदेवादीनांपदाघातेःरथांगेश्चचूर्णितादायोधनाद्रणभूमेरुत्थितोरेणुर्दिशःखंद्युम
णिंचसूर्यंछादयंस्तदेवरवादेन्यवर्त्ततकथंभूतात् असृक्स्रुतिभिः रक्तक्षरणैःपरिप्लुतात् सिक्ता
त्यद्वा परिप्लवनादुत्तोन्यवर्तताभावक्तःरक्तधाराणांतत्पर्यंतमुच्छलनादित्यर्थः प्रथमांतपाठेरेणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिरोभिर्महाभुजैश्च करभसदृशैः कैश्चित्प्रसारणः। अकर्षणात्स्तनासनीवभौ कथंभूतैः। शिरोभिः उद्धृतानि तुल्य
तिनानि किरीटानि कुंडलानि च येषां तैः संरंभयुक्ताः दृष्टा येषु तैः। परिदष्टा दच्छदाः नुष्टा येषु तैः ३९ पतितानि
यानि स्वशिरांसि तत्रत्यै रक्षिभिः तैः पश्यन्त इत्यर्थः। उद्यतान्यायुधानि यैः ते दोर्दंडैर्युक्ताः ४० वाहान् ऐरावतपाद

शिरोभिरुद्धृतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः। महाभुजैः साभरणैः सहायुधैः सप्रास्तृतो
भूः करभोरुभिर्विभो ३९ कबंधास्तत्र चोत्पेतुः पश्यतः स्वशिरोक्षिभिः। उद्यतायुधदोर्दंडैराधाव
तो भटान्मृधे ४० बलिर्महेंद्रं दशभिस्त्रिभिरैरावतं शरैः। चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत्
४१ स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः। चिच्छेद निशितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ त
स्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे। तां ज्वलंतीं महोल्काभां हस्तस्थामच्छिनद्धरिः ४३ ततः
शूलं ततः प्रासं ततस्तोमरमृष्टयः। यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ४४ ससर्जाथासुरीं मा
यामंतर्धानगतोऽसुरः। ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ४५ ततो निपेतुस्तरवो दह्यमाना
के ४ दवाग्निना। शिलाः सटंकशिखराश्चूर्णयंत्यो द्विषद्बलं ४६ महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चि
काः। सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ४७ यातुधान्यश्च शतशः शूलहस्ता विवाससः। छि
लि २ धि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो ४८ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः। अंगारा
न्मुमुचुर्वातैराहतास्तनयित्नवः ४९ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः। सांवर्तक इवा
ध १ त्युग्रो विबुधध्वजिनीमधाक् ५०

रक्षकान् आरोहं गजयंतारं आर्च्छयत् अविध्यत् ४१ ४२ दुर्मर्षः असहनो बलिः ४३ ५ टंकवत्तीक्ष्णाग्रैः शिखरैः
सहिताः ४६ ४८ स्तनयित्नवः अंगारान्मुमुचुरित्यनुषंगः ४९ अधाक् आपे आधाक्षीदित्यर्थः ५० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ०१० उद्धूतोत्तुंगतरंगैरावर्तैश्च भीषणाः ५१ एवमेवं दैत्यैः सृज्यमानासु ५२ यत्र यदा तत्र तदा नष्टासु भवतीति शेषः ५३ अष्टौ आयुधयुक्ताः बाहवो यस्य श्रीवत्सकौस्तुभयुक्ताः अनर्घ्यकिरीटं च कुंडले च उल्लसंति श्रीवत्सकौस्तुभादीनि यस्मिन् ५४ असुराणां कूटकर्ममंत्रादिप्रयोगाः तज्जन्मा मायाः महिम्नाः महिम्ना हरेः स्मृतिरेव सर्वासामापदां विमोक्षणरूपा किमुत ह

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत प्रचंडवातैरुद्धूततरंगावर्त्तभीषणः ५१ एवं दैत्यैर्महामायैरलक्षितगतिभिर्भीषणैः सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ५२ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ५३ ततः सुपर्णांससन्न्यस्तांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ५४ तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणं ५५ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः तल्लीलया गरुडमूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ५६ माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तं आहत्य तिग्मगदयाहनदंडजेंद्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाद्यः ५७ इति श्रीभागवते महापुराणे अष्टमस्कंधे दशमोऽध्यायः १० श्रीराम जयराम श्रीराम श्रीराम श्रीराम

२६ रेः प्रवेश इत्यर्थः ५५ इभारिवाहः सिंहवाहः अहिनोत् विक्षिप्तं लीलयैव तद्गृहीत्वा अहनत् अहन् हे नृप ५६ यस्य चक्रेण कृत्तशिरसौ पेततुः तं तथाभूतमपि आहत्य संहृष्टात्मा अंडजेंद्रं गरुडं महांतं तं हे हं तु गदामुनि न.य.२ राम २६
न्यइत्यर्थः आद्यो हरिः ५७ इति श्रीभागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां अष्टमे दशमः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ१ ॰ एकादशे तु देवेषु दैत्यघातिषु नारदः देवान्वारयच्छुक्रो मृतान् दैत्यानजीवयत् १ उदयच्छत् उदन्निन्ये २ ३ नि
बद्धानि अक्षीणि येषां तान् बालान् जित्वा नटः कपटं हे तिर्यथा तेषां धनं हरति तथा हे मूढ मायेशान् अस्मान् जे
तुमिच्छसि ४ मन्त्रभावं तु श्रुणु इत्याह आरुरुक्षति आरोढुमिच्छति ये च उत्सिसृक्षन्ति उत्स्रष्टुमिच्छति त्याजयितुमिच्छन्ति

शुक उवाच अथासुराः प्रत्युपलब्धचेतसः परस्य पुंसः परयानुकंपया जघ्नुर्भृशं शक्रसमीरणा
दयस्तांस्तान् रणे यैरभिसंहताः पुरा १ वैरोचनाय संरब्धो भगवान्पाकशासनः उदयच्छद्यदा व
ज्रं प्रजा हाहेति चुक्रुशुः २ वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितं मनस्विनं सुसंपन्नं विचरंतं
महामृधे ३ नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसि जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनं
४ आरुरुक्षंति मायाभिरुत्सिसृक्षंति ये दिवं तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च पदादधः ५ सोहं
दुर्मायिनस्तेद्य वज्रेण शतपर्वणा शिरो हरिष्ये मंदात्मन् घटस्व ज्ञातिभिः सह ६ बलिरुवाच
संग्रामे वर्तमानानां कालचोदितकर्मणां कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ७
तदिदं कालरशनं जगत्पश्यंति सूरयः न हृष्यंति न शोचंति तत्र यूयमपंडिताः ८ न वयं म
न्यमानानामात्मानं तत्र साधनम् गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ९ शुक
इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्द्दनः आकर्णपूर्णैरहनदाक्षेपैराह तं पुनः १० श्रीरामश्री

त्यर्थः अधो विधुनोमि पातयामि ५ ७ कालरशनं कालयंत्रितं अतो न हृष्यंति तत्र एवं विवेके यूयमपंडिताः
अनिपुणाः ८ तत्र कीर्तिजयादौ आत्मानं साधनं मन्यमानानां वो गिरो न गृह्णीमः मर्मसु ताडनं याभिस्ताः
९ विभुमिन्द्रं १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ग्र० तोत्रमंकुशः तेनाहतइव ११ सयानः विमानसहितः १२ १४ १६ १८ नमुचिर्बलः पाकश्चेतित्रयश्चाजग्मुः १९

एवं निराकृतो देवो वैरिणा तथ्यवादिना । नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ११ प्राहरत्कुलिशं तस्मा
अमोघं परमर्द्दनः । सयानोन्यपतद्भूमौ छिन्नपक्ष इवाचलः १२ स रवायं पतितं दृष्ट्वा जंभो बलिसखः सु
हृत् । अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् १३ स सिंहवाहमासाद्य गदामुद्यम्य रंहसा । जं
त्रावताडयच्छक्रं गजं चरमुमहाबलः १४ गदाप्रहारव्यथितो भृशं विह्वलितो गजः । जानुभ्यां धरणी
२७ स्पृष्ट्वा कश्मलं परमं ययौ १५ ततो रथो मातलिना हरिभिर्दशशतैर्वृतः । आनीतो द्विपमुत्सृज्य रथ
मारुरुहे विभुः १६ तस्य तत्पूजयन्कर्म यंतुर्दानवसत्तमः । शूलेन ज्वलता तं तु स्मयमानो हनन्मृधे
१७ सेहे रुजं सुदुर्मर्षां सत्वमालंब्य मातलिः । इंद्रो जंभस्य संक्रुद्धो वज्रेणापाहरच्छिरः १८ जं
भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः । नमुचिश्च बलः पाकस्तत्रापेतुस्त्वरान्विताः १९ वचोभिः
परुषैरिंद्रमर्दयंतोस्य मर्मसु । शरैरवाकिरन्मेघा धाराभिरिव पर्वतं २० हरीन्दशशतान्या
जौ हर्यश्वस्य बलः शरैः । तावद्भिरर्दयामास युगपल्लघुहस्तवान् २१ शताभ्यां मातलिं पाको रथं सा
वयवं पृथक् । सकृत्संधानमोक्षेण तदद्भुतमभूद्रणे २२ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः
आहत्य व्यनदत्संख्ये सतोय इव तोयदः २३ सर्वतः शरकूटेन शक्रं सरथसारथिं छादयामासुरसुराः राम
प्रावृट्सूर्यमिवांबुदाः २४ २७

२० त्रयाणां पृथग्विक्रममाह हरीनिति त्रिभिः हर्यश्वस्य इंद्रस्य तावद्भिः दशभिः शतैः २१ २२ आहत्य इंद्रं
विध्वा २३ प्रावृट्कालीनसूर्यं २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वणिकथा १ वणिजः भिन्नो नौर्येषां ते भिन्ननावइत्यर्थः २४ तुराषाडिंद्रः १ अश्वादिसहितो विनिर्गतः अग्रणीः सार
थिः २६ २८ शोकामर्षाभ्यां युक्तयानुषाक्तो धनान्वितः २९ घंटावनू घंटाभियुक्तः ३०१ अतिवीर्यं स्त्र म भिन

अलक्ष्यं तस्य मतीव विक्रम्य विचुक्षुभुर्देवगणाः सहानुगाः १ अनायकाः शत्रुबलेन निर्जिता वणि
कथा भिन्ननावः यथार्णवे २५ ततस्तोराषाडिषु बहुपंजराद्धि निर्गतः साश्वरथः ध्वजाग्रणीः बभौ दि
शः खं पृथिवीं विराजयन् स्वतेजसा सूर्य इव क्षपात्यये २६ निरीक्ष्य पुत्रनंदिवः परेऽभ्यपहितारणो वृ
वज्र४ त्रयच्छेद्रिपुं हंतु वज्रं धराकोषा २७ सते नैवाद्भधारा शिरसा बलपाकयोः ज्ञातीनां पश्यतां राजन्
जहार जनयन् भयं २८ नमुचिस्ताहि घंटध्वाशोकामर्षरुषान्वितः जिघांसुरिंद्रं नृपते चकार
परमोद्यमं २९ अश्मसारमयं शूलं घंटावद्धेमभूषणं प्रगृह्याभ्यद्रवत्क्रुद्धो हतोसीति वितर्ज
यन् प्राहिणोद्देवराजाय निनदन्मृगराडिव ३० तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषु
भिः सहस्रधा तमाहनन्नृपकुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ३१ न तस्य
जो३५ हि त्वचमपि वज्र ऊर्जितो विभेद यः सुरपतिनौजसेरितः तदद्भुतं परमतिवीर्यवृत्रभिन्निरस्त
तो नमुचिशिरोधरत्वचा ३२ तस्मादिंद्रो बिभेच्छत्रोर्वज्रः प्रतिहतो यतः किमिदं दैवयोगेन भू
तं लोकविमोहनं ३३ येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये कृतो निविशतां भारैः पतत्रैः प
तता भुवि ३४ तपः सारमयं त्वाष्ट्रं वृत्रो येन विपाटितः अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्व स२
चः ३५ सोयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके नाहं तदाददे दंडं ब्रह्मतेजोप्यकारणं ३६

दिति ३२ ३३ तथा पतत्रैः पक्षैः ३४ सारमयं वीर्योत्पिकं त्वाष्ट्रं तपएव वृत्रः सयेन वज्रेण मया विपाटितः ३५ हं इंल
कुदंगुल्मब्रह्मतेजः दधीचेः सामर्थ्यं ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० आर्द्रशुष्काभ्यांमत्स्युर्नवेति ३७ ३९ तुभयात्मकत्वमेवाह नशुष्केणानचार्द्रेणफेनेन तथाचश्रुतिः अपांफेनेननमुचेः
शिरइंद्रोदवर्त्तयदिति ४० ४ अनुचरैरुपगीयमानइत्यर्थः उपगीयमानैरनुचरैः सहेतिवा ४५ ४६ अविन

इतिशक्रेविषीदतिमाहवागशरीरिणी नायंशुष्कैरथोनार्द्रैर्वधमर्हतिदानवः ४७ मयास्मैयद्वरोदत्तोमा
स्त्वुर्नवार्द्रशुष्कयोः अतोन्यश्चिंतनीयस्तउपायोमघवन्रिपोः ३८ तांदैवीगिरमाकर्ण्यमघवान्सुसमा
हितः ध्यायन्फेनमथापश्यदुपायमुभयात्मकं ३९ नशुष्केणनचार्द्रेणजहारनमुचेःशिरः तंतुष्टु न२
वुर्मुनिगणामाल्यैश्चावाकिरन्विभुं ४० गंधर्वमुख्यौजगतुर्विश्वावसुपरावसू देवदुंदुभयोनेदुर्नर्त्त
क्योननृतुर्मुदा ४१ अन्येप्येवंप्रतिद्वंद्वान्वाय्वग्निवरुणादयः सूदयामासुरस्त्रौघैर्मृगान्केसरिणो
यथा ४२ ब्रह्मणाप्रेषितोदेवान्देवर्षिर्नारदोन्टप वारयामासविबुधान्दृष्ट्वादानवसंक्षयं ४३
नारदउवाच भवद्भिरमृतंप्राप्तंनारायणभुजाश्रयैः श्रियासमेधिताःसर्वउपारमतविग्रहात् ४४
शुकउवाच संयम्यमन्युसंरंभंमानयंतोमुनेर्वचः उपगीयमानानुचरैर्ययुःसर्वेत्रिविष्टपं ४५
येऽवशिष्टारणेतस्मिन्नारदानुमतेनते बलिंविपन्नमादायअस्तंगिरिमुपागमन् ४६ तत्राविनष्टा
वयवान्विद्यमानशिरोधरान् उशनाजीवयामाससंजीविन्यास्वविद्यया ४७ बलिश्चोशनसास्पृ
ष्टःप्रत्यापन्नेंद्रियस्मृतिः पराजितोपिनाखिद्यल्लोकतत्त्वविचक्षणः ४८ इतिश्रीभागवतेमहा राम
पुराणेअष्टमस्कंधेदेवासुरसंग्रामेएकादशोध्यायः २८

२८

शअवयवायेषांविद्यमानाः शिरोधरायेषांतान् ४७ प्रत्यापन्नानिपुनःप्राप्तानींद्रियाणिस्मृतिश्चयेनसः ४८
नै
अष्टमएकादशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हादेशेमोहिनीरूपविभ्रमालोकनोत्सुकं गवंसंमोहयामासहरिः पुनरसांत्वयत् अमुह्यन्नसुराविष्णुमाययानतंशु ८१
न इतिवक्तुंमहादेवमोहायमुपवर्ण्यते हरिः साममपाययत् द्वितीयं निशाम्यसयत्रास्तेतत्रागद्रूपंद्रष्टुंययावित्युत्तरे वयंसाश्चर्य २
णान्वयः १ २ सामयात्तममपासह ३ तेयिकिंचिन्नवाश्चर्यमानसाः इतिवृक्ष्यन्महादेवस्तोष्टावेहरिमष्टभिः
तेयिमहामायाविनिपरमेश्वरेनहिकिल्किंचिदघटितमिवावयंतु परमकौतूहलेनद्रष्टुमागताइतिबहुधा
संबोधयंस्तौति हेदेवदेवाकुतोहंदेवानांदेवइत्यत आह हेजगद्व्यापिन् तत्कुतः हेजगन्मयात्तर्हिकिंप्रधा

बादरायणिरुवाच वृषध्वजोनिशम्येदंयोषिद्रूपेणदानवान् मोहयित्वासुरगणान्हरिःसो
ममपाययत् १ वृषमारुह्यगिरिशः सर्वभूतगणैर्वृतः सहदेव्यायेयौद्रष्टुंयत्रास्तेमधुसू
दनः २ सभाजितोभगवतासादरंसोमयाभवः सूपविष्टउवाचेदंप्रतिपूज्यस्मयन्हरिं
३ श्रीमहादेवउवाच देवदेवजगद्व्यापिन्जगदीशजगन्मय सर्वेषामपिभावानांत्वमा
त्माहेतुरीश्वरः ४ आद्यंतावस्ययन्मध्यमिदमन्यदहंबहिः यतोऽव्ययस्यनैतानितत्सत्यंब्र
ह्मचिद्भवान् ५

नं नोहेजगदीशतच्चकुतस्तत्राह सर्वेषामपित्वंहेतुः अतईश्वरः आत्मत्वाचनजडंप्रधानंत्वमित्यर्थः ४
ननुजगन्मयत्वोक्त्याजगतउत्पत्त्यादिनासत्यत्वेनचजाड्येनचममापिकिंतथात्वंभूषनहिनहीत्याह
पत्र २ आद्यंतौमध्यंचअस्यजगतोयतोब्रह्मणोभवंतिअस्यचअव्ययस्यएतानिआद्यंतमध्यानिनसंतिय
च्चब्रह्मविइदंकारास्पदंदृश्यंअहंकारास्पदंद्रष्टुचबहिर्भोग्यंअन्यत्तुभोक्तृचनतत्सत्यंचचिद्रूपंच
ब्रह्मैवभवान् अतोनतवविकारादिशंकेत्यर्थः ५

भा०स्क०४ तैवेवंभूतंत्वेमुमुक्षूणामाचारः प्रमाणमित्याह नैवेवेति उभयतः इहामुत्र च संगं त्यक्त्वा ६ ननु ब्रह्मैव चेदहं तर्ह्यसं
गोदासीनस्य मम चरणांभोजोपासनया किं तेषां तत्राह त्वमिति ब्रह्मैव पित्वं नात्यंतमुदासीनः किंतु विश्वस्य
प्रपंचस्योदयादीनां हेतुः तदुपाधीनामात्मनां जीवानामीश्वरश्च तत्तत्फलदाता नहि किं राजादिवत्के याप्य
पेक्ष्यासेवकेभ्यः फलं ददामि नहि न हि अनपेक्षाएव त्वं तर्हि किमीश्वरत्वेन तत्राह तैरात्माभिः तत्फलदा
नार्थमपेक्ष्यत इति तदपेक्षत्वात्स्वभावतस्तदपेक्षतातया अनपेक्षत्वमेव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि पू
र्णं अमृतं च सुखरूपं विषयसुखवैलक्षण्यार्थमाह अविकारं नित्यं आनंदमात्रं च कुतः विगुणं किंच अ विशोकं। तत्कृतः।

३५ तैवेवचरणांभोजं श्रेयस्कामा निराशिषः विसृज्योभयतः संगं मुनयः समुपासते ६ त्वं ब्रह्म पूर्ण
ममृतं विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् विश्वस्य हेतुरुदयस्थितिसंयमाना
मात्मेश्वरश्च तदपेक्षतयानपेक्षः ७ एकस्त्वमेव सदसत् द्वयमद्वयं च स्वर्णं कृताकृतमि
वेह न वस्तुभेदः अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरुपाधिकस्य ८

नन्यत् न विद्यते अन्यद्यस्मात् ब्रह्मव्यतिरिक्ताभावादपि निरपेक्षत्वमित्यर्थः तर्हि सर्वात्मकत्वेन तद्विकारप्र
संगाद्दुर्वारस्तत्राह अन्यत् सर्वतो व्यतिरिक्तं च कारणत्वात् न ह्येवंभूतसुखात्मके ब्रह्मस्वरूपस्य तवान्या
पेक्षास्ति अतः केवलं भक्तानुग्रहार्थमेव तैर्वैश्वर्यं न स्वार्थमित्यर्थः ७ अनन्यत्वमनन्यत्वं चैकस्य कुत
इत्याशंक्य दृष्टांतेनोपपादयति सदसत्कार्यकारणरूपं द्वयं अद्वयं चापरमकारणं त्वमेवैकः कृतं कुं राम
डलादिरूपद्वयं अकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति कथं त ३५
र्हि भेदप्रतीतिस्तत्राह अज्ञानत इति कुतः यस्मिन्निरुपाधिकेप्यज्ञानवशाद्गुणैर्व्यतिकरो भेदः न खलु
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतएवं त्वां बहुधा वर्णयंति न तु तत्त्वतः के ऽपि न जानंतीत्याह द्वाभ्यां त्वां ब्रह्मेत्येवं वेदांतिनो ऽवयंति मन्यंते त्वामेव धर्मं
मीमांसकाः मन्यंते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षिणी ज्ञानक्रियायोगाप्रह्वीसत्याईशानो
अनुग्रहावित्येवं नवशक्तियुतं परं पांचरात्राः महापुरुषं पातंजलाः परायुर्ब्रह्मा सत्त्वसर्गाः सत्त्वगुणेन सृष्टाः
अपि येन त्वया विरचितं विश्वमपि खलु तत्त्वेन न जानंति किं पुनस्त्वां हे ईश अभद्रा राजसतामसं चकृते
टी॰ १ उत्पत्तिश्चेयेषां तेन जानंतीति किमु वक्तव्यं १० किंतु त्वं सर्वं जानासीत्याह सत्त्वं सर्वस्य वर्तसे व्याप्नोषि ज्ञा

त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पुरुषं परेशं अन्ये ऽवयंति नवशक्तियुतं परं त्वां
केचिन्महापुरुषमव्ययमात्मतंत्रं ९ नाहं परायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं ख
लु सत्त्वसर्गाः यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः १० सत्त्वं स
मीहितमदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ वायुर्यथा विशति खं च चराच
राख्यं सर्वं तदात्मकतयावगमावरुंत्से ११ अवतारा मया दृष्टा रममाणस्य ते गुणैः सोहं तत् द्रष्टु
मिच्छामि यत्ते योषिद्वपुर्धृतं १२ येन संमोहिता दैत्याः पायिताश्चामृतं सुराः तद्दिदृक्षव
आयाताः परं कौतूहलं हि नः १३ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री

नासि किं तत्सर्वं समीहितं स्वकृतं अदः स्थितिजन्मनाशं अमुष्य जगतो जन्मादि भूतानामीहितं च जग
तो भवबंध मोक्षं च व्याप्नोषि दृष्टांतः चराचराख्यं देहजातं खं च यथा वायुराविशति तथा कथमेवं वरुंत्से त
दात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः आत्मत्वे हेतुः अवगमः ज्ञानरूप इति ११ एवं स्तुत्वा प्रस्तुतं विज्ञा
पयति अवतारा इति द्वाभ्यां १२ १३

भा० आ०

सुरकार्याणि योषिद्द्वेषण भविष्यतीति पश्यत। अयंभावः अवश्यं तावदुन्मत्तानां दैत्यानां वंचयित्वा देवेभ्यः अमृतं देयं न
चैवं वैषम्यरूपांतरेण कर्तुं भुचितं अतो वचनमोहनादिसारं कामिनीरूपं मया धृतमिति १५ तद्रूपं दर्शयिष्या
मि संकल्पप्रभवः कामः तस्यादयाय स्मात् १६, १७ विचित्राणि पुष्पाणि अरुणाः पल्लवाः अग्रे येषां तेद्रुमाय
स्मिन् लसद्दुकूलेन पर्यस्तपरिहितं नितंबे मेखला यस्याः ता १८ उत्पतत्पतत्कंदुकलीलावेशेन यत्

स्क० २

शुक उवाच एवमभ्यर्थितो विष्णुर्भगवान् शूलपाणिना प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत १४ श्री
विष्णुरुवाच कौतूहलाय दैत्यानां योषिद्वेषो मया धृतः पश्यता सुरकार्याणि गते पीयूषभाजने १५
तत्तेहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम कामिनां बहु मंतव्यं संकल्पप्रभवोदयं १६ शुक उवाच
इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया १७ ततो ददर्श
३० उपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनि
तंबमेखलां १८ आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे प्रभज्यमानामिव म
ध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः १९ दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोल
लोचनां स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिताननां २०

वृत्तैने १

आवर्तनैर्नमनोन्नमनैस्ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्य प्रभज्यमानामिव। राम
चलत्पदमेव प्रवालं कोमलं ततस्ततो नयंतीं १९ दिक्षु भ्रमतः कंदुकस्य चापलैश्चांचल्यैः भृशं प्रो ३०
द्विग्नतारे आयते लोलेव चंचले लोचने यस्याः स्वकर्णाभ्यां विभ्राजिते ये कुंडले ताभ्यामुल्लसंतौ क
पोलौ ताभ्यां च नीलालकैश्च मंडितमाननं यस्याः २० राम राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० अ० संनह्यतीव धुंनी जगद्धिमोहयंती २१ तां वीक्ष्य देवः श्रीरुद्रः आत्मानमंतिके स्थिता मुमां स्वगणा अनवेद्य कथंभूतः
या १ इतिएवंभूतयाकंदुकलीलयाईषद्व्रीडानया अस्फुटं स्मितं तेन सह विसृष्टाय कटाक्षः तेन मुष्टाविव चितः अतएव

श्लथदुकूलं कवरीं च विच्युतां संनह्यतीं वामकरेणवल्गुना विनिघ्नतीं चान्यकरेण कंदुकं विमोहयंती
जगदात्ममायया २० तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्ष
ब्रजंत्या: ४ णप्रतिसमीक्षणविक्लवात्मानात्मानमंतिकउमां स्वगणां अवेद २२ तस्याः कराग्रात्स तु कंदुको यदा
गतो विदूरं तमनुव्रजंत्स्त्रियाः वासः ससूत्रं लघुमारुतो हरद्भवस्य देवस्य किलानुपश्यतः २३ ए
वंतां रुचिरापांगीं दर्शनीयां मनोरमां दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल २४ तयापहृतवि
ज्ञानस्तत्कृतस्मरविह्वलः भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ २५ सा तमायांतमालो
क्य विवस्त्रा व्रीडिता भृशं नीलीयमाना वृक्षेषु हसंती नान्वतिष्ठत २६ तामन्वगच्छद्भगवा
न्भवः प्रमुषितेंद्रियः कामस्य च वशं नीतः करेणुमिव यूथपः २७ सोनुव्रज्य वेगेन गृहीत्वा ज्याति
निच्छतीं स्त्रियं केशबंधउपानीय बाहुभ्यां परिषस्वजे २८ सोपगूढा भगवता करिणा करि
णीयथा इतस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा २९ आत्मानं मोक्षयित्वांग सुरर्षभभुजां
तरात् प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ३० रा राम राम राम राम राम

टी० स्वयं यः स्त्रियाः प्रेक्षणं च भावप्रतिसमीक्षणं ताभ्यां विक्लव आत्मा मनो यस्य तं २२ तं कंदुकमनुव्रजंत्याः स्त्रियाः
लघु सूक्ष्मं वासः ससूत्रं कांचीसहितं २३ विषज्जंत्यां कुंचितकटाक्षैरात्मानं निरीक्षमाणायां २४ तत्पदं तस्याः
समीपं ययौ २५ ९ अंगहराजन् ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰अ॰ ३२ एवंतामनुधावन् हरः सरित्सरःसु शैलादिषु च सन्निहितो बभूव ३४ तदुह मायया जडीकरणे ३५ ७ स्वां निष्ठां

तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः। प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः॥ ३१ तस्यानुधा-
वतो रेतश्चस्कन्दामोघरेतसः। शुष्मिणो यूथपस्येव वासितामनुधावतः॥ ३२ यत्र यत्रापतन्मह्यां
रेतस्तस्य महात्मनः। तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ३३ सरित्सरःसु शैलेषु वनेषू-
पवनेषु च यत्र क्व चासन्नृषयस्तत्र संनिहितो हरः॥ ३४ स्कन्ने रेतसि सोपश्यदात्मानं देवमा-
यया जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ३५ अथावगतमाहात्म्य आत्मनो जगदा-
त्मनः। अपरिज्ञेयवीर्यस्य न मेने तदु हाद्भुतं ३६ तमविक्लवमव्रीडमालक्ष्य मधुसूदनः। उ-
वाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुं ३७ श्रीभगवानुवाच दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठा-
मात्मना स्थितः। यन्मे स्त्रीरूपया स्वैरं मोहितोस्यंग मायया ३८ को नु मेतितरेन्मायां विष-
क्तस्त्वदृते पुमान् तांस्तान्विसृजतीं भावान् दुस्तरामकृतात्मभिः॥ ३९ सेयं गुणमयी माया
न त्वामभिभविष्यति मया समेता कालेन कालरूपेण भागशः॥ ४० श्रीशुक उवाच एवं भगवता
राजन् श्रीवत्सांकेन सत्कृतः। आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ४१ आत्मांशभूतां
तां मायां भवानीं भगवान् भवः। शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ४२ अपि व्यपश्य-
स्त्वमजस्य मायां परस्य पुंसः परदेवतायाः अहं कलानामृषभो विमुह्ये ययाऽवशोन्ये कि-
मुतास्वतंत्राः॥ ४३ यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रान्त उपारतं वै स एष साक्षात्पुरुषः

प्रकृतिं ३८ ३९ कालेन सृष्ट्यादिनिमित्तेन मया कालरूपेण भागशो रजआद्यंशेन समेता मदधीना सती ४० ४४

३१

पं॰८

राम

३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टाध्यायार्थनिगमनं इतीति ४५ एतत्कीर्त्तनादौ फलमाह एतदिति ४६ भगवतां कृते भक्तपक्षपातं स्मरन्न
मस्करोति असतामविषयं भावो भजनं तेन गम्यमंघ्रिं प्रपन्नान् सिंधुमथ्य सिंधोर्मथने जातममृतं यः अश्वा १२
शयत् अभोजयत् ४७ अष्टमे द्वादशः त्रयोदशेनु वर्ण्यंते सप्तमादीन्मनून्क्रमात् मन्वंतराणि सर्वाणि

शुक उवाच इतीते भिहितस्तात विक्रमः शार्ङ्गधन्वनः सिंधोर्निर्मथनेयेन धृतः पृष्ठे महाचल
लः ४५ एतन्मुहुः कीर्त्तयतोनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् यदुत्तमश्लोकगुणानु
वर्णनं समस्तसंसारपरिश्रमापहं ४६ असदविषयमंघ्रिं भावगम्यं प्रपन्नानमृतममरवर्यान्
नाशयत्सिंधुमथ्यं कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोस्मि
४७ इति श्रीभागवते महापुराणे अष्टमस्कंधे शंकरे मायामोहने द्वादशोऽध्यायः शुक उ०
मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु १ इक्ष्वा
कुर्नभगश्चैव धृष्टः शर्यातिरेव च नरिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते २ करूषश्च
पृषध्रश्च दशमो वसुमान्स्मृतः मनोर्वैवस्वतस्यैते दशपुत्राः परंतप ३ आदित्या वसवो
रुद्रा विश्वेदेवा मरुद्गणाः अश्विनावृभवो राजन्निंद्रस्तेषां पुरंदरः ४ कश्यपोऽत्रिर्वसि
ष्ठश्च विश्वामित्रोथ गौतमः जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ५ अत्रापि भगव
ज्जन्म कश्यपाददितेरभूत् आदित्यानामवरजो विष्णुर्वामनरूपधृक् ६ संक्षेपतो मयो
११ क्तानि सप्तमन्वंतराणि ते भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यन्वितानि च ७ राम राम

षड्विधानि पृथक्पृथक् सप्तमादिमन्वंतराण्याह मनुरित्यादिना यावदध्यायसमाप्ति १ ३ आदित्यादयो दे
वा इत्यन्वयः ४ ५ भगवतो जन्म अवतारः तमेवाह आदित्यानां विवस्वानर्यमा पूषेत्यादिक्रमानामध्येऽ
वरं जन्म यस्य सः ६ ७ शक्त्या अवतारेणान्वितानि

५५ १

भा०अ० अष्टमं मनुं वक्तुं कथमाह विवस्वत इति त्रिभिः ८ एके पडवां तृतीयामाहुः स मनुसंज्ञे वडवेति मन्तुं तदुक्तं षष्ठे सैव भू
त्वाथ वडवा नासत्यौ सुषुवे भुवीति यम श्रय मीत्ययमुना श्राद्धदेव अनित्रयः सुताः ९ सावर्णिः पुत्रः १० १२

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ८ तृतीयां वडवामे
के तासां संज्ञासुतास्त्रयः यमो यमी श्राद्धदेवश्छायायाश्च सुतान्छृणु ९ सावर्णिस्तपती कन्या भार्या
संवरणस्य या शनैश्चरस्तृतीयोभूदश्विनौ वडवात्मजौ १० अष्टमेन्तर आयाते सावर्णिर्भविता मनुः
निर्मोकविरजस्काद्याः सावर्णितनयान्नृप ११ तत्र देवाः सुतपसो विरजा अमृतप्रभाः तेषां वि
रोचनसुतो बलिरिंद्रो भविष्यति १२ दत्वेमां याचमानाय विष्णवे यः पदत्रयं राद्धमिंद्रपदं हित्वा त
तः सिद्धिमवाप्स्यति १३ योसौ भगवता बद्धः प्रीतेन सुतले पुनः निवेशितोधिके स्वर्गादधुनास्ते
३२ स्वराडिव १४ गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ऋष्यशृंगः पितास्माकं भगवान्बा
दरायणः १५ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः इदानीमासते राजं स्वे स्व आश्रममंडले
१६ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः
१७ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः भूतकेतुर्दीप्तिकेत्वित्याद्यास्तत्सुता नृप १८
श्रेत पारामरीचिगर्भाद्या देवा इंद्रोद्भुतः स्मृतः द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः १९ राम

दत्वाऽष्टमे पदत्रयं याचमानाय इमां सर्वां महीं सप्तमे मन्वंतरे विष्णवे प्रसादेनैव राद्धं लब्धमिंद्रपदं हित्वेत्यर्थः ३२
मन्वंतरे ४ रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा १५ इदानीं तु स्वयोगत आसते १६ अद्भुत इंद्रः १७ १९

श्रेत

२२ हविष्मत्प्रमुखाइत्युक्तानामेवैकेषांचिन्नामान्याह हविष्मानिति २३ विषूच्यांजातः सनु २४ एकादशमइत्या

आयुष्मतोंबुधारायामृषभोभगवत्कला भवि[illegible]नसंराद्धांत्रिलोकींभोक्ष्यतेऽद्भुतः २० दशमोब्र
ह्मसावर्णिरुपश्लोकसुतोमहान् तत्सुता भू[illegible]षेणाद्याहविष्मत्प्रमुखाद्विजाः २१ तत्रापिज=
न्मभवतिहरेर्विश्वसृजोगृहे अमूर्तिरितिविख्यातोयेनाप्यायितंवैजगत् २२ हविष्मान्सुकृतिः
सत्योजयोमूर्तिस्तदाद्विजाः सुवासनविरुद्धाद्यादेवाः शंभुः सुरेश्वरः २३ विष्वक्सेनोवि
षूच्यांतुशंभोः सख्यंकरिष्यति जातः स्वांशेनभगवान्गृहे विश्वसृजोविभुः २४ मनुर्वैधर्म
सावर्णिरेकादशमआत्मवान् अनागतास्तत्सुताश्चसत्यधर्मादयोदश २५ विहंगमाः का
मगमाःनिर्वाणरुचयः सुराः इंद्रश्चवैधृतस्तेषामृषयश्चारुणादयः २६ आर्य[illegible]कस्यसु
तस्तत्रधर्मसेतुरितिस्मृतः वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति २७ भवितारुद्रसाव
र्णीराजन्द्वादशमोमनुः देववानुपदेवश्चदेवश्रेष्ठादयः सुताः २८ ऋतधामाचतत्रें=
द्रोदेवाश्चहरितादयः ऋषयश्चतपोमूर्तिस्तपस्व्याग्नीध्रकादयः २९ स्वधामाख्योहरेरंशः
साधयिष्यतितन्मनोः अंतरंसत्यसहसः सूनृतायाः सुतोविभुः ३० मनुस्त्रयोदशोभाव्योदेवसा
वर्णिरात्मवान् चित्रसेनविचित्राद्यादेवसावर्णिदेहजाः ३१ देवाः सुकर्मसुत्रामसंज्ञाइंद्रो
श्री २ दिवस्पतिः निर्मोकतत्त्वदर्शाद्याभविष्यन्त्यृषयस्तदा ३२ देवहोत्रस्यतनयउपहर्त्तादिव
स्पतेः योगेश्वरोहरेरंशोबृहत्यांसंभविष्यति ३३ मनुर्वाइंद्रसावर्णिश्चतुर्दशमएष्यति उरुगं
भीरबुद्ध्याद्याइंद्रसावर्णिवीर्यजाः ३४

दिरार्ष १ ५ ६ तस्यमनोरंतरंसाधयिष्यति २७ २९ सत्यसहसः सूनृतायाश्चसुतः सनु ३० १ दिवस्पतेरिंद्रस्योपहर्त्ता
संपादकः संभविष्यति ३३ ३४

स्प १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ०
अष्टमोदिवस२

३५ क्रियांतंतूनूकर्मसंततीः विनायिताविस्तारयिष्यति ३६ युगसाहस्त्रपर्ययः परिवर्तीयस्यायुगसहस्त्र
प्रमाणमित्यर्थः ३७ अष्टमेत्रयोदशः चतुर्दशानुसर्वेषांमन्वादीनांयथायथांपृथक्कर्माणिवर्ण्यंतेभगवद्दश
वर्तिनां १ पुरुषेणईश्वरेणयज्ञाद्यावतारेणशास्यंतेनियुज्यंतइतितथा २ तदेवाहयज्ञादयइति ३ ऋष्यादि
चि

पवित्रश्चाक्षुषादेवाः शुचिरिंद्रोभविष्यति अग्निर्बाहुः शुचिः शुद्धोमागधाद्यास्तपस्विनः ३५ स
त्रायणस्यतनयोबृहद्भानुस्तदाहरिः वितानायांमहाराजक्रियातंतून्वितायिता ३६ राजंश्च
तुर्दशैतानित्रिकालानुगतानिते प्रोक्तान्येभिर्मितः कल्पोयुगसाहस्त्रपर्ययः ३७ इतिश्रीभाग
३३
वतेमहापुराणेअष्टमस्कंधेमन्वंतरानुवर्णनंत्रयोदशोध्यायः राजोवाच मन्वंतरेषुभगवन्य
प थामन्वादयस्त्विमे अस्मिन्कर्माणियेयेननियुक्तास्तद्वदस्वमे १ ऋषिरुवाच मनवोमनुपु
त्राश्चमुनयश्चमहीपते इंद्राः सुरगणाश्चैवसर्वेपुरुषशासनाः २ यज्ञादयोयाःकथिताःपौरु
ष्यस्तनवोनृप मन्वादयोजगद्यात्रांनयंत्याभिः प्रचोदिताः ३ चतुर्युगांतेकालेनग्रस्ता
न्श्रुतिगणान्यथा तपसाऋषयोपश्यन्यतोधर्मःसनातनः ४ ततोधर्मंचतुष्पादंमन
वोहरिणोदिताः युक्ताःसंचारयंत्यद्धास्वेस्वेकालेमहींनृप ५ पालयंतिप्रजापालायाव
दंतंविभागशः यज्ञभागभुजोदेवायेचतत्रानुकीर्तिताः ६ इंद्रोभगवतादत्तांत्रैलोक्य
श्रियमूर्जितां भुंजानःपातिलोकांस्त्रीन्कामंलोकेप्रवर्षति ७ श्रीराम श्रीराम रा

नांकर्माण्याहचतुर्युगांतइतिचतुर्भिः यतः येभ्यःश्रुतिगणेभ्यः ४ उदिताःप्रेरिताः युक्ताः संयताः संतोम
होधर्मंसंचारयंतिमह्यांधर्मंप्रवर्तयंतीत्यर्थः ५ प्रजापालामनुपुत्रास्तुधर्मंपालयंति यावदंतंया
वन्मन्वंतरावसानं विभागशः पुत्रपौत्रादिक्रमेण येचान्येदेवाःपृथिव्यादयोयत्रकर्माणिभोक्तृ

[illegible] ३३ ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगेश्वराः दत्तात्रेयादयः न रूपः १

प्रसंगाद्रूपांतरैरपि जगाद्यात्राप्रवर्तनमाह ज्ञानमिति द्वाभ्यां सिद्धाः सनकादयः ऋषयो याज्ञवल्क्यादयः ४
सनुज्ञानं कर्म च योगं च ब्रूते ८ प्रजेशा मरीच्यादयः तन्नरूपेण सर्गं करोतीति शेषः स्वराट्‌वपुः राज
मूर्तिः सर्वेषामभावाय भवति पृथग्विधाः गुणाः शीतोष्णादयो यस्य ९ नामरूपात्मिकया मायया
विमोहितात्मभिरेभिर्जनैः नानादर्शनैः शास्त्रैः स्तूयमानो निष्प्रमाणोपि न वेद दृश्यत इत्यर्थः १०॥

ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक्‌ ऋषिरूपधरः कर्म योगं योगेशरूपधृक्‌ ८
सर्गं प्रजेशरूपेण दस्यून् हन्यात्स्वराड्वपुः कालरूपेण सर्वेषामभावाय पृथग्गुणः ९
स्तूयमानो जनैरेभिर्मायया नामरूपया विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते १०
एतत्कल्पविकल्पस्य प्रमाणं परिकीर्त्तितं यत्र मन्वन्तराण्याहुश्चतुर्दश पुराविदः ११ इति
श्रीभागवते महापुराणे अष्टमस्कंधे मन्वादिविभागवर्णनं चतुर्दशोऽध्यायः राजो
वाच बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत भूतेश्वरः कृपणवल्लब्धार्थोपि बबंध तं
एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः २

प्रासंगिकं निरूप्य प्रस्तुतमेवोपसंहरति एतत्कल्पविकल्पस्य अवांतरकल्पस्य ११ इति अष्टमे
चतुर्दशः बलिं पंचदशे विश्वजिताचार्यैर्याजयत् ततः सो स्वर्गमजयत् यद्दिवा निलि
ल्पैः अत्रैर्येन नवाध्याभ्यां वामनचेष्टितं निग्रहच्छलेनाय न चलेः कृपानुग्रहः २ ईश्व
रः स्वयं कृपणवत् कस्माद्धेतोरयाचत लब्धार्थोभूत्वापि तं कस्माद्बबंध १ श्रीराम श्रीरा०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री१

भा०अ० तत्रतावदहत्वेः त्रिलोकीमपहर्तुंया ... दिखलं कृतवानितिवक्तुंब्राह्मणाः धनबलेनबलेरकांडएवसुर्गाविज
यत्क्रममाह पराजितश्रीरित्यादिनायावद ध्यायसमाप्ति सुंद्रपराजिताश्रीर्येन इंद्रेणअसुभिश्चत्या
जिता१सन् भृगूनुधर्मगोवेशयांद्धकादीन्महात्मानुदारचित्ते अर्थानांनिवेदनेनापेणानं२ त्रिलोके
स्वर्गीडेनुमिछंन्तं विश्वजितायोगेनअयाजयन् महाभिषेकेणपुद्रेणवहूंश्चब्राह्मणप्रसिद्धेन ४ हर्य
श्वस्यदस्पयतुरंगाक्तेषामिववर्णाहरितोयेषां ५ पुरटसुवर्णत्रूणाइषुधीअरिक्तोअक्षयशरोपिता

शुकउवाच पराजितश्रीरसुभिश्चहापित्तोहींद्रेणराजन्भृगुभिः सर्वात्मनातानभजल्लगन्वलिः सञ्जीवितः ९
शिष्यामहात्मार्थनिवदेनेन ३ तंब्राह्मणाभृगवः प्रीयमाणाः अयाजयन्विश्वजितात्रिणाकंजि
३४ गीषमाणं विधिनाऽभिषिच्यमहाभिषेकेण महानुभावाः ४ ततोरथःकांचनपट्टनद्धोहयाश्च
हर्यश्वतुरंगवर्णाः ध्वजश्चसिंहेनविराजमानोहुताशनादासहविर्भिरिष्टात् ५ धनुश्चदिव्यं
पुरटोपनद्धंतूणावरिक्तौकवचंचदिव्यं पितामहस्तस्यददौचमालामम्लानपुष्पांजलजं
चशुक्रः ६ एवंसविप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोथविप्रान् प्रदक्षिणीकृत्य
कृतप्रणामः प्रह्लादमामंत्र्यनमश्चकार ७ अथारुह्यरथंदिव्यंभृगुदत्तंमहारथः सुस्रग्ध
रोथसंनह्यधन्वीखड्गीधृततूणिः ८ हेमांगदलसद्बाहुःस्फुरन्मकरकुंडलः ररोजरथमा
रूढोधिष्ण्यस्थइवहव्यवाट् ९

महः प्रह्लादः जलजं शंखं ६ विप्रैरर्जितैः संपादितैर्योधनार्थैर्युद्धपरिकरो यस्य तैः रेवकल्पितं स्वस्त्य राम
यनं मंगलवाचनादि यस्य आमंत्र्यपृष्ट्वा ७ अथारुह्येत्यादिरराजेति द्वयोरन्वयः सुस्रक्धरः शोभनमा ३४
लाधरः ८ हेमांगदाभ्यां लसंतौ बाहू यस्य धिष्ण्यस्थः वेनप्रज्वलितः कुंडस्थआहवनीयइवेतिवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुल्यैमैश्वर्यबलं च श्रीश्च येषां तैर्दैत्ययूथैपरैतोयूपाविति द्वयोरन्वयः। परिधीनूद्दिशः। १० स्फुद्वान्अतिसमृद्धां ११

स्पर॰ धिकं यामसुखं तथाविधां पुरीं अकस्मादेव परित्यज्यैन्द्राद्यः पलायिताइति वैराग्यार्थमिंद्रपुरीमनुवर्णयति रम्या

भिनिसोद्यैरेकादशभिः उपवनानि फलप्रधानानि निकटानि च उद्यानानि पुष्पप्रधानानि दूरस्थानि च नगर

रम्या कूजंति विहंगमिथुनानि येषु गायंतो मत्ता मधुव्रता येषु १२ प्रवालादीनामुरुभारायामुताः शाखा येषां ते अ

प्रमदाः॰ मरद्रुमा येषु तैः। यत्र योसुसुरसेविताः क्रीडंतीता हंसादिकुलैराकुलाव्याप्तान लिन्यः सरांसि यत्र येषु संति

तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः। पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनि च १० दृष्टोविकर्षन्म

हगीमासुरीध्वजिनीं विभुः। ययाविंद्रपुरीस्फुद्वां कंपयन्निवरोदसी ११ रम्यासुपवनोद्यानैः श्रीमद्भिर्न

दनादिभिः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः। १२ प्रवालफलपुष्पोरुभारशाखामरद्रुमैः॥

हंससारसचक्राह्वकारंडवकुलाकुलाः। नलिन्यो यत्र क्रीडंति प्रमदाः सुरसेविताः। १३ आका

शगंगया देव्या वृतां परिखभूतया प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च १४ रुक्मपट्टकपाटै

पर॰ श्च द्वारैः स्फटिकगोपुरैः। जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मितां १५ सभाचत्वररथ्याढ्यां विमा

नैर्न्यर्बुदैर्युतां शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः। १६ राम राम राम राम राम राम

तैरुपवनोद्यानैरम्यामिति पूर्वेणैवान्वयः। १३ किंचापरिखाभूतयाअकाशगंगयावृतां प्राकारेण सौवर्णेन

चावृतां अट्टालाः प्राकारोपरि रचितान्युन्नतानि युद्धस्थानानि तत्सहितेन १४ रुक्मपट्टानि कपाटानि येषु

तैर्द्वारैः खातैः स्फटिकमयैर्गोपुरैः पुरद्वारैर्जुष्टां विभक्ताः प्रपथा राजमार्गा यस्यां १५ सभाउपवेशस्थाना

नि चत्वराणि अंगणानि रथ्या उपमार्गाः तैराढ्या संपन्नां न्यर्बुदं दशकोट्यः तेन गणनीयैरनंतैर्विमानैर्युतां

विज्ञाविद्रुममय्यो वेद्यो येषु तैः। शृंगाटकैश्चतुष्पथैर्युतां। १६ श्रीराम राम राम राम राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा०अ० नित्यंवयस्तारुण्यं पंचविंसो कुमार्यो यासां ताः रूपवन्नार्यः खलु हंता स्त्रियो यत्र यस्यां भ्राजंते १७ सुरस्त्री
णांकेशेभ्यो विभ्रष्टेनानां वसोगंधिकस्रजामामोदं १८ हेमगवाक्षेभ्यो निर्गच्छता धूमेन सुरप्रिया अप्सरसः
१९ मुक्तामये वितानमणिहर्म्ये केतुभिश्च ध्वजैः नानापताकायुक्ताभिर्वल्लभीभिश्च विमानानां

यत्र नित्यवयोरूपाः श्यामा विरजवाससः भ्राजंते नूपुरैर्नार्यश्चर्चिभिरिव द्रुमः १७ सुरस्त्रीके पुरुषास्त्रीभिः
३५ शविभ्रष्टेन वसोगंधिकस्रजां यत्रामोदमुपादाय मार्गआवाति मारुतः १८ हेमजालाक्षनि
र्गच्छद्धूमेनागुरुगंधिना पांडुरेण प्रतिच्छन्ने मार्गे यांति सुरप्रियाः १९ मुक्तावितानैर्मणिहर्म्यके
तुभिर्नानापताकावलभीभिराचिता शिखंडिपारावतभृंगनादिता वैमानिकस्त्रीकलगीतमं
गला २० मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः नृत्यैः सवाद्यैरु
पदेवगीतकैर्मनोरमा स्वप्रभया जितप्रभा २१ यां न व्रजंत्यधर्मिष्ठाः खलाभूतद्रुहः जिनगृहं
शठाः मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् २२ तां देवधानीं स वरूथिनीपतिर्बहिः
समंताद्रुरुधे पृतन्यया आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन् भयमिंद्रयोषितां २३
मघवांस्तदभिप्रेत्य बलेः परममुद्यमं सर्वदेवगणोपेतो गुरुमेतदुवाच ह २४ श्रीरामश्री राम

[illegible] पुरोभोगैः आवृतां आप्तां वैमानिकस्त्रीणां कलगीतैर्मंगलां २० ३५
उपदेवानां गंधर्वादीनां गीतकैश्च मनोरमां जिता प्रभा साक्षाद्विष्णोरधिष्ठात्री देवता या यातां अन्यैरजि
तप्रभामिति वा पाठांतरे जितायहा सूर्यादयो यया २१ यत्पुरीं २२ पृतन्या सेनया २३ २४ श्री०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केन हेतुना एवं तेजसा ऊर्जित आसीत् २५ प्रतिव्योढुं अपाकर्तुं २६ यतः कारणात् एतस्य ओज आदि यतः ओज आदेः एतस्य समुद्यमः २७ उपभृतं सचिंतं मंत्रमाह. तस्मादिदं त्रिविष्टपमुत्सृज्य निलयमदर्शनं यात यतः ३० कालान् केनास्य विपर्ययः स्यादित्यत आह एष इति विप्राणां बलेन उदर्को उत्तरोत्तराभिवृद्धिः

भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः २५ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः पिबन्निव मुखेनेदं लिहन्निव दिशो दश दहन्निव दृग्भिः संवर्त्ताग्निरिवोत्थितः २६ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ओजः सहो बलं तेजो यत एतत्समुद्यमः २७ गुरुरुवाच जानामि मघवञ्छत्रोरुन्नतेरस्य कारणं शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः २८ भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिं नास्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः २९ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपं यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः ३० एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः तेषामेवापमानेन सानुबंधो विनंक्ष्यति ३१ एवं सुमन्त्रितार्थास्ते गुरुणार्थानुदर्शिना हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ३२ देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीं देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयं ३३ तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः शतेन हयमेधानामनुव्रतमयाजयन् ३४ ततस्तदनुभावेन भुवनत्रयविश्रुतां कीर्तिं दिक्षु वितन्वानः स रेज उडुराडिव ३५ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभितां कृतकृत्यमिवात्मानं मन्यमानो महामनाः ३६ इति श्रीभागवते महापुराणे अष्टमस्कंधे पंचदशोऽध्यायः

फलं यस्य सः ३१ सुमंत्रितः अर्थः कार्यं येषां ते निलयं जग्मुः ३२ एवं प्राप्तमिंद्रपदं स्थिरीकर्तुमयाजयन् अनुव्रतं अनुवर्तिनं ३४ ५ द्विजदेवैर्ब्राह्मणैरुपलंभितां प्रापितां ३६ अष्टमे पंचदशः

नास्य शक्तः क्षणमपि स्थातुं शक्तोऽतिसन्मुखे ५

श्री

ए२

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ०
अष्टे पु२

षोडशे पुत्रनाशेन शोचंत्या अदितेः पतिः प्रार्थितः कश्यपः प्राह पयोव्रतमितीर्यते इदानीं श्रीवामनावतारप्रसंगमाह एवमि त्यादि यावत्समाप्तिः नष्टेषु सत्सु १ २ सः कश्यपः पत्नीमिदमाह ३ दीनवदनत्वादिकमालक्ष्य बहुधा विकल्पयन् पृच्छ ति अप्यभद्रमिति सप्तभिः हे भद्रे मृत्योः छंदमिच्छामनुवर्तनं गतं इति तथा मृत्युवशवर्तिनो जनस्येत्यर्थः ४ हे गृहमेधि

शुकउवाच एवंपुत्रेषुनष्टेषुदेवमातादितिस्तदा हृतेत्रिपिष्टपेदैत्यैःपर्यतप्यदनाथवत् १ एकदाकश्यप स्तस्याआश्रमंभगवानगात् निरुत्सवंनिरानंदंसमाधेर्विरतश्चिरात् २ सपत्नींदीनवदनांकृतासन परिग्रहः सभाजितोयथान्यायमिदमाहकुरूद्वह ३ अप्यभद्रंनविप्राणांभद्रेलोकेधुनागतं नधर्म्म स्यनलोकस्यमृत्योश्छंदानुवर्तिनः ४ अपिवाकुशलंकिंचिद्गृहेषुगृहमेधिनि धर्म्मस्यार्थस्यका मस्ययत्रयोगोह्ययोगिनां ५ अपिवातिथयोभ्येत्यकुटुंबासक्तयात्वया गृहादपूजितायाताः

३६ प्रत्युत्थानेनवाक्वचित् ६ गृहेषुयेष्वतिथयोनार्चिताः सलिलैरपियदिनिर्यांतितेनूनंफेरुराज गृहोपमाः ७ अप्यग्नयस्तुवेलायांनहुताहविषासति त्वयोद्विग्नधियाभद्रेप्रोषितेमयि कर्हिचित् ८ यत्पूजयाकामदुघान्यातिलोकान्गृहान्वितः ब्राह्मणोग्निश्चवैविष्णोः स र्वदेवात्मनोमुखं ९ अपिसर्वेकुशलिनस्तवपुत्रामनस्विनि लक्षयेस्वस्थमात्मानंभव त्याल्लक्षणैरहं १०

नि अपि वा किंच गृहेषु धर्मादेः किंचिदकुशलमिति काकुप्रश्नः यत्र येषु गृहेषु अयोगिनामपि योगः स्वध राम
र्मादिना योगफलं भवति ५ किंच त्वया अपूजिता एवाभ्येत्य गृहाद्याताः ६ नो चिंतिताः अनर्चिताः संतो यदि नि ३६
र्गच्छंति तर्हि गृहाः फेरुराजः शृगालस्तन्नाथः तदीयविवरतुल्याः ७ वेलायां होमकाले कर्हिचिन्न हुताः किं ८
९ भवत्या आत्मानं मनः अस्वस्थमप्रसन्नं स्वलक्षणैर्मुखम्लान्यादिभिः लक्षयामि ॥१०॥ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्वास्थ्यकारणमनुदृश्यांतिपृष्टवत्यृष्टमभद्रादिकं नास्तीत्याह भद्रमिति द्वाभ्यां इमे गृहा । त्रिवर्गस्य
परं क्षेत्रं अवस्थानं त्रिवर्गोपि यथावद्वर्तत इत्यर्थः ११ भगवतस्त्वदनुध्यानं यन्मया क्रियते तस्मात् अग्नयोऽतिथय
इत्यादि सर्वं न रिष्यति न हीयते १२ प्रस्तुतं विज्ञापयितुमाह को न्विति १३ सपाद्यं काममाह तवैवेति चतुर्भिः

अदितिरुवाच भद्रं द्विजगवां ब्रह्मन् धर्मस्यास्य जनस्य च त्रिवर्गस्य परं क्षेत्रं गृहमेधिन् गृहा इमे ११
अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः । सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति १२ को नु मे भगवन्का
मो न संपद्येत मानसः । यस्या भवान्प्रजाध्यक्ष एवं धर्मान्प्रभाषते १३ तवैव मारीच मनःशरीरजाः प्रजा इ
माः सत्वरजस्तमोजुषः । समो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तं भजते महेश्वरः । १४ तस्मादी
श भजंत्या मे श्रेयश्चिंतय सुव्रत हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो १५ परैर्विवासिता
व्य५ साहं मग्नाव्यसनसागरे ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम १६ यथा तानि पुनः साधो प्रप
द्येरन्ममात्मजाः तथा विधेहि कल्याणं धिया कल्याणकृत्तम १७ श्रीशुक उवाच एवमभ्यर्थितोऽदि
त्या कस्तामाह स्मयन्निव अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् १८ क्व देहो भौतिकोऽना
त्मा क्व चात्मा प्रकृतेः परः कस्य के पतिपुत्राद्या मोह एव हि कारणं १९ उपतिष्ठस्व पुरुषं भगवं
तं जनार्दनं सर्वभूतगुहावासं वासुदेवं जगद्गुरुं २० स विधास्यति ते कामान् हरिर्दीनानुकंपनः
अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम २१
स्लै १४ सपत्नैर्हृताः श्रीर्येषां हृतं स्थानं येषामिति पुत्राभिप्रायेणा बहुवचनं १५ १७ कः कश्यपः प्रथमं तावत्पुत्र
स्नेहं त्याजयितुं विस्मयव्याजेन तत्त्वमुपदिशति अहो इति सार्द्धेन १८ १९ अत्रापरितुष्यंतीं प्रत्याह उप
तिष्ठस्वेति द्वाभ्यां २० नन्वेवं भक्तकामप्राप्तिहेतुर्देवांतरसेवा प्रसिद्धा तत्राह अमोघेति २१

भा० अ० सयथाचेममनोरथं विदध्यात् २२ यथाचेमेआभुतुष्यतितथातत्सेवाप्रकारमादिश २३ मयापृष्टपजोमियद्वतमा
हातेतत्प्रवक्ष्यामीत्यन्वयः २४ अमलेशुक्ले २५ तेत्राहपूर्वकं कृत्यमाह सिनीवाल्यामित्यादिनाब्रह्मचार्यथत
द्रोआमित्यतेतनग्रथनयदिलभ्यतेतर्हि क्रोडविदिर्णयावेन्यवराहोत्खातयामृआलिप्य २६ तत्रमंत्रः त्वंदेवीति

अदितिरुवाच केनाहंविधिनाब्रह्मन्नुपस्थास्येजगत्पतिं यथोमेसत्यसंकल्पोविदध्यात्समनोरथं
२२ आदिशत्वंद्विजश्रेष्ठविधिंतदुपधावनं आशुतुष्यतिमेदेवः सीदन्त्याः सहपुत्रकैः २३ कश्य
पउवाच एतन्मेभगवान्पृष्टः प्रजाकामस्यपद्मजः यदाहतेप्रवक्ष्यामिव्रतंकेशवतोषणं २४
फाल्गुनस्यामलेपक्षेद्वादशाहंपयोव्रतः अर्चयेदरविंदाक्षंभक्त्यापरमयान्वितः २५ सिनी
२७ वाल्यांमृदालिप्यस्नायात्क्रोडविदीर्णया यदिलभ्यतेवस्रोतस्येतंमंत्रमुदीरयेत् २६ त्वंदेव्या
दिवराहेणरसायाःस्थानमिच्छता उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशय २७ निर्वर्तिता
त्मनियमोदेवमर्चेत्समाहितः अर्चायांस्थंडिलेसूर्येजलेवन्हौगुरावपि २८ नमस्तुभ्यंभ
गवतेपुरुषायमहीयसे सर्वभूतनिवासायवासुदेवायसाक्षिणे २९ नमोव्यक्तायसूक्ष्माय
प्रधानपुरुषायच चतुर्विंशद्गुणज्ञायगुणसंख्यानहेतवे ३० श्रीराम श्रीराम श्रीराम

हेहविंत्वरसायाः उद्धृतासि २७ निवर्तितआत्मनियमोनित्यनैमित्तिकोयेन २८ तत्रवाहनादीनवमंत्रान
ह नमस्तुभ्यमिति पाद्यादौविशेषतस्तुद्वादशाक्षरंवक्ष्यति २९ चतुर्विंशतिगुणास्तत्वानितानिजा राम
नातीतितथास्मै गुणसंख्यानस्यहेतवेसांख्यप्रवर्त्तकाय ३० श्रीराम श्रीराम श्रीराम श्रीराम २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६.

एवं सामान्येतानन्तगुणावतारान् प्रणमति त्रिभिः मंत्रोद्देशमंत्रोक्तयज्ञरूपेण विष्णोः प्रणमीनमइति द्वेशीर्षे
५२ यस्य त्रयः पादास्यानंतंतवे फल्ल विस्तारकायात्र्यो विद्यया मात्माय स्येति त्रिधाचबद्धस्य सप्तार्थेन्तो तथा
चमंत्रः चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ
५४ विवेशेति मार्गमुद्रैवृतोत्लूनः सोऽयं प्राज्ञैर्यथायथं विरक्तो यज्ञरूपेण स्तूयते तेन नन्तत्वतः तथा चयास्को
चत्वारि शृंगेति वेदा एवोक्ताः त्रयो अस्य पादाः इति सवनानि त्रीणि द्वि शीर्षे प्रायणीयोदयनीये सप्त हस्ता स

नमो द्विशीर्ष्णे त्रिपदे चतुःशृंगाय तंतवे सप्तहस्ताय यज्ञाय त्रयीविद्यात्मनेनमः ३१ नमः शिवा
यरुद्राय नमः शक्तिधराय च सर्वविद्याधिपतये भूतानां पतये नमः ३२ नमो हिरण्यगर्भाय प्राणा
य जगदात्मने योगैश्वर्यशरीराय नमस्ते योगहेतवे ३३ नमस्त आदि देवाय साक्षिभूताय ते
नमः नारायणाय ऋषये नराय हरये नमः ३४ नमो मरकतश्याम वपुषेऽधिगतश्रिये
केशवाय नमस्तेऽस्तु नमस्ते पीतवाससे ३५ त्वं सर्ववरदः पुंसां वरेण्यं वरदर्षभ अतस्ते श्रेयसे
धीराः पादरेणुमुपासते ३६ अन्ववर्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः स्पृहयन्त इवामोदं
भगवान्मे प्रसीदतां ३७ एतैर्मंत्रैर्हृषीकेश मावाहनपुरस्कृतं अर्चयेच्छ्रद्धया युक्तः पा
द्यापस्पर्शनादिभिः ३८ अर्चित्वा गंधमाल्याद्यैः पयसा स्नापयेद्विभुं वस्त्रोपवीताभरण
पाद्यापस्पर्शनैस्ततः गंधपुष्पादिभिश्चार्चेत् द्वादशाक्षरविद्यया ३९ राम राम

नवरुचेपा सप्तवक्षं हंसि त्रिधा विद्धो मंत्रब्राह्मणकल्पैः वृषभो रोरवीति रोरवणं सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्य
देनऋग्भिः शंसति यजुर्भिर्यजंति सामभिः स्तुवंतीति ३१ ३२ प्राणाय सूत्रात्मने योगैश्वर्यशरीरं यस्य ३३
४ अधिगता प्राप्ता श्रीर्येन तस्मै ३५ ३६ तत्पादपद्मयोः आमोदं स्पृहयंत इव देवा अश्री श्रयमन्ववर्तंत समे
प्रसीदतु ३७ आवाहनेन पुरस्कृतं समर्पितं ३८ ३९

मार्गमुद्रा वदि यस्यार्थः निवृत्तिमार्गलक्षण नानंतः तस्यापकम्पत्तिमार्ग
मुद्रा गच्छंतीइति मार्गमुद्राः तत्प्रवर्तकाचार्याः ते विद्यंते येषु अर्वाचीनेषु
मार्गमुद्रवंतः तैरालूनः व्यवच्छिन्नः पाठांतरे मार्गमुद्रवहंतीति मार्गमु
द्रहः तैरालूनः पृथक् चेनोपासितइत्यर्थः

भा॰ अ॰ पयसि शृतं पक्वं पायसं मूलविद्यया द्वादशाक्षरेणैव ४० । पूर्वोक्तानि स्नापितानि अस्त्रादिभिः ४२ तं
स्ये शेषाणि माल्यानि होम अवरोपणानि असंभवे द्वापि भोजयेदित्यर्थः ४३ सभाजितैस्तैरनुज्ञातः सन् शेषं

शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति । ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ४० निवेदितं त
द्भक्ताय दद्याद्भुंजीत वा स्वयं । दत्त्वाचमनमर्चित्वा तांबूलं च निवेदयेत् ४१ जपेदष्टोत्तरशतं स्तु
वीत स्तुतिभिः प्रभुं । कृत्वा प्रदक्षिणं भूमौ प्रणामं दंडवन्मुदा ४२ कृत्वा शिरसि तच्छेषां देवमुद्वास
येत्ततः । द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं ४३ भुंजीत तैरनुज्ञातः शेषं सेष्टः समाहि
तः । ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेहनि ४४ स्नातः शुचिर्यथोक्तेन विधिना सुसमाहि
३८ तः । पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनं ४५ पयोभक्षो व्रतमिदं चरेद्विष्णुं चेनोद्यतः । पू
र्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ४६ एवं त्वहरहः कुर्यात् द्वादशाहं पयोव्रतं । हरे
राराधनं होममर्हणं द्विजतर्प्पणं ४७ प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी । ब्रह्मचर्यम
धःस्वप्नं स्नानं त्रिषवणं चरेत् ४८ वर्ज्जयेदसदालापं भोगानुच्चावचांस्तथा । अहिंस्रः सर्व
भूतानां वासुदेवपरायणः ४९ त्रयोदश्यामथो विष्णोः स्नापनं पंचकैर्विभोः । कारयेच्छास्त्र
दृष्टेन विधिना विधिकोविदैः ५० पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः । चरुं निरूप्य प
यसि शिपिविष्टाय विष्णवे ५१ शृतेन तेन पुरुषं यजेत सुसमाहितः । नैवेद्यं चातिगुणवद्द राम
द्यात्पुरुषतुष्टिदं ५२ आचार्यं ज्ञानसंपन्नं वस्त्राभरणधेनुभिः । तोषयेदृत्विजश्चैव तद्वि
८। द्ध्याराधनं हरेः ५३ भोजयेत्तान्गुणवतासदन्नेन शुचिस्मिते । अन्यांश्च ब्राह्मणाञ्छक्त्या ये च ३८
तत्र समागताः ५४
धुभिः सहितः तस्यां रात्र्यां ब्रह्मचारी सन् श्वोभूते प्रभाते सति ४४ । ५ पय एव भक्ष्यं
आहारो यस्य ४६ । ७ अधः स्वप्नं शयनं ४८ ४९ पंचकैः पंचामृतैः ५० ५४ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८॥ ४७ मयावेतसमुदाहृतं ५८ ५९ सर्वयज्ञारम्भो ऽयंयज्ञः सर्वव्रतमितिचस्मृतं तेनमेनहृतं ६० २ ॥ अष्टमेषोडशः॥
ततः सप्तदशेऽदित्या कृतेतस्मिन्व्रते हरिः तत्कामपूरणायादौ तत्पुत्रो ऽभूदितीर्यते १ ५ प्रीतिविक्र
६१ दक्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथार्हतः अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ५५
भुक्तवत्सु चसर्वेषु दीनांधकृपणादिषु विष्णोस्तत्प्रीणनंविद्वान्भुंजीतसहबंधुभिः ५६
नृत्यवादित्रगीतैश्चस्तोतिभिः स्वस्तिवाचकैः कारयेत्तत्कथाभिश्चपूजांभगवतोऽन्वहं
एतत्पयोव्रतंनामपुरुषाराधनंपरं पितामहेनाभिहितंमयातेसमुदाहृतं ५८ त्वंचाने
नमहाभागसम्यक्चीर्णेनकेशवं आत्मनाशुद्धभावेननियतात्माभजाव्ययं ५९ अयं
वैसर्वयज्ञाख्यः सर्वव्रतमितिस्मृतं तपः सारमिदंभद्रेदानंचेश्वरतर्पणं ६० तएवनि
यमाः साक्षात्तएवचयमोत्तमाः तपोदानंव्रतंयज्ञोयेनतुष्यत्यधोक्षजः ६१ तस्मादेवद्व
तंभद्रेप्रयताश्रद्धयाचर भगवान्परितुष्टस्तेवरानाशुविधास्यति ६२ इतिश्रीभागवते
महापुराणेअष्टमस्कंधेकश्यपादितिसंवादोनामषोडशोऽध्यायः शुकउवाच इत्युक्ता
साऽदितीराजन्स्वभर्त्राकश्यपेनवै अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयंत्ये
कयाबुद्ध्यामहापुरुषमीश्वरं प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रया
बुद्ध्याभगवत्यखिलात्मनि वासुदेवेसमाधायचचारहपयोव्रतं ३ तस्याः प्रादुरभूत्तातभ
गवानादिपुरुषः पीतवासाश्चतुर्बाहुः शंखचक्रगदाधरः ४ तंनेत्रगोचरंवीक्ष्यसहसो
त्थायसादरं ननामभुविकायेनदंडवत्प्रीतिविक्लवा ५ सोत्थायबद्धांजलिरीडितुंस्थि
तानोत्सेहेआनंदजलाकुलेक्षणा बभूवतूष्णींपुलकाकुलाकृतिस्तद्दर्शनात्युत्सवगात्र
वेपथुः ६
लबाढं वसाबद्धांजलिः सती स्थितांकेवलंईडितुं पुनर्नोत्सेहेतुशशाक अ
पितुलस्मींबभूवाकथंभूताआनंदजलेईक्षणेयस्याः पुलकैराकुला आकृतिर्देहोयस्याः तस्यदर्श

यमे

१कुले

नगोग॥ पुरुसव॥ तेनगानेवपष्ठकायाधिकाश॥ ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स्का०

नुष्टाव पिबतीवाक्षिभिः क्षमोणे निर्यक्रियाभेदात् सत्यस्य परस्य द्विरुक्तिर दोषः ७ अयुक्तोविनिर्जित्य
देत्यानन्दा जितानपि भक्तात्र सितु मीशास्त्व मित्य स्तोद दिति स्त्रिभिः यज्ञेशत्यादि दशभिः संबो
धनैस्तत्राशंक्य किमपि नाम्नाति निवर्दतीप्रार्थयन्तशंनः हे धिकुरु यतोदीनानां नाथोसितं तीर्थश्रवः
कीर्तिर्यस्य श्रवणमेव मंगलं यस्य तन्नामधेयं यस्य। आपन्नानां शरणगतानां लोकानां व्रजिनाप
शमाय उदयो यस्य ८ भन्नमहतेनमः महत्वेहतवः विश्वाय। विश्वस्य भवन स्थिति संयमार्थं स्वे

धात्यर्शनैर्गद्गदयागिराहरिंनुष्टावसादेव्यदितिः कुरुद्वह ७ वीक्षतीसापिवतीवचक्षी
षा रमापतिं यज्ञपतिं जगत्पतिं ७ अदितिरुवाच यज्ञेशयज्ञपुरुषाच्युततीर्थपादतीर्थ
कर श्रवः श्रवणमंगलनामधेय आपन्नलोकव्रजिनोपशमोदयायशंनः कृधीशभगवन्न
३८९ सिदीननाथः ८ विश्वाय विश्वभुवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भू
म्ने स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ९ आयुः परं
वपुरभीष्टमतुल्यलक्ष्मीर्द्यौर्भूरसाः सकलयोगगुणास्त्रिवर्गः ज्ञानं च केवलमनंत भवं
ति तुष्टात्वत्तो नृणां किमु सपत्नजयादिराशीः १० शुक उवाच अदित्यैवं स्तुतो राज
न्भगवान्पुष्करेक्षणः क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ११

रं गृहीताः पुरुशक्तयो मायायाः गुणा येन तस्मै तथापि स्वस्थाय अच्युत स्वरूपाय कुतः शश्वदुपबृंहि रा० राम
तः नित्या जिताय पूर्णबोधस्तेन व्यापादितं नित्यं निरस्तं आत्मनि तमो मायालक्षणं येन ३८९
तस्मै ९ अस्मदीयमनोरथपूरणमीषत्कर मेवत्वत्तः किमुत्पकल्पायनाह आयुः परं ब्रह्मायु
रपि द्यौः स्वर्भूः अरसातलं च द्यौर्भूरसाः द्यौरिति पृथक् पाठे भूः अरसा अविलस्वर्गादि
ति विग्रहः रसेतिपाठे त्रीणिपदानि सकला योगगुणा मादयः क्षेत्रज्ञः अंतर्यामी ११

अणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेमो २

भा०भा० सपत्नैर्हता श्रीर्येषां स्वधामनः स्याविताना च पुत्राणां संबंधियत्तु तत्कृत्यं त्वया श्रीरमा कांक्षितं मया विज्ञातं
कांक्षितमेवाह तानिति त्रिभिः प्रतिलब्धाजयश्च श्रीश्च यैस्तैः पुत्रैः सह उपासितुं एकत्र स्थातुं मिच्छ
सि १३ प्रत्याहृतं यशश्च श्रीश्च यैस्तान् १५ अपारणीयाः अनतिक्रमणीयाः यद्यस्मात् अनुकूले

श्रीभगवानुवाच देवमातर्भवत्या मे विज्ञातं चिरकांक्षितं यत्सपत्नैर्हतश्रीणां च्यावितानां स्वधामतः १२ तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं १३ इन्द्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषां स्त्रियो रुदन्तीरासाद्य द्रष्टुमिच्छसि दुःखिताः १४ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि १५ प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति १६ अथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्यया ते ममार्चनं नार्हति गन्तुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् १७ त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनानुगुणं समीडितः स्वांशेन पुत्रत्वमुपेत्य ते सुतान्गोप्तास्मि मारीचतपस्यधिष्ठितः १८ उपाधाव पतिं भद्रे प्रजापतिमकल्मषं मां च भावयती पत्यावेवंरूपमवस्थितं १९ नैतत्परस्मा आख्येयं पृष्टयापि कथंचन सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं २० श्रीशुक उ० एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् २१

ईश्वरः कालो येषां ते विप्रैर्गुप्ता रक्षिताः अनुकूले ईश्वरे समर्थे विप्रैः गुप्ता इति वा १६ मम मयार्चितं त्वयैव तत्र हेतुः संतोषितस्येत्यादि श्रद्धानुरूपं इच्छानुसारेण फलहेतुत्वात् १७ मारीचस्य तपसि अधिष्ठाय स्थितः सन् गोप्तास्मि पालयिष्यामि अतः पतिमुपाधाव भजस्व १९ देवानां गुह्यं रहस्यं संवृतं सुसंवृतं गुप्तं सत् संपद्यते सिध्यति २० प्रभोः हरेरात्मनि जन्म लब्ध्वा २१ राम राम

राम
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविततथमीक्षणं हृष्टियस्य सः॥ २२ ॥ अनिलो यथा सर्वत्र समो अपि दारुणि सं घर्षणेन वनदाहकम् अग्निम् आ
धत्ते एवं त्वयं पुत्रेषु समो अपि देवेत्यक्षपणं वीर्यम् आधत्त इत्यर्थः॥ २३ ॥ धिष्ठितं अधिष्ठाय स्थितं सम् ईडितुं श
वेत्यर्थः॥ २४ ॥ अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्याः गर्भाय अर्भकाय वेदाः गर्भे यस्य य
द्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः॥ त्रयो लोका नाभौ यस्य सः॥ त्रिणाभः॥ तस्मै त्रयाणां
लोकानां पृष्ठे उपरि स्थितायः॥ शिपिशब्देन पशवो जीवा वा तेषु अन्तर्यामितया प्रविष्टाय यज्ञो वै विष्णुः प

स एवं समाधियोगेन कश्यपस्तद् अबुध्यत। प्रविष्टम् आत्मनि हरेरंशं ह्यवितथेक्षणः॥ २२ ॥ सोऽदितौ
वीर्यमाधत्त तपसा चिरसंभृतं। समाहितमना राजन् दारुण्यग्निं यथाऽनिलः॥ २३ ॥ अ
दितेर्धिष्ठितं गर्भं भगवन्तं सनातनं। हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः॥ २४ ॥ ब्रह्मो
वाच जयोरुगाय भगवन्नुरुक्रम नमोऽस्तु ते। नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः॥
२५ ॥ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे। त्रिणाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे॥ २६ ॥ त्वमादि
रन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः। कालो भवानाक्षिपतीश विश्वं स्रोतो
यथान्तः पतितं गभीरं॥ २७ ॥ त्वं वै प्रजानां स्थिरजङ्गमानां प्रजापतीनामसि संभविष्णुः।
दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु॥ २८ ॥ इति श्रीभागवते महा
पुराणे अष्टमस्कंधे भगवदवतारे सप्तदशोऽध्यायः॥ श्रीराम श्रीकृष्ण समर्थ॥

शिपिविष्टाय ५

शब्दः शिपिर्यज्ञ एव पशुषु प्रतिनिष्ठतीति श्रुतेः॥ यद्वा शिपयो रश्मयस्तैरेवेष्टितायेत्यर्थः॥ तथापि विष्णवे व्यापिने॥ २६ ॥
अन्तः पतितं तृणादि यथा गभीरं स्रोत आक्षिपति आकर्षति तथा कालात्मा भवान् विश्वम् आक्षिपति॥ २७ ॥ प्र
जापतीनां त्वमेव संभविष्णुः॥ उत्पादनशीलोऽसि अयं भावः॥ न ह्येवंभूतस्य तव जन्मादि संभवः॥ किंतु
देवानां प्रजापतीनां प्रजानां परमाश्रयत्वेन तत्कार्यसाधनाय यत्नोऽयं अतस्तान् स्वर्गच्युतान् पुनः॥
तं

गुणाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्तस्यादेशं भूत्वा वामनः सत्कर्त्तोः खिले। यज्ञं गतस्ततस्तेन सत्कर्त्योक्तो वरानूवृणु इत्थं विरिञ्चिन स्तुतं कर्म
चेष्टव कार्यलक्षणं वीर्यं च प्रभावो यस्य स हरिः रदित्यां प्रादुर्बभूव तित्रयाणामन्वयः। अमृतभूः मृत्युजन्मभू
टि २ न्यः शंखगदाब्जचक्राणि यस्य स तीतथा अद्भुत्रादित्विन मत्वर्थीयाप्रत्ययः। अविसर्गपाठे सचासौ पिशंगवा
श्र १ साश्च। रुषराजो मकरः तदाकारयोः कुंडलयोस्त्विषा उल्लसती श्रीर्वदनांबुजं यस्य। श्रीवत्सो वक्षसि यस्य
वलये रंगदैश्च सहोल्लसंति किरीटादीनि यस्य २ श्रीमत्या वनमालया विराजितः वेश्मगतं तमः ३ अग्निजि

शुक उवाच इत्थं विरिंच्यस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां चतुर्भुजः शंखगदाब्जच
क्रः पिशंगवासा नलिनायतेक्षणः १ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः श्र २
पुमान् श्रीवत्सवक्षा वलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः २ मधुव्रतव्रातविघुष्टया
स्वया विराजितः श्रीवनमालया हरिः प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कंठनिविष्ट
कौस्तुभः ३ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः द्यौरंत
रिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ४ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभि
जिति प्रभुः सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणम् ५ श्रीराम श्रीराम श्रीराम श्री

होत्वाः नगाः पर्वताः ४ तस्याद्रुर्भावसमयमाह श्रोणायामिति भाद्रपदशुक्लद्वादशी श्रवणद्वादशीति
प्रसिद्धा तस्यां तत्रापि श्रोणायां श्रवणस्थे चंद्रे इत्यर्थः तत्रापि श्रवणस्य प्रथमांशे अभिजिति नक्षत्रा
त्मकेत्यादशिति अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अधस्तात् श्रोणायाइति एवं विशिष्टमुहूर्त्ते प्रभुः
प्रादुर्बभूवेत्यर्थः किंच नक्षत्राण्यश्विन्यादीनि ताराशब्देन ताराग्रहा गुरुशुक्रादयः ते आद्या येषां
ते सूर्यादयोऽपि सर्वे तस्य जन्म दक्षिणं उदारं चक्रुः जन्ममुहूर्त्तं गुणावहं वा चक्रुरित्यर्थः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं० ८ अ० ११ ४९ विशेषांतरमाह यस्यां द्वादश्यां हरेर्जन्म तत्तस्यां महन्त्येव विदुः तदा च मध्यंदिनगतः सविता तिष्ठन् सा च द्वादशी वि
जयानाम प्रोक्तेत्यन्वयः ६ शंखादयो येषां अन्येषां च चित्रतूर्याणां निर्घोषोः भवत् ७ देवा मनवङ्ग्यादि
नां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ८ १० विस्मयांतरमाह यत्तद्वपुर्हरि धारयत् प्रकटितवान्

ह। द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप। विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ६ शंखदुंदुभयो
नेदुर्मृदंगपणवानकाः। चित्रवादित्रतूर्याणां निर्घोषस्तुमुलो भवत् ७ प्रीताश्चाप्सरसोऽनृ
त्यन् गंधर्वप्रवरा जगुः। तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ८ सिद्धविद्याधरगणाः स किंपुरु
षकिन्नराः। चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ९ गायंतोऽतिप्रशंसंतो नृत्यंतो विबुधानुगाः।
अदित्या आश्रमपदं कुसुमैः समवाकिरन् १० दृष्ट्वादितिस्तं निजगर्भसंभवं परं पुमांसं मु
दमाप विस्मिता। गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ११ यत्तद्वपु
र्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः। बभूव तेनैव स वामनो बटुः संपश्यतोर्दिव्यग
तिर्यथा नटः १२ तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः। कर्माणि कारयामासुः पुरस्कृत्य प्रजापति
म् १३ तस्योपनीयमानस्य सावित्रीं सविताब्रवीत्। बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् १४
ददौ कृष्णाजिनं भूमिर्दंडं सोमो वनस्पतिः। कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः १५ कम
ण्डलुं वेदगर्भः कुशान्सप्तर्षयो ददुः। अक्षमालां महाराज सरस्वत्यव्ययात्मनः १६ तस्मा इ
त्युपनीताय यक्षराट् पात्रिकामदात्। भिक्षां भगवती साक्षादुमादादंबिका सती १७ श्री

टी। तेनैव वपुषा मातापित्रोः संपश्यतोः स वामनो बटुर्भवत् दिव्यगतिः अद्भुतचेष्टितः स्वयं कथंभूतः अव्यक्त
चिद्रूपः कथमधारयत् भाति दीप्तिः विभूषणानि च आयुधानि च तैः व्यक्तो यथा भवति तथा १२ कर्मा
णि जातकर्मादीनि १३ ४ वनस्पतिः वनानां पतिः सोमः १५ १६ पात्रिकां भिक्षापात्रीं १७ ॥

जयजयजगदादे नादिमध्यांतविष्णो सकलभुवनसृष्टित्राणसंहारहेतो। परमपुरुष पद्मानाथि कानायकस्त्वं
कनककमलनेत्रोऽनंतनत्तो गींऽद्राप्यिन् ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सएवं संभावितो मारिषः श्रेष्ठावटुर्ब्रह्मवर्चसेन ब्रह्मर्षिगणासंजुष्टं तामसभामतिक्रम्यारोचत १९ यदर्थं वटुर्वि
भुवनदाहस्केत्वत्यादियावत्समाप्तियजमानं यजुतं भृगुणां भृगुभिः उपकल्पितो प्रवर्तितो । अखिलेन
सारणवलेन संभृतो संपूर्णः १० नर्मदायाउत्तरतटे भृगुकच्छसंज्ञकक्षेत्रे क्रतून्मंप्रवर्त्तयंतायबलेः

सब्रह्मवर्चसेनैव सभां संभावितोवटुः ब्रह्मर्षिगणासंजुष्टामत्यरोचतमारिष । १८ समिद्धमाहितं
वह्निं कृत्वा परिसमूहनं परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोन्द्विजः १९ क्रतवा अश्वमेधैर्यजमा
नमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः । अजगाम तत्राखिलसारसंभृतो भारेण गांसमनमयत्प
देपदे २० तं नर्मदायास्तट उत्तरे बलेर्यत्रत्विजस्ते भृगुकच्छसंज्ञके । प्रवर्त्तयंतो भगवः क्रतूत्तम
व्यचक्षतारादुदितं यथा रविं २१ ते ऋत्विजो यजमानः सदस्या हततिविषा वामनतेजसा न्टप सूर्यः
मा ६ किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः २२ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्
क्यमाणो भगवान्स वामनः । सदंड छत्रं सजलं कमंडलुं विवेश विभ्रद्धयमेधवाटं २३ मौञ्ज्या
मेखलया वीतमुपवीताजिनोत्तरं जटिलं वामनं विप्रं मायामाणवकं हरिं २४ प्रविष्टं वीक्ष्य
स्व २ भृगवः सशिष्यास्ते सहाग्निभिः प्रत्यगृह्णन्समुत्थाय संक्षिप्तास्तस्य तेजसा २५ यजमानः प्रमु
दितो दर्शनीयं मनोरमं रूपानुरूपावयवं तस्मा आसनमाहरत् २६ स्वागतेनाभिनंद्याथ पा
दौ भगवतो बलिः अवनिज्यार्चयामास मुक्तसंगमनोरमं २७ श्रीराम श्रीराम श्रीरा

द्विजो भृगवः ते तं व्यचक्षत अपश्यन् आरात्समीपएवोदितं र विमिव २१ ते ऋत्विगादयः सूर्यः किलेत्येव
मादि व्यतर्कयन्निति शेषः २२ हयमेधवाटं अश्वमेधमंडपं विवेश । २३ उपवीताजिनं उपवीतं कृष्णाजि
नमेवउत्तरमुत्तरीयं यस्य । २४ संक्षिप्ताः अभिभूताः मताः २५ रूपस्यानुरूपा अवयवा यस्य तं दृष्ट्वे [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० अ० चंद्रमौलिश्चेत्यन्वयः । अपरोऽर्थे चकारः । चंद्रमौलिरपि गंगारूपं यन्मूर्द्धादधारेत्यर्थः ॥ ३१ ॥ हे आर्य त्वां साक्षात्
ब्रह्मर्षीणां तपो वयं मन्ये कथंभूतं तपः वपुर्द्धरं मूर्तिधारि ॥ ३२ ॥ ३३ ॥ त्वच्चरणावनेजनैर्वाभिर्हतमंहो यस्य त
स्यमपुनीतापवित्रीकृता ॥ ३४ ॥ मे मत्तः प्रतीच्छ गृहाण । हे अर्हत्तम पूज्यतम ॥ ३५ ॥ इति अष्टमे अष्टादशः ॥ ७ ॥

तत्पादशौचं जनकल्मषापहं स धर्मविन्मूर्द्ध्न्यदधात्सुमंगलं । यद्देवदेवो गिरिशश्चंद्रमौलि
र्दधार मूर्द्ध्ना परया च भक्त्या ॥ ३१ ॥ बलिरुवाच । स्वागतं ते नमस्तुभ्यं ब्रह्मन्किं करवाम ते । ब्रह्मर्षीणां ३२
तपः साक्षान्मन्ये त्वार्य वपुर्द्धरं ॥ ३२ ॥ अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलं । अद्य स्विष्टः क्रतु
रयं यद्भवानागतो गृहान् ॥ ३३ ॥ अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज त्वच्चरणावनेजनैः ।
हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ३४ ॥ यद्यद्वटो वांछसि तत्प्रतीच्छ मे
४२ त्वामर्थिनं विप्रसुतानुतर्कये । गां कांचनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्रकन्यां । ग्रामान्समृ
२ द्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ॥ ३५ ॥ इति श्रीभागवते महापुराणे अष्टमस्कंधे ब
लिवामनसंवादे अष्टादशोऽध्यायः ॥ श्रीशुक उवाच । इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतं । नि
शम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत् ॥ १ ॥ श्रीभगवानुवाच । वचस्तवैतज्जनदेव सूनृतं कुलो
चितं धर्मयुतं यशस्करं । यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः ॥ २ ॥

उनविंशे तु हरिणा याचितं च पदत्रयं । प्रतिश्रुतं च बलिना जानतानु भृगुरुवारयन् ॥ तातुः स्तौति स्वयं तुष्टि राम
रित्यादि प्रसक्तोचितं वक्तव्यमिति शिक्षं अस्मान् शिक्षयन्नाह वाम वचः । वच स्तवैतदिति षोडशभिः । हे ज ४२
नदेव सांपराये पारलौकिके धर्मे पितामहः प्रह्लादः प्रमाणम् ॥ २ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निःसत्वस्य लक्षणं। यो हि द्विजानये याचकाय प्रत्याख्यातानन्द्वमिति वृत्तौ। कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य याचा
न ददाति २ तीर्थवाला नावसेरयस्मिन् युष्मत्कुले ४ यतः१ यस्मिन् कुले जातः१ ५ क्ष्मोद्धारे भूम्यान्द्धरणे ६
पराङ्मुखः१ वहिर्द्दृष्टिः१ ९ अतो हृदये स्थितेन मौनज्ञास्यनीत्यर्थः निश्रित्याश्वासानिलं ३ तर्हितः१ सूक्ष्मादेहाय

नैव यत् तस्मिन् कुले कश्चिन्निःसत्वः१ कृपणः१ पुमान् प्रत्याख्यातःप्रतिश्रुत्य याचा ऽदाता द्विजानये ३
नसेनितीर्थयुधिवा ऽर्थिनाथिनाः१ पराङ्मुखो यत्वे ऽमनस्विनान्दपाः१ युष्मत्कुले यद्यशसा ऽमले
नपङ्कात् तज्ज्ञातियथाद्धुपः१ रव ४ यत्तोजातो हिरण्याक्षश्चरन्नेकङ्मामही प्रतिवीरं दिग्विजय
नाविंदत गदायुधः१ ५ यं विनिर्जित्य कृच्छ्राणा विष्णुः१ क्ष्मोद्धारे आगतेनोत्मानं जयिनं मेने
तद्वीर्यं भूयेनु स्मरन् ६ निशम्य तद्वधं भ्राता हिरण्यकशिपुः१ पुरा हन्तुं भ्रातृहणं क्रुद्धो ज
गाम निलयं हरेः१ ७ तमायान्तं समालोक्य शूलपाणिं कृतान्तवत् चिन्तयामास कालज्ञो वि
ष्णुर्मायाविनां वरः१ ८ यतो यतोऽहं तत्रासौ मृत्युः१ प्राणभृतामिव अतोऽहमस्य हृदयं प्रवेक्ष्या
मि पराग्दृशः१ ९ एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशे ऽसुरेन्द्र श्वासानिलान्तर्हि
तसूक्ष्मदेहस्तत्प्राणरंध्रेण विविग्नचेताः१ १० स तन्निकेतं परिमृश्य शून्यमपश्यमानः१ कुपि
तो ननाद क्ष्मां द्यां दिशः खं विवरान्समुद्रान् विष्णुं विचिन्वन्न ददर्श वीरः१ ११ अपश्यन्निति हो
वाच मयान्विष्टमिदं जगत् भ्रातृहा मे गतो नूनं यतो नावर्त्तते पुमान् १२

स्यविनिमग्न मतिके पित्तचेतो यस्य अनुकंपितचित्त इति वास्तवो ऽर्थः१ १० न ददर्श अन्तः१ प्रविष्टत्वात् ११ पु
मान्यतः१ सकाशान्न वर्त्तते न हि हैव नूनं गतः१ नित्यमुक्तो वा इति वास्तवोऽर्थः१ १२ एवं स्वरूपं पर्यंतमखं
डं विष्णोर्वैरं यत्स्मृतवान् तदुचितमेव तस्यां प्रतिद्वंद्वमहाबलपराक्रमस्य अरोहं मानविजृंभितक्रोधानुबंधस्य॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ०
देहिनं

कथं नामासौ अरिशिरोमणिर्जीवन्नेव कानरवैरदेहं सुपसितवानित्याशंक्याह वैरानुबंधपं तावानाम त्योभवं तिदहनिगृढाभिमानवत्ता अराणां तथा अहमानेनापन्नहितां मनु अभवं स्यवायतोऽज्ञानप्रभवः अज्ञाननिर्वृत्तेः शाकुपाकपल्यागोमाश्रमेव्यत्युथुः एवमत्युप स्थितभैरवंडे विष्मावंरयत्क्तिनवासादुच्चिनमेव तस्याप्रतिहत्कमहावलपराक्रमस्य अरोहमानविज्ञ भितक्रोधानुबंधस्य १२ तदेवपूर्वजानुक्तो वा तत्पितरस्तामिपितेति द्विजवपधारिणा मेद्धिरेणा दवापंतनतु द्विजोऽइतितं द्विद्वानपि सयाचितः सन्

सेर

वैरानुबंधाणतावानामत्योरिहदेहिनां अज्ञानप्रभवो मनुरहमानोनापदंहितः १३ पितामहाद पुत्रांतदद्विद्वानु द्विजवत्सलः स्वमायु द्विजलिंगभ्योदेवेभ्योऽदात्सयाचितः १४ भवानाच्चरितानु धर्मानास्थितो गृहमेधिभिः ब्राह्मणैः पूर्वजैः अरैरन्यैश्चाद्दामकीर्तिभिः १५ तस्मात्वत्तो महीमीषद्वृणेऽहं वरदर्षभात् पदानित्रीणिदैत्येंद्र संमितानिपदामम १६ नान्यत्तेकामयराजन्वदान्या ज्जगदीश्वरात् नेनः प्राप्नोतिवैविद्वान्यावदर्थप्रतिग्रहः १७ वलिरुवाच अहो ब्राह्मणदायादवाचस्ते वृद्धसंमताः त्वंबालोबालिशमतिः स्वार्थंप्रत्यबुधोयथा १८ मांवचोभिः समाराध्य लोकानामेकमीश्वरं पदत्रयंवृणीतेयोऽबुद्धिमान्द्वीपदाशुषं १९ नपुमान्मामुपव्रज्य [illegible] भूयायाचितुमर्हति तस्माद्वृत्तिकरीं भूमिं वटोकामं प्रतीछमे २०

४३

याञ्चाकारणं

स्वायमायुर्देवेभ्यादद्दौ १४ ममपदासंमितानीतित्रिविक्रमपदाभिप्रायेण नचान्यत्त वादः तत्रापिस्वपदत्वानपुगमात् १५ यावदर्थमेवप्रतिग्रहोयस्य सः १६ ईश्वरस्यापिर्याञ्चाप्रकारे चोक्तावलेर्बंधनप्रश्नात्तरत्वेनतस्यगर्वोतिरेकेणाधिक्षेपप्रकारमाह अहोइतित्रिभिः तवाचोवृद्धानांसंमताः त्वंतुबालः वालिशमतिश्च वालिशानामज्ञानामिवमतिर्यस्य अत एव स्वार्थंप्रतियथावद्बुधः वस्तुतस्तु बालइवत्रवालिशमतिरितिछेदः स्वार्थंप्रत्यबुधइतिच भक्तानामवार्थं बुध्यसेन स्वार्थपरिपूर्णस्यतवनह्यतिरेकेण स्वार्थभावादित्यर्थः १८ अबुधत्वमेवाह मामिति द्विपस्यदाशुषंदा

नां अबुद्धिमानवमन्यमानो द्विमानिति चक्षुः कामंपश्य कुरुष्व मम
कादवपमात्यं [illegible] अतावकनाशकौंदाभ्यामिति २०

४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनरपिनिस्पृहत्वमेवाचिः कुर्वन्नाह यावंतइतिसप्तभिः नववर्षसमेतेन द्वीपेनापि सप्तानांद्वीपवराणांइच्छया
श्रीटी २ २२ तृष्णायाअंतंनगताइत्यस्माभिः २३ असंतुष्टस्तुप्राप्ते स्त्रिभिर्लोकैरपिनसुखंवर्त्तते २४ आशुशुक्ष

श्रीभगवानुवाच यावंतोविषयाःप्रेष्ठास्त्रिलोक्यामजितेंद्रियं नशक्नुवंतितेसर्वेप्रतिपूरयितुंनृप
२१ त्रिभिःक्रमैरसंतुष्टोद्वीपेनापिनपूर्यते नववर्षसमेतेनसप्तद्वीपवरेच्छया २२ सप्तद्वीपाधिप
तयोनृपावैन्यगयादयः अर्थैःकामैर्गतानांतंतृष्णायाइतिनःश्रुतं २३ यदृच्छयोपपन्नेनसंतुष्टो
वर्त्ततेसुखं नासंतुष्टस्तेत्रिभिर्लोकैरजितात्मोपसादितैः २४ पुंसोयंसंसृतेर्हेतुरसंतोषोर्थ
कामयोः २३ यदृच्छयोपपन्नेनसंतोषोमुक्तयेस्मृतः २५ यदृच्छालाभतुष्टस्यतेजोविप्रस्यवर्द्धते
तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः २६ तस्मात्त्रीणिपदान्येववृणेत्वद्वरदर्षभात् ए
तावतैवसिद्धोहंवित्तंयावत्प्रयोजनं २७ शुकउवाच इत्युक्तःसहसन्नाहवांछातःप्रतिगृह्य
तां वामनायमहींदातुंजग्राहजलभाजनं २८ विष्णवेक्ष्मांप्रदास्यंतमुशनाअसुरेश्वरं
जानंश्चिकीर्षितंविष्णोःशिष्यंप्राहविदांवरः २९ शुक्रउवाच एषवैरोचनेसाक्षाद्भगवान्वि
ष्णुरव्ययः कश्यपाददितेर्जातोदेवानांकार्यसाधकः ३० प्रतिश्रुतंत्वयैतस्मैयदनर्थमजा
नता नसाधुमन्येदैत्यानांमहानुपगतोनयः ३१ एषतेस्थानमैश्वर्यंश्रियंतेजोयशःश्रुतं दा श्री ८
स्यत्याछिद्यशक्रायमायामाणवकोहरिः ३२ त्रिभिःक्रमैरिमांल्लोकान्विश्वकायःक्र
मिष्यति सर्वस्वंविष्णवेदत्वामूढवर्त्तिष्यसेकथं ३३

णिरग्निः २६ सिद्धोहंकृतार्थःएतावतेवसर्वस्वापहारसिद्धेरितिगूढोभिप्रायः तदेवाह वित्तंहियावत्प्रयोजन
मेवसुखं अधिकस्यक्लेशावहत्वादित्यर्थः २७ ३० अनयः अन्यायः ३१ अन्यायमेवाह एषइति ३२ न
नुभेयोपदत्रयमेवप्रतिश्रुतंनाधिकंतत्राह त्रिभिरिति क्रमतामितिचेत्तत्राह सर्वस्वमिति ३३

भा०अ०

तथापिप्रतिश्रुतं संपादनीयमेवेति चेत्तत्राह क्रमत इति द्वाभ्यां एकेन पादन्यासेन भूमिं क्रममाणस्येत्यर्थः ता
र्तीयस्य तृतीयपदन्यासस्य ३४ ५ तथापिसर्वस्वदानात्कीर्तिनाशावङ्का विष्पत्तीति चेत्तत्राह नतद्दानमिति
तपः वित्तकाग्र्य कर्मपूर्त्त ननु तर्हि प्रतिश्रुत्यनृतिकथमनृतं वाच्यं तत्राह सोऽहं षड्भिः ३६ ७ अत्रापि
सत्यानृतव्यवस्थायां वेहृचश्रुत्या हि प्रथमं ओमिति सत्यं नेत्यनृतमित्यादिना सत्यानृते योर्लक्षण
पूर्वकस्तुतिनिंदाभ्यां सत्यं विहितं अनृतं च निषिद्धं अनंतरं चापरा गाथा एतद्रिक्तमक्षरमित्यादिना सत्य
कालेनदघा। दोषानृते च गुणानुत्क्वा तस्मात्काल एव दद्यात् तत्सत्यानृते मिथुनीकरोतीत्युपसंहारेणशनैसंकटादि

क्रमतोगांपदेकेन द्वितीयेन द्विविभोः खं च कायेन महता तार्तीयस्य कुतोगतिः ३४ निष्ठोतेन
४४ रेकमन्ये ह्यप्रदातुः प्रतिश्रुत्ताप्रतिश्रुतस्य याः निशः प्रतिपादयितुं भवान् ३५ नतद्दानं प्रशंसंति
येनवृत्तिर्विपद्यते दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ३६ धर्माय यशसेऽर्थाय कामाय स्व
जनाय च पंचधा विभजन्वित्तमिहामुत्र च मोदते ३७ अत्रापि वह्वृचैर्गीतं शृणु मे सुरसत्तम "
सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ३८ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते वृ
क्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ३९ श्रीराम श्रीराम श्रीराम श्रीराम श्रीरा

वनृतं मप्यनुज्ञातं तमिमं श्रुत्यर्थं दर्शयन्नाह ओमित्यंगीकारेणयत्प्रोक्तं तत्सत्यं नेति यदाह तदेवानृतं ४४
३८ ननु सत्यमीषदनृतं विना न सिध्यतीत्याशंक्य नाहा सत्यपुष्पफलं विद्यात् जानीयात् आत्मवृक्षस्य देह
रूपस्य वृक्षस्य कुतः गीयते श्रुत्योच्यत इत्यर्थः पाठांतरं तु सुगमाय द्यपि श्रुत्यावाचः सत्यं पुष्पफलं चे
त्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वादात्मवृक्षस्येति प्रस्तावसारेणोक्तं भवतु पुष्पफलस्थानी उ२
ये सत्यं ततः किमत आह वृक्षे देहे अजीवति तत्पुष्पफलं न स्यात् मानस्यादिति पाठश्रुत्युक्तायाः वा
चः परामर्शो देह आनृतं न रक्षणीय इत्याह अनृतं त्वात्मनो देहस्य मूलं ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेव दृष्टांतेन स्पष्टयति तद्यथा वृक्ष उत्पादितमूलः शुष्यति अचिराद्विवर्द्धते न पतति च एवं नमेनृतं यस्य स
आत्मा देहः शुष्यत् यद्यपि च आत्मा एवमेवानृतं वदन्नात्मानमाविमूलं करोतीत्येवं निंद्या ३ नृतं निषिद्धं तथा
प्युपसंहारानुसारेण तत्केवलानृतविषयमित्यपि प्रत्येवं व्याख्यातं देयं तत्त्वेन नतिचं तथैवोक्तेः तथा च श्रुतिः
फलं ४ ऊमिति सत्यं नित्यं नृतं तदेतत्पुष्पं वाचा यत्सत्यं महेश्वरा यशस्वी कल्याणकीर्तिर्भ[illegible]विता पुष्पं हि फलं वा
चः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्त्तते एवमेवानृतं वदन्ना
विर्मूलमात्मानं करोति स शुष्यति स उद्वर्त्तते तस्मादनृतं न वदेद्दयेत त्वेन[illegible] एकेन अनेन तु अमृतं नुद न तेर
यत्संकटेष्वात्मानं रक्षेदिति आत्यर्थः ४० सर्वथा सत्यवचनं देहानानिर्व[illegible]हेदिति स्फुटीकर्तुं सत्यस्य दा

तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्त्तते चिरात् एवं नष्टानृतः सद्य आत्मा शुष्यन्न संशयः ४० पराग्रिक्त
यत्किंचिद्दोमिति मीर२ मपूर्णं अक्षरं यत्तदोमिति तिं प्रयुज्यते न रिच्यते तेवै पुमान् ४१ भिक्षेव सर्वं मां कुर्यन्नाल्पं कामेन चात्म
ने अर्थतत्पूर्णमभ्यात्मं यच्चैतत्यन्नतवच्चः ४२ श्रीराम श्रीराम श्रीराम श्रीराम श्रीरा०

पानु अनृतस्य च गुणानाह पराग्रिक्ताभ्यां यदोमित्यक्षरं तत् पराक् दूरे अर्थं गृहीत्वा अंचतीति परा
क् रिक्तमिति श्रुतिपदस्य व्याख्यानं अपूर्णं वेद्यति तत्तस्मात् अर्थिने यत्किंचिदोमिति दास्यामीति प्रय
ुज्यते न रिच्यते न न्यूनो भवत् किं च भिक्षेव सर्वं मां कुर्वन् दास्यामीत्यगीकुर्वन् आत्मने कामेन नाल्प
योऽन्नान् भवति तेस्य भोगोनस्ति ध्रुवश्चेत्यर्थः तथा च श्रुतिः पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति
तद्यत्किंचोमित्याह नेवास्मै तद्रिच्यते स यत्सर्वमोंकुर्याद्रिच्यादात्मानं सकामेभ्यो नालं स्यादिति
४१ नेतियदनृतं वचः एतत्पूर्णमर्थव्ययाभावात् अभ्यात्मं चेति च कारात् लघः आत्मनोभिमुख
मन्यस्यार्थमाकर्षतीत्यभ्यात्मं यो हि नित्यं मम किंचिदपि नास्ति सोदामीति ब्रूते स हितेनानृतेन परस्या
मर्थानाकर्षतीति प्रसिद्धं ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 ननु तर्हि इदमनृतमसंगतमिव सर्वं हासेव्यं स्यात् नेत्याह सर्वमिति। तथा च श्रुतिः अथैतत्पूर्णमभ्यात्मं यत्रेति सय
त्सर्वं नेति ब्रूयात्पापिकास्य कीर्त्तिर्जायते सेनं तत्रैव हन्यादिति अनृतस्तुतिसंकटादिष्वनृतेन दोषो यत्तत्पूर्वसंहरति
स्त्रीषु प्रात्साहनेन वशीकारे नर्मणि परिहासे विवाहे च वरादिस्तोतागवां ब्राह्मणानां च हितार्थे हिंसायां च
कस्यचित्प्रासायां तथा च याज्ञवल्क्यः वर्णिनां हि वधो यत्र यत्र साक्ष्यमनृतं वदेदिति तथा च श्रुतिः तस्मात्को ७१

सर्वं नेत्यनृतं ब्रूयात्स दुःकीर्तिः श्वसन्मृतः। स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे गोब्राह्म
णार्थे हिंसायां नानृतं स्याज्जुगुप्सितं ४३ इति श्रीभागवते महापुराणे अष्टमस्कंधे वामनप्रा
दुर्भावे एकोनविंशोऽध्यायः। श्रीशुक उवाच बलिरेवं गृहपतिः कुलाचार्येण भाषितः। तूष्णीं
४५ भूत्वा क्षणं राजन्नुवाचावहितो गुरुं १ बलिरुवाच सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनां
७२ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् २ स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजं प्रति
श्रुत्य ददामीति प्राह्रादिः कितवो यथा ३ न ह्यसत्यात्परोऽधर्म इति होवाच भूरियं सर्वं वो
ढुमलं मन्ये ऋतेऽलीकपरं नरं ४ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् न स्थानच्य
वनान्मृत्योर्यथा विप्रप्रलंभनात् ५ राम०

त एव दधातु कालेन दधात्वसत्या न तेभ्यिथुनीकरोतीति ४३ अष्टमे एकोनविंशः। विंशे त्वनृतभीतो
सो ज्ञात्वाऽपि कपटं हरेः। ददावेव ततो विष्णुः सहसाऽवर्द्धताद्भुतं १ भगवतान्वयाप्रोक्तं सत्यं किंतु राम
योऽर्थकामादिकं न बाधेत स गृहमेधिनां धर्म इति २ कथं प्रत्याचक्षे निराकरोमि ३ ४ नन्वप्रत्या ४५
ख्याने दोषा उक्ताः तत्राह नाहमिति अधन्यात् दारिद्र्यात् मृत्योरपि ५ राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्यत्र धनादिकं तत्सर्वं संपरेतं मृतं पुरुषं हास्यति त्यक्ष्यत्येव तत्किमिति जीवन्नेव स्वयं न दद्यामिति भावः तथापि तावद्वृत्तिसंकटप
रिहारार्थं अंके दीयतामिति चेत् तत्राह तस्येति विप्रश्चेत्तेनार्थनं दत्तं नापि न तुष्यत् तर्हि तस्यार्थस्य त्यागदानेन किं निमित्तेन किं
चित् याचितादल्पस्य दानेन विप्रस्यासंतोषेण दानं व्यर्थमेव स्यात् अतः सर्वमेव तस्मै संदेयं न तु किंचिदिति भावः ८ नहि नदेयमेव
निचेत्तत्राह श्रेय इति दुस्त्यजैरसुभिरपि को विकल्पो विचारः ९ यद्दैत्येंद्र युद्धः निवर्त्तिभिरियं भूर्बुभुजे उपभुक्ता येषामि

मू० यद्यद्धास्यति लोकेस्मिन्संपरेतं धनादि‍" तस्य त्यागनिमित्तं किं विप्रस्तुष्येन्न तेन चेत् ८ श्रेयः कुर्वंति भूता
नां साधवो दुस्त्यजासुभिः दध्यङ् शिबिप्रभृतयः को विकल्पो धरादिषु ९ यैरिबुभुजे ब्रह्मन् दैत्येंद्रैः श्लो० २
निवर्त्तिभिः तेषां कालोग्रसील्लोकान्न यशोधिगतं भुवि १० सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः
न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ११ मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दु
र्गतिः कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वांछितं १२ यजंति यज्ञं क्रतुभिर्यमादृता भवंत
आम्नायविधानकोविदाः स एव विष्णुर्वरदोस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने १३

ह लोकान् परलोकांश्च भोगानिति वा कालो ग्रसीत् संहृतवान् न तु भुवि तै रधिगतं प्राप्तं यशो ग्रसीत् अतः की
र्त्तिरेव साध्या नान्यदिति भावः १० देहत्यागादपि धनत्यागे कीर्त्तिर्भवतीत्याह सुलभा इति तनुं त्यजंतीति तथा तीर्थे
पात्रे आगते दुष्करो धनत्यागः एवं मया कार्य इति भावः ११ तर्हि निर्धनत्वेन दैन्यं स्यादिति चेत्तत्राह मनस्विन इति"
८।३।१९।३ ते यावद् दृशतां दृशानामप्यर्थिनां कामोपनयेन कामपूरणेन दुर्गतिर्दैन्यमितियत् तच्छोभनं भद्रमेव भवादृशानां तु का
मोपनयेन दुर्गतिः शोभनमिति किं पुनर्वक्तव्यमित्यर्थः १२ ननु नायं वटुः किंतु विष्णुस्तव शत्रुरित्युक्ते तर्हि सुतरा
रामवदास्यामीत्याह यजंतीति परः शत्रुर्वास्तु १३ राम राम राम राम राम राम राम राम राम राम

मा ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि।

भा०श्रा० २ यद्यपि यशो न जिहासति तर्हि युद्धे मां हत्वा एनां भूमिं हरतु शयानेवा सम्यक् ज्ञातः सम्भ्रम चिंते शयीत निवासस्थानार्थः १३
अश्रद्धितं आज्ञातं श्रद्धे १४ १६ जालके मुक्ताभरणविशेषः तन्मालावती अवनेजनी नामया कलशं भृतं पूर्णे १७ २०

यद्यप्यसाऽवधर्मेणामांवध्नीयादनागसं तथाप्येनं न हिंसिष्ये भीतं ब्रह्मन्नतु रिपुं १२ एष वा उत्तमश्लो
को न जिहासति यद्यशः हत्वा मे गां हरेद्युद्धे शयीत निहतो मया १३ श्रीशुक उवाच एवमश्रद्धितं शिष्य
मनादेशकरं गुरुः शशाप दैवप्रहितः सत्यसंधं मनस्विनं १४ दृढं पंडितमान्यज्ञः स्तब्धोस्यस्मदुप
स्व० क्षया मच्छासनातिगो यस्त्वमचिराद्भ्रस्यसे श्रियः १५ एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् वाम
नाय ददावेनामर्चित्वोदकपूर्वकं १६ विंध्यावलिस्तदागत्य पत्नी जालकमालिनी आनिन्ये कलशं
हैमम् अवनेजन्यपां भृतं १७ यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा अवनिज्यावहन्मूर्ध्नि तदपो विश्वपा
४६ वनीः १८ तदासुरेंद्रं दिवि देवतागणा गंधर्वविद्याधरसिद्धचारणाः तत्कर्म सर्वेपि गृणंत आर्जवं
प्रसूनवर्षैर्ववृषुर्मुदान्विताः १९ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपूरुषकिन्नरा जगुः मनस्वि
नानेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयं २० तद्वामनं रूपमवर्धताद्भुतं हरेरनंतस्य गुणत्र
यात्मकं भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत २१ काये बलिस्तस्य
महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्ते २२

अवर्द्धत वांछातः प्रगृह्यतामिति बलिना पूर्वमुक्तत्वात् गुणत्रयमात्मनियस्य तत् अन्तर एवं भूः खमित्यादेर्यायद्यस्मिन् आ
सत स्थितवन्तः २१ ऋत्विगादि सहितो बलिस्तस्य हरेः काये एतद्विश्वं ददर्श २२ राम राम राम राम राम रा० राम
४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्देवश्च पश्यति रसामिति पादतलेनः सप्तभिः मारुतं गणं वायुसंघं इन्द्रसेनेः बलिसेनायस्यसः इन्द्रपदे स्थितत्वात् अचष्टेऽपश्यत् २३
आत्मास्वयं बलिर्मुख्यो येषां तान् असुरान् ऋक्षमालां नक्षत्रपंक्तिं २४ अंग हे राजन् समस्तरेफान् रेफाश्च शब्दान् २५ द्यौश्च द्यौ

प्रा। रसामचष्टांघ्रितलेऽथ पादयोर्महीं महीध्रान्पुरुषस्य जंघयोः पतत्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिन्द्रसेनः
२३ संध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीन् जघने आत्ममुख्यान् नाभ्यां नभः कुक्षिषु सप्तसिंधूनुरुक्रमस्यो हर
रसि चर्क्षमालां २४ हृद्यंग धर्मं स्तनयोर्मुरारेरृतं च सत्यं च मनस्यथेंदुं श्रियं च वक्षस्यरविंदहस्तां कंठे च सा
न४ मानि समस्तरेफान् २५ इंद्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि केशेषु मेघान् श्वसनं नासि
कायामक्ष्णोश्च सूर्यं वदने च वह्निं २६ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु अहश्च
रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभं २७ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं
छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च। २८ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणान् पु
नि४ षींश्च प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूतानि ददर्श वीरः २९ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः
कश्मलमापुरंग। सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषं ३० पर्जन्यघोषो जलजः पां
चजन्यः कौमोदकी विष्णुगदा तरस्विनी विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौ च ३१ ८१
सुनंदमुख्या उपतस्थुरीशं पार्षदमुख्याः सहलोकपालाः स्फुरत्किरीटांगदमीनकुंडलः श्रीवत्सरत्नोत्तम
मेखलांबरैः ३२

चासौ इन्द्रसेन २३ रतेः संरतसिक्कमणेषु पादन्यासेषु पूर्ध्वषधीजातीश्च २८ प्राणेष्विंद्रियेषु २९ सर्वात्मनीत्यादि वाक्यानंतं सर्वात्मनीत्यादि
सुदर्शनमित्यादीनामीशमुपतस्थुरित्युत्तरेणान्वयः ३० विद्याधरसंज्ञोऽसिः ३१ मीनकुंडले मकरकुंडले स्फुरत्किरी
टादीनि यस्यसः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुव्रतानां स्त्र जोयस्यां तयावनमालया श्रीवत्सादिभिश्च्या व्रतोव्याप उरुक्रमस्तत्सेवाह क्षितिमिति १

भा० श्ला० द्वितीयपदं क्रमेणाविक्षिप्तत्रिविष्टपं तृतीयं किंचिन्मात्रं जातं तृतीयाय तु न किंचिदपि नत्रहेतुः उरुक्रमस्यांघ्रिस्त्रिविष्टपा
म० दुपर्युपरिगच्छन् महर्जनाभ्यां तपश्च परं गतः सत्यलोकं गत इति ३४ अष्टमे विंशतिः एकविंशे पदाभ्युत्तिर्मिषेण बलिबंधनं वि
ऋ०षप्० ब्रह्मणा कृतमुत्कर्षं तस्य स्वख्यापयितुं जन उरुक्रमस्यांघ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह सत्यं सत्यलोके प्राप्तं नमं
घ्रि समीक्ष्य अब्जभवोऽभ्यगात् तथा मरीचिमिश्रादयश्चेति द्वयोरन्वयः कथं भूतोऽब्जभवः हरेर्घ्रेनखाप्रचंद्र:
मधुव्रतस्रग्वनमालयावृतो राजन् भगवानुरुक्रमः क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिश
जरा० श्चबाहुभिः ३३ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि उरुक्रमस्यांघ्रिरुपर्युपर्यथो म पद०
हर्जनाभ्यां तपसः परं गतः ३४ इति श्रीभागवते महापुराणेऽष्टमस्कंधे विंशतितमोऽध्यायः श्रीशुक उवाच
सत्यं समीक्ष्याब्जभवो नखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् मरीचिमिश्रा ऋषयो बृहद्व्रताः
४७ सनंदनाद्या नरदेव योगिनः १ वेदोपवेदा नियमा यमान्विता स्तर्केतिहासांगपुराणसंहिताः
ये चापरे योगसमीरदीपितज्ञानाग्निना रंधितकर्म्मकल्मषाः ववंदिरे यत्स्मरणानुभावतः स्वायं
भुवं धाम गता अकर्मकं २ अथांघ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकं समर्च्य भ
क्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयं ३ धातुः कमंडलुजलं तदुरुक्रमस्य पा
दावनेजनपवित्रतया नरेंद्र स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः
४ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ५ ये
राम तैर्हतस्वधाम्नो द्युतिर्यस्य सः स्वयं चैतैरावृतश्छन्नः हे नरदेव बृहद्व्रता योगिनश्च १ अंगानि शिक्षादीनि पुराणानि तत्सं ४७
कर्मफलं० हिताश्च योग एव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रंधितं दग्धं कर्मकल्मषं येषां ते च सर्वे नमे घ्रिं ववंदिरे यस्यांघ्रेः
स्मरणानुभावतः २ अकर्मकं कर्मभिरप्राप्यं विष्णोरंघ्रये ३ स्वयं यस्य नाभिपंकेरुहसंभवः तस्य विष्णोरंघ्रिं समभ्य० छो १
र्च्य ४ लोकत्रयं निमार्ष्टि पवित्रयति ५

भा०श्रा० ६ ७ ८ संक्षिप्तानुपसंहृता आत्मविभूतिः स्वविस्तारो येन ततेऽभेय यथापूर्वं वामनरूपेण स्थितायेत्यर्थः त्रिपदविषया व्याजयां
श्लोकपदपाश्चातयाचयः स्वभर्तुर्बलेर्महीं हृतां दृष्ट्वा तु ९ किम्भूतास्तदा हनवंडनि सोऽद्दि स्त्रिभिः १० ११ अनुचरा असुरा

भि० वीर्ये समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः धूपैर्दीपैः सुरभिर्लाजाक्षतफलांकुरैः ६ स्तवनैर्जयनादैश्च तद्वीर्यमहिमां
कितैः नृत्यवादित्रगीतैश्च शंखदुंदुभिनिस्वनैः ७ जांबवान् ऋक्षराजस्तु भेरीशब्दैर्मनोजवः विजयं दिक्षु सर्वासु महो
त्सवमघोषयत् ८ महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाञ्चया ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः ९ नवाऽयं ब्र
ह्मबंधुर्विष्णुर्मायाविनां वरः द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति १० अनेन याचमानेन शत्रुणा वटुरूपिणा स
र्वस्वं नो हृतं भर्तुर्न्यस्तदंडस्य बर्हिषि ११ सत्यव्रतस्य सततं दीक्षितस्य विशेषतः नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दया
वतः १२ तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः इत्यायुधानि जगृहुर्बलेरनुचरासुराः १३ ते सर्वे वामनं हंतुं शूल
पट्टिशपाणयः अनिच्छतो बले राजन् प्राद्रवन्जातमन्यवः १४ तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप प्रह=
स्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः १५ नंदः सुनंदोऽथ जयो विजयः प्रबलो बलः कुमुदः कुमुदाक्षश्च विष्व
क्सेनः पतत्रिराट् १६ जयंतः श्रुतदेवश्च पुष्पदंतोऽथ सात्वतः सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीं १७ ह
२ न्यमानान्स्वकान् दृष्ट्वा पुरुषानुचरैर्बलिः वारयामास संरब्धान् काव्यशापमनुस्मरन् १८ हे विप्रचित्ते हे राहो हे ने
मे श्रूयतां वचः मा युध्यत निवर्त्तध्वं न नः कालोऽयमर्थकृत् १९ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये तं नातिवर्ति
तुं दैत्याः पौरुषैरीश्वरः पुमान् २० यो नो भवाय प्रागासीदभवाय दिवौकसां स एव भगवानद्य वर्त्तते तद्विपर्ययं २१ ब
लेन सचिवैर्बुद्ध्या दुर्गैर्मंत्रौषधादिभिः सामादिभिरुपायैश्च कालं नात्येति वै जनः २२ भवद्भिर्निर्जिता ह्येते बहुशोऽनुच
राहरेः देवेनर्द्धास्त एवाद्य युधि जित्वा नदंति नः २३ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थ
त्वाय कल्पते २४

श्रा० १४ १८ अर्थकृत् अनुकूलः १९ पौरुषैस्तं कालमतिवर्त्तितुं पुमानीश्वरः समर्थो न भवति २० २२ हरेरनुचरा दैवात् देवेन ऋद्धाः
समृद्धा भवद्भिः २३ अर्थत्वाय आनुकूल्याय २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्क्रा० २५ विष्णुपक्षिणुराजनइति विराट् प्रभोश्चिकीर्षितं ज्ञात्वा अयमर्थः। अस्य सर्वस्वापहारेण ममत्याभिमानं सत्योऽप्यदानेन दूषणं खीकारेणाह
कारमपि त्याजयित्वा परमानुग्रहं कर्तुमिच्छति न चानेन तुल्योऽन्यः। कोपि सत्यसंधो धीरो वास्तीति तद्यशः प्रख्यापनार्थं किंचिन्नियमम
पीडनीतिप्रभोरभिप्रायं ज्ञात्वा तं बबंधेति सुत्येऽहनि सोमाभिषवदिने २६ रोदस्योः द्यावापृथिव्योः २७ २८ असौ सूर्यः। मया आक्रा
व्याप्तिनेत्स्पर्शः १ नेत्यन्वयः। खं च दिशश्च तनोः। तन्वा ते पादस्वं दत्तं यं सर्वस्वं गुरुणा शुक्रेणानुमोदितः सन् ३१ एवमुक्तोऽपि निरयपरिहारार्थं स्व

शुक उवाच पत्युर्निगदितं श्रुत्वा दैत्या दानवयूथपाः। रसां निर्विविशू राजन् विष्णुपार्षदताडिताः। २५ अथ तार्क्ष्यसुतो ज्ञा
त्वा विराट् प्रभुचिकीर्षितं बबंध वारुणैः पाशैर्बलिं सुत्येऽहनि क्रतौ। २६ हाहाकारो महानासीद्रोदस्योः सर्वतो दि
शं निगृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना २७ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः। नष्टश्रियं स्थिरप्रज्ञ
मुदारयशसं नृप २८ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय २९
४८ यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः यावद्वर्षति पर्जन्यस्तावती भूरियं तव ३० पदैकेन मयाक्रांतो भूर्लोकः खं
दिशस्तनोः स्वर्लोकस्ते द्वितीयेन पश्यतस्ते स्वमात्मना। ३१ प्रतिश्रुतमदातुस्ते निरये वास इष्यते विश त्वं निरयं
तस्माद्गुरुणा चानुमोदितः। वृथा मनोरथस्तस्य दूरः स्वर्गः पतत्यधः। ३२ प्रतिश्रुतस्याप्रदाता यः पार्थिनं विप्रल
भते विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना तद्व्यलीकफलं भुंक्ष्व निरयं कतिचित्समाः। ३३ इति श्रीभा
गवते महापुराणे अष्टमस्कंधे बलिनिग्रहो एकविंशोऽध्यायः। शुक उवाच एवं विप्रकृतो राजन् बलिर्भ
गवताऽसुरः। भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः। १ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

गोऽक्रोशापरिहारार्थं च मनोरथं कुर्वंतं प्रत्याह वृथेति यः प्रतिश्रुतस्य अप्रदानेन याचकं विप्रलंभते तस्य मनोरथो वृथैव स्वर्गश्च राम
तस्य दूर एव स च अधः पतत्येव ३२ त्वया चाहं विप्रलब्धः। ततस्माद्व्यलीकस्य अनृतस्य फलं निरयं भुंक्ष्वेति ३३ इति अष्टमे एकवि ४८
शः। द्वाविंशे तु प्रसन्नः सन् प्रस्थाप्य सुतले बलिं दत्त्वा वरान् हरिर्नूनं सत्त्वात्तद्द्वारपो भवत् संभर्पितत्तन्नचित्तनिमेखोचल
भक्तितः। छलितो बलिना चित्रं स्वमेवार्थ्य यदच्युतः। विप्रकृतः अपकृतः। भिद्यमानः सत्याच्चाल्यमानः। १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० श्रा० हे उत्तमश्लोक गिकालाक्षः ममवचनं ईरितं प्रति श्रुतं न चाव्यलीकं त्वयाकपटेन वामनतया भिक्षित्वा ऋ तेपांतरस्याविः कृतत्वात् एवमपि यदि भवानू व्यलीकं मन्यते तत्तथाऽपि ऋतमेव अहं करोमि. मदुक्तं विप्रलंभनं न भवतु मे शीर्ष्णि निजं तृतीयं पदं कुरु. नच द्वाभ्यां विश्वं आक्रान्तवता मेन व शिरः पदपर्याप्तं न भवतीति मन्य था. वित्तेन चेत्यद क्षय जातं तस्मादहं मधिकं मवस्यानू वित्तादपि वित्तवतोऽधिको वा इति भावः २ ननु चात्रा

घु० १ बलिरुवाच यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कुरु शीर्ष्णि मे निजं २ बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् नैवाऽर्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ३ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितम् यन्न माता पिता भ्राता सुहृदश्चादिशंति हि ४ त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः यो नोऽनेकमदांधानां विभ्रंशं चक्षुरादिशत् ५ यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः बहवो लेभिरे सिद्धिं यामु हैकांतयोगिनः ६ श्रीराम श्री०

परं धनं रक्षेद्दारान्रक्षेद्धनैरपि आत्मानं सततं रक्षेद्दारैरपि धनैरपि इत्यादि वचनादात्मभयपरिहाराय सर्वस्वं त्यज्यते त्वं तु कुतोऽभीतः सन्नात्मानमपर्यसि अत आह बिभेमीति असाधुवादात् अप्रकीर्त्त्या यथाहं भृशमुद्विजे तथा निरयादिभ्यो न बिभेमीति ३ ननु मया निग्रहात्तवापकीर्तिर्जातैव ने त्याह पुंसामिति अर्हत्तमेनार्पितं यं दंडं मातादयोऽपि न हि आदिशंति नैवार्पयंति हितैषिणा त्वया नुगृहीतोहं श्लाघ्यो वास्मीति भावः ४ नन्वहं देवानां हितैषी नासुराणां तत्राह त्वं नूनमिति पारोक्ष्यः शत्रुच्छलेन चतेमानः ५ शत्रुत्वं पुनर्भक्तानिवास्माननुगृहीतुमेवेत्याह यस्मिन्निति अत्र हा हप्रसिद्धे ६

भा०श्री० अंतानात्रममलञ्जानापिदुःखमित्याह तेनगुरुणाभवता ७ किंच। यापंदंडनूपोममानुग्रहस्त्वयाकृतः सत्व
केपात्रेत्वननत्वहमनुग्रहस्यपात्रमित्याशयेनाहपितामहइति भवदीयानोसंमतः यतः आविष्कृतः साधुवा
दोयस्य त्वमेवपरमः श्रीश्रेयायस्मः अतःभवतोविपक्षेणविद्विषाहिरण्यकशिपुनाचित्रंवेशसंहिंसांस
अथतस्मादहमपि दैवेन [illegible] अतिकंनीतः प्रसभंबलात् [illegible] जितः [illegible]

तेनाहंनिगृहीतोस्मिभवताभूरिकर्मणा बद्धश्चवारुणैःपाशैर्नोतिव्रीडेनचव्यथे ७ पितामहो
मेभवदीयसंमतः प्रश्रादश्चाविष्कृतः साधुवादः भवद्विपक्षेणविचित्रंवेशसंसंप्रापितः स्वचप
रमः स्वपित्रा ८ किमात्मनाऽनेनजहातियोंततः किरिक्थहारैः स्वजनाख्यदस्युभिः किं
जाययासंसृतिहेतुभूतयामर्त्यस्यगेहैः किमिहायुषोव्ययः ९ इत्थंसनिश्चित्यपितामहो
४९ महानगाधबोधोभवतःपादपद्मं ध्रुवंप्रपेदेह्यकुतोभयंजनाद्भीतःस्वपक्षक्षपणस्यसत्तम १०
अथाहमथाऽत्मरिपोस्तवांतिकंदैवेननीतःप्रसभंत्याजितश्रीः इदंकृतांतांतिकवर्तिजीवितंय
याऽध्रुवंस्तब्धमतिर्नबुद्ध्यते ११ शुकउवाच तस्येत्थंभाषमानस्यप्रह्लादोभगवत्प्रियः आज
गामकुरुश्रेष्ठराकापतिरिवोत्थितः १२ तमिंद्रसेनःस्वपितामहंश्रियाविराजमानंनलिनायतेक्ष
णं प्रांशुंपिशंगांबरमंजनत्विषंप्रलंबबाहुंसुभगंसमैक्षत १३ राम राम राम राम राम

प्रपितामहोपि ८ देहादीनामसारतांनिश्चित्याकुतोभयंध्रुवंचभवतःपादपद्ममेवप्रपेदे अथतस्मादहमपि
दैवेनतस्यैवभाग्येनतवांतिकंनीतः इतिचतुर्णामन्वयः अंततः आयुषेति रिक्थहारैः पुत्रैः इहगेहेषु राम
केवलमायुषोव्ययएवनतुसुखंकिंचित् ९ सःप्रसिद्धोमहान् स्वपक्षंदैत्यकुलंक्षपयतीतितथातस्यापि १० ४९
अथतस्मादहमपिदैवेनतस्यैवभाग्येनतवचअंतिकंनीतः प्रसभंबलात्त्याजितो आयस्ययया श्रियासाश्रम
तिः सनुमानिदंजीवितंमध्रुवंनबुध्यते कथंभूतं कृतांतस्यांतिकेवर्तिनिमित्तं संनिहितं ११ राकापतिःपूर्णेंदुः १२
अंजनत्विषंश्याम १३

भा० अ० स्वकृतेनाहंकारादिरूपापराधस्मरणेन सव्रीडं नीचीनमधोमुखं यस्य॥१४॥ शिरसानमन्नेव उपेत्य मूर्च्छीननामावले
लोकनमनुग्रहदृष्ट्यापुलकैः रश्रुभिश्च विक्लवो विह्वलः॥१५॥ त्वयैव निर्मितं दत्तं पदं मत्तदायं त्वया पहृतं किंतु खी
टी० क० ८ येमेव पुनः तन्न शोभनमेव कृतं। तत्र हेतुः मन्यइति यद्यस्मात् श्रीरेव यदात्ममोहनं च तस्मादिन्द्रं ईशिता॥१६॥ मो

तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत्। ननाम मूर्ध्नाश्रुविलोललोचनः सव्री
डनीचीनमुखो बभूव ह॥१४॥ स तत्र हासीनमुदीक्ष्य सत्पतिं हरिं सुनंदाद्यनुगैरुपासितं उपेत्य भू
मौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः॥१५॥ प्रह्लाद उवाच त्वयैव दत्तं पदमैंद्रमू
र्जितं हृतं तदेवाद्य तथैव शोभनं मन्ये महानस्य कृतोह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोह
नात्॥१६॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा तस्मै नमस्ते जगदीश्वराय
ते नारायणायाखिललोकसाक्षिणे॥१७॥ श्रीशुक उवाच तस्यानुशृण्वतो राजन् प्रह्लादस्य कृतांजलेः
हिरण्यगर्भो भगवानुवाच मधुसूदनं॥१८॥ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला प्रांज
उ० २ लिः प्रणतोपेंद्रं बभाषेऽवाङ्मुखी नृप॥१९॥ विंध्यावलिरुवाच क्रीडार्थमात्मन इदं त्रिजग
त्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युः कर्तुः प्रभोस्तव किमस्यत आवहंति त्यक्तह्रियस्त्व
दवरोपितकर्तृवादाः॥२०॥
हन त्वमेवाह यया श्रिया विद्वानपि यतः संयतोऽपि मुह्यते तत्तस्यां सत्यां कोऽन्यः पुमानात्मनो गतिं तत्त्वं यथाव
द्विचष्टे पश्यति तस्मै महाकारुणिकाय॥१७॥ तस्य प्रह्लादस्यानुशृण्वतः उवाचेति किं विह तं प्रष्टुं तदित्यर्थः॥१८॥
तदेव विंध्यावलिरपि तत्कृपयैव तो चसमानयुन् हिरण्यगर्भः क्षणं तस्थौ स्थितः अतोस्यास्माघवदाक्य प्रथ
ममवतारयति बद्धं वीक्ष्येति॥१९॥ त्रिजगतः कर्तुः प्रभोः पालकस्य अस्य तः सेहते अस्य ईश्वर स्यत वोन्य किमाव
हंति किं समर्पयति त्वया अवरोपितः कर्तृवादः कर्तारः स्वतंत्रा वयमिति वादमात्रमपि येषां ते अयं भावः लोकक
र्मया र्पितं तृतीयपदाय देहं समर्प्य प्रतिश्रुतं मत्तं करोमीति दहादिषु स्वाम्याविः कारणं भुवनत्रयं कुबुद्धि निर्लज्जाः
वि

यदि

× रस्य तत्त्वेन भवेत्तर्हि अयं मदनुग्रह एव। कथं तर्हि ध्रुवादिष्वेर्योर्थसंपदो दृष्टा सीतिचेत्तत्राह। मानएवस्तंभः अनमताः तस्य
निमित्तभूतानां समंततः सर्वश्रेयःप्रतिकूलानां जन्मादीनां सत्वेपि जन्मादिभि अथ सूतीयपंक्तौ २

भा०स्क० तदेवं प्रहादस्य विधावले अपरमार्थीनयापसंन्नाहरिः। ब्रह्मानुलोकाहृस्येच विज्ञापयति भूत। भावनेतित्रिभिः २१ नि
ग्रहानर्हत्वे हेतुः कृत्स्नेनेति सर्वस्वमेवाह आत्मेति २२ तदेवं कैमुत्यन्यायेनाह यस्य तव पादयोः सलिलमात्रमपि प्र
दाय सर्वां पूजां उत्तमां गतिं प्राप्नोति तेभ्यस्त्वभ्यमसौ बलिः त्रिलोकीं दाश्वान् दत्तवान् आर्तिं कथं प्राप्नुयात् २३
तस्य विशः अर्थान् नन्वथापहारः कामम् अनुगृह्णाम्यत्राह यन्मदः येनार्थेन मदो यस्य सः। अनताः अवसतः अन सन् म १

ब्रह्मोवाच भूतभावन भूतेश देवदेव जगन्मय मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं २१ कृत्स्नाते
नदत्ता भूर्लोकाः कर्मार्जिताश्च ये निवेदितं च सर्वस्वमात्माविक्लवया धिया २२ यत्पादयोरशठ
धीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वा
नविक्लवमनाः कथमार्तिमृच्छेत् २३ श्रीभगवानुवाच ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम नं
हं यन्मदः पुरुषः स्तब्धो लोकं मां चावमन्यते २४ यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः
५० नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत् २५ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः यद्य
ला २ स्य न भवेत्स्तंभस्तत्रायं मदनुग्रहः २६ मानस्तंभनिमित्तानां जन्मादीनां समंततः सर्वश्रेयःप्रतीपा
नां हंत मुह्येन्न मत्परः २७ एष दानवदैत्यानामग्रणीः कीर्तिवर्द्धनः अजैषीदजयां मायां सीदन्नपि
न मुह्यति २८ क्षीणरिक्थश्च्युतः स्थानात् क्षिप्तो बद्धश्च शत्रुभिः परित्यक्तो यातनामनुयापितः २९ राम शत्रुभिः ज्ञातिभि श्च

मदस्तं मेहत्त्वनामर्थनामपहार एवानुग्रह इत्यर्थः २४ दुर्लभं पुरुषजन्म कथंचित् लब्ध्वा तेनो जीवस्य जन्मादिनिमि
त्तो गर्वो महाहानिकरस्तस्य च नाशो मदनुग्राह्यदैवेत्याह यदेति द्वाभ्याम् अनीशः परतंत्रः संसरन् निजैः कर्मभिः ना
नायोनिषु कृमिकीटादिषु संसरन् २५ अत्र पौरुष्यां गतौ जन्मादिभिर्विलिवार्हतेह ब्रह्मन् मत्परो न मुह्येत्तत् अ राम ५०
तो भक्तस्य स्वेच्छया संपदा प्रदामि अभक्तस्य मुह्यदिति तदपहार एव मत्तस्यानुग्रहे कारणमिति भावः २६
अस्य च इदानीं मत्परत्वात् दैन्ये दुःखप्रापमपि दास्यामीति वक्तुं तस्य मोहाभावमाह एष इति त्रिभिः २८ २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेषतस्मिन्नकुले क श्रिद्भिः सत्वः कृपणः पुमानित्यादिनाछलैरेवमया धर्मउक्तः तथापितंधर्मेमयंनत्यजतिस्मेतःसत्यवाक् ३० ममयाश्रहमेवाश्रयःपालकोयस्यसः ३१ स्थानंप्रापितइतियदुक्तंतदेवस्थानमाह तावत्सावर्णिमन्वंतरपर्यंतंसुतलमध्यास्तामधिवसतेत्यर्थः यद्यस्मिन्निवसतोऽश्राध्यादयोममेक्षयानसंभवंति ३२ एवंब्राह्म
कु०
ग्राह्य० आ०

गुरुणाभर्त्सितः शप्तोजहौसत्यंनसुव्रतः छलैरुक्तोमयाधर्मोनायंत्यजतिसत्यवाक् ३० एष
मेप्रापितः स्थानंदुःप्राप्यममरैरपि सावर्णेरंतरस्यायंभवितेंद्रोमदाश्रयः ३१ तावत्सुतलं
मध्यास्तांविश्वकर्मविनिर्मितं यन्नाधयोव्याधयश्चक्लमस्तंद्रीपराभवः नोपसर्गोनिवसतां
संभवंतिममेक्षया ३२ इंद्रसेनमहाराजयाहिभोभद्रमस्तुते सुतलंस्वर्गिभिःप्रार्थितं ज्ञातिभिःपरिवारितः ३३
न त्वामभिभविष्यंतिलोकेशाः किमुतापरे त्वच्छासनातिगान्दैत्यांश्चक्रंमेसूदयिष्यति ३४
रक्षिष्येसर्वतोऽहंत्वांसानुगंसपरिच्छदं सदासंनिहितंवीरतत्रमांद्रक्ष्यतेभवान् ३५ तत्रदानव
दैत्यानांसंगात्तेभावआसुरः दृष्ट्वामदनुभावंवैसद्यःकुंठोविनंक्ष्यति ३६ इतिश्रीभागवतेमहा
पुराणेअष्टमस्कंधेबलिमोक्षणंनामद्वाविंशोऽध्यायः श्रीशुकउवाच इत्युक्तवंतंपुरुषपुरातनंम
हानुभावोऽखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्षणोभक्त्युत्कलोगद्गदयागिराब्रवीत् १

एवं प्रत्युक्त्वाकरुणापरवशः साक्षाद्बलिंप्रत्याह इंद्रसेनेतिचतुर्भिः ३३ त्वच्छासनंअतिगच्छंतिअतिवर्तंतेइतितथातान् ३४ तथापिभगवद्द्वियोगानंदनिदंतंप्रत्याहसदेति ३५ संगाद्यआसुरोभावः सविनंक्ष्यति ३६ अष्टमेद्वाविंशः त्रयोविंशबलोयातसुतलंसपितामहः उपेंद्रेणदिवंगत्वापूर्ववन्मोदतेहरिः १ बाष्पस्यकलाभिर्विंदुभिराकुलेईक्षणेयस्यभक्त्यापात्उत्कलः १ उक्तंठः १ रामराम राम राम राम राम राम

अहोनन्वप्राणमस्यमहिमा यदर्थंकृतः समुद्यमोवःप्रपन्नानांभक्तानांयोर्थः तस्यविधौअर्भकोपितस्यसंपादनेस
माहितः अप्रमत्तस्थितः यद्येनाद्यमेनलोकपालैरमरैः सत्वप्रधानैरपिअलब्धपूर्वस्त्वदनुग्रहः अपसद
नीचराजसमपिअर्पितः अयंभावः परमेश्वरायनुग्रहंवराकस्त्रिलोकीदत्तवानित्यतदास्तांप्राणमा
पिनसम्यक्कृतः किंतुतदर्थमुद्यममात्रंकृतंतेनचैकमेतत्पादानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहः सं

बलिरुवाच अहोप्रणामायकृतः समुद्यमः प्रपन्नभक्तार्थविधौसमाहितः यल्लोकपालैस्त्व
दनुग्रहोमरैरलब्धपूर्वोपसदेसुरेर्पितः २ शुकउवाच इत्युक्त्वाहरिमानम्यब्रह्माणंसभवंत
तः विवेशसुतलंप्रीतोबलिर्मुक्तःसहासुरैः ३ एवमिंद्रायभगवान्प्रत्यानीयत्रिविष्टपं पूर
यित्वादितेःकाममशासत्सकलंजगत् ४ लब्धप्रसादंनिर्मुक्तंपौत्रंवंशधरंबलिं निशा
म्यभक्तिप्रवणःप्रह्लादइदमब्रवीत् ५ प्रह्लादउवाच नेमंविरिंच्योलभतप्रसादंनश्रीर्न
शर्वः किमुतापरेन्ये यन्नोसुराणामसिदुर्गपालोविश्वाभिवंद्यैरभिवंदितांघ्रिः ६ यत्पा
दपद्ममकरंदनिषेवणेनब्रह्मादयः शरणदाश्नुवतेविभूतीः कस्माद्वयंकुसृतयः खल
योनयस्तेदाक्षिण्यदृष्टिपदवींभवतःप्रणीताः ७ रामराम राम राम राम राम

पादितः अहोत्वत्प्रणामप्रभावाश्चर्यमिति २ ३ अशासत्त्रैपिष्टपंद्युः सन्पालयामास ४ ५ दुर्गपालोसि
रक्षिष्यसर्वतोऽहमित्युक्त्वान् ६ हेशरणद आश्चर्यं हे यकुसृतयः दुष्टेनाः खलयोनयः तैरभूजानयस्त्व
त्वयंतस्यभवतोदाक्षिण्यदृष्टेः पदवींकस्मात्प्रणीताः बहुमानेनचित्तानुवर्त्तनेदाक्षिण्यंतेनयाद

२

५१

राम
५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ० के प्रियत्वादिति चेत् नहि एवं च नवे हितं अहो चित्रं किंतत् सर्वात्मनः समदृशश्च स्वभावो विषमइतियत्
तु सर्वात्मत्वं चित्रचरितं त्वे हेतुः अमिताऽचिंत्या योगमाया तया लीलया विसृष्टानि विरचितानि भुवनानि येन   न२
तस्य अहो इत्यत्र संधिरार्षः समदृक्त्वे हेतुः विशारदस्य सर्वज्ञस्य अथवा भक्तप्रियत्वेऽपि तव वैषम्यं
नास्त्येव यतः कल्पतरुस्वभावः सन्भक्तप्रियोसि नहि कल्पतरोराश्रितानामेव कामान्पूरयन्नपि विषमः

चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य सर्वात्मनः समदृशोविष
मः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ८ श्रीभगवानुवाच वत्स प्रह्लाद भद्रं ते प्रया
हि सुतलालयं मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ९ नित्यं द्रष्टासि मां तत्र गदापा
णिमवस्थितं मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः १० शुक उवाच आज्ञां भगवतो राज
न्प्रह्लादो बलिना सह बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः ११ परिक्रम्यादिपुरुषं स
र्वासुरचमूपतिः प्रणतस्तदनुज्ञातः प्रविवेश महाबिलं १२ अथाहोशनसं राजन्हरिर्ना
रायणोंतिके आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां १३ ब्रह्मन्संतनु शिष्यस्य कर्म
च्छिद्रं वितन्वतः यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् १४ शुक उवाच कुतस्तत्कर्मवै
षम्यं यस्य कर्मेश्वरो भवान् यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः १५ श्रीराम श्री०

भवतीत्यर्थः ९ मद्दर्शनेन यो महाह्लादः तेन ध्वस्तं कर्मबंधनमज्ञानं यस्य १० ३ कर्म वितन्वतः शिष्य
न२ स्य यत् छिद्रं मंत्रतंत्रनेजातं तत्संतनु विस्तारं संधत्स्व यजमानं विना कथं संधातव्यमिति न वाच्यमित्याह
यत्तदिति ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमवेक्षितमेव समं भवति किं पुनरनुष्ठितमित्यर्थः १४ भवान् यस्य सर्वेणापि भा
वेन वस्तुमात्रेण पूजितः तस्य कर्मसु कुतो वैषम्यं कथं भवतः कर्मणामीश्वरः प्रवर्तकः यज्ञेशः यज्ञ

भा०टी०स्कं०८ अ०२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० श्रा स्तावत्क्रजायस्मात्तुमंत्रतः स्वरादिभ्रंशेनतंत्रतः क्रमादिनांदेशात्ः कालतश्च अर्हतः पात्रतः वस्तुत हरे २
५२ स्तादक्षिणादिनायच्छिद्रं न्यूनत्वं तत्सर्वं तवानुकीर्तनमात्रमेव निः छिद्रं करोति १६ १७ इति शिरसाज्ञां प्रतिगृह्य बले

मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः सर्वं करोति निश्छिद्रं नामसंकीर्तनं तव १६ तथापि वद
तो भूमन्करिष्याम्यनुशासनं एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनं १७ शुक उवाच
अभिनंद्य हरेराज्ञामुशना भगवानिति यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह १८ एवं ब
लेर्महीं राजन्भिक्षित्वा वामनो हरिः ददौ भ्रात्रे महेंद्राय त्रिदिवं यत्परैर्हृतं १९ प्रजापति
पतिर्ब्रह्मा देवर्षिपितृभूमिपैः दक्षभृग्वंगिरोमुख्यैः कुमारेण भवेन च २० कश्यपस्यादि
तेः प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानामकरोद्वामनं पतिं २१ वेदानां सर्वदे
वानां धर्मस्य यशसः श्रियः मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः २२ उपेंद्रं कल्पयां
चक्रे पतिं सर्वविभूतये तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप २३ ततस्त्विंद्रः पुरस्कृत्य
देवयानेन वामनं लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः २४ प्राप्य त्रिभुवनं चेंद्र उ
पेंद्रभुजपालितः श्रिया परमया जुष्टो मुमुदे गतसाध्वसः २५ ब्रह्मा शर्वः कुमारश्च भृग्वा
द्या मुनयो नृप पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये २६ श्रीराम श्रीराम

यज्ञच्छिद्रं समाधत्त संदधे पाठांतरे समाधाय तामाज्ञां संपादितवानित्यर्थः १८ १९ देवाश्च ऋषयश्च भूमि ५२
पाश्च मनवः तैः सहितः २० २१ ननु लोकादीनां पतिरिंद्रः स्यात्सत्यं तथापि वेदादीनां कल्पं पालनदक्षं २२
वामनं उपेंद्रं कल्पयांचक्रे २३ देवयानेन मार्गेण विमानेनेति वा २४ २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ एतच्चरितंसर्वमाख्यातमितिविशेषात्तथाऽन्यान्यपिसंतीत्युक्तं तानितर्हिनिःशेषाणिवर्णनीयानीत्यपे
क्षायामाह पारमितितउरुबहुधाविक्रमतोविष्णोर्महिम्नः पारंयोगुणानांनोभवतिसमर्थः पार्थिवानिर
जांस्यपिविममेगणितवान् यथापार्थिवपरमाणुगणानमशक्यंतथाविष्णोर्गुणगणानमप्यशक्यमि
त्यर्थः तथाचमंत्रः विष्णोर्नुकंवीर्याणीति एतदेवमंत्रांतरार्थंसूचयन्नाह यस्यपुरुषस्यपूर्णस्य
महिम्नः पारं मंत्रदृक्ऋषिर्वसिष्ठः इतिएवमाह कथंकिंजायमानोजातोवाउपेतिनकोपीतिव
सुमहत्कर्मतद्विष्णोर्गायंतः परमाद्भुतं धिष्ण्यानिस्वानितेजग्मुरदितिंचशशंसिरे २७ सर्वमेत
न्मयाख्यातंभवतःकुलनंदन उरुक्रमस्यचरितंश्रोतॄणामघमोचनं २८ पारंमहिम्नउ
रुविक्रमतोगृणानोयःपार्थिवानिविममेसरजांसिमर्त्यः किंजायमानउतजातउपैतिम
र्त्यइत्याहमंत्रदृगृषिःपुरुषस्ययस्य २९ यइदंदेवदेवस्यहरेरद्भुतकर्मणः अवतारा
नुचरितंशृण्वन्यातिपरांगतिं ३० क्रियमाणकर्मणीदंदैवेपित्र्येथमानुषे यत्रयत्रानुकी
र्त्यतेतत्तेषांसुकृतंविदुः ३१ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवामनावतारचरिते
त्रयोविंशोध्यायः राजोवाच भगवन्श्रोतुमिच्छामिहरेरद्भुतकर्मणः अवतारकथामा
द्यांमायामत्स्यविडंबनं १ श्रीराम श्री
दन्नंतत्वेनैवाहेत्यर्थः तथाचमंत्रः नतेविष्णोजायमानोनजातोदेवमहिम्नःपारमंतमाप्यति २९
यइदंश्रृण्वन्नुभवतिसपरांगतिंयाति ३० सुकृतंयथावत्कृतंविदुः ३१ अष्टमेत्रयोविंशः चतुर्विंशे
प्रसंगेनमत्स्यरूपस्यशार्ङ्गिणः लीलोच्यतेयतःसत्यव्रतरक्षामहार्णवे तेनुतंनुनिदृश्योहोनिजेश्व
र्येनिदर्शनात् मत्स्यपृच्छतिपृथ्वीशोरव्यातयावामनोपमं मायामत्स्यविडंबनंमत्स्य रूपानुक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० ननु कस्मादकस्मादेव मत्स्यावतारश्रवणेच्छा श्रीवामनसादृश्यादित्याह यदर्थमिति द्वाभ्यां दुर्मर्षं दुः २ वक्त सहं १
रनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति युक्तमुक्तं यदर्थं तु लोकजुगुप्सितं मात्स्यरूपमेव धारय
तुरतन्नो यथावद्वक्तुमर्हसीत्यर्थः ३ ४ सामान्येनावतारप्रयोजनमाह गोविप्रेति ५ जुगुप्सितपरिहरं
ति धियो गुणैर्योनुच्चावचानि रूपाणि तेषु नियन्तृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वा

यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं तमःप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः २ एतन्नो भगवन्स
र्वं यथावद्वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहं ३ सूत उवाच इत्युक्तो विष्णुराते
न भगवान्बादरायणिः उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ४ श्रीशुक उवाच गोविप्रसुर
५३ साधूनां छन्दसामपि चेश्वरः रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ५ उच्चावचेषु भूतेषु च
रन्वायुरिवेश्वरः नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ६ आसीदतीतकल्पान्ते ब्राह्मो नैमि
त्तिको लयः समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ७ कालेनागतनिद्रस्य धातुः शिशयि
षोर्बली मुखतो निःसृतान्वेदान् हयग्रीवोन्तिकेऽहरत् ८ ज्ञात्वा तद्दानवेन्द्रस्य हयग्रीवस्य
रीर चेष्टितं दधार शफरीरूपं भगवान्हरिरीश्वरः ९ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो
महान् नारायणपरोऽतप्यत्तपः स सलिलाशनः १० योऽसावस्मिन्महाकल्पे तनयः स विव
स्वतः श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ११
तत्कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशङ्केति भावः ६ विशेषतो मत्स्यावतारप्रयोजनमा राम
ह आसीदिति त्रिभिः ब्रह्मणो निद्रायां भवो ब्राह्मः तेनैव निमित्तेन जातो नैमित्तिकः समुद्रेणोपप्लुतानि ५३
मग्नाः ७ आन्तिके निःसृतान् ८ शफरीरूपं मत्स्यरूपं ९ प्रयोजनान्तरं च लीलाप्रकारं चाह तत्र रा
जर्षिरित्यादिना यावत्समाप्ति १० सोऽयं श्राद्धदेव इति ख्यातः ११ राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतमालायां नद्यां १२ ० यत्राहं सुखं निवसामि तं ओकः स्थानं कल्पय १८ औदंचने नादेके माणिकस्थजले
१९ २१ रक्षायोगेनोपायेन यथा महाह्रदं प्राप्नुर्वा जलं विना न शुष्येयं तेनोपायेन निधेहि २२

एकदा कृतमालायां कुर्वतो जलतर्पणं तस्यांजल्युदके काचिच्छफर्येकाभ्यपद्यत १२ सत्यव्रतोंऽज
लिगतां सह तोयेन भारत उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः १३ तमाह सातिकरुणं महा
कारुणिकं नृपं यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल कथं विसृजसे राजन् भीताम
स्मिन्सरिज्जले १४ तमात्मनोनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं अजानन् रक्षणार्थाय शफर्याः
स मनो दधे १५ तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः १६ कलशाप्सु निधायैनां दयालुर्निन्य
आश्रमं १६ सा तु तत्रैकरात्रेण वर्द्धमाना कमंडलौ अलब्ध्वाऽत्मावकाशं वा इदमाह महीपतिं
१७ नाहं कमंडलावस्मिन् कृच्छ्रं वस्तुमिहोत्सहे कल्पयौकः सुविपुलं यत्राहं निवसे सुखं १८
स एनां तत आदाय न्यधादौदंचनोदके तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्द्धत १९ न म एतदलं
राजन् सुखं वस्तुमुदंचनं पृथु देहि पदं मह्यं यत्त्वाहं शरणं गता २० तत आदाय सा राज्ञा क्षि
प्ता राजन्सरोवरे तदावृत्यात्मना सोयं महामीनोन्ववर्द्धत २१ नैतन्मे स्वस्तये राजन्नुदकं स
लिलौकसः निधेहि रक्षायोगेन ह्रदे मामविदासिनि २२ इत्युक्तः सोनयन्मत्स्यं तत्र तत्रा
विदासिनि जलाशयेसंमितं तं समुद्रे प्राक्षिपज्झषं २३ क्षिप्यमाणस्तमाहेदमिह मां मकरा
दयः अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि २४ एवं विमोहितस्तेन वदता वल्गुभारतीं
तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् २५ नैवं वीर्यो जलचरो दृष्टोस्माभिः श्रुतोपि वा
यो भवान्योजनशतमन्हाभिव्यानशे सरः २६ नूनं त्वं भगवान्साक्षाद्धरिर्नारायणोव्ययः अनु
ग्रहाय भूतानां धत्से रूपं जलौकसां २७

अविदासिनि अनुपक्षये असंमितं तं जलाशयपरिमितं संतं २३ २५ अभिव्यानशे अभितो व्याप्तवान् २६ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ

मुख्यः सत्यः आत्मा च गतिश्च आश्रयः २७ २८ हे अरविंदाक्ष पृथगात्मनां देहाद्यभिमानिनां सतामितरे
षां पदोपसर्पणं यथा मृषा भवेत् तथा सर्वसुहृत्प्रियात्मनस्तव पदोपसर्पणं मृषा न भवेत् यद्यस्मात् नोभ

नमस्ते पुरुष श्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्वि
भो २७ सर्वे लीलावतारास्ते भूतानां भूतिहेतवः ज्ञातुमिच्छाम्यदो रूपं यदर्थं भ
वता धृतं २८ न तेऽरविंदाक्षपदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः यथेतरेषां पृ
थगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ३० श्रीशुक उवाच इति ब्रुवाणं नृपतिं ज
गत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षु
रेकांतजनप्रियः प्रियं ३१ श्रीभगवानुवाच सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम
निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं ३२ त्रिलोक्यां लीयमानायां संवर्तां
भसि वै तदा उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ३३

५४

नानामद्भुतं वपुरदीदृशः दर्शितवानसि पांगानेः पृथगात्मनो भेददर्शिनः पुंसः असतां परि
च्छिन्नानां पदोपसर्पणं यथा मृषेत्यर्थः ३२ एकांतजना भक्ताः प्रियायस्य ३१ अप्ययांभोधौ राम
प्रलयार्णवे भूर्भुव आदिकमित्यर्थः ३२ संवर्तांभसि प्रलयोदके त्वामुपस्थास्यति प्रा ५४
प्स्यति ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ओषधीः आरोपयित्वेशेषाः ३४ ३५ ऋषीणामेवालोकेन विचरिष्यसि ३६ महाहिना वासुकिना ३७ ८ मेमया अनु

त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ३४ आरुह्य बृ
हतीं नावं विचरिष्यस्यविक्लवः एकार्णवे निरालोके ऋषीणामेव वर्चसा ३५ दोधूयमानां तां नावं
समीरेण बलीयसा उपस्थितस्य मे शृङ्गे निबध्नीहि महाहिना ३६ अहं त्वामृषिभिः साकं सहना
वमुदन्वति विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ३७ मदीयं महिमानं च परं ब्रह्मेति शब्दि
तं वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ३९ इत्थमादिश्य राजानं हरिरन्तरधीयत सोऽन्ववैक्षत
तं कालं यं हृषीकेश आदिशत् ४० आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः निषसाद हरेः
पादौ चिन्तयन्मत्स्यरूपिणः ४१ ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीं वर्द्धमानो महामेघै
र्वर्षद्भिः समदृश्यत ४२ ध्यायन्भगवदादेशं ददृशे नावमागतां तामारुरोह विप्रेन्द्रैरादायौष
धीवीरुधः ४३ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवं स वै नः संकटादस्मादविता शं
नृ विधास्यति ४४ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे एकशृङ्गधरो मत्स्यो हैमो नियु
तयोजनः ४५ निबध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा वरत्रेणाहिना तुष्टस्तुष्टाव मधुसूद
नं ४६

गृहीतं प्रसादीकृतं हृदि अपरोक्षं वेत्स्यसि त्वया कृतैः संप्रश्नैर्मया विवृतं प्रकाशितं सत् ३९ ४५ वरत्रेण दोर
(स्य ८ केरूपेण ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सागरं तारयिष्यं तं तरिष्यन्निव सागरं सत्यव्रतो गुरुत्वेन तुष्टाव हरिमष्टभिः अत्रेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वे
ति तत्र तावत् ब्राह्मो लय इति यास्मिन् महाकल्प इति चोक्तेर्महाप्रलय इति प्राप्ते नेति ब्रूमः महाप्रलये पृथि
व्यादीनामवशेषासंभवात् यावद्ब्राह्मी निशेत्युक्तिविरोधाच्च अतो दैनंदिन इति युक्तं नचैतदपि संगच्छते ॥ अ०८
५५ सांवर्तकैरनाष्टष्ट्यादिभिर्विना अकस्मादेव सप्ताहेन त्रैलोक्यं निमंक्ष्यतीति मत्स्योक्तेरनुपपत्तेः यथोक्तं प्र
थमस्कंधे रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमिति तदपि तद्
दुर्घटं नहि प्रलयद्वयेपि मह्यां नाव्यारोहः संभवति नच चाक्षुषमन्वंतरे प्रलयोस्ति तथा च सति स
प्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् एतावदोषधीः सर्वा इत्यादिनिर्देशोपि न संगच्छते नहि तदा ओषध्यादि

राजोवाच अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः यदृच्छयेहोपसृता यमाप्नु
युर्विमुक्तिदो नः परमो गुरुर्भवान् ४७ राम राम राम राम राम राम राम रा०

नां सत्त्वानां वावशेषः संभवति तस्मादन्यथा वर्ण्यते नैवायं वास्तवः कोपि प्रलयः किंतु सत्यव्रतस्य ज्ञानोपदे
शाय विभूत्तो भगवान् वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास यथास्मिन्नेव वैवस्वतमन्वंतरे मार्कंडे
यायदर्शितवान् तत्पक्षे यैव च माहाकल्पे स्मिन्निति विशेषणं संगच्छते तथा च ततः समुद्र उद्वेलः स
न४ वेतः सद्दृश्यते नितस्यैव यथादर्शनमुक्तो मित्येषादि कुप्रस्कृतं स्तोत्रं व्याख्यास्यामः तत्र नानायोनिषु सं ५५
त४ त सरतः स्वस्य भगवत्प्रोपायचतुष्प्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते अनादिर्या अविद्या तया तु पहता आ
च्छन्ना आत्मसंविद्येषां ते अत एवाविद्यामूलैः संसारपरिश्रमै रातुराः इह संसारे यदृच्छया यदनुग्रहादुद्भ
पसृताः आश्रिताः संतो यं प्राप्नुयुः स भवानेव साक्षान्नो गुरुः सं नु ग्रंथिमित्यादि स्तुतेरयमन्वयः ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु वैराग्यं विना कुतो मुक्तिः तर्हि तस्य त्वत्सेवैकफलत्वात् सेवामादिशेत्याशयेनाह अबुधोयं जनः असुखं यथा भव
ति तथा कर्म समीहते तो सुखेच्छो नो हृदयन्तं पद्मं ग्रंथिं स भिंद्यात् यतः स एव परमो गुरुः ४८ ननु यज्ञदानादिभिः
सत्वशुद्धिं विना कथं ग्रंथिभेदः स्यात् तत्राह यस्य सेवया वपुमानात्मनो मनसो मलं तमो विजह्यात् प्रहीयमा
२१ मलः निजवर्णमत्व स्वरूपं भजेत स ईशानो गुरुर्भूयात् यतः स एव गुरोरपि परमो गुरुः मलहाने दृष्टान्तः रुद्रे
रोदनेरजतं यद्रोदीत् तद्रुद्रस्य रुद्रत्वं यदवशीर्यत तद्रजतं हिरण्यमभवदिति श्रुतेः तद्यथाग्निः संपर्कोन्मि

जनोबुधोयं निजकर्मबंधनः सुखेच्छया कर्म समीहते सुखं यत्सेवया तां विधुनोत्यसन्मतिं ग्रंथिं स भिं
द्याद्धृदयं स नो गुरुः ४८ यत्सेवयाग्निरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः भजेत वर्णं नि
जमेष सोव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ४९ न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः
स्वयं कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ५० अचक्षुरंधस्य यथाग्रणीः कृतस्त
थाजनस्याविदुषोबुधो गुरुः त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सतां ५१

त्वं जहाति स्ववर्णं भजेत ननु क्षालनादिभिः न तथा न यज्ञादिभिर्मलत्यागः किंतु त्वत्सेवयैवातेषां तु सेवां
गत्वमेवेति भावः ४९ परमेश्वरत्वं परमगुरुत्वं च प्रपंचयन्नाह यत्प्रसादस्यायुतभागस्य लेशमात्रमपि
अन्ये देवादयः सर्वे समेता अपि स्वयं तन्निरपेक्षाः संतः कर्तुं न प्रभवंति ५० गुरुदेवदृष्टान्तेन स्पष्टयन्नाह अच
क्षुरिति अविदुषो जनस्य अबुधो विद्वान् गुरुः स यथा अर्कः प्रकाशवत् स्वतएव दृक् ज्ञानं यस्य सः अर्क
अर्कदृक् अतः सर्वदृशां सर्वेंद्रियाणां समीक्षणः प्रकाशकः अतएव स्वगतिं बोद्धुमिच्छद्भिर्नोस्माभिर्गु
रुर्वृतोसि ५१

भा०आ० किंचशक्तेनागुरुरनर्थहेतुरेवेत्याह जनइति आदिशेदुपदिशति असतींमतिं अर्थकामादितमः संसारं ५२ ननु
तर्हिसर्वोपिलोकोमामेवकिंनापसर्पति अज्ञानादित्याह त्वमिति प्रियआसावीश्वरश्च ५३ अहंतुत्वामेवशर

जनोजनस्यादिशतेऽसतींमतिंययाप्रपद्येतदुरत्ययंतमः त्वंत्वव्ययंज्ञानममोघमंजसाप्रपद्यते
येनजनोनिजंपदं ५२ त्वंसर्वलोकस्यसुहृत्प्रियेश्वरोह्यात्मागुरुर्ज्ञानमभीष्टसिद्धिः तथा
पिलोकोनभवंतमंधधीर्जानातिसंतंहृदिबद्धकामः ५३ तंत्वामहंदेववरंवरेण्यंप्रपद्यई
शंप्रतिबोधनाय छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणुस्वमोकः ५४ शु ॰नू॰
कउवाच इत्युक्तवंतंनृपतिंभगवानादिपूरुषः मत्स्यरूपीमहांभोधौविहरंस्तत्त्व
५६ मब्रवीत् ५५ पुराणसंहितांदिव्यांसांख्ययोगक्रियावतीं सत्यव्रतस्यराजर्षेरात्मगुह्य
मशेषतः ५६ अश्रौषीदृषिभिःसाकमात्मतत्त्वमसंशयं नाव्यासीनोभगवताप्रोक्तंब्रह्म
सनातनं ५७ अतीतप्रलयापायउत्थितायसवेधसे सुरंहयग्रीवंवेदान्प्रत्याहरद्धरिः हत्वा ५८
५८ सतुसत्यव्रतोराजाज्ञानविज्ञानसंयुतः विष्णोःप्रसादात्कल्पेस्मिन्नासीद्वैवस्वतोम

णंयामीत्याह तंत्वामिति प्रतिबोधनायउपदेशाय अर्थदीपैः परमार्थप्रकाशकैः हृदयेभगवान्ग्रंथी राम
नु अहंकारादीन्स्वमोकः स्वरूपंविष्णुप्रकाशय ५४ नृपतिप्रति ५५ पुराणसंहितांमत्स्यपुराणंअ ५६
शेषतः अब्रवीदित्यनुषंगः ५६ ५७ अतीतः पूर्वीयः प्रलयः तस्यापाये अवसाने ५८ ५९ राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० येयंहरेरवतारस्तांयः प्रकीर्त्तयेत् ६० ६१ सत्यव्रतानांसत्यव्रतस्यअषिणांचाछत्रिणागछंती

सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः संवादंमहदाख्यानंश्रुत्वामुच्येतकि
ल्बिषात् ६० अवतारोहरेर्योयंकीर्त्तयेदन्वहंनरः संकल्पा[illegible]स्यासिध्यंतिस
यातिपरमांगतिं ६१ प्रलयपयसिधातुःसुप्तशक्तेर्मुखेभ्यः श्रुति गणमप
५७ नीतंप्रत्युपादत्तहत्वा दितिजमकथयद्योब्रह्मसत्यव्रतानांतमहमखि
लहेतुंजिह्ममीनंनतोऽस्मि ६२ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधे
पारमहंस्यांसंहितायांभगवतोमत्स्यावतारचरितानुवर्णनंनामचतुर्विंश
तितमोऽध्यायः २४

तिवल्लिंगसमवायाद्बहुवचनं जिह्ममीनंमायामत्स्यं ६२ इतिश्रीभागवतभावार्थदीपिका राम
यांश्रीधरस्वामिविरचितायांअष्टमेचतुर्विंशतितमोऽध्यायः राम राम राम राम श्री ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अष्टमस्कंध
समाप्तं ॥ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भगवतनवम
स्कंध४॥ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० न० श्रीगणेशायनमः गुणायंगुणतावाईस्यंप्रणतैकरुणानिधिं नमतंशरणंयामिपरमानंदमाधवं १ त्रिगुणाष्ट
भिरध्यायैर्वैवस्वतसुतान्वयः नवमेकथ्यमसत्कीर्तिप्रसंगायविलन्यते २ एवमुक्तोऽष्टमस्कंधेसधर्मः सत्वेशा
धकः कल्पेपाल्लकवत्कादिमन्वादीनांनिरूपणे ३ स ऊर्म्मेशुद्धसत्वानामंतरंगेशसत्कथा सूर्यसोमा

राजोवाच मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे वीर्याण्यनंतवीर्यस्यहरेस्तत्रकृतानिच १
योसौसत्यव्रतोनामराजर्षिर्द्रविडेश्वरः ज्ञानंयोतीतकल्पांतेलेभेपुरुषसेवया २ सवैविव
स्वतः पुत्रोमनुरासीदितिश्रुतं त्वत्तस्तस्यसुताश्रोक्ताइक्ष्वाकुप्रमुखान्नृपाः ३ तेषांवंशंपृथ
क्‌ब्रह्मन्वंश्यानुचरितानिच कीर्त्तयस्वमहाभागनित्यंशुश्रूषतांहिनः ४ येभूतायेभविष्या
श्चभवंत्यद्यतनाश्चये तेषांनःपुण्यकीर्त्तीनांसर्वेषांवदविक्रमान् ५ सूतउवाच एवंपरीः म२
क्षितराज्ञासदसिब्रह्मवादिनां पृष्टःप्रोवाचभगवाञ्छुकःपरंधर्मवित् ६ शुकउवाच"
त१ श्रूयतांमानवोवंशःप्राचुर्येणपरंतप नशक्यतेविस्तरतोवक्तुंवर्षशतैरपि ७ श्रीरामश्री

त्वयाख्यानेरघुनासंगतोच्यते ४ तत्रचत्रयोदशभिरध्यायैः सूर्यवंशोनुवर्ण्यते एकादशभिरध्या राम
यैःसोमवंशस्ततःपरे तत्रतुप्रथमेध्यायेवैवस्वतसुतान्वये सोमवंशप्रवेशोक्येसुद्युम्नस्त्रीत्वमु
च्यते उक्तानुवादपूर्वकंवैवस्वतमनोर्वंशंपृच्छतिमन्वंतराणीतिपंचभिः ८ श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुक्तं वंशं वक्तुं पूर्वोक्तमेव तावद्वंशं तत्त्ववर्त्तकं नारायणमारभ्यानुस्मारयति परावरेषामिति पंचभिः ८ ११
नाभागं चेति पाठेपि नभग एव नाभागः १२ सूर्यपौत्रस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवः प्रभृति सोम
वंशसंचारं वक्तुं सप्रस्तावमिलोपाख्यानमाह अप्रजस्य मनोः पूर्वमित्यादिना यावदध्यायसमाप्ति १३

परावरेषां भूतानामात्मा यः पुरुषः परः। स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किंचन ८ तस्य ना
भेः समभवत्पद्मकोशो हिरण्मयः। तस्मिन्जज्ञे महाराज स्वयंभूश्चतुराननः ९ मरीचिर्मन
सस्तस्य जज्ञे तस्यापि कश्यपः। दाक्षायिण्यां ततोऽदित्यां विवस्वानभवत्सुतः १० ततो मनुः श्रा
द्धदेवः संज्ञायामास भारत। श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ११ इक्ष्वाकुनृगशर्या
तिदिष्टधृष्टकरूषकान्। नरिष्यन्तं पृषध्रं च नभगं च कविं विभुः १२ अप्रजस्य मनोः पूर्वं वसिष्ठो
भगवान्किल। मित्रावरुणयोरिष्टिं प्रजार्थमकरोद्विभुः १३ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत
दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता १४ प्रेषितोऽध्वर्युणा होता ध्यायंस्तत्सुसमाहितः। हविषि व्य
चरत्तेन वषट्कारं गृणन्द्विजः १५ होतुस्तद्व्यभिचारेण कन्येला नाम साभवत्। तां विलोक्य मनुः प्रा
ह नातितुष्टमना गुरुम् १६ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनाम्। विपर्ययमहो कष्टं मैवं स्याद्ब्र
ह्मविक्रिया १७ यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः। कुतः संकल्पवैषम्यमनृतं विबुधेष्विव १८

पूर्वं इक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् दुहित्रर्थं मम कन्या यथा भवेत्तथा यजेति होतारं सम्यगयाचत पय एव व्रतं भक्ष
णं नियतं यस्याः १४ अध्वर्युणा होतर्यजेति प्रेषितो होता तेन गृहीते हविषि सति तत्तु तया प्रार्थितं ध्यायन्व्यचरत्
अजयत् पाठान्तरे तत्तु श्राद्धं ध्यायन्वा चावषट्कारं गृणन्वौषडिति पुरोयन् १५ १६ ब्रह्मविक्रिया मन्त्रान्यथात्वं १७

गृहीते हवि
१६ पाठान्तरे

तृ २
म १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्निशम्य वचस्तस्य भगवान्प्रपितामहः होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदन १९ एतत्संकल्पवैषम्यं
होतुस्ते व्यभिचारतः तथापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा २० एवं व्यवसितो राजन् भगवान्स म
हायशाः अस्तोषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया २१ तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः द
दाविलाभवत्तेन सुद्युम्नः पुरुषर्षभः २२ स एकदा महाराज विचरन्मृगयां वने वृतः कतिपयामा
त्यैरश्वमारुह्य सैंधवं २३ प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् दंशितोनुमृगं वीरो जगाम दि
शमुत्तरां २४ स कुमारो वनं मेरोरधस्तात्प्रविवेश ह यत्रास्ते भगवान्छर्वो रममाणः सहोमया २५
२ तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा अपश्यत्स्त्रियमात्मानमश्वं च वडवां नृप २६ तथा त
दनुगाः सर्वे आत्मलिंगविपर्ययं दृष्ट्वा विमनसोऽभूवन्वीक्षमाणाः परस्परं २७ राजोवाच ॥
कथमेवंगुणो देशः केन वा भगवन्कृतः प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः २८ शुक उ०
एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः दिशो वितिमिराभासाः कुर्वंतः समुपागमन् २९ ॥
तान्विलोक्यांबिका देवी विवासा व्रीडिता भृशं भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात्
३० ऋषयोपि तयोर्वीक्ष्य प्रसंगं रममाणयोः निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमं ३१ त
दिदं भगवानाह प्रियायाः प्रियकाम्यया स्थानं यः प्रविशेदेतत्स वै योषिद्भवेदिति ३२ श्री राम २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रासंगिकमुक्त्वाप्रकृतमनुवर्णयति सात्विति अनुचरीसंयुक्तेतिच वक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः २२ आश

तत्र ऊर्द्ध्वं वनं तद्वै पुरुषा वर्ज्जयंति हि सा चानुचरसंयुक्ता विचचार वनाद्वनं २३ अथ तामाश्रमाभ्याशे
चरंतीं प्रमदोत्तमाम् स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः २४ सापि तं चकमे सुभ्रूः सोमरा
जसुतं पतिं सतस्यां जनयामास पुरूरवसमात्मजं २५ एवं स्त्रीत्वमनु प्राप्तः सुद्युम्नो मानवो
नृपः सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम २६ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडि
तः सुद्युम्नस्याशयन्पुंस्त्वमुपाधावत शंकरं २७ तुष्टस्तस्मै स भगवानृषये प्रियमावहन् स्वां
च वाचमृतां कुर्वन्निदमाह विशांपते २८ मासं पुमान्स भविता मासं स्त्री तव गोत्रजः इत्थं
व्यवस्थया कामं सुद्युम्नोवतु मे दिनी २९ आचार्यानुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया
पालयामास जगतीं नाभ्यनंदंस्म तं प्रजाः ४० तस्योत्कलो गयो राजन्विमलश्च सुतास्त्रयः
दक्षिणापथराजानो बभूवुर्द्धर्मवत्सलाः ४१ ततः परिणते काले प्रतिष्ठानपतिः प्रभुः पुरू
रवस उत्सृज्य गां पुत्राय गतोवनं ४२ इति श्रीभागवते महापुराणे नवमस्कंधे इलोपाख्या
नं नाम प्रथमोध्यायः १ शुक उवाच एवं गतेथ सुद्युम्ने मनुर्वैवस्वतः सुते पुत्रकामस्तपस्ते
२१ पे यमुनायां शतं समाः १ ततोयजन्मनुर्देवमपत्यार्थं हरिं प्रभुं इक्ष्वाकुपूर्वजान् पुत्रांल्लेभे स्व
सदृशान्दश २

श्री ते यन्नुइच्छन् २७ २९ नाभ्यनंदन् स्त्रीत्वेपलउजयासीं समासं निलीयावस्थानात् ४० नवमे प्रथमः द्वितीयेम
नुपुत्राणां द्वावपुत्रौ विरागतः करूषकादि पंचानां वंशानाह लघुक्रमात् १ इक्ष्वाकुः पूर्वजोयेषां तान् २११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० तत्र पृषध्रस्य वंशो नाभवदिति सहेतुकमाह पृषध्रस्त्वित्यादिना कविः कनीयानित्यतः प्रोक्तेन नन्वर्थेन खड्गपाणिः
सन् स्थितो जागरणं वीरासनं तदेव व्रतं यस्य यत्तः अवहितः सन् गाः पालयामास ३ शार्दूलो व्याघ्रः ४ ५ प्रलीनाउ

पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ३ एकदा प्राविशद्गोष्ठं शार्दू
लो निशि वर्षति शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ४ एकां जग्राह बलवान् सा चुक्रोश भयातुरा तस्या
स्तु क्रंदितं श्रुत्वा पृषध्रोभिससार ह ५ खड्गमादाय तरसा प्रलीनोडुगणे निशि अजानन्नहनद्बभ्रोः शिरः
शार्दूलशंकया ६ व्याघ्रोपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृ
जन् ७ मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ८ तं शशा
प कुलाचार्यः कृतागसमकामतः न क्षत्रबंधुः शूद्रस्त्वं कर्मणा भवितामुना ९ एवं शप्तस्तु गुरुणा प्र
त्यगृह्णात्कृतांजलिः अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियं १० वासुदेवे भगवति सर्वात्मनि परे
मले एकांतित्वं गतो भक्त्या सर्वभूतसुहृत्समः ११ विमुक्तसंगः शांतात्मा संयताक्षोपरिग्रहः यदृच्छ
योपपन्नेन कल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः विचचार मही
मेतां जडांधबधिराकृतिः १३ एवंवृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितं तेनोपयुक्तकरणो ब्रह्म प्रा
प परं मुनिः १४ कविः कनीयान्विषयेषु निस्पृहो विसृज्य राज्यं सह बंधुभिर्वनं निवेश्य चित्ते पुरुषं
स्वरोचिषं विवेश कैशोरवयाः परं गतः १५

ग्रं० १ डुगणा यस्मिन् तस्मिन् समये बभ्रोः कपिलायाः गोः ६ कामतो नज
ग्यानेति स्वापयितुं वृक्णे श्रवणे यस्य सः छिन्नकर्णः व्युष्टायां प्रभातायां ७ ८ क्षत्रबंधुरपि त्वं भविता अपितु शूद्रो भवि
तेति ९ १० १३ उपयुक्तं करणं देहः १४ कवेरपि वंशो नाभवदित्याह कविरिति बंधुभिः सह राज्यं वि

राम
३

न०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न

१६ ब्रह्मभूयं ब्राह्मणत्वं नृगस्य वंशः पुत्रः सुमतिः ततो भूतज्योतिः ततो वसुः १७ ओघवतः पिता तत्पुत्रोप्योघवा
नेवेत्यर्थः १८ तदेवं त्रिभिः श्लोकैः करूष धृष्ट नृगाणां त्रयाणां वंशा उक्ताः नरिष्यंतस्य वंशमाह चित्रसेन इ
तिसार्द्धैस्त्रिभिः तत इत्यादेरन्वाधिक्यं स्यात् तत्रानंतर्ये तत इत्यादि पदं व्याख्येयं यन्नतु न्यून त्वं तत्र पूर्वस्य

करूषान्मानवादासन्कारूषाः क्षत्रजातयः उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः १६ धृष्टाद्धार्ष्ट
मभूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः १७ वसोः प्रतीकस्तत्पुत्र
ओघवानोघवत्पिता कन्या चौघवती नाम सुदर्शन उवाह तां १८ चित्रसेनो नरिष्यंताद्दक्षस्तस्य
सुतोभवत् तस्य मीढ्वांस्ततः कूर्च इंद्रसेनस्तु तत्सुतः १९ वीतिहोत्रस्त्विंद्रसेनात्तस्य सत्यश्रवा अ
भूत् उरुश्रवाः सुतस्तस्य देवदत्तस्ततोभवत् २० ततोग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः कानी
न इति विख्यातो जातूकर्ण्यो महानृषिः २१ ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप नरिष्यंता
न्वयः प्रोक्तो दिष्टवंशमतः शृणु २२ नाभागो दिष्टपुत्रोन्यः कर्मणा वैश्यतां गतः भलंदनः सुतस्त
स्य वत्सप्रीतिर्भलंदनात् २३ वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः खनित्रः प्रमतेस्तस्मा
च्चाक्षुषोथ विविंशतिः २४ विविंशतेः सुतो रंभः खनिनेत्रोस्य धार्मिकः करंधमो महाराज तस्या
सीदात्मजो नृप २५ तस्यावीक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् संवर्तोयाजयद्यं वै महायोगं
गिरःसुतः २६ मरुत्तस्य यथा यज्ञो न तथान्यस्य कस्यचित् सर्वं हिरण्मयं त्वासीद्यत्किंचिच्चास्य शो
भनं २७

परस्य चानुषंगादिभिर्व्याख्येयं १९ २० अग्निवेश्य एव कानीन इति जातूकर्ण्य इति ख्यातः २० २१ दिष्टस्य
पुत्रो नाभागो वक्ष्यमाणान्नाभागादन्य इति भ्रांतिं व्युदासार्थमनुवादमात्रं २३ ५ अंगिरसः सुतो महा
योगी संवर्तो यमयाजयत् स मरुत्तः २६ अस्य यत्किंचित्पात्रादिकमस्ति तत्सर्वं हिरण्मयं शोभनं मासीत् १०

पं१

वि१

भ

सा० न अमाद्यत्तु अहृष्यत् २८ ३० यतः यस्यां तृणविंदोः पुत्रा अभवन् ३१ २ तानेवाह विशाल इति तस्य तृणविंदोः सुत ३३
सहदेवजः देवजनसहितः पाठांतरं नामान्यत्वमात्रं अर्थस्तु स एव ४ ३५ वैशाल भूपालाः विशालस्यान्वयजा

अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजातयः मरुतः परिवेष्टारो विश्वेदेवाः सभासदः २८ मरुत्तस्य दमः पु ऽास १
त्रस्तस्यासीद्राज्यवर्द्धनः सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः २९ तत्सुतः केवलस्तस्माद्बंधु
मान्वेगवांस्ततः बुधस्तस्याभवद्यस्य तृणविंदुर्महीपतिः ३० तं भेजेऽलंबुषा देवी भजनीयगुणा
लयं वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ३१ तस्यामुत्पादयामास विश्रवा धनदं सुतं प्रा
दाय विद्यां परमामृषिर्योगेश्वरात्पितुः ३२ विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः विशा
४ लो वंशकृद्राजा वैशालीं निर्ममे पुरीं ३३ हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः तत्पु
त्रात्संयमादासीत्कृशाश्वः सहदेवजः ३४ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिं इ
ष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ३५ सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः एते वै
शालभूपालास्तृणविंदोर्यशोधराः ३६ इति श्री भागवते महापुराणे नवमस्कंधे द्वितीयाध्या
यः शुकउ० शर्यातिर्मानवो राजा ब्रह्मिष्ठः संबभूव ह यो वा अंगिरसां सत्रे द्वितीयमह
ऊचिवान् १ सुकन्या नाम तस्यासीत्कन्या कमललोचना तया सार्द्धं वनगतो ह्यगमच्च्यवनाश्र राम
मं २ ४

ताः ३६ नवमे द्वितीयोध्यायः तृतीये तु मनुपुत्रस्य शर्यातेः कीर्त्यतेन्वयः यत्रासौ कन्यमाख्यानं रेवतं
च महाद्भुतं ब्रह्मिष्ठः वेदार्थतत्त्वज्ञः तदेवाह यो वा इति द्वितीयमहः द्वितीये अह्नि क्रियमाणं कर्म ऊचि
वान् उवाच तस्य वंशे उत्तानबर्हिरानर्त इत्यादिना वक्ष्यति १ आदौ तावत्तत्कन्याचरित्रमाह सुकन्येति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ ५ भार्गवस्य च्यवनस्याभद्रं अपराधः ६ ८ मुग्धय मम कन्या क्षंतव्यं त्वयेत्युच्यमाने कतिवर्षाण्यस्याः विवाहः कृतो न
वेत्याह द्विवार्षिकस्तदभिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात् १० हे ईश्वरौ सेहे द्वावायुवां मह्यं वयस्यारूपं दत्तं संपादयतं ११

मासरवीसिः परिवृता विचिन्वत्यंघ्रिपान्वने वल्मीकं रंध्रे ददृशे खद्योतइवज्योतिषी ३ तं दैवचोदिता बाला
ज्योतिषी कंटकेनवै आविध्यन्मुग्धभावेन सुस्रावासृक्ततो बहु ४ शकृन्मूत्रनिरोधोभूत्सैनिकानां च
तत्क्षणात् राजर्षिस्तमुपालक्ष्य पुरुषान्विस्मितोब्रवीत् ५ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितं
व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणं ६ सुकन्या प्राह पितरं भीता किंचित्कृतं मया द्वे ज्योतिषी
अज्ञानंत्या निर्भिन्ने कंटकेन वै ७ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः मुनिं प्रसादयामा
स वल्मीकांतर्हितं शनैः ८ तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं
प्रायात्समाहितः ९ सुकन्या च्यवनं प्राप्य पतिं परमकोपनं प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्ति
भिः १० कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ११ ग्र
हं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमयोः क्रियतां मे वयो रूपं प्रमदानां यदीप्सितं १२ बाढमित्यूचतु
र्विप्रमभिनंद्य भिषक्तमौ निमज्जतां भवानस्मिन्ह्रदे सिद्धविनिर्मिते १३ इत्युक्तो जरया ग्रस्तदे
हो धमनिसंततः ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः १४ श्रीरामजयराम जयजय

असोमपोः सोमपानरहितयोरपि वां युवयोः सोमस्य ग्रहं सोमपूर्णपात्रं ग्रहीष्ये दास्यामीति युवां सोमेन यक्ष्ये इ
त्यर्थः ऐंद्रवायवं ग्रहं कृत्वा तस्याहि शुद्धद्वयदेवतासंबंधानुपपत्त्या ग्रहं कृत्वा तयोग पर्यवसायित्वात् १२ बाढमित्यभि
नंद्य भवानस्मिन्निमज्जतामित्यूचुः १३ ह्रदं प्रवेशि तं गावपि तमिति ग्रहं गृहीत्वा प्रविष्टावित्यर्थः १५ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० अश्विनौ शरणं ययौ युवां पृथक् स्थित्वा मम पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः १६ १९ बलं भितावुच्चितः हे असति अ
सम्मते अनभीष्टे २० हे सतां कुलप्रसूते ते मतिरन्यथा तद्विपर्ययेण कथमवगता अवसन्ना अध्यवसिते ति वा तदेवाह कु

पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवाससः १५ तान्निरीक्ष्य वरा
रोहा सरूपान्सूर्यवर्चसः अजानती पतिं साध्वी अश्विनौ शरणं ययौ १६ दर्शयित्वा पतिं तस्यै पातिव्रत्येन
तोषितौ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपं १७ यक्ष्यमाणोथ शर्यातिश्च्यवनस्याश्रमं गतः ददर्श दु
हितुः पार्श्वे पुरुषं सूर्यवर्चसं १८ राजा दुहितरं प्राह कृतपादाभिवंदनां आशिषश्चाप्रयुंजानो नाति
प्रीतमना इव १९ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लोकनमस्कृतो मुनिः यत्त्वं जराग्रस्त
५ मसत्यसंमतं विहाय जारं भजसेऽमुमध्वगं २० कथं मतिस्तेवगतान्यथा सतां कुलप्रसूते कुलदूषणं त्विदं
बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः २१ एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मि
ता उवाच तात जामाता तवैष भृगुनंदनः २२ शशंस पित्रे तत्सर्वं वयोरूपाभिलंभनं विस्मितः परम
प्रीतस्तनयां परिषस्वजे २३ सोमेन याजयन्वीर ग्रहं सोमस्य चाग्रहीत् असोमपोरप्यश्विनोश्च्यव
नः स्वेन तेजसा २४ हंतुं तमाददे वज्रं सद्यो मन्युरमर्षितः सवज्रं स्तंभयामास भुजमिंद्रस्य भार्गवः
२५ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः भिषजाविति यत्पूर्वं सोमाहुत्या बहिष्कृतौ २६
उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः शर्यातेरभवन्पुत्रा आनर्ताद्रेवतोभवत् २७ सोंतःसमु राम
द्रे नगरीं विनिर्माय कुशस्थलीं आस्थितोभुंक्त विषयानानर्तादीनरिंदमः २८ राम राम

लदूषणं त्विदमित्यादि २१ ४ सद्यस्तत्क्षणमेव मन्युर्यस्य सः २२ २५ ७ विषयान्देशान् अभुंक्त अपालयत् २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ककुद्मीज्येष्ठायस्मिन्नन्तन् विभुंब्रह्मणं २९ नलब्धःक्षणोवसरोयेनसः ३० आद्यंब्रह्माणं ३१ तत्रयोयहृदयेपुरुकृत्वा
तेसर्वेकालेननिरुद्धाःसंहृताः त्रिणवसप्तविंशतिचतुर्युगाणितैःविकल्पितःविभक्तः ३२ यादवस्यांशोमि
तेस्मैनररत्नायदेहि ३३ तेदेवाहभुवइति ३४ पुण्यजनत्रासान्यक्षभयात् पूर्वमेवपुरंत्यक्त्वाभिस्थितः ३५
नवमेतृतीयः चतुर्थेमनुपुत्रस्यनभगस्यकथोच्यतेतस्तोप्याम्बरीषस्यदत्वास्तिनिहतायतः नभगस्य

तस्यपुत्रशतंजज्ञेककुद्मीज्येष्ठमुत्तमं ककुद्मीरेवतींकन्यांस्वामादायविभुंगतः २९ कन्यावरंपरि
प्रष्टुंब्रह्मलोकमपावृतं आवर्तमानेगान्धर्वेस्थितोऽलब्धक्षणःक्षणं ३० तदंतआद्यमानम्यस्वा
भिप्रायंन्यवेदयत् तच्छ्रुत्वाभगवान्ब्रह्माप्रहस्यतमुवाचह ३१ अहोराजन्निरुद्धास्तेकालेन
हृदियेकृताः तत्पुत्रपौत्रनप्तॄणांगोत्राणिचनशृण्महे कालोभियातस्त्रिणवचतुर्युगविक
श्र५ ल्पितः ३२ तद्गच्छदेवदेवांशोबलदेवोमहाबलः कन्यारत्नमिदंराजन्नररत्नायदेहिभो ३३
भुवोभारावतारायभगवान्भूतभावनः अवतीर्णोनिजांशेनपुण्यश्रवणकीर्तनः ३४ इ
त्यादिष्टोभिवंद्याजंनृपःस्वपुरमागतः त्यक्तंपुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ३५
सुतांदत्वानवद्यांगींबलायबलशालिने बदर्याख्यंगतोराजातप्तुंनारायणाश्रमं ३६ इ
तिश्रीभागवतेमहापुराणेनवमस्कंधेतृतीयोऽध्यायः शुक उवाच नाभागोनभगापत्यंयंत
तंभ्रातरंकविं यविष्ठंव्यभजन्दायंब्रह्मचारिणमागतं १ श्रीराम श्रीराम श्रीराम

वंशमाहनभगस्यापत्यंनाभागःनाभागादंबरीषोमहाभागवतोभूदितिवक्ष्यन्तत्रहेतुत्वेनवंशप्रवर्तकस्यनभग
स्यनिःक्षेपंचरितंचतेनचश्रीरुद्रप्रसादमाह यंततमित्यादिना ब्रह्मचारिणंबहुकालंगुरुकुलेवसंतंनै
ष्ठिकोसावितिमत्वाविभागसमयेतस्मैभागमप्रकल्प्यवभ्रातरःसर्वदायंविभज्य गृहीतवंतः आगुरुकुला
दागतंयभागार्थिनंकविंविद्वांसंयविष्ठंप्रतितेनतंपितरंदायंव्यभजन्नित्यर्थः १ राम राम रामः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० एतदेव प्रश्नोत्तराभ्यां दर्शयति तत्र नाभागः पृच्छति हे भ्रातरः मह्यं किमभाङ्क्त अभजत कं भागं मदर्थं यूयं प्रकल्पि
तवंतः भ्रातरः आहुः तदा विस्मृतमस्माभिरिदानीं तु तव पितरं विभजामः त्वं पितरं गृहाणेत्यर्थः स च पि
तरं गत्वाह तत्र हे तात आर्याः श्रेष्ठाः मम त्वामभाक्षुः भागं चक्रुः मदीयो भागस्त्वमित्यर्थः पाठांतरे
हे तात किमिदं ममाभाक्षुः भजाम पितरं तवेत्युक्तवंत आर्याः त्वां मह्यं किमर्थं ददुरित्यर्थः पिताह हे
पुत्रक तत् तेषां वाक्यं मा आदृथाः प्रतारणमात्रत्वात् एतस्मिन्नादरं माकार्षीः न ह्यहं ते योग्य इव भागसाधन

भ्रातरोऽभाङ्क्त किं मह्यं भजाम पितरं तव । त्वां ममार्यास्तताभांक्षुर्मा पुत्रक तदादृथाः ॥ २ ॥ इमे अं
गिरसः सत्रमासतेऽद्य सुमेधसः । षष्ठं षष्ठमुपेत्याहः कवे मुह्यंति कर्मणि ॥ ३ ॥ तांस्त्वं शंसय
६ सूक्ते द्वे वैश्वदेवे महात्मनः । ते स्वर्यंतो धनं सत्रपरिशेषितमात्मनः ॥ ४ ॥ दास्यंत्यथ गच्छ ताग दास्यंति तेऽथ गच्छ तान्
च्छ तथा स कृतवान्यथा । तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितं ॥ ५ ॥ श्रीराम श्रीराम श्री

मित्यर्थः २ तथापि ते भागत्वेन दत्तोऽहं तव वृत्तिं जीवनोपायं तूपदेक्ष्यामीत्याह इमे इति सपादद्वाभ्यां ॥
अभिप्लवः षडहो भवति पृष्ठ्यः षडहो भवतीति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठं षष्ठमहः अक्र
मापत्य प्राप्य कर्मणि तद्दृष्टान् सुमेधसः पितरस्ते विशेषाज्ञानेन मुह्यंति कवे हे विद्वन् ३ ॥ राम
तान्महात्मनोपि त्वं इदमित्थं वरद्रमिति च ययेशेन दक्षिणायति च वैश्वदेवे द्वे सूक्ते संशयपाठय ६
ततः कर्मणि समाप्ते सति ते स्वर्यंतः स्वर्गं गच्छंतः स्वसत्रपरिशेषितमवशिष्टमात्मनो धनं तत् तु
भ्यं दास्यंति अथ तस्मात्तान् गच्छेति ततः यत्यादि श्रुकवाक्यं यथावत् कृतवान् सत्रपरिशेषितं सत्त्रावशिष्टं

कथन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरुषः श्रीरुद्रः दृश्यतइतिदर्शनंशरीरंकृष्णंदर्शनीयस्यसः वास्तुकंयज्ञभूमिगतंवसु धनंममेत्युवाच ६ तर्हि
स्मनंदेवममेदमितिमानवोनाभागउवाच पुनश्चरुद्रउवाचांनोश्चावयोरस्मिन्विवादेतेपितरिप्रश्नः ७
स्यादिति पृष्टवानितिशुकोक्तिः ७ पृष्टस्यमनोवोक्यंयज्ञवास्तुगतमिति उच्छिष्टमुर्वरितंकाश्चिदितिदक्षा
ध्वर उच्छेषणभागोवरुद्रइतिश्रुतेश्चाकिंचसदेवईश्वरः सर्वमप्यर्हतिकिंपुनर्यज्ञावशिष्टमित्यर्थः ८

तंकिंश्चित्स्वीकरिष्यंतंपुरुषःकृष्णदर्शनः उवाचोत्तरतोऽभ्येत्यममेदंवास्तुकंवसु ६ ममेदमृषिभि
र्दत्तमितितर्हिस्मममानवः स्यान्नौतेपितरिप्रश्नःपृष्टवान्पितरंतथा ७ यज्ञवास्तुगतंसर्वमुच्छिष्टमृ
षयः क्वचित्‌ चक्रुर्हिभागंरुद्रायसदेवः सर्वमर्हति ८ नाभागस्तंप्रणम्याहतवेशकिलवास्तुकं इ
त्याहमेपिताब्रह्मञ्छिरसात्वांप्रसादये ९ यत्तेपितावदद्धर्मंत्वंचसत्यंप्रभाषसे ददामितेमंत्रदृशे
ज्ञानंब्रह्मसनातनं १० गृहाणद्रविणंदत्तंमत्सत्रपरिशेषितं इत्युक्त्वान्तर्हितोरुद्रोभगवान्सत्यव
त्सलः ११ यएतत्संस्मरेत्प्रातःसायंचसुसमाहितः कविर्भवतिमंत्रज्ञोगतिंचैवतथात्मनः १२
नाभागादंबरीषोभून्महाभागवतःकृती नास्पृशद्ब्रह्मशापोपियंनप्रतिहतः क्वचित्‌ १३ राजो
वाच भगवन्छ्रोतुमिच्छामिराजर्षेस्तस्यधीमतः नप्राभूद्यत्रनिर्मुक्तोब्रह्मदंडोदुरत्ययः १४

श्रीरुद्रश्चाहयत्तइति १० इदमाख्यानंश्रुतिप्रसिद्धं तथाहिबह्वृचब्राह्मणं नाभानेदिष्ठंशंसतिनाभानेदिष्ठंवैमा
नवंब्रह्मचर्यंवसंतंभ्रातरोनिरभजन्‌सोऽब्रवीदित्यादि ११ अस्याख्यानस्यस्मरणेफलमाहयएतदिति आत्म
नोगतिंचप्राप्नोतीतिशेषः १२ क्वचिदपिनप्रतिहतोब्रह्मशापोब्राह्मणनिमित्तः कृत्यानलोऽपियंनास्पृशत्‌ ११
अतोसामहाभागवतः अतएवकृतीपुण्यवान्‌ १३ तस्यश्रोतुमिच्छामिचरितमितिशेषः ब्रह्मदंडः कृत्यानलः न

भाग

भा० स्कं० ९ टी० ४४

पि २ नर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रियं संपदं विभवं ऐश्वर्यं अतुलं निरुपमं १५ पुंसामतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्तुतं निरूपितं अनुपादेयं मेने
तत्र हेतुः विभवस्य निर्वाणं नाशं विद्वान् यतो येन विभवेन तन्नाशेन वा पुमानुत्तमो विशति मोहं निमज्जति १६
नन्वेवं ज्ञानं तापि विभवे षिणो दृश्यंते तत्राह वासुदेव इति भावं भक्तिं प्राप्तः येन भावेन इदं विश्वं लोष्टवत्तुच्छमति
तुच्छं स्मृतं १७ भक्तिमेव सर्वेंद्रियाणां भगवत्परत्वेन कथनेन प्रपंचयति स वा इति त्रिभिः श्रुतिः श्रोत्रं अच्युतस्य
सत्कथनासु उदये श्रवणे चकार त्यस्य सर्वत्रान्वयः १८ मुकुंदस्य विलिंगानामालयानि तेषां दर्शने दृशौ नेत्रे

शुक उवाच अंबरीषो महाभागः सप्तद्वीपवतीं महीं अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि १५ मेने
ति दुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतं विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान् १६ वासुदेवे भगवति त
९ द्भक्तेषु साधुषु प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतं १७ स वै मनः कृष्णपदारविंदयोर्वचांसि वैकुं २२
ठगुणानुवर्णने करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये १८ मुकुंदलिंगालय
दर्शने दृशौ तद्भृत्यगात्रस्पर्शेंगसंगमं घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते
१९ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने कामं च दास्ये न तु कामकाम्यया यथो
त्तमश्लोकजनाश्रया रतिः २० एवं सदा कर्मकलापमात्मनः परेधियज्ञे भगवत्यधोक्षजे सर्वात्म
भावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह २१

श्रीमत्याः तुलस्याः रसास्वादे सेरोजनयत् सौरभं तस्मिन् तदर्पिते तत्रैव नैवेद्ये ताम्बूले १९ कामं स्रक्चंदनादिसेवां
दास्यनिमित्तं तत्प्रसादस्वीकाराय न तु कामकाम्यया विषयेच्छया कथं च कार उत्तमश्लोकजनाश्रया र
तिर्यथा भवेत्तथा अनेन तद्भक्तेषु च परं भावं प्राप्त इत्येतत्स्फुटीकृतं २० सर्वत्रात्मेति भावो भावना यस्मिन्
तमात्मनः स्वस्य कर्मणां कलापं समूहं भगवति विदधत् समर्पयन् तन्निष्ठैर्भागवतैर्विप्रैः अभिहि
तः शिक्षितः सन्महीं शशास पालयामास अनेनाधिष्ठितैर्धर्मोपि यथावद्दर्शितः २१ रामराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० किंच यज्ञाधिष्ठातारमीश्वरमश्वमेधैरीजे आराधयामास महाविभूत्योपचितान्यंगानि दक्षिणाश्च येषु तैः
वसिष्ठादिभिर्हेतुभूतैस्ततैर्विस्तृतैः। धन्वनि धन्वदेशे निरुदके सरस्वतीमभि अभिस्रोतं तस्याः प्रतिलोममित्यर्थः २२
किंच यस्य क्रतुषु सदस्यादयो गीर्वाणैः सह भूषणादिभिस्तुल्यरूपाः व्यदृश्यन्त सह स्थिता इति चतुर्थेनान्वयः। न
देवानां निमेषाभावो हि लक्षणं यतः अनिमिषाश्च अदृश्यन्त तेनानिमिषाश्च अदृश्यन्त तथा आश्चर्यदर्शनोत्सु नेनिमिषंतीतितथा
केन तेषां निमिषापरमादित्याभावः २३ यस्य यदीयैर्मनुजैरपि स्वर्गो न प्रार्थितः तस्य तु का वार्ता २४ आस्तां

ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः। ततैर्वसिष्ठासितगौतमादिभिर्धन्व
न्यभिस्रोतमसौ सरस्वतीं २२ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः। तुल्यरूपाश्चानि
मिषा व्यदृश्यन्त सुवाससः। २३ स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः। शृण्वद्भिरुपगायद्भिरुत्त
मश्लोकचेष्टितं २४ समर्द्धयन्ति तान्कामाः स्वाराज्यपरिभाविताः। दुर्लभा नापि सिद्धानां मुकुंदं
हृदि पश्यतः २५ स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः। स्वधर्मेण हरिं प्रीणन् सर्वान्कामाञ्छ
सुतेषु नैर्जहौ २६ गृहेषु दारेषु बंधुषु द्विपोत्तमस्यंदनवाजिवस्तुषु अक्षय्यरत्नाभरणायुधादिष्वनं
तकोशेष्वकरोदसन्मतिं २७ राम

स्वर्गप्रार्थनशंकापि यद्यतः मुकुंदं हृदि पश्यतस्तान् कामाः विषयाः न समर्द्धयन्ति न हर्षयन्ति कथंभूताः स्वा
राज्येन स्वरूपसुखेन परिभाविताः अतिशायिताः अत एव सिद्धानामपि दुर्लभाः यानिति पाठे यान्मनुजा
न् स्वाराज्ये त्यक्त्वापि द्वितीयान्तपाठे मनुजानां विशेषणं यमिति पाठे यमंबरीषं पश्यतामिति पाठे सिद्धानां वि
शेषणं २५ एवं भगवदाराधनपरस्य कामाद्युपेक्षा न वैचित्र्यमित्युपसंहरति स इत्थमिति द्वाभ्यां २६ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न०

नन्वेवंभूतोसौकथंप्रतिपक्षानुजेयन्तत्राहतस्माइति २८ तदेवंतस्यैवैराग्यादिकेहरिभक्तिंचोक्त्वाब्रह्म
दंडयत्रनप्राभूदितियदुक्तंतदेवद्वादशीव्रतनिष्ठांकथयन्नाह आरिराधयिषुरित्यादियावद्ध्यायसमा
प्ति २९ अर्चयत्‌ अङागमाभावआर्षः ३०। ब्राह्मणाअपूजयामाससिद्धार्थानाप्तकामान्‌ज्ञानपक्षान

तस्मात्प्रदाद्धरिश्चक्रंप्रत्यनीकभयावहं एकांतभक्तिभावेनप्रीतोभृत्याभिरक्षणं २८ आरिरा
धयिषुःकृष्णंमहिष्यातुल्यशीलया युक्तःसांवत्सरंवीरोदधारद्वादशीव्रतं २९ व्रतांतेकार्ति
केमासित्रिरात्रंसमुपोषितः स्नातःकदाचित्कालिंद्यांहरिमधुवनेऽर्चयत्‌ ३० महाभिषेकवि
धिनासर्वोपस्कारसंपदा अभिषिच्यांबराकल्पैर्गंधमाल्यार्हणादिभिः ३१ तद्गतांतरभाव
नपूजयामासकेशवं ब्राह्मणांश्चमहाभागान्सिद्धार्थानपिभक्तितः ३२ गवांरुक्मविषाणी
नांरूप्यां[illegible]णांसुवाससां पयःशीलवयोरूपवत्सोपस्कारसंयुतां ३३ प्राहिणोत्साधुविप्रेभ्यो
गृहेषुन्यर्बुदानिषट्‌ भोजयित्वाद्विजानग्रेस्वाद्वन्नंगुणवत्तमं ३४ लब्धकामैरनुज्ञातःपार
णायोपचक्रमे तस्यतर्ह्यतिथिःसाक्षात्दुर्वासाभगवानभूत्‌ ३५ तमानर्चातिथिंभूयःप्रत्यु
त्थानासनार्हणैः ययाचेभ्यवहारायपादमूलमुपागतः ३६ प्रतिनंद्यसतद्याञ्चांकर्तुमाव
श्यकंगतः निममज्जबृहद्ध्यायन्कालिंदीसलिलेशुभे ३७ मुहूर्तार्द्धावशिष्टायांद्वादश्यांपा
रणांप्रति चिंतयामासधर्मज्ञोद्विजैस्तद्धर्मसंकटे ३८ ब्राह्मणातिक्रमेदोषोद्वादश्यांय
द्पारणे यत्कृत्वासाधुमेभूयादधर्मोवानमांस्पृ

पि ३२ नृप्यां[illegible]णांनृपखुराणांपयःशीलादिसंपदायासांतासां ३३ न्यर्बुदानिषट्षष्टिकोटीः ३४
तर्हितदैवदुर्वासाअतिथिःसाक्षात्प्रत्यक्षोभूत्‌ ३५ अनन्चेअर्चितवान्‌अभ्यवहारायभोजनाय ३६
आवश्यकंनैयमिकंमाध्याह्निकंकर्मकर्तुंगतः बृहद्ब्रह्म ३७ ३८ धर्मसंकटमेवाहयदतःब्राह्मणाति
तू सं

८ श्री

कौमितापाश्रमधर्मिकाणामपापाः पितोपाध्याय[illegible]

मिनकोरा ३९

अ०४

राम

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं द्विजैः सह विचार्य निश्चितोऽतिश्रं भेमेति व्रतस्य पारणं समाप्तिं ननु अशितमा हुः अशितेनेतिवाहुः अति
अ अपोऽश्नाति तेनैव वाशितं नैवानशितमिति ४० प्रत्युचष्ट प्रत्येक्षत ४१ २ प्रचललंकंपमानं गात्रं यस्य । भ्रुकुटिभ्यां कुटि

अंभसाकेवलेनाथ करिष्ये व्रतपारणं । प्राहुरन्वक्षणं विप्रा ह्यशितं नाशितं च तत् ४० इत्यपः प्राश्य रा
जर्षिश्चिंतयन्मनसाऽच्युतं प्रत्यचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ४१ दुर्वासा यमुनाकूलात्कृतावश्य
क आगतः । राज्ञाऽभिनंदितस्तस्य बुबुधे चेष्टितं धिया ४१ मन्युना प्रचलद्गात्रो भ्रुकुटी कुटिलाननः ।
बुभुक्षितश्च सुतरां कृतांजलिमभाषत । ४३ अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत । धर्मव्यतिक्र
मं विष्णोरभक्तस्येशमानिनः । ४४ यो मामतिथिमायातमातिथ्येन निमंत्र्य च । अदत्त्वा भुक्तवांस्तस्य
सद्यस्ते दर्शये फलं ४५ एवं ब्रुवाण [illegible] त्यजटां रोषविदीपितः । तया स निर्ममे तस्मै कृत्यां कालानलो
पमां ४५ तामापतंतीं ज्वलतीमसिहस्तां पदा भुवं वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृपः ४७ ॥
प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना । ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः । ४८ तद
भिद्रवदुद्वीक्ष्य स्वप्रयासं च निःफलं दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया । ४९ तमन्वधा
वद्भगवद्रथांगं दावाग्निरुद्धूतशिखो यथाहिं तथानुषक्तं मुनिरीक्ष्यमाणो गुहां विविक्षुः प्रस
सार मेरोः ५० दिशो नभः क्ष्मां विवरान्समुद्रांल्लोकान्सपालांस्त्रिदिवं गतः । सः यतो यतो धाव
ति तत्र तत्र सुदर्शनं दुःप्रसहं ददर्श ५१ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचित्तोऽरणमेष
माणः । देवं विरिंच्यं समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो मां ५२ श्रीराम श्रीराम

लमाननं यस्य ४३ ७ क्रुद्धमहिं पावकोदवाग्निरिव ४० निष्फलमुद्वीक्ष्य ४९ अनुषक्तं पृष्ठतः संसक्तं मे
रोगुहां विविक्षुरधावत् ५० १ अरणमेषमाणः शरणमिच्छन् अजिततेजसः हरेश्चक्रात् ५२ राम०

रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० भा० एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरोभविष्यति कदा क्रीडायाः अवसाने तदपि कदा हि परार्द्धसंज्ञे काले ५३ अतो वयं सर्वे यस्य नियमम् आज्ञां प्रपन्नाः प्राप्ताः सन्तो लोकहितं यथा भवत्येवं तन्नियमं मूर्ध्नार्पितं वहामः अतस्त त्कोद्रोहिणं त्वां रक्षितुं न समर्था इति शेषः यत्तरो नित्यसंबधात् ५४ श्रीरुद्रोपि प्रत्याचष्टे वयमिति चतु

ब्रह्मोवाच स्थानं मदीयं सह विश्वमेतत्क्रीडावसाने द्विपरार्द्धसंज्ञे भ्रूभंगमात्रेण हि संदिधक्षोः
कालात्मनो यस्य तिरोभविष्यति ५३ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ५४ प्रत्याख्यातो विरिंचेन विष्णुचक्रो
पतापितः दुर्वासाः शरणं यातः शर्वं कैलासवासिनं ५५ शंकर उवाच वयं न तात प्रभवाम
भूम्नि यस्मिन्परेऽन्येप्यजजीवकोशाः भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ५६
अहं सनत्कुमारश्च नारदो भगवानजः कपिलोऽपान्तरतमो देवलो धर्म आसुरिः ५७ मरी
चिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शिनः विदाम न वयं सर्वे यन्मायां माययावृताः ५८ तस्य
विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः तमेव शरणं याहि हरिस्ते शं विधास्यति ५९ ततो निराशो
दुर्वासाः पदं भगवतो ययौ वैकुंठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ६० संदह्यमानो
जितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः आहाच्युतानंत सदीप्सित प्रभो कृतागसं
मावहि विश्वभावन ६१

भिः भूम्नि महति महत्त्वमेवाह यस्मिन्परमेश्वरे अजाः ब्रह्माणस्त एव जीवास्तेषां कोशाः उपाधिभूताः ब्र
ह्मांड विग्रहाः ईदृशाः दृश्यमान ब्रह्मांड प्रमाणाः अन्येपि भवंति जायंते नश्यंति च यत्र येषु ब्रह्मांडेषु लोकेशाभि
मानिनो वयं भ्रमामः ५६ ननु सर्वज्ञस्य तव भ्रमः कुतस्तत्राह अहमिति पारदर्शिनः सर्वज्ञा अपि यस्य मा

कांतविक्षः ५८ हृष्टतामितमिति मामस्वविहपाहि ६३

राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० अपराधंनिवेदयन्प्रार्थयतेअजानतेति अघंदुःखंअपचितिंनिःकृतिं मद्भक्तद्रोहनिःकृतिंनपश्यामीतिचेत्
तत्राह यस्यतवनाम्निकीर्तितेनरकोऽपि मुच्यतेतस्यतवकिमशक्यमितिभावः ६२ नम्राशोभनस्पृहयामि

अजानतातेपरमानुभावंकृतंमयाऽघंभवतःप्रियाणां विधेहितस्याऽपचितिंविधातर्मुच्येत ७१
यन्नाम्न्युदितेनारकोऽपि ६२ श्रीभगवानुवाच अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज। सा
धुभिर्ग्रस्तहृदयोभक्तैर्भक्तजनप्रियः ६३ नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना श्रि
यंचात्यंतिकींब्रह्मन्येषांगतिरहंपरा ६४ येदारागारपुत्राप्तप्राणान्वित्तमिमंपरं हित्वामां
शरणंयाताःकथंतांस्त्यक्तुमुत्सहे ६५ मयिनिर्बद्धहृदयाःसाधवःसमदर्शिनाः वशीकु
र्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा ६६ मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयं नेच्छं
तिसेवयापूर्णाःकुतोऽन्यत्कालविद्रुतं ६७ साधवोहृदयंमह्यंसाधूनांहृदयंत्वहं मदन्य
त्तेनजानंतिनाहंतेभ्योमनागपि ६८ उपायंकथयिष्यामितवविप्रशृणुष्वतत् अयंह्या
हि२ त्माभिचारस्तेयतस्तंयाहिंभवान् ६९ साधुषुप्रहितंतेजःप्रहर्तुःकुरुतेशिवं तपोविद्या
चविप्राणांनिःश्रेयसकरेउभे ७० तेएवदुर्विनीतस्यकल्पेतेकर्तुरन्यथा ७० ब्रह्मंस्तद्गच्छ
भद्रंतेनाभागतनयंनृप क्षमापयमाहाभागंततःशांतिर्भविष्यति ७१ इतिश्रीभागवतेम
हापुराणेनवमस्कंधेअंबरीषचरित्रेचतुर्थोऽध्यायः

६४इमंपरंचलोकंहित्वा ६५ ६६ प्रतीतंप्राप्तमपि ६७ ६८ आत्मनस्तवैवअभिचारोहिंसायतोऽभूत्तमेवया
हि तुअशिवमनर्थं ६९ तपोविद्यासंपन्नस्यममकथमनर्थःसमजनीतिमास्मविस्मयंकार्षीरित्याहतपइति
पी
७०।७१ नवमेचतुर्थः राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमे विष्णुचक्रेणतु प्रसाद्य प्राणसंकटात् दुर्वासा रक्षितस्तेन तथा तद्वृत्तमितीर्य्यते १ सत्त्व्यमननमितिच्छेदः सुलोप पाद पूरणार्थः २ ज्योतिषां नक्षत्राणां पतिः सोमस्त्वं मात्राणि इंद्रियाणि च त्वत्त एवाभ्युदयः स्वस्व कार्य्यं कुर्वंतीत्यर्थः ३ सहस्रारायस्पष्टे सहस्रार स्वस्ति शरणं भूयाः इडस्पते पृथ्वीपते ४ ब्राह्मण रक्षणं तव युक्तमेव त्याह त्वं धर्म इति नचत्तवयमतिरस्तीतिरित्याह पौरुषपुरुषस्य स्वरस्य परंतेजः सामर्थ्यं त्वं अयं भावः सोऽस्ति त्यादि श्रुतिप्रसिद्धे भगवतः शोभनदर्शनं ततएवचैसर्व्वजातं अतस्त्वमेव सर्व्वमिति ५ हे सुनाभ स्वक्तुरक

शुक उवाच एवं भगवतादिष्टो दुर्वासाश्चक्रतापितः अंबरीषमुपागत्य तत्पादौ दुःखितो ग्रहीत् १ तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः अस्तावीत्तद्धरेरस्त्रं कृपयापीडितो भृशं २ अंबरीष उवाच त्वमग्निर्भगवान्सूर्यस्त्वं सोमोज्योतिषांपतिः त्वमापस्त्वं क्षितिर्व्योमवायुर्मात्रेंद्रियाणि च ३ सुदर्शन नमस्तुभ्यं सहस्राराच्युतप्रिय सर्वास्त्रघातिन्विप्राय स्वस्ति भूया इडस्पते ४ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परं ५ नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ६ त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनां दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत्सदसत्परावरम् ७ राम

कर्म्मणांत्वांकः स्तोतुं समर्थः अतस्तुभ्यं केवलं नमो गृणे इत्यन्वयः अद्भुतकर्मत्वमेवाह अखिलानां धर्माणां सेतवमर्यादा रूपाय अतएव अधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपायतीति तथा विशुद्धमत्युज्वलं वर्च्चस्तेजोयस्य तस्मै ६ तदेव प्रपंचयति त्वत्तेजसेतिद्वाभ्यां सूर्यादीनां प्रकाशश्च त्वमेव तृप्यतप्रको

१०

राम
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० न०

हे अजित अनंतजेनेन श्रीहरिणा यद्विसृष्टः। त्वं तद्दैत्यदानवानां वर्त्मप्रविष्टः। स नूनं पौर्वाह्णकादीन् भिदन् विराजसे।
पाठांतरे तु जितो दैत्यदानवा यस्मिन् तत् हल्लं पूर्वपदेन संधिरार्षः। किं च त्वया भगवन्नियुक्तेन खलानां दंडः। कार्यः
साधवस्त्वं रक्षणीयाः। अतो विप्ररक्षणेनास्माननुगृहाणेत्याह ~ हे जगत्त्राण स एव भूतः। त्वं खलानामेव प्र

यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवं वाहूदरोर्वंघ्रिशिरोधराणि वृश्चन्नजस्रं
प्रधने विराजसे ~ स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता विप्रस्य चास्म
त्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ९ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः। कुलं
नो विप्रदैवं चेत् द्विजो भवतु विज्वरः। १० यदि नो भगवान् प्रीतः एकः सर्वगुणाश्रयः। सर्वभूतात्म
भावेन द्विजो भवतु विज्वरः। ११ श्रीशुक उवाच इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं अशाम्य
त्सर्वतो विप्रं प्रदहद्राजयाच्ञया १२ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः। प्रशशंस तमु
र्वीशं युञ्जानः परमाशिषः १३ दुर्वासा उवाच अहो अनंतदासानां महत्त्वं दृष्टमद्य मे कृतागा
सोऽपि यद्राजन्मंगलानि समीहसे १४ दुःकरः को नु साधूनां दुस्त्यजो वा महात्मनां यैः संगृ
हीतो भगवान् सात्वतामृषभो हरिः। १५ यन्नामश्रुतिमात्रेण पुमान् भवति निर्मलः। तस्य तीर्थ
पदः किं वा दासानामवशिष्यते। १६ राजन्ननुगृहीतोऽहं त्वयातिकरुणात्मना मदघं पृष्ठतः
कृत्वा प्राणा यन्मेऽभिरक्षिताः। १७

हणार्थं निरूपितो नियुक्तः अतोऽस्मत्कुलस्यैकदैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि तदेव नो
नुग्रहः ९ सर्वमुक्तार्पणेन विप्ररक्षां प्रार्थयते यद्यस्तीति द्वाभ्यां विप्रा देवदेवता यस्मिन् तत्
१० राजास्तस्य वयोऽभ्रया १२, १६, १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० राजन्यादिश्लोकद्वयं शुकोक्तिः प्रीतोस्मीति श्लोकद्वयं पुनर्विप्रोक्तिः १८ १९ आत्मनिमिषेणेनैवेनाति
थ्येन २० भूरियं तत्र स्तोजनः कीर्त्तयिष्यति २१ २२ तस्य धैर्यातिशयमाह गतो मुनिर्यावत्तावन्नागतः तावत्सं
वत्सरोऽतिक्रांत इति २३ द्विजस्योपयोगेन भोजनेन अतिपवित्रं हरेरन्नं बुभुजे २४ स्ववीर्यं च धैर्यादि अ० १

राजा तमकृताहारः प्रत्यागमनकांक्षया । चरणावुपसंगृह्य प्रसाद्य समभोजयत् १८ सोऽशि
तादृतमानीतमातिथ्यं सार्वकामिकं । तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं १९ प्रीतोस्म्य
नुगृहीतोस्मि तव भागवतस्य वै । दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा २० कर्मावदातमे
तत्ते गायंति स्वःस्त्रियो मुहुः । कीर्त्तिं परमपुण्यां च कीर्त्तयिष्यति भूरियं २१ श्रीशुक उवाच
एवं संकीर्त्य राजानं दुर्वासाः परितोषितः । ययौ विहायसामंत्र्य ब्रह्मलोकमहैतुकं २२ संव
११ त्सरोऽत्यगात्तावद्यावता नागतो गतः । मुनिस्तद्दर्शनाकांक्षो राजाब्भक्षो बभूव ह २३ गतेथ
दुर्वाससि सोंबरीषो द्विजोपयोगातिपवित्रमाहरत् । ऋषेर्विमोक्षं व्यसनं च वुद्ध्वा मेने स्व
वीर्यं च परानुभावं २४ एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे । क्रियाक
लापैः समुवाह भक्तिं ययाविरिंच्यान्निरयांश्चकार २५ श्रीशुक उवाच अथांबरीषस्तन
यषु राज्यं समानशीलेषु विसृज्य धीरः । वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगु राम
णप्रवाहः २६ इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपतेः । संकीर्त्तयन्ननुध्यायन् भगवतो न०टी०२ ११
भवत् २७ इति श्रीभागवते महापुराणे नवमस्कंधे अंबरीषचरिते पंचमोऽध्यायः ५

लक्षणं परानुभावं भगवतः प्रभावं मेने एवंविधा अनेकगुणा यस्य सः अविरिंच्यान् विरिंचिपद
सहितान् भोगान् निरयप्रायान् चकारेत्यर्थः २५ २७ इति नवमे पंचमोऽध्यायः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा न०

षष्ठेऽम्बरीषस्य वंशमुक्त्वा ततः परं षड्भिरध्यायैरिक्ष्वाकोर्वंश उच्यते तत्र षष्ठे शशादादिर्मांधात्रंतो निरूप्य
ते प्रसंगात्सौभरेराख्यानं मांधातृतनयापतेः १ तंतवे संतानार्थं २ येंऽगिरसा जनिताः एते रथीतरस्य क्षेत्रे प्रसूतत्वे
न रथीतरगोत्राः संतः अंगिरसो वीर्येण प्रसूतत्वादांगिरसाश्च पुनरपि रथीतराणां अन्येषां जातानां प्रवराः मुख्याः
स्मृताः यतः क्षेत्रोपेताः ब्राह्मणा इत्यर्थः ३ तदेव मनोरिक्ष्वाक्वादिसुपुत्रेषु पृषध्रश्च कविश्च विरक्तत्वान्न वंशप्रवर्तकौ

शुक उवाच विरूपः केतुमांछंभुरंबरीषसुतास्त्रयः विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः १
रथीतरस्याप्रजस्य भार्यायां तंतवेऽर्थितः अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् २ एते क्षे
त्रप्रसूता वै पुनस्त्वांगिरसाः स्मृताः रथीतराणां प्रवराः क्षेत्रोपेता द्विजातयः ३ क्षुवतस्तु म
नोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ४ तेषां पुरस्तादभव
न्नार्यावर्ते नृपा नृप पंचविंशतिः पश्चाच्च त्रयो मध्येऽपरेऽन्यतः ५ स एकदाष्टकाश्राद्ध इक्ष्वाकुः
सुतमादिशत् मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरं ६ तथेति स वनं गत्वा मृगान्हत्वा
क्रियार्हणान् श्रांतो बुभुक्षितो वीरः शशं चाददपस्मृतिः ७

केतुप्रभृतीनां वंशा आस्तारतम्यक्रमेणोक्ताः इदानीमतिविततमिक्ष्वाकोर्वंशमाह क्षुवतस्त्वित्यादिना यावत्सोमवं
शप्रस्तावः क्षुतं कुर्वतो मनोर्घ्राणतो जज्ञे श्रद्धायां जनयामास दशपुत्रानिति पूर्वोक्तो वा हत्या अभिप्रायेण तु
द्रष्टव्यं पुत्राणां शतं ज्येष्ठाः ४ आर्यावर्त्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः तस्मिन्पुरस्तात्समुद्रपर्यंतं भ
उभविभागेन पंचविंशतिर्नृपा अभवन् हे नृप तथैव पश्चाद्भागे पंचविंशतिः मध्ये तु ज्येष्ठास्त्रयः अपरे तु अन्य
त्र दक्षिणोत्तरादिषु ५ विकुक्षिरेव शशाद इति विख्यात इति वक्ष्यति तत्र हेतुमाह स एकदेति चतुर्भिः ६ क्रियार्ह
णान् श्राद्धार्हान् आदत् अभक्षयत् ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० तद्गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धार्चितसंस्काराय ८ त्यक्तो विधिः सदाचारो येन तेन ९ स तु इक्ष्वाकुः आपकेन वसिष्ठेन
राज्यभोगेन विरक्तो योगी सन् तेन योगेन कलेवरं त्यक्त्वा स यत्परं तत्त्वं तदवाप १० शासत्पालयन् हरिमीजे ११ दैत्यपु
रस्य जयात् पुरंजयः इंद्रो वाहोऽस्येति इंद्रवाहः ककुदि स्थितत्वात् ककुत्स्थ इति चाशशादसुतस्य त्रीणि नामानि
तेन त्वं मे निमित्तानि १२ तान्येव व्याचक्षाणः आह कृतांत इति सप्तभिः कृतं विश्वमंतयतीति तथा पार्ष्णिग्राहः

शेषं निवेदयामास पित्रे तेन च तत्क्रुधा । चोदितः प्रोक्षणायाह दुष्टमेतद् कर्मकं ८ ज्ञात्वा पुत्रस्य
तत्कर्म गुरुणाभिहितं नृपः । देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ९ स तु विप्रेण संवादं ज्ञाप
केन समाचरन् । त्यक्त्वा कलेवरं योगी स तेनावाप यत्परं १० पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवी
१२ मिमां । शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ११ पुरंजयस्तस्य सुत इंद्रवाह इतीरितः । ककु
त्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः १२ कृतांत आसीत्समरो देवानां सह दानवैः । पार्ष्णिग्रा
हो वृतो वीरो देवैर्दैत्यपराजितैः १३ वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः । वाहनत्वव
तेनस्तस्य बभूवेंद्रो महावृषः १४ स सन्नद्धो धनुर्दिव्यमादाय विशिखान्छितान् । स्तूयमानः स
मारुह्य युयुत्सुः ककुदि स्थितः १५ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः । प्रतीच्यां दिशि
दैत्यानां न्यरुणत्त्रिदशैः पुरं १६ तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणं । यमाय भल्लैरनयद्
दैत्यान्येऽभिययुर्मृधे १७ तस्येषुपाताभिमुखं युगांताग्निमिवोल्बणं । विसृज्य दुद्रुवुर्दैत्या हन्यमा

सहाय १३ इंद्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हनिष्यामीति तेन वाहनत्वेन वृतः सन्निंद्रो लज्जयात तदंगी राम
कुर्वन् विष्णोर्वचनात्तस्य वाहनत्वाय महावृषो बभूवेत्यर्थः १४ १६ येऽभिमुखं ययुः तान् यमं दर्शयितुं १२
मदहानिं भल्लैरनयदित्यर्थः १७ तद्वत् दृष्ट्वा अन्ये दुद्रुवुः स्वमालयं पातालं १८ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति एतैः कर्मभिः पुरंजयादिनामभिराहूतः आहूतः पाठांतरे आकृतः इत्यर्थः १८ शावस्तिः शावस्तस्य पुत्रः कु
वलयाश्वक एव धुंधुमार इति विख्यातः २१ तत्र कारणमाह य इति सुतानामेकविंशत्या सहस्रैर्वृतः सन् अहन्
तेनासौ धुंधुमार इति चेति चकारस्यान्वयः २२ ४ अथ तस्मान्निकुंभात् कृशाश्वः २५ भार्याणां शतेन सह अ
स्य पुत्रार्थं मिंद्रदैवत्यामिष्टिं प्रवर्त्तयामासुः स्मेत्यार्थं २६ तद्देवाह राजेति पिपासितः तर्षितः सन् जलार्थं

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये प्रत्ययच्छत्स राजर्षिरितिनामभिराहृतः १९ पुरंजयस्य पुत्रो
भूदेननास्तत्सुतः पृथुः विश्वगंधिस्ततश्चंद्रो युवनाश्वस्तु तत्सुतः २० शावस्तस्तत्सुतो येन शावस्ती
निर्ममे पुरी बृहदश्वस्तु शावस्तिस्ततः कुवलयाश्वकः २१ यः प्रियार्थमुतंकस्य धुंधुनामासुरं बली
सुतानामेकविंशत्या सहस्रैरहनद्वृतः २२ धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः धुंधोर्मुखा
ग्निना सर्वे त्रय एवावशेषिताः २३ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत दृढाश्वपुत्रो हर्यश्वो
निकुंभस्तत्सुतः स्मृतः २४ बर्हणाश्वो निकुंभस्य कृशाश्वोथास्य सेनजित् युवनाश्वोऽभवत्तस्य
सोनपत्यो वनं गतः २५ भार्याशतेन निर्विण्ण ऋषयोस्य कृपालवः इष्टिं स्म वर्त्तयांचक्रुरैंद्रीं ते
सुसमाहिताः २६ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः दृष्ट्वा शयानान्विप्रांस्तान्पपौ मंत्रजलं
स्वयं २७ उत्थितास्ते निशम्याथ व्युदकं कलशं प्रभो पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं २८
राज्ञा पीतं विदित्वाथ ईश्वराय नमश्चक्रुरहो दैवबलं बलं २९ ततः काल उपावृत्ते कुक्षिं निर्भि
द्य दक्षिणं युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ३० कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशं मां
धाता वत्स मा रोदीरितींद्रो देशिनीमदात् ३१

ईश्वरप्रहितेन ते २

विप्रः मंत्राभिमंत्रितं जलं पत्न्यै देयं स्वयं पपौ २७ व्युदकं निरुदकं पुंसवनं पुत्रोत्पत्तिकारणं २८ अहो दैव
बलमेव मुख्यं बलं पुरुषबलं तु न किंचिदिति वदंतः ईश्वराय नमस्कारं चक्रुः २९ ३० अयं कं धास्यति पा

स्यतीति रुदितः ... मां धास्यति इन्द्रो मां धाता
देव सम मारोदीरिति प्रवदन् देशिनीं तर्जनीमदात् ३१

रुदितः

भा०न० तस्य पिता युवनाश्वो भिन्नकुक्षिरपि न ममार किंतु कालांतरेण तपसा सिद्धिमन्वगात् ३२ मांधातुर्महिमानमाह त्रस
द्दस्युरिति त्रिभिः। राजन् यस्मान्मांधातुर्दस्यवस्तुद्विग्नाः। कंपिताः। संतस्त्रसंति अत इंद्रो यस्य त्रसद्दस्युरिति
नाम विदधे स मांधाता अवनीमेकः। शशासेत्युत्तरेणान्वयः ३३ अच्युतस्य तेजसा अप्रच्युततेजसा इति वा ३४ आ
त्मविदपि सः यज्ञं विष्णुमीजे त्र्यंगमवविधिनाष्टिस सर्वदेवमयमिति सार्द्धेन। ३५ ६ प्रतितिष्ठति अस्तं गच्छति ३७ स्तं २
प्रसंगात्सौभरेश्चरितमाह तेषामिति यावत्समाप्ति तेषां स्वसारः मांधातुः कन्याः ३८ ननु महातापस

नममार पितातस्य विप्रदेवप्रसादतः। युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ३२ त्रसद्दस्युरितींद्रो
ऽगाविदधे नाम तस्य वै। यस्मात्त्रसंति ह्युद्विग्ना दस्यवो रावणादयः। ३३ यौवनाश्वोऽथ मांधाता चक्र
वर्त्यवनिं प्रभुः सप्तद्वीपवतीमेकः शशासाच्युततेजसा ३४ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिद
क्षिणैः सर्वदेवमयं देवं सर्वात्मकमतींद्रियं ३५ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः। ध
र्मो देशश्च कालश्च सर्वमेतद्यदात्मकं ३६ यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति सर्वं तद्यौ
वनाश्वस्य मांधातुः क्षेत्रमुच्यते ३७ शशबिंदोर्दुहितरि बिंदुमत्यामधान्नृपः। पुरुकुत्समंबरीष
मुचुकुंदं च योगिनं तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिं ३८ यमुनांतर्जले मग्नस्तप्यमा
नः परं तपः निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः। ३९ जातस्पृहो नृपं विप्रः। कन्यामेकाम
याचत। सोऽप्याह गृह्यतां ब्रह्मन् कामं कन्या स्वयंवरे ४० स विचिंत्याप्रियं स्त्रीणां जरठोऽयमसम्म

स्य कुतो विवाहप्रसंगः। कथं वा जराजर्जरितं राजकन्या वव्रिरे तदाह यमुनांतर्जल इति षड्भिः। ३९ नृपं मांधाता
रं सोऽपि मांधाता स्वयंवरे कामं गृह्यतामित्याह ४० स विप्रः स्त्रीणामप्रियं मां चिंत्यानेनाहं प्रत्युक्तोऽतश्चात्मानं राम
तथा साधयिष्यामीति व्यवसितः निश्चितवानिति द्वयोः। रन्वयः। अप्रियत्वे हेतुः जरठो वृद्धः वलीभि वि० २३
युक्तः पलितश्च एजत्कः कंपमानशिराः तापसत्वादिना वा संमतो हमिति शेषः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या

९२ तेथन्यस्य प्रपंचः सुरस्त्रीणामपीप्सितं किंपुनर्मनुजेंद्राणां स्त्रियः तासामिति ४२ ततः किंचित्तं तदाह मुनिरि
ति द्वाभ्यां क्षत्त्रेति हारेण पंचाशतापि राजकन्याभिः स एक एव वरो वृतः ४३ ४४ तस्य गार्हस्थ्यं वर्णयति स
इति चतुर्भिः बह्वृचः इति मंत्रसामर्थ्ययुक्तो ताभिः सह रेमे इत्युत्तरेणान्वयः कोरेमे अपारणीयं दुरंतं यत्त
पः तस्य श्रिया संभृताः अनर्घ्याः परिच्छदाः येषु तेषु गृहेषु तथा नानाविधेषूपवनेषु च अमलोंभासि

साधयिष्ये तथात्मानं सुरस्त्रीणामपीप्सितं किंपुनर्मनुजेंद्राणामिति व्यवसितः प्रभुः ४२ मुनिः
प्रवेशितः क्षत्त्रा कन्यांतःपुरमृद्धिमत् वृतः स राजकन्याभिरेकः पंचाशता वरः ४३ तासां कलि
रभूद्भूयांस्तदर्थेऽपोह्य सौहृदं ममानुरूपो नायं व इति तद्गतचेतसां ४४ स बह्वृचस्ताभिरपार
णीयतपः श्रियानर्घ्यपरिच्छदेषु गृहेषु नानोपवनामलांभःसरःसु सौगंधिककाननेषु ४५
महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः स्वलंकृतस्त्रीपुरुषेषु नि
स्त्रिंशमादायविवस्त्रोऽभ्यद्रवद्रुषा ३० तेविसृज्योरणौतत्रव्यद्योतंतस्मविद्युतः आदायमेषावायांतंनग्नमैक्षत
सापतिं ३१ ऐलोपिशयनेजायामपश्यन्विमनाइव तच्चित्तोविह्वलःशोचन्बभ्रामोन्मत्तवन्महीं ३२ सतांवी
क्ष्यकुरुक्षेत्रेसरस्वत्यांचतत्सखीः पंचप्रहृष्टवदनाःप्राहसूक्तंपुरूरवाः ३३ अहोजायेतिष्ठतिष्ठघोरेन रे
त्यक्तुमर्हसि मांत्वमद्याप्यनिर्वृत्यवचांसिकृणवावहै ३४ सुदेहोयंपतत्यत्रदेविदूरंहृतस्त्वया खादंत्येनंवृ
कागृध्रास्त्वत्प्रसादस्यनास्पदं ३५
३२ तस्याःसखीःअपंचवीक्ष्यसूक्तंशोभनंवचनंहयेजायेत्यादि ३३ तदेवार्थतआह अहोइतिद्वाभ्यां अनिर्वृत्यमत्कृतांनिर्वृति
मप्राप्यपागंतरमानिनिवृत्तिमगमयित्वामंत्रामनुचेतिवा वचांसिकृणवावहेगोष्ठीकरवावहै ३४ सुदेहोऽतिकमनीयोऽयं
ममदेहः ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

३९

२ पुरूरवो मा मृथा इत्यादि तस्याः सूक्तं तदपर्थनं आह मा मृथा इति चतुर्भिः मा म्रियस्व पुरुषोसि अतो धैर्यमावहेति भावः इमे वृकाः प्रसिद्धा इंद्रियाणि वा त्वा इति त्वां मा स्म अद्युः भक्षयंतु इंद्रियवशो माभवेत्यर्थः ३६ प्रियेनिमित्ते साहसं येषां सा ३७ ३८ ते संवत्सरांते इति अपराणि तिवचनादंतर्वत्नीमुपालक्ष्य ज्ञात्वा ३९ अनेनाग्निनाकर्मकृत्वा तद्द्वारा उर्वशी प्राप्स्यतीत्यभिप्रायेणाग्नि

उर्वश्युवाच मा मृथाः पुरुषोसि त्वं मा स्म त्वाद्युर्वृका इमे क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ३६ स्त्रियोह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः घ्नंत्यल्पार्थेपि विस्रब्धं पतिं भ्रातरमप्युत ३७ विधायालीकविस्रंभमज्ञेषु त्यक्तसौहृदाः नवं नवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः ३८ संवत्सरांते हि भवानेकरात्रं मयेश्वरः वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भोः अंतर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरं ३९ पुनस्तत्र गतोऽब्दांते उर्वशीं

भ्य वीरमातरं उपलक्ष्य मुदा युक्तः समुवास तया निशां ४० अथैनमुर्वशी प्राह कृपणं विरहातुरं गंधर्वानुपधावेमांस्तुभ्यं दास्यंति मामिति ४१ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप उर्वशीं मन्यमानस्तां सोबुध्यत चरन्वने ४२ स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्तत ४३ स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ४४ उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तरां आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ४५ तस्य निर्मंथनाज्जातो जातवेदा विभावसुः त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ४६ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

स्थालीं ददुः स तु तां स्थालीमेवोर्वशीं मन्यमानः तया सहितो वने विचरन्नेषा उर्वशी किं त्वग्निस्थालीत्यबुध्यत ४२ ततश्च तां स्थालीं वने स्थापयित्वा गृहान्गत्वा निशि नित्यं तामेवाध्यायतस्तस्य मनसि त्रेतायां त्रयी अवर्तत कर्मबोधको वेदत्रयः प्रादुरभूत् ४३ ततः स्थालीस्थानं गतः स नृ[illegible]स्थाने अश्वत्थं विलक्ष्य अस्मिन्नसावग्निरस्तीति विशेषेण लक्षयित्वा तेनाश्वत्थेन द्वे अरणी कृत्वा अग्निमंथेतिशेषः शमीगर्भो द्विमंथ इति श्रुतेः ४४ मथनप्रकारमाह अधरारणीं उर्वशीं ध्यायन्नुत्तरारणिमात्मानं ध्यायन् उभयोरारण्योर्मध्ये यत्काष्ठं तत्प्रजननं पुत्रं ध्यायन् तथा च मंत्रः उर्वश्यस्यायुरसि पुरूरवा इति ४५ तस्य तेन कृतान्निर्मंथनाद्विभावसुरग्निर्जातः कथंभूतः जातवेदा धनं भाग्यं यस्मात्स च त्रय्या

विद्यया विहितो नाभावलः स कारणविशेषः आहवनीयादि त्रिरूपः सन्नग्नि आदहत
त्वेन पुत्रत्वेन कल्पितः पुण्यलोकप्राप्तिकरणत्वात् ४६

३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्म

तदाह तेनेति ४७ नन्वानादिर्वेदत्रयबोधितो ब्राह्मणादीनां मिश्रधर्मैनेकदेवतायजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः कथं सादिरिव वर्ण्यते तत्रा
ह एक एवेति द्वाभ्यां पुरा कृतयुगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव वेदः देवश्च नारायण एक एव अग्निश्च एक एव लौकिकः
८१ वर्णश्च एक एव हंसो नाम ४८ वेदत्रयी पुरूरवसः सकाशादासीत् एयिवान् प्राप्तः अयं भावः कृतयुगे सत्वप्रधानैः प्रायेण सर्वेपि ध्याननि
ष्ठाः रजःप्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूवेति ४९ नवमे चतुर्दशः ततः पञ्चदशे गाधिरैलपुत्रान्वयेऽजनि

तेनायजत यज्ञेशं भगवन्तमधोक्षजं उर्वशीलोकमन्विच्छन्सर्वदेवमयं हरिं ४७ एक एव पुरा वेदः प्रणवः सर्व
वाङ्मयः देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ४८ पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप अग्निना प्रजया रा
जा लोकं गान्धर्वमेयिवान् ४९ इति श्रीभागवते महापुराणे नवमस्कन्धे चतुर्दशोऽध्यायः बादरायणिरुवाच
ऐलस्य चोर्वशीगर्भात्षडासन्नात्मजा नृप आयुः श्रुतायुः सत्यायू रयोथ विजयो जयः १ श्रुतायोर्वसुमान्पुत्रः
सत्यायोश्च श्रुतंजयः रयस्य सुत एकश्च जयस्य तनयोऽमितः २ भीमस्तु विजयस्याथ कांचनो होत्रकस्ततः ३
तस्य जह्नुः सुतो गंगां गंडूषीकृत्य योऽपिबत् जह्नोः पुरुस्तस्य पुत्रो बलाकश्चात्मजोऽजकः ३ ततः कुशः कु
शस्यापि कुशाम्बुर्मूर्तयो वसुः कुशनाभश्च चत्वारो गाधिरासीत्कुशाम्बुजः ४ तस्य सत्यवतीं कन्यामृचीकोऽया
चत द्विजः वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ५

षष्ठे हि त्रसुतो रामः कार्तवीर्यमहन्नृपः सुग्रहत्वात्पादिक्रमेण श्रुतायुप्रभृतीनां वंशानाह श्रुतायोरित्यादिना एकः एकसंज्ञः
अमितः तत्संज्ञः २ जह्नोः पुरुः तस्य बलाकः तस्याजकः ३ गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभूदित्युत्तराध्यायान्ते च वक्ष्यति
गाधेरभून्महातेजा इत्यादिना ४ तत्र तावत्तदुपोद्घाततत्वेन भृगुवंशभवस्य ऋचीकस्य चरितं प्रसक्तोनञ्च परशुरामावतार
चरितमाह तस्य सत्यवतीमित्यादिना विसदृशं अननुरूपं भार्गवमृचीकं ५

नृपसके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० दक्षिणवामयोरेकतः श्यामाः कर्णा येषां सर्वस्मिन्नंगे चंद्रस्येव वर्चो येषां तेषां सहस्रमपि पर्याप्तमस्मत्कन्यायाः पणः कुशिकाः कौशिकावयं ७
उभयैः पत्न्या प्रार्थितो मंत्रैः श्वश्रू तु क्षात्रैरित्यर्थः ८ यावत्स्नातुं मुनिर्निर्गतः तावज्जायया यां भर्त्रा स्नेहाच्च सुता सत्यवत्या श्रेष्ठम् धि०स्या०१
त्वा च याचिता माता सत्यवती याचिता सती प्रात्ममंत्राभिमंत्रितं स्वचरुं मात्रे अपृच्छच्च प्रादात् मातापि स्वचरुं क्षात्रमंत्राभिमंत्रितं स्वयमद
त्तं ज्ञात्वा एवं कष्टं जुगुप्सितं तदेवाह तेपुत्रो घोरो भविष्यति भ्राता तु ब्रह्मवित्तमो भविष्यतीति ९ एवं मा भूदिति प्रसादितो भार्गव आह

एकतः श्यामकर्णानां हयानां चंद्रवर्चसां सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयं ६ इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणांति
के आनीय दत्वा तानश्वानुपयेमे वराननां ७ स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया श्रपयित्वोभयैर्मंत्रैश्चरुं
स्नातुं गतो मुनिः ८ तावत्सत्यवती मात्रा स्वचरुं याचिता सती श्रेष्ठं मत्वा तयायच्छन्मात्रे मातुरदत्स्वयं ९ तद्विज्ञाय मुनिः
३० प्राह पत्नीं कष्टमकारषीः घोरो दंडधरः पुत्रो भ्राता ते ब्रह्मवित्तमः १० प्रसादितः सत्यवत्या मैवं भूदिति भार्गवः अथ तर्हि
भवेत्पौत्रो जमदग्निस्ततोऽभवत् ११ सा चाऽभूत्सुमहापुण्या कौशिकी लोकपावनी रेणोः सुतां रेणुकां वै जमदग्निरुवा
ह या १२ तस्यां वै भार्गवऋषेः सुता वसुमदादयः यवीयान् जज्ञ एतेषां राम इत्यभिविश्रुतः १३ यमाहुर्वासुदेवांशं हैहया
नां कुलांतकं त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीं १४ दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् रजस्तमोवृत
महन् फल्गुन्यपि कृतेंऽहसि १५ राजोवाच किं तदंहो भगवतो राजन्यैरजितात्मभिः कृतं येन कुलं नष्टं क्षत्रियाणामभी द०का०१
भीक्ष्णशः १६ बादरायणिरुवाच हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः दत्तं नारायणांशांशमाराध्य परिकर्मभिः १७

अथ तर्हि पौत्रो घोरो भविष्यति जमदग्निः पुत्रोऽभवदित्यर्थः सा च सत्यवती कौशिकी नद्यभूत् १२ भार्गवऋषेर्जमदग्नेः सुताः राम
१३ १४ अनीनशत् नाशयामास तदेवाह रजस्तमोवृतमिति पौरुषेतरं सुगमं १५ १६ कार्तवीर्यार्जुनेन कृतापराधं ३०
वक्तुं तस्य दर्पहेतुमैश्वर्यादिकमाह हैहयानामिति परिकर्मभिः परिचर्याभिर्दत्तात्रेयमाराध्य १७ राम राम

अधार्मिकं भुवो भार

अव्याहतमिन्द्रियादिकं चलेभ १८ यत्र यस्मिन्नैश्वर्य्यमणिमाद्यो गुणः १९ रेवां भासिन मेदाजले सरितं नर्म्मदां १० रावणो दिग्विजये
माहिष्मत्याः समीपे नर्म्मदायां देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात् प्रतिस्रोतसः सत्यास्तस्याः सरितो जले विप्लाविते स्वशिविरमा
लक्ष्य तस्य तद्धार्य्येन सेहे २१ ततः अन्नत्न किल्विषः क्रीडं तमभिमवितुं प्रवृत्तः स नूगृहीतः माहिष्मत्यां स्वपुर्य्यां कपिरिव सन्निरुद्ध

बाहुदशशते लेभे दुर्द्धर्षत्वमरातिषु अव्याहतेन्द्रियोजः श्रीतेजोवीर्य्ययशोबलं १८ योगेश्वरत्वमैश्वर्य्यं गुणा
यत्राणिमादयः चचाराव्याहतगतिर्लोकेषु पवनो यथा १९ स रेवाराधने क्रीडन् रेवां भासि मेदालकं वैजयन्ती
स्रजं बिभ्रद्रुरोध सरितं भुजैः २० विप्लाविते स्वशिविरे प्रतिस्रोतः सरित्सज्जले नाउ मृष्यत्तस्य तद्धार्य्यवी
रमानी दशाननः २१ गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्विषः माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपि
र्यथा २२ स एकदा तु मृगयां विचरन्विपिने वने यदृच्छयाश्रमपदं जमदग्नेरुपाविशत् २३ तस्मै स नर
देवाय मुनिरर्हणमाहरत् ससैन्यामात्यवाहाय हविष्मत्या तपोधनः २४ स वीरस्तत्र तद्दृष्ट्वा आत्मैश्व
र्य्यातिशायिनं तन्नाद्रियताग्निहोत्र्यां साभिलाषः स हैहयः २५ हविर्द्धानीमृषेर्दर्प्पान्नरान्हर्तुमचोदय
त् ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् २६ अथ राजनि निर्य्याते राम आश्रम आगतः श्रुत्वा तत्तस्य
दौरात्म्यं चुक्रोधाहिरिवाहतः २७ घोरं परशुमादाय सतूणं चर्म्म कार्मुकं अन्वधावत दुर्मर्षो मृगेन्द्र इव यू
थपं २८ तमापतन्तं भृगुवर्य्यमोजसा धनुर्द्धरं बाणपरश्वधायुधं ऐणेयचर्म्माम्बरमर्कधामभिर्युतं जटा
भिर्ददृशे पुरीं विशन् २९

अ पुनश्चावज्ञयायेन मुक्तः २२ इदानीं तत्कृतमपराधं दर्शयन्नाह स एकदेत्यादिना २३ अर्हणमातिथ्यादि हविष्मत्या कामधेन्वा २४ त
द्दर्हणं नाद्रियत तस्मिन्नातुष्यत् यतो ग्निहोत्र्यां होमधेनौ साभिलाषः स हैहयः हैहयेसहवर्त्तमानः २५ दर्प्पाद्धेतोः ऋषेर्हविर्द्धा
नीमग्निहोत्रधेनुं हर्तुं नरानचोदयत् २६ २७ सतूणं कार्मुकं चर्म्म वाहाय २८ ऐणेयचर्म्म कृष्णाजिनमम्बरं यस्य २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० प्रहरन्स्वरश्वधोयस्यामन अनिर्लतेयारिवीजो वीर्यं यस्य परेषां चक्रं सैन्यं सूदयतीति तथा छिन्ना भुजा एव तरवः कं धरा अयेषां
हताः सूता वाहनानि च येषां ते वीरा निपेतुः ३१ विरक्ता अमोदयायस्य ३२ पञ्चशतैर्धनुः षु सोऽर्जुनः रामाय संदधे एकमेव धनुर्य
स्य सः पागतेरे एक एव बंधः संधानं येषां ते रिपुभिः तानि धनूंषि समं सहन्तन् क्षणमेवाच्छिनत् ३३ मधसा धनं भूतानं च
लोधिपांश्च क्षिप्योभिधावतस्तस्य भुजान् चिच्छेद अहः फणानिवेत्यर्थः ३४ ३५ समर्पयत् समाप्यैयत् ३६ ३७ ३८

अश्वोदयद्रत्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्नीशक्तिभिः अक्षौहिणीः सप्तदशातिभीषणास्ता राम ए
को भगवानसूदयत् ३० यतो यतोसौ प्रहरत्परश्वधो मनोनिलौजाः परचक्रसूदनः ततस्ततश्छिन्नभु
३२ जोरुकंधरा निपेतुरुर्व्यां हतसूतवाहनाः ३१ दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः विवृ
क्णवर्मध्वजचापविग्रहं निपातितं हैहय आपतद्रुषा ३२ अथार्जुनः पञ्चशतेषु बाहुभिर्धनुःषु बाणान्युगप
त्स संदधे रामाय रामोऽस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समं ३३ पुनः स्वहस्तैरचलान्मृधेङ्घ्रिपा
नुत्क्षिप्य वेगादभिधावतो युधि भुजान्कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं त्वहेरिव ३४ कृत्तबा
होः शिरस्तस्य गिरेः शृङ्गमिवाहरत् हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ३५ अग्निहोत्रीमुपावर्त्य सव
त्सां परवीरहा समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत् ३६ स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च
नृ.स्क.५ वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ३७ राम राम महाबाहो भवान्पापमकारषीत् अवधीन्नरदेवं य
त्सर्वदेवमयं वृथा ३८ वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः यया लोकगुरुर्देवः पारमेष्ठ्यमगात्प ३२
दं ३९ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ४० राज्ञो
मूर्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः तीर्थसंसेवया चांहो जह्यङ्गाच्युतचेतनः ४१ इति श्रीभागवते महापु

३९ अर्हणतां पूज्यतां ३९ सौरी सूर्यस्य प्रभेव ४० तीर्थसंसेवया च कारात् यमनियमैश्च अच्युते चेतना चित्तं यस्य सः ४१ ॥ ७
नवमे पञ्चदशः १५

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोऽत्राथार्जुनसुतैर्जमदग्निर्हतो मुहुः १ रामात्क्षत्रवधः प्रोक्तो विश्वामित्रस्य चान्वयः १ किंचिद्दोषविचित्ररथे गंधर्वराजे स्पृहा यस्याः सा किंचिन्
सस्मार इति वा २ कलशं पुरो धाय अग्रे निधाय ३ व्यभिचारं मानसं ज्ञात्वा ४ आज्ञातिलंघिनां भ्रातॄणां मातुश्च वधं संचोदितः सन्मु
नेर्यः समाधिस्तपश्च तयोः प्रभावज्ञः यदि न हन्यां तर्हि मामपि शप्तुं समर्थः यदि तु हन्यां तर्हि मयि संतुष्टः सन् तानपि जीवयितुं स

शुक उवाच पित्रा पशिक्षितो रामस्तथेति कुरुनंदन संवत्सरं तीर्थचर्यां चरित्वाश्रममाऽव्रजत् १ कदाचिद्रेणुकाया
नागंगायां पद्ममालिनं गंधर्वराजं क्रीडंतमप्सरोभिरपश्यत २ विलोकयंती क्रीडंतमुदकार्थं नदीं गता होमवेलां न
सस्मार किंचिच्चित्ररथस्पृहा ३ कालात्ययं तं विलोक्य मुनेः शापविशंकिता आगत्य कलशं तस्थौ पुरोधाय कृतां
जलिः ४ व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न च क्रिरे ५ रामः संचो
दितः पित्रा भ्रातॄन्मात्रा सहावधीत् प्रभावज्ञो मुनेः सम्यक्समाधेस्तपसश्च सः ६ वरेण च्छंदयामास प्रीतः सत्य
वतीसुतः वव्रे हतानां रामोपि जीवितं चास्मृतिं वधे ७ उत्तस्थुस्ते कुशलिनो निद्रापाय इवांजसा पितुर्विद्वांस्त
पोवीर्यं रामश्चक्रे सुहृद्वधं ८ येऽर्जुनस्य सुता राजन्स्मरंतः स्वपितुर्वधं रामवीर्यपराभूता लेभिरे शर्म न क्व
चित् ९ एकदाश्रमतो रामे सभ्रातरि वनं गते वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् १० दृष्ट्वाग्न्यागार
आसीनमावेशितधियं मुनिं भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ११ याच्यमानाः कृपणया राममात्राऽतिदा
रुणाः प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबंधवः १२ रेणुका दुःखशोकार्ता निघ्नत्यात्मानमात्मना राम रामेहि ता
तेति विचुक्रोशोच्चकैः सती १३ तदुपश्रुत्य दूरस्था हा रामेत्यार्तवत्स्वनं त्वरयाश्रममासाद्य ददृशे पितरं हतं १४

समर्थ इति जानन्नित्यर्थः ६ ७ नन्वति निंदितं तत्कथं कृतवान् तत्राह पितुर्विद्वानिति पूर्वोक्त एवाभिप्रायः ८ सर्वक्षत्रियवधे
कारणं वक्तुमाह येऽर्जुनस्य सुता इत्यादिना ९ १० भगवत्यावेशिता धीर्येन तं १३ १४ श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰न॰ दुःखवाहिनी वेगेन विमोहितः १५ ब्रह्मघ्नैर्विहता श्रीर्यस्यास्तां हे राजन् स रामस्तेषां शीर्षभिर्माहिष्मतीमध्ये महान्तं गिरिं चक्रे १६ ७ तेषां रक्तेन
अब्रह्मण्यानां भयावहां घोरां नदीं चक्रे तथापि सर्वक्षत्रवधे किं कारणं तदाह हेतुं कृत्वेति मार्गेण अमंगलकारिणि अन्यायवर्तिनि सति
१८ त्रिःसप्तकृत्वो रेणुकया दुःखावेशादुरस्ताडनं कृतं ततो रामस्तावत्कृत्वः क्षत्रमुत्सादितवानिति प्रसिद्धिः १९ २० १ २२ २३ स

नेदुः तद्दुःखरोषामर्षार्तिशोकवेगविमोहितः हा तात साधो धर्मिष्ठ त्यक्त्वास्मान्स्वर्गतो भवान् १५ विलप्यैवं पितुर्देहं
निधाय भ्रातृषु स्वयं प्रगृह्य परशुं रामः क्षत्रान्ताय मनो दधे १६ गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियं तेषां
२धे सशीर्षभी राजन्मध्ये चक्रे महागिरिं १७ तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहां हेतुं कृत्वा पितृवधं क्षत्रेमंगल
कारिणि १८ त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः स्यमंतपंचके चक्रे शोणितोदान्ह्रदान्नव १९ पि
तुः कायेन संधाय शिर आदाय बर्हिषि सर्वदेवमयं देवमात्मानमयजन्मखैः २० ददौ प्राचीं दिशं होत्रे ब्रह्मणे
३२ दक्षिणां दिशं अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशं २१ अन्येभ्योऽवान्तरदिशः कश्यपाय च मध्यतः आर्या २
वर्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परं २२ ततश्चावभृथस्नानविधूताशेषकिल्बिषः सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र
इवांशुमान् २३ स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणं ऋषीणां मंडले सोऽभूत्सप्तमो रामपूजितः २४ जाम
दग्न्योऽपि भगवान्रामः कमललोचनः आगामिन्यंतरे राजन्वर्तयिष्यति वै बृहत् २५ आस्तेऽद्यापि महेंद्राद्रौ
न्यस्तदंडः प्रशांतधीः उपगीयमानचरितः सिद्धगंधर्वचारणैः २६ एवं भृगुषु विश्वात्मा भगवान्हरिरीश्व राम
रः अवतीर्य परं भारं भुवोऽहन्बहुशो नृपान् २७ गाधेरभून्महातेजाः समिद्ध इव पावकः तपसा क्षात्रमुत्सृज्य यो ले ३२
भे ब्रह्मवर्चसं २८

ज्ञानं स्मृतिस्तदेव लक्षणं चिह्नं यस्य तं स्वदेहं लब्ध्वा सप्तर्षीणां मंडले सप्तमऋषिरभूत् २४ बृहद्बृहत्सं वेदं वेदप्रवर्तकेषु सप्त
र्षिषु कर्ता भविष्यतीत्यर्थः १५ २६ भुवो भारमहन् भारमवाहन् नृपानिति २७ तदेवं प्रसक्तानुप्रसक्तं समाप्य प्रकृतमाह गाधेरि
ति महातेजा विश्वामित्रः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते सर्वे लिंगसमवायिन्यायेन प्राणभृत्तत्पद धातीति वन्न मधुछंद स एवोच्यंते तथाच श्रुतिः तस्य विश्वामित्रस्यैकशतं पुत्रा आसुः पंचा
शदेव ज्यायांसो मधुछंदसः पंचाशत्कनीयांस इत्यादि तत्र च विश्वामित्रपुत्रेषु भार्गवस्याजीगर्तस्य देवरातस्य ज्येष्ठत्वमेवगम्य
ते तथा आश्वलायन बौद्धायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तं प्रवरश्चैतस्मिन्नेव वंशे आवांतर भेदः ननु वंशांतरं त
थाच स्मृतिः एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते तावत्समानगोत्रत्वं विना भृग्वंगिरोगणादिति २८ तत्कुतो भृगुवंशभवस्य देव
रातस्य कौशिकप्रवरत्वमित्याशंक्य तदुपपादयन्नाह शुनःशेपेत्यादि यावत्समाप्ति पूर्वमजीगर्तसुतत्वे मध्यमत्वेन पितृभ्यां ममत्वा वि

विश्वामित्रस्य चैवासन्पुत्रा एकशतं नृप मध्यमस्तु मधुछंदा मधुछंदस एव ते २९ पुत्रं कृत्वा शुनःशेपं देवरातं
च भार्गवं आजीगर्तं सुतानाह ज्येष्ठ एष प्रकल्प्यतां ३० यो वै हरिश्चंद्रमखे विक्रीतः पुरुषः पशुः स्तुत्वा दे
वान्प्रजेशादीन्मुमुचे पाशबंधनात् ३१ यो रातो देवयजने देवैर्गाधिषु तापसः देवरात इति ख्यातः शुनःशे
पस्तु भार्गवः ३२ ये मधुछंदसो ज्येष्ठाः कुशलं मेनिरे न तत् अशपत्तान्मुनिः क्रुद्धो म्लेछा भवत दुर्जनाः
३३ स होवाच मधुछंदाः सार्धं पंचाशता ततः यन्नो भवान्संजानीते तस्मिंस्तिष्ठामहे वयं ज्येष्ठं मंत्रदृशं च
क्रुस्त्वामन्वंचो वयं स्म हि ३४ विश्वामित्रः सुतानाह वीरवंतो भविष्यथ ये मानं मे ऽनुगृह्णंतो वीरवंतमकर्त मां
३५

हाय विक्रीतत्वात्तस्य कृपया सुतानाह ज्येष्ठ एष प्रकल्प्यतामिति ३० एतदेव स्पष्टयितुं तं विशिनष्टि य इति द्वाभ्यां मुमुचे अमुच्यत ३१
भार्गवो पि गाधिषु गाधेर्वंशजेषु देवरात इति ख्यातः ३२ तत्तस्य ज्येष्ठत्वं कुशलं न मेनिरे मध्यमस्यानर्थावहत्वं दृष्ट्वा नोचेत्कुतस्तं
मुनिं विश्वामित्रं पंचाशता कनिष्ठैः सार्धं समध्यमो मधुछंदा उवाच नोस्माकं यत्तु ज्येष्ठत्वं कनिष्ठत्वं वा भवान् पिता संजानीते मन्यते
तस्मिन्वयं तिष्ठाम इति एवमुक्त्वा मंत्रदृशं कस्य नूनं कतमस्यामृतानामित्यादिमंत्राणां द्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः तदाह [illegible] वयं सर्वे त्वा
मन्वंचः स्महि अनुगंतारः कनिष्ठाः स्म इत्यर्थः ३४ ततः प्रसन्नो विश्वामित्रस्तान्सुतानाह हो वीरवंतः पुत्रवंतो भविष्यथ ये यूयं मे मा
नं पूजां मनुगृह्णंतो अनुवर्तमानाः सतो वीरवंतं पुत्रवंतमकर्त कृतवंत इत्यर्थः ३५

मां

कथं चक्रुः

भा०न० हेकुशिकाएषदेवरातः वोयुष्माकंदायः कौशिकाएवयतः वीरमत्सुतं तेमांअन्विताअनुगच्छतअन्येचाष्टकादयस्तस्यसुताआसन् ३६
तेप्रसंहरतिएवमिति एषकौशीतत्वाणेकेनुगृहीताः अन्यस्यपुत्रत्वेनस्वीकृतत्वादित्यर्थः कौशिकगोत्रंपृथग्विधंनानाप्रकारंजातंति
चप्रवरांतरमापन्नंप्राप्तंहियस्मात् एवंदेवरातज्येष्ठत्वेनतत्रप्रकल्पितं ३७ इतिनवमेषोडशः आर्यो सप्तदशेतुज्येष्ठपुत्र
१७ स्यपंचसु सुतेषु क्षत्रवृद्धादिचतुर्णांवंशवर्णनेन इह श्रीकृष्णावतारप्रस्तावायवंशानुक्रमणमल्पादिक्रमेणप्रक्रांतमिति

एषवः कुशिकावीरोदेवरातस्तमन्विताः अन्येचाष्टकहारीतजयक्रतुमदादयः ३६ एवंकौशिकगोत्रंतुविश्वा
मित्रैः पृथग्विधं प्रवरांतरमापन्नंतद्धिचैवंविकल्पितं ३७ इतिश्रीभागवतेमहापुराणेनवमस्कंधेषोडशोऽध्यायः
श्रीबादरायणिरुवाच यः पुरूरवसः पुत्रआयुस्तस्याभवन्सुताः नहुषः क्षत्रवृद्धश्चरजीरंभश्चवीर्यवान् १
अनेनाइतिराजेंद्र शृणुक्षत्रवृधोऽन्वयं क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः २ काश्यः कुशोगृत्स
मदइतिगृत्समदादभूत् शुनकः शौनकोयस्यबह्वृचप्रवरोमुनिः ३ काश्यस्यकाशिस्तत्पुत्रोराष्ट्रोदीर्घत
३३ स मः पिता धन्वंतरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः ४ यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः तत्पुत्रः के
तुमानस्यजज्ञेभीमरथः ततः ५ दिवोदासोद्युमांस्तस्मात्प्रतर्दनइतिस्मृतः सएवशत्रुजिद्वत्सऋतध्वजइतीरितः
६ तथाकुवलयाश्वेतिप्रोक्तोऽलर्कादयस्ततः ७ षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच नालर्कादपरोराजन्
बुभुजेमेदिनींयुवा ८ अलर्कात्सन्ततिस्तस्मात्सुनीथोऽथसुकेतनः धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत
९

यस्यवंशेकृष्णावतारस्तस्यवंशोऽतिविततत्वादंतेनिरूप्यतेअतः पुरूरवसः पुत्राणांपंचानांकनिष्ठानांवंशानुक्रमेणैनोप्र रम
थमस्यवंशमाहयइति एवंनहुषययातियदुप्रभृति वापिद्रष्टव्यं क्षत्रवृधः क्षत्रवृद्धस्यदीर्घतमसः पिता ४ स्मृतमात्रए २३
वार्तिंरोगदुःखंनाशयतीतितथा ६ ततः प्रतर्दनोदिशब्दवाच्यात् द्युमतः सकाशादलर्कादयः ७ ८ संततिसंज्ञः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यकेतोर्धृष्टकेतुः तस्मात्सुकुमारस्तस्माद्वीतिहोत्रः । तस्य भर्गः अतो भर्गात् भार्गभूमिः ॥१०॥ काशयः काशेर्वंश्याः काशेः प्रपितामहस्य
क्षत्रवृद्धस्यान्वयं अयन्ते यान्तीति तथा ॥११॥ ततः अनेनसः शुद्धो जज्ञे कृतकृत्यः सः यतः आत्मवान् ज्ञानी अतः पुत्रोत्पादने कृत
ने

धृष्टकेतुसुतस्तस्मात्सुकुमारः क्षितीश्वरः । वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृप ॥१०॥ इतीमे काशयो भू
पाः क्षत्रवृद्धान्वयायिनः । रंभस्य रभसः पुत्रो गंभीरश्चाक्रियस्ततः ॥११॥ तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः । शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः ॥१२॥ ततः शान्तरयो जज्ञे कृतकृत्यः स आत्मवा
न् । रजेः पंचशतान्यासन् पुत्राणाममितौजसां ॥१३॥ देवैरभ्यर्थितो दैत्यान् हत्वेन्द्रायाददाद्दिवं । इंद्रस्त
स्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः ॥१४॥ आत्मानमर्पयामास प्रह्रादाद्यरिशंकितः । पितर्युपरते पुत्रा या
चमाना नो ददुः ॥१५॥ त्रिविष्टपं महेन्द्राय यज्ञभागान् समाददुः । गुरुणा हूयमानेऽग्नौ बलभित्तनयान् र
जेः ॥१६॥ अवधीद्भ्रंशितान् मार्गान्न कश्चिदवशेषितः । कुशात् प्रतिः क्षात्रवृद्धात् संजयस्तत्सुतो जयः ॥१७॥
ततः कृतः कृतस्यापि जज्ञे हर्यबलो नृपः । सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः ॥१८॥ संकृति
स्तस्य च जयः क्षत्रधर्मा महारथः । क्षत्रवृद्धान्वया भूपा इमे शृण्वथ नाहुषान् ॥१९॥ इति श्रीभा
गवते महापुराणे नवमस्कंधे सप्तदशोऽध्यायः । श्रीरामजयरामजयजयराम श्रीराम श्रीराम ।

वानित्यर्थः ॥१२॥ १३ १४ १५ तेषामतिभ्रंशाय गुरुणा बृहस्पतिना अभिचारविधानेनाग्नौ हूयमाने सति ॥१६॥
सिंहावलोकनेनाह क्षात्रवृद्धात् क्षत्रवृद्धपौत्रात् कुशात् प्रतिः प्रतेः संजयः ॥१९॥ नवमे सप्तदशोऽध्यायः । राम०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथाद्देशे ययातेस्तनाहुषस्य कथोच्यते यस्य पंच सुपुत्रेषु कनीयान् गुरोर्ज्वरी १ तस्य राज्यस्य परिणामं अनर्थविदत्वं वेत्तीति तथा॥ तत्र हेतुः यत्रेति २ स्थानात्स्वर्गात् द्विजैरगस्त्यादिभिः ३ यवीयसो भ्रातॄणीदिशत् काव्यस्य शुक्रस्य वृषपर्वण अकन्यां भांड तदारैः सन् ४ ५ तत्र प्रतिलोमतादोषा ईश्वरघटनादिति दर्शयन् कथामाह एकदेत्यादिना प्रतिज्ञामाह तद्वचइस्यते नागुरो

टी०:१ शुकउवाच यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः षडिमे नहुषस्यासन्निंद्रियाणीव देहिनः १ राज्यं नैच्छद्यतिः पि
३४ त्रादत्तं तत्परिणामवित् यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते २ पितरि भ्रंशिते स्थानादिंद्राण्या धर्षणाद्द्विजैः
प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ३ चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः कृतदारो जुगोपो
र्वीं काव्यस्य वृषपर्वणः ४ राजोवाच ब्रह्मर्षिर्भगवान्काव्यः क्षत्रबंधुश्च नाहुषः राजन्यविप्रयोः कस्माद्वि
वाहः प्रतिलोमकः ५ शुकउवाच एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्यका सखीसहस्रसंयुक्ता गुरुपुत्र्या
च भामिनी ६ देवयान्या पुरोद्याने पुष्पितद्रुमसंकुले व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ७
ता जलाशयमासाद्य कन्याः कमललोचनाः तीरे न्यस्य दुकूलानि विजह्रुः सिंचतीर्मिथः ८ वीक्ष्य व्रजं
तं गिरिशं सह देव्या वृषस्थितं सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ९ शर्मिष्ठाऽजानती वा ३४
सो गुरुपुत्र्याः समव्ययत् स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् १० अहो निरीक्ष्यतामस्या दास्याः क
र्म ह्यसांप्रतं अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ११

शुक्रस्य पुत्र्या देवयान्या च व्यचरदिति द्वयोरन्वयः ६ कलगीता अलयो येषु तानि नलिनीपुलिनानि यस्मिन् पुरोद्याने अबला शर्मि
ष्ठा ७ सिंचतीः सिंचंत्यः ८ अजानती स्वीयं मत्वा गुरुपुत्र्या वासः समव्ययत् पर्यधात् १० असांप्रतमन्याय्यम् ११ श्रीराम श्री०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

अन्यायेनैव ब्राह्मणोत्कर्षविवर्तनैरनन्तिक्लैर्यैरितित्रिभिः येब्राह्मणाः परस्य पुंसो मुखं मुखादुत्पन्नत्वेन तत्सिद्धात्वेन च श्रेष्ठा इत्यर्थः ११
ज्योतिर्ब्रह्मापथा वेदमार्गः १२ १३ तद्वद्ब्राह्मणमात्रमेव तावच्छ्रेष्ठं तत्रापि वयं भृगवः अस्याश्च पिता नः शिष्यः एवं सत्यपि अस्मा
भिर्धार्यं वासः इयमसती धृतवती १४ २० निषिद्धोयं प्रतिलोमसंबंध इति चेत्तत्राह एष इति २१ ब्राह्मणमेव वृणोहि किमनेनाग्रहे

य इदं तपसा सृष्टं मुखं पुंसः परस्य ये धार्यते यैरिह ज्योतिः शिवः पंथाः प्रदर्शितः १२ यान्वंदंत्युपतिष्ठंते लोकनाथाः सु
रेश्वराः भगवानपि विश्वात्मा पावनः श्रीनिकेतनः १३ वयं तत्रापि भृगवः शिष्योऽस्या नः पितासुरः अस्मद्धार्यं धृ
तवती शूद्रो वेदमिवासती १४ एवं क्षिपंतीं शर्मिष्ठा गुरुपुत्रीमभाषत रुषा श्वसंत्युरंगीव धर्षिता दष्टदच्छदा १५ आ
त्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि किं न प्रतीक्षसेऽस्माकं गृहान्बलिभुजो यथा १६ एवंविधैः सुपरुषैः क्षिप्त्वा
चार्यसुतां सतीं शर्मिष्ठा प्राक्षिपत्कूपे वासश्चादाय मन्युना १७ तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् प्राप्तो य
स्व ४ दृच्छया कूपे जलार्थी तां ददर्श ह १८ दत्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे गृहीत्वा पाणिना पाणिमुज्जहार
दयापरः १९ तं वीरमाहौशनसी प्रेमनिर्भरया गिरा राजंस्त्वया गृहीतो मे पाणिः परपुरंजयः २० हस्तग्राहो
परो माभूद्गृहीतायास्त्वया हि मे एष ईशकृतो वीर संबंधो नात्र पौरुषः यदिदं कूपमग्नाया भवतो दर्शनं मम
२१ न ब्राह्मणो मे भविता हस्तग्राहो महाभुज कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा २२ श्रीराम श्रीराम श्री

णेति चेत्तत्राह न ब्राह्मण इति बृहस्पतेः सुतः कचः शुक्रात्मृतसंजीवनीं विद्यामध्यगात् तदा च देवयानी तं पतिं चकमे स च गुरु
पुत्री मम पूज्येति न तामुद्वहत् तेन क्रुपिता सती नैवेयं विद्यानिः फला भवत्विति तं शशाप स च तं च ब्राह्मणः पतिर्न भवेदि
ति तां शशाप तदाह यमशपं तस्य शापात् २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० अशास्त्रीयत्वादनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुध्वा तद्गतं तस्यां सकामं स्वमनश्च बुध्वा नह्यधर्म्मे मदीयं मनः प्रविशेदिति तस्या
वचः प्रतिजग्राह अंगीकृतवान् २३ स शर्मिष्ठासंबंधोपि दैववशादेवाभवदिति दर्शयन्नाह गते राजनीति नवभिः उक्तं भिक्षुकी
त्यादि कृतं कूपप्रक्षेपादि २४ कापोतीं मुञ्छवृत्तिं २५ प्रत्यनीकं द्वेषस्तेन विवक्षितं ताजयं प्रापणीयाद्युस्य भिप्रेतं यस्य तथाभू

ययातिरनभिप्रेतं दैवोपहृतमात्मनः मनस्तु तद्गतं बुध्वा प्रतिजग्राह तद्वचः २२ गते राजनि सा धीरे तत्र स्म रुद
ती पितुः न्यवेदयत्ततः सर्वमुक्तं शर्मिष्ठया कृतं २३ दुर्म्मना भगवान्काव्यः पौरोहित्यं विगर्हयन् स्तुवन्वृ
त्तिं च कापोतीं दुहित्रा स ययौ पुरात् २४ वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितं गुरुं प्रसादयन्मूर्ध्ना पादयोः
पतितः पथि २५ क्षणार्द्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः कामोस्याः क्रियतां राजन्नैनं त्यक्तुमिहोत्सहे
२६ तथेत्यवस्थिते प्राह देवयानी मनोगतं पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु २७ स्वनाथसंक
३५ टं वीक्ष्य तदर्थस्य च गौरवं देवयानीं पर्यचरत् स्त्रीसहस्रेण दासवत् २८ नाहुषाय सुतां दत्वा सह शर्मि
ष्ठयोशनाः तमाह राजञ्छर्मिष्ठामाधास्तल्पे न कर्हिचित् २९ विलोक्यौशनसीं राजञ्छर्मिष्ठा सुप्रजां
क्वचित् तमेव वव्रे रहसि सख्याः पतिमृतौ सती ३० राजपुत्र्यार्थितोपत्ये धर्म्मं चावेक्ष्य धर्म्मवित् स्मरं
छुक्रवचः काले दिष्टमेवाभ्यपद्यत ३१ यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वा
र्षपर्वणी ३२

तं ज्ञात्वा प्रत्यनीकानां विवक्षितमिति वा २६।२७ सानुगा सखीसहिता शर्मिष्ठा मामनुयात्विति २८ तत स्मान्निर्गतात्स्वकात्संकटं वी राम
क्ष्य तत्रैतस्मादवस्थितादर्थस्य प्रयोजनस्य गौरवं च वीक्ष्य २९ तल्पे मा धाः नोपगच्छेरित्यर्थः ३० अपत्यार्थमृतुकाले प्रार्थनात्त ३५
स्याः कामपूरणं धर्म्मं शुक्रस्य वचश्च स्मरन् दिष्टं दैवप्रापितमेव तत्संगमभ्यपद्यत न तु कामत इत्यर्थः ३२ ३३ श्रीराम श्रीरा०

र्धमवेक्ष्यमु त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसादयन्

आसुर्याः शर्मिष्ठायाः भर्तुः सकाशात् ३४ उपमंत्रयन् ३५ विरूपत्वं करोतीति तथा ३६ नेदुहितरी कामेरव्याप्यत्वेप्सा स्त्रिकामानां
व्यत्यस्य १ भोगेरितिवा शुक्र आह नहियोपि धास्यतिश्रमिणो धारयिष्यति तस्य वयसा कामं व्यत्यस्य तौ यथेच्छं जराव्यत्ययं यातु व्यत्यय्य ६
नीयतो मितिवा यद्वा व्यत्यस्येतिच्छेदः तां जरां त्वत्पार्श्वगतमित्यर्थः ३७ इति लब्धव्यवस्थानेन जराव्यत्यस्थितिर्येन सः ३८॥

गर्भसंभवमासुर्या भर्तुर्विज्ञायमानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ३४ प्रियामनुगतः कामी वचोभि
रुपमंत्रयन् नप्रसादयितुं शेके पादसंवाहनादिभिः ३५ शुक्रस्तमाह कुपितः स्त्रीकामानृतपूरुषः त्वां जरा
विशतां मंद विरूपकरणी नृणां ३६ ययातिरुवाच॥ अतृप्तोस्म्यद्य कामानां ब्रह्मन्दुहितरि स्मते व्यत्य
स्यतां यथाकामं वयसा योपि धास्यति ३७ इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत यदो तात प्रतिच्छेमां ज
रां देहि निजं वयः ३८ मातामहकृतां वत्सन तृप्तो विषयेष्वहं वयसा भवदीयेन रंस्ये कतिपयाः समाः ३९
यदुरुवाच नोत्सहे जरसा स्थातुमंतरा प्राप्तया तव अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ४० तुर्वसुश्चो ३
दितः पित्रा द्रुह्युश्चानुश्च भारत प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ४१ अपृच्छत्तनयं पूरुं वयसोनं गु
णाधिकं नत्वमग्रजवद्वत्स मां प्रत्याख्यातुमर्हसि ४२ पूरुरुवाच को नु लोके मनुष्येंद्र पितुरात्मकृतः ॥
पुमान् प्रतिकर्तुं क्षमो यस्य प्रसादाद्विंदते परं ४३ उत्तमश्चिंतितं कुर्यात्प्रोक्तकारी च मध्यमः अधमोश्र
द्धया कुर्यादकर्त्ता उच्चरितं पितुः ४४ इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः सोपि तद्वयसा कामान्यथावज्जुजु
षे नृप ४५

टि० १ येतान धर्मज्ञाः अनित्ये चयौवने नित्यबुद्धयः ४१ त्वज्जरां गृहीष्यसीत्यपृच्छत प्रत्याख्यानं माकृथा इत्याह नत्वमिति ४२ आत्मकृतः स्व
देहकर्तुः प्रत्युपकारं कर्तुं कोनु क्षमः ४३ तथापि पितुर्यश्चिंतितं कुर्यात्स उत्तमः यस्तूक्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात्स
धमः अकर्ता पितुरुच्चरितं पुरीषप्रायः ४४ जुजुषे सेवितवान् ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० यथोपजोषंयथाप्रीतांजुजुषे ४६ ४८ नानेवभातियावदिंद्रियप्रवृत्तितदुपरमेनाभातिस्वप्नमायाभ्यांसहितामनोरथवृत्त्यर्थः ४९
५० मुनः सुखकाममार्गाकादिंद्रियैः कुमितैः पराङ्मुखैरिंद्रियैः ५१ नवमेष्टादशः ऊनविंशययातिः स्वचेष्टितनन्वेजोपमे दे
मुक्ति १ वयानीसमी श्राव्यविरक्तोमाप्तवान् भुक्तभोगामजांहारयन्नजवद्वृत्तमात्मनः विडंबयनुप्रियामाहनिर्वदयितुमात्मवान् को

सप्तद्वीपपतिः सम्यक्पितृवत्पालयन्प्रजाः यथोपजोषंविषयानुजुजोषेव्याहतेंद्रियः ४६ देवयान्यप्यनुदिनं जु १
मनोवाग्देहवस्तुभिः प्रेयसः परमांप्रीतिमुवाहप्रेयसारहः ४७ अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः
सर्ववेदमयंदेवंसर्वदेवमयंहरिं ४८ यस्मिन्निदंविरचितंव्योम्नीवजलदावलिः नानेवभातिनाभातिस्वप्न
३६ मायामनोरथः ४९ तमेवहृदिविन्यस्यवासुदेवंगुहाशयं नारायणमणीयांसंनिराशीरयजत्प्रभुं ५० एवंव
र्षसहस्राणिमनः षष्ठैर्मनः सुखं विदधानोपिनातृप्यत्सार्वभौमः कदिंद्रियैः ५१ इतिश्रीभागवतेमहा
पुराणेनवमस्कंधेऽष्टादशोऽध्यायः शुकउवाच सइत्थमाचरन्कामान्स्त्रैणोऽपन्हवमात्मनः बुद्ध्वाप्रिया
यैनिर्विण्णोगाथामेतामगायत १ शृणुभार्गव्यमूंगाथांमद्विधाचरितांभुवि धीरायस्यानुशोचंतिवनेग्रा
मनिवासिनः २ बस्तएकोवनेकश्चिद्विचिन्वनूप्रियमात्मनः ददर्शकूपपतितांस्वकर्मवशगामजा
मू ३ तस्याउद्धरणोपायंबस्तः कामीविचिंतयन् व्यधत्ततीर्थमुद्धृत्यविषाणाग्रेणरोधसि ४

चरितंयस्या। मात्राचरन् उपभुंजानः गाथामितिहासंमद्विधेनमादृशेनाचरितामनुष्ठितां मद्विधस्यामितिवा यस्यग्रामनिवासिनः का राम
मिनोमद्विधस्याचरितंवनेस्थिताधीराः शोचंतितस्यगाथांशृणु २ आत्मानमनुलक्ष्याह बस्तइति प्रियामनुलक्ष्याह अजा ३६
मितिवनेसंसारेप्रियंविषयं ३ रोधसितटे विषाणाग्रेणमहादिकमुद्धृत्यतीर्थंनिर्गमायमार्गव्यधत्त ४ श्रीराम श्रीराम ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृध्द इति शर्म्मिष्ठाप्रमुखाः कामयामासुः कांतप्रति कामिनीः कामवत्यः पीवानं पुष्टं श्मश्रुलं श्मश्रुबहुलं रतिसमर्थमित्यर्थः मीढुं
टी॰ सेक्तारः सेक्तारं योनि कोविदं अभिज्ञं अत एवं पृष्ठं ५ नावबुध्यत नाववुध्यत ६ ७ स्वामिनमिति श्मश्रुकारिप्रायेण आह ८ ३
उविडाकारवस्तु जातिशङ्का संधितुं प्रसादयितुं ९ त्वष्पणं अछिन्नं तु जरया संभोगासमर्थमकरोत् अर्थाय स्वपुंस्त्वाः का

सोऽनीयकूपात्तु श्राणितमे वचकोमकिल्लनयावृत्त समुद्धि प्स्पवद्योजाः कांतकामिनीः पीवानं श्मश्रुलं प्रे
ष्ठं मीढुं सेयाभकोविदं ५ स एकोऽजत्वष्पस्तासां वह्वीनां रतिवर्द्धनः रेमे कामयद्दयस्तु आत्मानं नाव
बुध्यत ६ तमेवं प्रेष्ठतमयारममाणमजाऽन्यया विलोक्य कूपसंविग्नानामृष्यद्दसोकर्म्मेरुत् ७ तं दुर्हृ
दं सुहृद्रूपं कामिनं क्षणसौहृदं इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ८ सोऽपि चानुगतः स्त्रैणः
कृपणस्तां प्रसादितुं कुर्वन्निडिविडाकारं नाशक्नोत्पथि संधितुं ९ तस्यास्तत्र द्विजः कश्चिदजास्वास्य
छिन्नदृषा लंबंतं त्वष्पणं भूयः संदधेऽर्थाय योगवित् १० स वद्धत्वष्पणः सोऽपि ह्यजया कूपलब्धया का
लं बहुतिथं भद्रे कामैर्नाद्यापि तुष्यति ११ तस्याहं कृपणा सख्त्रि भवत्याः प्रेमयंत्रितः आत्मानं नाभिजाना
मि मोहितस्तव मायया १२ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः न दुह्यंति मनः प्रीतिं पुंसः काम
हतस्य ते १३ न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १४

पे॰ मभोगाय योगवित् उपायज्ञः जरां स्वां न रति शक्तिदृढावित्यर्थः १० कूपलब्धया सह कामैः सेव्यमानैर्न तुष्यति ११
१२ ननु तर्हि पुनरपि वहवो विषयाः सेव्यंतां ततो मनसि प्रीतिः सति कामोपशांत्या मोहो निवर्त्स्यतीति चेत्तत्राह यदि
ति द्वाभ्यां न दुह्यंति न पूरयंति १३ हविषा धृतेन कृष्णवर्त्मा अग्निरिव १४ राम राम राम राम राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि कदाचिकेनोपायेन वा मनसः संपूर्णा प्रीतिः स्यात् यथा कामोपशमः स्यादित्यत आह यदेति षड्भिः अमंगलं भावं रागद्वेषादि विषमं १५ दुःखानि नितरां वहतीति तथा तां १६ स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह मात्रेति अविविक्तं संकीर्णमासनं यस्य सः कर्षति आकर्षति १७ १८ ननु तृष्णात्यागस्यातिदुःकरत्वात्कथं ब्रह्मणि मनस आधानं स्यात् तत्राह दृष्टमिति योन्नं संविशेन्न चोपभुंजीत।

यदा न कुरुते भावं सर्वभूतेष्वमंगलं समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः १५ या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् १६ मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति १७ पूर्णं वर्षसहस्रं मे विषयान्सेवतो सकृत् तथापि चानुसवनं तृष्णा तेषूपजायते १८ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसं नि

३८ र्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह १९ दृष्टं श्रुतमसद्बुध्वा नानुध्यायेन्न संविशेत् संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् २० इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः दत्वा स्वां जरसं तस्मादाददे विगतस्पृहः २१ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरं २२ भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ २३ आसेवितं वर्षपूगान् षड्वर्गं विषयेषु सः क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः २४ स तत्र निर्मुक्तसमस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः २५

तत्र दृष्टं श्रुतं तयोरनुध्यानादौ संसर्गे आत्मदृग्भवति २० २१ तस्य पूरोर्वशे स्थापयित्वा २३ विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिंद्रियसुखं मुमुचे तत्याज यद्वा विषयेषु आसेवितं सेवाकारि तेषां मिंद्रियाणां वर्गं मुमुचे तदुपेक्षितवानित्यर्थः विधुतं निरस्तं त्रिगुणात्मकं लिंगं येन प्रतीतः प्रख्यातः २५ राम ३८

प्रस्तोभमेवाहपरिहासमिवेति यद्वा प्रस्तोभं निर्वृत्तिमार्गे प्रोत्साहनं मेने २६ ~ कथं समावेशयन् दाहनमइति नमनादिभिः समावेशयन्नित्यर्थः
~ शुकोवानमस्करोति २९ नवमैकोनविंशः विंशे पितृप्रसादात्प्रराजासनमहानेन. पूरोर्वंशानुकीर्त्यते भरतस्यचर्यते यशः १ २ तत्सुत
ग्रंतेपुरस्य
अहंयातेः सुतः ३ धर्मयुश्च सत्यपुश्चधर्मसत्यव्रतेयवः ४ वनेयुश्चावमः स्मृतः एवंदशैतेरन्तेयुप्रमुखास्तस्यरौद्रस्य घृताच्याम घ।

आत्वा माथांदेवयानीमेनप्रस्तोभमात्मनः स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितं २६ सासन्निवासंसुहृदां
प्रपायामिवगच्छतां विज्ञायेश्वरतन्त्राणांमायाविरचितंप्रभो २७ सर्वत्रसंगमुत्सृज्यस्वप्नौपम्येनभार्गवी रुष्णे
मनःसमावेशयच्चधुनोल्लिंगमात्मनः २८ नमस्तुभ्यंभगवतेवासुदेवायवेधसे सर्वभूताधिवासायशान्तायबृ
हतेनमः २९ इतिश्रीभागवतेमहापुराणेनवमस्कंधेएकोनविंशतितमोऽध्यायः बादरायणिरुवाच पूरो
र्वंशंप्रवक्ष्यामियत्रजातोसिभारत यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे १ जनमेजयोह्यभूत्पूरोः प्रचिन्वा
न्तत्सुतस्ततः ३ अन्तेयुकास्यकृक्षेयुस्थंडिलेयुः कृतेयुकः जलेयुःसन्नतेयुश्चधर्मसत्यव्रतेवयः ४ दशैतेऽप्स
रसः पुत्रावनेयुश्चावमः स्मृतः घृताच्यामिंद्रियाणीवमुख्यस्यजगदात्मनः ५ अन्तेयोरंतिभारोभूत्त्रयस्तस्यात्म
जान्नृप सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ६ तस्यमेधातिथिस्तस्मात्प्रस्कण्वाद्याद्विजायतः पुत्रोभू स
सुमतेरेभ्योदुष्यन्तस्तत्सुतोमतः ७ दुष्यन्तोमृगयांयातः कण्वाश्रमपदंगतः तत्रासीनांस्वप्रभयामुहेदेवमायामि
वस्त्रियं ~ वभाषतांवरारोहांभटैः कतिपयैर्वृतः तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः पप्रच्छकामसंतप्तःप्र
हसन्श्लक्ष्णयागिरा ९ कात्वंकमलपत्राक्षिकस्यासिहृदयंगमे. किंवाचिकीर्षितंत्वत्रभवत्यानिर्जनेवने १० श्रीराम

प्सरसिपुत्राजाताः अप्सरसइतिषष्ठीसप्तम्यर्थेवशावतिवेदृष्टान्तः जगदात्मनः जगतः आत्मभूतस्यमुख्यस्यप्राणस्येंद्रियाणीव। ५ ७ दुष्यं
तस्यशकुंतलायांभरतः पुत्रोभवदितिकथाहारेणाह दुष्यंतोमृगयामितिपंचदशभिः तामाश्रममंडयंतींस्त्रियंविलोक्यमुमुहेअमुह्य
त्। ~ तस्यादर्शनेनप्रमुदितः अतएवसन्निवृत्तः परिश्रमोयस्य ९ १० रामराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रमते १

भा० ने पौरवाणांचेतानह्य धर्म्मेश्रतोमेरतसस्त्वयिरमणादेवाहं त्वांराजन्यतनयांवेद्मि ११ विश्वामित्रस्यात्मजाहं मेनकायांजाता तया
चस्वर्गंगच्छन्त्याऽत्रवनेत्यक्ता अतोराजकन्येवाहमित्यर्थः १२ १३ किंकरवामेत्यादिवाक्यात् तदभिप्रायंज्ञात्वात्तुपपन्नमिति १४
गांधर्व्वविधिना मिथःसमयपूर्व्वकेण १५ १७ दुरत्ययंविक्रान्तविक्रमणंयस्य १८ १९ भस्त्राचर्म्मपात्रं तद्वत् माताआधारमात्रे
पितुरेवतुपुत्रः तत्रहेतुः येनेतिअत्मावैपुत्रनामासीतिश्रुतेः भरस्वपुत्राणं अनेनेभरतनाम निरुक्तं २० किंचरेतोधाः नेतः

३८ व्यक्तंराजन्यतनयांवेद्म्यहंत्वांसुमध्यमे नहिचेतःपौरवाणामधर्म्मेरमतेक्वचित् ११ आस्यतांह्यरविंदाक्षस्वरास्वता
महेणचनः भुज्यतांसन्तिनीवाराउष्यतांयदिरोचते १३ दुष्यंतउवाच उपपन्नमिदंसुभ्रूजातायाःकुशिकान्वये
स्वयंहिवृणुतेराज्ञांकन्यकाःसदृशंवरं १४ तुमित्युक्तेयथाधर्म्ममुपयेमेशकुंतलां गांधर्वविधिनाराजादेशका
लविधानवित् १५ अमोघवीर्योराजर्षिर्महिष्यांवीर्यमादधे श्वोभूतेस्वपुरंयातःकालेनासूतसासुतं
१६ कण्वःकुमारस्यवनेचक्रेसमुचिताःक्रियाः बद्ध्वामृगेंद्रांस्तरसाक्रीडतिस्मसबालकः १७ तंदुर
म त्ययविक्रांतमादायप्रमदोत्तमां हरेरंशांशसंभूतंभर्त्तुरंतिकमागमत् १८ यदानजगृहेराजाभार्यापुत्रा
वनिंदितौ शृण्वतांसर्वभूतानांखेवागाहशरीरिणी १९ माताभस्त्रापितुःपुत्रोयेनजातःसएवसः
भरस्वपुत्रंदुष्यंतमावमंस्थाःशकुंतलां २० रेतोधाःपुत्रोनयतिनरदेवयमक्षयात् त्वंचास्यधातागर्भस्य
सत्यमाहशकुंतला २१ पितर्युपरतेसोपिचक्रवर्तीमहायशाः महिमागीयतेतस्यहरेरंशभुवोभुवि
चक्रंदक्षिणहस्तेऽस्यपद्मकोशोस्यपादयोः २२

सेनावंशकृत्पुत्रोयमक्षयात्पितरंनयति तारयति तथाचश्रुतिःपुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः तस्मात्पुत्रइतिप्रोक्तःस्व ३८
यमेवस्वयंभुवेतिपाठांतरं मातृपित्रोःपुत्रप्रतिविवादसमक्षयाद्धर्म्मनिर्णेतुर्यमस्यसभायाःसकाशाद्रेतोधारेतःसेक्तापितैव
धर्म्मेणविजित्यपुत्रंनयतिनतुमातेत्यर्थः ततश्चभार्य्यापुत्रौस्वीकुरुवानितिज्ञेयं २१ चक्रवर्तीबभूवतिशेषः तस्यमहिमागी
यतेतदप्येतेश्लोकाअभिगीताइत्यादिवक्ष्यमाणेत्याहरेरंशभुवःअंशांशजोन्यस्यात्तत्रलिंगमाहचक्रमिति २२ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंगायामनुलोमं पंचपंचाशताबाजिभिरिजे २३ पुरोधाय पुरोहितं कृत्वा यमुनामनु च यमुनायाश्चानुलोमं अष्टाधिकसप्ततिमेध्यान् श्वान्बबंध।
किं कुर्वन् वसु धनं प्रकर्षेण ददत् २४ साचीगुणप्रकृष्टगुणवति देशे अग्निश्चितो भूत् यस्मिन्नग्निचयने दशवा सहस्रं ब्राह्मणाः भरतेन भूरि ८।२
ज२ दानेन दत्ताः गा बहुशः प्रत्येकं बद्वं बद्वं विभेजिरे विभज्य गृहुः चतुरशीत्यधिकेभ्यस्त्रयोदशसहस्रेभ्यो बद्वं भवति तथा हिरण्येन परिवृता
न् कृष्णान् शुक्लदन्तान् मृगानुत्सृष्टान् भरतो ददौ अंतवद्वानि सप्तचेति अत्युक्तानि सप्ताधिकशतं वद्वानि श्री शुकेनात्र श्लोकेषु
चतुर्दश लक्षत्वेन संगृहीतानि अदात्कर्मणि मष्णारे नियतानि चतुर्दशेति एवं चतुर्दश तिलक्षणांसप्ताधिकशतभागा बद्वमित्युक्तं भ

ईजे महाभिषेकेण सोभिषिक्तो धिराड्विभुः पंचपंचाशता मेध्यैर्गंगायामनुवाजिभिः २३ मामतेयं पुरोधाय यमुनामनु च
प्रभुः अष्टसप्ततिमेध्याश्वान् बबंध प्रददद्वसु २४ भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः सहस्रं बद्वशो यस्मिन्ब्राह्म
णा गा विभेजिरे २५ त्रयस्त्रिंशच्छतं ह्यश्वान्बद्धा विस्मापयन्नृपान् दौष्यन्तिरत्यगान्मायां देवानां गुरुमाययौ २६ मृगा
न्शुक्लदतः कृष्णान्हिरण्येन परीवृतान् अदात्कर्मणि मष्णारे नियुतानि चतुर्दश २७ भरतस्य महत्कर्म न पूर्वे नापरे
खशा न्नृपाः नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा २८ किरातहूणान्यवनान्पौण्ड्रान्कङ्कान्खशाञ्छकान् अब्रह्मण्यनृपांश्चाहन्म्लेच्छान्दि
जये खिलान् जित्वा पुरासुरा देवान्ये रसौकांसि भेजिरे देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ३० सर्वकामान्दुदुहतुः प्रजा
नां तस्य रोदसी समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत् ३१

वति इयं च बद्वसंख्या श्लोकेनुसंगृह्यते चतुर्दशानां लक्षाणां सप्ताधिकशतांशकाः बद्वं चतुरशीत्यग्रं सहस्राणि त्रयोदशेति २५ देवानाम
पि मायां विभवं अत्यगात् अत्यशेत यत् गुरुं पूज्यं हरिं आययौ प्राप्त दशभवद्वात् मायवत्तां इति पाठः हस्व अस्त्यनुसारेण मायावत्तां अ
पि ४ हरिं वा साविस्त्यर्थः २६ मृगान् श्वेतगजान् भद्र मृगादियोग जजातिभेदाः मष्णारे इत्यस्य अतिपदस्य व्याख्यानं कर्म्मणि
ति केस्मिंश्चित्कर्म्मविशेषे कृचित्तु मष्णारतीर्थे इति व्याचक्षते २७ पुरा देवान् जित्वा ये असुरा रसौकांसि रसातलादि स्थानि भे
जिरे तैः प्राणिभिश्च बलिभिर्देवस्त्रियो रसातलं नीताः सतीः पुनराहरत् आनिन्ये मनुष्यादिभिः सह नीताइति वा प्राणिभिरि
ति पाठे पणयो असुरास्तैर्नीताः सती यद्वा पणया दूताः १ दूतोन्यस्था प्याहरदित्यर्थः ३० त्रिनवसाहस्रीः समाः सप्तविंशतिसह

[illegible]

श्रा भिभिरन्मे २ ना२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यैवैराग्येणमोक्षप्र१

तस्यैवैराग्येणमोक्षप्रकारमाहसइति मृषेतिविचार्य्येतिशेषः ३२ नानुरूपाः मत्सदृशा न भवन्तीति भर्त्रोइरितेसतिव्यभिचारशं
कयास्मांस्त्यक्ष्यतीतिभयात्पुत्रान्जघ्नुः पुनः पुनः पुत्राणांदर्शनेनैवसादृश्यानुसंधानेनत्यजेत् नान्यथेत्याशयेनहतवत्यः ३३
वितथेव्यर्थेसति तदर्थंपुत्रार्थं मरुत्स्तोमेनयागेनयजतस्तस्यप्रसन्नाः संतोमरुतोभरद्वाजंनामपुत्रमुपाददुः समर्पयामा
सुः ३४ मरुतोभारद्वाजागमप्रकारंदर्शयन्नाह अंतर्वत्न्यामितिचतुर्भिः अंतर्वत्न्यांगर्भिण्यांभ्रातुरुतथ्यस्यपत्न्यांममतायां
वीर्य्येणमैथुनायकदाचित्प्रवृत्तोबृहस्पतिः तदाद्वितीयगर्भस्यावकाशाभावादेकोशपूर्वकंगर्भस्थेनवारितः ततःक्रु

सर्ग समृलोकपालाख्यमैश्वर्यमधिराट्श्रियं चक्रमस्खलितंप्राणान्मृषेत्युपरराम ह ३२ तस्यासन्नृ
पवैदर्भ्यः पत्न्यस्तिस्रः सुसंमताः जघ्नुस्त्यागभयात्पुत्रान्नानुरूपाइतीरिते ३३ तस्यैवंवितथेवंशेतदर्थं
यजतः सुतं मरुत्स्तोमेनमरुतोभरद्वाजमुपाददुः ३४ अंतर्वत्न्यांभ्रातृपत्न्यांमैथुनायबृहस्पतिः प्र
वृत्तोवारितोगर्भंशप्त्वावीर्यमुपासृजत् ३५ तंत्यक्तुकामांममतांभर्तुस्त्यागविशंकितां नामनिर्वचनं
तस्यश्लोकमेनंसुराजगुः ३६ मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते यातौयदुक्त्वापितरौभरद्वाजस्ततस्त्वयं ३७

द्वा२ द्बृहस्पतिरंधोभवेतितंगर्भंशप्त्वाबलाद्वीर्य्यंन्यषिंचत् ततोबृहस्पतेःशापाद्गर्भस्थोदीर्घतमाअंधोबभूव तेनचैद्वीर्यंपा
र्ष्णिप्रहरणेनैवबहिर्निःसारितंभूमौपतितंसद्यएवकुमारोऽभवत् ३४ तंचपरवीर्यजंभर्तुस्त्यागशंकिताविशंकितासतीत्यक्तुकामां
ममतांप्रतिसुराएनंबृहस्पतेर्ममतयाश्चविवादरूपश्लोकंजगुः किमर्थंजगुरतआह तस्यनाम निरुच्यतेयेनतंतन्नामनि
र्वचनेनैवभर्तुस्त्यागशंकामपाकर्तुमित्यर्थः ३६ तत्रपुत्रंत्यक्त्वायांतींममतांबृहस्पतिराह हेमूढेइमंपुत्रंभरपुषाणभर्तु
र्बिभेमीतिचेत्तत्राहद्वाजंएकस्यक्षेत्रेऽन्यस्यबीजादित्येवंद्वाभ्यांजातं अतोस्यापुत्रइतिनतेस्माद्भयशंकेत्यर्थः
एवमुक्त्वासतीतंप्रत्याहबृहस्पतेत्वमिमंभरयतःद्वाजंद्वाभ्यांमावाभ्यामन्यायतोजातं अतोनाहमेकाकिनीभरामीत्यर्थः यद्

हे न१

वितथं व्यभिचारसंभवात् तमात्मजं वितथं निरर्थकं मत्वा ममतां व्यसृजत् तत्याज पाठांतरे अहितं प्रथमजं भर्तुर्वीर्याज्जातमेवमुरस्य
तं मात्मजं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः ३५ एवं तयोत्यक्तं मरुतो बिभ्रतुः अविभरुः तदेवं मनुष्किः प्राप्तायां भरतस्यान्वये वितथे सति
दत्तः ३८ नवमे विंशः एकविंशे तु दौष्यंतेः सुतस्यान्वयउच्यते रंतिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते भरतस्यान्वये वितथस
तिदत्तत्वाद्वितथसंज्ञो भरद्वाजः सच ब्राह्मणोपि भरतस्य दत्तः पुत्रो जातः इति तद्वंशोनुक्रम्यते वितथस्य सुतो मन्युः तस्माद् बृहत्

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजं व्यसृजन् मरुतो बिभ्रद्दत्तोयं वितथेन्वये ३९ इति श्रीभागवते
महापुराणे नवमस्कंधे विंशोध्यायः शुक उवाच ॥ वितथस्य सुतान्मन्योर्बृहत्क्षत्रो जयस्ततः म
हावीर्यो नरो गर्गः संकृतिस्तु नरात्मजः ॥१ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन रंतिदेवस्य हि यशः इह धीरस्य ८
मुत्र च गीयते २ वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः निःकिंचनस्य सकुटुंबस्य सीदतः ३ व्यती
युरष्टचत्वारिंशदहान्यपिबतः किल घृतपायससंयावं तोयं प्रातरुपस्थितं ४ कृच्छ्रप्राप्तकुटुंबस्य
क्षुत्तृड्भ्यां जातवेपथोः अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ५ तस्मै संव्यभजत्सोन्नमादृत्य ग्र
ग्र श्रद्धयान्वितः हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ६ अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते
विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ७॥

क्षत्रजय महावीर्य नर गर्गाः पंच पुत्रा बभूवुः १ २ वियद्वित्तस्य वियत्तो गगनादिवोद्यमं विनोदैवादुपस्थितमेव वित्तं भोग्यं
यस्य यद्वा वियद्व्ययं प्राप्तं च यद्वित्तं भोग्यं यस्य तद्देवाह बुभुक्षतोपि सतो लब्धं ददतः तत्प्रपंचयति निःकिंचनस्येत्यादि सार्द्धैः
पंचदशभिः ३ अपिबतो जलपानमप्यकुर्वतः घृतादित्रयाणां द्वंद्वैक्यं तोयं च ४ ६ अथान्यो वृषलोतिथिरागमत् विभ
क्तस्य कुटुंबार्थमन्नादिके विभक्तो वत्तः ७

ल८

सगणाय श्वयूथसहिताय ८ उच्छेषं तत्त्वैरिति एकमेव तर्पयतीति तथा १० ११ परदुःखासहिष्णुत्वं सर्वेषां दुःखं स्वयं भोक्तुमाशा
स्तेनेति अणिमाद्यष्टसमृद्धियुक्तां गतिमपि मोक्षमपि चाहं न कामये तर्हि किं कामयसे तत्राह अखिलदेहभाजामार्तिं दुःखं च
द्वैत्वात्तर्पणान्तःस्थितः सन्नहं प्रपद्ये प्राप्नुयामीत्येकं कामये येन तव दुःखभोक्ता मयाहेतुभूतेन ते सर्वे अदुःखा भवन्ति १२ ननु

याते शूद्रस्तमन्योगादतिथिश्वभिरावृतः राजन्मे दीयतामन्नं सगणाय बुभुक्षते ८ स आदृत्यावशिष्टं यद्बहुमान
पुरस्कृतं तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ९ पानीयमात्रमुच्छेषं तच्चैकपरितर्पणं पास्यतः पुल्क
सोऽभ्यागादपो देह्यशुभस्य मे १० तस्य तां करुणां वाचं निशम्य विपुलश्रमां कृपया भृशसंतप्त इदमाहामृतं
४० वचः ११ न कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा आर्तिं प्रपद्येऽखिलदेहभाजामन्तःस्थि
तो येन भवन्त्यदुःखाः १२ क्षुत्तृट्श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः सर्वे निवृत्ताः कृ
पणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे १३ एवं प्रभाष्य पानीयं म्रियमाणः पिपासया पुल्कसायाद
दाद्धीरो निसर्गकरुणो नृपः १४ तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् आत्मानं दर्शयांचक्रुर्माया
विष्णुविनिर्मिताः १५ स वै तेभ्यो नमस्कृत्य निःसङ्गो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे मनः परम्
१६ ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः माया गुणमयी राजन्स्वप्नवत्प्रत्यलीयत १७ १६

टी० दुःखं किमिति प्रार्थयसे परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तिरित्याह क्षुत्तृडिति कृपणस्य जन्तोर्जीवनहेतोः जलस्यार्पणान्मे ४०
सर्वे क्षुत्तृडादयो निवृत्ता एव १३ १४ इत्येवं प्रभाष्य १४ त्रिभुवनाधीशाः ब्रह्मादयः मायान्तहीयद्येये परीक्षार्थं प्रथमं मा
यया वृषलादिरूपेण प्रतीताः सन्त इत्यर्थः १५ परं केवलं वासुदेवे भक्त्या नमश्चक्रे न तु तान्किमपि याचितवान् १६ अनन्यराध
सः ईश्वरातिरिक्तफलान्तरानपेक्षस्य प्रत्यलीयत आत्मन्येव लीनाऽभवत् १७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न० १८ मनुसुतस्य नरस्य वंशमुक्त्वा तत्सुतस्यैव गर्गस्य वंशमाह गर्गादिति महावीर्यस्य वंशमाह महावीर्यात् दुरितक्षयः तस्य त्रय्यारुणिः
कविः पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः ये अत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्मणरूपतां गतास्ते १९ मनुपुत्राणां पञ्चानां ज्ये
ष्ठस्य वंशमाह बृहदिति बृहत्क्षत्रस्येति यत् येन हस्तिनापुरं कृतमित्यर्थः अजमीढादयस्त्रयो हस्तिनः पुत्राः २० अजमीढाद्वान्यः
प. पुत्रो बृहदिषुर्नामाभवत् २१ २२ पारस्य तनयो नीपः नीपस्य पुत्रशतं २३ स एव कृत्व्यां संज्ञायां शुककन्यायां ब्रह्मदत्तं जन

४१ तत्प्रसंगानुभावेन नरेन्द्रे दैवानुवर्त्तिनः । अभवन्योगिनः सर्वे नारायणपरायणाः ॥ १८ गर्गाच्छिनिस्ततो गार्ग्यः
क्षत्राद्ब्रह्म ह्यवर्तत । दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः । पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं ग
ताः । १९ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरं । अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः । अजमी
ढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥ २० अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः । बृहत्कायस्ततस्त
स्य पुत्र आसीज्जयद्रथः ॥ २१ तत्सुतो विशदस्तस्य सेनजित्समजायत । रुचिराश्वो दृढहनुः काश्यो
वत्सश्च तत्सुताः ॥ २२ रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः । पारस्य तनयो नीपस्तस्य पुत्रशतं त्व
स्यां२ भूत् २३ स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् । स योगी गवि भार्यायां विष्वक्सेनमधात्सुतं २४
जैगीषव्योपदेशेन योगतन्त्रं चकार ह । उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवाः ॥ २५

यामास तदुक्तं हरिवंशादिषु पराशरकुलोत्पन्नः शुको नाम महायशाः व्यासादरण्यां संभूतो विधूमोऽग्निरिव ज्वलन् स तस्यां
पितृकन्यायां वीरिण्यां जनयिष्यति कृष्णं गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरं ब्रह्म
दत्तस्य जननीं महिषीमणुहस्य चेति यद्यपि शुक उत्पत्त्यैव विमुक्तसंगो निर्गतः तथापि विरहातुरं व्यासमनुयान्तं दृष्ट्वा छाया
शुकं निर्माय गतवान् तदभिप्रायेणेदमाहुः गार्हस्थ्यादिव्यवहार इत्यविरोधः स च ब्रह्मदत्तो योगी गवि वाचि सरस्वत्यां

[illegible] ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भान० ९ टनेमि:

सुपार्श्वस्य पिता २६ प्राच्यसाम्नां षट् संहिताः जगौ विभज्याध्यापितवान् २७ अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृ
हदिषुप्रभृतयः क्षत्रियाश्चेति विशदयमुक्तं २८ तस्य वंशांतरमाह नलिन्यामिति यावत्समाप्ति २९ मुद्गल एकः यवीनरादयश्चत्वारः

अजमीढे यवीनरो द्विमीढस्य कृतिमांस्तत्सुतस्ततः। नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत्॥ सुपार्श्वात्सुमतिस्तस्य
पुत्रः सन्नतिमांस्ततः॥२६॥ कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट्। संहिताः प्राच्यसाम्नां वै नीपो ह्युद्रायुध
४१ स्ततः॥२७॥ तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः। ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत्॥२८॥ नलिन्यामज
मीढस्य नीलः शांतिः सुतस्ततः। शांतेः सुशांतिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत्॥२९॥ भर्म्याश्वस्तनयस्तस्य पंचासन्मु
द्गलादयः। यवीनरो बृहद्विश्वः कांपिल्यः संजयः सुताः॥३०॥ भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि। विषयाणा
मलमिमे इति पंचालसंज्ञिताः॥३१॥ मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं। मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः
पुमानभूत्। अहल्या कन्यका यस्यां शतानंदस्तु गौतमात्॥३२॥ तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः। शरद्वांस्तत्सुतो
यस्मादुर्वशीदर्शनात्किल। शरस्तंबेऽपतद्रेतो मिथुनं तदभूच्छुभं॥३३॥ तद्दृष्ट्वा कृपया गृह्णाच्छंतनुर्मृगयां चरन्। ४२
कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी॥३४॥ इति श्रीभागवते महापुराणे नवमस्कंधे एकविंशतितमोऽध्यायः॥२१॥
१ शुक उवाच मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप। सुदासः सहदेवोऽथ सोमको जंतुजन्मकृत्॥१॥ तस्य पुत्रशतं
तेषां यवीयान्पृषतस्ततः। द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः॥ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याः पांचालका इमे॥२॥ २
योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः। तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः॥३॥ राम

इत्येवं पंच ३० १ भार्म्यात् भर्म्याश्वात् पुत्रान् मिथुनं चाभूत् तदेवाह दिवोदासः पुमान् अहल्या च कन्येति ३२ ४ नवमे एकविंशे ७
द्वाविंशे तु दिवोदासवंशमुक्त्वाथ वर्णिताः ऋक्षवंशजरासंधपार्थदुर्योधनादयः १ तस्य सोमकस्य पुत्राणां शतं बभूव तेषां जंतुर्ज्ये
ष्ठः यवीयान्पृषतः १ २ अजमीढस्य वंशांतरमाह य इति ततः संवरणात्कुरुः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ तस्य कृतिन्नृपरिचरोवसुः ततोवसोः बृहद्रथोमुख्यआदिर्येषां तानेवाह कुशांचेति तत्सुतः पुष्पवान्ज्येष्ठः तस्यापत्यं सत्य
सत्यहितइतियोज्यं ६ जरयाराक्षस्या ७ यतस्तस्मात्सोमापिः श्रुतश्रवाः कुरोः पुत्रः परिक्षिदनपत्यः जाह्नवः जह्नोः पुत्रः
८ श्रेतोराधिकादयुतोभूत् इत्यर्थः ९ १० ११ तस्यप्रतीपस्यदेवापिशंतनुवाह्लीकाः ११ प्राक् पूर्वजन्मनि महाभिषइ तिस

परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथततः कृती ४ वसुस्तस्योपरिचरो बृ
हद्रथमुखास्ततः कुशांवमत्स्यप्रत्यग्रचेदिपाद्याश्चचेदिपाः ५ बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्यतत्सुतः ॥
जज्ञेसत्यहितोऽपत्यंपुष्पवांस्तत्सुतोजह्नुः ६ अन्यस्यांचापिभार्यायांशकलेद्वेबृहद्रथात् येमात्राबहिरु
त्सृष्टेजरयाचाभिसंधिते जीवजीवेतिक्रीडंत्याजरासंधोऽभवत्सुतः ७ ततश्चसहदेवोऽभूत्सोमापिर्यच्छ्रु
तश्रवाः परीक्षिदनपत्योऽभूत्सुरथोनामजाह्नवः ८ ततोविदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् जयत्सेन
स्ततस्तस्याराधिकोऽतोऽयुतायुरभूत् ९ ततश्चाक्रोधनस्तस्माद्देवातिथिरमुष्यच ऋक्षस्तस्यदिलीपोऽभूत्प्र
तीपस्तस्यचात्मजः १० देवापिःशंतनुस्तस्यबाह्लीकइतिचात्मजाः पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः
अभवच्छंतनूराजाप्राङ्महाभिषसंज्ञितः यंयंकराभ्यांस्पृशतिजीर्णंयौवनमेतिसः ११ शांतिमाप्नोतिचेवा
ग्र्यांकर्मणातेनशंतनुः समाद्वादशतत्राब्देनववर्षयदाविभुः १३ शंतनुर्ब्राह्मणैरुक्तःपरिवेत्तात्वमग्र
भुक् राज्यंदेह्यग्रजायाशुपुरराष्ट्रविवृद्धये १४

ज्यायस्यसः १२ यदादेवानववर्षत्तदाशंतनुस्तत्रकारणंब्राह्मणान्पप्रच्छ १३ ब्राह्मणैश्चैवमुक्तः दाराग्निहोत्रसंयोगंकुरुतेयो
ग्रजेस्थिते परिवेत्तासविज्ञेयः परिवित्तिस्तुपूर्वजइतिस्मृतेः याग्रभुक् भुवमयंतोभुनक्ति अयंत्वादृशोऽपिपरिवेत्तेवभ
वति अतस्तद्दोषपरिहारायराज्यमग्रजायदेहि ततोदृष्टिर्भविष्यतीति १४ राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहं राज्यामिमे वांगविप्रान्स्वष्टैरपुप्रभो ॥ ९

एवमुक्तः शंतनुर्वनं गत्वा ज्येष्ठं छंदयामास राज्ञः प्रजापालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्वति प्रार्थितवान् ततः पूर्वमेव तत्स्यमं त्रिणा अश्मरावसंज्ञेन देवापिपारवेडीकृत्य राजानं हे कैर्नैर्य प्रहिता विप्रास्ते पाषंडमतमाश्रय या गिरा वेदहाहिभ्रंशितः सन्न देवा दस्याग्निवादान्निंदावचनानि सोऽब्रवीत् ततस्तस्य पातित्येन राजानं हे त्वं जातं शंनो दोषाभावाद्देवो वव र्षेत्यर्थः १५ १६ ततः सोमदत्ताद्भूरिश्रवाः शल्यश्चेति त्रयः १७ रामो जामदग्न्यः १८ दासकन्यायामिति उपरिचरस्य वसो वीर्येण मत्स्यगर्भादु

एवमुक्तो हि द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् ॥ तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा वेदवादातिवादान्वै तदा दे
वो ववर्ष ह १५ देवापिर्योगमास्थाय कलापग्राममाश्रितः सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति १६ बा
४२ अरि २ ह्लीकात्सोमदत्तोऽभूद्भूरिश्रवास्ततः शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् १७ सर्वधर्मविदां श्रेष्ठो
महाभागवतः कविः वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः १८ शंतनोर्दासकन्यायां जज्ञे चित्रां
गदः सुतः विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः १९ यस्यां पराशरात्साक्षादवतीर्णो हरेः कला
वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगां २० हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः मह्यं पुत्राय
शांताय परं गुह्यमिदं जगौ २१ विचित्रवीर्योऽथोवाह काशिराजसुते बलात् स्वयंवरादुपानीते अंबिकां
बालिके उभे तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः २२ क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः
५२ धृतराष्ट्रं पांडुं च विदुरं चाप्यजीजनत् २३ गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप तत्र दुर्योधनो ज्येष्ठो दुःशला
चापि कन्यका २४ शापान्मैथुनरुद्धस्य पांडोः कुंत्यां महारथाः जाता धर्मानिलेंद्रेभ्यो युधिष्ठिरमुखास्त्रयः २५

हेतोर्निमित्तभूतात्कंसात् समुद्विजे बिभेमि यतोऽधीरचित्ता ३० ३१ किमित्युपसंहर्त्तव्यमेव भूते न मे या पुत्रेण तव महती श्लाघास्यादिति
तत्राह विश्वमिति निशान्ते प्रलयावसाने यथावकाशं असंकोचतः असंभाविताऽत्वा उपहास्यत्वेव स्यादित्यर्थः ३२ चतुर्भुजरूपेणा
विर्भाविकारणं तावदाह त्वमेवेत्यादि चतुर्दशभिः पूर्वसर्गे प्रथमजन्मनि अभूः आसीः पृश्निर्नाम स्वायंभुवे मन्वंतरे अयं वसुदेवः सुतपा ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० तेपाथे तपः कृतवंतौ ३४ ३६ तप्यतो आचरतोः ईयुर्गतानि मदात्मनोः मच्चित्तयोः ३७ अमुना वपुषा प्रादुर्भूतोस्मि ३८ वरदराट् वरदेषु
श्रेष्ठ इत्यर्थः तेन स हेतुना दुष्करण वारंवार माविर्भावकारणमुक्तो मादृशः कामस्य दित्सया दातुमिच्छया ३९ मे मत्तोपि युवामपवर्गं न वव्रा
थेन धृतवंतौ ४० वरं लब्ध्वा मयि गते ४१ २ अदित्यां कश्यपाद्वामन आस इति पदं तु केनेदं पितद्रूपयोर्युवयोरहमेव पुनरासमित्यर्थः ४३ ४

युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः सन्नियम्येंद्रियग्रामं तेपाथे परमं तपः ३४ वर्षवातातपहिमघर्मकालगुणान
नु सहमानौ श्वासरोधविनिर्धूतमनोमलौ ३५ शीर्णपर्णानिलाहारावुपशांतेन चेतसा मत्तः कामानभीप्संतौ मदा
राधनमीहतुः ३६ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करं दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ३७ तदा वां प
१३ रितुष्टोहममुना वपुषानघे तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ३८ प्रादुरासं वरदराड्युवयोः काम
श्लो०५ दित्सया व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ३९ अजुष्टग्राम्यविषयावनपत्यौ च दंपती न वव्राथेपवर्गं मे
मोहितौ देवमायया ४० गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतं ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ
४१ अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समं अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ४२ तयोर्वां पुनरेवा
हमदित्यामास कश्यपात् उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ४३ तृतीयेस्मिन्भवेहं वै तेनैव वपुषाथ वां
जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ४४ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे नान्यथा मद्भवं ज्ञानं मर्त्य राम
लिंगेन जायते ४५
प्राक् प्रथमं तावदेतद्रूपं मे जन्मनि स्मरणाय ज्ञानाय दर्शितं मद्भवं मद्विषयं अनंतरं त्वदिच्छया बालोपि भविष्यामीति भावः ४५ १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु त्वयि प्रसन्नेपि कथमनयोः पुनर्जन्म तिस्त्रन्तः पूर्वं न भविष्यतीत्याह युवां मामिति ४६ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदायाः
९२ अतीतां कन्यां मन्मायामानयेति प्रथममेव भवता प्रचोदितो वसुदेवो यदा गन्तुमैच्छत्तदैव च अजापि या योगमाया सा [illegible]दजायया निमि न
त्तमात्रभूतया अजनि जाता ४८ हृताः प्रत्ययाः धीः सर्वा वृत्तयो येषां अथ वा हृता प्रत्यया अन्याश्च सर्वा वृत्तयो येषां जाग्रतामपि

युवां मां पुत्रभावेन ब्रह्मभावेन वासकृत् चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां ४६ श्रीशुक उवाच इत्युक्त्वासीद्धरिस्तू
ष्णीं भगवानात्ममायया पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ४७ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादा
य स सूतिकागृहात् यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाजनि नंदजायया ४८ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थे
पि इा षु पौरेष्वपि शायितेष्वथ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ४९ ताः कृष्णवाहे वसुदेव आगते
स्वयं व्यवर्यंत [illegible] यथा तमो रवेः ववर्ष पर्जन्य उपांशुगर्जितः शेषोन्वगाद्वारि निवारयन् फणैः ५० मघोनि वर्षे
त्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः प
तेः ५१ नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान् प्रसुप्तानुपलभ्य निद्रया सुतं यशोदाशयने निधाय तत्सुतामुपा न३
दाय पुनर्गृहानगात् ५२ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ५३
३८९ यशोदा नंदपत्नी च जातं परमबुध्यत न तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ५४ इति श्रीभागवते महापुराणे
दशमस्कंधे तृतीयोध्यायः ॥ ३ ॥

तथाभूतेषु द्वारपालेषु सत्सु बृहत्सु कपाटेषु लोहकीलयुक्तशृंखलैः बृहद्भिः कपाटादिभिः दुरत्यया इति वा ४९ स्वयमेव व्यवर्यंत विवृता
इत्यर्थः व्यवियंतेति वक्तव्ये गुणश्छांदसः रवेर्निमित्तात् ५० गंभीरायस्तोयौघस्य जवेन ये ऊर्मयस्तेषां फेनैः फेनिला व्याप्ता भयानकैरावर्तै
र्नैकशतैर्व्याप्तापि श्रियः पतेः सीतापतेः ५१ निद्रया अजया ५२ प्रतिमुच्य बध्वा पदोः पादयोर्लोहं हि निगडं आस्ते स्म ५३ जातं किंचिदिति
केवलमबुध्यत न तु पुत्रः कन्या वेति योगनिद्रया चेमोहितेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 चतुर्थे त्वंडिकावाक्यमाकर्ण्येति भयाकुलः । दुर्मंत्रिभिर्हितं मेने कंसो बालादि हिंसनं १ ततु अष्टमं जन्म कालो मृत्युः २ अंगेह भ्रातः
६ हीनदीनवन्नगुनथा पुत्रस्यान्यत्र नीतत्वात् साचयोगमायेति ज्ञातत्वात् याचितोपि स्त्र्याचिच्छिदे आकृष्य जग्राह ७ अपोथयत्

श्रीशुक उवाच बहिरंतःपुरद्वारः सर्वाः पूर्ववदावृताः ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः १ ते तु तूर्णमुपव्रज्य
देवक्या गर्भजन्म तत् आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते २ स तल्पात्तूर्णमुत्थाय कालोयमिति विह्वलः सूती
गृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्द्धजः ३ तमाह भ्रातरं देवी कृपणा करुणं सती स्नुषेयं तव कल्याण स्त्रियं मा हंतु
मर्हसि ४ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां नन्वहं ते ह्यवरजा दी
१४ न नाहतसुता प्रभो दातुमर्हसि मंदाया अंग मेमां चरमां प्रजां ६ श्रीशुक उवाच उपगुह्यात्मजामेवं रुदत्या दीनदीनवत्
याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ७ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुतां अपोथयच्छिलापृष्ठे
स्वार्थोन्मूलितसौहृदः ८ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ९
दिव्यस्रगंबरालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० सिद्धचारणगंधर्वैरप्सरः
किंनरोरगैः उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ११ किं मया हतया मंद जातः खलु तवांतकृत् यत्र क्व वा
पूर्वशत्रुर्मा हिंसीः कृपणान्वृथा १२ इति प्रभाष्य तं देवी माया भगवती भुवि बहुनामनिकेतेषु बहुनामा बभूव ह
१३ तयाभिहितमाकर्ण्य कंसः परमविस्मितः देवकीं वसुदेवं च विमुच्य प्रश्रितोब्रवीत् १४ श्रीराम श्रीरा राम १४

बलेन विक्षिप्य ८ सद्य एव देवी भूत्वा ९ कृपणेति अन्यान् च शिशून् हनिष्यतीति ज्ञात्वा वारयति पाठांतरे तु मा मां कृपणां
वृथा अहिंसीः हिंसितवानसि १२ बहुनामनिकेतेषु वाराणस्यादिस्थानेषु परमविस्मितः कथं वा गगनं गता जातेति भा ८

दैवी १ प्रश्रितः सविनयं यथा स्यात्तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यद्विश्रंभादज्ञाकाशवाण्यविश्वासात् अज्ञानतस्संसृतिर्न निवर्तते इत्याह ॥ यथेति ॥ यथा यावत् अनेवंविदः एवमजानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति ॥ यतो विपर्ययात् भेदो भवति ५

१५ । १६ । १७ हे महाभागौ स्वकृतं भुजः स्वारब्धकर्मभोक्तॄन् किं च जंतवः प्राणिनः सदा न आसते किं तु अल्पकालमेव तदपि एकत्र नासते किं तु विश्लिष्यंते यतो दैवाधीनाः १८ सदा नाशत इत्यनेन यदुक्तं जन्ममरणादि तदपि देहानामेव नात्मन इत्याह भुवीति भूतानि देहा एव यांति संभवंति अपयांति न भवंति चेत्यर्थः यथा भुवि भौमानि घटादीनि तद्वत् एतेषु भूतेषु जन्मादिभिर्विक्रियमाणेषु अयमपरोक्षतया प्रत्यभिज्ञायमानो आत्मा न विपर्येति विपर्ययं न प्राप्नोति एकरूप एव वर्तत इत्यर्थः भौमेषु विक्रियमाणेषु यथा भूस्तथेति १९ एवं विचार्यमाणे सति न शोकावकाशः देहादेः कारणत्वात्मनि परिच्छिन्ने सति अहंकारास्पदे भिन्ने भवेति यतो भ्रातृपुत्रादिदेहयोगः अतः संसृतिः सुखदुःखादिः यावदज्ञानेन निवर्तत इत्यर्थः २० एवमुक्तप्रकारेण नैतत्तत्व

अहो भगिन्यहो भाम मया वां बत पाप्मना । पुरुषादइवापत्यं बहवो हिंसिताः सुताः ॥ १५ स त्वहं त्यक्तकारुण्यस्त्य
क्तज्ञातिसुहृत्खलः । कांल्लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् १६ दैवमप्यनृतं वक्ति न मर्त्या एव
केवलं । यद्विश्रंभादहं पापः स्वसुर्निहतवान् शिशून् १७ मा शोचतं महाभागौ आत्मजान् स्वकृतंभुजः ॥
जंतवो न सदैकत्र दैवाधीनाः सहासते १८ भुवि भौमानि भूतानि यथा यांत्यपयांति च । नायमात्मा तथैतेषु विप प३
र्येति तथैव भूः १९ यथानेवंविदो भेदो यत आत्मविपर्ययः । देहयोगवियोगौ च संसृतिर्न निवर्तते २० तस्मा
द्भद्रे स्वतनयान्मया व्यापादितानपि । मानुशोच यतः सर्वः स्वकृतं विंदतेऽवशः २१ यावद्धतोऽस्मि हंतास्मीत्या
त्मानं मन्यतेऽस्वदृक् । तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् २२

नयाः अहं तु तान्न घातितवान् तथाप्यज्ञानदृष्ट्या स्वतनयान्मया व्यापादितानपि मानुशोचेति सांत्वयति तस्मादिति अ
ज्ञाना अयमेव कर्मवाद माहात्म्य इति २१ कथं तावद्ब्राह्मणादिहंतुः तद्वधस्य प्रायश्चित्तश्रवणं अज्ञानमूलमेवेत्याह याव
दिति अस्वदृक् देहाभिमानी नर अभिमानी तस्य देहस्य हननेन आत्मन्यमान इत्यर्थः २२ बाध्यान्तरितिबाधकतां प्राप्नोति ॥

अभिमन्य १

भा०१० श्यालः कंसः स्वसारिति स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनगुणद्वारा मिथुनलक्षणया स्वसृतत्पत्योरभिधानात् क्लिंगसमवायन प्राणभ
तत्पदधानीतिवत् देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्यर्थः शालशब्देन कथंचिद्वसुदेवाभिधानं २३ आत्मसौहृदं प्रिया

क्षम ध्वंममंदो रात्म्युसाधवो दीनवत्सलाः इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् २३ मोचयामास निगडाद्वि च
श्रब्धः कन्यकागिरा देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं २४ भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी व्यसृजद्वसुदेवश्च
प्रहस्य तमुवाच ह २५ एवमेतन्महाभाग यथा वदसि देहिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः २६ शोकहर्षभ त
यद्वेषलोभमोहमदान्विताः मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः २७ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः
१५ देवकीवसुदेवाभ्यामनुज्ञातो विशद्गृहं २८ श्रीशुक उवाच तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः तेभ्य आ
चष्ट तत्सर्वं यदुक्तं योगनिद्रया २९ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः देवान्प्रति कृतामर्षा दैतेया नाति
कोविदाः ३० एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ३१ किमुद्य विमुखान्
मैः करिष्यंति देवाः समरभीरवः नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ अस्यतस्ते शरव्रातैर्हन्यमानाः श
भि कोऽ‍ खशिरवाः केचिन्न्यस्तशस्त्रा इति वादिनः ३४ न त्वं विस्मृतशस्त्रास्त्रान्विरथान्भयसंविग्नान् हंस्यन्या राम
वाहादिना दर्शयन् ३४ स्वपरभेददर्शनेन किं भवति तदाह शोकहर्षेति भावैरेव निमित्तभूतैर्मिथो भावान् घ्नंतं भावमीश्वरं पृथ १५
ग्दृशस्तं न पश्यंति किंत्वहमेव हंता हत इति मन्यमाना इत्यर्थः २७ विशुद्धं यथा भवति २८ नातिकोविदा दृष्टमात्रमत्सराः २९ ३०
न निर्गता निर्दश दिना येषां तान् अन्यांश्च अस्यं विध्यतः समंतत्स्त्रज्य शरणं त्यक्त्वा अन्या शक्तान् विमुखांश्च न हंसि
नहि नसि ३५

तः१ नवधामिति कृष्ण १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बद्धिस्मित २

ते २

तस्य मनोर्दुहित्रोः कपिलयज्ञमूर्तिभ्यां पुत्रतां प्राप्तः ५७ घोरं दुश्चरं तपस्तप्यमानः ८ समाधावनुभूतमिदं
तो २ वक्ष्यमाणं निद्रिं लुलितं इवतु पदिशान्निव अनुवदन्निवच अष्टभिः श्लोकैर्व्याहरतीत्याह येन चिदात्मना विश्वं मनु २
चेतयते ३ चेतनी भवति विश्वं तु यं न चेतयेन चेतनी करोति स्वतएव चिद्रूपत्वात् तत्र हेतुः अस्मिन् शयाने स्व
पितियो जागर्ति साक्षितया वर्त्तते अहो चित्रं नायं जनस्तं वेद स तु इमं वेद ९ तस्यैश्वरत्वं दर्शयन् लो ये १

आकूत्यां देवहूत्यां च दुहित्रोस्तस्य वै मनोः। धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः।
५ कृतं पुरा भगवतः कपिलस्यानुवर्णितं आख्यास्ये भगवान्यज्ञो यच्चकार कुरूद्व
ह ६ विरक्तः कामभोगेषु शतरूपापतिः प्रभुः विसृज्य राज्यं तपसे सभार्यो वनमावि
शत् ७ सुनंदायां वर्षशतं पदैकेन भुवं स्पृशन् तप्यमानस्तपो घोरमिदमाह सभार
त ८ मनुरुवाच येन चेतयते विश्वं विश्वं चेतयते न यं यो जागर्त्ति शयानेस्मिन्नायं तं
वेद वेद सः ९ आत्मावास्यमिदं विश्वं यत्किंचिज्जगत्यां जगत् तेन त्यक्तेन भुंजीथा
मा गृधः कस्यचिद्धनम् १०

ष १ कस्य हितमुपदिशति आत्मनाईश्वरेण आवस्यं आवसतां च[illegible]भ्यं संव्याप्यं विश्वं सर्वं जगत्यां लोके यत्किंचि न्या १
ज्जगद्गतं जातं अतः तेनेवेश्वरेण यत्किंचित्त्यक्तं दत्तं धनं तेनैव भुंजीथाः भोगान् भुक्ष्व यद्वा तेन हेतुना त्य
क्तेन ईश्वरार्पणेनैव भुंजीथाः न स्वार्थं कस्यस्वित् कस्यचिदपि धनं मा गृधः माभिकांक्षीः यद्वा कस्य स्वि
दिति कस्यान्यस्य धनमस्ति यतो धनाकांक्षा क्रियेतेत्यर्थः तथा च श्रुतिः ईशावास्यमिति यथाश्लोकमेवा १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० अ० ८ नन्नुपहितसर्वंव्याप्नोति नहि चक्षुरादिभिः किं न प्रतीयते तत्राह यं पश्यंतं जनः चक्षुर्वा न पश्यति चक्षु
टी० २ राद्यविषयत्वात् नहि प्रमातारं प्रमाणं विषयीकरोतीति भावः तथा च श्रुतिः चक्षुषः चक्षुः श्रोत्रस्य श्रो
त्रमित्यादि नन्नु तर्हि घटनाशेदेवदन्नस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्यापि स्वरूपभूतं तद्विषय
प्रकाश्य ज्ञानं नश्येत् तत्राह यस्य नुपश्यतः चक्षुर्ज्ञानं न रिष्यति न नश्यति तत्र हेतुः कारणात्मन्नायाश्रितत्वेन वना
शानत्वात् सिद्धस्य ज्ञानस्य नहि स वित्प्रकाशो नाशेन नश्यतीति भावः भूतानि निलयाय यस्य तं सर्वा

पंन्नथाप्रथं पांठं यन्नपश्यतिपश्यंतंचक्षुर्यस्यनरिष्यति तंभूतनिलयंदेवंसुपर्णमुपधावत ११ न
२ यस्याद्यंतौमध्यंचस्वः परोनांतरंबहिः विश्वस्याऽमूनियद्यस्माद्विश्वंचतदृतंमहत्
१२ सविश्वकायः पुरुहूतईशः सत्यः स्वयंज्योतिरजः पुराणः धत्तेस्यजन्माद्यजयात्म
शक्त्यातांविद्ययोदस्यनिरीहआस्ते १३ अथाग्रेऋषयः कर्माणीहंते ऽकर्महे
तवे ईहमानोहिपुरुषः प्रायोऽनीहांप्रपद्यते १४

योमिणं तथापि सुपर्णं शोभनं पतनं असंगं उपधावत भजध्वं ११ तत्स्वरूपस्य नित्यत्वमेवोपपादयन्नाह
नयस्येति आदीनि आद्यंतादीनि विश्वस्य यस्माद्भवंति विश्वं च यत् यद्रूपं अनादावव्यभिचारित्वात् तत्
ऋतं सत्यं महत् परिपूर्णं ब्रह्म १२ नन्नु विश्वं च तद्रूपं तर्हि तस्य कुतो जन्माद्यभावः स्वप्रकाशत्वं वा केथं
वाजगज्जन्मादिकर्तृत्वेन विकारिणः सत्यत्वं पूर्णत्वं वा तत्राह स ईशः अजः सत्य अस्वप्रकाशश्च पुरा
णश्च निर्विकारः विश्वं कायो यस्य पुरूणि हूतानि नामानि यस्य तथाविधोपि यतः अस्य विश्वस्य जन्मा
दि स्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्यया उदस्य हि त्वानिः क्रियप्रवास्ते १३ यस्मादेव मीश्वरः

नन्वीहमानः कर्मभिर्बध्येत कोशकारइव बध्येतैव तत्राह ईहत इति आत्मलाभमनुवर्त्तमाना येतेनावसीदं टी॰ २
ति न विषज्जते १५ नदेवलोकानुग्रहाय विश्वसृष्ट्यादिः करोति श्रीरामकृष्णाद्यवतारैश्च वेदोक्तमथा
चरति तं शरणं व्रजामीत्याह तमिति निजवर्त्मनेरावतारानुरूपो मार्गः तत्र सम्यक्स्थितं अत ईहमा
नं कर्माचरंतं तथापि जीववैलक्षण्यमाह निरहंकृतं निराशिषं अनन्यचोदितमिति च निरहंकारत्वे
हेतुः बुधं निराशिष्ट्वे हेतुः पूर्णं अनन्यनियुक्तत्वे हेतुः प्रभुं तथापि कर्मानुष्ठाने हेतुः नॄन्स्वाचारेण
शिक्षयंतं तत्किमर्थं तत्राह अखिलानां धर्माणां भावयति प्रवर्तयतीति तथा तं १६ समाहितमपि संतं मंत्रोप
निषदं व्याहरंतं दृष्ट्वा सुप्तोत्थितवद्धिवेद्यामि वमत्वा असुरा यातुधानाश्च क्षुधानि मिति नज

ईहते भगवानीशो न हि तत्र विषज्जते आत्मलाभेन पूर्णार्थो नावसीदंति येनु तं १५ तमी
हमानं निरहंकृतं बुधं निराशिषं पूर्णमनन्यचोदितं नॄन् शिक्षयंतं निजवर्त्मसंस्थि
तं प्रभुं प्रपद्ये ऽखिलधर्मभावनं १६ शुकउवाच इति मंत्रोपनिषदं व्याहरंतं समाहितं
दृष्ट्वासुरा यातुधाना जग्धुमभ्यद्रवन्क्षुधा १७ तांस्तथावसितान्वीक्ष्य यज्ञः सर्वग
तो हरिः यामैः परिवृतो देवैर्हत्वाऽशासत्त्रिविष्टपं १८ स्वारोचिषो द्वितीयस्तु मनुरग्नेः सु
तोभवत् द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः १९ श्रीराम श्रीराम श्रीराम ११

ग्धुं अत्तुमभ्यद्रवन् १७ यामैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपालयत् स्वयमेवेंद्रो वभूवेत्यर्थः तत्र प्रतिमन्वंतरं
मन्वादयः षडन्ये भवंतीति तथाहि सप्तो द्वादशे वक्ष्यति मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः ऋषयोंशा
वताराश्च हरेः षड्विधमुच्यत इति तत्राद्ये स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ यामादयो देवाः म
रीचिप्रमुखाः सप्तऋषयः यज्ञो हरेरवतारः इंद्रश्च स एवेति तन्मन्वंतरं पंचविधमेव तत्तु चतुर्थस्कंधे प्र
पंचेन निरूपितं १८ द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादिषट्कमाह स्वारोचिष इति द्वितीयस्त्वित्यादि

भा० अ० २० २१ विभोरसाधारणं चरितमाह अष्टाशीतिसहस्राणीति २२ ५ सत्यजित् इंद्रस्य सखा सन् २६ उत्तमस्तृतीयो मनुः त
स्य पुत्रा ना २७ त्रिशिखईश्वरः २८ अन्यानपि विशिष्टपराक्रमोद्भवानाह देवा वैधृता इति २९ हरिरित्याहुतो व्याहृ ५२

तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः २० ऋषेस्तु वेदशिर
सस्तुषितानाम पत्न्यभूत् तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणि मुनयो
ये धृतव्रताः अन्वशिक्षन्व्रतं तस्य कौमारब्रह्मचारिणः २२ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः
पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप २३ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः सत्या वे
स दश्रुता भद्रा देवा इंद्रस्तु सत्यजित् २४ धर्मस्य सूनृतायां तु भगवान्पुरुषोत्तमः सत्यसेन इति ख्या
तो जातः सत्यव्रतैः सह २५ सोऽनृतव्रतदुःशीलानसतो यक्ष राक्षसान् भूतद्रुहो भूतगणां
३ श्चावधीत्सत्यजित्सखः २६ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः पृथुः ख्यातिर्नरः
केतुरित्याद्या दश तत्सुताः २७ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ज्योतिर्धामाद
यः सप्त ऋषयस्तामसेंतरे २८ देवा वैधृतयो नाम विधृतेस्तनया नृप नष्टाः कालेन यैर्वेदा
विधृताः स्वेन तेजसा २९ तत्रापि जज्ञे भगवान् हरिण्यां हरिमेधसः हरिरित्याहृतो येन ग
जेंद्रो मोचितो ग्रहात् ३० राजोवाच बादरायण एतत्ते श्रोतुमिच्छामहे वयं हरिर्यथा गज
पतिं ग्राहग्रस्तममूमुचत् ३१ तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभं यत्र यत्रोत्तमश्लोको राम
भगवान्गीयते हरिः ३२ ३

तो व्याहृतः ग्रहात् ३० अमूमुचत् मोचयामास ३१ श्रवणेच्छायां हेतुः तत्कथासु तासु कथासु या कथैव [illegible]सु मह
त्पुण्यं पुण्यस्य विशेषणं धन्यमित्यादि ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३३ अष्टमे प्रथमो ध्यायः तुर्ये मन्वंतरे प्रोक्तं गजेंद्रस्य विमोक्षणं द्वितीयादि त्रिभिस्तं तु विस्तरेणोपवर्ण्यते द्वितीये तु गजेंद्रस्य गजीभिः क्रीडतो जले दैवाद्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते आसीत्तु आसीत् १ तावता योजनायुतेना पर्यकं पूरितः त्रिकूटसमाख्या वृक्षमाह त्रिभिः शृंगैः मुख्यैः २ अन्यैश्च शृंगैः निर्झरा भ सानि घोषैश्च ककुभः सर्वा रोचनाय यन्नामाद्रि निष्प्रवर्णे वान्वय कथं भूतैः शृंगैः रत्नैर्धातुभिश्च विचित्रितैः ना

सूत उवाच ॥ परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः उवाच विप्राः प्र
तिनंद्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वतां ३३ इति श्रीभागवते महापुराणे अष्टमस्कंधे म
न्वंतरानुवर्णनं नाम प्रथमो ध्यायः शुक उवाच आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः १
क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः तावता विस्तृतः पर्यक् त्रिभिः शृंगैः पयोनि
खं ७ धिं दिशः रोचयन्नास्ते रौप्यायसहिरण्मयैः २ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रि
ॐ ८ तैः नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसां ३ स चावनिज्यमानांघ्रिः समंतात्पय उ
र्मिभिः करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ४ सिद्धचारणगंधर्वविद्याधरम
होरगैः किंनरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकंदरः ५ यत्र संगीतसन्नादैर्नदद्गुहममर्
ग षया अभिगर्जंति हरयः श्लाघिनः परशंकया ६ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृ
तः चित्रद्रुमसुरोद्यानकलकंठविहंगमः ७
नाविधाद्रुमलतानां गुल्मानां घोषैर्युतः ३ पयसः ऊर्मिभिः समंतादवनिज्यमानावंघ्री मूलप्रांता यस्य हरिद्भिः पा
लाशवर्णैः ४ ५ किंनरादीनां संगीतसंनादैर्नदंत्यो गुहा यस्मिन् प्रदेशे तेऽभिगर्जंति हरयः सिंहाश्च अंघ्रयो १
मर्षयाऽसहनेन ६ नानाय आरण्याः पशवस्तेषां व्रातैः संकुलाभिः द्रोणीभिः अलंकृत अस्तोऽकिंचा
चित्राद्रुमा यस्मिन् येषु सुरोद्यानेषु कंठमधुरस्वना विहंगमा यस्मिन् ७
कल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० त्रा० किंच स्वच्छाहकैः सरित्सरोभिर्युतः मणयइववालुकाययुतैः पुलिनैश्चयुतः देवस्त्रीणां मज्जनेन यः आमोदः
तेन सौरभयुक्तान्यंबूनि अनिलाश्च तैश्चयुतः आस्ते ८ तस्य द्रोण्यां वरुणस्योद्यानमास्ते ९ गिरिवनादिसंबंध
यमिति वक्ष्यति अतो गिरिमुपवर्ण्य वनं वर्णयति सर्वतालंकृतमिति पुनर्गिरिं वर्णयति मंदारैरिति चतुर्भिः

सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः देवस्त्रीमज्जनामोदसौरभांबुनिलैर्युतः ८ तस्य
द्रोण्यां भगवतो वरुणस्य महात्मनः उद्यानमृतुमन्नाम आक्रीडं सुरयोषितां ९ सर्वतोलंकृतं
दिव्यैर्नित्यपुष्पफलद्रुमैः मंदारैः पारिजातैश्च पाटलाशोकचंपकैः १० चूतैः प्रियालैः पनसैराम्रै
राम्रातकैरपि क्रमुकैर्नालिकेरैश्च खर्जूरैर्बीजपूरकैः ११ मधुकैः शालतालैश्च तमालैः सरला
४ र्जुनैः अरिष्टोदुंबरप्लक्षैर्वटैः किंशुकचंदनैः १२ पिचुमंदैः कोविदारैः सरलैः सुरदारुभिः ॥
द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः १३ बिल्वैः कपित्थैर्जंबीरैर्वृतो भल्लातकादिभिः ॥
तस्मिन्सरः सुविपुलं लसत्कांचनपंकजं १४ कुमुदोत्पलकह्लारशतपत्रश्रियोर्जितं मत्त
षट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः १५ हंसकारंडवाकीर्णं चक्राह्वैः सारसैरपि जलकुक्कु
टकोयष्टिदात्यूहकुलकूजितं १६ मत्स्यकच्छपसंचारचलत्पद्मरजःपयः कदंबवेतसन
लनीपवंजुलकैर्वृतं १७ कुंदैः कुरबकाशोकैः शिरीषैः कुटजेंगुदैः कुब्जकैः स्वर्णयूथी
भिर्नागपुन्नागजातिभिः १८ ॥

८ मंदाराभिर्वृत इत्यन्वयः १० ३ तस्मिन्गिरौ सर आस्ते तद्वर्णयति सुविपुलमित्यादिसार्धैः पंचभिः ल
संति कांचनपंकजानि यस्मिन् १४ कुमुदादीनां श्रिया उर्जितं कलैः स्वनो येषां तैः शकुंतैश्च निर्घु
ष्टं १५ चक्राह्वैः सारसैश्चाकीर्णं जलकुक्कुटादीनां कुलैः कूजितं १६ मत्स्यानां कच्छपानां च संचा
रेण चलतां पद्मानां रजसा युक्तं पयो यस्मिन् तत् १७ १८ श्रीराम श्रीराम श्रीराम श्री

यस्यैकं कांचनं शृंगं सेवते वै दिवाकरः ॥ अपरं राजतं शृंगं सेवते वै निशाकरः ॥ तृतीयं ब्रह्मसदनं [illegible] शृंगमुत्तमं ॥ न कृतघ्ना यांति
परं न नृशंसा न नास्तिकाः ॥ नातप्ततपसो लोके ये च पापकृतो जनाः ॥ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यमत्तगवः फलपुष्पादिसंपत्तिहितवेवायिपांनेः रत्नंशोभितं १९ तंत्रैवसतिपकदाचित्क्ष्मिरिकाननाश्रयो
वारणयूथपः करेणुभिश्चरनूत्तस्मादितेनयूथेनवृत्तः सरोवरस्याभ्याशंसमीपमगामदिक्षिपंन्च तिर
मेनान्वयः किंकुर्वन् कीचकवेणुवेत्रावंतविशालगुल्मलतादिसंदंभेवनस्पतीश्चप्रभंजन् प्रभंज

मल्लिकाशातपत्रैश्चमाधवीजालकादिभिः शोभितंतीरजैश्चान्यैर्नित्यर्त्तुभिर्द्रुमैः १९ लं।
तत्रैकदाचित्क्ष्मिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन् सकंटकान्कीचकवेणुवे
त्रवद्विशालगुल्मंप्रभंजन्वनस्पतीन् २० यद्गंधमात्राद्धरयोगजेंद्राव्याघ्रादयोव्यालमृ
गाः सखड्गाः महोरगाश्चापिभयाद्द्रवंतिसगौरकृष्णाः सरभाश्चमर्यः २१ वृकावरा
हामहिषर्क्षशल्यागोपुच्छशालावृककामर्कटाश्च अन्यत्रक्षुद्राहरिणाः शशादय
श्चरंत्यभीतायदनुग्रहेण २२ सघर्मतप्तः करिभिः करेणुभिर्वृतोमदच्युत्कलभैरनु
× मदविह्वलेक्षणः × वृतः स्वयूथेनतृषार्दितेनतत्सरोवराभ्याशमथागमद्द्रुतं २४
विगाह्यतस्मिन्नमृतांबुनिर्मलंहेमारविंदोत्पलरेणुवासितं पपौनिकामं
निजपुष्करोद्धृतमात्मानमद्भिः स्नपयन्गतक्लमः २५

नु २० कथंभूतः यस्यगंधमात्राद्धरयः सिंहागजेंद्रादयश्चभयाद्द्रवंतिपलायंते २१ वृकादयस्तोक्षुद्रा
श्चल्पप्राणिनः अन्यत्रतनुदृष्टिपथंत्यक्त्वाचरंति २२ पुनः कीदृशः घर्मतप्तः मदच्युत्कलभैमदस्त्रावीमद
भक्षंतीतितथोक्तैः २३ २४ निजेनपुष्करेणकराग्रेणोद्धृतंगतक्लमः सनुनिकामंपपौ २५

द्रुमः गिरिंगरिमाणपरितः प्रकंपयन्निषेव्यमाणो
लिकुलैर्मदाशनैः २३ सरोनिजंपंकजरेणुरूषि
तंजिघ्रन्नदूरात् ×

भा०श्रि० २६ हीनधियः करेणवः तं केवलं विचुक्रुशुः २८ मनउत्साहशक्तिः बलं शारीरं ओजः ऐंद्रियं तेषां स
कलं बलादि विपर्ययो विपरीतं अधिकं जलौकसो ग्राहस्य ३० सइत्थं यदा प्राणसंकटमापयत्तोदेही ३१
बुद्धिमेवाहनमामिति अहं च न प्रभवामि यतः ग्राहरूपेण केवलं विधातुः पाशेनावृतः तथापि तं

स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययंत्संस्नपयन्यथा गृही घृणीकरेणुः कलभांश्च दुर्मदो
नाचष्ट कृच्छ्रं कृपणो जमायया २६ तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रु
षाग्रहीत् यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोतिबलो विचक्रमे २७ तथातुरं यूथ
पतिं करेणवो विकृष्यमाणं तरसा बलीयसा विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्र
मे ५ हास्तारयितुं न चाशकन् २८ नियुध्यतोरेवमिंद्रनक्रयोर्विकर्षतोरंतरतो बहिर्मिथः
समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः २९ ततो गजेंद्रस्य मनो बलो
जसां कालेन दीर्घेण महानभूद्व्ययः विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्स
कलं जलौकसः ३० इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया अ
पारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभिपद्यत ३१ न मामिमे ज्ञातय आ भ
तुरं गजाः कुतः करिण्यः प्रभवंति मोचितुं ग्राहेण पाशेन विधातुरावृतोप्यहं च तं या
मि परं परायणं ३२
परं परेशं वरं परेषां ब्रह्मादीनां आश्रयनमाश्रयभूतं शरणं यामि ३२ श्रीराम श्रीराम श्रीराम राम

यः कश्चनेशे १

कोऽसौ यं शरणं यामि ४ अंतकाद्घोरात् तस्मात् तं शरणमीमहि व्रजेम यद्भयादित्यत्र श्रुतिः भीषास्माद्वा
तः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ३३ अष्टमे द्वितीयः तृतीये
तु गजेंद्रेण स्तोत्रेण हरिरुपेत्य तं समुद्धारितं ग्राहो हूहूर्देवलशापतः जाप्यं जप्यं स्तोत्रं प्राग्जन्म
निर्दिष्टं ध्यानसंज्ञे १ तस्मिन्नमानमनं अभिधीमहि अभिध्यायेत्केवलं ३ ग्राहगृहीतत्वेन काय म२
प्रणतेरशक्यत्वात् स्वस्य तत्र ज्ञानं संभावयितुं विशिनष्टि यतः स्वचिद्रूपात् चेतो हृदि चिदात्मकं
चेतनं भवति तदुक्तं येन चेतयते विश्वमिति तत्र हेतुः पुरुषाय पूर्षु कारणत्वेन प्रविष्टाय ननु प्र

यः कश्चनेशो बलिनोऽन्तकोरगात्प्रचंडवेगादभिधावतो भृशं भीतं प्रपन्नं परिपाति यद्भ
रा यान्मृत्युः प्रधावत्यरणं तमीमहि ३३ इति श्रीभागवते महापुराणे अष्टमस्कंधे मन्वं
तरानुवर्णने गजेंद्रोपाख्याने द्वितीयोऽध्यायः श्रीशुक उवाच एवं व्यवसितो बुद्ध्या
समाधाय मनो हृदि जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् १ गजेंद्र उवाच
उं नमो भगवते तस्मै यत एतच्चिदात्मकं पुरुषायादिबीजाय परेशायाभिधीमहि २
न१ यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयं योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवं ३ यं१

इति पुरुषो कारणमिति प्रसिद्धं तत्राह आदिः प्रकृतिः बीजं पुरुषः तद्रूपाय प्रविष्टत्वेऽपि जीव ग
वत्पारतंत्र्यं वारयति परेशायेति २ परमेश्वरं विशिष्ट एव न्नाह यावत्समाप्ति यस्मिन्नधिष्ठाने यत उ
गी पादानात् येन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति अस्मात्कार्यात् परस्मात् कारणाच्च यः परस्तं
स्वयंभुवं स्वतः सिद्धं प्रपद्ये शरणं व्रजामि ३ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० अ० विश्वहेतुत्वं स्वतः सिद्धत्वं चोक्तं इदानीं विश्वप्रकाशकत्वं च वर्णयन् प्रार्थयते य इति यः स्वात्मनीति विभातं अभि
व्यक्तं सन् क्वचित् प्रलये तिरोहितं लीनं सत् तदुभयं कार्यं कारणं च साक्षी सन्नीक्षते साक्षित्वे हेतुः
अविद्धदृक् अलुप्तदृक् दृष्टिः आत्ममूलः स्वप्रकाशः कुतः परात् प्रकाशकात् चक्षुरादेः अपि परः तस्या
पि प्रकाशक इत्यर्थः चक्षुषः चक्षुरित्यादि श्रुतेः ४ तिरोहितमीक्षितमित्युक्तं तत्प्रपंच पूर्वकं दुर्ज्ञेय
त्वं वदन् प्रार्थयते कालेनेति द्वाभ्यां पंचत्वमितेषु नाशं प्राप्तेषु गहनं दुःखगाहं गंभीरमनंतं तस्य तम
सः आदित्यवर्णं तमसः परस्तादिति श्रुतेः ५ अत एव देवादयोपि यस्य स्वरूपेन विदुः जंतुरर्वाची

यः स्वात्मनीदं निजमाययार्पितं क्वचिद्विभातं क्व च तत्तिरोहितं अविद्धदृक् साक्ष्यु
भयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ४ कालेन पंचत्वमितेषु कृत्स्नशो लो
६ पालेषु ३ केषु च सर्वहेतुषु तमस्तदासीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ५ न य
स्य देवा ऋषयः पदं विदुर्जंतुः पुनः कोऽर्हति गंतुमीरितुं यथा नटस्याकृतिभिर्विचे
ष्टतो दुरत्ययानुक्रमणः स मावतु ६ दिदृक्षवो यस्य पदं सुमंगलं विमुक्तसंगा मुनयः
सुसाधवः चरंत्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः स मे गतिः ७ सम ६

ईरितुं नः गंतुं ज्ञातुं वक्तुं वा दुरत्ययं दुर्गममनुक्रमणं चरितं कथनं वा यस्य सः मां ६ कथं तर्हि तमेव वि अवतु १
दित्वेति मृत्युमेतीत्यादि श्रुतिरित्याशंक्य तत्तज्ञानोपायं कथयन्नाह दिदृक्षव इति अलोक
व्रतं ब्रह्मचर्यादि अव्रणं अछिद्रं भूतानामात्मभूताः भूतेष्वात्मदृष्टयः संतः समगतिरस्तु ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुरत्ययानुक्रमणत्वंप्रपंचयन्प्रणाममंत्रानविधत्तइत्यादिना लोकानामप्ययः प्रलयः संभवोजन्मतयोर्हेतवे कथंत
दर्थंयस्तानिजन्मादीनिस्वीकरोतितस्मैनमइत्युत्तरेणान्वयः ॥ ब्रह्मणेब्रह्मरूपाय अनंतशक्तयेउरुरूपा
य अतआश्चर्याणिकर्माणियस्यतस्मैपरेशायनमः ॥ आत्मप्रदीपायप्रकाशांतरस्याविषयाय कुतः
साक्षिणप्रकाशकाय परमात्मनेजीवनियंत्रे अतएवगिरांविदूरायअप्राप्यायचेतसांचित्तवृत्तीनांतथा
चश्रुतिः यतोवाचोनिवर्तंतेअप्राप्यमनसासहेति १० एवमपिविपश्चिता निर्गुणेनतेः कर्म्येणसन्यासेन

गु॰ नविद्यतेयस्यचजन्मकर्मवाननामरूपेपागुणदोषएववा तथापिलोकाप्ययसंभवाययःस्व
मायया तान्यनुकालमृच्छति ॥ तस्मैनमःपरेशायब्रह्मणेनंतशक्तये अरूपायोनमआश्च उरूपाय२
र्यकर्मणे ॥ नमआत्मप्रदीपायसाक्षिणेपरमात्मने नमोगिरांविदूरायमनसश्चेतसामपि ॥१०॥ य२
सत्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिता नमःकैवल्यनाथायनिर्वाणसुखसंविदे ११ नमः
शांतायघोरायमूढायगुणधर्मिणे निर्विशेषायसाम्यायनमोज्ञानघनायच ॥ १२ क्षेत्रज्ञा
यनमस्तुभ्यंसर्वाध्यक्षायसाक्षिणे पुरुषायात्ममूलायमूलप्रकृतयेनमः १३

सत्वेनशुद्धेनसन्यासयोगादिनयःशुद्धसत्वाइतिश्रुतेः प्रतिलभ्यायप्रत्यक्त्वेनप्राप्यायनिर्वाणसुखसंवि
देमोक्षानंदानुभूतये ११ गुणधर्मिणेसत्वादिधर्मानुकारिणे ज्ञानघनायचेति निर्विशेषत्वेपिप्रधानत्वे
लक्षण्यमुक्तं १२ साक्षिणइतिसर्वाध्यक्षत्वेपिनिर्विकारत्वमुक्तं आत्मनोक्षेत्रज्ञानांमूलायमूलस्यप्रधा
नस्यापिप्रकृतयेतर्क्कवहेतवे तत्रहेतुः पुरुषायपूर्वमेवसते तथाचश्रुतिः पूर्वमेवाहमिहासमितित
त्पुरुषस्यपुरुषत्वमितिपूर्णायेतिवा १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०८अ०

सर्वेंद्रियाणांयेगुणाः विषयास्तेषांद्रष्ट्रेसर्वप्रत्ययाइंद्रियवृत्तयोहेतवोज्ञापकायस्यतस्मै गदेवाह असताअ
अ२ हंकारादिप्रपंचनछाययासद्रूपायात्तक्तायप्रतिबिंबेनबिंबमिवसूचितायतत्रहेतुः सद्रूपेविषयेषाभा पु२
सायस्यतस्मै तदुक्तंतत्रैव यथाजलस्थआभासइत्यादि पाठांतरे असत्यस्यछायया अध्यासेनअ
क्ताययुक्तायतदधिष्ठानायेत्यर्थः १४ अखिलकारणायसर्वकारकरूपाय अतएवस्वयंनिःकारणा
८ याकारणत्वेपिमृदादिवद्विकारंवारयति अद्भुतकारणायेति एवंभूतत्वेप्रमाणमाह सर्वेआगमाः

सर्वेंद्रियगुणद्रष्ट्रेसर्वप्रत्ययहेतवे असताच्छाययोक्तायसदाभासायतेनमः १४ नमोन
मस्तेऽखिलकारणायनिःकारणायाद्भुतकारणाय सर्वागमाम्नायमहार्णवायनमो
पवर्गायपरायणाय १५ गुणारणिच्छन्नचिदूष्मपायतत्क्षोभविस्फूर्जितमानसाय नैष्क
स्व२ र्म्यभावेनविवर्जितागमस्वयंप्रकाशायनमस्करोमि १६ मादृक्प्रपन्नपशुपाशविमोक्षणाय
मुक्तायभूरिकरुणायनमोऽलयाय स्वांशेनसर्वतनुभृन्मनसिप्रतीतप्रत्यग्दृशेभगवते
बृहतेनमस्ते १७

पंचरात्रादयः आम्नायाश्चवेदाः तेषांमहार्णवायस्रोतसामिवपर्यवसानस्थानाय अपवर्गायमोक्षरूपा
णि२ य अतःपरायणायउत्तमानामाश्रयाय १५ गुणारण्याछन्नश्चिदूष्मपाज्ञानाग्निः तस्मैतेषांगुणानां
क्षोभकार्येविस्फूर्जितंबहिर्वृत्तिकंमानसंयस्यसोकामूयतबहुस्यामितिश्रुतेः नैष्कर्म्यमात्मतत्त्वंतस्यभा
वेनभावनयाविवर्जिताआगमाविधिनिषेधलक्षणायैः तेषुस्वयंप्रकाशायस्यतस्मै १६ मादृक्कृमहद्विध
श्चमेप्रपन्नःपशुःतस्यपाशःअविद्यातस्यविशेषेणमोक्षणंयेन तत्रयोग्यतामाह मुक्तायमोचनेहेतुःभूरिकरु
३२। णायस्याअतत्साम्यार्थंअलयायअनलसायस्वांशेनअंतर्यामिरूपेणसर्वेषांतनुभृतांमनसिप्रतीतायप्रत्यग्दृ
तायप्रत्यक्प्रवृत्तेस्मृतत्वाचश्रुतिः यआत्मनितिष्ठन्आत्मानमंतरोयमयतीति भगवतेसर्वेषांतनुभृतांनियमनेसमर्थाय

नैष्कर्म्यभावेनविवर्जितागमस्वयंप्रकाशाय १६ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतः स्थत्वेपि देहादिष्वासक्तैर्दुः प्रापणाय शंकुमशक्यां तत्र हेतुः गुणसंगेन विवर्जिताय अत एव मुक्तात्म
भिः देहादिष्वनासक्तैः स्वांतिनयं तैः परिभावितरूपमाह ज्ञानात्मन इत्यादि १८ इष्टां गतिं कामिनो धर्मादिफ
लं प्राप्नुवंत्येव न तु तावदेव किंतु यत्तेन रकामिनामप्यन्यामप्याशिषा राति देहमथव्ययं राति एवं दयार्द्र
हृदयः सन्ने विमोक्षणमेव केवलं करोतु ना ऽधिकं प्रार्थये १९ एतावदप्याह भक्तिसुखानभिज्ञत्वेन वांछा
मि यस्य त्वेकांतभक्ता न कंचिदर्थं वांछंति तं परमेश्वरमीडे स्तोमीत्युत्तरेणान्वयः तेषां निःकामत्वे हे
तुः यं वै भगवतः सर्वज्ञान्मुक्ताः प्रपन्नाः सेवितवंतः २० अत्यद्भुतं सुमंगलत्वप्रदर्शनार्थमक्षरत्वादि
मा॰२

मू॰ आत्मजाप्रग्रहवित्तजनेषु सक्तैर्दुः प्रापणाय गुणसंगविवर्जिताय मुक्तात्मभिः स्वहृदये परि
भाविताय ज्ञानात्मने भगवते नम ईश्वराय १८ यं धर्मकामार्थविमुक्तिकामा भजंत इष्टां गतिमा
प्नुवंति किं त्वाशिषो रात्यपि देहमव्ययं करोतु मे ऽदभ्रदयो विमोक्षणं १९ एकांतिनो यस्य
न कंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः अत्यद्भुतं तच्चरितं सुमंगलं गायंत आनंदसमुद्र
मग्नाः २० तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यं अतींद्रियं सूक्ष्ममिवातिदू
रमनंतमाद्यं परिपूर्णमीडे २१ यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः नामरूपविभे
देन फल्ग्व्या च कलया कृताः २२ यथार्चिषो ऽग्नेः सवितुर्गभस्तयो निर्यांति संयांत्यसकृत्स्वरो
चिषः तथा यतो ऽयं गुणसंप्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः २३ श्रीराम श्रीराम श्री

टी॰ विशेषणानि २१ परिपूर्णत्वेन प्रदर्शयन्नाह त्रिभिः यस्येति फल्ग्व्या चास्वल्पया च कलया अंशेन कृताः सृज्यन्त इति तृतीये
नान्वयः २२ कथं कृता इत्यपेक्षायां दृष्टांतो यथार्चिषो ऽग्नेरिति प्रवाहे दृष्टांतः सवितुर्गभस्तय इत्यानंत्ये निर्यांति उ
छंति संयांति लीयंते गुणसंप्रवाहमेवाह बुद्धिर्मनः खानीति करणानि शरीरसर्गाः कार्यदेहप्रवाहाश्च यतो भवंति स २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० अत एव देवादीनां मध्ये कोपि न भवति नेजंतुः लिंगत्रयशून्यं प्राणिमात्रमपि किंतु सर्वस्य निषेधे अवधित्वेन अवशिष्यत
इति निषेधशेषः मायया अशेषात्मकश्च जयतात् मद्विमोक्षणाय आविर्भवतु २४ न च ग्राहाच्छरीरस्य मोक्षणेना
हंजीवितुमिच्छामि तत्र हेतुः अमुया अंतर्बहिश्च अविवेकव्याप्तया गजजात्या किं प्रयोजनं आत्मलोकस्य आ
त्मप्रकाशस्य यदावरणमज्ञानं तस्य विप्लवतु मोक्षमिच्छामि यस्य मोक्षस्य कालेन नाशो नास्ति यद्वा देहस्य संबंधो
देहनाशेन स्वयमेव किं तन्मोक्षप्रार्थनेन आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति ज्ञानैकनिवर्त्यत्वात् अ

मू१ स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षंढो न पुमान्न जंतुः नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशे
षः २४ जिजीविषे नाहमिहामुया किमंतर्बहिश्चावृतयेभयोन्या इच्छामि कालेन न यस्य विप्लवस्तस्यात्म ४२
लोकावरणस्य मोक्षं २५ सोहं विश्वसृजं विश्वमविश्वं विश्ववेदसं विश्वात्मानमजं ब्रह्म प्रणतोस्मि परं
पदं २६ योगरंधितकर्माणो हृदि योगविभाविते योगिनो यं प्रपश्यंति योगेशं तं नतोस्म्यहं २७ नमो
नमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय प्रपन्नपालाय दुरंतशक्तये कदिंद्रियाणामन
वाप्यवर्त्मने २८ नायं वेद स्वमात्मानं यच्छक्त्याहंधियाहतं तं दुरत्ययमाहात्म्यं भगवंतमितोस्म्यहं ॥ २९

तत्तस्यैवं मोक्षमिच्छामीत्यर्थः २५ सोहं मुमुक्षुः विश्वं विश्वरूपं अविश्वं विश्वव्यतिरिक्तं च अविश्वं वेदो धनं उप
करणं यस्य तं विश्वस्यात्मानं च केवलं प्रणतोस्मि न तु तं जानामि योगं विना दुर्ज्ञेयत्वादित्याह योगेन भगवदर्प
टी२ णारंधितानि निर्दग्धानि कर्माणि येषां यं प्रपश्यंति २७ तर्हि सर्वेपि योगमेव किं नास्थिता तत्राह नम इति द्वाभ्यां राम ८
असह्यो वेगो रागादिलक्षणो यस्य तथाभूतं शक्तित्रयं यस्य तस्मै नमः हि अखिलधियां सर्वेंद्रियाणां गुण
यशब्दादिरूपेण प्रतीयमानाय अतः कदिंद्रियाणां कुत्सितानींद्रियाणि येषां तेषां मनवाप्यं वर्त्म यस्य २८
यच्छक्त्या यस्य मायया अहंधीः तया हतं आवृतं अयं जनो न वेद दुरत्ययं माहात्म्यं यस्य तं इतः आश्रितोस्मि २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपवर्णितं निर्विशेषमूर्त्तिभेदं विनापरं तत्वं येन तं विविधा वासौ लिंगभिन्मूर्त्ति भेदः तस्याभिमानो येषां ब्रह्मादीनां ते यदानो
पजग्मुः तत्र तदा अखिलामरमयः सर्वदेवमयं मूर्त्तिः ३० दिविजैर्देवैः सह छंदोमयेन तेनिशे आयातः ३१ रवेद्दष्ट्वा उ
ततः२ पात्तं उद्धृतं चक्रं येन ३२ गरुडोपिमंदगतिरिति सहसावतीर्य अरिणा चक्रेण विपाटितं मुखं यस्य उस्त्रियाणां देवा
नां ३३ अष्टमे तृतीयः चतुर्थं तु नयोर्ग्राहः शापं गंधर्वत्वं पुनः गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदं १ २ हूहू

शुक उवाच एवं गजेंद्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिंगभिदाभिमानाः नैते यदोपससृपुर्निखि
लात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ३० तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिवि
जैः सह संस्तुवद्भिः छंदोमयेन गरुडेन समुह्यमानश्चक्रायुधोभ्यगमदाशु यतो गजेंद्रः ३१ सोंतः सरस्यु
रुबलेन गृहीत आर्त्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रं उत्क्षिप्य सांबुजकरं गिरमाह कृच्छ्रान्नारायणा
खिलगुरो भगवन्नमस्ते ३२ तं वीक्ष्य पीडितमजः सहसावतीर्य सग्राहमाशु सरसः कृपयोज्जहार ग्राहा
च४ द्विपाटितमुखादरिणा गजेंद्रं संपश्यतां हरिरमूमुचदुस्त्रियाणां ३३ इति श्रीभागवते महापुराणे अष्टमे
स्कंधे गजेंद्रमोक्षणानाम तृतीयोऽध्यायः शुक उवाच तदा देवर्षिगंधर्वा ब्रह्मेशानपुरोगमाः मुमुचुः
कुसुमासारं शंसंतः कर्म तद्धरेः १ नेदुर्दुंदुभयो दिव्या गंधर्वा ननृतुर्जगुः ऋषयश्चारणाः सिद्धाः स्तुष्टुवुः
पुरुषोत्तमं २ योसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् मुक्तो देवलशापेन हूहूर्गंधर्वसत्तमः ३

संज्ञायां गंधर्वसत्तमः असौ देवलस्य शापेन ग्राहो जातः स वै तत्र सद्यो मुक्तः स तु उत्तमश्लोकमगायत् तत्र अन्वयः एवं ही
त्वमघमर्षणं कुर्वन्ति पादेम२ तिहासोत्तमकथा सरसि स्त्रीभिः क्रीडन्तं सो स्नानं प्रविष्टं देवलं हस्ते विचकर्ष स च प्रकुपितो ग्राहो भवेति शशाप
तेन च प्रसादितः सन्नुवाच एवमेव गजेंद्रं ग्रसितवंतं गजेंद्रमुद्धरन् हरिस्त्वामपि मोचयिष्यतीति ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० स्कं० ८ ३ कथंभूतं। यशसो धाम आश्रयं अजः कीर्तन्याः कीर्तनीयाः गुणाः सतां कथा च यस्य तं ४ स्वलोकं गंधर्वलोकं ५।७
कुलाचले मलयाद्रौ वा आश्रमो यस्य ८ तं ऋषिं आरहस्युपासीनं वीक्ष्य ९ शापमवाह असाधुरित्यादि अकृतो अशिक्षि

प्रणम्य शिरसाधीशमुत्तमश्लोकमव्ययं अगायत यशोधाम कीर्तन्यगुणसत्कथं ४ सोनुकंपित ईशेन परि
क्रम्य प्रणम्य तं लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ५ गजेंद्रो भगवत्स्पर्शाद्विमुक्तोज्ञानबंध
नात् प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ६ स वै पूर्वमभूद्राजा पांड्यो द्रविडसत्तमः इंद्रद्युम्
न इति ख्यातो विष्णुव्रतपरायणः ७ स एकदाराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिं
जटाधरस्तापस आप्लुतोच्युतं समर्चयामास कुलाचलाश्रमः ८ यदृच्छया तत्र महायशा मुनिः
समागमच्छिष्यगणैः परिश्रितः तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह
९ तस्मा इमं शापमदादसाधुरयं दुरात्माकृतबुद्धिरद्य विप्रावमंता विशतां तमोंधं यथा गजः
स्तब्धमतिः स एव १० श्रीशुक उवाच एवं शप्त्वा गतोगस्त्यो भगवान्नृप सानुगः इंद्रद्युम्नोपि राजर्षि
र्दिष्टं तदुपधारयन् ११ आपन्नः कौंजरीं योनिमात्मस्मृतिविनाशिनीं हर्यर्चनानुभावेन यद्गजत्वेप्य
नुस्मृतिः १२ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः गंधर्वसिद्धविबु
धैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोगात् १३ एतन्महाराज तवेरितो मया कृष्णानुभा
वो गजराजमोक्षणं स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य शृण्वतां १४

तावुडियस्य गजो यूथास्तद्धमतिः स्तब्धेवायं अतः स एव गजो भवेत्यितिशेषः १० दिष्टं दैव प्रापितं तदुपधारयन् आलो
चयन् ११ कौंजरीं योनिमापन्नः तर्हि पश्चात्कथं स्मृति जातां तत्राह हरेरर्चस्यानुभावेनेति १२ अद्भुतं स्वभवन
मगात् १३ एतद्गजराजमोक्षणं नाम कृष्णानुभावस्तवेरितः कथं भूतं तत्राह स्वर्ग्यमित्यादि दुःस्वप्ननाशयतीति तथा १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत॰ श्रेयस्कामाएतद्यथावदनुकीर्त्तयंति १४ अनेन श्रेयो भवतीति कुतोज्ञातं साक्षाद्भगवद्वचनादेवेत्याह इदमा
हेत्यादियावत्समाप्ति १५ प्रसंगादन्यस्यापिस्मरणफलमुच्यते सर्वेषांद्वितीयांतानांस्मरंतीत्यष्टमेनान्वय॰ १६

यथानुकीर्त्तयंत्येतच्छ्रेयस्कामाद्विजातय॰ शुचय॰ प्रातरुत्थाय दुःस्वप्नाद्युपशांतये १४ इदमाह हरिः
प्रीतोगजेंद्रं कुरुसत्तम शृण्वतां सर्वभूतानां सर्वभूतमयो विभु॰ १५ श्रीभगवानुवाच येमां त्वां च स
रश्चेदं गिरिकंदरकाननं वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् १६ श्रीभग शृंगाणीमानि धिष्ण्या
नि ब्रह्मणोमे शिवस्य च क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरं १७ श्रीवत्सं कौस्तुभं मालां गदां कौ
मोदकीं मम सुदर्शनं पांचजन्यं सुपर्णं पतगेश्वरं १८ शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रि
यां ब्रह्माणं नारदमृषिं भवं प्रल्हादमेव च १९ मत्स्यकूर्मवराहाद्यैरवतारै॰ कृतानि मे कर्माण्य
नंतपुण्यानि सूर्यं सोमं हुताशनं २० प्रणवं सत्यमव्यक्तं गोविप्रान् धर्ममव्ययं दाक्षायणीर्ध
र्मपत्नी॰ सोमकश्यपयोरपि २१ गंगां सरस्वतीं नंदां कालिंदीं सितवारणं ध्रुवं ब्रह्मऋषीन्स
प्तपुण्यश्लोकांश्च मानवान् २२ उत्थायापररात्रांते प्रयता॰ सुसमाहिता॰ स्मरंति मम रूपा
णि मुच्यंते ह्येनसोऽखिलात् २३ ये मां स्तुवंत्यनेनांग प्रतिबुध्य निशात्यये तेषां प्राणात्यये चा
हं ददामि विमलां मतिं २४ श्रीशुक उवाच इत्यादिश्य हृषीकेश॰ प्रध्माय जलजोत्तमं हर्षयन्वि
बुधानीकमारुरोह खगाधिपं २५ इति श्रीभागवते महापुराणे अष्टमस्कंधे चतुर्थोऽध्याय॰ ॥

२० अव्यक्तं मायां अव्ययं धर्मं भक्तिलक्षणं सोमकश्यपयोरपि पत्नीर्दाक्षायणी॰ २१ सितवारणमैरावतं २२
सुसमाहिता॰ एकाग्रचित्ता॰ मम रूपाणि महिम्नो॰ २३ ४ जलजोत्तमं शंखवरं प्रध्माय वादयित्वा २५
इति अष्टमे चतुर्थ॰ ४ श्रीराम श्री

भा०अ०

अमृतार्म्भानमष्टाभिरध्यायैरनुवर्ण्यते स्वभक्तपक्षपातेन यत्रयोपायिने प्रभोः। पंचमे पंचमं चाथ षष्ठं चाकथय
न्मनु विप्रशापाद्वनिः श्रीकैः हेतोर्देवैः हरिस्मृतिः १ तामसश्चतुर्थो मनुः तस्य सोदरः भ्राता २ ५ तस्यैव वैकुंठ सं
ज्ञस्य हरेरनुभावः सनकादिशापन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां वाराहादिरूपेण युद्धादिलक्षणो गुणाश्च

शुक उवाच राजन्नुदितमेतत्ते हरेः कर्माघनाशनं गजेंद्रमोक्षणं पुण्यं रैवतं त्वंतरं शृणु १ पंचमो रैव
तो नाम मनुस्तामससोदरः बलिविंध्यादयस्तस्य सुता अर्जुनपूर्वकाः २ विभुरिंद्रः सुरगणा राज
न्भूतरयादयः हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ३ पत्नी विकुंठा शुभ्रस्य वैकुंठैः सु
रसत्तमैः तयोः स्वकलया जज्ञे वैकुंठो भगवान्स्वयं ४ वैकुंठः कल्पितो येन लोको लोकनमस्कृतः
मे रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ५ तस्यानुभावः कथितो गुणाश्च परमोदयाः भौमान्रेणू
१० न्स विममे यो विष्णोर्वर्णयेद्गुणान् ६ षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः पूरुपूरुषसुद्युम्नप्रमु श्री
खाश्चाक्षुषात्मजाः ७ इंद्रो मंत्रद्रुमस्तत्र देवा आप्यादयो गणाः मुनयस्तत्र वै राजन् हविष्मद्वी
रकादयः ८ तत्रापि देवः संभूत्यां वैराजस्याभवत्सुतः अजितो नाम भगवानंशेन जगतः प
तिः ९ पयोधिं येन निर्मथ्य सुराणां साधिता सुधा भ्रममाणोंभसि धृतः कूर्मरूपेण मंदरः १० रा
जोवाच यथा भगवता ब्रह्मन्मथितः क्षीरसागरः यदर्थं वा यतश्चाद्रिं दधारांबुचरात्मना ११ य
थामृतं सुरैः प्राप्तं किमन्यदभवत्ततः एतद्भगवतः कर्म वद स्व परमाद्भुतं १२ त्वया संकथ्यमानेन
महिम्ना सात्वतांपते नातितृप्यति मे चित्तं सुचिरं तापतापितं १३ सूत उवाच संपृष्टो भगवा राम
५१ नेवं द्वैपायनसुतो द्विजाः अभिनंद्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे १४ १०

ब्रह्मण्यतादयः परमोदयाश्च महदुदयः कथिताः तृतीयस्कंधादिषु ६ १० यतो हेतोः अंबुचरात्मना कूर्मरूपे
ण ११ सुराणां साधिता सुधा तु तया युद्धादपि सूचितं अतः पृच्छति किं चान्यदिति १२ १४ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोत्तिष्ठेरन्न पुनर्जीवं निस्मेत्यर्थः दुर्वाससा हि कदाचिन्मार्गे गच्छता मिंद्रं दृष्ट्वा स्वकंठस्था माला तस्मै दत्ता तेन
न च श्रीमदेनानादृत्य गजवर्तस्य कुंभयोर्निक्षिप्ता सा च मत्तः पद्मानां मालां चूर्णीचकार ततः कुपितो दुर्वासा
पद्म२ स्तं शशाप त्रिभिर्लोकैः सह निःश्रीको भवेति तदेतदाह दुर्वाससः शापेनेति इज्यादयः यागाद्याः १६ १८
असुरान्यथा देववलं क्षीणमभूत् तेन वलपुष्ट्यादियुक्तानु विलोक्येत्यर्थः १९ हरिं शरणं गताः संतो यथा पूर्वं प्राप्ता
महिमहिषेणोत्फुल्लविकसितवदनं यस्य २० मनुष्यादयो जरायुजाः अंडजाः स्वेदजाः यस्यावतारैः पुरुषः जी१

शुकवाच यदा युद्धेऽसुरैर्देवा बाध्यमानाः शितायुधैः गतासवो निपतिता नोत्तिष्ठेरन्स्म भूयशः १५
न२ यदा दुर्वाससः शापात्सेंद्रा लोकास्त्रयो नृप निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः १६
निशम्यैतत्सुरगणा महेंद्र वरुणादयः नाध्यगच्छन्स्वयं मंत्रैर्मंत्रयंतो विनिश्चयं १७ ततो ब्रह्म
सभां जग्मुर्मेरोर्मूर्द्धनि सर्वशः सर्वं विज्ञापयांचक्रुः प्रणताः परमेष्ठिने १८ स विलोक्ये
द्रवाय्वादीन्निःसत्वान्विगतप्रभान् लोकानमंगलप्रायानसुरानयथा विभुः १९ समाहित
न मनसा संस्मरन्पुरुषं परं उवाचोत्फुल्लवदनो देवान्स भगवान्परः २० अहं भवो यूयमथो
सुरादयो मनुष्यतिर्यग्द्रुमधर्मजातयः यस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं त
मव्ययं २१ न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः अथापि सर्गस्थितिसंय
मार्थं धत्ते रजः सत्वतमांसि काले २२ अयं च तस्य स्थितिपालनक्षणः सत्वं जुषाणस्य भवाय
देहिनां तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः २३

तस्यांशो ब्रह्मा तस्य कलाः मरीच्यादयस्ताभिर्विसर्जिताः पुत्रपौत्रादिद्वाराजनिताः २१ ननु तर्हि सर्वेष्व
सौ समः स्यात् किं तत्र शरणाश्रयेण सत्यं यद्यप्येवं तथाप्यधुना सत्वपक्षपातित्वमभिव्यक्तं इत्याशयेनाह न यस्य
निद्धाभ्यां २२ स्थितिपालनस्य लक्षणः कालः अतः सुरप्रियः सन् स्वीयानामनः शं सुखं करिष्यति २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१९

यत्रक्षीराब्धेोहरेर्धाम्सस्तद्देवानमस्‍ः परंस्थानं यद्वालोकालोकात्परतोयत्रमस्ताताःपरंस्थानंजगाम २४
देवीभिःलोकेऽप्रसिद्धाभिर्वैदिकीभिःस्तोतिमकरोत् २५ देववरंत्वांनमामहे हेदेववरं त्वांनमामेतिवा
वरत्वहेतुःसत्यंकुतःअविक्रियंनतुकुतः अनंतमाद्यंचअनादिं आद्यत्वंतोहि ह्याद्यादिविक्रियाभ
वंति किंच गुहाशयंसर्वांतरं कुतः निःकलंनिरुपाधिं नतुकुतःअप्रतर्क्यंनतुकुतः मनोग्रयानंमनसा
पिजविष्टंमनःप्राप्यस्थानंततःप्रागेवविद्यमानत्वात् तथाचश्रुतिः अनेजदेकंमनसोजवीयोनैनं

शुकउवाच इत्याभाष्यसुरान्वेधाःसहदेवैररिंदम अजितस्यपदंसाक्षाज्जगामत गीर्भि
मसःपरं २४ तत्रादृष्टस्वरूपायश्रुतपूर्वायवैविभो स्तुतिमब्रूतदैवीभिस्त्ववहिते
द्रियः २५ ब्रह्मोवाच अविक्रियंसत्यमनंतमाद्यंगुहाशयंनिष्कलमप्रतर्क्यम् मनोऽग्रयानंवचसाऽनिरुक्तंनमामहेदेववरंवरेण्यं २६ विपश्चितंप्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणं छायातपौयत्रनगृध्रपक्षौतमक्षरंखंत्रियुगं
व्रजामहे २७

[illegible]

तदेवाह आकवत्सर्वमर्शन तद्वावतोन्यानत्येतितिष्ठदितिवचसाऽनिरुक्तं अविषयत्वात् यद्वा
तं२ वाचाऽनभ्युदितंयेनवागभ्युद्यतइतिश्रुतेः मनोवचसोरगोचरत्वाद्प्रतर्क्यं यथेष्टंवासर्वेषांहेतुःहेतुमकाव
२६ किंच प्राणादीनांविपश्चितंज्ञातारंआत्माअहंकारोदेहोवा ननुततोव्यतिरिक्तोऽज्ञेयमेतात्या
पा०२ ह अर्थोविषयःइंद्रियाणितज्ञाहकोंतदुभयत्रपणभासइतितथातंतेथाप्यनिद्रंस्वप्नदृष्टव
देशांतरहितंतत्कुतः अव्रणं अदेहे अतएवअक्षरंखमिवव्यापिनंचसर्वत्रहेतुःयत्रयस्मिन्
गृध्रपक्षौजीवपक्षपातिनौछायातपौअविद्याचतन्निवर्तिकाविद्याचनास्तित त्रियुगंत्रिषुयु

तं२ त२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं देवमविक्रियत्वादिभिः सर्वज्ञत्वादिभिश्च सत्यत्वेन रूपं त्वे चोक्तं संसारचक्राधारत्वेनापि तं देवदर्शयन्नाह। अजस्य जीवस्य चक्रेण चक्रे वर्तमानं देहादि अजया मायया ईर्यमाणं यत् यः अक्षोऽयस्य यदधिष्ठानमाहुस्तमृतं सत्यं प्रपद्ये कथं भूतं चक्रं मनोमयं मनः प्रधानं दशेन्द्रियाणि पंच प्राणाश्च एवं पंचदश अराः यस्य आशु शीघ्रं त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चलं अष्टौ प्रकृतयो नेमयः आवरणानि यस्य २८ सर्वजीवनियन्तृत्वादिनाचरितं तमाह यद्वेति उपसुपर्णं जीव समीपं तन्नियन्तृत्वेन आसां च कार आलोकरूपं द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति श्रुतेः यद्वा भक्तरक्षार्थं गरुडस्योपरि उपविष्ट इत्यर्थः न हि देहस्थत्वात् भक्तरक्षणा
गं॰१ अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पंचदशारमाशु त्रिणाभि विद्युच्चलमष्टनेमि यदक्ष
माहुस्तमृतं प्रपद्ये २८ यएकवर्णं तमसः परं तदलोकमव्यक्तमनंतपारं आसां चकारो
पसुपर्णमेनमुपासते योगरथेन धीराः २९ न यस्य कश्चातितितर्ति मायां यया जनो
मुह्यति वेद नार्थं तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरंतं ३० श्रीराम
टी॰१ दिक्रियावेशात् जीवसाम्यं स्यात् तत्राह एकवर्णं ज्ञानैकस्वरूपं तमसः प्रकृतेः परं अलोकं अ
दृश्यं अव्यक्तं निर्विकल्पं अनंतपारं कालतो देशतश्चापरिच्छिन्नं तत्तु अक्षेवयः अप्रच्युतस्वरूप
त्वात् न जीवसाम्यं तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति विशेषश्रवणादित्यर्थः
यं॰२ अतएव धीराः योगेन रथेन प्राप्तिसाधनेनोपासते भजंते तं नमाम इत्युत्तरेणान्वयः २९ मायानि
यंतृत्वेनापि जीवसाम्यं परिहरन्नचरितं तमाह यस्य मायां कश्चन कश्चिदपि नातितर्ति तर्निना
तिक्रामति कथं भूतां जनो यया मुह्यति अर्थमात्मस्वरूपं न तु वेद। निर्जिताः आत्माः आत्मशक्तिमाया

भा०ञ्मा० अर्थनवेदेनियदुक्तंतत्प्रपंचयन्नाह इमेवयंदेवाऋषयश्चयस्यप्रियपानत्वासेवेनैवसृष्टाअपिवहिश्चानुश्च
सत्नाप्रकाशाभ्यामाविः प्रकटमपिसूक्ष्मांगतिंनिरुपाधिस्वरूपंनविद्मः इतरप्रधानारजस्तमोमयाः कुतो
विदुः तेनमाभेत्तिपूर्ववेणवान्वयः ३१ इदानींविराजरूपेणास्तावन्नार्थयतेपादोमहीतित्रिभिः यत्रमेलो
ना० जरायुजादिभूतसर्गः सामहीयस्यपादोसः नः प्रसीदतु आत्मतत्रः पदादिमत्वेऽपिनतत्परंतत्र कुतो

इमेवयंयत्प्रियंयैवतत्वासत्वेनसृष्टावहिरंतराविः गतिनसूक्ष्मामृषयश्चविद्महेकुतोऽसु
राद्याइतरप्रधानाः ३१ पादोमहीयंस्वकृतेनवयस्यचतुर्विधोयत्रहिभूतसर्गः सवेमहा
पुरुषआत्मतंत्रः प्रसीदतांब्रह्ममहाविभूतिः ३२ अंभस्कायंद्रतउदारवीर्यंसिध्यंति
जीवंत्युतवर्द्धमानाः लोकास्त्रयोऽथारिवल्लोकपालाः प्रसीदतांब्रह्ममहाविभूतिः ३३
१२ सोमंमनोयस्यसमामनंतिदिवौकसांवैबलमंधआयुः ईशोनगानांप्रजनः प्रजानां दाजानः२
प्रसीदतांनःसमहाविभूतिः ३४ अग्निर्मुखंयस्यतुजातवेदाजातःक्रियाकांडनिमित्तजन्मा"
अंतःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतांनःसमहाविभूतिः ३५ श्रीराम श्रीराम श्री

ब्रह्मअप्रच्युतब्रह्मरूपः ततुकुतः महतीविभूतिरेश्वर्यंयस्यसः ३२ उदारंवीर्यंशक्तिर्यस्यतदंभोयस्यरेतः सनः राम
प्रसीदतुउदारवीर्यताामाहायत्तोऽभ्भसोलोकादयः सिध्यंतिजायंते ३३ यः सोमोदेवानामंधः अन्नंअतएव स२ १२
बलमायुश्च नगानांवृक्षाणांप्रकर्षेणजनयतिवर्द्धयतीतिप्रजनः तंयस्यमनः समामनंतिप्रसीदतु ४
अग्निर्यस्यमुखंजातः कथंभूतः जातवेदाधनंयस्मात् क्रियाकांडतत्प्रतिपाद्यंकर्मतन्निमित्तजन्मयस्य
अंतःसमुद्रेउदरमध्येस्वधातूनपाकाहारान्नेवान्नादीन् अप्रसिद्धसमुद्रेपिवाडवरूपेणोदकान्यवानुपचन्नग्निः ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एष तरणिर्यस्य चक्षुरासीत् कथंभूतः देवयानं अर्चिरादिमार्गदेवता त्रयीमयः सेयात्रय्येव विद्या तन्मयेति
श्रुतेः ब्रह्मणो धिष्ण्यमुपासनास्थानं य एषोऽन्तरादित्ये हिरण्मयः पुरुष इति श्रुतेः मुक्तेर्द्वारं देवयानत्वात् अमृतं च पुण्यलोकत्वात्
मृत्युश्च कालात्मकत्वात् एवंभूतस्तरणिर्यस्य चक्षुरासीत् ३६ कथंभूतो वायुः चराचराणां सह आदिधर्मवा
न्प्राणः यं प्राणं वयं चक्षुराद्यधिष्ठातारो देवाः सम्राजं भृत्या इव अन्वास्म अनुसृत्य स्थिताः एवंभूतो वायुर्य

यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यं द्वारं च मुक्तेरमृतं च मृत्युः प्रसीद
तां नः स महाविभूतिः ३६ प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः अन्वा
स्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ३७ श्रोत्राद्दिशो यस्य हृदश्च खानि
प्रजज्ञिरे खं पुरुषस्य नाभ्याः प्राणेंद्रियात्मासुशरीरकेतः प्रसीदतां नः स महाविभूतिः ३८ ब
लान्महेंद्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिंचः खेभ्यश्च छंदांस्यृषयो मेढ्र
तः कः प्रसीदतां नः स महाविभूतिः ३९ श्रीर्वक्षसः पितरश्छाययासन् धर्मः स्तनादितरः
पृष्ठतोऽभूत् द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात्प्रसीदतां नः स महाविभूतिः ४० विप्रो मुखं ब्र
ह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ऊर्वोर्विडोजोंऽघ्रिरवेदशूद्रौ प्रसीदतां नः
स महाविभूतिः ४१

स्य प्राणादभूत् ३७ खानि देहगतानि छिद्राणि प्राणः पंचवृत्तिः इंद्रियाणि च आत्मा मनश्च असवो नागकू
र्मादयः शरीरं च तेषां केतः आश्रयभूतः खं यस्य पुरुषस्य नाभ्याः प्रजज्ञे सः ३८ यस्य बलान्महेंद्रो जज्ञे खेभ्यो
मिश्रषयश्च खेभ्यः कः प्रजापतिः ३९ इतरः अधर्मः ४० विट् वैश्यः ओजः नैपुण्यं तस्य पृष्ठत इति अङ्घ्रिः अ
ङ्घ्रिजा विप्रर्थः अवेदो वेदव्यतिरिक्तः शुश्रूषाद्यतिः तद्वृत्तिमान् शूद्रः स पादगतः सुगमं ४१

अवेदस्मृतौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपरितनरोष्ठात् नस्तः नासिकातो धृतिः कांतिः पशव्यः पशूनां हितः कामः स्पर्शेनाभूत् ४२ द्रव्यं भूतानि व
यः कालविशेषं लौकिकं प्रपंचं यद्यस्मान् दुर्विभाव्यं कुतः प्रबुधापबाधं विद्वद्भिरपोह्यमानं पाठांत
नो२ रे प्रबुधानां मायेत्यर्थं धाय स्मिन्नित्यर्थः ४३ तेदेवं सप्रपंचमुपवर्ण्य नितः प्रपंचमुपवर्णयन् प्रणमति नमोस्त्विति
वृत्तिभिर्दर्शनादिभिः नभस्वान्वायुः तस्यवदूतिर्लीलायस्य तस्मै ४४ तेसस्मितं मुखांबुजं दिदृक्ष

१३ लोभोऽधराद्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेनकामः भ्रुवोर्यमः भ्रुवोर्यमः
पक्ष्मभवस्तुकालः प्रसीदतांनः समहाविभूतिः ४२ द्रव्यंवयः कर्मगुणान्विशेषं यद्योग
२२ मायाविहितान्वदंति यद्दुर्विभाव्यंप्रबुधापबाधं प्रसीदतांनः समहाविभूतिः ४३ नमो
स्तुतस्मा उपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने गुणेषुमायारचितेषुवृत्तिभिर्न
सज्जमानाय नभस्वदूतये ४४ सत्वंनोदर्शयात्मानमस्मत्करणगोचरं प्रपन्नानां दिदृ
क्षूणां सस्मितंतेमुखांबुजं ४५ तैस्तैः स्वेच्छाभूतैरूपैः कालेकालेस्वयंविभो कर्मदुर्वि
षहंयन्नो भगवांस्तत्करोतिहि ४६ क्लेशभूर्य्यल्पसाराणिकर्माणिविफलानिवा देहिनांवि
र्य षयार्त्तानां नतथैवार्पितंत्वयि ४७

णां नोस्मच्चक्षुरादिकरणगोचरं यथाभवत्येवं चात्मानं दर्शय ४५ भक्तेच्छानुवर्तित्वं चतत्रवबहुशोदृ
ग२ ष्टमेवेत्याह तैस्तैरिति यन्नो दुर्विषहमशक्यं कर्म तत्कृत्वा स्वयमेव करोति ४६ नचवहिर्मुखानामिव राम १३
विकल्पानामस्माकं त्वय्यर्पितानि पूर्वपुण्यानि विपरीतफलानि भवितुमर्हंतीत्याह क्लेशभूरि
येषु अल्पसारं फलं येषु यद्वाविफलान्येव सकामानां कर्माणि त्वय्यर्पितेतु नतथा ४७ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीः

महानामलोपेन तत्त्वैव फलमुपपादयति अवमः अल्पापि कर्मकल्पः कर्माभासोपि ईश्वरार्पितः अविफलाय
अमायनकल्पते हि यस्मात् स एव ईश्वरः पुरुषस्यात्मा अत्यावेदयितो हितः आनाय्यत्मनि दयितो हितत्वा
पितं निःफलं स्यात् ४८ अनंतफलत्वमाह यथाहि मूलावसेचनं स्कंधानां शाखानां च भवति ४९ एवं
तर १ सत्यपि दर्पितकर्मणां त्वद्भक्तानामस्माकं यन्निमित्तं इदं दुःखमिति तमेव वृत्त्या शयनाह नमइति
दुर्वितर्क्यात्मकर्मणे स्वभावचेष्टितानियत्यैतस्मै ५० अष्टमे पंचमः षष्ठे पुनस्तु तिर्विष्णावावि

नावमः कर्मकल्पोपि विफलायेश्वरार्पितः कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः ४८
यथाहि स्कंधशाखानां तरोर्मूलावसेचनं एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ४९
नमस्तेभ्यमनंताय दुर्वितर्क्यात्मकर्मणे निर्गुणाय गुणेशाय सत्त्वस्थाय च सांप्रतं ५० इ
ति श्रीभागवते महापुराणे अष्टमस्कंधे अमृतमथनारंभो नाम पंचमोऽध्यायः श्रीशुक उ
वाच एवं स्तुतः सुरगणैर्भगवान् हरिरीश्वरः तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः
१ तेनैव सहसा सर्वे देवाः प्रतिहतेक्षणाः नापश्यन्खं दिशः क्षौणीमात्मानं च कुतो विभुं २
विरिंच्यो भगवान्दृष्ट्वा सह शर्वेण तां तनुं स्वच्छां मरकतश्यामां कंजगर्भारुणेक्षणां ३ तप्त
हेमावदातेन लसत्कौशेयवाससा प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवम् ४

षष्ठे तु सुरैः स्तुतः तन्मंत्राद्यासुरैः साकं अमृतार्थमुद्योगमः सहस्रार्काणामुदय इव द्युतिर्यस्य १ सहसा तेजसा वध्रूति १
प्रतिहतानीक्षणानि चक्षूंषि येषां २ तामाविर्भूतां तनुं विरिंच्यो दृष्ट्वा तुष्टाव इति पंचमेनान्वयः कंज
गर्भवदरुणे ईक्षणे यस्याः ३ तप्तहेमवदवदातेन पीतेन लसता कौशेयवाससा युक्तां प्रसन्नानि चारू
णि सर्वाणि अंगानि यस्याः शोभनं मुखं यस्याः सुंदरे भ्रुवौ यस्याः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०अ० महांतो मणयो यस्मिन् तेन किरीटेन कर्णाभरणे कुंडले ताभ्यां निर्भाते ये कपोले ताभ्यां श्रीमुखांबुजं यस्य ॥५
कौस्तुभमत्र आभरणं कंठे यस्य॥ लक्ष्मीं वक्षसि बिभ्रती ॥६ देवप्रवरो ब्रह्मा सर्वांगैरवनिंगतैः साष्टांगप्रणतैः॥ अनावि[?]रा
विरासयंनाभ्रुताभ्र दितिब्रुवन् ब्रह्माभिप्रेति नित्यत्वविभुत्व भगवच्चनो॥ ७ श्रीमत्तैरयमाविर्भाव एव न त्वस्मद कृ.त.२
दिवज्जन्मादिति एवी भोत्याह नजातं जन्मादयो यस्य कुतः॥ अगुणाय श्रीतो निर्वाणसुखस्यार्णवाय अपा
रमोक्षसुखरूपायेत्यर्थः॥ तथापि अणोरप्याणिम्ने अतिसूक्ष्माय। दुर्ज्ञानत्वात् वस्तुतस्तु अपरिगण्यंइ

महामणिकिरीटेन केयूराभ्यां च भूषितं। कर्णाभरणनिर्भातकपोलश्रीमुखांबुजं ५ कौ
१४ चीकलापवलयहारनूपुरशोभितं। कौस्तुभाभरणा लक्ष्मीविभ्रती वनमालिनी ६ सु
दर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासितं। तुष्टाव देवप्रवरः सशर्वः पुरुषं परं सर्वामर
गणैः साकं सर्वांगैरवनिंगतैः ७ ब्रह्मोवाच अजातजन्मस्थितिसंयमायाऽगुणाय नि
र्वाणसुखार्णवाय अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ७ रू
पं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण योगेन धातः सह नस्त्रिलोकान् पश्या
म्यमुष्मिन्नु ह विश्वमूर्तौ ८

इयत्तातीतं धाम मूर्तिर्यस्य तस्मै नचैतत्संभावितं यतः॥ महानचिंत्योऽनुभावो यस्य ७ तन्मूर्तेः॥ सना राम
तनत्वमपरिमेयत्वं चोपपादयति रूपमिति हे पुरुषर्षभ हे धातः॥ एतत्तव रूपं वैदिकेन तांत्रिकेण च यो १४
गेन उपायेन श्रेयोर्थिभिः सदा इज्यं पूज्यं अतोनादिमिदानीमपूर्वं जातमिति भावः॥ ननु यूयं देवाः॥ प्र
श्वरोऽवतु २३ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः क्रीडंतं पातु गोविंदः शयानं पातु माधवः २५ व्रजंतम
व्याद्वैकुंठ आसीनं त्वां श्रियः पतिः भुंजानं यज्ञभुक् पातु सर्वग्रहभयंकरः २६ डाकिन्यो यातुधान्यश्च कूष्मां
डा येऽर्भकग्रहाः भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः २७ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः उ
न्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः २८ स्वप्नदृष्टा महोत्पाता वृद्धा बालग्रहाश्च ये सर्वे नश्यंतु ते विष्णोर्नाम
ग्रहणभीरवः २९ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं पाययित्वा स्तनं माता सन्यवेशयदात्मजं ३०
तावन्नंदादयो गोपा मथुराया व्रजं गताः विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ३१ नूनं बतर्षिः संजातो
वै योगेशो वा समास सः स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः ३२ कलेवरं परशुभिश्छित्वा तत्ते व्रजौकसः
नं१ धि१ दूरे क्षिप्त्वावयवशो न्यदहन् काष्ठवेष्टितं ३३ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः उत्थितः कृष्णनिर्भुक्तसप
द्याहतपाप्मनः ३४

ति आत्मानमहंकारं सन्यवेशयत् ३० शाययामास विस्मयमेवाह नूनमिति ३१ बत विस्म
ये सांप्रतं सऋषिस्तपः प्रभावात् योगेशो ज्ञानी वा सम्यगास यतः स एव दृष्ट इति विस्मयांतरमाह ३१ दह्यमानस्येति कृष्णेन निर्भु
क्तः अत एव सपद्याहतः पाप्मा यस्य ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पु॰ प्रसंगात्तुकेमुत्यन्यायेन भक्तिर्वे भवमाह पूतनेति श्रद्धयाऽस्ति केयन भक्त्या पंस्ताः कोः स्निग्धाः तन्मातरइति वत्साहरणलीलाभिप्रायेण
का बहुवचने गावो गोपिस्त्रदामातरो भवन्निति एतत्पूतनामोक्षणं स्वः स्वर्गं गायतइति स्वर्गः मोक्षः यो मर्त्यः सः प्राणिमात्रमित्यर्थः

पूतनालोकबालघ्नी राक्षसी रुधिराशना जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ३५ किंपुनः श्रद्धया भक्त्या
कृष्णाय परमात्मने यच्छन्प्रियतमं किंनु रक्तास्तन्मातरो यथा ३६ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवं
दितैः अंगं यस्याः समाक्रम्य भगवानपि बत्स्तनं ३७ यातुधान्यपि सा स्वर्गमवापजननीगतिं कृष्णभुक्त
स्तनक्षीराः किमु गावोनु मातरः ३८ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रः कै
१० वल्याद्यखिलप्रदः ३९ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं नपुनः कल्पते राजन्संसारोऽज्ञानसं
५ भवः ४० कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः किमिदं कुत एवेति वदंतो व्रजमाययुः ४१ तेतत्र ६१
२९ वर्णितं गोपैः पूतनागमनादिकं श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ४२ नंदः स्वपु
त्रमादाय प्रेत्यागतमुदारधीः मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ४३ य एतत्पूतनामोक्षं कृ
ष्णस्यार्भकमद्भुतं शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं ४४ इति श्रीभागवते महापुराणे दशम राम

का आर्भकैश्चर्भकचरितं किंतत्पूतनामोक्षमिति श्रुत्वा दैत्यकुलानीशः पूतनायाः शिशुकृत्वात् स्तन्यापोशनतः प्राणैः प्राणाहुति १०
मकल्पयत् ४४ इति दशमे षष्ठः उत्क्षिपन् शकटं व्योम्नि तृणावर्तमधि क्षिपन् विश्वमास्ये च कृष्णः क्रीडति सप्तमे १ ॥
दर्शयन्

ड्स्मार्भकसुधासिंधुसंप्लवानंदनिर्भरः भूयस्तदेवसंपृष्टुराजा न्यस्तदभिनंदति २ येनयेनेति येनयेनभक्तस्यावतारेणापियानियानिकर्माणि
भाति २ करोतिनिः कर्णसुखावहानिमनः प्रीतिकराणिच भवंत्येव तथापियच्छृण्वतः पुंसः पुमात्रस्य अरतिर्मनोग्लानिः १ तन्मूलभूताविं
विधात्यस्मात्तत्र अपगच्छति तथासत्वशुद्धिः हरिभक्तिर्हरिदाससख्यानि च भवंति तदेव हारं हरेअरिति मनोहरं वा वदानुग्रहं यदि

श्रीराजोवाच येनयेनावतारेण भगवान् हरिरीश्वरः करोतिकर्णरम्याणि मनोज्ञानि च नः प्रभो १ यच्छृण्वतोऽपैत्य
रतिर्वितृष्णा सत्वं च शुद्ध्यत्यचिरेण पुंसः भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् २ अथान्यदपि
कृष्णस्य तोकाचरितमद्भुतं मानुषं लोकमासाद्य तज्जातिमनुरुंधतः ३ श्रीशुक उवाच कदाचिदौत्थानि
ककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषितां वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती ४
नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्रा
क्षमसीशयच्छनैः ५ उत्थानिकौत्सुक्यमना मनस्विनी समागतान् पूजयती व्रजौकसः नैवाशृणोद्वै रुदितं
सुतस्य सा रुदन् स्तनार्थी चरणावुदक्षिपत् ६

अति १ करोषीति ३ उत्सुक्येन पुनर्विशिनष्टि अथेति अनुरुंधतः अनुकुर्वतः उत्थापनं शिशोरंगपरिवर्तनं तत्र करणीये कौतुकाप्लवे उ
त्सवाभिषेकः तस्मिन्नेव दिने जन्मर्क्षस्यापि योगे अतिमहोत्सवे समवेतयोषितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः शोभि
तं तथा यो मभिषेचनं यशोदा चकार अन्नादिभिः सुपूजितैः विप्रैः कृतमंगलं संजातनिद्रं अक्षिणी यस्य तं अशीशयत् शा
यितवती शकटस्याधस्तात् प्रखे उदक्षिपत् उर्ध्वं चालितवान् ६ राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पू०

तदाऽधः शयानस्य शिशोरल्पके [illegible] आसौ प्रवालवत् मृदुनी अंघ्री ताभ्यां हतं शकटं व्यवर्त्तत विपरीतमपतत् कथंविधं ध्वस्तानि रसवंती कुप्यभाजनानि स्वर्णरजतातिरिक्तकांस्यादिमयानि यथा भवंति तथा चक्रे च अक्षश्च चक्राक्षौ व्यत्यस्तौ अक्राक्षाय स्मिन् विभिन्नः कूबरो युगंधरो यस्मिन् तच्च तत् च यथा भवति तथा व्यवर्त्तत ७ अद्भुतदर्शनेन आकुला बभूवुः तदेवाह कथमिति विपर्यगात् वि

अधः शयानस्य शिशोरथाल्पकप्रवालमृद्वंघ्रिहतं व्यवर्त्तत विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्ष विभिन्नकूबरं ७ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रियः औत्थानिके कर्मणि याः समागताः नंदादयश्चाद्भुत दर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ८ इति ब्रुवंतोति विषाद मोहिता जनाः समंतात् परिव ब्रुरात्तेवत् ऊचुरव्यवसितमतीन् गोपान् गोपीश्च बालकाः रुदतानेन पादेन क्षिप्तमेतन्न संशयः ९ न ते श्रद्दधिरे गोपा बालभाषितमित्युत अप्रमेयं बलं तस्य बालकस्य न ते विदुः १० रुदंतं सुतमादाय यशोदा ग्रहशंकिता कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ११ पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदं विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः १२ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः न तेषां सत्यशीलानामाशिषो विफलाः कृताः १३

परीतमपतदिति च ८ न शद्दधिरे विश्वासं न जग्मुः उत अपि बालस्यैतन्न संभवति एते तु बालाः किं जानंतीति १० रक्षोघ्नैः सूक्तैः स्तनं ११ भगवत्प्रभावानभिज्ञा विप्रं चाष्टितं विडंबयन्नाह पूर्ववदित्यादिना बलिभिः शक्तैः यद्वा अष्टदिक्षु बलिभिः सहितं सपरिकरं यथापूर्वं स्थापितं विप्रा दध्यादिभिर्रर्चयामासुः हुत्वा ग्रहादिहोमं विधाय १२ असूया गुणेषु दोषाविःकरणं ईर्ष्या असहनं तेषामाशिषः कृताः नो प्रयुक्ताः १३

२१

इति एवमभिप्रेत्य। सामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः पवित्राश्च ओषधयो यासु तासु जलेषु पूतैः स्नात्वा द्विजोत्तमैः कर्तृभिरभिषिच्य अभिषेकं कारयित्वा २४ हुत्वा हावयित्वा २५ गावः गाः अप्रादात् अन्वयुंजत आशिषो युयुजुः २६ तास्तथैव बभूवुरित्यर्थः २७ उत क्षिप्य मृदुपादेन शकटं चोत्क्षिप्य लीलया। तृणावर्तेन पदा पीड्य भुव्यपातयदर्भकः १ आरोहमुत्संगं १९ तृणावर्तो त्वमत्यपरिहाराय कृष्णेनैव।

इति बालकमादाय सामर्ग्यजुरुपाकृतैः। जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः १४ वाचयित्वा स्वस्त्ययनं नंदगोपः समाहितः। हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं १५ गावः सर्वगुणोपेता वासः स्रग्रुक्ममालिनीः। आत्मजाभ्युदयार्थाय प्रादात्तेन्वचोयुंजत ।।१६ विप्रा मंत्रविदो युक्तास्तैर्याः प्रोक्तास्तथाशिषः।। ता निष्फला भविष्यंति न कदाचिदपि स्फुटं १७ एकदारोहमारूढं लालयंती सुतं सती गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् १८ भूमौ निधाय तं गोपी विस्मिता भारपीडिता महापुरुषमादध्यौ जगतामास कर्मसु १९ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रचोदितः चक्रवातस्वरूपेण जहारासीनमर्भकं २० गोकुलं सर्वमावृण्वन् मुष्णंश्चक्षूंषि रेणुभिः ईरयन् सुमहाघोरशब्देन प्रदिशो दिशः २१ मुहूर्तमभवद्गोष्ठं रजसा तमसावृतं
स्वयं १ सुतं यशोदा नापश्यत्तस्मिन्न्यस्तवती यतः २२ नापश्यत्कश्चनात्मानं परं चापि विमोहितः तृणावर्तनि ५२

त्मानउत्संगादुत्तारयत्विति कृतं भारमजानती उत्पातशंकया महापुरुषमादध्यौ श्रीकृष्णमादरवन्निनां जगतां भारेण पीडिता विस्मिता च सती यद्वा जगतामधीक मर्मसु आसवं भवनं तु जगद्गुरुं वेदेत्यर्थः १९ २० ईरयन्निनादयन्नित्यर्थः २१ यतः यत्र न्यस्तवती तस्मिन् स्थाने नापश्यत् २२ २३ सर्वं गोकुलं रेणुभिरावृण्वन् अर्भकं जहार १

जगद्गुरुं १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पु॰ खरपवनचक्रात् पांशुवर्षे सति १४ उपारतः पांशुवर्षस्य वेगो यस्मिन् तथाभूते पवने सति तत्र तस्या रुदितमनुनिशम्य गोप्यो रुरुदुः
२५ वात्याचक्रवातः तद्रूपधरः कृष्णं हरन् शांतरयः कथंचिन्नभोगतः ततः परं गंतुं नाशक्नोदित्यर्थः गुरुमत्तया अतिगौरवेण तेन तथा
अश्मानं अश्मवंतं पर्वतप्रायं मन्यमानस्तेनैव आत्मनो गले गृहीतः तत्यक्तुमिच्छन्नपि नाशक्नोदित्यर्थः २७ २९ तस्योरसि लं

इति खरपवनचक्रपांशुवर्षे सुतपदवीमबलाऽविलक्ष्यमाणा अतिकरुणमनुस्मरंत्यशोचद्भुवि पतिता मृतव
त्सका यथा गौः २४ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः रुरुदुरनुपलभ्य नंदसूनुं
पवन उपारतपांसुवर्षवेगे २५ तृणावर्तः शांतरयो वात्यारूपधरो हरन् कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभार
२ भृत् २६ तमश्मानं मन्यमान आत्मनो गुरुमत्तया गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं २७ गलग्रहण
२२ निश्चेष्टो दैत्यो निर्गतलोचनः अव्यक्तरावो न्यपतत्सह बालो व्यसुर्व्रजे २८ तमंतरिक्षात्पतितं शिलायां विशी
र्णसर्वावयवं करालं पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः २९ आदाय मात्रे प्रतिहृत्य विस्मि प्रतिहृत्य
ताः कृष्णं च तस्योरसि लंबमानं तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तं ३० गोप्यश्च गोपाः
पुनः किल नंदमुख्या लब्ध्वा प्रापुरतीव मोदं अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः हिंस्रः
स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ३१

प्रतिहृत्य बमानं कृष्णमादाय मात्रे प्रतिहृत्य समर्प्य विस्मिता अभवन् बभूवुरित्यर्थः विहायसा गगनमार्गेण पुरुषादेन नीतं तथापि मृत्युमुखात्प्रमुक्तं राम
३० पुनर्लब्ध्वा मोदं प्रापुरिति परस्परं हर्षकथामाहुः अहो बतेति निवृत्तिं गमितः मृत्युं प्रापितः कोऽत्र विस्मयः युज्यत एवैतदिति त २२
द्विवेकिनो आहुः ३ हिंस्र इति ३१

२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ यदूनामपृथग्भावात् कुतश्चिद्द्वैविध्यप्रतिपद्यमानानां यदूनामपृथग्भावात् भावो भावनं तस्मात् अन्योन्यशिक्षया सर्वैकमत्यकारणा
दित्यर्थः सम्यक्कर्षतीति एकीकरोतीति संकर्षणमुशंति मन्यंते वक्ष्यंतीत्यर्थः गर्भसंकर्षणं तु न प्रकाशयति १३ अस्य तव पुत्रस्य अतः श्री
कृष्ण इत्येकं नाम भविष्यति प्रागयमिति सामान्यतया ऋषिरयं जन्मांतरगतं नाम कथयतीति नंदो मन्यते स्म। अत एव वासुदेव इति

श्रीशुक उवाच एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् चकार नामकरणं गूढो रहसि बालयोः ११ अयं हि रोहि
णीपुत्रो रमयन् सुहृदो गुणैः आख्यास्यते राम इति बलाधिक्याद्बलं विदुः १२ यदूनामपृथग्भावात् संकर्षणमुश
न्त्युत आसन् वर्णास्त्रयो ह्यस्य गृह्णतोनुयुगं तनूः १३ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः प्रागयं वसु
देवस्य क्वचिज्जातस्तवात्मजः १४ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते बहूनि संति नामानि रूपाणि च
सुतस्य ते १५ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १६ एष वः श्रेय आधास्यद् गोपगोकुलनंदनः अनेन
सर्वदुर्गाणि यूयमंजस्तरिष्यथ १७ पुरानेन व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्द
स्यून् समेधिताः १८ य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः नारयोभिभवंत्येतान् विष्णुपक्षानिवासु
राः १९ तस्मान्नंदात्मजोयं ते नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः २० इत्यात्मा
नं समादिश्य गर्गे च स्वगृहं गते नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषां २१ श्रीराम श्रीराम श्रीराम

संप्रचक्षत इति १४ गुणानुरूपाणि ईश्वरः सर्वज्ञः इत्यादीनि कर्मानुरूपाणि गोवर्धनोद्धरण इत्यादीनि तानि सर्वाण्यहमपि नो वे
द जना अपि नो विदुरिति १५ १६ लौकिकफलमाह एष इति आधास्यत् आधास्यति १७ अनेन रक्ष्यमाणाः समेधिता अदस्यून् जिग्यु
रिति १८ १९ इति च आत्मानं श्रीकृष्णं वा आशिषां आशीर्भिः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पु॰ बालक्रीडाचमत्कारैः कृष्णरामौ रमणसंयुतौ परमानंदमाधत्त व्रजे नंदयशोदयोः १ पूर्णत्वमेव दर्शयन्नाह कालेनेति २ अनुकृष्य पुनः पुनराकृ
ष्य सरीसृपंतौ अतिशयेन चलंतौ कथं घोषः कटिपादभूषणकिंकिणीनां प्रघोषेण नादेन रुचिरं यथा तथा घोषाणां नादेन हृष्टम
नसौ ययोस्तौ लोके नत्र स्वतारं छंदं जनं अनुसृत्य त्रिचतुराणि पदानि अनुगम्य मुग्धवत् प्रभीतवत् मात्रोरंतिसमीपं तु उपेयतुः जग्मतुः
तदा च तन्मातरौ निजसुतौ दोर्भ्यामुपगूह्य प्रमोदं ययतुः कथंभूते घृणया कृपया स्नुवंत्यौ पयः पूर्णपयोधरे संतौ पंके नागरागेण च

कालेन व्रजताल्पेन गोकुले रामकेशवौ जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुः २२ तावंघ्रियुग्ममनुकृष्य सरीसृ
प्रघोष पंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः २३ तन्मातरौ
निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगूह्य दोर्भ्यां दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिता
२४ 28 ल्पदशनं ययतुः प्रमोदं २४ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः वत्सैरितस्त
त उभावपि कृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः २५ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडाप
रावतिचलौ स्वसुतौ निषेद्धुं गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थां २६ श्री

रुचिरौ कथंभूतं सुखं निरीक्ष्य मुग्धं मंदस्मितं यस्मिन् अल्पा दशना अथ स्मिन् तत्तथा तच्च २४ यर्हि अंगनानां दर्शनीयाः कुमार
वृ॰उ॰२ लीला ययोस्तथाभूतौ जातौ तदा अंतर्व्रजे स्यमध्ये तदबलाः व्रजांगनाः तौ प्रेक्षंत्यः प्रेक्षमाणा विस्मृतगृहकृत्याः हसंत्यः राम
जहृषुः कथंभूतौ ताभ्यां प्रगृहीता निपुच्छानि येषां तैर्वत्सैरितस्ततः अनुकृष्यमाणौ २५ अतिचपलौ शृंग्यादिभ्यो निषेद्धुं गृ २४
होचितानि कर्माणि च कर्तुं यत्र तदा तज्जनन्यौ न शेकातः तदा अलं मनसोऽनवस्थामापतुरिति गृहसौख्यस्य पराकाष्ठा दर्शिता २६ 28

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रजस्थाः गोप्यः आगत्य यशोदां प्रत्यूचुः तदेवाह।२

नीव१ पृथु१

२८ ऐं कृष्णचापल्यं चौर्यादिणि सहैवाखिलसखतः प्रजल्पन्त्यः समागत्य गोप्यो गोप्यो मुदं ददुः २९ असमये अदोहकाले क्रोशसंजातहासः स्ते न१
यं चौर्यार्जितं न तु दत्तं तत्रापि स्वादु नेतरत् दधिपयः स्वदधिपयः अत्ति किंच भोक्ष्यन् मर्कटान् प्रतिविभजत् ददाति तेषां मध्ये न प्रत्येन कोपि ना
२२ त्ति चेत् तर्हि भांडं भिनत्ति क्वचिद् द्रव्यस्य अलाभे सति सः गृहार्थं भक्ष्याभावे कुपितो याति यद्वा सगृहाः गृहिणस्तेभ्यः कुपितस्तोषां तोका
ले१ न् पर्यंकादिषु सुप्तान् प्रक्रोश्य रोदयित्वा यातीति ३० कल्पितैः स्तेययोगैरित्युक्तं प्रपंचयति हस्ताग्राह्य इति तुंगशिक्यस्थ भांडेषु अंतर्निहितेद

कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले अघृष्टजानुभिः पद्भिः विचक्रमतुरंजसा २७ ततस्तु भगवान् कृष्णो वय
स्यैर्व्रजबालकैः सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २८ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं शृण्वं
त्याः किल तन्मातुरिति होचुः समागताः २९ वत्सान्मुंचन् क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथद
धिपयः कल्पितैः स्तेययोगैः मर्कान् भोक्ष्यन् विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे सगृह कुपितो यात्युपक्रोश्य
तोकान् ३० हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैः छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ध्वांतागारे
२२ ले२ धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ३१ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वा यन१
स्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसित

ध्वांते वयुनं ज्ञानं यस्य सः छिद्रं रचयति निहितं छिद्ररचनावित् ध्वांतयुक्तगृहे स्वांगमेवार्थप्रदीपं विचेरयति विशेषतो धृतमणिगणं यर्हि यस्मि
प्योगृहका न्काले ३१ रेचोर इत्याद्युक्तः सन् उशति उज्ज्वलनिर्लेपमवचारः अहं गृहस्वामी स्यामिति धार्ष्ट्यानि प्रा[illegible]गल्भानि अथवा उशति भोक्तमेनी
त्व्यग्राश्चवं चयथोदे यद्वा उशति वास्तौ स्वचित्ते गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः ३२ तत्समीप
हेदा२ सुप्रतीकः साधुरिवास्ते सभयनयनेन यस्मिन् तच्च तत् श्रीयुक्तं मुखं तदालोकिनीभिः व्याख्यातार्था प्रख्यातजन्म फलाँ उपालब्धुं अक्षि

हे मातः वयं किं कुर्मः व्रजे स्थातुं गंतुं वा न पारयामः कुतः यदि गम्यते स्थानांतरं तर्हि नेननवपुः ... दृश्योपि वर्धियते यदि स्थीयते तर्हि गृहस्थानि करोति कर्तुं ... स्यं ते
हे सख्यः कुत्रास्ति अयं तत्समीपे उत्तरीयवस्त्रांतर्गतः सुप्रतीकः साधुरिवास्ते२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुमहरा १

भा०१० कदाचित्पराधीनरे उपालंभनतदां श्रयं भक्ष्दिति कथयन्नाह एकदेति ३२ उपालंभ्य निर्भर्त्स्य भयेन संभ्रान्तप्रेक्षणेन चपलनिरीक्षणेन अक्षि
णी यस्य तं ३३ अदांतात्मन् चपलगात्ररहः एकांते ३४ नाहं भक्षितवानिति नन हि वाहं किंचिन्मया भक्ष्यते मत्कुक्षावाराववं सर्वं मक्तीति भावः
उ०के०१ समक्षं प्रत्यक्षं ३५ व्यादेहि मुखं प्रसारयेति व्यादत्त प्रसारितवान् ३६ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श तत्प्रपंचयति जगत् जंगमं स्थास्नु
स्थावरं खं अंतरिक्षं लोकं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूलोके वायुः प्रवहः अग्निर्वैद्युतः इंदुश्च तारकाश्च तत्सहिते

एकदा क्रीडमानास्ते रामाद्या गोपदारकाः कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ३१ सा गृहीत्वा करे कृष्णमुपा
लभ्य हितैषिणी यशोदा भयसंभ्रान्तप्रेक्षणाक्षमभाषत ३२ कस्मान्मृदमदान्तात्मन् भवान्भक्षितवान् रहः वदं
ति तावका ह्येते कुमारास्ते ऽग्रजोप्ययं ३३ नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः यदि सत्यगिरस्तर्हि समक्षं पश्य मे
२८ मुखं ३४ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ३५ सा तत्र ददृ
शे विश्वं जगत्स्थास्नु च खं दिशः साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकं ३६ ज्योतिश्चक्रं जलं तेजो नभस्वा
न्वियदेव च वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ३७ एतद्विचित्रं सह जीवकालस्वभावकर्मा
नौल१ शयलिंगभेदं सूनोर्विवीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ३८ २८

३७ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवाः मन इति वैकारिकशब्दे न गृहीतमपि दं यं वेत्य क्षणात् पुनरुक्तं इंद्रियाणि तेजसानि मा
त्राः तामसाः शब्दादयः एवमेतद्विचित्रं विश्वं सह एकदेव वीक्ष्य शंकामाप इत्यन्वयः विचित्रतामाह जीवश्च गुणक्षोभकः कालश्च वा२
परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारः आशयश्च एते लिंगानां चराचरशरीरिणां भेदो यस्मिन् ततु तत्र व्रजं
च सहात्मानं स्वसहितं किंचिद्विक्ष्य सूनोस्तनोऽत्यंते विदारितास्य शंकामवाप ३८
स१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामाह किं स्वप्न इति परितो विलोक्याह नायं स्वप्नः नहि किं देवस्य हरेः माया तथा चेत् अन्ये किं न पश्यंति तर्हि किं वा मदीय एव कोपि बुद्धिमोहः विपर्यासः दर्पणे मुखवत् एवं तर्हि क्षेम्यापि कथमंतः प्रतीयेत अनर्वहिश्च एकरूपेण च कथं जगत् प्रतीयेत तथा सति विंवप्रतिविंवयोः खिवपरस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्यान्यथा वितर्कयति अथो इति अथवा ममामुष्यार्भकस्यापि सतः यः कश्चनाचिंत्य आत्मयोगः खीयमैश्वर्यमौत्पत्तिकः स्वभाविकः ४० चरमं पक्षमाश्रित्यायमीश्वर इति चेतः चित्तं चिन्तादिभिन्नं वितर्कगोचरं जगत् यदाश्रयं यद

किं स्वप्न एतदुत देवमाया किं वा मदीयो वत बुद्धिमोहः अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ४० अथो यथावन्न वितर्कगोचरं चेतोमनः कर्मवचोभिरंजसा यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ४१ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ४२ इत्थं विदिततत्वायां गोपिकायां स ईश्वरः वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ४३

धिष्ठानं येन कारणेनाधिष्ठित्रायतः बुद्धिवृत्त्यभिव्यक्तात् न त्विदमवितर्क्यं भवतु तत्पदं कीदृगत आह सुदुर्विभाव्यं इदमत्यंतमचिंत्यमित्यर्थः ४० एवं प्रपंचं प्रतीत्या नीतं तत्त्वं पुनर्जीवसंसृतिहेतुमायाश्रयत्वेनानुनयंत्याह अहमिति यशोदानामाहं असौ मम पतिः अमुष्य व्रजेश्वरस्याखिलवित्तपाधिष्ठात्री अहं सती जाया एष कृष्णः मे सुतः गोप्यादयश्च मदीया इत्थं कुमतिर्यन्माययाभूत् स मे शरणमिति ४२ वैष्णवीं स्वीयां ४३

भा॰प्र॰ प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पुरे वासीत् ४३ मायावलोद्रेकं त्रय्यति त्रय्यांइंद्रादिरूपेण उपनिषद्भिर्ब्रह्मेति सां ख्यैः पुरुषइ
तियोगैः परमात्मेति सात्वतैः भगवानिति उपगीयमानं माहात्म्यं यस्य तं ४४ अतिविस्मयेन पृच्छति नंदइति महोदयं महानुदयः उत्कर्षो यस्य
तत् ४५ ययोः प्रसन्नोवतीर्णः तौ पितरावपि यन्नान्वविंदतां न प्रापतुः तां तत्प्रसिद्धं उदारं महत् अर्भके हितं बाललीलां यच्च कवयो गा
यंति ४६ ॥

मघोनष्टस्थर्निर्गोपीसांरोप्यारोहमात्मजं प्रवृद्धस्नेहकलिलहृदयासीद्यथापुरा ४३ त्रय्या चोपनिषद्भिश्च सांख्ययो
गैश्च सात्वतैः उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ४४ राजोवाच नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयं
यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४५ पितरौ नान्वविंदेतां कृष्णोदारार्भकेहितं गायंत्यद्यापि कवयो यल्लो
२६ कशमलापहं ४६ श्रीशुक उवाच द्रोणो वसूनां प्रवरो धरया सह भार्यया करिष्यमाण आदेशान् ब्रह्मणस्तमु
वाचह ४७ जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ४८ अस्ति
अ२ त्युक्तः स भगवान् व्रजे द्रोणो महायशाः जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ४९ ततो भक्तिर्भगवति पु
२६ त्रीभूते जनार्दने दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५० कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः सह
रामो वसन् संचक्रे तेषां प्रीतिं स्वलीलया ५१ इति श्रीभागवते महापुराणे दशमस्कंधे विश्वरूपदर्शनो नामाष्ट
मोध्यायः श्रीराम

राम
यं ते तयोर्न्नाविंदत्स किं श्रेयो करोत् ४६ ब्रह्मण आदेशान् गोपालनादिलक्षणान् ४७-४८ स एव हं द्रोणो जज्ञे स च नंद इति ख्यातः २६
सा च धरा यशोदा भवत् ४९ गोपगोपीनामपि वक्तुः स्वभावादस्य एव भक्तिस्तयोः पुनः नितरामिति ५० स्वलीलया पुत्रभावा २६
नुकारिण्या ५१ इति दशमेऽष्टमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्मयमाप १७ १८ नन्वेवं स्वातंत्र्यभंग इत्याह एवं संदर्शितामिति सेश्वरमिदं
विश्वं यस्य वशे यदधीनमित्यर्थः १९ भगवत्प्रसादमन्येपि भक्ता लब्धवंतः इदं त्वतिचित्रमिति सरोमांचितमाह नेममि

यदासीत्तदपि न्यूनं तेनान्यदपि संदधे तदपि द्व्यंगुलं न्यूनं यद्यदादत्त बंधनं १६ एवं स्वगेहदामानि यशोदा
संदधत्यपि गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् १७ स्वमातुः स्विन्नगात्राया विस्रस्तकबर
स्रजः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने १८ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता स्ववशे
नापि कृष्णेन यस्येदं सेश्वरं वशे १९ नेमं विरिंच्यो न भवो न श्रीरप्यंगसंश्रया प्रसादं लेभिरे गोपीय
त्तत्प्राप विमुक्तिदात् २० नायं सुखापो भगवान् देहिनां गोपिकासुतः ज्ञानिनां चात्मभूतानां यथा भक्तिम
तामिह २१ कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ २२
पुरा नारदशापेन वृक्षतां प्रापितौ मदात् नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ २३ इति श्रीभा
गवते महापुराणे दशमस्कंधे गोपीप्रसादो नाम नवमोध्यायः ९

तिविरिंचः पुत्रोपि भवः स्वात्मापि श्रीर्जायापि २० फलितमाह नायमिति देहिनां देहाभिमानिनां तापसादीनां ज्ञा
निनां निरस्ताभिमानिनामपीति २१ भक्तेर्बद्धस्याप्यन्यमोचकत्वं वक्तुमाह कृष्णस्त्विति २२ २३ दशमे नवमः ॥ ९

आत्मएव योन स्वरणसाधनं येषां तेषां न सुखापः यथा भक्तानां सुखापः १

भा·पू· दशमे पानादिदृग्नग्नौ नरायमलार्जुनौ तत्र ताभ्यां चेरवाभ्यां कृष्णस्तत उद्धार्यते १ यद्विगर्हितं कर्म येन वा देवर्षेर्भगवतो नमस्या पितमः १ क्रोध
संरंभतत्कथ्यतामिति २ ३ गंगायाः अन्तर्मध्ये कथंभूते भोजानां वनानि तेषां राजयस्ता विद्यंते यस्मिन् ४ अपश्यद्दृष्ट्वा च क्षीबाणौ मत्तौ
समबुध्यत ५ कुचेइस्यत आह आदतोद्दृष्ट्वेति ६ अनुग्रहार्थाय अनुग्रहश्च मदनाशः अथ श्रीकृष्णदर्शनं तदर्थं ७ इदं वक्ष्यमा

राजोवाच कथ्यतां भगवन्नेतत्तयोः शापस्य कारणं यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः श्रीशुक उवाच रुद्रस्यानु
चरौ भूत्वा सुदृप्तौ धनदात्मजौ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ २ वारुणीं मदिरां पीत्वा मदाघूर्णितलो
चनौ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ३ अंतः प्रविश्य गंगायामंभोजवनराजिनि चिक्रीडतुर्युवतिभि
र्गजाविव करेणुभिः ४ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ५ तं
दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिताः वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ६ तौ दृष्ट्वा मदि
रामत्तौ श्रीमदांधौ सुरात्मजौ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ७ नारद उवाच न ह्यन्यो जुषतो जो
ष्यान् बुद्धिभ्रंशो रजोगुणः श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ८ हन्यंते पशवो यत्र निर्दयैरजिता
त्मभिः मन्यमानैरिमं देहमजरामृत्यु नश्वरं ९

णं न ह्यन्य इत्यादि जोष्यान् प्रियान् विषयान् जुषतः सेवमानस्य पुंसः श्रीमदादन्यः अभिजात्यादिः सत्कुलविद्यादिजनि
तो मदः अन्यो वा रजोगुणः रजःकार्यहास्यहर्षादिरूपः न हि तथा बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा किंतु श्रीमद एवे
ति तदाह यत्रेत्यादिचतुर्भिः यत्र श्रीमदे ८ इमं नश्वरं देहं अजरामृत्यु अजरश्च अमृत्युश्च यथा तथा मन्यमानैः ९

वे८२ नरदेवभूदेवसंज्ञितमपिश्वादिभिर्भक्षितेविट्संज्ञितंदग्धंभस्मसंज्ञितंअन्यदाकृमिसंज्ञितंतस्यते तदर्थंयोभूतध्रुक् द्रोग्धा ततो भूतद्रोहान्नि
रयो भवति स किं स्वार्थं वेदवेत्त्यर्थः १० निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे ११ अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्तस्मिन्नेवा
पर्यायस्तं आत्मसात् कृत्वा आत्मेति मत्वा अत्र सुतः मूढात् ऋते १२ एवं श्रीमदचेष्टितमुक्त्वा तत्प्रतीकारं निश्चिनोति असत इति परं श्रेष्ठमंजनं दृष्टिप्रदं
दारिद्र्यमेव केवलमिति वा कुत इत्यत आह आत्मौपम्येनेति तेनानद्रुह्यतीति भावः १३ सदृष्टान्तमाह यथेति मुखम्लान्यादिभिर्लिंगैः सर्वे भांजीवा

देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितं भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः १० देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव
च मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोपि वा ११ एवं साधारणं देहमव्यक्तप्रभवाप्ययं को विद्वानात्मसात्कृत्वा हन्ति जन्तू
नृतेऽसतः १२ असतः श्रीमदांधस्य दारिद्र्यं परमंजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते १३ यथा कंटकविद्धां
गो जंतोर्नेच्छति तां व्यथां जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४ दरिद्रो निरहंस्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं
यदृच्छयाप्नोति तद्धि तस्य परं तपः १५ नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंति हिंसापि विनि
वर्तते १६ दरिद्रस्यैव युज्यंते साधवः समदर्शिनः सद्भिः क्षिणोति तं तर्षं तत आराद्विशुद्ध्यति १७ साधूनां समचित्तानां मु ५५२
कुंदचरणैषिणां उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः १८ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः तमोमदं
हरिष्यामि स्त्रैणयोरजितात्मनोः १९ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ न विवाससमात्मानं विजानीतः सु
दुर्मदौ २०

टिं.२१ नां सुखदुःखे समे इति ज्ञातवानिति अर्थः १४ दारिद्र्यं मोक्षमपि साधयतीत्याह श्लोकद्वयेन निरहंस्तंभो निर्गतः अ
हंकाररूपः स्तंभो यस्मात् सः १५ १६ युज्यंते स्वत एव संगच्छंते तर्षं तृष्णां १७ ननु साधूनां धनिक एव प्रियः स्यान्न दरिद्र इति
तत्राह साधूनामिति धनेन स्तंभो गर्वो येषां तैः १८ तमोमदं अज्ञानकृतं मदं १९ तमः प्लुतौ तमो व्याप्तौ २० आराम

जीवसाम्यं गतः सन् तां व्यथां स अन्यस्य नेच्छति साधवः दरिद्रस्यैव २ तैः सद्भिर्निमित्तभूतैस्तं तर्षं तृष्णां क्षिणोति क्षीणां करोति २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शपतिस्म अर्होत इति । अनुगृह्णाति स्यातां नैवमित्यादिना मत्प्रसादेन स्मृतिः स्यात् २१ स्वर्लोकगतां देवत्वं पुनस्तयोरत्रास्मिन्मदनुग्रहा
ल्लब्धभक्ती भविष्यत इति २२ प्रस्तुतमाह अथेति २३ किमिति सत्यं कर्तव्यं तत्राह देवर्षिरिति यतः पूज्यतमः २४ यमयोर्यमलयो
रात्मनः श्रीकृष्णस्य तन्मध्यप्रवेशमात्रेण २५ अनुअंचतीति अन्वक् अन्तेहेतुः दामोदरेणेति उलूखलेन उत्पाटितस्त्र्यग्रिवं धाम्
वि० २ लवं धार्ययोस्तौ परमस्य श्रीकृष्णस्य अक्रमितविक्रमस्तेन अतिवपः कंपायिपुत्ते स्कंधप्रवालविटपायपोस्तौ २७ ककुभः प्रतिसे

अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः । स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् २१ वासुदेवस्य सांनिध्यं लब्ध्वा
दिव्यशरच्छतं वृत्ते स्वर्लोकतां भूयो लब्धभक्तिर्भविष्यतः २२ श्रीशुक उवाच एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं
नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ २३ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः । जगाम शनकैस्तत्र यत्रा
स्तां यमलार्जुनौ । देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना २५ इत्यंत
रेणार्जुनयोः कृष्णस्तु यमयोर्ययौ । आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं २६ बालेन निःकर्षयतान्वगु
लूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ । निःपेततुः परमविक्रमितातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ
२७ तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः । कृष्णं प्रणम्य शिरसाखिललोकना
थं बद्धांजली विरजसाविदमूचतुस्म २८ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः । व्यक्ताव्यक्तमिदं विश्वं रू
पं ते ब्राह्मणा विदुः २९

वेतः स्फुरंतावित्यर्थः यद्वा दिशः प्रकाशयंताविति कुजयोर्वृक्षयोः स्थितो अग्निर्यथा मूर्ति
मानुपेति यथोपेत्य विरजसौ निर्मलौ २८ ननु गोपालं मां युवां देवो किमिति प्रणताविति चेत्तत्राह हे कृष्ण हे कृष्ण हे महायोगिन्
अचिंत्यप्रभाव त्वं न बालः किंतु परः पुरुषः यतः आद्यः कारणभूतः तत्रापि न निमित्तमात्रं किंतु उपादानमपि त्वमेवेत्याशये
नाहुः व्यक्ताव्यक्तमिति स्थूलसूक्ष्ममिदं ते रूपं विदुः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियंतापि त्वमेवेत्याहतुः त्वमेक इति देहः असवः प्राणा आत्मा अहंकारः इंद्रियाणि चैतेषामीश्वरः ३० नन्वस्य कालो निमित्तं प्रकृतिरु
पादानं प्रकृतेर्जातो महान् विश्वात्मतयोपरिणतो पुरुषः कर्त्ता नियंता च किमन्य आह अत आहतुः त्वमेव काल इत्यादिना सार्द्धेन
यतो भगवानीश्वरो विष्णुर्व्यं अतः कालो नाम तत्त्वलीलाप्रकृतिः शक्तिः पुरुषोंशः महान्कार्यं अतः त्वमेव सर्वमित्यर्थः ३१ नन्वहमे
स्पात् १ व तत्त्वं सर्वं घटादिज्ञाने मेत्यज्ञानं किंन भवति चेत्सर्वोपि ब्रह्मवित्स्यात् अत आहतुः गृह्यमाणैरिति दृश्यत्वेन वर्त्तमानैर्बुद्ध्यहं

त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः ३० त्वं महान् प्रकृतिः
सूक्ष्मा रजः सत्त्वतमोमयी त्वमेव पुरुषोध्यक्षः सर्वक्षेत्रविकारवित् ३१ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्रा
कृतैर्गुणैः को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ३२ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे आत्मद्योतगु ण२
णैश्छन्नमहिम्ने ब्रह्मणे नमः ३३ यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्व
संगतैः ३४ स भवान् सर्वलोकस्य भवाय विभवाय च अवतीर्णोंशभागेन सांप्रतं पतिराशिषां ३५ नमः पर
मकल्याण नमः परममंगल वासुदेवाय शांताय यदूनां पतये नमः ३६ श्रीराम श्रीराम श्रीराम

कारेंद्रियादिभिर्दृश्यैस्त्वं न गृह्यस इति भावः ननु तर्हि जीवो जानातु नेत्याहतुः को न्विहेति जीवो ह्युत्पत्तेः प्रागेव स्वप्रकाश
तया सिद्धं त्वां को वा ज्ञानात्रिगुणसंवृतः देहाद्यावृतः ३२ अतो दुर्विज्ञेयत्वात् केवलं प्रणमतस्तस्मै तुभ्यमिति आत्मनः
स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैः छिन्नो महिमा यस्य अग्नेरिवरेवस्तस्मै ३३ अतोत्र हमीश्वर इति कुतो ज्ञातं तत्राहतुः
मोक्षाय १ यस्येति ३४ भवाय उद्भवाय विभवाय विगताय यस्मिन् तस्मै कैवल्यायेत्यर्थः ३६

भवो १

CC-0, In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰पू॰ नोऽस्मांश्च अनुचराः कुबेरो नारदो वा तस्य किंकरौ भगवत्सत्वद्दर्शने ३७ तत्रागतयोरावयोः पूर्ववत्स्वभावो मा भूत् किंतु वाणी गुणानुकथनं
स्यादिनः अस्मल्लोहयोरिति द्विवचनस्थाने बहुवचनं अस्मात्संगिनां सर्वेषामपीति बहुवचनं तव निवासभूतं जगत् तस्य प्रणामे त्व
न्निवासभूतं इति बहुमानेन जगत्प्रणामे शिरो स्वित्यर्थः भवत्तनूनां भवतो मूर्तीनां ३८ संकीर्तितः संस्तुतः ३९ वाग्भिर्नेत्र
दि। न्याजुषतो ज्योष्यानिस्त्याभिः श्रीमेशरूपोऽनुग्रहः सत इति ४० युक्तमेवैतदित्याह साधूनां स्वधर्मवर्तिनां सम चित्तानां त्वा

अनुजानीहि नौ भूमन् तवानुचरकिंकरौ दर्शनं नौ भगवन्नृषेरासीदनुग्रहात् ३७ वाणी गुणानुकथने श्रवणौ क
थायां हस्तौ च कर्मसु मनस्तव पादयोर्नः स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शने स्तु भवत्तनूनां ३८
श्रीशुक उवाच इत्थं संकीर्तितस्ताभ्यां भगवान् गोकुलेश्वरः दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ३९
३० वे॰ श्रीभगवानुवाच ज्ञातं मम पुरैवैतदृषिणा करुणात्मना यच्छ्रीमदान्धयोर्वाग्भिर्विभ्रंशोऽनुग्रहः कृतः ४० साधूनां
समचित्तानां सुतरां मत्कृतात्मनां दर्शनान्नो भवेद्बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ४१ तद्गच्छतं मत्परमौ नलकूबर
सादनं संजातो मयि भावो वामीप्सितः परमोऽभवः ४२ श्रीशुक उवाच इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः
ल१ पुनः बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तरां ४३ इति श्रीभागवते महापुराणे दशमस्कंधे यमलार्जुनभंगो नाम
दशमोऽध्यायः १०

त्मविदां सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां रूपातिरेकात् सुतरामिति उक्तौ सवितुर्द
र्शनात् क्ष्णोर्यथा बंधो न भवेत् तद्वत् ४१ प्राधान्यादेकस्य संबोधनं हे नलकूबर युवां तत्तस्मात् सादनं स्वनिकेतनं मत्प ३०
रमौ संतौ गच्छतं वां युवयोः अपेक्षितो मयि प्रेमा जात एव अभवः न भवो यस्मिन् ४२ बद्धोलूखलं बद्धमुलूखलं यस्मिन् सदनं।

एकादशे समागत्य इहावनमथार्भकैः वत्सान् पालयतानानहतौवत्सवकासुरौ १ निर्घोतो व्रजपा नइति भयेन शंकिताः १ नन्दादयस्तरस्थयप्र
१२ त्यक्षतः पुरतो दृश्यं भयपतन कारणमविज्ञाय वे भ्रमुः २ लक्ष्यकारणं दर्शयति उलूखलमिति भ्रमप्रकारमाह कस्येद राक्षसादेः के एकादशसर्गः
मे कुतो वा कारणात् अहो आश्चर्यमुत्पातइति कातरा भीताः संतो वभ्रमुरित्यर्थः ३ मध्यगेन दक्षयामध्यगतेन नंकेवलमेतावत् दृक्षा

श्रीशुकउवाच गोपानंदादयः श्रुत्वा द्रुमयोः पततोरवं तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः १ भूम्यां निपतितौ
तत्र ददृशुर्यमलार्जुनौ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणं २ उलूखलं विकर्षंतं दाम्नावद्धं च बालकं कस्ये
टि ३ दं कुत आश्चर्यमुत्पात भयकातराः ३ वालका ऊचुरनेनेति तिर्यगतमुलूखलं विकर्षता मध्यगेन पुरुषावप्यन्व
क्ष्महि ४ न ते तदुक्तं जगृहुः न घटेतेति तस्य तत् वालस्योत्पाटनं तत्त्वोः केचित्संदिग्धचेतसः ५ उलूखलं
विकर्षंतं दाम्नावद्धं स्वमात्मजं विलोक्य नंदः प्रहसद्वदनो विमुमोच ह गोपीभिः स्तोभितो नृत्यन् भगवा
न्वालवत्क्वचित् उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयंत्रवत् ७ विभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादु
कं बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन्
भ्यां निर्गतौ दिव्यौ पुरुषावप्यचक्ष्महि दृष्टवंतो वयमिति ४ केवलं नार्भकानां जगृहुः रेवमन्येत्तुसंदेहयुक्ता विचार्य भ्रमुरिति ५
भगवन्मायया मोहितस्य नंदस्याचरितमाह उलूखलमिति ६ लास्यं ते मामिति शंकमानो तीव वोत्स्यमनुकरोति स्म गद
ह गोपीभिरिति स्तोभितः करतालादिना प्रोत्साहितः १७ इदमानयेत्याज्ञप्तः आनेतुमसमर्थइव च विभर्ति केवलं पीठादि
वाहुक्षेपं करताडनं च न हि दांचेति चकारस्यान्वयः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ १० नंदे श्रयं यदिदं तिथे तेषां एवं व्रजस्य हर्षमुवाहेति ९ १० रंतुं वृंदावनं गंतुं मतः कृष्णेन यंत्रिताः स्वतंत्राइव नंदाद्या मंत्रं मंत्रयन् १ सेतम १

दर्शयंस्तदिदं लोके आत्मनो भृत्यवश्यतां व्रजस्यावाहेवेहर्षं भगवान्बालचेष्टितैः ९ श्रीणीहि भोः फलानीति श्रुत्वा सत्वरमच्युतः फलार्थी धान्यमादाय ययौ सर्वफलप्रदः १० फलविक्रयिणी तस्य च्युतधान्यकरद्वयं फलैरपूरयद्रत्नैः फलभाण्डमपूरि च ११ सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् जन्मक्षमद्य भवतो विप्रेभ्यो देहि गाः शुचिः १२ पश्य पश्य वयस्यास्ते मातृमिष्टान्नवल्लकृतान् त्वं च स्नातः कृताहो विहरस्व स्वलंकृतः १३ नो पेयामातोयदाहृतो क्रीडसंगेन पुत्रकौ यशोदां प्रेषयामास रोहिणी पुत्रवत्सला १४ इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहस्नात स्तनी हस्तगृहीत्वा समहरामम च्युतं नीत्वा स्ववाटं कृतवत्यथोदयम् १५ क्रीडंतसा सुतं बालैरतिविलंसहायजं यशोदा जोहवीत्कृष्णं पुत्रस्नेहस्नात स्तनी १६ कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब अलं विहारैः क्षुत्क्षांतः क्रीडाश्रांतो सि पुत्रक १७ हे रामागच्छ ताताशु सानुजः कुलनंदन प्रातरेव कृताहारस्तत्र भवान्भोक्तुमर्हति १८ प्रतीक्षते त्वां दाशार्हो भोक्ष्यमाणो व्रजाधिपः एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः १९ इत्यानीय गृहं कृष्णं यशोदा मंगलोहेर्णैः अभ्यर्च्य भोजयित्वा च तुमुदमाप यशस्विनी २० श्रीशुक उवाच गोपवृद्धा महोत्पातानुभूय बृहद्वने नंदादयः समागम्य व्रजकार्यममंत्रयन् २१ तत्रोपनंदनामाह गोपो वृद्धो यथाधिकः देशकालार्थतत्वज्ञः प्रियकृद्रामकृष्णयोः २२ उत्थातव्यमितोस्माभिर्गोकुलस्य हितैषिभिः आयांत्यत्र महोत्पाता बालानां नाशहेतवः २३ मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् २४ सीन २ ३१

31

गोकुलस्यहितंकृत्यं १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ श्रीराम

व्रजकार्यं २

विपदं विनां पक्षिणां पदं विहारस्थानं वियत् विगतप्रतिष्ठं वा २५ अन्यत्तमो वाक् अविहालः अच्युतेनैव क्षणमासीत् २६ अरिष्टः अनर्थः
इतः स्थानात् २७ पशव्यं पशुभ्यो हितं नवानि काननानि अवांतराणि विद्यंते यस्मिन् तत् २८ एकधियः विप्रतिपत्तिरहिताः व्रजान्

चक्रवातेन नीतोयं दैत्येन विपदं वियत् शिलायां पतितस्तत्र परित्राताः सुरेश्वरैः २५ यन्न म्रियेत द्रुमयोरंतरं प्राप्य बाल
कः असावन्यत्तमो वापि तद्दप्यच्युतरक्षणं २६ यावदौत्पातिकोरिष्टो व्रजं नाभिभवेदितः तावद्बालानुपादाय या
स्यामोन्यत्र सानुगाः २७ वनं वृंदावनं नाम पशव्यं वनकाननं गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं २८ तत्त
त्राद्यैव यास्यामः शकटान् युंक्त मा चिरं गोधनादिवनं नाम पशव्यं नवकानं अन्यग्रतो यांतु भवतां यदि रोचते २९
तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः व्रजान् स्वान् समायुज्य ययू रूढपरिच्छदाः ३० वृद्धान् बाला स्वान्
स्त्रियो राजन् ५ न् सर्वोपकरणानि च अनः स्वारोप्य गोपाला यत्ता आत्तशरासनाः ३१ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य स
र्वतः तूर्यघोषेण महता ययुः सहपुरोहिताः ३२ गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः कृष्णलीला जगुः
प्रीताः निष्ककंठ्यः सुवाससः ३३ तथा यशोदारोहिण्यावेकं शकटमास्थिते रेजतुः कृष्णरामाभ्यां तत्क
थाश्रवणोत्सुके ३४ वृंदावनं संप्रविश्य सर्वकालसुखावहं तत्र चक्रुर्व्रजावासं शकटैरर्द्धचंद्रवत् ३५
वृंदावनं गोवर्धनं च यमुनापुलिनानि च वीक्ष्यासीदुत्तमा प्रीतिः राममाधवयोर्नृप ३६ श्रीराम श्री

पु १ शकटव्यूहान् रूढाः शकटानि आरोपिताः परिच्छदा येस्ते ३० यत्ताः कृतप्रयत्नाः ३१ २ नूत्नेः कुचयोर्गतैः कुंकुमैः कांतिर्यो
सां ताः नूत्नेषु कुचेषु यत्कुंकुमं तेन कांतिर्यासामिति वा ३३ ४ व्रजावासं गोकुलवसतिस्थानं ३५ ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा. १० स्वकालेनतद्योग्यकालेन ३७ कौमारलीलांवर्णयति अविदूर इत्यादिना ३८ क्षेपणैः विल्वामलकादिभिः किंकिणीयुक्तैः पादैः
क्षिपतः ताडयतः वत्सपालाइवहित्वाः कंबलादिपिहिताः रूपमनुकुर्वंतितैः सह ३९ स्वयमपितथैवरूषायमाणेन

एवंव्रजौकसांप्रीतिंयच्छंतौबालचेष्टितैः कलवाक्यैः स्वकालेनवत्सपालौबभूवतुः ३७ अविदूरेव्रजभुवः सह
गोपालदारकैः चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदैः ३८ क्वचिद्वादयतोवेणून्क्षेपणैः क्षिपतोक्वचि
त् क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रिमगोवृषैः ३९ वृषायमाणौनर्दतौयुयुधातेपरस्परं अनुकृत्यरु
तैर्जंतूंश्चेरतुः प्राकृतौयथा ४० कदाचिद्यमुनातीरेवत्सांश्चारयतोःस्वकैः वयस्यैःकृष्णबलयोर्जिघांसु
र्दैत्यआगमत् ४१ तंवत्सरूपिणंवीक्ष्यवत्सयूथगतंहरिः दर्शयन्बलदेवायशनैर्मुग्धइवासमान्
पपातह तंवीक्ष्यविस्मिताबालाः शशंसुःसाधुसाध्विति ४४ देवाश्चपरिसंतुष्टावभूवुःपुष्पवर्षिणः
तौवत्सपालकौभूत्वासर्वलोकैकपालकौ सप्रातराशौगोवत्सांश्चारयंतौविचेरतुः ४५ स्वंस्वंवत्स
कुलंसर्वेपाययिष्यंतएकदा गत्वाजलाशयाभ्यासंपाययित्वापपुर्जलं ४६ तेतत्रददृशुर्बालामहास
त्वमवस्थितं तत्रसुर्वज्रनिर्भिन्नंगिरेःशृंगमिवच्युतं ४७ सवैबकोनाममहानसुरोबकरूपधृक् आगा
त्यसहसाकृष्णंतीक्ष्णतुंडोग्रसद्बली ४८ कृष्णंमहाबकग्रस्तंदृष्ट्वारामादयोर्भकाः बभूवुरिंद्रियाणि

ईनौनदनुकारिशब्दान्कुर्वंतौयुयुधातेइत्यर्थः रुतैःशब्दैः जंतून्हंसमयूरादीन् ४० मुग्धइवाजानन्निवआसन्समीपमागमत् ४२ ३२
अपरपादाभ्यांसलांगुलंयथाभवतितथागृहीत्वा ४३ ४ सर्वेषांलोकानामेकोमुख्योपालकौ ४५ अभ्यासंसमीपं ४६ ४८ रामआ
दिर्येषांतेनतुरामः ४९

प्रातराशः प्रातर्भोज्यमन्नंतत्सहितौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५० तुंडयोरंब्रो: वीरणावत् अर्थयित्वणविशेषवत् ५१ समीडिरे तुष्टुवु: आनकै: अनेकै: संस्तवै: सह ५२ स्वस्थानमागतं प्राणमिव कृष्णं च प्रणीय एकीकृत्य ५३ अति प्रियेण प्रीत्या आदृताः सादराः प्रत्यागतमिव लोकांतरादागतमिव अलक्षिता निश्चलता नि

तं तालुमूलं प्रदहंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः । चच्छर्द सद्योऽतिरुषाक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत ५० तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः । पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद्दिवौकसां ५१ तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः समीडिरे चानकशंखसंस्तवैस्तद्वीक्ष्य गोपालसुता विसिस्मिरे ५२ मुक्तं बकास्यादुपलभ्य दारका रामादयः प्राणमिवेंद्रियो गणः स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ५३ श्रुत्वा तद्विस्मिता गोपा गोप्यश्चातिप्रियादृताः प्रेत्यागतमिवोत्सुक्यादैक्षंत तृषितेक्षणाः ५४ अहो बतास्य बालस्य बहवो मृत्यवोऽभवन् अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयं ५५ अथाप्यभिभवंत्येनं नैव ते घोरदर्शनाः जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत् ५६ अहो ब्रह्मविदां वाचो नासत्याः संति कर्हिचित् गर्गो यदाह भगवानन्वभावि तथैव तत् ५७ इति नंदादयो गोपाः कृष्णरामकथां मुदा कुर्वंतो रममाणाश्च नाविंदन्भववेदनां ५८ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ५९
इति श्रीभागवते महापुराणे दशमस्कंधे वत्सबकवधो नामैकादशोऽध्यायः श्रीराम श्रीराम श्रीराम श्री

मृतं पिबंतीव ईक्षणानि येषां ते ५४ अहो बतेत्यादि श्लोकत्रयस्य इति नंदादय इत्यनेनान्वयः अपि एवं तेषां मित्रानिष्टमासीत् यतोऽस्तेः पूर्वमन्येषां भयं कृतं ५५ अथ घोरदर्शना अपि नाभिभवंति न धर्षयंति ५६ गर्गो यदाह तस्मान्नंदात्मजोऽयं ते नारायणसमो गुणैरित्याह ५७ वत्सं पृथगतं हत्वा वत्सदंभासुरं हरिः मुनिः पृथगतं चाह नवग्रण्पदमिनांबके १ इति दशमे एकादशः ११ ८७

भा०१० हाहेत्युमहासर्पवपुर्धरमघासुरं वत्सपालगिलं क्रुद्धोऽगालेऽह निति वर्ण्यते १ महावकागल्लक्रीडाकेवत्सस्यनेकौतुके ३ हत्वाघासुरमुरवेस
सखेः प्राविशद्धरिः २ क्वचिद्वनाशायवनएवप्रथमंभोजनंकर्तुं १ तेनैवशृंगरवेणबोधयन्नवा पृथुकाः वालकाः स्निग्धाः स्नेहयुक्ताः शिकु
शिक्यं रम्याः शिग्वेत्रादयोयेषांतैसह स्वाधिकसंख्यायुक्तान्वत्सान् २ ३ काचादिभिः पूर्वमात्रभिर्भूषिता अपिफलादिभिरात्मान
मभूषयन्नित्यर्थः ४ मुष्णन्तश्चोरयंतः ५ यदिदूरंगतः कृष्णोभवतितर्हिति ६ ध्मातः वादयंतः शृंगैः सह ७ विच्छायाभिः पक्षिच्छायाभिःसै कलादि

श्रीशुक उवाच क्वचिद्वनाशायमनोदधद्व्रजात्प्रातः समुत्थायवयस्यवत्सपान् प्रबोधयन्शृंगरवेणचारुणा विनिर्गतो वत्सपुरःस
रोहरिः तेनैव साकंपृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाणवेणवः स्वकान्सहस्रोपरिसंख्ययान्वितान् वत्सान्पु
रस्कृत्यविनिर्ययुर्मुदा २ कृष्णवत्सैरसंख्यातैर्यूथीकृत्यस्ववत्सकान् चारयंतोर्भलीलाभिर्विजह्रुस्तत्रतत्रह ३ फलप्र
वालस्तवककुसुमनः पिच्छधातुभिः काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ४ मुष्णंतोन्योन्यशिक्यादीन्ज्ञातान्रा
३२ त्वचिक्षिपुः तत्रत्याश्चपुनर्दूराद्धसंतश्चपुनर्ददुः ५ यदिदूरंगतः कृष्णोवनशोभेक्षणायतं अहंपूर्वमहंपूर्वमिति
संस्पृश्यरेमिरे ६ केचिद्वेणून्वादयंतो ध्मांतः शृंगाणिकेचन केचिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः परे ७ विच्छायाभिः
प्रधावंतोगच्छंतः साधुहंसकैः वकैरुपविशंतश्चनृत्यंतश्चकलापिभिः ८ विकर्षंतः कीशवालानारोहंतश्चतैः
द्रुमान् विकुर्वंतश्चतैः साकंप्लवंतश्चतैः साकं ९ साकंभेकैर्विलंघंतः सरित्प्रस्रवसंप्लुताः हसंतःप्रतिच्छायाः श स्व
पंतश्चप्रतिस्वानान् १०

पूरैः ८ कीशवालान्वृक्षशाखासुवेल्लमानानिवानरवालांगूलानिआकर्षंतः लांगूलसमुच्चयंतस्तैः सहद्रुमानारुह राम
तः विकुर्वंतः दंतदर्शनभ्रूविजृंभादिभिस्तैः सहैवविकारान्कुर्वंतः पल्लाशिषुवृक्षेषुप्लवंतः शाखायाः शाखां ३३
तरमुत्पतंतः ९ प्रतिच्छायाः प्रतिबिंबानि १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानतिविस्मिताः श्लोकद्वयेनाभिनंदन्तीति सतांविदुषांब्रह्मैवतत्सुखंच अनुभूतिश्चानयास्वप्रकाशपरमसुखेनेत्यर्थः भक्तानांपरंदैवतेन आत्मप्रदेननाथेन मायाश्रितानांतुनरदारकतयाप्रतीयमानेनसह विजह्रुः कृतानांपुण्यानांराशयो येषांते ब्रह्मविदांनदनुभव एवभक्तानामतिगौरवेणैव भजनंएतंतुतेनसहसरभ्सेन विजह्रुः अहो भाग्यमितिभावः ११ वहुभिर्जन्मभिः कृच्छ्रेण धृत आत्मसंयमो येषांयतिनामपि १२ सुखक्रीडनवीक्षणेनक्षमायस्येसा कथंभूतः यस्य अंतरं अंतरंछिद्रंनाशंपीतामृतैरपितैर्मृत्युभीतैरमरैः प्रतीक्ष्यतेकथंमरिष्यति कदवेति यद्वाकथंभूतंसुखक्रीडनं यत्तदंतरं हृदये अमरैः प्रतीक्ष्यत विचिंत्यते पीतामृतैरपिपुनर्निजजी

इत्थंसतांब्रह्मसुखानुभूत्यादास्यंगतानांपरदैवतेन मायाश्रितानांनरदारकेण साकंविजह्रुः कृतपुण्यपुंजाः ११ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यगम्यः सएवदृग्विषयः स्वयंस्थितः किंवर्ण्यते दिष्टमहो व्रजौकसां १२ अथाघनामाभ्यपतन्महासुरस्तेषांसुखक्रीडनवीक्षणाक्षमः नित्यंयदंतर्निजजीवितेप्सुभिः पीतामृतैरप्यमरैः प्रतीक्ष्यते १३ दृष्ट्वार्भकान् कृष्णमुखानघासुरः कंसानुशिष्टः सबकीबकानुजः अयंतुमेसोदरनाशकृत्तयोर्द्वयोर्ममैनंसबलंहनिष्ये १४ एतेयदामत्सुहृदोस्तिलापः कृतास्तदानष्टसमाव्रजौकसः प्राणेगतेवर्ष्मसुकानुचिंताप्रजासवःप्राणभृतोहियेते १५ इतिव्यवस्याजगरंबृहद्वपुः संयोजनायाममहाद्रिपीवरं धृत्वाद्भुतंव्यात्तगुहाननंतदापथिव्यशेतग्रसनाशयाखलः १६

वितेप्सुभिः अयंभावः नामृतपानमात्रेणजीवनंसफलंभवतिकिं

संतः२ तुभगवल्लीलानुस्मरणेनेतितेदेवनित्यंचिंत्यतइति १३ कृष्णमुखानर्भकान्दृष्ट्वासइतिव्यवस्यनिश्चित्याऽजगरंवपुर्धृत्वाव्यशेत ग्रसनाशयापथिव्यशेतेतितृतीयश्लोकेनान्वयः कंसेनानुशिष्टः बकीपूतनाकथंव्यवस्यतदाह अयंहितिसोदर्योर्ममतयोर्द्वयोः

प्रहिताः ३ सोदरयोःस्थानेएनंकृष्णंसंबलंवत्सतरपालसहितंहनिष्यामि १४ ननुतथापिव्रजस्थास्तेअवशिष्यरन्नित्याहएतइति तिलापःकृताःतिलोदकतयाकल्पितास्मेसुदेहेषु व्रजौकसःसर्वेयेषांतेतथा १५ संयोजनायामंयोजनप्रमाणेनदैर्घ्येणयुक्तंच

सतैन्यं २

गतिविस्मिताः कांचनपांगसामिति गुणाश्मगाननयास्मिन्

गदा १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग॰ १॰ अद्भुतमिति(यु)क्त्वोपलक्षयितुं विशिनष्टि धरायामधरोष्ठो यस्य सः जलदेषूत्तरोष्ठो यस्य सः दर्यौ विवाननस्यांतौ यस्य सः क्षिणीयस्य सः
दंष्ट्रा २ गिरेः शृंगाणि दंष्ट्रा यस्य सः ध्वांतवदंतरास्यं यस्य सः वितता ध्वजजिह्वा यस्य सः वर्षानिलवत् श्वासो यस्य सः दाव वदीक्षणयो
रूष्मः दावदृष्टिरित्यर्थः पर्षानिलश्च श्वासो दवेक्षणोष्मश्च १७ वस्तोताजगरमेवव्यात्तस्य तुंडे दृष्ट्वा दंदावनस्य श्री संपदे
तुंड १ वेति भ्रांत्या मत्वा विपरीतव्यात्ताजागरास्य सा दृश्यमानो त्प्रेक्षितवंतः १८ उत्प्रेक्षामेव प्रश्नोत्तराभ्यामाहुः अहो इति सत्व

धराधरोष्ठाजलदोत्तरोष्ठाद्यानानांतो गिरिशृंगदंष्ट्रः ध्वांतांतरास्यो वितताध्वजिह्वः पर्षानिलश्वासद
वेक्षणोष्मः १७ दृष्ट्वातं ताहृशं सर्वे मत्वा दंदावनश्रियं व्यात्ताजगरतुंडेन स्युत्प्रेक्षंते स्म लीलया १८॥
३४ अहो मित्राणि गदत सत्वकूटं पुरः स्थितं अस्मत्संग्रसनव्यात्तव्यालतुंडायतेन वा १९ सत्यमर्ककरा
रक्तमुत्तराहनुवद्धनं अधराहनुवद्रोधस्तत्प्रतिच्छाययारुणं २० प्रतिस्पर्द्धेत सृक्किभ्यां सव्यासव्यं न
गोदरे तुंगशृंगालयोप्येतास्तद्दंष्ट्राभिश्च पश्यत २१ आस्तृतायाममार्गोयं रसनां प्रतिगर्जति एषां
मंतर्गतं ध्वांतमेतदप्यंतराननं २२ दावोष्मखरवातोयं श्वासवद्भाति पश्यत तद्दग्धसत्वदुर्गंधोप्यं

कूटं सत्वाभ्यासमिदं न यात त्रापि अस्मत्संग्रसनाय व्यात्ततुंडं च तद्द्वदावरतिवान वा १९ निश्चितं तथैवेत्याहुः सत्यमिति अर्क राम
करैरारक्तघनमुत्तरोष्ठवत् पश्यत तस्य घनस्य प्रतिच्छायया रुणं रोधः स्थलं अधरोष्ठवत् पश्यतेति परस्परमिति सर्वत्रान्वेति २० सृक्कि ३४
भ्यां ओष्ठप्रांताभ्यां प्रतिस्पर्द्धेते तुल्यतयावर्त्तेते नगोदरे गिरिदर्यौ तस्य दंष्ट्राभिः स्पर्द्धमानाः २१ आस्तृतायाममार्गः विस्तृतो
प्रति २ दैर्घ्यवान्मार्गः प्रतिगर्ज्जेति स्पर्द्धते एषां शृंगाणां मध्यगतमंधकारं एतत् अंतराननं आननमध्यं प्रतिगर्ज्जति २२ दावन
उष्मः खरो वातोयं तेन दावाग्निना दग्धानां सत्वानां यो दुर्गंधः स एव सर्पस्यांतर्गता मिषगंधवद्भाति २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं सत्यमेवाजगरमन्यथोत्प्रेक्ष्य निर्भयाययुः किं ग्रसिताग्रसिष्यति अनेन श्रीकृष्णेन हन्त्रा बकारे कशकमनीयं मुखं २४ अमृषा
वक्त्रतः सर्पवपुरसुर एवमृषायते स्वानां सर्पेसा दृश्यगोचरत्वेन प्रतीयतइति तान्निरोद्धुं वारयितुं यावन्मनो दधे तावत्प्रविशद्
स्तुत्तरेणान्वयः २५ प्रविष्ट एव केवलं न तु तेन गीर्णाः गिलिताः जीर्णाइति पाठेपि सएवार्थः कथंभूतेन हततयोः स्वकयोरंतः स्म
रतीति तथा तेन अत एव बकारेः श्रीकृष्णस्य प्रवेशं प्रतीक्ष्यमाणेन २६ स्वकरादवच्युतानु विनिःसृतानु विस्मितः स

अस्मानु किमत्र ग्रसितानि विष्टान यंत थांचेद्दकवाहिनेक्ष्यति क्षणादनेनेतिवकारियुशन्मुखं वीक्ष्योद्धसंतः क
रताडनेययुः २४ इत्थं मिथोऽतथ्यमतज्ञभाषितं श्रुत्वा विचिंत्येत्यमृषा मृषायते रक्षोविदित्वाखिलभूतहृत्स्थितः
स्वानां निरोद्धुं भगवान्मनो दधे २५ तावत्प्रविष्टास्त्वसुरोदरांतरं परं न गीर्णाः शिशवः सवत्साः प्रतीक्ष्यमाणे
न बकारिवेशनं हतस्वकांतस्मरणेन रक्षसा २६ तानु वीक्ष्य कृष्णः सकलाभयप्रदो ह्यनन्यनाथानु स्वकरा
दवच्युतानु दीनांश्च मृत्योर्जठराग्निघासानु घृणार्दितो दिष्टकृतेन विस्मितः २७ कृत्यं किमत्रास्य खलस्य
जीवनं न वा अमीषां च सतां विहिंसनं द्वयं कथं स्यादिति संविचिंत्य तज्ज्ञात्वाविशत्तुंडमशेषदृग्घरिः २८ गत्ना [illegible]
तदा घनच्छदा देवा भयाद्धाहेति चुक्रुशुः जहृषुर्ये च कंसाद्याः कौणपास्त्वघबांधवाः २९ तच्छ्रुत्वा भगवानृक्ष
स्म स्वव्ययः साभवत्सकं चूर्णीचिकीर्षो रामानंतरसा वरुधे गले ३०
४१
तु २७ कृत्यं किमत्रेत्यादि विचिंत्य तत्रोपायं ज्ञात्वा स्वय
मेपि प्रविशदित्यन्वयः कथं विचिंत्य अस्य जीवनं अमीषां च विहिंसनमिति द्वयं वै निश्चितं कथं न स्यादिति २८ घनच्छदा
मेघांतरिताः कौणपाः कुणपाशिनो राक्षसाः कुणपा निर्जीत्ति स्तदीयाइतिवा २९ चूर्णीकर्तुमिच्छोस्तस्य गले आरोधव

भा०ष्० निरुद्धोमुखादीनां मार्गे भक्तः कंठे यस्यास्थितस्य उत्क्रांतिर्दृष्टः बहिर्निर्गतलोचनस्य अंतरं मे देहमध्ये पूर्णपरिभक्तः मूर्द्धनु मूर्द्धनि
ब्रह्मरंध्रं निर्भिद्य बहिर्निर्गत इति ३१ प्राणेष्विंद्रियेषु स्वया अमृतवर्षिण्या दृष्टेव ३३ अहिं देहस्थितं शुद्धसत्वमयं ज्योति निर्गतं ख
वस्थितं तस्मिन्नीशाविवेश ३३ स्वकृतः स्वकार्यकृतः श्रीकृष्णस्य अर्हणमकृत पूजामकुर्वन् सुष्ठुगायंती तिसुगांधर्वादयः २

ततो निकायस्य निरुद्धमार्गिणो ह्युत्क्रांत दृष्टे भ्रमतो स्थितिस्तमः पूर्णोऽन्तरंगपवनो निरुद्धो मूर्द्धन विनिः
ष२ पार्श्वे विनिर्गतो बहिः ३१ तेनैव सर्वेषु बहिर्गतेषु प्राणेषु वत्सान् सुहृदः परेतान् दृष्ट्वा स्वयोत्थाप्य तदनि विनि
तः पुनर्वत्सान्मुकुंदो भगवान्विनिर्ययौ ३२ पीनाहिभोगोत्थितमद्भुतं महज्ज्योतिः स्वधाम्ना ज्वलयन्
३५ दिशो दश प्रतीक्ष्य खेवस्थितमीशनिर्गमं विवेश तस्मिन् मिषतां दिवौकसां ३३ ततोऽतिहृष्टाः स्वकृतोऽकृ
स२ तार्हणं पुष्पैः सुरा अप्सरसश्च नर्त्तनैः गीतैः सुगा वाद्यधराश्च वाद्यकैः स्तवैश्च विप्रा जयनिःस्वनैर्गणाः ३४
दि२ तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादिनैकोत्सवमंगलस्वनान् श्रुत्वा स्वधाम्नोंत्यज आगतोऽचिराद्दृष्ट्वा
महीशस्य जगाम विस्मयं ३५ राजन्नाजगरं चर्म शुष्कं वृंदावनेऽद्भुतं व्रजौकसां बहुतिथं बभूवाक्रीडग
ह्वरं ३६

३४ किंच तेषां यान्यद्भुतस्तोत्रादीनि नैकोत्सवाश्चानेकोत्सवाय मंगलस्वनास्तान् स्वधाम्नोंतिसमीपे श्रुत्वा
अजोऽत्र सत्याश्चिरादागतः ईशस्य कृष्णस्य महिमहिमानं दृष्ट्वा विस्मयं प्रापेति ३५ बहुतिथं बहुकालं आक्रीडगह्वरं क्री
डार्थं महाबिलं ३६ राम ३.५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यथाति चित्रं वृत्तमित्याह एतदिति कौमारं पंचमाद्दांतं पौगंडं दशमावधि कैशोरमापंचदशाद्यौवनं तु ततः परं १ हरेः कौमारजं पंचमा
ब्दकृतं कर्म गतं वर्षद्वयं पौगंडे के षष्ठे वर्षे बाला अघहननमिति ऊचुः किं तत् कर्म मृत्योः सकाशादात्मनामहेः अघस्य मोक्षणं आत्मनां प्रसिद्ध
मृत्योः अहेः संसारलक्षणात् अघासुरज्योतिषः श्रीकृष्णे प्रवेशमपि तदा दृष्टं कथितवंत इत्यर्थः ३७ नैतद्विचित्रं किं तदि

एतत्कौमारजं कर्म हरेरात्माहिमोक्षणं । मृत्योः पौगंडके बाला दृष्ट्वोचुर्विस्मिता व्रजे ३७ नैतद्विचित्रं मनुजा
र्भमायिनः परावराणां परमस्य वेधसः अघोपि यत्स्पर्शनधौतपातकः प्रापाऽत्मसाम्यं सतां सुदुर्लभं ३८ त्वस १
सकृद्यदंगप्रतिमांतराहिता मनोमयी भागवतीं गतिं ददौ सएव नित्यात्मसुखानुभूत्या व्युदस्तमायोयपरमो
गं किंपुनः ३९ सूत उवाच इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रं पप्रच्छ भूयोपि तदेव
पुण्यं वैयासकिं यन्निगृहीतचेताः ४० राजोवाच ब्रह्मन् कालांतरकृतं तत्कालीनं कथं भवेत् यत्कौमा
रे हरिकृतं जगुः पौगंडकेर्भकाः ४१ तद्ब्रूहि मे महायोगिन् परं कौतूहलं गुरो नूनमेतद्धरेरेव माया भवति न२
नान्यथा ४२ वयं धन्यतमा लोके गुरोपि क्षत्रबंधवः यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णकथामृतं ४३

त्यपेक्षायामाह अघोपीति आत्मसाम्यं स्वसमानरूपतां ३८ यस्य अंगं मूर्तिस्तस्य प्रतिमा प्रतिकृतिस्तत्रापि केवलं मनोम
यी सापि बलादंतराहिता सती भागवतीं गतिं ददौ प्रह्लादादिभ्यः सएव साक्षात्स्वयं मंतर्गतः किंपुनः नित्या या आत्मसु -या२
या२ खानुभूतिस्तया निरोत्पुदस्ता माया येन सः ३९ येन श्रवणेन निगृहीतं वशीकृतं चेतो यस्य सः ४० कालांतरे
कौमारे कृतं पौगंडके कथं ज्ञात्वा ऊचुरित्यर्थः ४१ ४३
-या१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०
१

तेनयः स्मारितानंतः तेनहृतान्याखिलेंद्रियाणियस्यसः तथाभूतोपिकथंविलक्षणबहिर्दृष्टिः हेभागवतोत्तमशौनक ४५ इति
दशमेद्वादशः त्रयोदशेहरेर्ब्रह्मावत्सानुवालांश्चमायया तदातत्सर्वस्वरूपोद्दंकृष्णः पूर्ववदाचरत् १ नूतनयसिनव्यव
त्करोषि तथाहिसारभृतांसारग्राहिणामयंनिसर्गः स्वभावः कोसौ अच्युतस्यवार्ताप्रतिक्षणंसाधूनंव्यवक्रवतीतिय
त्सः विटानांस्त्रैणानांस्त्रियः कामिन्यः वार्त्तेवकथंभूतानामपिसतांयो अच्युतवार्त्तेवअर्थोयेषांतानिवाणीश्च

सूतउवाच इत्थंस्मपृष्टः सतुबादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः कृच्छ्रात्पुनर्लब्धबहिर्दृशिःशनैः
प्रत्याहतंभागवतोत्तमोत्तम ४५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअघासुरवधोनामद्वादशोध्यायः १२
श्रीशुकउवाच साधुपृष्टंमहाभागत्वयाभागवतोत्तम यन्नूतनयसीशस्यशृण्वन्नपिकथांमुहुः १ स
३६ तामयंसारभृतांनिसर्गोयदर्थवाणीश्रुतिचेतसामपि प्रतिक्षणंनव्यवदच्युतस्ययत्स्त्रियाविटाना
७३ मिवसाधुवार्त्ता २ शृणुष्वावहितोराजन्नपिगुह्यंवदामिते ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ३
तथाघवदनान्मृत्योरक्षित्वावत्सपालकान् सरित्पुलिनमानीयभगवानिदमब्रवीत् ४ अहोतिरम्यंपु
लिनंवयस्याःस्वकेलिसंपन्मृदुलाच्छवालुकं स्फुटत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रु
माकुलं ५

तिचेतांसियेषांतथाभूतानामपि २ ३ ४ भोजनविधानायपुलिनेस्तौतिअहोइति स्वीयानांकेलीनांसंपदाविद्यते राम
यस्मिन्तत् मृदुलाअच्छावालुकायस्मिन्तत् किंचस्फुटत्विकसत्सरः सरोजवाहुल्येनोपचारात् सरएवविक ३६
सहितमुक्तंतस्यगंधः तेनहृताआकृष्टाअलयःपत्रिणश्चतेषांकेउदकेध्वनयस्तेषांप्रतिध्वानैर्लसंतोद्रुमास्तैराकु
लंव्याप्तं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिवारूढं वेलातीतमित्यर्थः ६ आरुध्य संरुध्य शाद्वले हरिततृणदेशे ७ तदा ते विरेजुः कृष्णस्य विष्वक् परितः पुरुराजिमंडलैर्बहुभिः पंक्तिमंडलैः सह नैरंतर्येणोपविष्टाः श्रीकृष्णाभिमुखानि आननानि येषां ते फुल्लदृशः विकसितनयनाः कर्णिकायाः परितः पत्राणि यथेति ८ पुष्पैः स्तबकैः दलैरन्यैश्च पत्रैः कृतानि भाजनानि यैः ९ एवं कंचित्स्वादविशेषं अभ्यवजह्रुः बुभुजिरे सहेश्वराः श्रीकृष्णसहिताः यज्ञभुगपि स बुभुजे बालानामिव केलिर्यस्य स तदाह उदरवस्त्रयोर्मध्ये वेणुं विभ्रद्दधदिति ॥

अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणं ६ तथेति पाययित्वा-
र्भा वत्सानारुध्य शाद्वले मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ७ कृष्णस्य विष्वक् पुरुराजिमंडलैरभ्याननाः फु २ ह २
फुल्लदृशो व्रजार्भकाः सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः ८ केचित्पुष्पैर्दलैः केचित्पल्लवै-
रंकुरैः फलैः त्वग्भिः शिग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ९ सर्वे मिथो दर्शयंतः स्वं स्वं भोज्यरुचिं पृथ-
क् हसंतो हासयंतश्चाभ्यवजह्रुः सहेश्वराः १० बिभ्रद्वेणुं जठरपटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृण-
कवलं तत्फलान्यंगुलीषु तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बा-
लकेलिः ११ भारतैवं वत्सपेषु भुंजानेष्वच्युतात्मसु वत्सास्त्वंतर्वने दूरं विविशुस्तृणलोभिताः १२ ॥

सर्वत्र वाम इति कक्षपाण्योर्विशेषणं मसृणं स्निग्धं दध्योदनकवलं तदुचितानि बिल्वादिफलानि अंगुलिसंधिषु कर्णिकेव सर्वाभिमुखो मध्ये तिष्ठन् सन् स्वस्य परितः उपविष्टान् सुहृदः स्वैर्नर्मभिः परिहासवाक्यैः स्वर्गे स्वर्गवासिनि जने आश्चर्येण पश्यति सति लोके जनानां मध्ये बुभुजे ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०प्र० भीर्भयं भयहेतुस्तस्मो भयं अस्य अपास्य यद्वा अस्य विश्वस्य भियोपि भयं यः श्रीकृष्णः आशात् भोजनात् अस्मिन् पादे अक्षराधिक्यमा
दृढं वद्धा रसना येन सः ६ तदा सर्पस्य ह्रदः पुरुषश्रेष्ठस्य पतनभारेण संक्षोभिता नामुरगाणां विषैः उच्छ्वसितो बुराशिर्य
स्य सः विषेण कषायीकृता भयंकरा ऊर्मयो यस्य सः पर्यक्परितः धनुःशतं प्लुतः प्रसृतः नेतच्चित्रमित्याह अनंतब
लस्येति ७

१२ गरुडस्ता २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुटिसकंधादयः दि वि ३

श्री १ ६२

भा॰ द॰ भुजदंडहतोदकघोषं श्रुत्वा ततः स्वसदनाभिभवं च निरीक्ष्यासहमानः समसरत्समाजगाम ॥ प्रेक्षणीयश्चासौ सुकुमारश्च
पू॰ घनवदुज्वलश्च तं श्रीवत्सपीतवसनं हे विहरतः श्रीवत्सेन युक्तमुज्वलत्पीतवस्त्रं यस्य तं भुजया भोगेनान्वच्छाद आविष्टयत्
एवं सप्रियो यथा तत् प्रियास्ते चेत्सखायश्च ति १० ११ उल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः आसन्नभयं श

तस्य हदे विहरतो भुजदंडघूर्णवार्घोषमंगवरवारणविक्रमस्य आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य च
क्षुश्रवाः समसरत्तदमृष्यमाणः ॥ तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं
क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्मसु षा भुजया चच्छाद एवं नागभोगपरिवीतमदृष्टचेष्टमालो ६३
क्य तत्प्रियसखाः पशुपा भृशार्त्ताः कृष्णेर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो नि
पेतुः १० गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः कृष्णे न्यस्तेक्षणा भीता रुदत्य इव तस्थिरे ११ अथ व्र
जे महोत्पातास्त्रिविधा ह्यतिदारुणाः उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः १२ तानालक्ष्य भयोद्विग्ना
गोपा नंदपुरोगमाः विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतं १३ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः
तत्प्राणास्तन्मनस्कास्ते दुःखशोकभयातुराः १४ आबालवृद्धवनिताः सर्वे गपशुवृत्तयः निर्जग्मुर्गोकुलाद्दी
नाः कृष्णदर्शनलालसाः १५ तांस्तथा कातरान्वीक्ष्य भगवान्माधवो बलः प्रहस्य किंचिन्नोवाच प्रभावज्ञो ५४ राम
नुजस्य सः १६

श्रीलं १ सितुर्येषां ते १२ तानालक्ष्य गोकुलान्निर्जग्मुरिति तृतीये नान्वयः भयोद्विग्ना भयहेतुभ्यो भीताः ५४
भयेन कंपमाना इति वा १३ न तं विंदंति अतद्विदः १४ पशुवृत्तयः अतिवत्सलाः १५ कातरान्भीतान् १६ श्रीरामः

अ१ न१

भगवंतं लक्ष्यंतिया निर्तैः सूचितया पदव्या मार्गेण १७ पदैर्मार्गे ज्ञानप्रकारमाहतद् इति विशपतेः श्रीकृष्णस्य अन्येषां पदानामंतरां
म५५१ तरे मध्ये तानि तरपोहन गवां श्कीनां मार्गे सत्वराः प्रमत्ताः योगिनस्तत्तदुपाध्यपर्वादेर्यथा परं तत्वं मृगयंति तद्वदिति भावः १८॥

तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः भगवल्लक्षणैर्जग्मुः पदव्यायमुनातटं १७ ते तत्र तत्राब्जयवांकुशाशनि
ध्वजोपपन्नानि पदानि विश्पतेः मार्गं गवामन्यपदांतरांतरे निरीक्ष्यमाणा ययुरंगसत्वराः १८ अंतर्हृदे भुजग
भोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते गोपांश्च मूढधिषणान् परितः पशूंश्च संक्रंदतः परम
८८ कश्मलमापुरार्त्ताः १९ गोप्योनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः ग्रस्तेऽहिना श्र
प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकं २० ताः कृष्णमातरमपत्यमनुप्रविष्टां तुल्यव्य
थाः समनुगृह्य शुचः स्रवंत्यः तास्ता व्रजप्रियकथाः कथयंत्य आसन् कृष्णानने ऽर्पितदृशो मृतकप्रतीकाः
२१ कृष्णप्राणान्निर्विशतो नंदादीन् वीक्ष्य तं ह्रदं प्रत्यषेधत्स भगवान् रामः कृष्णानुभाववित् २२ इत्थं स्व
गोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः आज्ञाय मर्त्यपदवीमनुवर्त्तमानः स्थित्वा
मुहूर्त्तमुदतिष्ठदुरंगबंधात् २३

ततश्च सर्प्पशरीरे वेष्टितं कृष्णं दूरान्निरीक्ष्य गोपांश्च पशूंश्च तथा तथा निरीक्ष्यार्त्ताः परं मोहमापुः १९ प्रियेण श्रीकृष्णेन वि
रहितं त्रैलोक्यं शून्यं ददृशुः २० २१ अनन्यगतिमात्मानमित्यं निरीक्ष्य अत एवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञा
य उरगबंधादुदतिष्ठदित्यन्वयः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्या॰ ईक्षमाणि २

भा॰ पु॰ तस्यप्रमथ्यमानेनवपुषाव्यथितात्मशरीरेभुजंगः कुंडलिमुन्मुच्यतेत्यक्त्वाकुपितः फणानुन्नमय्यश्वसनुकेवलंलक्ष्यमाणः तस्थौ
कथंभूतः श्वसनरंध्रेषुनासाविवरेषुविषयस्यतथाम्बरीषामंडकपाकभाजनंतद्वत्संतप्तानिस्तब्धानिर्यस्यतथा उल्मुकानिमु
रितोवश्याम १ खेषुयस्यसचसच १४ हरिश्च क्रीडन्नूतमसुसर्पपरिससार अतिकरालविषाग्नियुक्तादृष्टिर्यस्यतं जिह्वयाद्विशिखयतिप

तत्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्यक्त्वोन्नमय्यकुपितः स्वफणान्भुजंगः तस्थौश्वसन्श्वसनरंध्रविषां
टी॰ बरीषस्तब्धेक्षणोल्मुकमुखोहरिमीक्षमाणः २४ तंजिह्वयाद्विशिखयापरिलेलिहानंद्वेसृक्किणीह्यतिक
रालविषाग्निदृष्टिं क्रीडन्नमुंपरिससारयथाखगेंद्रोबभ्रामसोप्यवसरंप्रसमीक्षमाणः २५ एवंपरिभ्र
५५ महतोजसमुन्नतांसमानम्यतत्पृथुशिरःस्वधिरूढआद्यः तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाबुजो
खिलकलादिगुरुर्ननर्त २६ तंनर्तुमुद्यतमवेक्ष्यतदातदीयगंधर्वसिद्धमुनिचारणदेववध्वः प्रीत्यामृ
दंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः २७ यद्यच्छिरोनननमतेगशतैकशीर्ष्ण
स्तत्तन्ममर्दखलदंडधरोंघ्रिपातैः क्षीणायुषोभ्रमतउल्बणमास्यतोसृङ्नस्तोवमन्परमकश्मल
मापनागः २८

त१ तिमुखमेव २५ परिभ्रमणेनेवहतमोजायस्यमुन्नतावंसौयस्यतेतस्यमूर्द्धसूर्यनिकराः तेषांस्पर्शेनात्यरुणंपादांबुजंयस्यसः गम ५५
ननर्तकथंचंचलेषुशिरःसुननर्ततत्राह अखिलकलानामादिगुरुः २६ शतैकशीर्ष्णः शतंएकानिमुख्यानिशीर्षाणियस्यत
स्यक्षीणायुषोपिपुनर्भ्रमतः यद्यच्छिरोननमतेतत्तद्धतानजहातिनृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द तदाचअस्यतोमुखभ्योनां
सानिवरेभ्यश्चअसृग्वमन् २८

नस्तो १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स१

पुनरपि पुरुषाउच्चैर्निःश्वसितो यथैत्समुन्नमति गते दाघोते नानुनमयन् अहह अस्मिन्नवसरे हृष्टैर्गंधर्वादिभिः शेषासनः पुराणः पुरुषइव
सयशोदानंदनः पुष्पैःप्रपूजितः यद्वा तदा गंधर्वादिभिः पुष्पैः प्रपूजितो गोपैः पुराणः पुमानिव दृष्टइति यद्वा पुष्पैः सुपूजितइव प्रसन्नः
सन्नुदमयांबभूव हितं कृतवानित्यर्थः २४ अरणं शरणं २० गर्भगंगं नियस्य अतिभरणं अवसन्नं अतिक्रांतं पार्ष्णिः पादपृष्ठ आघ्रंश्री
कृष्णस्य स्थितेविश्वसमानावसानादयायासानाः २१ ताः शरणं प्रपन्नाः सत्यस्तं प्रणेमुः सुविग्नमनसः विकीर्णितचित्ताः भुवि वि

तस्यास्ति भिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसतोरुषोच्चैः नृत्यन्पदानुनमयन्दमयांबभूव पुष्पैः सुपू
जितइवेह पुमान्पुराणः २४ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरुवमन्नृपगात्रः स्मृत्वा चराचरगुरुं पुरु पन्नगन२
षं पुराणं नारायणं तमरणं मनसाजगाम २० कृष्णस्य गर्भजगतोतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणात
पत्रं दृष्ट्वाहिमाद्यमुपसेदुरमुष्य आर्त्ताः पत्न्यः श्लथद्वसनभूषणकेशबंधाः २१ तास्तं सुविग्नमनसो
थपुरस्कृतार्भाः कायं निधाय भुवि भूतपतिं प्रणेमुः साध्व्यः कृतांजलिपुटाः शमलस्य भर्त्तुर्मोक्षेप्सवः श
रणदं शरणं प्रपन्नाः २२ नागपत्न्य ऊचुः न्याय्योहि दंडः कृतकिल्बिषेस्मिंस्तवावतारः खलनिग्रहाय रिपोः
ल१ व१ सुतानामपि तुल्यदृष्टेर्धत्से दमं फलमेवानुशंसन् २३

ल१ तिवस्मिन्नुस्थाने जलादधस्ताद्धा तीरे वा शमलस्य पापात्मनो भर्त्तुर्मोक्षेप्सवः भर्त्तुर्यच्छमलं तं स्यवा भूतपतिं प्राणिमात्रस्य पतिं शर
णदं आश्रयप्रदं २२ प्रथमं तावत्कुपितं भगवंतं दंडानुमोदनेनोपशमयंत्यः स्तुवंति न्याय्योहीति तत्र दंडानुमोदनं षड्भि
र्दशभिः कृष्णहेर्नुतिः प्रार्थनं पंचभिः श्लोकैस्तत्र पन्नगयोषितां नच निग्रहानुग्रहलक्षणं वैषम्यमित्याहुः धत्से दममिति
अनुशंसन् आलोचयन् २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्याहुः अनुग्रह।

भा॰टी॰ पू॰ निग्रहोप्यनुग्रहोयमित्युक्तेइदानीमनुग्रहएवायंननिग्रहइतिना। अस्माकंयस्मात्स्यसर्पत्वंदशप्तेअतस्तन्मूलपापनिवर्तकोदंडोऽ
नुग्रहएवाक्रोधस्त्वनप्रतीयमानोपीत्यर्थः ३४ महांश्चायमनुग्रहइतितस्यपूर्वपुण्यमभिनंदितिनस्यपूर्वपुण्यमभिनंदतितस्य
पूर्वपुण्यमभिनंदतितपइति स्वयंमानरहितेन अन्यमानानंदेननच सर्वजीवयतीतिसर्वजीवः ३५ ननतपश्चादिनिमित्तएषभा
ग्योदयः किंत्वविचिंत्यंतवरूपावैभवमित्याहुः श्लोकत्रयेणकस्यानुभावइतितपश्चादिनाब्रह्मादेर्यापियस्याः श्रियः प्र

अनुग्रहोयंभवतास्तोहिनोदंडोऽसतांतेखलुकल्मषापहः यद्दंदशूकत्वममुष्यदेहिनः क्रोधोपितेऽनुग्रहएवसं
मतः ३४ तपःसुतप्तंकिमनेनपूर्वंनिरस्तमानेनचमानदेन धर्मोथवासर्वजनानुकंपयायतोभवांस्तुष्यतिसर्वजी ५२
५६ वः ३५ कस्यानुभावोस्यनदेवविद्महेतवांघ्रिरेणुस्पर्शाधिकारः यद्वांछयाश्रीर्ललनाचरत्तपोविहायका
मान्सुचिरंधृतव्रता ३६ ननाकपृष्ठंनचसार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यं नयोगसिद्धीरपुनर्भवंवावांछ
तियत्पादरजःप्रपन्नाः ३७ तदेषनाथापदुरापमन्यैस्तमोजनिःक्रोधवशोप्यहीशः संसारचक्रेभ्रमतःशरीरि
णोयदिच्छतःस्याद्विभवःसमक्षः ३८ भ॰।

सादमिच्छतिसाश्रीर्ललनापिश्रीरिवललनाउत्तमास्त्रीयस्यतवांघ्रिरेणुस्पर्शाधिकारस्यवांछयातपआचरत्तदस्य राम
सर्पस्यसकिं ।कोतइतिकोवेत्तीत्यर्थः ३६ यत्तवपादरजःप्रपन्नाःप्राप्ताःपारमेष्ठ्यादपितुच्छमन्यंते ३७ अहोतदेषअप ५९
लतएवप्राप अन्यैःश्रियादिभिरपि पुनःकथंभूतंपादरजः यदिच्छतःसेव्यमेवभवतीतिप्रार्थयतः एवंसमक्षएववि
भवःअपक्षिनासंपद्भवति ३८

अत्यक्ष।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्तुभ्यं भगवते अचिंत्यैश्वर्यादिगुणाय तदुपपादनाय द्वाभिः श्लोकैर्विशेषणानि पुरुषाय पूर्वं तर्यामिरूपेण वर्त्तमानाय महात्म
धा २ नेएवमपि नातिपरिछिन्नाय कुतः भूतावासाय आकाशा आश्रयाय एतदपि कुतः भूताय पूर्वमपि सतः कुतः पराय कारणाय किंच
परमात्मने कारणातीताय अर्थं कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः ज्ञानविज्ञाननिधये ज्ञानं ज्ञप्तिः विज्ञानं चिच्छ
क्तिः तयोर्निधये तत्वाभ्यां पूर्णाय कथं तथात्वं अत उक्तं ब्रह्मणे अनंतशक्तये ब्रह्मणे कथंभूताय अगुणाय अगुणाय अविकारा
य कथंभूताय अनंतशक्तये प्राकृताय प्रकृतिप्रवर्त्तकाय अप्राकृताय वा अप्राकृतानंतशक्तियुक्ताय अयमर्थः अगुण पा १

नमस्तुभ्यं भगवते पुरुषाय महात्मने भूतावासाय भूताय पराय परमात्मने ३९ ज्ञानविज्ञाननिधये ब्रह्मणेनंतशक्तये विज्ञान १
अगुणायाविकाराय नमस्ते प्राकृताय च ४० कालाय कालनाभाय कालावयवसाक्षिणे विश्वाय तदुपद्रष्ट्रे
विज्ञान तत्कर्त्रे विश्वहेतवे ४१ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने त्रिगुणेनाभिमानेन गूढस्वात्मानु पो १
भूतये ४२

त्वादविकारत्वं सत्त्वज्ञप्तिमात्रत्वात् कारणातीतं प्रकृतिप्रवर्त्तकोनंतशक्तिः विज्ञाननिधित्वादीश्वरः कारणं तदुभयात्मनेन नम
इति ४० अनंतशक्तित्वात् कालशक्त्या विश्वस्रष्टृत्वादिरूपेण नमस्यंति कालाय कालस्वरूपाय कालनाभाय कालश विश्वाय ३
क्त्याश्रयाय कालावयवानां सृष्ट्यादिसमयानां साक्षिणे तत आविश्वरूपाय तर्हि किं जडोहं नहि तदुपद्रष्ट्रे न च द्रष्टृमा
त्राय किंतु तत्कर्त्रे न कर्तृमात्राय विश्वहेतवे सर्वकारणरूपाय तदेवाहुः भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने =
आशयश्चित्तं भूतादिरूपाय अतः सर्वकारकरूपायेति अहंकारात्मतया नमस्यंति त्रिगुणेनेति एवं सृष्टेः कार्यत्व
त्रिगुणोभिमानस्तेन गूढास्वाशभूतानामात्मनामनुभूतिर्येन तस्मै ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२

भा॰ पु॰ त्वं त्वहंकारानाश्रितइतिस्तुवंति नमोनंताय अहंकारपरिच्छेदात् अतः सूक्ष्माय अदृश्यत्वात् अतएव कूटस्थाय उपाधिकृतवि
काराभावात् अतएव विपश्चिते सर्वज्ञाय एवंवक्ता स्तोता ३ चिंत्यमायत्वेन स्तुवंति नानावादानुरोधाय अस्ति नास्ति सर्व
त॰ २ ज्ञः किंचिज्ज्ञः बद्धः मुक्तः एकः अनेक इत्यादि नानावादाननुरुणद्धि मायया अनुवर्तते यस्तस्मै किंच वाच्यवाचकशक्तये
अभिधानाभिधेयशक्तिभेदादपि नानात्वेन प्रतीतायेत्यर्थः ४३ अनादृतत्वमेव हेत्वंतरेणापि सूचयंतः स्तुवंति नमः प्र
माणमूलाय चक्षुरादीनां चक्षुरादिरूपाय अतएव कवये स्वयं तन्निरपेक्षज्ञानाय कुतः शास्त्रयोनये वेदात्मकनिश्वा
साय किंच प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ४४ किंच अनादृतैश्वर्यत्वाद्देवचतुर्मूर्तिरूपेण सर्वोपास्यत्वेन

नमोनंताय सूक्ष्माय कूटस्थाय विपश्चिते नानावादानुरोधाय वाच्यवाचकशक्तये ४३ नमः प्रमाण
५८ मूलाय कवये शास्त्रयोनये प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ४४ नमः कृष्णाय रामाय वसुदे
वसुताय च प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ४५ नमो गुणप्रदीपाय गुणात्मच्छादनाय च
गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ४६

स्तं॰ ति॰ नम[illegible] नमः कृष्णायेति श्लोके नारामाय संकर्षणाय वसुदेवसुताय वसुदेवशब्दितं शुद्धं सत्वं तत्र प्रकाशमानाय वा
सुदेवायेत्यर्थः सात्वतामुपासकानां पतये सात्वतां यादीनां पालकाय एवं चतुर्मूर्तये कृष्णाय नम इति ४५ कथं चतुर्मूर्तिरि यतु ... १
ति तदाहुः नमो गुणप्रदीपायेति गुणाः अंतः करणानि तानि प्रदीपयति प्रकाशयतीति तथा तस्मै चित्ताधिष्ठातृत्वेन च यु ३
वकथ २ तुर्मूर्तितेत्यर्थः ननु तथाप्येकस्यैव चतुष्टुं अत आहुः गुणात्मच्छादनाय च गौरेव गुणेरूपासकानां फलत्वे चिन्त्याय आत्मा राम
नमाच्छाद्य नानात्वेन प्रकाशमानायेत्यर्थः ननु कथं तर्हि प्रतीतिरत उक्तं गुणवृत्त्युपलक्ष्याय चित्तादीनां च तत्तदाध्या ५८
वसायादिवृत्तिभिरुपलक्ष्याय उपलक्षणमेवाहुः गुणद्रष्ट्रे तत्साक्षिणे कथंचिदुपलक्ष्य एव न ज्ञेय इत्याहुः स्वसंवि
देऽगोचरायेत्यर्थः ४६ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अगोचरत्वमुपलक्ष्य त्वं च दर्शयं स्तान् नमंति अव्याकृतविहाराय अनतर्क्यमहिम्न इत्यर्थः सर्वव्याकृतसिद्धये सर्वकार्योत्पत्तिप्रकाशहे
तुत्वेनोपलक्षणयोग्यायेत्यर्थः उपलक्षणांतरमाहुः हृषीकेशकारणप्रवर्तक किंविषयलिप्सयान मुनये आत्मारामाय॥
किंसाधनवशेन नहि नहि मौनशीलिने मौनमात्मारामतात्स्वभावाय ४० कुतः परावरगतिज्ञाय स्थूलसूक्ष्मानां गतिज्ञ
त्वेन न क्वापि आसक्तिः मानोयेत्यर्थः अपि च सर्वाध्यक्षाय सर्वाधिष्ठात्रे कुतएतत् अविश्वाय न विश्वं यस्मिन् तन्निषेधविधेय धा ३
विश्वाय च तत्तद्विवर्त्ताधिष्ठानायेत्यर्थः किंच तद्द्रष्ट्रे अध्यासापवादसाक्षिणे अपि च अस्य विश्वा[illegible]ध्यासस्य च तदपवादस्य
च विद्याविद्याभ्यां हेतवे यद्वा अविश्वाय विश्वतैजसाद्यवस्थारहिताय विश्वाय च मायया स्वांशैस्तत्तदवस्थाय [illegible]तद्द्र

अव्याकृतविहाराय सर्वव्याकृतसिद्धये हृषीकेश नमस्तेस्तु मुनये मौनशीलिने ४० परावरगतिज्ञाय सर्वा
ध्यक्षाय ते नमः अविश्वाय च विश्वाय तद्द्रष्ट्रेस्य च हेतवे ४१ त्वं ह्यस्य जन्मस्थितिसंयमान् प्रभो गुणैरनीहो
कृतकालशक्तिधृक् तत्तत्स्वभावान् प्रतिबोधयन् सतः समीक्षयामोघविहार ईहसे ४२ श्रीराम श्रीराम

भा॰१ ष्ट्रे तासामवस्थानां भावाभावसाक्षिणे अन्यत् सर्वगतिज्ञत्व सर्वाधिष्ठातृत्वात्मारामत्वादिभिर्निरतिशयैश्वर्याय तुभ्यं नमः इति ४० लक्ष्मानंतस्मा१
विशेषणैः संकीर्णैः पंचपंचाशता नुतः अहि स्त्रीभिः प्रसन्नावस्तास्तासामिव भवद्भिरिः एवं तावद्दंडानुमोदनेन नमस्कारैः अभ
गवंतं प्रसाद्य इदानीं त्वदधीनानां प्राणिनां कोपराध इत्याशयवत्यः प्रार्थयंते त्वं हीति अस्य लोकस्य जन्मादीन् त्वमेवाकृत
अकरोः ततश्च तास्तान् संस्काररूपेण सतः स्वभावान् घोरत्वादीन् प्रतिबोधयन् ईहसे क्रीडसि यद्वा अस्य जन्मा
दीस्त्वमीहसे इत्यन्वयः कथंभूतः अकृता अनादि यः कालशक्तिस्तां धारयतीति [illegible]तथा अन्यत्समानं ४२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० पू० अनंतस्य तेवैव अमूस्तनवस्तन्यं इति क्रीडोपस्कराः स्तथापि तवाधुना शांताः प्रियाः कुतः सतां धर्मपरिपालनेच्छयाईहतः प्रवर्त्तमा
नस्य अतस्तानवितुं स्थातुः स्थितस्य ५० एवं च तवाप्रियाचरणा... ऽपराधः न हिंसा व्य इति ५१ २ युष्मदनुग्रह अन्येषां मत्कैर्वेतिचे
त्त्राहुः विधेहीति त्वदाज्ञया प्राणिनां नाथा मितिभावः ५३ ५५ यदसद्ग्रहः इति यतः स्वभावोऽसत् ग्रहरूपः यदायत्तः स्वभावा

तस्योवंतः मूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः शांताः प्रियास्ते ह्यधुनाऽवितुं सतां स्थातुश्च ते धर्मप
रिप्सयेहतः ५० अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः क्षंतुमर्हसि शांतात्मन् मूढस्य त्वामजानतः ५१
अनुगृह्णीष्व भगवन् प्राणांस्त्यजति पन्नगः स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां ५२ विधेहि ते
५८ किंकरीणामनुष्ठेयं तवाज्ञया यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो भयात् ५३ श्रीशुक उवाच इत्थं स नाग
पत्नीभिर्भगवान् समभिष्टुतः मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ५४ प्रतिलब्धेंद्रियप्राणः कालि
यः शनकैर्हरिं कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ५५ वयं खलाः सहोत्पत्त्या तामसा दीर्घम कालिय उवाच ३
न्यवः स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ५६ त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्जनं नानास्व
भाववीर्यौजोयोनिबीजाशयाकृति ५७ वयं च तत्र भगवन् सर्पा जात्युरुमन्यवः कथं त्यजामस्त्वन्मायां
दुस्त्यजां मोहिताः स्वयं ५८

दसतिदेहादौ ग्रहः सदुस्त्यज इति ५६ गुणैर्विविधतया सृज्यत इति गुणविसर्जनं तत्रापि नानास्वभावाद्योयस्पतत् गम
५७ आत्माजन्मैनेव उरुमन्युर्येषां ते स्वयं कथं त्यजामः ५८ ५८

ज्य१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि यस्मात् तत्र त्वन्मायात्यागे भवानेव कारणमिति अनुग्रहं विधेहि ममाज्ञया खादनीतीति वि ईश्वर त्वान्निग्रहं विधेहीति ५९ यतो गोभि
र्नृभिश्च नदी भुज्यतामिति ६० न युष्मत्तो भयमाप्नुयात् नस्य युष्माभिर्भयं नोत्पादनीयमित्याज्ञा ६१ इतोपि त्वया निर्गन्तव्यमित्याह

भवान् हि कारणं तत्र सर्वज्ञो जगदीश्वरः अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ५९ श्रीशुक उवाच इत्याकर्ण्य वचः
प्राह भगवान् कार्यमानुषः नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरं स्वज्ञात्यपत्यदाराद्यो गोनृभिर्भुज्यतां नदी ६०
य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ६१ यस्मिन्स्नात्वा मदाक्री
डे देवादींस्तर्पयेज्जलैः उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ६२ द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रि
तः यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं ६३ श्रीशुक उवाच एवमुक्तो भगवता कृष्णेनाद्भुतकर्म
णा तं पूजयामास मुदा नागपत्न्यश्च सादरं ६४ दिव्याम्बरस्रङ्मणिभिः परार्ध्यैरपि भूषणैः दिव्यगंधानुले
पैश्च महत्योत्पलमालया पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजं ६५ ततः प्रीतोभ्यनुज्ञातः परिक्रम्याभिवंद्य
तं सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ६६ तदैव सामृतजला यमुना निर्विषाभवत् अनुग्रहाद्भगवतः
क्रीडामानुषरूपिणः ६७ इति श्रीभागवते महापुराणे दशमस्कंधे कालियनिर्याणं नाम षोडशोध्यायः

योस्मिन्निति त्वयि स्थिते तन्न संभवतीति भावः ६२ न च त्वत्तो गरुडभयं भवेदित्याह द्वीपमिति ६३ ७ इति दशमे षोडशः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स

भा०द०पू० नागसप्रदेशेनागालयंतंनिर्यापयत् वंधून्सुहृदःस्वतःआतान्सुप्तांस्तत्रदवादपात् १ असमंजसंअप्रियं उपहार्यैःसुपर्णोभ
क्षैःसर्पजनैःसर्पापरैर्जनैः वानस्पत्यःवनस्पतेर्मूलेदेयः नागानांतद्बाधापरिहारायबलिर्निरूपितःउपकल्पितः २ ते
चनागाःस्वंस्वंभागंनागजनैर्दत्तंसुपर्णायप्रयच्छंतिततोभीताःगोपीथायरक्षणाय ३ विषवीर्याभ्यांयोमदस्तेनाविष्टःका
द्रवेयःकद्रूपुत्रःगरुडंकदर्थीकृत्यअविगणय्ययद्वाउपहार्यैःसुपर्णभक्ष्यैःसर्पाएवजनास्तेनागानांसंबधीयस्मिन्नेकौ

राजोवाच नागालयंरमणकंकस्मात्तत्याजकालियः कृतंकिंवासुपर्णस्यतेनैकेनासमंजसं १ श्रीशुक
उवाच उपहार्यैःसर्पजनैःमासिमासीहयोबलिः वानस्पत्योमहाबाहोनागानांप्राङ्निरूपितः २
पर्वइणि स्वंस्वंभागंप्रयच्छंतिनागाःपर्वणि गोपीथायात्मनःसर्वेसुपर्णायमहात्मने ३ विषवीर्यमदाविष्टः
५९ स्वयंतं काद्रवेयस्तुकालियः कदर्थीकृत्यगरुडंबुभुजेबलिं ४ तच्छ्रुत्वाकुपितोराजन्भगवान्भगवत्प्रियः
विजिघांसुर्महावेगःकालियंसमुपाद्रवत् ५ तमापतंतंतरसाविषायुधःप्रत्यभ्ययादुच्छ्रितनैकमस्त
कः दद्भिःसुपर्णंव्यदशद्ददायुधःकरालजिह्वोच्छ्वसितोग्रलोचनः ६ तंतार्क्ष्यपुत्रःसनिरस्यमन्यु
मान्प्रचंडवेगोमधुसूदनासनः पक्षेणसव्येनहिरण्यरोचिषाजघानकद्रूसुतमुग्रविक्रमः ७

नागोदीयतेतथाकृतोयोबलिःसुपर्णायनिरूपितः तत्रस्वंस्वंभागंसर्वेनागाःप्रयच्छंतिकालियस्तुनप्रयच्छतिकिंतुतैर्दत्तमपितं ५९
बलिंस्वयमेवबुभुजे ४५ विषमेवायुधंयस्यसः प्रत्यभ्ययात्प्रतिजगाम उच्छ्रितनैकमस्तकःउन्नमितानेकफणाःदंष्ट्रा
युधःदंतायुधः ६ करालजिह्वःश्वासात्उच्छ्वसितोग्रलोचनश्चउच्छ्वसितानिउज्जृंभितानिउग्राणिलोचनानिय
स्यसःतार्क्ष्यपुत्रोगरुडःमधुसूदनस्यआसनंयस्मिन्सः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नस्य गरुडस्यागम्यमगाधतयाच दुरासदं ८ नद्गम्यत्वे न कारणमाह तत्रेति निवारितोपि ९ ॥ लेलिहः सर्प्पस्तत्राचात्सी
त् जांबुनदं सुवर्णं तेनालंकृतं १२ असवइंद्रियाणि प्रमोदनिभृतात्मनः आनंदपूर्णमानसः १४ खंडू हाल्ववेष्टः नगाः वृक्षा

सुपर्णपक्षाभिहतः कालियोतीवविक्लवः ह्रदं विवेश कालिंद्यास्तदगम्यं दुरासदं १८ तत्रैकदा जलचरं गरुडो भक्ष्य
मीप्सितं निवारितः सौभरिणा प्रसह्य क्षुधितो हरत् ९ मीनान् सुदुःखितान् दृष्ट्वा दीनान्मीनपतौ हते कृपया सौभ
रिः प्राह तत्रत्यक्षेममाचरन् १० अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्य
हं ॥ तं कालियः परं वेद नान्यः कश्चन लेलिहः अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः १२ कृष्णं ह्रदा
द्विनिःक्रांतं दिव्यस्रग्गंधवाससं महामणिगणाकीर्णं जांबूनदपरिष्कृतं १३ उपलभ्योत्थिताः सर्वे लब्ध
प्राणा इवासवः प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे १४ यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव
कृष्णं समेत्य लब्धेहा आसंल्लब्धमनोरथाः १५ रामश्चाच्युतमालिंग्य जहासास्यानुभाववित् नगा गावो वृषा
वत्सा लेभिरे परमां मुदं १६ नंदं विप्राः समागत्य गुरवः सकलत्रकाः ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवा ल २
त्मजः १७ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे नंदः प्रीतमना राजन् गाः सुवर्णं समादिशत् यशोदापि
महाभागा नष्टलब्धप्रजा सती परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः तां रात्रिं तत्र राजेंद्र क्षुत्तृड्भ्यां श्रमकर्शि
ताः ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः २०

अपि पूर्वं शुष्का सन्तः सद्य एव विरूढा इत्यर्थः १६ तेविप्रास्तु चुः १७ १८ नष्टलब्धप्रजा नष्टप्राया पुनर्लब्धाः प्रजा यया सा १९
श्रमेण च कर्षितास्तु उपकूलतः कूलप्रांते २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ कालोग्नेर्मृत्युरूपादग्नेः नमत्सोर्विभिमः किंतुत्वच्चरण वियोगाद्धित्याहुः नशक्नुमइति विमोहानहिंदंडे नततः स्वशरणं गतानू गो
पृ॰ पानपादनंतोसावनेतवनवह्निनः २४ इतिदशमेसप्तदशः अष्टादशानंतोग्रीष्मवंसंतगुणलक्षितं अघातयद्बलेनालंप
लंबलीलयाहरिः १ कृत्वान्तत्यफणाग्रेषु कालियस्यसंकोतुकं बलप्रलंबतुंगासमारोहयदरातिहा २ गोपालच्छद्ममायया गोपालनं

नदाशु चिवनाङ्कृतादावाग्निः सर्वतोव्रजं सुप्तनिशीथआवृत्यप्रदग्धुमुपचक्रमे २१ ततउत्थायसंभ्रांतादह्य
मानाव्रजौकसः कृष्णंययुस्तेशरणं मायामनुषमीश्वरं कृष्णकृष्णमहाभागहेरामामितविक्रम एषघोर
तमोवह्निस्तावकानूग्रसतेहिनः २३ सुदुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो नशक्नुमस्त्वच्चरणंसं
६० त्यक्तुमकुतोभयं २४ इत्थंस्वजनवैक्लव्यं निरीक्ष्यजगदीश्वरः तमग्निमपिवत्तीव्रमनंतोनंतशक्तिधृक्
२५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकालियदमनोनामसप्तदशाध्यायः श्रीशुकउवाच अथकृ
ष्णः परिवृतोज्ञातिभिर्मुदितात्मभिः अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितं १ व्रजेविक्रीडितोरेवंगो
पालच्छद्ममायया ग्रीष्मोनामर्तुरभवन्नातिप्रेयान्शरीरिणां १ सचवृंदावनगुणैर्वसंतइवलक्षितः"
यत्रास्ते भगवान्साक्षाद्रामेणसहकेशवः ३ यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकं शश्वत्तच्छीकरर्जीषद्रुम निर्झर
मंडलमंडितं ४
घमयस्तांतया २ ३ वसंतसाम्यमाह चतुर्भिः यत्रग्रीष्मेपिनिर्झराणां निर्ह्रादेनघोषेणनिवृत्तस्वनाः छन्नध्वनयो झिल्लि राम
काकंगरध्वनिसूक्ष्मकीटायस्मिन् तथाभूतंवृंदावनंभवति किंच शश्वत्तेषांचनिर्झराणां शीकरैः अंबुकणैः ६०
ऋजीषाः स्निग्धाः येद्रुमास्तेषांमंडलेनमंडितं ४ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र ग्रीष्मे वने वा निदाघो ग्रीष्मः तेन तत्कालीनवह्न्यर्काभ्यां भवतीति यो दवस्तापः अतिशाड्वले अतिहरिततृणकीर्णे यद्वा अतिक्रान्तशाड्वले
पि स्थाने ननु शाड्वलमेव कुतस्तत्राह अगाधेति अगाधानि तोयानि यासां तासां ह्रदिनीनां नदीनां तटस्य ऊर्मिभिः वा ऊर्मिभिः पुलिनैः द्रवत्पुरीषं
पंको यस्या भुवः रसं शाड्वलितं शाड्वलरूपतां च विषवदुल्बणा अपि सूर्यरश्मयो न गृह्णन्तीति ५ नदन्नदं तं श्चित्रा मृगा द्विजा

सरित्सरः प्रस्रवणोर्मिवायुना कह्लारकंजोत्पलरेणुहारिणा न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवो तिशाड्वले
५ अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समन्ततः न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाड्वलितं
च गृह्णते ६ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजं गायन्मयूरभ्रमरं कूजत्कोकिलसारसं ७ क्रीडिष्यमाण
स्तत्कृष्णो भगवान्बलसंयुतः वेणुं विरणयन्गोपैर्गोधनैः संवृतो विशत् ८ प्रवालबर्हस्तवकस्रग्धातुकृतभू
षणाः रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् वेणुपाणितलैः
शृंगैः प्रशशंसुरथापरे १० गोपजातिप्रतिछिन्ना देवा गोपालरूपिणः ईडिरे कृष्णरामौ च नटा इव नटं नृप
११ भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् १२ क्वचिन्नृत्यत्सु चा
न्येषु गायकौ वादकौ स्वयं शशंसतुर्महाराज साधु साध्विति वादिनौ १३ श्रीराम श्रीराम श्रीराम

अयस्मिन् गायन्तो मयूरा भ्रमरा यस्मिन् कूजन्तः कोकिलाः सारसा यस्मिन् ७ तत आविशत् ८ ११ काकपक्षाः चूडा
करणात् प्राक्तनकेशाः भ्रमणादिप्रकारैः नियुद्धं बाहुयुद्धं तेन चिक्रीडतुः १२ १३ श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्प१ का१

भा०द०पू० कुंभैः कुंभरहसफलैः अस्पर्शत्वेनेत्रबंधश्चतदीयैः मृगाणां खगानां च चेष्टया १४ दर्दुरप्लावैः मंडुकस्तुतिगतिभिः स्पंदोलियालोलालंबने
नृपाणामिव लीलया १५ नद्यद्रिद्रोणीकुंजानिचेतसु १६ चारयंतौ सतौ तद्वनेऽस्मिन्वने तयोर्जिहीर्षया १७ ८ यथायथं

क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया १४ क्वचिच्च दर्दुरप्लावैर्विविधैरु
पहासकैः कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया १५ एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने नद्यद्रिद्रोणी
कुंजेषु काननेषु सरस्सु च १६ पशूंश्चारयतोर्गोपैस्तद्वने रामकृष्णयोः गोपरूपी प्रलंबोऽगादसुरस्तज्जिहीर्षया
१७ तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् १८ तत्रोपहूय गोपाला
६१ न्कृष्णः प्राह विहारवित् हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथं १९ तत्र चक्रुः परिवृढौ गोपा रामजनार्द
नौ कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे २० आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः यत्रारोहंति जे
तारो वहंति च पराजिताः २१ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः
रामसंघट्टिनो यर्हि श्रीदामवृषभादयः क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप २३ उवाह कृष्णो भगवा
न्श्रीदामानं पराजितः वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं २४ अविषह्यं मन्यमानः कृष्णं दानवपुंगवः वह
न्द्रुततरं प्रागादवरोहणतः परं २५

स७१ योबलाधनुरूपं द्वंद्वीभूय १९ परिवृढौ नायकौ तत्र के च न संघट्टिनः कृष्णप ६१
क्षीयाः २०१ वाह्यमानाः पृष्ठेनोह्यमानाः २२ ४ कृष्णदृष्टिवंचनाय अवरुह्य तस्मिन्नित्यवरोहणमर्यादातः परं दूरमगात् २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धराणिधरेंद्रवतूं गौरवं यस्य तं निजं आसुरं वपुरास्थितः पुरटपरिछदः सुवर्णालंकारः तडिद्युमानु विद्युद्दीप्तिमानित्यलंकारोपमा उडु
पतिवाडितिरोमोपमा उडुपतिं वहतीत्युडुपतिवाट् यदियथा चित्रस्थानपुस्थिता विद्युताभवं त्रित्तपरिचोडुपतिनं तदासांबुदाय थाभा
बे१ तितदनूं भावित्यर्थः २६ अलमतिवेगेन प्रदीप्तदृशोयस्मिन् प्रदीप्तदृग्भ्रुकुटितटसलग्नाउग्रादंष्ट्रायस्मिन् तच्चतंञ्चेतिवा उज्व ११२१

तमुद्वहन् धरणिधरेंद्रगौरवं महासुरो विगतरयो निजं वपुः समास्थितः पुरटपरिछदो बभौ तडिद्युमानुडुपतिवाडिवां
बुदः २५ निरीक्ष्य तद्वपुरलमंबरेचरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ज्वलच्छिखं कटककिरीटकुंडलत्विषाऽद्भु
तं हलधर ईषदत्रसन् २६ अथागतस्मृतिरभयो रिपुं बलो विहाय सार्थमिव हरंतमात्मनः रुषाहनच्छिरसि
दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा २७ स आहतः सपदि विशीर्णमस्तको मुखाद्वमन्रुधिरम
पस्मृतोऽसुरः महारवं व्यसुरपतत्समीरयन् गिरिर्यथा मघवत आयुधाहतः २८ दृष्ट्वा प्रलंबं निहतं बलेन
बलशालिना गोपाः सुविस्मिता आसन् साधु साध्विति वादिनः २९ आशिषोभिगृणंतस्तं प्रशशंसुस्तदर्हणं प्रे
त्यागतमिवालिंग्य प्रेमविह्वलचेतसः ३० पापे प्रलंबे निहते देवाः परमनिर्वृताः अभ्यवर्षन् बलं माल्यैः श
शंसुः साधु साध्विति ३१ इति श्रीभागवते महापुराणे दशमस्कंधे प्रलंबवधो नाम अष्टादशोध्यायः १८

ज्वलंत्यः शिखाः केशायस्मिन्तत् २७ आगतस्मृतिरभय इव आत्मनः सार्थं गोपसमूहं विहाय हरंतं रिपुं अहनत् यद्वा विहाय
साआकाशमार्गेण आत्मनः आप्तं अर्थमिव हरंतमिति वज्ररंहसा वज्रवेगेन मुष्टिना २८ अपस्मृतः गतस्मृतिः ११
महारवं समीरयन् २९ ३० तदर्हणं प्रशंसार्हं ३१ २ इति दशमे अष्टादशः श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विविशुः २

भा॰ १॰ १ ऊनविंशे निविष्टं तु गोपं गोकुलमच्युतः मुंजारण्यमरण्याग्नेररक्षत्तन्निपानतः दूरचारिण्यः १ वनाद्वनांतरं निविशंत्यो दावेन तर्षिताः तृषिताः क्रंदत्यः
इषीकाटवीं अत्युच्छ्रितघनतृणां विशापारण्यां २ कृष्णरामौ आदिर्येषां तेन तुतो ३ ता सां गवां खुरैर्दद्भिश्च छिन्नैस्तृणैर्गोष्पदैरंकि

श्रीशुक उवाच क्रीडाशक्तेषु गोपेषु तद्गावो दूरचारिणीः स्वैरं चरंत्यो विविशुः तृणलोभेन गह्वरे १ अजा गावो महिष्य
निवि २ श्च निर्विशंत्यो वनाद्वनं ईषीकाटवीं निर्विविशुः क्रंदंत्यो दावतर्षिताः २ तेपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा जाता
वि २ नुतापा न विदुर्विचिन्वंतो गवां गतिं ३ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां मार्गमन्वगमन्सर्वे नष्टाजीव्या विचे
तसः ४ मुंजाटव्यां भ्रष्टमार्गं क्रंदमानं स्वगोधनं संप्राप्य तृषिताः श्रांतास्ततस्ते [illegible] ५ ता आहूता
भगवता मेघगंभीरया गिरा स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ६ ततः समंताद्दवधूमकेतुर्यदृच्छयाभूत्क्षय
६२ कृद्वनौकसां समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंगमान्महान् ७ तमापतंतं परितो दवाग्निं गोपाश्च गा
वः प्रसमीक्ष्य भीताः ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ८ कृष्ण कृष्ण महावीर्य हे रामामित
नी २ विक्रम दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्हथः ९ नूनं त्वद्बांधवाः कृष्ण न चार्हंत्यवसीदितुं वयं हि सर्वधर्मज्ञ त्वन्ना
थास्त्वत्परायणाः १० श्रीशुक उवाच वचो निशम्य कृपणं गोपानां भगवान्हरिः संमीलयत मा भैष्ट लोचनानीत्य
भाषत ११ तथेति मीलिताक्षेषु भगवानग्निमुल्बणं पीत्वा मुखेन तान्कृच्छ्राद्योगाधीशो व्यमोचयत् १२ श्रीरा

भा। तेऽश्वप्रदेशे तृणैर्वा मार्गमन्वगमन् नष्टाजीव्या गतजीविकासाधनाः ४ मुंजाटव्यपि सैव इषीकाटव्येवा ५ ६ गोपानां नाशहेतुर्वे ६२
नवह्निः सर्वतः प्रादुरभूत् सारथिना वायुना ७ ११ कृच्छ्रान्नूनं कृच्छ्रप्रवेशात् ८ श्रमादिजनितान् १२ श्रीराम श्रीराम॥

गवां २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः क्षणमेव भांडीरं नीता तान् गा मोचयदित्यर्थः क्षणेनैव भांडीरं प्रापिताः ततश्चक्षीणपुन्मील्य विस्मिताः १३ ६ श्रीदामादिस्वगोपानां-
स्वागमारुह्य हृष्यतो स्वैश्वर्यमाविरकरोद्दहनवह्निनिपानतः १ इति दशमकं नवविंशः विंशे प्रावृट्शरच्छोभावर्णनेन वनो चिताः प्रा
प्र। वृट्क्रीडा निरूप्यंते गोपराय युजा हरेः १ हृयादयापमानेन प्रावृट्शरद्दतु श्रियेः वर्णनं तत्कुतेश्वर्यस्वकर्मलीलाविवक्षया २ १ १
ततश्चेते क्षीणपुन्मील्य पुनर्भांडीरमापिताः निशम्य विस्मिता आसन्नात्मानं गाश्चमोचिताः १३ कृष्णस्य योगवीर्यं त
द्योगमायानुभावितं दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरे ऽमरं १४ गाः संनिवर्त्य सायाह्ने सहरामो जनार्दनः ॥
प्र३ वेणुं विरणयन् गोष्ठमगाद्गोपैरभिष्टुतः १५ गोपीनां परमानंद आसीद्गोविंददर्शने क्षणं युगशतमिव यासां येन
विनाभवत् १६ इति श्रीभागवते महापुराणे दशमस्कंधे दावाग्निमोक्षणं नामैकोनविंशोऽध्यायः श्री
शुक उवाच तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च १ गोप
वृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः मेनिरे देवप्रवरौ रामकृष्णौ व्रजं गतौ २ ततः प्रावर्तत प्रावृट् सर्वसत्त्वसमु
द्भवा विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ३ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयित्नुभिः अस्पष्टज्योति
राच्छन्नं ब्रह्मेव सगुणं बभौ ४
तत्र प्रावृड्वर्णनं ततश्चादिह्वा विंशस्य सर्वेषां प्राणिनां सम्युक् उत्पत्तितो जीवनतश्चयस्याः प्रावृट् विद्योतमाना परिधयः परिवेषा यस्या
हि शाखायस्याः सा विस्फूर्जितं संक्षुभितं नभस्तलं यस्यां सा ३ सांद्रैर्निबिडैर्नीलांबुदैर्विद्युद्गर्जितसहितैराच्छन्नं सगुणं गुणै
राच्छन्नं जीवाख्यं विद्युद्गर्जितांबुदानां सत्त्वरजस्तमोभिरूपमा ४ श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पृ॰ पर्जन्यः सूर्यः स्वगोभिः काले यथा चित्तसमया अत्र राजोपमाकारा दानतः समये पुनर्दानतश्च सूचिता ५ अस्य विश्वस्य प्राणमाप्या
यनकरं जीवनमुदकं मुमुचुः कृपालवा यथा तत्सज्जनं निरीक्ष्यानुकंपमानाः तदाप्यायनाय स्वजीवनमपि त्यजंतीति तद्वन्महान्तोभि घाम्र
संतो॰ १ डिनैत्रे स्तन्न निरीक्ष्य विश्वं वायुभिर्वेपिता जीवनं मुमुचुरिति ६ तपसा ग्रीष्मेण कृशा देवमीढाः पर्जन्या सिक्ता वर्षीयसी उच्छ्वन्ना

शेषमासान्निपीनयगूभूम्याश्चोदमयं वसु स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ५ तपः कृशा देवमीढा आसी
द्वर्षीयसी मही यथैव काम्यतपसस्तनुः संप्राप्य तत्फलं ६ नैडित्वंतो महामेघाश्चंडश्वसनवेपिताः प्राणनं
जीवनं ह्यस्य मुमुचुः करुणा इव ७ निशामुखेषु खद्योतास्तमसा भांति न ग्रहाः यथा पापेन पाषंडा न हि वेदाः क
लौ युगे ८ श्रुत्वा पर्जन्यनिनदं मंडूका व्यसृजन् गिरः तूष्णीं शयाना प्राग्यद्वद्ब्राह्मणा नियमात्यये ९
आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः पुंसो यथा स्वतंत्रस्य देहद्रविणसंपदः १० हरिता हरिभिः
शष्पैरिंद्रगोपैश्च लोहिता उच्छिलींध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ११ क्षेत्राणि सस्यसंपद्भिः कर्ष
काणां मुदं ददुः धनिनामनुतापं वै दैवाधीनमजानतां १२ श्रीराम श्रीराम श्रीराम श्रीराम

पुष्टा काम्यतपोयस्य तस्य तनुः कामान् संप्राप्य यथेति ७ ८ नित्यकर्मावसाने आचार्यनिनदं श्रुत्वा तच्छिष्या यथा अधीयंते तद्ध राम
अनुशुष्यंती १ दिति ९ अनुशुष्यंत्यः अस्वतंत्रस्य इंद्रियपरतंत्रस्य निरंकुशस्येति वा १० हरिभिर्नीलैः शष्पैर्बालतृणैर्नीलवर्णा धिचित्र क्वापि ६३
दिंद्रगोपैः कीटविशेषैर्लोहिता तत्रतत्र उच्छिलींध्रैः छन्नाकारैः उद्भिदैः कृतच्छाया नृपाणां राज्ञां श्रीः सेनासं
पदिव ११ क्षेत्राणि तत्तदाहितस्त्र विच्छेदलसंतः प्रियं स्वादयामुदं ददाति विच्छेदे शुष्यंतोनुतापं चेति १२

स्वतंत्रस्य २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविभक्तम् अविभक्तः यथा हरिनिषेवं येन तिहरिसेवायां प्राप्तत्वात् हि स एव सर्वं चिराभवं तिनस्या एव परमधर्मत्वात् सुखत्वाच्च तदृष्टिरिति १३ कामात्के कामवासनायुक्तो मित्रिश्वसनो मिसाम्यं गुणे विषये युज्यत इति तथा इति सरित्संगति साम्यं १४ अधोक्षजएवचेतोयस्यांते १५ असंस्कृताः अक्षुण्णाः नाभ्यस्यमाना इत्यसंस्कृता साम्यं कालेन चाहता इति तृणाच्छादन साम्यं १६ यथा कामिनः

जलस्यलोकाः सर्वेन ववारिनिषेवणायाः अविभक्तचिरं रूपं यथाहरिनिषेवया १३ सरिद्भिः संगतः सिंधुर्बुद्धिभेश्वसनो मिमान् अपक्वयोगिनश्चित्तं कामात्के गुणयुग्यथा १४ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः १५ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव १६ लोकबंधुषु मेघेषु विद्युतश्चलसौहृदाः स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव १७ धनुर्वियति माहेंद्रं निर्गुणं च गुणिन्यभात् व्यक्ते गुणव्यतिकरे गुणवान् पुरुषो यथा १८ न रराजोडुपश्छन्नः स्वज्योत्स्ना राजितैर्घनैः अहंमत्या भासितया स्वभासा पुरुषो यथा १९ मेघागमोत्सवा हृष्टाः प्रत्यनंदन् शिखंडिनः गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे २० पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः प्राक्क्षामास्तपसा श्रांता यथा कामानुसेवया २१ श्रीराम श्रीराम

ग१ पुंश्चल्यः १७ निर्गुणं ज्यारहितमपि गुणिनि र्जितशत्रुबलेति आभात् अशोभत गुणव्यतिकारात्मके व्यक्ते प्रपंचे अगुणवानुनिगुणः पुरुषोयं यथेति १८ स्वभासा भासितया अहं मन्ये इति स्वचेतन्येनेव प्रकाशितेन नाहंकारेण छन्नो जीवो यथा यद्वा हविहानूदानेवेत्याश्यरइति स्वप्रतीत्ये वारापितेयति १९ मेघागमेनात्सवो येषां अतो हृष्टाः २० नानामूर्तयः अनेकदेहरूपाः २१

भा॰ द॰ पू॰ अशांतानि पंककंटकादियुक्तानि रोधांसि तटानि येषां तेष्वपि स्त्रुषु नितरामवसन् सारसाः चक्रवाकाः अशांतानि घोराणि अनुपरतानि वा कृत्यानि येषु तेष्वपि गेहेषु २२ ईश्वरे इंद्रे २३ नुन्नाः प्रेरिताः आशिषः कामान् विश्वतर्यो राजानः वणिजां पतयो वा द्विजेरिताः पुरोहितेरिताः २४ प्रावृषि कृष्णो क्रीडां वर्णयति एवं वनमिति सप्तभिः वर्षिष्ठं समृद्धं २५ ६ वनौकसः पुलिंदाः प्रमु

सरस्वशांतरोधस्सुनूषुरंगापि सारसाः। गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशयाः। २२ जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे पाषंडिनामसद्वादैर्वेदमार्गाः कलौ युगे २३ व्यमुंचन् वायुभिर्नुन्ना भूतेभ्योऽथामृतं घनाः ६८
यथाशिषो विश्वतयः काले काले द्विजेरिताः २४ एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजंबुमत्। गोगोपालैर्वृतो
रंतुं सबलः प्राविशद्धरिः २५ धेनवो मंदगामिन्य ऊधोभारेण भूयसा ययुर्भगवताहूता द्रुतं प्रीत्या स्नुत
६४ स्तनीः २६ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः जलधारा गिरेर्नादादासन्ना ददृशे गुहाः २७ क्वचिद्व
नस्पतिक्रोडे गुहायां चाभिवर्षति निर्विश्य भगवान् रेमे कंदमूलफलाशनः २८ दध्योदनमुपानीतं
शिलायां सलिलांतिके संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः २९ शाड्वलोपरि संविश्य चर्वतो
८ मीलितेक्षणान् तृप्तान्वत्सान् वत्सतरान् गाश्च स्वोधोभरश्रमाः ३० प्रावृट्श्रियं च तां वीक्ष्य सर्वभू
तमुदावहां भगवान् पूजयांचक्रे आत्मशक्त्युपबृंहितां ३१ श्रीराम श्रीराम श्रीराम श्री

दिता भगवान् ददृशे तथा वनराजीः मधुच्युतः मधुस्रावा ददृशे गिरेः सकाशाज्जलधाराः तासां च नादान् आसन्नानि कंद राम
१२ वर्तिनीः गुहाश्च पर्वतनो कुसः प्रमुदिता आसन् तथा वनराजयः मधुच्युता आसन् गिरेर्जलधारा आसन् ताश्च वस ६४
तान् ददृशे सर्वतो ददृशे भगवान् तथा धाराणां नादान् गुहाश्चेति २७ २८ २९ ३० ३१
ओ २

वनराजीः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरदं वर्णयति एवं निवसतोरित्यष्टादशभिः विगलितानि अभ्राणि यस्यां सा स्वच्छानि अंबूनि यस्यां सा अपरुषः शांतो निलो यस्यां सा
च सा च ३२ नीरजानां उत्पत्तिर्यस्यां तया शरदा हेतुना नीरजानामुत्पत्त्या वा ३३ व्योम्नः इति व्योमादीनां चतुर्णां चतुरो मलान् शर
द् हरत् आश्रमिणां कृष्णे जाता भक्तिर्यथा अशुभमसुखं हरति यथा हि ब्रह्मचारिणां गुर्वर्थोदकाहरणकुंभश्रमं यथा भक्ति
र्हरति तया पूर्णस्य तेनानुपयोगात् गुरुभिरपितया कृतार्थस्य तत्तीर्थानियोगात् एवं वान्नादं मे यं शरज्जहार यथा च गृही ग्रस्या

एवं निवसतोस्तस्मिन् रामकेशवयोर्व्रजे शरत्समभवद्व्यभ्रा स्वच्छांब्वपरुषानिला ३२ शरदा नीरजोत्पत्त्या
नीराणि प्रकृतिं ययुः भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ३३ व्योम्नोब्दं भूतशावल्यं भुवः पंकमपां मलं १५२
शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथाशुभं ३४ सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः यथा त्यक्तैष
णाः शांता मुनयो मुक्तकिल्विषाः ३५ गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवं यथा ज्ञानामृतं काले ज्ञा
निनो ददते न वा ३६ नैवाविदन् क्षीयमाणं जलं गाधजलेचराः यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः

णोपत्त्यादिसांकार्यं भक्तिर्हरति विविक्तवासरुच्युत्पन्नः तथाभूतानां शावल्यं सांकार्यं शरत् वर्षासु हि [illegible] संकुला निव हि२
संति यथा च वनस्थस्य मलधारणक्लेशं भक्तिर्हरति एवं भुवः पंकं शरत् यथा च यतीनां कामादिवासनामलं श्रीकृष्ण
भक्तिर्हरति एवमपां मलं शरद्धरति ३४ त्यक्तैषणाः त्यक्ता पुत्रवित्तलोकैषणा यैस्ते ३५ गिरय इति अयं भावः न हि सुप्र
ध्यायाः केऽपि विद्यामिव ज्ञानिनो ज्ञानामृतं सर्वतो वितरंति अपितु कृपया क्वचिदेव एवं गिरयः शिवं निर्मलं
तोयं क्वचिन् मुमुचुः क्वचिन्न पुनः प्राक्पीवसर्वदेति ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द॰ पू॰ गाधेष्वल्पजले चरंतीति तथोक्ता मीनादयः अविंदन्नूलभिरे ३९ शनैः शनैः शनैरिति तत्र ममता किंपंके अहंतामिव आमतां अपचक्तां जहुरिति ३९ आत्मन्युपरतसक्तक्रिया मुनिरिव निश्चलांबुः सपदयुपरतागमनिरुद्धत्वं वदुबाषड्वल्लभोंव भूवेति ४० केदारेभ्यो बद्धशालिक्षेत्रेभ्यो वद्रैः सेतुभिः स्रोतस्नूतनाः परं स्वभावात् प्राणेरिंद्रियस्त्वान्निरोधनं इंद्रियप्रत्याहारेण ४१ देहाभिमानजं बोधं इव व्रजयोषितां मुकुंद इवेत्यर्थः ४२ शरत्काले विमलतारकायस्मिन् तत्त्तत्शब्दब्रह्मणो विदस्मार्थानि

गाधवारिचरास्तापमविंदन् शरदर्कजं यथा दरिद्रः कृपणः कुटुंब्यविजितेंद्रियः ३९ शनैः शनैर्जहुः पंकस्थ
७२ लान्यामं वीरुधः यथाहं ममतां धीराः शरीरादिष्वनात्मसु ३९ निश्चलांबुरभूत्तूष्णीं समुद्रः शरदागमे
आत्मन्युपरते सम्यक् मुनिर्व्युपरतागमः ४० केदारेभ्यस्त्वपोगृह्णन् कर्षकाः दृढसेतुभिः यथा प्राणैः श्रव
६५ ज्ञानं तन्निरोधनयोगिनः ४१ शरदर्कांशुजांस्तापान् भूतानामुडुपोहरत् देहाभिमानजं बोधं मुकुंदो
व्रजयोषितां ४२ खमशोभत निर्मेघं शरद्विमलतारकं सत्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनं ४३ अखं
मंडलो व्योम्नि रराजोडुगणैः शशी यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ४४ आश्लिष्य समशीतो
ष्णं प्रसूनवनमारुतं जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ४५ गावो मृगाः खगा नार्यः पुष्पिण्यः
शरदाभवन् अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ४६ श्रीराम श्रीराम श्रीराम

पूर्वोत्तरमीमांसा निर्णीतान् दर्शयतीति तथा ४३ ४ समः अन्यूनाधिकः शीतश्च उष्णश्च तं न तु गोप्यः कृष्णाहृतचेतस
स्तेन तासां सुदुःसहइति यद्वानकार उपमार्थः तथा कृष्णद्वितसङ्गित चेतसा कृष्णमाश्लिष्य यथैषु स्थिताः ४५ ६५
पुष्पिण्यो गर्भिण्यः अन्वीयमानाः स्वपतिभिर निर्द्धत्तोपि चल्लादनुगम्यमाना ईश्वराराधनार्थाः क्रियाबलात् फलैरनु

स्वरपैः १ चैत्र २ ५३

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुमुत् कुमुदं कुत्सितं मुत् यस्य इति दस्युसाम्यं ४७ आग्रयणैः नवान्नप्राशनैर्वैदिकैरिंद्रियार्थैर्लौकिकैश्च महोत्सवैः कालभ्यां राम
कृष्णाभ्यां दर्शनादि महोत्सवाभ्यां ४८ वणिजा यतयो नृपाः स्नानकाश्च दृष्टाः दशभावर्षरुद्धाः संतो निर्गम्यार्थान्वाणिज्यार्ज स्वा अ
विया१ ध्यं धदिग्विजयं दीनुं प्रपेदिरे प्रापयं तयपामत्र योगादिसिद्धाः आयुषा रुद्धाः काल आगते स्वपिंडानु योगादिप्राप्यान्देवा
दिदेहानिति ४९ इति दशमे विंशतितमः एकविंशे शरद्रम्यवृंदावनगतहरेर्वेणुरवमाकर्ण्य गोपीभिर्गीतमीर्यते १ उ लर१

उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना राज्ञा तु निर्भया लोका यथा दस्यून्विना नृप ४७ पुरग्रामेष्वाग्रयणैरिंद्रियै
श्च महोत्सवैः बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ४८ वणिग्मुनिनृपस्नाता निर्गम्यार्थान्प्रपेदिरे वर्षरुद्धा य
था सिद्धाः स्वपिंडान्काल आगते ४९ इति श्रीभागवते महापुराणे दशमस्कंधे शरदृतुवर्णनो नाम विंशतितमोध्या
यः श्रीशुक उवाच इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः १ कुसु गो
मितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं मधुपतिरवगाह्य चारयन्गाः सहपशुपाल
ले बश्चुकूजवेणुं २ तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयं काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योन्ववर्णयन् ३
तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं नाशकन्स्मरवेगेन विक्षिप्तमनसो नृप ४ श्रीराम श्रीराम

इत्थमेवंभूतं वनं तदेवाह शरदा स्वच्छानि जलानि यस्मिन् तत् वायुना वातं अनुगतं तदेव व्याप्तमित्यर्थः ततश्च कुसुमि अनुकंपित
तवनराजिषु शुष्मिणो मत्ताः भृंगा द्विजाश्च तेषां कुलानि तैर्घुष्टाः सरांसि सरितः महीध्राश्च यस्मिन् तद्वनं कृष्णोव
गाह्य प्रविश्य वेणुमवादयत् २ ततः कृष्णस्य वेणुगीतं स्मरस्य उदयो यस्मात्तत् आश्रुत्य श्रुत्वा परोक्षं यथा भ
वति तथा व्रजे स्थितत्वात् ३ विक्षिप्तमनसः व्याकुलचित्ताः ४ श्री श्री श्री श्री श्री श्री श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा・द・पू・ यादृक्कृष्णस्मरणं तासां मनसः क्षोभकं जातं तदाह बर्हापीडमिति नटवद्वरं वपुर्बिभ्रद्वृन्दावनं प्राविशत् कथंभूतं वनं स्वपदैरंकितं
रमणं रतिजनकं गोपवृन्दैर्गीतकीर्तिः तथा बर्हमयमापीडं शिरोभूषणं बिभ्रत् बर्हमापीडो यस्मिन्निति वपुषो विशेषणं वा
वेणुवादनमुक्त्वा क्षं तं रन्ध्रान्वेणोरिति अतो नूनं अधरसुधेव पूर्णादिणारुच्च लेनेतीति गीतवत् प्रसर्पितुमर्हतीति भावः ५ अ
रे भिरे वर्णयन्त्यः पदे पदे परमानंदमूर्तिकृष्णं परिरब्धवत्यः ६ अनुवर्णनमेवाह अक्षण्वतामिति त्रयोदशभिः अ
क्षन्वतां च क्षामतां तावदिदमेव फलं प्रियदर्शनं परमान्यं न विरामन विप्रमइत्यर्थः तेच्च फलं सखिभिः सह पशून् वने
बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयंतीं च मालां रंध्रान्वेणोरधर
सुधयापूरयन् गोपवृन्दैर्वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ५ इति वेणुरवं राजन् सर्वभूतमनोहरं
६६ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयंत्योभिरेभिरे ६ गोप्य ऊचुः अक्षण्वतां फलमिदं न परं विदामः सख्यः
पशूननुविवेशयतोर्वयस्यैः वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षं ७ चूतप्र
बालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा
नटवरौ क्व च गायमानौ ८
प्रवेशयतोः रामकृष्णयोर्वक्त्रं यैर्निपीतं तैरेव जुष्टं सवित्तं नान्यैरित्यर्थः कथंभूतं वक्त्रं अनुवेणं वेणुमनुवर्तमानं वादयत्
टि॰ तथा अनुरक्तकटाक्षमोक्षं स्निग्धकटाक्षविसर्गः अथवा ये पीतं तयोर्वक्त्रं तैर्जुष्टं इदमेवाक्षण्वतामक्ष्णोः फलमिति ७ राम
अन्यदाहुः चूतेति चूतप्रवालादीनां विचित्राभिर्मालाभिः अनुपृक्तोऽपदंतरांतरतः संयुक्ते परिधाने नीलपीतांबरे ६६
ताभ्यां विचित्रौ वेषौ ययोस्तौ क्व च कदाचित् पशुपालगोष्ठ्यां गोपानां सभायां मध्ये अत्यर्थं विरेजतुः अहो गोपानां पुण्य
मिति भावः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्या ऊचुः हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत् कृतवानु कथं यद्यस्मान्नो गोपिकानामेव भोग्यं दीनामपि दामोदराधरसुधां स्वा
तंत्र्येणायं थंशं भुंक्ते कथं केवलं अवशिष्टं रसमात्रं यथा भवति तथा यतः यासां पयसा पुष्टाः ता मातृतुल्या ह्रदिन्यः हृष्यत्त्वचः विकसित
कमलवनमिषेण रोमांचिता लक्ष्यंते येषां वंशे जातास्ते तरवोऽपि मधुधारामिषेण आनंदाश्रु मुमुचुः यथा आर्याः कुलवृद्धाः पि २
स्ववंशे भगवत्सेवकं दृष्ट्वा हृष्यत्त्वचो अश्रु मुंचंतीत्यह दिति ९ काश्चिदाहुः हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषेण तनो
लब्धा १ ति कथंभूतं यद्देवकीसुतस्य पादांबुजाभ्यां लक्ष्मीः शोभा संपद्यनतत्र किंच गोविंदस्य वेणुमनु वेणुनिनादं श्रुत्वा अनंतरं म

गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानां भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्व गो १
चोऽश्रु मुमुचुस्तरवो यथार्याः ९ वृंदावनं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि गोवि
दवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रिसान्ववरतान्यसमस्त[illegible]सत्वं १० धन्याः स्म मूढमतयोऽपि हरिण्य एता या नं
दनंदनमुपात्तविचित्रवेषं आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ११ श्री रचितं

तं १ दगर्जितं नीलमेघं मत्वा मत्तायमयूरास्तेषां नृत्यं प्रेक्ष्य सं[illegible]शस्तत्रत अद्रिसानुषु अवरतानि उपरतक्रियाणि अन्यानि स ध १
मस्तानि सत्वानि यस्मिन् तत् तेन दन्येषु लोकेषु विद्यते अतो भुवः कीर्तिं वितनोतीत्यर्थः १० अपरा आहुः हे सखि मूढम
ह २ तयः तिर्यग्जातयोऽपि एता[illegible]रिण्यो धन्याः कृतार्थाः या वेणुरणितं वेणुनादमाकर्ण्य नंदनंदनं प्रतिप्रणयसहितैरवलो
क[illegible]नैर्विरचितां पूजां सम्मानं दधुः कृतवत्यः किंच कृष्णसाराः स्वपतिभिः सहिता एवं दधुः अस्मत्पतयस्तु गोपाः क्षुद्राः
समक्षं न सहंत इति भावः ११

रचितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० १० २ अन्वाऊचुः हे गोप्यः आश्रयं श्रेणतवनितानामुत्सवो यस्मात् रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेन वादितवेणोः संकीर्णं गीतं
च श्रुत्वा विमानैर्गच्छन्त्यो देव्यो देवानामंकेषु स्थिता अपि स्मरेण नुन्नसाराः परिक्षिप्तधैर्या मुमुहुः मोहे लिंगमाहुः भ्रश्यत्प्रसूनाः क
पीडा २ बराः चूडा यासां ताः विगता नीव्यो यासां ताः १२ अत्र सर्वत्र वक्ष्यमाणानीव संगतिर्वक्तव्या क्षरणांशके येवोत्तंभितेः उन्निमितैः
कर्णपुटैः पिबन्त्यः सत्यः तथा शावा अवत्सा अस्तनपानप्रवृत्ताः समनंतरमेव गीते श्रुत्वा तेदेव पीयूषमुत्तंभितकर्णपुटैः पि न२
बंतः स्नुतस्तनपयः कवलाः केवलं स्तनेभ्यः क्षरितक्षीरग्रासा मुखेषु येषां ते तस्थुर्विस्मृतक्रियावभूवुरित्यर्थः तत्र हेतु

कृष्णं निरीक्ष्य वनितोत्सवचारुवेषं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं देव्यो विमानगतयः स्मरनुन्नसाराः भ्रश्य २
६७ २ त्प्रसूनकबरा मुमुहुर्विनीव्यः १२ गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबंत्यः शावाः
स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः १३ प्रायो बताम्ब विहगा मुन
यो वनेस्मिन् कृष्णेक्षितं तदुदितं कलवेणुगीतं आरुह्य ये द्रुमभुजान् रुचिरप्रवालान् शृण्वंत्यमीलित
दृशो विगतान्यवाचः १४

गोविंदं दृशा मार्गेण आत्मनि मनसि स्पृशंत्य आलिंगंत्यः अत एव अश्रूणां कलाः लेशा लोचनयोर्यासां ताः गावस्ताश्च शावाः १३ भो राम
अंब मातः अस्मिन्वने ये विहगाः पक्षिणः ते प्रायेण मुनयो भवितुमर्हंति कुतः कृष्णेक्षितं कृष्णदर्शनं पुष्पफलाद्यंतरेण विना
यथा भवति तथा रुचिराः प्रवाला येषां तान् द्रुमभुजान् वृक्षाणां शाखा आरुह्य तेन श्रीकृष्णेन उदितं प्रकटितं कलवेणुगीतं ६०
केनापि मुखेनामीलितदृशः त्यक्तान्यवाचः संतो ये शृण्वंतीति तथा हि मुनयः श्रीकृष्णदर्शनं यथा भवति तथा लोके कर्मफ
लपरित्यागेन वेदद्रुमशाखा नु दारुचिराः प्रवालस्थानीयानि कर्माण्युपेदानाः सुखिनः श्रीकृष्णगीतमेव शृण्वंति संतः
अतस्तैर्विहगैर्मुनिभिर्भवितुमर्हंतीति भावः ये भगवद्गीतं भागवतं शृण्वंति ते वासुदेवरूपा भवंतीत्यर्थः १४
९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनोभवेन १

आस्तां चेतनानां कथा नद्योपि आवर्त्तैः परिभ्रमैः लक्षितेन सूचितेन कामेन भग्नो वेगो यासां ताः । आलिंगनेन स्थगितं माध्यास्थितं यथा भव
ति तथा ऊर्मय एव भुजास्तैः कमलोपहाराः कमलान्युपहरंत्यः मुरारेः पादयुगुलं गृहीत्वा धारयंती १५ लोकान्निहरणशीलत्वा
दिसा मात्सखुः श्रीकृष्णस्याम्बुदस्तदुपरि उदितः प्रेम्णा प्रवृद्धः सन् कुसुमालीभिः पुष्पसमूहैः तन्मूर्ध्नि स्पारे वा सह स्वव व२
पुषा छत्रं विहितवान् १६ साहंकारमाहुः पूर्णाः कृतार्थाः पुलिंद्यः शवरांगणाः कथमित्यत आहुः प्रथमं दयितानां स्तनेषु

नद्यस्तदा तदुपधार्य मुकुंदगीतमावर्त्तलक्षितमनोभवभग्नवेगाः आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णं
ति पादयुगुलं कमलोपहाराः १५ दृष्ट्वातपे व्रजपशून्सहरामगोपैः संचारयंतमनुवेणुमुदीरयंतं प्रेम
प्रवृद्ध उदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषाम्बुद आतपत्रं १६ पूर्णाः पुलिंद्य उरुगायपदाब्जरा को
गश्रीकुंकुमेन दयितास्तनमंडितेन तद्दर्शनस्मररुजस्तृणरूषितेन लिंपंत्य आननकुचेषु जहुस्तदाधिं

मंडितेन अनुलिप्तेन पुनः अरतिसमये उरुगायस्य श्रीकृष्णस्य पदाब्जयोः रागेण अरुणेन श्रीः कांतिर्यस्य तेन कुंकुमेन पुन
च२ स्तस्य वनस्थलीषु क्रमणेन तृणेषु रूषितेन लग्नेन तद्दर्शनेन तथाभूतस्य कुंकुमस्य दर्शनेन स्मररुजा रुक्तापो यासां ताः ते
न कुंकुमेन आननेषु कुचेषु च कामतप्तेषु लिंपंत्यः तदा कामव्यथां जहुः अतस्ताः कृतार्थाः धिगस्मानीदृशीः याप
वंभूतमप्याधिशमनं न लभामहे इति १७

न२

भा॰द॰पू॰ आस्तां वृन्दनानां कथा न मयापि आवर्त्तैः परिभ्रमैर्लक्षितेन स्पृचिन्तन कामेन भग्नो वेगाया सांत्ताः आलिंगनेन स्थगितमाच्छादितं यथा भवति
तथा ऽस्मेय एव भुजाभ्यां कमलोपहाराः कमलानुपहरन्त्यः मुरारीः पादयुगुलं गलन्ति धारयन्ति ५ लोकानिर्हरणशीलत्वादिसा
म्यान्नृसखुः श्रीकृष्णस्यांबुदस्तदुपरि उदितं प्रेम्णा प्रहृष्टैः सन्नु कुसुमालिभिः पुष्पसमूहैः तत्र त्वस्य स्तोकोररवीसहस्रवपुषाच्छन्नं वि
हितवान् १६

६८

राम
६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० १ आ० ३ नं० १

हे तानि हे षि हे सख्यः अयमद्रिर्गोवर्द्धनो ऽबलः हरिदासेषु श्रेष्ठः कुत इत्यत आह यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदो यस्य सः तृणा

टे० २ धुत्पन्न निमिषेण पादर्महर्षेर्दर्शनात् किंच यन्मानं नो नितिसह गोभिर्गोगणेन सखिसमूहेन च वर्त्तमानयोः तयोः केः पानीये सुवर्ये

कंदरैः सेः शोभनत्तृणेः कंदैर्मूलैः अयं यथा चितं अयमति धन्य इत्यर्थः १८ हे सख्य इदं त्वा तिविचित्रं गोपैः सहगावेनवेनसंचारयतोस्तु

२१ यामधुपदैर्महावेणुनादैः शरीरिषु यगतिमंतस्तेषामस्पंदनं स्थावरधर्मस्तरूणां पुलकः जंगमधर्म इति नियुज्यंते गावः आ

१९ हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्रमोदः मानं तनोति सहगोगणयोस्तयोर्यत् पानीयसूयवसकंदरकंदमूलैः १८ गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः अस्पंदनं गतिमतां पुलकस्तरूणां निर्योगपाशकृतलक्षणयोर्विचित्रं १९ एवंविधा भगवतो या वृंदावनचारिणः वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः २० इति श्रीभागवते महापुराणे दशमस्कंधे एकविंशतितमो ऽध्यायः शुक उवाच हेमंते प्रथमे मासि नंदव्रजकुमारिकाः चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रतं १

भिरिति निर्योगाः पादबंधनरज्जवः अधृष्यगवाकर्षणार्थाः पाशाश्चैते तैः कृतं लक्षणं चिन्हं ययोः शिरसि निर्योगवेष्टनेन स्कंधस्थपाशेन च गोपपरिस्थश्रिया विराजमानयोरित्यर्थः १९ २० गोपीनां कामतः कृष्णे निःसीमप्रेमसंगमः कात्यायन्यर्चनोद्भूतं तत्प्रसादमहोदयः १ इति दशमे एकविंशः द्वाविंशे गोपकन्यानां वस्त्राहरणलीलया वरं दत्वा गतः कृष्णो यज्ञशालामितीर्यते १ प्रथममासि मार्गशीर्षे १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७१

भा॰ द॰ १॰ ३ महामायेत्यादिसंबोधनैः तत्र न किंचिदशक्यमिति सूचयंत्यः प्रत्येकं प्रार्थयंते ४ कृष्णमेव तत्रैवमेवाह भूयान्नंदसुतः पतिरित्यानर्चुरिति ५ व्रतस्य पूर्वांगमाह उषसीति गोत्रैर्नामभिः अन्योन्यावबद्धबाहवः परस्परगृहीतपाणयः ६ ७ योगेश्वराणामीश्व

आप्लुत्यांभसिकालिंद्याजलांतेचोदितेरुणे कृत्वाप्रतिकृतिंदेवीमानर्चुर्नृपसैकतीं २ गंधैर्माल्यैःसुरभिभिर्ब
लिभिर्धूपदीपकैः उच्चावचैश्चोपहारैःप्रवालफलतंदुलैः ३ कात्यायनिमहामायमहायोगिन्यधीश्वरि नं
दगोपसुतंदेविपतिंमेकुरुतेनमः ४ इतिमंत्रंजपंत्यस्ताःपूजांचक्रुःकुमारिकाः एवंमासंव्रतंचेरुःकुमा
कृष्णचेतसः र्यो भद्रकालींसमानर्चुर्भूयान्नंदसुतःपतिः उषस्युत्थायगोत्रैःस्वैरन्योन्यावबद्धबाहवः कृष्णमुच्चैर्ज
९७ गुर्यांत्यःकालिंद्यांस्नातुमन्वहं ६ नद्यांकदाचिदागत्यतीरेनिक्षिप्यपूर्ववत् वासांसिकृष्णंगायंत्यो
विजह्रुःसलिलेमुदा ७ भगवांस्तदभिप्रेत्यकृष्णोयोगेश्वरेश्वरः वयस्यैरावृतस्तत्रगतस्तत्कर्मसि
द्धये ८ तासांवासांस्युपादायनीपमारुह्यसत्वरः हसद्भिःप्रहसन्बालैःपरिहासमुवाचह ९ अत्रा
गत्याबलाःकामंस्वंस्ववासःप्रगृह्यतां सत्यंब्रुवाणिनोनर्मयद्यूयंव्रतकर्शिताः १० नमयोदितपूर्वं त
वाअनृतंतदिमेविदुः एकैकशःप्रतीच्छध्वंसहैवेतिसुमध्यमाः ११ तस्यतत्क्ष्वेलितंदृष्ट्वागोप्यः
प्रेमपरिप्लुताः व्रीडिताःप्रेक्ष्यचान्योन्यंजातहासाननिर्ययुः १२ एवंब्रुवतिगोविंदेनर्मणाक्षिप्त
चेतसः आकंठमग्नाःशीतोदेवेपमानास्तमब्रुवन् ७१

र इति प्रत्येकं नाहमनोरथपूरणसामर्थ्यं दर्शयति तासां कर्मणः
सिद्धये फलदानायेति ८ नीपं कदंबं बालैः सह ९ हे अबलाः नात्र नर्मपरिहासः यस्मात् यूयं व्रतश्रांताः १० एकैकशो वा राम
आगत्य स्वीकुरुत सहैव वा न तत्रैस्माकमाग्रहे इत्यर्थः ११ क्ष्वेलितं परिहासः प्रेमपरिप्लुताः प्रेमरससमग्नाः १२ १३ ६९

७१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र मुग्धा ऊचुः अंगेति श्रीकृष्ण अनयमन्याय्यं मा कृथाः १४ प्रौढा ऊचुः नो चेद्राज्ञे नंदाय कंसाय वा ब्रुवामहे कुष्यंतीति १५ १६ प्रोत्तेरुर्नि
र्गताः १७ आहताः ईषदवनतयोनीः वीक्ष्य १८ धृतव्रतास्सत्यो विवस्त्राः अपः व्यगाहत तत् आशु स्नाता इति यत् एतत् तु उ एव देवहेलनं अप
राधः तत्परिहारार्थं व्रतवैगुण्यभीतानां प्रायश्चित्तमेवाह अंहसः पापस्य निवृत्तये मूर्ध्नि अंजलिं बध्वा अधोधानमः प्रणामं कृत्वेति १९

मानयं भोः कृथास्त्वां तु नंदगोपसुतं प्रियं जानीमोंऽग व्रजश्लाघ्य देहि वासांसि वेपिताः १४ श्यामसुंदर ते दास्यः
करवाम तवोदितं देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे १५ श्रीभगवानुवाच भवत्यो यदि मे दास्यो मयो
क्तं वा करिष्यथ अत्रागत्य स्ववासांसि प्रतीच्छंतु शुचिस्मिताः १६ ततो जलाशयात्सर्वा दारिकाः शीतवेपि
ताः पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्शिताः १७ भगवानाहता वीक्ष्य शुद्धभावप्रसादितः स्कंधे
प्रीतः २ निधाय वासांसि प्रोवाच सस्मितं १८ यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतत्तदु देवहेलनं बद्ध्वांजलिं
मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधो वसनं प्रगृह्यतां १९ इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राप्लवनं
व्रतच्युतिं तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः २० तास्तथावनता दृष्ट्वा भग
वान्देवकीसुतः वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः २१

इति दोषत्वेनाच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्य च्युतिहेतुं मत्वा तस्य पूर्तिकामाः तदशेषकर्मणां तस्य व्रतस्य अन्येषामशेषकर्मणां च साक्षात् कृतं फलभूतं नेमुः अवनेमुः यतः स एवावद्यमृक् पापमार्जकः २० २१

तं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ट॰१॰ दृढमत्यर्थं प्रलब्धा वंचिताः यूयं विवस्त्रा इत्यादिना त्रपया लज्जया च हापिताः त्याजिताः अत्रागत्य स्ववासांसि इत्याग्रहेण प्रस्तोभिताः
उपहसिताः सत्यं ब्रुवाणि नो नर्मेत्यादिना क्रीडनवत्कारिताः अवधायाञ्जलिमित्यादिप्रायश्चित्तच्छलेन नाभ्यसूयन् दोषदृष्ट्या नाप
श्यन् २२ प्रेष्ठसंगमेन सज्जिताः वशीकृताः अतो गृहीतचित्ताः सत्यो नो चेलुः गृहीतचित्तत्वमाह तस्मिन् कृष्णे लज्जायिते ७।२
क्षणाः लज्जाविलसितमीक्षणं यासां ता इत्यर्थः २३ दामोदर इति भक्तवात्सल्यं दर्शयति अबलाः प्रति २४ भो साध्व्यः भवतीनाम

दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः वस्त्राणि चैवाऽपहृतान्यथाप्यमुं ता
नाभ्यसूयन् प्रियसंगनिर्वृताः २२ परिधाय स्ववासांसि प्रेष्ठसंगमसज्जिताः गृहीतचित्ता नो चेलुस्त
७० स्मिन् लज्जायितेक्षणाः २३ तासां विज्ञाय भगवान् स्वपादस्पर्शकाम्यया धृतव्रतानां संकल्पमाह दा
मोदरोऽबलाः २४ संकल्पो विदितः साध्व्यो भवतीनां मदर्चनं मयानुमोदितः सोऽसौ सत्यो भवितुमर्हे
ति २५ न मय्यावेशितधियां कामः कामाय कल्पते भर्जिता क्वथिता धाना प्रायो बीजायनेष्यते २६
याताऽबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः २७ श्रीरा

मदर्चनमेव संकल्पो मनोरथः सः लज्जया युष्माभिरकथितोऽपि मया विदितः स मयानुमोदितः अतः सत्यो भवितुमर्हति अर्हतीति
संभावनोक्त्या आत्यंतिको न भविष्यतीति सूचितं २५ ननु कुत इत्यत आह न मयीति कामाय पुनः कामभोगाय विषयमहि ७०
म्ना कामस्यापि शान्तिहेतुत्वादिति भावः कामाप्ररोहे दृष्टांतः भर्जिताः दग्धाः क्वथिताः पक्वाः धाना यवादि बीजाय अंकुरोद्गमा
य प्राय इति स्वेच्छया पुनः प्ररोहमपि सूचयति २६ सिद्धाः पूर्णमनोरथाः तदाह इमा आगामिनीः मया रंस्यथेति आर्या कात्याय रात्रीः
नी सतीः सत्यः २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्य १ भक्त्यानुकंपकन्यास्तास्तद्विवर्जितयज्विनां परेऽनुग्रहतस्तेषां महत्कर्म महामदे १ २८ विप्रभार्यायाश्चानुग्रहाय यज्ञवाटं गच्छन् विप्रा
णां काठिन्यमभिप्रेत्य तेभ्योपि द्रुमाः श्रेष्ठा इति तानभिनंदयति त्रिभिः पश्यतेति हे स्तोककृष्णास्मादयो गोपा एतान् द्रुमानुपश्यत प
रमार्थमेव एकांतेन जीवितं येषां तान् तदाह वातवर्षादीन् स्वयं सहमाना अस्मान्निवारयंति ३१ सुजनस्य कृपालोरार्थिन इव ३३ नि

श्रीशुक उवाच इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ध्यायंत्यस्तत्पदांभोजं कृच्छ्रान्निर्विविशुर्व्रजं २८ अथ गो
पैः परिवृतो भगवान् देवकीसुतः वृंदावनाद्गतो दूरं चारयन् गाः सहाग्रजः २९ निदाघार्कातपे तिग्मे छायाभिः स्वा
भिरात्मनः आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः ३० हे स्तोककृष्ण हे अंशो श्रीदामन् सुबलार्जुन विशाल
वृषभौजस्विन् देवप्रस्थ वरूथप ३१ पश्यतैतान्महाभागान् परार्थैकांतजीविनः वातवर्षातपहिमान् सहंतो वार
यंति नः ३२ अहो एषां वरं जन्म सर्वप्राण्युपजीवनं सुजनस्येव येषां वै विमुखा यांति नार्थिनः ३३ पत्रपुष्पफल
छायामूलवल्कलदारुभिः गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ३४ एतावज्जन्मसाफल्यं देहिनामि
ह देहिषु प्राणैरर्थैर्धिया वाचा श्रेय एवाचरेत्सदा ३५ इति प्रवालस्तबकफलपुष्पदलोत्करैः तरूणां नम्रशा
खानां मध्येन यमुनां गतः ३६ तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः ततो नृप स्वयं गोपाः कामं स्वादु पपु
र्जलं ३७ तस्या उपवने कामं चारयंतः पशून्नृप कृष्णरामावुपागम्य गोपा वचनमब्रुवन् ३८ इति श्रीभागवते म
हापुराणे दशमस्कंधे द्वाविंशोऽध्यायः

यौ सोघनरसः तोक्माः पल्लवाद्यंकुराः ३४ ५ इत्यभिनंदयन् प्रवालादिसमूहैर्नम्रशाखानां तरूणां मध्यतो यमुनां प्राप्तः ६ ३७
कुमारिकाभ्यः पूर्वमेव तन्नमीकुर्वन्तया अग्रहीतभोज्यानामेव निर्गमात् क्षुधार्ता इत्युक्तं ३८ दशमे द्वाविंशः श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गो॰ द॰ १ त्रयोविंशे तेन गोपैरन्नयाञ्चापदेशतः तत्पत्न्यनुग्रहात्क्ष्मोदीक्षितानन्वतापयत् १ १ भक्ताया इत्येकवचनं सर्वः सायुज्याभिप्रायेण २ ३ अ
स्मद्विसर्जिताः आवाभ्यां प्रहिताः संतो याचध्वं युष्माकं का नत्र लज्जा न नु तथाप्यपान्नत्वदस्माकं किमिति दास्यंतीति चेत्तत्राह कीर्त्तयंत इ
ति ४ ६ अविदूरे वर्त्तमानौ संतौ ओदनं तत्र लषतः ओदनं च श्रद्धा च यदस्ति तर्हि यच्छतेति ७ दीक्षितानां यमभोज्यान्नाः इति विदिष्ण

गोपा ऊचुः रामराम महावीर्य कृष्ण दुष्टनिबर्हण एषा वै बाधते क्षुन्नस्तच्छांतिं कर्त्तुमर्हथः १ श्रीशुक उवाच इति विज्ञापितो वि
गोपैर्भगवान् देवकीसुतः भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् २ प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः सत्रमां ग॰२
गिरसं नाम ह्यासते स्वर्गकाम्यया ३ तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः कीर्त्तयंतो भगवत आर्यस्य मम चाभि
धां ४ इत्यादिष्टा भगवता गत्वायाचंत ते तथा कृतांजलिपुटा विप्रान् दंडवत्पतिता भुवि ५ हे भूमिदेवाः शृणुत
७१ कृष्णस्यादेशकारिणः प्राप्ताञ्जानीत भद्रं वो गोपान्नो रामचोदितान् ६ गाश्चारयंतावविदूर ओदनं रामाच्यु
तौ वो लषतो बुभुक्षितौ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ७ दीक्षायाः पशुसंस्था
याः सौत्रामण्याश्च सत्तमाः अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति ८ इति ते भगवद्याच्ञां शृण्वंतोपि
न शुश्रुवुः क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ९ श्रीराम श्रीराम श्रीराम श्रीराम ॥

तीति स्वयमेवाशंक्याहुः दीक्षाया अग्नीषोमीयपशवालंभात्पूर्वं दोषः न तु ततोन्यत्र तथा सौत्रामण्याश्चान्यत्र अन्यदा ८ क्षुद्रे राम ७१
स्वर्गादावाशा मां त्रेयषां ते भूरीणि क्लेशाधिकानि कर्माणि येषां ते अत एव ज्ञाः वृथा ज्ञानवृद्धा इति मानवंतः ९ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कर्मक्रममुल्लंघ्य देशकालेऽन्यार्थमन्नमन्येभ्यः कथं देयं तत्राह देश इति पृथक् चरुपुरोडाशादि द्रव्यं तंत्रं प्रयोगः धर्मोऽपूर्वं १० म
नुष्यायमिति दृष्ट्या मर्त्यात्मानो ब्राह्मणा वयं महान्त इति मन्यमानाः ११ २ लौकिकीं गतिमिति न हि कार्यार्थिनो निर्विद्येत् कोवा

देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोऽग्नयः देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः १० तं ब्रह्म परमं साक्षाद्भग
वंतमधोक्षजं मनुष्यदृष्ट्या दुःप्रज्ञा मर्त्यात्मानो न मेनिरे ११ न ते यदोमिति प्रोचुर्न नेति च परंतप गोपाः निरा
शाः प्रत्येत्य तथोचुः कृष्णरामयोः १२ तदुपाकर्ण्य भगवान् प्रहस्य जगदीश्वरः व्याजहार पुनर्गोपान् दर्शय
न् लौकिकीं गतिं १३ मां ज्ञापयत पत्नीभ्यः ससंकर्षणमागतं दास्यंति काममन्नं वः स्निग्धा मय्युषिता
धिया १४ गत्वाथ पत्नीशालायां दृष्ट्वासीनाः स्वलंकृताः नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् १५
नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः इतोऽविदूरे चरता कृष्णेनेहेषिता वयं १६ गाश्चारयनू स गोपालैः
सरामो दूरमागतः बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयतां १७ श्रुत्वाच्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः
तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः १८

याचकोन पराभूयत इत्यादि लोकस्थितिं दर्शयन् १३ केवलं देहेन गृहे वसंति धिया मय्येवोषिताः यतो मयि स्निग्धाः अतो दास्यं
ति प्रेषितः तीति १४ ५ उषिताः १६ सकृष्णो गोपालैः सह १७ तत्कथाक्षिप्तमनसः स्वात्तद्दर्शनोत्सुकाः अतस्तमुपागतं श्रुत्वा जातसंभ्रमा एव
बभूवुः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ १॰ १॰ भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधं बहुगुणं संस्कारविशेषैर्बहवो गुणा रसा सौरभ्यादयो यस्मिंस्तत्तु भाजनेः अमत्रे भांडैर्विपत्न्यादिभि
र्वार्यमाणा अपि प्रियं श्रीकृष्णं अभिसस्रुः अप्रतिबंधदृष्टांतः समुद्रं निम्नगा नद्य इवेति १९ भगवतीति दीर्घकालं श्रीकृष्णेन श्र
वणेन धृतआशयो याभिस्ताः २० तथागताः सत्यो ददृशुः २१ हिरण्यवत्यारिधिः परिधानं यस्य तं पीतांबरमित्यर्थः वनमाली
बर्हैः धातुभिः प्रवालैश्च नटवद्वेषो यस्य तं अनुव्रतस्य सख्युः अंसे विन्यस्तो निहितो हस्तो येन तं इतरेण हस्तेन लीलया
अंधुनानं भ्रामयंतं कर्णयोरुत्पले यस्य अलकाः कपोलयोर्यस्य मुखाब्जे हासो यस्य अलकाः कपोलयोर्यस्य मुखाब्ज

चतुर्विधं बहुगुणमन्नमादाय भाजनैः अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः १९ निषिध्यमानाः पतिभि
र्भ्रातृभिर्बंधुभिः सुतैः भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः २० यमुनोपवने शोकनवपल्लवमंडिते वि
७२ चरंतं वृतं गोपैः साग्रजं ददृशुः स्त्रियः २१ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे वि
हस्ते॰ न्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं २२ प्रायश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निम क॰२
ग्नमनसस्तमथाक्षिरंध्रैः अंतः प्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र २३ तास्तथा त्य
क्तसर्वाशाः प्राप्ता आत्मदिदृक्षया विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः २४ श्रीराम श्रीराम श्रीराम प्राह

हासो यस्य तं तच्चं तच्च २२ इतरपिल्लेयन सामरस्य प्राह इति बहुशः श्रुतो यः प्रियतमस्य उदयः उत्कर्षः स एव कर्णपूराः कर्णालंका राम
टी॰ २ रं यंति कृतार्थी कुर्वंतीति तथोक्तैः कर्णाभरणैरिति यस्मिन् श्रीकृष्णे निमग्नमनसः तं लोचनद्वारैरंतः प्रवेश्य सुचिरमुपगूह्य ७२
तापं जहुः अभिमतयो हं इतयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य यथेति २३ अखिलदृग्द्रष्टा सर्वबुद्धिसा
क्षी तास्तथा प्राप्ता विज्ञाय पितृ येत्यंतद्विरुणोति त्यक्तसर्वाशाः त्यक्ताः सर्वा आशा याभिस्ताः केवलमात्मनः स्वस्यैव दिदृक्षयेति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मप्रिये २ त्सि २ यथा २

हे महाभागाः वः स्वागतं सुभमागमनं नो नन्वेवाहयः यस्मात् स्थितिं बंधतिरस्कारेण अस्माकं दिदृक्षया प्राप्ताः इति इदं वः उपपन्नं युक्तमिति वा २५ संपन्नं १
युक्तत्वमाह नन्विति आत्मा च प्रियश्च तस्मिन्मयि कुशला विवेकिनः अत एव स्वस्य आत्मनोर्थं पश्यंतीति ये तथा भक्तिं कुर्वंति यथा त्वमाह
अद्धा साक्षात् अत्र हेतुः अहैतुकी अव्यवहितां फलाभिसंधिरहितां अतताः अव्यवहितां निरंतरां २६ आत्मनः सर्वतः प्रेष्ठत्वमु
पपादयति प्राणेति स्वात्मा तनयः आत्मा देहः एते सर्वे यत्संपर्कात् यस्याध्यासेन उपकरणत्वेन वा २७ तत्तस्मात् कृतार्था यूयं या

स्वागतं वो महाभागा आस्यतां करवाम किं यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः २५ नन्वद्धा मयि कुर्वंति कुश
लाः स्वार्थदर्शिनः अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा २६ प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः य
त्संपर्कात् प्रिया आसन् ततः को न्वपरः प्रियः २७ तद्यात देवयजनं पतयो वो द्विजातयः स्वसत्रं पारयि
ष्यंति युष्माभिर्गृहमेधिनः २८ पत्न्य ऊचुः नैवं विभोर्हति भवान् गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पाद
मूलं प्राप्ता वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् २९ गृह्णंति नो न पतयः यत्र २
पितरौ सुता वा न भ्रातृबंधुसुहृदः कुत एव चान्ये तस्माद्भवत्प्रपदयोः पतितात्मनां नो नान्या भवेद्गतिररिं नो १
दम तद्विधेहि ३०

तद्देवयजनं यज्ञवाटं गच्छत कृतार्थाः किमिति वयं स्थास्याम इति चेत्तत्राह पतय इति पारयिष्यंति समापयिष्यंति पतीनामनुग्रहायेत्यर्थः २८
नृशंसं परुषं निगमं प्रतिज्ञां न मे भक्तः प्रणश्यतीति इदं वा न स पुनरावर्त्तत इति पदावसृष्टं अवज्ञया पादेन त्यक्तं बहुमानेन केशैर्वोढुं ला
न २ सीभवितुं २९ किंच गृह्णंतीति नो अस्मान् अरिंदम कामलोभपापादिदमन भवतः पादाग्रयोर्निपतितो देहो येषां नो अन्या स्वर्गा
दिगतिरपि न भवेन्मा भूत् तत्तस्मात् दास्यमेव विधेहि इति ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५२

भा०१०.१ मयोपेता अनुज्ञाताः प्रत्यक्षं देवान् प्रदर्श्याह देवा अपीति ३१ तथापि त्वत्त्यक्तुं न शक्नुम इति चेत्तत्राह नेति प्रीतये सुखाय अनुरागाय स्ने
हवृद्धये अंगसंगः अंगाभ्यासंगः ३२ अनसूयवः अदोषदृष्टयः ३३ देहमिति तदीयं देहं तत्र विहाय चैतन्येन भगवंतं प्रापेत्यर्थः ३४ ५
अनुशीलयन् अनुकुर्वन् गोगोपगोपीनामिति कर्मणि षष्ठी रूपवाक्कृतैः रूपेण वाचा कृतैश्चरितैश्च रमयन् तान् रमयितुं रेम इ
त्यर्थः ३६ अनुस्मृतिप्रकारमाहन्नराननुकरणवतो विश्वेश्वरयोर्याञ्चां यन् अहन्म हतवंतः ततः कृतागसो वयमिव ॥

श्रीभगवानुवाच पतयो नाभ्यसूयेरन् पितृभ्रातृसुतादयः लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ३१ न
प्रीतयेऽनुरागाय ह्यंगसंगो नृणामिह तन्मनो मयि युञ्जाना अचिरान्मामवाप्स्यथ ३२ श्रीशुक उवाच ॥ इ
त्युक्ता यज्ञपत्न्यस्ता यज्ञवाटं पुनर्गताः ते चानसूयवस्ताभिः स्त्रीभिः सत्रमपारयन् ३३ तत्रैका विधृ
२३ ता भर्त्रा भगवंतं यथाश्रुतं हृदोपगुह्य विजहौ देहं कर्मानुबंधनं ३४ भगवानपि गोविंदस्तेनैवान्ने
न गोपकान् चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ३५ एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥
१३ रेमे गोगोपगोपीनां रमयन् रूपवाक्कृतैः ३६ अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः यद्विश्वेश्वर
योर्याञ्चामहन्म नृविडंबयोः ३७ दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीं आत्मानं च तया धिग्व्रतं
हीनमनुतप्ता व्यगर्हयन् ३८ धिग्जन्म नस्त्रिवृद्विद्यां धिग्बहुज्ञतां धिक्कुलं धिक्क्रियादाक्ष्यं विमु
खा ये त्वधोक्षजे ३९

त्मनुस्मृत्येति यदा च स्वभार्या गुरूनिव मन्यंते भगवद्भक्तिरहितमात्मानं च निंदन्नित्याह दृष्ट्वेति अलौकिकीं लोकातीतां ३८ राम
त्रिवृत् शौक्लसावित्रं दैक्षमिति त्रिगुणितं जन्म व्रतं ब्रह्मचर्यं क्रियाकर्मणि दाक्ष्यं च क्रियादाक्ष्यमित्येकं वा पदं धिगित्या २३
क्षेपे यद्वयं अधोक्षजे विमुखास्तेषां जन्मादि तत्सर्वं धिगिति व्यगर्हयन्नित्यर्थः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योः विधुत् अच्छिनत् तं दुरंतं भावं भक्तिपश्यंतेति ४१ द्विजातिसंस्कारः उपनयनेनं क्रियासंध्योपासनादयः ४२ ५ स्वात्मदोषापवर्गे

नूनं भगवतो माया योगिनामपि मोहिनी यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ४० अहो पश्यत नारीणाम
पि कृष्णे जगद्गुरौ दुरंतभावं योऽविध्यन् मृत्युपाशान् गृहाभिधान् ४१ नासां द्विजातिसंस्कारो न निवासो गुरा
वपि न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ४२ अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे भक्ति
र्दृढा न चास्माकं संस्कारादिमतामपि ४३ ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया अहो नः स्मारया
मास गोपवाक्यैः सतां गतिः ४४ अन्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः ईशितव्यैः किमस्माभि रा ५
रीशस्येत्थं विडंबनं ४५ हित्वान्यान् भजते यं श्रीः पादस्पर्शाशयासकृत् स्वात्मदोषापवर्गेण तद्याच्ञा
जनमोहिनी ४६ देशकालः पृथग्द्रव्यं मंत्रतंत्रद्विजाग्नयः देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ४७
स एष भगवान् साक्षाद्विष्णुर्योगेश्वरेश्वरः जातो यदुष्वित्यशृण्म ह्यपि मूढा न विद्महे ४८ अहो वयं धन्य
तमा येषां नस्तादृशीः स्त्रियः भक्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ ४९ नमस्तस्मै भगवते कृष्णा
याकुंठमेधसे यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ५० स वै न आद्यः पुरुषः स्वमायामोहिता
त्मनां अविज्ञातानुभावानां क्षंतुमर्हत्यतिक्रमं ५१ इति स्वाघमनुस्मृत्य कृष्णे ते कृतहेलनाः दिदृक्षवोप्यच्युत
योः कंसाद्भीता न चाचलन् ५२ इति श्रीभागवते महापुराणे दशमस्कंधे विप्रपत्न्युद्धरणं नाम त्रयो
विंशोध्यायः

एवं चात्मगर्वादित्यागेन ४६ इमश्शृण्म एवं सर्वत्र श्रुतवंतो वयं हि तथापीति ४८ ५१ न चाचलन् तयोर्दर्शनायन जग्मुः
५२ इति दशमे त्रयोविंशः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ १० २४ चतुर्विंशे महेन्द्रस्य मखं व्यावर्त्य हेतुभिः । कृष्णः प्रवर्त्तयामास गोवर्द्धनमखोत्सवं १ भूसुराणां क्रियामार्गं निरस्यस्वासुरेषु च मखं तन्मदभंगा
यतन्मखं समवारयत् २ ब्राह्मणाः केसा क्रीतास्वाश्रमस्थाएव भगवंतमभजन् भगवानपि तत्रैव निवसन् इंद्रयागकृतोद्यमान् गो
पानपश्यहीति संबंधः ३ तथा संभ्रमोनुभवति मखाय मितिन्विनु किमत्र फलं का चदेवता केनाधिरिणा केन वा साधनेन साध्य
ते ४ एतद्ब्रूहि महान्कामो मम श्रवणवर्त्तेते यद्दानवमहाकामोमादृश्यत इति तूष्णीं स्थितं प्रत्याह नेति सर्वात्मना सर्वत्रात्मदृष्टी

श्रीशुक उवाच भगवानपि तत्रैव बलदेवेन संयुतः । अपश्यन्निवसन् गोपानिंद्रयागकृतोद्यमान् १ तदभिज्ञोपि भ
गवान् सर्वात्मा सर्वदर्शनः । प्रश्रयावनतोऽपृच्छद्वृद्धान्नंदपुरोगमान् २ कथ्यतां मे पितः कोयं संभ्रमो व उपाग
तः । किं फलं कस्य चोद्देशः केन वा साध्यते मखः ३ एतद्ब्रूहि महान् कामो मह्यं शुश्रूषवे पितः । न हि गोप्यं हि
७४ साधूनां कृत्यं सर्वात्मनामिह ४ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां । उदासीनोरिवद्वर्ज्य आत्मवत्सु
हृदुच्यते ५ ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुतिष्ठति । विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ६ तत्र ता
वत् क्रियायोगो भवतां किं विचारितः । अथवा लौकिकस्तन्मे पृच्छतः साधु भण्यतां ७ श्रीराम श्रीराम श्री

नो ४ अतएव न विधेत स्वः परः इति दृष्टिर्येषां परः इति दृष्ट्यभावादेव न तेषां अमित्रादयोपि येषां संती स्याह अमित्रेति न मित्रं उदा
स्तउदासीनो विद्विट् द्वेष्य येषां तेषां कृत्यं सर्वकर्म न गोपनीयं किंचिदस्तीत्यर्थः सत्यपि भेददर्शने उदासीनः शत्रुवद्वर्ज्यः आ राम
त्मतुल्यत्वात्सुहृन्मित्रेषु न वर्ज्जनीय इत्याह उदासीन इति ५ किंच ज्ञात्वेति अज्ञात्वा चेत्तत्र विदुषो यथावत्कर्मफलं स्या ७४
न्न तथानाविदुषः ६ भवतामयं क्रियायोगः शास्त्रतः किं विचारितः परंतु लौकिकः आचारप्राप्तो वेति साधु सोपपत्तिकं भ
ण्यतां कथ्यतामिति ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माह

आचारप्राप्तएवेतिसहेतुकंपर्ज्जन्यइति आत्ममूर्त्तयः प्रियमूर्त्तयः ८ ततः किमत आह तमिदं वार्मुचांमेघानां तद्रेतसातद्वृष्टिपय
सा ९ तदुपजीवंतिजीविकांकल्पयंति धर्मार्थकामसिद्धये ननुकृष्यादिभिर्जीवंतां किमिंद्रेण तत्राह पुंसामितिफलभावनः ११
फलसाधनः पर्ज्जन्यंविनाकृष्यादिवैफल्यादित्यर्थः १० ११ इंद्रायमन्युंजनयन्निति कोपजननंद्वारागोवर्धनपूजनादिंद्रमवतारयि न१

नंदउवाच पर्ज्जन्योभगवानिंद्रोमेघास्तस्यात्ममूर्त्तयः तेऽभिवर्षंतिभूतानांप्राणनंजीवनंपयः ८ तंतात
वयमन्येचवार्मुचांपतिमीश्वरं द्रव्यैः तद्रेतसासिद्धैर्यजंतेक्रतुभिर्नराः ९ तच्छेषेणोपजीवंति त्रिवर्गफल
हेतवे पुंसांपुरुषकाराणांपर्ज्जन्यः फलभावनः १० यएनंविसृजेद्धर्मंपारंपर्यागतंनरः कामाल्लोभाद्भ
याद्द्वेषात्सवैनाप्नोतिशोभनं ११ श्रीशुकउवाच वचोनिशम्यनंदस्यतथान्येषांव्रजौकसां इंद्रायमन्युंज
नयन्पितरंप्राहकेशवः १२ श्रीभगवानुवाच कर्मणाजायतेजंतुः कर्मणैवविलीयते सुखंदुःखंभयं
क्षेमंकर्मणैवाभिपद्यते १३ अस्तिचेदीश्वरः कश्चित्फलरूप्यन्यकर्मणां कर्त्तारंभजतेसोपि नह्यकर्त्तुः
प्रभुर्हिसः १४

तुंदेवतानिराकरणंनत्वयमेवाभिप्रायइत्यर्थः १२ प्रथमंतावत्कर्मवादेनदेवान्निराकरोतिकर्मणेति ननुजडात्कर्मणः
केवलात्कथंफलसिद्धिःस्यात् अहो अशीलितमीमांसतांस्वमतिंश्रद्धाकर्मणांफलकारणत्ववचनतोऽवगतेःकिंतेनानुप विलसिता२
पि२ पन्नंनाम १३ केचित्पुनरपिसाहसभीताः कर्मपरतंत्रमीश्वरंमन्यंतेतन्मतमनूद्यनिराकरोति अस्तिचेदिति स्वयंक
र्मभिरलिप्तोऽन्येषांकर्मणांफलरूपीफलदाताकर्त्तारंभजेततत्कर्मफलदानेन १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰ १ अतः कर्मण एव फलसिद्धिस्तत्पारतंत्र्येच यज्ञागस्तत्तुल्यत्वान्न देवतया कार्यमित्याह किमिंद्रेणेति ननु कर्मणोपि प्रवृत्तिरंतर्या
म्यपेक्षैव कथं सर्वथा देवताया अनुपयोगः इत्याशंक्याह स्वभावविहितमिति स्वभावेन प्राक्तनसंस्कारेण विहितं यत्कर्म तदन्य
थाकर्तुमनीशेन १५ एतदेव विवृणोति स्वभावतंत्र इति प्रवृत्तेः संस्काराधीनत्वात् किमंतर्यामिणेत्यर्थः १६ तस्मात्स्वभावतो नि
षन्नस्य कर्मण एव सर्वकारणत्वात् कर्मैव पूज्यमित्याह देहानिति सार्द्धेन १७ संपूजयेत्संमानयेत् ननु देवतोद्देशेन द्रव्यत्या

किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्त्तिनां अनीशेनान्यथाकर्त्तुं स्वभावविहितं नृणां १५ स्वभावतंत्रो
हि जनः स्वभावमनुवर्त्तते स्वभावस्थमिदं सर्वं सदेवासुरमानुषं १६ देहानुच्चावचान् जंतुः प्राप्योत्सृ
७५ जति कर्मणा शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः तस्मात्संपूजयेत्कर्म स्वभावस्थः स्वकर्मकृत्
अंजसा येन वर्त्तेत तदेवास्य हि दैवतं १८ आजीव्यैकतरं भावं यस्त्वन्यमुपजीवति न तस्माद्विंदते क्षेमं
जारं नार्यसती यथा १९ वर्त्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः वैश्यस्तु वार्त्तया जीवेत् शूद्रस्तु द्विज
सेवया २० कृषिवाणिज्यगोरक्षा कुसीदं तुर्यमुच्यते वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशं २१ आरा

गाद्यात्मकत्वात् कर्मणः कथं देवतां विना सिद्धिरित्याशंक्य कर्मांगमात्रं देवतेति पक्षमुपसंहरन्निव हेतुवादमाश्रित्यान्यामेव राम
देवतां समर्थयते अंजसेति १८ हेतुबलेनैव विपक्षे दोषमाह आजीव्येति उपजीवति सेवते १९ स्वप्रवृत्तिं वक्तुं दृष्टांतत्वे ७५
न वर्णानां वृत्तिभेदमाह वर्त्तेतेति ब्राह्मणा वेदाध्यापनादिना २० वैश्यवृत्तेश्चातुर्विध्यमाह कृषीति कृषिवाणिज्यसहिता गो
रक्षा एवं त्रयं कुसीदं वृद्धिजीवनं तुर्यं चतुर्थं २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि१ मेधैरेव२

ननुगवामपि ॰ ॰मिंहद्राधीनैवेत्याशंक्यनिरीश्वरसांख्यमताश्रयेणानिराकरोतिसत्वमितिश्लोकद्वयेन अन्योन्यपुरुष ॰ ॰ स्त्रीयो
गेन २२ सर्वेतइतिसमुद्रशिलाखरादिष्वपिदृष्टिदर्शनान्नप्रेक्षावत्पूर्वकत्वदृष्टेरितिभावः नैरवसिद्धंतिजीवंति २३ तथापियो
७२ गक्षेमार्थंदेवतांपक्षनिविदत्तआहनःपुरइति पुरःपत्तनानिजनपदादेशाः अस्माकंयोगक्षेमहेतुर्वनंशैलादयएवतिभा
वः २४ ब्राह्मणानपिसंगरत्कन्निगमयतितस्मादितिस्वयमुत्प्रेक्षितयागकल्पनामाहयइंद्रमखस्यसंभाराइतिसार्द्धपंचभिः॥

सत्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत् २२ रजसाचोदितामेघावर्ष
त्यंबूनिसर्वतः प्रजास्तैरेवसिद्ध्यंतिमहेंद्रःकिंकरिष्यति २३ ननःपुराजनपदानग्रामानगृहावयं वनौकस
स्तातनित्यंवनशैलनिवासिनः २४ तस्माद्गवांब्राह्मणाना ॰ मद्रेश्चारभ्यतांमखः यइंद्रयागसंभारास्तैर
यंसाध्यतांमखः २५ पच्यंतांविविधाःपाकाःसूपांतापायसादयः संयावापूपशष्कुल्यःसर्वदोहश्च ॰ ॰
तां २६ हूयंतां ॰ मग्नयःसम्यक्ब्राह्मणैर्ब्रह्मवादिभिः अन्नंबहुविधंतेभ्योदेयंवोधेनुदक्षिणाः २७ अन्येभ्य
उ२ श्वाश्वचांडालपतितेभ्योयथार्हतः यवसंगवांदत्वागिरयेदीयतांबलिः २८ स्वलंकृताभुक्तवंतःस्वानुलिप्ताः
सुवाससः प्रदक्षिणंचकुरुतगोविप्रानलपर्वतान् २९ एतन्ममतंतातक्रियतांयदिरोचते अयंगोब्राह्मणा
द्रीणांमह्यंचदयितोमखः ३०

संभाराःसाधनानि २५ सूपंमोद्गंपायसंकेवलंपयसिपक्वंसंयावादयोगोधूमादिविकाराः आमश्चसूपपायसयोः आदोहह
स्यार्थेतान्यपापाठतः २६ यागशोभार्थंश्रद्धोत्पादनार्थंचाहहूयंतामिति धेनुदक्षिणाः धेनुसहितादक्षिणाःताएववोद
क्षिणाःवःयुष्माभिः २७ वैयेसंतत्वं २८ २९ सर्वान्शिरःकंपेनानुमोदयन्नाहगोब्राह्मणाद्रीणामितिमह्यंममच ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰१०॰ ३१ तद्द्रव्येण महेन्द्रमखद्रव्येण गिरिद्विजान् प्रतियथायथं ३२ बलीनुपहृत्य दत्त्वा आदृताः सादराः ३३ अनडुद्युक्तानि उन्नमान्
डुद्भिर्युक्तानि सद्विजाशिषः द्विजाशीर्भिः सहिताः ३४ गोपविश्रंभणं गोपानां विश्वासजनकं रूपं गतः प्राप्तः सन् बलिमुपाहर

श्रीशुक उवाच कालात्मना भगवता शक्रदर्पं जिघांसता प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णंत तद्व
चः ३२ तथा च व्यदधुः सर्वं यथाह मधुसूदनः वाचयित्वा स्वस्त्ययनं तद्द्रव्येण गिरिद्विजान् ३३ उप
हृत्य बलीन् सर्वानादृता यवसं गवां गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणं ३३ अनांस्यनडुद्यु
क्तानि ते चारुह्य स्वलंकृताः गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजाशिषः ३४ कृष्णस्त्वन्यतमं
७६ रूपं गोपविश्रंभणं गतः शैलोऽस्मीति ब्रुवन् भूरि बलिमाददद् बृहद्वपुः ३५ तस्मै नमो व्रजजनैः सह
चक्रे आत्मनात्मने अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ३६ एषोऽवजानतो मर्त्यान् कामरूपी
वनौकसः हंति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवां ३७ इत्यद्रिगोद्विजमखं वासुदेवप्रणोदि
ताः यथा विधाय ते गोपाः सहकृष्णा व्रजं गताः ३८ इति श्रीभागवते महापुराणे दशमस्कंधे चतु
विंशतितमोऽध्यायः ॥

जी॰ आदन् अभक्षयन् ३५ तस्मै आत्मने आत्मना स्वयं व्रजजनैः सह नमश्चक्रे अहो इति सार्द्धश्लोकं पठन् कामरूपी स ७६
र्पादिरूपः अस्मै अद्रये शर्मणे क्षेमाय ३७ कर्म बाल्ये प्राकृतभावो गुणो वा कर्म गोवर्धनोद्धारो वा महेशः कर्त्ता
कर्तीदेवेनेति यमुक्ता देवश्लोकेषु मतीन तभी ३८ इति दशमे चतुर्विंशः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचविंशाध्यायेशक्रव्रजनाशायवर्षति उद्धृत्यगिरिमासाराद्रक्षद्गोकुलंप्रभुः १ कृष्णनाथेयेभ्योनंदादिभ्यः १ क्रुद्धश्चसन्निंद्रः सांवर्तकं
नामसंवर्त्तकःप्रलयः तत्कर्तारंमेघानांप्रसिद्धगणंप्रचोदयत्प्रेरयामास ननुकथंकृष्णनाथानांघोत्प्रवृत्तइत्याशंक्यात्मसं
भावनयानिरस्तविवेकत्वादित्याशयेनाह वाक्यंचाहेत्यादिपंचभिः ईशमानीअहमीश्वरइतिगर्ववान् २ देवहेलनंदेवस्य
ममावज्ञा ३ अदृढैः असमर्थैः कर्ममयैः क्रियानिर्वर्त्यैः अतएवनामनौनिभैः नाममात्रेणयानावइत्यर्थःक्रियंयतात

श्रीशुकउवाच इंद्रस्तदात्मनःपूजांविज्ञायविहितांनृप गोपेभ्यः कृष्णनाथेभ्योनंदादिभ्यश्चुकोपसः १ गणं
सांवर्त्तकंनाममेघानांचांतकारिणां इंद्रः प्राचोदयत्क्रुद्धोवाक्यंचाहेशमान्युत २ अहोश्रीमदमाहात्म्यं
गोपानांकाननौकसां कृष्णंमर्त्यमुपाश्रित्ययेचक्रुर्देवहेलनं ३ यथादृढैः कर्ममयैःक्रतुभिर्नामनौनि
भैः विद्यामान्वीक्षिकींहित्वातितीर्षंतिभवार्णवं ४ वाचालंबालिशंस्तब्धमज्ञंपंडितमानिनं कृष्णंमर्त्य
मुपाश्रित्यगोपामेचक्रुरप्रियं ५ एषांश्रियावलिप्तानांकृष्णेनाध्मापितात्मनां धुनुतश्रीमदस्तंभंपशून्नय
तसंक्षयं ६

त्सदृशैः आन्वीक्षिकीमात्मानुस्मृतिरूपां ४ तथावाचालंबहुभाषिणंबालिशंशिशुं पं
डितमानिनंपंडितमन्यं अतस्तब्धमविनीतमितिनिंदायांयोजितापींद्रस्यभारतीश्रीकृष्णंस्तौति तथाहिवाचालंशास्त्र
योनिंबालिशंएवमपिशिशुवन्निरभिमानिनंस्तब्धंअन्यस्याभावादनम्रं अज्ञंनास्तिज्ञेयंयस्मात्तंसर्वज्ञमित्यर्थः पंडि स्पर्द्धं ३
तमानिनंब्रह्मविदांबहुमाननीयंकृष्णंसदानंदरूपंब्रह्ममर्त्यंतथापिभक्तवात्सल्येनमनुष्यतयाप्रतीयमानमिति
५ अवलिप्तानांध्मापितात्मनांदृहितदेहानां धुनुतअपनयत श्रीमदेनयस्तंभोगर्वस्तं ६

मत्तानां १

भा०द०प विभ्रतः तान्प्रत्याह अहं चेति अनु व्रजे अनु अनंतरमेवागमिष्यामि मरुद्गणैः देवगणैः सह ७ मघवताइंद्रेण निर्मुक्तं बंधनं येषां
ते प्रलयकालाभिप्रायेण बद्धा आसन् तदा निर्मुक्तबंधनाः संतः आसारैः धारासंपातैः पीडयामासुः ८ स्तनयित्नुभिः अशनि-
भिः स्तनंतः गर्जंतः मरुद्गणैः आवहप्रवहादिवायुसमूहैः प्रेरिताः जलशर्कराः जलोपलान् ९ स्थूणावत्स्थूलाः अ-
नं.१ भ्रेषु मुंचत्सु सत्सु नतोन्नतं निम्नं उन्नतं च द्विपरीतं यथाभवति तथा भूर्नादृश्यत १० जातवेपना जातकंपाः ११ तत्र प

अहं चैरावतं नागमारुह्यानुव्रजे व्रजं मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ श्रीशुक उवाच इत्थं मघवताज्ञ-
प्ता मेघा निर्मुक्तबंधनाः नंदगोकुलमासारैः पीडयामासुरोजसा ८ विद्योतमाना विद्युद्भिः स्तनंतः स्तनयि-
७७ त्नुभिः तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ९ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः जलौ- घैः
प्लाव्यमाना भूर्नादृश्यत नतोन्नतं १० अत्यासारातिवातेन पशवो जातवेपनाः गोपा गोप्यश्च शीतार्ता गोविंदं शरणं शी
ययुः ११ शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः वेपमाना भगवतः पादमूलमुपाययुः कृष्ण कृष्ण महाभा-
ग त्वन्नाथं गोकुलं प्रभो त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल १३ शिलावर्षातिवातेन हन्यमानमचेतनं
निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः १४ अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं स्वयागे विहतेऽस्माभिरिं-
द्रो नाशाय वर्षति १५ तत्र प्रतिविधिं सम्यगात्मयोगेन साधये लोकेशमानिनां मौढ्याद्धनिष्ये श्रीमदं

अन्नं यान्नं विशिनष्टि शिर इति १२ गोपगोपीनां प्रार्थनमाह कृष्ण कृष्णेति त्वमेव नाथो यस्य तत् गोकुलं गवां नतः १३
कुलं वंशः नः अस्माकं देवात् इंद्रात् त्रातुं रक्षितुं अर्हसि १३ विज्ञापनात्पूर्वमेव प्रकुपितेंद्रेण कृतं इदं मेने १४ कथं मेने तदाह
अपगतः ऋतुर्यस्मात् तदपर्तु अतिशयितो वातो यस्मिन् तदतिवातं शिलामयं शिलाप्रचुरं १५ तत्र प्रतिज्ञापूर्वं गोवर्द्धनोद्धारणं
आह तत्रेति प्रतिविधिं प्रतिकारं स्वसामर्थ्येन साधयिष्यामि तच्च मौढ्यात् लोकेशमानिनां श्रीमदं लक्षणं तमो हरिष्या

राम ७७

नं.२

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्प२

अत्यद्भुतानि कर्माण्याह यः सप्तहायन इति कथं बिभ्रन्न्स्थित इति पुष्करं पद्मं गजराट् महागज इव ३ महौजसः महाबलायाः तेनो
वा२ वयः आयुः यौवनं कालेन यथा पीयते तद्वत् कथमित्यनुवर्तते ४ अनसः अधः शयानमास्य स्पमासो स्त्र्यः परिछिद्द काय
स्य उदकु ऊर्द्ध चरणौ हिन्वतः चालयतः प्रपदेन पदाग्रेण हतं विपर्यस्तं अनः कथमपततु ५ योदैत्येन क्रियमाणः सनूतं

यः सप्तहायनो बालः करेणैकेन लीलया कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव ३ तोकेन मीलिताक्षेण पूतना
या महौजसः पीतस्तनः सह प्राणैः कालेन वयसः स्तनोः ४ हिन्वतोऽधः शयानस्य मास्यस्य चरणावुदक् ॥
अनोऽपतद्विपर्यस्तं रुदतः प्र[illegible]पदाहतं ५ एकहायन आसीनो क्रियमाणो विहायसा दैत्येन यस्तृणावर्तमु
हत्कंठग्रहातुरं ६ क्वचिद्धैयंगवस्तैन्ये मात्रा बद्ध उलूखले गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ७
वने संचारयन्वत्सान्स[illegible]रामो बालकैर्वृतः हन्तुकामं बकं दोर्भ्यां मुखतोरिमपाटयत् ८ वत्सेषु व
त्सरूपेण प्रविशन्तं जिघांसया हत्वान्यपाययत्तेन कपित्थानि च लीलया ९ हत्वा रासभदैतेयं तद्बंधूंश्च न२
बलान्वितः चक्रे तालवनं क्षेमं परिपक्वफलान्वितं प्रलंबं घातयित्वोग्रं बलेन बलशालिना अमो
ज२ ही२ चयद्व्रजपशून्गोपान्आरण्यवह्नितः ११ आशीविषतमाहींद्रं दमित्वा विमदं हदात् प्रसह्योद्वास्य यमुनां स्प२
चक्रेसौ निर्विषोदकां ११ दुस्त्यजश्चानुरागोस्मिन्सर्वेषां नो व्रजौकसां नंदते तनये स्मासु तस्याप्यौ
त्पत्तिकः कथं १२
णावर्तं दैत्यं कथं अहनित्यर्थः ६ हैयंगवस्तैन्ये नवनीतचौर्ये बाहुभ्यां गच्छन्नुरिंगन्नित्यर्थः मुखतोहन्तुकामायस्पत्तं बकं वेषम
रिबाहुभ्यां मुखतः कथमपाटयत् ८ ११ आशीविषतमः अतिक्रूरविषः आसावहींद्रश्च तं १२ औत्पत्तिकः स्वभाविकः क
थमिति किं सर्वेषामात्मास्यादिति शंका १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अभिनयेन १   नंदस्य

भा॰द॰टी॰ उक्तमपि अतिविस्मयेनॅवं दत्तिक्वसप्तहायनइति १४ प्राक्श्रुतमेवगर्गोक्तार्यवाक्यंतच्चरितपरिशीलनेननिश्चित्तासंभावनस्यॅकृष्णॅतत्तावता स्य १
धर्मेजातेसइदानींतेनैववाक्येनगोपानुपदिशतिश्रूयतामिति १५ २१ तस्मात्तस्यकर्मसुविस्मयोनास्तीतिनंदस्योक्तिः २२ इत्यद्धासाक्षा

क्वसप्तहायनोबालः क्वमहाद्रिविधारणं ततोनोजायतेशंकाव्रजनाथतवात्मजे १४ नंदउवाच श्रूयतांमेवचोगोपाव्ये
ग॰२ तुशंकाचवोर्भके एनंकुमारमुद्दिश्यगर्गोमेयदुवाचह १५ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः वासुदेवइतिश्री
नि॰ल॰३ मानभिज्ञाःसंप्रचक्षते १७ बहूनिसंतिनामानिरूपाणिचसुतस्यते १७ गुणकर्माणिरूपाणितान्यहंवेदनोजनाः १८ एषवः
७९ श्रेय आधास्यत्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १९ पुरानेनव्रजपतेसाधवोदस्यु
पीडिताः अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः २० यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः नारयोभिभ
वंत्येतान्विष्णुपक्षानिवासुराः २१ तस्मान्नंदकुमारोयंनारायणसमोगुणैः श्रियाकीर्त्यानुभावेनतत्कर्मसुनविस्म
यः २२ इत्यद्धामांसमादिश्यगर्गेचस्वगृहंगते मन्येनारायणस्यांशंकृष्णमक्लिष्टकारिणं २३ इतिनंदवचःश्रु
त्वागर्गगीतंव्रजौकसः दृष्टश्रुतानुभावस्यकृष्णस्यामिततेजसः मुदितानंदमानर्चुःकृष्णंचगतविस्मयाः २४

मांप्रतिसमादिश्यगर्गेस्वगृहंगतेसति इदानींतथामन्यमानोपिइदानींकृष्णंनारायणस्यांशंमन्ये अत्रहेतुः अक्लिष्टकारि राम
णमिति २३ ४ ७९
च दि१

वर्णास्त्रयःकिलास्यासन्गृह्णतोनुयुगंतनूः शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुदेवाःसात्विकास्तत्कथमकुतस्तेषांतमस्तत्राहनहीति सद्भावःसत्वंसद्भक्तिर्वातद्युक्तानांसुराणामीशावयमितिविस्मयोग
र्वोहियस्मात्तद्घटतेऽसंतःसंतस्तेकिंचैतेषांमानभंगोऽनुग्रहएवेत्याहमत्तइति १७ गोपायेरक्षिष्यामि किंच सोयंममयाव्रतो

नहिसद्भावयुक्तानांसुराणामीशविस्मयः मत्तोसतांमानभंगःप्रशमायोपकल्पते १७ तस्मान्मच्छरणंगोष्ठंमन्नाथंमत्प
रिग्रहं गोपायेस्वात्मयोगेनसोयंमेव्रतआहितः १८ इत्युक्त्वैकेनहस्तेनकृत्वागोवर्द्धनाचलं दधारलीलयाकृष्ण
छत्राकमिवबालकः १९ अथाहभगवान्गोपान्हेंबतातव्रजौकसः यथोपजोषंविशतगिरिगर्त्तंसगोधनाः २०
नत्रासइहवःकार्योमद्धस्ताद्रिनिपातने वातवर्षभयेनालंतत्त्राणंविहितंहिवः तथानिर्विविशुर्गर्त्तंकृष्णाश्वासि
तमानसाः यथावकाशंसधनाःसव्रजाःसोपजीविनः २२ क्षुत्तृड्व्यथांसुखापेक्षांहित्वातैर्व्रजवासिभिः वीक्ष्य
माणोदधावद्रिंसप्ताहंनाचलत्पदात् २३ कृष्णयोगानुभावंतंनिशम्येंद्रोतिविस्मितः निःस्तंभोभ्रष्टसंकल्पः
स्वान्मेघान्सन्न्यवारयत् २४ खंव्यभ्रमुदितादित्यंवातवर्षंचदारुणं निशम्योपरतंगोपान्गोवर्धनधरोब्रवीत्
२५ निर्यातत्यजतत्रासंगोपाःसस्त्रीधनार्भकाः उपारतंवातवर्षंव्युदप्रायाश्चनिम्नगाः २६ ततस्तेनिर्ययुर्गो
पाःस्वंस्वमादायगोधनं शकटोढोपकरणंस्त्रीबालस्थविराःशनैः २७ भगवानपितंशैलंस्वस्थानेपूर्ववत्प्रभुः
पश्यतांसर्वभूतानांस्थापयामासलीलया २८

नियमःसंकल्पोवाआहितःधृतइत्यर्थः १८ उत्पाट्यछत्राकंउच्छिलींध्रंयथा १९ यथोपजोषंयथासुखं २०। २१ स
व्रजाःशकटमंडलीसहिताः सोपजीविनः भृत्यपुरोहितादिसहिताः २२ पदात्स्थानात् २३ २५ व्युदप्रायाःविगतो
दकप्रायाःस्वल्पजलाइत्यर्थः २६ शकटोढोपकरणंशकटेषुऊढमुपकरणंयथाभवतितथा २७ २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नौ०२

भा०द०२ निभृताः पूर्णाः यथायथोचितं परिरंभणादिभिः समीयुः उपजग्मुः सदाशिषः श्रेष्ठानाशीर्वादान् २९ ततो गोवर्द्धनस्थानात् अस
श्रीकृष्णस्य तथाविधानि गोवर्द्धनधारणादिरूपाणि एतानि कर्माणि गायंत्यः ईयुः ययुः कथंभूताः एवं प्रेम्णा हृदिस्पृशं तीति
न१ हृदिस्पृशः ताः यद्वा कथंभूतस्य प्रेष्ठस्य तस्य हृदिस्पृशतीति हृदिस्पृक् तस्य ३२ ३३ इति दशमे पंचविंशः षड्विंशे विस्मिता

तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणादिभिः गोपाश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः
सदाशिषः २९ यशोदा रोहिणी नंदो रामश्च बलिनां वरः कृष्णमालिंग्य युयुजुराशिषः स्नेहकातराः ३० दिवि
देवगणाः साध्याः सिद्धगंधर्वचारणाः तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि पार्थिव ३१ शंखदुंदुभयो नेदुर्दिवि
७८ देवप्रणोदिताः जगुर्गंधर्वपतयस्तुंबुरुप्रमुखा नृप ३२ ततोनुरक्तैः पशुपैः परिश्रितो राजन् स्वगोष्ठं सबलो
व्रजद्धरिः तथाविधान्यस्य कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ३३ इति श्रीभागवते महापुराण
दशमस्कंधे पंचविंशतितमोध्यायः श्रीशुक उवाच एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते अतद्वीर्यवि
दः प्रोचुः समभ्येत्य सुविस्मिताः १ बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै कथमर्हत्यसौ जन्म ग्राम्येष्वात्म ७८
जुगुप्सितं २ स

न् गोपान् कृष्णस्याद्भुतकर्मभिः वैरोगगर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् १ समभ्येत्य नंदमभिगम्य १ यद्वृचुस्तदा
ह बालकस्येति यत् यस्मादद्भुतानि कर्माणि तस्मात् ग्राम्येषु कथं जन्मार्हति आत्मजुगुप्सितं आत्मानर्हं २ श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सति

गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्यस्य श्रीकृष्णस्य प्रीतिं प्रार्थयते देवइति यज्ञविप्लवेनयारुट्तयादेवेइंद्रेवर्षतिवं
आश्मवर्षानिलैः अश्मानिजलंशर्करातीव्रवायुभिः सीदत्पालपशुस्त्रिसीदंतः पालाः पशवः स्त्रियश्चयस्मिनूतंतूतथात्म्या
त्मास्वयमेवशरणंयस्यतंक्षेष्टंदृष्ट्वानुकंपीउत्स्मयन् प्रौढिमाविः कुर्वन् शैलमुत्पाद्य अवलो[illegible] बालो लीलाथमुच्छिलींध्रं
पा। यथातथाएकेनकरेणबिभ्रद्धृत्गोष्ठमपालितवान् एवंमहेंद्रमदभित्गवामिंद्रइत्युत्तराध्यायार्थंचस्मरति सएवंभ

देवंवर्षतियज्ञविप्लवरुषावज्राश्मवर्षानिलैः सीदत्पालपशुस्त्रिआत्मशरणंदृष्ट्वानुकंप्युत्स्मयन् उत्पाट्यैक
करेणशैलमबलोलीलोच्छिलींध्रंयथाबिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्नइंद्रोगवां २५ इतिश्रीभागवते
महापुराणेदशमस्कंधेषड्विंशतितमोध्यायः श्रीशुकउवाच गोवर्द्धनेधृतेशैलेआसाराद्रक्षितेव्रजे
गोलोकादाव्रजत्कृष्णंसुरभिःशक्रएवच १ विविक्तउपसंगम्यव्रीडितःकृतहेलनः पस्पर्शपाद
योरेनंकिरीटेनार्कवर्चसा २ दृष्टश्रुतानुभावोस्यश्रीकृष्णस्यामिततेजसः नष्टत्रिलोकेशमदइदं
आहकृतांजलिः ३

तः श्रीकृष्णेनः प्रीयात्प्रीयतामिति २५ [illegible] षड्विंशेदशमव्यक्तः षड्विंशोदशमाहरिः अनंतुपंचविंशंमाचतुर्विंशंतितः १
थकृः १ दशमेषड्विंशः सप्तविंशेतदालक्ष्यकृष्णस्यप्राभवंपरं वृण्वंतेसुरभीद्राभ्याममभिषेकमहोत्सवः १ गोवर्द्धनेधृतेशैले
१२ इतिकृष्णस्यभयेनागमनेहेतुः आसाराद्रक्षितेव्रजइतिसुरभेहर्षेणागमने १ तत्रेंद्रआगत्यकिंकृतवानुतदाह विविक्तउप
संगम्येत्यादिनाअथाहसुरभिरित्यन्तः प्रात्केननग्रंथेन विविक्तएकांते पादयोः पस्पर्शनमश्चकार २ अस्यश्रीकृष्ण
स्यकृतश्रासावनुभावश्चाकृतानुभावः अकृतानुभावोयेन सइंद्रः नष्टः त्रिलोकेशोहंइतिमदोयस्यसः ३

दृष्टः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू० तत्रममापराधंक्षमस्वेतिवक्तुंनतवतावदपराधोनास्त्येवत्वयाऽनुग्रहएवकृतइत्याहचतुर्भिः विशुद्धसत्वमिति धामस्वरूपंशान्तं
एकरूपं अतअतपोमयंप्रचुरज्ञानंसर्वज्ञमित्यर्थः कुतः ध्वस्तरजस्तमस्कं ध्वस्ते अविद्यमानेरजस्तमसीयस्मिन् अतएवअ
यंअस्मदादिषुदृश्यमानःमायाकार्यरूपः गुणसंप्रवाहः गुणैः संप्राप्यतइतितथासंसारइत्यर्थः तेतवनविद्यते यतः अग्रहणे
नाज्ञानेनानुबध्यतइतितथासंसारइत्यर्थः तेतवनविद्यते [illegible] सर्वज्ञस्यतेनास्ती
त्यर्थः अज्ञानसंबंधाभावा ४ यदाअज्ञानतत्कृतदेहसंबंधोनास्ति [illegible] दातत्कृतानांलोभादीनांकावार्तेत्याह कुतोत्वि

इंद्रउवाच विशुद्धसत्वंतवधामशांतंतपोमयंध्वस्तरजस्तमस्कं मायामयोयंगुणसंप्रवाहोनविद्यतेतेग्र
तुर हणानुबंधः ४ कुतोनुतद्धेतवईशतत्कृतालोभादयोयेऽबुधलिंगभावाः तथापिदंडंभगवान्बिभर्तिध
८० र्मस्यगुप्त्यैखलनिग्रहाय ५ पितागुरुस्त्वंजगतामधीशोदुरत्ययःकालउपात्तदंडः हितायचेच्छा
से१ तनुभिःसमीहसेमानंविधुन्वन्जगदीशमानिनां ६ श्रीराम श्रीराम श्रीराम श्रीरामश्री

पुनरस्यदेहस्य हेतवः १ ति तत्कृतोदेहसंबंधःकुतः तद्धेतवः नन्वज्ञानिनामपितेदृश्यन्ते अतआह अबुधलिंगभावाः अज्ञानिनांगमकाः याव
द्रागादिमत्वंतावत् [illegible] नित्यमेवनसिद्धमित्यर्थः लोभाद्यभावेपिमन्मखभंगोदंडार्थ इत्याह तथापीति ५ ननुत्वद्दंडेमम राम ८०
गोपपुत्रस्यकाशक्तिः किंचकारणंकोवादंडोमयाकृतइत्यतआह पितेति जगतांत्वंपिताजनकः गुरुरुपदेष्टा अधी
शः नियंताइति दंडधारणेहेतुत्रयं कालत्वाच्चसमर्थः तस्मादुपात्तदंडोलीलावतारैः समीहसे तवसमीहालीलै
वजगदीशमानिनामस्माकंमानविधूननमित्यर्थः ६ ह २

तूला ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमेतदित्यत आह यइति मद्विधाश्चेत आज्ञाश्चेत अतो जगदीशमानिनः कालेभयकालेपि यथाः धुनैवातिरंहैस्त्वां अभयं मगणय्य भय१
तं वीक्ष्य आशु तन्मदं जगदीशा इति मदं हित्वा विगतगर्वाः संतः आर्यमार्गेत्वद्भक्तिलक्षणं भजंति अतस्तवइहैव खलानामनुशा
सनं दंड इत्यर्थः ७ एवं भगवत्स्वरूपमभिप्रायंचानुवर्ण्य क्षमापयति स त्वमिति एवंभूता असतीमतिर्मेपुनः माभूदिति प्रार्थ
नांतरं ८ महानयमपराधः कथं क्षंतव्य इति चेदत आह गेवतिस्वयंभरणां पुनःअकुरु भारजन्मनांवहूनां भाराणां जन्म

येमद्विधाज्ञाजगदीशमानिनस्त्वांवीक्ष्य कालेऽभयमाशु तन्मदं हित्वाऽर्यमार्गं प्रभजंत्यपस्मया ईहा खला
नामपि तेऽनुशासनं ७ स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्ते विदुषा प्रभावं क्षंतुं प्रभोथार्हसि मूढचेत
सो मैवं पुनर्भून्मतिरीश मेऽसती ८ तवावतारोयमधोक्षजेह स्वयंभराणामुरुभारजन्मनां चमूपती
१२ नांभवाय देव भवाय युष्मच्चरणानुवर्तिनां ९ नमस्तुभ्यं भगवते पुरुषाय महात्मने वासुदेवाय कृष्णा
यसात्वतांपतये नमः १० स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्तये सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः
११

येभ्यस्तेषां अभवाय नाशाय युष्मच्चरणसेविनां तु भवाय अतो मम त्वत्सेवकत्वात्त्वं नापराधिनोपि क्षंतव्यमिति भावः ९
क्षमापयन्नमस्करोति नम इति तुभ्यं भगवते कृष्णाय नमः पुरुषाय सर्वांतर्यामिणे महात्मने अतस्त्वेव्यपरिच्छिन्ना
यकुतः वासुदेवाय सर्वनिवासाय सात्वतां यादवानां पतये १० तर्हि किमहं यादवः न स्वच्छंदोपात्तदेहाय स्वेषां भ
क्तानां छंदेन इच्छया स्वीकृतदेहाय तत्रापि विशुद्धं ज्ञानमेव मूर्तिर्यस्य तस्मै मायया सर्वस्मै कुतः सर्वस्य बीजाय का
रणाय अतएव सर्वात्मने नम इति ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प२

भा० द० पू० कृतागसं इत्यनेनोक्तमपराधं निवेदयति मयेदमिति आसारवायुभिर्गोष्ठनाशमयमयेदं मरुत्वं विचेष्टितं कृतं १२ तथापि मां ईशात्वयानुगृ
हीतोस्मि अनुग्रहं दर्शयति ध्वस्तेत्यादि तिरोधसङ्गतिश्च १३·४ इंद्रेणाभिप्रायेण निवेदित भगवान् पितृर्थेवाह मयेति इंद्र श्रियादेवराज्येन
१५ १६ वः युष्माभिरिति बहुवचनं वरुणाद्यभिप्रायेण कथं गंतव्यं स्वर्गे पितृवैवेश्वरत्वादिति चेत्तत्राह क्रियतामिति मदनुशासनेनमय

मयेदं भगवन् गोष्ठनाशायासारवायुभिः चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना १२ त्वयेशानुगृहीतोस्मि ध्वस्तस्तंभो
हतोद्यमः ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः १३ श्रीशुक उवाच एवं संकीर्तितः कृष्णो मघोना भगवानमु
मेघगंभीरया वाचा प्रहसन्निदमब्रवीत् १४ श्रीभगवानुवाच मया ते कारि मघवन् मखभंगोनुगृह्णता मद प३
नुस्मृतये नित्यं मत्तस्येंद्र श्रिया भृशं १५ मामैश्वर्यश्रीमदांधो दंडपाणिं न पश्यति तं भ्रंशयामि संपद्भ्यो य
८१ स्य चेच्छाम्यनुग्रहं १६ गम्यतां शक्र भद्रं वः क्रियतां मेनुशासनं स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तंभवर्जि
तैः १७ अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वरं १८ सुरभिरु
वाच कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वसंभव भवता लोकनाथेन सनाथा वयमच्युत १९॥
नंनुभवता त्वं नः परमकं दैवं त्वं न इंद्रो जगत्पते भवाय भव गोविप्रदेवानां ये च साधवः २० श्रीरा

थापूर्वं तत्र स्थीयतामित्यर्थः युक्तैः प्रमत्तैः स्तंभवर्जितैर्निरहंकारैः १७ स्वसंतानैर्गोभिः सह उपामंत्र्य १८ कृष्ण कृष्णेत्या राम
दिसंबोधनाइंद्रेण हतानपि भवता सनाथा वयं कृताः रक्षिता इत्यर्थः १९॥ त्वं नः परमकं दैवं देवता अतः हे जगत्प ८१
ते गोविप्रदेवानां ये अन्ये च साधवः तेषां भवाय अभ्युदयाय त्वमेवेंद्रो भव २० श्रीराम श्रीराम श्रीराम श्रीरा०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु भवतां इंद्रोस्तीति चेदत आह इंद्रमिति अलं पुरंदरस्येंद्रत्वेत्यर्थः ननु देवइंद्रो भवति कथमहं भवेयमिति चेदत आह अवती
र्णोसीति २ सुरभिरात्मनः पयसाभ्यषिंचत् इंद्रश्च आकाशगंगायाजलैरभ्यषिंचत् २२ देवमातृभिरदित्यादिभिः देवैर्मातृभि
श्चेति वा गाः पशून् गां स्वर्गं वा इंद्रत्वेन विंदतीति कृत्वा गोविंद इत्यभ्यधात् नामकृतवानित्यर्थः २३ ४ देवनिकायेषु केत

इंद्रेन त्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयं अवतीर्णोसि विश्वात्मन् भूमेर्भारापनुत्तये २१ श्रीशुक उवाच ॥
एवं कृष्णमुपामंत्र्य सुरभिः पयसात्मनः जलैराकाशगंगाया ऐरावतकरोद्धृतैः २२ इंद्रः सुरर्षिभिः साकं
नोदितो देवमातृभिः अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात् २३ तत्रागतास्तुंबुरुनारदादयो गंधर्ववि
द्याधरसिद्धचारणाः जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदान्विताः २४ तं तुष्टुवुर्देवनिका
यकेतवो व्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावः तदा गामनयन् प
योद्रुतां २५ नानारसौघाः सरितो वृक्षा आसन्मधुस्रुताः अकृष्टपच्यौषधयो गिरयोऽबिभ्रदुन्मणीन् २६ कृ गिरयः
ष्णेभिषिक्त एतानि सर्वाणि कुरुनंदन निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः २७ इति गोगोकुलप
तिं गोविंदमभिषिच्य सः अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवं २८ इति श्रीभागवते महापुराणे दशम
स्कंधे इंद्रस्तुतिः सप्तविंशोध्यायः ॥

३७१ वः दर्शनीयाः मुख्याः इत्यर्थः गावः गां पृथ्वीं पयोभिर्द्रुतां आर्द्राम् अनयन् अकुर्वन्नित्यर्थः २५ नानारसौघाः क्षीरादि
वाहिन्यः अकृष्टपच्याः कर्षणं विनैव पक्वाः ओषधयो व्रीह्यादय आसन् यद्वा अकृष्टपच्याः ओषधयो येषु ते गिरयः
उन्मणीन् गर्भगतान्मणीन् उत्तुंगान् वहिः प्रकटयन् अबिभ्रन् अबिभरुः २६ २८ इति दशमे सप्तविंशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰१ अष्टाविंशे ततो नंदानयनं वरुणालयात् वैकुंठदर्शनं चाथ गोपानामनुवर्ण्यते ॥ गोवर्द्धनं समुद्धृत्य वशीकृत्यामरेश्वरं नंदानय
नतः कृष्णो वरुणं च वशं नयत् २ ॥ कलामात्रायां द्वादश्यां पारणादरात् निशीथे आसुरीं वेलामवज्ञाय अरुणोदय एव पूर्वमे
व शास्त्रबलेन उदके प्रविष्टं ततो नंदं गृहीत्वा वरुणस्य भृत्यो नयदिति तथा च शास्त्रं कलार्द्धं द्वादशीं दृष्ट्वा निशीथादूर्द्ध्वमेव
हि आमध्याह्नाः क्रियाः सर्वाः कर्त्तव्याः शंभुशासनादित्याह वक्ष्यति च वरुणः अजानता मामकेनेति भगवद्धर्ममजान
तेत्यर्थः २ स्वानां भगवद्धर्मपराणां अभयदः माभैष्टेत्यभयं ददत् ३ सपर्यया अर्हणेन ४ अद्य इदानीं मे मया दे

श्रीशुक उवाच एकादश्यां निराहारः समभ्यर्च्य जनार्द्दनं स्नातुं नंदस्तु कालिंद्यां द्वादश्यां जलमाविशत् १
तं गृहीत्वानयद्भृत्यो वरुणस्यासुरोंतिकं निशि २ चुक्रुशुस्तमपश्यंतः कृष्ण रामेति गोपकाः भगवांस्तदु
पश्रुत्य पितरं वरुणाहृतं तदंतिकं गतो राजन् स्वानामभयदो विभुः ३ प्राप्तं वीक्ष्य हृषीकेशं लोकपाल
८२ सपर्यया महत्या पूजयित्वाह तद्दर्शनमहोत्सवः ४ वरुण उवाच अद्य मे निभृतो देह अद्यैवार्थोधिग
तः प्रभो त्वत्पादभाजो भगवन्नवापुः पारमध्वनः ५ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने न यत्र
अवज्ञायासुरीं वेलां प्रविष्टमुदकं ४ श्रूयते माया लोकसृष्टिविकल्पना ६

हो निभृतो धृतः यदा त्वद्दर्शनं जातं तदैव साफल्यं प्राप्तमित्यर्थः यद्वा निभृतः पूर्णमनोरथ इत्यर्थः किंच अद्यैवार्थोधि राम
गतः सर्वरत्नाकरपतिनापि ईदृशः पूर्वं नैवं विधोर्थः प्राप्त इत्यर्थः किंच संसारोपि निस्तीर्ण इत्याशयेनाह त्वत्पादभाज इति ८२
अध्वनः पारं मोक्षं ५ भगवते निरतिशयैश्वर्याय ब्रह्मणे पूर्णाय परमात्मने सर्वजीवनियंत्रे तत्र हेतुः न यत्रेति
लोकसृष्टिं विकल्पयति या माया सा यत्र न श्रूयते अविद्यमानवत्तिष्ठतीत्यर्थः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अजानता मद्भृत्येन त्वत्पित्राहरणं यत्कृतं तदिति नंदं विमुच्य समर्पयेति गोविंदेति ७ ८ अतींद्रियं अदृष्टपूर्वं लोकपालस्य महोदयं ऐश्वर्यं ९ औ
त्सुक्ययुक्ता धीर्येषां ते अपि किं स्वगतिं स्वस्थानं सूक्ष्मां ब्रह्माख्यां उपाधास्यत् उपाधास्यति नोस्मान्प्रापयिष्यतीति संकल्पितवंत इत्यर्थः १०
इति एवंभूतं स्वानां स्वेषां संकल्पं अखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपया एतद्वक्ष्यमाणमचिंतयत् ११ अविद्या
व

अजानता मामकेन मूढेनाकार्यवेदिना आनीतोयं तव पिता तद्भवान् क्षंतुमर्हति गोविंद नीयतामयं पिता तातपितृवत्स
ल ७ श्रीशुक उवाच एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः आदायागात्स्वपितरं बंधूनां चावहन्मुदं
८ नंदस्त्वतींद्रियं दृष्ट्वा लोकपालमहोदयं कृष्णे च संनतिं तेषां ज्ञातिभ्यो विस्मितोब्रवीत् ९ ते चौत्सुक्यधियो
राजन्मत्वा गोपास्तमीश्वरं अपि नः स्वगतिं सूक्ष्मामुपाधास्यदधीश्वरः १० इति स्वानां स भगवान् विज्ञाया
खिलदृक् स्वयं संकल्पसिद्धये तेषां कृपयैतदचिंतयत् ११ जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः उ
च्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् १२ इति संचिंत्य भगवान् महाकारुणिको हरिः दर्शयामास लोकं
स्वं गोपानां तमसः परं १३ सत्यं ज्ञानमनंतं नित्यं ब्रह्मज्योतिः सनातनं यद्धि पश्यंति मुनयो गुणापाये समाहिताः
य

देहाद्यहंबुद्धिस्ततः कामः ततः कर्म ततः उच्चावचासु देवतिर्यगादिषु भ्रमन् स्वीयां गतिं न वेद १२ स्वयं ब्रह्मस्वरूपं लोकं च वैकुंठा
ख्यं तमसः परं तमसः प्रकृतेः परं १३ देहादिपिहितानां दर्शनमशक्यमिति प्रथमं देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामास
तदाह सत्यमिति सत्यं अबाध्यं ज्ञानं अजडं अनंतं अपरिच्छिन्नं ज्योतिः स्वप्रकाशं सनातनं शश्वत्सिद्धं गुणापाये गुणापा
हे ज्ञानिनो यत्पश्यंति तत् कृपया दर्शयामास १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकं २ प्राक्तनत्वात् ३ नो

भा०१०पू० एवं ब्रह्मह्रदं प्रवेश्य अक्रूरह्रदं वा ह्रदस्तत्र निमग्नस्य विशेषविज्ञानाभावात् तं ब्रह्मह्रदं ते तु नीताः प्रापिताः तस्मिन् मग्नास्तु शब्दात् विशेषमाह पुनः
कृष्णेन उद्धृताः समाधितो व्युत्थापिताः सन्तः ब्रह्मणो लोकं वैकुण्ठं ददृशुरिति ननु ब्रह्मनिमग्नोऽपि पुनर्लोकदर्शनमघटितमेवेत्याशंक्याह य
प०३ त्रेति यस्मिन् ह्रदे निमग्नः स्तुतिं कुर्वन्नक्रूरोऽध्यगात् दृष्टवान् शुकपरीक्षित्संवादावर्णितः निर्देशः नद्यत्येके अस्मिन् भगवति किंचिदपि असं द्वि३
भावितमिति भावः अथवा अक्रूरो यत्र दृष्टवान् तस्य यमुनाह्रदस्य ब्रह्मह्रद इति नाम तं ह्रदं नीताः सन्तो ब्रह्मणो लोकं ददृशुः पुनश्च कृष्णे
पूर्व २१ नोद्धृताः [illegible] ते दृष्ट्वा विस्मिता बभूवुरिति व्याख्यातं व्यवहितान्वयोऽप्रसिद्धकल्पना सोढव्येति १५ १६ इति दशमे अष्टाविंशः ऊन

ते तु ब्रह्मह्रदं नीता मग्नाः कृष्णेन चोद्धृताः ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा १५ नंदादयस्तु तं दृष्ट्वा
परमानंदनिर्वृताः कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः १६ इति श्रीभागवते महापुराणे दशम
०३ स्कंधे अष्टाविंशोऽध्यायः श्रीशुक उवाच भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः वीक्ष्य रंतुं मनश्चक्रे योग
मायामुपाश्रितः १

विंशे तु रासार्थमुक्तिप्रत्युक्त्या हरेः गोपीभी राससंरम्भस्तस्य चान्तर्द्धिकौतुकी १ ब्रह्मादिजयसंरूढदर्प्पकंदर्प्पदर्पहा जय
तिश्रीपतिर्गोपीरासमंडलमंडनः २ ननु विपरीतमिदं परदारविनोदेन कंदर्प्पविजेतृत्वप्रतीतेः मैवं योगमायामुपाश्रि विजितत्वा २
मन्मथः ३ तः आत्मारामोऽप्यरीरमत् साक्षान्मन्मथमन्मथः आत्मन्यवरुद्धसौरत इत्यादिषु स्वातंत्र्याभिधानात् तस्माद्रासक्रीडाविडंब ०३
ना२ नं कामविजयख्यापनायेत्येव तत्त्वं किंच शृंगारकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः
ता रात्रीरिति या उक्ता उ वस्त्रापहारे सिद्धा मयेमा रंस्यथ क्षपा इति प्रतिश्रुता इत्यर्थः १ श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा तस्मिन्नवक्षणे तत्क्षितिपत उडुराज इव चंद्र इव उदगात् उदितः किंकुर्वन् दीर्घकालेन दर्शनं यस्य सः स्वप्रियायाः मुखं अरुणेन कुंकुमेन यथा विलि
पन् तथा प्राच्याः ककुभः दिशः मुखं शंतमैः करैः रश्मिभिः अरुणेन उदयरागेण विलिंपन् अरुणाकुर्वन्नित्यर्थः सप्रसिद्धः उडुराजः ते
ह्यः चर्षणीनां जनानां शुचः तापम्लानीः मृजन् अपनयन् २ कुमुद्वंतं कुमुद विकसनीयं विधत्ते यस्य तं कुमुद्वंतं अखंडमंडलं यस्य
आमेव १ तं रमायाः आननस्य आभा यस्य तं नवकुंकुममिव अरुणं दृष्ट्वा न तथा वनं च तस्य कोमलैः गोभिः रश्मिभिः रंजितं दृष्ट्वा कल्लम

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः। संचर्षणीनां उदगात् शुचो मृजन् प्रियः प्रियाया
इव दीर्घदर्शनः १ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं वनं च तत्कोमलगोभिरंजितं जगौ क वनं २
लं वामदृशां मनोहरं २ निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः। आजग्मुरन्योन्य
मलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः ४ दुहंत्यो भियपुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोधि
श्रित्य संयावमनुद्वास्यापरा ययुः ५ परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून् पयः शुश्रूषंत्यः पतीन् काश्चि
दश्नंत्यो पास्य भोजनं ६

मधुरं जगौ आगायत् कथं वामा मनोहरा दृशो यासां तासां मनोहरं यथा ३ असापत्न्याय अन्योन्यमलक्षितः न ज्ञापितः उद्यमो याभि
स्ताः स कांतो यत्र तत्र गीतध्वनिमार्गेण जग्मुः जवेन वेगेन लोलानि चंचलानि कुंडलानि यासां ताः ४ श्रीकृष्णस्य चक्रशब्द श्र
वणेन तत्श्रवण चिंतानां तत्क्षणमेव त्रैवर्गिककर्मणि दृष्टांत घोतयंत्यः इवाद्धविसितकर्म विहाय ययुः तदाह दुहंत्य इति
पयः स्थालीस्थं चुल्यामधिश्रित्य तत्क्वाथनमप्रतीक्षमाणाः काश्चित् ययुः संयावं गोधूमकणान्नं पक्वं अनुद्वास्य अनवतार्य ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰श्च॰

भा॰ द॰ पू॰ अन्याप्रभञ्जनः अंगोद्वर्त्तनादिकुर्वत्यः काश्चित् कृष्णमनुस्मृत्य कर्मनदासक्तमनसः अन्यथाकृत्यमपि फलं सेवेति द्योतयन्नाह त्व
ग्लनेति स्थानतः स्वरूपतः आर्द्रधोधारणेन विपर्ययं प्राप्ता निवस्त्राभरणा नियासांता। ७ नच कृष्णात् कृष्णमनसां विघ्नोभ
वतीत्याह तावार्यमाणाइति ८ न त्वज्ञोविनिर्गमायामित्यत्र प्रागपि तद्भावनायुक्तास्तदानितरां ध्रुवत्वित्यर्थः ९ किंच त
दानीमेव परमात्मानं श्रीकृष्णं ध्यानेन प्राप्ता सद्यः गुणमयं देहं जहुरित्याह श्लोकद्वयेन दुःसहेति १० ननु कथं जहुः
परमात्मत्वेज्ञानाभावादित्याशंक्याह जारबुद्ध्यापीति न हि वस्तुशक्तिर्बुद्धिमपेक्षते अन्यथा मत्वापि पिबतोऽमृतवदि

लिप्तत्यः प्रभञ्जयोन्याः अंजत्यः काश्चल्लोचने अन्यस्तवस्त्राभरणाः काश्चित् कृष्णांतिकं ययुः ७ तावार्यमा
८४ णाःपतिभिः पितृभिर्भ्रातृबंधुभिः गोविंदापहृतात्मानो न न्यवर्तन्त मोहिताः ८ अंतर्गृहगताः काश्चि
द्गोप्योऽलब्धविनिर्गमाः कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ९ दुःसहप्रेष्ठविरहतीव्रताप
धुताशुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः १० तमेव परमात्मानं जारबुद्ध्यापि संग
ताः जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः ११

तिभावः ननु तदपि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह सद्यः प्रक्षीणबंधनाइति ननु कथं भोगमंतरेण प्रारब्धकर्म राम
क्षीणं भोगेनैव सद्यः क्षीणमित्याह दुःसहेति दुःसहो यः प्रेष्ठस्य विरहः तेन तीव्रतापस्तेन धुतानि गतान्यशुभानि ८४
यासां ताः तदप्राप्तिपरमदुःखभोगेन पापं क्षीणमित्यर्थः तथा ध्यानेन प्राप्तोऽच्युतस्तस्याश्लेषेण या निर्वृतिः परम ध्या॰ २
सुखभोगस्तया क्षीणं मंगलं पुण्यबंधनं यासां ताः अतो ध्यानेन परमात्मप्राप्तस्तत्कालसुखदुःखाभ्यां निःशेषकर्मक्ष
यात् गुणमयं देहं जहुरिति ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यथा पतिपुत्रादीनां वस्तुतो ब्रह्मत्वेपि न तत्तद्भजनान्मोक्षस्तथा बुद्ध्यभावात् एवं कृष्णमपि ब्रह्मत्वबुद्ध्यभावेन तत्संगतिः कथं मोक्ष
हेतुरिति शंकते कृष्णं विदुरिति परं केवलं कांतं कमनीयं १२ परिहरति उक्तमिति अयं भावः जीवत्वावृतं ब्रह्मत्वं कृष्णस्य तु हृषी
केशत्वादनावृतं अतो न तत्र बुद्ध्यपेक्षेति भावः १३ ननु देही कथं अनावृतः स्यादत आह नृणामिति गुणात्मनः गुणनियंतुर्भग

राजोवाच कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने गुणप्रवाहोपरमस्तासां गुणधियां कथं १२ श्रीशुक उवाच ॥
उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः १३ नृणां निःश्रेयसार्था
य व्यक्तिर्भगवतो नृप अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः १४ कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च
नित्यं हरौ विदधतो यांति तन्मयतां हि ते १५ न चैवं विस्मयः कार्यो भवता भगवत्यजे योगेश्वरेश्वरे कृष्णे यत
एतद्विमुच्यते १६ ता दृष्ट्वांतिकमायाता भगवान् व्रजयोषितः अवदद्वदतां श्रेष्ठो वाचःपेशैर्विमोहयन् १७
श्रीभगवानुवाच स्वागतं वो महाभागाः प्रियं किं करवाणि वः व्रजस्यानामयं कच्चिद्ब्रूतागमनकारणं १८ र
जन्येषा घोररूपा घोरसत्वनिषेविता प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः १९ श्रीराम श्रीराम

वत एवंरूपाभिव्यक्तिः अतो न देहिसादृश्यं तत्र वक्तुं युज्यत इति भावः १४ अतो यथा कथंचित्तदासक्तिः मुक्तिकारणमित्या
ह काममिति ऐक्यं संबंधं सौहृदं भक्तिं १५ न च भगवत्येतायमिति भाव इत्याह नैवमिति यतः श्रीकृष्णादेतन्नु स्थावरादिक
मपि मुच्यते १६ प्रस्तुतमाह ता दृष्ट्वेति वाचः पेशैर्वाग्विलासैः १७ सर्वाः ससंभ्रममागता विलोक्य सभयमिवाह
व्रजस्येति १८ लज्जया मंदहसितमालक्ष्याह रजन्येषेति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू० किंच मातर इति विचिन्वंति मृगयंते बंधूनां साध्वसं माकुरुतेत्यर्थः २० ईषत्प्रणयात्कोपेनान्यतो विलोकयंतीः प्रत्याह दृष्टमिति रा
केशस्य पूर्णचंद्रस्य करै रंजितं यमुनास्पर्शिनो निलस्य लीलाभेदगतिस्तया एजंतः कंपमानाः तरूणां पल्लवास्तैः शोभितं २१
सतीः हे सत्यः २२ संरंभक्षोभितदृष्टीः प्रत्याह अथवेति यन्त्रिताशयाः वशीकृतचित्ताः हे सत्यः उपपन्नं युक्तं प्रीयंते प्रीता

मातरः पितरः पुत्रा भ्रातरः पतयश्च वः विचिन्वंति ह्यपश्यंतो मा कृढ्वं बंधुसाध्वसं २० दृष्टं वनं कुसुमितं राकेश साध्वसं
कररंजितं यमुनानिललीलैजत्तरुपल्लवशोभितं २१ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः क्रंदं
५३ ति वत्सा बालाश्च तान् पाययत दुह्यत २२ अथवा मदभिस्नेहाद्भवत्यो यन्त्रिताशयाः आगता ह्युपपन्नं वः
प्रीयंते मयि जंतवः २३ भर्त्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया तद्बंधूनां च कल्याण्यः प्रजानां चानु
८५ पोषणं २४ दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि वा पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी २५
अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहं जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियः २६ श्रवणाद्दर्शना
द्ध्यानान्मयि भावोऽनुकीर्त्तनात् न तथा सन्निकर्षेण प्रतियात ततो गृहान् २७ श्रीशुक उवाच इति वि
प्रियमाकर्ण्य गोप्यो गोविंदभाषितं विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययां २८ कृत्वा मुखान्यव
शुचः श्वसनेन शुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थु
र्मृजंत्य उरुदुःखभराः स्म तूष्णीं २९

भवंति २३ दृष्टादृष्टभयप्रदर्शनेन निवर्त्तयति भर्त्तुरित्यादि श्लोकत्रयेण २४ २५ फल्गु
कृच्छ्रं दुःसंपाद्यं औपपत्यं जारसौख्यं २६ किंच श्रवणादिति २७ चिंताप्राप्तानां स्थितिमाह कृत्वेति शुचः शोकाद्धेतोः तेन ८५
श्वासेन शुष्यंतो बिंबफलसदृशा अधरा येषु मुखेषु तानि अवनम्राणि कृत्वा तथा अंगुष्ठेन महीं लिखंत्यः तथा गृहीतक
ज्जलैरश्रुभिः कुचकुंकुमानि क्षालयंत्यः तूष्णीं स्थिताः यतः उरुदुःखभरेणाक्रांताः २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्र २

किंच प्रेष्ठमिति किंचित्संरंभेन कोपावेशेन गद्गदा गिरो यासां ताः अब्रुवन् तस्मात्संरंभकरणं प्रेष्ठमित्यादि प्रियतरमिव प्रतिभाषमाणं प्रत्याच
क्षमाणं २ नृशंसं क्रूरं दुरवग्रह स्वच्छंद। पादमूलं भक्तास्ति न तीरस्मानुभजस्व मा त्यजेति ३। अपि च यदुक्तं पत्यपत्येत्यादि त्वया धर्म
विदेति सोपहसं एवमेतत् उपदेशानां पदे विषये त्वय्येवास्तु उपदेशापदत्वे हेतुः ईशः इति विविदिषावाक्येन सर्वोपदेशानां मोक्षप
रत्वावगमादिति भावः ईशत्वे हेतुः आत्मा किल भवानिति भोगपरस्य हि सर्वस्य भोक्ता आत्मैवेशः इति अतः प्रेष्ठो बंधुश्च भवाने
उ१ वेति सर्वबंधुकरणायं त्वय्येवास्त्वित्यर्थः अथवा धर्मोपदेशानां पदं स्थानं धर्मोपदेष्टरि त्वयि सतीति अस्मासु च धर्मं जिज्ञास

प्रेष्ठं प्रियतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः। नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभग टि१
द्गदगिरः ब्रुवतानुरक्ताः ३० गोप्य ऊचुः मैवं विभोऽर्हति भवान् गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमू
लं भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून् ३१ यत्पत्यपत्यसुहृदामनुवृत्ति
रंग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तं अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ३२

समानास्मासु सतीषु त्वया धर्मविदा यदुक्तं एवमेतत् इदं स्तु न तु धर्मोपदेष्टा किंतु भवानात्मेति अथवा यदुक्तं एतदुपदेशापदे तद्दो
उ२ चेरपुरुषेऽस्तु नाम त्वयि ईशे स्वामिनि सति एवं काशंकां नेवमित्यर्थः यतस्तनुभृतां त्वमात्मा फलरूप इति यद्वा तेन दुक्तं काका
पत्यादिशुश्रूषणं धर्म इति एवमेव त्वय्येवास्तु कुतः उपदेशापदेशु शुश्रूषणीयत्वेनोपदिश्यमानानां पदे अधिष्ठाने कुतः
इशा ईश्वरमधिष्ठानं विना कोपि पतिपुत्रादिर्नामास्तीति अन्यत्समानं अलमतिविस्तरेण ३२ प२

पत्सादीनां २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः तव सुतः सति यदाधरबिंबे दत्तवेणुरनयत्स्वरजातीः २४
सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः २५ लं२

घनं१ प्रतपत्रं छायया कुर्वन्निति २३ अपिच महदेवता आश्चर्यमित्याहुः विविधेति हे सति यशोदे तव सुतो नानागोपक्रीडासु विदग्धो नि हे१
पुणः वेणुवाद्यविषये निजैव शिक्षायासुतोः स्वोत्प्रेक्षितान् तत्पतः अनेकशत्यर्थः स्वरजातीः निषादऋषभादि स्वरालाप
पभेदान् अनयत् उन्नीतवान् २४ तत्रतोः स्वरजातीः सवनशः मंद्रमध्यतारभेदेन युक्ता गीतध्वनिरागतः ततः आनताः
कंधरा चित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः कोविदा अपि तेन निश्चितं तत्त्वं तद्धेतुर्येषां ते कश्मलं मोहं ययुरिति २५

म२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०१ अस्माकंतु मोहंकिंब्रूमइत्याहुः निजपदाब्जदलैरिति ध्वजादीनिविचित्राणिललामानिचिह्नानियेषांतैर्निजानिपदान्येवअब्जदला
नितैः व्रजभुवः खुरतोदं सुराक्रमणव्यथां शमयन्वर्ष्मणा धुर्योगजः तद्वद्गतिर्यस्य सःस्वभावादिनेवेणुः सन् ॥१६ यद्व्रजतितेननि
मित्तेनसविलाससवीक्षणेन अर्पितोमनोभववेगोयासुतावयंकुजाव्रक्षास्तेषागतिंगमिताः सत्यः मोहननविदामः कवरंवसनं
टी०१ वा ॥१७॥ किंचामणिधरः मणीनुग्रथितानुगोगणनार्थंधारयतीतिमणिधरः क्वचिद्देशेतैर्मणिभिः गाः आसमंताद्गणयन् कृष्णः

निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः व्रजभुवः शमयन्खुरतोदंवर्ष्मधुर्यगति रीडित
वेणुः ॥१६ व्रजतितेनवयंसविलासवीक्षणार्पितमनोभववेगाः कुजगतिंगमितानविदामः कश्मले
१०४ नवसनंकवरंवा ॥१७ मणिधरः क्वचिदागणयन्गा मालयादयितगंधतुलस्याः प्रणयिनोनुचरस्य
कदांसेप्रक्षिपन्भुज मगायतयत्र ॥१८॥ क्वणितवेणुरववंचितचित्ताः कृष्णमन्वसतकृष्णगृहि
ण्यः गुणगणार्णमनुगत्यहरिण्योगोपिकाइवविमुक्तगृहाशाः ॥१९॥ श्रीराम श्रीराम श्री

राम

यत्रकदाचित् अगायत तदा क्वणितस्यवेणोःरवेणवंचितानि अपहृतानिचित्तानियासांताः कृष्णस्यहरिणस्यगृहिण्यो १०४
भार्याः गुणगणार्णंगुणगणसमुद्रं कृष्णमनुगत्यप्राप्यतंकृष्णमेवान्वसतअनन्यवर्तत इत्यर्थः कुतः यतोविमुक्ताः गृहा
शायाभिस्ताः गोपिकाइवता अपितद्वदेव अन्वासतेति ॥१९ तथादयितगंधायानुल्लसीतस्याःमालयासहवर्त्तमानंप्रण
अन्वासत१ यिनःप्रियस्यानुचरस्यांसेभुजंप्रक्षिपन्यत्रयदाकदाचित्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं वृंदावनप्रवेशेषु क्रीडितासायाह्ने गोधनानि परावृत्य यमुनायां क्रीडनस्तस्य सौभाग्यमनुवर्णयति कुंददामकृतकौतुकवेष इ
ति गोपीनां उत्सवाय कुंददामभिः कृतः कौतुकेन वेषाख्यं कारो येन सः हे अनघ यशोदातनय वत्सः पुत्रः नंदसूनुः कृष्णः यद्यपि सहे
व वह्यः कथं यत्य काश्चित्त ववत्स इति काश्चिन्नंदसूनुरिति चाहुः नर्मदः हर्षदः सन् यदा विजहार क्रीडां चकार २०॥ तदा मलयजे ति २
स्य स्पर्शेन मलयजस्य चंदनस्य वसुभिः शीतैरंशुभिः स्पर्शस्तेन तं कृष्णं मानयन् अनुकूलं यथा तथा उपवाति वीजयति यद्वा मलय
जो दक्षिणा वायुः यद्वा मलयजस्य कृष्णेन स्वांगे अनुलिप्तस्य स्पर्शेन मानयन्निति । किंच वंदिनः इव स्तावकाः संतः गंध
र्वादिगणाः वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः परितः उपासत २१ आयांतमालोक्य हर्षात् परस्परमूचुः वत्सल इति व्रज

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायां । नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार २०॥
मंदवायुरुपवात्यनुकूलं मानयन् मलयजस्पर्शेन वंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः २१
वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः । कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः २२
उत्सवं श्रमरुचापि दृशीनामुन्नयन् खुररजश्छुरितस्रक् दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः २३

स्यगवां च यद्वा व्रजे निवद्धानां गवां अनुकंप्यानामस्माकमित्यर्थः वत्सलः स हितकृत् कुत एतत् यद्यस्मात् अगध्रः अगं धरती
ति गोवर्द्धनोद्धरणः २२ बहुशो रक्षणस्यापलक्षणमेतत् वृद्धैर्ब्रह्मादिभिः सर्वैः पथीति सर्वैर्वंद्यमानचरण इत्यर्थः सायंशी
घ्रमागंतुं न ददातीत्यर्थः उपोह्य एकीकृत्य गीतयुक्तो वेणुर्यस्य सः श्रमयुक्तयापि कांत्या नेत्राणां हर्षमुन्नयन् उच्चैः प्रापयन्
खुररजोभिः छुरिता व्याप्ता स्रग्यस्य सः सुहृदामस्माकमाशिषो मनोरथस्य दित्सया दातुमिच्छया देवक्या जठरभव
तीति तथा स एव उडुराजश्चंद्रः निर्वृत्तिहेतुत्वेन सएष एतीति २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०टी० अतिसंभ्रमेण काश्चित्समीपमायांतं कथयंतिईषन्मदेनविघूर्णितेविह्वले लोचनेयस्य सः बदरपांडुवदनः ईषत्पक्वबदरवत्पांडुरं वदनंयस्य
सः अत्रहेतुः कनककुंडललक्ष्म्याकांत्यामृदुः कोमलोगंडोयस्मिंस्तद्वदनं मंडयन् कोमलगंडस्थलच्छायाशोभयन्निति १४ यदुपति
र्देवकीजठरभूरितिवप्रागयवसुदेवस्यकचिज्जातस्तवात्मजः इत्यादिगर्गवाक्यप्रसिद्धोक्तेः यद्वासखत्वेदेयिवान्सात्वतांकुलं
तिवत्तज्ञात्वाकाश्चिद्वदंतीतिगजेंद्रगतिः चंद्रइवप्रसन्नवक्त्रः व्रजगवामस्माकंअनंतंदिनतापंचशमयन्नुपयातिएषसमीपमा
यातीति २५ एवंविरहदुःखेनापिअनुग्रहोरुष्णलीलाएवगायंत्यः तस्मिन्विन्नचेतनाजीवितयासांताः तस्मिन्नेवमनःस

मू० मदविघूर्णितलोचनईषन्मानदः स्वसुहृदां वनमाली बदरपांडुवदनोमृदुगंडंमंडयन्कनककुंडललक्ष्म्या
२४ यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैषदिनांते मुदितवक्त्रउपयातिदुरंतंमोचयन्व्रजगवांदि
१०५ नतापं २५ श्रीशुकउवाच एवंव्रजस्त्रियोराजन्कृष्णलीलानुगायतीः रेमिरेहःसुचित्तास्तन्मनस्का
महोदयाः २६ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचत्रिंशोध्यायः श्रीशुकउवाच अथतर्ह्यागतोगो
ष्ठमरिष्टोवृषभासुरः महींमहाककुत्कायः कंपयन्खुरविक्षताम् १ ॥श्रीराम श्रीराम श्रीराम श्री

कल्पकृपयासांताः अंतोमहानुदयः उत्सवोयासांताः अहःस्वपिरेमिरे २६ इतिदशमेपंचत्रिंशः षट्त्रिंशेतुहत्वारिष्टेना राम
रदोक्त्यावलाच्युतौवसुदेवसुतौज्ञात्वाकंसोक्रूरंसमादिशत् १ गोपीरासांतर्यातेशंखचूडेनिहतेसः अहन्गोपीमहानं १०५
दासहांदुष्टमरिष्टकं एवंदेवगंधर्वादिगीतनृत्यवाद्यकुसुमवर्षादिभिः कृष्णप्राप्तेदृष्ट्वाव्रजस्यपरमोत्सवचृत्तेमानतोहरि
द्रार्थांतराधिकारार्थमध्यशरद्रः तर्हितदावृषभाकृतिरसुरः तंवर्णयति साङ्ख्यति साङ्र्त्रयेणमहांतोककुत्कायोयस्यसः
खुरैःविदारितांमहींकंपयन् १ रा२

इतीमांपरमोदारांलीलांसत्साहरेःपुमान्। दुःखंतरस्तनायासात्तत्केदिवमश्निकमं

रंभमाणः वृषभजातिशब्दं कुर्वन् विलिखन् विदारयन् उद्यम्य ऊर्ध्वं कृत्वा वप्राणि तटानि उद्धरन् क्षिपन् २ किंचित्किंचित् छकृन्मध्ये मध्ये ईषदीषत्
पुरीषं मुंचन् तथा मूत्रं मुत्सृजन् स्तब्धलोचनः अनिमेषलोचनः ३ यस्य ध्वनिना गवां नारीणां च तत्र आचतुर्थीङ् वेन स्रावः पातः
पंचमषष्ठयोः अतऊर्ध्वं प्रसूतिः स्यादिति विभागः ककुदि गलप्रदेशे शृंगे ४ कृष्ण कृष्णेति रक्षति एवं वदन् आस्फोट्य करतलेन बाहुमाह

रंभमाणः खरतरं पदा च विलिखन् महीं उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् ॥ १ ॥ किंचित्किंचिच्छकृन्मुं
चन् मूत्रयन् स्तब्धलोचनः यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणां ॥ २ ॥ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै
निर्विशंति घना यस्य ककुद्यचलशंकया ४ तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः पशवो दुद्रुवुर्भीता
राजन् संत्यज्य गोकुलं ५ कृष्ण कृष्णेति ते सर्वे गोविंदं शरणं ययुः भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतं ॥
माभैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् ॥ ६ ॥ गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम बलदर्पहाहं दुष्टा
नां त्वद्विधानां दुरात्मनां ७ इत्यास्फोट्याच्युतोऽरिष्टं तलशब्देन कोपयन् सख्युरंसे भुजाभोगं प्रसार्यावस्थि
तो हरिः ८ सोऽप्येवं कोपितोऽरिष्टः खुरेणावनिमुल्लिखन् उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥
९ अग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतं कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा ॥ १० श्रीरा०

त्वेतेन तलशब्देन कोपयन् भुजाभोगं भुजाभुजः स एव भोगः सर्पदेहः तं सर्पदेहाकारं भुजमित्यर्थः स्वयमच्युतः अन्यान् दुष्टान्
हरति संहरतीति हरिः ८ उद्यता ऊर्ध्वं गच्छता पुच्छेन भ्रमंतो मेघाय स्मिन् सः ९ अग्रे न्यस्ते विषाणाग्रे येन सः स्तब्धे असृग्लोच
ने लोचने यस्य सः कटाक्षेण तिर्यक् निरीक्ष्य ॥ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०१ प्रत्यपोवाह प्रतिलोमम् अनुद्रवन् अपविद्धः अपासितः आपतत् आद्रवत् स्विन्नानि स्वेदयुक्तानि सर्वांगानि यस्य सः क्रोधमूर्छितः क्रोधेन व्या
प्तः कृत्वा विषाणम् उत्पाट्य तेनैव जघान सच अपतत् मूत्रशकृत् मूत्रं च शकृच्च पुरीषं एकवद्भावः तदुभयं समुत्सृजन् निरस्यन् पादांश्च क्षिपन् दुःखेन
मांडुनेन तम तेऽश्रात्ते यनु अनवस्थितेक्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम अथ निर्ऋतेर्मृत्योः क्षयं निवासं जगाम कृच्छ्रं यथा भवति तथा कनडीगिवा
१४ नयनोत्सवः नयनानां मूर्तिमान् उत्सवः कंसाग्रे जवसंततिं कंसस्यांतगतस्मृतिं नारदः स्मारयामास कंसं दूतगिरिवत् तदाह अ

गृहीत्वा शृंगयोस्तं वै अष्टादशपदानि सः प्रत्यपोवाह भगवान्गजः प्रतिगजं यथा ११ सोपविद्धो भगवता पुनरुत्थाय
सत्वरः आपतत्स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः ११ तमापतंतं स निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भू
तले निःपीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान सोपतत् १२ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च
१०६ पादाननवस्थितेक्षणः जगाम कृच्छ्रं निर्ऋतेरथ क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः १४ एवं ककुद्मिनं हत्वा स्तू
यमानः स्वजातिभिः विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः १५ अरिष्टे निहते गोष्ठे कृष्णेनाद्भुतकर्मणा कं दैत्ये २
सायाथाह भगवान्नारदो देवदर्शनः १६ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च रामं च रोहिणीपुत्रं वसुदेवे राम
न बिभ्यता न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः १७ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम ॥ १०८

कथितेः रिष्ट इति देवदर्शनः देवर्षिः यद्वा एवं कृते एवं भविष्यतीति साक्षाद्देवदर्शनं यस्य सः ॥१६ आप्तेनैव नारदेनोक्तमाह यशोदाया इति दे
वक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह रोहिणीपुत्रं रामं च दे
वक्याः सप्तमसुतमाह यद्वा नंदसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्यारोहिण्याः पुत्रमाह वसुदेवसुतौ चेत् कथं व्रजं गतौ तत्राह वसु
देवेनेति १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८८ता

निवारितइति हेतवसुदेवेनोपलोयतोश्रेताबध्यतामितिमंत्रवदतानारदेननिवारितइति महंममनिर्दिशितः विधात्रानारदेनचव्रजंगंतु
मुद्यतोतावाहंभवञ्जामिति मंचाउत्तुंगस्तंभादिरचितस्थानानि २४ अहितोशत्रुर्मादुषवरताय २६ अर्थतत्रज्ञः अर्थसिद्धांतमेव

निशम्यतत्र्भोजपतिःकोपात्प्रचलितेंद्रियः निशातमसिमादत्तवसुदेवजिघांसयानिवारितोनारदेनतत्सुतोमृत्युमात्मनः ज्ञात्वालोहमयैःपाशैर्बबंधसहभार्यया॥२० प्रतियातेतुदेवर्षौकंसआभाष्यकेशिनं प्रेषयामासहन्यतांभवतारामकेशवौ २१ ततोमुष्टिकचाणूरशलतोशलकादिकान् अमात्यानुहस्तिपांश्चैवसमाहूयाहभोजराट्॥२१॥भो
भोनिशम्यतामेतद्वीरचाणूरमुष्टिकाः नंदव्रजेकिलासातेसुतावानकदुंदुभेः १७ रामकृष्णौततोमह्यंमृत्युः
किलनिदर्शितः भवद्भ्यामिहसंप्राप्तौहन्येतांमल्ललीलया। मंचाःक्रियंतांविविधामल्लरंगपरिश्रिताः पो
रजानपदाःसर्वेपश्यंतुस्वैरसंयुगं २४ महामात्रत्वयाभद्ररंगद्वार्युपनीयतां द्विपःकुवलयापीडोजहितेन
ममाहितौ॥२५॥आरभ्यतांधनुर्यागश्चतुर्दश्यांयथाविधि विशसंतुपशून्मेध्यान्भूतराजायमीढुषे॥२६॥इ
त्याज्ञाप्यार्थतंत्रज्ञआहूययदुपुंगवं गृहीत्वापाणिनापाणिंततोक्रूरमुवाचह २७ भोभोदानपतेमह्यंक्रियतांमै
त्रमादृतः नान्यस्त्वत्तोहिततमोविद्यतेभोजवृष्णिषु २८ अतस्त्वामाश्रितःसौम्यकार्यगौरवसाधनं यथेंद्रोविष्णु
माश्रित्यस्वार्थमध्यगमद्विभुः गच्छनंदव्रजंतत्रसुतावानकदुंदुभेः आसातेताविहानेनरथेनानयमाचिरं॥३०॥ न

जानातीति २७ दानपतेअक्रूरमैत्र्यंमित्रकृत्यंत्वयाक्रियतां त्वत्तोअन्यआदृतःसादरोहिततमश्चनविद्यतइति॥३०॥ श्रीराम श्र

विष्णुसंश्रयैः १   उक्तं चेति २

भा०द०३६ तौ मेन मृत्युर्नितरां सृष्टौ वैकुंठसंश्रयौ देवैः किंतु स्तत्राह घातयिष्यइति कालकल्पेन मृत्युतुल्येन वैद्युतोपमैः अशनितुल्यैः नष्टकं
टका नष्टशत्रुः ननु कतिपयसुहृद्धनन नष्टकंटका कथं स्यात्तत्राह जरासंधइति ३५ तत अखलितं मनीषितं विचारितं सध्यक्

निःसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः तावानयतं समं गोपैर्नंदाद्यैः साभ्युपायनैः ३१ घातयिष्यइहानीतौ काल
कल्पेन हस्तिना यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ३२ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् तद्बंधून्नि
हनिष्यामि वृष्णिभोजदशार्हकान् ३३ उग्रसेनं च पितरं स्थविरं राज्यकामुकं तद्भ्रातरं देवकं च ये चान्ये विद्विषो
मम ॥ ३४ ततश्चैषा मही मित्र भवित्री नष्टकंटका जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ ३५ शंबरो नरको
७ बाणो मय्येव कृतसौहृदाः तैरहं सुरपक्षीयान्हत्वा भोक्ष्ये महीं नृपान् ॥ ३६ एतज्ज्ञात्वानय क्षिप्रं रामकृ
ष्णाविहार्भकौ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ३७ अक्रूर उवाच राजन्मनीषितं सध्यक् तव स्वावद्य
मार्जनं सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ३८ मनोरथान्करोत्युच्चैर्जनो दैवहतानपि ॥
युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ३९ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः प्रविवेश गृहं कं
सस्तथाक्रूरः स्वमालयं ४० इति श्रीभागवते महापुराणे दशमस्कंधे कंसमंत्रः षट्त्रिंशोध्यायः ॥ ३६ ॥

राम
७

सम्यक् स्वावद्यमरणं तस्मान्मार्जनं तथाप्येतावानभिनिवेशो न कार्य इति भविष्यं सूचयन्नाह सिद्ध्यसिद्ध्योरिति ३८ पु
रुषकारस्य सव्यभिचारतामाह मनोरथानिति ३९ ४० इति दशमे षट्त्रिंशः ॥ श्री श्री श्री श्रीः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तत्रिंशे हते केशिन्यच्युतो भावि कर्मभिः। नारदेन स्तुतः क्रीडन् व्योमासुरमथावधीत्॥१॥ वृषवेषासुरं यद्वत् केशिनं हयवेषिणं कंसप्राणसखं हत्वा कंसवधमिवाकरोत्॥२॥ केशी त्विति प्रथमश्लोकनयः। एवंभूतः केशी तस्य ... नुषत भगवानुपाह्वयदिति द्वितीयेनान्वयः म
८१ हाहयः सन् महीं निर्जरयन् श्लथयन् विदारयन्निति यथा। सटाभिः केशैः अवधूता निरस्ता ये अभ्रा विमाना निच
तैः संकीर्णं नभः कुर्वन् हेषितं स्वजातिशब्दः भीषितमखिलं विश्वं येन तं तद्धेषितैः रोरेति निष्ठुरैर्हेषितैर्वालैः पुच्छरलोमभिश्च वि
घूर्णिताः अम्बुदाः येन तं आजौ संग्रामार्थं आत्मानं कृष्णं अग्रणीः पुरतो निर्गतः सन् उपाह्वयत् समीपमाजुहाव। स च केशी त

श्रीशुक उवाच केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन् मनोजवः। सटावधूताभ्रविमानसंकुलं कुर्वन्नभो ८।१
हेषितभीषिताखिलः॥१॥ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः। दुराशयः कंसहितं चिकी
र्षुर्व्रजं स नन्दस्य जगाम कम्पयन्॥२॥ तं त्रासयन्तं भगवान् स्वगोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदं। आत्मानमाजौ
मृगयन्तमग्रणीरुपाह्वयत् स व्यनदन्मृगेन्द्रवत्॥३॥ स तं निशम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवद
त्यमर्षणः। जघान [illegible] पद्भ्यामरविन्दलोचनं दुरासदश्चण्डजवो दुरत्ययः॥४॥ तद्वञ्चयित्वा तमधोक्षजो रुषा अ
प्रगृह्य दोर्भ्यां परिविध्य पादयोः। सावज्ञमुत्सृज्य धनुःशतान्तरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः॥५॥

निशम्य मृगेन्द्रवन्नादमकरोत्। ततः स केशी तं कृष्णं दृष्ट्वा मुखेन पिबन्निव व्यादाय मुखं विवृत्य अभिमुखः सन्नभिमुखं जगाम
किं च अत्यमर्षणः अतिकुपितः अत एव असहमानो वा प्रत्युत पद्भ्यां जघान दुरासदः अन्यैरभिभवितुमशक्यः दुरत्ययः उ
घतः सन् दुरतिक्रमः अत्र हेतुः चण्डजवः॥४॥ तत् हननं वञ्चयित्वा तं च हननाय प्रसारितयोः पादयोर्हस्ताभ्यां गृही
त्वा परिविध्य भ्रामयित्वा व्यवस्थितः तथैव व्यवस्थितो बभूव॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ने

भा॰ द॰ ३॰ व्यादाय मुखं प्रसार्य वेगेन हरिं प्रत्याद्रवत् सोपि हरिः हसन् उत्तरं सव्यं भुजं निर्भयत्वे दृष्टांतः यथोरगो बिल इति ६ ततः किं तदाह द्वा
इति चर्वणाय भगवद्भुजस्पर्शात् तीव्रतमात् तत्व्याहार्येनैव विहताः आयः लोहं स्पृशतीति स्पृक् यद्वा तप्तमयः अतितप्तं लोहादि स्पृश
तोयथ ततिः आमयाजैर्लोहैः ७ लेंडं पुरीषं उत्सृजन् ८ कर्कटिकाफलं हि पक्वं साधनं विदीर्णं भवतीत्युदरं दीर्णात्तस्य देहात् विग पृ २
तप्राणात् अविस्मितः गर्वरहितः अयत्नेन हत्वा हरिर्यनमः ९ केसायकृष्णमादिश्यतद्रहस्यादिपशुनः कंसघातादिकृष्णस्य

मल्लव्रसंज्ञः पुनरुत्थितोऽभ्यावादायकेशीतरसापतद्धरिं सोप्यस्यवक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगो बि
ले ६ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयःस्पृशो यथा बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे
उपेक्षितः ७ समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् प्रस्विन्नगात्रः परिवृत्तलोचनः प
१०८ पात लेंडं व्यसृजन् क्षितौ व्यसुः ८ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः अविस्मितो
यत्नहतारिः स्मयैः प्रसूनवर्षैर्वर्षद्भिरीडितः ९ देवर्षिरुपसंगम्य भागवतप्रवरो नृप कृष्णमक्लिष्टकर्मा
णं रहस्येतदभाषत १० कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर वासुदेवाखिलावास सात्वतां प्रवर प्रभो ११

कार्यमावेदयन्मुनिः तदाह देवर्षिरित्यादिना न चायं स्तावकः किंतु सर्वसुहृदित्याह भागवतप्रवर इति १० अस्मदहस्यं वैरिणां कंसस्य
चिंतवानिनिमोशंकोरित्याह कृष्णकृष्णेत्यादिना अयं भावः त्वमीश्वरो भूभारदैत्यसंहाराय अवतीर्णोसि अतस्तद्धेतुरूपाचरणेन १०८
त्वयि २ विश्वपरिपालयतिनत्रेतावेक्षयशकेवनास्तीत्याह अप्रमेयात्मन् अपरिच्छिन्नस्वरूप योगेश अचिंत्यप्रभाव जगदीश्वर वि
श्वनियंतः वासुदेव सर्वभूतेषु वर्तमानः अखिलो वाससर्वस्याश्रय संप्रति सात्वतां प्रवर श्रेष्ठ प्रभो सर्वशक्ते ११ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमेवंरूपोहमितित्रिविहन्नाहत्वमात्मेति नहित्वंजीववत्परिछिन्नः किंतुसर्वभूतानामंतरेणएकोनुस्यूतआत्मा अंतरमनुस्यूतत्वेदृष्टांतः एध
धसांकाष्ठानामंतर्ज्योतिरिवेति भूतेषुस्थितोपिनेन्द्रियैःपसइत्याहगूढइति अत्रहेतवः गुहाशयःबुद्धेरंतरः किंच साक्षी नहिसाक्षीदृ
श्यतइत्यर्थः अपिचमहापुरुषः अतःपरिछिन्नमतिमिन्नेज्ञापयसइत्यर्थः तर्हिसर्वांतरत्वेकिंप्रमाणंअतआहईश्वरइतिनहिईश्वरे
विनापरतंत्राणांजीवानांप्रवृत्तिर्घटतइत्यर्थः २२ अहंईश्वरः अन्यतुसर्वमीशितव्यमित्यत्रहेतुकुतः अतआह आत्मनेतिसाधनांतर

त्वमात्मासर्वभूतानामेकोज्योतिरिवैधसां गूढोगुहाशयःसाक्षीमहापुरुषईश्वरः २२ आत्मनात्माश्रयःपूर्वंमायया
ससृजेगुणान् तैरिदंसत्यसंकल्पःसृजस्यत्स्यवसीश्वरः १३ सत्वंभूधरभूतानांदैत्यप्रथमरक्षसां अवतीर्णो ५२
विनाशायसेतूनांरक्षणायच १४ दिष्ट्यातेनिहतोदैत्योलीलयायंहयाकृतिः यस्यहेषितसंत्रस्तास्त्यजंत्यनि
पा२ मिषादिवं ॥१५ चाणूरंमुष्टिकंचैवमल्लानन्यांश्चहस्तिनं कंसंचनिहतंद्रक्ष्येपरश्वोहनितेविभो ॥१६ तस्यानु
शंखयवनमुराणांनरकस्यच पारिजातापहरणमिंद्रस्यचपराजयं १७ ॥ श्रीराम श्रीराम श्रीराम ॥

निरपेक्षएवआत्माश्रयः स्वतंत्रः माययाशक्त्याभवान्गुणान्ससर्जसृष्टवान् तैः संसृष्टैर्गुणैरिदंविश्वंसृजसि असिसंहरसि अ
वसिपालयसि नमुसृष्ट्यादिक्रियाषट्कारकसाध्येवदृष्टेत्यतआहसत्यसंकल्पइति नहिसंकल्पैकसाध्येवहिः साधनापे
क्षेतिभावः अतस्त्वमीश्वरइत्युपसंहारः १३ प्रस्तुतमाहसत्वमितिभूधरभूतानांभूवधरंतीतिभूधराराजानस्तद्रूपाणां ॥१४
५२ परश्वोहनीति अद्येवाक्रूरएष्यतिश्वोमथुरांगंतासि परेश्वाणूरादीस्त्वयानिहतान्द्रक्ष्यामितिसिद्धवन्निर्देशो विज्ञापन
प्रकारविशेषः १६ तस्यअनुतदनंतरंशंखादीनांशंखःपंचजनः वधंद्रक्ष्यामीतिशेषः भाविनिर्देशमात्रमेतन्नत्वानंतर्यंवि
वक्षितं १८

भार्यया जांबवत्या स्वधामतः महाकालपुरात् २० द्वारकामावसन् द्वारकायां वसन् कर्त्ता करिष्यसि २१ अमुष्य विश्वस्य भूभारस्य वा २२ एवं विज्ञाप्य
कृताभिवंदनं भगवंतं नमस्यति द्वाभ्यां विशुद्धविज्ञानमिति केवलज्ञानैकमूर्तिः अतएव स्वसंस्थया स्वरूपसंपत्कुस्थित्येव परमानंदरूपाया
सम्यगाप्ताः सर्वे अर्था येन तं आप्तकामतोक्ता सत्यसंकल्पतामाह अमोघवांछितमिति ननु वांछा चेदस्ति दुःखनिवृत्ता संसृतिः अत आह स्व
तेजसेति चिच्छक्त्या नित्यनिवृत्तो मायाकार्यरूपो गुणप्रवाहो यस्मात्तं अतो भगवंतं निरतिशयैश्वर्यादिधारणं व्रजमिति २५ ननु त्रिका मीम १

उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणं नृगस्य मोक्षणं पापाद्द्वारकायां जगत्पते १८ स्यमंतकस्य च मणेरादानं सह
स्य १ भार्यया मृतपुत्रोपदानं च ब्राह्मणस्वधामतः १९ पौंड्रस्य च वधं पश्चात् काशिपुर्याश्च दीपनं दंतवक्त्रस्य निधनं चैद्य
१०१ स्य च महाक्रतौ २० यानि चान्यानि वीर्याणि द्वारकामावसन् भवान् कर्त्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि २१ अ
थ ते कालरूपस्य क्षपयिष्णोरमुष्य वै अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः २२ विशुद्धविज्ञानघनं स्वसंस्थ
या समाप्तसर्वार्थममोघवांछितं स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवंतमीमहि २३ त्वामीश्वरं स्वाश्रयमा ३
त्ममायया विनिर्मिताशेषविशेषकल्पनं क्रीडार्थमीयात्तमनुष्यविग्रहं नतोस्मि धुर्यं यदुवृष्णिसात्वतां २४ श्रीशु
क उवाच एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः २५ भगवानपि गो
विंदो हत्वा केशिनमाहवे पशून् पालयत् प्रीतो व्रजसुखावहः २६ श्रीराम श्रीराम श्रीराम श्रीराम पाले १
१०१

लज्ञस्त्वं कथं मत्प्रपंचं न जानासि जानासि चेत् कथं मां गुणप्रवाहं प्रवीपितवानाह त्वामिति ईश्वरं अन्यस्य वशयितारं स्वाश्रयं अ
नन्यावश्यं अत आत्ममायया आत्माधीनया २६ मायया विनिर्मिता अशेषविशेषा महदाद्या यादवरूपा वा येन तं धुर्यं श्रेष्ठम
नोनतोस्मीति २६

दी कल्पना १

प्रातरेव केशिवधानंतरं नारदोक्तमंगीकृत्य पुनस्तथैव पशून् पालयता व्योमो हतः यद्वा व्योमवधः पूर्वमेव वस्तोपि वृषधारिवधप्रसंगात्स्तो
च्यत इति द्रष्टव्यं केचित्तु पुनः शंखचूडवधात्पूर्वमेव पठंति च नमाह एकदेति १७ २८ मेषवदाचरितानां स्वयं चोरवदाचरितः सनुश्च

एकदा ते पशून् पालांश्चारयंतोद्रिसानुषु चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः १७ तत्रासन् कतिचिच्चो
राः पालाश्च कतिचिन्नृप मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः २८ मयपुत्रो महामायो व्योमो गोपालरूपधृ
क् मेषायितानपोवाह प्रायश्चोरायितो बहून् ॥ २९ ॥ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः शिलया पिद
धे द्वारं चतुःपंचावशेषिताः ३० तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां गोपान्नयंतं जग्राह वृकं हरिरि
वौजसा ३१ स निजं रूपमास्थाय गिरींद्रसदृशं बली इच्छन् विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ॥ ३२
तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले पश्यतां दिवि देवानां पशुमारममारयत् ३३ गुहापिधानं नि
र्भिद्य गोपान्निःसार्य कृच्छ्रतः स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलं ३४ इति श्रीभागवते महापुराणे द
शमस्कंधे सप्तत्रिंशोध्यायः ॥ ३७ श्रीशुक उवाच अक्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः उषित्वा रथमास्था
य प्रययौ नंदगोकुलं ॥ १ ॥

पोवाह अपकृष्य निनाय २९ पिदधे छादितवान् ३० शरणदः आश्रयप्रदः हरिः सिंह इव ३१ ३२ पशुमारं पशुमारं यथा भव
ति तथा अनिश्वसमित्यर्थः ३३ भुवि गोपैः स्तूयमानः उपरि विमानिभिर्देवैरिति ३४ इति दशमे सप्तत्रिंशः अष्टत्रिंशे यथाध्याय
ने क्रूरो गोकुलं गतः तथैव रामकृष्णाभ्यां गृहीत्वा सुसत्कृतः ॥ १ ॥ प्रातः केशिवधे वृत्ते द्वादश्यां निर्गते मुनौ ततो व्योमे हतेक्रूरः
सायं गोकुलमाविशत् ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰द॰टी॰ ततेवंनारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णो मथुरां गंतुमुद्यतो वर्त्तते तदाक्रूरोपि गोकुलं गमादित्याह अक्रूरोपीति अपीति
संभावनायां २ अर्हते योग्याय ३ स्वस्य तस्मस्य दर्शने असंभवमाशंक्य पुनः संभावयति मैवमिति दिति द्वेयेन विषयात्मनः वि
गस्य३ षयाविष्टचित्तस्य शूद्रोऽजन्मस्य यथा ब्रह्मकीर्त्तनं वेदोच्चारणं यथेति ४ यद्वा मैव किंतु अधमस्य नीचस्यापि मम स्यादेव कुत इ
त्यत आह ह्रियमाणः कालनद्येति अयं भावः यथानद्या ह्रियमाणानां तृणादीनां किंचित् कदाचित्तरतीति तथा कालवेगेन
कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरतीति संभवतीति ५ अतोऽनया प्रत्यक्षेण मामंगलं ध्रुवं नष्टमेवेति ज्ञायते भ

गच्छंनूपथि महाभागो भगवत्यंबुजेक्षणे भक्तिं परामुपगत एवमेतदचिंतयत् २ किं मयाचरितं भद्रं किं तप्तं प
रमं तपः किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवं ३ ममैतद्दुर्लभं मन्ये उत्तमश्लोकदर्शनं विषयात्मनो यथा
१० म२ नः ब्रह्मकीर्त्तनं शूद्रजन्मनः ४ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनं ह्रियमाणः कालनद्या क्वचित्तरति क
श्चन ५ ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजं ६ कंसो बताद्याकृ
त मेत्यनुग्रहं द्रक्ष्येंघ्रिपद्मं प्रहितोमुना हरेः कृतावतारस्य दुरत्ययं तमः पूर्वेतरन् यन्नखमंडलत्विषा ॥७
यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुच
कुंकुमांकितं ८

ल१ वो जन्मच सफलं जातमितियतः यतः नमस्करिष्यामि ६ अमंगलनाशसूचकांतरमाह कंसइ
ति बतेत्याश्चर्ये अतिखलः कंसोपि ममात्यंतमनुग्रहं अकरोत् यानूयतो अमुना प्रहितो हरेरंघ्रिपद्मं द्रक्ष्ये द्रक्ष्यामीति पूर्वे अं १०
बरीषादयस्तमः संसारमतरन्नुत्तीर्णाः ७ अंघ्रिपद्मं विभावयति यदिति ब्रह्मवादिभिरर्चितमिति परमैश्वर्यमाह श्रिया
चेति सौभाग्यातिशयं मुनिभिर्भक्तैः सहितैरिति परमपुरुषार्थत्वं गोचारणायेति कृपालुत्वं यद्गोपिकानामिति प्रेममात्र
सुलभत्वं ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हसित

मनोरथांतरं करोति द्रक्ष्यामिति शोभमानौ कपोलौ नासिका च यस्मिन् तत् स्मितसहितं अवलोको यस्मिन् अरुणे कंजवल्लोचने
यस्मिन् तत् तत् मुखं गुडालकावृतं चक्रे केशावृतं तदानीमेव शुभं भरम्यं च केचिद्दृष्ट्वा इति हृष्यन्नाह प्रदक्षिणमिति एवं पुनरप्य
न्यच्चिंतयति अप्येधति ईयुषः प्राप्तावतो लावण्यस्य धाम आश्रयः तस्य विग्रहो यद्वा विग्रहो लावण्ययुक्तो यद्धामवपुः तस्य उ
पलंभनं दर्शनं भविता भविष्यति अपि यद्येवं स्यात् तर्हि मह्यं मम दृशोर्लोचनस्य फलं न स्यादिति न अपितु स्यादेवेत्यर्थः ॥ ९।१०
यईक्षितेत्यादि चतुर्भिः कुलकं तत्रैव शंकानन्तस्मरणादिदेव भोक्तृत्वकर्तृत्वादि धर्मैः स्तात्र तत्र प्रतीयमानस्य कथं विक्षक्तत्व

द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनं मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे
प्रचरंति वै मृगाः ॥ ९ ॥ अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया लावण्यधाम्नो भवि
तोपलंभनं मह्यं न न स्यात्फलमंजसा दृशः ॥ १० ॥ यईक्षिताहंरहितोप्यसत्सतोः स्वतेजसापास्ततमो-
भिदाभ्रमः स्वमाययात्मन् रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ ११ ॥ श्रीराम श्रीरा°

मितिइमां शंकां श्लोकत्रयेणापाकुर्वंश्चतुर्थेन तमहं द्रक्ष्यामि इति मनोरथं करोति तथाहि यईक्षितेति ईक्षणमात्रकर्ता अ
सत्सतोः कार्यकारणयोः ईक्षिता ईक्षणमात्रेण कर्तापि अहंरहितः अहंकारहीनः तथा अपास्ततमो भिदाभ्रमः तमः स्वा
ज्ञानं तत्तो भिदा भेदः ततो भ्रमः अभिनिवेशादि आपस्ता अपाकृता येन अज्ञादयो यस्मिन् सः कुत एवं तत्राह स्वतेजसा
चिद्रूपतया नित्यस्वरूपसाक्षात्कारेण तथापि स्वमायया स्वाधीनया मायया तदीक्षया तस्य ईक्षया प्राणाक्षधीभिः
सहितैः आत्मन् आत्मनि स्वस्मिन्नेव रचितैः जीवैः सदनेषु वृंदावनतरुगुल्मगोपीगेहेषु चलीलया कर्माणि कुर्वन् सन् कैवल
भीयते अभिमुखेन प्रतीयते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सर्वथाऽहंकारादिभीरहितस्यात्मारामस्य लीलापि कुत इत्याशंक्य परानुग्रहार्थत्याह यस्येति अखिलानि अखिलस्य वा अमीवानि पापा
निघ्नंतीत्यखिलामीवहानि तैः तथा सुमंगलैः शोभनानि मंगलानि येभ्यः तैर्गुणाद्युद्भवकर्मणादयः कर्माणि जन्मानि तैः विमिश्रा युक्ता वाचो ज
गत्प्राणंति जीवयंति शुंभंति शोभयंति पुनंति पवित्रयंति व्यतिरेकमाह यास्ता इति तैर्विरहिताः ताः स्वलंकृता अपि वस्त्राद्यलंकृ
मता: १ व १ तशववच्छोभमाना स्युः तां समताः १२ स्वयं चीर्णं तान् सत्रनु वर्णाश्रमधर्माननुपालयतामामरवर्याणां सुखकर्त्ता सन्नवतीर्णः यत्तु यशः

यस्याखिलामीवहभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मभिः प्राणंति शुंभंति पुनंति वै जगद्यास्तद्विरक्ताः शवशो
भना मताः १२ स चावतीर्णः खलु सात्वतान्वये स्वसेतुपालामरवर्यशर्मकृत् यशो वितन्वन्व्रज आस्त ईश्वरो गा
यंति देवा यदशेषमंगलं १३ तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं रूपं दधानं श्रिय ईप्सि
सुदर्शना:२ तास्पदं द्रक्ष्यम मासन्नुषसः १४ अथावरुद्धः सपदीशयो रथात् प्रधानपुंसोश्चरणं स्वलब्धये धिया धृतं योगि
भिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन् वनौकसः १५ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

१३ त्रैलोक्यैककमेव कांतं दृशां दृष्टिः तद्वतां महानुत्सवो यस्मात् यद्वा महानुत्सव एव अतएव श्रिय ईप्सितमास्पदं एवंभूतं रूपं
श्रीमूर्तिं दधानं तमीश्वरं द्रक्ष्यामि इति अनुलिंग उषसः प्रभातसमयाः सुदर्शनाः शुभदर्शनाः सुखप्रभाता रजन्यः शुभसू इति
चिका वभूवुरित्यर्थः १३ किंच अथ दर्शनानंतरं सपदि तत्क्षणमेव रथादवतीर्णः सन् प्रधानयोश्चरणं योगिभिर पुरुषयोः
पि आत्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि आभ्यां सह अनयोः सखीन् गोपांश्च नमस्यामीति ॥ १५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच अपीति अधास्यत् धास्यति तद्धि भावयति दत्ताभयमिति सार्द्धेन १६ बलिना तावत्पदत्रयपरिमितभूतलदानमेव तस्य हस्ते उ
दकं निहितं कौशिकइंद्रस्तेनापि कदाचित् किंचिन्निहितमिति ज्ञातव्यं मुमुक्षूणां संसारभयनिवर्त्तकं सकामानां स्वभ्युदयप्रदं च
तन्मे अनुरक्तानामपि परमसुखदं चेत्याह यद्वा वा शब्दो वितर्के विहारे रासक्रीडायां गंधद्रव्यं गंधाय स्पर्शेन सौगंधिकगंधि १७ एवं
परमनुग्रहं संभाव्य पुनरप्यसंभवमाशंक्य परिहरति न मय्युपैष्यति कंसेन प्रहितः अतस्तस्य दूतः तथापि समस्पर्शतामयं त्ति बुद्धिं न उ

अप्यंघ्रिमूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपंकजं दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणै हृ १
लि १ षिणां नृणां १६ समर्हणं यत्र विधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेंद्रतां यद्वा विहारे व्रजयोषितां श्रमं स्प
र्शेन सौगंधिकगंध्यपानुदत् १७ न मय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्य दूतः प्रहितोपि विश्वदृक् योंत
र्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा १८ अप्यंघ्रिमूलेवहितं कृतांजलिं मामीक्षिता स
स्मितमार्द्रया दृशा सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशंक ऊर्जितां ॥ १९ ॥ श्रीराम ॥

पैष्यतिन करिष्यतीत्यर्थः यतो विश्वदृक् सर्वज्ञः अतः स मे चेतसोंतः अवहिश्च यदीहितं चेष्टितं एतत् यः क्षेत्रज्ञः अंतर्यामीनि
त्यज्ञानेनेक्षेत अयंभावः चेतसा वहिरेव कंसमनुवर्त्तेत अंतस्तु कृष्णमेव वर्त्तेदेतदसौ हृदि स्थितो जानातीति यद्वा एतस्य जग
तः ईहितमिति अतः १८ अपि यर्हि अंघ्रिमूले चरणोपांते अवहितं संयतं कृपामृतेन आर्द्रया दृशा मामीक्षिता द्रक्ष्यति तर्हि
सपद्येव विनष्टाखिलकल्मषः परां मुदं वोढा प्राप्स्यामीति ॥ १९ ॥ श्रीराम श्रीराम श्रीराम श्रीराम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·द·प्र· अथ मां परिरप्स्यते आलिंगयिष्यति यदा तेन देहेन मे आत्मा देहः तीर्थीक्रियते अतिपवित्रीकरिष्यते आश्लेषात् कर्मात्मकः कर्ममयो
बंधश्च उच्छ्रित शिथिलो भविष्यतीति अतो देहात् २० ततो भागवतेति तदा जन्ममृतः सफलजन्मानः अन्यथा तु जन्मैव न भव
तीत्याह महीयसा श्रीकृष्णेन अनुध्यानादृतः तस्य जन्म धिक् अमुष्य जंतोः ननु सुहृदादिषु परिष्वंगसंप्रश्नादयो जीवधर्माः कथमी
श्वरे संगच्छेत अत आह न मस्यापि दयितः प्रियः न हि परीतोऽप्रियः सुहृत्तमो हितं न हि परीतो द्वेष्यः एतत् सर्वं व्यतिरिक्ते उपेक्ष्य

सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ मां आत्मा हि तीर्थीक्रियते ततस्तदैव मे बंधश्च कर्मात्मक उ
च्छ्वसित्यतः २० लब्ध्वांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः तदा वयं जन्मभृतो महीयसा नै
११२ वादृतो यो धिगमुष्य जन्म तत् २१ न तस्य कश्चिद् दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव च तथापि भक्तान् भ
जते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ किं चाग्रजो मावनतं यदूत्तमः स्मयन् परिष्वज्य गृहीतमंज
लौ गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु २३ श्रीशुक उवाच ॥ इति संचिंतयन् कृष्णं श्वफ
ल्कतनयोऽध्वनि रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप २४ पदानि तस्याखिललोकपालकिरीटजुष्
टामलपादरेणोः ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः २५ श्रीराम श्रीराम

इति सत्यं तथापि भक्तान् भजते तत्र च यथार्थाय भक्ताः सांप्रतं था भजंते ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति भगवद्वचनात् अ राम
विषमत्वपि भक्तिभ्य एव फलं ददातीत्यत्र दृष्टांतो यद्वत् सुरद्रुम इति २२ यो मयांजलिः करिष्यते तस्मिन्नेव गृहीतमांजलिनि स ११२
मति २ मस्तानि च आघ्रोदि सत्कृतार्थेन तं मां स तु मार्गमपि नैव दृष्टस्तथापि रथेन प्राप्त इति २४ अखिलेलोकपालैः किरीटैर्जुष्टा
अमलाः पादरेणवो यस्य क्षितिकौतुकानि क्षितेरलंकाररूपाणि ॥ २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्दर्शनेनयआल्हादस्तेनविवृद्धः संभ्रमोयस्यसः प्रेम्णाऊर्द्धोनिरोमाणियस्यसः अश्रूणांकलाभिर्लेशैः आकुलेईक्षणेयस्य
सः अवरुह्य धन्यअवलुलुंतपदेषुअचेष्टतत्र्यलुठत् अहोइतिदुर्लभंतांभावयन् २६ ननुकिमर्थमेवंव्यलुठत् नास्तिप्रमसंभ्रमफ
लोहशङ्क्याहदेहभृतामितिदेहभाजामेतावानेवपुरुषार्थः कंसस्यसंदेशादारभ्यहरेर्लिंगदर्शनश्रवणादिभिर्यायमक्रूरस्यव

इति २६

तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेमोद्धरोमाश्रुकलाकुलेक्षणः रथादवस्कंधसतेष्वचेष्टतप्रभोरमून्यंघ्रिरजांस्यहोदेहभृता
मियानर्थोहित्वादंभंभियंशुचं संदेशाद्योहरेर्लिंगदर्शनश्रवणादिभिः २७ ददर्शकृष्णंरामंचव्रजेगोदोहनंग
तौ पीतनीलांबरधरौशरदंबुरुहेक्षणौ २८ किशोरौश्यामलश्वेतौश्रीनिकेतौबृहद्भुजौ सुमुखौसुंदरव
रौबालद्विरदविक्रमौ २९ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजं शोभयंतौमहात्मानौसानुक्रोशस्मि
तेक्षणौ ३० उदाररुचिरक्रीडौस्रग्विणौवनमालिनौ पुण्यगंधानुलिप्तांगौस्नातौविरजवाससौ ३१ प्र
धानपुरुषावाद्यौजगद्धेतूजगत्पती अवतीर्णौजगत्यर्थेस्वांशेनबलकेशवौ ३२ श्रीराम श्रीराम

र्णात इति संदेशआदिर्यस्यार्थस्यसयावानक्रूरस्यजातइति २७ ततः कृष्णंचरामंचददर्शगावोदुह्यंतेअस्मिन्निति गोदोह
नंतत्स्थानंगतौप्राप्तौ २८ २९ अनुक्रोशोअनुकंपातद्विलसितस्मितयुक्तमीक्षणंययोस्तौ ३० उदाराः रुचिराः क्रीडाय
योस्तौस्रग्विणौरत्नस्रग्भिरलंकृतौ ३१ प्रधानभूतौपुरुषौवाकुतः आद्यौतदपिकुतः जगद्धेतूअतएवजगत्पतीवि
परीतावाचातुर्णांपदानांहेतुहेतुमद्भावः जगत्यर्थेपृथिव्याभारापनयनार्थेस्वांशेनमूर्तिभेदेनबलकेशवौसंतौ ३२

प्रकृतिपुरुषात्मकौ २

प्रकृतिपुरुषा
कौ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 स्वप्रभयाविगततिमिरादिशः कुर्वाणौ कनकाचितौ सुवर्णव्याप्ताविति सालंकारयोः शैलसादृश्यमुक्तं ३३ ४ भगवद्दर्शनाल्हादेनय
द्वाष्पेननपर्याकुलेईक्षणेयस्यसः पुलकैराचितव्याप्तंअंगंयस्यसः स्वाख्यानंअक्रूरोहंनमस्करोमीतिकथनेनाक्रोत् ४० अभि
प्रेत्याक्रूरोयमेतदर्थमागतइतिज्ञात्वाकंसहननसामर्थ्यंद्योतयन्निवरथांगेणचक्रेणांकितोयः पाणिस्तेनअभ्युपाकृष्यगमा

दिशोवितिमिराराजन्कुर्वाणौप्रभयास्वया यथामारकतःशैलोरौप्यश्चकनकाचितौ ३३ रथात्तूर्णमवप्लु
त्यसोक्रूरःस्नेहविह्वलः पपातचरणोपांतेदंडवद्रामकृष्णयोः ३४ भगवद्दर्शनाल्हादवाष्पपर्याकुलेक्ष
णः पुलकाचितांगऔत्कंठ्यात्स्वाख्यानेनाशकत्नृप ३५ भगवांस्तमभिप्रेत्यरथांगांकितपाणिना परि
 रेभेभ्युपाकृष्यप्रीतः प्रणतवत्सलः ३६ संकर्षणश्चप्रणतमुपगृह्यमहामनाः गृहीत्वापाणिनापाणीअ
नयत्सानुजोगृहं ३७ पृष्ट्वाथस्वागतंतस्मैनिवेद्यचवरासनं प्रक्षाल्यविधिवत्पादौमधुपर्कार्हमाहरत् ॥
३८ निवेद्यगांचातिथयेसंवाह्यश्रांतमादृतः अन्नंबहुगुणंमेध्यंश्रद्धयोपाहरद्विभुः ३९ तस्मैभुक्तवते
प्रीत्यारामः परमधर्मवित् मुखवासैर्गंधमाल्यैः परांप्रीतिंव्यधात्पुनः ४० पप्रच्छसत्कृतंनंदः कथंस्थनि
रनुग्रहे कंसेजीवतिदाशार्हशौनपालाइवावयः ४१ श्रीराम श्रीराम श्रीराम श्रीराम

लिंगतवान् ३६ पाणिअंजलिरूपेणसंहतौचवगृहीत्वा ३७ मधुपर्केणवाहेर्याऽतस्मिन्वायदुचितंअर्हणंआहरत् आनीय राम
समर्पितवानित्यर्थः सत्कृतंसंमानितं निरनुग्रहेक्रूरे कथंकेनप्रकारेणस्थजीवथेत्यर्थः शौनः पशुघातीसएवपाल ११३
कोयेषांअवीनांमेषाणांतद्वत्तुल्याइत्यर्थः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरनुग्रहतामाहायावधीदिति तोकानुतोकानि असुतृपु असेनवतर्पयतियः अतःखलः तस्यकंसस्यप्रजानांहेअक्रूरयेषांजीवनमा
त्रमपिदुर्लभंतेषांवःकिंनुकुशलंविचारयामेति ४३ मधुरयावाचाऽत्यसकृता तथैववाचापरिपृष्टेनप्रश्नेनअध्वपरिश्रमंसंसारपरिश्रमं ४४
इतिदशमेअष्टत्रिंशः नवत्रिंशेपुरींगच्छत्यच्युतेगोपिकाक्रुपः अक्रूरेणाथकालिंद्यांविष्णोर्लोकस्यदर्शनं १ भक्तानांमनोरथाःसत्याभवंतीति

८

योऽवधीत्स्वस्वसुस्तोकान्क्रोशंतीनामसुतृप्खलः किंनुस्वित्तत्प्रजानांवःकुशलंविमृशामहे ४३ इत्थंसूनृतयावाचान
देनसुसभाजितः अक्रूरःपरिपृष्टेनजहावध्वपरिश्रमं ४४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअक्रूरागमनंनामाष्ट
त्रिंशत्तमोध्यायः श्रीशुकउवाच सुखोपविष्टःपर्यंकेरामकृष्णोरुमानितः लेभेमनोरथान्सर्वान्पथियान्सचका
रह १ किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने तथापितत्पराराजन्नहिवांछंतिकिंचन २ सायंतनाशनंकृत्वाभ
गवान्देवकीसुतः सुहृत्सुवृत्तंकंसस्यपप्रच्छान्यच्चिकीर्षितं ३ श्रीभगवानुवाच॥ तातसौम्यागतःकच्चित्स्वा
गतंभद्रमस्तुवः अपिस्वज्ञातिबंधूनामनमीवमनामयं॥४॥ किंनुवःकुशलंपृच्छेएधमानेकुलामये कंसमा नः
म्नी तुलनाअंगस्वानांनस्तत्प्रजासुच ५ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम॥

ध्यानयनादेः सुखोपविष्टइति रामकृष्णाभ्यांउरुअधिकंमानितः १ ३ हेतातहेसौम्यस्वागतंयथातथाआगतः स्वज्ञातिबंधूनांस्वेसुहृ
दःज्ञातयःसपिंडाःबांधवाअसपिंडाःसंबंधिनस्तेषामपिकिंअनमीवंअपापमदुःखमितियावत् ४ एवंप्रश्नोपिममनातिसंगतः अनामयम्
इत्याहकिंन्विति अंगहेअक्रूरपृच्छेपृच्छामिनः अस्माकंकुलस्यामयेरोगेनामातुलइतिनामयस्यतस्मिन्नःस्वानांज्ञातीनां रोग्यं २
तस्यप्रजासुच ५ ६२

मो १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू अस्मरस्मान्निमित्तं त्वज्जिनं दुःखं आर्ययोर्निरपराधयोः यद्धेतोर्यः अहमेव हेतुः तस्मात् ६ हे सोम्य स्वानां वा दर्शनं अद्य मम संजातं दिष्ट्या
य०२ भद्रं भद्रं ७ माधवः मधोर्वंशजः ८ धनुर्मखव्याजसंदेशाय स्य पुत्रार्थं चाणूरादिभिर्घातितुमर्थे अस्य कृष्णस्य स्वजन्म कृष्णस्य जन्म आनक
दुंदुभेः सकाशात् ९ विजिज्ञतुः विशेषेण ज्ञापयामासतुः १० सोपि नंदो गोपान् समादिशत् तदेव दर्शयति गृह्यतामित्यादिना गोर

अहो अस्मदभूद्भूरि पित्रोर्वृजिनमार्ययोः यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ६ दिष्ट्याद्य दर्शनं स्वानां म
ह्यं वः सोम्य कांक्षितं संजातं वर्ण्यतां तात तवागमनकारणं ७ श्रीशुक उवाच पृष्टो भगवता सर्वं वर्णयामा
स माधवः वैरानुबंधं यदुषु वसुदेववधोद्यमं ८ यत्संदेशाय दूतार्थं वा दूतः संप्रेषितः स्वयं यदुक्तं नारदे
३१४ नास्य स्वजन्मानकदुंदुभेः ९ श्रुत्वाक्रूरवचः कृष्णो बलश्च परवीरहा प्रहस्य नंदं पितरं राज्ञा दिष्टं
विजिज्ञतुः १० गोपान् समादिशत्सोपि गृह्यतां सर्वगोरसः उपायनानि गृह्णीध्वं युज्यंतां शकटानि कौ२
च ११ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः किल १२
एवमाघोषयत् क्षत्त्रा नंदगोपः स्वगोकुले गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं रामकृष्णौ पुरीं
नेतुमक्रूरं व्रजमागतं १३

सः क्षीरादि उपायनानि उत्तमवस्तूनि रसान् घृतादीन् शब्दछलेन दंडं सूचयति अचिकित्स्यरोगस्य चिकित्सार्थं रसान् ११४
दास्याम इति १२ १३ क्षत्त्रा व्रजरक्षाधिकृतेन आघोषयत् सर्वतो घोषितवान् गाः कृष्णैकजीवना गोप्यस्तत्तदा अक्रूरमा
गतमुपश्रुत्येति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ लिंगान्याह पंचभिः काश्चिदिति तेन श्रवणेन कृतो हृत्तापो तेन म्लाना मुखश्रीर्यासां तास्तथा बभूवुरिति दुकूलानि वलयानि च केश तेनयः श्वास
ग्रंथयश्च संसंतो दुकूलादयो यासां तथा भूताः काश्चनं च बभूवुरिति १४ तस्य श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषाश्चक्षुरादि
वृत्तयो यासां ताः इमं लोकं देहमपि न जानंति स्म मुक्ता इवेति १५ अपराः स्त्रियः शौरेर्गिरः स्मरंत्यः संमुमुहुः कथंभूताः अनुराग
णयुक्तस्मितेनेरिताः हृदि स्पृशंतीति हृदिस्पृशः मनोज्ञा विचित्राणि पदानि यासां ताः १६ विरहेण कातराः विक द
विघटयती ति २ लाः अच्युत आशयश्चित्तं यासां ताः १८ स्नेहं संगतिं विधाय विघटयतीति विधातारं प्रत्येकमाक्रोशयंत्य आहुः अहो

काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः स्रंसद्दुकूलवलयकेशग्रंथ्यश्च काश्चन १४ अन्याश्च तदनु
ध्याननिवृत्ताशेषवृत्तयः नाभ्यजानन्निमं लोकमात्मलोकं गता इव १५ स्मरंत्यश्चापराः शौरेरनुरागस्मित
रिताः हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः १६ गतिं सुललितां चेष्टां स्निग्धहासावलोकनं शोकाप
हानि नर्माणि प्रोद्दामचरितानि च १७ चिंतयंत्यो मुकुंदस्य भीता विरहकातराः समेताः संघशः प्रोचुरश्रुमु
ख्योऽच्युताशयाः १८ गोप्य ऊचुः अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः तांश्चाकृता
र्थान् वियुनंक्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा १९ यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुक
पोलमुन्नसं शोकापनोदस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं २०

इति मैत्र्या हितचरणेन प्रणयेन स्नेहेन च अकृतार्थान् अप्राप्तभोगान् पि...तान् वियुनंक्षि वियोजयसि तस्मात्तव क्वापि दया वा
लिशोचितमित्याहुः अपार्थकमिति विगर्हितं च १९ विगर्हितं तवेदं कर्मेत्याहुः यस्त्वमिति शोकमपनुदतीति शोकापनोदः
स चासौ स्मितलेशश्च अग्रहासः तेन सुंदरं मुकुंदस्य वक्त्रं सकृत्प्रदर्श्य पुनस्तस्य पारोक्ष्यं अदृश्यतां करोषि अतस्तव कृतं कर्म
असाधु निंद्यमित्यर्थः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० किंच दत्नापहारित्वेना ... तिक्रूरस्त्वमित्याह। क्रूरस्त्वमिति नत्व्यक्रूरो हरतिनाहमितिचेदत्राह। अक्रूरसमाख्ययेति नैवं वक्त
तुं शक्यः प्रभवति अतानामानेरणस्म भुवंत्वमेवागतासि तेषांमहरामिनयुष्मत्त्वक्षारितिचेत् येनत्वदत्तेनचक्षुषामधुद्विषः
एकदेशेनत्वत्कोलावदीयसमयस्य दिनेपुण्यअद्राक्ष्म। दृष्टवन्तो वयंइत्यर्थः भावः ममसर्वरहस्यमाभिर्ज्ञातमितिअमर्षेणवत्सा ।नैहि२
तत्र च्छ्रं१ स्मेवियोजयन्नस्मानधीकरोषीति २१ विधातारंविहायपरस्परमूचुः नंदसूनुरिति वत्सविदक्षणंभंगअस्थिरंसोहृदयस्यसागर

क्रूरस्त्वमक्रूरसमाख्ययास्मनश्चक्षुर्हिदत्तं हरसेवताज्ञवत् येनैकदेशेखिलसर्गसौष्ठवंत्वदीयमद्राक्ष्म
११५ वयंमधुद्विषः २१ ननंदसूनुः क्षणभंगसौहृदः समीक्षितः नः स्वकृतानुरावत विहायगेहानुस्वजना
नुसुतानुपितॄन्तद्दास्यमहोपगतानवप्रियः २२ सुखंप्रभातारजनीयमाशिषःसत्याबभूवुःपुर
योषितांध्रुवं यासंप्रविष्टस्यमुखंव्रजस्यतः पास्यत्यपांगोत्कलितस्मितासवं ।।२३ श्रीरामश्री

हारीनूविहायअद्ध्यसाक्षात्तस्येवदास्यमुपगताः स्वकृतानुरागोत्कटेनैवस्मिता दिनापरवशा अपिनः अस्मान्नसमीक्षिष्यते राम
नवंनवंप्रियं यस्यसः अतएवनं निवारयामइतिभावः २३ सर्वेमूचुःमुखंप्रभातेति व्रजस्यतः श्रीकृष्णस्यमुखंपास्यति ११५
मातरणद्रक्ष्यति कथंभूतंअपांगेनतन्नातेन उत्कलितं उज्जृंभितं स्मितमेव आसवारसोयस्मिन्नूतन्नूयद्वा अपांगेनमुत्क
लितेस्मितेनआसवरूपेयत्र मुखंतत्अपानंमुखमेवसंभावयति १३

ननु हित्वाणि दिनानि तथा भवन्तु नाम तथाप्यस्मत्स्नेहाकृष्टः पित्रादिभिश्च परावर्तितः आगमिष्यतीत्याशंक्याहुः हे अबलाः ना
मां मधुवन्मंजुभिर्भाषितैर्वशीकृतचित्तः तथा तासां सलज्जस्मितैर्विभ्रमैर्भ्रमतु परवान् पित्रादिपरतंत्रोपि यद्वा व्रजे परे
मनस्वी २ अन्ये बांधवाः संति यस्य सः तथा मनीषी धीरा अपि ग्राम्याः अविदग्धाः नः कथं प्रतियास्यति प्रत्येष्यति न कथंचिदित्यर्थः २४
किंच अस्मदुत्सवभाजोऽन्या अपि वा भविष्यंतीत्याहुः अद्येति अत्र पुरा दाशार्हादीनां दृशः दृष्टेर्महानुत्सवो भविष्यति भवि

तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान् मनस्व्यपि कथं पुनर्नः प्रतियास्यतेऽबलाः ग्राम्याः सल
ज्जस्मितविभ्रमैर्भ्रमन् २४ अद्य ध्रुवं तत्र दृशो भविष्यते दाशार्हभोजांधकवृष्णिसात्वतां महोत्सवः श्री
रमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतं २५ मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीवदारु
णः योऽसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः २६ श्रीराम श्रीराम श्रीरा

ष्यतीति देवकीसुतं द्रक्ष्यंति तथा ये चान्ये अध्वनि गच्छंतं द्रक्ष्यंति तेषामपि दृशो भविष्यतीति यद्वा दृश इति द्वितीया तेषां दृ
ते २ शो नेत्राणि महोत्सवो भविष्यं प्राप्स्यंति प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् २५ अक्रूरं शपंत्य आहुः मैतद्विधस्येति एतादृशं वि धाति
धानं कर्म यस्य अत एव निःकृपस्य अक्रूर इति शोभनं नाम माभूत् तत्र हेतुः अतीवदारुण इत्यादि प्रियात् प्राणादपि प्रियं
कृष्णं अध्वनः पारं अस्मद्दृगगोचरत्वादिति दूरं देशं नेष्यति २६ नरं

कृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०८ २१० अहो धिगस्मज्जीवितमित्याहुः अनार्द्रधीरिति अनार्द्रा कठिना धीर्यस्य सः तादृशः पक्ष्मेरथमधिरूढः १ अस्याविनयमात्मस्य
स्थविरे आपत्तेक्षितेन निवारितवन्तः इत्यर्थः किंच दैवं चेति अयं भावः यदि दैवमस्माकमनुकूलं भवेत् विघ्नः कश्चिदेषां
स्याट२ मध्ये प्रतिहन्येत अकस्माद्वज्रपातो भवतु अन्यद्वा किंचिदनिष्टं नतु नतु किंचिदस्तीति २७ परस्परं संमन्त्र्य साहसमधि
गत्याहुः निवारयामहे इति अकरिष्यन् किं करिष्यति निमिषार्द्धदुरत्ययात् मुकुंदसंगाद्वियोजितानि अतएव दीनानि विध्वंसिभा
चेतांसि यासां एवंभूतानामस्माकं नमरणमपि भयमित्यर्थः २८ इतोपि कारणादवश्यं साहसमेवावलंबनीयमित्या

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रतिकू
लमीहते २७ निवारयामः समुपेत्य माधवं किं नोकरिष्यन् कुलवृद्धबांधवाः मुकुंदसंगान्निमिषार्द्धदुस्त्यजा
११६ द्दैवेन विध्वंसितदीनचेतसां २८ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्यां नी
तास्मनः क्षणमिव क्षणदा विना तं गोप्यः कथं त्वतितरेम भवेत दुरंतं २९ योह्नः क्षये व्रजमनंतसखः परी
तो गोपैर्विशन् खुररजश्छुरितालकस्रक् वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु
कथं भवेम ३०

हुः हे गोप्यः यस्य ललितं स्मितं च वल्गुमंत्रश्च लीलावलोकश्च परिरंभणं च अनुरागेण एतानि यस्यां रासगोष्ठ्यां तस्यां १ राम
गीता२२ क्रीडासभायां नः अस्माभिः क्षणदाः रात्रयः क्षणमिव रात्रयः नीताः तमस्मत्प्रियं विना दुरंतं तमः विरहदुःखं कथं नु अति १६
न२ तरेम कथंचिदित्यर्थः २९ किंच आस्तां तमोत्तितरणं जीवमेव कथं स्यादित्याहुः यइति अह्नः क्षये दिनावसाने खुरर
जोभिः छुरिता धूसरा अलकाः स्रजश्च यस्य सः व्रजं विशन् स्मितेन युक्तः कटाक्षनिरीक्षणं तेन नित्रिंतं क्षिणोति हरति
अमुं कृष्णं विना कथं भवेम जीवेमेति ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैत्रं २

कृष्णनिषक्तानि मानसानि यासां ताः सुस्वरं मुक्तकंठं ३१ क्रूरमक्रूरं ताः अत्वा केसं कंसनिषूदनः गोपीमनोरथाराम सरामस्वपुरं ययौ १ स्त्रीणां
मिति ता अनादृत्य रुदतीः मैत्रादिकः मैत्रं देवता यस्य संध्योपासनं तदादिकर्म कृतं येन सः ३२ अन्वसज्जन्त अन्वगच्छन्त ३३ अनुरंजिताः परा
त्य निरीक्षणादिभिः किंचिदानंदिताः प्रत्यादेशं प्रत्याख्यानं ३४ तप्यतीः संतप्यमानाः आयास्य शीघ्रमागमिष्यामीति दूतवाक्यैः ३५

एवंब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृष्णनिषिक्तमानसाः। विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविंद दामोदर माधवे
ति ३१ स्त्रीणामेवं रुदंतीनामुदिते सवितर्यथ। अक्रूरश्चोदयामास कृतमैत्र्यादिको रथं ३२ गोपास्तमन्वसज्जंत
नंदाद्याः शकटैस्ततः। आदायोपायनं भूरि कुंभान्गोरससंभृतान् ३३ गोप्यश्च दयितं कृष्णमनुव्रज्यानुरंजिताः॥
प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ३४ तास्तथा तप्यतीर्वीक्ष्य व्रजस्थो न यदूत्तमः। सांत्वयामास सप्रेमैरा
यास्य इति दौत्यकैः ३५ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः
३६ ता निराशा निववृतुर्गोविंदविनिवर्तने। विशोका अहनी निन्युर्गायंत्यः प्रियचेष्टितं ३७ भगवानपि संप्राप्तो
रामाक्रूरयुतो नृप रथेन वायुवेगेन कालिंदीमघनाशिनीं ३८ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभं वृक्ष
खंडमुपव्रज्य सरामो रथमाविशत् ॥३९ अक्रूरस्तावुपामंत्र्य निवेश्य च रथोपरि कालिंद्या ह्रदमागत्य स्नानं
विधिवदाचरत् ४० निमज्ज्य तस्मिन्सलिले जपन्ब्रह्म सनातनं तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ४१

कृष्णं अनुप्रस्थापिताः प्रापिता आत्मानश्चित्तानि याभिस्ताः लेखमयपुत्रिका इव निश्चलाः ३६ ७ वृक्षाणां खंडं समूहमुपव्र
ज्य शत्रुभ्यः शंकितः सन् रथोपरि निवेश्य ३९ ब्रह्म वेदं जपन् केमौ बालौ कथं तौ मत्त्वा विति शंकितचेतसे अक्रूराय जले स्वरूपमात्मा
अर्पयदर्शयत् ४१

यस्य२

भा॰टी॰ सिद्धादिभिः स्तूयमानं ४४ सहस्रशिरांसि यस्य तं सहस्रफणेषु मौलयो यस्य संति इति तथा तं नीलं अंबरं यस्य तं विशदतुंकमूलके
नाल२ दं कुंदधवलं शृंगं शिखरं श्वेतं कैलासमिव स्थितं ४५ यस्य उत्संगे कुंडलीकृतदेहाद्विलोकयत्सि कादेशान श्लोकेनान्वयः ४६ शोभने
नच१ भ्रुवौ यस्य उन्नता नासिका यस्य तं च शोभनौ कपोलौ [illegible] अरुणो अधरो यस्य तं चतं च ४७ तुंगौ अंसौ यस्य तं उरस्थले श्री

गौरथस्यैकाकथमिह सुतावानकदुंदुभेः तर्हि खिल्यंदनेन नस्त्वइत्युन्मर्य्यच्यचप्रक्षः ४२ तत्रापिचयथापूर्वमासीनोपु जय१
य१ नेरवसः न्यमज्जद्दर्शनेजन्मिमृषाकिं सलिलेखलयोः ४३ भूयस्तत्रापि सोद्राक्षीत् स्तूयमानमहीश्वरं सिद्धचार
णगंधर्वैः सुरैर्नतकंधरैः ४४ सहस्रशिरसं देवं सहस्रफणमौलिनं नीलांबरं विशश्वेतशृंगैः श्वेतमिव स्थितं ४
११७ ४५ तस्योत्संगे घनश्यामं पीतकौशेयवाससं पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणं ४६ चारुप्रसन्नवदनं चारु यते४
हासनिरीक्षणं सुभ्रून्नसं चारुकर्णं सुकपोलाधरारुणं ४७ प्रलंबपीवरभुजं तुंगांसोरस्थलश्रियं कंबुकंठं
निम्ननाभिं वलिमत्पल्लवोदरं ४८ ॥ दृहत्कटितटश्रोणिकरभोरुद्वयान्वितं चारुजानुयुगं चारुजंघायुगु
लसंयुतं ४९ ॥ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतं नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ॥ ५० श्रीर

यस्य तं च तं च वलिमत्पल्लवोदरं वलयः तिर्यकु निम्नाः रेखा यस्य संति तद्वलिमत् तच्च तत्फलवत् अश्वत्थदलसदृशमुदरं यस्य राम
तं ४८ कटितटं च श्रोणिश्च करभसदृशौ ऊरू द्वयं च बृहत् बृहत्कटितटश्रोणिकरभोरुद्वयं च तेनान्वितं यद्वा बृहत् अग्रकटितटश्रो ११७
णिभ्यां करभोरुद्वयं तेन चान्वितं ४९ तुंगो उच्चदुन्नतो गुल्फो अरुणनखव्रातश्रेतेषां दीधितिभिः तथा नवांगुल्यः अंगु
ष्ठौ च तान्येव दलानि तैश्च विलसत् शोभमानं पादपंकजं यस्य तं ५०

कोमलाः अं

महार्हमणिव्रातयुतैः किरीटादिभिः ५१ २ पृथक्पृथक्भावोऽभिप्रायो येषां तैः तत्र पार्षदैः स्वामीति स्तूयमानं सनकादिभिर्ब्रह्मेति
ब्रह्माद्यैर्महेश्वर इति मरीच्यादिभिर्द्विजोत्तमैः परः प्रजापतिरिति ५३ वसुरुपरिचरः प्रह्लादनारदवसवः प्रमुखाः येषां तैः परं दैव मुख्याः

सुमहार्हमणिव्रातकीरीटकटकांगदैः कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ५१ भ्राजमानं पद्मकरं शंखचक्र
गदाधरं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ५२ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः सुरेशै
र्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ५३ प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः स्तूयमानं पृथग्भावैर्वचोभिर
मलात्मभिः ५४ श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया विद्ययाऽविद्यया शक्त्या मायया च निषेवितं ५५ वि (विद्यया २)
लोक्य सुभृशं प्रीतो भक्त्या परमया युतः हृष्यत्तनूरुहो भावपरिक्लिन्नात्मलोचनः ५६ गिरा गद्गदयाऽस्तौषी
त्सत्वमालंब्य सात्वतः प्रणम्य मूर्ध्नावहितः कृतांजलिपुटः शनैः ५७ इति श्रीभागवते महापुराणे दशमस्कं
धेऽक्रूरप्रतियाने एकोनचत्वारिंशोऽध्यायः

पृथग्भावैः। तमिति अभेदैर्वचोभिरिति वा ५४ विद्याविद्ये जीवानां मुक्तिसंसृतिहेतू मायाऽतयोः कारणं शक्तिः इलादिनी संवित् ज्ञानं अभिरव्या
भिश्च निषेवितं ५५ विलोक्य सुभृशं प्रीतः अस्मत्स्वामी सर्वं भूतः परमेश्वर इति ज्ञात्वेति ५६ ७ इति दशमे एकोनचत्वारिंशः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू० चत्वारिंशे ततो क्रूरः कृष्णमेत्य वेश्वरं प्रणम्य भक्त्यातुष्टाव सगुणागुणभेदतः १ श्रीकृष्णप्रणमति नतो स्मीति हि कृष्णत्वां नुतो स्मि ननु
त्वमस्मत्पितृव्यः कुतो मां बालं नतोसि तत्राह आद्यं पुरुषं अव्ययं च अनादिनिधनमित्यर्थः कुतः एतत् अखिलहेतूनां हेतुः सतु ना
रायणः नाहमिति चेत्तत्राह नारायणं त्वा किं नारायणः इतिमां स्तोषि कात्र स्तुतिः सत्यमेवाह यन्नाभिजातादिति यतो ब्रह्मणः १
२ अखिलहेतुहेतुत्वं प्रपंचयति भूरिति खस्यादिरहंकारः अजा माया तस्या आदिः पुरुषः एते यज्जगतो हेतवस्ते सर्वे तवैवअ
गात् श्रीमूर्तेर्भूताः जाताः उपसर्जनभूता वा २ नन्वेतैः स्तुतिः कथं क्रियते अहमेवान्यतत्तत्वं न स्तात्परं तत्र आत्मा माकयुत
वैषामायात्वत्पारमार्थ्यं तु न कोपि वेदेत्याह नैत इति एते अजाद्या दिव्य षांते आत्मनस्ते स्वरूपं न विदुः अनात्मतया जडत्वे

अक्रूर उवाच नतोस्म्यहं त्वाखिलहेतुहेतुं नारायणं पुरुषमाद्यमव्ययं यन्नाभिजातादरविंदकोशाद्ब्रह्माविरा
११८ शीद्यत एष लोकः भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि सर्वेंद्रियार्था विबुधाश्च सर्वे ये हे
तवस्ते जगतोंगभूताः २ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो नात्मतया गृहीताः अजोनुबद्धः स गुणैरजा
यागुणात्परं वेद न ते स्वरूपं ३

न कारणेन जडत्वेहेतुः गृहीताः प्रत्यक्षादिभिर्दृष्टाः न ह्यजडो दृग्गोचर इति भावः ननु जडा मां न जानंतु जीवस्तु जानास्य राम
तीत्यत आह अज इति स अजो ब्रह्मापि अजयागुणैरनुबद्धः आवृतः गुणातीतं ते स्वरूपं न वेद अन्यः कुतो जानास्यतीति ११८
यद्वा प्रकृत्यादयः आत्मना स्वरूपं च तव स्वरूपं च न विदुः जडत्वादेव जीवस्तु तान् आत्मानं चैव वेत्ति न पुनः ते स्वरूपमि न
ति यथा कोहं संगुह्य देहो सर्वाक्षमनोवाभूतमात्रा नात्मानमन्यं न विदुः परं यत् सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद स
र्वज्ञमनंतमीडे इति ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि केपि न ज्ञानं निकषं तर्हि संसारनिस्तितीर्षावाना मित्याशंक्य साक्षाद्गोचरत्वेपि येन केनापि मार्गेण भजतां त्वं गम्योसीत्याह
६२ त्वां योगिन इति हैरण्यगर्भाः योगिनो अध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तदंतर्यामिस्वरूपमीश्वरं च यजंति तेदेवसांख्ययोगावकी
क्रमै ३ र्त्याः कौ ४ त्रयी मार्गैर्ज्ञानभेदेन दर्शयति त्र्यां वेति श्लोकद्वयेन वैतानिकाः कर्मयोगिनः त्वां चैव त्वामेव यजंति इंद्रवरुणवाय्वादि त्रिनु ३ २
चे २ नूपं यजंते न तु मामिति नानावक्त्रहस्तादीनि रूपाणि येषां ते पुरु अमराः तेषामाख्यायानां मनात्वामेव यजंत इति अयं भावः ऐंद्र
वारुणादि सूक्तैरिंद्रादयः सर्वैश्वर्येण प्रकाश्यंते तेन च सर्वेश्वरावहत्वसंभवंति अतो नामभेदेन त्वामेव यजंति इति तथा च

त्वां योगिनो यजंत्यद्धा महापुरुषमीश्वरं साध्यात्मं साधिभूतं च साधिदैवं च साधवः ४ त्रय्यां च विद्यया केचि
त्वां वै वैतानिका द्विजाः यजंते विततैर्यज्ञैर्नानारूपामराख्यया ५ एके त्वाखिलकर्माणि संन्यस्योपशमं गताः
ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहं ६ अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते यजंति त्वन्मयास्त्वां
वै बहुमूर्त्येकमूर्तिकं ७ त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं बह्वाचार्यविभेदेन भगवन्समुपासते ८

श्रुतिः स प्रथमः सरुतिः स विश्वकर्मा स प्रथमो मित्रावरुणोग्निः स प्रथमो बृहस्पतिश्चिकित्वान्तस्मा इंद्राय हविरा जुहोतेति ५
ज्ञानयज्ञेन समाधिना ६ सोयं योगत्रयीमार्ग उक्तः वैष्णवशैवमार्गौ वाह द्वयेन अन्ये चेति संस्कृतात्मानः वैष्णवशैवदीक्ष
यादीक्षिताः संतस्त्वयाभिहितेन पांचरात्रादिविधिना त्वन्मयास्त्वन्नात्मानं चिंतयंतः त्वदेकप्रधाना वितिवा वासुदेवसंकर्ष
त्वन्मयाः २ णप्रद्युम्नानिरुद्धभेदेन बहुमूर्तिं नारायणरूपेणैकमूर्तिकं च त्वामेव यजंति ७ बह्वाचार्यविभेदेनेति नानाभेदपाशुपतादिमा
र्गेण ८ शैव १

भा० द० २ येऽपिचान्यदेवताभक्तास्तेऽपित्वामेवयजंतीत्याह सर्वएवेति हे सर्वदेवमयानेनैतत् परस्परं देवताविक्षेपकलहव्याकुलचित्ताः कथमेकमेवयजंतीत्यनु
चिंतितत्राह यद्यप्यन्यधियइतिबुद्धिमात्रेभेदोनवस्तुभेदइत्यर्थः ९ तस्मात्सर्वेमार्गास्त्वय्येवपर्यवस्यंतीतिसदृष्टांतमाहयथेति अद्रेःसकाशा
टि० २ त्सर्वतः प्रभवंतियानद्यः पुनः पर्जन्येनापूरिताः बहुस्रोतसः सत्यः सर्वतः सिंधुमेवविशंति यथा वहद्देवतागतयोमार्गाअंतत्स्त्वामेव
विशंति १० अत्रहेतुमाह सत्वमिति भवतः शक्तियोप्रकृतिस्तस्याः सत्वादयोगुणाः अतः प्राकृताः प्रकृतिकार्योपाधयोब्रह्मपर्यंताः
स्थावरादयोजीवाः स्वोपाधिद्वारातेषुगुणेषुप्रोताः प्रविष्टाः तत्र प्रकृतेः साचत्वयीति अतः क्रमेणोपाधिलयात् सर्वेपित्वामेव
विशंतइति यद्वा भवतः प्रकृतेर्गुणेषु प्रोताब्रह्मादयो भवद्व्यतिरिक्तानसंति अतः प्रवाहत्स्त्वमेवसर्वदेवमयइति ११ ननुभवतः

सर्वएवयजंतित्वांसर्वदेवमयेश्वरं येऽप्यन्यदेवताभक्तायद्यप्यन्यधियः प्रभो ९ यथाद्रिप्रभवानद्यः पर्जन्यापूरिताः
११९ प्रभो विशंतिसर्वतः सिंधुंतद्वत्त्वांगतयोंततः १० सत्वंरजस्तमइतिभवतः प्रकृतेर्गुणाः तेषुहिप्राकृताः प्रोताआ
ब्रह्मस्थावरादयः तुभ्यंनमस्तेस्त्वविषक्तदृष्टयेसर्वात्मनेसर्वधियांचसाक्षिणे गुणप्रवाहोयमविद्ययाकृतः प्र
वर्ततेदेवनृतिर्यगात्मसु ११२
२

प्रकृतेः रितिवदन्ममापिप्रकृतिसंबंधत्वावीषितत अतेषांममचकोविशेषस्यादित्याशंक्य [illegible] विशेषमाहतु राम
भ्यमिति अविषक्तदृष्टयेऽत्रलिप्तबुद्धयेकुतः सर्वात्मनः स्वव्यतिरिक्ताभावादविषक्तदृष्टित्वमित्यर्थः किंच सर्वधियांसा ११९
क्षिणे सर्वबुद्धिसाक्षित्वात् नक्वापिबुद्धिलेपइत्यर्थः तइतरेतु संसरंतीत्याह गुणप्रवाहइति देवतिर्यंच आत्मानोयेषां ९८२
तेषुदेवादिशरीराभिमानिष्वित्यर्थः त्वदविद्ययाकृतोयंगुणप्रवाहः प्रवर्तते अतोमहान्विशेषइत्यर्थः १२ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वात्मत्वेनइत्यनेनोक्तंसगुणरूपंस्तौति अग्निर्मुखमितिद्वाभ्यां अग्न्यादीनामीश्वरावयवत्वंविधीयते योयमग्निःसतवमुखमि
त्यादिवचनव्यक्तयाईक्षणंचक्षुःश्रुतिः श्रवणेंद्रियंकर्णमूलंप्राण अबलवचनत् १३ अद्रयःपरस्यतेऽस्थिनखानि १४ नकेवलमेता
वत् किंतुसर्वोप्ययंप्रपंचस्त्वद्वपुषःचभूतएवेतिवदन्नेवंसत्यपिप्रपंचस्यविकारास्त्वयिनप्रसज्यंते नस्पकाल्मिन्नित्यादित्याहत्व ८२
यीति अव्ययात्मनिपुरुषपूर्णेलोकादयः संजिहते हे अव्ययात्मन्निति कथंभूतेत्वयिमनोमयेमनःप्रधानेमनोवृत्तिनिर्मिप
बी

अग्निर्मुखंतेऽवनिरंघ्रिरीक्षणंसूर्योनभोनाभिरथोदिशःश्रुतिः द्यौःकंसुरेंद्रास्तवबाहवोर्णवाःकुक्षिर्म
रुत्प्राणबलंप्रकल्पितं १३ रोमाणिवृक्षौषधयःशिरोरुहामेघाःपरस्यास्थिनखानितेऽद्रयः निमेषणं
रात्र्यहनीप्रजापतिर्मेढ्रस्तुवृष्टिस्तववीर्यमिष्यते १४ त्वय्यव्ययात्मन्पुरुषप्रकल्पितालोकाःसपा
लाःबहुजीवसंकुलाः यथाजलेसंजिहतेजलौकसोप्युदुंबरेवामशकामनोमये १५ यानियानी
हरूपाणिक्रीडनार्थंबिभर्षिहि तैरामृष्टशुचोलोकामुदागायंतितेयशः १६ नमःकारणमत्स्यायप्र
लयाब्धिचरायच हयशीर्ष्णेनमस्तुभ्यंमधुकैटभमृत्यवे १७ श्रीराम श्रीराम श्रीराम श्रीराम

दृश्यंतत्त्वमयावुद्ध्यामनसेवानुद्रष्टव्याःइत्यादिश्रुतेः जलेयथाजलौकसःसूक्ष्मप्राण्युदुंबराशयः यथावाचउदुंबरांतः
केशरेषुमशकाःपरस्परंवार्त्तानभिज्ञाःएवंअनंतानिब्रह्मांडानित्वयिसंचरंतीत्यर्थः १५ तस्मात्देवभूतंतवस्वरूपंदुरवगा
हमितिवदवतारकथामृतमेवसंतःसेवंतइत्याह यानियानीति आमृष्टापरिमार्जिताइतिशुचोयेषांते १६ अन्तःस्व
यमप्यवतारान्नमस्यति नमइति हयशीर्ष्णे हयग्रीवायमधुकैटभयोर्मृत्यवेहंत्रे १७ ॥ ८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा आगहो॰८

भा॰ऽ॰ अकूराय कूर्माय क्षित्युद्धारो विहारो यस्य तस्मै भृगूणां पतये परशुरामाय १८ २० संकर्षणं रामं च तुर्व्यूहरूपेण प्रणमति नमस्ते वासु
देवायेति २१ एवं स्तुत्वा वंधमोक्षं प्रार्थयितुमाह भगवन्निति असन्निदं ह्रांदो ग्राहो यस्य सः। असन्नुग्राहो यस्येति वा २३ न केवलमयं
वे॰१ लोकः। अहमपि तथैत्याह अहं चेति २४ मूढत्वमेव प्रकटयति विपर्ययमतिरिति अनित्यकर्मफले नित्यमिति अनात्मनि दे
हे आत्मेति दुःखरूपे गृहादौ सुखमिति विपरीतमतिरित्यर्थः। द्वंद्वेषु सुखदुःखादिषु आरमति क्रीडतीति तथा सः। ननु

अकूपाराय बृहते नमो मंदरधारिणे क्षित्युद्धारविहाराय नमः सूकरमूर्तये १८ नमस्तेद्भुतसिंहाय साधुलोकभया
पह वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च १९ नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे नमस्ते रघुवर्याय रावणांतक
१२० रायच २० नमस्ते वासुदेवाय नमः संकर्षणाय च प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः २१ नमो बुद्धाय शुद्धाय
दैत्यदानवमोहिने म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे २२ भगवन् सर्वलोकोयं मोहितस्तव मायया अ
हं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु २३ अहं चात्मात्मजागारदारार्थस्वजनादिषु भ्रमामि स्वप्नकल्पेषु मूढः
सत्यधिया विभो २४ अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहं द्वंद्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियं २५
यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः २६ नोत्सहेहं कृपणधीः
काम कर्महतं मनः रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः २७ श्रीराम श्रीराम श्रीराम श्री

दुःखकथं रतिः तत्राह तमोविष्टः तमसा व्याप्तः प्रियं प्रेमास्पदं त्वां न जानामीत्यर्थः २५ सदृष्टांतमाह यथेति तस्मात् जलात् उद्भवं राम
तीति तदुद्भवानि तृणादीनि तैः तथा मायाच्छन्नं त्वामहं हित्वा पराङ्मुखः देहाद्यभिमुखो वर्त्ते इति २६ नन्वेवं जानतः कुतो १२०
विषयाभिमुखतामाह नोत्सहेइति कृपणा विषयवासनायुक्ता धीर्यस्य सः अतएव कामकर्मभ्यां हतं क्षुभितं इंद्रियैश्च व
लिभिर्विषयेषु युक्तैरितस्ततः आकृष्यमाणं रोद्धुं नियंतुं न शक्नोमीति २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

तदेवमस्त्वंतत्राय। सोहं तवत्रांघ्रिमुपगतः शरणंप्राप्तः। नन्विंद्रियपरतंत्रस्यैतदपि कुतस्तत्राह तत्रापि इति हे ईश अंतर्यामिन् तवत्र
भ्युपगमनं च असतां दुरापं अतो भवतोऽनुग्रहएवं त्वहं मन्ये अनुग्रहसत्तेति वा ननु सतां सेवयाइदं भवति किं मदनुग्रहेण यत
आहपुंसइति जीवस्य संसारस्यापवर्गः समाप्तिर्यदा त्वत्कृपया भवेत्तदा भावनास्पदं भवति हे अब्जनाभ तदा सदुपासना संपद्य
ते तदैव त्वयि मतिर्भवेत् त्वत्कृपां विना न सत्संगस्तां विना न त्वन्मतिः न तया मुक्तिरित्यर्थः। पादयोः पतन्प्रार्थयति नमइति
येन विज्ञानमेव मात्रा मूर्तिर्यस्य तस्मै अतएव सर्वप्रत्ययहेतवे समस्तज्ञानकारणाय किंच पुरुषेशप्रधानाय पुरुषस्येदृशाः
सुखदुःखादिप्रापकाः कालकर्मस्वभावादयस्तेषां प्रधानाय नियंत्रे कुतः ब्रह्मणपरिपूर्णाय किंच अनंतशक्तयो यस्य अनंतरूपे

सोहं तवांघ्र्युपगतोऽस्म्यसतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ
सदुपासनया मतिः स्यात् २८ नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये २९
नमस्ते वासुदेवाय सर्वभूतक्षयाय च हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ३० इति श्रीभागवते महापुरा
णे दशमस्कंधे चत्वारिंशोऽध्यायः॥

यद्वा अनंता मायाख्या शक्तिर्यस्य तस्मै अथवा प्रधानं प्रकृतिः पुरुषः तत्प्रवर्त्तकः पुरुषः ईशः कालः एतत्त्रितयात्मने ब्रह्मणे
वक्ष्यति भगवान् प्रकृतिर्यस्योपादानमाधारः पुरुषः परः सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहमिति २९ सर्वप्रत्यय
हेतुत्वमभिव्यंजयन् स्तौति नमस्ते इति वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतक्षयाय क्षयः आश्रयः अहंकार प्राणिनामा
श्रयः तत्र आहंकाराधिष्ठात्रे संकर्षणायेत्यर्थः हृषीकेशेति बुद्धिमनसोरधिष्ठात्रोः प्रद्युम्नानिरुद्धयोरेकीकृत्य ग्र
हणं शरणागतं मां पाहि इति प्रार्थना ३० इति दशमे चत्वारिंशोऽध्यायः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०पू० एकचत्वारिंशके हनूरजकं प्रविशन्पुरीं ततो वरानदात्तुष्टः सुदाम्नो वायकस्य च १ १ सशंकामक्रूरमनः प्रमोषः स्वधामसंदर्शनसंल
पात्। सराजधानीं मथुरामपश्यदस्त्वं कृतानंतमहोत्सवायुः २ भूमौ वियति जले वा यावंत्यद्भुतानि तेव्वयंत्यवसंति तेचत्वायि पश्य
तो मे किमद्भुतमदृष्टं अपि तु सर्वं दृष्टमित्यर्थः ४ ननु मत्या नः पूर्वमेव त्वं विस्मितमुखोपलक्षितो सि अतो भूमौ वियति जले

श्रीशुक उवाच स्तुवतस्तस्य भगवान्दर्शयित्वा जले वपुः भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः १ सोपि
चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् २ तमपृच्छ हृषीकेशः किं
ते दृष्टमिहाद्भुतं भूमौ वियति तोये वा तथा त्वां लक्षयामहे ३ अक्रूर उवाच अद्भुतानीह यावंति भूमौ विय
१२१ ति वा जले त्वयि विश्वात्मके तानि किं मे दृष्टं विपश्यतः ४ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले
तं त्वानुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतं ५ श्रीशुक उवाच इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः
मथुरामनयद्रामं कृष्णं चैव दिनात्यये ६ मार्गे ग्रामजना राजन् तत्र तत्रोपसंगताः वसुदेवसुतौ वीक्ष्य
प्रीता दृष्टिं न चाददुः ७ तावद्व्रजौकसस्तत्र नंदगोपादयोग्रतः पुरोपवनमासाद्य प्रतीक्षंतोवतस्थिरे
८ तान्समेत्याह भगवानक्रूरं जगदीश्वरः गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ९ भवान्
प्रविशतामग्रे सहयानः पुरीं गृहं वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीं १० श्रीराम श्री १२१

ते। वा किमद्भुतं दृष्टं वेदेति अतआह यत्राद्भुतानि इति यत्र त्वयि सर्वाण्यद्भुतानि तं त्वामिह पश्यतो मे अन्यत्र भूमौ हो किमद्भु
तं दृष्टं त्वां विना न तत्र किंचिदद्भुतमित्यर्थः ब्रह्मन् हे परमेत्यर्थः ब्रह्मेति वा पाठः ५ गांदिनीसुतोक्रूरः दृष्टिं नाददुः प
श्यंत एव स्थिता इत्यर्थः ७ रामकृष्णागमं प्रतीक्षमाणाः स्थिताः प्रश्रितं विनीतं स्वाग्रहे च प्रविशंतो अवमुच्य उत्तार्य

श्रीमद्भागवत ८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सायजः सह गोपालैरित्यर्थः ११ यच्छौचेनेन यस्य पादरजसः क्षालनोदकेन गृहांगण स्थितेन १३ श्लोक्यः पुण्यकीर्त्यै हे एकान्तभक्तानां याग
तिस्तावल्लेभे १४ अपुनन् पवित्रा वत्यः यागिरङ्घ्रिः स्वः स्वर्गं प्राप्ताः १५ प्रार्थयमानानमस्करोति अत एव भगवान् श्रेयानास्ति तिमत्वा

अक्रूरस्तुवाच नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मथुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ११ आगच्छ याम गेहान्नः
सनाथान् कुर्वधोक्षज सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम १२ पुनीहि पादरजसा गृहान्नो गृहमेधिनां यच्छौ
चेनानुतृप्यंति पितरः साग्नयः सुराः १३ अवनिज्यांघ्रियुगलमासीत् श्लोक्यो बलिर्महान् ऐश्वर्यमतुलं लेभे ग
तिं चैकांतिनां तु या ॥१४ आपास्तेंघ्र्यवनेजन्यस्त्रींल्लोकान् शुचयो पुनान् शिरसा धत्त याः शर्वः स्वर्याताः सग
रात्मजाः १५ देवदेव जगन्नाथ पुण्यश्रवणकीर्त्तन यदुत्तमोत्तमश्लोक नारायण नमोस्तु ते १६ श्रीभगवानु
वाच आयास्ये भवतो गेहमहमार्यसमन्वितः यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं १७ एवमुक्तो भग
वतासाक्रूरो विमना इव पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ अथापराह्णे भगवान् कृष्णः संकर्षणान्वि
तो मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः १८

बहुधासंबोधयति आर्योतावत् यदुचक्राय द्रुह्यतीति यदुचक्रधुक् तं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि १७ राम
कृष्णावानीतामिति स्वकृतं कर्मावेद्य समर्प्येति १८ गोपैः परितः प्राविशत् १९

रावता १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रवा २

भा॰२॰१ श्रीरामस्तदंतांपुरीमनुवर्णयति चतुर्भिः ददर्शतामिति स्फाटिकानितुंगानिगोपुराणि पुरद्वाराणि यस्यांतां हट्टं निहेममयानिकपाटा
नितोरणानि यस्यांतां तामंत्रच आराः आरकूटः अनन्तमयूराः काष्ठा धान्यागाराः अश्वशालादयो यस्यांतां परिखोपरिता रवातगर्त्ता स्ताभि
दुरासदां दुर्गमां उद्यानानि दूरस्थानि वनानि रम्याणि उपवनानि निकटानि चैतैरुपशोभितां २० सौवर्णाः शृंगाटकाः चतुष्पथाः ह
र्म्याणि धनिनां गृहाणि निःकुटा गृहारामाश्चिता आरामाश्चैतेः श्रेणीनां एकरूपशिल्पोपजीविनां सभाभिरुपवेशनस्थानैः अन्यैश्च
रम्ये १ भवनैर्गृहैः उपस्कृता अलंकृता अमलः स्फाटिकाः हरिता मरकताः वैडूर्यादिरत्नैर्जुष्टेषु आविष्टेषु रूपविष्टैः पारावतैर्बर्हिभिश्च वलभ्यादिषु

ददर्शतां स्फाटिकतुंगगोपुरद्वाराट्टहैमकपाटतोरणां। तांसारकोष्ठां परिखादुरासदामुद्यानरम्योपवनोपशोभि
तां २० सौवर्णशृंगाटकहर्म्यनिःकुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां ३ वैडूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्व
लिभिर्षुवेदिषु २१ जुष्टेषुजालामुखवध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादितां संसिक्तरथ्यापणमार्गचत्वरां प्रकी
१२२ र्णमाल्यांकुरलाजतंडुलां २२ आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः संदृष्टदर्भाक्रमुकैः
सकेतुभिः स्वलंकृतद्वारगृहां सपट्टिकां २३

ति १

वल १ नादितां च तत्र वलभ्यः गृहपुरोभागेषु चन्द्रशालाः उपरिदारुच्छादनविदर्जायाः वलभीनाम मध्यदेशविरचिताः अवष्टंभवेदिकाः जालामुखरं राम
ध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिबद्धाभूमयस्तेष्विति रथ्याराजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्ये चत्वराणि
अंगणानि संसिक्तानि रथ्यादीनि यस्यांतां प्रकीर्णमाल्यादयो यस्यांतां २२ तथा स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यांतां कैः १२१
आपूर्णैः दध्ना चंदनेन च उक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो यायषुतैः वृंदैः फलयुतैः उपलक्षिता दर्भाः क्रमुकास्तै
स्सहितैः सकेतुभिः सकेतवो ध्वजास्तत्सहितैः पट्टिका विस्तृत विस्तारपट्टवस्त्राणि तत्सहितैः तत्रायं रीतिः द्वारप्रभयपार्श्वतस्तं
डुलानामुपरि कुंभाः तत्परितः प्रसूनावलयः कंठपट्टिकाः सुरक्षिताः दिपल्लवाः तदुपरि पात्रांतरे दीपावलयः तत्सेनिधौ द
र्भाः क्रमुकाः कदलीवास्तोरणानि चेति २३

तत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरदेवानांवर्त्मनाराजमार्गेणतांपुरींसंप्रविष्टांद्वितीयांतं २४ औत्सुक्यमेवाहद्वयेनकाश्चिदिति विपर्ययेकृ विपरीतं धृतानिवस्त्राणि
भूषणानिचयाभिस्ताः युगलेषु धार्येषु कुंडलकंकणादिषु एकं विस्मृत्यसमीयुः कृतएकमेवपत्रंययास्ताः श्रवणयासाएकमेवनू

तांसंप्रविष्टांवसुदेवनंदनोदृत्तोवयस्यैर्नरदेववर्त्मना द्रष्टुंसमीयुस्त्वरिताःपुरस्त्रियोहर्म्याणिचैवारुरुहु
र्नृपोत्सुकाः २४ काश्चिद्विपर्ययधृतवस्त्रभूषणाविस्मृत्यचैकंयुगलेष्वथापराः कृतैकपत्रश्रवणैकनू
पुरानांक्त्वाद्वितीयंत्वपराःस्वलोचनं २५ अश्नंत्यएकास्तदपास्यसोत्सवाः अभज्यमानाअकृतोपभ
ज्जनाः स्वपंत्यउत्थायनिशम्यनिस्वनंप्रपाययंत्योर्भमपोह्यमातरः २६ मनांसितासामरविंदलो
चनः प्रगल्भलीलाहसितावलोकनैः जहारमत्तद्विरदेंद्रविक्रमोदृशांददच्छ्रीरमणात्मनोत्स
वं २७
अनंक्ता
पुरंचरणाभरणंयासांताअनक्ताअनक्त्वांएकस्मिन्नेवलोचनेअंजनंनिधायैव २४ नत्रुभोजनंत्यक्त्वा अभज्यमानाः स
खीभिः क्रियमाणाः तैलाभ्यंगाः अकृतस्नानाः अपोह्यनिरस्य २६ प्रगल्भायालीलातयाभिर्हसितानिरीक्षणानिच नि२
तैः श्रियंरमयतीतिश्रीरमणः तेनआत्मनावपुषातासांदृशांउत्सवंददत्मनांसिजहार २७ श्रीराम श्री

१११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰१ मुहुः श्रीकान्तं कृतं चेतसः सद्यस्तं दृष्ट्वा तस्य प्रेक्षणं च उत्स्मितं त्वद्वेदं सुधानया उ क्षणं स्तवनं तेन लब्धो मानो याभिस्ताः दृशा उद्धृ
तिं तेन नेत्रद्वारेण आत्मनि मनसि लब्धं प्राप्तं परिष्वज्य तदप्राप्तिजनितमनन्तमाधिं व्यथां जहुः हे अरिंदम निर्जितकाम इति संबोधनं श्रृं
गाररसे निमग्ना मा भूदिति २८ सौमनस्यं शोभनकुसुमसमूहः शोभनमनो भाववीपी रोः पुरस्त्रियः रजकोऽवस्त्रनिर्णेजकः

दृष्ट्वा मुहुः श्रुतमनुद्रुतं चेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः आनंदमूर्तिमुपगुह्य दृशात्मलब्धं दृष्
ट्वा जहुरनंतमरिंदमाधिं २८ प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः अभ्यवर्षन्सौमनस्यैः प्रमदा बल
केशवौ २९ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ३० ऊचुः पौरा=
अहो गोप्यस्तपः किमचरन्महत् या ह्येतावनुपश्यंति नरलोकमहोत्सवौ ३१ रजकं कंचिदायांतं रंगकारं
१२३ गदाग्रजः दृष्ट्वायाचत वासांसि धौतान्युत्तमानि च ३२ देह्यावयोः समुचितान्यंग वासांसि चार्हतोः
भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ३३ स याचितो भगवता परिपूर्णेन सर्वतः साक्षेपं रुषितः प्राह भृत्यो
राज्ञः सुदुर्मदः ३४ ईदृशान्येव वासांसि नित्यं गिरिवनेचराः परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ३५
यताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा वध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि हि ३६ एवं विकत्थमा
नस्य कुपितो देवकीसुतः रजकस्य कराग्रेण शिरः कायादपातयत् ३७ तस्यानुजीविनः सर्वे वासःकोशा
न्विसृज्य वै दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ३८

सोऽयं वस्त्राणां रंगमपि कुर्वन् रंगाकारः रुषितः कुपितः हे उ
द्वृत्ता गिरिवनेचराः यनित्यं ते यूयं नित्यमुर्वेव परिधत्त इति संभावनायां लोट् अभीप्सथ प्रार्थयध्वं राजकुलानि राजकीयाः लुंपं १२३
ति निःस्वं कुर्वंति वासःकोशान् वस्त्रपुटकान् ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३९ वायकः तंतुवायविशेषः वेषं अलंकारं चैलेयैर्वस्त्रमयैः आकल्पैर्भूषणैः ३९ ४० पर्वणि उत्सवे लोके इहलोके परमां श्रियं
चबलं च ऐश्वर्यं च स्मृतिं इंद्रियं च तत्पाटवं ४२ क्षेमाय रक्षाय भवाय रजकवधनवायकानुग्रहणं च युवयोर्विषमदृष्टितया न

प्रादात्

वसीत्यात्मप्रियवस्त्रैः कृष्णः संकर्षणस्तथा शेषाण्यदत्त गोपेभ्यो विसृज्य भुवि कानिचित् ३९ ततस्तु वायकः प्रीतस्त
योर्वेषमकल्पयत् विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ४० नानालक्षणवेषाभ्यां कृष्णरामौ विरेजतुः स्वलंकृतौ
बालगजौ पर्वणीव सितेतरौ ४१ तस्य प्रसन्नो भगवान् प्रादात्सारूप्यमात्मनः श्रियं च परमां लोके बलैश्वर्यस्मृती
द्रियं ४२ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः तौ दृष्ट्वा स समुत्थाय ननाम शिरसा भुवि ४३ तयोरासनमा
नीय पाद्यं चार्घ्यार्हणादिभिः पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुलेपनैः ४४ प्राह नः सार्थकं जन्म पावितं
च कुलं प्रभो पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ४५ भवंतौ किल विश्वस्य जगतः कारणं परं अवतीर्णावि
हांशेन क्षेमाय च भवाय च ४६ न हि वां विषमा दृष्टिः सुहृदोर्जगदात्मनोः समयोः सर्वभूतेषु भजंतं भज
तोरपि ४७ तावाज्ञापयतं भृत्यं किमहं करवाणि वां पुंसोत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ४८ इत्यभि
प्रेत्य राजेंद्र सुदामा प्रीतमानसः शस्तैः सुगंधैः कुसुमैर्माला विरचिता ददौ ४९ ताभिः स्वलंकृतौ प्री
तौ कृष्णरामौ सहानुगौ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ५० सोपि वव्रेऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि

नीश्वरतानाशंकनीयेत्याह न हि वामिति अत्र हेतुः समयोरिति अत्रापि हेतुद्वयं सुहृदोरिति जगदात्मनोरिति च इत्यभिप्रे
त्य इति एवं विचिंत्य आज्ञापयतं अभिप्रेत्य तन्मतं ज्ञात्वा ॥ ५१ श्रीराम श्रीराम श्रीराम श्रीराम श्री०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०प्र० अन्वयवर्द्धिनीं वंशवृद्धिमतीं तथा। अप्रार्थितं श्रीप्रभृतिकं च दत्वा तेनो निर्जगामेति। स्वैरं चरन्नृ मधुपुरे रजकं निकृत्य कंसम्। प्रदाय च वरानुप
वायकाय मालाकृते समनुकंप्य च कार कुब्जाम् ऋज्वीं धनुश्च सहसानमयन्नृ बभंज ५२ इति दशमे एकचत्वारिंशः। द्विचत्वारिंशके कुब्ज्ञो
द्धमनं धनुषो भिदा वधस्तद्रक्षिणां कंसारिष्टं रंगोत्सवादि च १ अंगविलेपाश्चंदनादयः। गृहीतान्यंगविलेपभाजनानि यया तां

इति तस्मै वरं दत्वा श्रियं चान्वयवर्द्धिनीं बलमायुर्यशः कीर्त्तिं निर्जगाम सहाग्रजः ५२ इति श्रीभागवते महा म१
पुराणे दशमस्कंधे एकचत्वारिंशोध्यायः। श्रीबादरायणिरुवाच अथ व्रजन्नृ राजपथेन माधवः। स्त्रियं
गृहीतांगविलेपभाजनां विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन्नृ रसप्रदः १ का त्वं वरोर्व्वे
१२५ तदु हानुलेपनं कस्यांगने वा कथयस्व साधु नः। देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते न चिराद्भविष्य
ति २ सैरंध्र्युवाच दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि मद्भावितं भोजपतेरति
प्रियं विना युवां कोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः धर्षितात्मा ददौ सांद्रमु
भयोरनुलेपनं ४

रसप्रदः सुखप्रदः १ हे अंगने हे वरोरु सोपहासं संबोधयति त्वं का एतदनुलेपनं कस्य वा उ ह इति निपातौ भ्रूविक्षेप राम
युक्ते वितर्के अस्मद्भ्यां वा सद्यः फलेत्याह न चिरादिति २ तिसृ ग्रीवादिः कट्यां वक्रा इति त्रिवक्रेति नामयस्याः सा अनु १२४
लेपनसाधनक्रियायां कंसस्य बहुमता हास्यस्मि ३ रूपं च अंगसौष्ठवं पेशलं च सौकुमार्यं वरसिकता हसितं च
आलापश्च वीक्षितं च तैः धर्षितात्मा मोहितचित्ता सांद्रं घनं ४ च राम राम राम राम॥

माधुर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ववर्णेन रशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णः तेन शोभितु शीलं यस्य तेन तु संप्राप्तपरभोगेन संप्राप्तः परो नाम रूपरिततो भागो
टी॰ येन संप्राप्तः परभागः शोभातिशयो येन तेन तेन तानुरंजितो ५ स्वदर्शने सदाः फलं दर्शयन् ६ तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीड्य हस्ताभ्यां
गुल्फावुत्तानतउन्नतयस्मिन् पाणीतेन चिबुके सुखस्याधोभागे धृत्वा अध्यात्मदेहे उन्नमयामास ७ तेदेव ऋजु समानं अंगं यस्याः इह

ततस्तावंगरागेण स्ववर्णेतरशोभिना संप्राप्तपरभागेन शुशुभातेनुरंजितो ५ प्रसन्नो भगवान् कुब्जां त्रिवक्रां रुचि
राननां ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलं ६ पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्युत्तानपाणिना प्रगृह्य चिबुके
ध्यात्ममुदनीनमदच्युतः ७ सा तदर्जु समानांगी बृहच्छ्रोणिपयोधरा मुकुंदस्पर्शनात्सद्यो बभूव प्रमदो
त्तमा ८ ततो रूपगुणौदार्यसंपन्ना प्राह केशवं उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया एहि गच्छ हि वी
र गृहं यामो न त्वां त्यक्तुमिहोत्सहे त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ १० एवं स्त्रिया याच्यमानः
कृष्णो रामस्य पश्यतः मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ११ एष्यामि ते गृहं सुभ्रु पुंसामाधिविक
र्षणं साधितार्थोऽगृहाणां नः पांथानां त्वं परायणं १२ विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः ना
नोपायनतांबूलस्रग्गंधैः साग्रजोऽर्चितः १३ तद्दर्शनस्मरक्षोभादात्मानं नाविदन् स्त्रियः विस्रस्तवासः श्लो॰ १
कवरवलयालेख्यमूर्तयः १४

नेश्रोणिपयोधरो च यस्याः सा मुकुंदस्पर्शनादिति मुख्यकारणं ८ आधिविक २
र्षणं मनः पीडा सैव मनं कंसवधेन अधितः अर्थः सुहृदां प्रयोजनं येन सः अगृहाणां अकृतदाराणां पांथानां प्रवासीनां
परायणं आश्रयस्त्वं मधुरया गिरा तां प्रस्थाप्य व्रजन् वणिक्पथैः वाभिरर्चितः लेख्याः इव मूर्तयो यासां ताः १३ ॥
अ सा २ णि चित्रन्यस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनुर्मखशालां प्रपद्य तु १४ प्रसह्य बलात् १५ निमेषेणातिशीघ्रं मदकरी मत्तहस्ती १६ गृह्यतां बध्यतामिति वदंतो जिघृक्षवः आहन्तुं न्नः १७ न केवलं क्रुद्धौ किंतु भग्नस्य धनुषः शकलेन गृहीत्वाजघ्नतुश्चेति १८ परतः प्रान्तंगतम्मिति शालामुखाद्विपुनः निःक्रम्य १० तेजःप्रभावः प्राग[illegible]ल्भं धृष्टतां २२ शकटं शकटावमोचनस्थानं २३ मुकुंदस्य विगमप्रज्ञान्निर्गमनसमये याश्चाशिषः आशा

३२५ ततः पौरान् पृच्छमानो धनुषः स्थानमच्युतः। तस्मिन्प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतं १४ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत्। वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे १५ करेण वामेन सलीलमुद्धृतं सज्जं च कृत्वा निमिषेण पश्यतां। नृणां विकृष्य प्रबभंज मध्यतो यथेक्षुदंडं मदकर्युरुक्रमः १६ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः। पूरयामास यं श्रुत्वा कंसस्त्रासमुपागमत् १७ तद्रक्षिणः सानुचराः कुपिता आततायिनः। गृहीतुकामा आवव्रुर्गृह्यतां बध्यतामिति १८ अथ तान् दुरभिप्रायान् विलोक्य

५८ बलकेशवौ। क्रुद्धौ धन्वन आदाय शकले तांश्च जघ्नतुः १९ बलं च कंसप्रहितं हत्वा शालामुखात्ततः। निःक्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः २० तयोस्तदद्भुतं वीर्यं निशाम्य पुरवासिनः। तेजः प्रागल्भ्यं रूपं च मेनिरे विबुधोत्तमौ २१ तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवान्। कृष्णरामौ वृतौ गोपैः पुराच्छ १२५
कटमीयतुः २२ गोप्यो मुकुंदविगमे विरहातुरा याः आशासताशिष ऋता मधुपुर्यभूवन्। संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हित्वेतरान् भजतश्चकमेऽयनं श्रीः

सुखं १ सर्वप्रभाता रजनीयं अद्य ध्रुवं तत्र दृशो भविष्यत इत्यादि यदुक्तवत्यस्ता आसन् सत्या बभूवुः पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्य देहस्य लक्ष्मीं शोभां कथंभूतस्य गात्रस्य नु अहो इतरान् हित्वा अयनं आश्रयं श्रीः कामयामास यां गात्रलक्ष्मीमिति वा २३

न ह्योहीन् २
पद्द १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्य

श्री २ ष्ठ

अवनिर्क्षालितं अंघ्रियुगलं येयोस्तौ क्षीरमिश्रं अन्नं भुक्त्वा सुखं न्यवसतां २४ पर्यंके च कंसो गोविंदरामयोर्विक्रीडितं तत्पराक्रम क
श्रितु २५ उभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दौत्यकाराणि च तथा च मंत्रः इक्ष्वाकुक अपसर्वं हिरण्याक्षो अयामुखः ६
रक्षसो दूत आगत इत्यादि तथा यदत्र भूतान्याल्वा विश्वेदेवी वाचं वदतीति आदिषु २६ तानि दर्शयति श्लोकत्रयेण वस्तैन्या

अवनिक्तांघ्रियुगलो भुक्त्वा क्षीरोपसेचनं ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं २४ कंसस्तु धनुषो भंगं
रक्षिणां स्वबलस्य च वधं निशम्य गोविंदरामविक्रीडितं परं २५ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः
तू २ वस्तान्याचष्ट भयथा मृत्योर्दौत्यकाराणि च २६ अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि असत्यपि द्विती
ये चैव द्वैरूप्यं ज्योतिषां तथा २७ छिद्रप्रतीतिः छायायां प्राणघोषाऽनुपश्रुतिः स्वर्णप्रतीतिर्वृक्षेषु स्व
पदानामदर्शनं २८ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनं यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगंबरः २९
अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च पश्यन् मरणसंत्रस्तो निद्रां लेभे न चिंतया ३० श्रीराम श्री०

जलादौ प्रतिरूपे दृश्यमानेऽपि स्वशिरसस्तत्रादर्शनं असत्यपि द्वितीये चक्षुषोस्तद्दाने अंगुल्यादौ ज्योतिषां चंद्रादीनां द्वित्वं २७
छायायां प्रतिबिंबे छिद्रप्रतीतिः पिहितकर्णपुटस्य येयात् श्रूयमाणो ध्वनिः स प्राणघोषानुश्रुतिः तस्यानुश्रवणं वृ
क्षेषु स्वर्णप्रतीतिः रजकर्दमादिषु स्वपदानामदर्शनं एतानि दुर्निमित्तानि २८ स्वप्नान्याह स्वप्न इति प्रेतैः मृतैः
परिष्वंगः खरमारुह्य यानं विषभक्षणं नलदमाली जपाकुसुममाली यायात् इतियत्नं तद्रूपकं दुर्निमित्तमिति ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सलिलस्य

भा०द०पू केऽपि न कथं विद्यमानायां पुनः सूर्ये चाप्सु समुत्थिते इति तथा च श्रुतिः यद्गान्महतीर्णवाहि नीऊर्माते स्वधामात्तमान्तष भोलो हिताक्षः सूर्योविपश्चिन्मनसापुनातिति यथोपजोषं यथासुखं मल्लातालत्तरं तूर्यपरिघैः श्रूयतेषु तेषु उपाध्यायाः मल्लाचार्या उपस्थानं मल्लरंगं समाहूताः निवेदितानुपायनानि यैस्ते ३८ इति दशमे द्विचत्वारिंशः त्रिचत्वारिंशके हत्वा गजेन्द्रं रामः

व्युष्टायां निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते कारयामास वै कंसो मल्लक्रीडामहोत्सवम् ३१ आनर्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः तेषु पौरा जानपदा ब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषं विविशू राजानश्च कृतासनाः ३३ कंसः परिवृतोऽमात्यै राजमंच उपाविशत् मंडलेश्वरमध्य स्थो हृदयेन विदूयता ३४ वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः

१२६ विराट् समागताः ३५॥ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ३६ नंदगोपादयो गोपा भोजराजसमाहूताः निवेदितोपायनास्त एकस्मिन् मंच आविशन् ३७॥ इति श्रीभागवते महापुराणे दशमस्कंधे मल्लरंगोपवर्णनं नाम द्विचत्वारिंशोऽध्यायः श्रीशुक उवाच अथ कृष्णश्च रामश्च कृतशौचौ परंतप मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥१॥ श्रीराम॥

कृष्णयोः रंगप्रवेशो सो भाग्य चाणूरेण च भाषणं १ पूर्वैरेव कृतशौचं शुद्धत्वं निरपराधत्वं च याभ्यां तौ एतदुक्तं भवति ध १२६ नुर्भंगादिना आवाभ्यां निर्जीर्णं स्वचितं पिपितोरोन मुंचति आवां च पुनर्जिघांसति अतो अस्य मातुलस्यापि वधे आ वयोर्न दोष इत्येवं कृतापराधपरिहाराविति मल्लानां दुंदुभीनां च निर्घोषं मल्लताल दुंदुभिनिर्घोषं १ ८८ ८७

सू॰

अंबष्ठोहस्तिपः तेनचोदितेपरिकरंपुंड्रोचितपरिधानंकृत्वासमुत्सनिबध्य ३ ४ अंतकोमृत्युः कालस्तन्निमित्तेयमस्तन्निर्यंतेनेकृपमा
यस्यतं ५ विगलितोविच्युतः मुष्टिनानिहत्यलीयत अदृशोबभूव ६ आचक्षाणः अपश्यन् घ्राणमवघ्राणंतेन न दृष्टिदर्शनंयस्यसः ॥
लोचनागोचरमपिहिपृशवोघ्राणेनजानंतीतिप्रसिद्धं प्रसर्पेतं धृतवान् पुच्छेकरेणशुंडाग्रेण सकृत्स्मो बलेन ७ धनुषः धनुषां पंचविंशतिर्यावत् तावत्तेदेशंगजं विचकर्ष आकृष्यनीतवान् कंकइवविचकर्ष यथानागंसर्पंवर्तमानंगजंसुपर्णइवस्वैय ८ सू॰ १

म॰ रंगद्वारंसमासाद्यतस्मिन्नागेवस्थिते अपश्यत्कुवलयापीडंकृष्णोंबष्ठप्रचोदितं २ बध्वापरिकरंशौरिः समुत्स
कुटिलालकान् उवाचहस्तिपंवाचामेघनादगंभीरया ३ अंबष्ठांबष्ठमार्गंनोदेह्यपक्रमामाचिरं नोचेत्सकुं
जरंत्वाघनयामियमसादनं ४ एवंनिर्भर्त्सितोम्बष्ठः कुपितः कोपितंगजं चोदयामासकृष्णायकालांतका
यमोपमं ५ करींद्रस्तमभिद्रुत्यकरेणतरसाग्रहीत् कराद्विगलितः सोमुंनिहत्यांघ्रिष्वलीयत ६ संक्रुद्धस्त
मचक्षाणोघ्राणदृष्टिः सकेशवं परामृशत्पुष्करेणसप्रसह्यविनिर्गतः ७ पुच्छेप्रगृह्यातिबलंधनुषःपंच
विंशतिं विचकर्षयथानागंसुपर्णइवलीलया ८ सपर्यावर्तमानेनसव्यदक्षिणतोच्युतः बभ्राम भ्राम्य
माणेनगोवत्सेनववालकः ९ ततोविमुखमभ्येत्यपाणिनाहत्यवारणं प्राद्रवत्पातयामासस्पृशमा
नःपदेपदे १०

भिति आविरासीद्यथाप्राच्यांदिशींदुरिवपुष्कलइतियावत् ८ सपर्यावर्तमानेतिपुच्छग्राहिणं तं
कृष्णंग्रहीतुंदक्षिणतः परिवर्तनेनगजस्ताहिसव्यतोभ्रामयति यदाचसव्यतापरिवर्तनेनतदादक्षिणतोभ्रमयंस्तेनसहचक्र वृ॰ सू॰ १
भ्रामगोवत्सेनभ्राम्यमाणेनबालकः सएवकृष्णोयथा अन्यबालकइवेति ९ वारणंगजंपादद्रवत्प्रकर्षेणसमं
ततोधावत् पातयामास यथापततितथातंवंचयन्प्राद्रवन्नित्यर्थः १० श्रीराम श्रीराम श्रीरा
भ्राम ८

किंच सधावन्नीति अहन् अहनत् १४ रंगंसमाविशत् तदावीरश्रियाविभौ कथंभूतः असंन्यस्तविषाणंगजदंतोयेनसः अस्
ग्जोरक्तंस्यमदस्यचविंदुभिः परितोंकितः १५ विरूढाउद्गताः स्वेदकणिकाभिरुपलक्षितंवदनांबुरुहंयस्यसः नकेवलंसए
कःसमाविशत् किंतुवृतोगोपैरिति १६ तत्रश्रृंगारादि...ः सर्वरसकदंबमूर्त्तिर्भगवांस्तत्तदभिप्रायानुसारेणबभौनसाकल्येन

सधावन् क्रीडयाभूमौपतित्वासहसोत्थितः तंमत्वापतितंक्रुद्धोदंताभ्यांसोहनत्क्षितिं ११ स्वविक्रमेप्रतिह
तेकुंजरेंद्रोत्यमर्षणः चोद्यमानोमहामात्रैःकृष्णमभ्यपतद्रुषा १२ तमापतंतमासाद्यभगवान्मधुसूद
नः निगृह्यपाणिनाहस्तेपातयामासभूतले १३ पतितस्यपदाक्रम्यमृगेंद्रइवलीलया दंतमुत्पाट्यतेनेभं
हस्तिपांश्चाहनद्धरिः १४ मृतकंद्विपमुत्सृज्यदंतपाणिःसमाविशत् असंन्यस्तविषाणोसृङ्मदविंदु
भिरंकितः १५ विरूढस्वेदकणिकावदनांबुरुहोबभौ वृतोगोपैःकतिपयैर्बलदेवजनार्दनौ १६॥
रंगंविविशतूराजन्गजदंतवरायुधौ १६ मल्लानामशनिर्नृणांनरवरःस्त्रीणांस्मरोमूर्त्तिमान्गोगो
॥१२८ पानांस्वजनोसतांक्षितिभुजांशास्तास्वपित्रोःशिशुः मृत्युर्भोजपतेर्विराड्विदुषांतत्त्वंपरंयोगि
नां वृष्णीनांपरदेवतेतिविदितोरंगंगतःसाग्रजः

सर्वेषामित्याह मल्लानामिति मल्लादीनांअज्ञानांद्रष्टॄणामशन्यादिरूपेणदशधाविदितःसन्साग्रजोरंगंगतइत्यन्व
यः मल्लादिभिर्व्यक्तारसाः क्रमेणश्लोकेननिबध्यंतेरौद्रोद्भुतश्चश्रृंगारोहास्यंवीरोदयातथाभयानकश्चबीभत्सः
शांतः सप्रेमभक्तिकः अविदुषांविराट् विकलः अपर्याप्तोराजइतितथाअनेनबीभत्सउक्तः विकलत्वंचध्वज
सारसर्वांगावित्यादिनावक्ष्यते १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि० उद्विजे भीतो बभूव १८ यथा नटौ विति निर्भयत्वं दर्शितं १९ प्रहर्षवेगेन उत्कलितानि ईक्षणानि आननानि येषां तैस्तयोराननं पपुः
पपुः न च प्रापुः निराकांक्षा न बभूवुरित्यर्थः २० नेत्रैः पिबन्त इवेति श्लिष्यन्तः परिष्वंगं कुर्वन्त इव लक्षिता इत्यर्थः २१ यद्दृष्टं धनु था० २
र्भंगादि यथा श्रुतं गोवर्द्धनोद्धरणादि तत्तदनुतिक्रम्य तदनुरूपमित्यर्थः प्रत्यक्षं च तयो रूपगुणं तदादि युक्तो गुणाः शौर्या
दयः माधुर्यं हसितालापादि प्रागल्भ्यं धार्ष्ट्यं तैः स्मारिता इव स्मरणं प्रापिता इव २२ विस्मिता लोका वक्ष्यन्ताह [illegible]

हत्वा कुवलयापीडं दृष्ट्वा तावपि दुर्जयौ कंसो मनस्यपि तदा भृशमुद्विविजे नृप १८ तौ रंगगतौ महाभुजौ
विचित्रवेषाभरणस्रग्वरौ यथा नटावुत्तमवेषधारिणौ मनः क्षिपन्तौ प्रभया निरीक्षितां १९ निरीक्ष्य तावुत्तम
पुरुषौ जना मंचस्थिता नागरराष्ट्रका नृप प्रहर्षवेगोत्कलितेक्षणाननाः पुनर्न तृप्ता नयनैस्तदाननं २० पिब प० ३
न्त इव चक्षुर्भ्यां लिहन्त इव जिह्वया जिघ्रन्त इव नासाभ्यां श्लिष्यन्त इव बाहुभिः २१ ऊचुः परस्परं ते वै यथा
दृष्टं यथा श्रुतं तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव २२ एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि अव
तीर्णाविहांशेन वसुदेवस्य वेश्मनि २३ एष वै किल देवक्यां जातो नीतश्च गोकुले कालमेतं वसन् गूढो ववृ
धे नंदवेश्मनि २४ पूतनानेन नीतान्तं चक्रवातश्च दानवः अर्जुनौ धनुकः केशी गुह्यकोऽन्ये च तद्विधाः
२५ गावः सपाला एतेन दावाग्नेः परिमोचिताः कालियो दमितः सर्प इंद्रश्च विमदः कृतः २६ सप्ताहमेकहस्ते
न धृतोऽद्रिप्रवरोऽमुना वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं २७ गोप्योऽस्य नित्यमुदितहसितप्रेक्ष
णं मुखं पश्यन्त्यो विविधांस्तापांस्तरन्ति स्माश्रमं मुदा २८ वदन्त्यनेन वंशोऽयं यदोः सुबहुविश्रुतः श्रियं यशो महत्वं
च लप्स्यते परिरक्षितः २९

अश्रमिरता वित्यादिभिः २३ किलेति सर्वत्रान्वयः २४ गुह्यकः शंखचूडः अन्ये च अघासुरादयः २५ आश्रमं ईषत्श्रमयुक्तं
मुखं आश्रमं मुखमिति वा यद्वा आश्रमं यथा भवति तथा तरंति स्मेति २५ अनेन परिरक्षितो यदोर्वंशः सुबहु विश्रुतः सन् श्रि
यादि लप्स्यतीति वदंतीति २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाकुयुद्धं २ दृ २ मास्ट्रोत्न २ म ३

भा·द·५· धेनुकवकवत्सासुरेषु विपर्ययो निर्जुनवांदषु निश्रुयात् ३० जनेष्वेवं ब्रुवाणेषु तूर्यसहमानश्चाणूरो अब्रवीदिति ३१ हे कृष्णप्रियंकरवामे
ति राज्ञि प्रीते भूतानि च प्रसीदेयुः यथाचित्तं नियुद्धं भवेत् मल्लसभाधिष्ठातॄन् अधर्मो स्पृशेदित्यर्थः हे मल्लेतिवा सहस्त्रद्विपानां सत्व
बलं बिभर्ति तिनथा बलिभिर्मादृशैः सह। अनयोः अधर्मः विक्रमं पराक्रमं कुरु मुष्टिको विक्रांतादिति ४० इति दशमेत्रिचत्वारिंशः

अयं चास्याग्रजः श्रीमान् रामः कमललोचनः। प्रलंबो निहतो येन वत्सको ऽन्ये च कादयः ३० जनेष्वेवं ब्रुवाणेषु तूर्येषु
विनिनदत्सु च कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत् ३१ हे नंदसूनो हे राम भवंतौ वीरसंमतौ नियुद्धकुश
लौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा ३२ प्रियं राज्ञः प्रकुर्वंत्यः श्रेयो विंदंति वै प्रजाः मनसा कर्मणा वाचा विपरीतमतो
न्यथा ३३ नित्यं प्रमुदिता गोपा वत्सपाला यथास्फुटं वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ३४ तस्माद्राज्ञः प्रिय
१२८ यूयं वयं च करवामहे भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ३५ तन्निशम्याब्रवीत् कृष्णो देशकालोचितं वचः
नियुद्धमात्मनो ऽभीष्टं मन्यमानो ऽभिनंद्य च ३६ प्रजाभोजपतेरस्य वयं चापि वनेचराः करवाम प्रियं नित्यं
तन्नः परमनुग्रहः ३७ बाला वयं तुल्यबलैः क्रीडिष्यामो यथोचितं भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभास
दः ३८ चाणूर उवाच न बालो न किशोरस्त्वं बलश्च बलिनां वरः लीलयेभो हतो येन सहस्त्रद्विपसत्व
भृत् ३९ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोत्र वै मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ४० इति श्रीभा
गवते महापुराणे दशमस्कंधे कुवलयापीडवधो त्रिचत्वारिंशः श्रीशुक उवाच एवं चर्चितसंकल्पो भगवान्म
धुसूदनः आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः १ हस्ताभ्यां हस्तयोर्बद्ध्वा पद्भ्यामेव च पादयोः विचकर्षतुर १२८
न्योन्यं प्रसह्य विजिगीषया २

चतुश्चत्वारिंशके तु मल्लकंसादिमर्दनं संयोषित्समाश्वासो रामाभ्यां पित्रोश्च दर्शनं १ चर्चितः निश्चितः स्वसंकल्पः एव यस्य सः १ २

कं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाहमूर्ध्नः कनिष्ठांगुलिव्यतिरेकेण कृतमुष्टिर्हस्तो वा सिः २ परिभ्रामयंहस्तादिषु गृहीत्वा परितश्चालनेविक्षेपो निःपातनं परिरंभो वा
हुभ्यां निष्पीडनं आवपातनं अधःक्षेपः ३ उत्सर्पणं उत्कृष्य पुरतो गमनं अपसर्पणं पृष्ठतो गमनं अपसर्पणं पृष्ठतो गम
नं एते प्रत्यंगे धतो प्रत्याहृतं वेतो ४ उस्थापनं जानुनी पादौ च संपिंडीकृत्य परितस्यो छादनं उन्नयनं हस्ताभ्यां मुद्धृत्य नयनं
चाल्ननं कंगदित्वग्रस्यनिः सारणं स्थापनं पादादिपिंडीकरणं एवं परस्परं आत्मनोदेहस्यापचक्रतुः अपकारं कृतवंतो
तत्र युद्धे बाल्यबलवत् एकतो बलं अन्यतो बलं तत्र युद्धे विषममित्यूचुरित्यर्थः यद्यपि तद्बालाबला वंतौ युद्धे द्रष्टुमहा

अरत्नीद्वे अरत्नीभ्यां जानुभ्यां चैवजानुनी शिरः शीर्ष्णा रसोरस्ता वन्योन्यमभिजघ्नतुः २ परिभ्रामणविक्षेपपरिरं
श्याल नै स्थापनै २ भावपातनैः ३ उत्सर्पणापसर्पणैः अन्योन्यं प्रत्यरुंधतां ४ उत्थापनैरुन्नयनैरपि परस्परं जिगीषंतावपचक्रतु
रात्मनः ५ तद्बालाबलवद्युद्धं समतः सर्वयोषितः ऊचुः परस्परं राजन्नुसानुकंपा वचः ६ महानयं व्य
ताधर्मएषा राजसभासदां यद्बलाबलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ७ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसंनि
भौ क्व चाति सुकुमारांगौ किशोरौ नाप्तयौवनौ ८ धर्मव्यतिक्रमोह्यस्य समाजस्य ध्रुवं भवेत् यत्राधर्मः समुत्ति
ष्ठेन्नस्थेयं तत्र कर्हिचित् ९ नसभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् अब्रुवन्विब्रुवन्नज्ञो नरः किल्विषम
श्नुते १० वल्गतः शत्रुमभितः कृष्णस्य वदनांबुजं वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवांबुभिः ११ श्रीराम

सवतो म। नयं धर्म इत्यूचुरित्यन्वयः ६ तदेव दर्शयति महानिति वाल्ययोः अयुद्धं राज्ञा चेत् उपेक्ष्यत्वं चारणीयः एतत्तु राज्ञः पश्यतः स्वयम
न्विच्छंति अनुमन्यंत इति महानधर्ममित्यर्थः ७ बालाबलवत्युद्धं तत्प्रपंचयति पंचभिः क्वेति वज्रसाराणि वज्रवत्कठिनानि
सर्वाण्यंगानि ययोस्तौ ८ समाजस्य समायाः ९ अपराऊचुः नसभामिति अब्रुवन् ज्ञात्वापि तूष्णीं तिष्ठन् विब्रुवन् विप
रीतं ब्रुवन् अज्ञः नजानामीति ब्रुवन् अतः प्राज्ञः सभां न विशेदिति १० वल्गतः शत्रुं भित इति शत्रोः सर्वतः कृष्णस्य श्रमवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्याऊचुः किंनपश्यतेति सामर्षसंभ्रोधंहासिनसंरंभः ओवशरत्तेनशोभितं अन्या ऊचुः पुण्यावनेति न लिंगेन मनुष्यदेहेन गूढः व
नस्यानि विचित्राणि माल्यानि यस्य सः गिरित्रः शिवः रमा च ताभ्याम् र्चितौ वंघ्री यस्य सः अयं भावः धिगिमास भो यस्या मयंप
राभूयेन नास्त्ययं व्रजभुवो धन्याः यतो यासु अयं कृष्णो विविधक्रीडयां च तिगच्छतीति अहो कष्टमल्पपुण्या वयं यतो स्मा भिरन
वसरे दृष्टाः गोप्यस्तु बहुपुण्या इत्याह स्त्रीभिः गोप्य इति अमुष्य कृष्णस्य रूपं अंगं लावण्यं नसारं श्रेष्ठं किंच असमा ईनन्ति
घ्नतसमं ऊर्द्धमधिकं च यस्य तत् नूनदपिन अनेन आभरणादिनासिद्धं किंतु स्वतएव श्वरस्यैव एकांतं धाम एश्वर्यस्य च अव्यभि

३२६ किन्नपश्यत रामस्य मुखमाताम्रलोचनं मुखिकं प्रतिसामर्षहाससंरंभशोभितं १२ पुण्यावनव्रजभुवो यदयं नृलिंग
गूढः पुराणपुरुषो वनचित्रमाल्यः गाः पालयन् सहबलः क्वणयं श्च वेणं विक्रीडयांचति गिरित्ररमार्चितांघ्रिः १३
गोप्यस्तपः किमचरन् यदमुष्य रूपं लावण्यसारमसमोर्द्धमनन्यसिद्धं दृग्भिः पिबंत्यनुसवाभिनवं दुरापमेकां
तधामयशसः श्रिय ईश्वरस्य १४ या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ गायं
श्चो३ तिचैनमनुरक्तधियोऽश्रुकंठ्यो धन्या व्रजस्त्रिय उरुक्रमचित्तयानाः १५ प्रातः व्रजाद्व्रजत आविशतश्च सायं
गोभिः समं क्वणयतोऽस्य निशम्य वेणुं निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यंति सस्मितमुखं सदयाव ३२७
लोकं १६ एवं प्रभाषमाणासु स्त्रीषु योगेश्वरो हरिः शत्रुं हंतुं मनश्चक्रे भगवान् भरतर्षभ १७

चारि स्थानं प्रागतेरमुष्येश्वरस्य तत्त्वयः एवंभूतं नित्यनवीनं रूपं यानेत्रैः १४ किंचायाः दोहनादिषु एनं गायंति ताः व्रजस्त्रि परश्यंतीति
दोलं२ यो धन्याः प्रेंखं खनं दोलनं उक्षणं सेचनं कथंभूताः उरुक्रमे चित्तेन उरुक्रमचित्तेन वयानं सर्वविषयप्राप्तिर्यासां ताप
गंतेरुक्रमचित्तयानाइत्यर्थः कुतः अनुरक्तधियः तत्र लिंगम् अश्रुकंठ्यः १५ प्रातरिति याः अबलाः अस्य वेणुं निशम्य
गृहात् तूर्णं निर्गम्य पथि स्मितं मुखं पश्यंति ताः भूरिपुण्या इति १६ एवं सभयं ब्रुवाणासु स्त्रीषु तासां भयनिवृत्तये कृष्णः हंतुश
त्रुं मनश्चक्रे १७
थ्य२

सभायाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहनपाशकृतया आतुरो विक्लो पुत्रयोर्बलमज्ञानं तौ पितरावनुतापं प्रापन्नाविति १८ तदा भगव
तो गात्राणां अरत्निजान्वादीनां निष्पातेः प्रहारः वज्रस्य निष्पेषः तीव्रप्रपातः चाद्दिन्निष्ठुरः भज्यमानाङ्गः श्लथगात्रः २० श्येनश्येव वेगा

मभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहसुचातुरो पितरावनुतप्यतां पुत्रयोरबुधो बलं १८ तैस्तैर्नियुद्धविधिभिर्विधैरच्युतेत वि
रौ युयुधाते यथान्योन्यं तथैव बलमुष्टिकौ १९ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः चाणूरो भज्यमानाङ्गो मुहुर्ग्लानि
मवाप ह २० स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ भगवन्तं वासुदेवं क्रुद्धो वक्षस्यबाधत नाचलत्तत्प्रहारेण मालाहत इव
द्विपः २१ बाह्वोर्निगृह्य चाणूरं बहुशो भ्रामयन्हरिः भूपृष्ठे पोथयामास तरसा क्षीणजीवितं २२ विस्रस्ताकल्पके
तथैव मुष्टिकः ५ शः स्रग्विन्द्रध्वज इवापतत् पूर्वं समुत्थापि हि हतेनैव बलभद्रेण बलिना तलेनाभिहतो भृशं २३ प्रवेपितः स रुधिरमु
द्वमन्मुखतोऽर्दितः व्यसुः पपातोर्व्युपस्थे वाताहत इवाङ्घ्रिपः २४ ततः कूटमनुप्राप्तं रामः प्रहरतां वरः अवधील्ली
लया राजन्सावज्ञं वज्रमुष्टिना २५ तर्ह्येव हि शलः तोशलकः प्रपादाहतशीर्षकः द्विधाविदीर्णस्तोशलक उभावपि
निपेततुः २६ हतेषु मल्लवर्येषु विद्रुतेषु हतेषु शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः २७ गोपान्वयस्यानाकृष्य
तैः संसृज्य विजह्रतुः वाद्यमानेषु तूर्येषु वल्गन्तौ रुतनूपुरौ २८ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ऋते
कंसं विप्रमुख्याः साधवः साधुसाध्विति २९ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् न्यवारयत्स्वतूर्याणि वाक्यं चे
दमुवाच ह ३० निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् धनं हरत गोपानां नन्दं बध्नीत दुर्मतिं वसुदेवश्च दुर्मेधा
हन्यतामाश्वसत्तमः उग्रसेनः पिता चापि सानुगः परपक्षगः ३२ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ल
घिम्नोत्पत्य तरसा मञ्चमुत्तुङ्गमारुहत् ३३
यस्य सचाणूरः अवधात् अताडयत् भूपृष्ठे भुवापरि पोथयामास आस्फालयं
त् ३३ इन्द्रध्वजो वज्रपद्माइन्द्रध्वजो नाम गौडेषु प्रसिद्धः कोस्मिंश्चिदुत्सवे महान्स्तम्भो ध्वजपताकाद्यलङ्कृतः पुरोभागे
तिष्ठति येन स यथा पतति २३ अर्दितः पीडितः उर्व्युपस्थे भूतले वल्गन्तौ नृत्यादिकुर्वन्तौ २८ साधु साध्विति वदन्तः ३३

८ चाणूरे मुष्टिके कूटे शले तोशलके

श्रीरुद्र: ७

भा०१०·९ अन्वयः अश्रमः लघिम्नालाघवेन दुर्विषहं अविषह्यमुग्रंतेजोयस्य सः ३४ गरिष्ठत्वाय विश्वाश्रयत्वमुक्तं तत्रहेतुः अजुनाभस्तस्य
यतः॥ पर्यवंपपातं आत्मतंत्रः ३६ ३८ निर्वेशानिःकृतिः आनृण्यमित्यर्थः तत्कारिणः संतः अभ्यधावन् तथातादृक् अतिरभसावेगा
त्तमाविशन्तमालोक्यकृत्स्नमात्मानमासनात् मनस्वीसहसोत्थायजगृहे सोसिचर्मणी ३४ तंखड्गपाणिविचरंतमाशुश्ये
नंयथादक्षिणसव्यमंबरे समग्रहीत्दुर्विषहोग्रतेजायथोरगंताक्ष्यसुतः प्रसह्य ३५ प्रगृह्यकेशेषुचलत्किरीटं निपात्य
रंगोपरितुंगमंचात् तस्योपरिष्टात्स्वयमब्जनाभः पपातविश्वाश्रय आत्मतंत्रः ३६ कंसंपरेतं विचकर्षभूमौ हरिर्य
थेभंजगतोविपश्यतः हाहेतिशब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेंद्र ३७ सनित्यदोद्विग्नधियातमीश्वरंपि
बन्वदन्वाविचरन्स्वपन्श्वसन् ददर्शचक्रायुधमग्रतोयतस्तदेवरूपंदुरवापमाप ४० तस्यानुजाभ्रातरोष्टौ
कंकन्यग्रोधकादयः अभ्यधावन्नतिक्रुद्धाभ्रातुर्निर्वेशकारिणः ४१ तथातिरभसांस्तांस्तुसंयत्तान्रोहिणीसुतः
१३० अहन्परिघमुद्यम्यपशूनिवमृगाधिपः ४२ नेदुर्दुंदुभयोव्योम्निब्रह्मेशाद्याविभूतयः पुष्पैःकिरंतस्तंप्रीताःशशं
शंसुर्ननृतुःस्त्रियः ४३ तेषांस्त्रियोमहाराजसुहृन्मरणदुःखिताः तत्राभियुर्विनिघ्नत्यःशीर्षाण्यश्रुविलो
चनाः ४४ शयानान्वीरशय्यायांपतीनालिंग्यशोचतीः विलेपुःसुस्वरंनार्योविसृजंत्योमुहुःशुचः
४५ हानाथप्रियधर्मज्ञकरुणानाथवत्सल त्वयाहतेननिहतावयंतेसगृहप्रजाः ४६ त्वयाविरहितापत्यापुरी
यंपुरुषर्षभ नशोभतेवयमिवनिवृत्तोत्सवमंगला ४७ अनागसांत्वंभूतानांकृतवान्द्रोहमुल्बणं तेनेमांभो
दशांनीतोभूतध्रुक्कोलभेतशं ४८ सर्वेषामिहभूतानामेषहिप्रभवाप्ययः गोप्ताचतदवध्यायीनक्वचित्

संपतान् येषांतान्उद्युक्तान् ४० ४१ ३ शोचंत्यो विलपाश्चक्रुः शुचः अश्रूणि धर्मज्ञेत्यादिनिविलापे प्रेमसंबोधनानितेत्वदीयावयं
४४ त्वयात्वत्पत्याविरहितापुरीयंनशोभतइतिस्वदृष्टांताभिधानंअनागसामितिगुपरमार्थाभिधानं ४६ एषःकृष्णःप्रभवंत्यस्मा
दितिप्रभवः अपियंत्यस्मिन्नित्यप्ययः सचसचतदवध्यानंअवज्ञानंतत्

श्रीमद्भागवतटीका १३०

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ल२ दपुरागम:

४९ आसृष्यड्वेषस्तृस्वा ५० पुत्रश्चाविति विज्ञायजगदीश्वरावितिज्ञात्वाशंकितौ नस्वजातेनालिंगितवंतौ किंतु वंदाञ्जलीतस्थतुरित्यर्थः प्रबालतल्ला
नू हस्तात्रमल्लंद्रसौ लीलया बीभत्साचरितं कंसस्तवीभत्समभारयत् ५१ दशमेतु अत्वारिंशोध्यायः पंचचत्वारिंशके अथपितृनंदादिसांत्व
नेउग्रसेनाभिषेक अग्रुगोवासात्समोगत: १ उपलब्धार्थौ विदित्वेति अयमर्थः उपसमीपे आवयो: पुत्रवुध्यासांसारिकपरमसुखभो
गान्वमेवलब्धार्थौल्हदु आवामीश्वरावितिप्राप्तः परमज्ञानरूपोर्थोयाभ्यांतथाभूतौज्ञात्वामयिप्रसन्नस्सस्नयोज्ञानेनामकिंदुलेभे नौ१

श्रीशुकउवाच राजेयोषित आश्वास्यभगवाङ्गोकभावनः यामाहलौकिकींसंस्थांहतानांसमकारयत् ४९ मातरं
पितरंचैवमोचयित्वाथबंधनात् कृष्णरामौववंदाते शिरसास्पृश्यपादयोः ५० देवकीवसुदेवश्चविज्ञायजगदीश्वरौ कृ
तसंवंदनौपुत्रौसस्वजातेनशंकितौ ५१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुश्चत्वारिंशोध्यायः श्रीशुकउ०
पितरावुपलब्धार्थौविदित्वापुरुषोत्तमः माभूदितिनिजांमायांततानजनमोहिनी १ उवाचपितरावेत्यसाग्रजःसा
त्वतर्षभः प्रश्रयावनतःप्रीणन्नंबतातेतिसादरं २ नास्मत्तोयुवयोस्तातनित्योत्कंठितयोरपि बाल्यपौगंडकैशो
राःपुत्राभ्यामभवन्क्वचित् नलब्धोदैवहतयोर्वासोनौभवदंतिके याबालापितृगेहस्थाविंदंतेलालितामुदं ४

स्यात् दुर्लभंनुमयिपुत्रतयाप्रेमाअतइदानीमेवतत्ज्ञानंमाभूदितिनिजांस्वाधीनांमायांतयोः प्रसारितवानिति १ तदेवदर्श
यति उवाचेत्यादिश्लोकैः प्रीणयन् सादरंब्रुवन् १ अस्मत्तः अस्मन्निमित्तं नित्यमुत्कंठितयोर्भवयोरपियुवयोः पुत्राभ्यामाव
भ्यांकृताबाल्यपौगंडकैशोराः स्तत्तद्वयस्यानुभवसुखानीत्यर्थः तेनाभवन्निति अस्मत्तः पुत्राभ्यामितिसामानाधिकार
ण्यंवा ३ किंच आवामेवंदैवहीनाभिस्याहनलब्धइति पितृगेहस्थाबालायांमुदंविंदंतेसाचनलब्धेति॥ ४ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावत् श्लोकद्वयेन युवयोरावयोश्च कामहानिर्जातेत्युक्तं आवयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि जातेत्याह सर्वार्थसंभव इति सर्वेषां धर्मार्थकामानां संभवो यस्मिन् स देहः यतः याभ्यां जनितः पोषितश्च तयोः पित्रोर्निर्वेशमानृण्यं मर्त्यः शतसंवत्सरमात्र तुर्यः म्मायुषा न प्राप्नोति ५ तन्नं धर्मपि पुत्रः कल्पः समर्थः सन्नपि देहेन च पित्रोर्वृत्तिं जीविकां न संपादयेत् तं प्रेत्य लोकांतरे यमदूताः स्वमांसमेव मां संखादयंति हि ६ किंच मात्रादिषु शुश्रूषामकुर्वन्नपि फलजीवितश्च भवतीत्याह मातरमिति अबिभ्रत् अपुष्णन्

३३१ सर्वार्थसंभवो देहो जनितः पोषितो यतः न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा ५ यस्तयोरात्मजः कल्प आत्मना च धनेन च वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयंति हि ६ मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुं गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन् मृतः ७ तन्नावकल्पयोः कंसान्नित्यमुद्विग्नचेतसोः मोघमेते व्यतिक्रान्ता दिवसा वामनर्चतोः ८ तत् क्षंतुमर्हथस्तात मातर्नौ परतंत्रयोः अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं ९ श्रीशुक उवाच इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा मोहितावंकमारोप्य परिष्वज्यापतुर्मुदं १० सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ न किंचिदूचतू राजन् बाष्पकंठौ विमोहितौ ११ एवमाश्वास्य पितरौ भगवान् देवकीसुतः मातामहं तूग्रसेनं यदूनामकरोन्नृपं १२ आह चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि ययातिशापाद्यदुभिर्नासितव्यं नृपासने १३ मयि भृत्य उपासीने भवतो विबुधादयः बलिं हरंत्यवनताः किमुतान्ये नराधिपाः १४ श्रीराम श्रीराम श्रीराम श्रीराम ३३१

श्वसन्नपि मृततुल्य एवेति ७ तत्तस्मात् नौ आवयोः मोघं व्यर्थं अनर्चतोः अपूजयतोः ८ दुर्हृदा कंसेन कृता १० ११ आश्वास्य सांत्वयित्वा १२ त्वमवज्ञापय नियमावदेत्याह ययातिशापादिति नित्वित्यवत्तु यादत्वपि मदाज्ञया न दोष इति भावः १३ मम तादृशी शक्तिर्नास्तीति चिंतेन त्वाह मयीति मत्प्रसादेन सर्वं भविष्यतीत्यर्थः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वानुज्ञातीनुसंबंधाश्चदिग्भ्यआनाय्येति १५ १६ सिद्धाः पूर्णाः कृष्णरामाभ्यांगतेनिवृत्तेज्वरस्तापोयेषांते १७ सहर्षयस्मितंवीक्षणंयस्मिन्तत्
तत् १८ प्रवयसोवृद्धाअपिअतिशयितंबलमोजश्चयेषांते १९ कृशोअल्पेनाप्याधिक्येनपोषितो नत्वाश्रयेमेतदित्याह पित्रोरित्यात्मनो

सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यःकंसभयाद्रुतान् यदुवृष्ण्यंधकमधुदाशार्हकुकुरांधकान् १५ सभाजितान्
समाश्वास्यविदेशावासकर्षितान् न्यवासयत्स्वगेहेषुवित्तैः संतर्प्यविश्वकृत् १६ कृष्णसंकर्षणभुजैर्गुप्तालब्धमनो
नोरथाः गृहेषुरेजिरेसिद्धाः कृष्णरामगतज्वराः १७ वीक्षंतोऽहरहः प्रीता मुकुंदवदनांबुजं नित्यप्रमुदितंश्री
मत्सदयस्मितवीक्षणं १८ तत्रप्रवयसोप्यासन्युवानोतिबलौजसः पिबंतोक्षैर्मुकुंदस्यमुखांबुजसुधांमुहुः
१९ अथनंदंसमासाद्यभगवान्देवकीसुतः संकर्षणश्चराजेंद्रपरिष्वज्येदमूचतुः २० पितर्युवाभ्यांस्निग्धा
भ्यांपोषितौलालितौभृशंपित्रोरभ्यधिकाप्रीतिरात्मजेष्वात्मनोपिहि २१ सपितासाचजननीयौपुष्णीतांस्वपुत्र
वत् शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे २२ यातयूयंव्रजंतातवयंचस्नेहदुःखितान् ज्ञातीन्वोद्रष्टुमे
ष्यामोविधायसुहृदांसुखं २३ एवंसांत्वय्यभगवान्नंदंसव्रजमच्युतः वासोलंकारकुप्याद्यैरर्हयामाससादरं २४
इत्युक्तस्तौपरिष्वज्यनंदः प्रणयविह्वलः पूरयन्नश्रुभिर्नेत्रेसहगोपैर्व्रजंययौ २५ श्रीराम श्रीराम श्री

देहादपिआत्मजेष्वधिकाहिप्रीतिरिति २० देवकीवसुदेवयोः पुत्रौयुवांनत्वस्मत्पुत्रावित्यपिनवाच्यमित्याह सपितेति २१॥
सव्रजंव्रजवासिभिः सहितं कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्रादीनितत् प्रभृतिभिः २४ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१०-४५ पुरोधसा गर्गाचार्येण द्विजसंस्कृतिं उपनयनं २६ गावो गाः रुक्मस्य माला विद्यन्ते यासां ताः क्षौमवस्त्रमालावतीः २७ याः पूर्वं मनोदत्ताः आसन् ताएव अददात् अनुस्मृत्य कंसेन हृताः सत्यः राजगोष्ठात् आच्छिद्य दत्ताः इत्याह कंसेनाधर्मेणेति २८ गायत्रं ब्रह्मचर्यं प्रक र्षेण भवन्त्याभ्यामिति प्रभवौ अतएव सर्वज्ञौ स्वतः सिद्धममलं ज्ञानं प्राच्छादयन्तौ नरवत् चेष्टितैः ३० यथा यथावत् उपसाद्य प्रा प्य गुरोर्वृत्तिमन्यान् ग्राहयन्तौ शिक्षयन्तौ गुरुमुपेतौ उपगतौ सेवितवन्तौ वित्यर्थः शुद्धो भावो यासु ताभिः सांगोपनिषदः अंगा वत

अथ शूरसुतो राजन् पुत्रयोः समकारयत् पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिं २६ तेभ्योऽदाद्दक्षिणा गावो रुक्ममालाः स्वलंकृताः स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः २७ याः कृष्णरामजन्मर्क्षे मनोदत्ता म
१३२ हामतिः ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः २८ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ गर्गाद्यदु
कुलाचार्याद्गायत्रं व्रतमास्थितौ २९ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ नान्यसिद्धामलं ज्ञानं गूहमानौ
नरेहितैः ३० अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः काश्यं सान्दीपनिं नाम अवन्तिपुरवासिनं ३१ यथोपसाद्य
तौ दान्तौ गुरौ वृत्तिमनिन्दितां ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ३२ तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृ
त्तिभिः प्रोवाच वेदानखिलान् सांगोपनिषदो गुरुः ३३ सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा तथा चान्वी
क्षिकीं विद्यां राजनीतिं च षड्विधां ३४ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्त्तकौ सकृन्निगदमात्रेण तौ संजगृहतुर्नृ
प ३५

नि शिक्षादीनि तैरुपनिषद्भिश्च सहितान् ३३ सरहस्यं मंत्रदेवताज्ञानसहितं धर्मान् मन्वादिधर्मशास्त्राणि न्यायपथान् मीमांसादी राम
न् आन्वीक्षिकीं तर्कविद्यां षड्विधां संधिविग्रहयानासनद्वैधआश्रयइत्येवं षड्विधां राजनीतिं ३५ सकृन्निगदमात्रेण एकवारं गुरो १३२
रुच्चारणमात्रेण ३६

पृ १

तावतीः चतुःषष्ठिकलाः ताश्चैवं तंत्रोक्तालिख्यंते यथा गीतं १ वाद्यं २ नृत्यं ३ नाट्यं ४ आलेख्यं ५ विशेषकच्छेद्यं ६ तंदुलकुसुमविका
राः ७ पुष्पास्तरणं ८ दशनवसनांगरागाः ९ मणिभूमिकाकर्म १० शयनरचनं ११ उदकवाद्यमुदघाताः १२ चित्रायोगाः माल्यग्रथन
विकल्पाः १४ शेखरापीडनयोजनं १५ नेपथ्ययोगाः १६ कर्णपत्रभंगाः १७ सुगंधियुक्तिः १८ भूषणयोजनं १९ ऐंद्रजालाः २० कौतुमा
रयोगाः २१ हस्तलाघवं २२ चित्रशाखापूपभक्ष्यविकारक्रियाः २३ पानकरसरागासवयोजनं २४ सूचीवामकर्म २५ सूत्रक्रीडा २६
विणाडमरुकवाद्यानि २७ प्रहेलिका २८ प्रतिमाला २९ दुर्वचकयोगाः ३० पुस्तकवाचनं ३१ नाटकाख्य[illegible]यिकादर्शनं ३२
काव्यसमस्यापूरणं ३३ पट्टिकावेत्रवाणविकल्पाः ३४ तर्ककर्माणि ३५ तक्षणं ३६ वास्तुविद्या ३७ रूप्यरत्नपरिक्षा ३८ धातुवादः

अहोरात्रैश्चतुःषष्ट्यासंयत्तौ तावतीः कलाः गुरुदक्षिण[illegible]याचार्यं छंदयामासतुर्नृप ३६ द्विजस्तयोस्तन्महिमानमद्भुतं
संलक्ष्य राजन्नतिमानुषीं मतिं संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयांबभूव ह ३७ तथेत्यथारुह्य स महार
थौ रथं प्रभासमासाद्य दुरंतविक्रमौ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हणमाहरत्तयोः ३८ तमाह
शु १ भगवानाशु गुरुपुत्रः प्रदीयतां योसाविहत्वया ग्रस्तो बालको महतोर्मिणा ३९

३९ मणिरागज्ञानं ४० आकरज्ञानं ४१ वृक्षायुर्वेदयोगाः ४२ मेषकुक्कुटलावकयुद्धविधिः ४३ शुकसारिकाप्रलापनं ४४ उत्सादनं ४५ के
शमार्जनकौशलं ४६ अक्षरमुष्टिकाकथनं ४७ म्लेच्छितकविकल्पकाः ४८ देशभाषाज्ञानं ४९ पुष्पशकटिका ५० निमित्तज्ञानं
५१ यंत्रमातृका धारणमातृका संवाच्यं ५२ मानसी काव्यक्रिया ५३ अभिधानकोशः ५४ छंदोज्ञानं ५५ क्रियाविकल्पाः ५६ ॥
छलितकयोगाः ५७ वस्त्रगोपनानि ५८ द्यूतविशेषाः ५९ आकर्षक्रीडा ६० बालक्रीडनकानि ६१ वैनायुकानां वैजयिकानां वै
यासिकानां च विधानां च ज्ञानानि ६४ इति चतुःषष्टिकलाः छंदयामासतुः उपलोमितवंतौ ३६ प्रभासक्षेत्रे महार्णवे मृतं
बालं वरयामास ३७ ईश्वरावितिं [illegible] विदित्वा समुद्रस्तयोरर्हणमाजहारेति ३८ ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द०प्र० पंचजनस्त्वसुरः हार्षितं समहान् ममासाश्च इत्यर्थः ४० १ सपर्यां पूजां ४३ सर्वेषां भूतानामाशयाश्रंतःकरणानि तान्यालयो निवासो यस्य
ते ४४ निजकर्मैव बंधनं यस्य तं तथाभूतमपि मदाज्ञापुरस्कारेणानयत त्स्तेन दोष इत्यर्थः ४५ ६ वत्सनिष्क्रयोन्यनकस्य संवाधनं गुरोर्नि

समुद्र उवाच नैवाहार्षमहं देव दैत्यः पंचजनो महान् अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः ४० जलमाविश्य तं
हत्वा नापश्यदुदरेऽर्भकं तदंगप्रभवं शंखमादाय रथमागमत् १ ततः संयमनीं नाम यमस्य दयितां पुरीं गत्वा जनार्दनः
शंखं प्रदध्मौ सहलायुधः ४१ शंखनिर्ह्राद माकर्ण्य प्रजासंयमनो यमः तयोः सपर्यां महतीं चक्रे भक्त्युपबृंहितां ४३
उवाचावनतः कृष्णं सर्वभूताशयालयं लीलामनुष्ययोर्विष्णो युवयोः करवाम किं ४४ श्रीकृष्ण उवाच गुरुपु
१३३ त्रमिहानीतं निजकर्मनिबंधनं आनयस्व महाराज मच्छासनपुरस्कृतः ४५ तथेति तेनोपनीतं गुरुपुत्रं यदूत्त
मौ दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ४६ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः को नु युष्मद्विधगु-
रोः कामानामवशिष्यते ४७ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी छंदांस्ययातयामानि भवंत्विह परत्र च
४८ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा आयातौ स्वपुरं तात पर्जन्यनिनदेन वै ४९ समनंदन्प्रजाः सर्वा
दृष्ट्वा रामजनार्दनौ अपश्यंत्यो बह्वहानि नष्टलब्धधना इव ५० इति श्रीभागवते महापुराणे दशमस्कंधे पंचचत्वा
रिंशोध्यायः ॥ ६९ ६९

क्रयो गुरुदक्षिणा युष्मद्विधस्य गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोपि ४७ हे वीरौ ४८ अनिलश्च द्रंहायस्य तेन ना पर्ज राम
न्यो मेघः तद्गर्जितनिनदो यस्य तेन ४९ नष्टं अदृष्टं तत्पुनर्लब्धं धनं याभिः ता इव ५० इति दशमे पंचचत्वारिंशः ॥ ६९ श्रीराम ॥ १३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४६ चत्वारिंशके घोषमुद्धवं प्रेष्य तद्गिरा यशोदानंदयोः श्रीकृष्णः शोकापनोदनं १ कामचारं द्विजातिः समनुपरित्यज्यातिसंयतः । गुरोर्ज्ञानम
नुप्राप्य सख्यं गोपीरुपादिशत् १ गोपीनां सांत्वनमतिरहस्यं सन्मंत्रिसाध्यमिति तदर्थं उद्धवं विशिनष्टि वृष्णीनामिति बुद्धिसत्तमः बुध्याति
श्रेष्ठः १ २ ३ गोपीनां विशेषतः संदेशकारणमाह ता इति मय्येव संकल्पात्मकं मनो यासां ताः अहमेव प्राणा यासां ताः मदर्थे त्यक्तं दैहिका
पतिपुत्रादयो याभिस्ताः ननु किमेतदाह ये त्यक्तलोकधर्मा इति मन्निमित्तं त्यक्तो लोको धर्मश्च ऐहिकामुत्रसुखतत्साधनानि च यैस्तानू वि

श्रीशुक उवाच वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा । शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः १ तमाह भग
वान् प्रेष्ठं भक्तमेकांतिनं क्वचित् । गृहीत्वा पाणिना पाणिं प्रपन्नार्त्तिहरो हरिः २ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीति
मावह । गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ३ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः । ये त्यक्त
लोकधर्माश्च मदर्थे तान् बिभर्म्यहं ४ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः । स्मरंत्योऽङ्ग विमुह्यंति
विरहौत्कंठ्यविह्वलाः ५ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान् कथंचन । प्रत्यागमनसंदेशैर्बल्लव्यो मे मदात्मि
काः ६ श्रीशुक उवाच इत्युक्त उद्धवो राजन् संदेशं भर्त्तुरादृतः । आदाय रथमारुह्य प्रययौ नंदगोकुलं

भर्मि पुष्णामि संवर्द्धयामीत्यर्थः ४ तासां वियोगाधिं दर्शयति द्वाभ्यां मयीति विरहौत्कंठ्येन विह्वलाः परवशाः ५ गोकुला
न्निर्गमनसमये शीघ्रमागमिष्यामीति प्रत्यागमनसंदेशाः तैः मम दीयाः बल्लव्यो गोप्यः मदात्मिका इति तासामात्मा देहय
दि स्यात्तर्हि विरहतापेन दह्येतैव तस्य मयि वर्त्तमानत्वात्कथंचिज्जीवंतीति भावः ६ संदेशं भवतीनां वियोगो मे न हि सर्वा
त्मना क्वचिदित्यादिकं ७

भा० द० मू निम्लोचति अस्तं गच्छति सति छन्नयानं यस्य तिन तदा गोपीभिरज्ञाते स्वनंदसंगत्वं ध्रुवानिति सूचयति ८ अजं वर्णयति पंचभिः वसिताः
पुष्पवंत्या गावः तन्निमित्तं मर्भितायुक्त अक्लिष्टैः शुष्मिभिर्मत्तैर्गोवृषैर्नादितं वास्राभिर्धेनुभिः स्ववत्सकान्प्रति ९ विलय इङ्गिरूसवत्सैः
सुधमा १ गोदोहशब्दैः सहाभिता रवाः मुंचनं य आनयन् गृहाणं दहोत्सादयो यस्मिन् तत्वेवणानानि स्वनेन १० गायंतीभिर्गोपीभिर्गोपैश्च

प्राप्तानंदव्रजं श्रीमन्निम्लोचति विभावसौ छन्नयानः प्रविशं तापशूनां खुरेरणाभिः ८ वासितार्थे भियुद्ध अक्लि
नौ दितं शुष्मिभिर्वृषैः धावंतीभिश्च वास्राभिरुधोभारैः स्ववत्सकान् ९ इतस्ततो विलयद्भिर्गोवत्सैर्मंडितं
सितैः गोदोहशब्दाभिरवं वेवणनानिः स्वनेन च १० गायंतीभिश्च कर्माणि शुभानि बलकृष्णयोः स्वलंकृताभि
गोपीभिर्गोपैश्च सुविराजितं ११ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः धूपदीपैश्च माल्यैश्च गोपावासै
मनोरमं १२ सर्वतः पुष्पितवनं द्विजालिकुलनादितं हंसकारंडवाकीर्णैः पद्मखंडैश्च मंडितं १३ तमाग
तं समागम्य कृष्णस्यानुचरं प्रियं नंदः प्रीतः परिष्वज्य वासुदेवधियार्चयत् १४ भोजितं परमान्नेन संविष्टं
कशिपौ सुखं गतश्रमं पर्यपृच्छत्पादसंवाहनादिभिः १५ कच्चिदंग महाभाग सखा नः शूरनंदनः आस्ते कु
शल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्वृतः १६ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना साधूनां धर्मशीलानां
यदूनां द्वेष्टि यः सदा १७ अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् गोपान् व्रजं चात्मनाथं गावो वृंदावनं
गिरिं १८

गोप १

सुविराजितं ११ अग्न्याद्यर्चनान्वितैर्गृहैः धूपादिभिश्च मनोरमं १२ १३ षंडः समूहः १४ आचर्यत् पूजयामास १५ कशिपौ शयायां संविष्टं १५ साधूनामिति कर्माणि षष्ठ्यः १७ गावो गाः गिरिं गोवर्द्धनं १८ श्रीराम श्रीराम श्री राम १३४

खं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथापास्यति आगमिष्यति १९ श्रीकृष्णोपकारस्मरणादिनिरनुपमानंदेनाभिभूयमान आह हा वाग्भिरित्यादिना वाताहर्षोच्चि
वृषासर्प ति अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः स्मः किंच स्मरतामिति लीलया अपांगेन निरीक्षितं अंगेहे उद्धव २१
ध्येति २ नेकेवलं शिथिला एव किंतु शनैरुपरमंतीत्याह सरिदिति सरितः शैला वनोद्देशा वनानि आक्रीडन् क्रीडास्थानानि २२

अथापास्यति गोविंदः स्वजनानुसंदीक्षितुं तर्हि द्रक्ष्यामतद्वक्त्रं सुनसं सुस्मितेक्षणं १९ दावाग्नेर्वातवर्षाच्चि
वृषसर्पाच्च रक्षिताः दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना २० स्मरतां कृष्णवीर्याणि लीलापांगनिरीक्षि
तं हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः २१ सरिच्छैलवनोद्देशान् मुकुंदपदभूषितान् आक्रीडा
नीक्ष्यमाणानां मनो याति तदात्मतां २२ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ सुराणां महदर्थाय गर्गस्य छो ५
वचनं यथा २३ कंसं नागायुतप्राणं मल्लौ गजपतिं तथा अवधिष्टां लीलयैव पशूनिव मृगाधिपः २४ तालत्रयं
महासारं धनुर्यष्टिमिवेभराट् बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिं २५ प्रलंबो धेनुको रिष्टस्तृणावर्तो बका
द्यः दैत्याः सुरासुरजितो हता येनेह लीलया २६ श्रीशुक उवाच इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः
अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः २७ यशोदा वर्ण्यमानानि पुत्रस्य चरितानि च शृण्वंत्यश्रूण्यवास्राक्षी
त्स्नेहस्नुतपयोधरा २८ तयोरित्थं भगवति कृष्णे नंदयशोदयोः वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा २९
उद्धव उवाच युवां श्लाघ्यतमौ नूनं देहिनामिह मानद नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ३०

सुराणामर्थाय महद्गंभीरं गर्गस्य वचनं यथा २३ नकेवलं तद्वचनानुसारेणैव व्यवहारसंवाददपीत्याह कंसमिति २४ इभराड्यष्टि
मिव तालत्रयप्रमाणं धनुर्बभंज २५ २६ २९ ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वि.उ

अखिलगुरुत्वमेवजनकत्वेननियंतृत्वेनचाह एताविति रामोमुकुंदश्चैतौविश्वस्यजीवयोनीनिमित्तोपादाने ननुपुरुषप्रधानयो
र्बीजयोनित्वंप्रसिद्धंमतआह पुरुषःप्रधानमितिपुरुषोंशः प्रधानंशक्तिः अनयोः प्रधानपुरुषावेवैतावित्यर्थः एवंजनकत्वमुक्त्वा किं
च अन्वीयभूतेषुभूतान्यनुप्रविश्यभूतानांतदुपहितस्यविलक्षणस्यनानाभेदस्यज्ञानस्यजीवस्यईशाते ईश्वरौनियंतारौभ १२
५ करोच्चिरं १५ लब्ध्वागुहंतेस्वःपालंमुचुकुंदमथाब्रुवन् राजन्विरमतांकृच्छ्राद्भवान्नःपरिपालनात् १६ नर
लोकेपरित्यज्यराज्यंनिहतकंटकं अस्मान्पालयतोवीरकामास्तेसर्वउज्झिताः १७ सुतामहिष्योभवतोज्ञा
तयोमात्यमंत्रिणः प्रजाश्चतुल्यकालीना नाधुनासंतिकालिताः कालोबलीयान्बलिनांभगवानीश्व
रोव्ययः प्रजाःकालयतेक्रीडन्पशुपालोयथापशून् १९ वरंवृणीष्वभद्रंतेऋतेकैवल्यमद्यनः एकएवे
श्वरस्तस्यभगवान्विष्णुरव्ययः २० लि २

सेनान्यं १६ उज्झितास्त्यक्तागताइत्यर्थः किंचसुताइति तुल्यकालीयाःत्वत्समानकालीनाः कालिताविचालिताः १८ मत्र राम
ज्ञाःकोन्यःकालयेदितिचेत्तत्राह कालइति कालयतेइतस्ततश्चालयति १९ तस्यकैवल्यस्य २० श्रीराम श्रीराम ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुहायांप्रविष्टः शेतस्म २१ ६ धर्षितः अभिभूतः दुर्द्धर्षमधृष्यं २७ विपिनेअरण्ये तत्रापिगिरिगह्वरेदुः प्रवेशस्थाने तत्रापिउरुकंटकेपद्मपलाशसदृशा
भ्यांपद्भ्यांविचरसीति २८ तेजोमूर्तिः प्रभावाहोस्विद्वा २९ सर्वत्रापरितोषादाह मन्यइति पुरुषर्षभंविष्णुं गुहाध्वांतमंतस्तमः ३० १ वयंत्विति

एवमुक्तः सवैदेवानभिवंद्यमहायशाः अशयिष्टगुहाविष्टोनिद्रयादेवदत्तया २१ स्वापंयातंयस्तुमध्येबोधयेत्वामचेतनः सत्वयादृष्ट
मात्रस्तुभस्मीभवतुतत्क्षणात् २२ यवनेभस्मसान्नीतेभगवान्सात्वतर्षभः आत्मानंदर्शयामासमुचुकुंदायधीमते २३ तमा
लोक्यघनश्यामंपीतकौशेयवाससं श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितं २४ चतुर्भुजंरोचमानंवैजयंत्याचमालया चा
रुप्रसन्नवदनंस्फुरन्मकरकुंडलं २५ प्रेक्षणीयंनृलोकस्यसानुरागस्मितेक्षणं अपीव्यवयसंमत्तमृगेंद्रोदारविक्रमं
२६ पर्यपृच्छन्महाबुद्धिस्तेजसातस्यधर्षितः शंकितःशनकैराजादुर्द्धर्षमिवतेजसा २७ मुचुकुंदउवाच कोभवा
निहसंप्राप्तोविपिनेगिरिगह्वरे पद्भ्यांपद्मपलाशाभ्यांविचरस्युरुकंटके २८ किंस्वित्तेजस्विनांतेजोभगवान्वाविभा
वसुः सूर्यःसोमोमहेंद्रोवालोकपालोपरोपिवा २९ मन्येत्वांदेवदेवानांत्रयाणांपुरुषर्षभं यद्बाधसेगुहाध्वांतंप्रदी
पः प्रभयायथा ३० शुश्रूषतामव्यलीकमस्माकंनरपुंगव स्वजन्मकर्मगोत्रंवाकथ्यतांयदिरोचते ३१ वयंतुपुरुषव्या
घ्रऐक्ष्वाकाः क्षत्रबंधवः मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो ३२ चिरप्रजागरःश्रांतोनिद्रयापहतेंद्रियः शय
स्मिन्विपिनेकामंकेनाप्युत्थापितोधुना ३३ सोपिभस्मीकृतोनूनमात्मीयेनैवपाप्मना अनंतरंभवान्श्रीमान्लक्षि
तोमित्रशासन ३४ तेजसातेविषह्येणभूरिद्रष्टुंनशक्नुमः महौजसोमहाभागमाननीयोसिदेहिनां ३५ एवंसंभाषि
तोराज्ञाभगवान्भूतभावनः प्रत्याहप्रहसन्वाण्यामेघनादगभीरया ३६

अपाभिप्रायेणबहुवचनं तेषुहंमुचुकुंदइतिप्रोक्तः युवनाश्वोमांधातुःपिता ३२ ३६ श्रीकृष्णायनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाणि

३९ क्वचित्कदाचित्क्षितिरपि रजांसि विममे गणितवान् तथापि निजन्मानि कर्माणि विमिमीते ३९ ४१ ते तिरम चक्षुषा निमित्तेन मयैव
दग्धः ४३ अपूर्णोहमिति शोचितु यद्दानेन्द्रेषु धनेषु क्षीणेषु यथा शोचति नैवं मा प्रपन्नः मद्दत्तवराणामक्षयत्वादिति भावः ४४
११ अष्टाविंशतिमे युगे भवानवतरिष्यती ति वृद्ध गर्गवाक्यमनुस्मरन्नित्यर्थः ४५ लक्षेति रवेकवल्लदुःखे भाकामास्तत्तु खानवरणेयागपाड

श्रीभगवानुवाच जन्मकर्माभिधानानि संति मेंग सहस्रशः नशक्यंतेनुसंख्यातुमनंतत्वान्मयापिहि ३८ क्वचिद्रजांसि
६ विममे पार्थिवान्युरुजन्मभिः गुणकर्माभिधानानि नमेजन्मानि कर्हिचित् ॥ ३९ कालत्रयोपपन्नानि जन्मकर्माणि मे
नृप अनुक्रमंतोनैवांतं गच्छंति परमर्षयः ३९ तथाप्यद्यतनान्यंग शृणुष्व गदतो मम विज्ञापितो विरिंचिन पुराहं ध
र्मगुप्तये ४० भूमेर्भारायमाणानामसुराणां क्षयाय च अवतीर्णो यदुकुले गृह आनकदुंदुभेः ४१ वदंति वासुदेवेति
वसुदेवसुतं हि मां कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः ४२ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा सो
१४ हं तवानुग्रहार्थं गुहामेतामुपागतः ४३ प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सलः वरान्वृणीष्व राजर्षे सर्वान् कामान् ६
ददामि ते मां प्रपन्नो जनः कश्चिन्न भूयोर्हति शोचितुं ४४ श्रीशुक उवाच इत्युक्तस्तं प्रणम्याह मुचुकुंदो मुदान्वितः ॥ ६२
ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन् ४५ मुचुकुंद उवाच विमोहितोयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थ त्वदीयया २
दृक् सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः ४६ श्रीराम श्रीराम श्रीराम श्री

त्वाशयेन अभक्तानां संसारसृष्टिभिः प्रपंचयंत्यो ति विमोहितइति हे ईश योषिच्च पुरुषश्चेति द्विविधोप्ययं जनः त्वदीयया मायया विमो
हितः अतः अनर्थदृक् अर्थं परमार्थसुखरूपं त्वां न पश्यतीति तथा अतः त्वां न भजति किंतु परस्परं वंचितः सन् सुखेच्छया दुःखानाम
वश्यभावोयेषु तेषु गृहेष्वेव सज्जत इति ४६

किंच कामसुखं सूकरादिष्वपि संभवति भगवद्भजनं तु न मानुषव्यतिरेकेणेति मानुषत्वं प्राप्य त्वां भजन्तीति मूढ इत्याह लब्ध्वेति अत्रक
अ२ र्मभूमौ अव्यंगं अविकलांगं किंच सति विषयसुखे मतिर्यस्य सः गृहमेवांधकूपस्तस्मिन् पतितः यथा पशुस्तृणलुब्धोंधकूपे पततीति ४७
न केवलमस्य जनस्यैयं गतिः किंतु ममापि तथैवेत्याह ममेति मर्त्ये शरीरे आत्मबुद्धिर्यस्य तस्य मम अत एव सुतादिष्वासज्जमानस्य ४८
उन्नद्धमदत्वं प्रपंचयति कलेवर इति घटकुड्यादिसदृशे दृश्यनात्मनि यत एव दुर्मदो भवं अतो ममैष कालो निःफलो गत इति ४९ ॥

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोनघ । पादारविंदं न भजत्यसन्मतिर्गृहांधकूपे पतितो यथा पशुः ४७
ममैष कालोजित निःफलो गतो राजश्रियोन्नद्धमदस्य भूपतेः मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरंतचिं
तया ४८ कलेवरेस्मिन् घटकुड्यसन्निभे निरूढमानो नरदेव इत्यहं वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वाऽग
णयन् सुदुर्मदः ४९ प्रमत्तमुच्चैरिति कृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं त्वमप्रमत्तः सहसाभिपद्यसे
क्षुल्लेलिहानोहिरिवाखुमंतकः ५० श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

त्वां अगणयं तं त्वमाक्रमसीत्याह प्रमत्तमिति प्रमत्तमनवहितं त्वां मं तकम विगणय्य देहादिष्वासक्तमिति यावत् कुतः प्रमत्त इति कृ
त्यचिंतया एवमेवं करणीयमिति मनोरथपरंपरया मनोरथे भग्ने विषयेषु लालसं उत्सुकं प्राप्तिपि पुनः प्रवृद्धो लोभस्तु हभाय
स्यंत अंतकस्त्वमभिभवसीत्यर्थः क्षुधा सद्धिणीत्के लिहनोः हिराखुं मूषकमिवेति ५० श्रीराम श्रीराम श्रीराम श्री

तिपपसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ किंच कालात्मना त्वयाऽभिपन्नो देह एवं भवतीत्याह पुरेति श्वसृगालादिभिर्भक्षितो विट्संज्ञितस्तैरभक्षितः कृमिसंज्ञितः। दग्धो भस्मसंज्ञि
तो भवति ३ तिर्वुह्याविचार्यैवंभूते शरीरे ममतां कुर्वन्तो जना हरिं नाराधयंतीयते आत्मनि शत्रुभूता ऽज्ञयाः सततं यतः। यैर्नैः सहस्राणि
यह निगत्वा दुःखनलब्ध्वापि च मानुषत्वं सुखावहं येन भजंति विष्क्रंते एवं मनुष्या आत्मनि शत्रुभूताः इति ५१ किंचांतकं प्राप्तं प्रागपि दिग्वि
जयिना राज्ञापि पारतंत्र्यं दुःखं तद्वदस्यैवेत्याह निर्जित्येति अभूतविग्रहः अविद्यमानसंग्रामः पूर्वं येस मास्ते राजभिर्वंदितोऽपि मि
थुनीभावसुखमेव परं येषु तेषु योषितां गृहेषु क्रीडामृगइवइतस्ततो नीयते ५२ किंचतत्रापि निवृत्तकर्मां कुर्वन्तस्य न भोगाक्षणः के चिद्दत्तो

पुरा रथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वा नरदेवसंज्ञितः। स एव कालेन दुरत्ययेन ते कलेवरो विट्कृमिभस्मसंज्ञितः। ५१
निर्जित्य दिक्चक्रम अभूतविग्रहो वरासनस्थः समराजवंदितः। गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पुरुष ईश
नीयते ५२ करोति कर्माणि तपःसुनिष्ठितो निवृत्तभोगस्तदपेक्षयाददत्। पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न
सुखाय कल्पते ५३ भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः। सत्संगमो यर्हि तदैव सद्गतौ परा
वरेशे त्वयि जायते मतिः। ५४ ७

त्याह करोतीति तपस्यधःशयनब्रह्मचर्यादौ सुनिष्ठितः पुनश्च स्वराडिंद्रः स्यामिति यद्वा जन्मांतरेष्वेवमेव चक्रवर्ती स्यामिति ५३ तदेवं
८२ महद्भिः श्लोकैरीश्वरं विहिर्मुखानां संसारं प्रपंच्य भक्त्या तन्निवृत्तिक्रममाह भवापवर्ग इति हे अच्युत भ्रमतः संसरतो जनस्य यदा
त्वदनुग्रहेण भवस्य बंधस्य अपवर्गोऽतो भवेत् प्राप्तकालः स्यात् तदा सत्तां संगमो भवेत् यदा च सत्संगमो भवेत् तदा सत्सं राम ७
गमो भवेत् तदा संगनिवृत्त्या कार्यकारणनियंतरि त्वयि भक्तिर्भवति तेन मुच्यत इत्यर्थः। ५४ ६७
सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रमादाय १

५९ अप्रमादार्थं न भवेत्येव कुत इत्यत आह नधीरिति एकांतभक्तानां धीराशीर्भिः प्राप्ताभिरपि न भिद्यते नासज्जत इत्यर्थः ६० व्यतिरेक
माह युंजानानामिति उत्थितं विषयाभिमुखं ६१ तुभ्यं तव ६२ युक्ताभ्यासेन भीषयंस्तपसि लोकसंग्रहे प्रवर्त्तयति क्षात्रधर्मेति सि १

श्रीभगवानुवाच सार्वभौममहाराज्ञमतिस्ते विमलोर्जिता वरैः प्रलोभितस्यापि न कामैर्विहतायतः ५९
प्रलोभितो वरैर्यत्त्वमप्रमादाय विद्धि तत् न धीर्मय्येकभक्तानामाशीर्भिर्भिद्यते क्वचित् ६० युंजानानामभ
८ क्तानां प्राणायामादिभिर्मनः अक्षीणवासनं राजन् दृश्यते क्वचिदुत्थितं ६१ विचर स्वमहीं कामं मय्यावे
शितमानसः अस्त्वेवं नित्यदा तुभ्यं भक्तिर्मय्यनपायिनी ६२ क्षात्रधर्मस्थितो जंतून् न्यवधीर्मृगयादि
भिः समाहितस्तत्तपसा जह्यघं मदुपाश्रितः ६३ जन्मन्यनंतरे राजन् सर्वभूतसुहृत्तमः भूत्वा द्वि
जवरस्त्वं वै मामुपैष्यसि केवलं ६४ इति श्रीभागवते महापुराणे दशमस्कंधे एकपंचाशत्तमोऽध्यायः ५१
श्रीशुक उवाच इत्थं सोऽनुगृहीतोंऽग कृष्णेनेक्ष्वाकुनंदनः तं परिक्रम्य संनम्य निश्चक्राम गुहामुखात्
१ संवीक्ष्य क्षुल्लकान्मर्त्यान् पशून् वीरुद्वनस्पतीन् मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तरां २ तपःश्र
द्धायुतो धीरो निःसंगो मुक्तसंशयः समाधाय मनः कृष्णे प्राविशद्गंधमादनं ३ बदर्याश्रममासाद्य न ८
रनारायणालयं सर्वद्वंद्वसहः शांतस्तपसाराधयद्धरिं ४

६२ ४ इति दशमे एकपंचाशत्तमः द्विपंचाशत्तमे धावन् भयादिव गतः पुरीं अन्वमोदत संदेशं रुक्मिण्या द्विज
वर्णितं १ १ क्षुल्लकान् अल्पप्रमाणान् २ तपसि श्रद्धायुतः ३ तत्र बदर्याश्रमं ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममतु सत्संगात्पूर्वमेव राज्यादिसंगविच्छेदो जातः सोयं त्वया महाननुग्रहः कृतइत्याह मन्यइति तेत्वया साधुभिर्विवेकिभिः तपसे वनं प्रवेष्टुमि
च्छुद्भिः स्वयं त्यक्तुमलभमानैः प्रार्थ्यतइति ५५ तदेवं विषयसेवामार्गं भगवत्सेवामार्गं च विविच्य वरान् वृणीष्वेति यदुक्तं तत्रोत्तरं माहंन
कामयइति अकिंचना निरस्ताभिमानाः आर्यो विवेकी ५६ रजस्तमः सत्वगुणैरनुबध्यंतइति तथाताः ऐश्वर्यादि शत्रुमरणादि ध
र्मादिरूपाः विसृज्य परं पुरुषमीश्वरं ज्ञप्तिमात्रज्ञानघनं कुतः निरंजनं तत्कुतः निर्गुणं तदपि कुतः अद्वयं अतएवाक्षरं त्वांश

मन्ये ममानुग्रह ईश ते कृतो राज्यानुबंधापगमो यदृच्छया यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखंडभूमि
पैः ५५ न कामयेन्यं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमा
त्मबंधनं ५६ तस्माद्विसृज्याशिष ईश सर्वतो रजस्तमः सत्वगुणानुबंधनाः निरंजनं निर्गुणमद्वयं परं त्वां ज्ञप्ति
मात्रं पुरुषं व्रजाम्यहं ५७ चिरमिह वृजिनार्तस्तप्यमानोनुतापैरवितृषषडमित्रोऽलब्धशांतिः कथंचित् श
रणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीश ५८

रणं व्रजामिति ५७ भुंक्ष्व तावद्भोगान् कैवल्यं तु करस्थमेवेति पुनर्वरैः प्रलोभयंतं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते चिरमिति वृजि
नैः कर्मफलैः आर्तः पुनस्तद्वासनादिभिस्तप्यमानः तथापि अवितृषषडमित्रः तदेव तृषा तृष्णा नविगता तृषाः षडमित्राः
शत्रवइंद्रियाणि यस्य सः अतएवालब्धशांतिः कथंचिद्दैववशेन लब्धशांतिरितिवा शरणं स्वज्ञानं तद्ददातीति तथोह शर
णद समुपेतः प्राप्तोहं अशोकत्वे हेतुः ऋतं आपन्नं आपदाव्याप्तं पाहीति ५८

तत्रवइंद्रियलब्धुमायस्य

अभयं।
तत्रापि हेतुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निम्नेनयन्मार्गेण्वलतिस्म ५ ६ वेगरभसंवेगोद्रिक्तं ७ भीरुभीतवत् भीरोरपिभीतवत् अतिभीतवदित्यर्थः ९ चेरतुः पलायितौ
बहुयोजनंदेशं ८ अप्रमाणवित् अप्रमाणमयत्तात्तन्नवेत्तीतितथा ९ तुंगंएकादशयोजनोन्नतं प्रकर्षेणवर्षत्यस्मिन्नितिप्रवर्ष
णाइत्याख्यायस्यतं तदाह भगवानिंद्रः १० तत्रविचिन्वन्नपितयोः पदं निलयस्थानमनधिगम्य ११ ततोगिरेः भुभुपाल द

भगवान्पुनराव्रज्यपुरीयवनेचेष्टितं हत्वाम्लेंद्रवलंनिन्येतदीयंद्वारकांधनं ५ नीयमानेधनेगोमिन्नैभिश्चाच्यु
तचोदितैः आजगामजरासंधस्त्रयोविंशत्यनीकपः ६ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवो मनुष्यचेष्टमापन्नो
राजन्दुद्रुवतुर्द्रुतं ७ विहायवित्तंप्रचुरंअभीतौभीरुभीतवत् पद्भ्यांपद्मपलाशाभ्यांचेरतुर्बहुयोजनं ८ पलाय
मानौतौदृष्ट्वामागधः प्रहसन्बली अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ९ प्रद्रुत्यदूरंसंश्रांतौतुंगमारुह
तांगिरिं प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्षति १० गिरौनिलीनावाज्ञायनाधिगम्यपदंनृप ददाहगिरिमेधो
भिः समंतादग्निमुत्सृजन् ११ ततउत्पत्यतरसादह्यमानात्तदुभौततात् दशैकयोजनात्तुंगान्निपेततुरधोभुवि १२
अलक्ष्यमाणौरिपुनासानुगेनयदूत्तमौ स्वपुरंपुनरायातौसमुद्रपरिखांनृप १३ सोपिदग्धावितिमृषामा
न्वानोवलकेशवौ बलमाकृष्यसुमहन्मगधान्मागधोययौ १४ आनर्ताधिपतिः श्रीमान्रैवतोरेवतींसु
तां ब्रह्मणाचोदितः प्रादाद्बलायेतिपुरोदितं भगवानपिगोविंदउपयेमेकुरूद्वह वैदर्भींभीष्मकसुतांश्रि
यो मा[illegible]त्रांस्वयंवरे १६ प्रमथ्यतरसाराज्ञः शाल्वादींश्चैद्यपक्षगान् पश्यतांसर्वलोकानांताक्ष्यपुत्रः सुधामिव १७ ५

शच्चएकंचयानियोजनानि तावदुत्तुंगान्मागधसंरोधदेशमतिक्रम्य परतोधोनिपेततुः १२ ४ श्रीकृष्णस्यविवाहान्निरूपयि
तुं बलदेवविवाहंनवमस्कंधोक्तमनुस्मारयति आनर्तेति १५ मात्रांकलां १६ गरुडोयथादेवान्प्रमथ्यसुधामहरत्तथेति १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ उ॰ राक्षसाद्युद्धहरणादिति स्मृतेः राज्ञः प्रमथ्येति च तत्त्वदुक्त्या राक्षसेन विधानेनोपयेमे परिणीतवानिति श्रुतं पूर्वमेव वासमानं तदेव श्रुतं १८ वि
शेषं श्रोतुमिच्छामः १९ श्रवणात्सुकयमानिः करोति ब्रह्मन्निति पुण्याः महाफलाः माध्वीः श्रुतिसुखाः लोकस्य मलापहाः श्रृण्वान्
श्रृण्वन्नित्यर्थः [illegible] श्रृण्वन्नित्यर्थः श्रुतज्ञः श्रुतसारवित् नित्यनूतनाः प्रतिक्षणमाश्चर्यवत्प्रतीयमाना २० २४ ये

राजोवाच भगवान् भीष्मकसुतां रुक्मिणीं रुचिराननां राक्षसेन विधानेन उपयेम इति श्रुतं १८ भगवन् श्रोतुमिच्छा
मः कृष्णस्यामिततेजसः यथा मागधशाल्वादीन् जित्वा कन्यामुपाहरत् १९ ब्रह्म न् कृष्णकथाः पुण्या माध्वीर्लोक
मलापहाः को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः २० श्रीशुक उवाच राजासीद्भीष्मको नाम विदर्भाधिपति मध्य
र्महान् तस्य पंचाभवन् पुत्राः कन्यैका च वरानना २१ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः रुक्मकेशो रुक्ममा
५९ ली रुक्मिण्येषां स्वसा सती २२ सोपश्रुत्य मुकुंदस्य रूपवीर्यगुणश्रियः गृहागतैर्गीयमानास्तं मेने सदृशं पतिं २३
तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे २४ बंधूनामिच्छतां दातुं कृष्णा
य भगिनीं नृप ततो निवार्य कृष्णद्विड् रुक्मी चैद्यममन्यत २५ तदवेत्य सितापांगी वैदर्भी दुर्मना भृशं विचिंत्याप्तं द्वि स्थानं
जं कंचित्कृष्णाय प्राहिणोद्द्रुतं २६ द्वारकां स समभ्येत्य प्रतीहारैः प्रवेशितः अपश्यदाद्यं पुरुषमासीनं कांचनास
ने २७ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् उपवेश्यासनं चक्रे यथात्मानं दिवौकसः २८ तं भुक्तवंतं विश्रां
तमुपगम्य सतां गतिः पाणिनाभिमृशन् पादावव्यग्रस्तमपृच्छत २९ श्रीराम श्रीराम श्रीराम श्रीरा॰ राम

धममन्यत तस्यावरमित्यर्थः अवेत्य ज्ञात्वा असितापांगी सुनीलकटाक्षी कृष्णाय कृष्णमानेतुं प्रेषयामास २६ प्रतीहारैः द्वारपालैः ५९
२७ आत्मानं श्रीकृष्णं २८ अभिमृशन् शनैः संमर्दयन् २९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० सधर्मो॰ स्वब्राह्मणस्याखिलकामदोग्धा यद्वा स ब्राह्मणः स्वविश्वस्याखिलकामधुगिति ३१ लोकानाप्नोति लोकात् लोकांतरं पर्यटति नैक
त्र निर्वृतस्तिष्ठतीत्यर्थः नाप्नोतीति पाठे सुरेश्वरोपि भूत्वा लोकान्नाप्नोति उत्तमलोकान्प्राप्नोपि त्रप्राप्तइव क्लिश्यतीत्यर्थः शेते सुख
मास्त इत्यर्थः तदेवाह सर्वेषु अंगेषु वाक्पाण्यादिषु विज्वरस्तापरहितः ३२ स्वलाभः स्वतएवप्राप्तो लाभः आत्मलाभो वा तेन संतुष्टा

कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः वर्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ३० संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केन चित्
अहीयमानः स्वाद्धर्मात्स ह्यस्याखिलकामधुक् ३१ असंतुष्टोऽसकृल्लोकानाप्नोत्यपि सुरेश्वरः अकिंचनोपि संतुष्टः शेते सर्वांगविज्वरः ३२ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् निरहंकारिणः शांतान्नमस्ये
शिरसाऽसकृत् ३३ कच्चिद्वः कुशलं ब्रह्मन्राजतो यस्य हि प्रजाः सुखं वसंति विषये पाल्यमानाः स मे प्रियः ३४ य
तस्त्वमागतो दुर्गं निस्तीर्येह यदिच्छया सर्वं नो ब्रूह्यगुह्यं चेत्किं कार्यं करवाम ते ३५ एवं संपृष्टसंप्रश्नो ब्राह्मणः
परमेष्ठिना लीलागृहीतदेहेन तस्मै सर्वमवर्णयत् ३६ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

प्रणीन॰

न्॰ साधून् स्वधर्मनिष्ठान् ३३ यस्य राज्ञो विषये देशे ३४ यतः स्थानात् यदिच्छया यस्य कार्यस्येच्छया दुर्गं समुद्रं ३५ संपृष्टः संप्र
श्नः प्रष्टव्योर्थो यस्य सः परमेष्ठिना परमेश्वरेण बंधूनामभिप्रेतं कारुक्मिण श्रेष्ठितमित्यादि सर्वं ३६ रुक्मिण्या स्वयमेव कां
तेलिखित्वा दत्तपत्रिकां मुद्रामुन्मुच्य कृष्णायप्रेमचिह्नमदर्शयत् ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्राह्मणः श्रीकृष्णानुज्ञया वाचयति श्रुत्वेति अयमर्थः हे अच्युत हे भुवनसुंदर त्वय्यौत्सुक्यं दर्शयति क्व च तव महिमा क्व चाहं रूपकुलशी लादियुक्तापि तथापि अपगतात्रपा यस्मात्तस्मात् मे चित्तं त्वय्याविशति आसज्जते तत्कुतस्तत्राह शृण्वतां कर्णविवरैः रंध्रैः प्रविश्यांगतापं अंगेति पृथक्संबोधनं वा हरतस्तव गुणान् श्रुत्वा तथा दृशिमतां चक्षुष्मतां दृशामखिलार्थलाभात्मकं रूपं च श्रुत्वेति ३७ अहो कुलकन्यानामिदमतिधार्ष्ट्यमिति माशंकीत्याह कात्वेति हे मुकुंद हे नृसिंह नरश्रेष्ठ कानाम कन्या कुलवती तथा महती पुरु

१० श्रीरुक्मिण्युवाच श्रुत्वा गुणान् भुवनसुंदर शृण्वतां ते निर्विश्य कर्णविवरैर्हरतोंगतापं रूपं दृशां दृशिमतामखि
लार्थलाभं त्वय्यच्युताविशति चित्तमपत्रपं मे ३७ कात्वा मुकुंद महती कुलशीलरूपविद्यावयोद्रविणधा
मभिरात्मतुल्यं धीरा पतिं कुलवती न वृणीत कन्या काले नृसिंह नरलोकमनोभिरामं ३८ तन्मे भवान्
खलु वृतः पतिरंग जायामात्मार्पितश्च भवतोत्र विभो विधेहि मा वीरभागमभिमर्शतु चैद्य आरात् गोमा
युवन्मृगपतेर्बलिमंबुजाक्ष ३९ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान् परेशः आराधि
तो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोन्ये ४० १०

गुणोदारा तथा धीरा धीमती त्वा त्वां पतिं न वृणीत मय्येवं केयं दोषशंकेति भावः कथंभूतं गुणशीलादिभिरात्मनैव तुल्यं निरुपममित्य र्थः द्रविणं द्रव्यसंपत् धाम प्रभावः तथा नरलोकस्य मनसा अभिरामो अभिरमणं यस्मात् किंच काले विवाहावसरे ३८ हे विभो त स्मान्मे मया भवान् खलु पतिर्वृतः आत्मा च भवतोर्पितः अतस्त्वमत्रागत्य मां भवतो जायां विधेहि विपक्षबाधकं द्योतयन्नाह मा वीरभागमिति वीरस्य तव भागं आरात् शीघ्रं एत्य आगत्य चैद्यो माभिमर्शतु मा स्पृशतु मृगपतेर्बलिं गोमायुः शृगाल इ वेति ३९ अनेकजन्मकृतैः सुकृतैरिदं मया लभ्येतेति प्रार्थयते पूर्तेति पूर्तं कूपादि इष्टं अग्निहोत्रादि दत्तं हिरण्यादि

नियमकीर्तनादि ग्रंथकुमुदि ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चैद्याय बंधुभिरर्पितायां त्वयि किमधुनाकरणीयं इत्यपेक्षायामाह श्वोभाविनीति हे अजित श्वोभाविनि उद्वहने प्रथमं गुप्तः अल
क्षित एवागत्य पश्चात्पृतनापतिभिः परिवृतः सन् चैद्यादिबलं निर्मथ्य प्रसह्य हठात् वीर्यप्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्याः
तां मां मनेन राक्षसविधिना उद्वहेति उपदेश उद्वहस्व ४१ ननु भवतु शिशुपालादिबलप्रमथनं अंतःपुरमध्यगतायास्तव हरणे त्वद्बंधु
वधोपि प्रसज्येतेत्यत आह अंतःपुरेति पुराद्बहि वर्तमानां गिरिजामंबिकां अंबिकागृहाद्देवं मम हरणं सुकरमिति भावः ४१ ननु

पति १ श्वोभाविनि त्वमजितोद्वहने विदर्भान् गुप्तः समेत्य पृतनापतिभिः परीतः । निर्मथ्य चैद्यमगधेशबलं प्रसह्य मां राक्षसेन
विधिनोद्वह वीर्यशुल्कां ४१ अंतःपुरांतरचरीमनिहत्य बंधून्त्वामुद्वहे कथमिति प्रवदाम्युपायं पूर्वेद्युरस्ति म
हती कुलदेवयात्रा यस्यां बहिर्नववधूर्गिरिजामुपेयात् ४१ यस्यांघ्रिपंकजरजःस्नपनं महांतो वांछंत्युमा
पतिरिवात्मतमोपहत्यै यर्ह्यंबुजाक्ष न लभेय भवत्प्रसादं जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात् ४३ ब्राह्म
ण उवाच इत्येते गुह्यसंदेशा यदुदेव मयाहृताः । विमृश्य कर्तुं यच्चात्र क्रियतां तदनंतरं ४४ इति श्रीभागव
ते महापुराणे दशमस्कंधे रुक्मिण्युद्वाहो नाम द्विपंचाशत्तमोध्यायः श्रीराम श्रीराम श्रीराम श्री

किमनेनानर्थकारिणा निर्बंधेन चैद्योपि तावत् प्रख्यातगुणकर्मा योग्य एव वर इति तत्राह यस्येति हे अंबुजाक्ष यस्य भवतोंघ्रि
पंकजरजोभिः स्नपनमात्मनस्तमोपहत्यै उमापतिरिव महांतो वांछंति तस्य भवतः प्रसादं न लभेय न प्राप्नुयां तर्हि व्रतैरु
पवासादिभिः कृशान् असून् प्राणान् जह्यां त्यजेयं ततः किमित्यत आह शतजन्मभिरिति एवमेव वारं यावद्भवत् जन्मभिरपि धारं
तव प्रसादः स्यादिति ४३ अत्र यत्कर्तुं करणीयं तद्विमृश्य क्रियतां तच्चानंतरमेव क्रियतामिति ४४ इति दशमे द्विपंचाशत्तमोध्यायः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ उ॰ त्रिपंचाशत्तमे मंगलाविदर्भान् कुतूहलित इति। रुक्मिणी मम हरत्कस्मो मिषतां द्विषतां बलात् १ । १ निद्रायाः अलाभे कारणांतरं वेदेति तया कथित ॥
मप्यहं च जानामीति २ आनयिष्ये आनेष्यामि राजन्यापसदान् राजसु हीनान् उन्मथ्यानयनं दृष्टांतः ए धस इति ३ उद्वाहर्क्षमिति
परश्वो रात्रे विवाहनक्षत्रमिति विज्ञाय तस्यां रात्र्यां प्रस्थाय प्रातर्विदर्भदेशान् गमत् भाभाविनित्वम जितो हर्हेन विदर्भान् गुप्ता सम
स्येति रुक्मिणीसंदेशात् ४ सैन्य इत्यादीनि चत्वारि अश्वनामानि ५ ६ पुत्रस्य रुक्मिणः स्नेहं न तद्वशमनु गच्छतीति तथा अनेन

श्रीशुक उवाच वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः। प्रगृह्य पाणिना पाणिं प्रहसन् द्विजमब्रवीत् १ श्रीभगवानु
वाच तथाहमपि तच्चित्तो निद्रां च न लभे निशि वेदाहं रुक्मिणा द्वेषान्ममोद्वाहो निवारितः २ तामानयिष्य उन्म
थ्य राजन्यापसदान् मृधे मत्परामनवद्यांगीमेधसोऽग्निशिखामिव ३ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः। रथः
११ संयुज्यतामाशु दारुकेत्याह सारथिं ४ स चाश्वैः शैब्यसुग्रीवमेघपुष्पबलाहकैः युक्तं रथमुपानीय तस्थौ प्रांज
लिरग्रतः ५ आरुह्य स्यंदनं शौरिर्द्विजमारोप्य तूर्णगैः आनर्तादेकरात्रेण विदर्भानगमद्धयैः ६ राजा स कुंडिन
पतिः पुत्रस्नेहवशं गतः शिशुपालाय स्वां कन्यां दास्यन् कर्माण्यकारयत् ७ पुरं संमृष्टसंसिक्तमार्गरथ्याचतु
ष्पथं चित्रध्वजपताकाभिस्तोरणैः समलंकृतं ८ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः जुष्टं स्त्रीपुरुषैः श्री
मद्गृहैरगुरुधूपितैः ९ पितॄन् देवान् समभ्यर्च्य विप्रांश्च विधिवन्नृप भोजयित्वा यथान्यायं वाचयामास मंगलं १० श्री

शिशुपालेति नमिति चिंघोतयति कर्माणि पुरालंकारपितृदेवार्चनादीनि ७ तान्येवाह पुरमित्यादि चतुर्भिः संमृष्टा संसिक्ता अमा राम
५२ र्गा यस्मिन् चत्वर चित्राध्वजेषु पताकाः ताभिः समलंकृतमकारयत् ८ स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थीयः प्रत्ययः यद्वा ११
स्रग्गंधमाल्यैर्विभ्रातीति तथा तैः तथा विरजांबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टं ९ यथान्यायं च कन्यां प्रति मंगलं वाचयामास १० यम

निअ २

तथाश्रीमद्गृहैर्जुष्टं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतकौतुकेन विवाहसूत्रेण मंगलं यस्यास्तां अहतं नवीनं भूषणोत्तमैश्च भूषितां ११ वध्वास्तस्याः कन्यायाः अथ विवित् अथर्वणमंत्रवित् ११
२ अभ्युदयेन चिंतं १४ ततस्तुरंगसैन्यैः परीतः परिवृतः कुंडिनं भीष्मकस्य पुरं ययौ मदच्यवं वेत्तमदच्युतः तैस्पंदनैः रथैः हेमरचि
तै

सुस्नातां सुदतीं कन्यां कृतकौतुकमंगलां अहतांशुकयुग्मेन भूषितां भूषणोत्तमैः ११ चक्रुः सामर्ग्यजुर्मंत्रैर्वध्वा रक्षां द्विजोत्त
माः पुरोहितोऽथर्वविद्वै जुहाव ग्रहशांतये १२ हिरण्यरूप्यवासांसि तिलांश्च गुडमिश्रितान् प्रादाद्धेनूश्च विप्रेभ्यो राजा वि २
धिविदांवरः १३ एवं चेदिपती राजा दमघोषः सुताय वै कारयामास मंत्रज्ञैः सर्वमभ्युदयोचितं १४ मदच्युद्भिर्गजा
नीकैः स्यंदनैर्हेममालिभिः पत्त्यश्वसंकुलैः सैन्यैः परीतः कुंडिनं ययौ १५ तं वै विदर्भाधिपतिः समभ्येत्याभिपूज्य
च निवेशयामास मुदा कल्पितान्यनिवेशने १६ तत्र शाल्वो जरासंधो दंतवक्त्रो विदूरथः आजग्मुश्चैद्यपक्षीयाः
पौंड्रकाद्याः सहस्रशः १७ कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुं यद्यागत्य हरेत्कृष्णो रामाद्यैर्यदुभिर्वृतः १८
योत्स्यामः संहतास्तेन इति निश्चितमानसाः आजग्मुर्भूभुजः सर्वे समग्रबलवाहनाः १९ श्रुत्वैतद्भगवान्राम
त्वरितः मो विपक्षीयनृपोद्यमं कृष्णं चैकं गतं हर्तुं कन्यां कलहशंकितः २० बलेन महता सार्द्धं भ्रातृस्नेहपरिप्लुतः
कुंडिनं प्रागात्गजाश्वरथपत्तिभिः भीष्मकन्या वरारोहा कांक्षंत्यागमनं हरेः प्र त्यापत्तिमपश्यंती द्विजस्याचिं
त्वयन्नदा २२

नामालाविध्यतेयेषुतेः १५ कल्पितं निर्मितं यदन्यं निवेशनं तस्मिन् १६ १७ यदि श्रीकृष्णो हरेदिति शंकिताः कन्यां साधयितुमि
त्यर्थः १८ २१ सूर्योदयात्पूर्वमेवौत्सुक्येन रुक्मिण्य चिंतयदित्याह भीष्मकन्येति प्रत्यापत्तिं प्रत्यागमनं २२ श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰उ॰ त्रियामांतरित इति। अल्पराधसः मंदभाग्यायाः २३ जुगुप्सितं धार्म्यादि अपीति शंकायां नायाति हि कृतोद्यम इति अ
र्थः। उद्योग कृतोद्यमत्वात्तेन प्रस्थापितवान् प्रस्थानावसरे तु किंचिन्मयि जुगुप्सितं मत्वा प्रत्यावृत्तः अतः सोपि द्विजो नूनं नायातीति
२४ यद्वाननो निर्गतोपि श्रीकृष्णो मंदैवैवमुख्यात्कश्चित्प्रतिबंधो भवदित्याह दुर्भगायाइति २५ कालः तज्ज्ञानाधुनापि न गोविंदागमन
काल इति मन्वाना किंचिदाश्वस्तचित्ता सती चिंतास्तब्धलोचने निमीलितवतीत्यर्थः २६ । प्रियभाषिणः प्रियसूचकाः २७॥

अहो त्रियामांतरितउद्वाहो मेल्पराधसः नागच्छत्यरविंदाक्षो नाहं वेद्म्यत्र कारणं २३ सोपि नावर्त्ततेद्यापि मत्संदेशहरो द्वि
जः अपि मय्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सितं मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः २४ दुर्भगाया न मे धाता ना
नुकूलो महेश्वरः देवी वा विमुखी गौरी रुद्राणी गिरिजा सती २५ एवं चिंतयती बाला गोविंदहृतमानसा न्यमील
१२ यत कालज्ञा नेत्रे चाश्रुकलाकुले २६ एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप वाम ऊरुर्भुजो नेत्रमस्फुरन् प्रिय
भाषिणः २७ अथ कृष्णविनिर्दिष्टः स एव द्विजसत्तमः अंतःपुरचरीं देवीं राजपुत्रीं ददर्श ह २८ सा तं प्रहृष्टवद
नमव्यग्रात्मगतिं सती आलक्ष्य लक्षणाभिज्ञा समपृच्छच्छुचिस्मिता २९ तस्या आवेदयत्प्राप्तं शशंस यदुनंद
नं उक्तं च सत्यवचनं आत्मोपनयनं प्रति ३० श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम॥

पुरोपवनं प्राप्तेन श्रीकृष्णेन विनिर्दिष्टः प्राप्तं मां कथयेत्यादिष्टः नव्यग्रा आत्मनो देहस्य गतिर्यस्य तं दूतस्य लक्षणं तत्कार्यसूच राम
कमभिजानातीति तथा २९ तस्यै प्राप्तं यदुनंदनं आवेदितवान् तच्च शशंस आत्मोपनयनं प्रति आत्मानां स्वयं कृष्णस्यो १२
नयनं प्रति तेन द्विजेन सत्यवचनं प्रोक्तमिति आत्मनः प्राणेश्वरस्येति वा यद्वा आत्मनस्तस्या उपनयनं श्रीकृष्णेनय
दुक्तं सत्यवचनं तामानयिष्ये इत्यादि तच्च शशंस अवर्णयदित्यर्थः ३०

ब॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं श्रीकृष्णं अस्मिन् कार्ये सर्वस्वार्पणमपि अपर्याप्तमिति तदुचितं प्रियमपरं न पश्यंती नरकेवलं ननाम पश्चाद्धृदये वित्यर्थः यद्वामाश्रियं येन मंगि
तेनावत्सर्वे संपदामास्पदं भवति किंपुनर्मयि प्रणतायामिति तितो धिकमन्यत्प्रियं र्णपश्यंती ननाम ति ३१ ३३ महामति रित्यनेन श्रीकृष्णो वा ढे कन्या
मुद्वोढुमेवागतः स्यादिति वरोचितेन विधिना समपूजयदिति सूचितं यथायथावत् ३४ समेतानां राज्ञां भध्यवीर्यो घनतिक्रम्य तं तं समर्हितवानि

नमागतं सुमाज्ञाय वैदर्भी हृष्टमानसा नपश्यंती ब्राह्मणाय प्रियमन्यन्ननाम सा ३१ प्राप्तौ श्रुत्वा स्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ अभ्य
यात्तूर्यघोषेण रामकृष्णौ समर्हणैः ३२ मधुपर्कमुपानीय वासांसि विरजांसि सः उपायनान्यभीष्टानि विधिवत्समपूजयत् ३३
तयोर्निवेशनं श्रीमदुपकल्प्य महामतिः ससैन्ययोः सानुगयोरातिथ्यं विदधे यथा ३४ एवं राज्ञां समेतानां यथावीर्यं यथावयः
यथाबलं यथावित्तं सर्वैः कामैः समर्हयत् ३५ कृष्णमागतमाकर्ण्य विदर्भपुरवासिनः आगत्य नेत्रांजलिभिः पपुस्त
न्मुखपंकजं ३६ अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरा असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः ३७ किंचित्सु
चरितं यन्नस्तेन तुष्टस्त्रिलोककृत् अनुगृह्णातु गृह्णातु वैदर्भ्याः पाणिमच्युतः ३८ एवं प्रेमकलाबद्धा वदंति स्म पु
रौकसः कन्या चांतःपुरात्प्रागाद्भटैर्गुप्ताम्बिकालयं ३९

त्यर्थः ३५ श्रीकृष्णे भाविकर्मसूचकं जनानुरागं दर्शयति कृष्णमागतमिति त्रिभिः ३६ अस्यैव रुक्मिण्येव अर्हत्येव असावेव भैष्म्या
नर एव समुचित एवेति षडवधारणानि तत्रैकस्मिन् व्यतिरेकप्रदर्शनमुपलक्षणार्थं नापरेति नच वाक्यभेददोषः अनूद्य विधेयभेदेन
विभिन्नानामेव वाक्यानां सह प्रयोगात् ग्रहं संमार्ष्टि इत्यादिवदिति अयमेवानुग्रह इति निर्दिशति गृह्णात्विति ३८ ३९
रुक्मिण्यावधारणात्रयं रुक्मिणी अस्यैव भार्या भवितुमर्हति नान्यस्य १ रुक्मिण्येवास्य भार्या भवितुमर्हति नान्या २ रुक्मिणी अस्य भार्या भवितुमर्हत्येव
अनर्हति ३ श्रीकृष्णे अवधारणात्रयं असावेवचास्याः पतिः समुचितो नान्यः १ अस्या एवासौ पतिः समुचितो नान्यस्याः २ असावस्याः पतिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वादित्रा

भा०उ तस्यागमनविशिनष्टि द्वयेन पञ्चामिति ४० । अपि चमृदंगेत्यादि जघ्निरे आहतांइत्यर्थः वारमुख्या गणिकाः नम्रः ४२ ४३ उपस्पृश्य आचम्य ४४ चा
प्रवयसो वृद्धाः भवान्विताम् इति भवस्योपसर्जनत्वेस्त्रीकामास्तित्युक्तौ ४५ नमस्यइति अभिण्पातंदेवदेशीयमंत्रः स्वसंतानयुतांगणेशादिसहि

पञ्चाविनिर्ययौ द्रष्टुं भवान्याः पादपल्लवं साचानुध्यायती सम्यक् मुकुंदचरणांबुजं ४० यतवाङ्मातृभिः सार्द्धं सखीभिः परि
वारिता गुप्ताराजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ४१ मृदंगशंखपणवास्तूर्यभेर्यश्च जघ्निरे नानोपहारबलिभिर्वारमुख्याः
सहस्रशः ४२ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यः स्वलंकृताः गायत्यश्च स्तुवंतश्च गायका वाद्यवादकाः परिवार्य वधूं जग्मुः
सूतमागधवंदिनः ४३ आसाद्य देवसदनं धौतपादकरांबुजा उपस्पृश्य शुचिः शांता प्रविवेशांबिकांतिकं ४४ तां वै
१३ प्रवयसो बालां विधिज्ञा विप्रयोषितः भवानीं वंदयांचक्रुर्भवपत्नीं भवान्वितां ४५ नमस्ये त्वांबिके भीक्ष्णं स्वसंतानयु
तां शिवां भूयात्पतिर्मे भगवान् कृष्णस्तदनुमोदतां ४६ अद्भिर्गंधाक्षतैर्धूपैर्वासः स्रङ्माल्यभूषणैः नानोपहारब ४२
लिभिः प्रदीपावलिभिः पृथक् ४७ विप्रस्त्रियः पतिमतीस्तथा तैः समपूजयत् लवणापूपतांबूलकंठसूत्रफल
क्षुभिः ४८ तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ४९ मुनिव्रत
मथ त्यक्त्वा निश्चक्रामांबिकागृहात् प्रगृह्य पाणिना भृत्यां रत्नमुद्रोपशोभिना ५० श्रीराम श्रीराम श्रीरा

तां आत्मारामो सो कथं त्वत्पतिर्भवेदिति चेदत्त आह तदनुमोदतामिति भवती श्रीकृष्णप्रवचा ४६ स्रग्गंधादिभिरंबिकां संपूजयत् राम
४७ तथा विप्रस्त्रियोपि तैर्द्रव्यैर्लवणादिभिश्च समपूजयदिति ४८ शेषां निर्माल्यं ४९ मुनिव्रतं मौनं भृत्यां सखीं ५० ॥ १३

भूषणादिभिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तां विलोक्य वीरा मुमुहुरिति न्तीयश्लोकेनान्वयः श्यामां अजातरजस्कां कुंतके भ्यः शंकितेइव चंचलेई क्षणे यस्याः तां ५१ द्विजा एव कुंद
नां कुमलानि बिंबफलवत् यो ऽधरस्तस्य द्युतिभिः शोणायमानानि यस्यास्तां कलाः शोभाद्यत्र तेन नूपुरे सिंजयंत त्कोल नूपुरे वीत
स्य धाम दीप्तिः तेन शोभितुं शीलमस्यास्तेन पदा चलंती ५२ न कवलं मुमुहुः पेतुश्चेत्याह यात्रां मिषेण हरयेस्वलावण्यं समर्पयंती

तां देवमाया मिव वीरमोहिनीं सुमध्यमां कुंडलमंडिताननां श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशं
कितेक्षणां ५१ शुचिस्मितां बिंबफलाधरद्युतिशोणायमानद्विजकुंदकुंमलां पदा चलंती कलहंसगामिनीं
सिंजत्कलानूपुरधामशोभिना विलोक्य वीरा मुमुहुः समागताः यशस्विनस्तत्कृतहृच्छयार्दिताः ५२ यां वीक्ष्य
२ ते नृपतयस्तदुदारहासव्रीडावलोकहृतचेतस उज्झितास्त्राः पेतुः क्षितौ गजरथाश्वगता विमूढा यात्राच्छले
न हरयेऽर्पयतीं स्वशोभां ५३ सैवं शनैश्चलयती चलपद्मकोशौ प्राप्तिं तदा भगवतः प्रसमीक्षमाणा उत्सार्य
वामकरजैरलकानपांगैः प्राप्तान् ह्रियैक्षत नृपान् ददृशेऽच्युतं सा ५४ तां राजकन्यां रथमारुरुक्षतीं जहार
कृष्णो द्विषतां समीक्षतां रथं समारोप्य सुपर्णलक्षणं राजन्यचक्रं परिभूय माधवः ५५ ततो ययौ रामपुरो
गमः शनैः शृगालमध्यादिव भागहृद्धरिः ५६ तं मानिनः स्वाभिभवं यशः क्षयं परे जरासंधवशा न सेहिरे
अहो धिगस्मान् यशआत्तधन्विनां गोपैर्हृतं केसरिणां मृगैरिव ५७ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मि
णीहरणं त्रिपंचाशत्तमोऽध्यायः ५३

यां वीक्ष्य क्षितौ पेतुः ५३ सतान् प्राप्तान् ह्रिया ऐक्षत अनंतरं देवा अच्युतं ददर्श इति पूर्वेणान्वयः चलस्य पद्मकोशौ तु ल्यौ चालयंती ५४ सु चरणौ १
पर्णलक्षणं गरुडध्वजं ५५ हरिः सिंहः ५६ असहमानानां तेषामाक्रोशमाह अहो धिगस्मान् यत्तोस्माकं यशः गोपैर्हृतमिति ५७
दशमे त्रिपंचाशत्तमः

मा०७० चतुः पंचाशतमेतु जिलाराज्ञोरिपक्षगान् ने विभिंणचविक्रम्याथ भैष्म्याः पाणिंपुरुयहीत् १ इतित्यहो धिगस्मानित्येवंवदंतः सुसंरब्धाः क्रोधा
विष्टाः दंशिताः कृतसन्नाहाः परिक्रान्ताः परिवृत्ताः अन्वीयुः अन्वधावन् १ विस्फूर्ज्य टंकारयित्वा १ परेषां शराणां वाहुल्यं याद

श्रीशुक उवाच इतिसर्वेसुसंरब्धा वाहानारुह्य दंशिताः स्वैः स्वैर्बलैः परिक्रान्ता अन्वीयुर्धृतकार्मुकाः १ तानाप
तत आलोक्य यादवानीकयूथपाः तस्थुस्तत्संमुखाराजन् विस्फूर्ज्य स्वधनूंषि ते २ अश्वपृष्ठे गजस्कंधे रथो
पस्थे च कोविदाः मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा ३ पत्युर्बलं शरासारैः छन्नं वीक्ष्य सुमध्यमा ॥
सव्रीडमैक्षत्तद्वक्त्रं भयविह्वललोचना ४ प्रहस्य भगवानाह मास्मभैर्वामलोचने विनंक्ष्यत्यधुनैवैत
१४ त्तावकैः शात्रवं बलं ५ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः अमृष्यमाणा नाराचैर्जघ्नुर्हयगजान्
रथान् ६ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि सकुंडलकिरीटानि सोष्णीषाणि च कोटिशः ७
हस्ताः सासिगदेष्वासाः करभा ऊरवोंघ्रयः अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसि च ८ हन्यमानव
लानीका वृष्णिभिर्जयकांक्षिभिः राजानो विमुखा जग्मुर्जरासंधपुरःसराः ९ शिशुपालं समभ्येत्य हृतदा
रमिवातुरं नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन् १० भो भो पुरुषशार्दूल दौर्मनस्यमिदं त्यज न प्रि
याप्रिययो राजन् निष्ठा देहिषु दृश्यते ११

वानां मत्वा त्वं दृष्टांतः मेघा इति ३ ऐक्षत् ऐक्षत ४ मास्मभैः माभयं कुरु हे वामलोचने वरा शात्रवं तावकैः १ त्वदीयैः कृत्वा १४.
सचांसो विक्रमश्रवं ६ उष्णीषाणि शिरोवेष्टनवस्त्राणि तत्सहितानि शिरांसि ७ करभाः प्रकोष्ठाः ऊरवः विशेषणं
वा ८ ९ अप्राप्तदारं भवतं हृतदारमिवातुरं १० निष्ठा स्थैर्यं ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुहकोनर्त्तयितातस्येच्छयादुःखेपीह मानेत्वनपारवश्यंव्यक्तंदर्शितं १२ तत्राचाहमेवदृष्टांतइत्याह जरासंधः शौरेरितिकृष्णात्सकाशात् एकं
संयुगंपरंकेवलंअजितमंचाजिंग्येजितवानहं १३ दैवमदृष्टंतद्युक्तेन ४ फल्गुतंत्रैः स्वल्पसैन्यैः १५ प्रदक्षिणंअनुकूलंस्यात् १६ २१ गोपाल

यथादारुमयीयोषिन्नृत्यतेकुहकेच्छया एवमीश्वरतंत्रोयमीहतेसुखदुःखयोः ११ शौरेः सप्तदशाहंवैसंयुगानिपराजितः
१४ त्रयोविंशतिभिःसैन्यैर्जिग्ये एकमहंपरं १३ तथाप्यहंनशोचामिनप्रहृष्यामिकर्हिचित् कालेनदैवयुक्तेनजाननृवि ७२
द्रावितंजगत् १४ अधुनापिवयंसर्वेवीरयूथपयूथपाः पराजिताः फल्गुतंत्रैर्यदुभिः कृष्णपालितैः १५ रिपवोजि
ग्युरधुनाकालआत्मानुसारिणि तदावयंविजेष्यामोयदादैवंप्रदक्षिणं १६ एवंप्रबोधितोमित्रैश्चैद्योगात्सा
नुगःपुरं हतशेषाःपुनस्तेपिययुःस्वंस्वंपुरंनृपाः १७ रुक्मीतुराक्षसोद्वाहंकृष्णद्विडसहन्स्वसुः ॥ पृष्ठ
तोन्वगमत्कृष्णमक्षौहिण्यावृतोबली १८ रुक्म्यमर्षीसुसंरब्धः शृण्वतांसर्वभूभुजां प्रतिजज्ञेमहाबाहुर्दंशितः
सशरासनः १९ अहत्वासमरेकृष्णमप्रत्यूह्यचरुक्मिणीं कुंडिनंनप्रवेक्ष्यामिसत्यमेतद्ब्रवीमिवः २० ॥ इ
त्युक्त्वारथमारुह्यसारथिंप्राहसत्वरः चोदयाश्वान्यतःकृष्णस्तस्यमेसंयुगंभवेत् २१ अद्याहंनिशितैर्बाणैर्गोपा
लस्यसुदुर्मतेः नेष्येवीर्यमदंयेनस्वसामेप्रसभंहृता २२ विकत्थमानः कुमतिरीश्वरस्याप्रमाणवित् रथेनैकेन
गोविंदंतिष्ठतिष्ठेत्यथाह्वयत् २३

स्य वेदपालकस्येतिवास्तवोर्थः तथासुदुर्मतेरिति शोभनाअनुग्रहवतीदुष्टेष्वपिमतिर्यस्यतस्येति २२ २३ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लङ्का

१०३० यदूनांकुलपांसनकुलदूषणावस्तानस्तायदूनांकुलस्यपते हेअंसन स्वयंचरिपुहननचतुरा अंससमाधोनइत्यस्माड्डातोः कर्त्तरिर्लुडद्प्रत्य
योनंघादिविहितः २४ ध्वांक्षः काकः सयथाहविर्मुष्णातिनद्वत् वस्तानस्तान्त्रध्वांक्षवदितिच्छेदः सहस्राक्षविदित्यर्थः हेमंद स्थिरे

धनुर्विक्षिप्यसुहृदंजघ्नेकस्मैत्रिभिःशरैः आहचात्रक्षणंतिष्ठयदूनांकुलपांसन २४ कुत्रयासिस्वसारंमेमुषित्वाध्वां
क्षवद्धविः हरिष्यत्यमंदमंदमायिनः कूटयोधिनः २५ यावन्नमेहन्ताबाणैःशयीथामुंचदारिकां स्मयन्नुक्तेन्मोध
नुः छित्वाषड्भिर्व्याधरक्मिणं २६ अष्टभिश्चतुरोवाहानुद्वाभ्यांसूतंध्वजंत्रिभिः सचान्यद्धनुरादायक्तष्णंवि
व्याधपंचभिः २७ तैस्ताडितःशरौघैस्तुचिच्छेदधनुरच्युतः पुनरन्यदुपादत्ततदप्यच्छिनदव्ययः २८ परिघं
१८ पट्टिशंशूलंचर्मासीशक्तितोमरौ यद्यदायुधमादत्तात्तत्सर्वंसच्छिनद्धरिः २९ ततोरथादवप्लुत्यखड्गपाणि
र्जिघांसया कृष्णमभ्यद्रवत्क्रुद्धःपतंगइवपावकं ३० तस्यचापततःखड्गंतिलशश्चर्मचेषुभिः छित्वासिमा
ददेतिग्मंरुक्मिणंहंतुमुद्यतः ३१ दृष्ट्वाभ्रातृवधोपायंरुक्मिणीभयविह्वला पतित्वापादयोर्भर्त्तुरुवाचकरु धोगं
णंसती ३२ योगेश्वराप्रमेयात्मन्देवदेवजगत्पते हंतुंनार्हसिकल्याणभ्रातरंमेमहाभुज ३३ श्रीशुकउवा०
तयापरित्रासविकंपितांगयाशुचावशुष्यन्मुखरुद्धकंठया कातर्यविस्रंसितहेममालयागृहीतपादःकरुणो
न्यवर्त्तत ३४

त्यर्थः ३५ . २६ २७ २८ ३० ३३ परित्रासेनविकंविपितान्यंगानियस्यास्तया शुचाशोकेनशुष्यन्मुखंयं राम
स्याः रुद्धः कंठयस्याः सा साचसाच कातर्येणवैक्लव्येणविस्रंसिताहेममयीमालायस्यास्तयागृहीतौपादौयस्यसः ३४ १८

अव २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सश्मश्रुकेशसहितानि स्थाने स्थाने अवशिष्टानि श्मश्रूणि केशाश्च यथा भवंति तथा तेनैवासिना प्रवपन् मुंडयन् व्यरूपयत् विरूपमकरोत् ३५ त
थाभूतं हतप्रायमित्युत्तरवाक्यमनुषंगः ३६ रुक्मिणी सांत्वयति मेवास्मानिति ३८ ३९ पुनः कृष्णमाक्षिपति बंधुरिति ४० पुनर्देवी प्र
त्याह क्षत्रियाणामिति येन धर्मेण भ्रातापि भ्रातरं हन्यात् ततस्तस्मात् घोरतरः अतिदारुणः धर्मश्च अतश्च को स्माकमपराध इति भावः ४१
पुनः श्रीकृष्णं प्रत्याह राज्यस्येति तथाप्यस्माकमेतदनुचितमिति भावः ४२ पुनर्देवी प्रत्याह तवेयमिति सर्वभूतेषु दुर्हृदामहितानां भ्रा

चैलेन बध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन् व्यरूपयत् तावन्ममर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः ३५
कृष्णांतिकमुपव्रज्य ददृशुस्तत्र रुक्मिणं तथाभूतं हतप्रायं दृष्ट्वा संकर्षणो विभुः विमुच्य बद्धं करुणो भगवान् कृष्णम
ब्रवीत् ३६ असाधिदं त्वया कृष्ण कृतमस्मज्जुगुप्सितं वपनं श्मश्रुकेशानां वैरूप्यं सुहृदो वधः ३७ मैवास्मान् साध
स्व्यसूयय भ्रातुर्वैरूप्यचिंतया सुखदुःखदो न चान्योस्ति यतः स्वकृतभुक् पुमान् ३८ बंधुर्वधार्हदोषोपि न बंधो
र्वधमर्हति त्याज्यः स्वेनैव दोषेण हतः किं हन्यते पुनः ३९ क्षत्रियाणामयं धर्मः प्रजापतिविनिर्मितः भ्रातापि भ्रा
तरं हन्याद्येन घोरतरस्ततः ४० राज्यस्य भूमेर्वित्तस्य स्त्रियो मानस्य तेजसः मानिनोन्यस्य वा हेतोः श्रीमदांधाः क्षि
पंति हि ४१ तवेयं विषमा बुद्धिः सर्वभूतेषु दुर्हृदां यन्मन्यसे सदाभद्रं सुहृदां भद्रमज्ञवत् ४२ श्रीकृष्ण श्रीराम

रुणौ अज्ञवत् भद्रं मन्यसे इच्छसि दुर्यत्नेन विषमा असमीचीना बुद्धिः कुतः यतस्त्वं देव सुहृदामभद्रमिति यद्वा सर्वभूतेषु दुर्हृदा
सु२ मपि स्वहृदां भद्रमेव दं दं ड रूपं मुंडनमभद्रं यन्मन्यसे तत्त्वेयं विषमा बुद्धिरिति अथवा सर्वभूतेषु मध्ये दुर्हृदां शिशुपालादीनां अ
भद्रं सुहृदां भद्रं च यन्मन्यसे तत्त्वेयं विषमा बुद्धिः समान भवति अज्ञवत् अज्ञानामिव ४३

आह।

कुतइयत्तं आत्ममोहइति ४४ परमार्थमाह एकएवेति परः शुद्धः ज्योतिश्चन्द्रादिर्यथोदकेषु नभो यथा घटादिष्विति ४५ कुतस्तर्हि नानात्वं
द्रष्टृविलक्षणात्मानो एकः शुद्धः प्रतीमः तत्राह देहइति द्रव्यमधिभूतं प्राणाः इंद्रियाणि अध्यात्मं गुणशब्देनाधिदैवं तत्त्रितयात्मकः देहो
पाधिना शुद्धो न प्रतीयत इत्यर्थः ४६ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत्राह नात्मनइति हे सति अन्येन अधिभूता
दिना आत्मनः संयोगवियोगौ न स्तः कुतः असतः असत्वादन्यस्येत्यर्थः कुतोऽसत्वं तत्राह तद्धेतुत्वादिति तस्यान्यस्य भूतेंद्रियादेः

आत्ममोहो नृणामेष कल्प्यते देवमायया सुहृद्दुर्हृदुदासीनइति देहात्ममानिनां ४४ एकएव परो ह्यात्मा सर्वेषामपि देहिनां
नानेव गृह्यते मूढैर्यथा ज्योतिर्यथा नभः ४५ देह आद्यंतवानेष द्रव्यप्राणगुणात्मकः आत्मन्यविद्यया क्लृप्तः संसार
१६ यति देहिनं ४६ नात्मनोऽन्येन संयोगो वियोगो वाऽसतः सति तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ४७ श्रीराम

प्रकाशस्य तद्धेतुत्वात् आत्महेतुकत्वात् ननु देवैरधिष्ठितेभ्य इंद्रियेभ्यो भूतानां प्रतीतिः प्रसिद्धा भूतप्रतीत्या च तत्प्रसिद्धिर्नात्म
नइत्यत आह दृग्रूपाभ्यां यथा रवेः यथा प्रकाशकत्वेन वर्तमानयोरपि चक्षूरूपयोः रवेः सकाशात्प्रसिद्धिः द्वयोरपि तेजस राम
त्वात् नेह भेदश्च तथा भूतेंद्रियादीनां परस्परसिद्धानामपि चैतन्याधीन एव प्रकाशः तत्कार्यत्वाच्च तद्व्यतिरेकेण सत्त्वं चेत्यर्थः ॥ १६
तथा च द्वादशे वक्ष्यति दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् एवं धीः खानि मात्राश्च स्फुरंत्यन्यतमादृतादिति यद्वा रवेः
प्रसिद्धाभ्यामेव दृग्रूपाभ्यां परस्परसिद्धिर्यथा न तद्वदिति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहसंबंधाभावादेवनात्मनोजन्मादयोपीतिवक्तुं जन्मादीनांदेहधर्मत्वमाह जन्मादयस्त्विति ननुकथंतर्हि जातोहं बालोहं वृद्धोहमि
त्यात्मनिजन्मादिप्रतीतिः देहजन्मादिनैवेतिसदृष्टांतमाह कलानामिवेति इंदोः कलानामेवजन्मादयोनेंदोर्यथातद्वत् यथाचकला
नाशादेवकुहूरमावास्याइंदुक्षयइत्युच्यते नतुहृदस्यात्मनोदेहनाशादेवमृतिव्यवहार इत्यर्थः ४८ नन्वात्मनोदेहादिसंबंधाभावे कथं
भोक्तृभोग्यभोगप्रतीतिरित्याशंक्यस्वप्नदृष्टांतेनसमर्थयति यथाशयानइति आत्मानंभोक्तारं विषयान्भोग्यान् फलंभोगं च

जन्मादयस्तुदेहस्यविक्रियानात्मनः क्वचित् कलानामिवनैवेंदोर्मृतिर्ह्यस्यकुहूरिव ४८ यथाशयानआत्मा
नंविषयान्फलमेवच अनुभुंक्तेप्यसत्यर्थेतथाप्नोत्यबुधोभवं ४९ तस्मादज्ञानजंशोकमात्मशोषविमोहनं
तत्वज्ञानेननिर्हृत्यस्वस्थाभवशुचिस्मिते ५० श्रीशुकउवाच एवंभगवतातन्वीरामेणप्रतिबोधिता वैमनस्यंप
रित्यज्यमनोबुद्ध्यासमादधे ५१ प्राणावशेषउत्सृष्टोद्विड्भिर्हतबलप्रभः स्मरन्विरूपकरणंवितथात्ममनो
रथः चक्रेभोजकटंनामनिवासायमहत्पुरं ५२ अहत्वादुर्मतिंकृष्णमप्रत्यूह्ययवीयसीं कुंडिनंनप्रवेक्ष्यामी
त्युक्त्वातत्रावसद्रुषा ५३ भगवान्भीष्मकसुतामेवंनिर्जित्यभूमिपान् पुरमानीयविधिवदुपयेमेकुरूद्वह ५४
तदामहोत्सवोनृणांयदुपुर्यांगृहेगृहे अभूदनन्यभावानांकृष्णेयदुपतौनृप ५५ नरानार्यश्चमुदिताः प्रमृष्ट
मणिकुंडलाः पारिबर्हमुपाजह्रुः वरयोश्चित्रवाससोः ५६ श्रीराम श्रीराम श्रीराम श्रीराम॥

नु१ असत्यप्यर्थेअनुभुंक्ते तथाबुधः संसारंप्राप्नोतीति ४९ आत्मानंशोषयतिविमोहयतिचेतितथातं निर्हृत्यअपाकृत्य ५० समादधेसमा
हितमकरोत् ५१ रुक्मिणस्त्ववृत्तवंतोनाज्ञानंनिवृत्तमितिदर्शयन्नाह प्राणावशेषइति २ अहत्वाअज्ञात्वाअदुर्मतिमितिचसत्यार्थः
अप्रत्यूह्यअनीयत्वे अप्रतिबुध्यैतिनुसत्यं यवीयसींस्वसारं यत्रविरूपितस्तत्रैवावसत् यत्रचभोजकटंनामपुरमभवत् ५३ ५४ व
रयोर्वरवध्वोर्देयमुपस्कारं ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना० ७० उन्नंभितैरिंद्रकेतुभिर्ध्वजविशेषैः उपक्लृप्तानि मंगलानि लाजांकुरपुष्पप्रकारादीनि तैः २ आहूता आहृताः प्रेष्ठा भूभुजस्तेषां गेहेः पराम्
श्रितु श्रितांरभाश्रितैरूपशोभितां यद्गोतैरेव गेहेः परामृष्टासंस्पृष्टांरभा अपूगा अश्रितैरूपशोभितां ५८ सुप्रमोदोत्सुक्यात्परिधावतां बंधू
नाम ध्येमिथः समेत्य मुदं प्रापुः ५९ ६१ इति दशमे चतुःपंचाशत्तमोध्यायः पंचपंचाशत्तमे तु प्रद्युम्नो जनिष्ठः हृतः शंबरेण हतः
सोथ हत्वा तं कांतया गमत् १ प्रद्युम्न हानिलाभाद्यैः शंबराहरणादिना कुटुंबिनामपत्यादि सुखं मत्स सूचत् जांबवत्यादि विवा दुःख १

मार्गैः भिपुष्पैंस्तंभितैरिंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः बभौ प्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभागुरुधूपदीपकैः
५७ सिक्तमार्गा मदच्युद्भिराहूतप्रेष्ठभूभुजां गजैर्द्वाःसु परामृष्टरंभापूगोपशोभिता ५८ कुरुसृंजयकैकेयविद
र्भयदुकुंतयः मिथो मुमुदिरे तस्मिन्संभ्रमात्परिधावतां ५९ रुक्मिण्याहरणं श्रुत्वा गीयमानं ततस्ततः राजा
१७ नो राजकन्याश्च बभूवुर्भृशविस्मिताः ६० द्वारकायामभूद्राजन्महामोदः पुरौकसां रुक्मिण्या रमयोपेतं
दृष्ट्वा कृष्णं श्रियः पतिं ६१ इति श्रीभागवते महापुराणे दशमस्कंधे रुक्मिण्युद्वाहोत्सवश्चतुःपंचाशत्तमो
ध्यायः श्रीशुक उवाच कामस्तु वासुदेवांशो दग्धः प्राग्रुद्रमन्युना देहोपपत्तये भूयस्तमेव प्रत्यप
द्यत १ स एव जातो वैदर्भ्यां कृष्णवीर्यसमुद्भवः प्रद्युम्न इति विख्यातः सर्वतोनवमः पितुः २ श्रीराम

हात् प्रागेव प्रद्युम्नजन्म ततो विवाहः ततः शंबरात्प्रद्युम्नप्रत्यागमनं अतः पुत्रकथनाप्रस्तावेपि प्रथमं प्रद्युम्नस्य जातमा १७
त्रस्य शंबरेण हरणं निरूप्यते प्रत्यागमनं तूत्तरकालीनमपि कथापर्यवसानायात्रोक्तमिति वासुदेवाधिष्ठितचित्तप्रभव
त्वाद्वासुदेवांशः सृष्टिहेतुत्वाच्च देहोपपत्तये देहप्राप्तये १ अनवमः अन्यूनः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्प्रसिद्धः कामशत्रुः शंबरस्तमात्मनः शत्रुं विदित्वा हृत्वा समुद्रे प्रास्य प्रक्षिप्य गृहमागमदिति १ ३ निर्जगार गिलितवान् ४ स्वधि
तिना शस्त्रिकया अवघन् अवायन् खंडितवंतः ५ तत्त्वं कामोयं तवन्नीति उत्पत्तिं श्रीकृष्णाद्रुक्मिण्यां उत्पन्न इति ६ यशस्विनीप

तं शंबरः कामरूपी हृत्वा तोकमनिर्दशं सविदित्वात्मनः शत्रुं प्रास्योदन्वत्यगाद्गृहं ३ तं निर्जगार बलवान्मीनः सोप्य
परैः सह वृतो जालेन महता गृहीतो मत्स्यजीविभिः ४ तं शंबराय कैवर्ता उपाजह्रुरुपायनं सूदा महानसं नी
त्वाऽवद्यन् स्वधितिनाद्भुतं ५ दृष्ट्वा तदुदरे बालं मायावत्यै न्यवेदयन् नारदोऽकथयत्सर्वं तस्याः शंकितचेतसः॥
बालस्य तत्त्वमुत्पत्तिं मत्स्योदरनिवेशनं ६ सा च कामस्य वै पत्नी रतिर्नाम यशस्विनी पत्युर्निर्दग्धदेहस्य देहोत्प
त्तिं प्रतीक्षती ७ निरूपिता शंबरेण सा सूपोदनसाधने कामदेवं शिशुं बुध्वा चक्रे स्नेहं तदाऽर्भके ८ नातिदीर्घेण
कालेन स कार्ष्णी रूढयौवनः जनयामास नारीणां वीक्षंतीनां च विभ्रमं ९ सा तं पतिं पद्मदलायतेक्षणं प्रलंब
बाहुं नरलोकसुंदरं सव्रीडहासोत्तभितभ्रुवेक्षती प्रीत्योपतस्थे रतिरंग सौरतैः १० तामाह भगवान् कार्ष्णिर्मातस्ते
मतिरन्यथा मातृभावमतिक्रम्य वर्तसे कामिनी यथा ११ रतिरुवाच भवान्नारायणसुतः शंबरेण हृतो गृहात्॥
अहं तेऽधिकृता पत्नी रतिः कामो भवान्प्रभो १२ एष त्वां निर्दशं सिंधावक्षिपन् शंबरोऽसुरः मत्स्योऽग्रसीत्तदुदरात्प्रा दरादि २
प्तो भवान्प्रभो १३ तमिमं जहि दुर्धर्षं दुर्जयं शत्रुमात्मनः मायाशतविदं त्वं च मायाभिर्मोहनादिभिः १४॥

तिव्रता भर्तुर्देहप्राप्तिं प्रतीक्षमाणा ७ तं शिशुं कामदेवं बुध्वा ८ विभ्रमं संमोहं ९ अंग हे राजन् सौरतैर्भावैः रूपतस्थे अभजत् १० ११
अधिकृता पत्नी स्वत्वे हेतुः रतिरहं भवान् काम इति १२ १३ दुर्जयत्वे हेतुः मायाशतविदमिति कथं तर्हि हंतव्य स्तत्राह मायाभिरिति १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०७० नचात्रविलंबः कार्यइत्याह परिशोचन्निरोदितीत्यर्थः १५ १८ वज्रस्यनिष्पेषनिर्घोतेयथानिष्ठुरस्तीव्रोनादोभवति तथाभूतंनादंव्यनदयत्॥
सामान्यविशेषतयाव्याप्यव्यापकत्वंपचतीतिवत् अतिनिष्ठुरंनादमकरोदित्यर्थः १९॥ २० वैहायसः आकाशस्थिताः २१ सत्वात्मि

परिशोचन्तिंतमानाकुररीवगतप्रजा पुत्रस्नेहाकुलादीनाविवस्त्रागोरिवातुरा १६ एवंभाष्यवंदेवोविद्यांप्रद्युम्नायमहात्म
ने मायावतीमहामायीसर्वमायाविनाशिनी १६ सचशंबरमभ्येत्यसंयुगायसमाह्वयत् अविषह्यैस्तमाक्षेपैः क्षिप
न्संजनयन्कलिं १७ सोधिक्षिप्तोदुर्वचोभिः पदाहतइवोरगः निश्चक्रामगदापाणिरमर्षोत्ताम्रलोचनः १८॥
गदामाविध्यतरसाप्रद्युम्नायमहात्मने प्रक्षिप्यव्यनदन्नादंवज्रनिष्पेषनिष्ठुरं १९ तामापतन्तींभगवान्प्रद्युम्नो
१८ गदयागदां अपास्यशत्रवेक्रुद्धः प्राहिणोत्स्वगदांनृप २० सचमायांसमाश्रित्यदैतेयींमयदर्शितां मुमुचेस्त्रमयंवर्षं
कार्ष्णौवैहायसासुरः २१ वाध्यमानोस्त्रवर्षेणरौक्मिणेयोमहारथः सत्वात्मिकांमहाविद्यांसर्वमायोपमर्दिनीं २२
ततोगौह्यकगांधर्वपैशाचोरगराक्षसीः प्रायुंक्तशतशोदैत्यः कार्ष्णिर्व्यधमयत्सताः २३ निशातमसिमुद्य
म्यसकिरीटंसकुंडलं शंबरस्यशिरः कायात्ताम्रश्मश्र्वोजसाहरत् २४ आकीर्यमाणोदिविजैः स्तोचद्भिः
कुसुमोत्करैः भार्ययांवरचारिण्यापुरंनीतोविहायसा २५ अंतः पुरवरंराजन्ललनाशतसंकुलं विवे
२१ शपत्न्यागगनाद्विद्युत्तेवबलाहकः २६ तंदृष्ट्वाजलदश्यामंपीतकौशेयवाससं प्रलंबबाहुंताम्राक्षंसुस्मि
तंरुचिराननं २७ १८

कांसत्वगुणमयीं प्रायुंक्तेत्युत्तरस्यानुषंगः २२ ताः मायाः व्यधमयत् २३ ताम्राणिश्मश्रूणियस्मिन्तत् ओजसाबलेन २४ २५
विद्युतासहबलाहकोमेघइव २६ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलाश्चवक्राश्चये ऽलकास्तएवालयः तैर्हीनाः लज्जिताः २८ अहं किं स्मानभवतीत्यवधार्य सस्मार त्वं स्वीयपुरत्वं अश्लाघतिस्तत्सहितं २९।३०

स्वलंकृतमुखांभोजं नीलवक्रालकालिभिः । हृष्टं मत्वा स्त्रियो हीता निलिल्युस्तत्र तत्र ह २८ अवधार्य शनैरीष
द्वैलक्षण्येन योषितः । उपाजग्मुः प्रमुदिताः सस्मार त्वं सुविस्मिता । २९ अथ तत्रासितापांगी वैदर्भी वल्गुभाषिणी
अस्मरत्स्वसुतं नष्टं स्नेहस्नुतपयोधरा ३० कोन्वयं नरवैडूर्यः कस्य वा कमलेक्षणः धृतः कया वा जठरे कया लब्धोत्व ११२
नेन च ३१ मम चाप्यात्मजो नष्टो नीतो यः सूतिकागृहात् एतत्तुल्यवयोरूपो यदि जीवति कुत्रचित् ३२ क
थं त्वनेन संप्राप्तं सारूप्यं शार्ङ्गधन्वनः । आकृत्यावयवैर्गत्या स्वरहासावलोकनैः । ३३ स एव वा भवेन्नूनं
यो मे गर्भे धृतो ऽर्भकः । अमुष्मिन् प्रीतिरधिका वामः स्फुरति मे भुजः । ३४ एवं मीमांसमानायां वैदर्भ्यां देवकीसु
तः । देवक्यानकदुंदुभ्यामुत्तमश्लोक आगमत् ३५ विज्ञातार्थोपि भगवान् तूष्णीमास जनार्दनः । नारदोकथ
यत्सर्वं शंबराहरणादिकं ३६ तच्छ्रुत्वा महदाश्चर्यं कृष्णांतःपुरयोषितः । अभ्यनंदन्बहून्नष्टान्नष्टं मृतमिवागतं
३७ देवकी वसुदेवश्च कृष्णरामौ तथा स्त्रियः । दंपती तौ परिष्वज्य रुक्मिणी च ययुर्मुदं ३८ नष्टं प्रद्युम्नमायां
तमाकर्ण्य द्वारकौकसः अहो मृतमिवायातो बालो दिष्ट्येति हाब्रुवन् ३९

सुतं स्मरंत्याह कोन्वयमिति नरवैडूर्यः पुरुषश्रेष्ठः ३१ एतत्तुल्यं वयोरूपं यस्य सः भवेदिति ३३ तस्य स्वपुत्रत्वं संभावयंति स एवेति ३४ दे
वक्यानकदुंदुभिभ्यामित्यर्थः । ३५ ३९

नै

देवक्यानकदुंदुभिभ्या

संभावयंत्याह कथं त्विति तद्वेगाधिके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०३० अतिसौंदर्येण प्रद्युम्नमनुवर्णयति यमिति पिता श्रीकृष्णस्तत्स्वरूपो निज आत्मीय ईशः भर्त्तेति भावो भावनाया सां तासां तन्मातरः १ कृष्णपत्न्योपि
रहसि निरूढभावाः सत्यायमभजन्निति यदा न खलु चित्रं कथं सति स्मरे स्मर्यमाणे त्वनेव क्षोभके कामे अक्षिविषये सति किंच रमास्पदस्य श्री
कृष्णस्तस्य बिंबं मूर्तिस्तस्य बिंबे प्रतिबिंबे पुत्रे तदा किमु वक्तव्यं अन्यनार्यो भेजुरिति ४० इति दशमे पंचपंचाशत्तमः १ षट्पंचाशत्तमे मिथ्या
भियोगमणिमाहरत् कन्यां जांबवतः प्राप कृष्णः सत्राजितस्ततः पुत्रादिकामे सोरम्यस्य निष्ठामुक्त्वा तिर्वंचत्लो अर्थस्यानर्थतामा

यं वै मुहुः पितृसरूपनिजेशभावास्तन्मातरो यदभजन्रहरूढभावाः चित्रं न तत्खलु रमास्पदबिंबबिंबे कामे स्म
रेक्षविषये किमुतान्यनार्यः ४० इति श्रीभागवते महापुराणे दशमस्कंधे प्रद्युम्नागमने पंचपंचाशत्तमोऽध्यायः ॥८७
श्रीशुक उवाच सत्राजितः स्वतनयां कृष्णाय कृतकिल्बिषः स्यमंतकेन मणिना स्वयमुद्यम्य दत्तवान् १ राजोवा
२९ च सत्राजितः किमकरोद्ब्रह्मन्कृष्णस्य किल्बिषं स्यमंतकः कुतस्तस्य कस्माद्दत्ता सुता हरेः २ श्रीशुक उवाच ॥
आसीत्सत्राजितः सूर्यो भक्तस्य परमः सखा प्रीतस्तस्मै मणिं प्रादात्सूर्यस्तुष्टः स्यमंतकं ३ स तं बिभ्रन्म श्री १
णिं कंठे भ्राजमानो यथा रविः प्रविष्टो द्वारकां राजंस्तेजसा नोपलक्षितः ४ श्रीराम श्रीराम श्रीराम

हस्यमंताहरणादिना सत्यभामाजांबवत्योर्विवाहप्रस्तावाय स्यमंतकाख्यानमाह सत्राजित इत्याकारांतः क्वचिच्च तकारांतो राम
प्यन्वयानुसारेण द्रष्टव्यः कृतापराधस्तच्छांतये स्वयमेवोद्यमं कृत्वा मणिना सह प्रादादिति १ २ भक्तस्य सत्राजितः सूर्यः ॥ २९
स्वाम्यपि सखैवासीदित्यर्थः सच तुष्टोऽस्मै स्यमंतकं नाम मणिं प्रादात् प्रीतः स्निग्धः ३ नोपलक्षितः सत्राजितोऽसाविति
विज्ञातः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीव्यते क्रीडते सूर्योयमिति शंकिताः संतः कथयामासुरिति ५ सूर्यं नमस्कारायागतं कल्पयित्वा त्रिभिः भक्तानां संबोधनानि नारायणेत्या
दि नि ६ गभस्तिचक्रेण रश्मिजालेन मुष्णन् प्रतिगृह्णन् तिग्मा तीक्ष्णा गावो रश्मयो यस्य ७ नन्वहमघटमानमित्याहुः नन्वन्विच्छन्ति मृगयन्ते अजः
सूर्यः ७ बालानामज्ञानां वचनं ज्वलन् विद्योतमानः ९ कृतानि कौतुकानि उत्सवेन मंगलानि यस्मिन् तत् विप्रैः कृत्वा १० भारप्र

तं विलोक्य जना दूरात्तेजसा मुष्टदृष्टयः दीव्यतेक्षैर्भगवते शशंसुः सूर्यशंकिताः ५ नारायण नमस्तेस्तु शंखचक्रगदाध
र दामोदरारविंदाक्ष गोविंद यदुनंदन ६ एष आयाति सविता त्वां दिदृक्षुर्जगत्पते मुष्णन् गभस्तिचक्रेण नृणां च
क्षूंषि तिग्मगुः ७ नन्वन्विच्छंति ते मार्गं त्रिलोक्यां विबुधर्षभाः ज्ञात्वाद्य गूढं यदुषु द्रष्टुं त्वां यात्यजः प्रभो ८ श्रीशुक०
निशम्य बालवचनं प्रहस्यांबुजलोचनः प्राह नासौ रविर्देवः सत्राजिन्मणिना ज्वलन् ९ सत्राजित्स्वगृहं श्री
मत्कृतकौतुकमंगलं प्रविश्य देवसदने मणिं विप्रैर्न्यवेशयत् १० दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो दुर्भिक्षमा
र्यरिष्टानि सर्पाधिव्याधयोऽशुभाः न संति मायिनस्तत्र यत्रास्तेभ्यर्चितो मणिः ११ स याचितो मणिं क्वापि यदुरा
जाय शौरिणा नैवार्थकामुकः प्रादाद्याच्ञाभंगमतर्कयत् १२ तमेकदा मणिं कंठे प्रतिमुच्य महाप्रभं प्रसेनो हयमा
रुह्य मृगयां व्यचरद्वने १३

माणं च चतुर्भिर्व्रीहिभिर्गुंजा गुंजानां पंच पणः पणान् अष्टौ धरणमष्टौ च कर्षस्ते चतुरः पलं तुला पलशतं प्राहुर्भारः स्याद्विंशतिस्तुलाः
मारी नाम अकालमृत्युः अरिष्टमभद्रं अशुभा दुःखहेतवः ११ क्वापि कदाचित् अनेन भगवत्यसमर्प्य स्वयमेव भोजिना सर्वारिष्ट
निवर्तकोऽपि अनिष्टहेतुरेव भवतीति सूचितं १२ तदेव दर्शयितुमाह तमेकदेति प्रमुच्य बद्ध्वा प्रसेनः सत्राजिद्भ्राता १३ ॥ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राघानै

भा०त्र० आच्छिद्यास्य गृहीला १४ ५ अजपन्नुपांशुवाचन् १६ २२ क्रव्यार्थे आमिषार्थे २३ अष्टविंशाहं अष्टचविंशतिश्च अहानि दिनानि यस्मिंस्त
दष्टविंशत्यहं विंशति शब्दस्य तिलोप आर्षः वज्रस्य निष्पेषो निर्घातस्तद्वत्परुषे निष्ठुरे २४ श्रीकृष्णमुष्टीनां विनिः पातैः विनिष्पि

प्रसेनं सहयं हत्वा मणिमाच्छिद्य केसरी गिरिं विशन् जांबवता निहतो मणिमिच्छता ४ सोपि चक्रे कुमारस्य मणिं क्रीड
नकं बिले अपश्यन् भ्रातरं भ्राता सत्राजित्पर्यतप्यत १५ प्रायः कृष्णेन निहतो मणिग्रीवो वनं गतः भ्राता ममेति
तच्छ्रुत्वा कर्णे कर्णे जपन् जनाः १६ भगवांस्तदुपश्रुत्य दुर्यशो लिप्तमात्मनि मार्ष्टुं प्रसेनपदवीमन्वपद्यत नाग
रैः १७ हतं प्रसेनमश्वं च वीक्ष्य केसरिणा वने तं चाद्रिपृष्ठे निहतमृक्षेण ददृशुर्जनाः १८ ऋक्षराजबिलं भी
ममंधेन तमसावृतं एको विवेश भगवानवस्थाप्य बहिः प्रजाः १९ तत्र दृष्ट्वा मणिं श्रेष्ठं बालक्रीडनकं कृ
तं हर्तुं कृतमतिस्तस्मिन्नवतस्थेर्भकांतिके २० तमपूर्वं नरं दृष्ट्वा धात्री चुक्रोश भीतवत् तच्छ्रुत्वाभ्यद्रवत्क्रु
द्धो जांबवान्बलिनां वरः २१ स वै भगवता तेन युयुधे स्वामिनात्मनः पुरुषं प्राकृतं मत्वा कुपितो नानुभाव
वित् २२ द्वंद्वयुद्धं सुतुमुलमुभयोर्विजिगीषतोः आयुधाश्मद्रुमैर्दोर्भिः क्रव्यार्थे श्येनयोरिव २३ आसीत्तद स्पे॰
दष्टविंशाहमितरेतरमुष्टिभिः वज्रनिष्पेषपरुषैरविश्रममहर्निशं २४ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरु
२ बंधनः खिन्नसत्वः खिन्नगात्रस्तमाहातीवविस्मितः २५
क्षीण

ष्टानि विश्लथानि अंगानां उरूणां बंधनानि संधिस्थानानि यस्य सः २५ श्रीकृष्णाय नमः श्रीरामो जयति ॥ राम
२०

प्रश्नविष्णु [illegible] हेतुः २

लोके कावाः यमंत्राबलीयानिति विस्मितः सन् विमृश्याहाजानेऽहमिति सर्वभूतानां प्राणस्तत्र यदोजः सहो बलंच इंद्रियहृदयदेहबलानि तत्त्व
वेत्ताहिजाने कथं तथात्वमतआह। विष्णुमित्यादि २६ पुराणत्वेहेतुः त्वंहीति सृष्टानिमित्तं यच्चसदुपादानं अतः पुराणः कालइति अधी
श्वरत्वमप्युक्तं परत्वमाह ईशः परइति तत्त्वनपृथगित्याह आत्मनामात्मेति २७ यत एवभूतः अतो मेमेष्टदेवो रघुनाथएवत्वमित्याह यस्येति
ईषदुत्कलितउद्दीपितोयोरोषस्तेन येकटाक्षमोक्षास्तैः क्षुभिता नक्राग्रहास्तिमिंगिलाः महामत्स्याश्चयस्मिन् सोब्धिर्वर्त्मादिशत् दत्तवा

जानेत्वां सर्वभूतानां प्राण ओजः सहो बलं विष्णुंपुराणपुरुषं प्रभविष्णुमधीश्वरं २६ त्वंहिविश्वसृजां स्रष्टा सृष्टानामपि
यच्चसत् कालः कलयतामीशः परआत्मातथात्मनां २७ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिं
गिलोब्धिः सेतुः कृतः स्वयशउज्ज्वलिताचलंकारक्षः शिरांसिभुविपेतुरिषुक्षतानि २८ इतिविज्ञातविज्ञानमृक्षरा
जानमच्युतः व्याजहारमहाराजभगवान्देवकीसुतः २९ अभिमृश्यारविंदाक्षः पाणिनाशंकरेणतं कृपयापरया
भक्तंमेघगंभीरयागिरा ३० मणिहेतोरिहप्राप्ताः वयमृक्षपतेबिलं मिथ्याभिशापंप्रमृज्यन्नात्मनोमणिनामुना
३१ इत्युक्तः स्वांदुहितरं कन्यांजांबवतींमुदा अर्हणार्थंसमणिनाकृष्णायोपजहारह ३२ अदृष्ट्वानिर्गमंशौरेःप्र
विष्टस्यबिलंजनाः प्रतीक्ष्यद्वादशाहानिदुःखिताः स्वपुरंययुः ३३ श्रीराम श्रीराम श्रीराम श्रीराम श्री

नु तथापियेनतस्मिन्स्वयशाएवसेतुः कृतः उज्ज्वलितादग्धाच यस्येषुभिः क्षतानिच्छिन्नानिरक्षसोदशग्रीवस्यशिरांसिभुविपे
तुः सएवत्वमितिजाने २८ इतिविज्ञातविज्ञानंयेनतंविज्ञानशब्दः करणसाधनः कर्मसाधनोवाऋक्षराजंप्रतितत्रोवाचेत्यर्थः २९
३० वयंत्विहवर्तेत्वाविलंद्वारंप्राप्तास्तत्रमिथ्याभिशापमनुनाप्रमृजन् प्रमार्ष्टुमहमेकएवांतर्बिलमिहप्राप्त इत्यर्थः ३१ सहम
णिनासमर्प्पयामास ३२ ३३

मणिनी १

३४ श्रीकृष्णप्राप्त्येयचंद्रभागानाम दुर्गामभजन् ३५ स च कृष्णस्तेषां प्रादुर्बभूव असवद्दति पाठे असवद्रूद्रियाणि तेषां प्रेष्ठ इत्यर्थः कदा १
देव्या उपस्थानात्प्रत्यादिष्टाद्दत्ताया आशीः कृष्णं द्रक्ष्यथेति तयाशिषैव ३६ यदि लोके जनाः कथंचिन्मृतं वंधुः पुनरागतमुपलभंते
तद्वदुपलभ्य सर्वे जातमहोत्सवा आसन्निति ३७ पाप्मना आत्मनो अपराधेनानुतप्यमानाः ३९ अघं दोषं आत्मनो रजः मत्वो

२९ निशम्य देवकी देवी रु क्मिण्यानकदुंदुभिः सुहृदो ज्ञातयो शोचन् बिलात्कृष्णमनिर्गतं ३४ सत्राजितं शपंतस्ते दुःखि-
ता द्वारकौकसः उपतस्थुर्महामायां दुर्गां कृष्णोपलब्धये ३५ तेषां तु देव्युपस्थानात्प्रत्यादिष्टाशिषा स ह प्रादुर्बभूव सि-
द्धार्थः सदारो हर्षयन् हरिः ३६ उपलभ्य हृषीकेशं मृतं पुनरिहागतं सह पत्न्या मणिग्रीवं सर्वे जातमहोत्सवाः ३७ ॥
सत्राजितं समाहूय सभायां राजसन्निधौ प्राप्तिं चाख्याय भगवान् मणिं तस्मै न्यवेदयत् ३८ स चाति व्रीडितो रत्नं
५३ गृहीत्वावाङ्मुखस्ततः अनुतप्यमानो भवनं आगमत्स्वेन पाप्मना ३९ सोनुध्यायंस्तदेवाघं बलवद्विग्रहाकुलः ॥
कथं मृज्याम्यात्मरज प्रसीदेद्वाच्युतः कथं ४० किं कृत्वा साधु मह्यं स्यान्न शपेद्वा जनो यथा अदीर्घदर्शनं क्षुद्रं मूढं द्र-
विणलोलुपं ४१ दास्ये दुहितरं तस्मै स्त्रीरत्नं रत्नमेव च उपायो यं समीचीनस्तस्य शांतिर्न चान्यथा ४२ २९

अपराधस्थिति ४० किं कृत्वा कस्मिन् कृते इत्यर्थः साधु भद्रं अदीर्घदर्शनमविचारकं मां क्षुद्रं कृपणं मूढं मंदमतिं ४१ एवं ध्या-
यन्नुपायं निश्चिनोति स्त्रीरत्नं दुहितरं तत्र दास्यामि तदनंतरं पारिहत्वेन रत्नमपीति ४२ श्रीराम श्रीराम श्रीराम
३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४३ बहुभिः कृतवर्मादिभिः ४४ मणिं न प्रतीच्छामः न स्वीकुर्मः हे देव कस्य स्त्वद्भक्तोस्यतिक टांक्ष फलभागिनः इति नत्वापुत्रत्वात्त्वदीयं धन
मस्माकमेवेति गूढाभिप्रायः ४५ दशमे षट्पंचाशत्तमः सप्तपंचाशत्तमे तु पुनः शतधनुर्वधे प्राप्तस्य दुर्यशो मार्ष्टि कृष्णः स्माक्रूराहृतान्म
णेः १ अक्रूरमुखैरीरितमणेः पात्रमथोच्यते उपमंत्र्य तमकांतसरामो मागाहजाकर्य सत्राजितः कृष्णाज्ञाभंगफलं व्यक्तिकं तु म

एवं व्यवसितो बुद्ध्या सत्राजित्स्वसुतां शुभां मणिं च स्वयमुद्यम्य कृष्णायोपजहार ह ४३ तां सत्यभामां भगवानुपयेमे यथा
विधि बहुभिर्याचितां शीलरूपौदार्यगुणान्वितां ४४ भगवानाह न मणिं प्रतीच्छामो वयं नृप तवास्तां देवभक्तस्य वयं च फल न २
भागिनः ४५ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकहरणं नाम षट्पंचाशत्तमोऽध्यायः श्रीशुक उवाच ॥ विज्ञा
तार्थोऽपि गोविंदो दग्धानाकर्ण्य पांडवान् कुंतीं च कुल्यकरणे सहरामो ययौ कुरून् १ भीष्मं कृपं सविदुरं गांधारीं द्रोण
मेव च तुल्यदुःखौ च संगम्य हा कष्टमिति होचतुः २ लब्ध्वैतदंतरं राजन् शतधन्वानमूचतुः अक्रूरकृतवर्माणौ म
णिः कस्मान्न गृह्यते ३ योऽस्मभ्यं संप्रतिश्रुत्य कन्यारत्नं विगर्ह्य नः कृष्णायादान्न सत्राजित्कस्माद्भ्रातरमन्वियात्
४ एवं भिन्नमतिस्ताभ्यां सत्राजितमसत्तमः शयानमवधील्लोभात्स पापः क्षीणजीवितः ॥ श्रीराम श्रीराम श्री

टी० १ ह विज्ञातार्थोऽपीति पांडवा बिलद्वारेण जतुगृहान्निर्गताः इत्येवं विज्ञातोऽर्थो येन सः कुंतीं च दग्धामाकर्ण्य कुल्यकरणे कुलो
चितव्यवहारार्थं १ अन्येषां च हा हा दुःखाभावात् भीष्मादीन् संगम्येत्युक्तौ २ ३ ननु जीवन् सत्राजित्कथं मणिं दास्य
ति तत्राहतुः योऽस्मभ्यमिति भ्रातरं प्रसेनमृतं कस्मान्नान्वियात् नानुगच्छत् म्रियतामित्यर्थः ४ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० उ जग्मिवान्जगाम ६ ११ हेलनैः प्रतिकूलैः जितैः पराधं १२ अर्पितामृतः सप्तदशसंख्यानूसंयुगानू १३ ४ तौरामकृष्णौ वकमेवतत्वमित्यभि

स्त्रीणां विक्रोशमानानां क्रंदंतीनामनाथवत् हत्वा पशून्सौनिकवन्मणिमादाय जग्मिवान् ६ सत्यभामा च पितरं हतं वीक्ष्य
शुचार्पिता व्यलपत्तात तातेति हा हतास्मीति मुह्यती ७ तैलद्रोण्यां मृतं प्रास्य जगाम गजसाह्वयं कृष्णाय विदितार्थाय त
प्ता चख्यौ पितुर्वधं ८ तदाकर्ण्येश्वरौ राजन्ननुसृत्य नरलोकतां अहो नः परमं कष्टमित्यस्राक्षौ विलेपतुः ९ आगत्य भगवां
स्तस्मात्सभार्यः साग्रजः पुरं शतधन्वानमारेभे हंतुं हर्तुं मणिं ततः १० सोपि कृष्णोद्यमं ज्ञात्वा भीतः प्राणपरीप्सया साहाय्ये
कृतवर्माणमयाचत सचाब्रवीत् ११ नाहमीश्वरयोः कुर्यां हेलनं रामकृष्णयोः को नु क्षेमाय कल्पेत तयोर्वृजिनमाच
२३ रन् १२ कंसः सहानुगापीतो यद्द्वेषात्त्याजितः श्रिया जरासंधः सप्तदशसंयुगान्विरथो गतः १३ प्रत्याख्यातः स चा
क्रूरं पार्ष्णिग्राहमयाचत सोप्याह को विरुध्येत विद्वानीश्वरयोर्बलं १४ य इदं लीलया विश्वं सृजत्यवति हंति च चेष्टां
श्व २ विश्वसृजो यस्य न विदुर्मोहिता अजया १५ यः सप्तहायनः शैलमुत्पाट्यैकेन पाणिना दधार लीलया बाल उच्छिलीं
ध्रमिवार्भकः १६ नमस्तस्मै भगवते कृष्णायाद्भुतकर्मणे अनंतायादिभूताय कूटस्थायात्मने नमः १७ प्रत्याख्या
तः शतिनापि शतधन्वा महामणिं तस्मिन्न्यस्याश्वमारुह्य शतयोजनगं ययौ १८ गरुडध्वजमारुह्य रथं रामजना
र्दनौ अन्वयातां महावेगैरश्वै राजन्गुरुद्रुहं १९

उ २

प्रत्याह य इदमिति अजया मायया मोहिता जेयतिसंधि रार्षः १५ १७ अंतर्यामि कृष्णनियुक्तः तस्मिन्नक्रूरे मणिं न्यस्य य राम
योपलायत १८ गुरुः श्वशुरस्तद्द्रुहं तं १९ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शतयोजनगामिनात्तत्र परं गंतुमशक्तस्तत्र पतितस्तं हयं विसृज्य २० व्यचिनोत् मृगयामास अक्रूरे मणिरस्तीति सर्वज्ञतया विदित्वा
पि रामवंचनाय तथा कृतवानिति भावः २१ २ अन्वेष [illegible] अन्विछ २३ सर्वज्ञस्यैवं चेष्टितं मह्यं च नायति मत्वा गूढमनुराह अहमिति

मिथिलायामुपवने विसृज्य पतितं हयं पद्भ्यामधावत्संत्रस्तः कृष्णोप्यन्वद्रवद्रुषा २० पदातेर्भगवांस्तस्य पदातिस्तिग्म
नेमिना चक्रेण शिर उत्कृत्य वाससोर्व्यचिनोन्मणिं २१ अलब्धमणिरागत्य कृष्ण आहाग्रजांतिके वृथा हतः श
तधनुर्मणिस्तत्र न विद्यते २२ तत आह बलो नूनं स मणिः शतधन्वना कस्मिंश्चित्पुरुषे न्यस्तस्तमन्वेष पुरं व्र
ज २३ अहं विदेहमिछामि द्रष्टुं प्रियतमं मम इत्युक्त्वा मिथिलां राजन् विवेश यदुनंदनः २४ तं दृष्ट्वा सहसो
त्थाय मैथिलः प्रीतमानसः अर्हयामास विधिवदर्हणीयं समर्हणैः २५ उवास तस्यां कतिचिन्मिथिलायां स
मा विभुः ततोऽशिक्षद्गदां काले धार्तराष्ट्रः सुयोधनः मानितः प्रीतियुक्तेन जनकेन महात्मना २६ केशवो द्वार
कामेत्य निधनं शतधन्वनः अप्राप्तिं च मणेः प्राह प्रियायाः प्रियकृद्विभुः २७ ततः स कारयामास क्रिया बंधो
र्हतस्य वै साकं सुहृद्भिर्भगवान् या याः स्युः सांपरायिकाः २८ श्रीराम श्रीराम श्रीराम श्रीराम ॥

२४ २५ कतिचित्समाः संवत्सरान् प्रासंगिकमाह तत इति २६ सत्यभामामप्येवं चयदिति सूचयन्नाह केशव इति २७ ॥
बंधोः सत्राजितः सांपरायिकाः पारलौकिकाः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वंचनं २

भा०उ० यूषतुर्हारिकायाः सकाशात् क्वापि पलायितो प्रयोजको मणिहरणे शतधन्वनः प्रवर्त्तकोतत्राऽक्रूरः कृष्णानुमंतैनैव गतः कृ
तवं मतु भक्तपक्षपात ग्राकंदाभया दिवापक्षिनइति गम्यते कथमन्यथासर्वज्ञेश्वरे तयोः संभवतीति २९ तदेवं श्रीवाराणस्यां दान
सरव्याय १ पतिसमीक्षया मणिहस्तेऽक्रूरः क्रमेव दिके महाध्वरैर्यजमानेनिवसति पुनः श्रीकृष्णेनैव प्रस्थापितोऽक्रूरइति कर्णे कर्णे सति १

अक्रूरः शतवर्मा च कृत्वाशतधनो वधं यूषतुर्भयवित्रस्तो हारकायाः प्रयोजको २९ अक्रूरे
प्रोषितेरिष्टान्यासन्नं वेहारेकोकसी शरीरा मानसास्तापा मुहुर्दैविक भौतिकाः ३० तेताष्टच्छु द्वारि
२३ कद्वानुग्रेसन पुरागमान् कस्मादिहारिष्टान्यासंन्नुच्यतामचिरणनः ३१ इत्यंगोपदिशंत्येके
विस्मृत्य प्रागुदाहृतं मुनिवासनिवासे किंघटेत्ताऽरिष्टदर्शनं ३२ श्रीराम श्रीराम श्री

—

जपतिजनेसत्यभामारामादिनामप्यविश्वासिजनसंग्रहायाऽक्रूरमाहूय साक्षेपं श्रीकृष्णः प्राहइत्थं भगवन्मतं संगोप्यकेचन
अपंयोन्यत्कारणमक्रूरानयनेवर्णयंति तद्यथाश्रुतं दूषयितुमनुवदति अक्रूरे प्रोषितइति ३० दूषयतिइतीतिअंगहे राज
न् श्रीकृष्णमाहात्म्यं विस्मृत्यपि तंदेवाहामुनिवासइति मुनीनां निवासोयस्मिन् समुनिवासः श्रीकृष्णस्तस्यनिवासे २३
सति अक्रूरापगममात्रेणाऽरिष्टदर्शनं किं घटेत नात्तदिष्टं विनान घटेतेत्यर्थः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनस्तन्मतमेवानुवर्णयति काशिदेशेषु मघवन्ति अवर्षति ३२ इत्येवंभूतमक्रूरमहिमाप्रतिपादनपरं वृद्धानां वाक्यं श्रुत्वा सत्यमेवं
तथाप्येतावद्देवकारणं न भवति किंतु मणेरप्यपराद्ध इति मत्वेत्युक्तं परमतं वस्तुतस्तु कृष्णलीलावशादेव वृष्ट्यारिष्टादिदर्शनमिति
श्रुकादि समंतमिति भावः ३३ ॥ विज्ञातमखिलं येन स चासौ अत एव चित्तज्ञस्तु अयं भावः महाभागवतस्यास्य मया दत्तोपि म

देवे वर्षति काशीशः श्वफल्कायागताय वै स्वसुतां गांदिनीं प्रादान् ततोऽवर्षत्स्म काशिषु ३२ तत्सुतस्तत्प्रभावोसाव
क्रूरो यत्र यत्र ह देवोभिवर्षते तत्र नोपतापा न मारिकाः इति वृद्धवचः श्रुत्वा नैतावदिह कारणं ३३ इति मत्वा समा
नाय्य प्राहाक्रूरं जनार्दनः पूजयित्वाभिभाष्यैनं कथयित्वा प्रियाः कथाः ३४ विज्ञाताखिलचित्तज्ञः स्मयमान उ
वाच ह ननु दानपते न्यस्तस्त्वय्यास्ते शतधन्वना स्यमंतको मणिः श्रीमान् विदितः पूर्वमेव नः ३५ सत्राजितोनपत्य
त्वात् गृह्णीयुर्दुहितुः सुताः दायं निनीयापः पिंडान् विमुच्यर्णं च शेषितं ३६ तथापि दुर्द्धरस्त्वन्यैस्त्वय्यास्तां सुव्र
त मणिः किंतु मामग्रजः सम्यक् न प्रत्येति मणिं प्रति दर्शयस्व महाभाग बंधूनां शांतिमावह ३७

णिर्वापेक्षा नास्त्येव यस्मादाहृतो मणिर्नास्ते हे चागत इति ज्ञात्वेति ३५ ततः किमत आह सत्राजित इति अपः पिंडांश्च निनीय द
त्त्वा ऋणं च विमुच्यापाकृत्य शेषितमवशिष्टं दायं दुहितुः सत्यभामायाः सुता गृह्णीयुरिति शास्त्रं तथा च स्मरंति पत्नी दुहितरश्चैव
पितरौ भ्रातरस्तथा तत्सुता गोत्रजो बंधुः शिष्यः सब्रह्मचारिण इति ३६ अग्रजोपि न प्रत्येति न विश्वसिति नातो नीतिवक्तव्यं ३७

भा० टी० यतः अच्छिन्नाः संततमखा वर्त्तंत इति ३८ अलक्षितः कोऽपि हि स्पृहणीयं वा ३९ रजः मिथ्याभिशापं संमृज्य अन्येद्युर्दत्त्वा इत्यादि मिषेण
धात्या भयस्तस्मै प्रत्यर्पितवानिति ४० दुःकीर्तिं तन्मूलं दुरितं चेति ४१ इति दशमे सप्तपंचाशत्तमः अष्टपंचाशत्तमे तु कृष्णः पंच कन्याः
गृहीत् कालिंदीं मित्रविंदां च सत्यां भद्रां च लक्ष्मणां कालिंदी निजलाभाय तपः परमुपयुपी परिणिष्यन् प्रियार्थ वासमिंद्रप्रस्थ

अच्छिन्नमखास्तस्य यद्वेत्तरुक्ममेवदयः ३८ एवं सामभिरालब्धः श्वफल्कतनयो मणिं आदाय वाससाच्छन्नं ददौ
सूर्यसमप्रभं ३९ स्यमंतकं दर्शयित्वा ज्ञातिभ्यो रज आत्मनः विमृज्य मणिना भूयस्तस्मै प्रत्यर्पयत्प्रभुः ४० यस्त्वेत
त्भगवत ईश्वरस्य विष्णोर्वीर्याढ्यं वृजिनहरं सुमंगलं च आख्यानं पठति शृणोत्यनुस्मरेद्वा दुःकीर्त्तिं दुरितमपोह्य या
ति शांति ४१ इति श्रीभागवते महापुराणे दशमस्कंधे स्यमंतकोपाख्याने सप्तपंचाशत्तमोध्यायः श्रीशुक उवाच ॥
एकदा पांडवान्द्रष्टुं प्रतीतान्पुरुषोत्तमः इंद्रप्रस्थं गतः श्रीमान्युयुधानादिभिर्वृतः १ दृष्ट्वा तमागतं पार्थाः
२४ मुकुंदमखिलेश्वरं उत्तस्थुर्युगपद्वीराः प्राणा मुख्यमिवागतं २ परिष्वज्याच्युतं वीरा अंगसंगहतैनसः सानु अर्जुनं २
रागस्मितं वक्त्रं वीक्ष्य तस्य मुदं ययुः ३ युधिष्ठिरस्य भीमस्य कृत्वा पादाभिवंदनं परिरभ्याथ यमाभ्यां चाभिवादि
तः ४ परमासन आसीनं कृष्णा कृष्णमनिंदिता नवोढा व्रीडिता किंचिच्छनैरेत्याभिवंदयत् ५ तथैव सात्यकिः पा
सनैः २ र्थैः पूजितश्चाभिवादितः निषसादासने न्ये च पूजिताः पर्युपासित ६ राम

मथागमत् प्रतीतान्नष्टान्पित्रुपदगृहे पुनः संवर्द्धितान्द्रष्टुं युयुधानः सात्यकिः १ प्राणा इंद्रियाणि मुख्यं पंचवृत्तिं प्राणमिव २ ३ २४
उद्धयोः प्रणामं कृत्वा संमन्य लिंगितः कनिष्ठाभ्यामभिवंदितो बभूव ३ कृष्णां द्रौपदीं वधूः भार्या सत्यपि निंदारहिता पार्थैर्नवं
अचिरोढा परिणीता ५ ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिहार्देन स्नेहेन आर्द्रे सजले दृशौ यस्याः सा तयापरिष्वक्तः तथापरिष्वज्य आवीधवायस्मसः ७ प्रेमा वैक्लव्यं तेन रुद्धः कंठो यस्याः क्लेशा
पाय आत्मनिदर्शनं यस्यास्तं भजतो भक्तान् क्लेशापायाय आत्मानं दर्शयतीति वा ८ ज्ञातीन् वै धूश्नो अस्मान् यदा त्राता अक्रू
रः प्रेषितः ९ ज्ञातीनिति वचनात्पार्थमाह वारयतीस्तीति नेनस्तीति तत्र हेतुः विश्वस्येति सुहृच्च आत्मा च तस्याहं सिनाशी

पृथां समागत्य कृष्णनाभिवंदनस्तयाति हार्दार्द्रदृशाभिरंभितः आपृष्टवांस्तां कुशलं सह स्नुषा पितृष्वसारं परिपृष्टबांध
वः ७ तमाह प्रेमवैक्लव्यरुद्धकंठाश्रुलोचना स्मरंतीतान् बहून् क्लेशान् क्लेशापायात्मदर्शनं ८ तदैव कुशलं ना
भूत्सनाथास्ते कृता वयं ज्ञातीन्नः स्मरता कृष्ण भ्राता मे प्रेषितस्त्वया ९ नैतेस्ति स्वपरभ्रांतिर्विश्वस्य सुहृदात्मनः
तथापि स्मरतां शश्वत्क्लेशान् हंसि हृदि स्थितः १० युधिष्ठिर उवाच ॥ किं न आचरितं श्रेयो न वेदाहमधीश्वर ॥
योगेश्वराणां दुर्दर्शो यन्नो दृष्टः कुमेधसां ११ इति वै वार्षिकान्मासान् राज्ञा सोभ्यर्थितः सुखं जनयन्नयनानंदमिं
द्रप्रस्थौकसां विभुः १२ एकदा रथमारुह्य विजयो वानरध्वजं गांडीवं धनुरादाय तूणौ चाक्षयसायकौ १३ साकं कृष्णेन
सन्नद्धो विहर्तुं विपिनं वनं बहुव्यालमृगाकीर्णं प्राविशत्परवीरहा १४ तत्र विध्यन् शरैर्व्याघ्रान् शूकरान्महिषान् रुरून् तृट्परीतः
शरभान् गवयान् खड्गान् हरिणान् शशशल्लकान् १५ तान्निन्युः किंकरा राज्ञे मेध्यान् पर्वण्युपागते परिश्रांतो बीभ
८ त्सुर्यमुनामगात् १६

यसि १० कुमेधसां विषयासक्तचित्तानां दृश्योसि ११ सुखमवदसदितिशेषः सुखमभ्यर्थित इति वा क्रियासमाप्तिः १२ कालिंदीदर्श
नप्रसंगमाह एकदेति अक्षय्याः सायका ययोस्तौ तूणाविषुधी १३ १५ राज्ञे युधिष्ठिराय मेध्यान् कर्मार्हान् बीभत्सुरर्जुनः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५

२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सख्या श्रीकृष्णेन १८ २० अयं मां का मयेदितिशं कायामाहा नान्यमिति २१ २ आहोवचतद्विद्वान् २२ प्रसंगात्तत्कालीनं चरित्रांतरमाह
यद्वेति पार्थैर्यद्दैवसंदिष्टो विज्ञापितः श्रीकृष्णस्तेदेवत्तपो विश्वकर्मणा देवशिल्पिना नगरं कारयामास २४ किंच भगवान् निरतिश

दौ तत्रोपस्पृश्य विशदं पीत्वा वारि महारथौ कृष्णौ ददृशतुः कन्यां चरंतीं चारुदर्शनां १७ तामासाद्य वरारोहां सुद्विजां रुचिरा
ननां पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रमदोत्तमां १८ का त्वं कस्यासि सुश्रोणि कुतो वा किं चिकीर्षसि मन्ये त्वां पतिमि
च्छंतीं सर्वं कथय शोभने १९ कालिंद्युवाच अहं देवस्य सवितुर्दुहिता पतिमिच्छती विष्णुं वरेण्यं वरदं तपः परममा
७८ स्थिता २० नान्यं पतिं वृणे वीर तमृते श्रीनिकेतनं तुष्यतां मे स भगवान् मुकुंदो नाथसंश्रयः २१ कालिंदीति समाख्याता
वसामि यमुनाजले निर्मिते भवने पित्रा यावदच्युतदर्शनं २२ तथावदद्गुडाकेशो वासुदेवाय सोपि तां रथमारोप्य
तद्विद्वान् धर्मराजमुपागमत् २३ यदैव कृष्णः संदिष्टः पार्थानां परमाद्भुतं कारयामास नगरं विचित्रं विश्वकर्मणा
२४ भगवांस्तत्र निवसन् स्वानां प्रियचिकीर्षया अग्नये खांडवं दातुमर्जुनस्यास सारथिः २५ सोग्निस्तुष्टो धनुर
दाद्धयान् श्वेतान् रथं नृप अर्जुनायाक्षयौ तूणौ वर्म चाभेद्यमस्त्रिभिः २६ मयश्च मोचितो वह्नेः सभां सख्युरु
पाहरत् यस्मिन् दुर्योधनस्यासीज्जलस्थलदृशिभ्रमः २७ स तेन समनुज्ञातः सुहृद्भिश्चानुमोदितः आययौ
द्वारकां भूयः सात्यकिप्रमुखैर्वृतः २८

वं। ये ऐश्वर्यगुणवानपि अर्जुनस्य धनुरादिलाभाय सारथिरासखांडवं वनं नामेंद्रस्य वनं २५ अक्षय्यौ अक्षय्यो सायकौ २६ खांडवदाह
कवन्हेः सखे अर्जुनायायस्मिन्निति सामान्येनानिर्देशः यस्यामित्यर्थः जलस्थलयोर्दर्शे दृष्टिर्भ्रमः यद्वा जले स्थलवद्दृक्
दृष्टिर्यस्मिन् तत्जलस्थलदृक् तस्मिन् भ्रम आसीदिति २७ २८ तू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुपुण्यंऋतुः आक्षंचयस्मिन् पंचमेमित्रविंदाविवाहमाह विंदानुविंदावितिद्वाभ्यां आवंत्योअवंतीराजानौ ३० १ षष्ठमाहनग्नजिदि
ति. कौशल्याअयोध्यापतिः सत्यानामकन्याअभवत् देवीकांतिमती नाग्नजितीतिपितृनाम्नाप्रसिद्धेत्यर्थः ३२ वीरस्यगोधमपिन
नी। सहंतइतितथा‍न् खलान् दुर्वृत्तान् ३३ वृषान्जयतीतियस्तेनलभ्या ३४ प्रतिनंदितःसंप्रतिनंदितवान् श्रीकृष्णेन वासः प्रतिनंदितः ३५

अथोपयेमेकालिंदींसुपुण्यर्त्वृक्षऊर्जिते वितन्वन्परमानंदंस्वानांपरममंगलं २९ विंदानुविंदावावंत्यौदुर्योधनवशानुगौ
स्वयंवरेस्वभगिनींकृष्णेसक्तांन्यषेधतां ३० राजाधिदेव्यास्तनयांमित्रविंदांपितृष्वसुः प्रसह्यहृतवान्राजन्राज्ञांप्रपश्यतां ३१ हृष्टो राजन्
तीक्ष्णशृंगान्सुदुर्धर्षान् नग्नजिन्नामकौशल्यआसीद्राजातिधार्मिकः तस्यसत्याभवत्कन्यादेवीनाग्नजितीनृप ३२ नतांशेकुर्नृपावोढुमजि
त्वासप्तगोवृषान् वीरगंधासहान्खलान् ३३ तांश्रुत्वावृषजिल्लभ्यांभगवान्सात्वतांपतिः जगामकौशल्यंपुरंसैन्य
२६ नमहतावृतः ३४ सकोशलपतिःप्रीतः प्रत्युत्थायासनादिभिः अर्हणेनापिगुरुणापूजयन्प्रतिनंदितः ३५ वरंवि
लोक्याभिमतंसमागतंनरेंद्रकन्याचकमेरमापतिं भूयादयंमेपतिराशिषोमलाः करोतुसत्यायदिमेधृतोव्रतैः
३६ अर्चितंपुनरित्याहनारायणजगत्पते आत्मानंदेनपूर्णस्यकरवाणिकिमल्पकः ३७ यत्पादपंकजरजःशि
जा१ रसाबिभर्तिश्रीरब्जजःसगिरिशःसहलोकपालैः लीलातनूःस्वकृतसेतुपरीप्सयेशःकालेदधत्सभगवान्ममके
नतुष्यत् ३८ श्रीशुकउवाच तमाहभगवान्हृष्टः कृतासनपरिग्रहः मेघगंभीरयावाचासस्मितंकुरुनंदन ३९

३६ कृष्णकृष्णारविंदाक्षवासुदेवजगत्पते त्वामहंशरणंयातः पाहिमांकरुणानिधे यथाहमितवांस्त्वंवेदुर्दमान्वृषभानिमा २६
न् नेतथारागादिकान्दोषान्दाम्यत्वंविजयप्रभो ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हे नरेंद्र राजन्यबंधोः क्षत्रियस्य शुल्कदा द्रव्यादिप्रदाः ४० गुणानामेकमेव धाम स्थानं त्वं तथाभूतस्य यस्य तवांगे ४१ ४३ दुर्दांताः अशिक्षिताः
दुरवग्रहः अपरायत्ताः कुतस्तदाह एतैरिति भग्नाः भंगं प्रापिताः एतान्यो निगृह्णाति तस्य कन्येति समयः कृतः ४३ यद्यपि इमे गावृषाः
४४ सप्तधा कृत्वेति बह्वीनां योषितां संपूर्णे एवाहं संभोगयोग्यः स्यामिति सत्यां प्रत्येसापत्न्य प्रदर्शनार्थं आत्मनः सप्तधाकरणं ४५ ४६

श्रीभगवा० नरेंद्र यांचा कविभिर्विगर्हिता राजन्यबंधोर्निजधर्मवर्त्तिनः तथापि याचे तव सौहृदेच्छया कन्यां त्वदीयां न हि शुल्कदा वयं ४०
राजोवाच कोन्यस्तेभ्यधिको नाथ कन्यावर इहेप्सितः गुणैकधाम्नो यस्यांगे श्रीर्वसत्यनपायिनी ४१ किंत्वस्माभिः कृतः पूर्वं समयः
सात्वतर्षभ पुंसां वीर्यपरीक्षार्थं कन्यावरपरीप्सया ४२ सप्तैते गोवृषा वीर दुर्दांता दुरवग्रहाः एतैर्भग्नाः सुबहवो भिन्नगात्रा नृपात्म
जाः ४३ यदिमे निगृहीताः स्युः त्वयैव यदुनंदन वरो भवानभिमतो दुहितुर्मे श्रियःपते ४४ एवं समयमाकर्ण्य बध्वा परिकरं प्रभुः
आत्मानं सप्तधा कृत्वा न्यगृह्णाल्लीलयैव तान् ४५ बध्वा तान् दामभिः शौरिः भग्नदर्पान् हतौजसः व्यकर्षल्लीलया बद्धान् बालो
दारुमयान् यथा ४६ ततः प्रीतः सुतां राजा ददौ कृष्णाय विस्मितः तां प्रत्यगृह्णाद्भगवान् विधिवत्सदृशीं विभुः ४७ राजपत्न्यश्च
दुहितुः कृष्णं लब्ध्वा प्रियं पतिं लेभिरे परमानंदं जातश्च परमोत्सवः ४८ शंखभेर्यानकानेदुर्गीतवाद्यद्विजाशिषः नरा नार्यः
प्रमुदिताः सुवासःस्रगलंकृताः ४९ दशधेनुसहस्राणि पारिबर्हमदाद्विभुः युवतीनां त्रिसाहस्रं निष्कग्रीवसुवाससां ५०
नवनागसहस्राणि नागाच्छतगुणान् रथान् रथाच्छतगुणानश्वानश्वाच्छतगुणान्नरान् ५१ दंपती रथमारोप्य महत्या सेनया वृतौ
स्नेहप्रक्लिन्नहृदयो यापयामास कोशलः ५२ श्रुत्वैतद्रुरुधुर्भूपा नयंतं पथि कन्यकां भग्नवीर्याः सुदुर्मर्षा यदुभिर्गोवृषैः पुरा ५३ तानस्यतः शरव्रातान् बंधुप्रियकृदर्जुनः गांडीवी कालयामास सिंहः क्षुद्रमृगानिव ५४

निष्कग्रीवाश्च ताः सुवाससश्च ताः तासां युवतीनां च दासीनां ५० नागान् नागेभ्यः शतगुणान् नवलक्षाणि रथान् रथेभ्यः शतगुणान् नव
कोटीः अश्वान् अश्वेभ्यः शतगुणान् नवपद्मानि ५१ ५२ यदुभिर्गोवृषैश्च भग्नवीर्या अपि सुदुर्मर्षाः क्रुद्धाः ५३ अस्यतः क्षिपतः प्रयुं
जानानिति यावत् ५४

·उ· ५५ सप्तमं विवाहमाह श्रुतकीर्त्तेरिति श्रुतकीर्त्तिनाम्नया पितृष्वसा तस्याः सुतां भद्रां नाम कैकेयीं तद्देशजां ५६ अष्टममाह सुतां च निरेकाएव श्री
ह्मी लक्ष्मणी जहार ५७ तेस्य निरोधात् पुरं तस्मात् ५८ मे श्री जांबवती भामा सत्या भद्रा च लक्ष्मणा कालिंदी मित्रविंदा चेत्यष्टौ पट्टमहास्त्रियः ३
तिदशमे अष्टपंचाशत्तमः तुनषष्ठितमे भौमं हत्वा तेनाहृता हरिः कन्याः सहस्रशः प्राप्य पारिजातं दिवो हरत् १ परिणायनवाभ्यामि सून्मना
रथपूरणे आत्मारामाप्यसौ रेमे गृहस्थवत् येन ताः स्त्रियो निरोद्धाः स भौमः चकाराधेन कारणेन हतः तदाचक्ष्वेति १ इंद्रेणा
भौमविचेष्टितं विज्ञापितः स नु प्राग्ज्योतिषपुरं भौमनगरं यया वित्यन्वयः कथं भूतेन दूतं छत्रं यस्य तेन लोकपाल प्रधानत्वात् इंद्रस्य व

पारिवर्हेमुपागत्य हारकामत्यसत्यया रेमे यदूनामृषभो भगवान् देवकीसुतः ५५ श्रुतकीर्त्तेः सुतां भद्रामुपयेमे पितृष्वसुः कैकेयीं
भ्रातृभिर्दत्तां कृष्णः संतर्दनादिभिः ५६ सुतां च मद्राधिपतेर्लक्ष्मणां लक्षणैर्युतां स्वयंवरे जहारैकः स्वः सुपर्णः सुधामिव ५७ अ
न्याश्चैवंविधा भार्याः कृष्णस्यासन् सहस्रशः भौमं हत्वा तन्निरोधादाहृताश्चारुदर्शनाः ५८ इति श्रीभागवते महापुराणे दशमस्कंधे
अष्टमहिष्युद्वाहो नामाष्टपंचाशत्तमोध्यायः राजोवाच यथा हतो भगवता भौमो येन च ताः स्त्रियः निरुद्धा एतदाचक्ष्व विक्रमं
शार्ङ्गधन्वनः १ श्रीशुक उवाच इंद्रेण हृतछत्रेण हृतकुंडलबंधुना हृतामराद्रिस्थानेन ज्ञापितो भौमचेष्टितं सभार्यो गरु
डारूढः प्राग्ज्योतिषपुरं ययौ २ गिरिदुर्गैः शस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमं मुरपाशायुतैर्घोरैर्दृढैः सर्वत आवृतं ३ गदया निर्बिभे
दाद्रीन् शस्त्रदुर्गाणि सायकैः चक्रेणाग्निं जलं वायुं मुरपाशांस्तथासिना ४ शंखनादेन यंत्राणि हृदयानि मनस्विनां प्राकारं ग
दया गुर्व्या निर्बिभेद गदाधरः ५ पांचजन्यध्वनिं श्रुत्वा युगांताशनिभीषणं मुरः शयान उत्तस्थौ दैत्यः पंचशिरा जलात् ६

रेण छत्रहरणापितेस्य चमानभंग इति तथोक्तो हृतेकुंडले यस्याः साउदितिर्बंधुर्माता यस्य तेन हृतममराद्रेः स्थानं मणिपर्वतलक्षणं यस्य ते
न सत्यभामाया गृहे भगवंतमिंद्र आगत्य विज्ञापितवान् तदा तस्याः कौतुकाय गरुडे तया सहयया वितियद्वान्वदनुज्ञयेवृत्तत्पुत्र हनिष्या
मीति इतिहासात् केभूम्येव वरं दत्तं सत्यं कर्तुं सत्यभामाया भूम्यंशत्वात्तया सहययौ यद्वा नारदानीतपारिजातकुसुमरुक्मिण्यै दत्ते
सति कुपितां सत्यभामां सांत्वयतां तुभ्यं पारिजातमेव दास्यामीति श्रीरुक्मिन प्रतिश्रुतमिति हरिवंशप्रसिद्धं तदर्थं नीतवानि
[illegible]णं परिति २ गरुडेन याने कारणं गिरिदुर्गैरित्यादि चेकपलक्षितं जलाग्न्यनिलैश्च सर्वतोवर्त्तमानो दुर्गमं ३ ४ ५

२८

राम
२८

तां २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आविध्य आलोल्य समहाज्ञात् इत्यन्वयः ८ तस्मै श्रीकृष्णाय गदां व्यमुंचत् ९ १० इंद्रतेजसा वज्रेण प्रतिक्रियया हेतुभूतया अमर्षजुषः ११ पीठं पी
ठनामानं निरगान् निरगमन् १२ निकृत्ता निःशीर्षादीनि येषां तान् १३ ४ शतघ्नीं शक्तिविशेषं १५ विचित्रावाजाः पत्राणि येषां ते बाणाः नि

६। त्रिशूलमुद्यम्य सुदुर्निरीक्षणो युगांतसूर्यानलरोचिरुल्बणः। ग्रसंस्त्रिलोकीमिव पंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतं यथोरगः। ६
आविध्य शूलं तरसा गरुत्मते निरस्य वक्त्रैर्व्यनदत्स पंचभिः। स रोदसी सर्वदिशोंबरं महानापूरयन्नंडकटाहमावृणोत् ७ तदाप
३८ तद्वै त्रिशिखं गरुत्मते हरिः शराभ्यामछिनत्त्रिधोजसा मुखेषु तं चापि शरैरताडयत्तस्मै गदां सोपि रुषा व्यमुंचत् ८ तामाप
तंतीं गदया गदां मृधे गदाग्रजो निर्बिभिदे सहस्रधा उद्यम्य बाहूनभिधावतोजितः शिरांसि चक्रेण जहार लीलया। १०
व्यसुः पपातांभसि कृत्तशीर्षो निकृत्तशृंगोद्रिरिवेंद्रतेजसा तस्यात्मजाः सप्त पितुर्वधातुराः प्रतिक्रियामर्षजुषः समु
वसु ६ द्यताः ११ ताम्रोंतरिक्षः श्रवणो विभावसुर्नभस्वानरुणश्च सप्तमः। पीठं पुरस्कृत्य चमूपतिं मृधे भौमप्रयुक्ता निरगन् धृ
तायुधाः १२ प्रायुंजतासाद्य शरानसीन् गदाः शक्त्यृष्टिशूलान्यजिते रुषोल्बणाः। तच्छस्त्रकूटं भगवान् स्वमार्गणै
रमोघवीर्यस्तिलशश्चकर्त ह तान् पीठमुख्याननयद्यमक्षयं निकृत्तशीर्षोरुभुजांघ्रिवर्मणः। स्वानीकपानच्युतच रु४
क्रसायकैस्तथा निरस्तान्नरको धरासुतः। निरीक्ष्य दुर्मर्षण आस्रवन्मदैर्गजैः पयोधिप्रभवैर्निराक्रमत् १४
दृष्ट्वा सभार्यं गरुडोपरि स्थितं सूर्योपरिष्टात्सतडिद्घनं यथा कृष्णं स तस्मै व्यसृजच्छतघ्नीं योधाश्च सर्वे युगप
च्च विव्यधुः १५ तद्भौमसैन्यं भगवान् गदाग्रजो विचित्रवाजैर्निशितैः शिलीमुखैः। निकृत्तबाहूरुशिरोध्रविग्रहं च २१
कार तर्ह्येव हताश्वकुंजरं १६

कृत्ता बाहवः ऊरवः शिरोधराः कंधराः विग्रहाश्च देहा यस्य तत् तर्ह्येव तं यदा विव्यधुः तस्मिन्नेव क्षणे १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा॰ उ॰ अस्त्राश्चर्यं कुरूद्वहेति संबोधनं तथाहि तैर्योनि प्रयुक्तानि शस्त्राणि तत्खंडनात् पूर्वमेव तत्सर्वसैन्यं हलाप श्चान्नान्यस्त्राणि च चिच्छेद तत्राप्येके स्त्रा १ शस्त्राणि १
केशस्त्रमस्त्रं च त्रिभिस्त्रिभिः शरैरित्याश्चर्यं १७ किंच गरुत्मतेति १८ यतः यया शक्त्या वज्रः प्रहित आस गरुडस्तेनाकंपत १९

यानि योधैः प्रयुक्तानि शस्त्रास्त्राणि कुरूद्वह हरिस्तान्यछिनत्तीक्ष्णैः शरैरेकैकशस्त्रिभिः उह्यमानः सुपर्णेन पक्षा २१
भ्यां निघ्नता गजान् १७ गरुत्मता हन्यमानास्तुंडपक्षनखैर्गजाः पुरमेवाविशन्नार्त्ता नरको युध्ययुध्यत १८ दृ
ष्ट्वा विद्रावितं सैन्यं गरुडेनार्दितं स्वकं तं भौमः प्राहरच्छक्त्या वज्रः प्रतिहतो यतः नाकंपत्तया विद्धो मालाहत इ म२
वद्विपः १९ शूलं भौमोऽच्युतं हंतुमाददे वितथोद्यमः तद्विसर्गात्पूर्वमेव नरकस्य शिरो हरिः अपाहरद्गजस्थ
स्य चक्रेण क्षुरनेमिना २० सकुंडलं चारुकिरीटभूषणं बभौ पृथिव्यां पतितं समुज्ज्वलत् हाहेति साध्वित्यृषयः
२८ सुरेश्वरा माल्यैर्मुकुंदं विकिरंत ईडिरे २१ ततश्च भूः कृष्णमुपेत्य कुंडले प्रतप्तजांबूनदरत्नभास्वरे सा
वैजयंत्या वनमालयार्पयत् प्राचेतसं छत्रमथो महामणिं २२ अस्तोषीदथ विश्वेशं देवी देववरार्चितं प्रांजलिः
प्रणता राजन् भक्तिप्रवणया धिया २३ देवी

गरुडे वितथोद्यमः २० १ प्रतप्तजांबूनदस्यानि रत्नानि तैर्भास्वरे मेरुवंशभूतं मंदरशिखरं महामणिं चार्पयदिति २२ २३॥ राम २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोश्वर्यंज्ञात्वाभूमिः स्तौतिनमस्त इति परमात्मन् देवाधेतयौमिन् २४ येनमंत्रेणकुंत्याः प्रसन्नः पूर्वमासीत्तेनमंत्रेणनमस्यतिनम
इति पंकजंनाभौयस्यतस्मैजगत्कारणायेत्यर्थः अतएवसत्कीर्तिमयीपंकजमालाविधृतयेस्यतस्मै एवंभूतधायत्तांपंक
जवत्सुप्रसन्नेतापापशमेननेत्रयस्यतस्मैपंकजवत्सुसंमेपंकजांकितौवाअंघ्रीयस्यतस्मैनमइति २५ किंचभगवतेनिर
तिशयैश्वर्यायावासुदेवायसर्वभूताश्रयाय अतोविष्णवेव्यापिने नहिसर्वभूताश्रयत्वंपरिच्छिन्नस्यसंभवतीतिकुतः सर्वोप्र

भूमिरुवाच नमस्तेदेवदेवेशशंखचक्रगदाधर भक्तेच्छोपात्तरूपायपरमात्मन्नमोस्तुते २४ नमः पं
कजनाभायनमः पंकजमालिने नमः पंकजनेत्रायनमस्तेपंकजांघ्रये २५ नमोभगवतेतुभ्यंवासु
देवायविष्णवे पुरुषायादिबीजायपूर्णबोधायतेनमः २६ अजायजनयित्रेऽस्यब्रह्मणेनंतशक्तये॥
परावरात्मन् भूतात्मन् परमात्मन्नमोस्तुते २७ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

यत्वंतत्राह पुरुषाय सर्वस्मात्कार्यात्पूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्वमितिश्रुतेः एतदपिकुतः आदिबीजाय॥
आदेर्जगत्कारणस्यापिकारणाय एवमपिनमृदादिवत् जाड्यमित्याहपूर्णबोधायेति २६ नन्वेवमपिस्वकारणात्पूर्व
सत्वंनस्यादतआह अजायेति स्वमजाय अन्यस्यजनयित्रे उभयत्रापिक्रमेणहेतुद्वयंब्रह्मणेबृहत्ते अनंतशक्तयेइ
ति वाबृहत्वादजत्वं अनंतशक्तित्वाज्जनयितृत्वमित्यर्थः ननुपित्रादयः पुत्रादीनांजनकाः तेषांचेतत्पूर्वं तेषांचभूता
नि तेषांचस्वकर्मद्वारेणजीवाः किमत्राह "परावरात्मन्नित्यादि पित्राद्यात्मत्वात्त्वमेवजनकइत्यर्थः २७ ॥राम राम

तत्राह १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिन १

भा०द०पू० ननु गुणविश्वोत्पत्त्यादिहेतवः ते च प्रधानस्यैव तस्य च पुरुषः क्षोभकः तत्र च कालो निमित्तिप्रसिद्धं किमत्राहं तत्राह त्वं चा
इति तमसो धारणेप्यसंवृत एवा स्थानाय पालनाय जगतः सृष्ट्याद्यर्थं उत्कटं रज आदि त्वमेव बिभर्षि सृजसीत्यर्थः काल
प्रधान पुरुषाश्च त्वद्व्यतिरिक्ता न संति त्वं तु परः सर्वव्यतिरिक्तः अतस्त्वमेव जनयितेत्यर्थः २८ कार्यकारण प्रपंचस्य तदव्य
तिरेकं तस्य च सर्वव्यतिरेकमुपपादयति अहमिति अहं भूमिः मात्राणीति देवा मन इति इंद्रियाणीति च त्रिविधाहं

त्वं वै सिसृक्षू रज उत्कटं प्रभो तमो निरोधाय बिभर्ष्यसंवृतः स्थानाय सत्त्वं जगतो जगत्पते कालः प्रधानं पुरुषो
भवान् परः २८ अहं पयो ज्योतिरथानिलो नभो मात्राणि देवा मन इंद्रियाणि कर्त्ता महानित्यखिलं चराच
२९ रं त्वय्यद्वितीये भगवन्नयं भ्रमः २९ तस्यात्मजोयं तव पादपंकजं भीतः प्रपन्नार्तिहरोपसादितः तत्पा
लयैनं कुरु हस्तपंकजं शिरस्यमुष्याखिलकल्मषापहं ३० श्रीशुक उवाच इति भूम्यार्थितो वाग्भिर्भ
गवान् भक्तिनम्रया दत्त्वाऽभयं भौमगृहं प्राविशत्सकलर्द्धिमत् ३१ तत्र राजन्यकन्यानां षट्सहस्रा
धिकायुतं भौमाहृतानां विक्रम्य राजभ्याददृशे हरिः ३२ तं प्रविष्टं स्त्रियो वीक्ष्य नरवीरं विमोहिताः मनसा
वव्रिरेभीष्टं पतिं दैवोपसादितं ३३ भूयात्पतिरयं मह्यं धाता तदनुमोदतां इति सर्वाः पृथक् कृष्णे भावेन
हृदयं दधुः ३४
कारकार्याणि कर्त्ताऽहंकारः २९ एवं स्तुत्वा प्रार्थयते तस्येति हे प्रपन्नार्तिहर तस्य नरकस्यायं भगदत्तो नाम भीतः अत
एवं मया तव पादपंकजमुपसादितः ३० अभयं दत्त्वा ३१ शताधिकमित्यपि ज्ञातव्यं यथाह पराशरः कन्यापुरे स कन्या राम
नां षोडशातुलविक्रमः शताधिकानि ददृशे सहस्राणि महामते इति राजभ्य इत्युपलक्षणं सिद्धादिभ्योपीति तथा २९
हि तेनैवोक्तं देवसिद्धासुरादीनां नृपाणां च जनार्दन हे त्वाहि सासुरः कन्यापुरे धनिजमंदिरे इति ३१ ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राहिणोत् प्रस्थापयामास सुमृष्टाः कमनीयाश्च ताः विरजोंबराश्च ताः नरयानैः शिबिकाभिः अपि च महाकोशान् निति ३५ ३६ सप्रि
यः सत्यभामासहितः ३७ ३८ गृहोद्याने निःकुटं तदुपशोभयति यः ३९ सेन्द्रान् विबुधान् निर्जित्य इत्नोद्रत्नमयाः संग्रामतो नीः
तत्र न नु कथं प्रसाधितस्वमनोरथेन श्रीकृष्णेन सहेन्द्रस्य संग्राम इत्याशंक्याह यया त्व इति अच्युते अर्थं साधनमिति च कर्म इ

ताः प्राहिणोद्वारवतीसुमृष्टविरजोंबराः नरयानैर्महाकोशान् रथाश्वान् द्रविणं हेम तत् ३५ ऐरावतकुले भांश्च
चतुर्दन्तांस्तरस्विनः पांडुरांश्चतुःषष्टिं प्रेषयामास केशवः ३६ गत्वासुरेन्द्रभवनं दत्त्वादित्यै च कुंडले प्र
जितस्त्रिदशेन्द्रेण महेन्द्राण्या च सप्रियः ३७ चोदितो भार्यया उत्पाट्य पारिजातं गरुत्मति आरोप्य सेन्द्रान्
विबुधान् निर्जित्योपानयत् पुरं ३८ स्थापितः सत्यभामाया गृहोद्यानोपशोभनः अन्वगुर्भ्रमराः स्वर्गात् तद्गंधा
सवलंपटाः ३९ ययाच आनम्य किरीटकोटिभिः पादौ स्पृशन्नच्युतमर्थसाधनं सिद्धार्थ एतेन विगृह्यते महा
नहो सुराणां च तमो धिगाढ्यतां ४० अथो मुहूर्त एकस्मिन् नानागारेषु ताः स्त्रियः यथोपयेमे भगवान् तावद्रूप
धरोऽव्ययः ४१ गृहेषु तासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः रेमे रमाभिर्निजकामसंप्लुतो य
थेतरो गार्हकमेधितांश्चरन् ४२

यं याचति धातोः विगृह्यते विग्रहं करोति महानपि तमः क्रोधः आढ्यतां धनिकतां ४० यथावत् अनेन देवक्यादिवधूजनसमाग
मापि प्रतिगृहं योगपद्येन सूचितः अव्ययः सर्वत्रापि संपूर्ण एव ४१ अहो भाग्यं नारीणामित्याह त्रिभिः गृहेष्विति अतर्क्याणि
कर्माणि करोतीति तथा सः निरस्तं साम्यमतिशयश्च येषां तेषु गृहेषु अनपायी अवस्थितः रमाभिः लक्ष्म्या अंशभूताभिः
निजकामसंप्लुतो स्वानंदपरिपूर्णः गार्हकमेधितान् गृहस्थस्य धर्मान् ४२

॥०३० अनुरागहाससहितमवलोकंच तत्पूर्वकं नवसंगमंच हृद्गतजल्पंच ता तस्मिन् लज्जांच भेजुः ४३ विश्रमणं संवाहनं केशप्रसारः केशवप्रसा
धनं दासीनां शतानि विधते यासां तथाभूता अपि स्वयं विभोर्दास्यं विदधुरिति ४४ इति दशम एकोनषष्टितमः ॥ अथ षष्टितमे कृष्णः
परिहासेन रुक्मिणीं कोपयित्वा ततः प्रेमकलहं तामसांत्वयत् रामारामजनानंदमहोदयविडंबनैः ॥१॥ रुक्मिण्या प्रेमकलहं दृष्टु
मनैश्वर्यमीये तस्व तल्पस्य स्वपर्यंकस्य १ वक्ष्यमाणं रुक्मिण्याः श्रियः कृष्णप्रेमरसं भावयितुं तस्योक्तमेव तत्त्वमनुस्मारयति प्रेम

इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां भेजुर्मुदाऽविरतमेधितयानुरागहासावलोकनवसंग
मजल्पलज्जाः ४३ प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः केशप्रसादशयनस्नपनोप
हार्यैः दासीशता अपि विभोर्विदधुः स्म दास्यं ४४ इति श्रीभागवते महापुराणे दशमस्कंधे पारिजातहरणे भौमवधे
३० बहुस्त्रीविवाहो नाम एकोनषष्टितमोऽध्यायः ॥ श्रीबादरायणिरुवाच कर्हिचित्सुखमासीनं स्वतल्पस्थं जगद्गु
रुं पतिं पर्यचरद्भैष्मी व्यजनेन सखीजनैः ॥१॥ यस्त्वेतल्लीलया विश्वं सृजत्यत्त्यवतीश्वरः स हि जातः स्वसेतूनां गो
पीथाय यदुष्वजः २ तस्मिन्नंतर्गृहे भ्राजन्मुक्तादामविलंबिना विराजिते वितानेन दीपैर्मणिमयैरपि ३ ॥ म
ल्लिकादामभिः पुष्पैर्द्विरेफकुलनादिते जालरंध्रप्रविष्टैश्च गोभिश्चंद्रमसोऽमलैः ४ पारिजातवनामोदवा
२ युनोद्यानशालिना धूपैरगुरुजै राजन् जालरंध्रविनिर्गतैः ५ श्रीराम श्रीराम श्रीराम श्रीराम ॥ श्री राम

पस्थिति २ आदौतावत् त्रिभिः श्लोकैर्मंदिरमनुवर्णयति तस्मिन्निति तद्गृहं नातिप्रसिद्धमाह भ्राजंती मुक्तादामानि तेषांवि ३०
लंबोऽस्ति यस्मिन् तेन वितानेन विराजिते तृतीयांतानां विराजितपदेनान्वयः सुगंधतया द्विरेफकुलैर्नादिते प्रविशद्भिश्चं
द्ररश्मिभिः ४ निर्गच्छद्भिः अगरुसंभव धूपैश्चातिमनोहरत्वं दर्शितं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७१

पयसः क्षीरस्य फनइवमृदुनि पर्यंकेस्यकशिपूत्तमे हंसतूलिकायां उपविष्टश्चासवत्त ६ तं देवाभिनयति वालव्यजनमिति ७ उपान्युतमच्यु
तस्य समीपे सामणिनूपुराभ्यां रेजे क्वणयती मणिमयौ नूपुरौ कूजयंती तथांगुलीयवलयव्यजनानि श्रयहस्तेहस्ताग्रयस्याः सा
वस्त्रांतनगूढौ स्थगितौ कुचौ तयोः कुंकुमेतनशोणाहारस्तस्य तथानितंवे धृतायापराद्ध्योत्र्यमूल्याकांचीतयाचरेजे ८ तांनि
रीक्ष्य प्रीतः सन् स्मयमानोहरिराव भाष केथंभूतां याली लया धृतनरतनोस्तस्यानुरूपं रूपं यस्याः तां तथोक्तं श्रीपराशरेणद

पयःफननिभेशुभ्रेपर्यंकेकशिपूत्तमे उपविष्टंसुखासीनं जगतामीश्वरं पतिं ६ वालव्यजनमादायरत्नदंडंसखीकरात् ५२
तेनवीजयतीदेवीउपासांचक्रेईश्वरं ७ सोपान्युतंक्वणयती मणिनूपुराभ्यां रेजेंगुलीवलयव्यजनाग्रहस्ता ॥ व
रूप ८ स्त्रांतगूढकुचकुंकुमशोणहारभासानितंबधृतयाचपराद्ध्यकांच्या ८ तांरूपिणींश्रियमनन्यगतिंनिरीक्ष्य याली
लयाधृततनोरनुरूपरूपां प्रीतःस्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधांहरिराबभाषे ९ श्रीभगवा
च राजपुत्रीप्सिताभूपैर्लोकपालविभूतिभिः महानुभावैःश्रीमद्भीरूपोदार्यबलोर्जितैः १० तान्प्राप्तानर्थि
नोहित्वाचैद्यादीन्स्मरदुर्मदान् दत्ताभ्रात्रास्वपित्राचकस्मान्नोववृषेसमान् ११ राजभ्योविभ्यतःसुभ्रुसमुद्रं
शरणंगतान् बलवद्भिःकृतद्वेषान्प्रायस्त्यक्तनृपासनान् १२ ॥ श्रीराम श्रीराम श्रीराम श्रीराम श्री

वेवेदवेदहायं मनुष्यत्वं च मानुषीविश्वमोर्देहानुरूपांवकरोत्यपामनस्तनुमिति किंच अलकेः कुंडलाभ्यां निष्केण पदकेनालंकृतं कंठे
नचाचतुर्दिक्षुशोभितं चवक्त्रे उल्लसती स्मितसुधायस्याः सा ९ सर्वगुणयुक्तायाअपि तवबुद्धिमदेस्याशयेनाहाराजपुत्रीसाद्धका
दशभिः हेराजपुत्रि लोकपालानामिव विभूतिरैश्वर्यंयेषांतैः तथामहाप्रभावैराढ्यैः रूपादिभिरूर्जितैश्च पूर्वमीप्सितासि ॥ १० तान्
हित्वानोस्मानसमान्कस्माद्वृतवत्यसित्वं ११ किंचप्रायशः राजभ्योजरासंधादिभ्योविभ्यतः भयंप्राप्नुवतः १२ ॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां अ२ किंचनाः १

भा०३ु० असपष्टवर्त्मनां अविज्ञाताचाराणां ४ अलोकपथं स्त्रीपारतंत्र्यं पदवीं मार्गं आस्थिताः अनुसृता १३ किंचानिः वयमिति ४ आत्मसमोपर
स्परमनुरूपं जन्मैश्वर्याभ्यां सहिता आकृतिरूपं जातिर्वा समा भवः आयतिः १५ न दीर्घा समीक्षा विचारा यस्यास्तया १६
अथ इदानीमपि १७ तर्हि किमित्यानीताहमिति चेदित्याशंक्याहावेद्येति ममभावद्विषंति ~ स्मयनुत्त्यं गर्वापनयनाय १९

असपष्टवर्त्मनां पुंसामलोकपथमीयुषां आस्थिताः पदवीं सुभ्रु प्रायः सीदंति योषितः १३ निः किंचना वयं शस्त्रिः किं
चनजनप्रियाः तस्मात्प्रायेण नराढ्यां नाभजंति सुमध्यमे १४ ययारात्मसमं वित्तं जन्मै श्वर्याकृति र्भवः तयार्विवाहो
मैत्री च नानत्तमाधमयोः क्वचित् १५ विदर्भ्येन त्वविज्ञाय त्वया दीर्घसमीक्षया वृतावयं गुणैर्हीना भिक्षुभिः श्लाघिता
३१ मुधा १६ अथात्मनो नुरूपं वै भज स्वक्षत्रियर्षभं येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे १७ चैद्यशाल्वजरासंध
दंतवक्त्रादयो नृपाः ममद्विषंति वामोरु रुक्मी चापि तवाग्रजः १८ तेषां वीर्यमदांधानां दृप्तानां स्मयनुत्तये आनी
तासि मया भद्रे तेजोपहरता सतां १९ उदासीना वयं नूनं न स्त्र्यपत्यार्थकामुकाः आत्मलब्धास्महे पूर्णा गेहयो
र्ज्योतिरक्रियाः २० बादरायणिरुवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव मन्यमानामविश्लेषात्तद्दर्पघ्न
उपारमत् इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं आश्रुत्य भीता हृदि जातवेपथुश्चिंतां दुरंतां म १
रुदती जगाम ह २२

स्त्रीणामतिदुःसहं मोदासीन्यमकामत्वं चाह उदासीना इति गेहयोर्देहगेहयोः कदासीनाः अतएव
ज२ ज्योतिः प्रदीपादिस्तद्वत्साक्षिमात्रयो क्रियारहिताः आस्महे वर्तामहे इति २० अविश्लेषात् अप्रियुक्ताः आत्मानं वल्लभामिवेत्य राम ३२
वार्थं इव शब्दः आत्मानमेव वल्लभां सर्वासु अहमेव वल्लभा नान्येति मन्यमानां गर्विताम् इत्यर्थः २१ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुकुलहे किंकौतुके सुखंवाःतत्राह अयंहीति नर्मैर्नर्मभिः यामः कालः ३१ २ भगवतस्तस्यैश्वर्ययुक्तं मुखं सव्रीडेन हासेन रुचि
रेणस्निग्धेनापांगेन वीक्ष्यमाणा असमत्वं भयंदुर्गोश्रयणं प्रवलैः कलिः अराजत्वम विज्ञातात्लौकिके हावसादनं निःकिंचनत्वं
तत्प्रीतिरात्मानादरणीयत्ताश्चैनो चित्यं निर्गुणत्वं चवृथा श्लाघा च भिक्षुभिः औदासीन्यमकामत्वं स्वदोषान् षोडशासत्तः अ

अयंहि परमो लाभो गृहेषु गृहमेधिनां यन्नर्मैर्नीयतेयामः प्रियया भीरु भामिनि ३१ श्रीशुक उवाच॥
सैवं भगवता राजन् वैदर्भी परिसांत्विता ज्ञात्वा तत्परिहासोक्तिं प्रियत्यागभयं जहौ ३२ वभाषे ऋष
भं पुंसां वीक्ष्यंती भगवन्मुखं सव्रीडहासरुचिरस्निग्धापांगेन भारत ३३ रुक्मिण्युवाच नन्वेवमेत
दरविंदलोचनाह यद्वै भवान् भगवतोऽसदृशी विभूम्नः क्वस्वेमहिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्र
वि
प्रकृतिरज्ञगृहीतपादा ३४

ज्ञत्वादीर्घदर्शित्वंभेष्यारात्वांवहन्नुगुणान् कृष्णनर्मोदितान् भेभ्यान्येषधस्तक्षुणस्त्वैवः भगवतः स्वनिंदापराणीवयानिवचनानिता
निसर्वोत्कर्षपरतया व्याचक्षाणा प्रतिभाषतेस्म ३३ तत्रयदुक्तं कस्मान्नाववृषेः समानिति तत्रासाम्यंसत्यमेवेत्याह नन्वेवमिति हे
अरविंदविलोचनत्र्यधीशः त्रयाणां ब्रह्मादीनामप्यधीशो नियंता त्वं क्वा क्वचाहं गुणप्रकृतिः त्रिगुणस्वभावा प्राकृतागुणमयी
प्रतिवो ननुत्वमेवाधीश्वरी श्रीः सर्वैरुपास्यत्वादिति अत आह अज्ञैः सकामैर्गृहीतौ पादौ यस्याः सा ३४ श्रीराम श्रीराम
९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टि २ न २
ति २

३० यदुक्तैराजभ्यो विभ्यतः सुभृशसमुद्रं वा सागरं गं तानिनिति ग्रोह स समि हेतु कर्मेति भयाभावं दर्शयति गुणाः शब्दादय एव राजंतइति राजानः स्ते
भ्यो भयादिवेति अंतः हृदय समुद्रे तत्र दृढ गाध विषयाकारेर परिछिन्न इत्यर्थः शेते निश्चलतया प्रकाशते उपलंभमात्रः चैतन्यघ
न आत्मा भवति बलवद्भिः कृतद्वेषानितियदुक्तं तदपि सत्यमित्याह नित्यमिति कदिंद्रियगणैः कुत्सितैर्वहिर्मुखैरिंद्रियगणैः
इत्यभिप्रायेण बहुवचनं कुत्सितइंद्रियगणाये षामितिवातिस्त्वनित्यकृतविग्रहः तेषु त्वयाप्रतीतिः यदुक्तं स्पैत्तेन पासनानि

सत्यं भयादिविगुणेभ्य उरुक्रमांतः शेते समुद्र उपलंभनमात्र आत्मा नित्यं कदिंद्रियगणैः कृतविग्रह स्त्वत्व
त्से वकैर्नृपपदं विधुतं तमोंधं ३५ त्वत्पादपद्मकरंद जुषां मुनीनां वत्मास्फुटं नृपशुभिर्ननु दुर्विभाव्यं "
३२ यस्मादलौकिकमिव हितमीश्वरस्य भूमं स्तवेहितमथो अनुयभवंत ३६ श्रीराम श्रीराम श्रीराम

तितद्युक्तमेवेत्याह त्वत्सेवकैरिति नृपाणां पदमासनं अंधं गाढतमएवतत्र अविवेकबहुलत्वात्वत्सेवकैरेवत्यक्तं किंपुन
र्वक्तव्यं त्वयात्यक्तमिति ३५ अस्पष्टवर्त्म नांपुंसामलोकपथमीयुषामितियदुक्तं तदपि तथैवेत्याह त्वत्पादेति नृपशुभिर्नि राम
राकारैः पशुभिः किंपुनर्वक्तव्यं तव वर्त्मास्फुटइति किंचा यस्माघ भवंतमनुवर्तंते तेषामपी हितमलौकिकमिवाञ ३२
तोऽतः किमुवक्तव्यं तवेश्वरस्य हितं अलौकिकमित्यर्थः आस्थिताः पदवीं सुमनु प्रायः सीदंतियोषित इत्यस्य परिहारं व
क्षतियद्वाद्वयेतिपंचमश्लोकि ३६
टि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निः किंचनावयं शश्वन्निःकिंचनजनप्रियाः तस्मात्प्रायेण न ह्याढ्या मां भजंतीति सुमध्यमे इत्यत्र श्लोको क्तं दोषत्रयं परिहरति निःकिंचन इ
ति दरिद्रता लक्षणा निःकिंचनत्वं तु भवतां न घटते इत्याह यस्मादिति अन्यत्र वलिभुजः पूज्या अपि ब्रह्मादयो यस्मै भवते बलिं ह
रंति तस्य सर्वेश्वरस्य भवतो दरिद्रता न घटत इत्यर्थः निःकिंचनजनप्रियात्वं तु सत्पुरुषेण बहुव्रीहिणा वा निदास्यादिति ख
यमुभयथा स्तोतिप्रेष्ठो भवानिति वलिभुजां ब्रह्मादीनां लोकेश्वराणां वा प्रेष्ठः ते पितृभूतत्वे तितस्मात्प्रायेण न ह्याढ्या मां भ
जंतीत्यस्यान्तरं न त्वा विंदंतीति आढ्यतया धीस्त्वां अतं केन विंदति अतस्ते असुतृपः असून् एव तर्पयंति न त्वां भजंतीत्यर्थः ३५

निःकिंचनो ननु भवान्यतो ऽस्ति किंचिद्यस्मै बलिं बलिभुजो ऽपि हरंत्यजाद्याः न त्वा विंदत्यसुतृपो ऽन्तकमाढ्यतांधाः प्रेष्ठो भवान्
वलिभुजामपि ते ऽपि तुभ्यं ३७ त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वांछया सुमतयो विसृजंति कृत्स्नं तेषां विभोसमुचि
तो भवतः समाजः पुंसः स्त्रियाश्च रतयोः सुखदुःखिनो नौ ३८ त्वं न्यस्तदंडमुनिभिर्गदितानुभाव आत्मात्मदश्च जग
तामिति मे वृतो ऽसि हित्वा भवद्भ्रुव उदीरितकालवेगध्वस्ताशिषो ऽब्जभवनाकपतीन् कुतो ऽन्ये ३९ श्रीराम श्री

वलिभुजामपि भवान्प्रेष्ठ इत्यत्र हेतुं वदंतीय योरात्म संमंवित्रमित्यनेनोक्तं मेनो विंत्यपरिहरति त्वं वा इति फलात्मा परमानंदरूपः ॥
एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः समाजः संबंध स्व कल्लक्षण संबंधः पुंसः स्त्रियाश्च मिथो रतयोः अत ए
व केनातत्कृतं सुखदुःखिनोः तदा कुलयोरित्यर्थः ३८ भिक्षुभिः श्लाघितामुधत्वस्य परिहारः त्वमिति भिक्षुपदव्याख्यानं न्यस्तदंडै
मुनिभिरिति मुधत्वस्य परिहारः आत्मेति यदर्थं सर्वं प्रियं भवति तस्य जगतामात्मनस्त्वाद्वरणे न नष्टत्वमित्यर्थः किंच आत्मद इति वेद भर्भ
तदविज्ञाय त्वया दीर्घसमीक्षयेति त्वस्मिन्नुक्तं दोषद्वयं परिहरति इतीति इति ज्ञात्वैव मेमया वृतो ऽसीत्यज्ञानपरिहारः हित्वेत्यदी
र्घसमीक्षणपरिहारः भवतो भ्रुवः सकाशादुदीरितात् कालः तस्य वेगः तेन ध्वस्ता आशिषो येषां तान् ब्रह्मादीनपि विहाय कुतो ऽन्ये वरा
काइत्यर्थः ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वाज्ञानं परिहृत्य पुरुषान्तरगुणवर्णनप्रदीप्तकोपसंरम्भेण तस्मिन्नेवाज्ञानमापादयति आज्ञमिति सिंहो यथा पशून्विद्राव्य स्वबलिं हरति
तथा शार्ङ्गधनुर्निनादेन वजरासंधादीन्विद्राव्य मां स्वभागं श्रियं यस्त्वं हृतवानसि तस्य तव राजभ्यो भयादुदधिं प्रपन्नइति यद्वचो भा
न३ षणं तदज्ञं मां घटते इत्यर्थः ४० यच्चान्यैस्य पृथ्व्वत्मना मित्यादिना ऽर्थाल्लोभजन्तः सीदन्तीत्यवसादनं श्रीभावहत्वं तदपि मद्देवेषाद्
हयद्वांछयेति यस्य तव भजनवांछया नृपोत्तमाः अंगो वेनस्य पिता वैन्यः पृथुः जायन्तो भरतः नाहुषो ययातिः गयश्चादिर्येषां
ते तव पदवीमार्गमाश्रिताः ते किं सीदन्ति न सीदन्त्येव अपि तु त्वत्पदं प्राप्ता इत्यर्थः एवं च कोपावेशेनावसादनस्य परिहारादस्य

आज्ञं वच त्वगदाग्रजयस्तुभूपान्विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वं सिंहो यथा स्वबलिमीश पशून्स्वभागं तेभ्यो भयाद्यदु
दधिं शरणं प्रपन्नः ४० यद्वांछया नृपशिखामणयोंगवैन्यजायन्तनाहुषगयादय ऐकपत्यं राज्यं विसृज्य विविशुर्वनमम्
३३ बुजाक्ष सीदन्ति तेनुपदवीं त इहास्थिताः किं ४१ कान्यं श्रयेत तव पादसरोजगंधमाघ्राय सन्मुखरितं जनताऽपवर्गं
लक्ष्म्यालयं त्वविगणय्य गुणालयस्य मर्त्यो सदोरुभयमर्थविविक्तदृष्टिः ४२ तं त्वानुरूपमभजं जगतामधीशमात्मा अस्संसा।
नमत्र च परत्र च कामपूरं स्यान्मे तवांघ्रिररणं सृतिभिर्भ्रमन्त्या यो वै भजन्तमुपयात्यनृतापवर्गः ४३ श्रीराम श्री

पृथ्व्वत्मना मित्येतदानंतर्यं विहायोत्कर्षः ४१ यच्चोक्तं अथात्मनोनुरूपमिति तत्राह कान्यमिति श्लोकद्वयेन गुणानामालयस्य तव पाद
सरोजगंधं जनताया अपवर्गं मोक्षरूपं लक्ष्म्या आलयं तत्त्वसंसक्तिमहद्भिर्मुखरितं वर्णितमाघ्राय तमविगणय्य मर्त्यो मरणधर्मिकास राम
दोरुभयं यस्य तं मर्त्यं का स्त्री श्रयेत सेवेत अर्थे विविक्ता दृष्टिर्यस्याः सा गुणालयस्य त्वनेन गुणैर्हीना इति यदुक्तं तदपास्तं ४२ अत ३३
स्त्वामेवाहमभजमित्याह तं त्वेति प्रार्थयते स्यादिति अरणं शरणं संसृतिभिर्देवतिर्यगादिजन्मभिः पाठांतरे त्वर्थवादं बहु त्वकर्मभि भ्र
वेणरित्यर्थः कथंभूतस्य तवांघ्रिः अनृतस्य संसारस्यापवर्गो नाशो यस्मात्सः भजन्तमुपयाति आत्मसात्करोति तस्य तवांघ्रिरिति
भीतस्य शरणमेवानुरूपं भजनेयोग्यं अतस्त्वामभजमित्यर्थः ४३

वा श्रुतिभिर्वेदैर्यागादिभिः जन्मभिः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येचोक्ता राज्ञांवहवोगुणाः राजपुत्री शिक्षिता भूपेर्लोकपालविभूतिभिरित्यादिना तत्रैसर्प्पसशापसंगुल्लिभंगवाहद्वाभ्यांतस्याः स्युरिति खरा
द्रुवेकावलेभारवोह्याः गांवावल्लीवद्दोइवृत्तिसंव्यापारक्लिष्टाः श्वानइवावमत्ताः विडालाइवक्षपणा हिंस्त्राअश्वेत्याइवकिंकराः नृपास्त
स्यादुर्भगायाः पत्युः स्युः यस्याः कर्णपथंत्वत्कथानप्राप्नुयादिति ४४ तथाहि तेपदाब्जमकरंदमंजिघ्रतीसतीयास्त्री विमूढासाका
तायमिति मतिर्यस्याः साकांतमतिर्जीवछ्वंभजति त्वगादिति शिर्वहिः विपिनद्धछन्नंअंतर्मांसादिमयमिति ४५ यदुक्तेमुदा

तस्यास्युरच्युतनृपाभवतोपदिष्टाः स्त्रीणांगृहेषुखरगोश्वविडालभृत्याः यत्कर्णमूलमरिकर्षणनोपयायाद्यु
ष्मत्कथामृडविरिंच्यसभासुगीताः ४४ त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफपित्तवातं ॥ सार
जीवंछ्वंभजतिकांतमतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री ४५ अस्त्वंबुजाक्षममतेचरणानुराग
आत्मन्रतस्यमयिचानतिरिक्तदृष्टेः यर्ह्यस्यवृद्धयउपात्तरजोतिमात्रोमामीक्षसेतदुहनःपरमानुकंपा
४६ नैवालीकमहंमन्येवचस्तेमधुसूदन अंबायाइवहिप्रायः कन्यायाःस्याद्रतिःक्वचित् ४७

सीनावयमित्यादितत्राह अस्त्विति यद्यपित्वंनिरपेक्षस्तथापिममत्तेचरणानुरागोस्तु मयिचमय्यपिनातिरिक्ताअतिशयवती
दृष्टिर्यस्यतस्यते आत्मन् आत्मन्येवरतस्यतेहितवेत्तनकोप्लाभः त्वच्चरणानुरागएवमहाँल्लाभः किंच यर्हिअस्यविश्वस्य
वृद्धयेउपात्तरजसः अतिमात्रेओकव्यंघनसेः तथाभूतःसन्मांसमीक्षसे उएवार्थेहहर्षे तदेवनःपरमानुकंपाअत्यनु
ग्रहइति ४६ तदेवंतदुक्तंसर्वप्रतिख्यास्वायप्रसन्नचित्तामंत्रमुपदिशंत्याहद्वाभ्यांनैवेति अथात्मनोनुरूपमित्यादितत्कवचः
अलीकंमिथ्येतिमेवमन्येयत्तालोकेकन्यायाएवक्वचिद्रतिर्भवति यथाकाशिराजकन्यानांअंबाअंबिकाअंबालिकानांति

सटीकंभागवतमूलचतुर्थस्कंधनिर्णयतात्पर्य १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊढायाः परिणीतायाश्चापीति उभयस्मादिहपरलोकद्वयात्च्युतो भ्रष्ट इति ४८ प्रलंभितानुपहसितासि अन्वात्थ अन्वाख्या
तवती ४९ मयि एकांतभक्तायास्ते कामाः संत्येव अकामाय निवृत्तये मोक्षपर्यवसायिन इत्यर्थः ५० अनुवादेन वराननुद्दा तामभि
नंदति उपलब्धमिति यद्यस्मान्मयि प्रवर्तमाना धीर्नापकर्षिता नान्यविषया जाता ५१ एकांतभक्तिमभिनंद्य तामेव द्रढी
कुर्वन् सकामान् भक्तान्निंदति ये मामिति दांपत्ये दंपत्युपभोग्यसुखार्थं ५२ मायामोहितत्वमेवोपपादयति मां प्राप्येति ॥

ऊढायाश्चापि पुंश्चल्या मनोभ्येति नवं नवं बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ४८ श्रीभगवानुवाच ॥
नर साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्रि प्रलंभिता ममोदितं यदन्वात्थ सर्वं तत्सत्यमेव हि ४९ यान्यानु कामयसे कामान्
मय्य कामाय भामिनि संति ह्येकांतभक्तायास्तव कल्याणि नित्यदा ५० उपलब्धं पतिप्रेम पातिव्रत्यं च ते नघे ॥
यद्वाक्यैश्चाल्यमानाया न धीर्मय्यपकर्षिता ५१ ये मां भजंति दांपत्ये तपसा व्रतचर्यया कामात्मानोऽपवर्गे
शं मोहिता मम मायया ५२ मां प्राप्य मानिन्यपवर्गसंपदं वाञ्छंति ये संपद एव तत्पतिं ते मंदभाग्या निरयेपि
ये नृणां मात्रात्मकत्वान्निरयः सुसंगमः ५३ दिष्ट्या गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी खलैः या
सुदुष्करासौ सुतरां दुराशिषो ह्यसुंभराया निकृति

अपवर्गेण सह संपदो यस्मिन् तं मां प्राप्य प्रसाधयेयं केवलं संपद एव विषयान् वांछंति न तु मां तत्पतिं तासां संपदां याहमेव पति
स्तं ये विषयान् निरयेपि श्वशूकरादिष्वपि भवेयुः तान् किंच तेषां मात्रात्मकत्वात् विषयात्मकत्वान्निरयः सुसंगमः शोभन
संगम एव स्यादतो मंदभाग्या इत्यर्थः ५३ हे गृहेश्वरि त्वया मयि भवमोचनी निः कामानुवृत्तिः कृतेत्यानंदि ष्टाभंग्र
कथंभूता खलैः सुदुष्करा दुराशिषो दुरभिप्रायाः अत एव असुंभरायाः प्राणतर्पणपरायाः निकृतिजुषो वंचनपरायाः स्त्रियाः

स्म १

किंच संतिनिःकामाः प्रेम्णैवमर्पेनुवर्त्तमानावद्धः किंतु त्वयासदृशीकापिनपश्यामीति तस्यांभक्तिबहुमानेनाभिनंदतिनत्वादृशीमिति
त्रिभिः उपश्रुताः सत्यः कथायस्यमे ५५ प्रोद्वाहपर्वणि अनिरुद्धविवाहे अक्षगोष्ठ्यांद्यूतसभायांतस्यभ्रातुर्वधंतस्मिन्काले कालांतरे
तदनुस्मरणतः पुनःपुनः समुत्थंदुःखमस्माभिरयोगोवियोगस्तद्भीत्याः सहः सोढवत्यसि अनेनैवाहानंतयमस्यज्ञातव्यं ५६ अपि
स्म १ चादूतेइति आत्मलभने मत्प्राप्त्यर्थंमयिचिरायतिशवोभाविनिविवाहे आगंतव्यमितिकृतेसमयकेथंचिद प्राप्तवतिसति एतद्दिशंवपुः

टहिमीं १ नत्वादृशींप्रणयिनींगृहेषुपश्यामिमानिनियया स्वविवाहकाले प्राप्तान्नृपानविगणय्यरहोहरोमेप्रस्थापितोद्विजउपश्रु
तसत्कथस्य ५५ भ्रातुर्विरूपकरणंयुधिनिर्जितस्यप्रोद्वाहपर्वणिचतद्वधमक्षगोष्ठ्यां दुःखंसमुत्थमसहोऽस्मद
योगभीत्यानैवाऽब्रवीः किमपितेनवयंजितास्ते ५६ दूतस्त्वयात्मलभनेसुविविक्तमंत्रः प्रस्थापितोमयिचि
रायतिशून्यमेतत् मत्वाजिहासइदमंगमनन्ययोग्यंतिष्ठेततत्त्वयिवयंप्रतिनंदयामः ५७ श्रीशुकउवाच
एवंसौरतसंलापैर्भगवान्जगदीश्वरः स्वरतोरमयारेमेनरलोकंविडंबयन् ५८ तथाऽन्यासामपिविभुर्गृ
हेषुगृहवानिव आस्थितोगृहमेधीयान्धर्मांल्लोकगुरुर्हरिः ५९ इतिश्रीभागवतेमहापुराणेदशमस्कंधे
रुक्मिणीसंवादेषष्टितमोध्यायः ॥

न्यमत्वाइदमनन्ययोग्यंअंगंजिहासत्यक्तुमिच्छामित्यक्षामीत्येवंदूतः प्रस्थापितः नथाह्युक्तंत्वयोद्वे त १
बुजाक्षनलभेयभवत्प्रसादंजह्यामसून्व्रतकृशान्शतजन्मभिः स्यादितियद्वा अजिहासइतिछेदः त्यक्तुमेच्छइत्यर्थः नत
वकमेत्वय्येवतिष्ठतुनचतत्त्वयितिकर्तुंशक्यमित्यर्थः किंतुकेवलंत्वांप्रतिनंदयामः हर्षयामइति ५७ सौरतसंपौलैः सुरतेनमंगो
ष्ठीभिः ५८ इतिदशमेषष्टितमः एकषष्टितमेशौरेः पुत्रपौत्रादिसंततिः अनिरुद्धविवाहेचरुक्मिणोरामतोवधः १ अष्टाधि
कशतद्व्यष्टसहस्रस्त्रीसमुद्भवान् कोदिशः पुत्रपौत्राहीन्हरिदारैरयोजयत् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदंतिताः २ ओसारासमतं २

७२

तदेववक्तुमाहाऐकैकशइतिकृष्णस्यावलाभार्याः सर्वाया आत्मनिसंपन्नयापितुः सकाशादनवमानु अन्यूनानु १ प्रेष्ठंन्यमंसत अच्युतस्य
प्रियतमंप्रत्येकंस्वंमेनिरे नतस्यतत्वमात्मारामत्वंन्यनकिंचयनचाविंति चार्वब्जकोशवदनं च आयतानि वाहुनेत्राणिचसप्रेमाहा
७२ सरसनवीक्षितानिचवल्गुजल्पाश्च भगवतोतेः संमोहितावनिताः स्वैः स्वैरनेकैर्विभ्रमैस्तस्यमनोविजेतुंहेतुंनसमशकनुनशक्ताविभ्
वुः विभ्रमनः परिपूर्णस्य २ तासांविभ्राणांमावर्णयन्नेतद्विशेषणातिस्मायेति स्मायागूढहसितंतद्युक्तोऽवलोकलवः कटाक्षस्तेन
मा

श्रीशुकउवाच ऐकैकशस्ताः कृष्णस्यपुत्रानूदशदशावलाः अजीजननननवमान्पितुःसर्वात्मसंपदा १ गृहाद
३४ नपगंवीक्ष्यराजपुत्र्योऽच्युतंस्थितं प्रेष्ठंन्यमंसतस्वंस्वंनतत्तत्वविदःस्त्रियः २ चार्वब्जकोशवदनायतवाहुनेत्र
सप्रेमहासरसवीक्षितवल्गुजल्पैः संमोहिताभगवतोनमनोविजेतुंस्वैर्विभ्रमैःसमशकन्वनिताविभ्र्वन्यः
३ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः पत्न्यस्तुषोडशसहस्रमनंगवा
णैर्यस्येंद्रियंविमथितुंकरणैर्नशेकुः ४ इत्थंरमापतिमवाप्यपतिंस्त्रियस्ताब्रह्मादयोपिनविदुःपदवींयदीयां
भेजुर्मुदाऽविरतमेधितयानुरागहासावलोकनवसंगमलालसाद्यम् ५ ३५

दर्शितः सूचितोभावोऽभिप्रायस्तेनहारिमनोहरणशीलंयद्भ्रूमंडलंतेनप्रहिताः प्रस्थापितायेसौरतामंत्राः तेषुशौंडैः प्रगल्भैरन
नंगस्यवाणैः शरैरन्यैश्चकरणैः कामशास्त्रप्रसिद्धैः यस्येंद्रियंमनोविमथितुंक्षोभयितुंषोडशसहस्रमपिपत्न्योनशेकुरिति ४ अनु
रागेणहासोवलोकश्चनवसंगमेलालसंमोत्सुक्यंचतैराद्यायस्यविभ्रमकंदेवस्यतंभेजुः अनुरागहासावलोकेनवसंगमला
लसात्तयंभेजुः नस्यमनोविजेतुंनशेकुरितिवा ॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मान स्म

किंतु प्रत्युद्गमनादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति प्रौढभावं विपिनवसंगमाद्यभिधानं अगतसारं खेनोत्सुक्यं न च तथा प्रतीतिः तेषामेव श्लो
कानां प्रस्तावांतरे पुनः पुनरावृत्तिरिति सांदर्यति ५ ६ प्रासंगिकमुक्त्वा प्रकृतमाह तासामिति दश दश पुत्रा यासां तासां मध्ये अष्टौ महि

प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः केशप्रसाधनशयनस्नपनोपहार्यैर्दासीशता अपि
विभोर्विदधुः स्म दास्यं ६ तासां या दशपुत्राणां कृष्णस्त्रीणां पुरोदिताः अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते
७ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् सुचारुश्चारुगुप्तश्च भद्रचारुस्तथाऽपरः ८ चारुचंद्रो विचारुश्च
चारुश्च दशमो हरेः प्रद्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ९ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा
चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश १० सांबः सुमित्रः पुरुजि
च्छतजिच्च सहस्रजित् विजयश्चित्रकेतुश्च वसुमान् द्रविडः क्रतुः जांबवत्याः सुता ह्येते सांबाद्याः पितृसं
मताः ११ वीरश्चंद्रोऽश्वसेनश्च चित्रगुर्वेगवान् वृषः आमः शंकुर्वसुः श्रीमान् कुंतिर्नाग्नजितेः सुताः १२
श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोऽवरः १३ प्रघोषो गात्रवान्
सिंहो बलः प्रबल ऊर्ध्वगः माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः १४ वृको हर्षोऽनिलो गृध्रो वर्द्ध हर्षोः
नोऽन्नाद एव च महांशः पावनो वह्निर्मित्रविंदात्मजाः क्षुधिः १५ श्रीराम श्रीराम श्रीराम श्रीराम

ष्यायाः प्रागुक्तास्तत्पुत्रानिति ७ ११ श्रीमानिति वसोः कुंतेर्वा विशेषणं १२ भद्रो नाम एकलः एकः सोमकश्चावरः कनीयान् एते
कालिंद्याः सुता इति १३ माद्र्याः लक्ष्मणायाः क्षुधिर्दशमः एते मित्रविंदात्मजाः १५ श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेववक्तुमाहाएकैकश इति कृष्णस्यावलाभार्याः सर्वाया आत्मनि संपन्नया पितुः सकाशादनवमानु अन्यूनानु १ प्रेष्ठं न्यमंसत अच्युतस्य
प्रियतमं प्रत्येकं स्वं मेनिरे न तस्य तत्त्वमात्मारामत्वं न किंचयन चाविंति चार्वब्जकोशाद्दनं च आयतानि बाहुनेत्राणि च सप्रेमाणि हा
७२ सरसेन वीक्षितानि च वल्गुजल्पाश्च भगवत्पतेः संमोहिता वनिताः स्वैः स्वैरनेकैर्विभ्रमैस्तस्य मनो विजेतुं हर्तुं न समशकन् न शक्ता बभू
वुः विभूम्नः परिपूर्णस्य ३ तासां विभ्रमा भावणेयन्ने नहि दृश्यत इति स्मायेति स्माया मूढहसितं तद्युक्ताः अवलोकलवः कटाक्षस्तेन
मा

श्रीशुक उवाच एकैकशस्ताः कृष्णस्य पुत्रान्दशदशावलाः अजीजनंननवमान्पितुः सर्वात्मसंपदा १ गृहाद
३५ नपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितं प्रेष्ठं न्यमंसत स्वं स्वं न तत्तत्त्वविदः स्त्रियः २ चार्वब्जकोशवदनायतबाहुनेत्र
सप्रेमहासरसवीक्षितवल्गुजल्पैः संमोहिता भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनिता विभूम्नः
३ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः पत्न्यस्तु षोडशसहस्रमनंगबा
णैर्यस्येंद्रियं विमथितुं करणैर्न शेकुः ४ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयोपि न विदुः पदवीं यदीयां
भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंगमलालसाद्यम् ५ ३५

दर्शितः सूचितो भावोऽभिप्रायस्तेन हारि मनोहरणशीलं यद्भ्रूमंडलं तेन प्रहिताः प्रस्थापिता ये सौरता मंत्राः तेषु शौंडैः प्रगल्भैर
नंगस्य बाणैः शरैरन्यैश्च करणैः कामशास्त्रप्रसिद्धैः यस्येंद्रियं मनो विमथितुं क्षोभयितुं षोडशसहस्रमपि पत्न्यो न शेकुरिति ४ अनु
रागेण हासावलोकश्च नवसंगमे लालसं मोत्सुक्यं च तेन आद्याय स्य विभ्रमकेदं वस्य तं भेजुः अनुरागहासावलोकनवसंगमला
लसा तु यं भेजुः नास्य मनो विजेतुं न शेकुरिति वा ॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतु प्रत्युद्गमनादिभिर्विभोस्तस्य दास्यं नित्यं विदधुरिति ॥ प्रौढभावो विपिनवसंगमाद्यभिधानं अगतसारं त्वेनोत्सुक्येन च तथा प्रतीतिः तेषामेव श्लो [मान] [द्य]
कानां प्रस्तावांतरे पुनः पुनरावृत्तिरिति सांदर्यात ५ ६ प्रासंगिकमुक्त्वा प्रकृतमाह तासामिति दशादशपुत्रा यासां तासां मध्ये अष्टौ महि

प्रत्युद्गमासनवराहणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः केशप्रसाधशयनस्नपनोपहार्यैर्दासीशता अपि
विभोर्विदधुः स्म दास्यं ६ तासां या दश पुत्राणां कृष्णस्त्रीणां पुरोदिताः अष्टौ महिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामि ते ॥
७ चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ८ चारुचंद्रो विचारुश्च
चारुश्च दशमो हरेः प्रद्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ९ भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा
चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश १० सांबः सुमित्रः पुरुजि
च्छतजिच्च सहस्रजित् विजयश्चित्रकेतुश्च वसुमान्द्रविडः क्रतुः जांबवत्याः सुता ह्येते सांबाद्याः पितृसं
मताः ११ वीरश्चंद्रोऽश्वसेनश्च चित्रगुर्वेगवान्वृषः आमः शंकुर्वसुः श्रीमान्कुंतिर्नाग्नजितेः सुताः १२ ॥
श्रुतः कविर्वृषो वीरः सुबाहुर्भद्र एकलः शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोऽवरः १३ प्रघोषो गात्रवान्
सिंहो बलः प्रबल ऊर्ध्वगः माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः १४ वृको [हर्षो]ऽनिलो गृध्रो वर्धनो
न्नाद एव च महांशः पावनो वह्निर्मित्रविंदात्मजाः क्षुधिः १५ श्रीराम श्रीराम श्रीराम श्रीराम

ष्यायाः प्रागुक्तास्तत्पुत्रानिति ७ ११ श्रीमानितिवसोः कुंतेर्वा विशेषणं १२ भद्रो नाम एकलः एकः सोमकः अवरः कनीयान् एते
कालिंद्याः सुता इति १३ माद्र्याः लक्ष्मणायाः क्षुधिर्दशमः एते मित्रविंदात्मजाः १५ श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०३० वर्णाश्रमकुलेभ्योऽपेतोऽब्रह्मत्वात् अनामगोत्रमितिश्रुतेः अत एवानधिकारित्वात् सर्वैः धर्मैः बहिःकृतः स्वैरवर्त्ती परमेश्वरत्वात् अत एव
निर्गुणः तमआदिहितत्वात् एवंभूतो जीवानां याप्यतुच्छ सपर्यामात्रं कथमर्हतीत्यर्थः ३६ अपि चाकथं वर्णानीयां मादृशोऽरेषां यद्देनां महि
मायस्मादेषां कुलं पयातिनो शतमपि किं सङ्क्रिवे हि कृतं अपितु शिरसा धृतं किंच अस्मदादिकुलवत् किं स्वथापानरतं अपि वर्तिनियं
ताचारमित्यर्थः अहा यद्देनामेवनावदीदृशं माहात्म्यं यदुतकुलं द्वंद्वमध्ययं यातः शापान्प्रभूदित्यादि अयं तु साक्षादीश्वरः अतः सपर्या
मात्रं कथमर्हतीत्यर्थः ३७ किंच ये राजानो दुष्टाननुच्चारयंति तद्दृष्टे काकदादिदेशानप्याश्रयंति एतत्तु ब्रह्मर्षिसेवितानपदेशानपि

वर्णाश्रमकुलापेतः सर्वधर्मबहिःकृतः स्वैरवर्त्ती गुणोहीनः सपर्यां कथमर्हति ३७ ययातिनेषां हि कुलं शप्तं
सङ्क्रिवे हि कृतं स्वथापानरतेशश्वत्स पर्य्यां कथमर्हति १७ ब्रह्मर्षिसेवितान् देशान् हित्वैतद्ब्रह्मवर्चसं समु
द्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः ३८ एवमादीन्यभद्राणि भाषमाणं नष्टमंगलः नोवाच किंचिद्भगवान्
सिं० यथा हिः शिवाकृते ३६ भगवन्निंदनं श्रुत्वा दुःसहं तत्सभासदः कर्णौ पिधाय निर्जग्मुः शपंतश्चादिपं रुषा ४०

त्य अब्रह्मवर्चसं समुद्रं दुर्गमपि हित्वा हापर्यित्वे त्यर्थः बाधंते तथायाः दस्यवः प्रजाः ताश्च अयमर्थः वेदतदर्थाभियोगाद्ब्रह्मवर्चसं त राम
द्विलिंगधारिणं पाषंडमित्यर्थः ते लिंगात्याज पित्वा बाधंते दंडयंति कथंभूतं दुर्गं धर्मवत्वरीतेर धर्मेत्व दुर्ज्ञेयमित्यर्थः तथा द ६७
स्यवः दस्यूनपि प्रजा विषाणावर्तमानानु दंडयंति अतो यदुभ्योऽन्यः को नाम धार्मिकोऽस्तीति पारुष्यं तत्त्वानार्थमेव ३८ शि
रुब्रह्मवर्चसं समुद्रं त्रलिंगं तत्सहितं समुद्रं वांफरुः तथा श्रुतं श्रुत्वा यथा सिंहो न किंचित् श्रूनादम ३६ ४०
वेदविरुद्ध २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ तावदुत्थायेत्यस्यायमभिप्रायः एष मत्पार्षदो मत्तुल्यबलः सर्वानेतान्हन्यात् अतो मयैव शीघ्रं हन्तव्य इति तत्क्षणमेवोत्थाय शिरो जहारेति
४४ ४६ नन्वेवं निंदकस्य कथं वासुदेवप्रवेशः तत्राह जन्मत्रयेप्यनुगुणितं मनुवर्णितं यद्वैरं तेन संरब्धया आविश्य यात तन्मयतां ततः स्व

निंदां भगवतः श्रृण्वंस्तत्परस्य जनस्य वा ततो नापैति यः सोपि यात्यधः सुकृताच्युतः ४१ ततः पांडुसुताः क्रुद्धा मत्स्यकैके
यसृंजयाः उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ४२ ततश्चैद्यस्त्वसंभ्रांतो जगृहे खड्गचर्मणी भर्त्सयन्कृष्ण
पक्षीयान्राज्ञः सदसि भारत ४३ तावदुत्थाय भगवान्स्वान्निवार्य स्वयं रुषा शिरः क्षुरांतचक्रेण जहारापततो रिपोः
४४ शब्दः कोलाहलोथासीत् शिशुपाले हते महान् तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ४५ चैद्यदेहो-
त्थितं ज्योतिर्वासुदेवमुपाविशत् पश्यतां सर्वभूतानामुल्केव भुवि खाच्च्युता ४६ जन्मत्रयानुगुणितवैरसं
जा रब्धया धिया ध्यायंस्तन्मयतां यातो भावो हि भवकारणं ४७ ऋत्विग्भ्यः सदस्येभ्यो दक्षिणां विपुलामदा स
त् सर्वान्संपूज्य विधिवच्चक्रेऽवभृथमेकराट् ४८ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः उवास
कतिचिन्मासान् सुहृद्भिरभियाचितः ४९ ततोनुज्ञाप्य राजानमनिच्छंतमपीश्वरः ययौ सभार्यः सामात्यः
स्वपुरं देवकीसुतः ५० वर्णितं तदुपाख्यानं मया ते बहुविस्तरं वैकुंठवासिनोर्जन्म विप्रशापात्पुनः पुनः ५१ ॥
राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ५२ श्रीराम श्रीराम

रूपतां यातः पुनः पार्षदो बभूवेत्यर्थः अत्र हेतुः भावो हीति भावो भावना अनुध्यानं भवस्य ध्येयाकारजन्मनः कारणं पेशस्कारि
ध्यानेन कीटो हि तथा दृष्टत्वादित्यर्थः ४७ ५० ५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०२०३०

श्री

सुरमानवाः खेचराः प्रमथाश्च ५३ पापं धर्मद्विषश्चात्र हेतुः कलिकल्मषं शंकरगाएव कुरुकुलस्यामयं आधिनाशके ५४ वितानं यूतं च ५५ दश
मे चतुः सप्ततितमः पंचयुक् सप्ततितमे यज्ञावभृथ संभ्रमः सुयोधनस्य चाक्षांत्या मानभंगादृशि भ्रमान् दुर्योधनस्यैके स्थैयवु दुः खका
रणं प्रेक्षमुक्तमनुवदति अजातशत्रोरिति १ इतिश्रुत्वा तन्मुखोदंवत्यथ १ २ दुर्योधनस्यासहनकारणं तन्नयागमहात्म्यमेवपुनः

राज्ञासभाजिताः सर्वे सुरमानवखेचराः कृष्णं कृतं च शंसंतः स्वधामानि ययुर्मुदा ५३ दुर्योधनमृतेपापं कलिंकु
८८ रुकुलामयं योनसेहे श्रियं स्फीतां दृष्ट्वा पांडुसुतस्यतां ५४ यइदं कीर्तयेद्विष्णोः कर्म चैद्यवधादिकं रा
जमोक्षं वितानं च सर्व पापैः प्रमुच्यते ५५ इति श्री भागवते महापुराणे दशमस्कंधे शिशुपालवधश्चतुः सप्तति
तमोध्यायः राजोवाच अजातशत्रोस्तं दृष्ट्वा राजसूयमहोदयं सर्वे मुमुदिरे ब्रह्मन् नृदेवा ये समागताः १
दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः इति श्रुतं नो भगवंस्तत्र कारणमुच्यतां २ ऋषिरुवाच पितामहस्य ते ८८
बांधवः यज्ञे राजसूये महात्मनः परिचर्यायां तस्यासन् प्रेमबंधनाः ३ भीमो महानसाध्यक्षो धनाध्यक्षः सुयोध
नः सहदेवस्तु पूजायां नकुलो द्रव्यसाधने ४ गुरुशुश्रूषणे जिष्णुः कृष्णः पादावनेजने परिवेषणे द्रु
पदजा कर्णो दाने महामनाः ५ युयुधानो विकर्णश्च हार्दिक्यो विदुरादयः वाह्लीकपुत्रा भूर्याद्या ये च ७
संतर्दनादयः ६ निरूपिता महायज्ञे नाना कर्मसु ते तदा प्रवर्त्तंते स्म राजेंद्र राज्ञः प्रियचिकीर्षवः ७ ७७

७१ सिंहावलोकनेन निरूपयति पितामहस्येत्यादि एकदा तु पुरतस्य तस्य प्राक्तेन नग्रंथन प्रेमबंधनाः प्रेमयंत्रिताः ३ पू
जायां संमाने द्रव्यस्य धननामावरुके संपादने ४ गुरुशुश्रूषणे चंदनालेपनादौ ५ ६ निरूपिताः नियुक्ताः संतो नानाक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋत्विजश्च सदस्याश्च सभासदः बहुविदश्चेतेषु स्विष्टेषु सम्यक्पूजितेषु सूनृतं प्रियवाक् समर्हणमलंकारादि दक्षिणाश्च प्रसिद्धास्ता
भिः द्युनद्यां गंगायां ८ ए ९ १० चित्राणि ध्वजपताकाग्राणि येषु तैरिभेंद्रैः स्पंदनैः अर्वभिरश्वैर्भटैश्च एवं चतुरंगैः सैन्यैर्निर्ययुः ११ यजमा
नो युधिष्ठिरः पुरःसरो येषां ते १२ सदस्या ऋत्विजोन्ये च द्विजश्रेष्ठाः निर्ययुः १३ किं चागंधादिभिः स्वलंकृताः नरा नार्यश्च मिथो विज

मू१ ऋत्विक्सदस्यबहुवित्सु सुहृत्तमेषु स्विष्टेषु सूनृतसमर्हणदक्षिणादिभिः चैद्ये च सात्वतपतेश्चरणं प्रविष्टे चक्रुस्ततस्त्ववभृ
थस्नपनं द्युनद्यां ८ मृदंगशंखपणवधुंधुर्यानकगोमुखाः वादित्राणि विचित्राणि नेदुरावभृथोत्सवे ९ नर्तक्यो
श्लो३ ननृतुर्हृष्टा गायका यूथशो जगुः वीणावेणुतलोन्नादस्तेषां स दिवमस्पृशत् १० चित्रध्वजपताकाग्रैरिभेंद्रस्यंदना
र्वभिः स्वलंकृतैर्भटैर्भूपा निर्ययू रुक्ममालिनः ११ यदुसृंजयकांबोजकुरुकेकयकोशलाः कंपयंतो भुवं सैन्यै १८
र्यजमानपुरःसराः १२ सदस्यर्त्विक्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः १३
स्वलंकृता नरा नार्यो गंधस्रग्भूषणांबरैः विलिंपंत्योभिषिंचंत्यो विजह्रुर्विविधै रसैः १४ तैलगोरससगंधोदह
रिद्रासांद्रकुंकुमैः पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः १५ गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा
दिवि विमानवरैर्नृदेव्यः ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः १६

हुः १४ रसा नवाहे तैलेति किंच सांद्रकुंकुमादिभिः पुंभिर्लिप्तास्तान् प्रलिंपंत्यो वारयोषितश्च विजह्रुः १५ नृभिर्गुप्ताः रथादिया
नैर्नृदेव्यो राजपत्न्यो निरगमन् निरगुः एतदुपलब्धुं विमानवरैर्देव्यो यथा तद्वत् मातुलेयाः सखिभिश्च परितः सिच्यमानाः स
व्रीडेन हासेन विकसंति वदनानि यासां ताः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० देवराननुपतिभ्रातॄन् उत्तरसखीन् सखीनपि वृत्तीभिः उदकेनोदनचर्मयंत्रैः सेचनपात्रैः अमलधियां कामिनां १७ क्रियाभिः अंगक्रियाभिः
ऋतुराट् सशरीरो राजसूययज्ञ इव १८ पत्नीसंयाजो यागविशेषः अवभृथसंबंधि आवभृथ्यं चेतेअरिवानानुष्ठीयन्त्यर्थः १९ २०

तांदेवरानुतसखीन् सिषिचुर्दृतीभिः क्लिन्नांबरा विवृतगात्रकुचोरुमध्याः औत्सुक्यमुक्तकवराच्च्यवमानमाल्याः भा १
क्षोभं दधुर्मलधियां रुचिरैर्विहारैः १७ स सम्राड् रथमारूढः सदश्वं रुक्ममालिनं व्यरोचत स्वपत्नीभिः क्रि
याभिः क्रतुराडिव १८ पत्नीसंयाजावभृथ्यैश्चरित्वानतमृत्विजः आचांतं स्नापयांचक्रुर्गंगायां सह कृष्ण
नि४ या १९ देवदुंदुभयो नेदुर्नरदुंदुभिभिः समं मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः २० सस्नुस्तत्र ततः सर्वे
प वर्णाश्रमयुता नराः महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् २१ अथ राजाऽहते क्षौमे परिधाय स्वलंकृतः
ऋत्विक्सदस्यविप्रादीनानर्चाभरणांबरैः २२ बंधुज्ञातिनृपान् मित्रसुहृदोन्यांश्च सर्वशः अभीक्ष्णं पू
जयामास नारायणपरो नृपः २३ सर्वे जनाः सुररुचो मणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः
नार्यश्च कुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः २४ अथर्त्विजो महाशीलाः सदस्या
ब्रह्मवादिनः ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः २५ देवर्षिपितृभूतानि लोकपालाः सहानुगाः
पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप २६ हरिदासस्य राजर्षे राजसूयमहोदयं नैवातृप्यन्प्रशंसंतः पिबन्मर्त्यो राज
मृतं यथा २७ राम

अहते नूतने आनर्च अर्चितवान् २२.२३ सुराणामिव रुक् कांतिर्येषां मणिकुंडलैः सहिताः स्रगु ६९
ष्णीषादयो येषां ते कुंडलयुगेनालकैश्च वृंदेन च जुष्टं वक्त्रश्रीर्यासां ताः २४ २५ २६ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता पिः २८ २९ गतज्वरः निर्श्रितः श्रमितः ३० अच्युतेऽस्वात्मा यस्य तस्य ३१ नरेन्द्रादीनां लक्ष्मीर्दुःस्था विभूतयः विश्वसृजा मयेन उपक्लृप्ताः विरचि
ताः सहः कुरुराट् दुर्योधनोऽतप्यत ३२ महिषीसहस्रमिति बहुत्वोपलक्षणं क्वणद्भिः अङ्घ्रिभिः शोभा यस्य मध्यसु चारु मध्यमित्यर्थः कु
चकुंकुमैः शोणो हारो यस्य तत् चैलैः कुंडलैः कुंतलैश्च आढ्यं संपन्नमशोभनेति शेषः ३३ क्वापि कदाचित्सवि रेऽ इति शेषः स्वयं च जे

तत्रायुधिष्ठिरो राजा सुहृत्संबंधिबांधवान् प्रेम्णा निवासयामास कृष्णं च त्यागकातरः २८ भगवानपि तत्रांग न्यवात्सीत्
त्प्रियंकरः प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं २९ इत्थं राजा धर्मसुतो मनोरथमहार्णवं सुदुस्तरं समुत्तीर्य कृ
सुरे ष्णेनासीद्गतज्वरः ३० एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः श्रियं अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ३१ यस्मि
न्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना विभांति किल विश्वसृजोपक्लृप्ताः ताभिः पतीन्द्रुपदराजसुतोपतस्थे यस्यां
विषक्तहृदयः कुरुराडतप्यत् ३२ यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं मध्य
जै सुचारु [illegible] कुचकुंकुमशोणहारं श्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यं ३३ सभायां मयक्लृप्तायां क्वापि धर्मसु
तोऽधिराट् वृतोऽनुगैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ३४ आसीनः कांचने साक्षादासने मघवानिव पारमेष्ठ्यश्रि
याजुष्टः स्तूयमानश्च बंदिभिः ३५ तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृप किरीटमाली न्यविशदसिहस्तः क्षि
पन्रुषा ३६ स्थलेऽभ्यगृह्णाद्वस्त्रान्तं जलं मत्वा स्थले पतन् जले च स्थलवद्भ्रांत्या मयमायाविमोहितः ३७

चक्षुषा हिताहितज्ञापकेन ३४ ५ मानी साहंकारः किरीटं च माला च विद्येते यस्य सः न्यविशत् विवेश क्षिपन् हास्यादीन् अधिक्षिपन्
३६ तत्र स्थले वस्त्रान्तमभ्यगृह्णात् आकुंचितवान् कुतस्तस्मिन् स्थले एव भ्रांत्या जलं मत्वा जले च अपतत् कुतः स्थलवत् भ्रांत्या ३७
रे वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० उ० ३८ भुवो भारं जिहीर्षुरिति श्रद्धसंपादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मंत्वेति किंचायस्य दृशा दृष्टिमात्रेणा दुर्योधनो भ्रमं निरभ्रांति शापभयमा यातु निमित्तमात्रं सः भूभारहरणबीजं दुर्योधनभ्रमं भीमादिहास्येन च तस्य पराभवं विधायेतु ष्णीमासीदि त्यर्थः ३९ ४० दशमे पंचसप्ततितमः ततः षट्सप्ततितमे शाल्वमहामृधे द्युमत्कृताप्रहारेण रणात्प्रद्युम्ननिर्गमः

जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयोऽपरे निवार्यमाणा अप्यंग राज्ञा कृष्णानुमोदिताः ३८ सव्रीडितोऽवाग्वदनो रुषा ज्वलन् निष्क्रम्य तूष्णीं प्रययौ गजाह्वयं हाहेति शब्दः सुमहानभूत्सतामजातशत्रुर्विमना इवाभवत् बभूव तूष्णीं भगवान् भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा ३९ एतत्तेऽभिहितं राजन् यत्पृष्टोऽहमिह त्वया
७० सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ४० इति श्रीभागवते महापुराणे दशमस्कंधे दुर्योधनस्य मानभंगो नाम पंचसप्ततितमोऽध्यायः शुक उवाच अथान्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप क्रीडानरशरीरस्य यथा सौभपतिर्हतः १ शिशुपालसखः शाल्वो रुक्मिण्युद्वाह आगतः यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा २ शाल्वः प्रतिज्ञामकरोच्छृण्वतां सर्वभूभुजां अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत ३ इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं आराधयामास नृपः पांसुमुष्टिं सकृद्ग्रसन् ४ संवत्सरांते भगवानाशुतोष उमापतिः वरेण छंदयामास शाल्वं शरणमागतं ५ राम
संपाद्य धर्मराजस्य राजसूयं महोदयं निहत्य सौभराजादीन् यथापारमदच्युतः ७०
२ ३ प्रत्यहं सकृत्पांसुमुष्टिमेकामश्नन् भक्षयन् ४ संवत्सरांत इति श्रीशुको पि भगवानुमापतिः श्रीकृष्णविद्विषि शाल्वेऽवश्यं वै २
फलं भन्यमानानश्रीघ्रं प्रादुरभूत् तस्याति निर्बंधमालक्ष्य संवत्सरांते च वरेण छंदयामास इच्छाकारितवान् वरं च गृहाणेत्युक्तवांश्चेत्यर्थः ५

तथेति प्रतिज्ञाय गिरिशेनादिष्टः अयस्मयं लोहमयं पुरं सौभसंज्ञं निर्माय चैव यित्वा प्रादात् ७ तमसो धकारस्य धाम आश्रयं अन्यैर्दुरासदं दुःप्राप्यं ८
प्रासादा रहाः अट्टलाः स्तदुपरिगृहाः गोलिकास्तत्पर्यंतकुड्यानि ताः विहारानुक्रीडास्थानानि च सर्वभज्ञ किंच विमानानि आतनिसाद्युस्त्रै

देवासुरमनुष्याणां गंधर्वोरगरक्षसां अभेद्यं कामगं वव्रे यानं वृष्णिभीषणं ६ तथेति गिरिशादिष्टो मयः परपुरंजयः
पुरं निर्माय शाल्वाय प्रादात्सौभमयस्मयं ७ स लब्ध्वा कामगं यानं तमोधाम दुरासदं ययौ द्वारवतीं शाल्वो वैरं वृष्णि
कृतं स्मरन् ८ निरुध्य सेनया शाल्वो महत्या भरतर्षभ पुरीं बभंजोपवनान्युद्यानानि च सर्वशः ९ सगोपुराणि द्वारा न४
णि प्रासादाट्टालतोलिकाः विहारान् स विमानाग्र्यान्निपेतुः शस्त्रवृष्टयः १० शिलाद्रुमाश्चाशनयः सर्पा आसा
रशर्कराः प्रचंडश्चक्रवातोभूद्रजसाच्छादिता दिशः ११ इत्यर्द्यमाना सौभेन कृष्णस्य नगरी भृशं नाभ्यपद्यत शं
राजन् त्रिपुरेण यथा मही १२ प्रद्युम्नो भगवान्वीक्ष्य बाध्यमाना निजाः प्रजाः मा भैष्टेत्यभ्यधाद्वीरो रथारूढो म
हारथः १३ सात्यकिश्चारुदेष्णश्च सांबोक्रूरः सहानुजः हार्दिक्यो भानुविंदश्च गदश्च शुकसारणौ १४ अपरे च
महेष्वासा रथयूथपयूथपाः निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः ५ ततः प्रववृते युद्धं शाल्वानां यदुभिः सह
यथासुराणां विबुधैस्तुमुलं लोमहर्षणं १६ ताश्च सौभपतेर्मायां दिव्यास्त्रै रुक्मिणीसुतः क्षणेन नाशयामास नै
शं तम इवोष्णगुः १७

वृष्टयः पेतुः १० आसारशर्कराः धारासंपातवज्जलोपलाः ११ शं सुखं नाभ्यपद्यत १२ १३ १४ १५
तुमुलं व्याकुलं लोमहर्षणं रौद्रं १६ नैशं निशि भवं तमः उष्णगुः सूर्य इव १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०३ किंच विद्याधतिस्त्रार्णामयानि पुरवानि दृष्टप्रांतायेषांते अयोलोहंतन्मयानि मुखान्यग्राणि येषांते ध्वजनीपालैः सेनान्यसन्नतानि निम्नानि प
र्वाणि यंधयायेषांतेः १८ सैनिकान् भटान् नेतॄन् सारथीन् १९ स्वपरसैन्ययार्वर्त्तमाना सेर्वपूजयामासुः समानितवंत २० कदाचिद्बहु
रूपं कदाचिदेकरूपं ध्वचिन्न दृश्यते एवं दुर्विभाव्यं दुर्वितर्क्यं मभूत् २१ किंच केचिदिति एवंतन् दुःखास्थितं अनवस्थितं चाभूत् २२

विद्याधरपत्त्रविंशत्याखगांपुखैरयोमुखेः शाल्वस्य ध्वजनीपालैः शरैः सन्नतपर्वभिः १८ शतेनाताडयच्छाल्वमेकैके
नास्यसैनिकान् दशभिर्दशभिर्नेतॄन् वाहनानि त्रिभिस्त्रिभिः १९ तदद्भुतं महत्कर्मप्रद्युम्नस्य महात्मनः दृ
ष्ट्वा तं पूजयामासुः सर्वेस्वपरसैनिकाः २० बहुरूपैकरूपं तं दृश्यतेन च दृश्यते मायामयं मयकृतं दुर्विभा
७१ १ व्यंपरैरभूत् २१ क्वचिद्भूमौ क्वचिद्व्योम्नि गिरिमूर्ध्नि जले क्वचित् अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितं
२२ यत्रयत्रोपलक्ष्येत ससौभः सहसैनिकः शाल्वस्ततस्ततो मुंचन् शरान्सात्वतयूथपाः २३ शरैरग्न न
र्कसंस्पर्शैराशीविषदुरासदैः पीड्यमानपुरानीकः शाल्वोमुह्यत्परेरितैः २४ शाल्वानीकपशस्त्रौघैर्वृष्णि प्रद्युम्न
वीरा भृशार्दिताः नतत्यजूरणं स्वंस्वं लोकद्वयजिगीषवः २५ शाल्वामात्यो द्युमान्नाम प्रद्युम्नं प्राक्प्रपीडितः
आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली २६
अग्निर्दाहकः अर्कवत्खगापत्सवैः तैः संस्पर्शो येषांते आशिविषवदेकदेशस्य
दीमात्रेणमारकत्वात् दुरासदैः दुःसहैः पीड्यमानं पुरमनीकानि च यस्यसः परैर्यदुभिरीरितैर्मुक्तैः २४ भृशार्दिता अपिस्व राम
स्वं रणं स्वांस्वां युद्धभूमिं २५ मौर्व्या कार्ष्णायसमय्या व्याहत्य प्रहृत्य २६ ७१

अपोवाह अन्यतो निनाय २७ २८ मनु मत्तो विना क्लीबं चिंतयस्य एतेन त्वया सूतेन २९ पितरौ रामकृष्णौ च अभिसंगम्य तत्रापि श्रुत्वा तावन्यां पृष्टः सन् स्वयोग्यं किंनु वक्ष्यामीति ३० भ्रातृजामयो भ्रातृभार्याः व्यक्तं निश्चितं मां नूनं क्लैब्यं कथयिष्यंतीति न कथनमनुकरोति कथं कथमिति ३१ विभो हे समर्थ एतत्

प्रद्युम्नं गदयाशीर्णवक्षःस्थलमरिंदमं अपोवाहरणात्सूतो धर्मविद्दारुकात्मजः २७ लब्धसंज्ञो मुहूर्तेन कार्ष्णिः सार
थिमब्रवीत् अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणं २८ न यदूनां कुले जातः श्रूयते रणविच्युतः विना मत्क्लीबचि
३ त्तेन सूतेन प्राप्तकिल्बिषात् २९ किं वक्ष्येऽभिसंगम्य पितरौ रामकेशवौ युद्धात्सम्यगपक्रांतः पृष्टस्तत्रात्मनः क्षमं ३०
व्यक्तं मे कथयिष्यंति हसंत्यो भ्रातृजामयः क्लैब्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ३१ सारथिरुवाच धर्मं
विजानतायुष्मन्कृतमेतन्मया विभो सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ३२ एतद्विदित्वा तु भवान्मयापो
वाहितो रणात् उपसृष्टः परेणेति मूर्छितो गदया हतः ३३ इति श्रीभागवते महापुराणे दशमस्कंधे षट्सप्त
तितमोऽध्यायः शुक उवाच स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः नय मां द्युमतः पार्श्वं वीरस्येत्याह सा
रथिं १ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् २ चतुर्भिश्च
तुरो वाहान् सूतमेकेन चाहनत् द्वाभ्यां धनुश्च केतुं च शरेणान्येन वै शिरः ३ श्रीराम श्रीराम श्रीराम

अपसर्पणं धर्ममाह सूत इति ३१ अपोवाहितः अपनीतः उपसृष्टः उपसर्गपीडां प्राप्त इति कृत्वा यतः परेण शत्रुणा गदया हतः सन् मूर्छि
तोऽसि संज्ञां गतो भवानिति ३३ दशमे षट्सप्ततितमः सप्तयुक्सप्ततितमे नानामायाविचक्षणः कृष्णेनात्यशाल्वस्तो हतः
सौभं च चूर्णितं दंशितः सन्नद्धः १ विधमंतं क्षपयंतं प्रतिहत्य प्रतिरुध्य १ अष्टानां विनियोगमाह चतुर्भिरिति ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

...०२७ सौभेयाः सौभस्थाः ४ नवानांरात्रीणांसमाहारोनवरात्रंत्रयाणांनवरात्रीणांसमाहारस्त्रिणवरात्रंसप्तविंशतिरहोरात्रीणीत्यर्थः तुमुलमाकुले
उल्वणंघोरं ५ परमत्तमुप...न्यस्यति इंद्रप्रस्थगत इत्यादिना ६ ७ आह चेति स्वयंतमवपथि चिंताविद्धं भित्तमाभाषणं आर्यमिश्राभि

गदसात्यकिसांबाद्याजघ्नुः सौभापतेर्बलं पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ४ एवंयदूनांशाल्वानां
निघ्नतामितरेतरं युद्धं त्रिणवरात्रंतदभूत्तुमुलमुल्वणं ५ शुकउवाच इंद्रप्रस्थगतः कृष्ण आहूतो धर्म
सूनुना राजसूयेभिनिर्वृत्ते शिशुपाले च संस्थिते ६ कुरुवृद्धाननुज्ञाप्य मुनींश्च ससुतां पृथां निमित्तान्यति
घोराणिपश्यन्द्वारवतींययौ ७ आह चाहमिहायात आर्यमिश्राभिसंगतः राजन्याश्चैद्यपक्षीया नू
नंहन्युः पुरींमम ८ इतिसंचिंत्यभगवानाजगामत्वरान्वितः संग्राम भूमिमागत्य प्रद्युम्नादीन्निरीक्ष्य सः
पु ९ वीक्ष्यतत्कदनं स्वानां निरूप्य पुररक्षणं सौभं च शाल्वराजं च दारुकं प्राह केशवः एवं रथं प्रापय मर्त्य
मा३ नेशाल्व स्यांतिकं प्रभुवे संभ्रमस्तेन कर्तव्यो मायावी सौभराडयं १० इत्युक्तश्चोदयामास रथमास्थाय दा
रुकः विशंतं ददृशुः सर्वे स्वे परे चारुणानुजं ११ शाल्वश्च कृष्णमालोक्य हतप्रायबलेश्वरः प्राहरत्कृ
ष्णसूताय शक्तिं भीमरवां मृधे १२ तामापतंतींनभसि महोल्कामिवरंहसा भासयंतीं दिशः शौरिः सायकैः
शतधाच्छिनत् १३
संगतोबलभद्रादिसहितः ८ दुर्निमित्तदर्शनाकुलचित्त एवंचिंतयन्नुद्धारकामागत्य स्वानांकदनंवीक्ष्य सौभं च शाल्वराजं च
वीक्ष्यरामंपुररक्षणे नियुज्य दारुकंप्राहेत्यन्वयः ९ तेनत्वया १० आस्थाय सम्यगधिष्ठाय अरुणानुजं ध्वजे वर्तमानं

राम ७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंचशाल्वेशरसंदोहैः शरजालैः खंसूर्यइवरश्मिभिरिति मुनीलत्वादिभिराकाशोपमासौभस्य श्चचित्यवेगत्वबाहुल्यादिभिः शराणांरश्मिसा
दृश्यं श्रयत्नेनवरश्मिवत् शरजालप्रसारणात्सूर्यतुल्यः श्रीकृष्णइति १४ द्वाविंहं १५ १६ सख्युः शिशुपालस्यइक्षताभस्माकं

तंचषोडशभिर्विद्धाबाणैः सौभंचरंखेभ्रमत् अविध्यच्छरसंदोहैः खंसूर्यइवरश्मिभिः १४ शाल्वः शौरेस्तुदोः सव्यंसशार्ङ्गं शार्ङ्ग-
धन्वनः विभेदन्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं १५ हाहाकारोमहानासीद्भूतानांतत्रपश्यतां विनद्यसौभराडुच्चैरि-
दमाहजनार्दनं १६ यत्त्वयामूढनः सख्युर्भ्रातुर्भार्याहृतेक्षतां प्रमत्तः ससभामध्येत्वयाव्यापादितः सखा १७ तंत्वाद्य
निशितैर्बाणैरपराजितमानिनं नयाम्यपुनरावृत्तिंयदितिष्ठेर्ममाग्रतः १८ श्रीभगवानुवाच वृथात्वंकत्थसेमन्द
नपश्यस्यन्तिकेन्तकं पौरुषंदर्शयन्तिस्मशूरानबहुभाषिणः १९ इत्युक्त्वाभगवान्शाल्वंगदयाभीमवेगया तता-
डजत्रौसंरब्धः सचकम्पेवमन्नसृक् गदायांसन्निवृत्तायांशाल्वस्त्वन्तरधीयत २० ततोमुहूर्तआगत्यपुरुषः
शिरसाच्युतं देवक्याप्रहितोस्मीतिनत्वाप्राहवचोरुदन् २१ कृष्णकृष्णमहाबाहोपितातेपितृवत्सल
बद्ध्वाऽपनीतः शाल्वेनसौनिकेनयथापशुः २२ निशम्यविप्रियंकृष्णोमानुषींप्रकृतिंगतः विमनस्कोघृणी
स्नेहाद्बभाषप्राकृतोयथा २३ कथंराममसंभ्रान्तंजित्वाऽजेयंसुरासुरैः शाल्वेनाल्पीयसानीतः पितामेबल-
वान्विधिः २४ इतिब्रुवाणेगोविन्देसौभराट्प्रत्युपस्थितः वसुदेवमिवानीयकृष्णंचेदमुवाचसः २५ श्रीराम

प्रमत्तः अनवहितः व्यापादितः निहतः १७ अपराजितोहमितिमानवन्तं अपुनरावृत्तिंमृत्युं तिष्ठेः स्थास्यसि १८ २० घृणिर्दयावान् २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११०९ जनिताजनयिताईशश्चेत् शक्तश्चेत् २६ ७ स्वबोधः स्वतः सिद्धज्ञानवानपि स्वजनस्नेहतः। प्राकृतोमानुषस्वभावेनउपप्लुतः। निमग्नः आस्ते अतिष्ठ
त् ततस्तत्सर्वमासुरीमायामबुध्यत मायामितिज्ञातवान् ३८ स्वाप्नस्वप्नप्रपंचयथा २९ एवंपरमतमुपन्यस्तंनिराकरोति एवमिति के
त्वैकेचनानन्विताः अनन्विताः पूर्वापरानुसंधानरहिताः तदाह यत्त्ववाचइति तेनानुस्मरंतीत्यर्थः। अयमभिप्रायः नतावद्रा—

एषतेजनितातातोयदर्थमिहजीवसि वधिष्यतीस्यतस्तमुमीशश्चेत्याहवालिश २६ एवंनिर्भर्त्स्यमा
यावीखड्गेनानकदुंदुभेः उत्कृत्य शिरआदाय खस्थं सोभेसमाविशत २७ ततोमुहूर्तं प्रकृतावुप
प्लुतः स्वबोधआस्ते स्वजनानुषंगतः। महानुभावस्तदबुध्यदासुरीमायां सशाल्वप्रसृतां मयोदितां
७३ २८ नतत्रदूतं नपितुः कलेवरं प्रबुद्धआजौ समपश्यदच्युतः। स्वाप्नंयथाचांबरचारिणांति पुंसो
भ्रमंसमालोक्यनिहंतुमुद्यतः २९ एवंवदंतिराजर्षे ऋषयः केचनान्विताः। यत्स्ववाचाविरुध्ये
तनूनंतेनस्मरत्यृते ३० क्वशोकमोहौस्नेहोवाभयंवायेऽज्ञसंभवाः क्वचाऽखंडितविज्ञानज्ञाने
श्वर्य्यस्त्वखंडितः ३१

जस्सूपार्थं रामेण सहगतः श्रीकृष्णः संकर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ३० असंभावितं चे
त्याह क्वशोकमोहाविति भयं वादुर्निमित्तदर्शनकृतं नूनं हन्यकः पुरीमिमेमितियदुक्तं यच्च हस्ताच्छार्ङ्गं न्यपतदिति उक्तं तद्रूपं ७३
वाध्येति अज्ञेषु संभवा येषां ते अखंडितानि विज्ञानज्ञानैश्वर्याणि यस्य सः। तत्र विज्ञानं स्वरूपविषयं ज्ञानं बाह्यविषयं ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच। यस्यपादसेवया उर्जितापुष्कलाया। आत्मविद्यातयाआनादिआसावात्मविपर्ययग्रहस्तत्रग्रहः कुशः सुविदुः स्वीत्यादिलक्षणः तं हि
न्वं तिनाशयतिसंतः एश्वर्यपदचंतस्यसतांगतेः कुतोनुमोहइतिअतोनेतद्वचनं सत्यमित्यर्थः ३२ किंच हिसंयं गदाहतोतेशस्त्रपुंगोरि
तिवर्मकिवचंरुराजबभंज ३३ ४ त्वयार्कसन्निभंप्रलयकालीनसूर्यसदृशं ३५ ३६ दैवगाणेरितासवीनामिति ३७ इतिदशमे

यत्पादसेवोर्जितयात्मविद्ययाहिन्वंत्यऽनाद्यात्मविपर्ययग्रहं लभंतआत्मीयमनंतमैश्वरं कुतोनुमोहः परमस्यसद्गतेः ३२
२ तंशस्त्रपूगैः प्रहरंतमोजसाशाल्वंशरैः शौरिरमोघविक्रमः विध्वाच्छिनद्वर्मधनुःशिरोमणिंसौभंचशत्रोर्गदयारुरोज
सः ३३ तत्कृष्णहस्तेरितयाविचूर्णितं पपातंतोयेगदयासहस्रधा विसृज्यतद्भूतलमास्थितोगदामुद्यम्यशाल्वोच्यु
तमभ्यगाद्द्रुतं ३४ आधावतः सगदंतस्यबाहुं भल्लेनछित्वाथरथांगमद्भुतं वधायशाल्वस्यलयार्कसन्निभं बिभ्र
द्बभौसार्कइवोदयाचलः ३५ जहारतेनैवशिरः सकुंडलं किरीटयुक्तं पुरुमायिनोहरिः वज्रेणवृत्रस्ययथापुरंदरो
बभूवहाहेतिवचस्तदानृणां ३६ तस्मिन्निपतितेपापेसौभेचगदयाहते नेदुर्दुंदुभयोराजन्दिविदेवगणेरिताः
सखीनामपचितिंकुर्वन्दंतवक्त्रोरुषाभ्यगात् ३७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसौभवधोनामसप्त
सप्ततितमोध्यायः शुकउवाच शिशुपालस्यशाल्वस्यपौंड्रकस्यापिदुर्मतिः परलोकगतानांचकुर्वन्पारो
क्ष्यसौहृदं १ एकः पदातिः संक्रुद्धोगदापाणिः प्रकंपयन् पद्भ्यामिमांमहाराजमहासत्वोव्यदृश्यत २

सप्तसप्ततितमोध्यायः तेनाष्टसप्ततितमेदंतवक्त्रविदूरथोहत्वाहरिः पुरेरेमरामः सूतंततोवधीत् सखीनामपचितिंकुर्वन्नित्य
केतदावाहा शिशुपालस्येति परोक्षंसौहृदं परोक्षेकरणीयंसुहृत्कृत्यं १ २ श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७३० प्रत्यधानुप्रतिक्रोध मुकुंद प्राह दुर्मद इत्यादि उदरधिक्षपपरतास्फुटैव परमार्थस्तु दुर्मदः गतमदः प्राह मुकुंदेत्त नीयजन्मनि मुक्तिदानार्थ
मागतं अद्य निजजन्मत्रैये ऽस्मिन् विष्णुमार्गे ऽयं ब्रह्मशापावसाने भवान्मम स्वामी मद्दृष्टिपथं गतः एतद्दिष्ट्या दिष्ट्या भद्रं अतिहर्षे वीप्सा ४
किंचाहं ह्यस्य त्वमस्माकं मातुलेयो बंधुः एवमपि मित्रधुक् मित्राणां घातितवान् मां च जिघांससि तस्माद् अस्माकं त्वं नाम कृपाः स
न काद्यनुग्रहप्राप्तानं दुर्वारः अतस्त्वामेतावन्मात्रं महे याचे किं तदाह हे अमंद सर्वसहनसमर्थ क्षात्रधर्मेणासि वितं गदया लो
हनिष्ये प्रहरिष्यामि त्वामेकवारं सहस्वेति ननु वज्रतुल्यां त्वद्गदां का वा सहतेनेवमित्याह अवज्रकल्पया उत्पलमालावद

ततथापांतमालोक्य गदामादाय सत्वरः अवलुत्य रथात्तस्मात् सिंधुवेलेव प्रत्यधात् ३ गदामुद्यम्य कारूषो
मुकुंदं प्राह दुर्मदः दिष्ट्या दिष्ट्या भवानद्य मम दृष्टिपथं गतः ४ त्वं मातुलेयो नः कृष्ण मित्रध्रुङ् मां जिघा
७४ संसि अतस्त्वां गदयामंद हनिष्ये वज्रकल्पया ५ तर्ह्यानृण्यमुपैम्यज्ञ मित्राणां मित्रवत्सलः बंधुरू
पमरिं हत्वा व्याधिं देहचरं यथा ६ एवं रूक्षैस्तुदन्वाक्यैः कृष्णं तोत्रैरिव द्विपं गदयाताडयन्मूर्ध्नि सिंह
वद्व्यनदच्च सः ७

तिकोमलयेत्यर्थः ५ नन्वेवं हननेन कस्तव पुरुषार्थस्तमाह तर्हीति अज्ञ नविद्यते ज्ञो यस्मात्
हे सर्वज्ञेत्यर्थः परमार्थतः स्वामिनं एतद्देहसंबंधेन बंधुरूपब्रह्मशापेन शत्रुत्वं प्रतीतं त्वां हत्वा मित्राणामानृण्यमुपैमि वि राम
शेषाणामाधीयते मनसि चिंत्यत इति व्याधिः देहे तया मित्तयाचरतीति तथा तमोऽश्यं हत्वा क्षात्रधर्मेणाराध्य हंतर्गे इत्यर्थ ७४
स्यैज्ञात्वे तितोत्तयथा पित्रादीनामानृण्यमुपपततिह द्विति ६ रूक्षैरित्यादि प्रतोसमिप्रायेण तोत्रैरंकुशादिभिः ७॥

ज्ञानार्थत्वात्

ह२

एवं श्रीकृष्णो महाबलानपि लीलया जयन्तं वैनतेयवत् कदाचिज्जरासंधादिभिः निर्जित इति प्रभुदृष्टिनामीयन्ते नित्यजयेऽपहत्रवः योगे
श्वरः भगवान्जगदीश्वर इति १६ विदूरथानमामध्यपूतनादिहनोः कुलं कृष्णस्य पारमन्यार्राद्धामाहत्सूतवत्स्वल्लोतस्य संगमाह

गदयाभिहतोऽप्यङ्गो न चचाल यद्वद्द्रुहः कृष्णोऽपि तं महत्गुर्व्या कौमोदक्या स्तनान्तरे ९ गदानिर्भिन्नहृदय उद्वम
न्रुधिरं मुखात् प्रसार्य केशबाह्वंघ्रीन् धरण्यां न्यपतद्व्यसुः १० ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतं पश्यतां
सर्वभूतानां यथा चैद्यवधे नृप ११ विदूरथस्तु तद्भ्राता भ्रातृशोकपरिप्लुतः आगच्छदसिचर्मभ्यामुच्छ्वसंस्तज्जिघां
सया ११ तस्य चापततः कृष्णश्चक्रेण क्षुरनेमिना शिरो जहार राजेंद्र सकिरीटं सकुंडलं १२ एवं सौभं च शाल्वं च दं
तवक्त्रं सहानुजं हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः १३ मुनिभिः सिद्धगंधर्वैर्विद्याधरमहोरगैः अप्सरोभिः
पितृगणैर्यक्षैः किंनरचारणैः १४ उपगीयमानविजयः कुसुमैरभिवर्षितः वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीं
१५ एवं योगेश्वरः कृष्णो भगवान्जगदीश्वरः ईयते पशुदृष्टीनां निर्जितो जयतीति सः १६ श्रुत्वा युद्धोद्यमं रामः कु
रूणां सह पांडवैः तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल १७ स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् स
रस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः १८ पृथूदकं बिंदुसरस्त्रितकूपं सुदर्शनं विशालं ब्रह्मतीर्थं च चक्रं प्राचीं
सरस्वतीं १९ यमुनामनु यान्येव गंगामनु च भारत जगाम नैमिषं यत्र ऋषयः सत्रमासते २० श्रीरामः श्री

श्रुत्वेति १७ प्रतिस्रोतं प्रतिलोमं १८ सुदर्शनं तीर्थं चक्रं चैतत्तीर्थं १९ यमुनामनु यानि तीर्थानि गंगामनु च यानि तानि सर्वाणि गा
त्वा नैमिषमरण्यं जगाम २०

७०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० अभिप्रेत्य श्रीराम इति ज्ञात्वा २१ महर्षेर्व्यासस्य २२ सूतं प्रतिलोमजं अंजलिं अनतं अध्यासीनं च तान् तेभ्य उच्चासने आसीनमित्यर्थः २३ ४ अजानन्
धात्त्वइतिचेत् नेवमित्याह अपरिति २४ ननु बहुज्ञः कथमेवं कुर्यात् तत्राह अदांतस्येति गुणाय यथेष्टाचितानुष्ठाय २६ विप्रानध्या
स्तो अन्यद्वा किंचित्कारणं किं न वर्तितं चेत् अत आह एतदर्थ इति धर्मध्वजिनः उत्तमलिंगधारिणः २७ भावित्वादिति न हि भवितु

तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः अभिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन् २१ सोर्चितः सपरिवारः कृतास
नपरिग्रहः रोमहर्षणमासीनं महर्षेः शिष्यमैक्षत २२ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं अध्यासीनं च ता
न्विप्रांश्चुकोपोद्वीक्ष्य माधवः २३ कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः धर्मपालांस्तथैवास्मान्वध
मर्हति दुर्मतिः २४ ऋषेर्भगवतो भूत्वा शिष्योधीत्य बहूनि च सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः २५ अदां
७५ तस्याविनीतस्य वृथा पंडितमानिनः न गुणाय भवंति स्म नटस्येवाजितात्मनः २६ एतदर्थो हि लोकेस्मिन्न
वतारो मया कृतः वध्या मे धर्मध्वजिनस्ते हि पातकिनोधिकाः २७ एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि
भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः २८ हाहेतिवादिनः सर्वे मुनयः खिन्नमानसाः ऊचुः संकर्षणं दे
म२ वं धर्मस्ते कृतः प्रभो २९ अस्य ब्रह्मासनं दत्तमस्माभिर्यदुनंदन आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते
अजानतेवाचरितस्त्वया ब्रह्मवधो यथा ३० राम

यं केनापि परिहर्तुं शक्यत इत्यर्थः अहनत् अहन् २८ ते त्वया २९ अधार्मि ७५
कः प्रतिलोमजवधः कायम धर्म इति चेत्तत्राहुः अस्येति पुराणप्रवचनाय आत्मनः शरीरस्य नास्ति क्लमो यस्मिन् तदायुश्च
दत्तमिति ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या

ब्रह्मवधपि किं मम श्वरस्येति च मत्संभवतत्रापि प्रायश्चित्तं कर्त्तव्यमित्याशयेनाहुः योगेश्वरस्येति सार्द्धेन अम्नायो ब्राह्मणानहे नव्यङ्गीति
लक्षणः तथाप्येतस्याब्रह्महत्यायाः पावनं प्रायश्चित्तं हे लोकपावन आनन्यचोदितः स्वयमेव भवान् यदि करिष्यति तर्हि लोक संग्र
हो भविष्यति नान्यथेति ३१ वधस्य निवेशे प्रायश्चित्ते प्रथमकल्पमुख्यकल्पे विधीयतां न तूपदिश्यतां किंचा वनेह मुनयः एतस्य दी
र्घमायुः सत्वं बलमिंद्रियं यत्तत्पाटवं अन्यच्च यद्वक्तृ किंराशासितं मया पेक्षितं तत्तु ब्रूतां सर्वं ३३ अस्मदादीनां सत्यतां यथा भवेत्तथा वि
आत्मावाइती । धीयतामित्यर्थः ३४ तथा संपादयन्नाह आगादंगात् संभवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शत

योगेश्वरस्य भवतो नाम्नायोपि नियामकः यद्यनद्ब्रह्महत्यायाः पावनं लोकपावन चरिष्यति भवांल्लोक
संग्रहानान्यचोदितः ३१ श्रीभगवानुवाच करिष्ये वधनिर्वेशं लोकानुग्रहकाम्यया नियमः प्रथमे कल्पे
यावन्स तु विधीयतां ३२ दीर्घमायुर्वतैतस्य सत्वमिंद्रियमेव च आशासितं यत्तदूक्तं साधये योगमायया
३३ ऋषय ऊचुः अस्त्रस्य तव वीर्यस्य मृत्योरस्माकमेव च यथा भवेद्वचः सत्यं तथा राम विधीयतां ३४ श्री
भगवानुवाच आत्मा वै पुत्र उत्पन्न इति वेदानुशासनं तस्मादस्य भवेद्वक्ता आयुरिंद्रियसत्ववान्
३५ किं वः कामो मुनिश्रेष्ठा ब्रूताहं करवाण्यथ अजानतस्त्वपचितिं यथा मे चिंत्यतां बुधाः ३६ श्री

मित्यादिवेदानुशासनं वेदवचनं तस्मादस्य रोमहर्षणस्य पुत्र उग्रश्रवाः भवतां पुराणप्रवक्ता भवेत् स च आयुरादिमांश्च भवेत्
अतः साक्षाज्जीवनादस्त्रस्य मत्यो अस्मत्यता पुत्ररूपेण त्वायुरादिसिद्धेर्युष्मद्वचनस्यापि सत्यता इति भावः ३५ किंच स्या २
ब्रह्मदंडार्थं युष्मदपेक्षितं प्रथमं तावदथ क्षितं कथयत तदहं करिष्यामीत्याह किं वः काम इति किं विषयो वः कामो वर्न्न
ते तत्तं ब्रूतेति अथानंतरं ब्रह्मदंडं गृहीत्वा अपचितिं निःकृतिमजानतो मे हे बुधाः यथावच्चिंत्यतामपचितिरिति ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमं तावदपेक्षितं कर्तव्यं कथयन्ति इल्वलस्येति द्वाभ्यां ३० ३८ प्रायश्चित्तमाह ततश्चेति परीत्य प्रदक्षिणीकृत्य सुसमाधानादिगुणवि
शेषोपेतः कोदृक् मात्रयुक्तमिति विरोधः सुसमाहितः कामक्रोधविरहितः चरित्वा कृच्छ्राणि ३२ इति दशमे अष्टसप्ततितमः तुला
श्री

ऋषिरुवाच इल्वलस्य सुतो घोरो बल्वलो नाम दानवः स दूषयति नः सत्रमेत्य पर्वणि पर्वणि ३७ तं पापं जहि दा
शार्ह तन्नः शुश्रूषणं परं पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणं ३८ ततश्च भारतं वर्षं परीत्य सुसमाहितः च
रित्वा द्वादश मासांस्तीर्थस्नायी विशुध्यसे ३९ इति श्रीभागवते महापुराणे दशमस्कंधे ऽष्टसप्तति
तमोध्यायः शुक उवाच ततः पर्वण्युपावृत्ते प्रचंडः पांशुवर्षणः भीमो वायुरभूद्राजन्पूयगंधस्तु सर्व
७९ ले शः १ ततो ऽमेध्यमयं वर्षं बल्वलेन विनिर्मितं अभवद्यज्ञशालायां सो ऽन्वदृश्यत शूलधृक् २ तं विलोक्य बृ
हत्कायं भिन्नांजनचयोपमं तप्तताम्रशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखं ३ सस्मार मुसलं रामः परसै
न्यविदारणं हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः ४ तमाकृष्य हलाग्रेण बल्वलं गगनेचरं मुसले
नाहनत्क्रुद्धो मूर्ध्नि ब्रह्मद्रुहं बलः ५ सो ऽपतद्भुवि निर्भिन्नललाटो ऽसृक् समुत्सृजन् मुंचन्नार्तस्वरं शै
लो यथा वज्रहतो ऽरुणः ६ संस्तुत्य मुनयो रामं प्रयुज्यावितथाशिषः अभ्यषिंचन्महाभागा वृत्रघ्नं वि
बुधा यथा ७ वैजयंतीं ददुर्मालां श्रीधामाम्लानपंकजां रामाय वाससी दिव्ये दिव्यान्याभरणानि च ८

शीतितमे रामो बल्वलं हि जन्तुर्यं निहत्य तीर्थस्नानादिः स्वकृतहत्यामपानुदत् उपावृत्ते प्राप्ते १ २ भिन्नाविदीर्णांजनचयः राम
उपमा यस्य तं निरुध्य मिथ्यार्थः तप्तताम्रवर्णं शिखाश्मश्रूणि च यस्य तं दंष्ट्राभिरुग्रं भ्रुकुटीयुक्तं मुखं यस्य तं ३ ४ ५ ७९
अरुणो रुधिरं दैत्यः शैलो धातुभिः ६ ७ श्रियो धामानि अम्लानानि यस्यास्तां ८

पंकजानि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतत्परः यत इति आश्लवनूंद्गान् ९ अनुस्रोतेन अनुलोमतः पुलहाश्रमं हरिक्षेत्रं १० गोमत्यां गंडक्यां विपाशायां च स्नात्वा शोणेच

अथ तैरभ्यनुज्ञातः कौशिकीमत्य ब्राह्मणैः स्नात्वा सरोवरमागान्यत्र सरयूः स्रवत् ९ अनुस्रोतेन सरयूं प्रयागमुपगम्य
सः स्नात्वा संतर्प्य देवादीन् जगाम पुलहाश्रमं १० गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः गयां गत्वा पितॄनिष्ट्वा गं
गासागरसंगमे ११ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च सप्तगोदावरीं वेणां पंपां भीमरथीं ततः १२ स्कंदं दृष्ट्वा
ययौ रामः श्रीशैलं गिरिशालयं द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः १३ कामकोष्णीं पुरीं कांचीं कावेरीं च सरिद्व
रां श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः १४ ऋषभाद्रिं हरेः क्षेत्रं दक्षिणां मथुरां तथा सामुद्रं सेतुमगमत् महा
पातकनाशनं १५ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्यो हलायुधः कृतमालां ताम्रपर्णीं मलयं च कुलाचलं १६ तत्राग
स्त्यं समासीनं नमस्कृत्याभिवाद्य च योजितस्तेन चाशीभिरनुज्ञातो गतोर्णवं दक्षिणं तत्र कन्याख्यां दुर्गां दे
वीं ददृशे सः १७ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं विष्णुः संनिहितो यत्र स्नात्वास्पर्शद्गवायुतं १८
ततोभिव्रज्य भगवान् केरलांस्तु त्रिगर्तकान् गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः १९ आर्यां द्वैपा
यनीं दृष्ट्वा शूर्पारकमगाद्बलः तापीं पयोष्णीं निर्विंध्यामुपस्पृश्याथ दंडकं २० प्रविश्य रेवामगमत् यत्र मा

आप्लुतः इत्यासंपूज्य ११ १२ श्रीशैलं श्रीपर्वतं १३ कांचीपुरीं १४ १५ १६ हिष्मती पुरी मनुतीर्थमुपस्पृश्य प्रभासं पुनरागमत्
दक्षिणमर्णवं १७ फाल्गुनं अनंतपुरं पंचाप्सरसं सरः अस्पर्शत् अस्पृशत् १८ केरलादीन् देशान् द्वीपमयनं यस्याः सा २० १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ विनशनं कुरुक्षेत्रं २३ विवक्षुः वक्तुमिच्छुः किं वदिष्यतीति भियान् तूष्णीमासन्निति २४ २५ २६ अन्यः पराजयो वा रणः संग्रामः २७

श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगे सर्वराजन्यनिधनं भारं मेने हृतं भुवः २२ स भीमदुर्योधनयोर्गदाभ्यां युध्यतो
५२ र्मृधे वारयिष्यन् विनशनं जगाम यदुनंदनः २३ युधिष्ठिरस्तु तं दृष्ट्वा यमौ कृष्णार्जुनावपि अभिवाद्याभवंस्तूष्णीं
७९ किं विवक्षुरिहागतः २४ गदापाणी उभौ दृष्ट्वा संरब्धौ विजयैषिणौ मंडलानि विचित्राणि चरंताविदमब्रवीत्
२५ युवां तुल्यबलौ वीरौ हे राजन् हे वृकोदर एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं २६ तस्मादेकतरस्येह
युवयोः समवीर्ययोः न लक्ष्यते जयोऽन्यो वा विरमत्वफलो रणः २७ न तद्वाक्यं जगृहतुर्बद्धवैरौ नृपार्थवत् अनु
स्मरंतावन्योन्यं दुरुक्तं दुःकृतानि च २८ दिष्टं तदनुमन्वानो रामो द्वारवतीं ययौ उग्रसेनादिभिः प्रीतैर्ज्ञाति
भिः समुपागतः २९ तं पुनर्नैमिषं प्राप्तमृषयो याजयन् मुदा क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहं ३० मा–
तेभ्यो विशुद्धविज्ञानं भगवान् व्यतरद्विभुः येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ३१ स्वपत्न्यावभृथस्नातो ७९
ज्ञातिबंधुसुहृद्वृतः रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः ३२ ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः
अनंतस्याप्रमेयस्य मायामर्त्यस्य संति हि ३३ योऽनुस्मरेत रामस्य कर्माण्यद्भुतकर्मणः सायंप्रातरनंतस्य वि
ष्णोः स दयितो भवेत् ३४ इति श्रीभागवते महापुराणे दशमस्कंधे एकोनाशीतितम ध्यायः ७९ श्रीराम मो

अर्थवद्वाक्यं २८ दिष्टं प्राचीनं कर्म समुपागतः संगतः २९ क्रत्वंगं यज्ञमूर्तिं ३० आत्मनि अधिष्ठाने विश्वगं सर्वानुस्यूतं येनैव वि
दुः पश्यंतीति हि शुद्धविज्ञानं व्यतरत् अदात् ३१ ३२ ३३ ३४ दशमे एकोनाशीतितमः ७९ ७९ ७९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामचरित्र
२

अथाशीतितमेऽध्यायः श्रीदामानं गृहागतं संपूज्यापृच्छदर्थं सुगुरुवासकथां सुदामुरारिमारको हरिः पुराचकार शंसनं अतः पुरावि
नेवतं निजोपकारमाचरन्मुनिः श्रुत्वा पुनर्मुकुंदवीर्याणि पृच्छति हे भगवन् श्रोतुमिच्छामि यन्वयः १ उत्तमश्लोकस्य सत्या मनो
हराः विषयेवेतृष्ण्यजनिकाः कथाः विशेषज्ञः सारवित् विषसः विषादं प्राप्तः २ कथा श्रवणं क्व वृद्दष्टांतं तया ३ न्यार्थानाह

राजोवाच भगवन्यानि चान्यानि मुकुंदस्य महात्मनः वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छामहे प्रभो १ को नु श्रु
त्वा सकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः विरमेत विशेषज्ञो विषण्णः काममार्गणैः २ सा वाग्यया तस्य गुणान्गृ
णीते करौ च तत्कर्मकरौ मनश्च स्मरेद्वसंतं स्थिरजंगमेषु शृणोति तत्पुण्यकथाः स कर्णः ३ शिरस्तु तस्यो
भयलिंगमानमेत्तदेव यत्पश्यति तद्धि चक्षुः अंगानि विष्णोरथ तज्जनानां पादोदकं यानि भजंति नित्यं ४
सूत उवाच विष्णुरातेन संपृष्टो भगवान्बादरायणिः वासुदेवे भगवति निमग्नहृदयोऽब्रवीत् ५ शुक उ०
श्लो०२ कृष्णस्यासीत्सखा कश्चिद्ब्राह्मणो विन्नुमः विरक्त इंद्रियार्थेषु प्रशांतात्मा जितेंद्रियः ६ यदृच्छयोपपन्नेन
वर्तमानो गृहाश्रमी तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथाविधा ७ श्रीराम श्रीराम श्रीराम॥

टी० १ सा वागिति तावेव करौ यौ तत्कर्म कुरुतः तदेव मनः यत् स्थिरजंगमेषु वसंतं स्मरेत् यस्तस्य पुण्याः कथाः शृणोति स एव कर्णः ३
उभयलिंगं स्थिरजंगमं च तत्स्यैव लिंगमिति मत्वा आनमत्तदेव शिरः तदेव तस्य लिंगमित्येव यत्पश्यति तदेव चक्षुः तान्येवां
गानि यानि पादोदकं भजंतीति ४ ५ ६ तथाविधा कुचैला किंच क्षुत्क्षामा यत्किंचित्संपन्नेनान्नेन तस्मै परिविष्यस्वयं क्षुधाजीर्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानसिकं ध्यानं दुःखं धवसीदंती वेपमाना भयेन कंपमाना ८ ९ १० भोजवृष्ण्यंधकेश्वर इति तत्स्वीकार
ना०३ ग्लायता शुष्यता सीदमाना भर्तुर्भोगसंपादनाशक्त्या अवसीदंती वेपमाना भयेन कंपमाना ८ ९ १० भोजवृष्ण्यंधकेश्वर इति तत्स्वीकार ग्लायता शुष्यता ... १४ मत्संमम १५ गुल्मा निरक्षा ६
मात्रेण सर्वं ते दास्यतीति भावः नात्यभीक्ष्णानु परिपाक विरसत्वात् ११ १२ अपि स्तिकिमस्तीति प्रश्नः १४ मत्संमम १५ गुल्मा निरक्षा

ननु ब्रह्मन्भगवतः सखा साक्षाच्छ्रि
पतिव्रतां पतिं प्राह ग्लायता वदनेन सा दरिद्रा सीदमाना सा वेपमाना भिगम्य च ८ ननु ब्रह्मन्भगवतः सखा साक्षाच्छ्रियःपतिः दास्यति द्रविणं भूरि सीदते ते कु
आरण्यश्च २ यः पतिः ब्रह्मण्यश्च भगवान् सात्वतर्षभः ९ तमुपेहि महाभाग साधूनां च परायणं दास्यति द्रविणं भूरि सीदते ते कुटुंबिने किंन्वर्थकामा
टुंबिने १० आस्ते धना द्वारवत्यां भोजवृष्ण्यंधकेश्वरः स्मरतः पादकमलमात्मानमपि यच्छति किंन्वर्थकामा
दु४ न्भजतो नात्यभीष्टान् जगद्गुरुः ११ स एवं भार्यया विप्रो बहुशः प्रार्थितो मुहुः अयं हि परमो लाभ उत्तमश्लोक
७८ दर्शनं १२ इति संचिंत्य मनसा गमनाय मतिं दधे अप्यस्त्युपायनं किंचिद्गृहे कल्याणि दीयतां १३ याचित्वा
न्र चतुरो मुष्टीन्विप्रान् पृथुकतंडुलान् चैलखंडेन तान्बद्ध्वा भर्त्रे प्रादादुपायनं १४ स तानादाय विप्राग्र्यः प्रययौ
थं द्वारकां किल कृष्णसंदर्शनं मह्यं कथं स्यादिति चिंतयन् १५ त्रीणि गुल्मान्यतीयाय तिस्रः कक्षाश्च सद्विजः
विप्रोऽगम्यांधकवृष्णीनां गृहेष्वच्युतधर्मिणां १६ गृहं द्व्यष्टसहस्राणां महिषीणां हरेर्द्विजः विवेशैकतमं
श्रीमत् ब्रह्मानंदं गतो यथा १७ तं विलोक्याच्युतो दूरात् प्रियापर्यंकमास्थितः सहसोत्थाय चाभ्येत्य दो
र्भ्यां पर्यग्रहीन्मुदा १८ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतो प्रीतो व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः १९
तो१ थं सैन्यस्थानानि कक्षाः प्रकोष्ठाः अतीयाय अतिक्रम्य जगाम सद्विजः द्विजसहितः ततश्च अगम्याः दुर्गमा अंधकावृष्णयश्च तेषां
गृहेषु १६ तथा हरेर्द्व्यष्टसहस्राणां महिषीणां च यानि गृहाणि तेषु च मध्ये श्रीमत् एकतमं गृहं विवेश ततो च सद्विजो ब्रह्मानंदं गतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समर्हणं उपायनं उपहृत्य समर्प्य पादावनेजनीरपः २० २१ २२ धमनिभिः संततं व्याप्तं २३ अवधूतं मलिनं २४ विस्मयमाह किमनेनेति द्वाभ्यां

समतो: संभ्रान्तासंमानितः १ २६ सतोः गृह्यागोष्ठ्या २७ भार्यया अपरिणीतानर्वाग्गृहस्थलिंगदर्शनात् भोगादर्शनाच्च संशयादिव प्रश्नः २८

अथोपवेश्य पर्यंके स्वयं सरस्तुः समर्हणं उपहृत्यावनिज्यास्य पादौ पादावनेजनीः २० अग्रहीच्छिरसा राजन् भगवांल्लो

कपावनः व्यलिंपदिव्यगंधेन चंदनागुरुकुंकुमैः २१ धूपैः सुरभिभिर्मित्रं प्रदीपावलिभिर्मुदा अर्चित्वावृधत्तांबूलं

गां च स्वागतमब्रवीत् २२ कुचैलं मलिनं क्षामं द्विजं धमनिसंततं देवी पर्यचरत्स्वयं चामरव्यजनेन वै २३ अंतः

पुरजनो दृष्ट्वा कृष्णेनामलकीर्तिना विस्मितोभूदतिप्रीत्या अवधूतं सभाजितं २४ किमनेन कृतं पुण्यमवधू

तेन भिक्षुणा श्रिया हीनेन लोकेस्मिन् गर्हितेनाधमेन च २५ योसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः १ पर्य

के स्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा २६ कथयांचक्रतुर्गाथाः पूर्वा गुरुकुले सतोः आत्मनो ललिता

राजन् करौ गृह्य परस्परं २७ श्रीभगवानुवाच अपि ब्रह्मन् गुरुकुलाद्भवता लब्धदक्षिणात् समावृत्तेन

धर्मज्ञ भार्योढा सदृशी न वा २८ प्रायो गृहेषु ते चित्तमकामविहितं तथा नैवातिप्रीयसे विद्वान् धनेषु विदितं हि

मे २९ ॥

अप्रतिषिधादुद्वाहमनुमत्य मत्वाह प्रायइति न हि ते न चित्तं नूनं अकामविहितं कामैर्विहतं न भवतीति मे विदि

तं तथाहि धनेषु वस्त्रादिषु नैवातिप्रीयसे हे विद्वन् इति विदुषस्तवैतद्युक्तमिति भावः २८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०३० कामहनत्वाभावेकिंगृहधर्मेक्लेशेनेत्याशंक्याहाकेचिदिति देवीः ईश्वरमायारचिताः प्रकृतीर्विषयवासनास्त्यजंतः कौमेरनाकृष्टचेत
सामपिकर्म्मकरणंहृष्टांतः यथाहमिति लोकसंग्रहलोकस्यसंग्रहोग्रहणंयथाभवतितथाऽहमीश्वरोपिकर्माणियथाकरोमि
तद्वत् ३० नोऽस्मावयोः यत्नोगुरोः विज्ञेयंपरमात्मतत्वंतमसः संसारस्य ३१ तत्रात्मज्ञानप्रदस्यगुरोरसंयत पूज्यत्वेवक्तुंपुरुषस्य
त्रीन्गुरूनाह सवाइनोऽस्माति इहसंसारयत्रसंभवोजन्ममात्रसपितातावदाद्यः प्रथमोगुरुः पूज्यः केऽन्योविद्याप्रदगुरुमाह
द्विजातेः सतः पुंसः सत्कर्मणांयत्रसंभवः उपनीयवेदाध्यापकइत्यर्थः सद्वितीयोगुरुः यथाहमीश्वरस्यतथाप्रथमादपि

केचित्कुर्वंतिकर्माणिकौमेरहतचेतसः त्यजंतः प्रकृतीर्देवीर्यथाहंलोकसंग्रहं ३० कश्चिद्गुरुकुलेवासंब्र
१५ ह्मन्स्मरसिनोयतः द्विजोविज्ञायविज्ञेयंतमसः पारमश्नुते ३१ सेवसत्कर्मणांसाक्षात्द्विजातेरिहसंभवः
आद्योंगयत्राश्रमिणांयथाहंज्ञानदोगुरुः ३२ नन्वर्थकोविदाब्रह्मन्वर्णाश्रमवतामिह येमयागुरुणा
वाचातरंत्यंजोभवार्णवं ३३ नाहमिज्याप्रजातिभ्यांतपसोपशमेनच तुष्येयंसर्वभूतात्मागुरुशुश्रूषयाय
था ३४

पूज्यइत्यर्थः ब्रह्मविद्याप्रदंगुरुंप्राह आश्रमिणंसर्वेषामपिज्ञानदोयः सतुसाक्षादहमेवेति ३२ अतोज्ञानप्रदंगुरु
स्त्र० रूपंमामाश्रित्ययेसंसारंतरंतितेबुद्धिमंतइत्याह नन्विति हे ब्रह्मन्ननुआश्रमवतांमध्येअर्थकोविदाः इहमनुष्यजन्मनितत्रापिवर्णाश्र ८५
व मेत्वसतियेमयागुरुणागुरुरूपेणचवाचोपदेशमात्रेणाञ्जः सुखेनैवभवार्णवंतरंतितेज्ञानप्रदान्गुरोराधिकः सेव्यानास्तिइ
त्यर्थः ३३ अतएवतेऽभ्यर्जनादधिकोधर्मश्चनास्तीत्याह नाहमिति इज्यागृहस्थधर्मः प्रजातिः प्रकृष्टंजन्मउपनयनंतेनब्रह्मचारिध
र्मउपलक्ष्यतेतताभ्यांतथापतसावनस्थधर्मेणउपशमनयतिधर्मेणवाऽहंपरमेश्वरः तथानतुष्येयंयथासर्वभूतात्मापिगुरुशुश्रू

वर्णा प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच अस्माकं गुरुशुश्रूषणं किमपि दैवाद्वसंपन्नं तत्किं त्वया स्मर्यत इति अपि न इति गुरौ निवसतामस्माकं यत्किमपि वृत्तं तत् कच्चित् कदाचित् ३५ अपर्तौ अप्रगते ऋतौ अकाल इत्यर्थः वातश्च वर्षं च तयोः समाहारः स्तनयित्नवो गर्जितानि चा भवन् ३६ निम्नं कूलं नतं उन्नतं च स्थानं ३७ अम्बूनां संप्लवः व्यामिश्रणाय स्मिन्नेकार्णवे कस्मिन्नित्यर्थः परिबभ्रिम परिभ्रमणं कृतवन्त इत्यर्थः अस्माद्वतोः परिपरितः विभ्रम मृड्डागमः छान्दसः॥ भारान् धृतवंत इत्यर्थः ३८ ३९ उवाच रूपयाश्लोकत्रयीयया यावत्पर्यन्तता थोडिव्याह अहो इति आत्मा देहः ४० गुरोर्निःकृतं प्रत्युपका

अपि नः स्मर्यते ब्रह्मन् वृत्तं निवसतां गुरौ गुरुदारैश्चोदितानामिंधनानयने क्वचित् ३५ प्रविष्टानां महारण्यमपर्तौ सुमहत् द्विजा वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ३६ सूर्यश्चास्तं गतस्तावत्तमसा चावृता दिशः निम्नं कूलं जलमयं न प्राज्ञायत किंचन ३७ वयं भृशं तत्र महानिलाम्बुभिर्निहन्यमाना मुहुरम्बुसंप्लवे दिशोऽविदन्तोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ३८ एतद्विदित्वा उदिते रवौ सांदीपनिर्गुरुः अन्वेषमाणो नः शिष्यानाचार्योऽपश्यदातुरान् ३९ अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः ४० एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिःकृतं यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ ४१ तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः संतु मनोरथाः छंदांस्ययातयामानि भवंत्विह परत्र च ४२ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु गुरोरनुग्रहेणैव पुमान् पूर्णः प्रशान्तये ४३ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम स२

रः सर्वे अर्था यस्मात्स आत्मा देहस्तस्यार्पणं विनियोगः ४१ अयातयामानि यातो यामो यस्य पक्वस्यान्नस्य तद्वदनुगतसारं भावातितद्वद् न्यदपि गतसारं गौण्यावृत्त्या यातयाममित्युच्यते अगतसाराणि छंदांसि मन्त्रा अधीयमानानि भवन्त्वित्यर्थः ४२ इत्थंविधान्येवंप्रकाराणि अनेकानि वृत्तानि किं त्वया स्मर्यन्त इति शेषः फलितमुपसंहरति गुरोरिति ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०९३० अस्माभिः किमनिर्वृत्तं असंपन्नं येषामस्माकं भवता सहवासो ऽभूत् ४४ भवतस्तु सर्वमेतद्विडंबनमात्रमित्याह यस्ये
त्ति त्वं दामयं वदारव्य ब्रह्म तथा श्रेयसामावपनं तद्रूपं वेस्थाने देहो मन्निर्यथा स्यात्तथा तव ४५ इति श्रीदशमेऽच्च
शीतितमः एकाशीतितमे सख्युर्जग्धो पृथुकतंडुलान् श्रियं निमित्तवानिद्रदुःखं भातु तदाश्रेते १ संकथयन्
ब्राह्मण उवाच किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो भवता सत्यकामेन येषां वासो गुरावभूत् ४४ यस्यछंदोमयं
ब्रह्मदेहआवपनं विभो श्रेयसां तस्य गुरुषु वासोऽत्यंत विडंबनं ४५ इति श्रीभागवते महापुराणे दशमस्कंधे अशीति
मोऽध्यायः शुक उवाच सइत्थं द्विजमुख्येन संकथयन् हरिः सर्वभूतमनोभिज्ञः स्मयमान उवाचतं १ ब्रह्मण्यो
स्क०३ ब्राह्मणं कृष्णो भगवान्प्रहसन्प्रियं प्रेम्णा निरीक्षणेनैव प्रेक्षन्खलु सतां गतिः २ श्रीभगवानुवाच किमु
८० पायनमानीतं ब्रह्मन्मे भवता गृहात् अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ३ भूर्यप्यभक्तोपहृतं न मे तो
षाय कल्पते पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ४ इत्युक्तो
पि द्विजस्तस्मै व्रीडितः पतये श्रियः पृथुकप्रसृतिं राजन्न प्रायच्छदवाङ्मुखः ५ सर्वभूतात्मदृक् साक्षात्त
स्यागमनकारणं विज्ञायाचिंतयन्नायं श्रीकामो माभजत्पुरा ६ पत्न्याः पतिव्रतायास्तु सखा प्रियचिकी
र्षया प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ७
सुखगोष्ठिं कुर्वन् सर्वभूतानां मनसोऽभिज्ञः मदर्थं पृथुकानानीय दत्तं तुलज्जत
इति जानन्नित्यर्थः १ प्रहसन् स्वलीकुर्वन् २ लज्जया तत्कथयतस्तामपानुदन्नाह आएवपीति द्वाभ्यां ३ ४ ५ सर्वभूताना राम
मात्मदृक् अंतः करणसाक्षी ६ अमर्त्यानां देवानामपि दुर्लभाः ७ ८०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिजीर्णाचाहससनस्यपुनस्तन्मध्येविजीर्णाबल्वान् ८ अंगहेसखेमांविश्वंविश्वात्मानेमां ९ इतिवदन्नेकांमुष्टिंजग्धात्वोरेति अयंभावः एताव
तापुंसाऽहामुत्रचमत्कराक्षविलासभूतानांसर्वसंपदांसमृद्धयेअलं अतः परंद्वितीयमुष्टुदनेनमांमामनदधीनांकुर्विति १० त्वत्तोष
कारणंतवतोषस्यकारणंयथाभवन्तेथासर्वसंपत्समृद्धये यांभक्तस्यसमृद्धिंदृष्ट्वांबुतुष्येरित्यर्थः ११ स्वर्गतेस्वर्गवासिनं १२ स्वाभ

इत्थंविचिंत्यवसनाच्चीरबद्धान्द्विजन्मनः स्वयंजहारकिमिदमितिपृथुकतंदुलान् ८ नन्वेतदुपनीतंमेपरमप्री म १
णनंसखे तर्पयंत्यंगमांविश्वमेतेपृथुकतंदुलाः ९ इतिमुष्टिंसकृज्जग्ध्वाद्वितीयांजग्धुमाददे तावच्छ्रीर्जगृ ८
हेहस्तंतत्परापरमेष्ठिनः १० एतावतालंविश्वात्मन्सर्वसंपत्समृद्धये अस्मिन्लोकेथवामुष्मिन्पुंसस्त्वत्तो
षकारणं ११ ब्राह्मणस्तांतुरजनीमुषित्वाच्युतमंदिरे भुक्त्वापीत्वासुखंमेनेआत्मानंस्वर्गतंयथा ॥ १२
श्वोभूतेविश्वभावेनस्वसुखेनाभिवंदितः जगामस्वालयंतातपथ्यनुव्रज्यनंदितः १३ सचालब्ध्वाधनं
कृष्णान्नतुयाचितवान्स्वयं स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः १४ अहोब्रह्मण्यदेवस्यदृष्टा
ब्रह्मण्यतामया यद्दरिद्रतमोलक्ष्मीमाश्लिष्टोबिभ्रतोरसि १५ क्वाहंदरिद्रःपापीयान्क्वकृष्णःश्रीनि
केतनः ब्रह्मबंधुरितिस्माहंबाहुभ्यांपरिरंभितः १६ श्रीराम श्रीराम श्रीराम श्रीराम ॥

नेउदितेरवौविश्वंभावयतीतिविश्वभावः तेनेतिपुरतोभाविनमिंद्रदुर्लभविभवंसूचयति स्वसुखेनस्वानंदपूर्णनेतिदीनः दीनतां
दर्शयतिनंदितोविनयोक्तिभिः १२ व्रीडितः स्वचित्तकार्पण्यपन्नत्वज्जितः महान् श्रीकृष्णस्यदर्शनेननिर्वृतः १४ निर्वृत्तिमेवाह
अहोइति चतुर्भिःयत्‌यतः लक्ष्मीमुरसिविभ्रता आश्लिष्टोहं १५ पापीयान्नीचः १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मसं

मा०७ १७ पूजितश्चंदनलेपनादिभिः १८ एवंसंपूज्यापि धनस्यादानेकारणंकल्पयति स्वर्गापवर्गयोरितिद्वाभ्यां १९ स्वर्गादीनांयद्यपि
तस्यचरणार्चनमेवकारणंतथापिकारुणिकत्वादभूयपि धनंनाददात् २० निजगृहस्यातिकेतत्प्राप्तंतत्तस्यविशेषणंसूर्येति २१ वि
श्लो:१ चित्रोपवनादिभिरेतांकथंभूतः कूजद्भिर्द्विजकुलैः तथाप्रोत्फुल्लानि कुमुदादीनियेषुतानिवारीणियेषुतानितथोक्तैः २२

निवासितः प्रियाजुष्टपर्यंके भ्रातरोयथा महिष्यावीजितःश्रांतोबालव्यजनहस्तया १७ शुश्रूषयापरमयापा
दसंवाहनादिभिः पूजितोदेवदेवेन विप्रदेवेनदेववत् १८ स्वर्गापवर्गयोःपुंसांरसायांभुविसंपदां सर्वासाम
पिसिद्धीनांमूलंतच्चरणार्चनं १९ अधनोयंधनंप्राप्य माद्यन्नुच्चैर्नमांस्मरेत् इतिकारुणिकोनूनं धनंमेभू
रिनाददात् २० इतितच्चिंतयन्नंतः प्राप्तोनिजगृहांतिकं सूर्यानलेंदुसंकाशैर्विमानैः सर्वतोवृतं २१ विचि
त्रोपवनोद्यानैः कुजद्विजकुलाकुलैः प्रोत्फुल्लकुमुदांभोजकल्हारोत्पलवारिभिः २२ जुष्टंस्वलंकृतैःपु
८२ भिःस्त्रीभिश्चहरिणाक्षिभिः किमिदंकस्यवास्थानंकथंतदिदमित्यभूत् १३ एवंमीमांसमानंतंनरानार्योमर समा
प्रभाः प्रत्यगृह्णन्महाभागंगीतवाद्येनभूयसा १४ पतिमागतमाकर्ण्यपत्न्युद्धर्षातिसंभ्रमा निश्चक्रामगृ
हात्तूर्णंरूपिणीश्रीरिवालयात् २४

किंच जुष्टमितिहरिणानामिवाक्षीणियासांताभिः तदैश्वर्यंदृष्ट्वावितर्कितवान् तदेवाह
किमिदमिति प्रथमंतेजःपुंसंजंदृष्ट्वाकिमिदमिति पश्चाद्विमानानिदृष्ट्वाकस्यचेति स्थानंचस्वीयमितिज्ञात्वाकथंतदिदं= राम
स्थानमिति एवंरूपमभूदिति १३ अमरप्रभाः तत्तुल्यकांतयः प्रत्यगृह्णन्नुपायनादिभिरादृतवंतः २४ उद्धृताहर्षो ८१
यस्याःसाअतिसंभ्रमश्चादरोयस्याः सा आलयात्कमलवनात्रूपधारिणीश्रीरिव स्वगृहस्यतत्रभगवतात्रानीतत्वात्स्व

५८ [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० ५०

यतएवंभूतः श्रीकृष्णः ततः सएवसर्वोत्तमइत्याह जयतीति जनानांनिवासः आश्रयः तेषुवानिवसति अंतर्यामितया तथासक
लोजयति देवक्यांजन्मेतिसवादमात्रंयस्यसः पर्षन्तुसभा तेसेवकरूपायस्यइच्छामात्रेणनिरसनसमर्थोपिक्रीडा
र्थंदोर्भिरधर्ममस्यन्तु क्षिपन्तु स्थिरचरवृजिनघ्नः अधिकारिविशेषानपेक्षमेववृंदावनगततरुलतादीनांसंसार

१२७

जयतिजननिवासोदेवकीजन्मवादोयदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं स्थिरचरवृजिनघ्नः सुस्मितश्री
मुखेनव्रजपुरवनितानांवर्द्धयन्कामदेवं ४८ इत्थंपरस्यनिजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरू
पविडंबनानि कर्माणिकर्मकषणानियदूत्तमस्यश्रूयादमुष्यपदयोरनुवृत्तिमिच्छन् ४९ १२७

नां
दुःखंहंता तथाविलासैर्वेदप्रधानेपक्षंव्रजवनितानांपुरवनितानांचसुस्मितेन श्रीमत्तासुखेनैवकामदेवंवर्द्धयन्काम
श्चासोदीव्यतिविजिगीषतिसंसारमितिदेवस्तंभोगद्वारामोक्षपदमित्यर्थः ४८ राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ पूजितश्चन्दनलेपनादिभिः १८ एवं संपूज्यापि धनस्यादानेकारणं कल्पयति स्वर्गापवर्गयोरितिद्वाभ्यां १९ स्वर्गादीनां यद्यपि तस्य चरणार्चनमेव कारणं तथापि कारुणिकत्वादभूयोपि धनंनाददात् २० निजगृहस्यान्तिकं तत्प्राप्तं तत्तस्य विशेषणं सूर्येति २१ वि चित्रोपवनादिभिरेतां कथं भूतैः कूजद्भिर्द्विजकुलैः तथा प्रोत्फुल्लैर्निकुमुदादीनि यपुत्रानि वारीणि येषु तानि तथोक्तैः २२

निवासितः प्रियाजुष्टे पर्यंके भ्रातरो यथा महिष्या वीजितः श्रान्तो बालव्यजनहस्तया १७ शुश्रूषया परमया पा दसंवाहनादिभिः पूजितो देवदेवेन विप्रदेवेन देववत् १८ स्वर्गापवर्गयोः पुंसां रसायां भुवि संपदां सर्वासाम पि सिद्धीनां मूलं तच्चरणार्चनं १९ अधनोयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् इति कारुणिको नूनं धनमेभू रिनाददात् २० इति तच्चिंतयंस्ततः प्राप्तो निजगृहान्तिकं सूर्यानलेन्दुसंकाशैर्विमानैः सर्वतो वृतं २१ विचि त्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः प्रोत्फुल्लकुमुदांभोजकल्हारोत्पलवारिभिः २२ जुष्टं स्वलंकृतैः पुं भिः स्त्रीभिश्च हरिणाक्षिभिः किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् १२ एवं मीमांसमानं तं नरा नार्योमर प्रभाः प्रत्यगृह्णन्महाभागं गीतवाद्येन भूयसा १४ पतिमागतमाकर्ण्य पत्न्युद्धर्षातिसंभ्रमा निश्चक्रामगृ हात्तूर्णं रूपिणी श्रीरिवालयात् २४

किंच जुष्टमिति हरिणानामिवाक्षीणि यासां ताभिः तदैश्वर्यं दृष्ट्वा वितर्कितवान् तदेवाह किमिदमिति प्रथमं तेजः पुंसजं दृष्ट्वा किमिदमिति पश्चाद्विमानानि दृष्ट्वा कस्य चेति स्थानं च स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमिति एवं रूपमभूदिति १२ अमरप्रभाः तत्तुल्यकान्तयः प्रत्यगृह्णन् उपायनादिभिरादृतवन्तः २४ उद्धर्ता हर्षो यस्याः सा अतिसंभ्रमश्चादरो यस्याः सा आलयात् कमलवनात् रूपधारिणी श्रीरिव स्वर्गस्य तत्र भगवतानीतत्वात् स्व

सुदामचरितसारभावः २८ राम

प्रस्तावेन सह गाथार्थं संक्षेपतो दर्शयति द्वाभ्यां ॥ इत्थं नष्टद्वित्रिणा निर्विघ्नगतस्कमः प्रव्रज्यां गापर्यटन्न सक्तिर्निराकृतो ॥ परिस्वधर्मा दंकोपि
तः सन्मनिरमूं गाथामगायदित्यन्वयः ॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा० श्रीगणेशाय नमः जयंति श्रीपरानंदकृपापांगसदृशः यानित्यमनुवर्त्तंते संपूर्णाविगताहृशः १ उक्तास्त्रयोदशाध्यायैर्द्वादशेत्वा
श्रयः सतः अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरः सतः २ उक्तोऽलयावधित्वेन प्राकृतात्यंतिकेऽलये अधिष्ठानतया चोक्तो महा
पुरुषवर्णने ३ तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षितः शेषैस्तत्र रविस्तोत्याह सूतः पृष्टोथ सत्रिभिः ४ स्वाश्रयश्रवणे
कार्योन विलंबो मनीषिणा इत्यथ तु कालेवेषम्युचतुर्भिस्तावदुच्यते ५ तत्रतु प्रथमे भाविमागधान्वयभूमिपान् कलि
प्रभावतः प्राह संकरादिमलीमसान् ६ एवंभूते सोमवंशे मुकुंदस्वैरक्रीडावर्णितो व्यास एववंशो भावीवर्ण्यते हि ष्व भक्तिमुक्ता
२ मुनेर्यवर्त्मना लीनिवृत्तेः ७ तेदंवैवस्वतमनुवंशे सोमवंशप्रसंगेन श्रीकृष्णावतारचरितानि सप्रपंचमनुवर्णितानि अथ इदा
नीं भावि सोमवंशः कलौ विजातीयसंकरादिमलीमसो वैराग्यद्वारा श्रीकृष्णे भक्तिनिगमनायानुवर्ण्यते तत्रतु सोमवंश
१ शाखासु चिरकालानुवर्त्तितया मागधवंशानुक्रमते तत्र पुरोर्वंशे उपरिचरो वसुस्तस्य बृहद्रथः तस्य जरासंधः तस्य
सहदेवः पुत्रोभूदित्युक्तं नवमस्कंधे तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवाः इत्यादयो रिपुंजयांता विंशतिर्भाविनो रा
जानो निरूपिताः॥

परीक्षिदुवाच स्वधामानुगते कृष्णे यदुवंशविभूषणे कस्य वंशोभवत्पृथ्व्यामेतदाचक्ष्व मे मुने १ शुक उवाच
योऽत्यः पुरंजयो नाम भविष्यो बारहद्रथः तस्याऽमात्यस्तु शुनको हत्वा स्वामिनमात्मजं प्रद्योतसंज्ञं राजा
नं कर्तायत्पालकः सुतः २

तदुपरितनं वंशं संकरादिदोषैः प्रपंचयति योंऽत्य इति रिपुंजय एव पुरंजयः स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति राम
यस्य पालको नाम सुतो भविष्यति १ २ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ प्रद्योतनाः प्रद्योतसंज्ञाः ४ ६ ८ नंदोनामकश्चिन्महापद्मसंख्यायाः सेनायाः धनस्य वा पतिर्भविष्यति अत एव महापद्म इत्य

[illegible]
[illegible] सुतः १ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ३ नंदिवर्द्धनस्तत्पुत्रः
पंचप्रद्योतना इमे अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः ४ शिशुनागस्ततो भाव्यः काकवर्णस्तो त
त्सुतः १ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेत्रधर्मजः ५ विधिसारः सुतस्तस्याऽजातशत्रुर्भविष्यति द
र्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ६ नंदिवर्धनस्त्वाजेयो महानंदिः सुतस्ततः शिशुनागा द
शैवैते षष्ट्युत्तरशतत्रयं ७ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः महानंदिसुतो राजन् शूद्रीग
र्भोद्भवो बली ८ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृत् ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मि
काः ९ स एकछत्रां पृथिवीमनुल्लंघितशासनः शासिष्यति महापद्मो द्वितीय इव भार्गवः १० श्री
तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः सुताः य इमां भोक्ष्यंति महीं राजानः स्म शतं समाः ११ ॥

पितस्य नाम ९ एकमेवछत्रं यस्यां तां पृथिवीं शासिष्यति पालयिष्यति क्षत्रोत्सादेन दृष्टांतः भार्गवः परशुरामइ
व १० समा संवत्सरान् ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तत्रिंशदुत्तरं ३

भा०९ नवनंदान् नंदं च तत्पुत्रांश्चैवं नवप्रपन्नान् विश्वस्तानुविरयात्मानुवाद्विजः कौटिल्यवात्स्यायनादिपर्यायश्चाणक्य उद्धरिष्यति उ
न्मूलयिष्यति मौर्याः मौर्यसंज्ञाः ११ कथं भोक्ष्यति तत्राह स एवेति चंद्रगुप्तं मौर्यं प्रथमं १३ १४ तेषां प्रथमो दशरथः पराशरादि
भिः कौचाप्यनुसंधेयस्तेन सह मौर्या दश सप्तत्रिंशच्छतोत्तरं शतं समाः १५ १७ बृहद्रथस्य सेनापतिः पुष्यमित्रो नाम स्वामिनं ह

नवनंदान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ ११ स एव चंद्रगुप्तं वै द्विजो राज्ये
भिषेक्ष्यति तस्यापि वारिसारस्तु ततश्चाशोकवर्द्धनः १३ सुयशा भविता तस्य संगतः सुयशःसुतः शालिशूकस्ततः
स्तस्य सोमशर्मा भविष्यति १४ शतधन्वा ततस्तस्य भविता तद्बृहद्रथः मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं
समा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह १५ अग्निमित्रस्ततस्तस्मात् सुज्येष्ठोऽथ भविष्यति वसुमित्रो भद्रकश्च
२ पुलिंदो भविता सुतः १६ ततो घोषः सुतस्तस्मात् वज्रमित्रो भविष्यति ततो भागवतस्तस्मात् देवभूतिरिति श्रुतः १७
शुंगा दशैते भोक्ष्यंति दशावर्षशताधिकं ततः कण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप १८ शुंगं हत्वा देवभूतिं क
ण्वोऽमात्यस्तु कामिनं स्वयं करिष्यते राज्यं वसुदेवो महामतिः १९ श्रीराम श्रीराम श्रीराम श्रीराम
ण्वो

त्वा राज्यं करिष्यति स च शुंगानां प्रथमः ततोऽग्निमित्रादयो नवेत्येवं शुंगाः दशावर्षशताधिकं द्वादशाधिकं [illegible] राम
वर्षशतं १८ कथं कण्वान्यास्यति तत्राह शुंगमिति परस्त्रीकामिनं देवभूतिनामानं शुंगं हत्वा तदमात्यो वसुदेव २
नामा कण्वो राज्यं करिष्यति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कण्वानां चतुर्थः सुशर्मा इमे वसुदेवादयः काण्वायनाः वर्षाणां त्रीणिशतानि पंच च चत्वारिंशद वर्षाणि त्रीणिशतानि पंचचत्वारिंशच
र्षाणि च भूमिं भोक्ष्यंति २० काण्वानामंतिमं सुशर्माणं हत्वा वलिहि कनामान अंध्रो गां भोक्ष्यति २१ ४ यज्ञैर्य पृथुवहुसंज्ञपुत्रश्च सु
नवमः शिवस्वातिनामा भविता २५ ७ आवभृत्याः अवभृति निर्गरीत द्राजानः २८ ९ एतेआभीरादयो मौनव्यतिरिक्ताः पंच

तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः काण्वायना इमे भूमिं चत्वारिंशच्च पंच च शतानि त्रीणि भोक्ष्यंति वर्षाणां च कलौ यु
गे २० हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली गां भोक्ष्यत्यंध्रजातीयः कंचित्कालमसत्तमः २१ कृष्णनामाथ तद्
भ्राता भविता पृथिवीपतिः श्रीशांतकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः २२ लंबोदरस्तु तत्पुत्रस्तस्माच्चिविलको
नृपः मेघस्वातिश्चिविलकादटमानस्तु तस्य च २३ अनिष्टकर्मा हालेयस्तलकस्तस्य चात्मजः पुरीषभीरु
स्तत्पुत्रस्ततो राजा सुनंदनः २४ चकोरो बहवो यत्र शिवस्वातिररिंदम तस्यापि गोमती पुत्रः पुरीमान् भविता
ततः २५ मेदशिराः शिवस्कंदो यज्ञश्रीस्तत्सुतस्ततः विजयस्तत्सुतो भाव्यश्चंद्रविज्ञः सलोमधिः २६ एते त्रिंशन्नृ
पतयः चत्वार्यब्दशतानि षट्पंचाशच्च पृथिवीं भोक्ष्यंति कुरुनंदन २७ सप्ताभीरा आवभृत्या दशगर्दभि
नो नृपाः कंकाः षोडश भूपाला भविष्यंत्यतिलोलुपाः २८ ततोष्टौ यवना भाव्याश्चतुर्दश तुरुष्ककाः भूयो दश ११
गुरुंडाश्च मौना एकादशैव तु २९ एते भोक्ष्यंति पृथिवीं दशवर्षशतानि च नवाधिकां च नवतिं मौना एकादश
क्षितिं भोक्ष्यंत्यब्दशतान्यंग त्रीणि तैः संस्थिते ततः ३०
पंच किलकिलायां नृपा एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यंति ततः पूर्वोक्ता एव एकादश मौनाः त्रीण्यब्दशतानि क्षितिं भोक्ष्यंति तैः संस्थितेन
षु मृतेषु किलकिलायां पुर्यां नृपतयो भविष्यंतीत्युत्तरेणान्वयः ३० राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लो॰ २

भा॰ द्वा॰ अधिकानि च षड्वर्षाणि ३१ तेषां भूतनंदादीनां यथापूर्वं वाह्लिकास्तन्नामानस्त्रयोदश सुताः भविष्यंति पुष्पमित्रो नामाऽन्यो रा
जन्यः अस्य च दुर्मित्रो नाम पुत्रः ३२ तथा आंध्राः कौशल्याः वैदूरपतयः निषधाश्च एते च तत्तद्देशानामधिपाः प्रख्याता एककाल
जयइतिप्रसि काल्याः खंडमंडलेषु भूपाः ततः एते भूपा वाह्लिकेभ्य एव भाव्या भविष्यंति ३३ ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता
सच पूर्वोक्तात्पुरंजयादन्यः पुरंजयादिति प्रसिद्धः स नु वर्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेंछप्रायान् करिष्य

किलिकिलायां नृपतयो भूतनंदोथ वंगिरिः शिशुनंदिश्च तद्भ्राता यशोनंदिः प्रवीरकः इत्येते वै वर्षश
तं भविष्यंत्यधिकानि षट् ३१ तेषां त्रयोदश सुता भवितारश्च वाह्लिकाः पुष्पमित्रोथ राजन्यो दु
र्मित्रोस्य तथैव च ३२ एककाला इमे भूपाः सप्तांध्राः सप्त कौशलाः वैदूरपतयो भाव्या निषधास्तत
एव हि ३३ मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः करिष्यत्यपरो वर्णान् पुलिंदयदुमद्रकान् ३५
३ श्लो॰ २ प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरी अनुगंगामाप्रया
गं गुप्तां भोक्ष्यति मेदिनी ३६ सौराष्ट्रावंत्याभीराश्च शूद्रा आर्बुदमालवाः व्रात्या द्विजा भविष्यंति शूद्र
प्राया जनाधिपाः ३६

तिश्चापरानिति पाठे अन्यान् पुलिंदादिसंज्ञान् वर्णान् करिष्यतीत्यर्थः ३४ स च एवं कृत्वा अब्रह्मभूयिष्ठाः अत्रैवर्णप्रचु राम
राः सतीः प्रजाः स्थापयिष्यति पालयिष्यति स च पद्मवत्यां पुरी अनुगंगं गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालि २
तां मेदिनीं भोक्ष्यति ३५ तदनंतरं च सौराष्ट्रादिदेशवर्तिनो द्विजाः व्रात्या उपनयनरहिता भविष्यंति ३६ राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अब्रह्मवर्चसः वेदाचारशून्याः ३७ इमे च ते म्लेच्छप्राया भूभृतः तुल्यकाला भविष्यंति किंच एते सर्वे अधर्मानृतपराः अधर्मे अनृते
च परिनिष्ठिताः फल्गुदाः अल्पदातारः ३८ उदितास्तमितप्रायाः हर्षशोकादिबहुलाः ३९ असंस्कृताः गर्भाधानादिसंस्कारर
हिताः प्रजाः भक्षयिष्यंति धनाद्यपहारादिना पीडयिष्यंति ४० किंच तन्नाथाः तेनाथायेषां ते जनपदाः देशवर्तिनो मनुष्याः
तच्छीलाचारवादिनः तेषामिव शीलमाचारो वादश्च तेषां ते ४१ द्वादशे प्रथमोध्यायः द्वितीये तु कलेर्दोषदृष्टोऽकल्क्यवतारतः
अधर्मिष्ठजने नष्टे पुनः कृतयुगागमः कलिधर्माननु प्रपंचयति ततश्चेत्यादिना १ धर्मन्याययोर्व्यवस्थायां बलमेव २ दांप

सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चा ब्रह्मवर्चसः ३७ तुल्यकाला
इमे राजन् म्लेच्छप्रायाश्च भूभृतः एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ३८ स्त्रीबालगोद्विजघ्नाश्च
परदारधनादृताः उदितास्तमितप्राया अल्पसत्वाल्पकायुषः ३९ असंस्कृताः क्रियाहीना रजसा तमसा
वृताः प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ४० तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः अन्योन्य
तो राजभिश्च क्षयं यास्यंति पीडिताः ४१ इति श्रीभागवते महापुराणे द्वादशस्कंधे प्रथमोऽध्यायः शुक उ
वाच ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः १ वित्तमेव क
लौ नृणां जन्माचारगुणोदयः धर्मन्यायव्यवस्थायां कारणं बलमेव हि २ दांपत्येऽभिरुचिर्हेतुर्मायैव
व्यावहारिके स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ३ श्रीराम श्रीराम श्रीराम श्रीराम

त्ये पतिभावे अभिरुचिरेव हेतुः न कुलगोत्रादिः व्यावहारिके क्रयविक्रयादौ स्त्रीत्वे पुंस्त्वे च तयोः श्रैष्ठ्ये रतिकौशलमेव हे
तुर्न कुलमाचारो वा ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा० आश्रमाणां रव्यातो ज्ञाने लिंगमेव दंडा जिनादि के हेतुर्न वाचार विशेषः अन्योन्यापत्तिकारणं त्र्याश्रमादाश्रमोर रव्यापोत्व का ८
रणं यद्वा बहूदकहंसादीनामन्योन्यापत्तौ नमस्कारादिव्यवहारे कारणं अवृत्यामुद्रापणादि दानासामर्थ्येन न्याय दौर्बल्य
पराजयः चापलं वचः बहुभाषणं ४ असाधुत्वे चौर्याद्यभियोगप्रसाधनं अलंकारः ५ दूरे वर्त्तमानवार्ययनं जलाशयस्तीर्थं
ननु गुर्वादि स्वार्थः पुरुषार्थः ६ ८ आछिन्नोऽपहृतादारा द्रविणानि च यासां ताः अपि बर्जि ९ ११ क्षीयमाणी ष्वित्यादीना

लिंगमेवाश्रमरव्यातावन्योन्यापत्तिकारणं अवृत्त्यां न्यायदौर्बल्यं पांडित्ये चापलं वचः ४ अनाढ्यतैवासाधुत्वे दं साधुत्वे १
भएवतु स्वीकारएव चोद्वाहे स्नानमेव प्रसाधनं ५ दूरे वार्ययनं तीर्थं लावण्ये केशधारणं उदरं भरता स्वार्थः
सत्यत्वे धार्ष्ट्यमेव हि ६ दाक्ष्यं कुटुंबभरणं यशोर्थे धर्मसेवनं एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले
४ ७ ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः प्रजा हि लुब्धै राजन्यै र्निर्घृणैर्दस्युधर्मभिः ८ आछिन्न
दारद्रविणा यास्यंति गिरिकाननं शाकमूलामिषक्षौद्रफलपुष्पाष्टि भोजनाः ९ अनावृष्ट्या विनंक्ष्यंति
१२४ दुर्भिक्षकरपीडिताः शीतवातातपप्रावृड् हिमैरन्योन्यतः प्रजाः १० क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यंते च
चिंतया त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणां ११ क्षीयमाणेषु देहेषु देहिनां कलिदोषतः वर्णाश्रम
वतां धर्मे नष्टे वेदपथे नृणां १२ पाषंडप्रचुरे धर्मे दस्युप्रायेषु राजसु चौर्यानृतवृथाहिंसा नानावृत्तिषु
वै नृषु १३ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु गृहप्राये ष्वाश्रमेषु यौनप्रायेषु बंधुषु १४ श्रीराम॥ राम

इत्थं कलौ गतप्राय इति पंचभिरन्वयः क्षीयमाणेषु अल्पप्रायेषु १२ दस्युप्रायेषु चौरतुल्येषु चौर्यानृतवृथाहिंसा द्यानाना ४
वृत्तयो येषां नृषु १३ छागप्रायासु प्रमाणतः क्षीरतश्च अजातुल्यासु॥१४ राम राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थास्नुषु वृक्षेषु विद्युत्प्रायेषु तडिद्बहुलेषु शून्यप्रायेषु सद्मसु गृहेषु १५ जनेषु खरधर्मिणि दुःसहचेष्टिते कलौ गतप्राये समाप्तप्राये १६
एतत्प्रपंचयति चतुर्भिः चराचरगुरोः ईश्वरस्यैव धर्मत्राणे हेतुः गुरुत्वेश्वरत्वयोरुपपादनं अखिलस्य विश्वस्यात्मनः कारणस्येति
एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय धर्मत्राणप्रयोजनमाह कर्मापनुत्तये मोक्षाय १७ शंभलग्रामेषु मुख्यस्य प्रधा
नस्य तन्नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे १८ धर्मत्राणप्रकारमाह अश्वमिति असाधवो दस्यवो येन तेन अश्वमारु-

अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु १५ इत्थं कलौ गतप्राये जनेषु
खरधर्मिणि धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः धर्मत्रा
णाय साधूनां जन्म कर्मापनुत्तये १७ शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः भवने विष्णुयशसः कल्किः प्रा
दुर्भविष्यति १८ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः असिनासाधुदमनमष्टैश्वर्यगुणान्वितः १९ ॥
विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः नृपलिंगच्छदो दस्यून् कोटिशो निहनिष्यति २० अथ तेषां
भविष्यंति मनांसि विशदानि वै वासुदेवांगरागातिपुण्यगंधानिलस्पृशां पौरजानपदानां वै हतेष्वखिल
दस्युषु २१

ह्यासिना दस्यून् कोटिशो निहनिष्यतीत्युत्तरेणान्वयः असाधुदमन इति पाठे कल्किविशेषणं १९ ॥
तत्प्रपंचः आशुना शीघ्रगामिना [illegible] तेन हयेन क्षोण्यां विचरन् अणिमाद्यष्टैश्वर्यादिगुणाः सत्यसंकल्पादयः तै
रन्वितः नृपलिंगच्छदः राजवेषच्छन्नान् २० ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह अथेति साध्वीभ्यां तेषां पौरजानपदानां मनां
सि विशदानि भविष्यंति तत्र हेतुः वासुदेवस्यांगरागे पाचंदनादिना तिपुण्यगंधो निलस्तं स्पृशंतीति तथा तेषां २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वा॰ स्थविष्ठः स्थूलः २२ कृतयुगप्रवृत्तिमाह यदाऽवतीर्णइति प्रजानां सूतिः प्रसूतिः २३ तदवतारकालोपलक्षणमाह यदा चंद्रश्चे
ति तिष्यः पुष्यः अयमर्थः चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगः तदा तत्कृतयुगं भविष्यतीति यद्यपि च प्रतिद्वादशाब्दं क
र्कराशौ बृहस्पतौ वर्त्तमाने हित्राखेमावास्यासु तेषां त्रयाणामपि पुष्ययोगः संभवति तथाऽपि तेषां सह प्रवेशोऽत्र विवक्षितः ।
समेष्यंतीति वचनात् अतो नातिप्रसंगः २४ एवं नवमस्कंधमारभ्यानुक्रांतं वैवस्वतमनोर्वंशद्वयं निगमयति येऽतीता इति उद्देशतः

तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति वासुदेवे भगवति सत्वमूर्तौ हृदि स्थिते २२ यदावतीर्णो भगवान् क
५ ल्किर्धर्मपतिर्हरिः कृतं भविष्यति तदा प्रजासूतिश्च सात्विकी २३ यदा चंद्रश्च सूर्यश्च तथा तिष्यबृहस्पती
एकराशौ समेष्यंति तदा भवति तत्कृतं २४ ये तीता वर्त्तमाना ये भविष्यंति च पार्थिवाः ते त उद्देशतः प्रोक्ता
वंशीयाः सोमसूर्ययोः २५ आरभ्य भवतो जन्म यावन्नंदाभिषेचनं एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं २६

संक्षेपतः २५ कलियुगावांतरविशेषवक्तुमाह आरभ्येत्यादिना वर्षसहस्रं पंचदशोत्तरं शतं चेति कयाऽपि विवक्षयाऽवांतरसंख्ये
यं वस्तुतः परीक्षिन्नंदयोरंतरं द्वाभ्यां न्यूनं वर्षाणां साईसहस्रं भवति यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुंजयांता राम
विंशती राजानः सहस्रसंवत्सरं भोक्ष्यंतीत्युक्तं नवमस्कंधे येवार्हद्रथभूपाला भाव्याः साहस्रवत्सरमिति ततः परं च प्रद्योतनाः ५
अष्टत्रिंशोत्तरशतं शिशुनागाश्च षष्ठ्युत्तरशतत्रयं भोक्ष्यंति पृथिवीमित्यग्रे वोक्तत्वात् २६ राम राम राम रा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३१

कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपायं प्रसंगादाह सप्तर्षीणां त्विति। अयमर्थः प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमंड
लं तत्र किंचिदुन्नतं पादाग्रस्थानीयो मरीचिः ततः पश्चाद्दीनमग्रयुगकंधराकारो वसिष्ठः सभार्यः ततः पश्चादीषदुन्नतं पादमूल
स्थानीयोंगिराः ततः पश्चाच्चतुरस्रं ताराचतुष्कं ईशान्यात्रिः ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः तदनंत
रं ततः क्रतुः एवं स्थितेषु तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ पुलहक्रतुसंज्ञौ तयोस्तमध्यतयोस्तु पूर्वयोस्तु मध्ये
२७। तत्समं दक्षिणतः समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते २७ तेन तथैव युक्तान्नृणामब्दशतं तिष्ठंति तच्च हि

सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दिवि तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि २७ तेनैव ऋषयो युक्तास्ति
ष्ठंत्यब्दशतं नृणां ते त्वदीये द्विजाः काल अधुना चाश्रिता मघाः २८ विष्णोर्भगवतो भानुः कृष्णाख्यो
सौ दिवं गतः तदाविशत्कलिर्लोकं पापे यद्रमते जनः २९ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ता
वत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत् ३० यदा देवर्षयः सप्त मघासु विचरंति हि तदा प्रवृत्तस्तु कलिर्द्वाद
शाब्दशतात्मकः ३१ यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः तदा नंदात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ३२

२८।२ जास्त्वदीये काले अधुना मघा आश्रिताः वर्तन्ते २८ यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्वात्मको देहः दिवं वैकुंठं गतः तदा कलि
युगमविशत् यस्मिन् युगे जनः पापे रमत इति कलियुगस्य लक्षणं २९ ननु श्रीकृष्णे पृथिव्यां वर्तमानेऽपि संध्यारूपेण कलिः
प्रविष्ट एवासीत् सत्यं तथा तावत्तस्य पराक्रमो नाभवदित्याह यावदिति पराक्रांतुं अभिभवितुं ३० अथ यथोक्तमेव कलिप्रवे
शकालमित्याह यदा देवर्षय इति द्वादशाब्दशतात्मक इति दिव्येन मानेन संध्यांशाभ्यां सह यो द्वादशाब्दशतात्मकः स कलिः
तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ३१ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह यदेति तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छ

टीकायां द्वादशस्कंधे ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा० ननुयदाकलेर्लिंगमुपलब्धंतदैवप्रविष्टइति युक्तंततः पूर्वमेवप्रवेशः ततः परंवृद्धिरित्यत्रकिंप्रमाणंतत्राहयस्मिन्निति प्रतिपन्नंप्रविष्टमि
तिज्ञातं पुराविदः पूर्वज्ञातारः ३३ कलेरनंतरंकृतयुगप्रवेशमाह दिव्याब्दानामिति चतुर्थेकलौ प्रवेशनाह्त्परिमितनाशेनापि
सहागतेसतीत्यर्थः कृतयुगप्रवेशचिह्नमाह यदानृणांमनआत्मप्रकाशकंभविष्यति तदेति ३४ राजवंशोक्तास्थितिब्राह्मणादि
वंशेष्वप्यतिदिशति इत्येषइति यथायाभिरुच्चनीचावस्थाभिः तास्ताअवस्थाः वंशाइतिचपाठः ३५ एततु कीर्तिनस्यवैराग्यपर्य

यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि प्रतिपन्नंकलियुगमितिप्राहुःपुराविदः ३३ दिव्याब्दानांसहस्रांते
चतुर्थेतुपुनःकृते भविष्यतियदानृणांमनआत्मप्रकाशकं ३४ इत्येषमानवोवंशोयथासंख्यायतेभुवि तथावि
ट्शूद्रविप्राणांतास्ताज्ञेयायुगेयुगे ३५ एतेषांनामलिंगानांपुरुषाणांमहात्मनां कथामात्रावशिष्टानांकीर्ति
६ रेवस्थिताभुवि ३६ देवापिःशंतनोर्भ्रातामरुश्चेक्ष्वाकुवंशजः कलापग्रामआसातेमहायोगबलान्वितौ ३७
ताविहैत्यकलेरंतेवासुदेवानुशिक्षितौ वर्णाश्रमयुतंधर्मंपूर्ववत्प्रथयिष्यतः ३८ कृतंत्रेताद्वापरंचकलि
श्चेतिचतुर्युगं अनेनक्रमयोगेनभुविप्राणिषुवर्त्तते ३९ राजन्नेतेमयाप्रोक्तानरदेवास्तथापरे भूमौममत्वंकृ
त्वांतेहित्वेमांनिधनंगताः ४०

गितामाह एतेषामिति नाममेवलिंगंज्ञापकंयेषांतेषांकथामात्रेणैवावशिष्टानांकीर्तिरेवस्थितानतुराज्यंपुत्रादयोवा कलावुत्स
न्नानांराजवंशानांपुनः प्रवृत्तिप्रकारमाह देवापिः सोमवंशजः मरुस्तुसूर्यवंशजः कलापग्रामोनामयोगिनामावासः ३६ राम
प्रसिद्धः ३७ ३८ इममेवप्रकारंप्रतिचतुर्युगंदर्शयति कृतमिति ३९ एतेषांनामलिंगानामित्यादियदुक्तंतत्प्रपं ६
चयति राजन्निति पंचभिः ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममत्वं स्नेहेत्यनेन सूचितां भूतद्रोहप्रवृत्तिं निंदति किमिति राजन्नात्मनः राजेति नामयस्य तस्यापि देहस्यांते क्रमेण यो विष्ठा भस्मेति वा संज्ञा भविष्य
ति तन्निष्ठेन तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद कुतइत्यपेक्षायां हेतुत्वेन भूतद्रोहं विशिनष्टि यतो भूतद्रोहान्निरयो भवतीति ४१
ममत्वप्रकारं प्रपंचयति कथमिति सेयमखंडा भूमिः पूर्वजैः पुरुषैर्धृतासती इदानीं मत्पूर्वोचसती मत्पुत्रादेः कथं स्यादित्येव ४२ उभौ
महीं कायं च। ग्र दर्शनं मृत्यु ४३ उपहे सरति येयइति ते सर्वे च कथासु क्रियमाणासु कथामात्राः कालेन स्मृताः ४४ इति द्वादशे द्वितीयः

भूमि विट् भस्मसंज्ञांते राजन्नाम्नः पियस्य च भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ४१ कथं सेयमखंडा भूः पू
र्वैर्मे पुरुषैर्धृता मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ४२ तेजोबन्नमयं कायं गृहीत्वात्मतया बुधाः महीं ममतया
चोभौ हित्वांते दर्शनं गताः ४३ ये ये भूपतयो राजन् भुंजंति भुवमोजसा कालेन ते कृताः सर्वे कथामात्राः कथासु
च ४४ इति श्रीभागवते महापुराणे द्वादशस्कंधे वंशानुकीर्तनं नाम द्वितीयोध्यायः श्रीशुक उवाच दृष्ट्वात्मनि
जये व्यग्रान् नृपान् हसति भूरियं अहो मा विजिगीषंति मृत्योः क्रीडनकान्नृपाः १ काम एष नरेंद्राणां मोघस्या
द्विदुषामपि येन फेनोपमे पिंडे येतिविश्रंभिता नृपाः २ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः ततः सचि
वपौराप्तकरींद्रान् अथकंटकान् ३ एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलां इत्याशाबद्धहृदया न पश्यंत्यंतिकेंतकं ४

तृतीये भूमिगीतेन राज्यदोषाद्विवर्ण्यते कलौ च दोषभूयिष्ठे दोषहन्नाहरेर्नतिः देहे हंता भूमौ च ममतां कुर्वंत्यतो बुधाइत्युक्तं गतेवं भूमिगीतैः प्रपंचय
ति दृष्ट्वेत्यादिना आत्मनि पृथिव्यां जये व्यग्रान् उत्कंठितान् हा सप्रकारमेवाह अहो इति १ येन कामेन फेनोपमे पिंडे देहे विश्रंभिता विश्वासं नीयंते येषां न
रेंद्राणां स एव कामो मोघ एव स्यात् २ काममेव दर्शयति द्वाभ्यां पूर्वमिति इंद्रियार्थलंपटस्य नराजप्राप्तिः स्यादिति प्रथममिंद्रियषड्वर्गं निर्जित्य गी२
राजमंत्रिणो जेष्यामः वशीकरिष्यामः सचिवा अमात्याः करींद्राहस्तियाः तांश्च जेष्यामः कंटकान् प्रतिपक्षान् अस्य अपास्य अथ कंट
कानिति वा पाठः ३ इति एवं केचिदाशाबद्धहृदयाः ४ राम राम राम राम राम राम राम राम रामश्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वा॰ इतिएवंकेचिदाशावद्धहृदय: ४ एवंकेचित्पुनर्मांजित्वाप्यनित्यस्मयाऽब्धिंविशन्ति नदैवमिंद्रियजयेनपराज्यंसाधयितुमिच्छंतिने तिमं
दाइत्याह कियदिति ५ अत: अनेकेनपरंपरानीत्युक्तेनदेवाह यामिति कुरुद्वहेति भूमिगीतंकथयन् शुक: संबोधयति कुत्कोह्वहाइ
त॰१ इतिनुपाठ: सुगम: ६ अबुद्धयइत्युक्तंप्रपंचयति मत्कृतइति ७ ८ रामोनामक श्चिद्राजा यद्वालोकदृष्ट्या दाशरथिरेवनिर्दिष्ट:

समुद्रावरणांजित्वामांविशंत्यब्धिमोजसा कियदात्मजयस्यैतन्मुक्तिरात्मजयेफलं ५ यांविसृज्यैवमनवस्तत्सुताश्च
कुरुद्वह गतायथागतंयुद्धेतांमांजेष्यंत्यबुद्धय: ६ मत्कृतेपितृ[illegible]पुत्राणांभ्रातॄणांचापिविग्रह: जायतेह्यसतां
राज्येममताबद्धचेतसां ७ ममैवेयंमहीकृत्स्नानतेमूढेतिवादिन: स्पर्द्धमानामिथोघ्नंतिम्रियंतेमत्कृते[illegible]नृ
पा: ८ पृथु: पुरूरवागाधिनर्हुषोभरतोऽर्जुन: मांधातासगरोराम: खट्वांगोधुंधुहारघु: ९ तृणबिंदुर्ययाति
निश्शर्यातिःशंतनुर्गय: भगीरथ:कुवलयाश्व: ककुत्स्थोनैषधोनृग: १० हिरण्यकशिपुर्वृत्रोरावणोलोक
रावण: नमुचि:शंबरोभौमोहिरण्याक्षोऽथतारक: ११ अन्येचबहवोदैत्याराजानायमहेश्वरा: सर्वेसर्वविद: शूरा: सर्वेसर्व
जितोजित: १२ ममतांमय्यवर्त्तंतकृत्वोच्चैर्मर्त्यधर्मिण: कथावशेषा:कालेनह्यकृतार्थाकृताविभो १३ कथा
इमास्तेकथितामहीयसांवितायलोकेषुयश:परेयुषां विज्ञानवैराग्यविवक्षयाविभोवचोविभूतीर्नतुपार
मार्थ्यं १४

९ १० लोकंरावयतिरोदयतीतिलोकरावण: ११ १२ मय्यवर्त्तंतेममतांकृत्वायेअवर्त्तंततेकालेनकथावशेषा: कृता: विभोइति राम
संबोधनंकुरुद्वहेतिवत् १३ राजवंशानुकथनस्यतात्पर्यमाह कथाइमाइति विज्ञानंविषयासारताज्ञानं तत्तोविरागं तयो ७
र्विवक्षया परेयुषां मृतानांवचोविभूती: वाग्विलासमात्ररूपा: पारमार्थ्यंपरमार्थयुक्तंकथनंनभवतीत्यर्थ: १४ राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्तर्हि पुरुषाणामुपायः परमार्थः तमाह यस्त्विति नित्यं प्रत्यहं तत्राप्यभीक्ष्णं १५ कलिदोषापचयं सति भक्तेरसंभवं मन्यमानः पृच्छति
केनोपायेनेति वि धमिष्यंति यथा यथावत् १६ कलियुगकः परमो धर्म इति बुभुत्सया पृच्छति युगानीति ब्रूहीत्यनुषंगः आत्यंतिक जि
ज्ञासया पुनः पृच्छति प्रलयकल्पयोः संहारस्थितिकालयोः न चायं वहिर्मुखः प्रश्न इत्याह कालस्येति १७ तत्र युगधर्मांस्ताव

यस्तूत्तमश्लोकगुणानुवादः संगीयतेभीक्ष्णममंगलघ्नः तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेमलां भक्तिमभीप्समा
नः १५ श्रीराजोवाच केनोपायेन भगवन् कलेर्दोषान् कलौ जनाः विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मुने
१६ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः १७ शुक उवाच कृ स्प ३
ते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृतः सत्यं दया तपो दानमिति पादा विभोर्नृप १८ संतुष्टाः करुणा मैत्राः शां
ता दांतास्तितिक्षवः आत्मारामाः समदृशः प्रायशः श्रमणा जनाः १९ त्रेतायां धर्मपादानां तुर्यांशो ही
यते शनैः अधर्मपादैरनृतहिंसासंतोषविग्रहैः २० तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटाः त्रैवर्गि
कास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप २१ तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः २२

वदाह कृत इति तज्जनैस्तत्कालीनैर्जनैः दानं रागद्वेषत्यागः अभयदानं तदेव प्रथमस्कंधे शौचशब्देनोक्तं विभोः संपूर्णस्य धर्मस्य १८
तदानींतनजनानाह संतुष्टा इति मैत्राः भूतमैत्रीयुक्ताः श्रमणाः आत्माभ्यासवंतः १९ २० ब्रह्मोत्तराः ब्राह्मणाधिकाः २१ अनृते
नुसत्यं हिंसया दया असंतोषेण तपः विग्रहेण दानमिति यथासंख्ययोज्य हिंसातुष्ट्यनृतद्वेषैरित्ययं क्रमो न विवक्षितः धर्मस्या
र्द्धं ह्रसति क्षीयते अधर्मस्य लक्षणैः चिन्हैः पादैरित्यर्थः २२ राम राम राम राम राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० यशस्विनः कीर्तिप्रियाः क्षत्रद्विजोत्तमाः क्षत्रियब्राह्मणप्रधानाः २३ कलौ धर्मपादानां तुर्यांशः चतुर्थांशोऽवशिष्यते २४ शूद्रदासोत्त
राः शूद्रकैवर्तादिप्रधानाः २५ युगानामेवंभूतवैषम्ये कारणमाह सत्त्वमिति पंचभिः २६ मनश्च बुद्धिश्चेन्द्रियाणि च सत्त्वे यदा प्रभवं
ति स्वविषयेषु वर्तन्ते २७ यदा कर्मादिषु भक्तिः प्रीतिस्तदा रजोऽत्र प्रधानं त्रेतायुगमिति जानीहि २८ काम्यानां कर्मणां विषययुद्ध
प्रीतिः तत्र दा रजस्तमः प्रधानं द्वापरं जानीहि २९ विषादनं दुःख ३० कलिदोषान् प्रपंचयति यस्मादित्यादिना यस्मात्कलौ

यशस्विनो महाशालाः स्वाध्यायाध्ययने रताः आढ्याः कुटुम्बिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः २३ कलौ तु धर्महेतूनां
तुर्यांशोऽधर्महेतुभिः एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनंक्ष्यति २४ तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः दुर्भ
गा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः २५ सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः कालसंचोदितास्ते वै परिवर्तन्त आत्मनि
८ २६ प्रभवंति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च तदा कृतयुगं विद्यात् ज्ञाने तपसि यद्रुचिः २७ यदा कर्मसु काम्येषु भक्तिर्भवति
देहिनां तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् २८ यदा लोभस्त्वसंतोषो मानो दंभोऽथ मत्सरः कर्मणां चापि का
म्यानां द्वापरं तद्रजस्तमः २९ यदा मायानृतं तन्द्रा हिंसा विषादनं शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ३० य
निद्रा २ स्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ३१ दस्यूत्कृष्टा जनपदा
वेदाः पाषण्डदूषिताः राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ३२ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

हैनोः क्षुद्रदृशः मंदमनयः क्षुद्रभाग्याः महाशनाः बह्वाहाराः वित्तहीना अपि कामिनः स्वैरिण्यः पुंश्चल्यः असतीः असत्यः राम

अल्पभाग्याः १ ३२ दस्यवः उत्कृष्टाः प्रचुरा येषु ते ३३ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अव्रता विहिताचारशून्याः अशौचाः शौचशून्याः अवटवो ब्रह्मचारिणो भविष्यंति कुटुंबिन अगृहस्थाः स्वयं भिक्षाटनपरा भविष्यं
ति न तु भि[illegible]क्षां दास्यंति तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यंति न्यासीनो यतयः अतिधनादिलोलुपा भविष्यंति ३४ पु
नरपि स्त्रीणां स्वभावमाह ह्रस्वकाया इति कटुकभाषिण्यः अप्रियवादिन्यः चौर्यं च माया च कपटं तद्रूपं च साहसं यासां ताः

अव्रता बटवो ऽशौचा भिक्षवश्च कुटुंबिनः । तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः ३४
ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः । शश्वत्कटुकभाषिण्यः चौर्यमायोरुसाहसाः ३५
पणायिष्यंति वै क्षुद्राः किराटाः कूटकारिणः । अनापद्यपि मंस्यंते वार्त्तां साधुजुगुप्सितां ३६
पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं । भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ननंदु
३७ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः । ननांदृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ३८

३५ किराटाः वणिजः पणायिष्यंति क्रयविक्रयादिव्यवहारं प्रवर्त्तयिष्यंति किंच सर्वे जनाः अनापद्यपि जुगुप्सितां निंदितां
वार्त्तां वृत्तिं साधु मंस्यंते ३६ सर्वोत्तममपि पतिं द्रव्यहीनं भृत्यास्त्यक्ष्यंति पतयश्च विपन्नं रोगादिभिर्व्यापाराक्षमं कौलं कुलपरंपरा
यातं त्यक्ष्यंति अपयस्विनीर्दुग्धदोहाः ३७ सौरतं सुरतनिमित्तं हृद्यं येषां ते अतएव ननंदारो भार्याभगिन्यः श्यालाः भार्या
भ्रातरः तैः संवादो मंत्रालोचनं येषां ते ननंदु इति वा पाठः ३८ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० अयमेवोपायो नान्य इति सदृष्टान्तमाह यथेति धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्रस्थितो वह्निरेव हरति न तु तोयादि एवं योगिनामपि विष्णुरेव न तु यागादिकमित्यर्थः ४८ एतदेव विवृणोति विद्येति विद्या देवतोपासना आत्मभावे स्वस्वरूपे ४९ ५१ इदानीं कलिं स्तौति द्वाभ्यां कलेर्दोषनिधे राजन्निति तत्सर्वं हरिकीर्त्तनादेव कलौ भवति ५२ ३ द्वादशे तृतीयः चतुर्थे चतुर्द्धा कालयं निमित्तिकादयः तत्र संसारनिस्तारो हरिकीर्त्या वर्ण्यते कलिदोषनिवर्त्तकं हरिनामसंकीर्त्तनादिकं स एव च कलोपरमो ५२

यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजं एवमात्मगतो विष्णुर्योगिनामशुभाशयं ४८ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः नात्यन्तशुद्धिं लभतेन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ४९ तस्मात्सर्वात्मना राजन् हृदिस्थं कुरु केशवं म्रियमाणो ह्यवहितस्ततो यासि परां गतिं ५० म्रियमाणैरभिध्येयो भग-
५० वान्परमेश्वरः आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः ५१ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः कीर्त्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् ५२ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः द्वापरे परिचर्यायां कलौ तद्धरिकीर्त्तनात् ५३ इति श्रीभागवते महापुराणे द्वादशस्कंधे तृतीयोऽध्यायः ॥ श्रीशुक उवाच ॥ कालस्ते परमाण्वादिर्द्विपरार्द्धावधिर्नृप कथितो युगमानं च शृणु कल्पलयावपि १ श्रीराम श्रीराम

धर्म इति प्रश्नद्वयस्योत्तरमुक्तं यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तदिदानीं तृतीयस्कंधोक्तकालानुवादपूर्वकं निरूपयति काल इति राम
स कालः परमाणुर्वै यो भुंक्ते परमाणुतामित्यादिना कालः कथितः चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि १०
द्वि द्विगुणानि शतानि चेति युगमानं च कथितं १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र कल्पमानमाह चतुर्युगेति यत्र चतुर्दश मनवः क्रमेण भवंति प्रलयस्तु चतुर्विधः १ नैमित्तिकः प्राकृतिकः आत्यंतिको नित्यश्चेति तत्र
नैमित्तिकं प्रलयं मानसहितमाह तदंत इति द्वाभ्यां तावान् चतुर्युगसाहस्रप्रमाणः सैव ब्राह्मी रात्रिः २ नैमित्तिकत्वं दर्शयति यत्र
यदा विश्वसृक् श्रीनारायणः विश्वमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते आत्मभूः ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मण
एवानं[illegible]तासनत्वमुक्तं ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्त्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ४ प्राकृतिकं प्रलयमाह द्वाभ्यां

चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते सकल्पो यत्र मनवश्चतुर्दश विशांपते १ तदंते प्रलयस्तावान् ब्राह्मी रात्रिरुदा
हृता त्रयो लोका इमे यत्र कल्पंते प्रलयाय हि २ एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् शेतेनंतासनो विश्व
मात्मसात्कृत्य चात्मभूः ३ द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः तदा प्रकृतयः सप्त कल्पंते प्र[illegible]लयाय वै
४ एष प्राकृतिको राजन् प्रलयो यत्र लीयते आंडकोशस्तु संघातो विघात उपसादिते ५ पर्जन्यः शतव
र्षाणि भूमौ राजन्न वर्षति तदा निरन्ने ह्यन्योन्यं भक्षमाणाः क्षुधार्दिताः क्षयं यास्यंति शनकैः कालेनोपद्रु
ताः प्रजाः ७ सामुद्रं दैहिकं भौमं रसं सांवर्त्तको रविः रश्मिभिः पिबते घोरैः सर्वं नैव विमुंचति ८ श्रीराम

द्विपरार्द्धे तु ब्रह्मण आयुषि सप्त प्रकृतयः महदहंकारः पंचतन्मात्राणि ५ संघातः महदादि[illegible] कार्यभूतः प्रकृतीनां तत्कार्यं ब्रह्मांडस्य
च लयात् प्राकृतिक इत्यर्थः विघातो विघातकारणं उपसादिते सति ६ तदेवाह पर्जन्य इत्यादिना बुद्धींद्रियादिरूपेण त्यक्तः प्राक्त
नेन ग्रंथेन [illegible] ७ सामुद्रादिकं सर्वं रसं रविः पिबते आकर्षति श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टी॰ अनिलवेगोत्थः वायुवेगोद्भूतः अनिलवेगोवाइति पाठे अनिलेन वेगो यस्य सः वाः रविणा रश्मिभिः पीनमुदकं च दहतीत्यर्थः अनिल
वेगोवाइति पाठः सुगमः भूविवरान् पातालादीन् शून्यान् रविणा दहिकरसाकर्षणान् प्राणिरहितान् ९ शिखाभिर्ज्वालाभिः

ततः संवर्त्तकोवह्निः संकर्षणमुखोत्थितः । दहत्यनिलवेगोत्थः शून्यान् भूविवरानथ ९ उ
पर्यधः समंताच्च शिखाभिर्वह्निसूर्ययोः । दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् १० त
तः प्रचंडपवनो वर्षाणामधिकं शतं परः संवर्त्तको वाति धूम्रखं रजसावृतं ११ ततो मेघ
कुलान्यंग चित्रवर्णान्यनेकशः । शतं वर्षाणि वर्षंति नदंति रभसस्वनैः । तत एकोदकं वि
११ श्वं ब्रह्मांडविवरांतरं १२ तदा भूमेर्गंधगुणं ग्रसंत्याप उदप्लव ग्रस्तगंधा तु पृथिवी प्रल
यत्वाय कल्पते १३ आपां रसमथो तेजस्ता लीयंतेऽथ नीरसाः ग्रसते तेजसो रूपं वायुस्तद्रहि सो॰ २
ततदा १४ लीयते चानिले तेजो वायोः खं ग्रसते गुणं स वैविशति खराजं स्ततश्च नभसा गु
णः १५ शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते तैजसश्चेंद्रियाण्यंग देवान्वैकारिका गुणाः १६

१० किंचिदधिकं वर्षाणां शतं संवर्त्तकः परो वायुर्वाति तदा रजसावृतं खं धूम्रं भवति ११ रभसस्वनैः तीव्रगर्जितैः ब्रह्मांडविव राम
रांतरं ब्रह्मांडविवरमध्यगतं विश्वं एकोदकं एकार्णवोदकं व्याप्तं भवति १२ उदप्लवे उदके नाशाविते सति प्रलयत्वाय अभा ११
वाय १३ १४ १५ भूतादिः नामसोहंकारः गुणैर्वृत्तिः सह १६ राम राम राम राम राम राम

त्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपरिणामः।

अव्याकृतेप्रधाने १७ तस्यतुल्येयानास्तीत्याह नतस्येति कालावयवैः अहोरात्रादिभिः गुणाः भावविकाराः परिणामः अव्यक्तेअस्तित्व विकार
शून्यं नित्यंसर्वदैकरूपं प्रवृद्धिरहितमित्यर्थः अव्ययअपक्षयशून्यं सर्वत्रहेतुः कारणमिति १८ किंच वागादिगोचरस्य सविशेषस्य विका
राभवति इदंतुनतथेत्याह नयत्रेति द्वाभ्यां लोककल्पः लोकरूपः सन्निवेशः रचनाविशेषः १९ स्वप्नजाग्रत् स्वप्नजागरावस्थायुक्तं सुषु
प्तवत् इंद्रियाभावात् शून्यसादृश्येहेतुः अप्रतर्क्यं नपुनः शून्यमेवेत्याह तदिति २० उपसंहरति लयइति शक्तयः सत्वादयः २१

महान्यस्त्वहंकारेगुणाः सत्वादयस्ततः ग्रसतेव्याकृतेराजन्गुणान्कालेननोदितं १७ नतस्यकाला
वयवैः परिणामादयोगुणाः अनाद्यनंतमव्यक्तंनित्यंकारणमव्ययं १८ नयत्रवाचोनमनोनसत्वंन
मोरजोवामहदादयोमी नप्राणबुद्धींद्रियदेवतावानसन्निवेशः खलुलोककल्पः १९ नस्वप्नजा
ग्रन्नचतत्सुषुप्तंनखंजलंभूरनिलोग्निरर्कः संसुप्तवच्छून्यवदप्रतर्क्यंतन्मूलभूतंपदमामनंति २०
लयः प्राकृतिकोह्येषपुरुषाव्यक्तयोर्यदा शक्तयः संप्रलीयंतेविवशाः कालविद्रुताः २१ बुद्धींद्रिया
र्थरूपेणज्ञानंभातितदाश्रयं दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तुयत् २२ श्रीराम श्रीराम श्री

आत्यंतिकंलयमाह बुद्धींद्रियेतिद्वादशभिः आत्यंतिकलयोमोक्षः सचब्रह्मज्ञानेनसर्वप्रपंचलयात्मकः नचप्रपंचस्यात्मवत्स
त्वेलयः संभवतीतिविज्ञानरूपात्ब्रह्मणः पृथक्त्वेनतस्यासत्वमुपपादयति बुद्धिःइंद्रियाणिअर्थाश्चेत्येवंग्राहकंकरणग्रा
ह्यरूपेणेति तेषामाश्रयंज्ञानमेवभातिनपृथक्तत्रहेतुमाह दृश्यत्वाव्यतिरेकाभ्यामिति अतोयदाद्यंतवत्तदवस्तु अत्रेवंप्रयो
गः विमतंसन्नभवति दृश्यत्वात्कारणव्यतिरेकात् आद्यंतवत्त्वाच्चरज्जुसर्पादिवदिति २२ राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰स्का॰ तत्राव्यतिरेके दृष्टांतेन प्रपंचयति दीपइति दीपश्चक्षू रूपाणां तेजो विशेषाणां यथा तेजसो नव्यतिरेकः तथाधीः कर्त्तृ खानि करणानि
मात्राः विषयाः ऋतात् ब्रह्मणः पृथक् न स्युर्ब्रह्मकार्यत्वात् नन्वेवं कार्यकारणयोरभेदे कार्यासत्वे कारणस्याप्यसत्वप्रसंगः स्यत्तत्रा
ह। अन्यतमादिति कार्यादित्यं तव्यतिरिक्तो ब्रह्मणः प्रपंचो ब्रह्मणस्तु व्यतिरेकः प्रपंचस्य तु न तेनानास्ति व्यतिरेक इत्यर्थः २३॥
यदातु बुद्धेरसत्वं तदा तदवस्थानां सुतरामसत्वमित्याशयेनाह बुद्धेरिति ननु विश्वतैजसप्राज्ञानां एतास्त्ववस्थान बुद्धे

दीपश्चक्षुश्च रूपंच ज्योतिषा न पृथग्भवेत् एवंधीः खानि मात्राश्च न स्युरन्यतमादृतात् २२ बुद्धेर्जा
नै॰ गरणं स्वप्नः सुषुप्तिरिति चोच्यते मायामात्रमिदं राजन् नानात्वं प्रत्यगात्मनि २४ यथाजलधरा
११ व्योम्नि भवंति न भवंति च ब्रह्मणीदं तथाविश्वमवयव्युदयाप्ययात् २५ श्रीराम श्रीराम॥

रितिननु विश्वतैजसप्राज्ञानां एता अवस्थानबुद्धे रित्याशंक्याह मायामात्रमिति इदं विश्वतैजसप्राज्ञरूपं २४ आद्यंतवत्वादित्यस्यहे राम
तोरसिद्धिमाशंक्य सावयवत्वेन साधयति यथेति अवयवीति यस्मा अवयववत्तदाद्यंतवत् घटादिवदित्यर्थः अत उदयाप्ययात् आद्यंत १२
वत्वाद्विश्वं सन्न भवतीत्यर्थः यद्वा पृथगेवागमापायित्वाद्विश्वं मिथ्या ब्रह्म तु न तदवधित्वात् सत्यमित्यनेन साध्यते दृष्टांतस्तु पूर्वो
क्त एव यथाजलधराव्योम्नीति दृष्टांतः स्वागमापायितदवधित्वमात्रेण नतु मिथ्यात्वेइति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विना१

अन्यत्तमाद्दनादिति प्रतिज्ञाने कारणस्य सत्यत्वमुपपादयति सत्यं हीति अवयवः कारणं प्रोक्तः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव
सत्यमित्यादिश्रुतिभिः अत्र युक्तिमपि दर्शयति विनेति अंगेहराज्ञन् हि यस्मात् अर्थेन अवयविनां पृथगेव अवयवाः प्रतीयेरंस्तथाय २
दस्याऽवयवाः तंतवः पटात्पृथक् प्रतीयंते तद्विदिति २५ ननु कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत सत्यं तदपि नातीव सत्यमित्याह
यदिति सामान्यं कारणं विशेषः कार्यं तद्रूपेण अन्योन्यापाश्रयत्वात् परस्परापेक्षत्वेन निरूपणात् सहत्वादित्यर्थः अतः कारणत्व
६१ मवधित्वं व्यापकत्वमित्यादिकमपि यत्परापेक्षत्वाद्यथैवं तत्सर्वमवस्त्वित्यर्थः यद्यानंत्रवहेतुं त्तरमेव तत् पदुपलभ्येत सभ्रमः सा

न

सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह विनार्थेन प्रतीयेरन् पटस्येवांग तंतवः २५ यत्सामान्यविशेषाभ्यामुपलभ्येत
सभ्रमः अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् २६ विकारः ख्यायमानोऽपि प्रत्यगात्मानमंतरा न निरूप्योऽस्
त्यणुरपि स्याच्चेच्चित्सम आत्मवत् २७

गुण

मान्यविशेषरूपत्वात्स्वप्नवत् अन्योन्यापाश्रयादितीदमपि हेतुत्वं नरो गुणिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्पराधीनसि
द्धत्वात् तथाभूतं स्वप्नवदिति निगमनं आद्यंतवत् तत्सर्वमवस्त्विति २६ तदेवमनेकैर्हेतुभिः प्रपंचस्यासत्त्वं प्रसाधितं २६
ननु शंकानंतु प्रपंचस्यापि प्रकाशमानत्वादात्मवत् सत्त्वं किं न स्यादिति तत्राह विकार इति ख्यायमानः प्रकाशमानोऽपि विकारः
प्रपंचः प्रत्यगात्मप्रकाशं विनाऽणुमात्रोऽपि न निरूप्योऽस्ति तं विना निरूप्यः स्याच्चेत् तर्हि सोऽपि चित्समः स्यात् चिद्रूपेणात्म
नाऽसमः स्वप्रकाशो भवेत् तथा च सति सोऽप्यात्मवत् स्यात् एकरूपः स्यादित्यर्थः २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० टी कुतइत्यतआह नहीति ननुसत्यस्याप्यात्मनोजीवब्रह्मरूपनानात्वमस्त्येवतत्राह यद्येवंनानात्वंमन्यतेतर्हिविद्वान्कथंतर्हितयोर्भेद
व्यहारः उपाधिकृतइत्याह नानात्वमिति तत्रछिद्रयोर्यथाघटाकाशमहाकाशयोरिवेतिपरिच्छेददृष्टांतः ज्योतिषोःआका‥शजलस्थ परिछेदा २
सूर्ययोरिवेत्युपाधिकृतविकारसहसद्भाववत्तयोर्वाह्यशरीरस्थयोर्घटादिवेतिक्रियाभेदे २८ ब्रह्मणएवप्रपंचव्यवहारात्वंवनत्वे
दृष्टांतेनस्पष्टयति यथेति क्रियाभिस्तत्तद्रचनाभेदैर्वहुधाकटककुंडलादिरूपेणलौकिकैर्वैदिकैर्वचोभिःजनैःअ‥कारो
पिहितेः २९ नन्वहंकारस्यकथंब्रह्मस्वरूपावरणेनभेदव्यवहारहेतुत्वंतस्यस्वकारणभूतब्रह्मावरकत्वासंभवात् आव्र

नहिसत्यस्यनानात्वमविद्वान्यदिमन्यते नानात्वंछिद्रयोर्यद्वत्ज्योतिषोर्वातयोरिव २८ यथाहिरण्यं
१३ बहुधासमीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु एवंवचोभिर्भगवानधोक्षजोव्याख्यायतेलौकिकवैदि
केर्जनैः २९ यथाघनोऽर्कप्रभवोऽर्कदर्शितोह्यर्कांशभूतस्यचचक्षुषस्तमः एवंत्वहंब्रह्मगुणस्तदी
क्षितोब्रह्मांशकस्याऽऽत्मनआत्मवंधनः ३०

णेवास्त्वस्यापिप्रकाशाभावादित्याशंक्यसदृष्टांतमाह यथेति अर्कोरश्मएवमेघरूपेणपरिणतोवर्षतीति अग्नौप्रास्ताहुतिः स राम १३
म्यक्आदित्यमुपतिष्ठति आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइत्यादिवचनात् तस्मादर्कप्रभवः अर्केणैवदर्शितः प्रकाशितःअ
र्कतमःस्वरूपभूतार्कदर्शनप्रतिबंधकोभवति अहं अहंकारः ब्रह्मगुणः ब्रह्मकार्यभूतः तदीक्षितस्तेनैवप्रकाशित
अंशआत्मनोजीवस्यआत्मवंधनः ब्रह्मरूपदर्शनप्रतिवंधकोभवति ३० राम राम राम राम राम राम

स्वे १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तै।

अतएवाहंकारनाशे स्वरूपदर्शनं भवतीति निदृष्टांतेनाह घनइति आत्मनउपाधिः जिज्ञासया विचारेण तर्हि नदा अनुस्मरेत् ब्रह्माहमिति पश्य
तीत्यर्थः ३१ सोयमात्यंतिकः प्रलयइत्युपसंहरति यदैवमिति विवेकहेतिना ज्ञानशस्त्रेण अहंकारण मेवात्मबंधनं अच्युतंपरिपूर्ण
मात्मानमनुभवतीत्यर्थः ३२ नित्यप्रलयमाह। नित्यदेति ३३ कुतइत्यत आह कालेति परिणामिनां नदीप्रवाहप्रदीपज्वालादीनां
याउत्पनीचावस्थास्ताः कालरूपस्रोतसोवेगेनाशु ह्रियमाणस्यदेहादेर्दृश्यमानाः नदेहादेवनित्यदाजन्मप्रलयहेतवोभवंति ३४

घनोयदार्कप्रभवोविदीर्यते चक्षुः स्वरूपंरविमीक्षतेतदा यदाह्यहंकारउपाधिरात्मनोजिज्ञासयानश्यति
तर्ह्यनुस्मरेत् ३१ यदैवमेतेनविवेकहेतिनामायामयाहंकरणात्मबंधनं छित्वाच्युतात्मानुभवोवति
ष्ठतेतमाहुरात्यंतिकमंगसंप्लवं ३२ नित्यदासर्वभूतानांब्रह्मादीनांपरंतप उत्पत्तिप्रलयावेके
सूक्ष्मज्ञाः संप्रचक्षते ३३ कालस्रोतोजवेनाशुह्रियमाणस्यनित्यदा परिणामिनामवस्थास्ताजन्म
प्रलयहेतवः ३४ अनाद्यंतवतानेनकालेनेश्वरमूर्तिना अवस्थानैवदृश्यंतेवियतिज्योतिषामिव ३५

देहः प्रतिक्षणं प्रध्वंसी प्रतिक्षणं अवस्थाभेदस्य विद्यमानत्वात् प्रदीपादिवदित्यनुमानं ३४ यदिप्रतिक्षणं अवस्थाभवंतित
र्हि किंन दृश्यंते अतोहेतुरसिद्ध इत्याशंक्याह अनाद्यंतवता कालेन जायमाना अवस्था नैवलक्ष्यंते आकाशेगच्छतां ज्योति
षां चंद्रादीनां गमनावस्थाविशेषाः यथा नैवलक्ष्यंते नदृश्यं अतोयथा तेषां प्रदेशांतरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्य
तेनदृष्टत्रापि बाल्यतारुण्यादिदर्शनेन मध्यवर्तिन्योऽवस्थाः कल्प्यंत इति न हेतुरसिद्ध इत्यर्थः ३५ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० उपसंहरति निगद इति ३६ पुराणार्थमुपसंहरति एता इति लीलाविषयाः कथाः अजोऽब्जापि कार्त्स्न्येनाभिधातुं नेशः ३७ ननु
यदि साकल्येनाभिधातुं न शक्यं तत्र हि किं तदभिधानेन तत्राह संसार इति विविधदुःखमेव दवो दावानलस्तेनार्दितस्य पीडितस्य
अन्तं तितीर्षोः पुंसः भगवतो या लीलास्तासां कथाः तासां रसस्तन्निषेवणमंतरेणान्यः प्लवस्तरणसाधनं न भवेत् उपायांतरा

नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः आत्यंतिकश्च कथितः कालस्य गतिरीदृशी ३६ एताः कुरुश्रेष्ठ
जगद्विधातुर्नारायणस्याखिलसत्त्वधाम्नः लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोऽप्यभि
धातुमीशः ३७ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य लीलाकथा
१४ रसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ३८ पुराणसंहितामेतामृषिर्नारायणोऽव्य
यः नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ३९ स वै मह्यं महाराज भगवान्बादरायणः इमां भाग
वतीं प्रीतः संहितां वेदसंमितां ४० एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये दीर्घसत्रे कुरुश्रेष्ठः
संपृष्टः शौनकादिभिः ४१ इति श्रीभागवते महापुराणे द्वादशस्कंधे चतुर्थोऽध्यायः श्रीराम श्री

संभावात् तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः ३८ श्रोतुरादरलाभाय संप्रदायप्रवृत्तिमाह पुराणसंहितामिति राम
त्रिभिः ३९ स वै बादरायणः प्रीतः सन्मह्यमिमां संहितां प्राहेति पूर्वेणान्वयः ४० असौ सूत इति पुरतः स्थितमंगुल्या नि १४
र्दिश्याह नैमिषालये नैमिषारण्यस्थाने ४१ इति द्वादशे चतुर्थोऽध्यायः राम राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमेतु समासेन परब्रह्मोपदेशातः राज्ञः तक्षकसंदंशान्मृत्युभीति निवारणं एतत्पुराणं शृण्वन्न भयं प्राप्नोतीत्यभिप्रेत्य पु-
राणार्थमनुस्मारयति अत्रेति अयं भावः जगतः कर्ता ब्रह्मापि यस्य प्रसादजः प्रसादोत्थरजोद्भूतो निर्दिष्टः ततो ज्ञानत्वात्तत्परो त-
त्रः सर्वसंहर्ता रुद्रश्च यस्य क्रोधसंभवो नन्तु स्वतंत्रः स विश्वस्यात्मा नियंता भगवानत्रानुवर्ण्यते अत एवंभूतं भगवंतं शृण्व-
तः कुतोन्यस्माद्भयशंकेति १ त्वं पुनः कृतार्थ एवेत्यनुस्मारयति त्वंत्विति पशुबुद्धिं अविवेकं यस्मान्न नंक्ष्यसि कुत इ-
त्यत आह नजात इति यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति च नचैवं त्वं पूर्वं नाभूः नचाद्य जातोसि अतो न नंक्ष्यसि ॥

शुक उवाच अत्रानुवर्ण्यतेभीक्ष्णं विश्वात्मा भगवान् हरिः यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः १
त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि नजातः प्रागभूतोद्य देहवत्त्वं न नंक्ष्यसि २ न भविष्य-
सि भूत्वा त्वं पुत्रपौत्रादिरूपवान् बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः ३ श्रीराम श्रीराम

२ ननु बीजादंकुरवत्स्वस्मात्पुत्ररूपेण स्वयमेव भवति यथाह श्रुतिः अंगादंगात्संभवसि हृदयादधिजायसे आत्मा वै पुत्र-
नामासि स जीव शरदः शतमिति ततः पुनरंकुराद्बीजमिव पौत्ररूपेणापि स्वयमेव भवति पिता पुत्रेण पितृमान्योनियो-
नाविति श्रुतेः अतस्तेषु नश्यत्सु कथं न नंक्ष्यामीति चेत्तत्राह नभविष्यसीति भूत्वा पुत्रपौत्रादिरूपवान्बीजांकुरवन्न
भविष्यसि यस्माद्देहादेर्व्यतिरिक्तस्त्वं यथानलः काष्ठात् देहाद्देहो जायते नात्मेति भावः ३ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी० जन्मादिर्हि देहधर्मत्वं दर्शनेन प्रपंचयति स्वप्ने यथात्मनः शिरश्छेदं स्वयं पश्यति एवं जागरेपि यस्माद्देहस्य पंचत्वादिकं पश्यति तत
स्माद्देहे वात्मन इदं भ्रममात्रं वस्तुत आत्मा अजोमर इत्यर्थः तदुक्तं आत्मनः पितृपुत्राभ्यामनुमेयो भवाप्ययो न भवाप्ययवस्तुना
मभिज्ञो द्वयलक्षण इत्यादि ४ यस्माद्देहोपाधिकोऽयमात्मनो जन्मादिसंसारभ्रमः तस्मादुपाधिनिवृत्तौ मुच्यत इति सदृष्टांत
माह घट इति यथा पुरा घटोपाधेः पूर्वमिव पुनर्घटे भिन्ने तदंतर्वर्त्यवकाशः आकाश एव स्याद्यथा एवं देहे मृते तत्त्वज्ञानेन लीनस
ति ५ ज्ञानेन तत्त्वं सद्भावयितुं मायाकृतेनात्मनो देहाद्युपाधिसंबंधप्रकारमाह मन इति मन आत्मनो देहादीन् सृजति तद्वम

स्वप्ने यथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयं यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽमरः ४ घटे भिन्ने यथाकाश
आकाशः स्याद्यथा पुरा एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ५ मनः सृजति वै देहान्गुणान्कर्माणि चात्मनः
१५ तन्मनः सृजते माया ततो जीवस्य संसृतिः ६ स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ततो दीपस्य दीपत्व
मेवं देहकृतो भवः ७ रजः सत्त्वतमोवृत्त्या जायतेऽथ विनश्यति तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः
८

तो मायासृजति ततो माया ह्युपाधिसमुदायात् ६ एतदेव सदृष्टांतमाह सार्द्धेन स्नेहेति दीपस्य ज्योतिषः दीपत्वं ज्वालारू
पः परिणामः तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्त्तिस्थानीयो देहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः॥ राम
दीपस्थानीयः संसार इति योज्यं देहकृतः देहनिबंधनः यद्वा देहकृतो मनसः न चात्मनः ७ अंतो दीपवत्संसार एव नश्य १५
ति न त्वात्मा ज्योतिर्वदित्याह नेति ननु तत्र प्रतीयमानः आत्मा कुत इत्यत आह य इति व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेह
योः परः अन्यः अतः स्वयंज्योतिः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परत्वं प्रपंचयति आकाशइवेति आधारोदेहादेः प्रपंचस्यध्रुवोनिर्विकारः नास्त्यनन्तउपमाचयस्यसोनंतोपमः ततोविभुः ९ अन्तस्त्वमेव
वंचिंत [illegible] येत्याह एवमिति आत्मस्थंदेहाद्युपाधिस्थितं आमृशविचा [illegible] रय अनुमानगर्भिण्याहंदृष्टद्रष्टान्वयव्यति रेकयुक्त्या ९
एवंचसति त्वांतक्षकोनदहेदित्याहचोदितइति नत्वहेतवः मृत्यवइतिमृत्युहेतवः १० विमर्शप्रकारंदर्शयन् तक्षकादर्शनंदर्शय
ति द्वाभ्यां योहंसब्रह्म यद्ब्रह्मतदहमेवेतिसमीक्षन् तत्राहंब्रह्मेतिभावनयाजीवस्यशोकादिनिवृत्तिः ब्रह्माहमितिभावनया

आकाश इवचाधारोध्रुवोऽनंतोपमस्ततः ९ एवमात्मानमात्मस्थमात्मनैवामृशप्रभो बुद्ध्यानुमान
गर्भिण्यावासुदेवानुचिंतया ९ चोदितोविप्रवाक्येननत्वांधक्ष्यतितक्षकः मृत्यवोनोपधक्ष्यंतिमृत्यु
नांमृत्युमीश्वरं १० अहंब्रह्मपरंधामब्रह्माहंपरमंपदं एवंसमीक्ष्यचात्मानमात्मन्याधायनिष्कले ११
दशंतंतक्षकंपादेलेलिहानंविषाननैः नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः १२ एतत्तेकथितंतात
यथात्मापृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमिच्छसि १२ इतिश्रीभा० द्वा० प्रमाणात्लक्षणंपंच
मोऽध्यायः

चब्रह्मणः परोक्षत्वनिवृत्तिर्भवतीतिव्यतिहारोदर्शितः निष्कलेनिरुपाधौआत्मनिब्रह्मणि ११ विषयुक्तैराननैर्दशंतंग्रसंतं
तक्षकं लेलिहानंसर्पं यद्वालेलिहानेजिह्वाभिरोष्ठप्रान्तेसनिष्पेषमास्वादयंतं आत्मनः पृथक् १२ हरेश्चेष्टां आत्मा
त्वंयत्पृष्टवान् तदेतत्तेकथितं शिष्यस्यकृतार्थतांपरीक्षणायपृच्छतिकिमिति १३ द्वादशेपंचमः ५ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द्वा० षेष्व परीक्षितो मोक्षः सर्पहोमादितत्सुतात् वेदशाखाविभागोक्तो व्यासशिष्यासवर्णनं निशम्य निखिलात्माहरिस्तं पश्यति निखिले
चात्मनि पश्यतीति तथा तेन अतः समेन नतेन अवनतेन मूर्ध्ना तत्पादतलमुपसृत्य तत्पादे शिरसि निधायेत्यर्थः १ सिद्धः कृ
तार्थोऽस्मि यतः अनुगृहीतोऽस्मि अनुग्रहमेवाह यत् यस्मात् श्रावितः चशब्दात्प्राप्तिसाधनं च २ करुणात्मनामसि नैतदिति द्वा
भ्यां नात्यद्भुतमिति ३ अश्रौष्म अनंतात् भवतः सकाशात् ४ सिद्धोऽस्मीत्युक्तं तदेवाविः करोति भगवन्निति यतः त्वया दर्शितं ब्रह्म

श्रीसूत उवाच एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन तत्पादपद्ममुपसृत्य नतेन
मूर्ध्ना बद्धांजलिस्तमिदमाह स विष्णुरातः १ राजोवाच सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना श्रावि
१६ तो यच्च मे साक्षादनादिनिधनो हरिः २ नात्यद्भुतमहं मन्ये महतामच्युतात्मनां अज्ञेषु तापतप्तेषु ँदनु भूतेषु य २
ग्रहः ३ पुराणसंहितामेतामश्रौष्म भवतो वयं यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ४ भगवंस्तक्षका
दिभ्यो मृत्युभ्यो न बिभेम्यहं प्रविष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया ५ अनुजानीहि मां ब्रह्मन्वाचं यच्छा
म्यधोक्षजे मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ६ अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया भव
तादर्शितं क्षेमं परं भगवतः पदं ७

प्रविष्टः कथंभूतं अभयं यतो निर्वाणं कैवल्यरूपं ५ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्र सिद्धोऽहं न किंचिच्छ्रोतुमिच्छामि केवलम राम
नुज्ञां देहीत्याह अनुजानीहीति वाचमित्युपलक्षणं सर्वेंद्रियाणां वाचं नियम्य किं करिष्यसि तदाह मुक्ताः कामाशया यस्मात्तथा १६
संनीय न तच्चेतः अधोक्षजे प्रवेश्य असून्विसृजामि ६ ननु किं प्राणत्यागेन कंचित्कालं ज्ञाननिष्ठो भवेति चेत् तत्राह अ
ज्ञानं चेति चकारात्तत्संस्कारोऽप्यनर्थवत्तत्पुंये वेत्याह भवतेति ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ आत्मना बुद्ध्या आत्मानं मनः आत्मनि प्रत्यक्प्रकाशे समाधाय परमात्मानं दध्यौ अस्पन्दासुः लीनप्राणः यथा तरुः स्थाणुः ९ तमेव
विशिनष्टि प्राक्कूले प्राग्रे बर्हिषि दर्भे १० तदेवं ब्रह्मभूते तस्मिन् तक्षकागमनादिकं पित्र्यं एषणामिवाभवदिति दर्शयति तक्षक इति त्रि
भिः हे विप्राः तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनायागच्छन्तं ११ तत्र स्थालीढ वटवृक्षस्य भस्मीभूतस्य पुनरंकुरादिकर्मणा

श्रीसूत उवाच इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः जगाम भिक्षुभिः साकं नरदेवेन पूजितः ८ परीक्षिद
पि राजर्षिरात्मन्यात्मानमात्मना समाधाय परं दध्यावस्पन्दासुर्यथा तरुः ९ प्राक्कूले बर्हिष्यासीनो गंगाकू
ल उदङ्मुखः ब्रह्मभूतो महायोगी निःसंगः छिन्नसंशयः १० तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना हंतु
कामो नृपं गच्छन् ददर्श पथि काश्यपं ११ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं द्विजरूपप्रतिच्छन्नः काम
रूपोऽदशन्नृपं १२ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां १३
हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः विस्मिता ह्यभवन्सर्वे देवासुरनरादयः १४ देवदुंदुभयो नेदु
र्गंधर्वाप्सरसो जगुः ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः १५ जनमेजयः स्वपितरं श्रुत्वा तक्षकभ
क्षितं यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः १६ सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान् दृष्ट्वेंद्रं
भयसंविग्नस्तक्षकः शरणं ययौ १७

स्थापनात् विषहारिणं तदपेक्षितद्रविणैः संतर्प्य ततो निवर्त्य द्विजरूपेण तिरोहितः सन् अदशत् १२ तद्वपुः तत्क्षणमेव जातमित्याह ब्रह्मभू
तस्येति १३ तत्र क्षणे सर्वेषां दुःखं च ततः परमुत्सवं चाह द्वाभ्यां हाहाकार इति १४ प्रासंगिकमाह जनमेजय इत्यादि सर्पाभि
चारसत्रे द्विजैः सह वर्त्तमानः यथावत् आजुहाव जुहाव ति वा सर्वसर्पावाहने कारणमाह संक्रुद्ध इति १६ १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा० ह्रा० कस्मात्तक्षकोऽनदह्येतेत्युक्ताः संतोद्विजाः ऊचुः तमिति तेनइंद्रेण अभिसर्पः १९ ऋत्विजः प्रतिप्राह सेहेंद्रः इंद्रसहितः किमितिनृपा
त्यते २० तद्राज्ञोवचः श्रुत्वाअजुहुवुः साक्षेपमाक्रान्तं दर्शयति तक्षकेति इहामावात्युपेत मरुत्वतामरुद्गणवताइंद्रेण सह २१ ब्राह्मणै
र्नैकेराक्षेपैः पुरुषवाक्यैः सः तक्षकः २२ अंगिरसः पुत्रो बृहस्पतिः प्राह २३ ४ भवतुनामाजरामरः तथापिपितृमारकेधक्ष्यामी

अथ यंस्तक्षकंतत्रराजापरीक्षितोद्विजान् उवाचतक्षकः कस्मान्नदह्येतारगाधमः १८ तेगोपायतिराजेंद्रश
क्रः शरणमागतं तेनसंस्तंभितः सर्पस्तस्मान्नाग्नौपतत्यसौ १९ परीक्षितइतिश्रुत्वा प्राह विजितदारधीः सेंहेंद्र
स्तक्षकोविप्रानाग्नौकिमितिपात्यते २० तच्छ्रुत्वाजुहुवुर्विप्राः सेंहेंद्रंतक्षकंमखे तक्षकोऽथपुपेत स्वेहसेंहेंद्रेणामरु
त्वता २१ इतिब्रह्मादिनाक्षेपैः स्थानादिंद्रः प्रचालितः बभूवसंभ्रांतमतिः सविमानः सतक्षकः २२ तंपतंतंविमा
१७ नेनसहतक्षकमंबरात् विलोक्यांगिरसः प्राहराजानंतंबृहस्पतिः २३ नैषत्वयामनुष्येंद्रवधमर्हतिसर्पराट्
अनेनपीतममृतंअथवाअजरामरः २४ जीवितंमरणंजंतोर्गतिः स्वेनैवकर्म्मणा राजंस्ततोन्योनान्यस्यप्रदाता
सुखदुःखयोः २५ सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप पंचत्वमृच्छतेजंतुर्भुंक्तेआरब्धकर्म्मणा २६ तु
तस्मात्सत्रमिदंराजन् संस्थीयतामभिचारकम् सर्पाअनागसोदग्धाजनैर्दिष्टंहिभुज्यते २७ श्रीराम श्रीरा

तिचेत्तत्राह जीवितमितिगतिः परलोकः अनेनदुर्मरणनिमित्तापितुर्दुर्गतिरनेनकृतेत्युपितसंकनीयमित्यर्थः २५ कथमन्यःसु राम
खदुःखप्रदातानास्तिसर्पादीनामुपलभ्यमानत्वादितिचेत्तत्राह सर्पादिनाजंतुः पंचत्वंमृत्युंऋच्छतिप्राप्नोतीतियत्तदारं १७
ब्धकर्मैवभुंक्ते स्वकर्म्मप्रयुक्तोएवसर्पादियोनस्वतंत्राइतिभावः २६ संस्थीयतांसमाप्यतां अभिचारकंहिंसाफलंयोदि
ष्टंप्राचीनंकर्मअतः सर्पाद्दिष्टप्रयुक्तस्यतवाप्ययंनापराधइतिभावः २७ राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्पतिं रहस्पतिं २८ ननु कथं विदुषामप्येवं संमोहः यतो ब्रह्मकोपात्परीक्षितो मृत्युः जनमेजयकोपात्सर्पाणामित्यादि तत्राह सैषेति तस्याम
लक्षणं दर्शयति अलक्षणा न लक्ष्यत इत्यलक्षणा अप्रतर्क्येत्यर्थः कासावित्यत आह यया अस्य विष्णोरेव आत्मभूताः आत्मांशभूताः प्राणिनः
गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु मुह्यंति बाध्यबाधकतां व्रजंतीत्यर्थः ननु श्रवणादिना बाधितया कुतो मोहः स्यात्तत्राह अबाध
यया बाधितुमशक्यया २९ कथं तर्हि मायातत्कार्यनिवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात् सर्वानर्थनिवृत्ति
रिति शास्त्रार्थमुपसंहरति नयत्रेति पंचभिः दंभिति या माया कपटवानयं पुमानित्येवंभूता या बुद्धावसकृदुल्लिख्यमाना
पे१ यामित्यर्थः सा आत्मवादे क्रियमाणे आत्मवादिभिर्यत्राभयान विराजिता न प्रकाशिता किंतु भीतेव स्वकार्यं मोहादिकम

इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः सर्पसत्रादुपरतः पूजयामास वाक्पतिं २८ सैषा विष्णोर्महामायाऽबाधयाऽमुह्यंत्य लक्षणयया १
स्यैवात्मभूता भूतेषु गुणवृत्तिभिः २९ न यत्र दंभीत्यभया विराजिता मायात्मवादे सकृदात्मवादिभिः न यद्विवादो वि
विधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति यत् ३० न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहं तदेत
दुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं मुनिः ३१

कुर्वंती कथंचित् वर्तत इति प्रतिपादितेत्यर्थः तदुक्तं तस्मै नमो भगवते वासुदेवाय धीमहि यन्मायया दुर्जयया मां ब्रुवंति जगद्गु
रुं विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया विमोहिता विकत्थंते ममाहमिति दुर्धिय इति किंच यद्यस्मिन् तदाश्रयो
मायाश्रयो विविधो वादोपि नास्ति विशेषविषयत्वाद्विवादानां तस्य च विशेषातीतत्वादिति भावः संकल्पविकल्पात्मकं यो यस्य त
न्मनोपि यत्र नास्ति संकल्पविकल्पानामपि विशेषविषयत्वात् ३० किंच सृज्यं कर्म सृजता कारकवर्गेण सह उभयोः सृज्य
सृष्ट्रोः परं साध्यं श्रेयः फलमपि अत्र त्रिभिः सृज्यसृष्टृफलैरन्वितो जीवश्च अहंकारात्मको यत्र नास्ति अत एव उत्सादितो
निरस्तो बाध्यबाधको यस्मिन् तदेतत् स्वयं आत्मस्वरूपमित्यर्थः तत्र स्मात् ऊर्मीन् अहंकारादीन्निषिध्य विरमेत् विशेषे
ण क्रीडेदित्यर्थः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतस्तदेव वैष्णवं पदमामनंतीत्याह परमिति यदेतत्तदेव परं वैष्णवं पदं स्वरूपमामनंति के अतत् आत्मव्यतिरिक्तं उत्सिसृक्षवः त्यक्तुमि
च्छवः यतः अनन्यसौहृदाः नास्ति अन्यस्मिन् सौहृदं येषां ते कुतः दौरात्म्यं देहाद्यहंभावं विसृज्य देहे अहंकाराभावादन्यत्र सौहृदं ना
स्ति अतस्त्यक्तुमिच्छव इत्यर्थः कथं नेतिनेतीत्येव अत्र विद्वदनुभवमपि प्रमाणयति हृदोपगुह्य ध्यानादिना ततः समाहितैरवसितं
निश्चितं यद्वा अवसितं अवरुद्धं आत्मतया गृहीतमित्यर्थः ३२ एवं प्राप्तावधिकारिणो दर्शयति त एतदिति देहजमहमिति गेहजं

परं पदं वैष्णवमामनंति तत् यन्नेति नेतीत्यतदुत्सिसृक्षवः विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समा
हितैः ३२ त एतदधिगच्छंति विष्णोर्यत्परमं पदं अहं ममेति दौर्जन्यं न येषां देहगेहजं ३३ अतिवादांस्तितिक्षेत ना
वमन्येत कंचन न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ३४ नमो भगवते तस्मै कृष्णायाकुंठमेधसे यत्पादांबु
१८ रुहध्यानात् संहितामध्यगामिमां ३५ शौनक उवाच पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः वेदा
श्च कथिता व्यस्ता एतत्सौम्याभिधेहि नः ३६ सूत उवाच समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः हृद्याकाशा
दभून्नादो वृत्तिरोधाद्विभाव्यते ३७

ममेति ३३ प्राप्त्युपायमाह अतिवादानिति ३४ शास्त्रसमाप्तौ गुरुं प्रणमति नम इति कृष्णाय व्यासाय आध्यगां अधिग
तवानस्मि ३५ इमां संहितामध्यगामित्युक्ते तत्र पुराणसंहिताविभागविशेषतो बुभुत्सुर्वेदविभागमपि प्रसंगात्पृ राम
च्छति पैलादिभिरिति हे सौम्य ३६ तत्र प्रथमं वेदाविर्भावप्रकारमाह समाहितात्मन इत्यष्टभिः ब्रह्मणो हृदि य आ १८
काशस्तस्मान्नादोऽभूत् यः कर्णपुटपिधाने श्रोत्रवृत्तिनिरोधादस्मदादिष्वपि विभाव्यते वितर्क्यते ३७ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगाद्ब्रह्मोपासकानां मोक्षफलमाह यस्यान्तस्योपासनया आत्मनो मलं धूत्वाऽपोह्य कथंभूतं मलं तमाह द्रव्यमधिभूतं क्रियामध्या
त्मं कारकमधिदैवमेवं त्रिधाभूतं ततोऽस्माद्यस्य स्थितिस्तथाह ३८ त्रिवृत् त्रिमात्रः कंठोष्ठादिभिरुच्चार्यमाणस्योंकारस्याक्षरस
माम्नायात्तर्भावात् सूक्ष्मतयातो विशिनष्टि अव्यक्तः प्रभवो यस्य सः तदेवाह स्वराट् स्वत एव हृदि प्रकाशमानः तमेव कार्येण ल
क्षयति यत्तदिति नपुंसकत्वं लिंगशब्दविशेषणत्वात् लिंगं गमकं ३९ कोऽसौ परमात्मा तमाह शृणोतीति इमं स्फोटं अव्यक्त
मोंकारं ननु जीव एव तं शृणोति नेत्याह सुप्तश्रोत्रे कर्णपिधानादिना श्रवणवृत्तिकेऽपि श्रोत्रे सति जीवस्य करणाधीनज्ञानत्वा

यदुपासनया ब्रह्मन् योगिनो मलमात्मनः द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवं ३८ ततोऽभूत्त्रिवृदों
कारो योऽव्यक्तप्रभवः स्वराट् यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ३९ शृणोति य इमं स्फोटं सुप्तश्रो
त्रे च शून्यदृक् येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ४० स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमा
त्मनः स सर्वमन्त्रोपनिषद्वेदबीजं सनातनं ४१ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

तु न तदा श्रोतृत्वं तदुपलब्धिस्तत्तस्य परमात्मद्वारिकैवेति भावः ईश्वरस्तु नैवं यतः शून्यदृक् शून्येऽपींद्रियवर्गे दृक् ज्ञानं यस्य। तथाहि
सुप्तोऽयं यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता लीनेंद्रियत्वात् अतो यस्तदा शब्दं श्रुत्वा जीवं प्रबोधयति स यथा परमात्मैव तद्द्रष्टृ
कोऽसावोंकारः तं विशिनष्टि सोऽयं येन वाक् शब्दजातं व्यज्यते यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिः अभिव्यक्तिः ४० किंच
स्वधाम्नः स्वस्याश्रयः कारणं यत्तद्ब्रह्म तस्य किंच परमात्मांशभूतसमस्तदेवतावाचकोऽपीत्याशयेनाह स इति सर्वमन्त्रा
णामुपनिषदां रहस्यं सूक्ष्मरूपमित्यर्थः तत्र हेतुः वेदानां बीजं कारणं बीजत्वेऽप्यविकारितामाह सनातनं सदैकरूपं तस्य ब्रह्म
रूपत्वात् ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० इदानीं ततः सर्वप्रपंचोत्पत्तिप्रकारमाह तस्य हीति त्रयस्त्रिसंख्यायुक्ताः भावाः येऽकारोकारमकारैर्धार्यंते तत्कारणत्वात् तानेवाह
गुणाः सत्त्वादयः नामानि ऋग्यजुःसामानि अर्था भूर्भुवःस्वर्लोकाः वृत्तयो जाग्रदाद्याः ४० ततस्तेभ्यो वर्णेभ्य अक्षराणां समाम्नायं
समाहारं तमेवाह अंतस्थाः यरलवाः ऊष्माणः शषसहाः स्वराः अकाराद्याः स्पर्शाः कादयः ह्रस्वदीर्घौ आदिशब्दाज्जिह्वामूलीया
दयः तैरेव लक्षणं स्वरूपं यस्य तत् ४१ विभुश्चतुर्मुखस्वरूपो भगवानज इति पूर्वस्यैवानुषंगः चातुर्होत्रविवक्षया चत्वारो
होत्रोपलक्षिता ऋत्विज ऋतुहोतारः तैरनुष्ठेयं होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ४२ पुत्रान् मरीच्यादीन् तान् वेदा

तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह धार्यंते यैस्त्रयो भावा गुणनामार्थवृत्तयः ४१ ततोऽक्षरसमाम्नाय
मसृजद्भगवानजः अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ४१ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः
१९८ सव्याहृतिकान् सोंकारान् चातुर्होत्रविवक्षया ४२ पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् ते तु धर्मो
पदेष्टारः स्वपुत्रेभ्यः समादिशन् ४३ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः चतुर्युगेष्वथ व्यस्ता द्वापरादौ
महर्षिभिः ४४ क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान् वीक्ष्य कालतः वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतनो
ताः ४५ अस्मिन्नप्यंतरे ब्रह्मन् भगवान् लोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ४६

न् ब्रह्मकोविदान् वेदाद्याचरणादिनिपुणान् ४३ एवं चतुर्युगेषु प्राप्ता द्वापरादौ द्वापरमादिर्यस्य तदंशलक्षणस्य कालस्य तस्मि राम
न् द्वापरांते वेदविभागप्रसिद्धेः शंतनुसमकालव्यासावतारप्रसिद्धेश्च व्यस्ता विभक्ताः ४४ तत्र हेतुः क्षीणायुषो जनान् तर्हि १९८
पुरुषबुद्धिप्रभवत्वात् अनादरणीयस्यादित्याशंक्याह हृदिस्थेति ४५ एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतम
न्वंतरे विशेषतो निरूपयितुमाह अस्मिन्नपीति ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंशेशा मायानन्यांशः सत्वं। तस्य कलया अंशेन अवतीर्णः सन् ४७ चातुर्विध्यमेवाह ऋगिति ऋगादिमन्त्राणां राशीन् वर्गशः तत्तत्प्र
करणभेदेन उद्धृत्य यथा नैकविधमणिगणाः पद्मरागादयो विविच्योद्ध्रियन्ते तद्वदुद्धृत्य तेन मंत्रैः अतस्त्रः ऋगादि संहि
ताश्चक्रे ४८ तासां संहितानाम ध्येएकैको ४९ ऋक्समुदायरूपत्वात् बह्वृचाख्यां नितरां प्रश्लेषणा गद्यमानत्वात् निगदाख्यं ५०
छंदस्सु गीयमानत्वात् छंदोगाख्यां संहितां ५१ तत्र ऋग्वेदशाखाविभागमाह पैल इति स्वसंहितां द्विधा विभज्य इंद्रप्रमितये बा
ष्कलाय च ऊचे ५२ स बाष्कलोऽपि संहितां चतुर्धा व्यस्य बोध्यादिभ्यः शिष्येभ्यः आह हे भार्गव ५२ इंद्रप्रमितिरपि स्वां संहितां सु त्व १

पराशरात्सत्यवत्यामंशांशकलया विभुः अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ४७ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य
वर्गशः चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ४८ तासां स चतुरः शिष्यानुपाहूय महामतिः एकैकां संहितां ब्रह्म
न्नेकैकस्मै ददौ विभुः ४९ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह वैशंपायनसंज्ञाय निगदाख्यं यजुर्गणं ५०
साम्नां जैमिनये प्राह तथा छंदोगसंहितां अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे ५१ पैलः स्वां संहितामूचे इं
द्रप्रमितये मुनिः बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकां ५२ चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव
पाराशरायाग्निमित्र इंद्रप्रमितिरात्मवान् ५३ अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविं तस्य शिष्यो देवमित्रः देव ३
सौभर्यादिभ्य ऊचिवान् ५३ शाकल्यस्तत्सुतः स्वां तु पंचधा व्यस्य संहितां वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधा
त् ५४ जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहितां बलाकपैजवैताळविरजेभ्यो ददौ मुनिः ५५

तं माण्डूकेयमध्यापयामास तस्य माण्डूकेयस्य शिष्यो देवमित्रः ५३ तत्सुतः माण्डूकेयसुतः शाकल्यो वात्स्यादिषु पंचसु धात् तान
ध्यापयामासेत्यर्थः ५४ तच्छिष्यः शाकल्यशिष्यः स्वसंहितां त्रिधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बलाका
दिभ्यश्चतुर्भ्यो ददौ ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० वाष्कलिः पूर्वोक्तस्य वाष्कलस्य पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः वालायन्यादयस्तामादधुः अधीतवंतः ५६ अकुशाखोप
संहारपूर्वकं तच्छ्रवणफलमाह बह्वृचाइति एतच्छंदसां एतत्पादछंदसां ५७ यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपा
यनशिष्याइत्यादिना चरकनामनिरुक्तिमाह यस्माच्चेरुरिति ब्रह्महत्यारूपमंहः क्षपयतीतितथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्च-
चरणाच्चरका इत्यर्थः ५८ तच्छिष्यः वैशंपायनशिष्यः अल्पसाराणामेतेषां चरितेन किं यत् सुदुश्चरं महच्चरिष्यामीति ५९ वि

रव्य० १ वाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहितां चक्रे वालायनिर्भज्यः काशारश्चैव तां दधुः ५६ बह्वृचाः संहिता ह्येता
एभिर्ब्रह्मर्षिभिर्धृताः श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ५७ वैशंपायनशिष्या वै चरकाध्वर्यवोऽभवन् य
च्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ५८ याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् चरितेनाल्पसाराणां
२० चरिष्येऽहं सुदुश्चरं ५९ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ६०
देवरातसुतः सोऽपि छर्दित्वा यजुषां गणं ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ६१ यजूंषि तित्तिरा भूत्वा
तल्लोलुपतयाददुः तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ६२ याज्ञवल्क्यस्ततो ब्रह्मन् छंदांस्यधि
गवेषयन् गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरं ६३

ति १
क्लो० १ प्राणामृवमंत्रा अवज्ञाकर्त्रा मत्तोऽधीतमाशु त्यजेति ६० देवरातसुतो याज्ञवल्क्यः ६१ छर्दितस्यादानं विप्ररूपेणानुचितमिति तिराः राम
पक्षिविशेषा भूत्वा आददुः ततश्चैते तैत्तिरीया इति प्रसिद्धाः सुपेशला अतिरम्याः ६२ बहुवचनमवांतरभेदविवक्षया का एव माध्यं २०
दिनादिशाखाप्रसंगमाह याज्ञवल्क्यइत्यादिना गुरौ वैशंपायनस्य व्यासेन विभज्यानुक्तत्वाद्विद्यमानानि अधि अधिकानि ग
वेषयन् सूपतस्थे सम्यक् तुष्टाव ईश्वरं तेनादिष्टं वेदानां तथा च श्रुतिः आदित्यः पूर्वाह्णे दिवि दिवईयते यजुर्वेदे
न तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्य इति ६३ राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनाधापयानः २

नमो भगवते तुभ्यमादित्याय पो भवानेक एवमां लोकयात्रामनुवहतीत्यन्वयः तदेव दर्शयति अखिलजगतामात्मस्वरूपेणांतर्हृदयेषु
कालस्वरूपेण चवहिरपिवर्त्तमान इति अखिलजगतामित्यस्यप्रपंचः चतुर्विधेति हृदयांतर्वर्त्तित्वेऽपि जीवचन्नेनोपाधिनाऽव्यव
धीयमानः कालस्वरूपेणावत्यस्यप्रपंचः क्षणेति क्षणलवादयायेऽवयवास्तैरुपचितासंवत्सरास्तेषांगणेन प्रत्यह मपामादाने
शोषणं विसर्गो वृष्टिः ताभ्यामनेन गायत्री प्रथमपादार्थो वरेण्यत्ताऽनुवर्णिता ६४ द्वितीयपादार्थमनुवर्णनेन स्तौति यदुहेति हेवि
न१ बुधर्षभ हे सवितः यदमुष्मो भगवतस्तवमंडलेपतितस्तम भिधीमहि सम्यगाभिमुख्येन ध्यायिमे पुनस्तेरेयेच संबोधनं प्रत्यहं ष्य१

याज्ञवल्क्य उवाच ॐ नमो भगवते आदित्यायाऽखिलजगतामात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनि
कायानां ब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषु बहिरपिचाकाशइवोपाधिनाऽव्यवधीयमानो भगवानेक एव
क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ६४
यदुहवाव विबुधर्षभ सवितरदस्तपस्यानुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरित
वृजिनबीजावभर्जनं भगवतः समभिधीमहि तपनमंडलं ६५ यइह वाव स्थिरचरनिकराणां निजनिकेतना
नां मनइंद्रियासुगणान् अनात्मनः स्वयमात्मांतर्यामी प्रचोदयति ६६ राम राम राम राम राम

त्रिषवणं वैदिककर्ममार्गेण स्तुवतां भक्तानां यान्यखिलानि दुरितानि तत्फलानि च वृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषाम
ति१ वभर्जनं विनाशकं हे तपनेति ६५ तृतीयपादं स्तौति य इहेति हे याभ्यवान् स्थावरजंगमसमूहानां स्वाश्रयाणां जीवानां मनइंद्रिय
नू१ प्राणगणान् अनात्मनो जडान् स्वयमात्मैवांतर्यामी सन् प्रचोदयति प्रवर्त्तयति ६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा०

तृतीयपादमेवं मंडलस्थपरतया व्याचक्षाणः स्तौति यदेवेति यं कं एव भवान् अतिकरालवदनो योंधकारसंज्ञो जगरग्रह स्तेन गीलितं अन
एव मृतकमिव विचेतनं स्वधर्माख्यं यदात्मावस्थानं प्रत्यक् प्रवणत्वं तदेव श्रेयस्तस्मिन् प्रवर्तयति किंच यो भवानवनिपतिरिवार्द्रतिग
रति ६० आशापालैर्विद्रा दिभिः कमलकोशयुक्तैः सलिलैर्वांजलिभिः उपहृतार्हणः दत्ताघः ६८ यत्तएवं भूतस्तवा अथत्र
तः अहम् अयातयामानि अन्यैर्यथावदविज्ञातानि यजूंषितत्कामो ऽहं उपसरामि भजामि ६९ एवं स्तुतः प्रसादितश्च ७० यं

यदेव मे लोकमति करालवदनांधकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतनमवलोक्याऽनुकंपया
२३ परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्त्तयत्यवनिपतिरि
वासाधूनांभयमुदीरयन्नटति ६७ परितआशापालैस्तत्र तत्र कमलकोशांजलिभिरुपहृतार्हण ६८
अथह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वंदितं महमयातयामयजुःकाम उपसरामीति ६९
सूत उवाच एवं स्तुतः स भगवान्वाजिरूपधरो हरिः यजूंष्ययातयामानि मुनयेदात्प्रसादितः ७० य
जुर्भिरकरोच्छाखादशपंचशतैर्विभुः जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः ७१ जैमिनेः सा २३
मगस्यासीत्सुमंतुस्तनयो मुनिः सुत्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहितां ७२ श्रीराम श्रीरा०

चदश शाखाः याः शतैरपरिमितैर्यजुर्भिरकरोत् संतेरितिपाठ सएषयाज्ञवल्क्यः तैर्यजुर्भिरकरोदिति जगृहुः अ
केशरेभ्यः २ धीतवंतः रविणा अश्वरूपेण वाजेभ्यः केशरेभ्यः वाजैर्वेगेन वा सन्यस्ताः त्यक्ताः शाखाः वाजसनीसंज्ञास्ताः शाखाइतिवा
७१ सामशाखाविभागमाह जैमिनेरिति तत्सुतः सुमंतुसुतः ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ७२ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तच्छिष्यो जैमिनेः शिष्यः महान् अतिमेधावी सहस्रं संहिताख्यं भेदं चक्रे साम्नां तत्संहिताभेदं ततस्तदनंतरं ७३ सुकर्म्मणः शि
ष्यो एकः कौशल्यो हिरण्यनाभः पौष्यंजिर्नामैकोऽजगृहे तु ॥ आवंत्य आन्यः तस्यैव शिष्यः सोऽपि जग्राह ७४ पौष्यंज्यावंत्ययोः
पिचकारा हिरण्यनाभस्यापि पंचशतानि शिष्या आसन् तेनावंतीः शाखाय शाय थजगृहुः तानुदीच्यान् संततेः कालतः कांश्चित्
प्राच्यांश्च प्रचक्षते इत्यर्थः यथोक्तेष्वेव उदीच्याः सामगाः शिष्यास्तस्य पंचशतं स्मृताः हिरण्यनाभोत्तावंत्यः संहितायै द्विजाः

सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् सहस्रं संहिताभेदं चक्रे साम्नां ततो द्विजाः ७३ हिरण्यनाभः कौश
ल्यः पौष्यंजिश्च सुकर्म्मणः शिष्यो जगृहतुश्चान्य आवंत्यो ब्रह्मवित्तमः ७४ उदीच्याः सामगाः शिष्या आसन्पं
चशतानि वै पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान्प्रचक्षते ७५ लौगाक्षिर्म्मांगलिः कुल्यः कुशीदः कुक्षिरे
व च पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं ७६ कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः शिष्य ऊचे
स्वशिष्येभ्यः शेषा आवंत्य आत्मवान् ७७ इति श्रीभागवते महापुराणे द्वादशस्कंधे वेदशाखाप्रणयनं षष्ठो
ध्यायः

तेभ्यो गृहीतास्तैः पिचोच्यंते पंडितैः प्राच्यसामगा इति ७५ पुनरप्येतेषां त्रयाणां सुकर्म्मणः शिष्याणां शिष्यांतरैः शाखा
बाहुल्यं दर्शयति लौगाक्षिरिति द्वाभ्यां ७६ कृतो नाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्यः ऊचे शेषाः अन्या अपि याः
प्रसिद्धाः शाखाः ता आवंत्यः स्वशिष्येभ्यः उच इति ७७ इति द्वादशे षष्ठः सप्तमोऽथर्वविस्तारः पुराणव्यसनं ततः ॥
पुराणलक्षणादीनि फलं भागवतश्रोतुः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible] क्रमप्राप्तमथर्ववेदविभागमाह शिष्यं कबंधनामानं स्वकां स्वकीयां संहितां सोपि शिष्यापितां द्विधा विभज्य। तदुक्तं वैष्णवे अथर्ववेदं स
मुनिः सुमंतुरमितद्युतिः शिष्यमध्यापयामास कबंधं सोऽपि तं द्विधा कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवानिति १ तत्र वेददर्शः स्व
संहितां चतुर्द्धा विभज्य चतुरः शिष्यानध्यापयामास पथ्यस्त्रिधा विभज्य त्रीनिति सार्द्धेन आह शौल्कायनिरिति २ आंगि
रसः शुनकस्य शिष्यौ बभ्रुः सैंधवायनश्च तदुक्तं शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे द्वितीयां संहितां प्रादात् सैंधवा

सूतउवाच अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां संहितां सोपि पथ्याय वेददर्शाय चोक्तवान् १ शौ
ल्कायनिर्ब्रह्मबलिर्मौदोषः पिप्पलायनिः वेददर्शस्य शिष्यास्ते पथ्यशिष्यान् यथा शृणु कुमुदः शुनको
७२ ब्रह्मन् जाजलिश्चाप्यथर्ववित् २ बभ्रुः शिष्योऽथांगिरसः सैंधवायन एव च अधीयेतां संहिते द्वे सावर्ण्या
२२ द्यास्तथापरे ३ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादयः एते आथर्वणाचार्याः शृणु पौराणिकान् मुने
४ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः वैशंपायनहारीतौ षड्वै पौराणिका इमे ५ अधीयंत व्या
सशिष्यान् संहितां मत्पितुर्मुखात् एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ६

यनसंज्ञिने इति सावर्ण्याद्याः सैंधवायनादीनां शिष्याः ३ नक्षत्रकल्पः शांतिकल्पश्चेति द्वौ तदुक्तं नक्षत्रकल्पो वेदानां संहिता राम
नां तथैव च चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचमः इति नक्षत्रकल्पादीनां कर्तारस्तत्तन्नामभिरुच्यंते ४ मत्पितुर्मुखादि २२
ति प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् तस्य च मुखात् त्रय्यारुण्यादयः एकैकां संहितामधीय
तै१ ते एषां षण्णां शिष्योऽहं ताः सर्वाः समधीतवान् १६ राम राम राम राम राम राम राम रामश्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University,Ramtek Collection

रामशिष्योऽकृतव्रणः एवं च तासां मूलसंहिता इत्यनेन ततः संहिताबाहुल्यं सूचितं ७ शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षण
त्रैकं कथनाय दर्शयति पुराणेति ८ अस्य विश्वस्य अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रय इत्यत्रो न२
क्तेः स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते अन्तराणि मन्वन्तराणि वंशो वंश्यानुचरितमिति च ईशानुकथा संस्था निरोधः अनेनैवात्य
न्तिकलयरूपा मुक्तिरप्युक्ता हेतुशब्देन जीवाश्रयवासनाशब्दवाच्यादुतयोर्गृहीताः ९ दशभिरेतैर्लक्षणैर्युक्तं महापुराणं विदुः
अथ प्रतिसर्ग १ केचित्पंचविधं सर्गश्च वंशो मन्वन्तराणि च वंशानुचरितं चेति पुराणं पंचलक्षणमिति महत्पुराणमल्पं चेति व्यवस्थया यत्र दशापि

कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः अधीमहि व्यासशिष्याच्चतस्रो मूलसंहिताः ७ पुराणलक्षणं ब्रह्मन् ब्रह्मर्षि
भिर्निरूपितं शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ८ सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च वंशो वंश्यानुच
रितं संस्था हेतुरपाश्रयः ९ दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः केचित्पंचविधं ब्रह्मन् महदल्पव्यवस्थया
१० अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः भूतसूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते ११ पुरुषानुगृही
तानामेतेषां वासनामयः विसर्गोऽयं समाहारो बीजाद्बीजं चराचरं १२ श्रीराम श्रीराम श्रीराम श्री

लक्षणानि पृथक् निरूपयति तन्महापुराणं यत्र त्वन्येषां पंच स्वेवं तान्यभावस्य विवक्षा तदल्पमिति व्यवस्थयेत्यर्थः १० सर्गादिलक्षणा
नि व्याचष्टे अव्याकृतेत्यादिना प्रधानस्य गुणानां क्षोभात् यो महान् तस्माद्यस्त्रिवृदहंकारस्तस्मात् भूतमात्राणां सूक्ष्माणामिन्द्रि
न२ याणां चार्थानां स्थूलानां तद्देवतानां च संभवः सर्गः कारणसृष्टिः सर्ग इत्यर्थः उच्यत इति यथापक्षमुत्तरत्राप्यनुषंगः ११ विसर्गं
व्याचष्टे पुरुषेणेश्वरेणानुगृहीतानामेतेषां महदादीनां पूर्वकर्मवासनाप्रधानो यं समाहारः कार्यभूतश्चराचरप्राणिरूपो
जीवाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चराणां भूतानां सामान्यतोऽचराणि चकाराच्चराणि च कामाद् वृत्तिः तत्र तु नृणां स्वेन स्वभावेन कामाच्चोदनया अपि वा या नियता वृत्तिर्जीवि-
षु काकृता सा वृत्तिरुच्यत इत्यर्थः १३ तिर्यङ्-मर्त्यर्षिदेवेष्वच्युतावताराः तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः यैरवतारैरिति
समासान्निःकृष्य कथं चित्संबंधः त्रयीद्विषो दैत्याः १४ षड्विधं मन्वन्तरमुच्यते षड्विधत्वमेवाह मनुरिति मन्वादयः षडेते वर्गाः स्वस्वा-
धिकारेण यदा प्रवर्त्तन्ते तन्मन्वन्तरमित्यर्थः १५ वंशमाह ब्रह्मणः सकाशात् प्रसूतिर्येषां भूभुजां राज्ञामित्यर्थः तेषामन्वयो वंशः तत्र भवा वं-
श्याः तेषां वृत्तं ये च तद्वंशधरास्तेषां च वृत्तं वंश्यानुचरितमुच्यते १६ अस्य विश्वस्य स्वभावतो मायातो निष्पन्नस्य यद्वा मायातः अनु

३३ वृत्तिर्भूतानि भूतानां चराणामचराणि च कृता स्वेन नृणां तत्र कामाच्चोदनयापि च १३ रक्षाच्युतावतारेहा विश्वस्या-
नु युगे युगे तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः १४ मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः ऋषयोंऽशावतार-
श्च हरेः षड्विधमुच्यते १५ राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये १६
नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः संस्थेति कविभिः प्रोक्तश्चतुर्धाऽस्य स्वभावतः १७ हेतुर्जीवोऽ-
स्य सर्गादेरविद्याकर्मकारकः यं चानुशयिनं प्राहुरव्याकृतमुतापरे १८ श्रीराम श्रीराम श्रीराम श्री ३३

विधो लय इति १७ अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः सोऽत्र हेतुरुच्यत इत्यर्थः तस्य निमित्तत्वमाह अविद्यया कर्मकार-
कः कर्मकर्ता जीवादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः स तु तत्र हेतुरित्यर्थः तं चानुशयानिमित्तमिति केचित् अव्याकृतमित्यपरे तत्रा-
हयमिति चैतन्यप्राधान्येनानुशयिनं उपाधिप्राधान्यविवक्षयाऽव्याकृतं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपाश्रयमाह व्यतिरेकेति जाग्रदादिष्ववस्थासु जीवतयावर्त्तत इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षितयाऽन्वयः स
माध्यादौ च व्यतिरेको यस्य तद्ब्रह्म संसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः १९ तदेव सदृष्टांतं प्रपंचयति पदार्थ
षु घटादिषु द्रव्यं मृदादि यथा युतं अन्वितं अयुतं च बहिरण्यवस्थानां रूपनामसु च सन्मात्रं सत्तामात्रं यथा एवं बीजं गर्भाधानमा
दियासां पंचतानां अंते च यासां तासु देहावस्थासु तद्वस्वपि अधिष्ठानत्वेन साक्षित्वेन च युतमयुतं च यत् तदपाश्रय इति २० एवं दशापि
लक्षणानि व्याख्याय वर्णयंति महात्मान इति यदुक्तं तदाह विरमेतेति यदा सर्गादीनां मायामयत्वानुसंधानेन वा मेदवादेरिव स्वय

व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु । मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः १९ पदार्थेषु यथा द्रव्यं सन्मात्रं
रूपनामसु बीजादिपंचतांतासु ह्यवस्थासु युतायुतं २० विरमेत यदा चित्तं हित्वा वृत्तित्रयं स्वयं योगेन वा तदात्मा
नं वेदेहाया निवर्त्तते २१ एवं लक्षणलक्ष्याणि पुराणानि पुराविदः मुनयोऽष्टादश प्राहुः क्षुल्लकानि महांति च
२२ ब्राह्मं पाद्मं वैष्णवं च शैवं लैंगं सगारुडं नारदीयं भागवतमाग्नेयं स्कांदसंज्ञितं २३ भविष्यं ब्रह्मवैवर्त्तं मा
र्कंडेयं सवामनं वाराहं मात्स्यं कौर्म्यं च ब्रह्मांडाख्यमिति त्रिषट् २४ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः
शिष्यप्र । शिष्यशिष्याणां ब्रह्मतेजोविवर्द्धनं ॥ २५ इति श्रीभागवते महापुराणे द्वादशस्कंधे सप्तमोऽध्यायः ७ श्रीरा

मेव चित्तं विरमेत् इहैवानुष्ठितेन योगेन वा देवहूत्यादिवत् तदा विक्षेपाभावादात्मानं वेद तदा चा[illegible] विद्यानिवृत्तेरीहायाः
संसाररूपायाः निवर्त्तत इत्यर्थः २१ पुराणविभागप्रस्तावेन तल्लक्षणादि प्रासंगिकमुक्त्वा प्रकृतमाह एवं विधैर्लक्षणै
र्लक्ष्याणि २३ २ त्रिषट् अष्टादश २४ उपसंहरति ब्रह्मन्निति मुनेर्व्यासस्य शिष्यादीनां च ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्द्ध
नं श्रोतृणामिति शेषः २५ द्वादशे सप्तमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा०टी० अथैवमनुपृष्टो मार्कंडेयस्य मोहहेतुः कामादिभिरसंमोहो नरनारायणस्तुतिः पुराणविभागप्रसंगेन [illegible] नपु
राणकर्तुर्मार्कंडेयस्य चरितं प्रस्तौति माह सूतेति त्वमेव वक्तुं योग्य इत्याह तमसीति संसारे भ्रमतां पारदर्शनस्तन्निवर्तकः॥१॥ व
क्तव्यमाह। आहुरिति उर्वरितः अवशिष्टः येन कल्पांते न एतत्कथं घटत इत्येकप्रश्नः॥२॥ प्रलयाभावादप्येतन्न घटत इत्याह।
स वा इति यतो भार्गवर्षभः कोऽपि प्राकृतिको नैमित्तिको वा॥३॥ अन्यदप्यघटितमेवेत्याह एक एवेति तोकं बालकं॥४॥ कौतू

शौनक उवाच सूत जीव चिरं साधो वद नो वदतां वर तमस्यपारे भ्रमतां नॄणां त्वं पारदर्शनः॥१॥ आहुश्चिरायुषम्
षिं मृकंडुतनयं जनाः यः कल्पांते ह्युर्वरितो येन ग्रस्तमिदं जगत्॥२॥ स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन् भार्गवर्ष
भः नैवाधुनापि भूतानां संप्लवः कोऽपि जायते॥३॥ एक एवार्णवे भ्राम्यन् ददर्श पुरुषं किल वटपत्रपुटे तोकं
२४ शयानं त्वेकमद्भुतं॥४॥ एष नः संशयो भूयान् सूत कौतूहलं यतः तं नश्छिंधि महायोगिन् पुराणेष्वपि संमतः
॥५॥ सूत उवाच प्रश्नस्त्वया महर्षेऽयं कृतो लोकभ्रमापहः नारायणकथा यत्र गीता कलिमलापहा॥६॥ प्राप्तद्वि
जातिसंस्कारो मार्कंडेयः पितुः क्रमात् छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः॥७॥ श्रीराम श्रीराम श्री

हलं औत्सुक्यं न संशयेनैकेवलं त्वं महायोगी किंतु पुराणेष्वपि विज्ञानत्वेन संमतः॥५॥ प्रश्नमभिनंदति हे महर्षे अयं प्रश्नः तत्र हेतुः राम
नारायणेति यत्र प्रश्नविषये॥६॥ तत्र मार्कंडेयस्य तपसा भगवंतमाराध्य मायापदर्शनं वरं ततः श्वेते नैव भगवन्मायया समस्तकल्पोद् २४
भ्रमः नान्यदिति तु तत्र वक्तुमादितः आरभ्य तस्य चरितमाह प्राप्तेत्यादिना मार्कंडेयो मृत्युं जिग्य इति पंचमश्लोकेनान्वयः॥
मध्यमग्रंथेन तस्य धर्मः कथ्यते प्राप्ता द्विजातिसंस्कारा उपनयनांता येन सः पितुः सकाशात् गर्भाधानादिक्रमात् छंदां
सि वेदान्॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहव्रतधरः नैष्ठिकब्रह्मचारीसन् ८ नियमर्द्धेयेधर्म्मेनद्धेये आश्रमादिषु पंचसुहरिमर्चयन् ९ स्वयंगुर्वर्थमाहृत्य तेनानुज्ञातश्चान्नं हिवु
भुंजेनो चेत्तस्मिन्कदाचिदुपोषितो भवति १० ११ तेन तस्मात्सुजेयेन १२ धर्म्मात्मक्लेशारागादयोयस्यतेन अन्तरात्मना प्रत्याहृतेन मनसा १३
१४ तस्यतपोनिष्ठामितिहासेनवर्णयति एनहित्यादिना आस्मिन्सप्तममन्वंतरे तपसामत्युद्दंयहिष्यतीतिविशांकितः १५ मुनयमुनिंच्छेरा
यितुं रजसस्तोकं अतिप्रियमपश्यल्लोभः मदश्रृतो १६ ७ तदा आश्रमपदं प्रविष्टावायुर्वेवावितितेतीयेनान्वयः पुण्यद्रुमैर्मल्लतानि आ
विते पुण्यहिज्ञानामृषीणांकुलेराकीर्णं पुण्या अत्यमलाजलाशयायस्मिन् १८ मत्तभ्रमराणां संगीतंयस्मिन् मत्तकोकि

गृहव्रतधरः शांतोजटिलोवल्कलांबरः बिभ्रत्कमंडलुंदंडमुपवीतंसमेखलं ८ कृष्णाजिनंसाक्षसूत्रं कुशा
श्चनियमर्द्धेये अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिं ९ सायंप्रातः स्वगुरवे भैक्ष्यमाहृत्यवाग्यतः बुभुजेगु
र्वनुज्ञातः सकृन्नोचेदुपोषितः १० एवंतपःस्वाध्यायपरोवर्षाणामयुतायुतं आराधयन्हृषीकेशं जिग्ये मृत्युं सुदु
र्जयं ११ ब्रह्माभृगुर्भवोदक्षो ब्रह्मपुत्राश्चयेपरे नृदेवपितृभूतानि तेनासन्नतिविस्मिताः १२ इत्थंबृहद्व्रतधर
स्तपःस्वाध्यायसंयमैः दध्यावधोक्षजंयोगी ध्वस्तक्लेशान्तरात्मना १३ तस्यैवंयुंजतश्चित्तं महायोगेनयोगिनः
व्यतीयायमहान्कालो मन्वंतरषडात्मकः १४ एतत्पुरंदरोज्ञात्वा सप्तमेस्मिन्किलांतरे तपोविशंकितोब्रह्मन्नारे
भेतद्विघातनं १५ गंधर्वाप्सरसः कामंवसंतमलयानिलौ मुनयेप्रेषयामास रजस्तोकमदौतथा १६ तेवैतदा
श्रमंजग्मुर्हिमाद्रेः पार्श्वउत्तरे पुष्पभद्रानदीयत्र चित्राख्याचशिलाविभो १७ तदाश्रमपदंपुण्यंपुण्यद्रुमलता
चितं पुण्यद्विजकुलाकीर्णंपुण्यामलजलाशयं १८ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं मत्तबर्हिनटाटोपंमत्त

लानांकूजितंयस्मिन् मत्तबर्हिणएवनटस्तेषामाटोपः संभ्रमोयस्मिन् मत्तद्विजानांपक्षिणांकुलैराकुलंव्याप्तं ॥१९॥ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वी०

३१

एवंभूते तत्राश्रमपदं विष्टः सन् वायुर्मलयानिलो ववौ प्रससार उन्नंभयन् तत्र सरःक्षेषु प्रवेशान्मांद्यं हिमनिर्झरकाणानामादानात्शै
त्यं पुष्पपरिष्वंगात्सौगंध्यं चोक्तं २० किंच उदयं चंद्रायस्मिन् तन्निशा चंद्रो रजनीमुखं यस्मिन् सः प्रवालस्तवकामालयः श्रेणयो ना २
येषु तैः गुप्यंति विटपैः संश्लिष्यंती ति गोपाद्रुमाः लताश्च तेषां जालैः समूहैः आविर्बभूव २१ किंच तदा गीतवादित्रयूथिकैः
गायकादिसमुदायिभिः गंधर्वैरन्वीयमानः तथा स्वः स्त्रियोऽप्सरसस्तासां यूथस्यपतिः आत्तचापमिषुश्रेयनस स्मरश्चैतत्रा प १

वायुः प्रविश्याददाय हिमनिर्झरसीकरान् सुमनोभिः परिष्वक्तो ववौ वन्नं भयन् स्मरे २० उदयं चंद्र निशा वक्त्राः प्रवा
२५ लस्तवकालिभिः गोपद्रुमाल्लताजालैस्तत्राः सीत्कुसुमाकरः २१ अन्वीयमानो गांधर्वैः गीतवादित्रयूथिकैः अ
दृश्यतात्तचापपुरवः स्त्रीयूथपतिः स्मरः २२ हुताग्निमुपासीनं ददृशुः शक्रकिंकराः मौलिन्नाक्षं दुराधर्ष
मूर्तिमंतमिवानलं २३ ननृतुस्तस्य पुरतः स्त्रियः योगायकाजगुः मृदंगवीणापणवैर्वाद्यं चक्रुर्मनोरमं २४
संदधे स्त्रे स्वधनुषि कामः पंचमुखं तदा मधुमेदारजस्तोकं द्रष्टत्याव्यकंपयत् २५ क्रीडंत्यः पुंजिकस्थलाः
कंदुकैः स्त नगौरवात् श्वासमुद्ग्रमध्यायाः केशविस्त्रसितस्रजः २६ इति तस्य तोष्य मदृष्ट्वा लेस्याननुकंदु २४
के वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं २७ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः सर्वं तत्राभवन्मोघ
मनीशस्य यथोद्यमः २८

दृश्यत २२ दुराधर्षं अभिभवितुमशक्यं २३ ४ शोषणदीपनसंमोहनतापनोन्मादनाख्यानि पंचमुखानि यदस्त्रे संदधे तदेव मधुर्व यस्य १
संतः रजस्तोक अपुंस्त्वमार्षे अन्ये चेद्रष्टत्यात्स्य मनोऽव्यकंपयत् २५ २६ किंच वायुर्मलयानिलः पुंजिकस्थलाः तस्याः सूक्ष्मं
वासो जहार ० सर्वं तेषां कर्म तत्रास्मिन् मोघं व्यर्थं अनीशस्य निर्दैवस्य २८
न

तद १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनेरपकुर्वतः प्रतिकूलमाचरंतः हे मुने २९ अहमः अहंकारस्य भावं विकारं ३० निस्तेजसं म्लानवदनं स्वराडिंद्रः ३१ नरनाराय
णरूपो हरिः ३२ तावनुवर्णयति द्वाभ्यां गौरं वक्षः श्मा जिनं वल्कलं चांबरं ययोस्तौ पवित्रपाण्यापीयोः तौ त्रिवृत् त्रिगुणं वततुकमिति न
न१ वात्रि दंडहिः पंचमौंजिस्त्योदोनवकोप्रयोगानतइतिनवतंत्वादिमयं ३३ वेदं मुष्टिं किंच साक्षात्तपएव तौ तत्रेहगुः तपन्त डिह ८८१
प

तइत्थमपकुर्वतो मुनेस्तत्तेजसा मुने दह्यमानानिवत्तुः प्रबोध्याहिमिवार्भकाः २९ इतींद्रानुचरैर्ब्र
ह्मन् धर्षितोपि महामुनिः यन्नागादहमो भावं न तच्चित्रं महत्सु हि ३० दृष्ट्वा निस्तेजसं कामं सगणं
भगवान्स्वराट् श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परं ३१ तस्यैवं युंजतश्चित्तं तपःस्वाध्यायसंय
मैः अनुग्रहायाविरासीन्नरनारायणो हरिः ३२ तौ शुक्लकृष्णौ नवकंजलोचनौ चतुर्भुजौ रौरव
वल्कलांबरौ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं ३३ पद्माक्षमालामुत जंतुमा
र्जनं वेदं च साक्षात्तप एव रूपिणौ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ३४
ते वै भगवतो रूपे नरनारायणावृषी दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ३५ स तत्संदर्श
नानंदनिर्वृतात्मेंद्रियाशयः हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ३६ श्रीराम श्रीराम

र्णदीप्यमानविद्युत्संकाशं यत्पिशंगं गौरं रोचिस्तेन रूपिणौ मूर्तिमंतौ तादृक् तेजोयुक्तमूर्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः ॥
प्रांशू उन्नतौ ३४ उच्चैर्महता आदरेण ३५ तयोः संदर्शनेन य आनंदस्तेन निर्वृता उपशांता आत्मेंद्रियदेहेंद्रियमनांसि यस्य सः न
सेहे नाशक्नोत् ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा॰ द्वा॰ आश्लिषन् आश्लिष्यन् आलिंगयन्निव ३७ पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेन अर्घेण ३८ पादाभ्यां पादावानस्य गरिष्ठौ पूज्य
तैर्मातौ प्रति ३१ भै अन्तर्यामिणस्तेषयप्रवर्त्तकत्वादात्मनस्तत्स्कतावस्वातंत्र्यं पश्यन्नाह किमिति हे विभो तव तत् किं अहं वर्णये
कथं स्तोमि यत् येन पतद्वैय वक्तुदीरितः प्रेरितोऽसुः प्राणाः संस्पंदते प्रवर्त्तते तमनु च वागादयः स्पंदंति अत्र हेतुः वेत्यन्वयव्यति
रेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादिश्रुतिभिश्च तत्त्वसिद्धमित्यर्थः न केवलं प्राकृतानां तनुभृतां किंतु अजशर्वयोश्च अतः स्वस्यम
माऽपि तथैव एवं यद्यपि न कोपि दपि कस्यापि स्वातंत्र्यं अथापि दारुयंत्रवत् त्व प्रावर्त्तितैरपि वागादिभिर्भजतां पुंसां भा

उत्थाय प्रांजलिः प्रह्व औत्सुक्यादाश्लिषन्निव । नमाम नमईशानो वभाषे गद्गदाक्षरः ३७ तेषामास
२६ नमादाय पादयोरवनिज्य च अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ३८ सुखमासनआसीनोप्र
सादाभिमुखो मुनिः पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ३१ भै मार्कंडेय उवाच किं वर्णये तव वि
भो यदुदीरितोसुः संस्पंदते तमनु वाङ्मनइंद्रियाणि स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि
भजतामसि भाववंधुः ४० मूर्तीइमे भगवतो भगवंस्त्रिलोक्याः क्षेमाय तापविरमाय च मृत्युजित्यै
नानाविभर्ष्यवितुमन्यतनूर्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः ४१ राम राम राम

ववंधुः आत्मवंधुरसि न तु पित्रादिवद्देहमात्रवंधुः अहो कृपालुतानेवेत्यर्थः ४० ननु कथं मां प्राणादिप्रवर्त्तकोधर्मपुत्रत्वाहाव २६
योरिति चेत्तत्राह मूर्त्तीइति हे भगवन् भगवंस्तव इमे मूर्त्ती त्रिलोक्याः क्षेमाय पालनाय तापविरमाय दुःखनिवृत्तये मोक्षाय नार१
च न तु त्वं कस्यापि पुत्र इत्यर्थः अत्र दृष्टांतः यथेदं विश्वमवितुं अन्यास्तनूः मत्स्यकूर्मादिलक्षणाः नानानाअनेकप्र
काराविभर्षि तद्वत् न केवलं पालनादिमात्रं तव कर्म किंतु स्थिलयावपीत्याह सृष्ट्वेति तत्राप्यन्यनिरपेक्षत्वे दृष्टांतः ऊर्णना
सृ

सृष्टुविजिसै २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मादेवंभूतस्त्वं तस्मात्त्वदंघ्रिमूलं भजामी त्याह तस्येति तस्या विभुः पालकस्य स्थावरजंगमानामीश्वरस्य भजामीति तृतीय
श्लोकस्यानुषंगः कथंभूतमंघ्रिमूलं यत्स्थपुत्र स्थितं कर्मगुणकालानां रंजामलं अन्यच्च पूर्वोक्तास्तापाद्ययोनस्पृशंतिरुजनइति वा पाठः
यतः वेदहृदये येषां ते वहतात्पर्यविदो मुनयः यद्देवस्तवंति निनरां नमंति नतु तत्प्राप्तये एवं स्तवनादि कुर्वंति ४२ यत अन्यः पुरुषार्थो नास्तीत्या
ह नान्यमिति अंघ्रिकृपनयात् श्रीमच्चरणप्राप्तेः अन्यं क्षेमं न विद्मः परितः सर्वेस्वीपिलोकेषु भीर्यस्य तस्य जनस्य तदेवाह द्विपरार्द्धधिष्ण्यं
स्थानं यस्यसः ब्रह्मापि तत्कालस्य लव्ड्रू विजृंभनूपात् कालादल्ल विभेति अतः किमुतवक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥

तस्या विभुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणकालरुजः स्पृशंति यद्दैस्तुवंति निनमंति यजंत्यभीक्ष्णं ध्या
यंति वदहृदया मुनयस्तदाप्त्यै ४२ नाऽन्यं तवांघ्र्युपनयाऽदपवर्गमूर्त्तेः क्षेमं जनस्य परितो भिय ईश विद्मः ॥
ब्रह्मा बिभेत्यऽलमतो द्विपरार्द्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां ४३ तद्वै भजाम्यृतधियस्तव पाद
मूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते र्हि सर्वमनीषितार्थं ४४ ते॰ १

४३ यस्मादेवं ततस्मात्तवपादमूलं भजामि कथंभूतस्य ऋतधियः सत्यज्ञानस्वरूपस्य यद्वा सत्याधीर्यस्य यस्मिन् त्वा तस्य आत्मगु
रोर्जीवस्य नियंतुः अतः कारणात् परस्य किं कृत्वा आत्मच्छदि स्वात्मावरके अपार्थं च निष्फलं असच्च तुच्छं अंत्यं च नश्वरं इदं देहादि
१८ भजनं त्यक्त्वा असच्चेत् कथं प्रतीयते तत्राह अभिज्ञमात्रं न तु स्वतः मसत् किंत्वात्ममात्रं न ततः पृथगस्तीत्यर्थः नन्वपवर्गाय भवतु म
द्भजनं फलांतरार्थं त्वन्य भजनं कार्यमेवतत्राह तर्हीति यदि त्वां भजति पुरुषः तर्हि ते त्वत्त एव सर्वं मनीषितमर्थं विंदेतेति ४४ ॥

भा० द्वा० ननु ब्रह्मरुद्रावपि ममैव मूर्ती अतो मामेव किमत्यंतमाद्रियसे तत्राह सत्वमिति यद्यपि यद्यपि त्वेव मायया कृता एता लीलाः त्वयैव
धृताः तथापि या सत्वमयी सैव प्रशांत्यै मोक्षाय न केवलं त्वत्रस्य प्रशांत्यभावमात्रं मन्यभजनेन किंतु निःश्रेयसं च किंचिदन्यथा त्वे भवेदित्या
ह त्व संवेति ४४ तदेवं सदाचारेण द्रढयति तस्मादिति हे भगवन् तव शुक्लां तां तनुं श्रीनारायणाख्यां अथ तावकानां च शुक्लां तनुं
नराख्यां यद्यस्मात् सात्वताः सत्वमेव पुरुषस्येश्वरस्य रूपमुशंति मन्यंते न त्वन्यत् रजस्तमश्चेति अत्र हेतुः यतः सत्वात् लोको वैकुं
ठाख्यः लोकत्वे सत्यप्यभयं च भोगे सत्यप्यात्मसुखं च ४५ अतस्तं प्रणमति तस्मै नम इति हंसाय शुद्धाय संयतगिरे नियतवाचे अ

सत्वं रजस्तम इतीश तवात्मबंधो मायामयाः स्थितिलयोदयहेतवोऽस्य लीला धृता यदपि सत्वमयी प्रशांत्यै
५१ नान्ये नृणां व्यसनमोहभियश्च याभ्यां ४४ तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजं
२० ति यत्सात्वताः पुरुषरूपमुशंति सत्वं लोको यतोऽभयमुतात्मसुखं च नान्यत् ४५ तस्मै नमो भगवते [illegible]पु
रुषाय भूम्ने विश्वाय विश्वगुरवे परदेवतायै नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वरा
य ४६ यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः [illegible] संतं स्वखेष्वसुषु हृद्यपि दृक्पथेषु तन्माययावृतमतिः स उ एव पु १
साक्षादाद्यस्तेऽखिलगुरोरुपसाद्य वेदं ४७

थ च निगमेश्वराय वेदमार्गप्रवर्त्तकाय ४६ वेदार्थसंप्रदायप्रवर्त्तनेन हेतुत्वं वदन् स्तौति यमिति कपटं द्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः राम
पुमान् स्वं इंद्रियादिषु नियंतृत्वेन संतमपि यं त्वां न वेद दृक्पथेषु विषयेषु बुद्धिविक्षेपे हेतुः तन्मायया तस्यैव मायया आवृता आत्मनि २०
ष्ठा मतिर्यस्य स उ सोपि आद्य एव पूर्वमज्ञोपि वा अखिलगुरोस्तव तत्व वर्तिनं वेदमुपसाद्य प्राप्य तं त्वां साक्षादेद ४७ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदेनैवतत्त्वज्ञानमित्युपपादयन् प्रणमति यस्येति तवदर्शनेनिगमेभवति कथंभूते आत्मनस्तवरहः रहस्यप्रकाशके अन्यथादुर्ज्ञेयत्वामा ह। अजपराब्रह्मसुख्याः कवयोपिसांख्ययोगादिभिर्यतमानाः यत्रत्वयिमुह्यन्तिकुतइत्यत आह सर्वेषांसांख्यादिवादानांविषयाभि हृदयस्तेषांप्रतिरूपंतत्तदनुसारिशीलंस्वभावोयस्यतत्कुतः आत्मनोदेहादिसंघातेननिगूढोबोधोयस्यतंएवंभूतंमहापुरुषंत्वां वंदे ४८ इतिद्वादशेअष्टमः नवमेभगवन्मायांदिदृक्षोर्हदर्शनेमहुः मायाशिशालीयांचौ चमुनेनिविशानिगमेः भगवतःपरि

यद्दर्शनेनिगमआत्मरहः प्रकाशंमुह्यन्तियत्रकवयोऽजपरायतन्तः तंसर्ववादविषयप्रतिरूपशीलंवंदेम हापुरुषमात्मनिगूढबोधं ४८ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेअष्टमोऽध्यायः सूतउवाच सं स्तुतोभगवानित्थंमार्कंडेयेनधीमता नारायणोनरसखः प्रीतआहभृगूद्वहं १ भगवानुवाच भोभो ब्रह्मर्षिवर्योसिसिद्धआत्मसमाधिना मयिभक्त्यान[illegible]नपायिन्यातपःस्वाध्यायसंयमैः २ वयं तेपरितुष्टास्मत्वद्बृहद्व्रतचर्यया वरंप्रतीच्छभद्रंतेवरदेशादभीप्सितं ३ ऋषिरुवाच जितंतेदेवदेवेशप्र पन्नार्तिहराच्युत वरेणैतावताऽलंनोयद्भवान्समदृश्यत ४ गृहीत्वाऽजादयोयस्यश्रीमत्पादाब्जदर्शनं मनसायोगपक्वेनसभवान्मेऽक्षिगोचरः ५

तोषपूर्वकंतदेपक्षितवरदानंकथयितुमाह संस्तुतइत्यादिना १ आत्मसमाधिनाचित्तैकाग्र्येण २ वयंतेपरितुष्टाः स्मेतिवहुवचनं सर्वदेवाभिप्रायेणवरदेशादित्येकवचनंहृदयोरैक्याभिप्रायेणप्रतीगृहाण ३ वरेणच्छंदयतांत्वयाजितंतउत्कर्षोदर्शितः मममतुवरा कांक्षानास्तीत्याहवरेणेति ४ यतएवश्रीमत्पादाब्जदर्शनंमनसाऽपिगृहीत्वाप्राप्यकृतार्थाअजादयोभवंति सभवान्मेऽक्षिगोचः तोजातःकिमतःपरंवरेणत्यर्थः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

०.टी० द्रष्टुमिच्छामि लोकपालैर्ब्रह्मादिभिः सहितो ऽयं लोको जनः सद्भिर्हांसनिवहैर्निमिषितां यः यति ६ तथेति द्रक्ष्यसीति ईश्वरः स्मय
स्मितात् पागतः क्रियाविशेषणं ७ तमेवार्थं मायादर्शनरूपं श्रमादिमूर्तिषु ८ भावद्रव्ये मनो मयेद्रव्ये: क्वचित् कदाचित् प्रेम
प्रसरसंकुलः प्रमोदेर्केषाप्तः ९ मायादर्शनमाह तस्येत्यादिना १० तत्र वायुमनुवलाहकामघाः अमवृन्ध्यावितेभूवुः तैश्च त
डिद्भिः सहिताः नुचैः स्वनेनोर्गर्जनैः अक्षोरथागतः हे तस्थविष्ठाः अभितोवर्षधाराः मुमुचुः चतुर्दिक्षु वर्त्तमानाः समुद्राः समार

अथः प्रवृत्तपत्राक्षपुण्यश्लोकशिखामणे द्रक्ष्यमायाप्ययालोकः सपाल्लावेद्रमद्भिर्हां ६ सूत उवाच इतीडितोर्चितः
काममृषिणा भगवान्मुने तथेति सस्मयतनुप्रगाद् दृष्याः आश्रमीश्वरः ७ तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव स
वसन्नग्न्यर्कसोमाम्बुभूर्वायुवियदात्मसु ८ ध्यायन्सर्वत्र च हरिं भावद्रव्यैरपूजयत् क्वचित्पूजां विसस्मार भ
२८ क्तिप्रसरसंक्लतः ९ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुने उपासीनस्य संध्यायां ब्रह्मन् वायुरभून्महान् १०
तं चंडशब्दं समुदीरयंत बलाहका अन्वभवन् करालाः अक्षस्थविष्ठा मुमुचुस्तडिद्भिः स्वनंत उच्चैरभिवर्षधाराः
११ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मातलमाग्रसंतः समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघो
षाः १२ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभीरुपतापितं जगत् चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां

वेगेनोर्मयः तैर्भूतलं ग्रसंतः उग्रा नक्रा येषु महाभया आवर्ता येषु गंभीरो घोषो येषु ते च ते च १२ आत्मना सह जरायुजादि चतुर्वि रामः
धं जगदंतर्बहिश्चापतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समत्रसत् भयं प्राप तेनोपतापितत्वं अद्भिः कथंभूताभिः अ २८
तिद्युभिः अतिक्रांता द्यौः याभिः खरैः असहैः रश्मिभिः वायुभिर्वै तिशोषः शतह्रदाभिः विद्युद्भिः दीर्घमार्गदत्तानुसारेण १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रभंजनेन वायुना घूर्णितं प्रकंपितं वाः उदकं यस्मिन् सः अप्यधात् छादयामास समं सह १४ सक्ष्मांतरिक्षं भूम्यंतरिक्षस्थप्राणिसहितं स
दिवं स्वर्गस्थदेवसहितं भगणाः ज्योतिर्गणाः तैः सहितं जटां विक्षिप्य विकीर्य १५ परिश्रमेणाइषितः गतः व्याप्त इत्यर्थः इषुस

तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः आपूर्यमाणो वरषद्भिरंबुदैः क्ष्मामप्यधात् द्वीपव
र्षाद्रिभिः समं १४ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भिराप्लुतं सएक एवोर्वरितो महा
मुनिर्बभ्राम विक्षिप्य जटा जडांधवत् १५ क्षुत्तृट्परीतो मकरैस्तिमिंगिलैरुपद्रुतो वीचिनभस्वताहतः
तमस्यपारे पतितो भ्रमन् दिशो न वेद खं गां च परिश्रमेषितः १६ क्वचिद्गतो महावर्ते तरलैस्ताडितः
क्वचित् यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः १७ क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भ
यं क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः १८ अयुतायुतवर्षाणां सहस्राणि शतानि च व्यती
युर्भ्रमतस्तस्मिन् विष्णुमायावृतात्मनः १९ स कदाचित् भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः न्य
ग्रोधपोतं ददृशे फलपल्लवशोभितं २०

र्षणाइत्यस्मात् १७ अन्योन्यघातिभिः तत्रक्षणाय परस्परं युध्यद्भिः १८ विष्णुमायावृतात्मन इति स तथा दृष्टवानित्यर्थः १९ क
कुदि उन्नतप्रदेशे न्यग्रोधपोतं कोमलं वटं २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

०टी॰ नस्यईशान दिक् शाखायां शिशुमपि २१ श्रीमत्तरम्यंवदनपंकजंयस्यतंकंवुवत् त्रिरेखाढ्यता ग्रीवायस्यतं महोरस्कं विशालवक्षसं
सुनासंशोभनानासायस्यतं सुंदरभ्रूकं वायस्यतं २२ श्वासैरेजंतः कंपायमानाअलकाः केशा भांतशोभितं कंवुवत् अतवेल्लेयन
श्रीयेयोः तौकंवुश्रियौ तयोः कर्णयोर्दाडिमपुष्पयस्यतं विद्रुमतुल्या अधरभासाइषत् शोणा पितसुधातुल्यं स्मितंयस्यतं २३
पद्मगर्भवत् आईषत् अरुणावपांगौ नेत्रांतौ यस्यहृद्योहासोयस्मिन् तदवलोकनंयस्यतं श्वासैरेजंत्य अलंत्यावल्लयस्तियो

घ्रागुत्तरस्यां शाखायांतस्यापिदद्दृशे शिशुं शयानपर्णपुटकेग्रसंतंप्रभयातमः २१ महामरकतश्यामं
श्रीमद्वदनपंकजं कंवुग्रीवंमहोरस्कं सुनासंसुंदरभ्रुकं २२ श्वासेजदलकाभांतंकंवुश्रीकर्णदाडिमं
२५ छो३ विद्रुमाधरभासेशोणायितसुधास्मितं २३ पद्मगर्भारुणापांगंहृद्यहासावलोकनं श्वासेजद्वलिसंवि
ग्ननिम्ननाभिदलोदरं २४ चार्वंगुलिभ्यां पाणिभ्यामुन्नीयचरणांबुजं मुखेनिधायविप्रेंद्रोधयंतंवी
क्ष्यविस्मितः २५ तद्दर्शनाद्वीतपरिश्रमोमुदाप्रोत्फुल्लहृत्पद्मविलोचनांबुजः प्रहृष्टरोमाद्भुतभावशं
कितः प्रष्टुंपुरस्तंप्रससारबालकं २६

कुनिम्नैरखातैः आभिः संविग्नाचंचलानिम्नाचगंभीरानाभि[illegible]र्यस्मिन् तत् दलवदश्वत्थपत्रसंकाशमुदरंयस्यतं २४ चारवः राम
अंगुलयोययोस्ताभ्यां उन्नीयआकृष्य धयंतंपिवंतं २५ हृत्पद्मंचविलोचनांबुजेच प्रोत्फुल्लानितानियस्यसः अद्भुतभावं अला २५
भर्गरूपंतेन शंकितः सन्नपितंप्रष्टुंपुरःप्रससारसमीपंगतः २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदः इदं जगत् यथापुरा प्रलयात्पूर्वं व्यस्तं विन्यस्तं दृष्ट्वा च अतीव विस्मितः सन् अमुह्यत् २५ कृत्स्नशो दर्शनं प्रपंचयति खमित्या
दिना ककुभो दिशः पुराणि आकरान् खेटान् कर्षकग्रामान् व्रजान् गोकुलानि आश्रमान् वर्णान् तेषां वृत्तीश्च इत्यर्थः २८ ना
नायुगानि कल्पांश्च कल्पयति इति विकल्पनं इत्थं तथा तं काले च सदिव परमार्थं इव तत्त्वव भासितं तेनैव २९ ३० वटं च तोकं च

तावच्छिशोर्वै श्वसितेन भार्गवः सोंऽतः शरीरं मशको यथाविशत् तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथापुरा मुह्य
दतीव विस्मितः २५ खं रोदसी भगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभः सुरासुरान् वनानि देशान्सरितः
पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः २७ महान्ति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्प
कल्पनं यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितं २९ हिमालयं पुष्पवहां च तां नदीं नि-
जाश्रमं यत्र ऋषीनपश्यत् विश्वं विपश्यञ्छ्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ३० तस्मिन्पृथि
व्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपांगनिरीक्षणेन ३१
अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ३२ श्रीराम॥

वीक्ष्य तत्प्रेमसुधातुल्यस्मितयुक्तेनापांगनिरीक्षणेन निरीक्षितः सन् ३१ अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति
यान्वयः कथंभूतं नेत्राभ्यां हृदि धिष्ठितं ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वा० तावत्परिष्वंगला भात्पूर्वमेवऋषेस्सकाशान्तर्हितोबभूव तदुक्तमेव फलदृष्टांतः अनीशो निर्दैवः तेन निर्मिता ईहा क्रीडा यथेति ३३ तं

अन्तर्हितं भगवंतमनु वटः सलिलं लोकसंप्लवश्च तिरोधायि अन्तर्हितः सच स्वाश्रमे एव यथापूर्वं स्थित इति ३४ इति द्वादशे नवमः

दशमे शिवआगत्य मुनये श्रेष्ठं वरान्ददौ तेन साकं मतिप्रीत्या समामाप्य सभाजयत् १ ज्ञानकाशया ज्ञानवत्प्रकाशमानया

तावत्स भगवान्साक्षाद्योगाधीशो गुहाशयः अंतर्दधे ऋषेः सत्यो यथेहानीशनिर्मिता ३३ तमन्वथवटो

ब्रह्मन्सलिलंलोकसंप्लवः तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ३४ इतिश्रीभागवते महापुरा

णे द्वादशस्कंधे मायादर्शनंनाम नवमोऽध्यायः सूत उवाच स एवमनुभूयेदं नारायणविनिर्मितं वैभवं

२० योगमायायास्तमेव शरणंययौ १ मार्कंडेय उवाच प्रपन्नोऽस्म्यंघ्रिमूलं ते प्रपन्नाभयदं हरे यन्मायया पि वि

बुधा मुह्यन्ति ज्ञानकाशया २ सूत उवाच तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् रुद्राण्या भगवान्रुद्रो

ददर्श स्वगणैर्वृतः ३ अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाश

यं ४ निभृतोदझषव्रातो वातापाये यथार्णवः कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ५ राम

३०

त्वऋजनं विना विद्वांसोऽपि यस्य तव मायया ज्ञानिनो वयमित्यहंकारेण मुह्यन्तीत्यर्थः २ श्रीनारायण एव स्वमायादर्शनश्रान्तं श्री शि

वरूपेण सांत्वयामास तदाह तमेवमित्यादिना निभृतात्मानं समाहितचित्तं रुद्राण्या भवान्या ३ निभृता निश्चला आत्मेंद्रिया

शया देहेंद्रियमनांसि यस्य तं ४ निभृतं निश्चलमुदकं झषव्रातश्च यस्मिन् सः संसिद्धिफलं साक्षात्कुरु प्रकटीकुरु यतो भवान्

द्वा

ज्ञानेन काश्यते नाश्यते ज्ञानं कामयानया

कान्तार्हिसायामिधातोः २ इति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कं १

भा०टी० आशिषः अभ्युदयलक्षणाः उत स्वित् अत्र हेतुः भक्तिमिति ६ संवदिष्यामः संवादं करिष्यामः ७ सात्वतां गतिर्हेतुः ईशान
इति ८ रुद्धाधियोऽन्तःकरणस्य वृत्तयो यस्य सः ९ १० न केवलं बहिरेव आत्मन्यपि प्राप्तं शिवं विचक्ष्य विस्मितः कथं

श्रीभगवानुवाच नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत भक्तिं परां भगवति लब्धवान् पुरुषेऽव्य
ये ६ अथापि संवदिष्यामो भवान्येतेन साधुना अयं हि परमो लाभो नृणां साधुसमागमः ७ सूत उ
वाच इत्युक्त्वा तमुपेयाय भगवान् सतां गतिः ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनां ८ तयो
रागमनं साक्षादीशयोर्जगदात्मनोः न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ९ भगवांस्तदभि
ज्ञाय गिरिशो योगमायया आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः १० आत्मन्यपि शिवं प्राप्तं
अ२ तडित्पिंगजटाधरं त्र्यक्षं दशभुजं प्रांशुमुद्यन्तमिव भास्करं ११ व्याघ्रचर्मांबरं शूलधनुरिष्वसिच
र्मभिः अक्षमालाडमरुककपालं परशुं सह बिभ्राणं सहसा भांतं विचक्ष्य हृदि विस्मितः १२॥
किमिदं कुत एवेति समाधेर्विरतो मुनिः नेत्रे उन्मील्य ददृशे सगणं सोमयागतं १३ श्रीराम॥

प्राप्तं सहसा अकस्मादेव हृदि भान्तं कथंभूतं तडित्पिंगा जटा धारयतीति तथा तं त्रीण्यक्षीणि यस्य तं शूलादिभिः सहा
क्षमालादीन् बिभ्राणमित्यन्वयः अक्षमालादीनां हृद्येकं ११ १२ विस्मयपूर्वकं बहिर्दर्शनमाह किमिदमिति सोमया उमया
महागतं रुद्रं ददृशे १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टी॰ ८ ततोननाम १४ पूर्णकामत्वंयत्नक्रियेनत्वयाजगन्निर्वृतंभवतीति १५ निर्गुणत्वेनत्रिगुणत्वेनचनमस्करोति नमःशिवायनिर्गुणायस
त्वायसत्वाधिष्ठात्रेअतएवप्रमृडयतीतितथात्तेस्मै १६ ७ नास्मत्तःत्रयःब्रह्मविष्णुमहेश्वराःयत्तुंयेभ्यःनेवयं १८ वरदानादिनाभवंतीत

रुद्रंत्रिलोकैकगुरुंननाममशिरसामुनिः तस्मैसपर्यांव्यदधात्सगणायसहोमया स्वागतासनपाद्या
र्घ्यगंधस्रक्धूपदीपकैः १४ आहचात्मानुभावेनपूर्णकामस्यतेविभोः करवामकिमीशाननयेनेदं
निर्वृतंजगत् १५ नमःशिवायशांतायसत्वायप्रमृडायच रजोजुषेथघोरायनमस्तुभ्यंतमोजुषे ८
३१ १६ सूतउवाच एवंस्तुतःसभगवानादिदेवःसतांगतिः परितुष्टःप्रसन्नात्माप्रहसंस्तमभा
षत १७ श्रीभगवानुवाच वरंवृणीष्वनःकामंवरदेशावयंत्रयः अमोघंदर्शनंयेषांमर्त्योयद्वि
दतेऽमृतं १८ ब्राह्मणाःसाधवःशांताःनिःसंगाभूतवत्सलाः एकांतभक्ताअस्मासुनिर्वैराः
समदर्शिनः १९ सलोकालोकपालास्तानूवंदंत्यर्चंत्युपासते अहंचभगवान्ब्रह्मास्वयंच ८

राम
वास्माभिःक्रियतेनत्वनुग्रहः जगद्धितत्वाक्तवतामितिब्राह्मणान्स्तौति ब्राह्मणाइत्यादिनायेसाधवःसदाचाराःशां ३१
ताःमत्सरादिरहिताःनिःसंगाःनिष्कामाः १९ नकेवलंतएवकिंच अहंचेत्यादि २० श्रीराम श्रीराम श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूज्यतमं त्वहे त्वं तरमाह नेति श्राएव पित्र्यणुमात्रमपि चक्षते पश्यंति तत्तस्मात् एवंभूतान् युष्मान् ईमहि भजेम २१ २ ब्राह्मणस्य यः श्रा त्मणान् श्रात्मसमाधानं चित्तैकाग्र्यं तपश्चालोचनं स्वाध्यायः श्रध्ययनं संयमः वागादिनियमः तैः २३ किंच श्रव णादित्यादि २४ चंद्रोल्ललामाभूषणं यस्य तस्य धर्मरहस्ययुक्तं श्रमृतास्यंद वचः कर्णाभ्यां पिबन् नातृप्यत् श्रलमिति

नैते मय्यच्युतेऽजस्य मिहामएवपि विचक्षते नात्मनश्च जनस्यापि तद्युष्मान्वयमीमहि २१ न ह्यम्मया
नि तीर्थानि न देवा श्चेतनोज्झिताः ते पुनंत्युरुकालेन यूयं दर्शनमात्रतः २२ ब्राह्मणोऽभ्यानमस्या सोऽयं
स्मद्रूपं त्रयीमयं बिभर्त्यात्मसमाधानतपःस्वाध्यायसंयमैः २३ श्रवणाद्दर्शनाद्वापि महापात
किनोऽपि वः शुध्येरन्नंत्यजाश्चापि किमु संभाषणादिभिः २४ सूत उवाच इति चंद्रललामस्य ध
र्मगुह्योपबृंहितं वचोऽमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् २५ स चिरं मायया विष्णोर्भ्रामितः
कर्शितो भृशं शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् २६ ऋषिरुवाच अहो ईश्वरचर्येयं दुर्वि
भाव्या शरीरिणां यन्नमंतीशितव्यानि स्तुवंति जगदीश्वराः २७ राम राम राम राम राम

नामृतायनं कर्णयोरमृतायनं इति वान्वयः २५ शिवस्य वाग्वामृतं तेन ध्वस्तः क्लेशपुंजो यस्य सः २६ इयं लीला दुर्विभाव्या श्रवितर्क्या यद्यथा ईशितव्यानि स्वनियम्यानि यानि भूतानि जगदीश्वराः स्वयं नमंति स्तुवंति चेति २७ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वा॰ अथवा लोकसंग्रहमात्रमेतदित्याह धर्म्ममिति प्रवक्तारोपि यत्स्वयं देहिनां धर्ममाचरंति २८ नन्वेतत्स्वप्रभावतिरस्कारकं
कथं मया क्रियते तत्राह नेति एतावता लोकसंग्रहमात्रेण नेतैर्नमनादिभिः कथंभूतैः स्वमायामयीवृत्तिर्येषु तैः भग
वतो मायिन इवानुभावो न दुःष्यतीत्यत्र प्रसिद्धस्य मायिनः कुहकं यथा कपटं यथा तैस्तैर्नमनादीनि श्रतस्तस्य य
था कुहकेश्वरात्मानुभावो न दुष्यतइतितद्वत् प्रदुष्येतेतिपाठे नकारस्य दर्शनं नुषंगः २९ मायाचेष्टितं प्रपंचयति सृष्ट्वेति

धर्म्मं ग्राहयितुं प्रायः प्रवक्तारोऽपि देहिनां आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च २८ नैवैतद्भगवतः ना १
स्वमायामयवृत्तिभिः न दुष्येतानुभावैस्तैर्मायिनः कुहकं यथा २९ स सृष्ट्वेदं मनसा विश्वमात्म
३२ नाऽनुप्रविश्य यः गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ३० तस्मै नमो भगवते त्रिगुणाय गु
णात्मने केवल्याय अद्वितीयाय गुरवे ब्रह्ममूर्तये ३१ कं वृणे नु परं भूमन् वरं त्वद्वरदर्शनात् यद्दर्शना
त्पूर्णकामः सत्यकामः पुमान् भवेत् ३२ वरमेकं वृणेथापि पूर्णात्कामाभिवर्षणात् भगवत्यच्युतां
भक्तिं तत्परेषु तथा त्वयि ३३ सूत उवाच इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा तमाह भग
वान् शर्वः शर्वया चाभिनंदितः ३४ राम

स्वप्नदृक् यथेत्यविद्याचेष्टिते दृष्टांतः ३० त्रिगुणत्वेपि न जीववत्तदभिभूतता किंतु गुणानामात्मने नियंत्रे ३१ वरं वृणीष्वे ३२
तियदुक्तं तत्राह कमिति वरं दर्शनं यस्य तस्मात्त्वत्तः परं कं नु वरं वृणे यस्य तव दर्शनात्पूर्णकामः सर्वानंदसंदोहरूपः
सत्यकामः यथेच्छं प्राप्तसर्वानंदः ३२ ३ वरदानाय स्वयमेव प्रवृत्तः मैवं यातु च मया चाभिनंदितः अनुमोदितः सन्नाह ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कामोयं सर्वोपि अन्यत्व पुण्ययशा इत्यादि ब्रह्मवर्चस्विनस्ते भूयादित्युत्तरेणान्वयः यतस्त्वमधोक्षजे भक्तिमान् ३५ ६ तस्य कर्मतप
आदि मुनेः पुरानुभूतं च भगवन्मायाविभवं तच्च कथयन् ३७ अवाप्तमहायोगमहिमायन सः ३८ एतन्मार्कंडेयस्य चरितं तेना द्वं १
नुभूतं च भगवन्मायाविभवं तेऽनुवर्णितं ३९ नन्वेवमप्यस्मत्कुलोत्पन्नस्यास्य सप्तकल्पायुष्ट्वं इदं रुच्यमानं विरुद्धमेव तत्राह
एतन्मार्कंडेयेनानुभूतं भगवन्मायाविभवं नानाकल्परूपं कदाचित्क ईश्वरेच्छया तस्यैवाकास्मिकं न तु सर्वसाधारणमेतदुक्

कामस्तेयं महर्षेऽस्तु भक्तिमांस्त्वमधोक्षजे आकल्पांताद्यशाः पुण्य अजरामरता तथा ३५ ज्ञानं त्रैकालिकं ब्रह्मन्
विज्ञानं च विरक्तिमत् ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यतास्तु ते ३६ सूत उवाच एवं वरान्स मुनये दत्वागात्त्र्यक्ष
ईश्वरः देव्यै तत्कर्म कथयन्ननुभूतं पुरामुनेः ३७ सोप्यवाप्तमहायोगमहिमा भार्गवोत्तमः विचरत्यधुनाप्यद्धा
हरावेकांततां गतः ३८ अनुवर्णितमेतत्ते मार्कंडेयस्य धीमतः अनुभूतं भगवतो मायावैभवमद्भुतं ३९ एतत्केचि
दविद्वांसो मायासंसृतिमात्मनः अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ४० य एवमेतद्भृगुवर्य वर्णितं रथां
गपाणेरनुभावभावितं संश्रावयेत्संशृणुयादु तावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ४१ इति द्वादशे दशमोऽध्यायः

चित् अनादि बहुकालं आवर्तितं देवयुगसहस्रद्वयमानेन पुनःपुनः परिवर्तितं प्रचक्षते केते नृणां संसृतिं सर्गप्रलयादिल
दु २ क्षणं आत्मनो भगवतो मायिसि एवमविद्वांसः विद्वांसः माया शिशोऽश्वासोच्छ्वासाभ्यां सप्तकल्प स्तदुदरप्रवेशनिर्गमनः सप्तक
ल्पत्वं तत्क्षणमात्रेणेति वदंति अतो न विरोध इत्यर्थः ४० संशृणुयात् उत संश्रावयेद्वा यो तावुभौ तयोः कर्मवासनाकृता
संसृतिर्न भवेदिति ४१ द्वादशे दशमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टी॰ एकादशे तु पूजार्थं महापुरुषवर्णनं रवेर्व्यूहस्य चाख्याने प्रतिमासं पृथक् पृथक् येन ॥ मर्त्यत्वमापन्नो मर्त्यो सो भागवोत्तमः ॥ तं प्रष्टुमिति
क्रियायोगं सांगोपांगादि कल्पितं अथेति हि भागवता यतो भवान् समस्ततंत्रराद्धांते तत्त्ववित् १ प्रष्टव्यमाह तांत्रिका इति परिचर्या
यां उपासनायां विषये केवलस्य चैतन्यघनस्य अंगानि पादादीनि उपांगानि गरुडादीनि आयुधानि सुदर्शनादीनि आकल्पाः
कौस्तुभादयः तेषां हेहकंप तद्यथा कल्पयंति येऽस्मत्त्वैः कल्पयंति २ तन्नो वर्णयेति ३ गुरूपदेशगम्यत्वाद् स्यार्थस्य तत्त्व नमस्का

शौनक उवाच अथेममर्थं पृच्छामो भगवंतं बहुवित्तमं समस्ततंत्रराद्धांते भगवान् भागवततत्त्ववित्
१ तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः अंगोपांगायुधाकल्पं कल्पयंति यथैव यैः २ तन्नो वर्ण
३३ य भद्रं ते क्रियायोगं बुभुत्सतां येन क्रियानैपुणेन मर्त्यो यायादमर्त्यतां ३ सूत उवाच नमस्कृ
त्वा गुरून् वक्ष्ये विभूतीर्वैष्णवीरपि याः प्रोक्ता वेदतंत्राभ्यामाचार्यैः पद्मजादिभिः ४ मायाद्यैर्नव
भिस्तत्वैः सविकारमयो विराट् निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ५ राम राम राम

रपूर्वकमाह नमस्कृत्वेति विभूतीः विराड्विग्रहाद्याः ४ अंगादिकल्पनां भूरादिभिर्दर्शयितुं प्रथमं तावद्यथा कल्पयंती राम
ति प्रश्नस्य वैराजरूपेणोत्तरं वक्तुं विराड्विग्रहमाह मायाद्यैः प्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्वैः विकार ३३
एकादशेंद्रियाणि पंचमहाभूतानीति षोडशात्मको विराट् स प्रसिद्धो निर्मितः यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्र
यं दृश्यते अनेनांगादिकल्पनासौलभ्यं दर्शितं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्य रूपमेव ईश्वरेणाधिष्ठितत्वात्तेन भेदविवक्षया तस्य रूपमुच्यते अंगकल्पनामाह। भूः पादावित्यादि त्रिभिः॥
भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ६ प्रजननं मेढ्रं अपानः पायुः ७ ८ अनुक्तमन्यदप्येवमुह्यमित्याह यावानयं व्यष्टिपु
रुषस्वमानतः सप्तवितस्तिसंस्थया अवयवसंनिवेशेन मितः ९ भूषणादीन्याह। कौस्तुभेत्यादिना स्वात्मज्योतिः शुद्धजीवचैतन्यं या

एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः नाभिः सूर्योक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ६ प्रजापतिः प्रजन
नमपानो मृत्युरीशितुः तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः ७ लज्जोत्तरोधरो लोभो दंता ज्योत्स्ना स्मयो
भ्रमः रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ८ यावानयं वै पुरुषो यावत्या संस्थया मितः तावानसा
वपि महापुरुषो लोकसंस्थया ९ कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः तत्प्रभा व्यापिनी साक्षा
त् श्रीवत्समुरसा विभुः १० स्वमायां वनमालाख्यां नानागुणमयीं दधत् वासश्छंदोमयं पीतं ब्रह्मसूत्रं
त्रिवृत्स्वरं ११ बिभर्ति सांख्यं योगं च देवो मकरकुंडले मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं १२ अव्याकृ
तमनंताख्यमासनं यदधिष्ठितः धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते १३ श्रीराम श्रीराम श्री॥

तस्यैव कौस्तुभस्य प्रभा नामैव श्रीवत्सं बिभर्ति १० त्रिवृत्स्वरं त्रिमात्रं प्रणवं ११ पारमेष्ठ्यं पदं ब्रह्मलोकं १२ अव्याकृतं प्रधानं॥
यत् अधिष्ठितः अधिष्ठाय स्थितः तदासनभूतं पद्मं सत्त्वं सत्त्वगुणः १३ श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० मुख्यतत्वं प्राणतत्वं प्राणो वै मुख्य इति श्रुतेः दरवरं शंखं १४ १५ आकूतीः क्रियाशक्तिः मनः अस्य रथं अस्याभिव्यक्तिं बहिरभिव्यक्तेः रू
पं मुद्रया धृतया अर्थक्रियात्मतां वरदाभयादिरूपत्वं विभक्तितत्वं मुद्रया तथा तथा भावयेदित्यर्थः १६ मंडलं देवयजनं देवपूजा
भूमिः सूर्यमंडलत्वेन भावयेदित्यर्थः अंतर्वेदिमंडलं वा दीक्षा संस्कार आत्मनः गुरुकृतां मंत्रदीक्षामेव आत्मनः संस्कारं जानीयात् तां
भावयेदित्यर्थः परिचर्येति भगवतस्तत्परिचर्यां स्वस्य सकलपापक्षयाय एवंरूपां भावयेदित्यर्थः १७ पूर्वमासनपद्ममुक्तं इ

ओजः सहोबलयुतं मुख्यतत्वं गदां दधत् अपां तत्वं दरवरं तेजस्तत्वं सुदर्शनं १४ नभोनिभं नभस्त
त्वमसिं चर्म तमोमयं कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिं १५ इंद्रियाणि शरानाहुराकूती
३४ रस्य स्यंदनं तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां १६ मंडलं देवयजनं दीक्षा संस्कार आ
त्मनः परिचर्या भगवत आत्मनो दुरितक्षयः १७ भगवान् भगशब्दार्थं लीलाकमलमुद्वहन् धर्मं य
शश्च भगवांश्चामरव्यजनेऽभजत् १८ आतपत्रं तु वैकुंठं द्विज धामाकुतोभयं त्रिवृद्वेदः सुपर्णाख्यो
यज्ञं वहति पुरुषं १९

करलंपद्म
दानीं तैः स्थं पद्ममाह भगवानिति भगवच्छब्दार्थं ऐश्वर्यादिषाड्गुण्यं १८ हे द्विजाः एकवचनांतो वा पाठः अकुतोभयं राम
कैवल्यं धाम गृहं सत्म भजत् यद्वा वैकुंठस्य विशेषणं अकुतोभयं यद्धामेति त्रिवृत् ऋग्यजुःसामरूपो वेदः सुपर्णो ३४
सि गरुत्मान् त्रिवृत्तेन शिर इत्यादिमंत्रलिंगात् यज्ञं यज्ञरूपं यज्ञो वै विष्णुरिति श्रुतेः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनपायिनी हरेः शक्तिः तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात्तस्याश्च तदभेदादित्यर्थः तत्रमूर्त्तिः पंचरात्राद्यागमरूपः अणिमादयो ऽष्टौ गुणाः ते हरेर्द्वारपालाः नंदादयः २० तस्यैव चतुर्व्यूहोपासनो माह वासुदेवादिर्योदेः पुरुषः श्रीनारायण एव स्वयं मूर्त्तिभेदैरुपास्य इत्यभिधीयते २१ तस्यैवाध्यात्मनि चतुर्द्धोपासनमाह स एव भगवान् विश्वादिशब्दैर्वृत्तिभिः जाग्रदाद्यवस्थाभिः परिभाव्यते तद्रूपाधीनाह अर्थो वाह्यः इंद्रियं मनः आशयस्तदुभयसंस्कारयुक्तमज्ञानं ज्ञानं त्रितयसाक्षित्वं २२ उक्त चतुर्व्यूहहृदयोपासनं अपि पूर्वोक्तं अंगाद्युपासनमाह अंगेति अंगादिभिरुपलक्षितो भगवान् हरिर्वासुदेवादिचतुर्मूर्त्तिः सन् वि

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः विष्वक्सेनस्तंत्रमूर्त्तिर्विदितः पार्षदाधिपः नंदादयोऽष्टौ द्वाःस्थाश्च ते ऽ
णिमाद्या हरेर्गुणाः २० वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं अनिरुद्ध इति ब्रह्मन् मूर्त्तिव्यूहोऽभिधीयते २१ स
विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः अर्थेंद्रियाशयज्ञानैर्भगवान् परिभाव्यते २२ अंगोपांगायुधाकल्पै
र्भगवांस्तच्चतुष्टयं बिभर्त्ति स्म चतुर्मूर्त्तिर्भगवान् हरिरीश्वरः २३ द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक्
स्वमहिमपरिपूर्णो मायया च स्वयैतत् सृजति हरति पातीत्याख्यया ऽनावृताक्षो विवृत इव निरुक्तस्तत्परै

श्वादिचतुष्टयं बिभर्त्ति स्म अविश्वादिभावे अपि तन्नियंतृत्वस्य न जीवत्वमित्याह विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति २३ तस्य ब्रह्मादित्रिमूर्त्तितामाह द्विजऋषभेति स एष एव भगवान् ब्रह्मयोनिर्वेदस्य कारणमित्यादिहेतुत्वं स्वतो भेदाभावे अपि च स्वगत मायया सृजति हरतिपातीति एवाख्यया ब्रह्मादिरूपया अनावृताक्षः अनावृतज्ञानो ऽपि विवृत इव निरुक्तः शास्त्रेषु ननु भिन्नः अत्र विद्वदनुभवं प्रमाणयति तत्परैरात्मत्वेनैव लभ्यत इति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा·द्वा· यस्येदमुपासनयुक्तं तं श्रीकृष्णं प्रार्थयते कृष्णसखस्य अर्जुनस्य सखे वृष्णिश्रेष्ठ अवनिद्रुहो ये राजन्याः तेषां वंशस्य दहन अनपवर्ग अक्षी-
णवीर्य यस्य गोपवनितानां व्रजाः समूहाः भृत्या नारदादयः तैर्गीतं तीर्थभूतं श्रवः कीर्तिर्यस्य श्रवणमेव मंगलं यस्य २५ एतज्जपमा-
त्रस्यापि ब्रह्मज्ञानं फलमित्याह य इति कल्ये उषः काले यस्तच्चित्तः प्रयतः शुचिश्च सः जप्त्वा गुहाशयं हृदिस्थं ब्रह्म पश्यति २६ मंडल-
देवयजनमित्युक्त्वा बुद्धिमागतेः मूर्तिव्यूह प्रसंगेन रविव्यूहोऽत्र पृच्छ्यते शुक इति पंचमे यदाह तथाऽन्यच्च ऋषयो गंधर्वाप्सर-
सो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्तेत्यादिना सौराः सूर्यसंबंधी सप्तानां गणाः २७ तेषां सप्तानां अधीश्व-

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य गोविंद गोपवनिताव्रजभृत्यगीततीर्थश्रवः
३५ श्रवणमंगल पाहि भृत्यान् २५ य इदं कल्य उत्थाय महापुरुषलक्षणं तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयं २६
शौनक उवाच शुको यदाह भगवान् विष्णुरातय शृण्वते सौरो गणो मासि मासि नाना वसति सप्तकः २७ तेषां नामा-
नि कर्माणि संयुक्तानामधीश्वरैः ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः २८ सूत उवाच अनाद्यविद्यया वि-
ष्णोरात्मनः सर्वदेहिनां निर्मितो लोकतंत्रोऽयं लोकेषु परिवर्तते २९ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः
सर्ववेदक्रियामूलं ऋषिभिर्बहुधोदितः ३०

रैः तत्तन्नतिभिः तत्तन्मासाधिकृतैः सूर्यैर्वा व्यूहं विभागं २८ तत्र तावत्तं व्यूहं निरूपयितुं प्रथमं सूर्यस्वरूपमाह अनाद्यविद्य- राम
या मायया अयं सूर्यः लोकतंत्रः लोकयात्राप्रवर्तकः २९ अतस्तस्य क्रियाभेदोपाधिकमेव नानात्वं न स्वत इत्याह एक एवे- ३५
ति सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः जगदात्मा आदिकृत् सृष्टिकर्ता हरिरेव सूर्यः स च सर्ववेदोक्तक्रियाणां मू-
लं सन् तेनोपाधिना बहुधोक्तः ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालरूपधारिणो हरेर्द्वादशादित्यरूपभेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवर्त्तनेयमायाकृतं नवधा भेदमाह काल इति कालः॥
प्रातरादिः देशः समादिः क्रियाअनुष्ठानं कर्त्ता ब्राह्मणादिः करणं स्रुगादि कार्यं यागादि आगमः मंत्रादिः द्रव्यं व्रीह्यादि फलं स्वर्गादि
३१ तत्रच कालरूपधारी भगवान् पृथक्‌चरति मध्वादिषु चैत्रादिषु लोकतंत्र्यायात्रानिर्वाहाय ३२ तानेवगणानाह धातेति द्वादशभिः धातासूर्यः कृतस्थली अप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृत् यक्षः पुलस्त्य ऋषिः तुंबरुर्गंधर्वः नयंति अनुवर्त्तयंति पलोक ३

कालो देशः क्रियाकर्त्ता करणं कार्यमागमः द्रव्यं फलमिति ब्रह्मन् नवधोक्तोऽजया हरिः ३१ मध्वादिषु द्वाद
शसु भगवान्‌कालरूपधृक् लोकतंत्राय चरति पृथग्‌द्वादशभिर्गणैः ३२ धाता कृतस्थली निर्वा सुकी रथकृ हे २
न्मुने पुलस्त्यस्तुंबुरुरिति मधुमासं नयंत्यमी ३३ अर्यमा पुलहोऽथौजाः प्रहेतिः पुंजिकस्थली नारदः कच्छनी
रश्चनयंत्येते स्म माधवं ३४ मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः रथस्वन इति ह्येते शुक्रमासं नयंत्यमी ३५
वसिष्ठो वरुणो रंभा सहजन्यस्तथा हुहूः शुक्रश्चित्रस्वनश्चैव शुचिमासं नयंत्यमी ३६ इंद्रो विश्वावसुः श्रोता एला
पत्रस्तथांगिराः प्रम्लोचा राक्षसो वर्यो नभोमासं नयंत्यमी ३७ विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः अनु

अथौजा यक्षः प्रहेती राक्षसः नारदो गंधर्वः कच्छनीरो नागः माधवं वैशाखं ३४ मित्रः सूर्यः पौरुषेयो राक्षसः रथस्वनो यक्षः शुक्रमा
सं ज्येष्ठं ३५ वरुणः सूर्यः सहजन्यो यक्षः शुक्रो नागः चित्रस्वनो राक्षसः शुचिमासं आषाढं ३६ इंद्रः सूर्यः विश्वावसुर्गंधर्वः श्रोता
यक्षः एलापत्रो नागः वर्यो राक्षस इति स्वयमेव व्याख्यातं नभोमासं श्रावणं ३७ विवस्वान् सूर्यः उग्रसेनो गंधर्वः व्याघ्रो राक्ष
सः आसारणो यक्षः शंखपालो नागः नभस्यं भाद्रपदं ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ द्वा॰ धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः सुरुचिर्यक्षः तपोमासं माघमासं क्रमात् निलंघनं कौर्मोक्तादिक्रमानुसारेण वैष्णवेनु मास
क्रमेणोक्तिः केचित्नामवन्यत्र स्तोकल्प भेदेनेति ज्ञेयं ३९ ऋतुर्यक्षः वर्चो राक्षसः पर्जन्यः सूर्यः सेनजित् अप्सराः विश्वा गंधर्वः ऐरा
वतो नागः तपस्यं फाल्गुनं ४० अंशुः सूर्यः अरांइतिवापाः नार्क्ष्यो यक्षः ऋतसेनो गंधर्वः विद्युच्छत्रु राक्षसः महाशंखो

पूषा धनंजयो वातः सुषेणः सुरुचिस्तथा घृताची गौतमश्चेति तपोमासं नयंत्यमी ३९ ऋतुर्वर्चा भरद्वाजः
पर्जन्यः सेनजित्तथा विश्वैरावतश्चैव तपस्याख्यं नयंत्यमी ४० अथांशुः कश्यपस्तार्क्ष्य ऋतसेन
२६ स्तथोर्वशी विद्युच्छत्रु महाशंखः सहोमासं नयंत्यमी ४१ भगः स्फूर्जोऽरिष्टनेमिरूर्ण आयुश्च पं
चमः कर्कोटकः पूर्वचित्तिः पुष्यमासं नयंत्यमी ४२ त्वष्टा ऋचीकतनयः कंबलश्च तिलोत्तमा ब्र
ह्मापेतोथ शतजित् धृतराष्ट्र इषंभराः ४३ विष्णुरश्वतरो रंभा सूर्यवर्चाश्च सत्यजित् विश्वामित्रो म- पं॰
खापेत ऊर्जमासं नयंत्यमी ४४

नागः सहोमासं मार्गशीर्षं ४१ भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गंधर्वः ऊर्णो यक्षः आयुऋषिः कर्कोटको नागः ४२॥ राम
भ्वो॰ ८ ऋचीकतनयो जमदग्निः कंबलो नागः ब्रह्मापेतो राक्षसः शतजित् यक्षः धृतराष्ट्रो गंधर्वः इषंभराः आश्विनपाल्लकाः ४३ वि २६
ष्णुरादित्यः अश्वतरो नागः सूर्यवर्चा गंधर्वः सत्यजित् यक्षः मखापेतो राक्षसः ऊर्जमासं कार्त्तिकं ४४ श्रीरामः श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एते चादित्यादयः कौर्मे विभक्तोक्ताः धाताऽर्यमा च मित्रश्च वरुणश्चेन्द्र एव च विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च भगस्त्वष्टा च
विष्णुश्च आदित्या द्वादश स्मृताः १ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोऽथांगिरा भृगुः गौतमोऽथ भरद्वाजः कश्यपः क्रतुरेव
च जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः २ रथकृच्चौरिष्टनेमिर्ग्रामणीश्च रथस्वनः रथचित्रस्वनः श्रोताश्चारुण
सेनजित्तथा तार्क्ष्यश्चारिष्टनेमिश्च सतजिच्चान्यजित्तथा एते यक्षाः श्रुत्या हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा वर्यो व्याघ्रस्त
थापश्च वायुर्विद्युद्दिवाकरः ब्रह्मोपेतश्च विप्रेन्द्र यज्ञोपेतश्च राक्षसाः वासुकिः कच्छनीरश्च कच्छपः सर्पपुंगवः एलाप

एता भगवतो विष्णोरादित्यस्य विभूतयः स्मरतां संध्ययोर्नॄणां हरंत्यंहो दिने दिने ४५

त्रः शंखपालस्तथैरावतसंज्ञितः धनंजयो महापद्मस्तथा कर्कोटको द्विजाः कंबलोऽश्वतरश्चैव वहंत्येवं यथाक्रमं तुंबुरुर्नार
दो हाहा हुहूर्विश्वावसुस्तथा उग्रसेनो वसुरुचिर्विश्वावसुरथापरः चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः सूर्यवर्च्चा
द्वादशैते तिग्मधर्मा गायत्तांवराः क्रतुस्थल्यप्सरोवर्या तथान्या पुंजिकस्थली मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः
अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा रंभा चेति द्विजश्रेष्ठास्तथै
वाप्सरसः स्मृता इति ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टी० द्वा० एतेषां पृथक्कर्माणि निरूपयति द्वादशस्वपीति त्रिभिः असौ देवः सूर्यः षड्भिर्गंधर्वादिभिः अस्य जनस्य समंतात्चरन् शुभमा
मतिं तनुते गायन्त्यर्थानेन स्तुवन्ति ४६ तास्त्रिगोसूर्यप्रकाशकाः ४७ उन्नह्यंति दृढं बध्नंति ग्रामण्यो यक्षाः नैर्ऋता राक्षसाः
४८ किंच वालखिल्या इति एतेषु निमासेत एवं विभुं सूर्यं ४९ व्यूह्य विभज्य ५० इति द्वादशे एकादशः ११ छ छ छ

द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै चरन् समंतात्तनुते परत्रेह च सन्मतिं ४६ सामर्ग्यजुर्भिस्तल्लिंगै
ऋषयः संस्तुवंत्यमुं गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोऽग्रतः ४७ उन्नह्यंति रथं नागा ग्रामण्यो रथ
योजकाः नोदयंति रथं पृष्ठे नैर्ऋता बलशालिनः ४८ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयो मलाः पु
२३७ रतोऽभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ४९ एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः कल्पे कल्पे स्व
मात्मानं व्यूह्य लोकानवत्यजः ५० इति श्रीभागवते महापुराणे द्वादशस्कंधे एकादशोऽध्यायः ११ छ
सूत उवाच नमो धर्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सनातनान् १
एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितम् २ राम राम राम

द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः प्रथमस्कंधमारभ्य प्राधान्येन समासतः तदेवमस्मिन् पुराणोक्तानर्थान् संक्षेप राम
तो वर्णयिष्यन् धर्मादीन्प्रणमति नम इति महते हरिभक्तिलक्षणाय ब्राह्मणेभ्यः ब्राह्मणान् सनातनान् धर्मानित्युप ३७
लक्षणं पुराणोक्तार्थान् १ पुरुषैरुचितं श्रवणादियोग्यं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतत्प्रपंचयति अत्रेति भगवान् ऐश्वर्यादिषड्गुणः साक्षात् संकीर्तित इति देवताकांडार्थः २ ब्रह्मकांडार्थमाह अत्र ब्रह्मेति गुह्यं नि
र्गुणं प्रभवाप्ययं प्रभवत्यस्मादिति प्रभवं अप्येत्यस्मिन्निति अप्ययं एतद्वयं अनेनाश्रयशब्दार्थो दर्शितः विज्ञानसंयुतं अपरोक्षज्ञानपर्य
न्तं ज्ञानं तदुपाख्यानं तत्तु ज्ञानमुपाख्यायते प्रकाश्यतेऽनेन वचनं ज्ञानसाधनमित्यर्थः ४ कर्मकांडार्थमाह भक्तियोग असाध्यसा
धनरूपः तदाश्रयं भक्तियोगेन निष्पादितं एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधप्रकरणार्थाननुक्रामति पारिक्षितमुपा

अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः नारायणो हृषीकेशो भगवान्सात्वतांपतिः ३ अत्र
ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं ४ भक्तियोगः समाख्यातो वैराग्यं
च तदाश्रयं पारीक्षितमुपाख्यानं नारदाख्यानमेव च ५ प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः शुक
स्य चैव ब्रह्मर्षेः संवादश्च परीक्षितः ६ योगधारणयोत्क्रान्तिः संवादो नारदाजयोः अवतारानुगीतं च सर्गः
२ ब प्राधानिकोऽग्रतः ७ विदुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ८ ॥
ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ततो ब्रह्माण्डसंभूतिर्वैराजः पुरुषो यतः ९ ॥ श्रीराम श्री

ख्यानं परीक्षिज्जन्मादि तत्स्वरूपावायनारदाख्यानं च ५ ब्रह्मर्षेर्ब्राह्मणोत्तमस्य इति प्रथमस्कंधार्थः ६ उत्क्रांतिरर्चिरादिगतिः प्राधा
निकः प्रधानकार्यविराड्रूपः अग्रतः आदितः महदादिक्रमेणेत्यर्थः इति द्वितीयार्थः ७ महापुरुषस्य संस्थितिः प्रलये तु इत्यभव मी १
स्थानं ८ प्राकृतिकः प्रकृतिभवो गुणक्षोभरूपः वैकृतिका महदादयः चकारादिकोऽशाश्रयेन्नयोस्तेषां च सर्गः ९ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० गतिः स्वरूपेणोद्धरणं १० अधर्मेणानारीचनरस्वातन्त्र्यम्११ संतानो धर्मेणोक्ता हितानां पत्नीनामितिनवब्रह्मसमुत्पत्तिरित्यस्यानन्तरं द्रष्टव्यं १२
१३ चतुर्थस्कंधार्थमाह नवब्राह्मणां मरीच्यादीनां समुत्पत्तिः संतानः १४ पंचमस्कंधार्थमाह ततः प्रैयव्रते प्रियव्रतस्य चरिते १५॥
द्वीपाब्धुपवर्णनं प्रथमं संक्षेपतः ततो द्वीपादीनां येगिरयो नद्यश्च तेषामुपवर्णनं पातालनरकादीनां च स्थितिः अनेने वनरक॥

कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः भुवनुद्धारोऽम्भोधेर्हिरण्याक्षवधोयथा १० ऊर्द्ध्वतिर्यगवाक्
सर्गो रुद्रसर्गस्तथैव च अर्द्धनारीनरस्याथ यतः स्वायंभुवो मनुः ११ शतरूपाचया स्त्रीणामाद्या प्रकृतिरुत्तमा
संतानो धर्म्मपत्नीनां कर्द्दमस्य प्रजापतेः १२ अवतारो हि देवस्य कपिलस्य महात्मनः देवहूत्याश्च संवादः कपि
लेन च धीमता १३ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः १४ ना
रदस्य च संवादस्ततः प्रैयव्रतं द्विज नाभेस्ततोनुचरितमृषभस्य भरतस्य च १५ ततो द्वीपसमुद्राद्रिवर्षव
र्षोपवर्णनं ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः १६ दक्षजन्मप्रचेतोभ्यस्तत्पुत्रीणां च संततिः
यतो देवासुरनरास्तिर्यङ्नगखगादयः १७ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्च दितेर्द्विजाः १८ दैत्येश्वरस्य च
रितं प्रह्रादस्य महात्मनः १८ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं मन्वंतरावताराश्च विष्णोर्हयशिरा

निवर्त्तकमस्ज्ञामित्योपाख्यानं गृहीतं ततः पराचीनं १६ षष्ठार्थमाह दक्षजन्मेति १७ सप्तमार्थमाह पुत्र्योश्चेति १८॥ राम
अष्टमार्थमाह मन्वंतरानुचरितमिति क्वचित्कस्यचिदनुक्तिः शुक्रमोक्तिश्च भक्तिरसानुकूलत्वेनेति द्रष्टव्यं १९॥ ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० नवमार्थमाह राजवंशेति २१ सोमवंशादिभूतस्यैलचरितं २२ २३ २४ २५ तत्सुतस्य भीष्मस्य २६ २७ दशमार्थमाह तस्य कर्माणि

कौर्म्यं मात्स्यं नारसिंहं वामनं च जगत्पतेः क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां १७ देवासुरं महायुद्धं राजवंशानुकीर्त्तनं इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः १८ इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च सूर्यवंशानुकथनं शशादाद्या नृगादयः १९ सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः खट्वांगस्य च मांधातुः सौभरेः सगरस्य च २० रामस्य कोशलेंद्रस्य चरितं किल्बिषापहं निमेरंगपरित्यागो जनकानां च संभवः २१ रामस्य भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च २२ दौष्यंतेर्भरतस्यापि शंतनोस्तत्सुतस्य च ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोनुकीर्त्तितः २३ यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले २४ तस्य कर्माण्यपाराणि कीर्त्तितान्यसुरद्विषः पूतनासुपयःपानं शकटोच्चाटनं शिशोः २५ तृणावर्त्तस्य निष्पेषस्तथैव बकवत्सयोः धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः २६ गोपानां च परित्राणं दावाग्नेः परिसर्पतः दमनं कालियस्याहेर्महाहेर्नंदमोक्षणं २७ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनं २८ गोवर्द्धनोद्धरणं च शक्रस्य सुरभेरथ यज्ञाभिषेकः कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु २९ शंखचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ३० व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः गजमुष्टिकचाणूरकंसादीनां च यो वधः मृतस्यानयनं सूनोः पुनः सांदीपनेर्गुरोः ३१ मथुरायां निवसता यदुचक्रस्य यत्प्रियं कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ३२ जरासंधसमानीतसैन्यस्य बहुशो वधः घातनं यवनेंद्रस्य कुशस्थल्या निवेशनं ३३ ब

ति पूतनायाश्चासुसहितस्य स्तन्यपयसः पानं २८ सहभ्रातुः ससखस्य २९ ३१ यज्ञाभिषेकं यज्ञः पूजाश्चाभिषेकश्च तयोर्द्वंद्वं ३२ ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द्वा० द्विषतः शत्रून्प्रमथ्य ३७ ३८ ये च शंबरादयस्तेषां ३९ माहात्म्यं प्रभावः ४१ एकादशार्थमाह विप्रशापेति धर्मविनिर्णयः वर्णाश्रमधर्म
निश्चयः ४१ मर्त्यपरित्यागः मनुष्यत्वस्यादर्शनं ४२ द्वादशार्थमाह युगेति युगलक्षणं तदनुरूपा वृत्तिश्चेत्यर्थः त्रिविधा प्राकृतिकी
नैमित्तिकी नित्या चेति ४३ ऋषेर्व्यासस्य सूर्यस्य च विन्यास इत्यर्थः ४४ इति चोक्तमिति चकारादन्यदपि वः युष्माभिरिह यत्पृष्टो
ऽस्मि तदुक्तमिति किमेवं नानार्थकथनेन तत्राह लीलेति सर्वशः तत्तदर्थकीर्तनद्वारेणेत्यर्थः ४५ तत्कीर्तनेनापि किमित्यपेक्षा

आदानं पारिजातस्य सुधर्मायाः सुरालयात् रुक्मिण्याहरणं युद्धे प्रमथ्य द्विषतो हरेः ३७ हरस्य जृंभणं युद्धे बाणस्य
भुजकृंतनं प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ३८ चैद्यपौंड्रकशाल्वानां दंतवक्त्रस्य दुर्मतेः शंबरो द्विविदः
३९ पीठो मुरः पंचजनादयः ३९ माहात्म्यं च वधस्तेषां वाराणस्याश्च दाहनं भारावतारणं भूमेर्निमित्तीकृत्य पांडवा
न् ४० विप्रशापापदेशेन संहारः स्वकुलस्य च उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः ४१ यत्रात्मविद्या ह्य-
खिला प्रोक्ता धर्मविनिर्णयः ततो मर्त्यपरित्याग आत्मयोगानुभावतः ४२ युगलक्षणवृत्तिश्च कलौ नृणामुप
त्रि ४ प्लवः चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ४३ देहत्यागश्च राजर्षेर्विष्णुदत्तस्य धीमतः शाखाप्रणयनमृषेर्मा
र्कंडेयस्य सत्कथाः महापुरुषविन्यासः सूर्यस्य जगदात्मनः ४४ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोहमिहास्मि वः
लीलावतारकर्माणि कीर्तितानीह सर्वशः ४५ पतितः स्खलितो वार्तः क्षुत्वा वा विवशो ब्रुवन् हरये नम इत्युच्चै
र्मुच्यते सर्वपातकात् ४६ संकीर्त्यमानो भगवाननंतः श्रुतानुभावो व्यसनं हि पुंसां प्रविश्य चित्तं विधुनोत्य
शेषं यथा तमोर्कोभ्रमिवातिवातः ४७

यंतत्फलमाह द्वाभ्यां पतितः कूपादिषु स्खलितः सोपानादिषु आर्तः दुःखितः क्षुत्वा क्षुतं कृत्वा विवशोपि ४६ संकीर्त्यमानः श्र राम
ुतोऽनुभावो यस्य स पुंसां चित्तं प्रविश्य निःशेषं दुःखं विधुनोतीति हीति सतामनुभवं प्रमाणयति आर्को गिरिगुहादिध्वांतं न ३९
निवर्तयतीत्यपरितोषाद्दृष्टांतांतरमाह अतिवातोऽभ्रमिवेति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिकीर्त्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपंचयति मृषागिर इति चतुर्भिः मृषागिरः मिथ्यावाचः असतीः अ
सत्यः असत्कथाः या सुताः यत्र या सु उत्तमश्लोकस्य यशोऽनुगीयते इति यत् तदेव सत्यं तदेव हि मंगलं ह इति हर्षे भगवद्गुणानाम
भ्युदयाय स्मात् तत् ४८ नवं नवं यथा भवति तथा रुचिरं रुचिप्रदं महानुत्सवाय स्मात् ४९ चित्राणि पदानि यस्मिन् तदपि जग
त्पवित्रयतीति तथा तद्धरेर्यशो न प्रगृणीत न वर्णयेत् तद्वचः ध्वांक्षतीर्थं काकतुल्यनराणां रतिस्थानं न तु हंसैर्ज्ञानिभिः सेवितं
तत्र हेतुः यत्रेति ५० स वाग्विसर्गः स एव वाचो प्रयोगः जनताघसंप्लवः जनसमूहाघनाशकः यद्यस्मात् तानि अन्यैः कीर्त्यमानानि ॥

मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः तदेव सत्यं तदु हैव मंगलं तदेव पुण्यं भगवद्गुणोदयं ४८ तदेव रम्यं
रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवं तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकगुणानुगीयते ४९ न तद्वचश्चित्रप
दं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् तद्ध्वांक्षतीर्थं न तु हंससेवितं यत्राऽच्युतस्तत्र हि साधवोऽमलाः ५० स वा
ग्विसर्गो जनताघसंप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्य यशोंकितानि यत् शृण्वंति गायंति गृणं
ति साधवः ५१ नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं
कर्म यदप्यनुत्तमं ५२ यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु अविस्मृतिः श्रीधरपादपद्म
योर्गुणानुवादश्रवणादिभिर्हरेः ५३

शृण्वंति श्रावयंति गायंति ते नो चेत् स्वयमेव गृणंति ५१ इदानीं ज्ञानकर्म्मादरादपि भगवत्कीर्त्तनादिष्वादरः कर्त्तव्य इत्याह नैःकर्म्य
ब्रह्मतत्प्रकाशकं यत् ज्ञानं यतो निरंजनं उपाधिनिवर्त्तकं तदप्यच्युतभक्तिवर्जितं चेत् न शोभते नापरोक्षपर्यंतं भवतीत्यर्थः ईश्वरे न
चेदर्पितं तर्हि यदनुत्तमं सर्वोत्तममपि कर्म तदपि पुनः कुतः शोभते यतः शश्वत्साधनकाले च अभद्रं दुःखात्मकं ५२ किंच व
र्णाश्रमाचारादिषु यः परो महान् परिश्रमः स यशःश्रियामेव कीर्त्तिः संपत्तिः केवलं न परः पुरुषार्थ इत्यर्थः गुणानु
वादादिभिः श्रीधरपादपद्मयोरविस्मृतिर्भवति ५३

फलकाले २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः किमत आहा अविस्मृतिरिति क्षिणोति नाशयति ५४ अथेदानीं श्रोतॄनृषीनात्मानं चाभिनंदन्नाह यूयमिति द्वाभ्यां हे द्विजाग्र्याः यद्य
स्मात् आत्मन्यंतःकरणे श्रीनारायणं आविवेश्य शश्वद्भजत संभावनायां लोट् अतो भूरिभागाः बहुपुण्याः कथंभूतं अखिलात्मभू
तं सर्वनियामिनं अत एव देवं सर्वोपास्यं अदेवं न देवोऽन्यो यस्य तं कुतः ईशो यद्वा यस्मात् यूयं भूरिभागाः तप आदिसंपन्नाः ततो

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं
५४ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ५५ मदेव १
अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां
च शृण्वतां ५६ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ५७ य एवं
श्रावयेन्नित्यं यामक्षणमनन्यधीः श्रद्धावान्योऽनुशृणुयात् पुनात्यात्मानमेव सः ५८ द्वादश्यामेकादश्यां वा
५० ४ ता शृण्वन्नायुष्यसंहितामेतां पठित्वा मुच्यते भयात् ६० देवता मुनयः सिद्धाः पितरो मनवो नृपाः यच्छंति कामान् गृ
णतः शृण्वतो यत्र कीर्तनात् ६१ ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते मधुकुल्याः घृतकुल्याः पयःकुल्या
अतत्फलं ६२ पुराणसंहितामेतामधीत्य प्रयतो द्विजः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६३ विप्रो-
धीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ६४ [illegible]

नारायणं भजतेति विधिः ५५ मे मया श्रुतं ५६ एतत्पुराणकीर्तनादिफलं प्रपंचयितुमाह एतद्व इत्यष्टभिः ५७ यामं क्षणं वे गम
त्यर्थः आत्मानमेव साक्षात्तु नातिनतु स्नात्वा दिवेहं हमात्रं ५८ ६१ ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फल- ४०
मेतां पठित्वा अनुविंदत इति ६२ किं च प्रोक्तमिति ६३ राजन्यस्तु उदधिमेखलां पृथ्वीं संधिराष्पः ६४

वान्भवेत् ॥ पठत्स्य नश्यनून्भयनरूतोभवस्यपातकी ॥ पुष्करे मथुरायां च द्वारवत्यां यतो सवान् ॥ उपोष्य ४

अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह कलिमलानां संहतिं समूहं कालयति विनाशयतीति तथाऽन्यत्र शास्त्रांतरे ६५ शास्त्रप्रतिपा
दितं भगवंतं नमस्करोति नमितिद्वाभ्यां जगदुदयस्थितिसंयमात्मनो रजआद्याः शक्तयो यस्य तं द्युपतिभिर्हैर्वैरपि दुरवसितं अज्ञातः
स्तवः स्तोत्रं यस्य तं ६६ उपचिताभिः उक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्वस्यात्मन्येवापरचितं=
स्थिरजंगमं चालयो यस्य तस्मै भगवते ६७ श्रीगुरुं नमस्करोति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोऽन्यस्मिन्
भावो यस्य तथाभूतोऽपि अजितस्य रुचिराभिर्लीलाभिः आकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशं श्रीभागवतं कं

कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनु
पदं कथाप्रसंगैः ६५ तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दु
रवसितस्तवमच्युतं नतोऽस्मि ६६ उपचितनवशक्तिभिः स्वआत्मन्युपरचितस्थिरजंगमालयाय भगवत उ
पलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ६७ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरली
लाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ६८ इति द्वादशे
द्वादशोऽध्यायः सूत उवाच यं ब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं
सामगाः ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः १

यो व्यतनुत तं नतोऽस्मीति ६८ द्वादशे द्वादशः सर्वपुराणसंख्यादीननुपवर्णयिष्यन् तत्प्रतिपाद्यं देवं प्रणमति यमिति स्तु
वैवैदै[illegible]स्तुन्वंति स्तावंति उपनिषच्छब्दस्याकारांतत्वं छंदोनुरोधेन ध्यानेनावस्थितं निश्चलं तद्गतं यन्मनस्तेन यस्यांतं न वि
दुः सुरासुरगणाः १
तुमन[illegible]

CC-0. In Public Domain.Kavikulguru Kālidas Sanskrit University Ramtek Collection

ततः किमत आह। अविस्मृतिरिति क्षिणोति नाशयति ५४ अथेदानीं श्रोतॄणामात्मानं चाभिनंदन्नाह यूयमिति द्वाभ्यां हे द्विजाग्र्याः यूय
स्मात् आत्मन्यंतःकरणे श्रीनारायणं आविवेश्य शश्वदजस्रं संभावनायां लोट् अतो भूरिभागाः बहुपुण्याः कथंभूतं अखिलात्मभू
तं सर्वांतर्यामिणं। अतएव देवं सर्वोपास्यं अदेवं न देवोऽन्योपास्यस्तत् कुतः ईशो यद्वा यस्माद्यूयं भूरिभागाः तपआदिसंपन्नाः ततो

अविस्मृतिः कृष्णपदारविंदयोः क्षिणोत्यभद्राणि शमं तनोति च सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं
५४ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं नारायणं देवमीशमजस्रभावा भजताविवेश्य ५५ मदेव २
अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात् प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां
च शृण्वतां ५६ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ५७ य एवं
श्रावयन्नित्यं यामक्षणमनन्यधीः श्रद्धावान्योऽनुशृणुयात् पुनात्यात्मानमेव सः ५८ द्वादश्यामेकादश्यां वा
४० ४ ता शृण्वन्नायुष्यं संहितामेतां पठित्वा मुच्यते भयात् ६० देवता मुनयः सिद्धाः पितरो मनवो नृपाः यच्छंति कामान् गृ
णतः शृण्वतो यस्य कीर्तनात् ६१ ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते मधुकुल्या घृतकुल्याः पयःकुल्या
श्च तत्फलं ६२ पुराणसंहितामेतामधीत्य प्रयतो द्विजः प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत् ६३ विप्रो=
ऽधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलां वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ६४ [illegible]

नारायणं भजतेति विधिः ५५ मे मया श्रुतं ५६ एतत्पुराणकीर्तनादिफलं प्रपंचयितुमाह एतद्व इत्यष्टभिः ५७ यामं क्षणं वे गम
त्यर्थः आत्मानमेव साक्षात्पुनाति न तु स्नानादिवद्देहमात्रं ५८ ६१ ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते तत्फल= ४०
मेतां पठित्वा अनुविंदत इति ६२ किंच प्रोक्तमिति ६३ राजन्य उदधिमेखलां पृथ्वीं सर्वाधिराधिपः ६४

वान् भवेत् ॥ पठत्यनश्नन् प्रयतस्ततो भवत्यपातकी ॥ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्य पुराणस्यैवं प्रभावातिशये कारणमाह कलिमलानां संहतिं समूहं कालयति विनाशयतीति तथा इतरत्र शास्त्रान्तरे ६५ शास्त्रप्रतिपा
दितं भगवंतं नमस्करोति तमिति द्वाभ्यां जगदुदयस्थिति संयमात्मानो रजआदयः शक्तयो यस्य तं द्युपतिभिर्देवैः पि दुरवसितः अज्ञातः
स्तवः स्तोत्रं यस्य तं ६६ उपचिताभिः उक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्व आत्मन्येवोपरचितं-
स्थिरजंगमं चालयो यस्य तस्मै भगवते ६७ श्रीगुरुं नमस्करोति स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तोऽन्यस्मिन्
भावो यस्य तथाभूतोऽपि अजितस्य रुचिराभिर्लीलाभिः आकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशं श्रीभागवतं कं

कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णं इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनु
पदं कथाप्रसंगैः ६५ तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं द्युपतिभिरजशक्रशंकराद्यैर्दु
रवसितस्तवमच्युतं नतोऽस्मि ६६ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय भगवत उ
पलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ६७ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरली
लाकृष्टसारस्तदीयं व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ६८ इति द्वादशे
द्वादशोऽध्यायः सूत उवाच यं ब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं
सामगाः ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः १

...तोऽव्यतनुत नतोऽस्मीति ६८ द्वादशे द्वादशः सर्वपुराणसंख्यादीनुपवर्णयिष्यन् तत्प्रतिपाद्यं देवं प्रणमति यमिति स्त
...स्तुन्वंति स्तुवंति उपनिषच्छब्दस्याकारांतत्वं छंदोनुरोधेन ध्यानेनावस्थितं निश्चलं तद्गतं यन्मनस्तेन यस्यांतं न वि
दुः सुरासुरगणाः १

CC-0. In Public Domain.Kavikulguru Kâlidas Sanskrit University Ramtek Collection

यनादेहोदुर्ज्ञेयत्वमेव प्रदर्शयितुं कूर्म्मावतारमनुस्मारयन्नाशिषं प्रार्थयते पृष्ठे भ्राम्यन्नुच्चं मंदरगिरिष्ठो मंदरगिरिस्तस्य ग्रावा
पाषाणास्तैः कंडूयनात् तेन सुखेन निद्रालोः निद्राशीलस्य यस्य श्वासानिलानां संस्कारास्तेषां कला अंशलेशाः तदनुवर्त्तनेन
शात् जलनिधेरंभसां यातायातं न विश्राम्यति ननु समुद्रक्षोभादि च तत्संस्कारवशात् तत्राह वेलाक्षोभस्तस्य निभेन
मिषेण २ पुराणसंख्यास्तासां संभूतिं समाहारं च अस्य तु श्रीभागवतस्य वाच्यविषयः प्रयोजनं च दानं च तस्य पाठादेश्च माहात्म्यं च निबोधत ३

२। पृष्ठे भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतःश्वासानिलाः पांतु वः यत्संस्कारकलानुवर्त्तनवशाद्वेला
निभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति १ सूत उवाच पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने दानं दान
४१ स्य माहात्म्यं पाठादेश्च निबोधत २ ब्राह्मं दश सहस्राणि पाद्मं पंचोनषष्टि च श्रीवैष्णवं त्रयोविंशत् चतुर्विंशति शैवकं ३ दशाष्टौ
श्रीभागवतं नारदं पंचविंशतिः मार्कंडं नव वाह्नं च दश पंच चतुःशतं ४ चतुर्दश भविष्यं स्यात्तथा पंचशतानि च दशाष्टौ ब्र
ह्मवैवर्त्तं लिंगमेकादशैव तु ५ चतुर्विंशति वाराहमेकाशीति सहस्रकं स्कांदं शतं तथा चैकं वामनं दश कीर्त्तितं ६ कौर्म्मं सप्तद
शाख्यातं मात्स्यं तत्तु चतुर्दश एकोनविंशत्सौपर्णं ब्रह्मांडं द्वादशैव तु ७ एवं पुराणसंदोहश्चतुर्लक्ष उदाहृतः तत्राष्टादशसा
५४ ने३ हस्रं श्रीभागवतमिष्यते ८ इदं भगवता पूर्वं ब्रह्मणे नाभिपंकजे स्थिताय भवभीताय कारुण्यात्संप्रकाशितं ९ आदिम
ध्यावसानेषु वैराग्याख्यानसंयुतं हरिलीलाकथाव्रातामृतानंदितसत्सुरं १० सर्ववेदांतसारं यद्ब्रह्मात्मैकत्वलक्षणं व
स्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनं ११ प्रौष्ठपद्यां पौर्णमास्यां हेम[illegible]सिंहसमन्वितं ददाति यो भागवतं स याति परमां ४१

१द्राति: त्रयोविं ४ चतुर्विंशतिसहस्राणि शैवके शिवपुराणे ४ वाह्नं तु अग्निपुराणं दश पंच सहस्राणि चत्वारि शतानि ५ ६ स्कांदं शताधिके काशीतिसहस्रं
७ सौपर्णं गरुडपुराणं एकोनविंशत् एकोनविंशति ८ महाभारतं त्वितिहासः रामायणं च ऋषिप्रोक्तं काव्यं अतः पुराणानां संदोहः समूहश्च
तुर्लक्षसंख्याक एव इदानीमस्य वाच्यप्रयोजनादीन् दर्शयितुमाह तत्र स्यादिना ९ १० हरिलीलाकथानां व्रातः समूहः स एवामृ
तेनानंदिताः संतः सुरा यस्मिन् तत् ११ तन्निष्ठं तद्विषयं १२ प्रौष्ठपद्यां भाद्रपद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनान्वितं १३ ८७ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्रसएवामृतं तेनात्मतृप्तस्य निर्वृतस्य १५ १७ पारमहंस्यं परमहंसैः प्राप्यं नैष्कर्म्यं सर्वकर्मोपरमः भक्त्यान तत्श्रवणादि परो विमुच्यते १८ श्रीभाग
वतसंप्रदायप्रवर्त्तकरूपेण भगवज्ज्ञानलक्षणं मंगलमाचरति कस्मैयेनेति अतुलः असमः अयं श्रीभागवतरूपः पुराकल्पादौ तद्रूपेण ब्र
काय२ ह्मरूपेण तद्रूपिणा नारदरूपिणा योगींद्राय तदात्मना शुकरूपेण तत्परं सत्यं श्रीनारायणाख्यं तत्त्वं धीमहीति १९ गायत्र्यैव यथोपक्र प्र ४
मेसुपसंहरन् गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति तमेव देवतारूपेण गुरुरूपेण च प्रणमति नमइति भोः चक्षुर्व्याख्यातवान् २० २३

४२ राजंते तावदन्यानि पुराणानि सतां गणे यावद्भागवतं पुण्यं श्रूयते मृतसागरं १४ सर्ववेदांतसारं हि श्रीमद्भागवतमिष्यते ॥
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् १५ निम्नगानां यथा गंगा देवानामच्युतो यथा वैष्णवानां यथा शंभुः ॥
पुराणानामिदं तथा १६ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः १७ श्रीमद्भा
गवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते यत्र ज्ञानविरागभक्तिसहितं नैष्क
र्म्यमाविष्कृतं तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः १८ कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पु
रा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा योगींद्राय तदात्मनाऽथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोक
ममृतं सत्यं परं धीमहि १९ नमस्तस्मै भगवते वासुदेवाय साक्षिणे य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे २० योगींद्राय
नमस्तस्मै शुकाय ब्रह्मरूपिणे संसारसर्पदष्टं यो विष्णुरातममूमुचत् २१ भवे भवे यथा भक्तिः पादयोस्तव जायते तथा कुरु ४२
५१ यांगेशनाथ त्वमेव यतः प्रभो २२ नामसंकीर्तनं यस्य सर्वपापप्रणाशनं प्रणामो दुःखशमनस्तं नमामि हरिं परं २३ इति श्री
भागवते म० द्वादशस्कंधे सूतोक्तत्रयोदशोऽध्यायः ॥ ७ ॥

भावार्थदीपिकामेतां भगवद्भक्तवत्सलां श्रीपरानंदपादाब्जभृंगः श्रीः श्रीधरोऽकरोत् ४२
स्ववाकूचपलालापैः खलीलापरिनर्तितैः प्रीयतां परमानंदो हरिः सद्गुरुः स्वयं श्रीनंदसंप्रीत्यै गुरुं भागवतं मयात्मनेनेदमा
ख्यातं नतु मन[illegible] भवात् इति श्रीभावार्थदीपिकायां श्रीधरस्वामिविरचितायां द्वादशस्कंधे त्रयोदशोऽध्यायः ॥ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीभागवतद्वादशस्कंधेसमाप्तं श्रीराम श्रीराम
हस्ताक्षरमुकुंदभट्टरावेकेवासनवव श्रीराम श्रीराम
त्सेगुल्म॥शाके १७०९ प्लवंगनामा॥ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागवतएकादशस्कंधः
प्रारंभः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॐनमः श्रीपरमहंसस्व(रा)हितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामाय।
विजयंतेपरानंदकृष्णपादरजःस्रजः याधृतामूर्ध्निजायंतेमहेंद्रादिमहःस्रजः १ ॐनेकत्रिंशतोध्याये
मुक्तिरेकादशेततः जायंतेयेतिहासोद्ये समासव्यासनृपतेः २ नारदोवसुदेवायसमासेनव्यवर्णयत् ॥
भगवानुद्धवायार्थविस्तरेणोपपत्तिभिः तत्रतुप्रथमेध्यायेयदुवंशस्यसंक्षयः उपक्षिप्तोविरागायमौस ५
लव्यपदेशतः ४ प्रवृत्तितः परानंदकृष्णक्रीडानुवर्णिता तन्निवृत्त्यापरानंदपदारोहोनुवर्ण्यते ५ एवं
तावद्दशमस्कंधेभूभारावतारणाय निजविभूतिविभूषितयदुवंशस्ययदुवंशावतारितसकलसुरांश
स्यभगवतः श्रीकृष्णस्यतदुचितप्रवृत्तिविडंबनेनतच्छ्रवणस्मरणादिपराणांपरेषामानंदकारणं क्रीडा
निरूपिता अथेदानीमुपरमितयोगमायावैभवस्यभक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थंभूतलेअव
तारितानांचाधिकारिणांसुरांशानांमौसलापदेशेनतत्तदधीकारिपदप्रापणपूर्वकंचब्रह्माद्यनुग्रहा
यनिजपदारोहोनिरूप्यते तत्रकुरुक्षेत्रयात्रायामविरक्तस्यैकर्मणाकर्मनिर्हारोयथास्यात्तत्तदुच्यते
मित्येवंकर्मयोगंपृष्टवतो नारदादिभिःकर्मयोगोनिरूपितः कर्मणांनिर्हारएषसाधुनिरूपितः य
च्छ्रद्धयाप्तविन्तेनशुक्लेनेज्येतपुरुषइत्यादिनातेनचविशुद्धसत्वस्यश्रीकृष्णरामौपरमेश्वरत्वेनज्ञा
तवतः षड्भीनयना ध्यायश्रीकृष्णेनात्मतत्त्वमुपदिष्टं वेदावःसमेवतार्थंतोतेतदुपमन्येहेयन
पुत्रान्समुद्दिश्यतत्त्वग्रामउदाहृतइत्यादिना तच्चविषयभोगातिशयेनपुनस्तिरोहितमासीत् तदे
वेदानीं नारदमुखेनप्रथमे पंचाध्यायानिरूप्यते ॥ राम राम राम राम राम राम राम

ह
वसुदेवस ६
८
राम
१
कर्म

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० एका० तत्र तु प्रथमे ध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापव्यपदेशेनात्मनैव विषयसुखानामप्यनित्यताप्र
तिपाद्यते ततश्चतुर्भिर्निमिजायन्तेयसंवादेन सपरिकरपरमतत्त्वनिरूपणं ततः षष्ठे भगवदुद्धवसंवा
दप्रस्तावः ततस्त्रयोविंशत्याउद्धवंप्रतिभगवतस्तत्वनिरूपणं ततो द्वाभ्यां मौसलक्रीडेत्येवमेकत्रिं
शताध्यायैरेकादशस्कंधस्य प्रवृत्तिः तत्र यथामति व्याख्यानमारभ्यते तत्र मौसलप्रसंगार्थं प्र
वेशकाध्यायमनुवदति श्लोकद्वयेन कृत्वेति अवतारयत् अवतारयदित्यडागमो द्रष्टव्यः अविघ्नेन ग
पर्यस्ता १ वत्तरं अतिशीघ्रं हिंसायिनमित्यर्थः कलिं कलहं १ एतद्धि [illegible]णा तियेकोपिताइति सपत्नैर्दुर्यो

बादरायणिरुवाच कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः भुवोवतारयद्भारं जवि
ष्ठं जनयत्कलिं १ ये कोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभि
स्तान् कृत्वा निमित्तमितरेतरतः समेतान् हत्वा नृपान्निरहरत्क्षितिभारमीशः २

धनादिभिः कोपिताः कोपं कारिताः सुबहु यथा भवति तथा बहुवारानित्यर्थः तदेवाह दुर्द्यूतहेलन
कचग्रहणादिभिरिति दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्ष
णं एतानि आदिर्येषां गरदानजतुगेहदाहादीनां तैः कोपिताः तान्पांडुसुतान्निमित्तं कृ
त्वा इतरेतरतः उभयोः पक्षयोः समेतान्मिलितान्नृपान्हत्वा क्षितिभारं निरहरत् जहार यद्वा के
ये कोपिताः ये च कोपिताः तान् इतरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः एतावत्प्रकटं दैत्याः पूत
नादयः तान्स्वयमेव हतवान् यतु दैत्या बाधवच्छन्नाः स्थिताः तान्परस्परं निमित्तं विधाय हत्वा भूभा ९३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी

एका॰ अपि च भूभारेत्यादि अन्याः भुवो भारभूता राजपृतनाः राज्ञां पृतनाः सेनाः राज्ञस्तेषां पृतना अरित्रिया स्व
बाहुभिर्गुप्तैः परिरक्षितैर्यदुभिर्विवाहादिच्छत्वेन निरस्य हत्वा बाहुभिरिति बहुवचनेनैवस्कत अनु भुजाभि
प्रायेण नन्वेवं कृष्णमभिकीर्षता तीर्त्वा कथं तेभ्यो यादवानद्रुह्यदित्यत आह अप्रमेयः प्रमातुमशक्यः
चिन्तामाह मन्य इति नन्विति वितर्के अवनेर्भूमेर्भारोऽयं यद्यपि लोकप्रतीत्यागतः तथाप्यहमगतमेव मन्ये
यद्यस्मात् अविषह्यं सोढुमशक्यं यादवकुलमित्यनेनैव स्ववंशत्वात्स्वयं हननमनुचितमिति स्थितिः

भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिन्तयदप्रमेयः । मन्येऽवनेर्न नु गतोऽप्य
गतं हि भारं यद्यादवं कुलमहो अविषह्यमास्ते ॥२॥ नैवान्यतः परिभवोऽस्य भवेत्कथंचि
२ न्मत्संश्रयस्य विभवोन्नहनस्य नित्यं । अन्तः कलिं यदुकुलस्य विधाय वेणुस्तंबस्य
वह्निमिव शान्तिमुपैमि धाम ॥४॥ एवं व्यवसितो राजन्सत्यसंकल्प ईश्वरः शापव्याजे
न विप्राणां संजह्रे स्वकुलं विभुः ॥५॥

ते ॥३॥ तर्हीदमप्यन्यैर्घात्यतां तत्राह नैवेति अन्यतो देवादिभ्योऽपि यादवकुलस्य परिभवस्ति राम
रस्कारो न भवेत् कुतः मत्संश्रयस्य मां संश्रयत इति मत्संश्रयं कुलं तस्य किंच नित्यं विभवोन्नहन २
स्य विभवैर्गजतुरंगादिभिः रुद्धस्य उच्छृंखलस्य यद्वा तर्हीदं किमिति संहर्तव्यं तत्राह विभवोन्नहनस्येति
तस्मादेवं करिष्यामीत्याह अन्तः कलिमिति शान्तिमुपशममुपैमि वर्तमानसामीप्ये वर्तमानवद्वा न
उपैष्यामि तदनन्तरं धाम चैवकुण्ठाख्यमुपैष्यामीत्यर्थः व्यवसितः कृतनिश्चयः संजह्रे उपसंहृतवान् ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमवतारप्रयोजनं सर्वं संपाद्य स्वं लोकं जगामेत्याह श्लोकद्वयेन स्वमूर्त्येति लोकानां लावण्यस्य निर्मुक्तिस्त्यागो यया यामपेक्ष्य लोकेषु लावण्यं नास्तीत्यर्थः यद्वा लोकेभ्यो लावण्यस्य निर्मुक्तिर्दानं यतः यत्संपर्केण लोका लावण्यवन्तो भवन्तीत्यर्थः तया स्वमूर्त्या नृणां लोचनमाच्छिद्य आकृष्य तदन्यस्यावलोकने लोचनस्याप्रवृत्तेः तथा स्वगीर्भिस्ता गिरः स्मरतां चित्तं चाच्छिद्य तथा पदैस्तत्र तत्राङ्कितैस्तानि पदानीक्षतामीक्षमाणानामन्यत्रागमनादिकाः क्रियाश्चाच्छिद्य तदानीन्तनानां सर्वेषां चक्षुरादिप्रवृत्तेः स्वैकनिष्ठाः कृत्वेत्यर्थः ६

स्वमूर्त्या लोकलावण्यनिर्मुक्त्या लोचनं नृणां गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीक्षतां क्रियाः ६
आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यञ्जसा नु कौ तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वरः ७
राजोवाच ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां ८ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ९

किंच इतउपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां सुश्लोकां कवीनां यस्यां तां स्वकीर्तिं वितत्य विस्तार्य अनया कीर्त्या अञ्जसा सुखेनैव नु निश्चितं तमस्तरिष्यन्तीत्यभिप्रेत्य ईश्वरः स्वं पदं स्थानमगादिति ७ अब्रह्मण्येभ्यः अदातृभ्यो वा असेवकेभ्यो वा विप्राः कुप्यन्ति कृष्णमयत्वेन न तथेत्याह ब्रह्मण्यानामित्यादिना कोपे जातेपि कृष्णचेतसां कथमभूत्कथं प्रादुरभूदित्यर्थः ८ अतः स्पष्टस्य निमित्तस्याभावान्निमित्तान्तरं पृच्छति यन्निमित्त इति एकात्मनामेकचित्तानां कथं भेदः कलहः ९ रामं राम

अं २

किंच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६

भा०ए० इश्वरेणैवात्र निमित्तमितिपरिहरति बिभ्रदिति सकलानां सुंदरवस्तूनां संनिवेशो विन्यासविशेषो यस्मिन् तद्
वपुर्बिभ्रत् तर्हि किमतिसौंदर्योद्विषयपरः न सुमंगलं कर्माचरन् तर्हि किं कयापि कामनया न आप्तकामः तर्
म २ हि किमिति कर्माचरति धामद्वारवत्याख्यं गृहमास्थाय रममाणः गृहे रममाणात्कर्मैयाहयितुमित्यर्थः ननु
र २ किमाप्त[...]कामस्य गृहे त्याकर्मेभिवांतत्राह उदारकीर्तिर्बहुफलप्रदा कीर्त्तिर्यस्य सः कीर्तिवितानार्थमित्य
र्थः एवंपरमैश्वर्येण वर्त्तमान एव कुलं संहर्तुं मैच्छत् तत्कस्य हेतोः स्थित इति कृत्यभूभारहरणशेषायस्य सः १०
ईश्वरेच्छयाल्लिंतब्रह्मशापनिमित्तं वक्तुमाह कर्माणीति कर्मार्थमाहृताः कर्माणि कृत्वा निसृष्टा मुनयो पिंडा

शुक उवाच विभ्रद्वपुः सकलसुंदरसंनिवेशं कर्माचरन् भुवि सुमंगलमाप्तकामः आस्थाय
३ धाम रममाण उदारकीर्त्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः १० कर्माणि पुण्यनिवहानि
सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा कालात्मना निवसता यदुदेवगेहे पिंडारकं
समगमन्मुनयो विसृष्टाः ११

रकं समगमन्नित्यन्वयः निसृष्टाः प्रस्थापिताः पूर्वोक्तामुदारकीर्तिं विवृण्वन् कर्माणि विशिनष्टि पुण्यनिवहानी
त्यादि त्रिभिः पदैः कानिचित् अश्वमेधादिकर्माणि पुण्यमेव जनयंति पुत्रोपलालनादीनि तु लोकस्य सुखमे राम
व कुर्वंति प्रायश्चित्तादीनि तु पापमेव हरंति एतानि तु सर्वेतामुखानीत्याह पुण्यानिवहानि प्रापयंतीति ३
तथा सुमंगलानि अतिसुखात्मकानि गायत् जगत् कलिमलापहराणि कृत्वा मुनिप्रस्थापने हेतुः कीर्तिनादिनापुण्य
कालात्मना संहारकर्तृ पणे यदुदेवगेहे वसुदेवगृहे निवसता सता स्वकुलसंजिहीर्षिणेत्यर्थः पिंडारके त निवहंति २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ उपसंगृह्यपादग्रहणंकृत्वा १३ प्रश्नप्रकारमाहद्वयेननेवेषयित्वेति हे अमोघदर्शनाः विप्राः एषा अंतर्वत्नीगर्भिणी १४ वः युष्मान्साक्षात्पृष्टुं विलज्जतील[illegible]मानाअस्मन्मुखेनपृच्छति प्रसोष्यंती आसन्नप्रसवा किंस्वित्संजनयिष्यतिकन्यां
१२ वापुत्रंवातत्स्प[illegible]तां १५ प्रलब्धाः वंचिताः १६ तस्मिन्नुदरे अस्मयं लोहमयं १७ मंदभाग्यैर्नोस्माभिः किमत्र [illegible]तानः

विश्वामित्रोऽसितः कण्वोदुर्वासाभृगुरंगिराः कश्यपोवामदेवोत्रिर्वसिष्ठोनारदादयः १२ क्रीडं
तस्तानुपव्रज्यकुमारायदुनंदनाः उपसंगृह्यपप्रच्छुरविनीताविनीतवत् ॥१३ तेवेषयित्वा
स्त्रीवेषैः सांबंजांबवतीसुतं एषापृच्छतिवोविप्राअंतर्वत्न्यसितेक्षणा १४ प्रष्टुंविलज्जती
साक्षात्प्रब्रूतामोघदर्शनाः प्रसोष्यंतीपुत्रकामाकिंस्वित्संजनयिष्यति १५ एवंप्रलब्धामु
नयस्तानूचुः कुपिताननृप जनयिष्यतिवोमंदामुसलंकुलनाशनं १६ तच्छ्रुत्वातेतिसंत्र
स्ताविमुच्यसहसोदरं सांबस्यददृशुस्तस्मिन्मुसलंखल्वयस्मयं १७ किंकृतंमंदभाग्यै
नः किंवदिष्यंतिनोजनाः इतिविह्वलितागेहानादायमुसलंययुः १८ तच्चोपनीयसदसि
परिम्लानमुखश्रियः राज्ञआवेदयांचक्रुः सर्वयादवसंनिधौ १९ श्रुत्वाऽमोघंविप्रशा
पंदृष्ट्वाचमुसलंनृप। विस्मिताभयसंत्रस्ताबभूवुर्द्वारकौकसः २० तच्चूर्णयित्वामुसलं
यदुराजः सआहुकः समुद्रसलिलेप्रास्यल्लोहंचास्यावशेषितं २१ राम राम राम

अस्मान्किंवदिष्यंतीतिविह्वलिताः संतोमुसलमादायगेहान्ययुः १८ राज्ञेउग्रसेनाय ननुश्रीकृष्णाय १९ २०
आहुकः उग्रसेनः सोपिश्रीकृष्णमपृष्ट्वैवप्रास्यत् क्षिप्तवान् अस्यमुसलस्यचूर्णीक्रियमाणस्यावशेषितंलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

तरलैरकंरेगेः २२ अंत्यैर्मत्स्यैः सह शल्ये शरीरे १२३ ज्ञाता सर्वेऽर्थो येन सः ईश्वरोपि समर्थोपि सन् अन्यथा कर्तुं नेच्छत् किं
त्वनुमोदितायतः कालरूपी २४ इति एकादशे प्रथमः द्वितीये निमिजायंतसंवादेनाह नारदः धर्मान् भागवतान् भक्त्या
वासुदेवाय पृच्छते अभीक्ष्णं प्रस्थापितोऽपि पुनः पुनरवात्सीदित्यर्थः ननु नारदस्य दक्षादिशापान्नैकत्र वासः ॥
संभवतीत्याशंक्याह गोविंदभुजगुप्तायामिति नतस्यां शापादेः प्रभाव इत्यर्थः कृष्णोपासनलालसात्रेत्योत्सु

४ कश्चिन्मत्स्योऽग्रसील्लोहं चूर्णानि तरलैस्ततः । उह्यमानानि वेलायां लग्नान्यासन् किलैरकाः
२२ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे । तस्योदरगतं लोहं स शल्ये लुब्धकोकरोत् ॥
२३ भगवान् ज्ञातसर्वार्थ ईश्वरोऽपि तदन्यथा । कर्तुं नैच्छद्विप्रशापं कालरूप्यन्वमोदत । २४
इति श्रीभागवते महापुराणे एकादशस्कंधे प्रथमोऽध्यायः श्रीशुक उवाच गोविंदभुजगुप्तायां
द्वारवत्यां कुरूद्वह । अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः १ को नु राजन्निंद्रिय
वान्मुकुंदचरणांबुजं । न भजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २ तमेकदा तु देवर्षिं वसुदे
वो गृहागतं । अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ३ वसुदेव उवाच भगवन् भवतो या
त्रा स्वस्तये सर्वदेहिनां । कृपणानां यथा पित्रोरुत्तमश्लोकवर्त्मनाम् ४ राम राम राम राम ४

कर्येयुस्य सः १ यत्कृतेनेमुक्तानामपीदृशी सोत्सुकं तं को नु नाम न भजेदित्याह कोन्विति इंद्रियवानितींद्रियवत्व
मात्रमेव यत्राधिकारिविशेषणमित्यर्थः सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः २३ यथा पित्रोर्यात्रा आगमनमप रामः२
त्यानां स्वस्तये मंगलाय यथा च उत्तमश्लोकस्य वर्त्मभूतानां महतां यात्रा कृपणानां स्वस्तये तथा भगवद्रूपस्य भव
तो यात्रा सर्वदेहिनां स्वस्तये इति ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१

दैवैरपि महतामुपमानमनुचितमित्याह भूतानामिति देवानां चरितमिन्द्रादीनां भूतानां दुःखायापि भव
ति त्वादृशां त्वयासदृशानां अच्युतआत्मनियेषां तेषां किंच सुखं कुर्वंतोपि देवा भजनानुसारेण कुर्वंति
न तथा साधव इत्याह भजंतीति छायेव यथा पुरुषो यावत्करोति तावदेव तस्य छायापि तथा कर्मसचिवाः
कर्मसहायाः ६ तदेवं यद्यपि भवत आगमनमात्रेणैव वयं कृतार्थास्तथापि पृच्छामः तवेति तव ये द्धर्माः

भूतानां देवचरितं दुःखाय च सुखाय च सुखायैव हि साधूनां त्वादृशामच्युतात्मनां ५ भजं
ति ये यथा देवान् देवा अपि तथैव तान् छायेव कर्मसचिवाः साधवो दीनवत्सलाः ६ ब्रह्मं
स्तथापि पृच्छामो धर्मान् भागवतांस्तव यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात् ७ अ
हं किल पुरानंतं प्रजार्थो भुवि मुक्तिदं अपूजयं न मोक्षाय मोहितो देवमायया ८ यथा
विचित्रव्यसनाद्भवद्भिर्विश्वतो भयात् मुच्येमह्यंजसैवाद्धा तथा नः शाधि सुव्रत ९ श्री
शुक उ० राजन्नेवं कृतप्रश्नो वसुदेवेन धीमता प्रीतस्तमाह देवर्षिर्हरेः संस्मारितो गुणैः
१०

प्रसन्नो भगवान् तानित्यर्थः ७ ननु त्वत्तोपि किमन्यो भगवत्प्रसादपात्रमस्ति तत्राह अहं किलेति भुवि प्र
जार्थो पूजयं पुत्रलाभप्रयोजनः सन् पूजितवान् किलेति सूतीगृहे भगवदुक्तमनुस्मरति ८ अंजसा य
था मुच्येमहि तथा नोऽस्मान् शाधि शिक्षय विचित्राणि व्यसनानि यस्मिन् तस्मात्संसारात् तथा विश्व
तः सर्वतो भयं यस्मिन् तस्मात् भवद्भिर्हेतुभूतैः अंजसा अनायासेन अद्धा साक्षात् ९ हरेर्गुणैर्वर्णनीय
त्वेन प्रश्नगतैर्हरिसंस्मारित इत्यर्थः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत

सा॰ए॰ प्रीतिमाविष्करोति सम्यगिति त्रिभिः यत्पृच्छसे यत्पृच्छसि विश्वभावनान् सर्वशोधकान् ११ आदृतः आस्तिक्येन गृहीतः अनुमोदितः परैः क्रियमाणः सत्कृतः सद्धर्मो भागवतो धर्मः देवहेत्वसुदेवेत्यर्थः यद्वा देवस्यो विश्वस्य च द्रुह्यंति नियतानपि १२ किंच त्वयामहानुपकारः कृत इत्याह त्वयेति पुण्यश्रवणकीर्त्तनेयस्य सः १३
अत्रापि भगवद्धर्मनिर्णयेऽपि विदेहस्य जनकस्य १४ आर्षभाणां मुत्पत्तिं वयं विविच्य कथयति सा॰१

श्री॰ उवाच सम्यगेतद्व्यवसितं भवता सात्वतर्षभ यत्पृच्छसे भागवतानु धर्मांस्त्वं वि
श्वभावनानु ११ श्रुतोनुपठितो ध्यात आदृतो वानुमोदितः सद्यः पुनाति सद्धर्मो दे
वविश्वद्रुहोपि हि १२ त्वया परमकल्याणः पुण्यश्रवणकीर्त्तनः स्मारितो भगवानद्य
५ देवो नारायणो मम १३ अत्राप्युदाहरंतीममितिहासं पुरातनं आर्षभाणां च संवादं वि
८ देहस्य महात्मनः प्रियव्रतो नाम सुतो मनोः स्वायंभुवस्य यः तस्याग्नीध्रस्ततो नाभिरृ
षभस्तत्सुतः स्मृतः १५ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया अवतीर्णं सुतशतंत
स्यासीद्वेदपारगं १६ तेषांनु भरतो ज्येष्ठो नारायणपरायणः विख्यातं वर्षमेतद्यन्नाम्ना भा
रतमद्भुतम् १७ राम

विवक्षा या१ सप्तभिः प्रियव्रत इति १५ मोक्षधर्मं विवित्सया मोक्षधर्माणां प्रवृत्तेनेच्छया अव
तीर्णं वासुदेवांशमाहुः तस्य च वेदपारगं सुतशतमासीत् १६ तेषामृषभसुतानां मध्ये नवयोगेश्वराणां
चरितं तत्तो विविच्याह तेषामिति एतद्जनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत्
एतेन तस्य धर्मातिरेकानुरूपितः १७

नकुमिन रेषां चरितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमां पृथ्वीं गृहान्निर्गतो हरिमुपासीनः सेवमानः सन् १८ नव सुताः नवद्वीपपतयः नवानां ब्रह्मावर्तादि भूखंडा
नां पतयः अस्य भारतवर्षस्य एकाशीतिः सुताः कर्ममार्गप्रवर्त्तका ब्राह्मणा अभूवन् १९ अर्थशंसिनः पर
मार्थनिरूपकाः श्रमणाः श्रमवंतः आत्माभ्यासे कृतश्रमा इत्यर्थः वातरशनाः दिगंबराः आत्मविद्यायां वि
शारदाः निष्णाताः २० १ तेषां पारमहंस्यं चरितमाह द्वाभ्यां त एत इति भगवद्रूपं पश्यंतः सदसदात्मके स्थूल

स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा हरिं उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः १८ तेषां
नव नवद्वीपपतयोऽस्य समंततः कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः १९ नवाभवन्महा
भागा मुनयो ह्यर्थशंसिनः श्रमणा वातरशना आत्मविद्याविशारदाः २० कविर्हरिरंतरिक्षः
प्रबुद्धः पिप्पलायनः आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः २१ त एते भगवद्रूपं वि विश्वं
श्वं सदसदात्मकं आत्मनोऽव्यतिरेकेण पश्यंतो व्यचरन्महीं २२ अव्याहतेष्टगतयः
दुला ४ सुरसिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान् मुक्ताश्चरंति मुनिचारणभूतनाथविद्या
धरद्विजगवां भुवनानि कामं २३ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया वितायमा
नमृषिभिरजनाभे महात्मनः तान् दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप यजमा
नोऽग्नयो विप्राः सर्व एवोपतस्थिरे २५ विदेहस्तानभिप्रेत्य नारायणपरायणान् प्रीतः सं
पूजयांचक्रे आसनस्थान्यथार्हतः २६

सूक्ष्मरूपं न त्वस्य व्यतिरेकेण पश्यंतः २२ अव्याहताः अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते मुक्ता अना
सक्ताः २३ महात्मनो निमेः वितायमानं अनुष्ठीयमानं अजनाभे भारतवर्षे २४ यजमानो निमिः अग्न
यः आहवनीयादयः विप्राश्च ऋत्विगादयः २५ अभिप्रेत्य ज्ञात्वा २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० स्वर्गेचरोचमानान् नवाभरणादिप्रकोशेः ब्रह्मपुत्रोपिमान् सनत्कुमारादिसदृशान् २७ परमप्रीत्याहृष्टे
नमभिनंदंतिहाभ्यामन्यइति ननुभगवतः पार्षदानांकथमत्रोपलब्धिः तत्राह विष्णोरिति विष्णु
भक्तालोकपावनार्थंसर्वत्रपर्यटंतीत्यर्थः २८ मयादुर्लभंलब्धंमहाभाग्यमित्याह दुर्लभइति
वहवोदेहाभवंतियेषांतेदेहिनाजीवास्तेषांक्षणभंगुरोपिमानुषोदेहोदुर्लभः परमपुरुषार्थसा
निरवधाः १ धनत्वात् वैकुंठः प्रियायेषांवैकुंठस्थवाप्रियास्तेषांदर्शनं २९ हेअनघाः भवतः युष्मानात्यंति

मा १ तान्रोचमानान्स्वरुचाब्रह्मपुत्रोपमान्नव पप्रच्छपरमप्रीतः प्रश्रयावनतोनृपः २७
विदेहउवाच मन्येभगवतःसाक्षात्पार्षदान्वोमधुद्विषः विष्णोर्भूतानिलोकानां
६ पावनायचरंतिहि २८ दुर्लभोमानुषोदेहोदेहिनांक्षणभंगुरः तत्रापिदुर्लभंमन्येवै
कुंठप्रियदर्शनं २९ अतआत्यंतिकंक्षेमंपृच्छामोभवतोनघाः संसारेस्मिन्क्षणा
र्द्धोपिसत्संगःशेवधिर्नृणां ३० धर्मान्भागवतान्ब्रूतयदिनः श्रुतयेक्षमं यैःप्रस
न्नः प्रपन्नायदास्यत्यात्मानमप्यजः ३१ नारदउवाच एवंतेनिमिनापृष्टावसुदेव
महत्तमाः प्रतिपूज्याब्रुवन्प्रीत्यासमसदस्यर्त्विजंनृपम् ३२ राम राम राम

मे केक्षेमंपृच्छामः यतःक्षणार्द्धकालंभवोपिसत्संगःशेवधिर्निधिः निधिलाभेयथानंदोभवतितथापरमानं
दइत्यर्थः ३० तदर्थंचभागवतान्धर्मान्ब्रूतायदिनोऽस्माकंश्रुतयेश्रवणायक्षमंयोग्यंभवति कथंभू
तान् यैर्धर्मैःप्रपन्नायभक्तायअजोहरिःआत्मानमपिदास्यतितान् ३१ सहसदस्यैःऋत्विग्भि
श्चवर्त्तमानंतेपिभगवद्धर्मश्रवणपराबभूवुरित्यर्थः भगवद्धर्मान्तत्केमायातत्तरणानिच ब्रह्म

राम ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथममात्यंतिकं क्षेमं कथयति मन्य इति नकुतश्चिद्भयं यस्मात् अकुतश्चिद्भयं अत्र संसारे असदात्म
भावात् असति देहादावात्मभावनात् नित्यं सर्वदा उद्विग्नबुद्धेः विश्वात्मना सर्वथा निःशेषं यत्र पादांबु
जोपासने भीर्निवर्तते तत् ॥३३॥ भागवतधर्मलक्षणमाह ये वै इति सम्यादिभिः सुखेन वर्णाश्रमादिधर्मान्
ल्प २ हीनाः निरहंस्य तान् स्वमुखेनैव भगवता विदुषामपि पुंसां अंजः सुखेनैवात्मलब्धये ये वै उपायाः प्रो
क्ताः तान् भागवतान् धर्मान् विद्धि ॥३४॥ अंजःपदे प्रोक्तं सुकरत्वे विष्णुणातियानीति यानास्थायाप्यश्रितयोग
हि ष्विव न प्रमाद्येत विघ्नैर्न विहन्येत किंच निमील्य नेत्रे धावन्नपि इह येषु भागवतधर्मेषु न स्खलेत्
निमीलनं नामाज्ञानं यथाह ॥ श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते एकेन विकलः काणः द्वा
भ्यां मंधः प्रकीर्तित इति अज्ञो वापीत्यर्थः यथा पदन्यासस्थानमतिक्रम्य शीघ्रं परतः पदन्यासन

कविरुवाच मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं उद्विग्नबुद्धेरसदा
त्मभावाद्विश्वात्मना यत्र निवर्तते भीः ॥३३॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये अं
जः पुंसामविदुषां विद्धि भागवतान् हितान् ॥३४॥ कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना
वानुसृतस्वभावात् करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥३६॥

किंचित् १ गति ज्ञीवनं गहरत्रापि किंचिदतिक्रम्यातिक्रम्य अतिशीघ्रमनुष्ठानं धावनं तथानुतिष्ठन्नपि न स्खले
न्न प्रत्यवायी स्यात् तथा न पतेत् फलान्न भ्रश्येत् ॥३५॥ ननु केते भागवता धर्माः ईश्वरार्पिता नित्यं सर्वे
के मोण्यपीत्याह कायेनेति आत्मना चित्तेन अहंकारेण वा अनुसृतो यः स्वभावस्तस्मात् अयमर्थः
न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति तथा च भगवद्गीतासु यत्क
रोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति यद्यानेन कायो
हीनामवकर्मना चमन इत्याशंक्याह अध्यासनानुसृतात् प्राक्षणवादिस्वभावाद्यत्करोति
स्यथः तत् सकलं परस्मै परमेश्वराय नारायणायेति समर्पयेत् तत्तथा
सति सकलमपि कर्म भागवतो धर्मो भवतीति भावः ॥३६॥

अन्यथा भावप्रमाश्रुति
रेव रज्जौ

॥श्लोक॥ यानास्थाय नरो राजन् न प्रमाद्येत कर्हिचित् ॥ धावन्निमील्य
॥ वा नेत्रे न स्खलेन्न पतेदिह ॥ ३५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्तेः

भा०ए० ननु किमेवं परमेश्वरभजनेन अज्ञानकल्पितभयस्य ज्ञानेनैव निवर्त्यत्वादित्याशंक्याह भयमिति यतो भयं तन्मा
ययाभवेत् अतो बुधो बुद्धिमान् तमेव भजेत् ननु भयं देहाद्यभिनिवेशतो भवति सत्यं देहाहंकारतः स
चस्वरूपास्मरणात् किमत्र तस्य माया करोति अत आह ईशादपेतस्येति ईशविमुखस्य तन्मायया ॥ ग्र
स्मृतिः भगवत्स्वरूपास्फूर्तिः ततो विपर्ययो देहोऽस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति एवं हि सि
द्धे लोकिकोप्यपि मायासूक्तं च भगवता दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते माया
मेतां तरंति त इति एकया अव्यभिचारिण्या भक्त्या भजेत् किंच गुरुर्देवता आत्मा गुरुरेव देवता ईश्वरः

भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः तन्माययातो बुध आभ
रामु जेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ३७ अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्व
प्नमनोरथौ यथा तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात् ३८
शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके गीतानि नामानि तदर्थ
कानि गायन्विलज्जो विचरेदसंगः ३९

आत्मा प्रेष्ठश्च यस्य तथा दृष्टिः संनित्यर्थः ३७ ननु विषयविक्षिप्तस्य कुतोऽव्यभिचारिणी भक्तिः क्वं राम
भवति कुतस्तरामभयं तत्राह न तावद्विषया नाम वास्तवाः सन्ति किंतु मनोविलासमात्रं अतो मनोनिय ८
मनेन भजनादभयं स्यादित्याह अविद्यमानोऽपीति द्वयः द्वैतप्रपंचः ध्यातुः पुंसः धिया मनसा स्वप्नश्च
मनोरथश्च यथेत्यर्थः तत्तस्मात्कर्माणि संकल्पयति विकल्पयति च यन्मनस्तन्निरुंध्यात् नियच्छेत् तत
श्च कया भक्त्या भजनादभयं स्यादित्यर्थः ३८ एतदुक्तं नाशक्यो सुगममार्गमाह शृण्वन्निति तदर्थ मिसा‍ंस्य २
कानि तान्यूर्ध्वजन्मानि कर्माणि चार्थो येषां तानि एतान्यपि सा कल्पनज्ञातुमशक्यानीत्याह यानि लो
के गीयमानेत्तानि प्रसिद्धानि तानि शृण्वन् गायंश्च विचरेत् असंगो निःस्पृहः ३९ टीका २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा०९०

एवं च भजतः संप्राप्तप्रेम लक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह एवमिति एवंव्रतं इत्थंव्रतं यस्य सः स्वप्रियस्य हरेर्नामकीर्त्या जातोऽनुरागः प्रेम यस्य सः अत एव द्रुतचित्तः श्लथहृदयः कदाचित्कैः पराजितं भगवंतमाकलय्योच्चैर्हसति एतावंतं कालमुपेक्षितोऽस्मीति रोदिति अत्यौत्सुक्यात्क्रोशति क्वासीति हर्षेण गायति जितं जितमिति नृत्यति किं दांभिकवत्परान्प्रति प्रकाशयितुं न तु न्मादवत् ग्रहग्रहीतवत् लोकबाह्यः विवशः ४० किंच एवमिति सर्वाणि भूतानि आकाशादीनि यत्किंचित्कृतं मात्रं तत्सर्वं हरेः शरीरमिति मत्वा प्रणमेत् संभावनायां लिङ् ४१ नन्वियमा रूढयो

हे है से सां अनुरुहा पोति ३

रौति १

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः । हसत्यथो रोदिति रौति गायत्युन्मा
दवन्नृत्यति लोकबाह्यः ॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्
सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यः ॥ ४१ भक्तिः परेशानुभवो विर
क्तिरन्यत्र चैष त्रिक एककालः । प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपा
योऽनुघासं ४२ इत्यच्युताङ्घ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः । भवन्ति वै भा
गवतस्य राजंस्ततः परां शांतिमुपैति साक्षा

कार्थौ भवन्तीत्याह इत्यच्युताङ्घ्रिमिति ४३

गानामपि बहुजन्मभिर्दुर्लभे भागानि कथं नामकीर्तनमात्रेणैकस्मिन्नेव जन्मनि भवेदित्याशंक्य सदृष्टांतमाह भक्तिरिति प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पद भगवद्रूपस्फूर्तिः तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिरित्येष त्रिकः एककालः भजनसमकाल एव स्यात् यथाश्नतो भुंजानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासं स्युः उपलक्षणमेतत् प्रतिसिक्थमपि यथा स्युस्तद्वत् एवमेकैकस्मिन्भजने किंचित्किंचित्प्रेमादित्रिके जायमानेऽनुवृत्त्या भजतः परमप्रमादि जायते बहुग्रासभोजन इव परमतुष्ट्यादि ४२ ततश्च भगवत्प्रसादेन

स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० भागवतस्य भवतीत्युक्ते तस्य लक्षणं पृच्छति अथेति यद्धर्मः यस्मिन् धर्मे परिनिष्ठितः याद‍ृशो यत्स्वभावः य
थाचरति वर्त्तते ब्रूते वा येश्च लिंगैर्भगवतः प्रियो भवति ४४ यद्धर्मेत्यस्योत्तरमाह त्रयेण सर्वभूतेष्विति आ
त्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत् तथा ब्रह्मरूपे आत्मन्यधिष्ठानभूतानि च यः पश्ये
त् यद्वा आततत्वाच्च मातृत्वाच्चात्मा हि परमो हरिरिति तंत्रोक्तेः आत्मनो हरेः सर्वभूतेषु मशकादिष्वपि नि
यंतृत्वेन वर्त्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् न तु तस्य तारतम्यं तथा आत्मनि हराविव
भूतानि च पश्येत् कथंभूते भगवति अप्रच्युतैश्वर्यादिरूपेण पुनर्जडमलिनभूताश्रयत्वेनआश्यादि

राजोवाच अथ भागवतं ब्रूत यद्धर्मो याद‍ृशो नृणां यथाचरति यद्ब्रूते यैर्लिंगैर्भगव
त्प्रियः ४४ हरिरुवाच सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः भूतानि भगवत्यात्म
८ न्येष भागवतोत्तमः ४५ ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च प्रेममैत्रीकृपोपे
क्षा यः करोति स मध्यमः ४६ अर्चायामेव हरये पूजां यः श्रद्धयेहते न तद्भक्तेषु
चान्येषु स भक्तः प्राकृतः स्मृतः ४७ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि न हृष्यति
विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ४८

चतुर्दुर प्रसन्नयोरैश्वर्यादिप्रच्युतिं पश्येत् स सर्वत्र परिपूर्णं भगवन्तं पश्यन् भागवतोत्तम इत्यर्थः ४५ प्रेम च मैत्री राम
च कृपा च उपेक्षा च ताः ईश्वरादिषु यः करोति स मध्यमो भागवतः एवंभूतस्य भेदस्य दर्शनात् ४६ ८
अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेषु अन्येषु च सुतरां न करोति प्र इति प्रारंभः अधुनो
२२ पप्राप्त भक्तिः शनैरुत्तमो भविष्यतीत्यर्थः ४७ पुनरष्टभिः श्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैव लक्ष सप्तारतः २
णान्याह गृहीत्वापीति श्रीवासुदेवाविष्टचित्तो न गृह्णाति तावदिंद्रियैरर्थान् गृहीत्वापीत्यपिशब्दार्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचदेहादीनांसंसारधर्मैर्जन्माप्ययादिभिर्योहरेः स्मृत्याः विमुह्यमानः सभागवतप्रधानः तत्रदेहस्यजन्माप्ययौ
पिपासे २ प्राणस्यक्षुत् मनसोभयंबुद्धेस्तर्षः इंद्रियाणांकृच्छ्रंश्रमइति ४९ कामश्चकर्माणिचबीजानिचवासनाः तेषां
वासुदेवएकोनिलयआश्रयोयस्यसः ५० एतेनगृहीत्वापीत्यादिश्लोकत्रयेणदेहषडूर्मिमोहकामादिरहि
तश्चैरतीतियथाचरतीत्यस्यान्तरमुक्तं येलिंगैर्भगव[illegible]त्प्रियइत्यस्यान्तरमाह नयस्येति जन्मकुलं कर्मत
पआदि जातयः अनुलोमप्रतिलोमजाः मूर्द्धावसिक्तादयः अस्मिन्देहेअहंकाररहितः सत्कुलक विप्रान्मूर्द्धावसिक्तो क्षत्रियायां
र्मादिलिंगैर्हरेः प्रियोभवतीत्यर्थः ५१ वित्तेषुस्वीयंपरकीयमिति आत्मनि स्वःपरइति ५२ किंचत्रिभुव

देहेंद्रियप्राणमनोधियांयोजन्माप्ययक्षुद्भयतर्षकृच्छ्रैः संसारधर्मैरविमुह्यमानः स्मृत्याहरेर्भा
गवतप्रधानः ४९ नकामकर्मबीजानांयस्यचेतसिसंभवः वासुदेवैकनिलयः सवैभागव
तोत्तमः ५० नयस्यजन्मकर्मभ्यांनवर्णाश्रमजातिभिः ५१ सज्जतेस्मिन्नहंभावोदेहेवैसह
रेःप्रियः ५१ नयस्यस्वःपरइतिवित्तेष्वात्मनिवाभिदा सर्वभूतसमःशांतःसवैभागवतोत्तमः
५२ त्रिभुवनविभवहेतवेऽप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् नचलतिभगवत्प
दारविंदाल्लवनिमिषार्द्धमपिसवैष्णवाग्र्यः ५३

नविभवहेतवेपित्रैक्यराज्यार्थमपि लवार्द्धमपिनिमिषार्द्धमपिभगवत्पदारविंदभजनाद्योनचलति
सवैष्णवाग्र्यः ननुलवार्द्धमात्रभजनोपरमेचेत्रैलोक्यलाभोभवेत्तर्हिकुतोनचलेत्तत्राह अकुंठस्मृतिः
भगवत्पदतोऽन्यत्सारंनास्तीत्येवंरूपाऽकुंठाअनपगतास्मृतिर्यस्यसः भगवत्पदादन्यत्सारंनास्ती
तिकुतः अतआह अजितेति हरावेवआत्मायेषांतथाभूतैः सुरादिभिरपिदुर्लभात् किंतु केवलंविमृ
ग्यात् तदपेक्षयासर्वस्यतुच्छत्वंस्मरन्योनचलतीत्यर्थः ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० अपि च विषयाभिसंधिना स्वल्पेनैव कामेन नातिसंतापः सति भवेत् स तु भगवत्सेवानुष्ठानेन संभवतीत्याह भगवत इति
उरु विक्रमो येनांघ्रिः अंघ्रिः चरणयोः शाखाः अंगुल्यः तासु नखानि च तानि मणयः अतेषां चंद्रिकाशीतलया दी
प्त्या निरस्तः कामादितापो यस्मिन् तस्मिन् उपसीदतां भजतां हृदि कथं पुनः संतापः प्रभवति चंद्र
उदिते सति अर्कस्य तापः यथा न यस्य स्वः परइत्यादिना श्लोकत्रयेण याहशोइत्यश्यात्तरमुक्तं वेदितव्य यदुक्तं
इ त्यस्य हरिनामानीति ज्ञातव्यं ५४ उक्तसमस्तलक्षणसारमाह विसृजतीति हरिरेव स्वयं साक्षाद्यस्य हृ वि १

भगवत उरुविक्रमांघ्रिशाखानखमणिचंद्रिकया निरस्ततापे हृदि कथमुपसीदतां पुनः स प्र
भवति चंद्र इवोदितेऽर्कतापः ५४ विसृजति हृदयं न यस्य साक्षाद्धरिरवशाभिहितोऽप्यघौघ
नाशः प्रणयरशनया धृतांघ्रिपद्मः स भवति भागवतप्रधान उक्तः ५५ इति श्रीभागवते म
हापुराणे एकादशस्कंधे नारदवसुदेवसंवादे भागवतधर्मनिरूपणं नाम द्वितीयोऽध्यायः
टी राजोवाच परस्य विष्णोरीशस्य मायिनामपि मोहिनीं मायां वेदितुमिच्छामो भगवंतो ब्रु
वंतु नः १ नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतं संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजं मू

त १ हृदयं न विसृजति न मुंचति कथंभूतः अवशेनाप्यभिहितो मात्रोऽपि अघौघनाशयति यः सः तत् किं न विसृज
१२ ति यतः प्रणयरशनया धृतं हृदये येन तद्रूपं अंघ्रिपद्मं यस्य सः भागवतप्रधान उक्तो भवति ५५ एकादशे द्वितीयः
मायातत्तरणब्रह्मकर्मप्रश्नचतुष्टये तृतीये नृत्तरं दत्ते मार्षेभ्यो मुनिभिः पृथक् विष्णोर्मायां पृच्छति परस्येति
हे भगवंतः १ ननु लक्षणैर्भागवतो भक्तास्तत्रार्थः स्यात् किं बहुप्रश्नैरत आह नानुतृप्य इति संसा
रतापेन नितरां तप्तोऽहं तस्य तापस्य भेषजं हरिकथामृतं युष्मद्वचो जुषमाणो नानुतृप्यामि २ ८७
टी

राम टी ... मनो २

प्रमीमीते

नि॰ १

मायायाः स्वरूपतोनिरूपणासंभवात्सृष्ट्यादिकार्यद्वारेणनिरूपयितुमाहएभिरिति आद्यः पुरुषः ययाशक्त्या भूतानां आत्माकारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानिभूतानिससर्ज एषामायाभगवतइति वरमश्लोकपादस्यप्रतिश्लोकमनुषंगः किमर्थंससर्ज स्वमात्रात्मप्रसिद्धये स्वंमिमीतेप्रउपालेमः स्वमानात्तस्यात्मनोजीवस्यप्रकृष्टायेसिद्धये यद्वा स्वांभूतानांजीवानांमात्राप्रसिद्धये विषयभोगा या आत्मप्रसिद्धयेमोक्षायचेत्यर्थः तदुक्तंवेदस्तुतौ बुद्धीन्द्रियमनः प्राणान्जनानामसृजत्प्र भुः मात्रार्थंचभवार्थंच आत्मनेकल्पनायचेति ३ एवंजीवोपकारणार्थंपंचधातुभिर्महाभू

अंतरिक्षउवाच एभिर्भूतानिभूतात्मामहाभूतैर्महाभुज । ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ३ एवंसृष्टानिभूतानिप्रविष्टः पंचधातुभिः एकधादशधात्मानंविभजन्जुषतेगुणान् ४ गुणैर्गुणान्सभुंजानआत्मप्रद्योतितैःप्रभुः मन्यमानइदंसृष्टमात्मानमिहसज्जते ५ कर्माणिकर्मभिःकुर्वन्सनिमित्तानिदेहभृत् तत्तत्कर्मफलंगृह्णन्भ्रमतीहसुखेतरं ६ इत्थंकर्मगतीर्गच्छन्बह्वभद्रवहाःपुमान् आभूतसंप्लवात्सर्गप्रलयावश्नुतेवशः ७

तैःसृष्टानिभूतान्यंतर्यामिरूपेणप्रविष्टः एकधामनसादशधाबाह्येंद्रियरूपेण आत्मानंविभजन् गुणानुत तद्विषयान्जुषतेजोषयतीत्यर्थः यद्वा तेमात्मानंप्रतिगुणान् विभजन्जुषतेप्रीयतइत्यर्थः ४ सचजीवः आत्मनाअंतर्यामिणाप्रद्योतितैर्गुणैर्विषयान्भुंजानइदंसृष्टशरीरमात्मानंमन्यमानइहशरीरादौस ज्जते ५ कर्मभिःकर्मेंद्रियैश्चसनिमित्तानिसवासनानिकर्माणिकुर्वन्सुखेतरंसुखदुःखात्मकंगृ

ननुभुंजानःकथंसज्जते चैतन्यात्मासन्याह्यैःभुंजानोभोगसमयामोमुच्यते इतिचेन्नत्याह

ननुसर्वकर्मफलंचगृह्णन्अयंदेहभृत्भ्रमतीहसंसारेनतुमुच्यते

र्मफलं ६ बहूनिकृत्स्नानिवस्तूनितथाताः मंगीप्रतत्येतल्पतिमर्त्यो ७

कियंतंकालंभ्रमतीह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए[वं] स्ट[ष्टि]मुक्का प्रलयं
दर्शयितुमारभते

अव्यक्ताय।

पि ५

भा० ए०
धं० ड्वा ३

धातूनां महाभूतानामुपप्लवे नाशे हेतावासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं अव्यक्ताय प्रकृतिं नेतुं नाम आकर्षति नाशे हेतुमाह शतवर्षेति तस्मिन्काले उपचित उष्मा आसां ते उष्मा आसा ताः अर्कः यद्वा तेन कालेनापचितमुष्माऽस्य यस्य सः ९ ऊर्ध्वशिखः [..]लः विष्वक् परितः १० संवर्तकः प्रलयकर्त्ता धाराभिः जलबिंदुभिः हस्तिहस्ताभिः स्तंभमानाभिः ११ ततस्तदुपाधित्वे योऽहं राजः पुरुषोऽव्यक्तं कारणं प्रविशति अधिकारि[..]काणामिति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांतकृतात्मानः प्रविशंति परं पदमिति स्मृतेर्यावदधिकारमवस्थितिरनुन्यायाच्च वैराजशब्दाभिधेयस्य च ब्रह्मणः परमभागवतत्वा

धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकं अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ८ शतवर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि तत्कालोपचितोष्मार्को लोकांस्त्रीन्प्रतपिष्यति ९
पातालतलमारभ्य संकर्षणमुखानलः दहन्नूर्ध्वशिखो विष्वग्वर्द्धते वायुनेरितः ॥१०॥ व २
संवर्तको मेघगणो वर्षति स्म शतं समाः धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ११
ततो विराजमुत्सृज्य वैराजः पुरुषो नृप अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः ॥१२॥
वायुना हृतगंधा भूः सलिलत्वाय कल्पते सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते १३ प

१

न्मोक्षं एवं संगच्छते नान्येषामिव कारणमात्रप्रवेशः सत्यं अश्वमेधादिना सत्यलोकं गतानामप्यभक्तानां नास्तीति श्रवणाद्भक्तेर्वै ब्रह्मणोऽपि प्रकृतौ लयः पुनरुत्पत्तिः श्रुतिमोक्षं दोलेभ्यसूचनीयेवमुक्तेमिथ्य विरोधः यद्वा केनापि प्रमाणेनाव्यपगत इत्यव्यक्तं प्रवेशेव तत्प्रवेशनं च मोक्ष एवोक्त इति द्रष्टव्यं १२ एवं विराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यंतानां प्रातिलोम्येन लयमाह वायुनेति वायोर्हि गंधः संहारित्वप्रसिद्धः संवर्तकेन वायुना हृतगंधा अत एव गंधस्य प्रवर्तकस्यगतत्वात्सलिलत्वाय कल्पते-

रधिकारिणामिति

१०

८

राम
१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमसश्च रूपतिरस्कारित्वं प्रसिद्धं संवर्तकेन तमसा। अवकाशेन आकाशेन स्वकारणेन। कालात्मना श
ब्दस्य हि कालत एव नाशः प्रसिद्धः तद्रूपेणात्मना ईश्वरेण आत्मनि तामसाहंकारे १४ इंद्रियाणि बुद्धिश्च
राजसाहंकारे मनो वैकारिके देवैः सह सात्विकाहंकारे। एवं त्रिविधः स्वगुणैः स्वकार्यैः सहितः अहं अ
हंकारः आत्मनि महति स च प्रकृतौ विलीनो द्रष्टव्यं १५ त्रिवर्णा त्रिगुणा माया श्रवणभीतं च राजानं तन्निवृ
त्त्युपायश्रवणस्वच्छं दयति किं भूय इति १६ एवमनुकंपितस्तन्निवृत्त्युपायमवपृच्छति यथैतामिति य
द्यपि तन्मायया नाबुध आभजंतीति भक्तिस्तत्तारकत्वेनोक्तेव तथापि किं भक्तिरेव अन्योऽपि वास्ते त्र

हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते कालात्मना
हृतगुणं नभ आत्मनि लीयते १४ इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप प्रविशंति ह्यहंकारं स्व
गुणैरहमात्मनि १५ एषा माया भगवतः सर्गस्थित्यंतकारिणी त्रिवर्णा वर्णितास्माभिः किं
भूयः श्रोतुमिच्छसि १६ राजोवाच यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः तरंत्यंजः स्थू
लधियो महर्ष इदमुच्यतां १७ प्रबुद्ध उवाच कर्माण्यारभमाणानां दुःखहत्यै सुखाय च
पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां १८ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना
गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः १८

पायोऽस्तीति जिज्ञासुः पुनः पृच्छति अकृतात्मभिः अवशीकृतांतःकरणैः स्थूलधियः स्थूले शरीरे अहं
धीर्येषां ते १७ भक्तिव्यतिरेकेण नास्त्यन्य उपाय इत्यभिप्रेत्य भक्तिमेव ससाधनां निरूपयति तत्र प्र
थमं वैराग्यद्वारा गुरूपसत्तिमाह चतुर्भिः कर्माणीति दुःखहत्यै दुःखप्रतीकाराय पाकविपर्यासं
फलवैपरीत्यं मिथुनीचारिणां मिथुनीभूय प्रवर्तमानानां १८ कैर्मर्भिः साधितैः अपि वित्तादि
हेतव २ यानसुखं इति च पश्येदित्याह नित्यार्तिदेनेति आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः

भा० ए० एवंलोकंपरमिति कर्म्मनिर्मितत्वान्नश्वरं तथाच श्रुतिः तद्यथेह कर्मजितोलोकः क्षीयते एवमे
वामुत्र पुण्यजितो लोकः क्षीयतइति किंच वर्त्तमानसमयेपि दुःखयुक्तं पश्येदित्याह सतुल्या
तिशयध्वंसं सह तुल्येन अतिशयेन ध्वंसेन च वर्त्तमानं अतस्तत्र स्पर्द्धा अतिशये असूयाध्वं
११ सालोचनेन भयादिकं चापरिहार्यमित्यर्थः यथा खंडमंडलपतीनां मिथः स्पर्द्धादितद्वत् २० ग
उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्वज्ञं अन्यथा संशयनिरास
कत्वायोगात् परे च ब्रह्मण्यपरोक्षानुभवेन निष्णातं अन्यथा संबोधसंचारायोगात् परब्रह्मणि

एवंलोकंपरं विद्यान्नश्वरं कर्म्मनिर्म्मितं सतुल्यातिशयध्वंसं यथा मंडलवर्त्तिनां २० तस्माद्गुरुं
प्रपद्येत जिज्ञासुः श्रेयउत्तमं शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं २१ तत्र भागवतान्धर्म्मा
ञ्छिक्षेद्गुर्वात्मदैवतः अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः २२ सर्वतो मनसोऽसंग
द्यां २ मादौ संगं च साधुषु मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं २३ शौचं तपस्तितिक्षां च मौ
नं स्वाध्यायमार्ज्जवं ब्रह्मचर्य्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः २४ त्या०

किंच १ निष्णातत्वद्योतकमाह उपशमाश्रयमिति २१ गुरुरेवात्मा देवतं च यस्य सः अनुवृत्त्या सेवया यैर्धर्म्मै
र्म्मैः वस्तुतः आत्मा आत्मप्रदश्चोपासकानां यथा बलिप्रभृतीनां ३२ यथोचितमिति हीने
षु दयां समेषु मैत्रीं उत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः २३ शौचं बाह्यं मृज्जलादिभिः आभ्यं राम
तरं चादंभामानादिशिक्षितं तपः स्वधर्माचरणं तितिक्षां क्षमां मौनं वृथा वाचामनुच्चारणं ११
स्वाध्याय अधिकारानुरूपं वेदपाठादिकं आर्ज्जवं स्वच्छता ब्रह्मचर्य्यं यस्य यादृग्गुचि
तं अनुस्वदारनियमादि अहिंसां भूतेष्वद्रोहं द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मेश्वरान्वीक्षां सच्चिद्रूपेणात्मेक्षां नियन्तृरूपेणेश्वरान्वीक्षां च कैवल्यमेकान्तशीलत्वं अनि
केतत्वां गृहाद्यभिमानराहित्यं विविक्तचीरवसनं विजनपतितानां शुद्धानां वा वल्कलानां परि
धानं २५ भागवते भगवत्प्रतिपादके अन्यत्रशास्त्रोदोयानिंदातां मनसः प्राणायामेन वा
चा मौनेन कर्मणा नीहया दंडं सत्यं यथार्थभाषणं शमदमौ अंतःकरणबाह्येंद्रियनिग्रहौ
२६ हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थं हत्युद्देशेन सर्वकर्म्म विशेषतः अयजनादि य

सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां विविक्तचीरवसनं संतोषं येन केनचित्
२५ श्रद्धां भागवते शास्त्रे निंदामन्यत्र चापि हि मनोवाक्कर्म्मदंडं च सत्यं शमदमा
वपि २६ श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्म्मणः जन्मकर्म्मगुणानां च तदर्थेऽखिल
चेष्टितं २७ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं दारान्सुतान्गृहान्प्राणान्यत्पर
पु२ स्मै निवेदनं २८ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं परिचर्यां चोभयत्र महत्सु
नृषु साधुषु २९ परस्परानुकथनं पावनं भगवद्यशः मिथो रतिर्मिथस्तुष्टिर्निवृत्ति
मिथ आत्मनः ३०

मतत् तदर्थं शिक्षेत् २७ इष्टं दत्तमित्यादयो भावनिष्ठाः वृत्तं सदाचारः आत्मनः प्रियं गंधपुष्पादि दा
रादीन प्यालक्ष्य परस्मै परमेश्वराय निवेदनं तत्सेवकत्तयासमर्प्पणं यत्तत् शिक्षेत् २८ कृष्णएवा
त्मनाथो येषां कृष्ण आत्मनो जीवस्य नाथो येषामिति वा तेषु उभयत्र स्थावरजंगमे च या परि
चर्या तां विशेषतो नृषु तत्रापि साधुषु स्वधर्म्मशीलेषु तत्रापि महत्सु श्रीभागवतेषु २९ तैः
सह संगम्य यत्पावनं भगवद्यशः तस्य परस्परानुकथनं शिक्षेत् यद्वा यशः प्रतितत्रैस्य ... दि

परित्यागेन मिथो पारतिः रमणं या च तुष्टिः सुखं या च निवृत्तिः समस्तदुःखनिवृत्तिस्तां च शिक्षेत् ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ एवं वर्त्तमानानां परानंदप्राप्तिमाह स्मरंत इति द्वाभ्यां अघौघहरं हरिं मिथः स्मरंत इति द्वयेन भक्त्या साधन भक्त्या संजातया प्रेमलक्षणया भक्त्या ३१
अजं हरिं अनुशीलयंति तल्लीलां अभिनयंति एवं परं प्राप्य निर्वृताः संतस्तूष्णीं भवंति ३२ उ
पसंहरति इतीति ३३ भागवतधर्मोत्पन्नया भक्त्या नारायणपरो मायां तरतीत्युक्ते पृच्छति नारायणाभिधानस्येति निष्ठा स्वरूपं अयं भावः ब्रह्मैव तावत् नारायण इति भगवानिति परमात्मेति चोच्यते तदुक्तं वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मेति परमात्मेति भगवानिति शब्द्यत इति तथा नारायण भगवतीति इदं विश्वमाहितं गृहीतमायास्तगुणः सर्गादावगुणः स्वत इत्यादिषु

३२ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ३१
क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः ३२ इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया नारायणपरो मायामंजस्तरति दुस्तरां ३३ राजोवाच नारायणाभिधानस्य ब्रह्मणः परमात्मनः निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ३४ पिप्पलायन उवाच
स्थ। स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च देहेंद्रियासुहृदयानि
चरंति येन संजीवितानि तदवेहि परं नरेंद्र ३५

स्थपंच अहेतुः २ तत्र किमेभिः शब्दैः निर्विशेषं तदेव वस्तूच्यते अस्ति वा कोऽपि विशेषांश इति ३४ अत्रोत्तरं स्थित्युद्भवेति अयमर्थः अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः हेतुरहितः स नारायण इति परमेवं त्वमवे
पु॰ हि स्वप्नजागरसुषुप्तिषु अनुवर्त्तमानं यत् वक्ष्यति तुरीयं त्रिषु संततमिति बहिश्च समाध्यादौ यत्सत् ब्रह्मेति परमेव तत्त्वमवेहि देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति प्रवर्त्तंते तत्प
पं

त३

प्राण ४ चक्षुः ४

अवेद्यत्वेनेन विषयत्वेशान्निषेधतिनैनदिति एतत्परंतत्त्वंमनोनविशतिनविषयीकरोति वागुक्तवागपि च
क्षुः श्रोत्रमाबुद्धिश्च प्राणः अक्रियाशक्त्यानप्राप्नोति अन्यानिचेंद्रियाणि यथाऽनलस्स्वाः स्वांशभूता
अर्चिषा विस्फुलिंगादयोनप्रकाशयंतिनदहंतिचा तथाजडासुमनआदिष्वंतिश्लिष्यमानस्यात्म
नहीति तथाचक्षुरिति: प्रकाशस्यचेतत्वंतत्प्रकाशकस्यनंतप्रकाश विषयत्वं प्राणस्यमुक्तं चक्षुरुक्तं श्रोत्रस्यश्रोत्रमनस्या
त्वंमनसायेमनोविदुरिति तथायतोवाचोनिवर्त्तंते अप्राप्यमनसासहेत्यादिश्रुतेः ननुतत्त्वोपनिष

नैतन्मनोविशतिवागुतचक्षुरात्मा प्राणेंद्रियाणि च यथाऽनलमर्चिषः स्वाः शब्दो
पि बोधकनिषेधतयात्ममूलमर्थोक्तिमाह यदृतेन निषेधसिद्धिः २६

दं पुरुषं पृच्छामीति श्रुतेः शब्दगोचरत्वंप्रतीयतेतत्राह शब्दोपिआत्ममूलं आत्मनिप्रमाणंसन् स्प २
बोधकनिषेधतया स्वस्यैव आर्थोक्तिं आर्थादुक्तं यथाभवति तथाहनसाक्षात् कुतः बोधकं निषेधरूपत्वात् यतोवाचोनि
वर्त्तंते अ[illegible]प्राप्यमनसासह। यद्वाचाऽनभ्युदितंयेनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धि यन्मनोन
मनुते नचक्षुषापश्यतिकश्चनैनमित्यादिश्रुतेः ननुचे[illegible]नैवाह श्रुतिः किमिदमुच्यतेत्र नहि
र्थोक्तिमाहेतितत्राह यदृतइति अथात आदेशोनेतिनेति अस्थूलमनणु यतोवाचोनिवर्त्तंते
यद्वाचानभ्युदितमित्यादि निषेधस्य यत् अवधिभूतब्रह्म अंतेनविनासिद्धिर्नास्ति सर्वस्य
निषेधस्यसावधित्वात् २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३२

भा०११

पितत्प्रसंगः स्यादत आह। नास्तीति। आत्मा ब्रह्मन जजान न जायते। जन्मा
भावादेव न दन्तं न राखितं नाल क्षण्यो

ननु तर्हि प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते अत आह सत्त्वमिति सत्स्थूलं कार्यं असत्सूक्ष्मं कारणं त
त्सर्वं ब्रह्मैव भाति कुतः यत् यस्मात्तयोः सदसतोः परं कारणं ननु कथमेकं बहुविधस्य कारणं तत्राह
उरुशक्ति अनेकशक्ति मत् उरु महती मायालक्षणा शक्तिर्यस्य तदिति वा बहुधाभानमेव दर्शयति आ
दौ यदेकं ब्रह्म तदेव सत्त्वरजस्तम इति त्रिवृत्प्रधानं प्रवदंति ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानि
ति तदेव प्रवदंति ततः अहमिति जीवं जीवोपाधिमहंकारं च तदेव प्रवदंति ततश्च ज्ञानक्रियार्थफल
रूपतया ज्ञानशब्देन देवताः क्रियाइंद्रियाणि अर्था विषयाः फलं तत्प्रकाशः सुखादिर्वा तद्रूपतया
ब्रह्मैव भाति न हि सर्वरूपेण स्वतो भासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ३७ ननु सर्वा

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवं ज्ञानक्रियार्थफलरूपतयो
रुशक्ति ब्रह्मैव भाति सदसच्च तयोः परं यत् ३७ नात्मा जजान न मरिष्यति नैधतेसवनविद्व्य
भिचारिणां हि सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ३८ मौनद्धीयते

त्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोऽपि विकारो नास्ति नैधते न वर्द्धते इ
ष्ट्याभावादेव विपरिणामोऽपि निरस्तः कुतः हि यस्मात् व्यभिचारिणां आगमापायिनां बाल्ययुवादि
देहानां सवनविद् तत्तत्कालद्रष्टा न ह्यवस्थावतो द्रष्टा तदवस्थो भवतीत्यर्थः निरवस्थः कोसावात्मा
अत आह उपलब्धिमात्रमिति नन्वायातं तर्हि क्षणिकत्वं नेत्याह सर्वत्रेति सर्वत्र देशे शश्वत्सर्व १ ज्ञानमात्रं
दा अनपायि अनुवर्तमानं ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्वं अ १३२
त आह इंद्रियबलेनेति सदेव ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकाराद्ध्य एव जायते एकोदशाप्रेतिप्रतीयते
नश्यति च न ज्ञानमिति भावः व्यभिचारिष्वव्यभिचारे दृष्टांतः प्राणो यथेति ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा १

तत्त्वधं १

दृष्टान्तं वितृष्णमिन्द्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति अण्डेष्विति पेशिषु जरायुजेषु तरुषु
कृमिजेषु अविनिश्चितेषु स्वेदजेषु उपधावति अनुवर्तते एवं दृष्टान्ते निर्विकारत्वं प्रदर्श्य दार्ष्टान्तिकेपि
दर्शयति कथं तदेवात्मा सविकार इव प्रतीयते यथा यदा जागर इन्द्रियगणः यदा च स्वप्ने तत्संस्कार
च २ वानहंकारः यदा तु प्रसुप्ते तदा तस्मिन्प्रसुप्ते इन्द्रियगणे संनिलीने अहमिति अहंकारे च संनकूट
स्थः निर्विकार एवात्मोक्तः आशयमृते लिंगशरीरमुपाधिं विना विकारहेतोरुपाधेरभावा
ले १ दित्यर्थः नन्वहंकारपर्यन्तस्य सर्वस्य लये शून्यमेवावशिष्यते न तु तदा कूटस्थ आत्मा अत आह न

अण्डेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र । सन्ने यदिन्द्रियगणे
हमि च प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ३९ यर्ह्यब्जनाभचरणैषणयोरु
भक्त्या चेतोमलानि विधमेद्गुणकर्मजानि तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं सा
क्षाद्यथाऽमलदृशः सवितृप्रकाशः ४०

दनुस्मृतिर्नः तस्य विशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति
एतावन्तं कालं सुखमहमस्वाप्सं न किंचिदवेदिषमिति अतोऽननुभूतस्यास्मरणात्तस्य च सुषुप्त्याव
स्थानुभवः विषयसंबन्धाभावान्न तस्य स्पष्ट इति भावः तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तन्न द्रष्ट
व्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति ३९ ननु यदि सुषुप्तौ कूटस्थात्मानुभवो भव
ति कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत् कदाचिदपि तन्निवर्त
कोऽनुभवो भवेदत आह यर्हीति वित्तैषणादि विहाय केवलमब्जनाभस्यैव चरणैषणया उ
रुभक्त्या पुमांश्चेतसो मलानि विधमेत् नाशयेत् चेत एव वाकन्दे खगतानि मलानि तदा

भक्त्या प्रक्षालयेत् तदा तस्मिन्विशुद्धे चेतसि सत्ति साक्षादव्यवधानेना
त्मतत्त्वमुपलभ्यते अमलया दृशा सत्या यथा पूर्वमेव सिद्धः सवितृ
प्रकाश इति ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०स्कं०११

कर्म्मेति २

वेदस्य ३

मंते: कर्म्मयोगाधीनत्वात्तत्पृच्छति कर्म्मयोगमिति नैष्कर्म्यं कर्म्मनिवृत्ति साध्यं ज्ञानं ४१ प्रश्नोत्तरमाह एवमिति प्रश्नप्रष्टश्नमर्थे पितुः इक्ष्वाकोः ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि नाब्रुवन् ४२ गह नत्वद्योतनाय प्रथमं द्वितीय प्रश्नस्योत्तरमाह कर्म्म विहितं अकर्म्म तद्विपरीतं निषिद्धं विकर्म्म विग तं कर्म्म विहिताकारणं ईश्वरात्मत्वात् ईश्वरादुद्भूतत्वात् अपौरुषेयत्वादित्यर्थः पुवाक्य हि वक्तुर भिप्रायतो ऽर्थज्ञानं शक्यं अपौरुषेयं तु केवलं वाक्यपौर्वापर्य्येणैव तात्पर्यावधारणं तच्च दुः ररमिति तत्र कर्म्मादौ विद्वांसोपि मुह्यन्ति किं सुतान्य अतस्त्वत्तदा बालत्वान्नैवाब्रुवन्निति ४३

१४

राजोवाच कर्म्मयोगं वदत नः पुरुषो येन संस्कृतः विधूयेहाशु कर्म्माणि नैष्कर्म्यं विंद ते परं ४१ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरन्तिके नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्य तां ४२ आविर्होत्र उवाच कर्म्माकर्म्म विकर्म्मेति वेदवादो न लौकिकः वेदस्य चे श्वरात्मत्वात्तत्र मुह्यन्ति सूरयः परोक्षवादो वेदोयं बालानामनुशासनं कर्म्ममो क्षाय कर्म्माणि विधत्ते ह्यगदं यथा ४५ नाचरेद्यस्तु वेदोक्तं स्वयमज्ञो ऽजितेंद्रियः विकर्म्मणा ह्यधर्म्मेण मृत्योर्मृत्युमुपैति सः ४६ राम राम राम राम राम राम

दुर्ज्ञेयं वेदतात्पर्यमाह परोक्षवाद इति यत्रान्यथा स्थितो ऽर्थः संगोपयितुमन्यथा कथ्यते स परो क्षवादः तथा च श्रुतिः तं वा एतं चतुर्हं संतं चतुर्होतेत्याचक्षते परोक्षेण परोक्षप्रिया इव हि दे वा इति परोक्षवादत्वमेवाह कर्म्ममोक्षायेति अत्र दृष्टान्तः अगदमौषधं यथा पिता बालमगदं पाययन् खंडलड्डुकादिभिः प्रलोभयन्पाययति ददाति च तानि न तावता ऽगदपानस्य त ल्लाभः प्रयोजनं अपि त्वारोग्यं तथा वेदोप्यवान्तरफलैः प्रलोभयन्कर्म्ममोक्षाय कर्म्माणि विधत्ते ४४ ननु कर्म्ममोक्षश्चेत्पुरुषार्थस्तर्हि प्रथममेव कर्म्म त्यज्यतां मत आह नाचरेदिति अ

१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्म फलेअनहंकारेण २

कर्तव्यं

भा० १०

गु २

प्राप्नोति

१ अनहंकारेन

तस्माद्देहोत्तकमेवकुर्वाणोननुनिषिद्धं ननुकर्म्माणिक्रियमाणेतस्मिन्नासक्तिः तत्फलेवस्यान्नतुनेः कि
मन्नूपासिद्धिरतआह निःसंगः आत्माभिनिवेशवान् ईश्वरार्पितंनतुफलोद्देशेनाननुफलस्यश्रु
तत्वात्कर्म्माणिक्रतेफलंभवेदेवनराच्चनार्थतित्कर्म्मणिरुच्युत्पादनार्थं अगदपानेखंडलडु
कादिवत् तत्रश्चकर्म्माभिरुच्यार्थंतदर्थसम्यग्विचारयति तदावियोवाएतदक्षरमविदित्वागार्गि
स्माल्लोकात्प्रैतिसकृपणइत्यनात्मज्ञस्यकृपणत्वं तमेवंवेदानुवचनेनब्राह्मणाविविदिषन्तियज्ञे
नब्रह्मचर्येणतपसाश्रद्धयायज्ञेनानाशकेनचेतियज्ञादीनांज्ञानशेषत्वं चावधार्यनिष्कामपुरु

वेदोक्तमेवकुर्वाणोनिःसंगोर्पितमीश्वरे नैष्कर्म्यांलभतेसिद्धिंरोचनार्थाफलश्रुतिः ४६

यश्चाशुहृदयग्रंथिंनिर्जिहीर्षुःपरात्मनः विधिनापचरेद्देवंतंत्रोक्तेनचकेशव ४७

पा२ लब्धानुग्रहआचार्यात्तेनसंदर्शितागमः महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ४८

शुचिःसंमुखमासीनःप्राणसंयमनादिभिः पिंडंविशोध्यसंन्यासकृतरक्षोर्चयेद्धरिं ४९

अर्चादौहृदयेचापियथालब्धोपचारकैः द्रव्यक्षित्यात्मलिंगानिनिष्पाद्यप्रोक्ष्यचासनं ५०

र्म्मपुरुषन्तेन तत्रश्चस्वर्गकामोयजेतेत्यादिभिःकामित्तस्यस्वर्गादेःफलत्वेनावगमात्कामितोमो
नभवतीतिनैष्कर्म्यसिद्धिरवभवतीतिभावः ४६ वैदिकेकर्म्मयोगमुक्त्वातांत्रिकमाहयश्चाशुइति
परात्मनःपरस्यवसतआत्मनोजीवस्यहृदयग्रंथिमहंकारंबंधंनिर्हर्तुमिच्छुःसतंत्रोक्तेनचविधि
नाप्रकारणभजेत तंत्रमागमः चकारादैदिकेनसहसमुच्चयमाह ४७ तमेवविधिमाहलब्धानु
ग्रहइत्यादिनातेनाचार्येणसंदर्शितआगमःअर्चनप्रकारोयस्यसः ४८ मूर्त्तौसंमुखमा
सीनःप्राणादिशब्देनभूतशुद्ध्यादिपिंडदेहविशोध्यासन्न्यासैःकृतरक्षः ४९ अर्चादौवेवप्र

रक्षा

मे त्रेय पतन जो ४

अ मान ५

तानप्राप्तिं ६

फलेच्छा योन नवति तम नै०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०
चद्देवेस्तन्न्यासो
मूलमंत्रेण २

पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृदि संपूजितां श्रीमूर्त्तिं ध्यात्वा हृदयशिरः शिखाकवचनेत्रास्त्रमंत्रैः
मूलमंत्रेण चार्चयेत् ५१ अंगानि हृदयादीनि उपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां
केः उपचारैरर्चयेत्तदाह पाद्येति आद्यशब्देन मधुपर्कमाचमनं च ५२ अक्षतास्तिलकालंकार
प नतु पूजायां नाक्षतैरर्चयेद्विष्णुं न केतक्या महेश्वरमिति निषेधात् उपहारो नैवेद्यं ५३ शेषां
निर्माल्यं स्वधाम्नि स्वस्थाने देवं हृदि मूर्त्तिकांडके वा ह्युद्वास्य स्थापयित्वा पूजाविधिसमाप

५०१ पाद्यादीनुपकल्प्याथ सन्निधार्य समाहितः हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चये
त् ५१ सांगोपांगां सपार्षदां तां तां मूर्त्तिं स्वमंत्रतः पाद्यार्घ्याचमनीयाद्यैः स्नानवासो
विभूषणैः ५३ गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः सांगं संपूज्य विधिवत्स्तवैः
स्तुत्वा नमेद्धरिं ५४ आत्मानं तन्मयं ध्यायन्मूर्त्तिं संपूजयेद्धरेः शेषमादाय शिरसा स्व
धाम्न्युद्वास्य सत्कृतं ५४ एवमग्न्यर्कतोयादावतिथौ हृदये च यः यजतीश्वरमात्मा
नमचिरान्मुच्यते हि सः ५५ इति श्रीभागवते महापुराणे एकादशस्कंधे विंशः प्रश्नोना
मसप्तविंशोध्यायः राजोवाच यानि यानीह कर्म्माणि यैर्यैः स्वच्छंदजन्मभिः चक्रे क
रोति कर्त्ता वा हरिस्तानि ब्रुवंतु नः १

पंये दितिशेषः ५४ तांत्रिककर्मयोगमुपसंहरति एवमिति ५५ इत्येकादशे टीकायां सप्तविंशोऽध्यायः चतुर्थे एवंवत्
देहाप्रश्नस्योत्तरमुक्तवान् जयंतीनंदनो नाम्नाद्रमिलो नवसप्तमः मूर्त्याभिमतयात्मनश्चय
नेनात्मनः प्रियमवतारं पूजयेदित्युक्ते अवतारज्ञानमपेक्षितं तथा सत्त्वे स्तुत्वा नमेद्धरिमि
त्युक्ते गुणकर्मज्ञानं चापेक्षितम् अतः पृच्छति यानि यानीति कर्त्ता करिष्यति ॥१॥

३५

राम
३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तयाश्हशनिकालत्रयसंबंधिसकलावतारगुणकर्म्माणिकथयितुमशक्यानि संक्षेपतस्तानि कानिचित्कथयि
ष्यामीत्याह यावाइत्यादिना अनुक्रमिष्यन् गुणांस्तु मिच्छतियः सतु बालानामिव बुद्धिर्यस्य स मंदमति
तिः कालेन महता कोपि महामतिः रजांसि गणयेदपि अखिलशक्तिधाम्नः सर्वेशस्य श्रयस्य भग
वतो गुणांस्तु नैव गणयेत् तथाच श्रुतिः विष्णोर्नुकं वीर्याणि प्रवोचंयः पार्थिवानि विममे रजांसि
इत्यादि २ तत्रादौ पुरुषावतारमाह भूतैरिति यदा स्वसृष्टैर्भूतैर्विराजं ब्रह्मांडं पुरं निर्मायतस्मिन्ली
लया प्रविष्टानतु भोक्तृत्वेन प्रभवत्पुण्यस्य जीवस्य तत्र भोक्तृत्वात् ३ अस्य गुणकर्माण्याह हृद्ययेन
यत्कायइति यस्याधिष्ठयः कायएषः कायइति सप्तमि वा तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानक

र्मिल उवाच योवा अनंतस्य गुणाननंताननुक्रमिष्यन्सतु बालबुद्धिः रजांसि भूमेर्गणयेत्क
थंचित्कालेन नैवाऽखिलशक्तिधाम्नः २ भूतैर्यदा पंचभिरात्मसृष्टैः पुरं विराजं विरचय्य त
स्मिन् स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ३ यत्काय एष भुवनत्रय
संनिवेशो यस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्वा
दिभिः स्थितिलयोद्भव आदिकर्त्ता ४ आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्र
तुपतिर्द्विजधर्मसेतुः रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजा

मेंद्रियाणि यस्य स्वतः स्वरूपभूतात्सत्वात्तनुभृतां ज्ञानं यस्य स्वतः सिद्धं ज्ञानमितिवा य सु ५
स्य श्वसनतः प्राणात् बलं देहशक्तिः ओजः इंद्रियशक्तिः ईहा क्रियाय असत्वादिभिर्विश्वस्य स्थितिलयोद्भवे
आदिकर्त्ता ४ आदिकर्तृत्वमेनन्तरस्य वर्ककेव्रेणरमपिसंचित न दर्शयितुं गुणावतारद्वारा चराचरस
स्यादिकर्तृत्वमाह आदाविति यस्य येनुषंगः यस्य रजसा अस्य जगतः सर्गे कार्ये शतधृतिर्ब्रह्मा अभूत्
स्थितौ च विष्णुः यस्य सत्वेन तिरोषः क्रतुपतिः तत्फलदाता द्विजातीनां तद्धर्माणां च सेतुः पालक इत्य

७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११०

२१

धर्म्मस्य भार्यायां दक्षदुहितरि मूर्त्तिसंज्ञायां नारायणो नर इति मूर्त्तिद्वयेन अजनिष्ट जातः तच्चरितमाह नैष्क
र्म्यमात्मस्वरूपं लक्ष्यते येन तत्कर्म निर्हारि तत्प्रवाहवाचनाय स्वादिरूपः स्वयं च चार च यो अद्यापि कर्म चर
न्नास्ते ऋषिवर्य्यैर्निषेविताङ्घ्रिर्यस्य सः ६ भगवदवतारत्वद्योतकं परमोपशमं दर्शयितुमितिहा
समाह इन्द्र इति दत्ताशिः धामस्थानं तपसा गृहीतुमिच्छतीति विशङ्क्य तपोनाशाय कामं सपरिवा
रं प्रेषयामास स कामः बदरीति कृपाख्यायतनं तत्र आश्रमं अप्सरोगणादिभिः सह गत्वा स्त्री
१६ णां प्रेक्षणान्येव इषवो बाणास्तैर्न तस्य महिमानं जानातीति अतन्महिज्ञः ७ अक्रमं अपराधं

धर्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशान्तः। नैष्कर्म्यल
क्षणमुवाच चचार कर्म्म यो ऽद्यापि चास्त ऋषिवर्य्यनिषेविताङ्घ्रिः ६ इन्द्रो विशङ्क्य
मम धाम जिघृक्षतीति कामं न्ययुङ्क्त सगणं स बदर्युपाख्यं गत्वाप्सरोगणवसंत
हरनमक्र ८ सुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञाय शक्रकृतमक्रममादिदेवः
प्राह प्रहस्य गतविस्मय एजमानान् मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो
बलिमशून्यमिमं कुरुध्वं ८ इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशिर
सः सघृणं तमूचुः नैतद्विभो त्वयि परे ऽविकृते विचित्रं स्वारामधीरनिकरानत

अहो अहं धीर इति विस्मयो गर्वः तद्रहितः एजमानान् शापभियाकंपमानान् भो विभो समर्थ
देववध्वः मा भैष्ट बलिमातिथ्यं तान्प्रार्थयते इमम् अस्माकम् आश्रमम् आतिथ्याभावे शून्यप्रायः स्यादि
त्यर्थः हे नरदेव अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडा नितरां नम्राणि
शिरांसि येषां ते लज्जाभरेणैवावनत शिरस्का इत्यर्थः सघृणं यथा भवति कृपां जनयन्त इत्यर्थः
कृपायुक्तं नमितिवामायातः परे अप्रते अविकृते स्वारामा आत्मारामा धीरास्तेषां निकरैः आनतौ पादप

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्माकं चापराधाचरणं स्वभावत्वान्न चित्रमित्याहुः त्वामिति त्वां सेवतां सेवमानानां सुरैरिन्द्रादिभिः कृता अन्तराया विघ्ना भवंति कस्मादित्यत आहुः स्वौक इति स्वस्थानं स्वर्गमतिक्रम्य परमं ते तव पदं व्रजतां नान्यस्य त्वाम् असेवमानस्य कुतः यो हि बर्हिषि यज्ञे स्वभागान्पुरोडाशादीन् बलीन् करान् दत्वा ददतो वर्तते इन्द्रादिभ्यो ददतः प्रयच्छतः तर्हि किमङ्ग त्वद्भक्तो विघ्नैर्भ्रश्यति नेत्याहुः धत्त इति यदीति निश्चये यतस्त्वं सर्वसुराधीश्वरो अविता रक्षको अतोऽसौ विघ्नानां मूर्ध्नि पदं अग्रिं धत्ते अतः पुनस्त्वयि विघ्नशंकेति भावः १० त्वद्भक्तानां तु केवलं तपः अरं नाहुर्योगिनः अस्माकं वा वशं यांति क्रोधस्य वा तत्रास्मद्वशाः कामोपभोगमपि तावदनुभवंति क्रोधवशाः पुनरति

त्वां सेवतां सुरकृता बहवोन्तरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते नान्यस्य बर्हि
षि बलीन्ददतः स्वभागान् धत्ते पदं त्वमविता यदि विघ्नमूर्ध्नि १० क्षुत्तृट्त्रिकाल
गुणमारुतजैह्व्यशैश्नानस्मानपारजलधीनतितीर्य केचित् क्रोधस्य यांति वि
फलस्य वशं पदे गोर्मज्जंति दुश्चरतपश्च वृथोत्सृजंति ११ इति प्रगृणतां तेषां स्त्रियो
त्यद्भुतदर्शनाः दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः १२ ते देवानुचरा दृष्ट्वा
स्त्रियः श्रीरिव रूपिणीः गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः १३ राम श्री

मंदा इत्याहुः क्षुत्त्विति क्षुच्च तृट् च त्रिकालगुणाश्च शीतोष्णवर्षाणि मारुतश्च प्राणो बाह्यो वा जैह्व्यं जिह्वाभोगाः शैश्नाः गुह्योपभोगाश्च एतान् समान् अपारजलधीन् अपारान् अतितीर्य विरक्ता गोष्पदे मज्जंति कुतः यतः क्रोधस्य विफलस्य वशं यांति गच्छंति किंच अन्ते मज्जंतो यथा विवशाः संतो मस्तकारोपितं भारमुत्सृजंति तथा वृथैव नमोक्षाय न च भोगाय शापादिना दुश्चरं तप उत्सृजं ति ११ स्त्रियः योगनिर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठु अलंकृताः तेषां स्वलावण्यादि दर्शयन्

रामनायदर्शयामास १२ रूपिणी मूर्तिमत्यः श्रीरिव ताः स्त्रियः
स्त्रीर्दृष्ट्वा तासां रूपस्यौदार्येण महत्त्वेन हृता श्रीः कान्तिर्येषां ते १३

भा०१० श्चंवृणीध्वं कवयंवराकाः केचेमाइतिवित्त आह सवर्णा समानरूपा नैकाप्यस्मदनुरूपेतिचेत्तर्माभवतु य
थापिस्वर्गस्य भूषणरूपा १४ सुरवंदिनः देवभृत्याः १५ इंद्रायइंद्रप्रतिनारायणवल्लभूचुः शक्रः तत्रासत्र
सयाप्तः विस्मितआसेतिवा १६ अन्यानप्यवतारांस्तच्चरितानिचाह हंसस्वरूपीति हं तः दत्तात्रेयः कुमा
रः सनकादिः नः पिता ऋषभश्च विष्णुरेवकलयावतीर्णाः सन्नात्मयोगमवदत् येनविष्णुनाहयास्येह

तानाहदेवदेवेशः प्रणतान्प्रहसन्निव आसांमेकतमांवृध्वंसवर्णास्वर्गभूषणां १४ ॐ मि
त्याहेशामादायनत्वासुरवंदिनः उर्वशीमप्सरः श्रेष्ठां पुरस्कृत्यदिवंययुः १५ इंद्राया
स२ नमस्सदसिशृण्वतांत्रिदिवौकसां ऊचुर्नारायणवलंशक्रस्तत्राविस्मितः १६ हंसस्व
रूप्यवददच्युतआत्मयोगंदत्तः कुमारऋषभोभगवान्पितानः विष्णुः शिवायजगतां
कलयावतीर्णस्तेनाहृतामधुभिदाश्रुतयोहयास्ये १७ गुप्तोऽप्ययेमनुरिलौषधय
श्चमात्स्यक्रौडेहतोदितिजउद्धरताऽंभसःक्ष्मां कौर्म्येधृतोद्रिरमृतोन्मथनेस्वपृ
वि२ ष्ठेग्राहात्प्रपन्नमिभराजममुंचदार्तं १८ संस्तुन्वतोऽब्धिपतितान्श्रमणानृषींश्च
शक्रंचवृत्रवधतस्तमसिप्रविष्टं देवस्त्रियोऽसुरगृहेपिहिताअनाथाजघ्नेऽसुरे
द्रमभयायसतांनृसिंहो १९

यग्रीवावतारेमधुभिदासता ततः श्रुतयः आहृताः १७ इलापृथ्वी ओषधयश्चगुप्ताः क्रौडेवराहा
वतारे याह क्रौडेंद्रमंमुंचन्मोचयामास एवमादौयत्रावतारनामनास्तितत्रविष्णुः शिवायजगतां
कलयावतीर्णइत्यनुवर्तनीयं १८ संस्तुन्वतास्तुतिकुर्वाणान् ऋषिन्वाकु खिल्यानुकश्य
पार्थसमिदाहरणेगोःपदेनिमग्नानिंद्रेणापहसितान्कुद्धात्पापदोमोचयत् तमसिब्रह्महत्यायां

१७ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंतरेषु सर्वेषु मन्वंतरेषु कलाभिर्मूर्त्तिभिर्भुवनानि अदधात् अपालयत् इमां क्ष्मां समदात् अदात् १० हैहयानां कुलस्याप्ययाय भार्गवरूपोग्निः सरामो दाशरथिः स नृसलंकेलंकायां स्थितं स चजयति वर्त्तमानकालीनावतार इत्यर्थः २१ भाविनं राम कृष्णावतार मोहाभूमरिति बुद्धावतारमाह वा देरिति अनर्हान् यज्ञानर्हान् दैत्यान्विमोहयिष्यति कल्क्यवतारमाह शूद्रानिति न्यहनिष्य

देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः भूत्वाथ वामन
२१ इमामहरदहो लेः क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्यः २० निःक्षत्रियामकृत गां च
त्रिसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः सोब्धिं बबंध दशवक्त्रमहन्सलंके
सीतापतिर्जयति लोकमलघ्नकीर्तिः २१ भूमेर्भरावतरणाय यदुष्वजन्मा जातः करि
ष्यति सुरैरपि दुष्कराणि वादैर्विमोहयति यज्ञकृतो ऽतदर्हान् शूद्रान्कलौ क्षितिभुजो
न्यहनिष्यदंते २२ एवंविधानि कर्माणि जन्मानि च जगत्पतेः भूरीणि भूरियशसो वर्णितानि महाभुज २३ इति श्रीभा० म० एकादशस्कंधे चतुर्थोऽध्यायः राजोवाच भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः तेषामशांतकामानां का निष्ठाऽवि
जितात्मनां १

न्यहनिष्यति २२ २ इत्येकादशे चतुर्थः पंचमे भक्तिहीनानां का निष्ठा का
युगे युगे विष्णोः पूजाविधिः प्रश्नद्वयात्तरमुच्यते १ वासवंतासुर कृता वहवोंतरायाइत्येन न श्रीह
रिभक्ता विघ्नमूर्द्धिपदं दत्वा परां गतिं यांति अभक्तानां तु विघ्ना भवंतीत्युक्तेन हि तेषां का गतिर्भवती
ति पृच्छति भगवंतमिति हि आत्मवित्तमाः अविजितात्मनां अत एवाशांतकामानां का निष्ठा किं प्राप्य

भा०ए०

१८

स्वजनकस्ययुगुरोर्भगवतोः नाहरान्धुरुद्रोहेणदुर्गतिंयांतीतिवक्तुं भगवतासकाशाद्ब्राह्मणादीनांमुत्पत्तिमाह
मुखेति गुणैः सत्वेनविप्रः सत्वरजोभ्यांक्षत्रियः रजस्तमोभ्यांवैश्यः तमसाशूद्रइति २ एषांमध्येये ३
ज्ञात्वात्रभजंति येचज्ञात्वाप्यवज्ञानंति आत्मनःप्रभवाज्जन्मयस्मात्तं तदभजनेहेतुरघूनामप्या
हइश्वरमिति स्थानाद्ब्राह्मणादिभ्यःभ्रष्टाः ३ तत्रये३ज्ञास्तेभवद्विधानामनुग्राह्याइत्याहदूरइति दूरेह
रिकथाश्रवणंयेषांते अतएवदूरेचअच्युतकीर्तिर्नस्तिर्वा ४ ज्ञानलवेदुर्विदग्धास्त्वचिकित्स्याइ
त्युपेक्ष्याइत्याशयेनाह विप्रइति श्रौतेनेउपनयनाख्येन उपलक्षणमेतत् अध्ययनादिनापिह
रेःपदांतिकंगताःअज्ञानात्नमाधिकारंप्राप्ताअपिमुह्यंतिकर्मफलेषुसज्जंतेकुतःआम्नायेषुयेवादाः

चमसउवाच मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैःसह चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयः
पृथक् २ यएषांपुरुषंसाक्षादात्मप्रभवमीश्वरं नभजंत्यवजानंतिस्थानाद्भ्रष्टाःपतंत्यधः ३
दूरेहरिकथाःकेचिद्दूरेचाच्युतकीर्तनाः स्त्रियःशूद्रादयश्चैवतेनुकंप्याभवादृशां ४
विप्रोराजन्यवैश्यावाहरेःप्राप्ताःपदांतिकं श्रौतेनजन्मनाथापिमुह्यंत्याम्नायवादि
नः ५ कर्मण्यकोविदास्तब्धामूर्खाःपंडितमानिनः वदंतिचाटुकान्मूढायथामाध्व्यागि
रोत्सुकाः ६

द्यारे

अर्थवादाः तेमोहकतयाविदंतीत्येषांते तदुक्तंगीतासु यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः वे
दवादरताःपार्थनान्यदस्तीतिवादिनइत्यादिना ५ भक्तिमार्गादाद्यौयतेषांमोहप्रपंचयन्निंदति
कर्मणीत्यादिना अकोविदाः यथाबंधकंनभवतितथाकर्तुमज्ञाः नचाभिज्ञाइत्याहुस्तब्धा इति यतः स्त
ब्धा अनम्राः तत्रहेतुः सुस्ते मूर्खा अपिपंडितावयमितिमानवंतः अतःअपामसोममममृताअ
भूम " अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति यत्रनाह्न्यंचनशीतंस्यान्नग्लानिर्नाप्यरात्तयइ
त्यादिकया यथामाध्व्यागिरोत्सुकाः संतोमूढास्तयाचाटुकान् अप्सरोभिःसहविचरिष्यामइत्या

राम

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो वर्द्धन्त इत्याह त्रिभ्यो रजसेति घोराः अभिचारादिसंकल्पा
येषां ते अहिवन्मन्युर्येषां ते ७ कामुकत्वं प्रपंचयति वदंतीति उपासिताः स्त्रियो यैः ते न तु वृद्धाः तेभ्यो
न्यः मिथुनसुखमेव परं न त्वातिथ्यादि येषु गृहेषु तेषु आशिषो वदंति इदमद्य मया लब्धमिमं प्राप्स्ये मनो
रथं इदमस्तीदमपि मे भविष्यति पुनर्धनमित्याकारा दांभिकतां प्रपंचयति यजंतीति असृष्टान्नविधान
न१ दक्षिणं असृष्टः न संपादिता अन्नविधानदक्षिणा यथा यजंति तदाह वृत्त्यै जीविकार्थं परं केवलं पशून् तथा१

रजसा घोरसंकल्पाः कामुका अहिमन्यवः दांभिका मानिनः पापा विहसंत्यच्युतप्रि
यान् ७ वदंति तेन्योन्यमुपासितस्त्रियो गृहे मैथुन्यपरेषु चाशिषः यजंत्यसृष्टा सुरेषु
न्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः ८ श्रिया विभूत्याभिजनेन विद्य
या त्यागेन रूपेण बलेन कर्मणा जातस्मयेनांधधियः सहेश्वरान्सतोऽवमन्यंति
हरिप्रियान्खलाः ९ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्ट
मीश्वरं वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्तया ॥१०

घ्नंति अतद्विदः हिंसादोषानभिज्ञाः ८ मानितां प्रपंचयति श्रियेति श्रिया धनादिसंपदा विभूत्या
ऐश्वर्येण अभिजनो जातिः यः स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान् सतः अवमन्यंते ९
किंच एवं वर्तमानास्ते वेदतत्त्वार्थं स्फुटमपि न जानंतीत्याह सर्वेष्विति केन रूपेणावस्थितं तदा
ह आत्मानमीश्वरं आत्मत्वादीश्वरत्वाच्चावस्थितं एवमप्यसंगतामाह यथा खं पुरुषार्थत्वामो
हे अभीष्टं स्फुटत्वमाह वेदोपगीतं चेति तत्कुतः यतो मनोरथानां व्यवायामिषमद्यसेवा विषया

ण्णं वार्तया प्रवदंति १०
निरन्तिपरं वेदं प्रवर्तिपरं वर्णयंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु व्यवायादीनामपि क्रान्तो भार्यामुपेयात् हुतशेषं भक्षयेत्यादिना विहितत्वात्किमेवं निषिध्यते तत्राह लो-
केइति व्यवायः स्त्रीसंगः नित्याः रागत एव नित्यप्राप्ताः जंतोः प्राणिमात्रस्य अतस्तत्र तासु चोद-
नाविधिर्नास्ति ननु ऋतावुपेयादित्यादिविधिर्दृश्यते सत्यं न त्वयमपूर्वविधिः रागतः प्राप्तत्वात्
किंतु नियमविधिरूपेण रागिणामभ्यनुज्ञामात्रं क्रियते तदाह व्यवस्थितिरिति तेषु व्यवाया-
दिषु कैः विवाहयज्ञसुराग्रहैः विवाहविषय एव व्यवायः कार्यः यज्ञे एवामिषसेवा सौत्रामण्या
सुराग्रहानुग्रहो नीतिः अन्यत्रैवं मद्यसेवेति नियमः क्रियते ननु च नियमपक्षे प्यावश्यकत्वा-
न्निंदायुक्ता अत आह आसु निवृत्तिरिष्टेत्ययं भावः नायं नियमविधिरपि नित्यप्राप्तत्वात्
अतो निवृत्तिः परिसंख्यैव आसु व्यवायामिषमद्यसेवासु विधित्विष्टः कथं तर्हि व्यवस्थितिरि-
त्युक्तं उच्यते न तावत्परिसंख्याविधिना अन्यत्र निवृत्तिरुच्यते तथासति स्वार्थत्यागः परार्थ-

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना व्यवस्थितिस्तेषु विवाहयज्ञ
सुराग्रहैरासु निवृत्तिरिष्टा ॥११॥

कल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् अतः केचिदप्राप्तस्य प्रापणमनर्थकमित्यपूर्ववि-
धिद्वाराऽन्यनिवृत्तिफलता भवति तद्यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र
रशनालिंगत्वाद्गर्दभाश्वाभिधानीरशनाद्वय प्राप्त्यतो मंत्रस्यापूर्वविधिद्वारा परिसंख्योच्यते यथा
वा तत्र वार्त्तिकोऽप्राप्तविधिरेवायमतो मंत्रः अनिश्चितः परिसंख्याफले नोक्तानि विशेषः पुनः अ-
नेरिति केचित्तु रागतो नित्यप्राप्तस्य अप्राप्तांशपूरणलक्षणस्य नियमफलस्याभावान्नियम-
विधिद्वाराफलतः परिसंख्या भवति यथा पंच पंचनखा भक्ष्या इति तथा रागतो नित्यवत्प्राप्तस्य
व्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा परिसंख्यैव तत् ननु यद्यभ्यनुज्ञामात्रमेतत्केवलं तर्हि
ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति घोरायां भ्रूणहत्यायां पच्यते नात्र संशय इत्यादिदोष

अश्वाभिधान्यादानं स्वार्थो विधेः तस्य त्यागः गर्दभाभिधान्याभावः विध्यपेक्षया परस्य निषेधस्यार्थस्य कल्पना लिंगं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं व्यवायादिमनोरथाकुलितत्वाद् भीष्ममात्मानं न शृण्वन्तीत्युक्तं इदानीं धनस्यापि धर्मद्वारा परमात्म
भवती॰ प्रापकस्य दृष्टोपभोगार्थं विनियोगान्नात्मज्ञानं धोपौत्याह धनं चेति धर्म एवेकः फलं यस्य तत् कुतः
यतो धर्मात् सविज्ञानं अपरोक्षज्ञानसहितं हृदं परोक्षज्ञानं भवति केथंभूतं अनुप्रशांति अनु
नं अंतरमेव प्रकृष्टा शांतिर्निर्वाणलक्षणा यस्य तत् एवंभूतं धनं गृहेषु देहाद्यर्थं युंजंति ११ किंच यवस्थे
याविव्यवायाद्यनुज्ञानयेयेष्टा अपि त्वन्यथैवेत्याह यदिति यद्यस्मात् सुरायाः घ्राणभक्षः अवघ्रा
णं स एव विहितः न पानं तथा पशोरालभनमेव विहितं न तु हिंसा अयमर्थः देवतोद्देशेन यत्पशुह

वै धनं च धर्मैकफलं यतो ज्ञानं सविज्ञानमनुप्रशांति गृहेषु युंजंति कलेवरस्य मृत्युं न प
श्यंति दुरंतवीर्यम् ११ यत् घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा
एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं १३ ये त्वनेवंविदोऽसंतः स्तब्धाः
सदभिमानिनः पशून् द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् १४ राम राम॥

ननैतदालभनं वायव्यं श्वेतमालभेतेत्यादिश्रुतेः ननु हिंसा यावद् विहिताहिंसा सा न हिंसेति की
र्त्यते इति वचनात् भक्षणादेरननुक्रियमाणं लौकिके हननवद्धिंसैव अत्रालभनमेव विहितं
न तु हिंसा अतो न यथेष्टभक्षणाभ्यनुज्ञेत्यर्थः व्यवायोऽपि प्रजयानिमित्तभूतया न तु रत्ये अतो मनो तन्निषेधप्रपंच
नएवं२ रथवादिन इमं विशुद्धं स्वधर्मं न विदुरिति १३ एवं भगवत्पराङ्मुखानां बहुदोषतां प्रपंचयति पंच
भिः ये त्विति अनेवंविदः धर्मं विदंतीयत्त विस्रब्धाः निःशंकाः अनेन मनोरथा भविष्यतीति विश्व
स्ताचा तदानीं तनं पाषणनवाते पशुभिर्विश्वस्ताः ते पशवः प्रेत्य अमुत्र तान् खादंति मांसभ
क्षयिताऽमुत्र यस्य मांसमिहाद्म्यहं एतन्मांसस्य मांसत्वं प्रवदंति मनीषिण इति वचनात् १४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११ अभिचारादिना द्विषंतः मृतके देहे सानुबंधे पुत्रादिसहिते १५ अज्ञास्तावदेवं ज्ञैरनुकंपितास्तरंति तत्वज्ञा
स्तावत् । ये तु नात्यंतमज्ञाः न च तत्वज्ञाः ते तेरालववर्तिनः पतंतीत्याह य इति कैवल्यं तत्वज्ञानमसंप्रा
२० प्ताः तत्र हेतुः त्रिवर्गप्रधानाः अक्षणिकाः उपशांतिक्षणरहिताः देहादिस्वच्छयैव बुद्ध्या वा स्वयमेवा
त्मानं घातयंति १६ तदाह एत इति आत्महनः आत्मापकर्षवकर्त्तारः अज्ञाने कर्मणि तथा च श्रुतिः अ
सुर्या नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्यापि गच्छंति ये के चात्महनो जना इति १७ या गृहापत्य

द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरं मृतके सानुबंधेऽस्मिन्बद्धस्नेहाः पतंत्यधः १५
ये कैवल्यमसंप्राप्ता ये चातीताश्च मूढतां त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते १६
एत आत्महनोऽशांता अज्ञाने ज्ञानमानिनः सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः १७
हित्वात्मायासरचिता गृहापत्यसुहृच्छ्रियः तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः १८
राजोवाच कस्मिन्काले स भगवान् किंवर्णः कीदृशो नृभिः नाम्ना वा केन विधिना पूज्यते
तदिहोच्यतां १९ करभाजन उवाच कृतं त्रेता द्वापरं च कलिरित्येषु केशवः नानाव
र्णाभिधाकारो नानैव विधिनेज्यते २० कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः कृष्णा
जिनोपवीताक्षान्बिभ्रद्दंडकमंडलू २१

सुहृच्छ्रियस्ता हित्वा १८ तदेवं भगवद्भक्तिरेव कर्त्तव्येति स्थिते तत्र विशेषं पृच्छति कस्मिन्काल इति ॥ राम
किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाकारः केन वा नाम्ना केन वा विधिना १९ एषु कृतादिका २०
लेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण २० तदेव वर्णादि
चतुष्टयमाह कृत इत्यादिना कृष्णाजिनादीन् बिभ्रदिति ब्रह्मचारिवेषधारीति २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपसाध्यानेन। २२ ३ त्रिगुणेति क्षामांगभूतामेखलायस्यसः यज्ञमूर्त्तिः हिरण्यकेशः पिशंगकेशः। २४
त्रय्याविद्ययावद्वत्रय्योक्तकर्मभिः २५ वृष्णिगर्भः तस्याः पुत्रः वृषाकपिः स्मृतः सर्वेषंतिकामानुत्र्या
वेपयतिक्लेशानितितथा जयत्येवसर्वदेतिजयंतः। २६ श्यामः अतसीपुष्पसंकाशः निजानि च
केतोन्यायुधानियस्यसः श्रीवत्सोनामवक्षसोदक्षिण भागेरोमणांप्रदक्षिणावर्त्तः सः आदिर्येषां

मनुष्यास्तत्तदाशांतानिर्वैराः सुहृदः समाः यजंतितपसादेवंशमेनचदमेनच २२ हं
सः सुपर्णोवैकुंठोधर्मोयोगेश्वरामलः ईश्वरः पुरुषाव्यक्तः परमात्मेतिगीयते २३ त्रे
तायांरक्तवर्णोसौचतुर्बाहुस्त्रिमेखलः हिरण्यकेशस्त्रय्यात्मास्रुक्स्रुवाद्युपलक्ष
णः २४ तंतदामनुजादेवंसर्वदेवमयंहरिं यजंतिविद्ययात्रय्याधर्मिष्ठाब्रह्मवादिनः
२५ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेवउरुक्रमः वृषाकपिर्जयंतश्चउरुगायइतीर्यते २६
द्वापरेभगवान्श्यामः पीतवासानिजायुधः श्रीवत्सादिभिरंकैश्चलक्षणैरुपलक्षि
तः २७ तंतदापुरुषंमर्त्यामहाराजोपलक्षणं यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप
२८ नमस्तेवासुदेवायनमः संकर्षणायच प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः
२९ नारायणायऋषयेपुरुषायमहात्मने विश्वेश्वरायविश्वायसर्वभूतात्मनेन
मः ३० इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरम् नानातंत्रविधानेनकलावपियथाशृणु ३१

करचरणादिगतपद्मादीनांतैः अंकैः अंकितैश्चिह्नैः लक्षणैर्वा ईडेः कौस्तुभादिभिः। २७ महाराजोप
लक्षणंछत्रचामरादियुक्तं वेदतंत्राभ्यां वैदिकेनागमिकेनचमार्गेणयजंतिपूजयंति परं ई
श्वरंज्ञातुमिच्छवः २८ नामान्याहनमस्तइति २९ ३० नानातंत्रविधानेनेतिकलौतंत्रमार्गस्यप्र

कृष्णत्वाख्यावर्णयति त्विषाकांत्याऽकृष्णमिंद्रनीलमणिवदुज्वलं यद्वा त्विषाकृष्णं कृष्णावतारं अ
नेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि अ
स्त्राणि सुदर्शनादीनि पार्षदाः सुनंदादयः तत्सहितं यज्ञैरर्चनैः संकीर्त्तनं नामोच्चारणं स्तु
तिश्च तत्प्रधानैः सुमेधसो विवेकिनः ३२ स्तुतिमाह ध्येयमिति हे प्रणतपाल हे महापुरुष ते
चरणारविंदं वंदे कथंभूतं ध्येयं ध्यानयोग्यं सदेति सर्वत्र संबध्यते ध्येयत्वे हेतवः इंद्रियकुटुं
बादिभ्यः परिभवस्तिरस्कारः तं हंतीति तत् किंच अभिष्टदोहं मनोरथपूरकं किंच तीर्था
स्पदं गंगाद्याश्रयत्वेन परमपावनं शिवविरिंच्याभ्यां नुतं स्तुतं महत्तमं ननु गोकुलनाथा एव किम
र्थंताभ्यां नुतं तत्राह शरण्यं आश्रययोग्यं सुरवांछकमित्यर्थः तर्हि ब्रह्मादिस्तोत्रं प्राकृतस्य कथं गो

कृष्णवर्णं त्विषाकृष्णं सांगोपांगास्त्रपार्षदं यज्ञैः संकीर्त्तनप्रायैर्यजंति हि सुमेधसः ३२ ध्येयं
सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंच्यनुतं शरण्यं भृत्यार्त्तिहं प्रणतपाल भवाब्धि
पोतं वंदे महापुरुष ते चरणारविंदं ३३ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यव
चसा यदगादरण्यं मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदं ३४

चरं स्यात् तत्राह भृत्यार्त्तिहं यस्य कस्यापि भृत्यमात्रस्यार्त्तिं हंतीति न केवलं मार्गानुकारिमात्रं हेतिः
किंतु भवाब्धिपोतं संसारार्णवतारकं च ३३ इदानीं स्वयमाप्तकामत्वान्नैरपेक्ष्यं भक्तार्थं च साक्षेप
तां दर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति अन्यैः सुदुस्त्यजां यां सुरेप्सितां राज्यलक्ष्मीं त्यक्त्वा य
दितियत्तदोस्त्यर्थः यः अरण्यमगात् किं राज्यवैकल्यदर्शनेन नाधर्मिष्ठः कुतः आर्यस्य गुरोर्दश
रथस्य वचसा किंच एवं राज्यं त्यक्त्वाऽपि भक्तवात्सल्येन दयितया सीतया ईप्सितं मायामृगं स्व
र्णकारं यो न्वधावत् तस्य भगवतश्चरणारविंदं वंदे यद्वा हे धर्मिष्ठेति संबोधनं तथाऽप्य विवक्षि
तवाच्यपदेन संधिर्न भवति तथा यदगादिति चरणारविंदमेवोच्यते यच्च मायामृगमन्वधावत्

दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युगानुरूपाभ्यां नामरूपाभ्यां ३५ एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह कलिमिति गुणज्ञाः कलेर्गुणं जानन्ति
येन ननु दोषाणां बहुत्वात् कथं सभाजयन्ति तत्राह सारभागिनः गुणांशग्राहिणः कोऽसौ गुणः तमाह यत्रे
ति नह्युक्तं ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवं इति ३६
तस्मात्कलेरुत्तमत्वं अस्मात्संकीर्तनात् परमो लाभो नास्ति यतः संकीर्तनात् ३७ किंच कृतादिष्विति

एवं युगानुरूपाभ्यां भगवान् युगवर्तिभिः मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ३५ कलिं स
भाजयन्त्यार्या गुणज्ञाः सारभागिनः यत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ३६ नह्यतः
परमो लाभो देहिनां भ्राम्यतामिह यतो विन्देत परमां शान्तिं नश्यति संसृतिः ३७ कृतादिषु प्र
जा राजन् कलाविच्छन्ति संभवं कलौ खलु भविष्यन्ति नारायणपरायणाः ३८ क्वचित्क्वचिन्म
हाराज द्रविडेषु च भूरिशः ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ३९ कावेरी च म
हापुण्या प्रतीची च महानदी ये पिबन्ति जलं तासां मनुजा मनुजेश्वर प्रायो भक्ता भगव
ति वासुदेवेऽमलाशयाः ४० देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन्
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कर्तं ४१ राम राम राम राम राम

३८ ३९ अमलाशयाः संतः प्रायः प्रायशो भगवति भक्ता भवन्ति ४० भक्तस्य विधिनिषेधनिवृत्तिः कृतार्
त्वमाह देवर्षीति आप्ताः पोष्याः कुटुम्बिनः इतरे देवादयः पंच यज्ञदेवताः एतेषां यथान्य भक्तः
ऋणी अतएव तेषां किंकरः न तदर्थं नित्यं पंचयज्ञादि कर्तेति तथा च स्मृतिः हीनजातिं परिक्षीणमृणार्थं
कर्म कारयते इति अयं तु न तथा कोऽसौ यः सर्वभावेन श्रीमुकुन्दं शरणं गतः कर्तं कृत्यं परिहृत्य यद्वा कर्तं

स्कं०११ विहितकर्मनिवृत्तिमुक्ता निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह स्वपादमूलमिति त्यक्तः अन्यस्मिन् देहो दे
वतांतरे वा भावो येन अत एव तस्य विकर्मणि प्रवृत्तिर्न संभवति यच्च कथंचित्प्रमादादिना उत्पतितं भवे सं
२२ त् तदपि हरिर्धुनोति ननु यमस्तन्न मन्येत तत्राह परेशः ननु च श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात्तदाज्ञा
भंगं कथं सहेत तत्राह प्रियस्याननुतां यं पापक्षयार्थं भजते तत्राह हृदि संनिविष्टः न हि वस्तुशक्तिः प्रियताम
पेक्षत इत्यर्थः ४२ जायंतेयान् ऊर्जयंत्याः पुत्रान् ४३ उपातिष्ठन् अनुतिष्ठन् ४४ निःसंगो भूत्वा ४५ शास्त्र

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः। विकर्म यच्चोत्पतितं कथंचिद्धुनोति
सर्वं हृदि संनिविष्टः ४२ नारद उवाच धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः। जाय
भा न्तेयान्मुनीन्प्रीतः सोपाध्यायो ह्यपूजयत् ४३ ततोऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः।
राजा धर्मानुपातिष्ठन्नवाप परमां गतिं ४४ त्वमप्येतान्महाभाग धर्मान्भागवतान्श्रुतान्। आ
टी स्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ४५ युवयोः खलु दंपत्योर्यशसा पूरितं जगत्। पुत्र
तामगमद्यद्वां भगवानीश्वरो हरिः ४६ दर्शनालिंगनालापैः शयनासनभोजनैः। आत्मा
वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ४७ वैरेण यं नृपतयः शिशुपालपौंड्रशाल्वादयो ग
तिविलासविलोकनाद्यैः। ध्यायंत आकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधि
यां पुनः किं ४८

प्रक्रियामुक्त्वा युवां तु संगता एव कृतार्थौ इत्याह युवयोरिति वां युवयोः ४६ न च
सर्वकर्मार्पणादि भागवतधर्मैरन्येषामिव युवयोः सत्त्वशुद्धिरापादनीया पुत्रोपलालनेनैव भागवतधर्म
सर्वस्वं निष्पन्नमित्याह दर्शनेति कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा पावितः शोधितः ४७ राम
एतदेव कैमुत्यन्यायेन स्फुटयति वैरेणेति ये राय नामनादे वैरेणापि ध्यायंतस्तस्य गतिविलासादिभिः आ २२
कृतधियः तत्तदाकारा ध्यायंतस्तत्साम्यमापुः किं पुनः वक्तव्यमनुरक्तधियां तत्साम्यं भवतीति ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुपुत्रस्नेहश्चेन्मोक्षहेतुस्तर्हिसर्वेमुच्येरन् तत्राहमापत्यबुद्धिमिति अपत्यइतिबुद्धिंमा कृथाः अंङ्गामभ्रष्ठा
हसः ४९ ननुकथमीश्वरोमानुषःस्यात्कथंवातस्यविश्वसृष्ट्यादिकर्तुः पूतनाशोषणादिकमोश्वर्यमिवनिरूप्येत
तत्राहभूभारनृपाअसुराएवयेराजन्यास्तेषांहननेवतान् हंतुनिर्वृत्त्यैमोक्षाय ५० १ इहेअस्मिन्नवदेहेशमलंमोहंवि

माः पत्यबुद्धिमकृथाः कृष्णेसर्वात्मनीश्वरे मायामनुष्यभावेननिगूढैश्वर्येपरेव्यये ४९ भूभारासुरराज
न्यहंतवेगुप्तयेसतां अवतीर्णस्यनिर्वृत्त्यैयशोलोकेवितन्यते ५० शुकउवाच एतच्छ्रुत्वामहाभागोवसुदे
वोतिविस्मितः देवकीचमहाभागाजहतुर्मोहमात्मनः ५१ इतिहासमिमंपुण्यंधारयेद्यःसमाहितः
सविधूयेहशमलंब्रह्मभूयायकल्पते ५२ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेवसुदेवनारद
संवादेजायंतेयोपाख्यानेनामपंचमोध्यायः बादरायणिरुवाच अथब्रह्मात्मजैर्देवैः प्रजेशैरावृ
तोभ्यगात् भवश्चभूतभव्येशोययौभूतगणैर्वृतः १ इंद्रोमरुद्भिर्भगवानादित्यावसवोश्विनो
ऋभवोंगिरसोरुद्राविश्वेसाध्याश्चदेवताः २ गंधर्वाप्सरसोनागाः सिद्धचारणगुह्यकाः ऋष
यः पितरश्चैवसविद्याधरकिन्नराः द्वारकामुपसंजग्मुः सर्वेकृष्णदिदृक्षवः ३ वपुषायेनभग
वान्नरलोकमनोरमः यशोवितेनलोकेषुसर्वलोकमलापहं ४ राम राम राम राम राम

ब्रह्मलाय १ धूयकल्पते ५२ इत्येकादशेपंचमः षष्ठेब्रह्मादिभिःस्तुत्वागंतुंविज्ञापितोहरिः उद्धवःप्रार्थयामासस्वधामन राम
यमामिति १ अतःपरमतिविस्तरेणात्मविद्यांनिरूपयितुंतत्प्रस्तावमाह अथेति आत्मजैःसनकादि २३
भिः अभ्यगात् द्वारकामितिचतुर्थेनान्वयः ३ ननुतेषामुपेंद्रादिरूपंसगोचरंनित्यंपश्यतांकोयमितिदिदृक्षेव
क्षाअतआहवपुषेति येनवपुषानरलोकमनोरमः सन् सर्वलोकेषुयशोवितेनेतदतिसुंदरंवपुर्दिदृक्षवः
४

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

२३

वि १ स्मि २

व्यचक्षत अपश्यन् ५ स्वर्गोद्यानस्थैर्माल्यैः ६ चित्राणि शृंखलवंधप्रायाणि पदानि अर्थाश्च यासु ताभिर्गीर्भिः ६
बुद्धीन्द्रियादिभिर्दर्शनादिना प्राणेन बलहेतुना दंडवत्प्रणिपातेन नमनेनावयं नमस्कृतवंतः स्मेति विस्मये य
थाहुः दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा मनसा वचसा चेति प्रणामोष्टाङ्ग ईरित इति स्मशब्दोक्तो विस्म
याय विशेषणे कर्ममयादुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमंतर्हृदि चिंत्यते न तु दृश्यते तदद्य यन्नताः
अहो भाग्यमित्यर्थः ७ ननु ममापि दृष्टादृष्टकर्मकरणात्कुतो मत्पदारविंदचिंतनेन कर्मपाशान्मुमुक्षुभिः

तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः व्यचक्षताऽवितृप्ताक्षाः कृष्णमद्भुतदर्शनं ॥५
स्वर्गोद्यानोपगैर्माल्यैश्छादयंतो यदूत्तमं गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं ६ देवा ऊचुः
नताः स्म ते नाथ पदारविंदं बुद्धीन्द्रियप्राणमनोवचोभिः यच्चिंत्यतेऽन्तर्हृदि भावयुक्तैर्मुमु
क्षुभिः कर्ममयोरुपाशात् ७ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि
लुंपसि तद्गुणस्थः नैतैर्भवानजित कर्मभिरज्यते वै यत्स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः

नि२ ८ शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपःक्रियाभिः सत्वात्मना
मृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ९ ॥ राम राम राम

क्रियते तत्राहुः त्वमिति हे अजित आत्मनि दुर्विभाव्यं त्वदधीनमिदमत्र कर्म त्वं व्यक्तं महदादिप्रपंचं सृजसि पालय
सि संहरसि च तद्गुणस्थः तस्य मायायाः गुणेषु नि
यंतृत्वेन स्थितः अथ चाप्येतैः कर्मभिर्भवान्नाज्यते न लिप्यते कुतः यो भवान् अनवद्यः रागादिरहितः य
तः स्वे आत्मरूपे अव्यवहिते अनावृते अभिरतः अतस्त्वत्कर्मकर्तृत्वं न प्पात्मारामः परमेश्वर इति मुमु
क्षुभिश्चिंत्यत इति भावः ८ ननु त्वात्मारामस्य किं कर्मकरणेन अत आहुः शुद्धिरिति हे ईड्य हे ऋषभ दु
राशयानां रागिणां विद्यादिभिः तथा शुद्धिर्न भवति सत्वात्मनां सतां ते यशसि विना नायं तव कर्माचरण

राम २३

विपाउपालना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवत्वद्यशश्रेष्ठं द्रवशुद्धिहेतुः अस्माभिस्त्वत्तवांघ्रिर्दृष्टः अतस्त्वांघ्रिर्नोस्माकं अशुभाशयानां विषयवासना
नां धूमकेतुः तद्दाहकः स्यात् कथंभूतः क्षमाय मोक्षाय मुनिभिः मुमुक्षुभिः प्रमाद्रे हृदा यउह्यमान श्रि
यमाणः यश्च सात्वतैर्भक्तैः समविभूतये समानैश्वर्याय वासुदेवादि व्यूहे अर्चितः तेषु चैको श्रिहात्मच
क्रिधारीः स्वरतिक्रमाय स्वर्गं अतिक्रम्य वैकुंठप्राप्तये सवनशस्त्रीकाले अर्चितः १० किंच प्रयतपा
णिभिः संयतहस्तैर्हविर्गृहीत्वा अध्वराग्नौ आहवनीयादौ याज्ञिकैर्यश्चिंत्यते ननु यस्य देवता ये हविर्गृहीत
स्तान्ध्यायेद्वषट्करिष्यन्निति वचनात्तद्देवता श्चिंत्यते अत आह त्रय्या निरुक्तेन विधिना इंद्रादिरूपेण
यज्ञपुरुष श्चिंत्यते इत्यर्थः उत किंच अध्यात्मयोगे आत्माधिकारे योगे योगिभिरपि आत्मनेत्सावमायाः

स्यात्त्वत्वांघ्रिरशुभाशय धूमकेतुः क्षमाय यो मुनिभिरार्द्रहृदोह्यमानः यः सात्वतैः समविभूतय
आत्मवद्भिर्व्यूहेर्चितः सवनशः स्वरतिक्रमाय १० यश्चिंत्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या नि
रुक्तविधिनेश हविर्गृहीत्वा अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः प
रिष्टः ११ पर्युष्टया तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्निवच्छ्रीः यः सुप्रणीतममुयार्हण
मादद न्नो भूयात्सदांघ्रिरशुभाशयधूमकेतुः १२ राम राम राम राम राम राम राम राम

णिमादिस्तां जिज्ञासुभिस्तत्कामैर्यश्चिंत्यते परमभागवतैस्तन्मुक्तैर्यः परिष्टः सर्वतः पूजितः स तु वांघ्रिर्नो अशुभाश
यधूमकेतुः स्यादिति पूर्वेणान्वयः ११ एतेषां च मुनिसात्वताहीनां यज्ञिसेवकानां मध्ये परमभागवतेषु तत्र अपि
तव प्रीतिरधिकेति स्तौति पर्युष्टयेति इदं भावं छादसः अहं पत्न्या च सामिर्न तत्रैव वक्षसि पर्युषिताः पीयं च सति
तिप्रतिपत्निवच्छ्रीः संस्पर्द्धमाना भवति तथापि तां स्पर्द्धमानां श्रियमनादृत्य या भवानपर्युषितयापि अमुया
वनमालया भक्तैरर्पितया मितिप्रीत्या सुप्रणीतं सुष्ठु संपादितं यथा भवति तथार्हणं पूजामादद्गृहीतवान्
सुप्रणीतमित्यर्हणविशेषणं वा तस्य तवांघ्रिर्नोशुभाशयधूमकेतुर्भूयात् यद्वा यो घ्रिरमुया सुप्रणीतमित्यर्हणमा
ददत् स नो अशुभाशयधूमकेतुर्भूयादित्यन्वयः अथैवं संबोध्य एतेषां ध्यानार्चनादि निष्ठा अपि त्वद्य
शसि प्रवृत्तस्मृत्त्वां वंतावैकेतार्थाः भगवतो यशः प्रियत्वादित्याहुः पर्युष्टयावशकांता विलयस्मात्परितः सर्वो

मुनि साध्वत धीर याज्ञिक योगि
भागवताः

सपत्नीवत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०९० त्वच्चरणस्य भक्तपक्षपातः प्रसिद्ध एवेति संस्तवं तः प्रार्थयंते केतुरिति बलिं बंधनेन त्रिभिर्विक्रमैर्युतः तत्र द्वितीय विक्र
मे सत्यलोकं गतस्त्व पादः केतुः अस्तु द्धितो विजय ध्वजइव तत्संपादयंति त्रिपतत्पताकः त्रिधापतंती त्रिषु वापतं
ती गंगा यस्य ताकायस्य सः तथा असुर देव चमूर्वोः तत्सेन योरभयो भयाभयकरः साधुषु सुरेषु स्वर्गाय खलेषु सुरेषु इ
तरायु अधोगमनाय यावं केतुस्तु पदस्तु पादः सभजतानां श्रयं पुनातु शोधयतु अधोगतिं तिपाठ भजतान इति कर्म
णि षष्ठ्यो अघाक्रजतो ऽस्मान्पुनात्विति तथा च श्रुतिः चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुः कृतानि तेन
पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महे स्वः अमृत
स्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधा त्विति १३ ननु युद्धे देवासुरा दयः परस्परं जयं तिजो

केतुस्त्रिविक्रम युतस्त्रिपतत्पताकायस्ते भयाभयकरो ऽसुरदेवचम्वोः स्वर्गाय साधुषु खलेष्वित
राय भूमन् पादः पुनातु भगवन् भजतामघं नः १३ नस्यात्तु गावइव यस्य वशेभवंति ब्रह्मादयस्तनुभृ
तो मिथुरर्द्यमानाः कालस्यते प्रकृतिपूरुषयोः परस्यशंनस्तनोतु चरणः पुरुषोत्तमस्य १४ अस्या
सिहेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः सोऽयं त्रिणाभिरखिलापचये
गा। प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वं १५ राम राम राम राम राम राम

भा०२ यंते वा किमहं तत्रेत्यत आहुः नसीति मिथुः मिथः अर्द्यमानाः युद्धादिभिः पीड्यमानाः ब्रह्मादयो ऽपि यस्य तव व
शे भवंति न तु जय पराजयवा स्वतंत्राः केइवा नसिना सिकायां ऊंताः नासिका विद्धा बद्धा गावा बलीवर्द्दा इव
कुतः कालस्य कलयितुः प्रवर्त्तकस्य तवैव कुतः प्रकृति पुरुषयोरपि परस्य तत्पुरुषोत्तमस्य पादो नः शं त
नोतु १४ प्रकृति पुरुषाभ्यां परत्वमुपपादयंतः कालत्वं पुरुषोत्तमत्वमाहुः अस्य जगतः उदयादीनां हेतु राम
रसि कुतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान्महत्तत्वं तेषां कालं नियंतारं त्वामाहुः अक्षरात्परतः परः २४
महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्नपरं किंचित्साकाष्ठा सापरागतिरित्याद्याः श्रुतयः किंच अ
यं संवत्सरात्मकायः कालः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोऽपि त्वमेव अतस्त्वमुत्तमः पुरुष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गम्य

त्वमेव प्रकृत्यादिद्वारा जगत्सृष्ट्यादिहेतुरित्युक्तं तत्केन प्रकारेणेत्याह । त्वमिति त्वं नः पुरुषो वीर्यं शक्तिं समधिकं त्यप्रा प्ययया मायया सह महान्तं धत्ते किमिव अस्य विश्वस्य गर्भमिव सोऽयं महानुत्तयैव मायया नुगतः सन् आत्मनः स काशादण्डकोशं ससर्ज । त्वयानुगत इति पाठः । पित्तया मायया त्वयाऽधिष्ठितः सन्निति १६ नन्वेवंभूत मीश्वरं त्वमम कुतोऽवगतं तत्राह । तदिति तत्तस्मात् तस्थुषः स्थावरस्य च जङ्गमतो जंगमस्य च भवानधीशः । यद्यस्मान्मायया ऽपितायाः गुणविक्रियया इन्द्रियवृत्तिः तयापनीतान् अर्थान् विषयान् जुषन् जुषमाणोऽपि हे अषीकपते न लिप्तस्त्वं येत्वन्ये जीवा योगिनो वा स्वतः परिहृतादपि अविद्यमानानप्यन्ये कौशल्याविषयं जोषणाद्धि ॥ पति

त्वं नः पुमान्समधिकं त्ययया स्ववीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः । सोऽयं तयाऽनुगत आत्मन आण्ड

कोशं हैमं ससर्ज बहिरावरणैरुपेतम् १६ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिय

श्लो२ यापनीतान् अर्थान्जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म १७ स्मायावलोक

लवदर्शितभावहारिभ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः पत्न्यस्तु षोडशसहस्रमनङ्गबाणैर्यस्येन्द्रियं

विमथितुं करणैर्न विभ्व्यः १८ विभ्व्यस्त्वामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि

श्लो१ निहन्तुं आनुश्रवं श्रुतिभिरङ्घ्रिजमङ्गसङ्गैस्तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति १९ राम राम ॥

वासनामात्रेण बध्यन्त इत्यर्थः । १७ अलिप्तत्वमाह । स्मायेति स्मायावलोकः । मन्दस्मितविलसितोऽवलोकः । त स्य भवः । कटाक्षः । तेन दर्शितो यो भावोऽभिप्रायः । तेन मनोहारि यद्भ्रूमण्डलं तेन प्रहिता ये सौरता मन्त्राः तेः शौ ण्डैः प्रगल्भैरनङ्गबाणैः कामस्य बाणैः संमोहनैः करणैः कामुककलाभिः षोडशसहस्रपत्न्यो यस्येन्द्रियं मनः वि मथितुं क्षोभयितुं न विभ्व्यः न समर्थाः स भवान्न लिप्त इति पूर्वेणान्वयः । १८ तस्मात्त्वमेव भक्तपापापहर्ता न देवत्वं मुकुन्देति तत्कीर्तिनद्यः तथा पादावनेजसरितो गङ्गाद्याः त्रिलोक्याः शमलानि हन्तुं विभ्व्यः केन प्रकारेण आनुश्रवं गुरोरुच्चारणमनुश्रूयत इत्यनुश्रवो वेदः तत्र भवं कीर्तिरूपं तीर्थं श्रुतिभिः श्रवणैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० विबुधैः सह २१ विक्षिप्ता विस्तारिता २२ उद्दामानि वृत्तानि विक्रमा यैर्युतानि कर्म्माणि २३ ८ वीर्य्यशौर्य्याभ्यां श्रिया २९ उद्वेलेन लंघितमर्यादेन ३० वैकुंठयास्यन् तव भवनं यास्यामि ३१ ४ प्रभासं यास्याम इति वद

बादरायणिरुवाच इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिं अभ्यभाषत गोविंदं प्रणम्यांबरमाश्रितः १
२० ब्रह्मोवाच भूमेर्भारावताराय पुरा विज्ञापितः प्रभो त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं २१
धर्मश्च स्थापितः सत्सु सत्यसंधेषु वै त्वया कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा २२ अवतीर्य
यदोर्वंशे बिभ्रद्रूपमनुत्तमं कर्म्माण्युद्दामवृत्तानि हिताय जगतोऽकृथाः २३ यानि ते चरितानीश मनु
ष्याः साधवः कलौ शृण्वंतः कीर्तयंतश्च तरिष्यंत्यंजसा तमः २४ यदुवंशेऽवतीर्णस्य भवतः पुरु

षोत्तम शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो २५ नाधुना तेऽखिलाधार देवकार्यावशेषितं कुलं च
विप्रशापेन नष्टप्रायमभूदिदं २६ ततः स्वधाम परमं विशस्व यदि मन्यसे सलोकांल्लोकपालान्नः पा
हि वैकुंठ किंकरान् २७ श्रीभगवानुवाच अवधारितमेतन्मे यदात्थ विबुधेश्वर कृतं वः कार्यमखि
प लं भूमेर्भारोऽवतारितः २८ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं लोकं जिघृक्षद्रुद्धं मे वेलयेव
महार्णवः २९ यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलं गंतास्म्यनेन लोकोऽयमुद्वेलेन विनंक्ष्यति ३०
इदानीं नाश आरब्धः कुलस्य द्विजशापजः यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ३१ शुक उवाच
इत्युक्तो लोकनाथेन स्वयंभूः प्रणिपत्य तं सह देवगणैर्देवः स्वधाम समपद्यत ३२ अथ तस्यां महो राम
त्पातान् द्वारवत्यां समुत्थितान् विलोक्य भगवानाह यदुवृद्धान्समागतान् ३३ श्रीभगवानुवाच २५
ह २ एते वै सुमहोत्पाता व्युत्तिष्ठंतीह सर्वतः शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ३४ न वस्तव्यमिहा
नोऽयमभिप्रायः एते देवांशाः स्वाधिकारान्यांतीति ननु सद्यो मोक्षं द्वारवत्यां मृता मुच्येरन् तस्मादभ्युदयफलं
प्रभासं गमिष्यामीति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षशापाद्यक्ष्मणा गृहीतश्चन्द्रो यत्र स्नानमात्रेण किल्बिषात्तस्माद्रोगदुःखात्सद्यो विमुक्तः सन् कलोदयं भेजे ३६ उशिजः कमनीयान् अंधसा अन्नेन ३७ उप्त्वेति यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं

यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्मणोडुराट् विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं ३६ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन् सुरान् भोजयित्वोशिजो विप्रान्नानागुणवतान्धसा ३७ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महान्ति वै वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ३८ शुक उवाच एवं भगवतादिष्टा यादवाः कुरुनंदन गंतुं कृतधीयस्तीर्थं स्पंदनान् समयूयुजन् ३९ तन्निरीक्ष्योद्धवो राजन् श्रुत्वा भगवतोदितं दृष्ट्वारिष्टानि घोराणि नित्यं कृष्णमनुव्रतः ४० विविक्त उपसंगम्य जगतामीश्वरेश्वरं प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत ४१ उद्धव उवाच देवदेवेश योगेश पुण्यश्रवणकीर्त्तन। संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भवान् विप्रशापं समर्थोपि प्रत्यहन्न यदीश्वरः ४२ नाहं तवांघ्रिकमलं क्षणार्द्धमपि केशव त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ४३ तव विक्रीडितं कृष्ण नृणां परममंगलं कर्णपीयूषमास्वाद्य त्यजंत्यन्यस्पृहां जनः ४४ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेमहि ४५ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ४६

सत्पात्रे इति द्योतयति ३८ ४० लोकं मर्त्यलोकं न प्रत्यहन् न प्रतिहतवान् ४२ ४४ शय्यादिषु त्वां भक्ता इति त्वं सेवितवंतो वयं कथं त्यजेम। ४५ त्यक्तुमशक्नुवन् प्रार्थये नामायाभयादित्याह त्वयेति च चर्चिताः अलंकृताः हि निश्चितं जयेम ४६

स्त २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या

भा०ए० संन्यासिनो ब्रह्मचर्यादि न्क्लेशैः कथं विस्तरंति वयंत्वनोसिनैव तरिष्यामइत्याह वातरशनाइति ऊर्द्ध्वमंथिनः
ऊर्द्ध्वरेतसः ४७ तावकैर्भक्तैः सह त्वद्वार्त्तया ४८ क्ष्वेलीपरिहासः हंहो केवे ४९ एकांतिनमित्यादि स्वाभि
प्राय वचनहेतुः ५० षष्ठएकादशेषष्ठः सप्तमेतूद्धवास्यात्मज्ञान सिद्धये हरिः स्वयं अवधूतेतिहासातं

वातरशनायऋषयः श्रमणाऊर्द्ध्वमंथिनः ब्रह्माख्यंधामतेयांतिशांताः सन्यासिनोऽमलाः ४७
वयंत्विहमहायोगिन्भ्रमंतः कर्म्मवर्त्मसु त्वद्वार्त्तयातरिष्यामस्तावकैर्दुस्तरंतमः ४८ स्मरं
तः कीर्त्तयंतस्ते कृतानिगदितानिच गत्युत्स्मितेक्षणक्ष्वेलियन्नृलोकविडंबनं ४९ शुकउवाच
एवंविज्ञापितोराजन्भगवान्देवकीसुतः एकांतिनंप्रियंभृत्यमुद्धवंसमभाषत ५० इतिश्रीभाग
वतेमहापुराणएकादशस्कंधेभगवउद्धवसंवादेषष्ठोध्यायः श्रीभगवानुवाच यदात्थमां
महाभागतच्चिकीर्षितमेवमे ब्रह्माभवोलोकपालाः स्वर्वासंमेऽभिकांक्षिणः १ मयानि
ष्पादितंह्यत्रदेवकार्यमशेषतः यदर्थमवतीर्णोहमंशेनब्रह्मणार्थितः २ कुलंवैशापनि
र्दग्धंनंक्ष्यत्यन्योन्यविग्रहात् समुद्रः सप्तमेह्येनांपुरींचप्लावयिष्यति ३ यर्ह्येवायं
मयात्यक्तोलोकोयंनष्टमंगलः भविष्यत्यचिरात्साधोकलिनापिनिराकृतः ४
नवस्तव्यंत्वयैवेहमयात्यक्तेमहीतले जनोऽधर्मरुचिर्भद्रभविष्यतिकलौयुगे ५ त्वं
तुसर्वंपरित्यज्यस्नेहंस्वजनबंधुषु मय्यावेश्यमनः सम्यक्समदृग्विचरस्वगां ६ य
दिदंमनसावाचाचक्षुर्भ्यांश्रवणादिभिः नश्वरंगृह्यमाणंचविद्धिमायामनोमयं

२६ गुरुषष्ठावर्वर्णयत् यूनात्स्वसंहृत्येतत्कुलमिति सर्वांसेवैकुंठवासप्रति १ त्वंचसर्वत्यागनात्मनिष्ठोभवेति
वक्तुमाह कुलमितित्रयेण ३ तदेवायंनष्टमंगलोभविष्यति ४ नवस्तव्यमेवत्वया ५ ६ ननुगुणदोषाभ्यां
विषमलोकेकुतः समदृष्टिः स्यात्तत्राह यदिदमितिमनआदिभिर्गृह्यमाणं मनोमयत्वान्मायेतिवि

राम
२६

मनोमयत्वेहेतुः पुंस इति अयुक्तस्य विक्षिप्तमनसः नानार्थो भेदविषयो भ्रमः स भ्रमएव गुणदोषभा
क् ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यत्वोक्तान भ्रमविद्धंमित्त गुणदोषबुद्धेः पुंसः कर्मविहि
त अकर्मतल्लोपः विकर्मनिषिद्धमिति भेदः अविद्यावद्विषयाएव वेदइत्यर्थः ८ कथमात्मनि
परिछिन्नं वित्तं जगदीक्षणीयं तत्राह आत्मानमिति मय्यपि ब्रह्माणितद्रूपेणेक्षस्व ९ नन्वेवयुक्तोपि
तेन तेन कर्मकारणदेवादयो विघ्नान्करिष्यंति तत्राह ज्ञानेति ज्ञानं वेदतात्पर्य्यनिश्चयः विज्ञानं त

पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक् कर्माकर्मविकर्मेति गुणदोषधियो भिदा
८ तस्माद्युक्तेंद्रियग्रामो युक्तचित्त इदं जगत् आत्मनीक्षस्व विततमात्मानं मय्यधी
श्वरे ९ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् आत्मानुभवतुष्टात्मा नान्तरा
यैर्विहन्यसे १० दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते गुणबुद्ध्या च विहितं न करो
ति यथार्भकः ११ सर्वभूतसुहृच्छांतो ज्ञानविज्ञाननिश्चयः पश्यन्मदात्मकं विश्वं
न विपद्येत वै पुनः १२ शुक उवाच इत्यादिष्टो भगवता महाभागवतो नृप उद्धवः प्र
णिपत्याह तत्त्वं जिज्ञासुरच्युतम् १३ ॥०

टी० दर्थानुभवः ताभ्यां सम्यक् युक्तः ततः आत्मानुभवेनैव तुष्टं चित्तं यस्य शरीरिणां देवादीनां आत्मभू
तः अंतरायैर्न प्रतिहन्यसे अयं भावः यावदनुभवं यथाश्रमं कर्माणि कुर्यात् तदनंतरं सर्वेषा
मात्मभूतत्वात् कोऽपि विघ्नान्नाचरतीति तथाच श्रुतिः तस्य ह न देवाश्चनाभूत्या ईशत आत्मा
स ह्येषां भवतीति १० न चात्मज्ञानस्यापि यथेष्टाचरणप्रसंगइत्याह दोषबुद्ध्येति तथापि प्राक्तनसं
स्कारान्निषेधान्निवर्तते एव किंतु न दोषबुद्ध्या विहितं च प्रायशः करोति न तु गुणबुद्ध्या यथार्भकः
संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्तते न तद्वत् ११ एवंभूतस्य न पुनः संसार इत्याह

सर्वभूतानि विपद्यन्ते न पुनः संसारेत १३

टी० गुणदोषबुध्या
२

३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

त्वनु सर्वं परित्यज्य त्वाद्युपदेश मात्मनो ३ योयंमन्वानः पृच्छति योगेशेति योगफलदायिनु योगवित्
न्यासानामानि गोप्यानिक्षेपविशेषः यद्वा योगो विन्यस्यते क्रियते यस्मिन् योगात्मनु योग आत्म
प्रकृतो भवतियस्य योगस्वरूपेति वा योगस्य संभवोयस्मात् चतुर्भिरेतैः संबोधनैः स्वमहिम्नाक
वलं त्वयापदिष्टं ननुमदधिकारं पर्यालोच्यैति दोषानिते तदाहनिःश्रेयसायेति न चारोग्याद्यर्थं सर्वे
दानादिवदयं त्यागः किंतु संन्यासलक्षणः अप्रत्यापत्तिरूपः १४ ५ यन्न तित्यागाद्युपदिष्टं सोहं म
ढमतिः कुतः ममेति अहमितिच सानुबंध पुत्रादि सहितं त्वन्मायया विरचितं आत्मनि दृढविगा

राम

ढानि मग्नः अतः तत्तु भवतानिगदितं यथा ३ हमंजसा संधसीयामितथा भृत्यमामनुशाधि शेनेषशि

उद्धव उवाच योगेशयोगविन्यासयोगात्मन्योगसंभव निःश्रेयसायमेप्रोक्तस्त्यागःसन्यास

२८

लक्षणः १४ त्यागोयंदुष्करो भूमन्कामानां विषयात्मभिः सुतरां त्वयि सर्वात्मन्नभक्तैरिति

मूढमति २ ममतिः १५ सोहं ममाहमितिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंध तत्वंजसा नि
गदितं भवता यथाहं संसाधयामि भगवन्ननुशाधिभृत्यं १६ सत्यस्य ते स्वदृश आत्मन
आत्मनोन्यं वक्तारमीशविबुधेष्वपि नानुचक्षे सर्वे विमोहितधियस्तव मायये मे ब्रह्मादय
यस्तनुभृतो बहिरर्थभावाः १७ तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठवि
कुंठधिष्ण्यं निर्विण्णधीरहमुहवृजिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये १८

टी० क्षय १६ मयासंक्षेपेणोक्तं किं विस्तरतस्त्वन्यात्पृच्छसि नेत्याह सत्यस्येति स्वदृशः स्वप्रकाशस्य सत्यस्या
त्मनः आत्मनामां प्रति वक्तारं ते त्वत्तः अन्यं नानुचक्षे न पश्यामि स्वदृशः स्वतः सिद्धज्ञानात् तो वान्य
मितिवा कुतइत्यत आह सर्वेइति बहिरर्थभावा विषयेष्वर्थबुद्धयः १७ कुविंदः शीलाभवतिके चि
त्सविताः फलकाले विनश्यंतिके चिद्दग्धाः के चिद्रक्षणे समर्थाः केचित्तु स्थानभ्रष्टाः तद्वा इत्य
र्थमनवद्यमित्यादीनिपंच विशेषणानि नअंतः कालतः पारं देशतश्च यस्य तं कालादिभिरकुंठ
विकुंठलोको धिष्ण्यं स्थानं यस्य तं उहेभगवन् हस्फुटं निर्विद्विहेतुः वृजिनैर्दुःखैरभितप्तः हे

राम

१८

अ२ स्व२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततेवमसंभावनाविपरीतभावनाभ्यामुपदिष्टतत्वमनवगाहमानं प्रति तन्निवृत्तये गुरूपदेशं विनाऽपि स्वा
न्वयव्यतिरेकाभ्यामेव तत्वप्रतिपत्तिर्भवतीति दर्शयितुमाह प्रायेणेति लोकतत्त्वस्य विचक्षणाः परीक्ष
काः अशुभाशयात् विषयवासनातः १९ तदुपपादयति आत्मनः पश्वादिशरीरेभ्य आत्मैव हितः अहितः तेषां
तेगुरुः तत्र प्रत्यक्षं दर्शयति पुरुषत्वे चेति तथा च श्रुतिः पुरुषत्वे वाविस्तरामात्मा स हि प्रज्ञानेन
संपन्नतमो विज्ञानं वदति विज्ञानं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथे
तरेषां पशूनामशनापिपासे एवाभिविज्ञानमिति २० अत एव पुरुषत्वे सोऽतिरेक इति २१ अनुमानमाह

श्रीभगवानुवाच प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः समुद्धरन्ति ह्यात्मानमा
त्मनैवाऽशुभाशयात् १९ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः यत्प्रत्यक्षानुमाना
भ्यां श्रेयोऽसावनुविन्दते २० पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः आविस्तरां प्रप
श्यन्ति सर्वशक्त्युपबृंहितं २१ एकद्वित्रिचतुष्पादो बहुपादस्तथाऽपदः बह्व्यः सन्ति पु
रः सृष्टास्तासां मे पौरुषी प्रिया २२ अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरं गृह्यमा
णैर्गुणैर्लिंगैरग्राह्यमनुमानतः २३ अत्राप्युदाहरन्तीममितिहासं पुरातनं अवधूतस्य
संवादं यदोरमिततेजसः २४ रात

अत्रेति अत्रैव पौरुष्यां पुरि युक्ता अप्रमत्ताः अग्राह्यं ग्राह्येभ्योऽहंकारादिभ्यो व्यतिरिक्तं मां अद्धा साक्षात् मृग
यन्ति मार्गणप्रकारं हृदयमाह गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः जडानां प्रकाशः स्वप्रकाशमेकं विना न घटेत
इति अनुपपत्तिमुखेन लक्षकैः तथा लिंगैर्लिंगैः व्याप्तिमुखेनानुमानतः ईश्वरं प्रवर्तकं मृगयन्ते बुद्ध्यादि
करणानि कर्तृप्रयोज्यानि करणत्वात् दात्रादिवदिति तदुक्तं भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः
दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैरिति न च तावता आनुमानिकत्वं अभिमतं व्यं देहादिव्यतिरि
क्तत्वं पदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् २३ भूयोऽन्वयव्यतिरेकाभ्यामसंभावनादिनिवृत्ता

विविहाभिमताहंकाराणीति ९३

कुमारिकादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वलौकिकविलक्षणा

भा०ए० २५ सु विशारदोऽतिनिपुणो २६ सर्वलोकवैलक्षण्यमेवाह प्रायइति धर्मादिषु विवित्सायामात्मविचारे च मा
नवाः समीहंते प्रवर्त्तंते तत्रापि आयुरादेहेतुना कामनयैव २७ त्वंतु न कस्य चित्कर्म्मणः कर्त्ता भुवन्नपि न च किं
चिदीहसे इच्छसि नन्वशक्ततया वा अज्ञानेन वा अनैपुण्येन वा विरूपत्वेन वा अवाग्मितया वा औदासीन्य च

अवधूतं द्विजं कंचिच्चरंतमकुतोभयं कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् २५ यदुरुवाच
कुतो बुद्धिरियं ब्रह्मन्नकर्त्तुः सुविशारदा यामासाद्य भवाल्लोकं विद्वांश्चरति बालवत् २६ प्राया
धर्मार्थकामेषु विवित्सायां च मानवाः हेतुनैव समीहंत आयुषो यशसः श्रियः २७ त्वं तु क
ल्पः कविर्दक्षः सुभगोऽमृतभाषणः न कर्त्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् २८ जने
२८ षु दह्यमानेषु कामलोभदवाग्निना न तप्यसेऽग्निना मुक्तो गंगांभस्थ इव द्विपः २९ त्वं हि
नः पृच्छतां ब्रह्मन्नात्मन्यानंदकारणं ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ३० श्रीभग
वानुवाच यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा पृष्टः सभाजितः प्राह प्रश्रयावनतं द्वि
जं ३१ ब्राह्मण उवाच संति मे गुरवो राजन्बहवो बुद्ध्युपाश्रिताः यतो बुद्धिमुपादाय मुक्तोऽटा
कृ मीह तान् शृणु ३२ पृथिवी वायुराकाशमापोऽग्निश्चंद्रमा रविः कपोतोऽजगरः सिंधुः पतंगो म
धुकृद्गजः ३३ मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः कुमारी शरकृत्सर्प ऊर्णनाभिः सु
पेशकृत् ३४ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः शिक्षा वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः
३५

राम
दत्त एवेनेत्याह कल्प इत्यादिना २८ महानानंदश्च तव कुत इति पृच्छति जनेष्विति २९ स्पर्शविहीनस्य विष २८
यभोगरहितस्य अत्र हेतुः केवलात्मनः कलत्रादिशून्यस्य ३० बुद्ध्यैवोपाश्रिताः स्वीकृताः न तूपदेशेन कृ
अटामि पर्यटामि ३३ शोभनं रूपं करोतीति सुपेशस्कृत् ३४ मया आश्रिताः तेषां एतेषां वृत्ति
भिः आत्मनः शिक्षां शिक्षणीयानर्थान् हेयोपादेयादीन् अन्वशिक्षं अनुशिक्षितवानस्मि ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाहं पोपयाति ॥ ३६ ॥ क्षितेः क्षमां शिशिक्षितवानित्याह भूतैरिति आक्रम्यमाणः पीड्यमानः तद्विद्वान् भूता
नां दैववशवर्त्तितं विद्वान् व्रतं नियमं ३७ पर्वततरुभ्यां द्व्यक्षरः पाचयः पृथिवीतस्याः शिक्षितमाह शश्वदि
ति सर्वेहापरार्थाः परोपकारार्थाः सर्वाः ईहा यस्य सः परार्थ एवैकान्ततः संभवो यस्य सः भूभृत्तः
पर्वतेनात् तस्य हि रक्षतृणनिर्झरप्रस्रवक्रियाः परार्था एव यथा तद्वत् तथा नगशिष्यः सन् परात्मता
पराधीनात्मता शिक्षेत यथा परे रवत्वं आत्मार्थं चान्यन्न मेयमनुमन्यते तद्वत् ३८ वायुरपि द्विविधम्

यतोयदनुशिक्षामि यथा वा नाहुषात्मजा ॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ३६ भूतैरा
क्रम्यमाणोपि धीरो दैववशानुगैः ॥ तद्विद्वान्नचलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं ३७ शश्वत्प
रार्थसर्वेहः परार्थैकान्तसंभवः ॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां ३८ प्राणवृत्त्यैव
संतुष्येन्मुनिर्नैवेन्द्रियप्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ३९ विषयेष्वावि
शन्योगी नानाधर्मेषु सर्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ४० पार्थिवेष्विह देहेषु
प्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी गन्धैर्वायुरिवात्मदृक् ४१ अन्तर्हितश्च स्थिरजंगमे
षु ब्रह्मात्मभावेन समन्वयेन ॥ व्याप्त्याऽव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत् ४२

प्राणो वायुः अत्र प्राणस्य गुरुत्वमाह प्राणवृत्त्येति प्राणाद्याहारादिमात्रेण प्रवर्त्तते न रूपरसादौ निंद्रिय
विषयप्राप्तमोपेक्षते तथा मुनिरपि भवेदित्यर्थः प्राणवृत्तेः फलमाह नैव विकल्पनं ज्ञाननाशः स्यात् अर्थादि
हि निर्वाहः कार्येषु गुणलिप्सायां तु वाङ्मनेन च विक्षिप्यते तेनाधिकं लिप्सेदित्याह ज्ञानमिति नाव
कीर्येत न विक्षिप्यते ३९ विषयान् सेवमानोपि प्रियाप्रियतयासक्तिं न प्राप्नुयादित्याह शिक्षेदित्याह विषयेष्विति
नानाधर्मेषु शीतोष्णादिधर्मकेषु नहि वायुर्वनदहनवासः जनितगुणं ४० यथा वायुर्गन्धादिधर्मयोगा
न प्रतीयमानोपि च तद्वान्न तथा गौणदेहादिधर्मयोगेनाहंप्रत्ययप्रतीयमानोपि आत्मा न तद्गुणवानि
ति अन्तर्हितोदेहेगतोपि मुनिरात्मनो देह
भावनाद्वयमाह अन्तर्हितश्च स्थिरजंगमेन

ति संभावितमिति वायोरेव शिक्षितमित्याह पार्थिवेष्विति ४१ एतत्
स्यैवाद्वितीयस्यान्तर्वेहि भावेन वर्त्तमानत्वमस्य आकाशाच्छिक्षितं स

ष्वसंग अन्तरा एवाव्यवच्छेदं च भावयेत् कुतः स्थिरजं
गमेषु समन्वयेन याव्याप्तिः सापाकिंमणिषु सूत्रस्येव व्याप्तिः नाविततस्य स
र्वगतस्य तत्कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीति श्रुतेः
नन्वेतत्सर्वं कथं संभवतीत्यत्राह नभस्त्वं तेनतुल्यत्वं संभावयेत् यथा नभ
सः सर्वगतस्य न घटादिभिः संगः परिच्छेदो वा एवमात्मनोऽपि संभवती
ति ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गी॰ नेऽ२

भा॰ए॰ किंच कूटस्थस्यात्मनो नामापायि देहादिसंबंध इत्याह तेजोऽबन्नमयैः तेजश्च आपश्च अन्नं पृथिवी च तन्म
यैः कालसृष्टैः गुणैर्देहादिभिः पुमान्न संस्पृश्यत इति नभो न वायुसंभवतीति ४३ स्वच्छत्वादिभिर्गुणैरुद
के जगत्पुनातीति तत्गुणमयाशिक्षितमित्याह स्वच्छः निर्मलः प्रकृतितः स्वभावेन स्निग्धः उर्वशीनुराग नेऽ३
वान् माधुर्यः मधुरालापी तीर्थभूः तीर्थस्थाने अपां मित्रं उदकतुल्यः अग्याहितिपाठस्तरवायेपा
पात्पुनाति स्वच्छत्वादिगुणैरर्थोदकसादृश्यं ज्ञातव्यं ४४ अग्नेः शिक्षितमाह तेजस्वीति तेजस्वी
वा॰ ज्ञानातिशयात् विशेषस्तपसा दीप्तः दुर्धर्षः अक्षोभ्यः सचासावुदरभाजनश्च अपरिग्रहः युक्त

२९ तेजोऽबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः। न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान् ४३
स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकी
र्तनैः ४४ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः सर्वभक्ष्योऽपि युक्तात्मा नादत्ते म
लमग्निवत् ४५ क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छतां भुङ्क्ते सर्वत्र दातॄणां दहन् प्राग्
ग॰ उत्तराशुभं स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः प्रविष्ट ईयते तत्तत्स्वरूपोऽग्निरिवै
धसि ४७

माह॰ युक्तात्मा मुनिः ४५ अग्नेरेव शिक्षांतरं क्वचिदिति यथाऽग्निः परैश्छन्न एव हविर्गृह्णाति तथा मुनि राम
रित्याह दातॄणामिति प्रागुत्तराशुभं भूतं भविष्यच्च पापं ४६ आत्मनो देहोपाधिकोऽप्युच्चनीच २९
त्वादीन स्वाभाविक इत्यप्यग्निदृष्टांतेन संभावितमित्याह स्वमाययेति स्वमायया स्वाविद्यया
सृष्टं सदसल्लक्षणं देवतिर्यगादिरूपं वा ४७ राम राम राम राम राम

विभाग्न्यादिरूपं वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनो जन्मादिषड्विकाराभाव अंत्र दृष्टांतेन संभावितइत्याह विसर्गाद्याइति विसर्गो जन्मश्मशानं नाशः अ
अंत्रयं ज्योतिःशास्त्रप्रक्रिया अप्मयंमंडलं चंद्रः तेजोमयंमंडलमादित्यः तयोरकर्णे क्षत्राव स्थाने च
द्रो नदृश्यते चक्षुषः आदित्यमंडलेन समदेशस्थितेन व्यवधानात् अमावास्या अथ षष्टिघटिकाभिः
चंद्रो नक्षत्रांतरं गच्छति आदित्यस्त्रयोदशभिरहोरात्रैः अतः प्रतिपदमारभ्य विषमस्थितस्या
दित्यमंडलस्य पंचदशः पंचदशो भाग अप्मयमंडले प्रतिबिंबितो दृश्यते सा कलेत्युच्यते एवं पंचदशः

विसर्गाद्याः श्मशानांता भावा देहस्य नात्मनः कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना
४८ कालेन ह्योघवेगेन भूतानां प्रभवाप्ययो नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथाऽ
र्चिषां ४९ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति नतेषु युज्यते योगी गोभिर्गा इव
गोपतिः ५० बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्गतः लक्ष्यते स्थूलमतिभिरात्मा चाव
स्थितोऽर्कवत् ५१ नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित् कुर्वन्विंदेत संताप
कपोत इव दीनधीः ५२

क्षिस्त्रयोदशभिर्नक्षत्रैरहोरात्रैरंतरमिति राशिचक्रस्य सप्तविंशति नक्षत्रात्मकस्य मध्ये संमुखो चंद्रादित्यो ति
ष्ठतः स तदा संपूर्णप्रतिबिंबभावाल्लाच्छितो दृश्यते सा पूर्णिमा तस्यां अमावास्यवत्प्रतिबिंबेन सह षोडशकोल अं
द्रः उपचयैते ततः पुनः प्रतिपदमारभ्य मंडलयोर्विषमभावात्कलाह्रासः तत्र यथा कलानामेवोत्पत्त्याद
यो नाप्यमंडलस्य तथात्मनोपीत्याह कलानामिवेति ४८ सिंहावलोकनेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरतां
यावराग्यं शिक्षितमित्याह कालेनेति ओघवद्वेगो यस्य तेन आत्मनः संबंधिनां भूतानां देहानामित्यर्थः अर्चि
षां ज्वालानां ४९ आदित्याच्छिक्षितमाह द्वाभ्यां गुणैरिंद्रियैर्गुणान्विषयानुपादत्ते यथाकालं अर्थिभ्यो गतेऽस
ति विमुंचति च नतेषु युज्यते लेपं न प्राप्नोति दृष्टांतमाह गोभिर्गा रश्मिभिर्गा जलानि गो
धि विशोहितान्यादित्य दृष्टांतेन संभावितमित्याह बुध्यत इति स्वे स्वरूपेऽवस्थित आत्मा भेदेन न बुध्यते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० भा ए० दृष्टांतं प्रपंचयति कपोतः कश्चनेति ५३ अयो मिथः स्नेहप्रसंगाद्दर्शयति कपोतौ विनिबन्धेन स्नेहगुणेन
निबद्धहृदययोर्यौ तौ ५४ विस्रब्धौ निःशंकौ ५५ सा कपोती नर्मयन्ती सहासवीक्षितालापादिभिः प्रीणयन्ती
नं १ अन्वकंपत ५६ नानुकंपिता सती यंयं वाञ्छति तं कामं समनयत् संपादयामास राजन्निति स्वयं यथेति सूचि
तं ५६ ७ तेषु जल्प भरितनिष्पंडेषु हरेः स्वभावकमोदिशक्तिभिः रचितावयवाः पक्षिणः कोमलान्यंगानि

कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ कपोत्या भार्यया सार्द्धमुवास कतिचित्समाः ५३ क
पोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः ५४ शय्यासना
टनस्थानवार्त्ताक्रीडाशनादिकं मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ५५ यंयं वाञ्छति सा रा
जंस्तर्पयंत्यनुकंपिता तं तं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ५६ कपोती प्रथमं गर्भं गृह्णंती
३० काल आगते अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ५७ तेषु काले व्यजायंत रचितावय
वा हरेः शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ५८ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रव
क त्सलौ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ५९ तासां पतत्रैः सुस्पर्शैः कूजितैर्मु
ग्धचेष्टितैः प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ६० स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया
शिशून्पुपुषतुः प्रजाः २ विमोहितौ दीनधियौ ६१ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ परितः कानने तस्मिन्ने
र्थिनौ चेरतुश्चिरं ६२ कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ गतौ पोषणमादाय स्व राम
नीडमुपजग्मतुः ६३ कपोती स्वात्मजान्वीक्ष्य बालकान् जालसंवृतान् तानभ्यधावत् २१
क्रोशंती क्रोशतो भृशदुःखिता ६५
तनूरुहाः अंगपक्षाणि ५८ ५९ पतत्रैः पक्षैः अदीनानां हृष्टानां ६० पप्रजान् बालान् प्रजाः पुत्रान् ६१ ६२
स्वालयांतिके चरतः क्रीडतः तान्कपोतपुत्रान् आनल्पप्रसार्य ६३ उत्सुकौ वांछावंतौ तत्पोषणार्थं
गतौ संतौ पोषणं भक्ष्यं ६४ ५
दृष्ट्वा तान्लुब्धकः कश्चिद्यदृच्छातो वनेचरः जगृहे
जालमातत्य चरतः स्वालयांतिके ॥६३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिचाजालेन ६६ आत्मानुरूपां भार्यां विललाप प्रशोच च ६७ विलापमाह त्रयेण अहो इति अल्पपुण्यस्य दृष्टसुखे ॥
अकृतार्थस्य अदृष्टमसंपादयतः ६८ ७० तानाच नान्यनुयन्नपि शिक्षुजालेषु २१ २ दार्ष्टांतिके योजयति एव
मिति ७४ एवं गृहासक्तिस्तिरश्चामप्यनर्थहेतुः मानुषस्य त्वतिनिंदितेत्याह यः प्राप्येति ७४ एकादशसप्तमः ॥
अष्टमे जगरादिभ्योनवभ्यः शिक्षितं हरिः अवधूतगिरा प्राह विविकायाद्वैति १ प्रारब्धकर्मभोगस्यावश्यंभा वं १

साऽसकृत्स्नेहगुणिता दीनचित्ताऽजमायया । स्वयं चाबध्यत शिचा बद्धान्पश्यन्त्यपस्मृतिः ॥ ६६ कपोतश्चा
त्मजान्बद्धानात्मनोप्यधिकान्प्रियान् । भार्यां चात्मसमां दीनो विललापातिदुःखितः ॥ ६७ अहो मे पश्य
ताऽपायमल्पपुण्यस्य दुर्मतेः । अतृप्तस्याऽकृतार्थस्य गृहस्त्रैवर्गिको हतः ॥ ६८ अनुरूपानुकूला च य
स्य मे पतिदेवता । शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ॥ ६९ सोहं शून्ये गृहे दीनो मृतदारो मृतप्र
जः । जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ॥ ७० तांस्तथैवावृतान् शिग्भिर्मृत्युग्रस्तान्विचेष्ट
तः । स्वयं च कृपणः शिक्षु पश्यन्नप्यबुधोपतत् ॥ ७१ तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनं । क
पोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहं ॥ ७२ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् ॥ पुष्णन्
कुटुंबं कृपणः सानुबंधोवसीदति ॥ ७३ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं । गृहेषु खग
वत्सक्तस्तमारूढच्युतं विदुः ॥ ७४ इति श्रीभागवते महापुराणे एकादशस्कंधे अवधूतसंगमे
नाम सप्तमोऽध्यायः ॥ ब्राह्मण उवाच । सुखमैंद्रियकं राजन्स्वर्गे नरक एव च । देहिनां यद्य
था दुःखं तस्मान्नेच्छेत तद्बुधः ॥ १ ग्राससुमृष्टं विरसं महांतं स्तोकमेव च । यदृच्छयैवापतितं ग्र
सेदाजगरोऽक्रियः ॥ २

विवानदर्थोद्यमे नरायुर्व्ययो वृथा कर्तव्य इति अजगरादिक्षितमाह सुखमित्या
दिना यदैंद्रियकं सुखं तत्स्वर्गे नरके च भवत्येव यथा दुःखं तस्मात्तद्बुधस्तन्नेच्छेत् ॥ १ शरीरनिर्वाहमात्रं तु यथा
लब्धेन कर्तव्यमित्याह ग्रासमिति आजगरः अजगरवृत्तिः अक्रियः उदासीनः ॥ २ ॥ राम राम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० यदानापनतितदा किंकर्तव्यं तत्राह शयीतेति अनुपक्रमः नीरुद्यमः दिष्टभुक् दैवमेवाप्यकमिति धैर्यवान् ३॥
औजमिति ननु समर्थोपि शयीतेति किंमित्याह ओजइंद्रियबलं सहोमनोबलं बलंशारीरं भवतु इत्थंभूतमपि देहमक
र्मकमेव बिभ्रत् शयान एव भवेत् वीतनिद्रः स्वार्थे तद्दृष्टिश्च भवेत् न पुनरीहेत इंद्रियवानपीति दर्शना
दिव्यापारमपि निवारयति ४ समुद्राच्छिक्षितमाह मुनिरिति बहिः प्रसन्नः अंतर्गंभीरश्च दुर्विगाह्यः
एवंभूत इति परिज्ञातुमशक्यः अलक्ष्याभिप्रायत्वात् दुरत्ययः अनतिक्रमणीयः तेजस्वित्वात् अ
त१ नंतपारः कालतो देशश्चापरिच्छेद्यः स्वरूपाविर्भावात् अक्षोभ्यः अविकार्यः रागाद्यभावात् स्तिमितोदः त०

शयीताहानि भूरीणि निराहारोऽनुपक्रमः यदि नोपनयेद्ग्रासो महाहिरिव दिष्टभुक् ३ ओजः
सहोबलयुतं बिभ्रद्देहमकर्मकं शयानो वीतनिद्रश्च नेहेतेंद्रियवानपि ४ मुनिः प्र
३१ सन्नगंभीरो दुर्विगाह्यो दुरत्ययः अनंतपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः ५ समृ
द्धकामो हीनो वा नारायणपरो मुनिः नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः ६
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत्

निश्चलोदकोऽर्णवो यथा तद्वदेतैर्गुणैर्भवेदित्यर्थः ५ किंच वर्षासु सरिद्भिः समुद्रोऽपि सागरो य
थानोत्सर्पेत् ग्रीष्मे तद्विहीनोपि न शुष्येत् तथा समृद्धकामस्तद्विहीनो वा न हृष्येत् न च शोचेदित्य राम
र्थः अत्र हेतुः नारायणः परः न तु विषयपर इति ६ रूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैः मोहिताः ॥ ३१
पतंगमधुकरगजहरिणमीना हताः अतस्तेषु नासक्तोपं चैते गुरवः तदुक्तं पतंगमातंगकुरंगभृंग
मीना हताः पंचभिरेव पंच[illegible]एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंच इति तत्र रू
पविलासमोहिता नश्यंतीति पतंगाच्छिक्षितमाह दृष्ट्वेति तत्स्वाभावैः प्रलोभितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति योषिदिति ८ मधुकराच्छिक्षितमाह स्तोकमिति गृहानु गृहस्थानु अहिंस
न्नु अपीडयन्नु अयंभावः यथा मधुकरो विविधपुष्पगंधलोभेनैकस्मिन्नेव पद्मे वसन्नस्तसमये संकुचिते तस्मिन्बध्य
ध्यते एवं मुनिरपि गुणलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यत इति ९ किंच अणुभ्यश्चेति ॥१० द्विविधा मधुकरा
मधुकुर्वंति पुष्पादादाय गृह्णातीति मधुहा भ्रमराः मधुकरोति आहारत्वेन स्वरूपेण चेति मधुमक्षिका च

योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंग
वन्नश्यति नष्टदृष्टिः ८ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता गृहानहिंसन्नातिष्ठेद्वृत्तिं मा
धुकरीं मुनिः ९ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः सर्वतः सारमादद्यात्पुष्पेभ्य
इव षट्पदः १० सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं पाणिपात्रोदरामत्रो मक्षिके
व न संग्रही ११ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं मक्षिका इव संगृह्णन्सह तेन वि
नश्यति १२ पदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि स्पृशन्करीव बध्येत करिण्या अंगसंग
तः १३ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः बलाधिकैः स हन्येत गजैरन्यैर्ग
जो यथा १४

तत्र प्रथमाच्छिक्षितमुक्तं द्वितीयाच्छिक्षितमाह सायमिदं भोक्ष्यामि श्व इदं भोक्ष्यामीति भिक्षितमन्नादि न संग
ह्णीत किंतु पाणिपात्रस्तन्मात्रग्राही यद्वा उदरमेवामत्रं पात्रं यस्य सः एकभिक्षायामुदरमात्रग्राही भवेत्
संगृही तु मक्षिकेव नं भवति न जीवतीत्यर्थः ११ एतद्दृढयति पुनः सायंतनमिति १२ स्पर्शासक्तिनाशहेतुरिति
गजाच्छिक्षितमाह पदापीति पादेनापि दारवीं दारुमयीमपि गजो हि करिणीं प्रदर्श्य निखातपिहितगर्त्ते निपा
त्य बध्यते १३ किंच नाधिगच्छेदिति नोपगच्छेत् १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० त्यागभोगविहीनो धनसंचयः परमामी भवतीत्यत्र मधुहा गुरुरित्याह नदेयमिति तद्न्योवल्लवान् भुंक्ते तद्
प्पन्यस्तत्वान्यः मधुहा मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ननु सुगुप्तं धनं कथमन्योज्ञास्यति हरिष्यति
चेतितत्राह अर्थवित् लिंगैरर्थं तदुपायं च वेत्तीत्यर्थवित् यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हरति च १५
स्वोद्यम विनापि भोगः संभवतीत्यत्रापि सएव गुरुरित्याह सुदुःखेति आशासानानामिति वक्तव्ये वर्णलो
पआर्षः यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ तयोरन्नमदत्वानुभुक्त्वा चांद्रायणं चरेदिति गृहि
णामावश्यकत्वेन दानविधानात् १६ हरिणाच्छिक्षितमाह ग्राम्येति भगवल्लीलां तु शृणुयादेव मृगयोर्लु

सं० नदेयंनोपभोग्यं च लुब्धैर्यद्दुःखसंचितं भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु १५ सुदुः
खोपार्जितैर्वित्तैराशासानां गृहाशिषः मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां १६ ग्राम्य
गीतं न शृणुयाद्यतिर्वनचरः क्वचित् शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् १७ नृ
३३ त्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः
१८ जिह्वयातिप्रमाथिन्या जनो रसविमोहितः मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा
१९ इंद्रियाणि जयन्त्याशु निराहारा मनीषिणः वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते २०

ब्धकस्य १७ हरिणशब्देन हरिणीसुत ऋष्यशृंगोऽपि गुरुर्ज्ञातव्य इत्याह नृत्येति वश्याव भूवेति शेषः राम
१८ रसाशक्तिर्नसिंहतुरिति मीनाच्छिक्षितमित्याह जिह्वयेति अतिप्रमाथिन्या अतिक्षोभिकया दुर्जय ३२
या ऋच्छति प्राप्नोति बडिशे आमिषलिप्ते लोहकंटके १९ दुर्जयत्वमुपपादयति इंद्रियाणीति आहा
भावाः अयंभावः यद्याहारस्त्यज्यते तर्ह्यन्येन्द्रियजयः केवलं भवति रसनेन्द्रियं तु वर्द्धते यदि तु भुज्यते तर्हि पु
नः अरसा सक्त्या सर्वेन्द्रियक्षोभः स्यात् अतो रसासक्तिपरित्यज्यौषधवद्भुंजीतेति प्राणच्चैव संतुष्येदिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ पिंगलायानेराश्यंयशिक्षितमितिवक्तुंनदाख्यानमाहपिंगलेत्यादिना मेमयाशिक्षितं २२ स्वैरिणी कामचारिणी संकेतेरतिस्थान २३ तान्वित्तवृतः सधनान् अनेषव भुन्कोदानं कांतानुसुरताहीन् २४ अपिसभावनायां अन्योऽपिमामुपेष्यती त्येवंदुराशयत्सुन्नेरणान्वृथा २५ क्षयंबलं वमानापुनः प्रविशतिपुनः प्रविशतिपुनर्निर्गच्छति एवंकुर्वतीनिशीथमर्द्धरात्रंप्राप २६ निर्वेद अलंबुद्धिः वित्तचिंत्तेनैवहेतुर्यस्यसः २७ यथायथावगाव ज्जितेंद्रियानस्याद्विजितान्येंद्रियः पुमान् नजयेद्रसनंयावज्जितंसर्वंजितेरसे २१ पिंगलानाम वेश्यासीद्विदेहनगरेपुरा तस्यामेशिक्षितंकिंचिन्निबोधन्रपनंदन २२ सास्वैरिण्येकदाकांतसंकेतउपनेष्यती अभूत्काले बहिर्द्वारि बिभ्रतीरूपमुत्तमं २३ मार्गआगच्छतोवीक्ष्यपुरुषान्पुरुषर्षभ तांछुल्कदान्वित्तवतः कांतान्मेने ऽर्थकामुकी २४ आगतेष्वपयातेषु सासंकेतोपजीवनी अप्यन्येवित्तवान्कोपिमामुपेष्यतिभूरिदः २५ एवंदुराशयाध्वस्तनिद्राद्वार्य्यवलंवती निर्गच्छंतीप्रविशतीनिशीथंसमपद्यत २६ तस्यावित्ताशयाशुष्यद्वक्त्रायादीनचेतसः निर्वेदः परमोजज्ञेचिंताहेतुः सुखावहः २७ तस्यानिर्विण्णचित्तायागीतंशृणुयथामम निर्वेदः आशापाशानांपुरुषस्ययथाह्यसिः नह्यंगाजातनिर्वेदोदेहबंधंजिहासति २८ पिंगलोवाच अहोममोहविततिंपश्यताऽविजितात्मनः याकांतादसतः कामकामयेयेनबालिशा २९ संतंसमीपेरमणंरतिप्रदंवित्तप्रदंनित्यमिमंविहाय अकामदंदुःखभयाधिशोकमोहप्रदंतुच्छमहंभजेज्ञा ३०

नृ ममम्तः शृणुननुकिंनिर्विण्णायागीतं श्रवणेनतत्राह हियस्मात् पुरुषस्याशापाशानांनिर्वेदोऽसिर्यथातथाछेत्ता तत्रहेतुः नह्येति अंगहेराजन् २८ अविजितात्मत्वेहेतुः याहबालिशाविवेकभून्यातस्याः येनकारणेन असतः तुच्छात्नरान्कामंकामये २९ बालिशत्वंप्रपंचयति

कुमा॰ ?

भा०१० अति विगर्ह्य विनिंद्य या वार्त्तोक्ती विकासत्या कुतः। संकेत्येनयाइति सूयावहुश्रीहिणास्वविशेषणं वा परितापं प्रपंचय
ति स्त्रैणा दिति स्त्रीलंपटात् अथच अर्थतृष्णः खुध्रात् अतएवानुशोच्योऽन्नरात् याह वित्तं रतिं चिच्छतीति याह तथा
त्मा परितापितः। केन चित्त मिच्छती तेन नरेणाक्रीतेनात्मना देहेन ३१ अहो धिङ्मायाहमतिवीभत्सितं भ
जामीत्याह यदिति वंशा नाम स्थूणासु निहितास्तिर्यग्वेणु। वंशास्तो स्मिन् भयांतो निहितावेणवः। अस्थिभिः
वनिर्मिता वंश्या दयो यस्मिंस्तत् तत्र पृष्टदीर्घमस्थि यत्सवंशः पार्श्वास्थीनि वंश्यानि स्थूणा हस्तपादास्थी

अहो मयात्मा परितापितो वृथा संकेत्यवृत्त्याऽति विगर्ह्यवार्त्तया स्त्रैणान्नराद्यार्थतृषोऽनुशोच्या
त्क्रीतेन वित्तं रतिमात्मनेच्छती ३१ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं
३३ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ३२ विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः
यान्यमिच्छत्यसत्यस्माद्दात्मदात्कामम् अच्युतात् ३३ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरि
णां तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ३४ कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः
आद्यन्तवन्तो भार्याया देवा वा कालविद्रुताः ३५ राम राम राम राम राम राम राम

नि तथा रोमभिर्नखैश्च पिनद्धं छादितं तथापि क्षरंती नवद्वाराणि यस्मिन् तत् एवंभूतागाररूपं नरशरी राम
रमेतत् मत् मत्तोऽन्या का वा कांतं न बुध्वा उपैति सेवते ३२ सत्संगतिं सत्यामप्यहो ममैव मोहइत्याह विदेहाना ३२
मिति याहमसती अच्युतादन्यं कामं भोगमिच्छती सा ३३ एवं निर्विण्णसती अतः परमेवं करिष्यामीत्याह
सुहृदिति अयमीश्वरः आत्मनैवात्मनामेव निवध्नन् विक्रीय विशेषेण क्रीत्वा अनेनैव सह रमे रमा लक्ष्मी
यथा ३४ अन्यस्या सेव्यत्वं दर्शयति कियदिति आद्यंतवंतो यकामाः विषयाः। कामदान राज्ञा देवा वाका
लकल्पिताः। भार्यायाः कियत् प्रियं कृतवंतः। न किंचित् अतोनेहामुत्र च तमतिरिक्तः कोपि सेव्योऽस्तीत्यर्थः ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं निश्चित्य स्वभाग्यमभिनंदति नूनमिति दुष्टा आशाय स्यास्तस्या मे ३६ ननु धनाप्राप्त्या क्लिष्टासि कथं विष्णुः
प्रीतः तत्राह मैवमिति मंदभाग्यायाश्चेद् इह स्यांतर्ह्येव निर्वेदहेतवः क्लेशा न स्युरित्यर्थः येन निर्वेदेन अनुबंधं
गृहादिकं निर्हृत्य परित्यज्य ३७ अतस्तेन श्रीविष्णुना उपहृतं कृतमुपकारं निर्वेदलक्षणं ग्राम्येषु नरेषु वि
षयेषु चासंगता ३८ कथं व्रजसि तदाह संतुष्टेति ३९ ननु ब्रह्मादीन् हित्वा अमुनैवेति कोयं नियमस्तत्रा

नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा । निर्वेदोयं दुराशाया यन्मे जातः सुखावहः ३६
मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः । येनानुबंधं निर्हृत्य पुरुषः शममृच्छति ३७ तेनो
पकृतमादाय शिरसा ग्राम्यसंगताः । त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ३८ संतुष्टा श्र
मा द्दधत्येतद्यथालाभेन जीवती । विहराम्यमुनैवाहमात्मना रमणेन वै ३९ संसारकूपे पति
तं विषयैर्मुषितेक्षणं । ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुमधीश्वरः ४० आत्मैव ह्यात्मनो
गोप्ता निर्विद्येत यदाखिलात् । अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ४१ ब्राह्मण उवाच
एवं व्यवसितमतिर्दुराशां कांततर्षजां । छित्वोपशममास्थाय शय्यामुपविवेश सा ४२ आ
शा हि परमं दुःखं नैराश्यं परमं सुखं । यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ४३
इति श्रीभागवते महापुराणे एकादशस्कंधे अष्टमोऽध्यायः श्रीराम श्रीराम श्रीराम

तु संसारेति मुषितेक्षणं अपहृतविवेकं ४० तर्हि किमात्मत्राणोपाधिना भक्तिरिष्यासि न तत्र सर्वतो निर्वि
द्य भगवद्भजने प्रवृत्तस्यात्मन एव सामर्थ्यत्वादित्याह आत्मैवेति यदा एवं जगत्पश्येत्तत्र अप्रमत्तः सन्
निखिलात् इहामुत्र च भोगात् निर्विद्येत तदा हि आत्मैवात्मनो गोप्तेत्यन्वयः अतः केवलं प्रेम्णैव भजा
मीति भावः ४१ कांतस्य तर्षोऽभिलाषस्तस्माज्जातां ४२ फलितमाह आशा हीति ४३ इत्येकादशे अष्टमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्२८

२१

भा०ए० नवमे कुररादिभ्यो देहत्यागापशिक्षितं आत्तायदुः कृतार्थोऽभूदिति क्रमेण वर्णितं । कुररां शिक्षितमाह परिग्र
होहीति यद्यत्प्रियतमं तस्य तस्य परिग्रहः तृद्विद्वा परिग्रहो दुःखमिति विद्वान्सन् यस्त्वकिंचनः त्यक्तपरि
ग्रहः ननु दरिद्रः तदाह सामिषमिति २ अर्भकशिक्षामाह नेति गेहपुत्रिणां तद्वतां या भवति चिंता सा च
मेनास्ति आत्मनैव क्रीडा यस्य आत्मनि रतिः प्रीतिर्यस्य सः ३ नन्वेज्ञ सर्वज्ञयोः किं सादृश्यं ने त्रिंय

ब्राह्मण उवाच परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणां अनंतं सुखमाप्नोति तद्विद्वान्य
स्त्वकिंचनः १ सामिषं कुररं जघ्नुर्बलिनो ये निरामिषाः तदामिषं परित्यज्य स सुखं
समविंदत २ न मे मानापमानौ स्तो न चिंता गेहपुत्रिणां आत्मक्रीड आत्मरतिर्विच
रामीह बालवत् ३ द्वावेव चिंतया मुक्तौ परमानंद आप्लुतौ यो विमुग्धो जडो बालो
२४ यो गुणेभ्यः परं गतः ४ क्वचित्कुमारी त्वात्मानं वृणानान् गृहमागतान् स्वयं ता
नर्हयामास क्वापि यातेषु बंधुषु ५ तेषामभ्यवहारार्थं शालीन् रहसि पार्थिव अवघ्न
त्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ६ सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः
बभंजैकैकशः शंखान् द्वौ द्वौ पाण्योरशेषयत् ७ राम राम राम राम राम

परमसुखमित्याह द्वाविति विमुग्धः अज्ञः जडो अनुद्यमः एवंभूतो यो बालः यश्च प्रकृतेः परमीश्वरं प्रा राम
प्तः तौ द्वौ ४ कुमार्याः शिक्षितं वक्तुं कुमार्याख्यायिकामाह क्वचिदित्यादिना वृणानान् स्ववरणाय आगतान् २४
बंधुषु पित्रादिषु ५ शंखाः शंखवलयाः महद्यथा भवति तथा स्वनं चक्रुः ६ सा महती बुद्धिमती दि
त स्वयं शाल्यवहननं जुगुप्सितं च दरिद्रतायोतकं एकैकशः क्रमेण एकमेकं बभंज करादपसारितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निरभिहत्पथकुक्लत्तवती ॥ ननुकुमार्यास्तवचकथंसंगतिः तत्राहलोकानिति एवं वासइति प्रथमांतपा
ठेकलहहेतुः वार्त्तागोष्टीहेतुर्भवेदित्यर्थः १० चित्तेकाग्रतोहेतौऽस्फुर्त्तिलक्षणसमाधिहेतुरितिशर
नर कारादिक्षितौमित्याहमइति तत्रापायमाह जितेति आसनजयेश्वासजयः तस्यचंडश्वासाधीनंम ये२
नोनिश्चलंभवति ननुक्षणं निश्चलसदपिमनोपिविषयवासनयायदिविक्षिप्यतसुषुप्तौविचसर्व
थालीयतवानदाकितत्राह वैराग्येति वैराग्येणविक्षिप्यमाणं अभ्यासयोगतलक्ष्यंध्रियमाणंस्थि

उभयोरप्यभूद्द्वोषोह्यवधूत्याःशमशंखयोः तत्राप्येकोनिरभिदेदेकस्मान्नाभवद्ध्वनिः
॥ अन्वशिक्षमिमंतस्याउपदेशमरिंदम लोकाननुचरन्नेतांल्लोकतत्त्वविवित्स
याएवं वासबहूनांकलहोभवेद्वार्त्ताद्वयोरपि एकएवचरेत्तस्मात्कुमार्याइवकंक
णः १० मनएकत्रसंयुज्याज्जितश्वासोजितासनः वैराग्याभ्यासयोगेनध्रियमा
णमतंद्रितः ११ यस्मिन्मनोलब्धपदंयदेतच्छनैःशनैर्मुंचतिकर्मरेणून् सत्त्वेन
वृद्धेनरजस्तमश्चविधूयनिर्वाणमुपैत्यनिंधनं १२ राम राम राम रामराम

रीक्रियमाणं ११ एकत्रेतिकुत्रतत्राह यस्मिन्निति यत्लयविक्षेपात्मकंमनः एतद्यस्मिन् परमानं [illegible] ८
दरूपेभगवतिलब्धास्पदंसत्कर्मरेणून् कर्मवासनामुंचतितस्मिन् ननुकर्मवासनात्यागेपि
सुषुप्तिवल्लयाद्दुर्वारः नासत्त्वेनेति वृद्धेनउपशमात्मकेनारजस्तमसोर्भावविक्षिप्यलयाभावा
न्निर्वाणंअखंडितंध्येयाकारेणावस्थानमुपैति कुतः अनिंधनंइंधनंगुणास्तत्कार्यंचतद्रहितं॥
तदुक्तंयोगशास्त्रेमनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः यासंप्रज्ञातनामासौसमाधि

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०पु० ततश्चानेहतस्फूर्त्तिरित्याह तदितिवहिर्दर्शनादिना अंतरं स्मृत्यंईयोगतात्मानस्यश्रमकारणं दृत्तेचि
त्तेः भेरीघोषेरंतिकेअजंतं नृपतिमपिनवेदतद्दत्तु १३ सर्प्पाच्छिक्षितमाह एकचारीति योगिसमदृ
स्यापित्यागकुमारीगुरुः१ जनसंगत्यागासर्प्पः१ सयथाजनाद्भ्रकमानएकाकीविचरतिनियतनि
केतरहितश्चासहायप्रमत्तश्च एकांतवासीचा आचारेगतिभिः१ सविषंवितिनलक्ष्यतेच असहाय
श्चामितभाषीचतद्दत्तमुनिवर्त्ततेत्यर्थः१४ किंच गृहारंभइति अध्रुवात्मनः१ नश्वरदेहस्य सुखं
यथाभवतितथावर्त्तते १५ कारकसामग्रीनिरपेक्षात्केवलोदीश्वराद्विश्वस्यष्टिसंहाराम्भूर्णेनो

तदेवमात्मन्यवरुद्धचित्तोनवेदकिंचिद्वहिरंतरंवा यथेषुकारोनृपतिंव्रजंतमिषौगतात्मा
नददर्शपार्श्वे १३ एकचार्य्यनिकेतःस्यादप्रमत्तोगुहाशयः१ अलक्ष्यमाणआचारैर्मुनिरे
३५ कोऽल्पभाषणः १४ गृहारंभोतिदुःखायविफलश्चाध्रुवात्मनः१ सर्पःपरकृतंवेश्मप्रवि
श्यसुखमेधते १५ एकोनारायणोदेवः१ पूर्वसृष्टंस्वमायया संहृत्यकालकलयाकल्पांतइ
दमीश्वरः१ १६ एकएवाद्वितीयोभूदात्माधारोऽखिलाश्रयः१ कालेनात्मानुभावेनसाम्यं
नीतासुशक्तिषु १७ सत्वादिष्वादिपुरुषः१ प्रधानपुरुषेश्वरः परावराणांपरमआस्तेकैवल्य
संज्ञितः केवलानुभवानंदसंदोहोनिरुपाधिकः१ १८ राम राम राम राम राम

भिदृष्टांतेनमायासंभावितात्वितिवक्तुंप्रथमंसंहारप्रकारमाहएकइतिसार्द्धत्रयेणएकः१कारकनि ३५
रपेक्षः१ पूर्वसृष्टमिदंजगत्कालकलयाकालशक्त्यासंहृत्य १६ एकएवाद्वितीयःसंजातोयद्विजा
तीयभेदशून्योऽभूत् कारणभूतासुसत्वादिषुशक्तिष्वपिसाम्यंनीतासुसतीषुसाम्यंगुणसाम्यंप्र
धानं १७ तदुपाधिःपुरुषःतयोरीश्वरःपरावराणांपरब्रह्मादयःअवरेअन्येचमुक्ताजीवास्तेषां
परमःप्राप्यआस्तेकुतःकैवल्यसंज्ञितःमोक्षशब्दाभिधेयःतत्रहेतुःकेवलेतिनिर्विषयःस्वप्रकाशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३

गणितं १

ततः केवलादेवसृष्टिं दर्शयति केवलेनात्मानुभावेन कालेसूत्रं क्रियाशक्तिप्रधानंमहत्तत्त्वं सृजति जीवसंसार
हेतुभूतं सूत्रे सृष्टेऽपि हिंसामाभैरिति संबोधयति अरिंदम अरीनुरागादीन् दमयितुं समर्थ १९ सूत्रस्यैवव्यु
त्पत्तिशब्देनाच्यमानस्य तामिति स्त्रीलिंगेन परामर्शः त्रिगुणव्यक्तिं गुणत्रयस्य कार्यं अतएवविश्वतोमुखं
नानाविधं त्रिगुणात्मकं विश्वमहंकारद्वारेण सृजन्तीं त्रिगुणकार्यैः सूत्रसंज्ञायाः कारणमाह यस्मिन्निति श २
कारणभूते समष्टिरूपे यस्मिन्निदं विश्वं प्रोतं वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लो

केवलात्मानुभावेन स्वमायांत्रिगुणात्मिकां संक्षोभयन्सृजत्यादौ तया सूत्रमरिंदम। १९
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखं यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् २०
यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः। २१ य
त्र यत्र मनो देही धारयेत्सकलं धिया स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्स्वरूपतां २२
कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः। याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन् २३

कः परश्लोकः सर्वाणि च भूतानि संहृत्यानीतीत्युक्तं। येन वा प्राणरूपेण जीवः संसरति २०
तदेव शिक्षितमर्थमुक्त्वा दृष्टान्तमाह यथेति हृदयात् मुखात् वक्त्रतः। वक्त्रेण संतत्य प्रसार्य विहृत्य
क्रीडित्वा २१ भगवद्ध्यानपराणां तत्सारूप्यं न चित्रमिति पेशस्कृतो भ्रमरविशेषात् ज्ञानमित्याह यत्र
यत्रेति सकलमेकाग्रं २२ कुड्यां प्रवेशितः। निरुद्धः भयेन ध्यायन् सात्मतां तत्सारूप्यं सात्मतां
मितिपाठे त्वपूर्वरूपमसंत्यजन्नित्यस्यायमभिप्रायः। यदा तेनैव देहेनान्यसारूप्यं दृश्यते त
दा किंवक्तव्यं देहान्तरेण सारूप्यं घटत इति २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ए० स्वदेहादेव शिक्षितमाह स्वात्मेति स्वात्मनो देहात् शिक्षितं २४ गुरुत्वे हेतुः विरक्तिविवेकयोर्हेतुः विरक्तिहेतुत्व
माह सत्वनिधनं उत्पत्तिविनाशौ बिभ्रत् स्म किंच सततं संततं आर्त्युदर्कं दुःखमेवोत्तरफलं विभ्रति
यद्वा संततार्त्तिरेव उदर्के उत्तरफलं यस्य तत्सत्वनिधनं बिभ्रत् विवेकहेतुत्वमाह तत्वानीति यथा
यथावत् एवं सत्युपकारित्वे पि देहे नैवास्थाकर्त्तव्येत्याह तथापीति पारक्यं श्वशृगालादिभक्ष्यमिति
निश्चितवान् २५ सततार्त्युदर्कत्वं प्रपंचयति जायेति द्वाभ्यां यस्य देहस्य प्रियचिकीर्षया भोगसंपा
दनेच्छया जायादिवर्गान्वितन्वन्पुष्णाति पुरुषः कथंभूतः सकृच्छ्रं यथा भवति तथा ऽवरुद्धानि

एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो २४
देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्वनिधनं सततार्त्युदर्कं तत्वान्यनेन विमृशा
मि यथा तथापि पारक्यमित्यवसितो विचराम्यसंगः २५ जायात्मजार्थपशुभृत्यगृहाप्त
वर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन् स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वा
स्य बीजमवसीदति वृक्षधर्मा २६ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यत
स्त्वगुदरं श्रवणं कुतश्चित् घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेह
पतिं लुनंति २७

नि ९ संचितानि धनानि येन सः देहविशेषणं वा सदेहः स्वांते स्वस्यायुषोंऽते अव
प२ सीदति नश्यति किंच देहनाशे पि न दुःखसमाप्तिरित्याह अस्य पुरुषस्य देहांतरबीजं कर्म सृष्ट्वेति वृक्ष
स्य वधर्मा यस्य सः २६ किंच जिह्वेति अमुं देहवंतं देहाभिमानिनं पुरुषं एकतो रसं प्रति जिह्वा अपकर्षति
आकर्षति कर्हि कदाचित् तर्षा पिपासा जलं प्रति शिश्नो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरं अन्नं
प्रति श्रवणं शब्दं प्रति घ्राणो गंधं प्रति चपलदृक् रूपं प्रति क्व च क्वचित् स्वस्वविषयं प्रति कर्मशक्तिः

[illegible]

३६

राम

३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गदेवं देहो गुरुरित्यादि त्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यापि दुर्लभत्वं दर्शयन्नीश्वरनिष्ठां वि-
धत्ते सृष्ट्वेति द्वाभ्यां पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणोऽवलोकायापरोक्ष्याय धिषणा बुद्धिर्यस्मिन् ५२
तं तदुक्तं तासां मे पौरुषी प्रियेति श्रुतिश्च पुरुषे त्वेवाविस्तरामात्मेत्यादि ईश्वरो हि करणाधिष्ठात्रीरग्न्यादि
देवताः वागादिभिः सह सृष्टवान् ताश्च तं प्रति भोगार्थं शरीरमायाचंत स च ताभ्यो गोशरीरं अश्वशरी-
रं पुरुषशरीरं यथाक्रमं मोनीतवान् ततस्ता देवताः सा अब्रवीद्यथायतनं चक्षुरादिस्थानं अस्मिन् देहे प्र-
विशतेति तदाह ताभ्य इतीत्यादि तथा ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानय

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् तैस्तैरतुष्टहृ-
दयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः २८ लब्ध्वा सुदुर्लभमिदं बहुसंभवां-
ते मानुष्यमर्थदमनित्यमपीह धीरः तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः
खलु सर्वतः स्यात् २९ एवं संजातवैराग्यो विज्ञानालोक आत्मनि विचरामि महीमेतां
मुक्तसंगोऽनहंकृतिः ३०

ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं बतेति २८ तस्माद्बहूनां संभवानां जन्म-
नामंते मानुष्यं अनित्यमप्यर्थदं पुरुषार्थप्रापकं देवानामपि दुर्लभमिदं अनुमृत्यु अनु निरंतरं मृत्युर्वायस्य
तत् यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत विषयः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव २९
तदेवं हेयोपादेयविवेकं चेहधानिरूप्येदानीं यदुक्तं त्वं तु कल्पः कविर्दक्ष इत्यादि तत्रोत्तरमाह एवमि-
ति एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः संपन्नं तं वा आत्मविशेषणं
आत्मनि स्थित एव महीं विचरामि ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० ननु किं बहुभिर्गुरुभिः न हि श्वतेकेन भृगुप्रमुखैर्बहवो गुरवश्चाश्रिताः तत्राह नैद्यैकस्मादिति बहुधा सम्प्रपञ्चनैः प्रपञ्च
भदादिभिः अयं भावः नैतत्परमार्थापेक्षया गुरुत्वं किं त्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्र नि
वर्त्तकाः तेषां च बहुत्वं युक्तमेवेति ज्ञानप्रदं गुरुमेकमेव वक्ष्यति मदभिज्ञं गुरुं शान्तमुपासीतेति उक्तो
या२ चात्तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममिति ३१ विप्रादत्तात्रेयः योगाद्धि मां पुरुभयीयदुहे हयाप्य
इत्युक्तो वा त यथागतं तथैव यदृच्छया यावितस्यथं ३२ भगवान्स्वायंब्रह्मविनूकुलमितिश्लोकोपेतेन १४
वैषाप्राप्तवेज इति अत्र संग्रहश्लोकः कपोतमीनहरिणकुमारीगजपन्नगाः पतंगाः कुररश्चाष्टाहयोर्थे

नैद्यैकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ३१ श्रीभ
गवानुवाच इत्युक्त्वा स यदुं विप्रस्तमामन्त्र्य गभीरधीः वंदितोभ्यर्थितो राज्ञा ययौ प्रीतो यथा
३८ गतं ३२ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ३३
इति श्रीभागवते महापुराण एकादशस्कंधे भगवदुद्धवसंवादे अवधूतगीता नाम नवमोऽध्यायः
श्रीभगवानुवाच मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयः वर्णाश्रमकुलाचारमकामात्मा
मा१ समाचरेत् १

गुरवो मताः मधुकृन्मधुहर्त्ता च पिंगला चह्वयोस्त्रयः उपादेयार्थविज्ञानेशेषाः पृथ्व्यादयो मताः नदवांत
देहे नरनाडाविसर्गः रभेदश्रूतत्रततत्स्फुटीकृतेः अध्यायत्रितये चाष्टनवांशं वीरिताः क्रमात् ३३ इत्येकादशनवमः चतुर्वि राम ३७
शतिगुरुर्वाख्यालब्धसंभावना भुवः उद्धवस्यात्मतत्वाप्तिसाधनाक्तिरतः परं दशमे देहसंबंधात्संसरति
नीत्मनः स्वतः इत्येतद्दूषणयामास मतान्तरनिरासतः तदेवमन्वयव्यतिरेकाभ्यामुत्पन्नविवेकज्ञानस्य
तत्वज्ञानायादितोऽभ्यसाधनान्युपदिशति भगवान् मयेति मयापंचरात्राद्युक्तेष्ववहितः स्वधर्मेष्ववहितः

आश्रमात्मन् तद्विशिष्टान् वर्णाश्रमाचारान् विशिनष्टि ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१ कथमकामात्मतासंभवतीत्यत आह अन्वीक्षेतेति स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषयेषु सत्यत्वाभिनि
वेशनयसर्वेष्वारंभास्तेषां फलं वैपरीत्यं पश्येत् एवं फलं वैपरीत्यादकामः स्यात् २ किंच कामो विषया
णां मिथ्यात्वादपीत्याह सुप्तस्येति विफलः अर्थः शून्यः अपार्थः अवस्प्रयोगः इंद्रियैर्योव हि र्नानाबुद्धिः सा विष
ला नानात्मकत्वादिंद्रियकेतावन्मनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थी निवृत्ते तत्र काम्यनिषिद्धयोः
नित्यनैमित्तिके कुर्यात्प्रत्यवाय जिहासया इति स्मृतिः अतः प्रवृत्तं काम्यं कर्म त्यजेन्निवृत्ते नित्यनैमित्तिक
मेव कुर्यात् आत्मविचारे तु सम्यक् प्रवृत्तो निवृत्तं कर्म चोदनामपि नाद्रियेत ४ किंतु यमानहिंसादी
था०२ न् अभीक्ष्णमादरेण सेवेत शौचादीस्तु नियमान् क्वचित् यदा शक्ति स्यात् आत्मज्ञानो ३ वि

अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां। गुणेषु तत्त्वध्यानेन सर्वारंभविपर्ययं २ सुप्तस्य
विषयालोको ध्यायतो वा मनोरथः। नानात्मकत्वाद्विफलस्तथा भेदात्मधीर्गुणैः ३ निवृत्तं
कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत्। जिज्ञासायां संप्रवृत्तो नाद्रियेत् कर्मचोदनां ४ यमानभीक्ष्णं
सेवेत नियमान्मत्परः क्वचित्। मदभिज्ञं गुरुं शांतमुपासीत मदात्मकं ५ अमान्यमत्सरो द
क्षो निर्ममो दृढसौहृदः। असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षेत्रस्वज
नद्रविणादिषु। उदासीनः समं पश्यन्सर्वेष्वर्थमिवा था०२
त्मनः ७

राधेन यमान् द्वादश नियमांश्चैकादश विशेषाध्याये वक्ष्यति
किंच यमध्याहारपरित्यज्य गुरुमुपासीतेत्याह मदभिज्ञमिति मदात्मकं मद्रूपं ५ गुरुसेवकस्य धर्मानाह
अमानीति दक्षः अनलसः निर्ममः जायादिषु ममताशून्यः गुरौ तु दृढसौहृदः असत्वरः अव्यग्रः अमोघ
वाक् व्यर्थालापरहितः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि ६ ननु स्वजायादिषु कथं निर्ममः स्यात्
तत्राह जायेति आत्मनो देहे हेतुं विवेकं दर्शयति आत्मनोऽर्थं प्रयोजनं सर्वत्र सममिव पश्यन्निति अ
यं भावः सर्वदेहेष्वात्मन एकत्वाज्जायादिदेहेऽस्मिंश्च देहे आत्मनोऽर्थः सुखादिः सम एव कोऽपि विशेषो

कोशेष्वममत्वाऽभिनिवेशाऽपेक्षमणं गुलाभिनः मसूरीपाठपेक्षेति १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए अहोकोऽसौ व्यतिरिक्त आत्मा यस्य कर्तृत्वं सर्वेषु समः स्यात् तत्राह विलक्षण इति स्थूलसूक्ष्माद्देह
द्वयादात्माऽन्यः यतो विलक्षणः द्वैधा वैलक्षण्यं दर्शयति ईक्षितास्वदृगिति द्रष्टा हि दृश्याद्वि
लक्षणः स्वप्रकाशश्च जडाद्विलक्षणः तत्पार्थक्ये दृष्टांतः यथाग्निर्दाहकः प्रकाशश्च दाह्या ने२
त्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति ८ अनेनैव दृष्टांतेन नित्यत्वाद्वित्वविभुत्वैकत्वा
दयोपि सिध्यंतीत्याह निरोधेति यथा च दारुषु अंतः प्रविष्टोग्निस्तत्कृतानुत्पत्त्याशादीन्प्राप्नोति ननु
स्वतो नाशादिमान् एवं देहगुणाननित्यत्वादीन् देहात्परो नित्यादिस्वरूपोप्यात्माऽनुभवति
न तु स्वनित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति भावः ९ नन्वेवं देहसंयोगात्तद्वैभा

विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षितास्वदृक् । यथाऽग्निर्दारुणो दाह्याद्दाहकोन्यः
३८ प्रकाशकः ८ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान् गुणान् अनुप्रविष्ट आध
त्त एवं देहगुणान्परः ९ योऽसौ गुणैर्विरचितो देहोऽयं पुरुषस्य हि संसारस्त
न्निबंधोयं पुंसो विद्याच्छिदात्मनः १० तस्माज्जिज्ञासयात्मानमात्मस्थं केवलं
परं संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमं ११ श्रीराम श्रीराम श्रीराम

त्वं घटेत आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा कुतस्तन्निवृत्तिस्तत्रा राम
ह योऽसाविति पुरुषस्येश्वरस्याधीनेन मायागुणैर्योऽसौ सूक्ष्मः अयं च स्थूलो देहो विरचि ३८
तः पुंसो जीवस्यायं संसारः तन्निबंधनस्तदध्यासकृतः हि यस्मादेवं तस्मादात्मविद्या
वि२ तन्निवृत्तिकेत्याह आत्मनो विद्या ज्ञानं तस्य छित् छेत्री अच्छिदिति वा पाठे छेद १० यस्मा
देवं तस्माज्जिज्ञासया विचारेण आत्मस्थं आत्मनि कार्यकारणसंघातपर्वावस्थितं सम्यक्ज्ञा
त्वा एतत् एतस्मिन् देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निरसेत् त्यजेत् ११ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुरोर्लब्धा विद्या सा अविद्यातत्कार्यनिरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेण निरूपयति आचार्य
इति आद्यः अधरः तत्संधानं तयोर्मध्यमं मथनकाष्ठं प्रवचनमुपदेशः विद्या तु संधिः संधौ भवन्नग्निरिव
तथा च श्रुतिः आचार्यः पूर्वरूपमंतेवास्युत्तररूपं विद्या संधिः प्रवचनं संधानमिति १२ अग्निसादृश्यमेवा
ह वैशारदीति विशारदोऽतिनिपुणः तेन शिष्येण प्राप्ता तेन गुरुणोपदिष्टा वा अतिविशुद्धा बुद्धिः गुणकार्य
रूपां मायां निवर्तयति यदात्मकमेतद्धि स्वं जीवस्य संसृतिनिमित्तं तान्गुणांश्च दग्ध्वा असमिन्निरिंध
नः तस्मात्कार्येण कारणेन विद्यया च व्यवधानाभावात्साक्षात्परमानंदरूपो भवतीति १३ एवं तावत्तत्त्वप्रकाश
ज्ञानस्वरूपो नित्य एक आत्मा कर्तृत्वादयश्च धर्मास्तस्य देहोपाधिकाः तद्व्यतिरिक्तं च सर्वमनित्यं मायाम

स्वयं शाम्यति २

अग्निरिव २

आचार्योऽरणिराद्यः स्यादंतेवास्युत्तरारणिः तत्संधानं प्रवचनं विद्यासंधिः सुखावहः १२ वैशार
दी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूताम् गुणांश्च संदह्य यदात्ममेतत्स्वयं च शाम्यत्य
समिद्यथाग्निः १३ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः नानात्वमथ नित्यत्वं लोक
कालागमात्मनां १४

यं च अतः सर्वतो विरक्तः सन्नात्मज्ञानेन मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेवं श्रुतिसमन्व
येन निर्णीतं पूर्वमतांतरविरोधेन संदेहो माभूदिति तन्मतं निराकर्तुमुत्थापयति अथेति अथ मन्यसे एषां
जीवात्मनां कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति एवं हि जैमिनीया मन्यन्ते अहंप्रत्ययवेद्य ए
वात्मा स च प्रतिशरीरं भिन्नः कर्ता भोक्तृरूपश्च न तु तत्स्वरूपभूतो निर्विकार एकः परमात्मास्तीति
यथाहुः अहंप्रत्ययवेद्यो ज्ञातव्यः सर्वदेव हीति न चैवं वैराग्यं च न संभवति तथा हि भोगस्थानानामनि
त्यत्वाद्धि वैराग्यं भवेत् भोगकालस्य वा तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वा न त्वेतदस्तीत्या
ह अथ नित्यत्वं लोककालागमात्मनां मन्यसे इति १४

वि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० नचभोगानांविच्छेदस्तन्मायामयत्वाद्वैराग्यंस्यादित्याह सर्वभावानांस्रक्चंदनादीनांसंस्था स्थितिः औत्पत्तिकी
प्रवाहरूपेणनित्यातथाचवदंतिनकदाचिदनीदृशंजगदिति अन्यस्तुकर्त्ताकश्चिदीश्वरोपिनास्तीतिभावः किं
चा यथायथावत् नतुमायामयीत्यर्थः नचात्मस्वरूपभूतंनित्यमेकंज्ञानमस्तीत्याह तत्तदिति घटपटाद्या
कारभेदेनधीर्जायते अतोऽनित्याभिद्यतेच अयंगूढोभिप्रायः नहिनित्यज्ञानरूपस्यात्मनोअपितुज्ञानप
रिणामवान् नचविकारित्वेनानित्यत्वप्रसंगः यथाहुः विक्रियाज्ञानरूपाऽस्यनित्यत्वविरोत्स्यतइति अ रा२
नामुक्ताविंद्रियादिरहितस्यपरिणामासंभवाज्जडत्वेनतत्राप्रपुरुषार्थत्वात्प्रवृत्तिरेवश्रेयसानिवृत्तिरिति५

मन्यसेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५ एवम
४० प्यंगसर्वेषांदेहिनांदेहयोगतः कालावयवतःसंतिभावाजन्मादयोऽसकृत् १६ अत्रा
पिकर्मणांकर्तुस्वातंत्र्यंचलक्ष्यते भोक्तुश्चसुखदुःखयोःकोन्वर्थोविवशंभजेत् १७
सुखं१ नदेहिनांकिंचिद्विद्यतेविदुषामपि तथाचदुःखंमूढानांवृथाऽहंकरणंपरम् १८

तत्रतावत्तदुक्तमंगीकृत्यवैराग्योपपादनायप्रवृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयति एवमपीत्यादिना लो राम
कर्मणांकर्तुःस्वातंत्र्यंलक्ष्यते २ कानांलोकपालानामित्यर्थः प्राक्तनेनग्रंथेनअंगहेतुद्रव कालावयवतः संवत्सरादिरूपात् १६
अत्रापितिस्वातंत्र्यपक्षेदुःकर्मणांदुःखभागस्यचासंभवादित्यर्थः १७ ननुयःसम्यक्कर्मकर्तुंजा ३ए
नातितस्यसुखिनएव यस्तुनजानातितएवदुःखिनइतिचेत्तत्राहनेति विदुषामपिक्वचित्सुखंनविद्यते
तथामूढानामपिदुःखंनविद्यते अतोवयंकर्मकुशलत्वात्सुखिनइतितेषांकेवलंवृथैवाहंकारः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगीकृत्याप्याह यदीति तं योगमुपायं न विदुर्यथा साक्षान्मृत्युर्न प्रभवेत् १९ तथापि यावज्जीवं सुखं भविष्यती
५२ ति चेन्न तर्हि कान्विति यतः अंतिकं वर्त्तमानानां मृत्युर्न तुष्टिं ददाति आघातं वधस्थानं प्रति २० एवमस्मिन् लोके
सुखं नास्तीत्युक्तं लोकांतरे पि नैवं चेत्याह श्रुतमिति श्रुतं स्वर्गादि तदपि दुष्टं स्पर्द्धापरं सुखासहनं अ
सूयापरगुणदोषाविष्करणं अत्ययो नाशः व्ययोऽपक्षयः तैर्दुष्टं यद्वा व्ययो नाशः अत्ययोऽन्यस्याति शा
यः तेन दृष्ट्वा तत्र प्राप्यादुःखमित्यर्थः किंच बहवोंतरायाः वैगुण्यादिरूपा विघ्ना यस्मिन् कामसुखं त

यदि प्राप्तिविघातं च जानंति सुखदुःखयोः तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा १९ कोऽन्व
र्थः सुखयत्येनं कामो वा मृत्युरंतिके आघातं नीयमानस्य वध्यस्येव न तुष्टिदः २० श्रुतं च
दृष्टवत् दुष्टं स्पर्द्धासूयात्ययव्ययैः बह्वंतरायकामत्वात् कृषिवच्चापि निष्फलं २१ अंतरा
यैरविहतो यदि धर्मः स्वनुष्ठितः तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु २२ इष्ट्वेह देवता
यज्ञैः स्वर्लोकं याति याज्ञिकः भुंजीत देववत्तत्र भोगान् दिव्यान् निजार्जितान् २३ स्वपुण्याप
चिते शुभ्रे विमान उपगीयते गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् २४ स्त्रीभिः कामगया
नेन किंकिणीजालमालिना क्रीडन्न वेदात्मपातं सुराक्रीडेषु निर्वृतः २५ आराम आराम

स्य भावस्तत्वं तस्मात् कृषिर्यथा बहुविघ्ना तद्वत् बहुसुखत्वेन अनंतमपि निःफलं २१ विघ्नवैगुण्याद्यभा
वमंगीकृत्यापि नाशदुःखं दुःपरिहरमित्याह अंतरायैरिति पंचभिः निर्जितं साधितं २२ यज्ञैर्देवताः इंद्रा
दिरूपा इष्ट्वा २३ स्वपुण्यैरुपचिते सर्वभोगसंपन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते २४ कामेन इच्छ
या गच्छता विमानेन किंकिणीजालमालिना क्षुद्रघंटिकासमूहशोभिना सह स्त्रीभिः सुराक्रीडेषु नंदे

नादि क्रीडासमयानीर्व २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० कालेन चालितः पातितः २६ प्रवृत्तिर्द्विविधा विध्यनुसारेण काम्यकर्मणि च तदुल्लंघनेनाधर्मे वा तत्र काम्यकर्मप्र
वृत्तेर्गतिरुक्ता अधर्मप्रवृत्तेर्गतिमाह यदीति यदि वेत्यन्वयः अजितेंद्रियत्वात्कामात्मा अतः कृपणः अतो
लुब्धो भोगतृष्णाकुलः अतः स्त्रैणः स्त्रीलंपटः तदर्थं भूतविहिंसकः २७ किंच दुष्टजनप्रलोभितो धनाद्यर्थं पशून्
उल्बणं अविधिनाहत्वा तमः स्थावरतां याति २८ एवं कर्मसु प्रवृत्तस्य न सुखं न च निवृत्तिरित्युपसंहरति कर्माणीति
२९ तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राह लोकानामिति द्वौ मं २
तमः परार्द्धौ परमायुर्यस्य ब्रह्मणोपि तथा च श्रुतिः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च

तावत्प्रमोदते स्वर्गे यावत्पुण्यं समाप्यते क्षीणपुण्यः पतत्यर्वागनिच्छन् कालचालितः २६ यद्यधर्म
रतः संगादसतां वाजितेंद्रियः कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः २७ पशूनविधिना
४१ लभ्य प्रेतभूतगणान्यजन् नरकानवशो जंतुर्गत्वा यात्युल्बणं तमः २८ कर्माणि दुःखोदर्का
मौः पुनः णि कुर्वन्देहेन तैः पुनः देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः २९ लोकानां लोकपालानां मद्भयं कल्पजी
देह २ विनां ब्रह्मणोऽपि भयं मत्तो द्विपरार्द्धपरायुषः ३० गुणाः सृजंति कर्माणि गुणोऽनुसृजते गु
णान् जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ३१

मृत्युर्धावति पंचम इति अतः प्रवृत्तिमार्गस्य सर्वथानर्थहेतुत्वाद्धिरण्यास्तो निवृत्तिरेव युक्तेति तात्पर्यार्थः ३० एतेनैव स्व म २
यमीश्वरत्वाविष्कारेणेश्वराभावांगीकारः परिहृतः अन्यदपि मीमांसकमतं निराकरोति गुणा इति तत्र
यदुक्तं कर्तृभोक्तृरूपत्वादात्मेति तं निराकरोति गुणा इति गुणा इंद्रियाणि कर्माणि सृजंति न त्वात्मा आत्म राम
वेंद्रियाणि प्रवर्तयत्कर्माणि करोतीति चेत्तत्राह गुणा इति गुणाः सत्वादिगुणा इंद्रियाणि अनुसृजति ४०
प्रवर्तयंति न त्वात्मा अतः कर्तृत्वं तावन्नास्ति भोक्तृत्वमप्यौपाधिकमित्याह जीव इति गुणसंयुक्तः
कृतदेहाभिमानः असौ तेषु अहंकारवानित्यर्थः ३१ राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बहुधा ६

यथोक्तमात्मनो नानात्वं तद्देहोपाधिकमित्याह यावत्स्यादिति गुणानां वैषम्यमहंकारादिकार्यरूपं। नन्वा
त्मन एकत्वे कथं पारतन्त्र्यमुक्तं कथं वा लोकपालादीनामपि भयमित्युक्तं तत्राह नानात्वमिति ३२ यद्य
गूढमपि प्रीतं प्रवृत्तिरवश्रेयसीति तत्राह य एतदिति। तद्गुणवैषम्यं तत्कृतं भोगकर्म चेत्यर्थः। उपासीर
श्लोकेन २ न्सेवेरन् लोकादीनामनित्यत्वाच्छुचाऽर्पिताः आत्ताः सन्तो मुह्यन्ति ३३ न केवलमनित्यतामात्रं किंतु मा गुणव्यतिकरेण
यामयत्वमपीत्याह काल इति स्वभावो देवत्वादिपरिणामहेतुः धर्मस्तद्द्वारा कारणं गुणव्यतिकरे मायया
कालः संवत्सरादिः क्षोभसति मामेवं प्राहुः ननु मद्व्यतिरिक्ताः सन्ति ततो निष्ठन्ति रेवं मुक्तिहेतुत्वाच्छ्रेयसीति सिद्धं ३४ एवंनाव

आत्मा जीवः २ यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः। नानात्वमात्मनो यावत्पारतन्त्र्यं तदैव हि ३२ याव
दस्याऽस्वतन्त्रत्वं तावदीश्वरतो भयं य एतत्समुपासीरंस्ते मुह्यन्ति शुचाऽर्पिताः ३३ काल आत्मा
गमो लोकः स्वभावो धर्म एव च इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ३४ उद्धव उवाच गुणे द२
षु वर्तमानोऽपि देहजेष्वनपावृतः। गुणैर्न बध्यते देही बध्यते वा कथं विभो ३५ कथं वर्तेत वि
हरेत्कैर्वा ज्ञायेत लक्षणैः। किं भुञ्जीतोत विसृजेच्छयीतासीत याति वा ३६ राम राम राम

देक एवात्मा तस्य च गुणकार्यदेहसंबन्धकृतः संसारः आत्मज्ञानाच्च मुक्तिरित्युक्तं विलक्षणः स्थूलसूक्ष्मा
दित्यादिना तदेव च मतान्तरनिरासेन दृढीकृतं श्रेयसामित्यादिना तत्र पृच्छति गुणेष्विति अयमर्थः
गुणाध्यासत्वं मुक्तिः सत्त्वेव वा अधिष्ठानसाधनाभावान्न मुक्तिः द्वितीये च गुणेषु वर्तमानोऽपि तत्कार्ये
देहजेषु कर्मसु सुखादिषु च कथं न बध्यते तथापि तेनाकाशवदनावृतत्वान्नैव बध्यत इति चेत्तर्हि पोथु २
बन्धानसंभवतीत्याह अनपावृतः कथं बध्यत इति ३५ यदि तु सत्त्ववदेहकारणबध्यते तन्निरूप्याच मु
च्यत इति मतं तर्हि तत्कथं ज्ञातव्यमिति पृच्छति बद्धो मुक्तो वा कथं वर्तेतेत्यादि किं भुञ्जीत कथं भुञ्जीतेत्यर्थः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० एतत्‌एतद्विषयंप्रश्नं। किंच एकएवात्मानादिगुणसंबंधान्नित्यबद्धः मुक्तेर्जन्य- वेः नित्यत्वप्रसंगान्नि
त्यमुक्तइत्यप्यंगीकार्यंस्यात् तत्रेमभ्रमोभवतीत्याह नित्यबद्धइति ३७ एकादशेदशमोऽध्यायः एको
देशेनुबद्धानांमुक्तानांचाथलक्षणं साधूनांचतथाभक्तेर्लक्षणंहरिणेरितं नित्यबद्धोनित्यमुक्त एकएवे व २
तिभ्रमइतिर्यदुक्तंतत्किंवस्तुतोविरोधात् प्रतीतितोवाः नाद्यः बंधमोक्षयोर्वास्तवाभावादित्याहबं
द्धोमुक्तइतिद्वाभ्यां आत्मावद्धोमुक्तश्चमगुणतः मदधीनसत्वादिगुणोपाधितः ननुवस्तुतः नन्वोपा
धिकत्वेपित्तदुःखपाकादिवद्बद्धत्वमेवकिंनस्यात्तत्राह गुणस्यमायामूलत्वाद्बंधनंनास्ति अतएवमो

एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर नित्यमुक्तोनित्यबद्धएकएवेतिमेभ्रमः ३७ इतिश्री
४१ भागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेदशमोऽध्यायः श्रीभगवानुवा
च बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः गुणस्यमायामूलत्वान्नमेमोक्षोनबंधनं १
शोकमोहौसुखंदुःखंदेहापत्तिश्चमायया स्वप्नोयथात्मनःख्यातिःसंसृतिर्नतुवास्तवी २

क्षश्चनास्तीति ननुकथंसर्वशास्त्रविरुद्धमुच्यतेतत्राहइतिमेव्याख्येति एवंमत्कृतोनिर्णयः अत्रम राम
तिकुतर्केरित्यर्थः अथैवमन्वयः आत्माचबद्धोमुक्तइतिव्याख्यागुणतः सामगुणतः मद्गुणपा ४१
रतंत्र्यात् अत्रहेतुत्वेनगुणनियंतृत्वस्मिंस्तदृत्तिरिक्तमाह अतएवनमेबंधनंमोक्षोवेति अ
न्यत्समानं एवंकारणभूतगुणानांमायामयत्वात्कार्यंसंसृतिर्मायेतिप्रपंचयतिशोकमोहावि
ति यथास्वप्नः आत्मनः बुद्धेरवख्यातिः विवर्तःसाहत २ राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतो वस्तुविरोधस्तावन्नास्ति प्रतीतिस्तूपाधिकी घटत इत्याह विद्याविद्येति नन्वेते मोक्षबंधावाभ्यामिति तन्न
शक्तौ कुतः मे मायया विनिर्मिते मायायाश्चानिरूप्यत्वात् बंधमोक्षकरीत्येकवचनं द्विवचनार्थे ननु तत्का
र्यत्वे बंधमोक्षयोरनादित्वनित्यत्वे न स्यातां नाद्ये अनादि अतो यावदविद्याप्रवर्त्तते यामित्तावद्बंधः तदु
विद्योदयामित्तद्धा मोक्षः स्फुरतीत्यर्थः तथा च स्कंदपुराणे बंधको भवपाशेन भवपाशाच्च मोचकः कै
वल्यदः परं ब्रह्म विष्णुरेव सनातन इति ३ तत्र शरीरिणामिति बहुवचननिर्देशाद्विषयभेदेनाऽवि
रोधस्तत्ताइति भ्रांतिं व्यावर्त्तयन्बंधमोक्षव्यवस्थामुपपादयति एकस्यैवेति तर्हि किमात्मभेदस्तत्रा

विद्याविद्ये मम तनू विद्युद्धव शरीरिणाम् मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ३ ए
कस्यैव ममांऽशस्य जीवस्यैव महामते बंधोऽस्याविद्ययाऽनादिर्विद्यया च तथेतरः ४
अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ५

पृथक् १ पि बंधः नेत्याह अस्य जीवस्यैवेति नन्वात्मभेदे जीवो नाम को न्योस्ति कथं च बंधमोक्षसुखदुःखादिव्यव
नतु बिंबस्य २ स्था तत्राह ममांशस्य अयं भावः यथैकस्यापि चंद्रादेर्जलाद्युपाधिना बिंबप्रतिबिंबरूपो भेदः तथा चत
त्रजलकृतः कंपादयः प्रतिबिंबस्यैव यथा च तत्र प्रतिबिंबानामप्युपाधिभेदेन भेदादेकस्मिन्नुदके भेभेप
नेऽन्यप्रतिबिंबस्य च बिंबकंपो नान्यगतस्य तथाऽविद्यायां प्रतिबिंबितस्य मदंशस्य जीवस्यैव तत्कृतौ बंधः तस्य
चोपाधितो भेदान्नाव्यवस्थेति तथा चाह यथैकस्मिन्घटाकाशे रजो धूमादिभिर्युते न सर्वे संप्रयुज्यंते तथा जी
वाः सुखादिभिरिति एतदुपाधेरहस्यत्वबुध्यानिश्चितव्यमितिसंबोधयति हे महामते इतरो मोक्षः ४ तदेवं व्य
वस्थामुपपाद्य कथं वर्त्ततेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह अथेति तद्वैलक्षण्यं हि द्विविधं जीवेश्वरयोरेकं
जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरिति सार्द्धद्वयेन शाकानंदधर्मवतोरेकस्मिन् धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१ सुपर्णौ वृक्षात्पक्षिणौ विवृते ह्यात्पृथक्भूतौ सदृशौ चिद्रूपत्वात् सखायौ अवियोगादेकमत्याश्च यदृच्छया अनिकेते
यामायया वृश्चनादिति वृक्षो देहः ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रुतेः ऊर्ध्वमूलमधःशाखम
श्वत्थं प्राहुरव्ययमिति स्मृतेश्च तस्मिन्कृतनीडे निकेतनं हृदयरूपं याभ्यां तौ तयोर्मध्ये एको जीवः पि पिप्पलानं ३
प्पलौ श्वत्थे देहस्तस्मिन्नदनीयं कर्मफलमित्यर्थः खादति भक्षयति अन्य ईश्वरः निरन्नः अभोक्ताऽ
पि निज्ञानंदतृप्तो बलेन ज्ञानादिशक्त्या भूयान् अधिकः श्रुतिश्च द्वा सुपर्णा सयुजा सखाया समा
नं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीतीति ६ पलाधिक्यमे

४१ सुपर्णाविति सदृशौ सखायौ यदृच्छयेतौ कृतनीडौ च वृक्षे एकस्तयोः खादति पिप्प
लान्नमन्यो निरन्नोऽपि बलेन भूयान् ६ आत्मानमन्यं च स वेद विद्वानपिप्पलादो न
तु पिप्पलादः यो विद्यया युक्स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७ देहस्थो
पि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ८

वाह आत्मानमिति अतः यः विद्यया युक् युक्तः स तु नित्यबद्धः अनादिबद्धः यस्तु विद्याप्रधानः राम
७ इदानीं बद्धमुक्तजीवानामे ४१
स तु नित्यमुक्तः मायाया अनावरकत्वात् आश्रयाव्यामोहकत्वाच्च
व मिथो वैलक्षण्यमाह देहस्थोऽपीति दशभिः विद्वान् मुक्तः संस्कारवशेन देहस्थोऽपि देहस्थान
भवति यथा स्वप्नादुत्थितः स्मर्यमाणस्वप्नदेहस्थितोऽपि तत्रस्थो न भवति तत्कृतसुखदुःखा
द्यभावात् तद्वत् तथावस्तुतः अदेहस्थोपि कुमतिः अविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रेह तु वेनैवं लक्षण्यं तत्तरमाह द्वाभ्यां इंद्रियैरिंद्रियार्थेषु गृह्यमाणेष्वपि यस्तु विद्वान् सनाहं कुर्यात् अ
हं ग्रहणोमीति मतिं न कुर्यादित्यर्थः कुतः गुणैर्गुणेषु गृह्यमाणेषु अत एव अविक्रियः रागादिशून्यः त
दुक्तं गीतासु तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जत इति ॥
अबुधस्तु पूर्वकर्माधीनेस्मिन् शरीरे वर्त्तमानः गुणैरिंद्रियैर्भाव्यनकर्मणा तत्र देहादौ निबध्यते
कुतः कर्त्तास्मीत्यहंकारणात् तदुक्तं तत्रैव प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारवि
मूढात्मा कर्ताहमिति मन्यत इति १० एतैस्त्रिभिः श्लोकैः कथं वर्त्तेतत्येस्य प्रश्नस्य सुखदुःखशून्यानि

इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च गृह्यमाणेष्वहं कुर्यान्न विद्वान्यस्त्वविक्रियः एवं दैवाधी
नेशरीरेस्मिन् गुणभाव्येन कर्मणा वर्त्तमानो बुधस्तत्र कर्त्तास्मीति निबध्यते १० एवं विरक्तः
शयनासनाटनमज्जने दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ११ न तथा बध्यते विद्वांस्त
त्रतत्रादयन्गुणान् प्रकृतिस्थोप्यसंसक्तो यथा खं सविता निलः १२ वैशारद्येक्षया संगशि
तयाछिन्नसंशयः प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्त्तते १३ यस्य स्युर्वीतसंकल्पाः प्राणें
द्रियमनोधियां वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः १४ राम राम राम रामरा

शास्त्रब्रह्मपरब्रह्मपारंगतः
तस्येक्षा निपुणा:

टी० १

रभिमानश्च देहवर्त्तते यः स मुक्तो भवति वैलक्षण्यांतरं वदन् किं भुंजीतेत्यादिप्रश्नोत्तरमाह एवमिति त्रिभिः
अन्यगतमेव कर्म मम भातीत्येव विरक्तो विद्वान् ११ तथा विहाय निवशयनासनादिषु न बध्यते कुतः त
त्र तत्र विषयेषु गुणानिंद्रियाणि आदयन् भोजयन् तत्साक्षित्वेन वर्त्तमानः न तु स्वयमदन् एतदेव
कुतः तत्राह प्रकृतिस्थोपि निःसंगेन यथा खं सर्वत्र स्थितमपि न सज्जते यथा सविता जलेप्रतिबिं
बितोपि यथा निलः सर्वत्र संचरन्नपि तद्वत् १२ असंगेन वैराग्येण शितया तीक्ष्णया छिन्नः सं
शयः असंभावनादिर्यस्य सः नानात्वात् देहादिप्रपंचात् १३ कथं विहरेदित्यस्योत्तरत्वेन वैलक्षण्यां

तरमाह यस्य स्युरिति निराकृतैः देहगुणैः संकल्पशून्याभिः प्रा
णादिवृत्तिभिर्विहरन्मुक्त इत्यर्थः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० एवंतावद्द्वंद्वमुक्तयोः स्वसंवेद्यमेववैलक्षण्यमुक्तं इदानींकैर्बोद्धांपरलक्षणैरित्यस्यान्नरत्नयापरैरपिसुज्ञेयं वैलक्षण्यमाह यस्यात्मेतित्रिभिः हिंस्रैर्दुर्जनैरन्यैर्वाप्राणिभिः यस्यात्मादेहः पीड्येत यदृच्छयायेनकेनापिक्वचित्किंचित्पूज्येतवा सबुधस्तत्रानव्यतिक्रियतनाविक्रियतइत्यर्थः तदुक्तंयाज्ञवल्क्येन यःकंटकैर्विरुदतिचंदनेनयश्चलिंपति अक्रुद्धापरितुष्टश्चसमस्तस्यचतस्यचेति १५ किंच साधसाधुवाकुर्वतीतावदतोवाजनान्नस्तुवीतनचनिंदेत् योलौकिकव्यवहारविमुखः समुक्तइत्यर्थः १६ अपिचानकुर्यादिति योदेहीकेपिकर्मण्युदासीनः समुक्तइतराव्रडइत्यर्थः १७ एतान्यवसर्वाणिमुमुक्षोः साधनानि

तु२

यस्यात्माहिंस्यतेहिंस्रैर्येनकिंचिद्यदृच्छया अर्च्यतेवाक्वचित्तत्रनव्यतिक्रीयतेबुधः १५ नस्तुवीतननिंदेतकुर्वतःसाध्वसाधुवा वदतोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः १६ नकुर्यान्नवदेत्किंचिन्नध्यायेत्साध्वसाधुवा आत्मारामोनयावृत्त्याविचरेज्जडवन्मुनिः १७ शब्दब्रह्मणिनिष्णातोननिष्णायात्परेयदि श्रमस्तस्यश्रमफलोह्यधेनुमिवरक्षतः १८ गांदुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजांच वित्तंत्वतीर्थीकृतमंगवाचंहीनांमयारक्षति दुःखदुःखी १९ ॥

४४

ज्ञातव्यानियस्तुकेवलंशब्दब्रह्मण्यभिज्ञः पांडित्यमात्रश्लाघीनतुतैः साधनैस्तदर्थनिष्ठोभवितृतंनिंदति शब्दब्रह्मणिनिष्णातः अथतः पारगतोपिपरेब्रह्मणिननिष्णायात् ध्यानाद्यभियोगंनकुर्यात् तस्यशास्त्रश्रमः श्रमैकफलः ननुपुरुषार्थपर्यवसायी अधेनुंचिरप्रसूतां १८ एतदेवान्यार्थनिदर्शनैः प्रपंचयतिगामिति दुह्यतइतिदोहः पयः दुग्धोदोहः नोत्तरत्रदोह्योः स्तियस्याः तांअथशून्यां असतींभार्यांकामशून्यां देहंपराधीनंप्रतिक्षणंदुःखहेतुं असत्प्रजांदृष्टादृष्टसाधनशून्यपुत्रं अतीर्थीकृतमागतेपात्रेदत्तंवित्तंदुःकीर्तिदुरितापादकं अंगहेतुत्वादुःखानंतरंदुःखमवय

कस्यचित्सेवकस्यपासमर्पितं२

रामः ४४

लोगस्वर्गापवर्गदत्वमंर हितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयाहीनां वा च मित्युक्तं विवृणोति यस्यां मे जगतः शोधकं चरित्रं न स्यात् किं न नु अस्य विश्वस्य स्थित्यादिरूपं
न ईडते इत्यर्थः लीलावतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म वा न स्यात् तां निष्फलां गिरं धी
रो धीमान् न धारयेत् २० उक्तं ज्ञानमार्गमुपसंहरति एवं विनिश्चित्य विचारेणात्मनि नानात्वभ्रमं दह्यात् ध्यासे
निरस्य निर्मलं मनो मयि सर्वगापत्ति पूर्णे समर्प्य संधार्य उपारमेत न किंचित् कुर्यात् न शास्त्रपाण्डित्यमा
मर२ त्रेण इत्यर्थः २१ यद्यनीशः अशक्तः तर्हि आत्मा मिदं भक्त्यैव कृतार्थो भविष्यसीत्याह मयीति २२ मदर्प्पणेन

यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य लीलावतारेप्सितजन्म वा स्याद् वन्ध्यां गिरं तां वि
भृयान्न धीरः २० एवं जिज्ञासयाऽपोह्य नानात्वभ्रममात्मनि उपारमेत विरजं मनो मय्यर्प्य सर्वगे णि३
२१ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं मयि सर्वाणि कर्माणि निरपेक्षः समाचर २२ श्रद्धा
लुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः गायन्ननुस्मरन् कर्म जन्म चाभिनयन्मुहुः २३ म
दर्थे धर्मकामार्थानाचरन्मदपाश्रयः लभते निश्चलां भक्तिं मय्युद्धव सनातने २४ सत्संग
प२ लब्धया भक्त्या मयि मां स उपासिता स वै मे दर्शितं सद्भिरंजसा विन्दते पदं २५ उद्धव उवाच
साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता २६

कर्मभिर्विशुद्धसत्त्वस्यान्तरंगां भक्तिमाह श्रद्धालुरिति द्वाभ्यां अभिनयन् स्वयमनुकुर्वन् २३ आचर
कु१ न्सेवमानः २४ तत्रानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या सभक्तः मामुपासीत ध्याता भवति
स च ध्यानशीलः सद्भिर्दर्शितं वैनिश्चितं सुखेनैव मे पदं स्वरूपं प्राप्नोति २५ सत्संगलब्धया भक्त्येत्यु
क्ते तत्र सतां भक्तेश्च विशेषं पृच्छति साधुरिति साधवः स्वस्वमतिपरिकल्पिताः सन्ति बहवः ते
ष्वनु कीदृशः संमतः भक्तिरपि बहुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत सद्भिश्चनारदादिभिरादृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा

भा०ए० इदं चातिगुह्यं त्वयैव वक्तव्यमित्यैश्वर्यं विवृणोति हे पुरुषाध्यक्षेत्यादिना ब्रह्मादीनि यंत्तः २७ अत्र हेतुः त्वमिति
व्योमवदसंगः यतः प्रकृतेः परः स्वेच्छयाउपात्तपृथक् परिमितं वपुर्येन सः २८ तत्र त्रिंशल्लक्षणैः
४४ साधुं निरूपयति कृपालुरिति पंचभिः कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदपि अकृतद्रो
हः तितिक्षुः क्षमावान् सत्यं सारं स्थिरं बलं वा यस्य सः अनवद्यात्मा असूयादिरहितः सुखदुः
खयोः समः यथाशक्ति सर्वेषामुपकारकः २९ कामैरक्षोभितचित्तः दांतः संयतबाह्येंद्रि

एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां २७ त्वं ब्र
ह्मपरमं व्योम पुरुषः प्रकृतेः परः अवतीर्णोसि भगवन् स्वेच्छोपात्तपृथग्वपुः २८ श्रीभ
गवानुवाच कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनां सत्यसारोनवद्यात्मा समः स
र्वोपकारकः २९ कामैरहतधीर्दान्तो मृदुः शुचिरकिंचनः अनीहो मितभुक् शांतः
स्थिरो मच्छरणो मुनिः ३० अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः अमानी मान
दः कल्पो मैत्रः कारुणिकः कविः ३१

यः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृष्टक्रियाशून्यः मित राम
भुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मुनिः मननशी ४४
लः ३० अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान् विपद्यप्यकृपणः जितषड्गुणः
क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः एते जिता येन सः अमानी न मानाकांक्षी अन्येभ्योपि
मानदः कल्पः परबोधने दक्षः मैत्रः अवंचकः कारुणिकः करुणयैव प्रवर्तमानः न दृष्टलोभेन क
विः सम्यक्ज्ञानी ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच म यावद्रूपेणादिष्टानपि स्वधर्मान्संत्यज्य यो मां भजेत् सोपि एवं पूर्वोक्तवत् सत्तमः किमज्ञानान्नास्तिक्याद्वा न। धर्मा
चरणे सत्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव च सर्वं भविष्यतीति दृढ
टनिश्चयेनैव धर्मान् संत्यज्य यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य अथवा विद्धैकादशीकं द्वादश्येकादश्युपवा
नुपवासा सौनिवद्ध श्राद्धादि यो यो भक्तिविरुद्धो धर्मस्तान् संत्यज्येत्यर्थः ३२ किंच यावान् देशकालापरिच्छिन्नः यश्च सर्वात्मा
यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वापि यद्वा विशेषतः पुनः पुनर्ज्ञात्वा एकांतभावेन ये भजंतीति ३३ साधुल

आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान् धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः ३२ ज्ञात्वाज्ञा
त्वाथ ये वै मां यावान्यश्चास्मि यादृशः भजंत्यनन्यभावेन ते मे भक्ततमा मताः ३३ मल्लिंगमद्भक्तजनदर्शन
चर्न २ स्पर्शनार्चनं परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनं ३४ मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव सर्वला
भोपहरणं दास्येनात्मनिवेदनं ३५ मज्जन्मकर्मकथनं मम पर्वानुमोदनं गीततांडववादित्रगोष्ठी
भिर्मद्गृहोत्सवः ३६ यात्राबलिविधानं च सर्ववार्षिकपर्वसु वैदिकी तांत्रिकी दीक्षा मदीयव्रतधा
रणं ३७ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः उद्यानोपवनाक्रीडपुरमंदिरकर्म्मणि ३८
संम्मार्जनोपलेपाभ्यां सेकमंडलवर्त्तनैः गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥ ३९ राम राम ॥

क्षणमुक्तं भक्तलक्षणमाह मल्लिंगेत्यष्टभिः लिंगानि प्रतिमादीनि ३४ सर्वलाभोपहरणं सर्वस्य लब्धस्य सम
र्प्पणं ३५ पर्व्वाणि जन्माष्टम्यादीनि तदनुमोदनं ३६ बलिविधानं पुष्पोपहारादिसमर्प्पणं सर्ववार्षिकपर्व
सु चातुर्मास्यैकादश्यादिषु विशेषतः ३७ उद्यानादिकरणे सामर्थ्ये सति स्वतः असति चान्यैः संभूयोद्यमः
उद्यानं पुष्पप्रधानं उपवनं फलप्रधानं आक्रीडं क्रीडास्थानं ३८ संम्मार्जनं रजसापाकरणं उपलेपः ॥
गोमयोदकादिभिरालेपनं सेकः सौरभप्रोक्षणं मंडलवर्तिनं सर्वतोभद्रादिकरणं मह्यं मम ३९ राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०टी० स्वयमन्येनवानिवेदितेनस्वीकुर्यात् एतच्चसाधारणंस्थावरविषयंरागप्राप्तविषयंवा भक्त्यानुग्राह्यमेवाषड्भिर्मासो
पवासैर्यत्फलंपरिकीर्तितं विष्णोर्नैवेद्यसिक्थेनपुण्यंतद्भुंजतांकलौ हृदिरूपंमुखेनामनैवेद्यमुदरेहरेः पा
दोदकंचनिर्माल्यंमस्तकेयस्यसो च्युतइत्यादिवचनेभ्यः यद्वा अन्यस्मैनिवेदितंमेनोपयुंज्यात् मह्यंननिवेदये
दित्यर्थः विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरं पितृभ्यश्चापितद्देयंतदानंत्यायकल्पते पित्तृशेषंतुयोदद्याद्ध
रयेपरमात्मने रेतोधाः पितरस्तस्यभवंति क्लेशभागिनइत्यादिवचनेभ्यः ४० ४१ इदानीमेकादशपूजाधिष्ठा

अमानित्वमदंभित्वंकृतस्यापरिकीर्तनं अपिदीपावलोकंमेनोपयुंज्यान्निवेदितं ४० यद्यदिष्टत
मंलोकेयच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यंतदानंत्यायकल्पते ४१ सूर्योऽग्निर्ब्राह्मणागा
४५ वोवैष्णवःखंमरुज्जलं भूरात्मासर्वभूतानि भद्रपूजापदानिमे ४२ सूर्येतुविद्ययात्रय्या
हविषाग्नौयजेतमां आतिथ्येनतुविप्राग्र्येगोष्वंगयवसादिना ४३ वैष्णवेबंधुसत्कृत्याहृदि
खेध्याननिष्ठया वायौमुख्यधियातोयेद्रव्यैस्तोयपुरस्कृतैः ४४ स्थंडिलेमंत्रहृदयैर्भोगैरा
त्मानमात्मनि क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमां ४५ धिष्ण्येष्वित्येषुमद्रूपंशंखचक्रगदा
वुजैः युक्तंचतुर्भुजंशांतंध्यायन्नर्चेत्समाहितः ४६ राम राम राम राम राम राम राम

नान्याह सूर्यइति हेभद्र ४२ अधिष्ठानभेदेनपूजासाधनान्याह सूर्यइतित्रिभिः त्रय्याविद्ययासूक्तैरुप राम
स्थानादिना अंगहेउद्धवयुवसादिनातृणादिना ४३ बंधुसत्कृत्याबंधुवत्संमाननाहृदिखेहृदयाकाशे ४५
मुख्यधियाप्राणदृष्ट्या तोयेतोयादिभिर्द्रव्यैस्तर्पणादिना ४४ स्थंडिलेभुविमंत्रहृदयैःरहस्यमंत्रन्यासैः
४५ सर्वाधिष्ठानेषु [illegible] ध्येयमाह धिष्ण्येष्वितिइतिअनेनप्रकारेणएषुधिष्ण्येषु ४६ राम राम राम

युक्तायाभक्तेः फलमाह इष्टापूर्त्तेनेति सद्भक्तिदृढाभक्ति अस्याभक्तेरंतरंगसाधनमाह इत्थं मत्स्मृतिः साधु
सेवयाभवति यद्वास्मृतिर्ज्ञानं तेन अदृढाभक्तिमतः पुंसः साधुसेवया महानेभवतीत्यर्थः ४७ ज्ञानभक्ति
मार्गानुक्तौ तत्रज्ञानमार्गादपिभक्तिमार्गश्रेष्ठइत्याह प्रायेणेति सत्संगेनयोभक्तियोगः तेन विनापायः
संसारतरणेन विद्यते सत्संगेनेत्यत्र हेतुमाह हियस्मात् सतामहंप्रायेणप्रकृष्टमयनंआश्रयः अतः
सत्संगोमय्यंतरंगइत्यर्थः ४८ इदानींसांख्ययोगादीनिसाधनान्तरपक्षाणिसव्यभिचाराणिच

प १ इष्टापूर्त्तेनमामेवयोजेतसमाहितः लभतेमयिसद्भक्तिंमत्स्मृतिःसाधुसेवया ४७ प्रायेणभ
क्तियोगेनसत्संगेनविनोद्धवानोपायोविद्यतेसम्यक् प्रायेणहिसतामहं ४८ अथैतत्परमं
गुह्यंशृण्वतोयदुनंदन सुगोप्यमपिवक्ष्यामित्वंमेभृत्यःसुहृत्सखा ४९ इतिश्रीभा०म०
ए०का० एकादशोऽध्यायः श्रीभगवानुवाच नरोधयतिमांयोगोनसांख्यंधर्मएववा न
स्वाध्यायस्तपस्त्यागोनेष्टापूर्त्तंनदक्षिणा १ व्रतानियज्ञःछंदांसितीर्थानिनियमायमाः
यथाऽवरुंधेसत्संगःसर्वसंगापहोहिमां २ सत्संगेनहिदैतेयायातुधानामृगाःखगाः
गंधर्वाप्सरसोनागाःसिद्धाश्चारणगुह्यकाः ३ राम राम राम राम राम राम राम

सत्संगस्यस्वतंत्रएवसमर्थः फलाव्यभिचारीचेतिवर्णयितुमाह अथेति एतद्वक्ष्यमाणंपरमंगुह्यं अत
श्रृणुविन्नित्यर्थः ४९ एकादशएकादशोध्यायः द्वादशेसाधुसंगस्यमहिमावर्णितः पुराकर्मानुष्ठानत
त्यागव्यवस्थाचरते पर नरोधयति नवशीकरोति योगः आसनप्राणायामादिः सांख्यंतत्त्वानांविवे
कः धर्मःसामान्यतोऽहिंसादिः स्वाध्यायोवेदजपः तपः कृच्छ्रादि त्यागःसंन्यासः इष्टापूर्त्तंइष्टंचाग्नि
ष्टोममग्निहोत्रादी पूर्त्तंकूपारामादिनिर्माणं दक्षिणाशब्देनसामान्यतोदानंलक्ष्यते १ व्रतानिएकादश्यु

पवासादीनि यमः देवपूजा द्विजातिसिरहस्यमन्त्राः श्रवणं धवणकीर्तनं
ति २ यातुधानाः राक्षसाः ३

सा १

पत्रं च२

भा०११०

४ त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः ५ ऋक्षो जांबवान् गृध्रो जटायुः वणिक्पथः तुलाधारः व्याधः धर्मव्याधः य
ज्ञपत्न्यो दीक्षितभार्याः ६ तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह तेइति न अधीताः श्रुतिगणा यैस्ते तद
ध्ययनेन उपासिता महत्तमा यैः ते न तथा किंच अव्रतातप्ततपसः न व्रतानि येषां न तप्तानि तपांसि यैः ते च ते च तत
र्थं च न उपासितामहत्तमा यैः ते तथा किंच अव्रतातप्ततपसः न व्रतानि येषां ... यद्वा स्वसंगस्यापि सत्संगत्वं विवक्ष्यते स्वस्या
थासत्संगादिति सक्तिः संगो नाममेयवसंग इत्यपि प्रयोक्तं यद्वा स्वसंगस्यापि सत्संगत्वं विवक्ष्यते स्वस्या
पि सत्वात् यद्वा मदीयसंगादित्यर्थः ७ तत्र वृत्रादीनां भवतु नाम कथं चित्साधनांतरं गोप्यादिभृतीनां तु
नान्यदस्तीत्याह केवलेनेति सत्संगलब्धेन केवलेनैव भावेन प्रीत्या नगाः यमलार्जुनादयः नागाः का

विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोंत्यजाः रजस्तमःप्रकृतयस्तस्मिन् तस्मिन् युगे युगे ४ बहवो
मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ५ सुग्रीवो हनु
मान् ऋक्षो गजो गृध्रो वणिक्पथः व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ६ ते नाधीतश्रु
ति गणा नोपासितमहत्तमाः अव्रतातप्ततपसः सत्संगान्मामुपागताः ७ केवलेन हि भावे
न गोप्यो गावो नगा मृगाः ये न्ये मूढधियो नागाः सिद्धा मामीयुरंजसा ८ यं न योगेन सांख्ये
न दान व्रत तपोध्वरैः व्याख्या स्वाध्याय संन्यासैः प्राप्नुयाद्यत्नवानपि ९ राम राम राम

लियादयः नाय ... दानीतन सर्वत्र गुल्मादीनामपि भगवति भावोस्तीति गम्यते नंदुत्तं भगवतैवाग्रहोत्र
ल्लियादयः नायन्नान दानीतन सर्वत्र गुल्मादीनामपि भगवति भावोस्तीति गम्यते नंदुत्तं भगवतैव अहोअत्र
मदिवचरामरार्चितपादांबुजं ते सुमनः फलार्हणं नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म
यत्कृतमित्यादिना सिद्धाः कृतार्थाः संतः ईयुः प्रापुः ८ स्वप्राप्तेर्दुर्लभतामाह यमिति योगादिभिः
कृतप्रयत्नोपि न प्राप्नुयात् तं मामीयुरिति पूर्वेणान्वयः अत्र च प्रथमं योगाप्यः पश्चादयावाश्रीकृष्ण
न सह संगताः ते संतः तत्संगो न्येषां सत्संगः तेन च तेषां भक्तिरिति ज्ञातव्यम् ९ राम राम

४६

वलिंबाणादयः

१२:१

अपरे स्वरकादयः

राम

४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोपीनां भावं प्रपंचयति रामेणेति चतुर्भिः श्वाफल्किनाक्रूरेण मयि प्रणीते सति मे मत्तोऽन्यः सुखाय न ददृशुः कुतः वियोगेन तीव्रोद्दुः
न२ सह आधियो यासां ताः अत्र हेतुः भपि विगाढेन अनिर्देद्येन भावेन प्रेम्णा अनुरक्तानि चित्तानि यासां ताः तीव्राधिर्व्यक्तिता स्ता इति म
या सह या एव क्षपा रात्रयः क्षणार्द्धवन्नीतास्ता एव पुनर्मया हीनास्तासां कल्पसमा बभूवुः कथंभूतास्ताः वाचामगोचरा इत्यर्थः ११
किंच एवं तीव्राधयस्ताः मोहं भिषणाः समाधिं प्राप्ता इत्याह ताइति मयि अनुषंगेण आसक्तया बद्धा धिया याभिस्ताः स्वमात्मानं स्वदे
हे अदः दूरस्थं इदं संनिहितं च नाविदन् यद्वा स्वपतिपुत्रादि ममतास्पदं आत्मानं अहंकारास्पदं अदः परलोकं इदं इहलोकं

रामेण सार्द्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः । विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय १०
तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण । क्षणार्द्धवत्ताः पुनरंग तासां हीना मया कल्पसमा बभूवुः ११
ता नाविदन्मय्यनुषंगबद्धधियः स्वमात्मानमदस्तथेदं । यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे
१२ मत्कामा रमणं जारमस्वरूपविदोऽबलाः । ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः १३ तस्मात्त्वमुद्धवोत्सृज्य
चोदनां प्रतिचोदनाम् । प्रवृत्तं च निवृत्तं च श्रोतव्यं श्रुतमेव च १४ मामेकमेव शरणमात्मानं सर्वदेहिनां याहि स
र्वात्मभावेन मया स्या ह्यकुतोभयः १५

कंचनाविदन्निति यथा मुनयः समाधौ नामरूपे न विदुस्तद्वत् किंतु अब्धितोये नद्य इव मयि प्रविष्टा इत्यन्वयः १२ एवं तास्त्वब ३१
लाः केवलं मत्कामाः अस्वरूपविदः स्वरूपं तु न जानंति तथापि मत्संगात् जारं ब्रह्म जारबुद्ध्या विद्यमपि ब्रह्मस्वरूपमेव मां
परमं प्रापुरित्यर्थः १३ यस्मादेवंभूतो मत्संगजनप्रभावस्तस्मात्त्वं चोदनां श्रुतिं प्रतिचोदनां स्मृतिं च यद्वा विधिं च नि
षेधं च त्वमुत्सृज्य १४ मां शरणं याहि मयैवाकुतोभयः स्याः भव १५ राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एषः प्रसिद्धः गुहां देहं प्रविष्टः सन् अनेकशाखाविस्तृतवेदलक्षणाभिधानं प्रपंचरूपेण प्रसवितीत्यध्याहारेण न्वयः २

भा०प० पूर्वं तावन्मयोदितस्त्वया हितः स्वधर्मो मद्विधि त्यादिना कर्म्मकर्त्तव्यमित्युक्तं इदानीं तु सर्वं त्यक्त्वा मां शरणं याहीत्युच्यते तत्र किमात्मनः कर्तृत्वाद्य
स्ति नास्ति वेत्यात्मस्थः आत्मविषयः संशयो न निवर्त्तते यद्वा कर्म कार्यं त्याज्यं वेत्यात्मस्थः संशयो मे निवर्त्तत इति पृच्छति संशय इति
नी२ येन संशयेन १६ उत्तरं स एष इत्यष्टभिः अयं भावः ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मा भाति तत्प्रपंचाध्यासाज्जीवानाम ना
द्यविद्यया कर्तृत्वादि ततो विधिप्रतिषेधाधिकारः तदानीं सत्वशुध्यर्थं कर्माणि कुर्वित्युक्तं सत्वे च शुद्धे पुनः कर्मजाड्यपरिहाराय
भक्तिविक्षेपकं कर्मोहरं परित्यज्य दृढविश्वासेन मां भजेत्युक्तं आत्मा यान्तु विद्यायां न किंचित्कर्तव्यमस्तीति तत्र तावदीश्वरान्नादादि
द्वारा जीवसंसृतिकारणभूतं प्रपंचोद्गमामाह सोऽर्द्धश्चतुर्भिः स एषः अपरोक्षजीवयतीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः ३

उद्धव उवाच संशयः शृण्वतो वाचं तव योगेश्वरेश्वर न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः १६ श्रीभ
४० गवानुवाच स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो
वर्ण इति स्थविष्ठः १७ गु

विवरेखा १ विवरेषु आधारादिचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य सः तामेवाभिव्यक्तिमाह घोषेणेति घोषेण परारव्येन नादवता प्राणेन सह गु
हां आधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यंत्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे च उपेत्य प्राप्य वक्त्रे
मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः अकारादिरित्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानाविधशाखात्मको भवति तथा च
श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनु
ष्या वदंतीति अभियुक्तश्लोकश्च आयासां मित्रावरुणसदनादुच्चरंती त्रिषष्टिं वर्णानंतः प्रकटकरणैः प्राणसंगात्प्रसू
ते तां पश्यंतीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये इति १७ राम राम राम

भा२ इति कारणान्नंसाद्गुहीप रूपं स्वाभिधानात्मकामित्रावरुणसदनाद्गीतोमत्स्थानात् वरुणः सोमः तयोः सदनं परमात्मेति यतः श्वासस्य
शीघ्रमुपलभ्यते तस्मादुच्चरंती त्रिषष्टिं वर्णान् जनयंतीत्येकविंशतिर्ह्रस्वदीर्घप्लुतभेदेन अइउऋ वर्णाः स्त्रिधा नवा ऋवर्णः प्लुत
या२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अव्यक्तस्य सतः सूक्ष्मं मंधमनक्रमेणाभिव्यक्तो दृष्टांतो यथेति यथाऽग्निः खेऽऊष्मा अव्यक्तोष्मरूपः दारुण्यधिकं मथ्यमानः अनिल
सहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः प्रकर्षेण जातो हविषा संवर्द्धते तथैवेयं वाणी ममाभिव्यक्तिः १८ उ
क्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिर्व्यतिदिशति एवं गदिः गदनं भाषणमभिव्यक्तिरित्युपसंहारः कर्मेह स्तयोर्वृत्तिः गतिः पाद स्कं॰ ११ः२
योः २ विसर्गः पायूपस्थयोरिति कर्मेंद्रियाणां घ्राणः अवघ्राणं रसो रसनादृक् दर्शनं स्पर्शनं श्रुतिः श्रवणमिति ज्ञानेंद्रिया
णां संकल्पो मनसः विज्ञानं बुद्धिचित्तयोः अभिमानो हंकारस्य सूत्रं प्रधानस्य सत्वरजस्तमसां विकारः अधिदेवादिस्त्रिवि

यथाऽनलः खेऽनिलबंधुरूष्मा बलेन दारुण्यऽधिमथ्यमानः अणुः प्रजातो हविषा समिध्यते तथैव मे
व्यक्तिरियं हि वाणी १८ एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च संकल्पविज्ञान
मथाऽभिमानः सूत्रं रजः सत्वतमोविकारः १९ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स
आद्यः विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥२०

विधः प्रपंचः सेव्यक्तिरिति पूर्वेणान्वयः १९ तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वराद्भिन्नः इत्याह अयमिति अ
३२ यं जीव ईश्वरः आदावव्यक्त एक एव वयसा कालेन विश्लिष्टा विभक्ता वागादींद्रियरूपाः शक्तयो यस्य यद्वा विशेषणाश्लिष्ट
आलिंगितो मायाशक्तिर्येन सः बहुप्रकार—इवाभाति यतः स एव आद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्म
स्यकारणभूतः एकस्य बहुधाभाने दृष्टांतः ——यो निं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति ॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ११ तस्मान्मायाविलसितत्वान्नश्वरमिदं जगन्नत्वपृथगिति सदृष्टांतमाह यस्मिन्निति तंतु वितानेसंस्थाः स्थितिर्यस्य सः । पटो यथा
तथा यस्मिन्निदं विश्वमोतं दीर्घतंतुषु पटइव प्रोतं तिर्यक्तंतुष्विव । एवंभूतं समष्टिव्यष्ट्यात्मकं विश्वमचिद्ययात्मन्यध्यस्तं वृक्षरू
पेणजीवस्यकर्तृत्वादिसंसारहेतुः अनेनस्तह्येवकेज्ञानेनकर्मादिसर्वव्यापादनमित्युक्तेमित्याशयेनाह यएषइतिसार्धैस्त्रिभिः पुराणः
अनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापवर्गौ कर्मेण फलेवाप्रसूतेजनयति २१ वृक्षरूपकंप्रपंचयति द्वेइति द्वे
पुण्यपापेअस्यबीजे संचशतमूलः शतमपरिमिताः वासनाः मूलानियस्य त्रयोगुणानालानिप्रकांडायस्य पंचभूतानिस्कंधा

यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतु वितानसंस्थः । यएषसंसारतरुः पुराणः कर्मात्मकः पुष्पफले प्र
सूते २१ द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः दशैकशाखो द्विसुपर्णनीडस्त्रि
४८ वल्को द्विफलोऽर्कं प्रविष्टः २२ अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः हंसायए
कं बहुरूपमिज्यैर्मायामयं वेद सवेद वेदं २३ एवं गुरूपासनयैकभक्त्या विद्याकुठारेणशितेन धीरः विवृश्च्य
जीवाशयमप्रमत्तः संपद्य चात्मानमथत्यजास्त्रं २४ इतिश्रीभागवतेमहापुराणएकादशस्कंधेभगवदुद्धवसं[वादे द्वादशोऽध्यायः]

यस्यां पंचरसाः शब्दादि विषयास्तेषां प्रसूतिर्यस्मात् दशचएकाच शाखाइंद्रियाणियस्याः द्वयोः जीवपरमात्मनोर्नीडं यस्मिन् ॥
त्रीणिवल्कलानि त्वचो वातपित्तश्लेष्माणोयस्याः द्वे सुखदुःखफले यस्य सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तन्निर्भिद्यग राम
तस्यसंसाराभावात् २२ तत्फलभोक्तृनाह गृध्यंतीतिगृध्राः कामिनः ग्रामेचराः गृहस्थाः अस्यवृक्षस्यैकंफलं दुःखमदं ४८
तिपरिणामतः स्वर्गादेरपिदुःखस्वरूपत्वात् हंसाविवेकिनोऽरण्यवासाः संन्यासिनएकंफलंसुःखमदंति एकंपरमा
त्मानं मायामयमेवबहुरूपंइज्यैःपूज्यैःगुरुभिः कृत्वायोवेदसवेदंतत्वार्थंवेद २३ वृक्षच्छेदोपायमुक्त्वा सर्वसाधनंत्यज
त्याह एवमिति एकांतभक्त्याशितेनतीक्ष्णेनज्ञानकुठारेणस्वतंत्रेणोवाशयं जीवोपाधिंत्रिगुणात्मकंलिंगशरीरंविवृश्च्य ॥ →
जीवाशयं २ छित्वापरमात्मानंचसंपद्यप्राप्यअथास्त्रंसाधनंत्यजेति २४ एकादशेद्वादशोध्यायः ॥ राम राम राम राम राम

ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रयोदशेऽथ सत्वस्य वृद्ध्या विद्योदयक्रमः । हंसेतिहासतश्चित्तगुणविश्लेषवर्णनं ॥ विद्याकुठारेण जीवाशयं संवृश्च्य साधनं त्यजे
त्युक्तं तत्र तमआदिगुणत्रयवृत्तिप्रवृत्तिनिवृत्तिधर्मत्वात्कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह सत्वमिति स
या १ त्वभिः तत्र यथा नेत्रादि वृद्धात्मधर्मा गुणाः स्युः तर्हि तत्स्वरूपत्वात्तेषां निवृत्तिर्न स्यात् न तु तदस्तीत्याह बुद्धेः प्रकृतेरेव गुणा
न त्वात्मन इति अतः सत्वेन सत्ववृत्त्या अन्यतमौ हन्यात् रजस्तमोवृत्ती जयेदित्यर्थः १ सत्वं च सत्वेन दयादिवृत्तिरूपमुपश
मात्मकेन सत्वेनैव हन्यात् १ ननु गुणत्रयवृत्तीनां परस्परोपमर्दरूपत्वात्कथं सत्ववृत्त्यैव ता वृत्तयो नियम्यन्त इत्याशंक्या
ननु १ ह सत्वादिति मद्भक्तिलक्षणो धर्मः स च भक्तिरूप एव वा सत्वमेव कथं वर्द्धेत तत्राह सात्विकानां पदार्थानामुपासयास

श्रीभगवानुवाच ॥

सत्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः । सत्वेनान्यतमौ हन्यात्सत्वं सत्वेन चैव हि १ सत्वाद्धर्मो भवेद्वृद्धात्पुंसो मद्भ
क्तिलक्षणः । सात्विकोपासया सत्वं ततो धर्मः प्रवर्त्तते २ धर्मो रजस्तमो हन्यात्सत्ववृद्धिरनुत्तमः । आशु नश्यति
तन्मूलो ह्यधर्म उभये हते ३ आगमोऽपः प्रजा देशः कालः कर्म च जन्म च । ध्यानं मंत्रोऽथ संस्कारो दशैते गु
णहेतवः ४ तत्तत्सात्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते । निंदंति तामसं तत्तद्राजसं तदुपेक्षितं ५ सात्विका
न्येव सेवेत पुमान्सत्वविवृद्धये । ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनं ६ राम राम राम राम राम ॥

[illegible] सत्वरजसंचारः / बुद्धेरादिः गुणा आत्मादि वि / [illegible] उत्पत्य कुलविशुद्ध / [illegible] / [illegible] धानादि २

त्वया सत्वं वृद्धं भवतीत्यर्थः २ स च धर्मो रजस्तमश्च हन्यात् कुतः न विद्यते उत्तमो यस्मात्सः सर्वोत्तमः यतः सत्ववृद्धिः सत्वस्य
वृद्धिर्यस्मिन् तत्कारणवायस्य सः अत एव तत्कार्यो धर्मप्रतिबंधोपि नास्तीत्याह तस्मिन्नुभयस्मिन्हते तन्मूलः ते रजस्तमसी
रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः ३ सात्विकोपासनया सत्वं वर्द्धत इत्युक्तं तानेव सत्ववृद्धिहेतून्दर्शयितुं सा
मान्यतो गुणत्रयवृद्धिहेतूनाह आगमः शास्त्रं अपः आपः १ केचिदागमाथ इति पाठः ४ एषु सात्विकादिनिर्णयमाह एषामि
गमसं ४ वमध्ये प्रचक्षते प्रशंसंति यच्च निंदंति तत्तत्तामसं यत्तु तैर्वृद्धैरुपेक्षितं न स्तुतं न च निंदितं तद्राजसं ५ सात्विकान्येवेति निवृत्तिशास्त्रा
ण्येव सेवेत न प्रवृत्तिपाखंडशास्त्राणि तीर्थं पावनं गंधोदकं न सुरादयः प्रजाजनाः निवृत्तान् जनानेव न प्रवृत्तान् दुराचारान् विविक्तादे
शान् ध्यायते देशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादीन् कर्म च नित्यं न काम्याभिचारादीनि जन्म वैष्णवशैव
दीक्षालक्षणं न शाक्तक्षुद्रदीक्षारूपं ध्यानं श्रीविष्णोः न कामिनो विद्विषां मंत्रं प्रणवादिकं न काम्यक्षुद्रान् संस्कारमात्मनः शोधकं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमसर्वं क्रमेण दर्शयति भयानहमिति त्रिभिः ५

कामचेष्टां

साऽऽग्नः ननु गुणव्यतिकराज्जातो देहः कथं स्वाश्रयभूतान् गुणांस्त्वन्न एवोत्पन्नया विद्यया ऽपोह्य स्वयमप्युपरमेत् तत्राह वेणूनां संघर्षाज्जातो ऽ
ग्निर्यथा स्वतन एवोत्पन्नाभिर्ज्वालाभिः सह दहन संवेद्धं धास्वयं शाम्यति एवं देहोपि तत्क्रियः तस्यां भवति क्रिया व्यापारो यस्य सः ७॥
ननु नियतेंद्रियत्तयासात्विकसवायामियुक्तान्तस्तिपुरुषार्थः तथापि राजसादीनु विषयान् दुःखमिति जानंतो ऽपि कथं सेवंत इति
भूस्याः पृच्छति विदंतीति पदं स्थानं श्वानो यथा भर्त्स्यमानो ऽपि खरो यथा पद्भ्यां मानो ऽपि खरीमनुधावति अजो यथा नित्संङ्गो हंतु नाऽध्यः २
मानितो ऽपि भक्षयति तद्वत् ८ मिथ्याभिनिवेशान्भुंजत इति सहेतुकमाहमिति त्रिभिः प्रमत्तस्य विवेकशून्यस्य देहादावहं आह १
वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ७ उद्धव उवाच विदंति मर्त्याः प्राये
ण विषयान्पदमापदां तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ८ श्रीभगवानुवाच अहमित्यन्यथा बुद्धिः
४र्य प्रमत्तस्य यथा हृदि उत्सर्पति रजो घोरं ततो वैकारिकं मनः ९ रजो युक्तस्य मनसः संकल्पः सविकल्पकः
न४ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः १० करोति कामवशगः कर्माण्यविजितेंद्रियः दुःखोदर्काणि
संपश्यन्रजोवेगविमोहितः ११ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः अतंद्रितो मनो युंजन्दोषदृ
ष्टिर्न सज्जते १२

मिति मिथ्याबुद्धिर्हृदये यथा यथा वर्द्धत्सर्पति ततो ऽहं बुद्धेश्च वैकारिकं सत्वप्रधानमपि म
पन्तस्विकस्यरजो नः प्रतीघोरं दुःखात्मकं रजः उपसर्पति मनो व्याप्नोतीत्यर्थः एवं इदमेवमिदमेवं भोक्ष्यामि इति सविकल्पः संकल्पः राम
युक्तस्य २ स्यात् ९ ततश्च अहो रूपमहो भावः इति गुणध्यानाद्दुर्द्धरः कामः स्यात् १० ततो विषयान्भोक्तुं कर्माणि करोति ११ एवं चे
न्नकस्यापि दुःख निवृत्तिः स्यादित्याशंक्याह यदपि यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान् विवेकी ४र्य
पुनर्मनो निरुंधन्न सज्जते १२ विषयदोषदृष्ट्यापि मनो निरोधाशक्तेः सुखं तन्निरोधोपायमाह अप्रमत्त इति अनिर्वि
ण्णः अनलसः यथाकालं त्रिषवणमपि परानंदरूपे ऽप्यर्पयन् समादध्यात् १३ राम राम राम राम राम
अप्रमत्तो ऽनुयुंजीत मनो मय्यर्पयंछनैः अनिर्विण्णो यथाकालं जितश्वासो जितासनः १३

मा२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयेसंग्रथितस्यमनसस्तद्वियोगेनेश्वरनिश्चयमसंभावितंमन्यमानंप्रतितंनिरूपणायेतिहासमुपक्षिपतिएतावानितियथावन्मय्यावेश्य
तइत्येतावानित्यर्थः मच्छिष्यैरित्युक्तेतेषामुतिज्ज्यायसामेनेनरूपेणनिरूपणासंभवात्पृच्छतियदेति तकालंतेदेतद्रूपंत्वंचेवदितुमिच्छामि
तत्कथयेति १५ मानसाःपुत्राः सूक्ष्मांदुर्ज्ञेयां एकांतिकींगतिंपरांकाष्ठां १६ तेदेवाहगुणेष्विति विषयेषुस्वभावतोरागादिवशाच्चेतःप्र
विशति तेचानुभूताविषयावासनारूपेणचेतसिप्रविशंति अतितितीर्षोः विषयानतिक्रमितुमिच्छोः १७ एवमितिमहान्देवोपिस्व

एतावान्योगआदिष्टोमच्छिष्यैःसनकादिभिः सर्वतोमनआकृष्यमय्यद्धावेश्यतेयथा॥ १४ उद्धवउवाच यदा
त्वंसनकादिभ्योयेनरूपेणकेशव योगमादिष्टवानेतद्रूपमिच्छामिवेदितुं १५ श्रीभगवानुवाच पुत्राहिरण्य
गर्भस्यमानसाःसनकादयः पप्रच्छुःपितरंसूक्ष्मांयोगस्यैकांतिकींगतिं १६ सनकादयऊचुः गुणेष्वाविशते
चेतोगुणाश्चेतसिचप्रभो कथमन्योन्यसंत्यागोमुमुक्षोरतितितीर्षोः १७ श्रीभगवानुवाच एवंपृष्टोमहा
देवःस्वयंभूर्भूतभावनः ध्यायमानःप्रश्नबीजंनाभ्यपद्यतकर्मधीः १८ समामचिंतयद्देवःप्रश्नपारति
तीर्षया तस्याहंहंसरूपेणसकाशमगमंतदा १९ दृष्ट्वामांतउपव्रज्यकृत्वापादाभिवंदनं ब्रह्माणम
ग्रतःकृत्वापप्रच्छुःकोभवानिति २० इत्यहंमुनिभिःपृष्टस्तत्वजिज्ञासुभिस्तदा यदवोचमहंतेभ्यस्तदुद्धव
निबोधमे॥२१॥

यंभूरपि भूतानांस्रष्टाऽपिध्यायमानः विचारयन्नपिप्रश्नस्यबीजंयदज्ञानादयंप्रश्नस्तन्नाविदत् यतःकर्मविक्षिप्तधीः १८
प्रश्नस्यपारमुत्तरमभिप्रायोवातस्यतितीर्षयाजिज्ञासया हंसरूपेणेतियथाहंसोनीरंक्षीरंचपृथक्कर्तुंशक्तःएवमहंगुणांश्चे
तश्चेतिविवेक्तुंहंसरूपेणगतोऽस्मीति १९ २० इत्यहंमुनिभिःपृष्टइतिपृथग्वाक्यं यदवोचमितिचपृथक् अतोऽस्मच्छ
द्धात्वनिरदोषः तेभ्योयदवोचंतन्मेवचनंनिबोध २१

भा०पु० देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात्स्वयमेव विषयेभ्यश्चेतसो विश्लेषो भवतीति वक्तुं प्रश्नखंडनमिषेणैव तावदा
त्मानात्मविवेकमाह वस्तुन इति त्रिभिः । किमात्मनो यं प्रश्नः तदुपाधेर्भूतसंघस्य वा यद्यात्मनस्तर्हि तस्य वस्तुनः परमार्थरूप
स्य च नानात्वे सति हे विप्राः वः युष्माभिः कृतः प्रश्नः ईदृशः बहुषु निर्धारणरूपः कथं घटेत वक्तुरेवोत्तरदातुर्वा मे मम क आश्र
यः अविशेषे आत्मनि केन जातिगुणादिविशेषमाश्रित्योत्तरं वक्ष्यामीत्यर्थः । २२ भूतसंघविषयत्वेपि अयं वः प्रश्नः वाचारंभः
वाङ्मात्रेणारब्धः यतोऽनर्थकः कुतः भूतेषु देवमनुष्यादिदेहेषु पंचभूतात्मकेषु अतः समानेषु अभिन्नेषु पुनश्च वस्तु
तः परमकारणात्मना अभिन्नेषु वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव [illegible] सत्यमिति श्रुतेः । २३ तत्र पंचात्मकत्वं प्रत्यक्षा
दिसिद्धमेवेति परमकारणाभेदमेवोपपादयति मनसेति मनआदिभिर्यद्यद्गृह्यते तत्तदहमेवेत्यर्थः । अंजसा तत्त्वविचा

वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः । कथं घटेत वो विप्रा वक्तुर्वा मम क आश्रयः । २२ पंचात्मकेषु भूतेषु समाने
५० षु च वस्तुतः । को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः । २३ मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः । अहमेव न
मत्तोऽन्यदिति बुध्यध्वमंजसा २४ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः । जीवस्य देह उभयं गुणाश्चेतो मदात्मनः
२५

रेण एतेनैव सर्वात्मकोऽहमित्यंजसाऽपुनर मुक्तो भवति २४ एवं प्रश्नखंडनमिषेणात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोऽवि
दुष्परिहरं यत्पृष्टं तत्रोत्तरमाह गुणेष्वित्यादिनाऽध्यायसमाप्तेः । अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपत्वं स्याद्वि
षयैः संग्रथितं चित्तं बुध्यादिशब्दवाच्यमेव जीवस्य रूपं स्वरूपं भवेत्तत्तदा साक्षाद्वियोगो न घटेत तस्य तु स्वरूपमहं ब्रह्मैव
चिन्ताध्यासनं तु तत्स्वभावतया विषयैः संग्रथितं अतः स्वस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्व राम
तो निर्विद्य भगवंतं भजतो भवबंधविपरिपूर्णस्वरूपावस्थानमिति हे प्रजाः पुत्रकाः सत्वं गुणेषु चेतः आविशति गुणाश्च ५०
ग२ चेतसि एवं गुणाश्चेतः उभयं ग्रथितं मदात्मनो ब्रह्मस्वरूपस्य जीवस्य देहः । अध्यस्त उपाधिः न तु स्वरूपं २५ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मादभीक्ष्णं पुनः पुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं तच्च पुनर्वासनारूपेण चित्तप्रकर्षेण भवंतीति तथा गुणाश्चित्तप्र
एवं यदुभयं तन्मद्रूपः सन्नुत्यजेत् २६ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थरूपता तत्राह जाग्रदिति जाग्रः स्वप्नः सुषुप्तं चेति बुद्धेर्
वृत्तयः ताश्च न स्वाभाविक्यः किंतु सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जंतोरित्युक्तरीत्या त्रिषु सत्त्वनिमि
त्तवक्ष्यमाणक्रमेण गुणत्रयाव जीवस्तासां विलक्षणः तदवस्थारहितत्वाद्विनिश्चितः कुतः तासां साक्षित्वेन २७ ननु तर्हि कु
थमहं जागर्मीत्यादिप्रतीतिस्तत्राह यर्हीति यस्मात्सम्यक् सृतिः संसरणं मनयेति संसृतिर्बुद्धिः तया बंधो ऽयमात्मनो गुणवृत्ती

गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६ जाग्रत्स्वप्नं सुषुप्तं च गुण
तो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः २७ यर्हि संसृतिबंधोऽयमात्मनो गुणवृत्तिदः
मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां २८ अहंकारकृतं बंधमात्मनोऽर्थविपर्ययं । विद्वान्निर्विद्य संसार
चिंतां तुर्ये स्थितस्त्यजेत् २९ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं
यथा ३० असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१ राम

...चेतमांगुण्यानां
...नलक्ष्य १

हेति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् ततस्तद्गुणचेतसश्चान्योन्यत्यागो भवति २८ कथं संसृत्याबंधः कथं चत्ये
जह्यात् तदाह अहंकारेण कृतं बंधनमात्मनः अर्थविपर्ययं आनंदाद्याचरणं नानर्थहेतुं विद्वान् जानन् सन् निर्विद्य दुःखमेतदि
तिज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंता संसारो बुद्धिः तस्मिन् चिंता अभिमानं तत्कृतां भोगचिंतां च त्यजेदिति २९ यावदेव न
त्वं जनापतेऽस्य कर्मज्ञानादि सर्वं व्यर्थमित्याह यावदिति यद्यपि जागर्ति कर्मादिषु तथापि स्वप्न... निवर्तते यतोऽज्ञः
असम्यग्दर्शी अज्ञो जागरत्वस्य स्वप्नवद्दृष्टांतः स्वप्न इति ३० ननु कथं वेदप्रमितवर्णाश्रमकर्मादिनानाधीर्निवर्तेत तत्राह
असत्त्वादिति भावानां देहादीनां च तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा
अविद्यावद्विषयांचेदं इति भावः ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नू१

भा०स्कं० भुक्तिमिति युक्तेनावस्थायुक्तमाह य इति । अर्थान् स्थूलान् देहादीन् समस्तकरणैश्चक्षुरादिभिर्भुंक्ते कथंभूतान् अनुक्षणधर्मिणः क्षणि
कबाल्यतारुण्यादिधर्मवतः । यश्च स्वप्ने हृदि जागरदृष्टसदृशान् वासनामयान् भुंक्ते । यश्च सुषुप्ते तान् सर्वानुपसंहरति स एकः । कु
तः । त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा । ननु जाग्रदवस्थायां सर्वेंद्रियाणि पश्यति स्वप्ने मनः सुषुप्तौ तत्संस्कारशेषा बुद्धिः । कथमात्मा
न द्रष्टा तत्राह इंद्रियेशः । अपि विश्वतैजसप्राज्ञा भिन्नाः । न तु तत् । स्मृत्यानुसंधानेन स एवावस्थात्रयान्वयात् । यः स्वप्नेऽद्राक्षं य न२
श्च तदनन्तरं न किंचिदवेदिषं स एवाप्यहं जागर्मीति उपाधिभेदेन विश्वादिव्यवहार इति भावः । एतेन बाल्ययुवाद्यवस्था

यो जागरे बहिरनुक्षणधर्मिणोऽर्थान् भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् । स्वप्ने सुषुप्ते उपसंहरते
५१ स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ॥ ३२ ॥ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया मयि
कृता इति निश्चितार्थाः । संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माऽखिलसंशया
धिं ॥ ३३ ॥ ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं । विज्ञानमेकमुरुधेव
विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ ३४ ॥ राम राम राम राम राम राम राम

स्वपिमि प्रतिसंधानेनात्मैक्यं द्रष्टव्यं ॥ ३२ ॥ ततः किमत आह एवमिति । गुणतो या एता मनसस्त्र्यवस्थास्ता मद्विद्यया मयि कृताः ।
न तत्त्वतः सतीर्भाति निश्चितः आत्मरूपोऽर्थो यैस्ते यूयं अखिलसंशयानामाधिं आधीयंतेऽस्मिन्निति आधिरहंकारस्तं सं
छिद्य । हार्दं हृदिस्थितं मां भजत केन छित्वा तत्राह अनुमानेन सदुक्तिभिः सतामुपदेशैः । अति[illegible]भिश्च तीक्ष्णेन ज्ञानखड्गे
न ॥ ३३ ॥ अनुमानानि दर्शयति ईक्षेतेति इदं जगत् विभ्रमं मायामीक्षेत तत्र हेतवः मनोविजृंभितत्वात् दृष्टत्वात् द्विनाशित्वाच्च
स्वप्नवत् अलातचक्रवत् । ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह । विज्ञानमिति निगमनं तस्मात्त्रिधाऽयं गुणपरिणा
मकृतो विकल्पो भ्रमः समाप्यतीति ॥ ३४ ॥

अग्निचंचलता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मात्ततो दृश्याद्दृष्टिं प्रतिनिवर्त्य निजसुखानुभावो भवेत्तेनैवाल्पार्थं च निवृत्ततृष्णस्तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्यापाररहित इ
त्यर्थः ननु देहवतः सर्वथा देहतद्दृष्टिप्रतिनिवर्त्तनायोगात्पुनः संसारः स्यादेवेत्यत्राह संदृश्यत इति क्वचिदावश्यकाहारादिषु यद्य
पीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या त्यक्तं तत्पुनर्मोहाय न भवेदेव किंतु देहपातपर्यंतं स्मृतिरेव स्यात् संस्कारमात्रेणाव
भासो भवेदित्यर्थः ३५ एतदेवोपपादयति देहमिति आसनादुत्थितं उत्थापयतेत्येवास्थितं ततः क्वचिद्दैवतो निर्गतं पुनस्तत्रै
वोपेतं वा देहमीषिनानुसंधत्ते कुतोऽन्यत् यतः येन देहेन स्वरूपमध्यगमत् ज्ञातवान् तं देहं यतः कारणादिति वा परिहितं परिहि
वासो गतं स्थितं वा यथा न वेत्ति तद्वत् ३६ ननु च यः परिपाल्यमानोऽपि मुमूर्षति तं चेन्न पश्यति तर्हि पतेद्देवेनेत्याह देहोऽपीति दे

दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं
भ्रमाय न भवेत्स्मृतिरानिपातात् ३५ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं दै
वादुपेतमुत दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ३६ देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभ
कं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३७ मयैतदुक्तं
वो विप्रा गुह्यं यत्सांख्ययोगयोः जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ३८ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य
तेजसः परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ३९ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं सुहृदं प्रियमा
त्मानं साम्यासंगादयोऽगुणाः ४०

दैववशेन गच्छत् स्वारंभकं कर्म यावदस्ति तावत्पर्यंतं प्रतिसमीक्षत एवासासुः प्राणेंद्रियसहितः ननु तर्हि तस्मिन्कदाचित्पुनः सज्जेतापि
नेत्याह तमिति स्वाप्नं स्वप्नतुल्यं अधिरूढः प्राप्तः समाधिपर्यंतो योगो येन अतएव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः तथा च श्रु
तिः तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति ३७ उक्तार्थे तेषां विश्वासार्थं स्वस्वरूपमाह मयेति सांख्यमात्मानात्म
विवेकः योगोऽष्टांगः तयोर्गुह्यं रहस्यं यज्ञं विष्णुं युष्मद्धर्मविचक्षयेत्यनेन धर्मोऽप्युपदिष्ट इति ज्ञेयं अतएव पत्तेन हंसरूपेण
ब्रह्मणः प्राप्त्यमाधवेत्यनुवादो भविष्यति ३८ ऋतं प्रणीयमानो धर्मः सत्यमनुष्ठीयमानो धर्मः तेजः प्रभावः एतेषां परमयनं ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

~~अनेमीति~~ २

०.१० मेमद्वा आगृणन् मां तुष्टुवुः ४१ प्रत्येयाय प्रत्यागतोऽस्मि ४२ एकादशे त्रयोदशः॥ चतुर्दशे परं श्रेयो भक्तिरेव न चेतरत्। इत्येतद्दर्शितं ध्या
नयोगस्य सहसाधनैः॥ एवं तावद्भगवता भक्त्या मोक्ष इत्युक्तं अन्यैस्त्वन्यानि साधनानि वदन्तीति तत्र विशेषनिर्धारणाय पृच्छति वदं
तीति श्रेयांसि श्रेयःसाधनानि किं विकल्पेन प्राधान्यं उताहो किं वा एकस्यैव मुख्यत्वात् १ पक्षे त्वेन कारणं भवतीति न अपेक्षि
२ तं अपेक्षाय स्मिन् सः अहैतुकः अयमर्थः भवता या भक्तियोग उक्तः अन्ये च यानि श्रेयःसाधनानि वदन्ति तेषां किं साक्षात्फ
लसाधनत्वेन प्राधान्यं वा सर्वेषां उतांगांगित्वे प्राधान्येऽपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिदस्ति विशेष इति ॥२॥

इति मे छिन्नसंदेहा मुनयः सनकादयः सभाजयित्वा परया भक्त्यागृणत संस्तवैः ४१ तैरहं पूजितः सम्यक् संस्तुतः परमर्षि
भिः प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ४२ इति श्रीभा॰ म॰ एका॰ त्रयोदशोऽध्यायः॥ उद्धव उवाच वदन्ति कृष्ण श्रे
यांसि बहूनि ब्रह्मवादिनः तेषां विकल्पप्राधान्यमुताहो एकमुख्यता १ भवतोदाहृतः स्वामिन् भक्तियोगोऽनपेक्षि
तः निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः २ श्रीभगवानुवाच कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता मयादौ
५२ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः ३ तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा ततो भृग्वादयोऽगृह्णन् सप्त ब्रह्ममहर्षि
यः ४ तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ५ किंदेवाः किन्नरा
नागाः रक्षः किंपुरुषादयः बह्व्यस्तेषां प्रकृतयो रजः सत्त्वतमोभुवः ६ याभिर्भूतानि भिद्यन्ते भूतानां पतयस्तथा
यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि ७ एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणां पारंपर्येण केषांचित्पाखंडम
तयोऽपरे ८

तत्र भक्तिरेव महाफलत्वेन मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुरुषैः कानि यूयं स्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येन परिकल्पितानि राम
क्षुल्लकफलानीति विवेक्तुं प्रकृत्यनुसारेण बहुधा वचनार्थप्रतिपत्तिमाह कालेनेति सप्तभिः मदात्मकः मय्यात्मा चित्तं यन सः ३ भृग्वाद ५२
यः भृगुः मरीचिः अत्रिः अंगिरसः पुलस्त्यः पुलहः क्रतुरित्येते च सप्त ब्राह्मणाः प्रजापतयः ते च ते महर्षयश्च ४ ५ किंदेवाः क्लेशस्वेदादो
गंधादिराहित्येन किं देवा मनुष्या वेति संदेहास्पदं द्वीपांतरमनुष्याः एवं किन्नराः ईषन्मुखतः शरीरतो वा किंचित्पुरुषाः इव वानरा
दयः प्रकृतयः वासनाः बह्व्यः ६ रजः सत्त्वतमोभिर्भुवः जन्मस्थानानि यासां ताः ६ भूतानि देवासुरमनुष्यादीनि चित्रा वाचः वे
दार्थव्याख्यानविषयाः ७ एवमित्युक्तोपसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण अपरे पाषंडमतयः वेदविरुद्धा

किंचित्नराः २ किंपुरुषाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्र॰ तन्मरुतीनां मायागुणमूलत्वान्मन्मायामोहितधियः अनेकांतं नानाविधं ९ तदेवाह धर्ममिति सार्द्धेन कर्ममीमांसकाः तदुक्तं मोक्षार्थिनि
प्रवर्त्तेत तत्र काम्यनिषिद्धयोः नित्यनैमित्तिकं कुर्यात्प्रत्यवायजिहासयेत्यादि यशः काव्यालंकारकाः यथाहुः यावत्कीर्त्तिर्मनुष्यस्य पु
ण्यालोकेषु गीयते तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति कामं वात्स्यायनादयः सत्यं शमं दमं च योगशास्त्रकाराः अन्ये दृष्टार्थ
वादिनो दंडनीतिकाराः ऐश्वर्यसिद्धं ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति अन्ये सामान्यपायाप्यवश्यं साधनमिति तेषां मतं तेष्वेव त्यागभोज
नं च लोकायतिकाः केचिद्याः यज्ञं तपो दानं यज्ञो देवतानां पूजनं तपश्च दानं च १० तेषां तुच्छफलत्वमाह आद्यंतवंत इति एषां लोकाः

मन्मायामोहितधियः पुरुषाः पुरुषर्षभ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ९ धर्ममेके यशश्चान्ये कामं सत्यं द
मं शमं अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं केचिद्यज्ञं तपो दानं व्रतानि नियमान् यमान् १० आद्यंतवंत एवैषां
लोकाः कर्मविनिर्मिताः दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः ११ मय्यर्पितात्मनः सभ्य निरपेक्षस्य
सर्वतः मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां १२ अकिंचनस्य दांतस्य शांतस्य समचेतसः मया संतुष्टम
नसः सर्वाः सुखमया दिशः १३ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुन
र्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् १४ राम राम राम राम राम राम राम राम राम राम राम

एते साध्यानि फलानि तमोनिष्ठा मोहावसानाः भोगकालेऽप्यसूयादिभिः शुचार्पिताः व्याप्ताः ११ भक्तेर्मुख्यत्वमाह मय्यर्पिति
म॰ग यावत्समाप्तिहे सभ्य मया परमानंदरूपेण आत्मनो स्वरूपत्वेन स्फुरता १२ किंच अन्येषां तत्तल्लोकादिपरिच्छिन्नं सुखं तु
खं भक्तस्य तु परिपूर्णमित्याह अकिंचनस्येति १३ परिपूर्णतामेवाह न पारमेष्ठ्यमिति रसाधिपत्यं पातालादिस्वाम्यं
अपुनर्भवं मोक्षमपि मद्विना मां हित्वा अन्यन्नेच्छति अहमेव तस्य प्रेष्ठ इत्यर्थः श्रीराम जय राम जय जय राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममापि स एव श्रेष्ठ इत्याह न तथेति द्वाभ्यां आत्मयोनिर्ब्रह्मा पुत्रोपि शंकरो मत्स्वरूपभूतोपि संकर्षणो भ्राताऽपि श्रीर्भार्यापि आत्मा मूर्त्ति
रपि यथा भक्त इति वक्तव्ये तिहर्षेणाह भवानिति १५ पूयेयं मदंतर्वर्त्तिब्रह्माण्डानि पवित्री कुर्यामिति भावेनेत्यर्थः १६ किंच मद्भक्ता
नां सुखं नान्यावेद्यं भूतमिति वा को वक्तुं समर्थः यतस्तत्स्वसंवेद्यं निरुपममित्याह निष्किंचना इति महांतः निरहंमानाः अनालब्ध
धियः अस्पृष्टचित्ताः निःकिंचनत्वादीनां पृथक् हेतुहेतुमद्भावः एवंभूताः मम मदीयाः यत्सुखं जुषंति सेवंते तत्सुखं ते एव विदुः लभ्यंते २
नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निरपेक्षाः तैरेव लभ्यं न तु मोक्षापेक्षैरपीत्यर्थः यद्वा एवंभूताः संतो यं मम मामि

स्वांघ्रिरेणुभिः न तथा मे प्रियतम आत्मयोनिर्न शंकरः न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् १५ निरपेक्षं मुनिं शांतं नि
र्वैरं समदर्शनं अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः १६ निष्किंचना मय्यनुरक्तचेतसः शांता महां
तोऽखिलजीववत्सलाः कामैरनालब्धधियो जुषंति यत्तन्नैरपेक्ष्यं न विदुः सुखं मम १७ बाध्यमानो
पि मद्भक्तो विषयैरजितेंद्रियः प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते १८ यथाग्निः सुसमृद्धार्चिः करो
त्येधांसि भस्मसात् तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः १९ न साधयति मां योगो न सांख्यं धर्म
उद्धव न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता २० भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां भ तो २
क्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् २१ राम राम राम राम राम राम राम राम ॥

त्यर्थः जुषंते प्राप्नुवंति त एव यं नैरपेक्ष्यं सुखं न हि विदुर्नान्य इत्यर्थः १७ अपि च आस्तां तावदुत्तम भक्तकथा यतः प्राकृतोऽपि भक्तः राम
कृतार्थ एवेत्याह बाध्यमान इति द्वाभ्यां विषयैराकृष्यमाणोपि प्रगल्भया समर्थया १८ पाकाद्यर्थं प्रज्वालितोप्यग्निर्यथा काष्ठा ५३
नि भस्मी करोति तथा रागादिनापि कथंचिन्मद्विषयासती भक्तिः समस्तपापानीति भगवानपि स्वभक्तिमहिमाश्चर्येण संबो
धयति हे उद्धव विस्मयं शृण्विति १९ अत एवंभूते श्रेयानान्य इत्यादि इत्याह न साधयतीति द्वाभ्यां २० श्रद्धया भक्तिस्तया संभवात् जा
तिदोषादपीत्यर्थः २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्त्यभावेऽन्यत्साधनं व्यर्थमित्याह धर्म इति २२ रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या च विना कथमाशयः शुध्येदिति २३ किं
च भक्तिः स्वाश्रयं शोधयतीति किं च वक्तव्यं यतो गद्गदवागादिलक्षणो मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह वागिति २४ अपि च भ
क्त्यैवात्मशुद्धिर्नान्यत इति सदृष्टान्तमाह यथेति यथाग्निना ध्मानेन तापितमेव हेम सुवर्णं अन्तर्मलं जहाति न क्षालनादिभिः स्वं नि
जं रूपं च भजते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतामापद्यते २५ ननु ब्रह्मविदाप्नोति परं तमेव विदित्वाऽतिमृत्युमेतीत्या
दिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्या तत्प्राप्तिरवगम्यते कुतो भक्तियोगेनेत्युच्यते तत्राह यथा यथेति आत्मा चित्तं परिमृज्य

धर्मः सत्यदयोपेतो विद्या वा तपसान्विता मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि २२ कथं विना रोमहर्षं द्रवता
चेतसा विना विनानन्दाश्रुकलया शुध्येद्भक्त्या विनाऽऽशयः २३ वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्व
चिच्च विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति २४ यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भज
ते च रूपं आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भजत्यथो मां २५ यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगा
थाश्रवणाभिधानैः तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तं २६ विषयान् ध्यायतश्चित्तं विष
येषु विषज्जते मामनुस्मरतश्चित्तं मय्येव प्रविलीयते २७ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं हित्वा मयि
समाधत्स्व मनो मद्भावभावितं २८ राम राम राम राम राम राम राम राम राम राम राम राम राम

शोधनेन मत्पुण्यकथानां श्रवणैरभिधानैश्चाभक्तेरेवावान्तरव्यापारो ज्ञानं न पृथगित्यर्थः २६ किं च ज्ञानं नाम चित्तस्य मदाकार ७१
परिणामः स च मां भजतः स्वभावत एव भवति न त्वयत्नान्तरमपेक्षत इति सदृष्टान्तमाह विषयानिति २७ यस्मादन्यत्साधनं
निष्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्विहाय मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहरति तस्मा
दिति [illegible] मद्भावभावितं मद्भावेन भजनेनैव शोधितं २८ राम राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यानप्रधानत्वा योगस्य त एव योगं वक्तुमर्हसीत्यर्थः यमनियमयोर्बहुवक्तव्यत्वात् २

१०. विशेषतो वात्स्यायनादिप्रोक्तकाममार्गोः परित्याज्य इत्याह स्त्रीणामिति आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने २९ ग
एतदुपपादयति न तथेति अस्य पुंसः यथा तत्संगिसंगतः क्लेशो भवेत् यथा च बंधो योषित्संगतः तथा ऽन्यप्रसंगतो न भवेदिति ३०
मां चिंतयेदित्युक्तं तत्प्रकारं पृच्छति यथेति ध्यानाकारप्रश्नः यादृशमिति ध्येयविशेषणप्रश्नः यदात्मकमिति यस्य तानि विशेषणा
नि तत्स्वरूपप्रश्नः एतन्मे ध्यानमेव वक्तुमर्हसीति पाठः तत्रायमर्थः मुमुक्षुस्त्वां यथा ध्यायेत् तन्मे वक्तुमर्हसि जिज्ञासोः कथनी
यमपुनरेतत् त्वद्दास्यमेव पुरुषार्थः ननु ध्यानेन कृत्यमस्तीति तदुक्तं त्वयोपभुक्तस्रग्गंधेत्यादि त्वं वक्तुमर्हसीति पाठस्तु सुग
मः ३१ तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह सम इति च तुर्भिः समनात्युच्चनीचे आसने कंबलादौ सम

५४ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः २९ न तथास्य भवेत्क्ले
शो बंधश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३० उद्धव उवाच यथा त्वामरविंदाक्ष यादृश
तं वा यदात्मकं ध्यायेन्मुमुक्षुरेतन्मे ध्यानमेवक्तुमर्हसि ३१ श्रीभगवानुवाच सम आसन आसीनः समकायो
यथासुखं हस्तावुत्संग आधाय स्वनासाग्रकृतेक्षणः ३२ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः विपर्यये
णापि शनैरभ्यसेन्निर्जितेंद्रियः ३३ हृद्यविछिन्नमोंकारं घंटानादं बिसोर्णवत् प्राणेनोदीर्य तत्राथः पुनः संवेश
येत्स्वरं ३४ एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः ३५ राम राम

कायः समं यथासुखमासीन इति नास्ति स्वस्तिकादिनियम इत्युक्तं नासाग्रनिरीक्षणं च चित्तस्थैर्यार्थं अंतर्लक्ष्यो बहिर्दृष्टिः स्थि
रचित्तः सुसंयत इति योगशास्त्रोक्तेः ३२ विपर्ययेण रेचकपूरककुंभककमेणापि यद्वा वामेन आपूरितं दक्षिणया त्यजेत् तयापू
रितं वामेन त्यजेत् विपर्ययेण यथोक्तं योगे इडया पूरयेद्वायुं त्यजेत्पिंगलयातत इति निर्जितेंद्रिय इति प्रत्याहार उक्तः ३३ प्राणा
यामो हि द्विविधः सगर्भो ऽगर्भश्चेति तत्र श्रेष्ठत्वात् प्रणवगर्भमाह हृदीति द्वाभ्यां मूलाधारादारभ्य अविछिन्नं संततं घंटानादतुल्यं ओंका
रं हृदि संस्थितं प्राणेन ऊर्ध्वं द्वादशांतपर्यंतं नीत्वा कथं बिसोर्णवत् कमलनालतंतुवत् तत्र मात्रातीतं स्वरं पंचदश बिंदुं सं
वेशयेत् अथ पुनरित्यस्य तं च बिंदुं स्थिरं कुर्यादित्यर्थः यद्वा मूलाधारादारभ्य मूर्द्धपर्यंतं बिसतंतुवत्सूक्ष्ममविछिन्नं संतं

हृदि मनसि प्राणेनोदीर्याभिव्यज्य अथ पुनस्तत्रोंकारे घंटानादतुल्ये स्वरं उदात्तादि ॐ तेनादं स्थिरं कुर्यादिति ३४ मासादर्वाक् जितानिलो भवति ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं ध्यानांगमुक्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह हृत्पुंडरीकमिति सार्द्धेन अंतस्थं देहांतर्वर्ति ऊर्ध्वनालमधोमुखं कुड्मलितं च कद
स२ लीपुष्पसंकाशं यदस्ति तद्विपरीतं ध्यात्वेत्यर्थः ३६ न्यसेत् चिंतयेत् विशेषणं ध्यानमाह वह्निमध्य इति षड्भिः ध्यानमंगलं ध्यानस्य शुभवि
षयं ३७ समं अनुरूपावयवम् दीर्घाश्चारवश्च चत्वारो भुजा यस्मिन् तत् तथा सुचारोऽतिरम्यं ३८ समानयोः कर्णयोर्विन्यस्ते स्फुरती
मकराकारकुंडले यस्मिन् तत् तं श्रीवत्सं श्रियो निकेतनं वक्षसि दक्षिणवामस्तनाभ्यां युक्तमित्यर्थः ३९ ४० द्युमद्भिः किरीटा
दिभिः आसमंतात् युक्तमलंकृतं प्रसादेन शोभनं मुखमीक्षणं च यस्मिन् तत् सुकुमारं अतिकोमलं ४१ सविशेषणं ध्यानमुपसं

हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखं ध्यात्वोर्द्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं ३६ कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्त
रोत्तरं वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३७ समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजम् सुचारुसुंदरग्रीवं सुकपोलं
शुचिस्मितम् ३८ समानकर्णविन्यस्तस्फुरन्मकरकुंडलं हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ३९ शंखचक्रगदा
पद्मवनमालाविभूषितं नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतं ४० द्युमत्किरीटकटककटिसूत्रांगदायुतं सर्वांग
सुंदरं हृद्यं प्रसादसुमुखेक्षणं ४१ सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्म
नो बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ४२ तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् नान्यानि चिंतयेद्भूयः सु
स्मितं भावयेन्मुखं ४३ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतये
त् ४४ एवं समाहितमतिर्मामेवात्मानमात्मनि विचष्टे मयि सर्वात्मन्ज्योतिर्ज्योतिषि संयुतम् ४५

हरति इंद्रियाणीति प्रकर्षेण नयेत् सर्वतः सर्वांगयुक्तो ४२ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तर न
त्वेनाशेन विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः एकत्रांगे अन्यान्यंगानि चिंतयेत् एकत्रेति यदुक्तं तद
वांगदर्शयति सुस्मितमिति ४३ व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धब्रह्मण्यारूढः सन् न किं
चित् ध्यातृध्येयविभागमपि न चिंतयेत् ४४ मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिर्ज्योतिषि
संयुक्तमिवेत्यन्वयः ४५

तम सत्व रज

अ०१० एवंभूतसमाधिपर्यंतध्यानस्य फलमाह ध्यानेनेति मनो युंजतः समाहधतः द्रव्यज्ञानक्रियाभ्रमः अधिभूताधिदैवाध्यात्मरूपः द
श्यद्रष्टृदर्शनरूपो वा भ्रमः निर्वाणं शांतिं सम्यग्यास्यतीति ४६ एकादशे चतुर्दशः तत्र पंचदश प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णु
पदसंप्राप्तावंतरायतया मताः एवं मनो युंजतो योगिनो ऽन्तराविर्भवंत्यः सिद्धयो प्यंतरायप्राया एव अतस्ताः परिहृत्य परमेश्वरपर
एव भवेदिति वक्तुं सिद्धीराह जितेंद्रियस्येति युक्तस्य स्थिरचित्तस्य १ स्विदिति वितर्के का स्वित्नु किंनामा कथं स्वित्कीदृशी वा धारणा
अकतीति प्रश्नांतरे वा शब्दः त्वमेव तज्ज्ञाता नान्य इत्याशयेनाह योगिनामिति २ धारणा अष्टादशेत्यनुषंगः योगपारगैरिति

ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ४६ इति श्रीभागवते महापुरा
णे एकादशस्कंधे चतुर्दशोऽध्यायः श्रीभगवानुवाच जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः मयि धारयत
श्चेत उपतिष्ठंति सिद्धयः १ उद्धव उवाच कया धारणया कास्वित्कथं स्वित्सिद्धिरच्युत कति वा सिद्धयो ब्रूहि यो
५५ गिनां सिद्धिदो भवान् २ श्रीभगवानुवाच सिद्धयोऽष्टादश प्रोक्ता धारणायोगपारगैः तासामष्टौ मत्प्रधाना द
शैव गुणहेतवः ३ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ४
गुणेष्वसंगो वशिता यत्कामस्तदवस्यति एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः ५ राम राम राम

त्रिकालज्ञत्वादिक्षुद्रसिद्धीरन्यपि जानंतीति भावः अहमेव प्रधानं मुख्यः स्वभावत आश्रयो यासां ताः मत्सारूप्यं प्राप्तेषु किंचिंन्यूना ८१
भवंतीति भावः गुणहेतवः सत्त्वोत्कर्षहेतुकाः ३ ताः स्वरूपेणापदिशति अणिमेति सार्द्धैः पंचभिः अणिमा महिमा लघिमा च मूर्ते राम
र्देहस्येति त्रयः सिद्धयः सर्वप्राणिनामिंद्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयो ५५
ग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाश्यं [illegible] मो भूदर्शनसामर्थ्यं सिद्धिः शक्तीनां मायातत्तदंशभूता ४२
नां प्रेरणं तत्रेश्वरे मायायाः अन्येषु तदंशानां प्रेरणं ईशिता नाम सिद्धिः ४ विषयभोगेषु असंगो वशिता सिद्धिः यत्कामः यद्यत्सुख
कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति सिद्धिः औत्पत्तिकाः स्वाभाविक्यो निरतिशया इत्यर्थः ५ राम राम राम

श्रीराहरीनं नाम श्रीसिद्धिः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणहेतुसिद्धीराह अनूर्मिमत्त्वं क्षुत्पिपासादिराहित्यं दूरश्रवणं दर्शनं चेति द्वे सिद्धी मनोवेगेन देहस्य गतिः कामितरूपप्राप्तिः परकायप्रवे
शः ६ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः संकल्पानुरूपप्राप्तिः अप्रतिहता आसमंतात्कृतिर्यस्याः
सा आज्ञा चेत्युत्तरा दश ७ क्षुद्रसिद्धीरपंचाह त्रिकालज्ञत्वमिति अद्वंद्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां संस्तंभनं ८ तत्र धारणा ।।
भिः सह विशेषतो निरूपयति यथेति यावत्समाप्तिः ९ भूतसूक्ष्मोपाधौ मयि तन्मात्रभूतसूक्ष्माकारः सः तन्मात्रोपासकः । गम
प १ महिमानं अणिमानं १० ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि यथासंख्यं महत्तत्त्वाकारं भूतानां चेति आकाशादिभूतोपाधौ च मयि मनो=

अनूर्मिमत्त्वं देहेऽस्मिन् दूरश्रवणदर्शनं मनोजवः कामरूपं परकायप्रवेशनं ६ स्वच्छंदमृत्युर्देवानां सहक्रीडानुदर्श
नं यथासंकल्पसंसिद्धिराज्ञाप्रतिहता गतिः ७ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता अग्न्यर्काम्बुविषादीनां प्रति
ष्टंभोऽपराजयः ८ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः यया धारणया या स्याद्यथा वा स्यान्निबोध मे ९ भूत पा२ या३
सूक्ष्मात्मनि मयि तन्मात्रं धारयेन्मनः अणिमानमवाप्नोति तन्मात्रोपासको मम १० महत्यात्मन्मयि परे यथासं न२
स्थं मनो दधत् महिमानमवाप्नोति भूतानां च पृथक्पृथक् ११ परमाणुमये चित्तं भूतानां मयि रंजयन् कालसूक्ष्मा
र्थतां योगी लघिमानमवाप्नुयात् १२ धारयन्मय्यहंतत्त्वे मनो वैकारिकेऽखिलं सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्रा
प्नोति मन्मनाः १३ महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः १४ विष्णौ
त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे स ईशित्वमवाप्नोति क्षेत्रज्ञक्षेत्रचोदनो १५

धारयन् तत्तद्रूपं च महिमानं प्राप्नोतीत्यर्थः ११ वाय्वादिभूतानां ये परमाण्वः तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थतां काल
परमाणूपाधिकेपतामिति लघुत्वविवरणं तदुक्तं स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति १२ वैकारिकाहंकारोपाधौ मयि अखि
लानां करणानामात्मत्वं अधिष्ठातृत्वं अत्र हेतुः मन्मनाः मयि मनोधारणप्रभावादेव भवति नान्याचीवहेतुरनुसंधेय इति भावः एवं मद्धारणानु
भावेन मद्योगवत्त्वमा अयङ्क्त्यादिषु द्रष्टव्यं १३ क्रियाशक्तिप्रधानं महत्तत्त्वमेव तदुपाधौ मयि सः मे पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते सूत्रं ३
कथंभूतस्य अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य तदुपाधेर्ममेत्यर्थः १४ अधीश्वरे त्रिगुणमायानियंतरि अत एव कालविग्रहे आकालि[illegible]त
रूपे अंतर्यामिणि ईशित्वं विशिनष्टि क्षेत्रज्ञानां जीवानां क्षेत्राणां तदुपाधीनां च चोदनं प्रेरणं न तु विश्वसृष्ट्यादिकर्तृत्वं लक्षणमित्य
र्थः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रा॰१॰ तुरीयाख्ये विराड्हिरण्यगर्भकारणरूपोपाधयः ईशस्य त्रिभिर्हीनं तुरीयं तत्पदं विदुरित्येवंलक्षणे ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा इत्युक्तभगवच्छब्दशब्दिते १६ यत्र परमानंदरूपे सर्वोऽपि कामस्तदेकरूपो भूत्वा वसीयते समाप्यते १७ अतः परं गुणहेतुकाः शुद्धसत्वात्मिके श्वेततां शुद्धरूपतां १८ आकाशात्मनि प्राणे समष्टिरूपे तद्रूपे मयि मनसा घोषं नादं चिंतयन् असौ हंसो जीवः तत्र आकाशे उपलब्धा आज्ञाता सन् नानास्थाः विचित्रा वाचः शृणोति यद्वा तत्राकाशे उपलब्धाः अभिव्यक्ताः याः भूतानां वाचस्ता दूरतः शृणोतीति १९ त्वष्टा आदित्यः तस्मिन् परिच्छिन्नं चक्षुः संयोज्य तं च चक्षुषि तत्रोभयसंयोगे मां॥

नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते मनो मय्यादधद्योगी मद्धर्मा वशितामियात् १६ निर्गुणे ब्रह्मणि मयि धारयन्वि-
शदं मनः परमानंदमाप्नोति यत्र कामो वसीयते १७ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि धारयन् श्वेततां याति ष-
डूर्मिरहितो नरः १८ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ १९ च-
टी॰१ क्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि मां तत्र मनसा ध्यायन् विश्वं पश्यति सूक्ष्मदृक् २० मनो मयि सुसंयोज्य देहं त-
दनुवायुना मद्धारणानुभावेन तत्रात्मा यत्र वै मनः २१ यदा मन उपादाय यद्यद्रूपं बुभूषति तत्तद्भवेन्मनोरूपं
मद्योगबलमाश्रयः २२

ध्यायन् विश्वं दूरतः पश्यति २० मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते तस्याः प्रभावेन यत्र मनो
याति तत्रात्मा देहो यातीत्यर्थः यद्वा मनः कर्तृ आत्मानं वायुना सह देहं च मयि सुसंयोज्य यत्र याति तदनु तत्र देहो यातीति राम
२१ मनः उपादाय उपादानकारणं कृत्वा यद्देवादिरूपं भवितुमिच्छति तत्तन्मनोरूपं मनसोऽभीष्टं रूपं योगी भवेत् ५६
कुतः यतो मद्योगबलं योऽहमचिन्त्यशक्तिर्नानाकारस्तस्मिन्मयि मनसो योगो धारणा तस्य बलं प्रभावः स एवाश्र-
यः कारणम् २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र भुवि विक्षतितत्रात्मानं चिंतयेत् ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः बाह्यवायोर्भूतः प्रविष्टः तेन मार्गेणेत्यर्थः षंडघ्रिवत् भृंगा यथा पुष्पात्पुष्पांतरमनायासेन प्रविशंति तद्वत् २३ पिंडं हित्वेत्युक्तं तत्प्रकारं कथयन् स्वच्छंदमृत्युमाह पार्ष्ण्यापार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं प्रसर्ग घ्राणमूर्द्धद्वारेण ब्रह्मरंध्रेणेत्युपलक्षणं ब्रह्मवाय्वग्न्यहात्र्यपेक्षितं तथा नं भगवत्सानीत्वा २४ मत्स्थं मन्मूर्तिनूपं शुद्धं सत्वं चिंतयन् तदा सत्वद्वृत्तयः सत्वांशभूताः २५ यदावाय्वग्रकालेपि यथा [illegible] तिपाठ यथावायनकेनापि प्रकारेण बुध्या संकल्पयेत तत्र तथा यथावत्प्राप्नोतीत्यर्थः यद्वा यथा संकल्पयेत् यथा वा मत्परा मयि वि

परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् २३ पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्द्धसु आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं २४ विहरिष्यन्सुराक्रीडे मत्स्थं सत्वं विभावयेत् विमानेनोपतिष्ठंति सत्ववृत्तीः सुरस्त्रियः २५ यथा संकल्पयेद्बुद्ध्या यदा वा मत्परः पुमान् मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते २६ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम २७ मद्भक्त्या शुद्धसत्वस्य योगिनो धारणाविदः तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता २८ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः मद्योगश्रांतचित्तस्य यादसामुदकं यथा २९ राम राम राम

श्वासवानुभवति तथा तदनुरूपं संवे प्राप्नोतीत्यर्थः किं कुर्वन् सत्ये संकल्पे मयि मनो युंजन् २६ मदिति पृथक्पदं ममेत्यर्थः ईशितुः सर्वनियंतुः वशितुः स्वतंत्रस्य मम भावं स्वभावं प्राप्तः तत्तागुणोहतवा २७ अतः परं क्षुद्राः धारणाविदः इति त्रिकालज्ञेश्वरधारणा सूचिता त्रैकालिकी त्रिकालवस्तुविषया स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता अनेनैव परचित्ताद्यभिज्ञताऽपि व्याख्याता २८ अग्न्यादिसर्वोपघातशून्या भगवान्नित्यवंभूतयोगमयं तेनाभिभूयेत अत्र हेतुः मद्योगेति यादसामुदकं यथा उपघातकं न भवति तथा तस्य वपुषः अग्न्यादयः इत्यर्थः अनेनैवाहद्वताऽपि व्याख्याता २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० १

१०।१५° मद्विभूतीः ममावतारान् ध्वजादिभिः सह ३० उपसंहरति उपासकस्येति एवं पृथक् धारणाभिः ३१ यद्वा किंन्नो धारणाप्रयासेन एकेयैव सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्येति मद्धारणां नारायणे तुरीयाख्ये इत्यत्रोक्तां या सुदुर्लभा स्यात्साकानकाचिदित्यर्थः ३२ यद्यप्येवं तथापि न प्रार्थ्या इत्याह अंतरायानिति ३३ तस्माद्धेतुकीयमेव धारणा कार्या नान्याः काम्या इत्याह जन्मेति जन्मनैव काश्चित्सिद्धयो भवंति पृथगादेवानां यथा च याद सामुद्रकस्तंभः पक्ष्यादीनां खेचरत्वादि तदुक्तं पातंजले जन्मौषधितपोमंत्रयोगजाः सिद्धय इति योगेन मद्धारणाभिरुक्तेन योगगतिं मत्सालोक्यादिरूपं ३४ कुत इत्यत आह सर्वासामित्यर्द्धेन प्रभुत्वोपपादनः

मद्विभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैः स भवेदपराजितः ३० उपासकस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः ३१ जितेंद्रियस्य दांतस्य जितश्वासात्मनो मुनेः

उ२ मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा ३२ अंतरायान्वदंत्येता युंजतो योगमुत्तमम् मया संपद्यमानस्य कालक्षपणहेतवः ३३ जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ३४ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभुः अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ३५ अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ३६ इति श्रीभागवते महापुराणे एकादशस्कंधे पंचदशोऽध्यायः १५ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीरा° राम

हेतुः कारणं पतिः पाता पितां चेति किंचानेकत्वं सिद्धीनामेव प्रभुः अपि तु मोक्षादीनामपीत्याह अहमिति योगो मोक्षः सांख्यं तत्साधनं ज्ञानं धर्मस्य तदुपदेष्टॄणां ब्रह्मवादिनां च ३५ कुतः तत्राह अहमिति सर्वदेहीनां जीवानामात्मा यतः आंतरः अंतर्यामी एष त आत्मांतर्याम्यमृत इति श्रुतेः तर्हि किमंतर्वर्त्तित्वात्परिच्छिन्नः नेत्याह बाह्यः अव्यापक इत्यर्थः तर्हि तेनावृतः अनावृतः एतत्सदृष्टांतमाह भूतेषु चतुर्विधेषु महाभूतानि यथा बहिरंतश्च भवंति स्वयमहमपि तथेत्यर्थः ३६ ५८

एकादशे पंचदशः १५

वादि

षोडशे तु हरेराविर्भावयुक्ता विभूतयः ज्ञानवीर्यप्रभावेन विशेषेणोपवर्णिताः अत्र स्त्रितेन यज्ज्ञानमशक्यमकृतात्मनां अतस्तद्योग्यता
पत्त्यै विभूत्यादिनिरूपणं एवं तावत्त्रयाध्यायामष्टप्रश्ना निरूपिताः ब्रह्मत्वं संभवेत्तावत्सप्तमादिचतुष्टये बंधमुक्त्योस्तु निर्द्धारः सङ्क
तयोश्च ततः परे द्वादशे नंतरं कर्मकृतित्यागव्यवस्थितौ हंसेतिहासतो योगनिष्ठायां च त्रयोदशे श्रेयःसाधननिर्द्धारे ध्याने चैव
चतुर्दशे धारणासिद्धिभेदं च प्रसंगेन निरंतरं उद्धवप्रश्नतो दत्तमुत्तरं हरिणा चित्ते षोडशे भूतिविस्तारहृद्यावर्णो अमतं तत ज्ञा
नादिनिर्णयेवर्णाश्रमादीनां च निर्णये योगत्रयाधिकारस्तु विंशे च ततदनंतरं तत्त्वसंख्याविवादे च पुंप्रकृत्योर्विवेचनेन जन्ममृत्युप्र
कारे च द्वाविंशे दत्तमुत्तरं परापराधसहने चतुर्भिस्तदनंतरं सप्तविंशे क्रियायोगप्रश्नस्तदुपवर्णनं अष्टाविंशतितः प्राक्तज्ञानि

उद्धव उवाच त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं सर्वेषामसि भावानां त्राणस्थित्यप्ययोद्भवः १

योगोपसंहृतिः संसारासंभवप्रश्नस्तन्मध्ये दत्तमुत्तरं तदशक्यापुनः प्रश्नभक्तियोगोपसंहृतिः एवं प्रश्नोत्तराण्यत्र क्रमेणेना
निविंशतिः अहमात्मांतरो बाह्योनावृतः सर्वदेहिनां यथा भूतानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं तत्र च भूतानि यथा
केचित्केनचिद्गुणविशेषेणाद्रिक्तानि वर्तंते केचित्सामान्यरूपेणैव तथा त्वमपि केन केन रूपेण वर्तसे इति विभूतीः प्रष्टुं प्रथ
क॰ मं तावदुक्तमेव सर्वात्मत्वमनुवदति त्वं ब्रह्मेति अपावृतं निरावरणं स्वतंत्रं वा अत एव सर्वेषामपि त्राणं रक्षणं स्थिति
जीवनं रक्षणं त्राणस्थिती तत्सहितो अप्ययोद्भवो यस्मात् स त्वं उपादानकारणमित्यर्थः १ राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र सदाचारं प्रमाणमाह यथातथ्येन यथार्थत्वेन सर्वभूतकारणं त्वां ब्राह्मणा वेदतात्पर्यविदः २ एवं कारणत्वेन सर्वात्मत्वमनूद्य वि
भूतीः पृच्छति येष्विति उपासीनाः सेवमानाः संतः ३ दुर्ज्ञेयत्वमेवाह गूढः अस्फुटः भूतानां प्राणिनां मध्ये अत्र हेतुः भूतानां
मात्मा अंतर्यामी अत्रापि हेतुः हे भूतभावनेति नेत्वया ॥४ ताएव साकल्येन पृच्छति हे महाविभूते याः काश्चिद्भूम्यादिषु तत्वि

५८ उच्चावचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः उपासते त्वां भगवन् याथातथ्येन ब्राह्मणाः १ येषु येषु च भावेषु भक्त्या त्वां
परमर्षयः उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे २ गूढश्चरसि भूतात्मा भूतानां भूतभावन न त्वां पश्यंति भू
तानि पश्यंतं मोहितानि ते ३ याः काश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते ता मह्यमाख्याह्यनुभा
वितास्ते नमामि ते तीर्थपदाङ्घ्रिपद्मं ४ श्रीभगवानुवाच एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर युयुत्सुना वि
नशने सपत्नैरर्जुनेन वै ५ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकं ततो निवृत्तो हंताहं हतोऽयमिति लौकि
कः ६ स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः अभ्यभाषत मामेवं यथा त्वं रणमूर्द्धनि ७ ५८

विभूतयः रसायां रसातले अनुभाविताः त्वदीयत्वेकेन चिच्छक्ति विशेषेण संयोजिताः तीर्थानां पदं च तदङ्घ्रिपद्मं च ॥५॥
नरावतारभूतार्जुनप्रश्नसंवादित्वात्तवायं प्रश्नः साधीयानिति तावदनुमोदते एवमिति त्रिभिः प्रश्नं पृष्टवत् सपत्नैर्योद्धु
मिच्छता विनशने कुरुक्षेत्रे ६ युयुत्सोर्विभूतिप्रश्नः प्रसंगस्तत्राह ज्ञात्वेति लौकिकः प्राकृतमतिः सन् ७ स च यदा त
तो ज्ञातिवधान्निवृत्तः तदा मया प्रतिबोधितः सन् यथा त्वमभिभाषसे एवं संग्राममुखे मामभ्यभाषत तद्देव तवापि कथ
यिष्यामीति भावः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताविभूतीः कथयति अहमिति अस्मच्छब्द समानाधिकरणाः प्रथमांताः द्वितीयांता अस्मद्वो विभक्तयः तास्ता ध्यापासनार्थं कथ्यंते
षष्ठी च क्वचिन्निर्द्धारणे संबंधे च क्वचिद्यथायोग्यं द्रष्टव्यं तत्र आत्मा मीषां भूतानां आत्मेति सुहृदि तिईश्वर इति च सामान्येनादि-
मुपास्य इत्यर्थः एवं सर्वत्र तेषां स्थित्युद्भवाप्ययः तत्र हेतुरित्यर्थः ८ विशेषतो विभूतीराह कलयतां वशीकुर्वतां मध्ये गुणानां मध्ये
आकाशादौ गुणिनि धर्मिणि औत्पत्तिकः स्वाभाविको यो गुणः सोहं १० सूत्रं प्रथमकार्यं महान्महत्त्वं सूक्ष्मोपाधित्वाद्दुर्ज्ञेयत्वाच्च जीव

अहमात्मोद्भवामीषां भूतानां सुहृदीश्वरः अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ९ अहं गतिर्गतिमतां कालः
कलयतामहं गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः १० गुणिनामप्यहं सूत्रं महतां च महानहं सूक्ष्माणामप्य
हं जीवो दुर्ज्ञेयानामहं मनः ११ हिरण्यगर्भो वेदानां मंत्राणां प्रणवस्त्रिवृत् अक्षराणामकारोस्मि पदानां छंदसामहं १२ इंद्रोहं नि२
सर्वदेवानां वसूनामस्मि हव्यवाट् आदित्यानामहं विष्णू रुद्राणां नीललोहितः १३ ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः
देवर्षीणां नारदोहं हविर्धान्यस्मि धेनुषु सिद्धेश्वराणां कपिलः सुपर्णोहं पतत्रिणां प्रजापतीनां दक्षोहं पितॄणामहमर्
यमा १५ मां विद्ध्यसुरदैत्यानां प्रह्लादमसुरेश्वरं सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां १६ ऐरावतं गजेंद्राणां यादसां वरु
णं प्रभुं तपतां च मतं सूर्यं मनुष्याणां च भूपतिं १७ उच्चैःश्रवास्तुरंगाणां धातूनामस्मि कांचनं यमः संयमतां चाहं
सर्पाणामस्मि वासुकिः १८

स्य सूक्ष्मत्वं बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोपि दृष्ट इति श्रुतेः ११ वेदानां संबंधितेषां मध्यापकः पदानि त्रिपदा गाय
त्रीत्यर्थः १२ १३ हविर्धानी कामधेनुः १४ ५ नक्षत्रौषधीनां प्रभुं सोमं यक्षरक्षसां प्रभुं १६ यादसां प्रभुं तपतां तापवतां ध्या
मतां दीप्तिमतां च मध्ये १७ संयमतां च दंडयतामित्यर्थः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृंगिणां दंष्ट्रिणां च मध्ये तेषां प्रभुर्वा तुर्यः संन्यासः प्रथमः ब्राह्मणः स्रोतसां प्रवाहानां च सरसां स्थिरोदकाशयानां २० धिष्ण्यानां निवास
स्थानानां गाहनानां दुर्गमाणां २१ प्रतिष्ठितानां वेदार्थनिष्ठानां सेनान्यां च भूपतीनां अग्रण्यां सन्मार्गप्रवर्तकानां अजः ब्रह्मा २२ शुचीनां
शोधकानामपि मार्जनलक्षण धर्षणहीनानां मध्ये वा यादिन्द्रः १४ शोधकोऽहं यागानां यागगानामष्टानां मध्ये आत्मसंरोधः समाधिरहं
मंत्रो नीतिः कौशलानां विवेकादिने पुण्यानां मध्ये आन्वीक्षिकी आत्मानात्मविवेकविद्या आख्यात्यन्यथाख्याति शून्यख्यात्यस

नागेंद्राणामनंतोऽहं मृगेंद्रः शृंगिदंष्ट्रिणां आश्रमाणामहं तुर्यो वर्णानां प्रथमोऽनघ १९ तीर्थानां स्रोतसां गंगा समुद्रः
सरसामहं आयुधानां धनुरहं त्रिपुरघ्नो धनुष्मतां २० धिष्ण्यानामस्म्यहं मेरुर्गहनानां हिमालयः वनस्पतीनाम मा १
श्वत्थ ओषधीनामहं यवः २१ पुरोधसां च विशिष्टाहं प्रतिष्ठितानां बृहस्पतिः स्कंदोऽहं सर्वसेनान्यामग्रण्यां भगवानजः २२ मा
यज्ञानां ब्रह्मयज्ञोऽहं व्रतानामविहिंसनं वाय्वग्न्यर्काम्बुवागात्मा शुचीनामप्यहं शुचिः २३ योगानामात्मसंरोधो म
५९ त्रोऽस्मि विजिगीषतां आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां २४ स्त्रीणां तु शतरूपाहं पुंसां स्वायंभु
वो मनुः नारायणो मुनीनां च कुमारो ब्रह्मचारिणां २५ धर्माणामस्मि संन्यासः क्षेमाणामबहिर्मतिः गुह्यानां
सूनृतं मौनं मिथुनानामजस्त्वहं २६

७ द्वयातिरिक्तनिर्वचनीयख्यातिवादीनां एव मिदं सर्वे विगीयादुरंतो विकल्पः सोऽहं २४ सोऽहं कुमारः सनत्कुमारः २५ संन्यासः राम
नामर भूतानां अभयदानं क्षेमाणां अभयस्थानानां मध्ये अबहिर्मतिः अंतर्निष्ठा सूनृतं प्रियवचनं मौनं च न हि प्रियभाषणे मौ ५९
नं च पुरुषस्याभिप्रायो ज्ञायते अजः प्रजापतिः यस्य देहाद्द्वीभ्यां मिथुनं संभूतं स एव मुख्यं मिथुनं अर्धो ह वा एष
आत्मनो यत्पत्नीति श्रुतेः २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवणा[illegible]स्याः पचतुष्टयिकाः अभिजिन्नाम नक्षत्रं

भा०ए० अनिमिषां अप्रमत्तानां मधुमाधवौ वसंत इत्यर्थः अभिजित् उत्तराषाढाचतुर्थः पादः तथाच श्रुतिः अभिजिन्नाम नक्षत्रं उपरिष्टा
दाषाढानां अधस्ताछ्रोणायादित्यादि २७ कृतं कृतयुगं देवलः असितः व्यासानां वेद विभागकर्तॄणां कवीनां विदुषां काव्यः शुक्रः
२८ भगवतां उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ये वेत्तॄणां २९ सुपेशसां

संवत्सरोऽस्म्यनिमिषामृतूनां मधुमाधवौ मासानां मार्गशीर्षोऽहं नक्षत्राणां तथाऽभिजित् २७ अहं युगा
नां च कृतं धीराणां देवलोऽसितः द्वैपायनोऽस्मि व्यासानां कवीनां काव्य आत्मवान् २८ वासुदेवो भगव
तां त्वं तु भागवतेष्वहं किंपुरुषाणां हनुमान्विद्याध्राणां सुदर्शनः २९ रत्नानां पद्मरागोऽस्मि पद्मकोशः सुपेशसां
कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं ३० व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः तितिक्षाऽस्मि
तितिक्षूणां सत्त्वं सत्त्ववतामहं ३१ ओजः सहो बलवतां कर्माहं विद्धि सात्वतां सात्वतां नवमूर्तीनामादिम
ूर्तिरहं परा ३२ विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ३३ अपां र
सश्च परमस्तेजिष्ठानां विभावसुः प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः ३४ ब्रह्मण्यानां बलिरहं वीरा
णामहमर्जुनः भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ३५ श्रीराम श्रीराम श्रीराम श्रीराम श्री

६८ सुंदराणां दर्भजातीनां काशाद्यवांतरजातीनां हविःषु चरुपुरोडाशादिषु घृतेषु च ३० लक्ष्मीः धनादि संपत् ३१ बलवतां ओजआसहश्च
सात्वतां भागवतानां भक्तया कृतं कर्माहमित्यर्थः तेषामेव नवमूर्तीनां चेन वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववे
राहनृसिंहब्रह्माणइति यानवमूर्तयस्तासामाद्यवासुदेवाख्या ३२ गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रं अविकृ
त ३२ परमः मधुरः परः परार्ख्यः शब्दः ३४ अर्जुनः पार्थः भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ३५ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म.गी.१० गन्धादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयो ज्ञानेंद्रियव्यापाराः तत्र लक्षणं दर्शनं सर्वेंद्रियाणामिंद्रियं तत्तदर्थग्रहणशक्तिरूपमहं ३६
तदेवं तत्र तत्र निर्द्धारेण न तत्तत्संबंधनं च विशेषतो विभूती निर्निरूप्य ह्यानीं सामान्यतः सर्वा अपि निरूपयति पृथिवीति सार्द्धद्वयेन पृ
थिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि अहं अहंकारः महान्महत्तत्वं एताः सप्त प्रकृतिविकृतयः विकाराः पंचभूतानि एकादशें
द्रियाणि वेत्येवं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पंचविंशति तत्वानी तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृ
तिविकृतयः सप्त षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति किंच रजः सत्वं तम इति प्रकृतेर्गुणा अपरं ब्रह्म च तदेतत्स

गन्धस्तूत्सर्गोपादानमानंदस्पर्शलक्षणे आस्वादश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियं ३६ पृथिवी वायुराकाश
आपो ज्योतिरहं महान् विकारः पुरुषोव्यक्तं रजः सत्वं तमः परं अहमेतत्प्रसंख्यानं ज्ञानं तत्वविनिश्चयः
३७ मयेश्वरेण जीवेन गुणेन गुणिना विना सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित् ३८ संख्यानं
१० परमाणूनां कालेन क्रियते मया न तथा मे विभूतीनां सृजतोंडानि कोटिशः ३९ श्रीराम श्रीराम

एतेषां लक्ष वैमहमेव किंच एतत्प्र[illegible]संख्यानं एतेषां परिगणितो ज्ञानं च तत्फलं तत्वविनिश्चयः अहमेव ३७ एतदेव संक्षिप्याह
मयेति जीव ईश्वररूपो द्विविधो यो भावः यश्च गुणगुणिरूपः यश्च क्षेत्रज्ञक्षेत्ररूपः स सर्वोपि मया विना मद्व्यतिरेकेण
नास्ति अहमेव सर्वमित्यर्थः ३८ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्ववन्निर्द्धारेण संबंधाभ्यां विशेषतः सर्वाः कथ राम
यति चेत्तत्राह संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियते [illegible] न तथा मे विभूतीनां संख्यानं ६०
कर्तुं न शक्यते कुत इत्यत आह सृजतोंडानीति यदा मया सृज्यमानानां ब्रह्मांडानामेव तावत्संख्या नास्ति तदा कुतस्तत्स्थानां विभूती
नां संख्येत्यर्थः ३९

ऊ कुंराक्यते २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१० तथापि विशेषतः एव सर्वोऽपि संक्षेपतः कथयामीत्याह तेजः प्रभावः श्रीः संपत् सौभगं मनोनयनाह्लादकत्वं भगः भाग्यं वीर्यं
बलं अंशकाः विभूतिः ४० उपसंहरति एताइति एते च विभूतिभेदा मयि चिन्तावतारयकल्पिताः अतो नात्रातीवाभिनिवेशः कर्त्त
व्य इत्याह मनोविकाराः एव न तु परमार्थः यथा किंचित् खपुष्पादि वाङ्मात्रेणाभिधीयते तत्तुल्याः ४१ तस्माद्धापादीन्नीयच्छ आत्मानं
बुद्धिरात्मना स त्वं संपन्न यात्ते यवनियच्छ अध्वने संसारमार्गाय ४२ असंयमे न दोषमाह यइति असंयच्छन् असंयच्छति ४३ परि

तेजः श्रीः कीर्त्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ४० एतास्ते कीर्त्तिताः सर्वाः
संक्षेपेण विभूतयः मनोविकारा एवैते यथा वाचाभिधीयते ४१ वाचं यच्छ मनो यच्छ प्राणं यच्छेन्द्रियाणि च ॥
आत्मानमात्मना यच्छ न भूयः कल्पसे ध्वने ४२ यो वै वाङ्मनसी सम्यगसंयच्छन् धिया यतिः तस्य व्रतं तपो दा
नं स्रवत्याम घटाम्बुवत् ४३ तस्माद्वचो मनः प्राणान्नियच्छेन्मत्परायणः मद्भक्तियुक्तया बुद्ध्या ततः परिस
माप्यते ४४ इति श्रीभागवते महापुराणे एकादशस्कंधे महाविभूतिर्नाम षोडशोध्यायः उद्धव उवा
च यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १ ॥ श्रीराम श्री

२९१ समाप्यते कृत्यो भवतीत्यर्थः ४५ इति एकादशे षोडशः ततः सप्तदशे पृष्टः स्वधर्मे भक्तिलक्षणे हंसोक्ते धर्मं मन्वाह ब्रह्मचारि
गृहस्थयोः कर्माहे विद्धिमात्वतामित्यत्र भक्त्याक्षेत्तुं कर्मं मोक्षसाधनत्वं च कर्मणामयोदितं पूर्वं हितः स्वधर्मस्थित्यादिना
तत्र तत्रोक्तं न च कर्मानुष्ठाहृणां नियमेन भक्तिर्दृश्यते अतः पृच्छति यस्त्वयेति सप्तभिः पूर्वं कल्पादौ त्वद्भक्तिलक्षणः
त्वज्ज्ञापकः तत्साधनमित्यर्थः वर्णाश्रमहीनानामपि द्विपदां नराणाम् ॥ १ ॥ राम श्रीराम श्रीराम श्रीरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण १ ननु संप्रदायादेव ज्ञास्यते किं पुनर्वर्णनेनेत्यत्राह पुरेति परमकं परम श्रेयः सोकं सुख
रूप श्रेनयत् यं हसरूपेण धर्मो ३ प्युक्त एव न तु योगमात्रं जानीत मागतं यज्ञं युष्मद् ब्रह्मविवक्षयेत्युक्तत्वात् ३ प्रागनुशासितो ३
पि न भविता न भविष्यति ४ अत्र हेतुमाह वक्ता निद्राभ्यां ते त्वत्तो ऽन्यः कलौ वद ५ ६ तत्तस्मात् नो ऽस्माकं मनुष्याणाम ध्य

यथा ऽनुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् स्वधर्मेण रविंदाक्ष तत्समाख्यातुमर्हसि २ पुरा किल महाबाहो
धर्म्मं परमकं प्रभो यत्तेन हंसरूपेण ब्रह्मणे ऽभ्यात्थ माधव ३ स इदानीं सुमहता कालेनामित्रकर्शन न मे २
प्रायो भविता मर्त्यलोके प्रागनुशासितः ४ वक्ता कर्ताविता नान्यो धर्मस्याच्युत ते भुवि सभायामपि वैरिञ्च्यां
यत्र मूर्तिधराः कलाः ५ कर्त्रा ऽविंत्रा प्रवक्त्रा च भवता मधुसूदन त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ६
६१ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः यथा यस्य विधीयेत तथा वर्णय मे प्रभो ७ शुक उवाच इत्थं स्वभृत्य
मुख्येन पृष्टः स भगवान्हरिः प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान् ८ श्रीभगवानुवाच आदौ कृत
युगे वर्णो नृणां हंस इति स्मृतः कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ९ श्रीराम श्रीराम श्रीरा
नू २

यस्य यथा विधीयेते ७ धर्म्यः धर्मादनपेतः कुतः नैश्रेयसकारः भक्तिजनकः अतः सेमेतः तं धर्म्मं निबोध ८ तत्रादौ मदुपा ६१
सनालक्षण एव मुख्यो धर्म आसीत् आचारलक्षणस्तु पश्चात्प्रवृत्तः सं चैवमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह आदा
विति कल्पादौ यत्कृतयुगं तस्मिन् ते चेतदा मासु पासत एवं केवलं नान्यत्कुर्वंतीति वक्तुं कृतयुगनाम निरुक्तिमाह कृतेन कृ
त्यैति जात्या जन्मनैव ९

धर्म्यएषन वर्ष भौनेः श्रेयसकरोन्नणां ॥ वर्ण
श्रमाचारवतांनमुद्धवनिबोधमे २

भा०ए० किंच विधायकाभावादपि तदानीं नान्यन्न्यकर्मास्तीत्याह वेद इति धर्मश्च मनोविषयोऽहमेव वृषरूपधृक् चतुःपात् न क्रियाविशेषो
यज्ञादिः अतः तपोनिष्ठाः मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तप इति वचनात् कायतपा हंसं शुद्धं मां ध्यायंतीत्यर्थः १० प्रात्" त्रि।
त्रेतायुगप्रवेशमेव विराजरूपस्य प्राणान्निमित्ताद्धृदयात्सकाशात् तस्यास्त्रय्याः सकाशात् हौत्राध्वर्यवौद्गात्रैः त्रिवृद्रूपः यज्ञो वै

वेदः प्रणव एवाग्रे धर्मोऽहं वृषरूपधृक् उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः १० त्रेतामुखे महाभा
ग प्राणान्मे हृदयात्त्रयी विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ११ विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपाद
जाः वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः १२ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम वक्षःस्थलाद्वनेवासो न्यासः
शीर्षणि संस्थितः १३ वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणी आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमाः १४
प्र शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः १५ तेजो बलं धृतिः शौर्यं
तितिक्षौदार्यमुद्यमः स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतयस्त्विमाः १६ आस्तिक्यं दाननिष्ठा च अदम्भो विप्रसेवनं
अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः १७ शुश्रूषणं द्विजगवां देवानां चाप्यमायया तत्र लब्धेन संतोषः
शूद्रप्रकृतयस्त्विमाः १८

त्रिवृदिति श्रौतेः ११ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषामुत्पत्तिमाह विप्रेति द्वाभ्यां आत्माचारः स्वधर्म एव लक्षणं
ज्ञापको येषां ते १२ मम वैराजरूपस्य हृदः वक्षसोऽधस्तात् ब्रह्मचर्यमिति नैष्ठिकाभिप्रायं १३ तेषामधिकारिविशेषेण
स्वभावानाह वर्णानामिति पंचभिः जन्मस्थानानुसारिण्यः नीचैर्नीचस्थानं प्रतीयमर्थः मंदाभिर्जन्मभूमिभिर्मंदाः उत्तमाभि
रुत्तमा इति १४ तप आलोचनं १५ तेजः प्रतापः एतैर्वाश्रमस्वभावा अपि ज्ञेयाः १६ १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्वाख्यानां स्वभावानाह अशोच्यमिति शुष्कविग्रहः निर्मूलकलहः तर्षः तृष्णा १९ तत्र तावत्सर्वधारणं धर्ममाह अहिंसेति वर्णग्रहणमु
पलक्षणार्थं २० वर्णधर्मानुग्रहस्तु प्रकरणे वक्ष्यति प्रथमं तावदाश्रमेषु ब्रह्मचारिणो धर्मो वर्ण्यते स च द्विविधः उपकुर्वाणको नै
ष्ठिकश्चेति तत्राद्यस्य धर्मानाह द्वितीयमिति नवभिः द्विजः त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयना
ख्यं जन्म प्राप्य आचार्येणाहूतो ब्रह्म वेदमधीयीत चकारात्तदर्थं च विचारयेत् २१ किंचामेखलादीन् कुशांश्च दधत् तत्रौ क्षशब्दे

अशोच्यमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः कामक्रोधश्च तर्षश्च स्वभावोंतेवसायिनां १९ अहिंसा सत्यम
स्तेयाम कामक्रोधलोभता भूतप्रियहितेहा च धर्मोयं सार्ववर्णिकः २० द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं
६१ द्विजः वसन् गुरुकुले दान्तो ब्रह्माधीयीत चाहुतः २१ मेखलाजिनदण्डाक्षब्रह्मसूत्रकमण्डलून् जटि
नू२ लो धौतदद्वासो रक्तपीठः कुशान् दधत् २२ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः नच्छिंद्यान्न
खरोमाणि कक्षोपस्थगतान्यपि २३ रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं अवकीर्णेवगाह्याप्सु यतासु
स्त्रिपदीं जपेत् २४ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुरान् शुचिः समाहित उपासीत संध्ये च यतवाग्जप
न् २५

नाक्षमाला कथंभूतः जटिलः अनभ्यंगादिना जातजटः तथा अधौतदद्वासो रक्तपीठः दंता अवासः अदद्वासो सिनधौतानि
तानि यस्य सः अधौतदद्वासाः स चासौ रक्तपीठः अनकौतुकादिना रक्तपीठमासनं यस्य सः २२ जप अन उच्चारो मूत्रपुरी
षोत्सर्गो अजपोच्चारस्तस्मिन् वाग्यतः मौनी भवेत् २३ रेतो बुद्धिपूर्वं नावकिरेत् नोत्सृजेत् ब्रह्मव्रतधरः आगृहस्थः स्वयमेव
कथंचिदवकीर्णे अवगाह्य स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत् २४ संध्ये चेह यतवाक् जपन्नुपासीत॥

[illegible] ६१

न२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० २६ अन्यदपियत्संप्राप्तंतच्चनिवेदयेत् तेनानुज्ञातंतुसंयतः संनुपयुंजीतेत्यर्थः २७ यानशय्यासनस्थानैः यानंपृष्ठतोयानेन नि
द्रितमप्रमत्ततयासमीपशयनेन विश्रांतंपादसंवाहनादिभिः समीपासनेन आसीनंकृतांजलिनियोगप्रतीक्षया नाति
दूरवर्त्स्थानेनेत्यर्थः २८ एवंभूतवृत्तंयस्यसः २९ एवमुपकुर्वाणकस्यधर्मानुक्त्वानैष्ठिकस्यविशेषधर्मनाह यदीतिषड्भि
श्लोकं१ असौब्रह्मचारीयदिछंदसां महल्लोके ततोब्रह्मलोके चारोक्ष्यन् आरोढुमिच्छतीत्यर्थः यद्याछंदसांलोकमितिब्रह्म

आचार्यंमांविजानीयान्नावमन्येतकर्हिचित् नमर्त्यबुध्यासूयेत सर्वदेवमयोगुरुः २६ सायंप्रातरुपानीय
भैक्ष्यंतस्मैनिवेदयेत् यच्चान्यदप्यनुज्ञातमुपयुंजीतसंयतः २७ शुश्रूषमाणआचार्यंसदोपासीतनीचवत्
यानशय्यासनस्थानैर्नातिदूरेकृतांजलिः २८ एवंवृत्तोगुरुकुलेवसेद्भोगविवर्जितः विद्यासमाप्तेयावद्धिब्रह्म
२८ तमखंडितं २९ यद्यसौछंदसांलोकमारोक्ष्यब्रह्मविष्टपं गुरवेविन्यसेद्देहंस्वाध्यायार्थंबृहद्व्रतः ३० अग्नौ
गुरावात्मनिचसर्वभूतेषुमांपरं अपृथग्धीरुपासीतब्रह्मचर्यस्य कल्मषः ३१ स्त्रीणांनिरीक्षणस्पर्शसंल स्य
पालक्ष्वेलनादिकं प्राणिनांमिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ३२ शौचमाचमनंसंध्योपासनमार्जवम् ॥ स्नानं१
तीर्थसेवाजपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं ३३ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री

लोकमारोक्ष्यन् आरोढुमिच्छतीत्यर्थः यद्याछंदसांलोकमितिब्रह्मलोकविशेषणं यत्रमूर्तिधराः कलाइत्युक्तत्वात् तदिहिदेह
द्व्रतः सनुद्बृहत्नैष्ठिकंव्रतंयस्यसः विन्यसेत् समर्पयेत् अधिकस्वाध्यायार्थं अधीतनिवृत्त्यर्थंवा ३० ब्रह्मवर्चः वेदाभ्यासजं
तेजः तद्वान् ३१ तस्यैवचनस्रुछयति साधारणधर्मानाह स्त्रीणामिति निरीक्षणंभावगर्भं क्ष्वेलनंपरिहासः एवमादिकंत्य
जेत् मिथुनीभूतानग्रतस्त्यजेत् नपश्येदित्यर्थः ३२ तस्यैवसर्वाश्रमसाधारणंधर्ममाह शौचमितिद्वाभ्याम् ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४ निष्कामं नैष्ठिकस्यानु मोक्षफलमाह एवमिति अमलः निष्कामश्चानुद्दग्धः कर्माशयो तत्कारणं यस्य तथाभूतः स नु मक्तो भवति
३५ उपकुर्वाणकस्य समावर्त्तनप्रकारमाह अथेति अनंतरं द्वितीयाश्रमं आविक्ष्यन् प्रवेष्टुमिच्छन् यथायथावद्विचारितवेदार्थः स्नायात् २
ह१ अभ्यंगादिकं कृत्वा समावर्त्तेतेत्यर्थः ३६ तथाधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामश्चेद्गृहं अन्तःकरणशु
द्ध्यादिकामश्चेद्वनं प्रविशेत् शुद्धांतःकारणः सच द्विजोत्तमः ब्राह्मणश्चेत् प्रव्रजेदित्यर्थः यद्वाश्रमादाश्रमांतरं गच्छेत् अन्यथाश्र

सर्वाश्रमप्रयुक्तोयं नियमः कुलनंदन मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३४ एवं वृहद्व्रतधरो
ब्राह्मणोग्निरिवज्वलन् मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ३५ अथानंतरमावेक्ष्यन् यथाजि
ज्ञासितागमः गुरवे दक्षिणां दत्वा स्नायाद्गुर्वनुमोदितः ३६ गृहं वनं वो[illegible]पविशेत्प्रव्रजेद्वा द्विजोत्त
मः आश्रमादाश्रमं गच्छेन्नान्यथामत्परश्चरेत् ३७ गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां यवीय
सीं तु वयसा यां सवर्णामनुक्रमात् ३८ इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां प्रतिग्रहोऽध्या
पनं च ब्राह्मणस्यैव याजनं ३९
यनं च ब्राह्मणस्यैव याजनं ३९

नाश्रमी प्रतिलोमं च नाचरेदित्यर्थः अमत्पर इति वाच्छेदः स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ३७ विवाहनिय
ह२ मपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह गृहार्थीति सदृशीं सवर्णां अजुगुप्सितां कुलतोलक्षणतश्चानिंदितां कामतस्तु याम ६३
न्याश्चेदुद्वहेत् तां सवर्णामनु तस्याश्चानंतरं नेत्रापि वर्णक्रमेणोद्वहेदित्यर्थः तिस्रो वर्णानुपूर्वेण द्वे तथैका यथाक्रमं ब्राह्मणक्ष
त्रियविशां भार्याः स्वा शूद्रजन्मन इति स्मृतेः ३८ इज्यादयस्त्रैवर्णिकानामावश्यका धर्माः प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्रा
ह्मणस्यैव ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रापिमुख्यामुख्यतमांचान्यांवृत्तिमाह प्रतिग्रहमिति तयोर्याजनाध्यापनयोरपिकार्पण्यादिदोषंपश्यन् शिलैः स्वामित्यक्तैः क्षेत्र
पतितैः कणिशैः ४० एवंचवृत्तिकार्श्यंब्राह्मणेनसोढव्यमित्याह ब्राह्मणस्येति ४१ उञ्छवृत्तिर्नाम विपण्यादिपतितकणोपादानं ता
शिलवृत्तेः फलंत्वानया तुष्टचित्तस्यमोक्षफलमाह शिलोञ्छेति महानंत्रानित्यादिलक्षणे ४२ एवमधनस्यमहत्फलमुक्त्वा साधनानां
मप्याह त्रिभिः समुद्धरेति दारिद्र्याद्दुस्तारयंति विप्रमित्युपलक्षणमत्परायणंयंकमपि ४३ राज्ञस्त्वावश्यकोऽयमित्याह सर्वाइति ४४

प्रतिग्रहंमन्यमानस्तपस्तेजोयशोनुदं अन्याभ्यामेवजीवेत शिलैर्वादोषदृक्तयोः ४० ब्राह्मणस्यहिदेहोयंक्षुद्रका
मायनेष्यते कृच्छ्रायतपसेचेह प्रेत्यानंतसुखायच ४१ शिलोञ्छवृत्त्यापरितुष्टचित्तो धर्म्मंमहांतंविरजंजुषाण ॥
मय्यर्पितात्मागृहएवतिष्ठन्नातिप्रसक्तः समुपैतिशांति ४२ समुद्धरंतियेविप्रसीदंतंमत्परायणं तानुद्धरिष्येनचिरा
दापद्भ्योनौरिवार्णवात् ४३ सर्वाः समुद्धरेद्राजापितेवव्यसनात्प्रजाः आत्मानमात्मनाधीरोयथागजपतिर्गजान् ४४
एवंविधोनरपतिर्विमानेनार्कवर्चसा विधूयेहाशुभंकृत्स्नमिंद्रेणसहमोदते ४५ सीदन्विप्रोवणिग्वृत्त्यापण्यैरेवाप
दंतरेत् खड्गेनवापदाक्रांतोनश्ववृत्त्याकथंचन ४६ वैश्यवृत्त्यातुराजन्योजीवेन्मृगययाऽऽपदि चरेद्वाविप्ररूपेणनश्व
वृत्त्याकथंचन ४७

रा। सर्वेषामापद्वृत्तीराह सीदन्निति त्रिभिः पण्यविक्रयोर्हः नतुसुरालवणादेः तत्राप्यापदाक्रांतश्चेत्तु खड्गेन क्षत्रियवृत्त्यावायद्यपिगोत
मोऽनंतरांपापीयसींवृत्तिमातिष्ठेतइतिस्मरन् खड्गधारणंपण्यविक्रयाद्दुष्टंमन्यते तथापिहिंसात्मकत्वेनततोवाणिज्यवृत्ति
रेवश्रेष्ठेति भगवतोमतं ननुश्ववृत्त्यानीचसेवया ४६ तत्राप्यापदिमृगययाविप्ररूपेणवाध्यापनादि ४७॥ श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारवः प्रतिलोमजविशेषाबुरुडादयः तेषां वृत्तिकलादिक्रियास्ता आपदुत्तीर्णस्तानानुकल्पेनुवर्तनेत्याह कुक्ष्यादिति ४८ तदेवं वृत्तिव्यवस्था
मुक्त्वा पुनर्गृहस्थस्यावश्यकार्यं चयज्ञानाह वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषीन् स्वधाकारेण पितॄन् स्वाहाकारेण देवान् बलिहरणे
न भूतानि अन्नोद्यैरन्नोदकादिभिर्मनुष्यानिति ज्ञातव्यं यथोदयं विभावानुसारतः तेष्वीश्वरदृष्टिं विधेनेमद्रूपाणीति ४९ आवश्य
के धर्ममुक्त्वा शक्त्यनुसारं धर्ममाह यदृच्छयात्वधमविना उपार्जितेन वा शुल्केन स्वव्रत्याल्लब्धेन शुद्धेन धनेन वा भृत्यान् पोष्या

शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकक्रियां कुक्षान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ४८ वेदाध्यायः स्वधास्वाहा
बाल्यन्नाद्यैर्यथोदयं देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ४९ यदृच्छयोपपन्नेन शुल्केनोपार्जितेन वा ध
नेनापीडयन् भृत्यान्न्यायेनैवाहरेत्क्रतून् ५० कुटुंबेषु न सज्जेत न प्रमाद्येत्कुटुंब्यपि विपश्चिन्नश्वरं पश्येददृष्ट
६९ मपि दृष्टवत् ५१ पुत्रदाराप्तबंधूनां संगमः पांथसंगमः अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ५२ इत्थं परिमृश
न्मुक्तो गृहेष्वतिथिवद्वसन् न गृहैरनुबध्येत निर्ममो निरहंकृतः ५३ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्ति
मान् तिष्ठेद्वनं चोपविशेत्प्रजावान्वा परिव्रजेत् ५४

न ५० गृहस्थस्यापि निवृत्तिनिष्ठामेवाह कुटुंबेष्विति त्रिभिः न प्रमाद्येत् ईश्वरनिष्ठायां प्रमत्तो न भवेत् ननु दृष्टादृष्टार्थकर्मास
क्तस्य कथमप्रमादः विचारेणेत्याह विपश्चिदिति ५१ तत्रापि दृष्टेष्वासक्तेरधिकत्वात्तेषां नश्वरतां प्रपंचयति पुत्रादीनामेकत्र ६९
संगमः पांथानां प्रपायां संगम इव तत्र हेतुः अनुदेहं प्रतिदेहमेते वियंति नश्यंति निद्रावृत्तिः स्वप्नो निद्रापायेपैति ५२ अति
थिवत् उदासीनः ५३ अस्याप्याश्रमविकल्पमाह कर्मभिरिति गृहाश्रम एव तिष्ठेत् यदि प्रजावान् तर्हि प्रव्रजेत् वा ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गृहाद्यासंगदोषमाह यस्त्विति त्रिभिः ५५ वधमेवाभिनयेन दर्शयति अहो इति बाला आत्मजा यस्याः सा आत्मजाश्च मां विना अनाथाः
५८ संतः कथं जीविष्यंतीति ५६ गृहे आशया वासनातेन आसर्वतः क्षिप्तं हृदयं यस्य सः अधंतमः अतितामसीं यानि ५७ इत्येकाद
शे संप्तदशः अष्टादशे वद्ध्रमेवं वनस्थयतिगार्हस्थं अधिकारविशेषण विशेषं चापितत्कृतं क्रमप्राप्तान्वनस्थधर्मानाह वनमिति ॥

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः । स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ५५ अहो मे पितरौ वृद्धौ भार्या बाला
त्मजात्मजाः । अनाथा मामृते दीनाः कथं जीवंति दुःखिनः ५६ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं । अतृप्तस्तान
नुध्यायन्मृतोंधं विशते तमः ५७ इति श्री भागवते महापुराणे एकादशस्कंधे सप्तदशोध्यायः ॥ श्री भगवानुवाच ॥ व
नं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा । वन एव वसेच्छांतस्तृतीयं भागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं
प्रकल्पयेत् । वसीत वल्कलं वासस्तृणपर्णाजिनानि च २ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः । न धावे
दप्सु मज्जेत त्रिकालं स्थंडिलेशयः ३ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले । आकंठमग्नः शिशि
रे एवं वृत्तस्तपश्चरेत् ४

आयुषस्तृतीयं भागं पंचसप्ततिवर्षपर्यंतं ततः परं क्षीणेंद्रियस्य षड्विरागेः पि संन्यासाधिकारः स्यादिति भावः १ वसी
त परिदधीत २ दतः दंतानुधावेत् न शोधयेत् त्रिकालमप्सु मज्जेत मुसलवत्स्नायात् स्थंडिलेशयः भूमिशायी ३ तप्येत पंचा
ग्नीन्सूर्येण सह चतुर्दिशत्वग्नीन्निधायात्मानं तापयेदित्यर्थः आसारषाट् आसारं धारासंपातं सहते इति तथा अभ्राव
काशं नाम व्रतं चरेत् जले आकंठमग्नः उदकावासं नाम व्रतं चरेत् ॥४॥ राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० उलूखलेनवाश्मनावाकुट्टयतिकंड्डयतीतितथा दंताएवोलूखलंयस्यसतथा ५ संचिनुयात् आहरेत् अन्यदा कालांतरे आहृतं कालांतरेनादद्यात्तल्लब्धेनैवनवैः न्नाद्यैपुराणंतुपरित्यजेदितिनारदोक्तेः ६ कालचोदितान् आग्रयणादीन् ७ किंच अग्निहोत्रमितिमुनेः आम्नातागमैर्वेदवादिभिः ८ अस्यनिष्कामस्यफलमाहएवमिति धमनिभिः शिराभिः संततः व्याप्तः यावज्जीवंकृतेनतपसाशुष्कमांसइत्यर्थः ऋषिलोकान् महर्लोकादिक्रमेणाअयंभावः अंतःकरणशुद्धिभक्तिद्वारात्रैवतावन्मुच्यते॥ प्रतिबंधकबाहुल्यत्वेनेनक्रमेणमुच्यतइति ९ तंसकामंनिंदितियस्त्विति निःश्रेयसंमोक्षफलं अल्पीयसेऽविरि

अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा उलूखलाश्मकुट्टोवादंतोलूखलएवच ५ स्वयंचसंचिनुयात्सर्वमात्मनोवृत्तिकारणं देशकालबलाभिज्ञोनाददीतान्यदाहृतं ६ वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् नतुश्रौतेनपशुनामांयजेतवनाश्रमी ७ अग्निहोत्रंचदर्शश्चपौर्णमासश्चपूर्ववत् चातुर्मास्यानिचमुनेराम्नातानिचनैगमैः ८ एवंचीर्णेनतपसामुनिर्धमनिसंततः मांतपोमयमाराध्यऋषिलोकादुपैतिमां ९ यस्त्वेतत्कृच्छ्रतश्चीर्णंतपोनिःश्रेयसंमहत् कामायाल्पीयसेयुंज्याद्बालिशःकोपरस्ततः १० यदासौनियमेऽकल्पोजरयाजातवेपथुः आत्मन्यग्नीन्समारोप्यमच्चित्तोऽग्निंसमाविशेत् नू२
६५ ब्रह्मपर्यन्तेषु ११ यदाकर्मविपाकेषुलोकेषुनिरयात्मसु विरागोजायतेसम्यङ्न्यस्ताग्निःप्रव्रजेत्ततः १२ इष्ट्वायथोपदेशंमांदत्वासर्वस्वमृत्विजे अग्नीन्स्वप्राणआवेश्यनिरपेक्षःपरिव्रजेत् १३

स्यादित्यल्पमेवतस्मै १० एवंयावज्जीवंवर्तमानस्यमोक्षः तृतीयभागावसानेतुमंदविरागोपिसन्यासाधिकारः यदित्युत्तोवर्गोववस्त्वध राम
दुःखोदर्केषु मीशक्तोभवेत् तदापिसम्यग्विरक्तःविरक्तोवा तत्राविरक्तस्यकृत्यमाह यदेति जातोवेपथुःकंपोदेहेयस्यसः ११ विरक्तंप्रत्याहयदेति १२ तत्रादौकृत्यमाहइष्ट्वेतियथोपदेशंश्राद्धाष्टपूर्वकंप्राजापत्येष्ट्यामामिष्ट्वास्वेप्राणेआत्मनि॥१३ राम राम॥ ६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सन्यासे विघ्ना भवंति तानविगणय्य सन्यसेदेव त्याशेयनाह विप्रस्येति केनापि प्रयोजनेन कुर्वं तिति माहस्त्रयमिति परं परं ब्रह्म १४ एवं प्रव्र
जितस्य धर्मानाह विभृयाच्चेदिति परं कौपीनाच्छन्य ह्यासो यदि धारयितुमिच्छति तर्हि कौपीनं मोक्षाद्यैत यावता तावन्मात्रं धारय
दित्यर्थः त्यक्तं प्रैषोच्चारात्पूर्वमेव अतोऽन्यत् किंचिदपि न विभृयात् दंडपात्राभ्यामित्यावश्यकजलपवित्रादेरुपलक्षणं १५ म १
मनः पूतं मनसा सम्यक् विचार्य यद्युक्तं तदाचरेत् १६ मौनं वाचो दंडः अनीहा काम्यकर्मत्यागो देहस्य प्राणायामः १७ एतेऽत्र

विप्रस्यैवं सन्यस्तो देवादारादिरूपिणः विघ्नान् कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परं १४ विभृयाच्चेन्मुनिर्वासः कौपीना
च्छादनं परं त्यक्तं न दंडपात्राभ्यामन्यत् किंचिदनापदि १५ दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं सत्यपूतं वदेद्वाक्यं म
नः पूतं समाचरेत् १६ मौनानीहानिलायामा दंडा वाग्देहचेतसां न ह्येते यस्य सत्यंग वेणुभिर्न भवद्यतिः १७ भिक्षां चतुर्षु
वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंक्लृप्तानुस्कोष्यल्लुब्धेन तावता १८ वहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः
विभज्य पावितं शेषं भुंजीताशेषमाहृतं १९ एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः आत्मक्रीड आत्मरत आत्म
वान्समदर्शनः २०

त्र्यायां दंडायस्य न संति अगेहस्त्ववेव अगः दृष्टैर्वेणुभिरिति वा १७ चतुर्ष्विति ब्राह्मणप्रवरचतुर्भिर्भेदेन चतुर्विधेषु पूर्वपूर्वासंभवे वा वि
गर्ह्यान् अभिशस्तपतितान् असंक्लृप्तान् अत्रायं लाभो भविष्यतीति पूर्वमनुदिष्टान् १८ वहिर्ग्रामात् पावितं प्रोक्षणादिभिः शो
धितं विभज्य विष्णुब्रह्मार्कभूतेभ्यः अशेषमित्यधिकाहरणं निरस्तं याचितमिति पाठे माधुकरेण याचितमन्नं चेत् तर्हि विभज्य
भुंजीत न तयाचितादि भैक्ष्यं चतुष्टयमित्यर्थः माधुकरं तु नैव दधिभैक्ष्यं नान्यत्सु विद्यते नैव यके क्षिपदसुत्रितत्यं भोनिकं वहि रितिस्म
तेः यद्वा तदानीं केनापि याचितं चेत् तन्मध्याद्वस्मै किंचिद्विभज्य दत्वेत्यर्थः १९ किंच एकश्चरेदिति आत्मन्येव क्रीडा कौतुकं यस्य
सः आत्मन्येव रतः संतुष्टः आत्मवान् धीरः २० राम राम राम रामे राम राम राम राम श्री

चतुर्विधेष्विति परफ्रव्विविशदर्थपति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः । मपि भावेन विमल आशयो यस्य सः २१ बंधं मोक्षं च केन बंधः केन वा मोक्ष इति तावाह
बंध इति २१ २२ सुराणि हष्टादिमंति ग्रामास्तद्रहिता व्रजा गोष्ठानि तान् सार्थान् यात्रिकजनसमूहान् २४ यतः शिलवृत्त्या प्राप्तेनान्नेनापि
नो धसा अन्नेन शुद्धसत्वः सन् निवृत्तमोहः सन् सिध्यति मुच्यते २५ ननु मिष्टान्नं विहाय कथं शिलान्नेन प्रवृत्तिः स्यादत आह नेति एतत्
दृश्यमानं मिष्टान्नादि वस्तु तत्त्यानं पश्यन् यतो विनश्यति श्रुतः इहामुत्र च लोके आसक्तचित्तः सन् चिकीर्षितात् तदर्थं कर्त्याद्विरमेत्
२६ ननु तथापि यावद्विनाशं सुखहेतुत्वात् चिंतावतः कुतो विरागः स्यात्तत्राह यदेतदिति एतज्जगत् ममतास्पदं मनोवाक्प्राणैः सह

विविक्तक्षेमशरणो मद्भावविमलाशयः । आत्मानं चिंतयेदेकमभेदेन मया मुनिः २० अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञान
निष्ठया । बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः । तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः । विरक्तः क्षुद्रकामेभ्यो लब्ध्वा
त्मनि सुखं महत् २३ पुरग्रामव्रजान् सार्थान् भिक्षार्थं प्रविशंश्चरेत् । पुण्यदेशसरिच्छैलवनाश्रमवतीं महीं २४ वानप्र
स्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् । संसिद्ध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलांधसा २५ नैतद्वस्तुतया पश्येद्दृश्यमानं ६६
विनश्यति । असक्तचित्तो विरमेदिहामुत्रचिकीर्षितात् २६ यदेतदात्मनि जगन्मनोवाक्प्राणसंहतं । सर्वं मायेति
तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् २७ ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः । सलिंगानाश्रमांस्त्यक्त्वा चरेद
विधिगोचरः २८

सह तं संहितं अहंकारास्पदं शरीरं च सर्वं तज्जन्यं सुखं च आत्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टांतेन त्यक्त्वा स्वस्थः आत्मनिष्ठः
सन् पुनः तन्न स्मरेत् न चिंतयेत् २७ एवं वहूदकादिधर्मानुक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति सार्द्धैर्दशभिः विहि विरक्तो मुमुक्षुः राम
सन् यो ज्ञाननिष्ठो वा मोक्षेप्यनपेक्षो मद्भक्तो वा स लिंगान् त्रिदंडादिसहितान् आश्रमान् तद्धर्मान्त्यक्त्वा तद्दस्तित्यक्त्वा यथो ६६
चितं धर्मं चरेदित्यर्थः न पुनरत्यंतत्यागएव विवक्षितः पुनर्धर्मविधानात् अक्रियत्वस्योत्तराध्याये वक्ष्यमाणत्वात् न हि पूर्व ६४
स्मात्को विशेषः तत्राह विधिगोचरः विधिकिंकरो न स्यादिति एतदेव स्फुटीकरिष्यति शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादि

श्री ना २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि कथं चरेत् तदाह बुध इति । विवेकवानपि बालकवत् मानावमानविवेकशून्यः कुशलः निपुणोऽपि जडवत् फलानुसंधानाभावेन विद्वानपि उ-
न्मत्तवत् लोकरंजनाभावेन नैगमः वेदार्थनिष्ठोऽपि गोचर्यां अनियताचारमिव २९ वेदवादरतः कर्मकाण्डव्याख्यानादिनिष्ठः है-
तुकः केवलतर्कनिष्ठः शुष्कवादे निष्प्रयोजने गोष्ठ्यां विवादे तस्मिन् ३० अतिवादान् दुरुक्तानि ३१ आत्मदृष्ट्या तावद्वैरकारणं नास्ति सु-

बुधो बालकवत् क्रीडेत् कुशलो जडवच्चरेत् । वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् २९ वेदवादरतो न स्यान्न पाषण्डी
न हैतुकः । शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ३० नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु । अतिवादांस्तितिक्षेत ना-
वमन्येत कंचन । देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित् ३१ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः । यथेन्दुरुदपात्रेषु
भूतान्येकात्मकानि च ३२ अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् । लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतन्त्रितं ३३
आहारार्थं समीहेत युक्तं तत्प्राणधारणं । तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ३४ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुता-
परं । तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ३५ शौचमाचमनं स्नानं न तु चोदनया चरेत् । अन्यांश्च नियमा-
ञ्ज्ञानी यथाऽहं लीलयेश्वरः ३६

क्तं एक एवेति देहदृष्ट्यापि नास्तीत्याह भूतानि चेदेहा अपि कारणरूपेण एकात्मकानि ३२ दैवतन्त्रितं दैवाधीनं यतः ३३ अलं त-
र्हि भिक्षाप्रयत्नेनापि तत्राह आहारमात्रार्थं समीहेत चायतः तस्य प्राणधारणं युक्तं सम्यक् कुतः यतस्तेन प्राणधारणेन तत्त्वं वि-
चार्यते किं तेनापि तदाह तद्विज्ञायेति ३४ तर्हि किं मिष्टान्नादिकमग्राह्यमेवं केनेच मुक्तमित्याह यदृच्छयेति ३५ यथाऽहमी-
श्वरो लीलयाचरामि तथा ज्ञानी ज्ञाननिष्ठः अनासक्तः कुर्यात् न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११० कुतो विधिकिंकरत्वाभावस्तस्य तत्राह नहितस्य विकल्पाख्या भेदप्रतीतिः नन्वस्तिसा सत्यं याचासीत्सापिमद्वीक्षया ज्ञानेन हतानतु नह
तापुनर्दृश्यमानत्वात् तत्राह आदेहांतात् क्वचित्कदाचित्तु बाधितेव ख्यातिर्भवति ३७ तदेवं विरक्तस्य मुमुक्षोर्ज्ञानवतः संन्यासंतूक्त्वा
मोक्षोत्कं केवलं वैराग्यवंतं विविदिषुं प्रत्याह दुःखोदर्केष्विति न जिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं येन सः ३८ मामेवमद्दृष्ट्यैव
गुरुं परिचरेत् ततः परमकोऽस्मादित्यादि धर्मवर्त्ततइतिभावः ३९ अनधिकारिणः संन्यासं निंदति द्वाभ्यां यस्त्विति प्रचंडोऽत्या

नहितस्य विकल्पाख्या याचमद्वीक्षयाहता आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मया ३७ दुःखोदर्केषु कामेषु
जातनिर्वेदआत्मवान् अजिज्ञासितमद्धर्मो गुरुंमुनिमुपाव्रजेत् ३८ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ३९
यावद्ब्रह्मविजानीयान्मामेव गुरुमादृतः ३९ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः ज्ञानवैराग्यरहितस्त्रिदंड
मुपजीवति ४० सुरानात्मानमात्मस्थं निन्हुतेमांचधर्महा अविपक्वकषायोस्मादमुष्माच्च विहीयते ४१ भिक्षो
र्धर्मः शमोऽहिंसा तपईक्षा वनौकसः गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ४२ ब्रह्मचर्यं तपः शौचं
संतोषो भूतसौहृदं गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ४३ इति मां यः स्वधर्मेण भजन्नित्यमनन्यभा
क् सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात् ४४ भक्त्योद्धवाऽनपायिन्या सर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययं ब्र

६०

सक्ताइंद्रियसारथिर्बुद्धिर्यस्य सः ४० सुरान् यष्टव्यान् स्वात्मानंच आत्मस्थं मांच निन्हुते प्रतारयति निन्हवफलमाह अस्मादिति
४१ चतुर्णां प्रधानधर्मानाह भिक्षोरिति ४२ अन्यधर्मान्कांश्चित् गृहस्थेप्यतिदिशति ब्रह्मचर्यमिति शौचं रागादिराहित्यं तस्य राम
ब्रह्मचर्यप्रकारमाह ऋतौ गंतुरिति ४३ एवंभूतवर्णाश्रमधर्मफलमाह इतिमामिति दृढां मद्भक्तिं विंदते ४४ ततः किमत आ
ह भक्त्येति महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् अतएव तत्कारणं मां ब्रह्मरूपं वैकुंठनिवासिनं ६०
यद्वा ब्रह्मणो वेदस्य कारणं मामुपयाति सामीप्येन प्राप्नोति ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततश्चासौ मुक्त एवेत्याह इति एवंभूतेन स्वधर्म्मेण निर्णिक्तं शुद्धं सत्वं यस्य सः अत एव निर्ज्ञाता मम गतिरैश्वर्य्यं येन ४६ उक्तमर्थं संक्षिप्या
हयं एष आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः मदर्प्पणेन कृतः ४७ प्रकरणार्थमुपसंहरति एतत्ते ऽभिहितं यथा भक्तो
भूत्वा मां परं प्राप्नुयादिति ४८ एकादशेऽष्टादशः ज्ञानादि निर्णयः पूर्वं कृतो ह्याश्रमधर्म्मतः एकोनविंशतितमे ज्ञानादे[illegible]स्त्याग उच्य
ते तदेवं तर्केणो वाधितो ऽपि देहादिप्रपंचो यावदपरोक्षानुभवेन दिङ्मोहादिरिव न लीयते तावत् ज्ञानाभ्यासस्ततो मुक्तिः आदेहा

इति स्वधर्मनिर्णक्तसत्वो निर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नो विरक्तः समुपैति मां ४६ वर्णाश्रमवतां धर्म्म एष आ
चारलक्षणः स एव मद्भक्तियुतो निःश्रेयसकरः परः ४७ एतत्ते ऽभिहितं साधो भवान् पृच्छति यच्च मां यथा
स्वधर्म्मसंयुक्तो भक्तो मां समियात्परं ४८ इति श्रीभागवते महापुराणे एकादशस्कंधे ऽष्टादशो ऽध्यायः १८
श्रीभगवानुवाच यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् १
ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः २

तान्काचित् स्यातिस्ततः संपद्येते मयेत्यादिना यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीत्याह यः
ति विद्याश्रुतानुभवः तात्पर्यं तेन संपन्नः अत एव आत्मवान् प्राप्तात्म[illegible]तत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान्न भवति
अनकारपाठे प्राकृ आत्मनुकूलतर्कैर्नो निर्णीतात्मेत्यर्थः स इदं हेतुतन्निवृत्तिसाधनं च मयि मायामात्रमिति ज्ञात्वा ज्ञा
नं च तत्साधनं च संन्यसेत् अयमेव विद्वत्संन्यासो नाम १ अत्र हेतुमाह ज्ञानिनस्त्विति यस्मादहमेव तस्येष्टः अपेक्षितः
स्वार्थः फले हेतुः तत्साधनं च संमतः स्वर्गो ऽभ्युदयश्च अपवर्गः संसारनिवृत्तिश्च अतस्तस्य न प्राप्यं कृत्यं वा किंचिदस्ती
त्यर्थः २

अनेन २ हू २ येनसृजसितं सृजेतिरस्ते:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहादिमद्रुभीवास्राःआत्मज्ञानादनंतरं ५

आ०७०

अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति यथोक्तेज्ञानिनम भिनंद विज्ञानीतियतो सौ ज्ञानेन मां धारयति ३ तस्य ज्ञानं स्तौति तपइति अ
लमत्यर्थं ज्ञानस्य कलयालेशेन ४ ज्ञानेन सहितं तत्स्पष्टं तम्भथा भवति तथाह त्वंतत्संपन्नात्म सौ मामेव भज आन्यात्सर्वेत्यर्जुनत्य
र्थः ५ तस्य प्रत्ययार्थं पूर्वेषांवृत्तमाह ज्ञानेति मामेव संसिद्धिं प्राप्ताः ६ तदेवज्ञानं संक्षेपतनुपदिशति त्वयीति त्रिविधः आध्या
त्मिकादि विकारो देहादिः सामायानेतु परमार्थो यतो यस्मात् अंतराम ध्यापवापत्ततिरजसर्पमालादिवत् नाद्यपवर्गयोः
नैवांदांवतेचास्ति अतः यत यदा अस्य विकारस्यामीजन्मादयः स्युः तदात स्यत्तवाधिष्ठानभूतस्यकि न किंचिदित्यर्थः त

ज्ञानविज्ञानसंवृद्धाः पदं श्रेष्ठं विदुर्मम ज्ञानी प्रियतमोः तोमेज्ञानेनासौ विभर्तिमाम् ३ तपस्तीर्थं जपो दानं
पवित्राणीतराणि च नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मान
मुद्धव ज्ञानविज्ञानसंपन्नो भजमां भक्तिभावितः ५ ज्ञानविज्ञानयोगेन मामिष्ट्वात्मानमात्मनि सर्वयज्ञ
पतिं मांवै संसिद्धिं मुनयोगमन् ६ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतराः पतति नाद्यपवर्गयो
र्यत् जन्मादयोस्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोस्ति तदेव मध्ये ७ उद्धव उवाच ज्ञानविशुद्ध
विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ८

नतु भगवन्नेतेषां सन्न्या
सिनां चे समासात्ते
सं लारि प्रयासका
तिरिसारायि ...

यदीतं

स्यापि वस्तुतो न संतितस्यास त्वादित्याह आद्यंतयोरिति असतः सर्पादेः आद्यंतयोर्यदस्ति रज्वादि तदेव मध्येः पिनतु
सर्पादि तद्वदयं विकारो नास्तीत्यर्थः यद्वा आद्यंतयोर्यदस्ति तन्मध्येऽप्यस्त्येव नतस्यजन्मादयः संति अतस्त्वं निर्विकारब्र
ह्मेति ७ ज्ञानादविशेषजिज्ञासुः पृच्छति ज्ञानमिति विशुद्धमेतत् ज्ञानं विपुलं निश्चितं यथा भवति तथा कथयेति मह
द्भिर्ब्रह्मादिभिर्विमृग्यं ८

ननु भवतु ज्ञानमेवतत्किं योगेन किं

ननु ज्ञानत्त्वयोः दृष्टयोः धर्मकथनं मनुष्य
पाप्यमद्विषयमनुकरोतीति चेत्तत्राह गीति १

महेहि मेर्गुणैस्त्वम भिनेयेनाह तापत्रयेणाभिनाहतस्य अतः संतप्यमानस्य अंघ्रिद्वंद्वमेवातपत्रं तस्मात् नकेवलमातपत्रात् किंतु अम
तमेणाभिनावर्षेतियस्मात् एवं अनिर्रूपामुत्पादयन्नाह दृष्टमिति अस्मिन्विले संसारकूपे पतितानत्र कालाहिनादष्टं एवमपिक्षुद्र
सुखेषु वतरूत्तर्षस्तस्मायस्यतं दह्यमानः कथं समुद्धरणीयइति चेत्तत्राह आपवर्ग्यः अपवर्गबोधकैः वागमृतैरासिंचेति १० नह्रिश्या
सार्थं विद्वन् सभायानिर्णीतमहं वक्ष्यामीत्याह इत्थमिति ११ ज्ञानादिभिरूपबृंहितान् तत्सहितानित्यर्थः १३ तत्र ज्ञानं कथयतिनवे

तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश पश्यामिनान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् एवं
दष्टंजनं संपतितं बिलेऽस्मिन् कालाहिनाक्षुद्रसुखोरुतर्षं समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंचमहानुभाव १०
श्रीभगवानुवाच इत्थमेतत्पुराराजा भीष्मं धर्मभृतांवरं अजातशत्रुः पप्रच्छ सर्वेषांनोऽनुशृण्वतां ११ निवृत्ते
भारते युद्धे सुहृन्निधनविह्वलः श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत १२ तानहं तेभिधास्यामि देवव्रतमु
खाच्छ्रुतान् ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् १३ नवैकादशपंचत्रीन्भावान्भूतेषु येनवै ईक्षे
ताथैकमप्येषु तज्ज्ञानं ममनिश्चितम् १४

तिप्रकृतिपुरुषमहदहंकारपंच वक्ष्यामीत्याह तन्मात्राणि एकादशेंद्रियाणि पंचमहाभूतानि त्रयोगुणाः एतान् भा
वानष्टाविंशतितत्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येषु अनुगतानि येनज्ञानेनक्षेत अथ एषु अपि भावेषु एकं परमा
त्मतत्वं अनुगतं येन क्षेत कार्यकारणात्मकं जगत्पश्यन् परमकारणात्मकमेवेक्षेत ननु ततः पृथगिति येन पश्येत् तज्ज्ञा
नमित्यर्थः १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विज्ञानमाह एतदेवेति श्लोकोद्धेन यत् यदा येनैकेनानुगतानेकात्मका भावान् पूर्वमेक्षत तानुत्तथापूर्ववन्नेक्षेत किंतु तदेकं परमका
रणं ब्रह्मैव तदा एतदेव विज्ञानमुच्यते एतदुक्तं भवति परोक्षज्ञानेनापरोक्षभ्रमस्य दि ज्ञोहादि प्रपंच निवृत्य भावान्तदा जगत् दि २
स्य तन्नष्पात्मनः पृथक् सदिति मन्यते अपरोक्षज्ञानेनानुबाधितमेव जीवन्मुक्तः संस्कारशेषं पश्यति ततः परं न पश्यति च अतः
परोक्षज्ञानेन विज्ञानशब्दाभ्यामुच्यते इति १५ एकेन सर्वकार्याणामनुगतिः कार्याणां कारणात् पृथक् सत्त्वं चोपपादयति सार्द्धे
न तत्र यदि न कदाचिदनीदृशं जगदित्यादिमतेनैतेषां भावानामुत्पत्त्यादयो न स्युः न हि कारणस्यैकस्याभावादेकात्मता
मिथ्यात्वं च न स्यात् अत एषामुत्पत्त्यादीन्साधयति स्थितीति त्रिगुणात्मनां सावयवानामित्यर्थः विमता भावा उत्पत्त्या का २
दिमन्तः सावयवत्वात् घटादिवदिति प्रपश्येत् ततः आदावुत्पन्नो अंते परिणामान्तरापत्तौ च कारणत्वेनामध्यवाश्रयत्वेन

एतदेव हि विज्ञानं नतैकेन येन यत् १५ स्थित्युत्पत्त्याप्ययान्पश्येद्भावानां त्रिगुणात्मनां आदावंते च मध्ये च
सृज्यात्सृज्यं यदन्वियात् पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् १६ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्ट
यं प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते १७ राम राम राम राम राम राम राम राम

सृज्यात्सृज्यं कार्यात्कार्यान्तरं प्रतिपदिन्वियात् अनुगच्छेत् तत्प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव सदिति पश्ये
दित्यर्थः १६ वैराग्यमाह श्रुतिरिति द्वाभ्यां श्रुतिः नेह नानास्ति किंचनेत्यादि प्रत्यक्षं पटादि कार्यं तत्त्वादि व्यतिरेकेणादृश्यमानं चेत
न्यव्यतिरेकेण च न किंचिद्दृश्यत इति ऐतिह्यं महाजनप्रसिद्धः अनुमानं विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यादि एवं प्र
माणचतुष्टयं एतेष्वनवस्थानात् एतैर्बाधितत्वात् स एवं सर्वानुगतं सत्यमात्मतत्त्वं पश्यन् विकल्पस्य च मिथ्यात्वात्ततो विरज्य
ते विरक्तो भवतीत्यर्थः १७

न २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नचैवेदाकस्वर्गादिसुखाशयानविरज्येतेत्याह कर्मणामिति आविरिंच्यात् ब्रह्मलोकपर्यंतं अदृष्टमपि सर्वं अमंगलं दुःखरूपं नश्वरं
चपश्येत् १८ भक्तियोगंसकारणमाह भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन् प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि १९ श्रद्धा श्रव
णादरः शश्वदिति सर्वत्रानुषज्यते मदनुकीर्तनं श्रवणानंतरं सत्कथाख्यानमित्यर्थः २० १ अंगचेष्टा लौकिकी क्रिया वचसा लौ
किकेनापि मद्गुणनामोरणं कथनं २१ मदर्थं मद्भजनार्थं तद्विरोधिनोऽर्थस्य परित्यागः भोगस्य तत्साधनस्य चंदनादेः सुख

कर्म्मणां परिणामित्वादाविरिंच्यादमंगलं विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् १८ भक्तियोगः पुरैवोक्तः
प्रीयमाणाय तेऽनघ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं १९ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनं
परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्य्यायां सर्व्वांगैरभिवंदनं मद्भक्तपूजाभ्यधि
का सर्वभूतेषु मन्मतिः २१ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं मय्यर्पणं च मनसः सर्वकामविवर्जनं २२
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः २३ एवं धर्म्मैर्मनुष्याणामुद्धवा ९६
त्मनिवेदिनां मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्याऽवशिष्यते २४ यदात्मन्यर्पितं चित्तं शांतं सत्वोपबृंहितं
धर्म्मं ज्ञानं सवैराग्यमैश्वर्य्यं चाऽभिपद्यते २५

स्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः २३ भक्तिः प्रेमलक्षणा संजायते अ
स्य भक्तिस्य अन्यः कोऽर्थः साधनरूपः साध्यरूपो वाऽवशिष्यते सर्वोपि स्वत एव भवतीत्यर्थः २४ तदेवाह यद्वा किं बहुना
चित्तमेवांतर्बहिर्निष्ठमर्थानर्थयोः कारणमित्याह यदात्मनीति द्वाभ्यां यदा आत्मनि मयि ईश्वरे चित्तमर्पितं तदा पुमान्
धर्मादीन् प्राप्नोत्येव २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए. एतेद्वव्यतिरेकेणद्रष्टयति यत् यदाचित्तंविकल्पेदेहेगृहादौवर्पितंसत्परिधावतितदाधिकंरजस्वलमसंनिष्ठंचभवति ततश्च
विपर्ययंश्रधर्मादिकंविद्धि २६ स्वामिप्रनानृधर्मादीन्याचेष्टधर्मोमक्कीर्तिकृत्वुततः सार्वेप्रानिः प्रकृष्टउक्तोः शास्त्रेषु २०
धर्मादीनामद्भुतनप्रसिद्धानामन्यथाव्याख्यानवाद्यमादिष्वपिसंख्यातः स्वरूपतोवाकिंचिह्रलक्षणंस्यादितिसंभावन.

यदर्पितंतद्विकल्पइंद्रियैःपरिधावति रजस्वलंवाऽसन्निष्ठंचित्तंविद्धिविपर्ययं २६ धर्मोमद्भक्तिकृत्प्रोक्तो
ज्ञानंचैकात्म्यदर्शनं गुणष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः २० उद्धवउवाच यमःकतिविधःप्रोक्तो
७० नियमोवारिकर्षन कःशमःकोदमःकृष्णकातितिक्षाधृतिःप्रभो २८ किंदानंकिंतपःशौर्यंकिंसत्य
मृतमुच्यते कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षिणा २९ पुंसःकिंस्विद्बलंश्रीमन्भगोलाभश्चकेश
वकाविद्याह्रीःपराकाश्रीःकिंसुखंदुःखमेवच ३० [illegible] कःपंडितःकश्चमूर्खःकःपंथाउ
त्पथश्चकः कःस्वर्गोनरकःकःस्वित्कोबंधुरुतकिंगृहं ३१ कआढ्यःकोदरिद्रोवाकृपणःकःकईश्वरः एता
न्प्रश्नान्ममब्रूहिविपरीतांश्चसत्पते ३२ श्रीभगवानुवाच अहिंसासत्यमस्तेयमसंगोह्रीरसंचयः आ
स्तिक्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाऽभयं ३३ शौचंजपस्तपोहोमःश्रद्धातिथ्यंमदर्चनं तीर्थाटनंप
रार्थेहातुष्टिराचार्यसेवनं ३४ टी
यानद्विशेषजिज्ञासुःपृच्छतियमइतिपंचभिः २८ इष्टंअभ्यर्हितंधनंचकिं २९ परेतिविद्यादीनांविशेषणं।श्रीमेंडनं ३० १ ७०
प्रश्नान्पृष्टानर्थान्विपरीतानृअशमादीन् ३२ यमनियमानाह अहिंसेतित्रिभिः अस्तेयंमनसाऽपिपरस्वाग्रहणंआ
स्तिक्यंधर्मविश्वासः ३३ शौचंबाह्यमाभ्यंतरंचेतिद्वयंअतोद्वादशनियमाः श्रद्धाधर्मादरः ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उभयोः श्लोकयोर्यःस्मृताः तेयमानियमाश्च यद्वाउभयोः प्रवृत्तनिवृत्तयोः मुमुक्षोर्यमा मुख्याः सकामस्य नियमा मुख्याः स्मृता
इत्यर्थः अत्रहेतुमाह हियस्मात् उपासिताः सेविताः संतः पुंसांप्रवृत्तानां निवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं
चदुहंतीति ३५ मुमुक्षोरनुपादेयान् शमादीन् हेयांश्च दुःखादीन्महाजनप्रसिद्धेभ्योविलक्षणानाह शमइत्यादिनायावत्समाप्ति
एतेनवक्तद्विपरीताश्च शमादयोऽप्यनुज्ञेयाः शमो मन्निष्ठता बुद्धेः नतु शांतिमात्रं दम इंद्रियसंयमः नचौरादिदमनं तितिक्षाविहि

एते यमाः सनियमा उभयोर्द्वादश स्मृताः पुंसामुपासितास्तात यथाकामं दुहंति हि ३५ शमो मन्निष्ठ
ता बुद्धेर्दम इंद्रियसंयमः तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ३६ दंडन्यासः परं दानं काम
त्यागस्तपः स्मृतं स्वभावविजयः शौर्यं सत्यं च समदर्शनं ३७ अन्यच्च सूनृता वाणी कविभिः परि
कीर्तिता कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ३८ ऋतं

तद्दुःखस्य संमर्षः सहनं न भारादेः जिह्वोपस्थयोर्जयो वेगधारणं धृतिः न त्वनुद्वेगमात्रं ३६ दंडो भूतद्रोहः तस्य त्या
गो दानं न धनार्पणं कामत्यागः भोगापेक्षा तपः न कृच्छ्रादि स्वभावो वासना तस्य जयः प्रतिबंधः शौर्यं न विक्रांतिः
समं ब्रह्म तस्य दर्शनं मालोचनं सत्यविषयत्वात् सत्यं न यथार्थभाषणमात्रं ३७ अन्यच्च ऋतमित्युक्तं सूनृता सत्या प्रिया च ऋ२
वाक् एवं ऋतसत्ययोः स्फुटएव विवेकः कर्म प्राप्तं त्यागं व्याख्यातुमादौ तत्तौ भिदे न शौचं त्याचेष्टतस्यापि मलत्या र्थ२
गरूपत्वेन त्यागादभेदप्रतीतेः कर्मसु असंगमः अनासक्तिः शौचं त्यागस्तु संन्यास इति तयोर्भेद इत्यर्थः ३८ राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० नृणामिष्टं धनं धर्मः न पश्वादि साधारणं भगवत्तमः परमेश्वरोऽहमेव यज्ञः मद्बुध्या यज्ञोऽनुष्ठेयः न त्वक्रियाबुद्ध्येत्यर्थः यज्ञार्थदानं
दक्षिणा सा च ज्ञानोपदेशः न हिरण्यादिदानं तेन हि यज्ञरूपो विष्णुः प्राप्यते दुर्दमं मनं चलं तच्च मनोदमनहेतुत्वात् प्राणा
याम इति तथा लोकप्रसिद्धं वा नि[illegible] ३८ लाभं व्याचिख्यासुः प्रथमं भगं तत्तो भेदेन व्याचष्टे लोके तयोरभेदप्रसिद्धेः भगो
भाग्यं तच्च मे ऐश्वरो भावो मदीयमैश्वर्यादि षाड्गुण्यमित्यर्थः उत्तमो लाभः मम भक्तिः न पुत्रादिः विद्या चात्मनि प्रतीतस्य भे
दस्य बाधः न ज्ञानमात्रं अकर्मसु जुगुप्सा ह्रीः न तु वदने ह्रीः न लज्जामात्रं गुणा एव श्रीर्मंडनं न किरीटादि दुःखसुखयो
रत्ययः अतिक्रमः अननुसंधानं सुखं न भोगः विषयभोगापेक्षैव दुःखं नाग्निदाहादि बंधन्मोक्षं हृदयं वा यो वेत्ति सं पं ३

धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ३८ भगो म ऐश्वरो भावो लाभो
७१ मद्भक्तिरुत्तमः विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ४० श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः ११
दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ४१ मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः स्मृतः उत्पथश्चि
त्तविक्षेपः स्वर्गः सत्वगुणोदयः ४२ नरकस्तमउन्नाहो बंधुर्गुरुरहं सखे गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्य
ते ४३

तः न वित्तमात्रं ४१ अहंबुद्धिरित्युपलक्षणं देहगेहादिष्वहं ममेत्यभिमान[illegible]वानूमूर्ख इत्यर्थः मन्निगमः मां मिलितां गं
मयति प्रापयतीयो निर्वृत्तिमार्गः स तु पंथाः सन्मार्गः न कंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः राम
न तु चौराद्याकुलः सत्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ४२ तमस उन्नाह उद्रेकः नरकः न तामिस्रादिः ७२
गुरुरेव बंधुर्न भ्रात्रादिः स चाऽहमेव यथाहं जगद्गुरुः एक एव परो बंधुर्विषमे समुपस्थिते गुरुः सकलधर्मात्माप
रः किंचन गोहरिरिति स साधनं भोगायतनं गृहं तच्च मानुष्यं मानुषरूपं शरीरमेव न हर्म्यादि गुणैः संपन्न आढ्य उ
च्यते न धनी ४३

वं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असंतुष्टोयः सदरिद्रः न निःस्वः योऽजितेंद्रियः सकृपणः शोच्यः न दीनः विषयेष्वनासक्तधीर्यः सईशः स्वतंत्रः न राजादिः गुणासंगः गुणेषु संगो
यस्य सः विपर्ययः अनीशः एतच्च शमादिविपर्ययोपलक्षणार्थं ४४ उपसंहरति एतइति साधुमोक्षोपयोगितया एतच्च सर्वं गुणदोषयुवि
न३ वेकाबायाद्भवन्तुष्टमितिर्यासंक्षिपतोल्लक्षणमाहाकिंबहुनावर्णितेन गुणदोषयोर्ल्लक्षणमेतावदेव नचात्र गुणदोषयोर्हि दृशि दर्शनं दोषः मुमु गुण
क्षोस्तु उभयदर्शनवर्जितः स्वभाव इति ४५ एकादशएकोनविंशः विशेयोगत्रयंप्रोक्तं भक्तिज्ञानक्रियात्मकं गुणदोषव्यवस्थार्थ
मधिकारिविभागतः गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितइत्युक्तं तदाक्षिपति विधिश्च प्रतिषेधश्चेतीश्वर श्र

दरिद्रो यस्त्वसंतुष्टः कृपणो योऽजितेंद्रियः गुणेष्वसक्तधीरीशो गुणसंगो विपर्ययः ४४ एत उद्धव ते प्रश्नाः
सर्वे साधु निरूपिताः किं वर्णितेन बहुनाल्लक्षणं गुणदोषयोः गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ४५
इति श्रीभागवते महापुराणे एकादशस्कंधे एकोनविंशोऽध्यायः उद्धव उवाच विधिश्च प्रतिषेधश्च निगमो हीश्व
रस्य ते अवेक्षतेऽरविंदाक्ष गुणं दोषं च कर्मणां १ वर्णाश्रमविकल्पं च प्रातिलोमानुलोमजं द्रव्यदेशवयः
कालान्स्वर्गं नरकमेव च २

स्यत्तव निगम आज्ञारूपो वेदः स च विधेयानां प्रतिषेध्यानां च कर्मणां गुणदोषं च पुण्यपापरूपमवेक्षते १ उत्तमाधमभा फल१
वेन तदधिकारिणा वर्णानामाश्रमाणां विकल्पं भेदं च गुणदोषरूपमवेक्षते प्रतिलोमानुलोमजं च गुणदोषं तथैवा
वेक्षते प्रतिलोमजाः उत्तमवर्णासु स्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः अनुलोमजास्तूत्तमवर्णेभ्यः पुरु
षेभ्यो हीनवर्णासु स्त्रीषु जाताः मूर्द्धावसिक्ताम्बष्टादयः तेषां च असत्सत्तत्त्वेन विज्ञेयाः प्रतिलोमानुलोमजा इति गुणदोषौ द्र
व्यादीन् कर्मोहीनोनहेतोभ्यः स्वर्गं नरकं च तत्फलतया गुणदोषमेवावेक्षते एतच्चोत्तराध्यायप्रपंचयिष्यते २ श्रीराम

हृप१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० तथाऽपि प्रसक्तेति किमायातं अत आह गुणदोषेति । गुणदोषदृशिर्दोष इति निराकृतत्वात् गुणदोषभिदादृष्टिमंतरेण तां विना निषेधविधिलक्षणं क
वे२ मैकांडं तद्वचः कथं तद्वचोऽन्तरेण निःश्रेयसं कथं स्यात् तत्रापि श्रोतव्यो मंतव्य इत्यादि साधनविधेः नानुध्यायेद्बहून् शब्दान् वाचो विग्ला
दा२ पनं हि तदित्यादि निषेधस्य चावश्यकत्वादिति भावः यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणं तद्वचो विनेति सामानाधि
कारण्यमेवाऽस्तु यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणमपि वचः कथं नु तत्त्वमस्यादिवाक्यवत् निःश्रेयसप्रदं स्यात् म१

गुणदोषभिदादृष्टिमंतरेण वचस्तव निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ३ पितृदेवमनुष्याणां
वेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ४ गुणदोषभिदादृष्टिर्निगमात्ते
७२ न हि स्वतः निगमेनापवादश्च भिदाया इति ह भ्रमः ५ श्रीराम श्रीराम श्रीराम श्रीराम

सर्वस्य वेदस्य तत्परत्वांगीकारादित्यर्थः ३ ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो द्रष्टारो मनुष्याश्च कथयिष्यंतीत्यत आह ।
पित्रादीनां सर्वेषां तव वचनात्मको वेद एव तु श्रेयः श्रेष्ठं चक्षुः प्रमापकं किंतु अनुपलब्धेऽर्थे मोक्षस्वर्गादौ च तथा साध्य
साधनयो इदमस्य साध्यं इदमस्य साधनमित्यत्रापि तदेवं गुणदोषदृष्ट्यभावे निःश्रेयसं न घटते ४ किंच शास्त्रेणैव विहि राम
तां भेददृष्टिं तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्यत इति निगमात् वेदाज्ञारूपाद्धेतोरेव न हि स्वतः यस्मादर्थप्राप्तं वन ७२
निवर्तेत ह स्फुटं भ्रमो भवति तं निवर्तयेदिति शेषः ५ राम राम राम राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विषयो भेदः प्याधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह योगा इति योगा उपायाः ब्रह्म कर्म देवताकांडे प्रोक्ताः कर्म च निष्कामं श्रेयोविधित्सया मोक्षसाधनेच्छया अन्य उपायो नास्तीति काम्यकर्मादिकं व्यावर्त्तयति तथा चोत्तराध्याये स्फुटीकरिष्यति यतो नित्यादिना ६ तेष्वधिकारिभेदमाह निर्विण्णानामिति द्वाभ्यां इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुध्या तत्फलेषु विरक्तानां अत एव तत्साधनभूतकर्मन्यासिनां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानां अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ७ यदृच्छया केनापि भाग्योदयेन

श्रीभगवानुवाच योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ६ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां ७ यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ८ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ९ स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् १० श्रीराम श्रीराम श्रीराम श्री

तत्र काम्यकर्मसु प्रवर्त्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्याये वक्ष्यति निष्कामकर्मयोगाधिकारिणस्तु यथाशक्ति स च ज्ञानभक्तियोगाधिकारात्प्रागेव तदधिकृतयोस्तु स्वल्पः ताभ्यां सिद्धानां तु न किंचिदिति ८ सावधिं कर्मयोगमाह तावदिति नवभिः कर्माणि नित्यनैमित्तिकानि यावता यावत् ८ कर्मयोगिनो ज्ञानभक्तिभूमिकारोहप्रकारमाह स्वधर्मस्थ इति अनाशीःकामः अफलकामः अन्यत् निषिद्धं नरकयोनिहेतुः ध्येयं विहितानतिक्रमाद्वा निषिद्धाचरणाद्वा ॥ अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं न याति अफलकामत्वाच्च स्वर्गमपीत्यर्थः १० राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतु अस्मिंल्लोके अस्मिन्नेव देहे अनघः निषिद्धत्यागी अतः शुचिः निवृत्तरागादिमलः यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभत्वं
द्योतयति ११ अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौति स्वर्गिणोऽपीति निरयिणश्चेति दृष्टांतत्वेनोक्तेर्ज्ञानभक्तिभ्यां ज्ञान
भक्त्योः तदुभयं स्वर्गिनारकिशरीरं १२ अतो नरः स्वर्गतिं न कांक्षेत् नारकीमिति दृष्टांतः यद्वा स्वर्गे नरके साधनकर्माणि न कुर्या
दित्यर्थः अस्यातिश्रेष्ठत्वात्पुनरपि मनुष्यो भवेयमित्यपि न कांक्षेत यतो देहावेशात् देहाशैन्यात्स्वार्थे प्रमाद्यति अवधान
शून्यो भवति १३ अपि तु एतत् देहं साधकमिति विद्वान् तस्यार्थसिद्धिदमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनासक्तः सन्मृत्योः पू

अस्मिंल्लोके वर्त्तमानः स्वधर्मस्थोऽनघः शुचिः ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ११ स्वर्गिणोऽप्येतमिच्छं
ति लोकं निरयिणस्तथा साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं १२ न नरः स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणः १३ ने
मं लोकं च कांक्षेत देहावेशात्प्रमाद्यति १३ एतद्विद्वान्पुरा मृत्योरभवाय घटेत सः अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थ
सिद्धिदं १४ छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १५ अहोरात्रैः
छिद्यमानं बुद्ध्वायुर्भयवेपथुः मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति १६ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सु
कल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा १७ राम राम

र्वमेव मोक्षाय घटेत यत्नं कुर्यात् १४ अप्रमत्तो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टांतः छिद्यमानमिति यमैः यमवन्निर्दयैः पुरुषैः
कृतनीडं यस्मिन् तं स्वकेतं स्वस्याश्रयं अलंपटः अनासक्तः १५ दार्ष्टांतिकमाह अहोरात्रैः छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः राम
कंपो यस्य सः १६ एवमप्रयतमानं प्रमत्तं निंदति नृदेहमिति प्लवं नावं प्राप्य तत्प्राप्याहारः यो भवाब्धिं न तरेत् स आत्महा अत्र हेतवः ७३
आद्यं सर्वफलानां मूलं एतत्तु प्राप्तिकर्मभिः सर्वप्राप्त्यः किंच सुदुर्लभं तु यत्नकोटिभिरपि प्राप्तुमशक्यं तथापि सुलभं य
दृच्छया लब्धत्वात् तत्रैव सुकल्पं पटुतरं किंच गुरुः संस्थितमात्र एव कर्णधारो नेता यस्य तं मया च स्मृतमात्रेणानुकूलेन मारुतेन
प्रेरितं १७

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तावद्विरक्तस्य वैराग्यद्वारा ज्ञानं भक्तिसाधनं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तत्र स्वयं चाज्ञानप्राप्तेः पूर्वं किंचित्कर्त्तव्यं वक्त-
नीयं चाह सोद्विग्नं भवभिः यदारंभेषु कर्मसु निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्तश्च तदा संयतेंद्रियः सन् आत्मनो-
भ्यासेन आत्मविषयतः तिसंततया अचलं यथा भवति तथा मनो धारयेत् १८ तत्र प्रथममेवात्यंतधारणासंभवात् तत्त्वभावानु-
सारेण वशीकरणमाह यहि आशुभ्राम्यत्परिभ्रमदनवस्थितं भवति तदा अनुरोधेन किंचिदपेक्षापूरणद्वारेण १९ ननु तर्हि
यथापूर्वमेव स्यात् तत्राह मनोगतिं तु न विसृजेत् नापेक्षेत किंतु अप्रमत्तः सन् लक्षयेदित्यर्थः २० अनुरोधमार्गसदृष्टां

यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः अभ्यासेनात्मनो योगी धारयेदचलं मनः १८ धार्यमाणं मनो य-
र्हि भ्राम्यदाश्वनवस्थितं अतंद्रितोनुरोधेन मार्गेणात्मवशं नयेत् १९ मनोगतिं न विसृजेज्जितप्राणो जि-
तेंद्रियः सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् २० एष वै परमो योगो मनसः संग्रहः स्मृतः हृदयज्ञत्वम-
न्विच्छन् दम्यस्येवार्वतो मुहुः २१ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः भवाप्ययावनुध्यायेन्मनो
यावत्प्रसीदति २२

नेस्तोति एषः अनुवृत्तिमार्गेण मनसः संग्रहः परमो योगः तत्साधनत्वात् उपचारेण स्तुतिः यथा अदांतस्य दमनी-
यस्य अर्वतः अश्वस्य हृदयज्ञत्वं स्वाभिप्रायेण गतिमन्विच्छन् अपेक्षमाणः अश्वधारकः प्रथमं किंचिन्न क्षतिमनु-
यन्नेन तदाचरश्मिनातं घृत्वैवाच्छतिनानुपेक्षतेतत्तद्वदित्यर्थः २१ एवमीषद्वशीकृतस्य मनसोऽत्यंतनैश्चल्योपा-
यानाह सांख्येनेति त्रिभिः सांख्येन तत्त्वविवेकेन सर्वभावानां महदादिदेहांतानां अनुलोमं जडप्रकृत्यादिक्रमे- ना॰ २
ण भवं प्रतिलोमतः पृथिव्यादिक्रमेणाप्ययं च अनुध्यायन् प्रसीदति निश्चलं भवति २२ राम राम राम रा

न्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० ततश्चागमापायिषु तेष्ववधिभूतात्मदर्शनात् तद्विवेकापन्नसंस्कारेण निर्विण्णस्य अतो विरक्तस्य अत एवोक्तवेदिनः गुरूपदिष्टार्थालो
चकस्य ततो गुरूपदिष्टस्यैव चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति २३ किंच यमादिभिर्योगमार्गैः
म २ आन्वीक्षिक्या पदार्थदृश्या शोधनेन ममार्चनेन ध्यानादिभिर्वा वाशब्देनास्य पक्षस्य स्वातन्त्र्यं दर्शयति एतैरुपायैर्योग्यं परमात्म
नि मनः स्मरेत् नान्यैः अतोऽन्यत्न कुर्यादित्यर्थः २४ ननु पापापत्तौ प्रायश्चित्तं कार्यमेव तत्राह यदीति योगेन ज्ञानाभ्यासेनैव एतच्च
भक्तस्यापि नामकीर्त्तनाद्युपलक्षणार्थं नान्यत् कृच्छ्रादि २५ ननु नित्यनैमित्तिककर्मसु साधकत्वाद्गुणः हिंसादिकं च अशु

निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः मनस्त्यजति दौरात्म्यं चिंतितस्यानुचिंतया २३ यमादिभिर्योगपथैरा
न्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः २४ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हि
तं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २५ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः कर्मणां जात्य
७५ शुद्धानामनेन नियमः कृतः गुणदोषविधानेन संगानां त्याजनेच्छया २६ श्रीराम श्रीराम श्रीराम

द्धिहेतुत्वाद्दोषः तत्र च तन्निवर्त्तकत्वात् कृच्छ्रादिप्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात्प्रायश्चित्तं विना योगेनैव कथं पा
दहेद २ पं दहेत् तत्राह स्वे स्व इति सार्द्धेन स एव गुणो नेतरः तदुपपादयति यस्माद्विधिनिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां
नियमः संकोचः कृतः कुत इत्यत आह जात्या तु स्वत एवाशुद्धानां सहजप्राप्तानां संगानां त्याजनेच्छया अयं भावः पुरुष
स्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते अत इदं राम
न कर्त्तव्यं इदमेव कर्त्तव्यं इदमेव मित्येवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते यथोक्तं न प्रवृत्तिपरो वेद ७५
स्तथान्तराध्यायिचक्ष्मामः ते त्वत्येव हि काममित्यादिना अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादि विधि
गोचरत्वमिति २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु उद्विग्नः ननु तत्फलेषु विरक्तो
नेत्याह वेदेति यद्यपि वेद तथापि तत्परित्यागे अनीश्वरः अशक्तः २७ एवंभूताय सश्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढ
निश्चयः सन् ततः तदनंतरं मां प्रीत्या भजेत विषयासक्तो सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह गर्हयन्निति २८ कथं भजे
त किं वा तस्य भवति तदाह प्रोक्तेनेति द्वाभ्यां श्रद्धा मत्कथायां मे शश्वन्मदनुकीर्तनमित्यादिना तत्र तत्रोक्तेन मा

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः २७ ततो भजेत मां प्रीतः श्रद्धा
लुर्दृढनिश्चयः जुषमाणश्च तान्कामान् दुःखोदर्कांश्च गर्हयन् २८ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः कामा
हृदय्या नश्यंति सर्वे मयि हृदि स्थिते २९ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि मयि दृष्टेऽखिला
त्मनि ३० तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ३१ यत्कर्मभिर्यत्तप
सा ज्ञानवैराग्यतश्च यत् योगेन दानधर्मेण श्रेयोभिरितरैरपि ३२ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंऽजसा स्वर्गा
पवर्गं मद्धाम कथंचिद्यदि वांछति ३३ राम राम राम राम राम राम राम राम राम

असकृत् निरंतरं भजतः हृदय्याः हृद्गताः कामा नश्यंति २९ हृदयमेव ग्रंथिः अहंकारः तत्पूर्वका अ सर्वे संशया असंभावनाद
यः कर्माण्यनारब्धफलानि संसारहेतुभूतानि ३० तदेवं व्यवस्थया अधिकारत्रयमुक्तं तत्र च भक्तेरन्यनिरपेक्षत्वादन्यस्य च
तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य श्रेयः साधनं ३१ तत्र
हेतुः यत्कर्मभिरित्यादि इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भवत्यस्ति तत्सर्वं ३२ अंजसा अनाया
सेन चान्यत्स्वर्गमपवर्गं मद्धाम च वैकुंठं च भक्त एव वांछा तु नास्तीत्युक्तं यदि वांछतीति ३३

तस्य २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० तत्र हेतुमाह नकिंचिदिति धीराः धीमंतः एकांतिनः मय्येव प्रीतियुक्ताः अतो मया दत्तमपि न गृह्णंति किं वक्तव्यं न वां
छंतीत्यर्थः अपुनर्भवं आत्यंतिकमपि कैवल्यं ३४ तदुपपादयति नैरपेक्ष्यमेव परं उत्कृष्टं अनल्पकं महत् निःश्रेयसं फलं
२० तत्साधनं च प्राहुः मे भक्तिं निराशिषः प्रार्थनाशून्यस्य प्रार्थनाकारणभूतापेक्षारहितस्य पुंसो भवेत् यद्वा मे निरपेक्षस्य
याभक्तिः सा निराशिषा भवेदित्यर्थः ३५ अनेन च प्रकारेण सिद्धानां गुणदोषादिनिविरोधपरिहारमुपसंहरति न मयीति २२
टी० गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः साधूनां निरस्तरागादीनां अतः समचित्तानां अतएव बु

नकिंचित्साधवो धीरा भक्ता ह्येकांतिनो मम वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ३४ नैरपेक्ष्यं परं प्रा
हुर्निःश्रेयसमनल्पकं तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ३५ न मय्येकांतभक्तानां गुणदोषो
द्भवा गुणाः साधूनां समचित्तानां बुद्धेः परमुपेयुषां ३६ एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः
७१ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ३७ इति श्रीभागवते महापुराणे एकादशस्कंधे विंशतितमोऽध्या
यः

द्धेः परमीश्वरं प्राप्तानां ३६ काम्यकर्मनिष्ठानि दिष्ट्यैतान्मुक्तिमार्गानुपसंहरति एवमिति मे पथः मत्प्राप्त्यु स्क
पायान् ये अनुतिष्ठंति ते क्षेमं कालमायादिरहितं मम लोकं विंदंति यत्परं ब्रह्म तच्च विदुः ३७ इत्येकादशे विंशः ७१
जयति स्वपरानंदः परानंदनृकेसरी यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती इक्षंतामिच्छया संतः क्षमंतां मम
साहसं मयाहि स्वीयबोधाय कृतमत्र न संशयः २ एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणां कामिनां द्रव्यदेशा
दिगुणदोषाः प्रपंचिताः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तं तत्र च ज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ साधकानां तु प्रथमं तावन्नित्यनैमित्तिककर्मनिष्ठानां यथाश
क्ति नित्यनैमित्तिककर्म सत्त्वशोधकत्वाद्गुणः तदकरणं निषिद्धकरणं च तन्मलोत्पत्तिकारणत्वाद्दोषः तन्निवर्तकत्वाच्च प्रायश्चि
त्तं गुणः विशुद्धसत्त्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वाद्गुणः भक्तिनिष्ठानां पुनः श्रवणकीर्त्तनादिभक्तिरेव गुणः
तद्विरुद्धं सर्वमुभयेषां दोष इत्युक्तं इदानीं ये तु न सिद्धा नापि साधकाः किंतु केवलं काम्यकर्मप्रधानास्तेषां सकलगुणदोषान्प्रपं
चयिष्यन् आदौ तानतिवहिर्मुखान्निंदति य एतानिति मत्पथः मदुक्तमार्गान् क्षुद्रान् तुच्छान् चलैः अस्थिरैः प्राणैर्देहवायु
भिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति निखिलगुणदोषभाक्त्वेन नानायोनीः प्राप्नुवंतीत्यर्थः १ ननु तैरेव कर्मभिः केचि

श्रीभगवानुवाच य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरंति
ते १ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः २ शुद्ध्यशुद्धी विधी
येते समानेष्वपि वस्तुषु द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ३ धर्मार्थं व्यवहारार्थं यात्रार्थमिति चान
घ दर्शितोऽयं मयाऽऽचारो धर्ममुद्वहतां धुरं ४

द्गुणदोषभाजः केचिन्न तिकुतो वैषम्यं न ह्यग्निना केचित्तप्यंते केचिन्नेति संभवति तत्राह स्वे स्व इति अधिकारभेदेन कल्पितौ गु
णदोषौ न वस्तुनिष्ठाविति भावः २ तदाह शुद्ध्यशुद्धी इति विचिकित्सार्थं योग्यमयोग्यं वेति संदेहद्वारा स्वाभाविकप्रवृत्तिसंकोचा
ग्यसे २ र्थमित्यर्थः तत्र शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे गुणदोषौ तन्निमित्तापादेयत्वानुपादेयत्वे शुभाशुभौ ते त्रिनिमित्तावर्थानर्थौ ३ तत्र शुद्ध्य
शुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धेनाधर्म इति गुणदोषौ व्यवहारार्थं अशुद्धावपि रागादीनां व्यवहारदर्शनाद्रूपादेयत्वेना
त्यादि तिशुभाशुभौ यात्रार्थं दोषत्वे प्यापन्नशरीरनिर्वाहमात्रोपादानेन न पापं अधिकोपादाने तु पापमिति मयाऽऽमन्वादि
रूपेण धर्मरूपां धुरं भारं कर्मजडानामित्यर्थः ॥४॥ राम राम राम राम राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०न०
शुद्ध्यशुद्धिप्रपंचयिष्यन्नेदोक्तत्वेन तदभिनिवेशो माभूदिति समानेष्वपि वस्तुष्विति यदुक्तं तत्प्रपंचयति भूमीनि त्रिभिः भूतानां प्राणि
नो धारयंतीति धातवः कारणानि शारीराः शरीरारंभकाः देहतः साम्यमुक्तं जीवतोप्याह आत्मसंयुताइति ५ धातुषु देहेषु नाम
रूपाणि चूर्णाश्रमादीनि कल्पनायाः प्रयोजनमाह एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्ति नियमद्वारा धर्मादिपुरुषार्थसिद्धये
६ नेकेवलं देहेष्वेव अपितु देशकालादि भावानामपि आदिशब्देनानुपादयानां फलं निमित्ताधिकारिणां ग्रहणं च सूनां उपादे स्मृ २
यानां व्रीह्यादीनामपि ममेमाया नियमार्थं संकोचार्थमित्यर्थः एवं गुणदोषविषयं परिशोधयन्नयोः शुद्ध्यशुद्धिमूलत्वात् शुद्ध्य

भूम्यंब्वग्न्यनिलाकाशा भूतानां पंच धातवः आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ५ वेदेन नामरूपा
विषमाणि २ णि समेष्वपि धातुषु द्धवकल्प्यंत एतेषां स्वार्थसिद्धये ६ देशकालादि भावानां वस्तूनां मम सत्तम गुणदोषौ
विधीयेते नियमार्थं हि कर्मणां ७ अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत् कृष्णसारोऽप्यसौवीरकीक
टासंस्कृतेरिणम् ८ कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा यतो निवर्त्तते कर्म स दोषोऽकर्मकः स्मृतः ९ स्त्री॥

७६ शुद्धिं प्रपंचयति अकृष्णसार इत्यष्टभिः देशानां मध्ये कृष्णमहरिणरहितोऽशुचिः तत्रापि अब्रह्मण्यः ब्राह्मणभक्तिशून्योऽत्यंत
मशुचिः कृष्णसारोऽपि कृष्णेन मृगेण सारः श्रेष्ठायः सोऽपि असौवीरः कीकटः सुवीराः सत्पुरुषाः तद्वान् सौवीराः कीकटोऽ
तदुक्तं २ पिशुचिः सैव पुण्यतमो देशः सत्पात्रं यत्र लभ्यतइति तदुक्तिंतीयः कीकटः अंगवंगकलिंगादिः असंस्कृतः संमार्जनादि शून्य
म्लेच्छ २ न्यः बहुलो वा ईरिणं ऊषरं एकचक्रावः तत्र अशुचितदन्यः शुचिरित्यर्थादुक्तो भवति ८ कालस्य शुद्ध्यशुद्धी दर्शयति कर्म राम
एयइति द्रव्यतः द्रव्यसंपत्त्या स्वतश्चापूर्वाह्णादिः कर्मण्यः स कालस्तस्मिन्कर्मणि गुणवान् यतः यस्मिन् द्रव्याल्लाभ ७६
नेचाराष्ट्रविप्लवादिना वाकर्म निवर्त्तते यस्तु तत्कादादशाहादिलक्षणोऽकर्मकः कर्मानर्हः स्मृतः स कालो दोषः अशुद्धइ
त्यर्थः स्त्री॥
श्ये १
कर्मार्हः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्त्रादीनां पात्रान्नानां द्रव्याणां शुद्धाशुद्धौ दर्शयति द्रव्यस्येति चतुर्भिः द्रव्येण तोयादिना शुद्धिः मूत्रादिना त्वशुद्धिः वचनेन शुद्धमशुद्धं
वेति संदेहे शुद्धमित्येवं रूपेण ब्राह्मणवचनेन शुद्धिः ८ विपरीतेनाशुद्धिः संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः अवघ्राणादि — विपरीतेनाशुद्धिः ३
नात्वशुद्धिः कालेन दशाहादिना नवोदकादेः शुद्धिः काले मेघोदकं ग्राह्यं वर्ज्यं तु त्र्यहमेव हि अकाले दशरात्रं स्यात्तत्तः शुद्धिर्वि
धीयते पर्युषितान्नादेरशुद्धिः अंत्यजाद्युपहतानां तडागादिकोदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी १० शक्त्याशक्त्या सूर्योपरागा
दिस्नानकाद्यौदेः शक्तान्प्रत्यशुद्धिः अशक्तान्प्रति शुद्धिः बुध्या पुत्रजन्मादौ दशाहाद्बहिर्ज्ञानेन शुद्धिः अंतर्ज्ञाने शुद्धिः सेमद्बुद्धाजी
र्णमलवहस्त्रादेः समृद्धं प्रत्यशुद्धिः दरिद्रं प्रति शुद्धिः तत्रापि विशेषमाह यदिति एतेन च द्रव्यवचनादयो द्रव्याशुद्धिद्वारा

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च संस्कारेणाथ कालेन महत्त्वाल्पतयाऽथवा १० शक्त्याशक्त्याथवा
बुद्ध्या समृद्ध्या च यदात्मने अयं कुर्वंति हि यथादेशावस्थानुसारतः ११ धान्यदार्वस्थितंतूनां रसतैजसच
र्मणां कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः १२

आत्मने यदयं कुर्वंतीति देशावस्थानुसारत एव यथा यथा वा कुर्वंति न सर्वतः तथा हि निर्भय एव देशो कुर्वंति न तु चोराद्याकुले — स्नानादिना
तथा रोगादिव्यतिरिक्ते युवाद्यवस्थायामेव कुर्वंति न बाल्य रोगाद्यवस्थायामिति तथा च स्मृतिः देशं कालं तथात्मानं द्रव्यं
द्रव्यप्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति ११ द्रव्यादिभिर्द्रव्यस्य शुद्धिरित्युक्ता तत्र वचनादिशुद्धिरेक
रूपैवाद्रव्यात्मिका शुद्धिर्बहुरूपेति तां प्रपंचयति धान्येति दारुलौकिके ग्रह चमसादि वा अस्थिगजदंतादि रसास्तैल
घृतादयः तैजसा सुवर्णादयस्तेषां पार्थिवानां च रथ्याकर्दम घटेष्टकादीनां यथायथं कालादिभिः शुद्धिः तत्रापि काको
त्यजाद्युपघातत्तारतम्येन देशकालावस्थाद्यनुसारेण एतैरन्यैश्च युतायुतैर्मिलितैः केवलैश्च कालस्य पुनर्ग्रहणं यु
तत्वप्रदर्शनार्थं १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पी० १ वाकूसा ना सन

अस्पृश्यस्पर्शे शुद्धिमुत्कालेपविषेयमाह यत्पात्रवस्त्रादि येनांते क्षणं क्षाराम्लोदकादिना गंधश्च लेपश्चापोहति त्यजति स्वगतेन च मललेपत्वात्प्रकृतिं स्वमेव रूपं भजते तत्तस्य तन्मृच्छौचं शोधकं यावता च तत्क्षालनादि नाश्यपोहति तावत्प्रमाणं स्वरूपत आकृतितो वा तत्कर्त्तव्यमिष्यते १३ एवं तावत् द्रव्यशुद्धिरुक्ता इदानीं कर्तृशुद्धिमाह स्नानेति अवस्थाः कौमारादिः वीर्यं शक्तिः संस्कार उपनयनादिः कर्माणि संध्योपासने दीक्षादिलक्षणं आत्मनः साहंकारस्य कर्तुः एतैः स्नानादिभिर्यथाय

अमेध्यलिप्तं यद्येन गंधलेपमपोहति भजेत प्रकृतिं तस्य तच्छौचं तावदिष्यते १३ स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः मत्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद् द्विजः १४ मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं धर्मः संपद्यते षड्भिर् अधर्मस्तु विपर्ययः १५ क्वचिद् गुणोऽपि दोषः स्याद् दोषोऽपि विधिना गुणः गुणदोषार्थनियमस् तद्भिदामेव बाधते १६ समानकर्माचरणं पतितानां न पातकं औत्पत्तिको गुणः संगान्न शयानः पतत्यधः १७ श्रीराम श्री

थं तत्कार्यानुसारिणी शुद्धिः इयं च शुद्धिर्न व्यवहारार्था किंतु विहितकर्मार्थेत्याह शुद्धः इति द्विज इत्युपलक्षणं शूद्रादिरपि ॥१४॥ मंत्रशुद्धिमाह सद्गुरुमुखाद् यथावत्परिज्ञानं मंत्रस्य शुद्धिः कर्मशुद्धिमाह ईश्वरार्पणं कर्मणः शुद्धिः धर्मोद्भवे शुद्धेः शुद्धीति प्रपंचः प्रदर्श्य उपसंहरति धर्म इति देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते एतेषां या विपर्ययः सोऽधर्मे हेतुरित्यर्थः १५ अयं च गुणदोषविभागो न वास्तव इत्याह क्वचिदिति आपदि प्रतिग्रहो गुणोऽप्यनापदि निषिद्धत्वाद्दोषः परधर्मः अपरस्य गुणोऽपि स्वस्य दोषः दोषोऽपि कुटुंबत्यागादिर्विरक्तादेर्न दोषः अपि तु विधिबलेन गुणः एवं च यो गुणदोषयोरेकस्मिन्नेवार्थे नियमः गुणदोषार्थ वा यो नियमः नियामकशास्त्रं स तयोर्भिदामेव बाधते १६ दोषस्य क्वचित् दोषत्वाभाववैगुण्ये चोदाहरणं दर्शयति समानस्य तस्यैव कर्मणः सुरापानादेराचरणं अपतितानां पतने हेतुर् अपि त्वात्यागकर्मणा च पतितानां न पुनः पातकं अधिकोऽत्र शंकनं भवति पूर्वमेव पतितत्वात् अतोऽत्र दोषस्यापि दोषता नास्तीत्यर्थः नैवं संगोऽपि योयत्ते दोषः सगस्य सोऽत्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतोगुणदोषनियमविधीनांप्रवृत्तिसंकोचद्वारानिवृत्तावेवतात्पर्यमित्यभिप्रेत्याहयतोयतइति १८ यथाश्रुतप्रवृत्तिपरतांवेदस्यनिराक
र्तुं प्रवृत्तिमार्गस्यानर्थहेतुतांदर्शयतिविषयेष्वितित्रिभिः संगः आसक्तिः ततस्तेषु विषयेषुयत्नप्रतिहतेनकामः ततःसहकामादेवकलिः
कलहोविवादः १९ दुर्विषहः तीव्रः तमः संमोहः तेनक्रोधं चेतनाकार्याकार्यस्मृतिः द्रुतंशीघ्रं २० शून्यायकल्पतेअसत्तुल्योभवती
त्यर्थः स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्छितस्यमृततुल्यस्य २१ तदेवतुल्यत्वंप्रपंचयति वि षयेतिव्यर्थंवृक्षजीविकयेवयाजीवन्वर्ततेतु
संमूर्छिततुल्यः अतएवयोभस्त्रेवश्वसन्वर्ततेसमृततुल्यः अतः स्वार्थनाशइत्यर्थः २२ ननुप्रवृत्तस्यस्वर्गादिफलश्रवणात्कुतः॥

यतोयतोनिवर्तेतविमुच्येततततस्ततः एषधर्मोनृणांक्षेमः शोकमोहभयापहः १८ विषयेषुगुणाध्यासात्पुं
सः संगस्ततोभवेत् संगात्तत्रभवेत्कामः कामादेवकलिर्नृणां १९ कलेर्दुर्विषहः क्रोधस्तमस्तमनुवर्तते
तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतं २० तयाविरहितः साधोजंतुः शून्यायकल्पते ततोस्यस्वार्थविभ्रं
शोमूर्छितस्यमृतस्यच २१ विषयाभिनिवेशेननात्मानंवेदनापरं वृक्षजीविकयाजीवन्व्यर्थंभस्त्रेवयः
श्वसन् २२ फलश्रुतिरियंनृणांनश्रेयोरोचनंपरं श्रेयोविवक्षयाप्रोक्तंयथाभैषज्यरोचनं २३ उत्पत्त्यै
वहिकामेषुप्राणेषुस्वजनेषुच आसक्तमनसोमर्त्याआत्मनोनर्थहेतुषु २४ राम राम राम राम

स्वार्थविभ्रंशः तत्राहइयंफलश्रुतिः नश्रेयः परमपुरुषार्थपरानभवतीत्यर्थः किंतुबहिर्मुखानांनृणांमोक्षविवक्षयाअवांतरफ
२२ लैः कर्मसुरुच्युत्पादनमात्रं यथाभैषज्येऔषधेरोचनंरुच्युत्पादनं तथाहि पिबनिंबंप्रदास्यामिखलुतेखंडलड्डुकान् पित्रैव
मुक्तः पिबतिनफलंतावदेवतु २३ ननुकर्मकांडेमोक्षस्यनामापिनश्रूयते कुतएवंव्याख्यायतेयथाश्रुतेरपाऽघटनादित्याहउ
त्पत्त्येतिद्वाभ्यां उत्पत्त्यास्वभावतएवकामेषुपश्वादिषुप्राणेषुआयुरिंद्रियबलवीर्यादिषुस्वजनेषुपुत्रादिषुअनर्थहेतुषुपरि
पाकतोदुःखहेतुषु २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० अतस्तान् स्वार्थं परमसुखमविदुषः अतोऽनन्तानुप्रक्षीभूतान्वेदोऽयं संबोधयिष्यतीति नैव श्रेय इति विश्वासितानित्यर्थः तानेवं भूतानुद्दिश्य जिनाध्वनि काम
वर्त्मनि देवादियोनिषु भ्राम्यतः ततः पुनः नमः वृक्षादियोनौ विशतः पशुकाम इति आयुरिन्द्रियादिकाम इति पुत्रादिकाम इति च कथं पुनस्तेष्व
वकामेषु स्वयमेव बुधो वेदो युञ्ज्यात् प्रवर्त्तयेत् तथा सत्य नाप्तः स्यादिति भावः २५ कथं तर्हि कर्ममीमांसकाः फलपरतां वदंति तत्राह एवमिति
व्यवसितं वेदस्याभिप्रायं कुसुमितां अवान्तरफलप्ररोचनं यार मणीयां परमफलं श्रुतिं वदंति कुतस्ते कुबुद्धयस्तदाह हि यस्माद्दे दुर्वा
ख्यासादयस्तथा न वदंतीति २६ कुबुद्धित्वं प्रपंचयति कामिन इति इष्टिभिः कामित्वात् कृपणाः तत्रोल्लुब्धाः लुब्धाः कुलाः अतः पुष्प
३१ वदवान्तरफलेषु परमफलबुद्धयः अत एव अग्निमुग्धाः अग्निसाध्यकर्माभिनिवेशेन लुप्तविवेकाः ततश्च धूमतान्ताः धूमता धू

नतान विदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि कथं युञ्ज्यात्पुनस्तेषु तांस्तमो विशतो बुधः २५ एवं व्यवसितं के
चिद्विज्ञाय कुबुद्धयः फलश्रुतिं कुसुमितां न वेदज्ञा वदंति हि २६ कामिनः कृपणा लुब्धाः पुष्पेषु फ
लबुद्धयः अग्निमुग्धा धूमतान्ताः स्वं लोकं न विदंति ते २७ न ते मामंग जानंति हृदिस्थं य इदं यतः उक्थ
२८ शस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः २८ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

ममार्गोऽग्निरेषां ते स्वं लोकमात्मतत्त्वं तथा च श्रुतिः कश्चिद्वा अस्माल्लोकात्प्रेत्य आत्मानं वेद अयमहमस्मीति कश्चित्स्वं लो
केन प्रतिप्रजानाति अग्निमुग्धो हैव धूमतान्त इति २७ कोऽसौ स्वो लोकः तमाह नेति हृदिस्थमात्मानं मां स्वलोकं ननु हृदिस्थम
हंकारास्पदं जानंत्येव सत्यं परमात्मानं तु न जानंतीत्याह य इदं यद्व्यतिरिक्तं जगन्नास्ति कुतः यत इदं जगज्जातं तं कुतो न जानं राम
ति हि यस्मात्तु उक्थं कर्मैव शस्त्रं शंसकथनीयं पशुहिंसासाधनं येषां ते अतः केवलं असुतृपः प्राणतर्पणपराः नीहारे २८
तमः तेन व्याप्तानि चक्षूंषि येषां ते यथा संनिहितमपि न जानंति तद्वत् तथा च श्रुतिः न तं विदाथ य इमा जजानान्यद्युष्माक
मंतरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति २८ राम राम राम राम राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेदतात्पर्याज्ञानाद्वान्यान्यजंतीत्याह तेपरोक्षमस्फुटं मेमतमविज्ञायदेवतान्यजंतइत्युत्तरेणान्वयः स्वमतमेवाह हिंसायांमांसलक्ष
णार्थंतत्फलार्थंचयदिरागःस्यात्तर्हियज्ञएवतत्प्रवृत्त्यनुज्ञानद्वारापरिसंख्यायनत्वावश्यकत्वेनचोदनेत्येवंरूपं यद्यपिनित्यनैमित्तिकयोःकाम
विशेषानुबंधानास्ति तथापिकर्मणापितृलोकइतिश्रुतेःसामान्यतःपितृलोककामनास्त्येवश्रुतःकारणशुद्धिकामनावेतिभावः
तदुक्तं नोकामस्यक्रियाकाचिद्दृश्यतेनेहकर्हिचित् यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितमिति २९ अज्ञत्वादेवहिंसयावि
५१ हारःक्रीडायेषांते ३० किंचातेःतिमंदबुद्धइत्याह स्वप्नोपममिति अमुंपरलोकंआशिषश्चास्मिंल्लोकेसंकल्प्यनतुनिश्चित्य

नैमं मतमविज्ञायपरोक्षंविषयात्मकाः हिंसायांयदिरागःस्याद्यज्ञएवनचोदना २९ हिंसाविहाराह्यालब्धैः
पशुभिःस्वसुखेच्छया यजंतेदेवतायज्ञैःपितृभूतपतीन्खलाः ३० स्वप्नोपमममुंलोकमसंतंश्रवणप्रि
२८ यं आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक् ३१ रजःसत्त्वतमोनिष्ठारजःसत्त्वतमोजुषः उपासतइंद्रमु
ख्यान्देवादीन्नतथैवमां ३२ इष्ट्वेहदेवतायज्ञैर्गत्वारंस्यामहेदिवि तस्यांतइहभूयास्ममहाशालामहा
कुलाः ३३

विघ्नबाहुल्यात् त्यजंतिकर्मसुविनियोजयंति यथाकश्चिद्वणिक्दुस्तरसमुद्रादिलंघनेनबहुधनार्जनेच्छया सिद्धंधनंत्यजं
तुभयभ्रंशोभवतीतिहृदिस्थः ३१ अतोरजःसत्त्वतमोनिष्ठास्तेरजःसत्त्वतमोजुषःस्वानुरूपानिंद्रादीनेवोपासतेनतुमांय
द्यपींद्रादीनामपिमदंशत्वान्मदुपासनमेवतत्तथापियथावन्नोपासतेभेददर्शित्वादित्यर्थः ३२ हृदिसंकल्प्येत्युक्तं
तमेवसंकल्पंदर्शयतिद्वाभ्यां तेतस्यभोगस्यांते महाशालामहागृहस्थाः ३३ राम राम राम राम राम राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० ततः किमित्यतआह एवमिति अतोमद्वचनत्वाभावान्नित्यसंसारिणो भवंतीति भावः ३४ नेदं वै प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृ
त्तिपरत्वमेवोपसंहरति वेदाइति कर्मब्रह्मदेवताकांडविषया इमे वेदाः ब्रह्मात्मविषयाः ब्रह्मैवात्मानं संसारित्वेन तत्परा तत्त्व
रत्वाप्रतीतेश्चाफलश्रुतिरियं नृणां न श्रेयोरोचनं परं श्रेयो विवक्षया प्रोक्ता यथा भैषज्यरोचनमित्युक्तमेव कारणमनु-
स्मारयति परोक्षेति ऋषयो मंत्राः तेद्रष्टारो वा तत्किमिति यतः परोक्षमेव मम च प्रियमयं भावः शुद्धांतःकरणैरेव तद्बोद्ध
न व्यं नान्यैरनधिकारिभिः वृथा कर्मत्यागेन भ्रंशप्रसंगादिति ३५ ननु वेदज्ञात्प्रियमित्यादयः किमिति तथा न वर्णयंति
मां विना तत्त्वतो वेदास्तदर्थं वा न कोऽपि वेदेत्याशयेनाह शब्दब्रह्मेति यावत्समाप्ति स्वरूपतोऽर्थतश्च दुर्विज्ञेयं तच्च सूक्ष्म

एवं पुषिततया वाचा व्याक्षिप्तमनसां नृणां मानिनां चातिस्तब्धानां मद्वार्त्ताऽपि न रोचते ३४ वेदा
ब्रह्मात्मविषयास्त्रिकांडविषया इमे परोक्षवादा ऋषयः परोक्षं मम च प्रियं ३५ शब्दब्रह्म सुदुर्बो
धं प्राणेंद्रियमनोमयं अनंतपारं गंभीरं दुर्विगाह्यं समुद्रवत् ३६ श्रीराम श्रीराम श्रीरा०

स्थूलं चेति द्विविधं तत्र सूक्ष्मं तावत्स्वरूपतोऽपि दुर्ज्ञेयमित्याह प्राणेंद्रियमनोमयं प्रथमं प्राणमयं परारव्यं ततो मनोमयं
पश्यंत्याख्यं ततइंद्रियमयं मध्यमाख्यं तस्य वैखर्यभिव्यंजकेन करणेंद्रियप्रधानत्वात् किंच अनंतपारं समष्टिप्राणादि
मयस्य निर्विशेषस्य च तस्य कालतो देशतश्चापरिच्छेदात् अर्थतोऽपि दुर्विज्ञेयत्वमाह गंभीरं निगूढार्थं अतो दुर्विगा
ह्यं मतिप्रवेशानर्हं तथा च श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता
नेंगयंति तुरीयं वाचो मनुष्या वदंति अयमर्थः वाचः शब्दब्रह्मणः परिमितानि निर्गुणितानि पद्यंते ज्ञायंते परं तत्त्वमेभिरिति
पदानि रूपाणि चत्वारि तानि च त्वायें प्रियमनीषिणां तद्दृष्टयः ते विदुर्नान्ये यतो गुहायां देहमध्ये त्रीणि निहितानि नेंगयं
ति स्वरूपेण न प्रकाशयंति यतः केवलं वाचः तुरीयं चतुर्थं भागं
वैखरीरूपं मनुष्याः प्राणिनो वदंति तमपि वदंत्येव न तु तत्त्वतो जानंति ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र मनीषिभिरवज्ञेयं सूक्ष्मं रूपं दर्शयति मयेति मयांतर्यामिणोपबृंहितं अधिष्ठितं अंतस्थत्वेऽप्यपरिच्छेदमाह भूम्ने
ति अधिष्ठातृत्वेऽप्यविकारित्वमाह ब्रह्मणेति अविकृतस्यापि नियंतृत्वं घटयति अनंतशक्तिनेति भूतेषु सर्वप्राणि
षु घोषरूपेण नादरूपेण लक्ष्यते मनीषिभिः अंतःसूक्ष्मत्वेन दर्शने दृष्टांतः बिसेषूर्णातंतुरिवेति ३७ ततो वैखर्याख्या
यावृत्त्या वाच उत्पत्तिप्रकारं सदृष्टांतमाह यथेति त्रिभिः हृदयाकाशात् मुखात् उद्वमते बहिः प्रकटयति दार्ष्टां दारा २
तिकं दर्शयति आकाशादिति प्राणः तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवान् ३८ तेन रूपेण छंदोमयो वेदमूर्तिः

मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ३७ यथोर्णनाभिर्हृदया
दूर्णामुद्वमते मुखात् आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ३८ छंदोमयोऽमृतमयः सहस्रप
दवीं प्रभुः ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां ३९ विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः
अनंतपारां बृहतीं सृजत्याक्षिपते स्वयम् ४०

स्वतस्त्वमृतमयः घोषवान् नादोपादानवान् मनसानिमित्तभूतेनानिमित्ततामेव दर्शयति स्पर्शादीन्वर्णान्रूपय तू २
ति संकल्पयतीति स्पर्शरूपिणेति स्पर्शग्रहणमुपलक्षणं हृदयाकाशाद्बृहतीं सृजतीति । तृतीयश्लोकेनान्वयः
बृहतीशब्दार्थव्याख्यानाय विशेषणानि सहस्रपदवीं वेदमार्गमिति देवाह ओंकारात् उरःकंठादिसंगेन व्यंजिताः
त्रं २ स्पर्शादिभिर्भूषितां ओंकारश्चाव्यक्तः सूक्ष्माभिप्रेतः न तु अकारादिवर्णरूपः तस्याव्ययकोटित्वात् तत्र स्पर्शाः कादि
पंचवर्गाः स्वरा अकारादयः षोडश ऊष्माणः शषसहाः अंतस्था यरलवाः ३९ विचित्राभिर्वैदिकलौकिकाभिर्भा
षाभिर्विततां यथोत्तरं चत्वार्यक्षराणि अधिकानि येषां तैः छंदोभिरुपलक्षितां एवमनंतपारां सृजति स्वयमेवा
क्षिपते उपसंहरति ४०

चत्वारि उत्तराणि त्वे २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ए० तेषु केचित् छंदांसि दर्शयति गायत्रीति तत्र चतुर्विंशत्यक्षरा गायत्री ततश्चतुरक्षरवृद्ध्योष्णिगादिच्छंदांसि अत्यष्टिः अतिजगती
अतिविराट् चेत्यर्थः एतैः छंदोभिरुपलक्षितामिति पूर्वेणैवान्वयः ४१ अतोऽहं स्वरूपेणासंकल्पेन स्वरूपतो दुर्ज्ञेयेत्युक्तं अर्थतोऽपि
दुर्ज्ञेयत्वमाह किमिति कर्मकांडे विधिवाक्यैः किं विधत्ते देवताकांडे मंत्रवाक्यैः किमाचष्टे प्रकाशयति ज्ञानकांडे च किमनूद्य
विकल्पयेत् निषेधार्थं इत्येवमस्या हृदयं तात्पर्यं मत्तो मत्तोऽन्यः कोऽपि इह एवं न वेद ननु त्वं हि त्वं मत्स्वरूपया कथयस्वमिति मां भि
वयज्ञरूपं विधत्ते मामेव तत्तद्देवतारूपमभिधत्ते न मत्तः पृथक् यच्चाकाशादिप्रपंचजातं तस्मात् एतस्मादात्मन

गायत्र्युष्णिगनुष्टुब्बृहती पंक्तिरेव च त्रिष्टुब्जगत्यतिच्छंदो ह्यत्यष्ट्यतिजगद्विराट् ४१ किं विधत्ते
किमाचष्टे किमनूद्य विकल्पयेत् इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन मां विधत्तेऽभिधत्ते मां विक
८० ल्प्यापोह्यते त्वहं ४२ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां मायामात्रमनूद्यान्ते प्रतिषिध्य प्र
सीदति ४३ इति श्रीभागवते महापुराणे एकादशस्कंधे एकविंशोऽध्यायः श्रीराम श्रीराम

आकाशः संभूत इत्यादिना विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति ४१ कुत इत्यपेक्षायां सर्ववेदार्थं संक्षेपतः
ए कथयति एतावानेव सर्वेषां वेदानामर्थः तमेवाह शब्दो वेदः मां परमार्थमाश्रित्य भिदां मायामात्रमित्यनूद्यैनं हत्वा रूप २
२ नास्ति किंचनेति प्रतिषिध्य प्रसीदति निवृत्तव्यापारो भवति अयं भावः यथा ह्यंकुरे यो रसः स एव तत्तद्विस्तारभूत
नाना कांडशाखास्वपि तथैव प्रणवस्य योऽर्थः परमेश्वरः स एव तद्विस्तारभूतानां सर्ववेदकांडशाखानाम् राम
पि संगच्छते नान्य इति ४३ नित्यमुक्तः स्वतः सर्ववेदवित् स्वपरज्ञानदाताय संविद्गुरुमीश्वरं एकादशे एकवि ८०
शः ६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वाविंशे तत्वसंख्यानामविरोधमिहोच्यते पुंप्रकृत्योर्विवेकश्च जन्ममृत्युविधापि च तदेवं वेदानां प्रवृत्तिपरत्वं निराकृत्य मोक्षपरत्वं निर्णीतं संति च मोक्षपरत्वेऽपि तदंतर्विवादास्तथाहि केचित्तत्वसंख्यासु विवदंते तत्रापि च बाह्यार्थ-सदसत्वे आत्मनस्त्वेकत्वनानात्वादिषु तत्र किं सत्यमिति जिज्ञासया पृच्छति कतीति ऋषिभिरागमेषु च बहुधा संख्यातानि तत्त्वानि तेषु कति युक्तानीत्यर्थः भगवन्नेतदनुवादपूर्वकं बहुधा संख्यानं प्रपंचयति नवेति त्रिभिः त्वं तावदष्टाविंशति तत्त्वान्यात्थ उक्तवानिति च वयं शुश्रुम श्रुतवंतः १ २ एतावत्त्वं नाम यावत्त्वं नानात्वमित्यर्थः यद्विवक्षया

उद्धव उवाच कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम १
केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिं सप्तैके नव षट्केचिच्चत्वार्येकादशापरे केचित्सप्तदश प्रा-
हुः षोडशैके त्रयोदश २ एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया गायंति पृथगायुष्मन्निदं नो
वक्तुमर्हसि ३ श्रीभगवानुवाच युक्तं च संति सर्वत्र भाषंते ब्राह्मणा यथा मायां मदीयामुद्गृह्य व-
दतां किं नु दुर्घटं ४ नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ५

यत्प्रयोजनमभिप्रेत्य च गायंति आयुष्मन्निति संबोधनं ३ विवक्षाभेदेन सर्वं युक्तमेव मायया च किं नाम न युक्तमित्याह युक्तमिति यथा ब्राह्मणाः भाषंते तत्तथैव युक्तं न वस्तुतः यस्मात्तत्त्वानि सर्वत्रांतर्भूतानि सर्वाणि तत्त्वानि किंच मायामिति असत्त्वेऽपि मायाश्रयत्वात् घटत एवेत्यर्थः उद्गृह्य स्वीकृत्य न हि मरीचिजलपरिमाणादिविवादे किंचिद्घटितं भववति ४ ननु यदि सर्वमपि युक्तं कुतो विवादः यदि च मायैवावलंबनं कुतो हेतुं प्रति विवादः तत्राह नैतदिति हेतुं प्रति च विवदमानानां मदीया दुरत्ययाः शक्तयः सत्त्वाद्याः अंतःकरणवृत्तिविशेषरूपेण परिणता एव हेतुरित्यर्थः ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ्रू २ व २ यासामिति १

भा०ए० तासां विवादहेतुत्वमुपपादयति यासां व्यतिकरात् क्षोभात् वदतां पदं विषयः विकल्पो भेद आसीत् अंतःकरणवृत्ति विक
ल्पो वा तन्मूलभूतः एतद्व्यतिरेकेण द्रढयति शमदमेऽपीत्यादि हे कंपतस्मिन् प्राप्ते विकल्पोऽप्येति लीयते तं च विकल्पमनुवादः
शाम्यतीति ६ संति सर्वत्रेति यदुक्तं तत्प्रपंचयति परस्परेति द्वाभ्यां अन्योन्यास्मिन्ननुप्रवेशाद्धेतोर्यथा विवक्षितं तथा
कार्य १ पूर्वं कारणं अपरं कार्यं कारणभावेन प्रसंख्यानं भवति यद्वा पूर्वा अल्पसंख्या अपराधिकसंख्या तयोर्भावः पौर्वापर्यं तेन
न प्रसंख्यानं गणनमिति ७ अनुप्रवेशं दर्शयति एकस्मिन्नपीति पूर्वस्मिन् कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण

यासां व्यतिकरादासीद्विकल्पो वदतां पदं प्राप्ते शमदमेऽप्येति वादस्तदनुशाम्यति ६ परस्परानुप्रवेशा
त्तत्त्वानां पुरुषर्षभ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ७ एकस्मिन्नपि दृश्यंते प्रविष्टानीतराणि च
पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ८ पौर्वापर्यमतोऽमीषां प्रसंख्यानमभीप्सतां यथा विवि
८१ क्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात् ९ अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनं स्वतो न संभवा
दन्यस्तत्त्वज्ञो ज्ञानदो भवेत् १०

अ। प्रविष्टानि मृदादि घटवत् परस्मिन्कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि घटे मृद्वत् ८ अविरोधमुपसंहरति अत
अमीषां तत्त्वानां पौर्वापर्यं कारणकार्यत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये यथा यथा विवक्षया य
द्वक्त्रं यस्य मुखं प्रवर्तते तत्तत्सर्वं विविक्तं निश्चितं वयं गृह्णीमः उक्तन्यायेन सर्वत्र युक्तेः संभवात् ९ ननु कार्यकार राम
णतत्त्वानां पृथक्त्वाविवक्षया भवतु नाम संख्याभेदः जीवेश्वरयोस्तु कथं भेदाभेदविवक्षया षड्विंशतिपंचविं ८१
शतिपक्षौ प्रवृत्तौ अत आह अनादीति स्वतो न संभवति अन्यतस्तु संभवात्स्वतः सर्वज्ञः परमेश्वरोऽन्यो भवेत
व्य
म् इति षड्विंशतिपक्षाभिप्रायः इत्यर्थः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथं तर्हि पंचविंशतिपक्षस्तत्राह पुरुषेति वैलक्षण्यं विसदृशत्वं नास्ति द्वयोरपि चिद्रूपत्वात् अतस्तयोरन्यत्वं तु मन्यत्वकल्पना अप
र्थार्था एवं पंचविंशतिपक्षप्रवृत्तिरित्यर्थः नन्वेवमपीश्वरप्रसादलभ्यज्ञानस्य पृथग्धर्म्मत्वात् पक्षद्वयमपि न घटेत अत आह ज्ञानं चे
ति सत्वगुणात्मकत्वात्तद्धर्म्मभूतमित्यर्थः ११ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणः स्यात् अत आह प्रकृतिरिति गुणसाम्यं हि प्रकृ
तिः अतस्तद्विशेषरूपा गुणास्तस्या एव न त्वात्मनो जीवस्य अकर्तृत्वात् तस्य स्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः १२
अतः सत्वमयं ज्ञानं प्रकृतेर्गुण इति पूर्वेणैव संबंधः ननु तर्हि त्वयैव कर्म्म चाऽज्ञानं च तत्वान्तरं स्यात् न रजः कर्मे रजसो वृत्तिः
अज्ञानं च तमसः अतः कर्म्माज्ञानयो रजस्तमोद्वारा प्रकृतावेवान्तर्भाव इति भावः तथापि कालस्वभावयोस्तत्वान्तरता स्यात्

पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः ११ प्रकृतिर्गुणसाम्यं वै प्रकृतेर्ना ८१
त्मनो गुणाः सत्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः १२ सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते गुणव्य
तिकरः कालः स्वभावः सूत्रमेव च १३ पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ज्योतिरापः क्षितिरिति
तत्वान्युक्तानि मे नव १४ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्य
ङ्गोभयं मनः १५

नागुणानां व्यतिकरो यस्मात् स ईश्वर एव कालो नाम स्वभावो नाम सूत्रं महत्तत्वमेव तस्य सर्वशक्तिमत्वात् तदेवं ज्ञानादी
पथ२ नां यथामतिभावान्न पक्षद्वयेऽपि तत्वहृद्धिः एतच्च पक्षान्तरेष्वपि ज्ञेयं स्वमते तु गुणानामागमापायित्वात् प्रकृतेर्भेदो विवक्षि सुं
तः अतो गुणास्त्रीणि तत्वानि १३ अपराणि पंचविंशतितत्वानि पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति पुरुष इति सार्द्धा
भ्यां व्यक्तं महत्तत्वं नभआदीनि तन्मात्राणि मया १४ एकादशेन्द्रियाणि दर्शयति श्रोत्रमिति दर्शनं चक्षुः ज्ञानशक्तयो ज्ञाने
न्द्रियाणि पंच वागादिपाय्वन्तानि द्वे द्वे केनोक्तानि चत्वारि अंघ्रिरिति कर्म्माणि कर्मेन्द्रियाणि पंच उभयं उभयात्मकं मनः अ
ङ्ग हे उद्धव एवं तान्येकादश १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० पंचदर्शयति शब्दइति शब्दादीनि विषयतया परिणतानि पंच महाभूतानि ननु गत्यादिभिस्तत्वाधिक्यं पक्षत्रयेऽपि स्यात् नेत्याह ग
तीति गतिश्चोक्तिश्च उत्सर्गश्च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि न तत्वांतराणीत्यर्थः १६
तदेवं मतत्रयेण तत्वसंख्याभेदं निरूप्य यदि क्ष्मयागार्यंतीति यत्स्पष्टं तत्तन्मतं तात्पर्यं दर्शयति सर्गादाविति कार्याणि षोडशवि
१२ काराः कारणानि महदादीनि सप्त तद्रूपिणी सत्वादिगुणैः अस्य विश्वस्य सर्गादौ गुणैः सत्वाद्यवस्थां धत्ते उपादानकारणरूपत्वा
त् पुरुषस्तु अव्यक्तः अपरिणामी निमित्तभूतः केवलमीक्षते अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति १७ तेषां परा अस्य

शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः १६ सर्गादौ प्रकृतिर्ह्य
स्य कार्यकारणरूपिणी सत्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते १७ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्ष
या लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् १८ सप्तैव धातव इति तत्रार्थाः पंच खादयः ज्ञानमात्मो
८२ भयाधारस्ततो देहेंद्रियासवः १९ षडित्यत्रापि भूतानि पंच षष्ठः परः पुमान् तैर्युक्त आत्मसंभूतैः सृष्ट्वे
दं समुपाविशत् २०

कार्यस्यानंतर्भावमभिप्रेत्याह व्यक्तादय इति व्यक्तादयो महदादयः प्रकृतेरुत्पन्नाः धातवः ते विकुर्वाणाः पुरुषेक्षणलब्धवी
र्याः संहताः अंडं कार्यं सृजंतीत्यन्वयः प्रकृतेर्बलात् तन्माश्रित्येत्यर्थः १८ एवं स्वमतमुपसंहृत्य मतांतरेष्वपि सामान्यतो नि
रूपितानामेषां विशेषतः सतात्पर्यं दर्शयति सप्तैवेति ज्ञानं जानातीति द्रष्टा जीवः उभयोर्द्रष्टृदृश्ययोराधार आत्मा च ते राम
सप्त तत्र प्रकृत्यादीनां कारणत्वेन स्वादिष्वंतर्भावः उत्तरेषामंतर्भावार्थमाह ततः तेभ्यः सप्तभ्यः देहेंद्रियासवः कार्या ८२
णि जायंते १९ षडिति मतेपि भौतिकस्य भूतेष्वंतर्भावे जीवस्य च परमात्मनि भावमाह तैर्युक्त इति २० राम राम राम

चक्षुश्रोत्रघ्राणत्वग्रसनेंद्रियाणि पूर्वस्मिन् कारणे पंच भूतात्मके सौतिके ङ्यादितामंतश्चावोऽसूक्ष्माः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्नं पृथ्वी आत्मनो ज्ञातानि आत्मना सह चत्वारि तत्वानि अंतभार्वार्थमाहैतेरिति अवयविनः कार्यस्य २१ भूतानि च मात्रा
णि बुद्धींद्रियाणि च पंच पंच एकेन मनसा सह आत्मा सप्तदशः २२ आत्मैव संकल्पयन् मन उच्यते त्रयोदशपक्षे भूतानि च इंद्रियाणि
मात्रेरकीकृतानि पंच बुद्धींद्रियाणि च तत्प्रकाशकानि पंचैव मन एकमिंद्रियाधिष्ठातृ आत्मा चेति द्विविधः एवं त्रयोदशपक्ष
जीवमनसोरात्मांतर्भावेनैतान्येवैकादश २३ नवपक्षे अष्टप्रकृतयः पुरुषश्चाविकारणामंतर्भावः २४ उपसंहरति इ

चत्वार्येव तितत्रापि तेज आपोन्नमात्मनः । ज्ञातानि नैतेरिदं ज्ञातं जन्मावयविनः खलु २१ संख्याने सप्तदश
के भूतमात्रेंद्रियाणि च पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः २२ तद्वत्षोडशसंख्याने आत्मैव मन
उच्यते भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश २३ एकादशत्वमात्मासौ महाभूतेंद्रियाणि च अष्टप्र
तयश्चैव पुरुषश्च नवेत्यथ २४ इति नानाप्रसंख्यानं तत्वानामृषिभिः कृतं सर्वन्याय्यं युक्तिमत्वाद्विदुषां
किमशोभनं २५ उद्धव उवाच प्रकृतिः पुरुषश्चोभौ यद्यप्यात्मविलक्षणौ अन्योन्यापाश्रयात्कृष्ण द
श्यते न भिदानयोः प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि २६ श्रीराम श्रीराम श्रीराम

तीति इति एभिः प्रकारैः प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः २५ तत्र पृच्छति प्रकृतिरिति आत्मना जडाजड स्वभावेन विलक्ष
णौ अन्योन्यापाश्रयात् परस्परपरिहारेणाप्रतीतेरित्यर्थः तदेव व्यनक्ति प्रकृतौ तत्कार्ये देहे प्रकृतिश्चात्मनि तेन विना
तस्य अप्रतीतेः अहमित्यभेदप्रतीतेर्देहात्मनोर्भेदो लक्ष्यत इत्यर्थः २६ श्रीराम श्रीराम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०१ हृदि वर्त्तमानं संशयं नये युक्तौ नैपुणं प्रावीण्यं येषां ते ॥ २७ अर्हसीत्युक्तं तत्र हेतुमाह हि यस्मात् त्वत्तः त्वत्प्रसादादेव अत्र ज्ञानप्रमो
षः भ्रंशः अतः शक्तितः मायातः ननु स्वप्रकाशस्यात्मनः कथं ज्ञानप्रमोषः ज्ञानदानं तत्प्रमोषो वा मम किं प्रयोजनं तत्राह
त्वमेवेति २८ विकाराविकाराभ्यां नानात्वैकत्वाभ्यां सापेक्षनिरपेक्षाभ्यां प्रकाशाप्रकाशाभ्यां चात्यंतभेदं वक्तुमाह प्रकृ

एवं मे पुंडरीकाक्ष महांतं संशयं हृदि छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः २७ त्वत्तो ज्ञानं हि जीवानां
प्रमोषस्तेऽत्र शक्तितः त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः २८ श्रीभगवानुवाच प्रकृतिः
पुरुषश्चेति विकल्पः पुरुषर्षभ एष वैकारिकः सर्गो गुणव्यतिकरात्मकः २९ ममांग माया गुण
८३ मय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते वैकारिकस्त्रिविधोऽध्यात्ममेकमथाधिदैवमधिभूतम
न्यत् ३०

तिः पुरुषश्चेति विकल्पोऽत्यंतभेद एव कुत इत्यपेक्षायां प्रकृतिशब्दोक्तदेहादिसंघातस्य विकारित्वं तावद्दर्शयति एष इति द्वा राम
भ्यां एष सर्गः सृज्यत इति सर्गो देहादिसंघातः वैकारिकः विकारवान् अत्र हेतुः गुणव्यतिकरात्मकः गुणक्षोभकृतः ८३
२९ नानात्वमाह ममेति विकल्पभेदं नं बुद्धीश्च अनेकधात्वं प्रपंचयति वैकारिकः अनेकविकारवानपि स्थूलत्वेन मा
र्गेण तावत्त्रिविधः त्रैविध्यमेवाह अध्यात्ममित्येकं रूपं ३० राम राम राम राम राम राम रामे रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानात्मविवेक ४

तानिरूपाणिदर्शयति इहचाध्यात्मरूपमधिभूतं अत्ररंध्रेचक्षुर्गोलकेप्रविष्टः आर्कंवपुः अंशोधिदैवमितिसापेक्षप्रकाशाना
माहपरस्परमिति चक्षुषारूपंज्ञायते तदन्यथानुपपत्त्याचक्षुः तत्सूर्यस्यान्यथानुपपत्त्यातदधिष्ठातृदेवतातत्त्वंचक्षुषःप्र
वृत्तिस्ततोरूपज्ञानमित्येवमेतत्त्रयंपरस्परंसिध्यति अत्ररंध्रइतिविशेषणव्यावर्त्यमाह दृष्टांतोपयोगितया यस्त्वस्य
कीर्त्तितेमंडलात्मासतुस्वतः सिध्यति चक्षुर्विषयत्वेपिप्रतीत्यागमापेक्षाऽभावमात्रेणस्वतइत्युक्तं इदानीमात्मनोऽवि
८ कारित्वादभावेनभेदमाहयत् यस्मात् आत्माएषामध्यात्मादीनामाद्यः कारणं अतएकरूपः अभिन्नः अतस्तस्माद
तेभ्योपिपरोभिन्नः स्वप्रकाशत्वापत्त्याह स्वयाऽनुभूत्यास्वतः सिद्धप्रकाशेन अखिलानांसिद्धानांपरस्परंप्रका

दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिध्यतियःस्वतःखे आत्मायदेषामपरोयआद्यःस्वयानुभूत्याऽखिलसिद्धि
सिद्धिः एवंत्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचित्तयुक्तम् ३१ योसौगुणक्षोभकृतोविकारःप्रधान
मूलान्महतःप्रसूतः अहंत्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसऐंद्रियश्च ३२ राम राम राम राम

शकानामपिप्रकाशकःसर्वेषामपिसामान्यतःस्वप्रकाशविषयत्वात् अतएवतस्यस्वप्रकाशकत्वंसिद्धं चक्षुषिदर्शितंत्रैविध्यं
मिंद्रियांतरेष्वप्यतिदिशतिएवमिति यथाचक्षुः एवंत्वगाद्यपीत्यर्थः त्वक्स्पर्शोवायुरिति श्रवणंशब्दोदिशइति जिह्वारसोवरुणइति
नासागंधोऽश्विनाविति चित्तयुक्तंमनः करणांतरमपि तच्चित्तंचेतयितव्यंवासुदेवइति मनोमंतव्यंचंद्रइति बुद्धिर्बोधव्यंब्रह्मेति
अहंकारोऽहंकर्तव्यंरुद्रइत्येवंत्रिविधमित्यर्थः ३१ ननुपुनरपित्वलक्षणमात्रमेवात्रत्रिविधप्रपंचव्यतिरिक्तात्मप्राप्तिस्तुकुतः
स्यात् अहंकारनिरस्यात्तत्कुतः त्रिविधविकल्पनिरस्तैवेत्याशंक्यनाह योसौअहंअहंकारः तमेवाह गुणक्षोभकरात्तीतितथानतः
परमेश्वरात्कालाद्यानिमित्तात् प्रधानंमूलमुपादानंयस्यतस्मान्महतःप्रसूतोविकारःसत्रिवृत् त्रिविधः मोहमयस्यविकल्पस्यहेतु
त्रिवृत्त्वमेवाहवैकारिकइति ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ ११ सकृन्नैव निवर्तते आत्माज्ञानविलसितत्वात्तज्ज्ञानेन त्वाशयेनाह आत्मापरिज्ञानमय इति ननु कथं मोहमयत्वं विकल्पस्याहंकारस्य चोक्त-
स्मिन्सत्यत्वांगीकारात् नत्वाह विवाद इति अर्थे भिदार्थे निष्ठा विवादोऽप्यात्मापरिज्ञानमय इत्यन्वयः यद्वा विवादः सर्वो भिदार्थनिष्ठ एव न
तु वस्तुमात्रनिष्ठः अतः परस्परयुक्तिभिरवभेदस्य निराकृतत्वात् मोहमयत्वं सिद्धमिति ननु यद्यहंकारो विकल्पश्च नास्ति अत्वं तर्हि
तन्निवृत्तिप्रयासेन न तत्राह व्यर्थोऽपि अर्थरहितोऽपि स्वरूपभूतान्मत्तो बहिर्मुखानां नैवोपरमेत प्रत्युत तत्कृतैः कर्मभिर्नुयनीचैर्दे-
हेषु ते संसरन्तीति ३३ तत्र पृच्छति त्वत्त इति व्यापकस्यात्मनो देहाद्देहान्तरगमनं अकर्तुः कर्माणि नित्यस्य च जन्ममरणे हीनि

आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः व्यर्थोऽपि नैवोपरमेत पुंसां मत्तः परावृत्त-
८४ धियां स्वलोकात् ३३ उद्धव उवाच त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो उच्चावचान्यथा देहान् गृह्णं-
ति विसृजंति च ३४ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः नह्येतत्प्रायशो लोके विद्वांसः संति वं-
चिताः ३५ श्रीभगवानुवाच मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतं लोकाल्लोकं प्रयात्यन्य आत्मा
तदनुवर्तते ३६ ध्यायन्मनोनु विषयान् दृष्टान्वानुश्रुतानथ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति ३७॥

कथमिति भावः ३४ एतद्विद्वांसो न संति हि यस्मात् माययाऽवंचिताः मोहिताः ३५ लिंगशरीराध्यासेन सर्वं घटत इत्युत्तरमाह मन इति राम
प्रधानत्वेन पंचभिरिति निर्देशोऽन्येषामप्युपलक्षणार्थः देहाद्देहान्तरं प्रतीयाति ततोऽन्य एवात्मा तन्मनोऽनुवर्तते अहंकारेणा- ८४
नुगच्छति ३६ ननु मनसोऽपि पूर्वदेहवियोगाद्देहान्तरयोगश्च कथं भवतीति चेत् स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारण-
तं॰ २ माह ध्यायदिति कर्मतंत्रं लोकं मीपरयापितान् दृष्टान्वानुश्रुतान्वेदोक्तान्वा अनुध्यायत् अथ अनंतरं ध्यायमानेषु उद्यत्
आविर्भवत् पूर्वविषयेषु च सीदत् लीयमानं भवति तदनंतरं तस्य स्मृतिः पूर्वापरानुसंधानं नश्यति ३७ राम राम

रु

विषयान् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२

ततः किमत आह विषयेति केनोपस्थापिते देवादिदेहाद्यभिनिवेशेन आत्मानं पूर्वदेहं पुनर्मनो न स्मरेदिति यत्सेवयात्
नो देहाभिनिवेशेन भयशोकादेर्देवादिदेहाभिनिवेशेन वा हर्षतर्षादिहेतोः पूर्वदेहे अत्यन्तविस्मृतिः अहंकारनिवृत्तिः
तदभिमानिनो जनो जीवस्य मृत्युः स्यात्तन्न देहवन्नाशः ३८ जन्मतु विषयस्य देहस्य आत्मत्वपरिस्वीकृति अभिमानं प्राहुः
न तु देहवदुत्पत्ति न च पुत्रादिदेहवत्स्तोत्पत्तिशयमात्रेण किंतु सर्वभावेन अभेदेन अभिमानमात्रेणोत्पत्तिमरणदृष्टांतद्वयं
स्वप्ने अमनोरथश्चेत्यर्थः ३९ दृष्टांतो विवृणोति स्वप्नमिति तत्रवर्तमानं स्वप्नादौ पूर्वं चेति आपूर्वमिव तिवाद्वयः स्वेसि

विषयाभिनिवेशनतात्मानं यत्स्मरेत्तु नः जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः ३८ जन्मत्वात्म
तयापुंसः सर्वभावेन भूरिदः विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ३९ स्वप्नं मनोरथं वेत्थं
प्राक्तनं न स्मरत्यसौ तत्र पूर्वमिवात्मानमपूर्वं चानुपश्यति ४० इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति
वस्तुनि बहिरंतर्भिदाहेतुर्जनोसज्जनकृद्यथा ४१ श्रीराम श्रीराम श्रीराम श्रीराम श्री

ष्टमप्यात्मानमपूर्वमिव अद्यजातमिव पश्यतीत्यर्थः ४० उपसंहरति इंद्रियाणामयनं मनः तस्य देहांतराभिनिवेशेनयासृ
ष्टिः उत्पत्तिस्तया वस्तुनि आत्मनि तदभिमानेनेदं त्रैविध्यं उत्तममध्यमनीचत्वं अ सदेव भातीत्यन्वयः एवंभूत आत्मा बा
ह्याभ्यंतरभेदहेतुश्च भवति बाह्यविषयाणां तरान्सुखादीं अपश्यतीत्यर्थः यथाजनो जीवः स्वप्ने बहून् असतो जनान्
देहान्कुर्वन्पश्यन् बहुरूपो भाति तद्वत् यद्वा इदं त्रैविध्यं आध्यात्मादिरूपं भाति असज्जनकृद्दुष्टपुत्रोत्पादकः
जनः पिता स्वयं समोपि पुत्राभिमानस्तदरिमित्रादिषु यथा भेदहेतुर्भवति तद्वदिति अन्यत्समानं ४१ राम राम

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० तदेवं लोकप्रसिद्धौ जन्ममृत्यू निरूप्य सूक्ष्मावस्थाभावपि तौ वैराग्याय निरूपयति नित्यदा प्रतिक्षणं भूतानि शरीराणि तत्स्थाने
नश्यन्ति च कालस्यातिसूक्ष्मत्वात्तत्तु भवनमभवनं वा विवेकिभिर्न लक्ष्यते ४१ सतोर्जन्ममरणयोरज्ञानं कारणम्
तु तद्भवनमभवनयोः कुतस्त्याग्रह्यानुमानेन साधयति अर्चिषां परिमाणादिभिः स्रोतसां गन्त्यादिभिः फलानां
रूपा २ पाकादिभिर्यथावस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः आदिशब्देन तेजोबलकामक्रोश लोहितानामुपादानं
विमतं प्रतिक्षणोत्पत्तिविनाशवन्तः अवस्थाभेदवत्त्वात् दीपज्वालादिवदित्यनुमानं ४२ कथं तर्हि प्रत्यभिज्ञानं तदेवसादृश्याविले

नित्यदा ह्यंग भूतानि भवन्ति न भवन्ति च । कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ४१ यथार्चिषां स्रोतसां
च फलानां वा वनस्पतेः । तथैव सर्वभूतानां वयोवस्थादयः कृताः ४२ सोऽयं दीपोऽर्चिषां यद्वत् स्रोतसां
तदिदं जलं । सोऽयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां ४४ मा स्वस्य कर्मबीजेन जायते सोऽप्ययं पुमान्
८५ म्रियते वामरो भ्रान्त्या यथाग्निर्दारुसंयुतः ४५ निषेकगर्भजन्मानि बाल्यकौमारयौवनं । वयो
मध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ४६

विनिर्णयाह सोऽयमिति सादृश्यादर्चिषामेव यथा सोऽयं दीप इति प्रत्यभिज्ञा यथा च स्रोतसां प्रवाहजलानामेव तदिदं जलमिति
तथा सोऽयं पुमानिति धीर्गीश्च मृषा नृणां बहूनां शरीराणां मृषा व्यर्थमायुर्येषामविवेकिनां तेषां भवति ४४ ननु कथं देहाध्यास
दि २ सवतः पुंसः कर्मजन्ममरणानि संति नान्यस्येत्यवस्थान हि घटेन घटस्य पुरुषभेदेन सत्वमसत्वं चेति नात्र ज्ञस्यापि वस्तो
तस्तद्भावादित्याह मा स्वस्येति आत्मनः कर्मणा बीजभूतेन सोऽपि अजोऽपि पुमान् जायते म्रियते वा किंतु अयं भ्रान्त्या अज राम
न्मापि जायत इव अमरोऽपि म्रियत इव यथा महाभूतत्वेनाजन्मापि अग्निः काष्ठांतर्भावस्थितोऽपि दारुसंयोगवियोगाभ्यां जन्म ८५
नाशौ प्राप्नोतीति हेतुः ४५ सिद्धवत्कृत्योक्ता वयोवस्थाः प्रपंचयति निषेको जठरे प्रवेशः गर्भस्तन्मध्ये वृद्धिः बाल्यं आपंच
माराच् कौमारं आषोडशवर्षात् ततो यौवनमापंचचत्वारिंशतः ततो वयो मध्यमाषष्टिवर्षात् ४६ राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देहसंबंधाज्जन्ममरणादि नात्मन्युपपादितमर्थमुपसंहरति एता इति हि स्फुटं अन्यस्य देहस्य तनूः अवस्थाः गुणसंगात् प्रकृत्य विवेका
त् केश्चित्परमेश्वरानुगृहीतः कथं जहाति अवस्थावतो देहस्य द्रष्टा नावस्थावानिति विवेकज्ञानेन ४७ ननु तदानीं मूर्छितत्वेन
जन्ममरणे वा न देहानं दृश्यते तत्राह आत्मन इति पितृदेहस्यौर्ध्वदेहिकं कुर्वता प्ययदर्शनात् पुत्रदेहस्य च जातकर्मणो ज
न्मदर्शनात् आत्मनः स्वदेहस्यापि भवाप्ययावनुमेयौ एवं च दृश्यत्वे सति भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयल
क्षणः भवाप्ययधर्मको न भवति ४८ एतदेव दृष्टांतेन स्पष्टयति तरोरिति तनुशब्देनोक्तिऽङ्कुरमात्रोपलक्षणं फलपाको

एता मनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ४७ आत्मनः पितृ
पुत्राभ्यामनुमेयौ भवाप्ययौ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ४८ तरोर्बीजविपाकाभ्यां
यो विद्वान् जन्मसंयमौ तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ४९ प्रकृतेरेवमात्मानमविवि
च्याबुधः पुमान् तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ५० सत्त्वसंगादृषीन्देवान्रजसाऽसुरमानुषान्
तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ५१ नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् एवं बुद्धिगुणा
न्पश्यन्ननीहोऽप्यनुकार्यते ५२ श्रीराम

तस्य प्रीत्यादेरित्यर्थः यद्वा तरोरेवांत्यः परिणामो विपाकः बीजाज्जन्म विपाका
त्संयमनाशं च विद्वान् ४९ अविवेकिनः संसारं प्रपंचयति प्रकृतेरिति पंचभिः तत्त्वेन तत्त्वतोऽविविच्य तत्त्वदृष्ट्या स्पर्शेषु विषयेषु सं
मूढ इति ५० गुणभेदेन त्रिविधत्वं तत्रापि तत्तारतम्येनानेकविधं संसारमाह सत्त्वेति ५१ नन्वकर्तुरात्मनः कुतः कर्मभिर्भ्रमणं त
त्राह नृत्यतो जनान्पश्यन् अनुकरोति तत्कृतस्वरतालादिगतिं शृंगारकारुण्यादिरसं च मनसाऽनुवर्तयतीत्यर्थः अनुकार्यते गु
णैर्बलादित्यर्थः ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०प० अनेन दृष्टान्तेन दृश्यधर्मो द्रष्टरि स्फुरतीति दर्शितं उपाधिधर्मोऽप्युपहितेऽवभासत इत्यत्र दृष्टान्तमाह यथांऽभसेति तीरस्थास्तरवो
धावन्त इव दृश्यन्ते जले प्रतिबिंबितावाच चलाइवेति विषयग्राहकेन मनसा परिकल्पिता एवं तेषु लावण्यादयो गुणाः नवस्तु
तः संति अतो मनो निबंधन एव संसार इत्यभिप्रेत्य ग्राहकगुणा ग्राह्येऽवभासंत इत्यत्र दृष्टांतमाह चक्षुषेति ५३ भोगस्या
पि मिथ्यात्वे दृष्टान्तद्वयमाह यथेति यथा एतौ प्रसिद्धौ मनोरथधियः स्वप्नदृष्टाश्च धियोऽयथा मृषा एवमात्मनो विषयानुभ

यथांऽभसा प्रचलता तरवोऽपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ५३ यथा मनोरथधियो
विषयानुभवा मृषा स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ५४ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ध्या
यतो विषयानस्य स्वप्नेऽनर्थागमो यथा ५५ तस्मादुद्धव मा भुंक्ष्व विषयानसदिंद्रियैः आत्माग्रहणनिर्भा
तं पश्य वैकल्पिकं भ्रमं ५६ क्षिप्तोऽवमानितोऽसद्भिः प्रलब्धोऽसूयितोऽथवा ताडितः सन्निरुद्धो वा वृत्त्या वा प
रिहापितः ५७ निष्ठितो मूत्रितो वाज्ञैर्बहुधैवं प्रकंपितः श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ५८
उद्धव उवाच यथैवमनुबुध्येयं वद नो वदतां वर सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमं ५९

वः संसारो मृषा ५४ ननु यदि मृषा तर्हि किं तन्निवृत्तिश्रमेण तत्राह अर्थे हीति अस्यात्मनः ५५ अतो भोगोद्यमो न कर्तव्य इ राम
त्याह तस्मादिति ५६ दुःखप्रतीकाराद्यममपि परित्यज्य परमेश्वरनिष्ठेनैव भाव्यमित्याह क्षिप्त इति द्वाभ्यां क्षिप्त आक्षिप्तस्तु ८६
न्नइति वा प्रलब्धस्तु पहसितः ५७ निष्ठितः निष्ठीवितः विषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावि
तोऽपि कृच्छ्रगतः कष्टं प्राप्तोऽपि ५८ एवं त्वदुक्तं यथावबुध्येयं तथा नः सर्वान् प्रतिवद ५९ श्रीराम श्रीराम श्रीराम श्री

२२२

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० त्वद्भ्रमेनिक्षिप्तेनान्तेनविदुषामपित्र्यसद्भिः कृतमतिक्रमंत्र्यपराधंसुदुःसहंमन्यइत्यन्वयः प्रकृतिस्वभावः ६० निरस्यसर्वंसंदे
हानेकृष्णसुदर्शनं प्रकाशितरहस्यत्तभजामिगुरुमीश्वरं एकादशेद्वाविंशः चयोविंशेतिरस्कारसहनोपायईर्यते ॥
भिक्षुगीताप्रकारेणमनसःसंयमोधिया १ दुर्जनोपद्रवानूनंदुःसहोपिमहीयसां अतस्त्रत्रुर्भिरध्यायैःसहनोपायव
र्णनं २ तत्रतावदस्मिन्नध्यायेभिक्षुगीतयामनोविजयः उत्तरस्मिन्प्रकृतिपुरुषविवेकः तदुत्तरस्मिन्गुणवृत्तिविजयः

विदुषामपिविश्वात्मन्प्रकृतिर्हिबलीयसी ऋतेत्वद्धर्मनिरतांछांतांस्तेचरणालयान् ६१ इतिश्रीभाग
वतेमहापुराणएकादशस्कंधेभगवदुद्धवसंवादेद्वाविंशोध्यायः बादरायणिरुवाच सएवमाशंसितउ
द्धवेनभागवतमुख्येनदशार्हमुख्यः सभाजयन्भृत्यवचोमुकुंदस्तमाबभाषेश्रवणीयवीर्यः १ अ०२३
श्रीभगवानुवाच बार्हस्पत्यसनास्त्यत्रसाधुर्वैदुर्जनेरितैः दुरुक्तैर्भिन्नमात्मानंयःसमाधातुमीश्वरः
२ नतथातप्यतेविद्धःपुमान्बाणैस्तुमर्मगैः यथातुदंतिमर्मस्थाह्यसतांपरुषेषवः ३ कथयंतिमहत्पु
ण्यमितिहासमिहोद्धव तमहंवर्णयिष्यामिनिबोधसुसमाहितः ४ केनचिद्भिक्षुणागीतंपरिभूतेनदुर्ज
नैः स्मरताधृतियुक्तेनविपाकंनिजकर्मणां ५
ततःपरस्मिन्नेत्थगीतयाविषयसंगत्यागेनसत्संगादितिक्रमेणोपायाभगवतावर्ण्यंते आशंसितःप्रार्थितःभृत्यस्यवचःसुकुर्व
न्नितिभृत्यप्रतिश्रवभाष १ तत्रतावद्दोषाकारोचलतहत्त्वत सप्रजयतिद्वाभ्यांहेबार्हस्पत्यत्वद्बृहस्पतेःशिष्य अत्रलोकेसाधुर्नोस्ति
योदुर्जनोक्तैर्भिन्नंक्षोभितंमनःशमयितुमीश्वरःस्यात् २ कुतइत्यतआहनेति यथाममस्थाःमर्मस्वेवनित्यस्थिताःपरुषोक्तिरू
पाइषवःकादंतिव्यथयंतितथाइतरबाणानतुदंति अतस्तेतथानतप्यतइत्यर्थः ३ तथाऽपिमयावक्ष्यमाणेरुपायैःसर्वसोढु
शक्यमित्यभिप्रायेणेतिहासंप्रस्तौतिमहदितिथाभवतितथापुण्यमितिहासंगाथाकथयति ४ ५ ॥ श्री ॥ श्री ॥
३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० मतु भिक्षुः पूर्वं धनाढ्यः कष्टार्जितस्य धनस्य नाशेन संतप्यमानो नितिनिर्विण्णः सन्प्रव्रज्य भिक्षामटन् दुर्जनैरुपद्रुतः प्रशांतोपयोगिनीं गाथा
मगायत्तेति वृत्तांतं तस्य चरितमाह एवंतिष्वित्यादिना एवं निषु मालवेषु वार्त्ताकृषिवाणिज्यादिरूपा वृत्तिर्यस्य कदर्यश्च स्मृता तावुकाः
आत्मानं धर्मकार्यं च पुत्रदारांश्च पीडयन् देवतातिथिभृत्यांश्च स कदर्य इति स्मृत इति ६ तस्य यज्ञातयो बांधवाश्च तिथयः धनिना
नार्चिताइत्यर्थः शून्यावसथे धर्मकर्महीने गेहे देहे वा ७ यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य पंच भागिनः पंचय

दा। एवं तिषु द्विजः कश्चिदासीद्धनतमः श्रिया। वार्तावृत्तिः कदर्यस्तु कामी लुब्धो ऽतिकोपनः ६ ज्ञातयोऽति
थयस्तस्य वाङ्मात्रेणापि नार्चिताः शून्यावसथ आत्मापि काले कामैरनर्चितः ७ दुःशीलस्य द्रुह्यं कदर्यस्य २
८७ प्रियं१ ते पुत्रबांधवाः दारादुहितरो भृत्या विषण्णा नाचरन् ८ तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः धर्मका
मविहीनस्य क्रुद्धुः पंचभागिनः ९ तदव ध्यानविस्रस्त पुण्यस्कंधस्य भूरिद अर्थोऽप्यगच्छन्नि
धनं बह्वायासपरिश्रमः १० ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव दैवतः कालतः किंचिद्ब्रह्म व २
बंधोर्नृपार्थिवात् ११ स एवं द्रविणे नष्टे धर्मकामविवर्जितः उपेक्षितश्च स्वजनैश्चिंतामापदुरत्य
यां १२ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः खिद्यतो बाष्पकंठस्य निर्वेदः सुमहान्भूत् १३

तद्देवताः ९ तेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्कंधो ऽर्थलाभमात्रहेतुर्वेशायस्य तस्य बह्वाया राम ८७
सैः कृष्यादिभिः केवलं श्रमो यस्मिन्सः १० दैवतः गृहदाहा दिना कालतः निखातं धान्यादि नृपात्पार्थि
वानां च हृद्वैक्यं तस्मात् ११ २ नष्टरायः नष्टाराः अर्थाः यस्य तस्य तपस्विनः संतप्तस्य १३ श्रीराम श्रीराम श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेमयात्मादेहः वृथैवात्मानुतापनं प्रपंचयति न धर्मायेत्यादिना यस्येदृशोऽर्थायासस्तेन मया १४ नरकाय च सत्यप्यर्थे धर्माननु
ष्ठानात् १५ श्वित्रः श्वेतकुष्ठं सिद्धस्यार्थस्योत्कर्षे संवर्द्धने नाशोपभोगयोर्हि है कथं नाशस्तूपभोगे वेत्यर्थः साधनोत्कर्षयोरायासः
तत्रस्त्रासः चिंता च नाशे भ्रमइति १७ किंच अर्थप्राप्त्यर्थं स्तेयादयः षड नर्थाः प्राप्तेर्थे स्मयादयो व्यसनैः सहनव व्यसनानि स्त्री
द्यूतमद्यविषयाणि त्रीणि १८ १९ भेदवैरस्पर्द्धाः प्रपंचयति द्वाभ्यां भिद्यंते स्नेहं त्यजंति कथंभूताः एकाः स्निग्धाः एकएक
प्राणाः तेच तेश्च स्निग्धाः अतिप्रियाश्चेत्यर्थः कुतः काकणिना पुंस्त्वमार्षं विंशतिवराटिका काकिणी तया २० संरब्धाः क्षु

सचाहेदमहोकष्टं वृथात्मामेनुतापितः नधर्मायनकामाय यस्यार्थायासईदृशः १४ प्रायेणार्थाः कदर्याणां न सुखाय
कदाचन इहचात्मोपतापाय मृतस्य नरकाय च १५ य शोयशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः लोभः स्व
ल्पोपि तान् हंति श्वित्रो रूपमिवेप्सितं १६ अर्थस्य साधने सिद्धउत्कर्षे रक्षणे व्यये नाशोपभोग आयासस्त्रासश्चिं
ताभ्रमो नृणां १७ स्तेयं हिंसानृतं दंभः कामक्रोधः स्मयो मदः भेदो वैरमविश्वासः संस्पर्द्धा व्यसनानि च ॥१८
एते पंचदशानर्था ह्यर्थमूला मता नृणां तस्मादनर्थमर्थाख्यं श्रेयोऽर्थी दूरतस्त्यजेत् १९ भिद्यंते भ्रातरो दाराः पि
तरः सुहृदस्तथा एकस्निग्धाः काकणिना सद्यः सर्वेऽरयः कृताः २० अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः ॥
स्क. त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौहृदं २१ लब्ध्वाजन्मामरप्रार्थ्यं मानुष्यं तत् द्विजाग्र्यतां तदनादृत्य ये स्वार्थं
२ घ्नंति यांत्यशुभां गतिं २२ स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् द्रविणे कोनुसज्जेत मर्त्योऽनर्थस्य धामनि २३

भिन्नाः स्पृधः स्पर्द्धमानाः २१ इह तावदर्थनिष्ठानामेते नर्थाः परलोकेप्यनर्थ एवेतेषामित्याह लब्ध्वेति त्रिभिः मानुष्यं ज
न्मातत्र तत्रापि द्विजाग्र्यतां ब्राह्मण्यं स्वार्थं घ्नंति आत्महितं न कुर्वंति ये ते यांति २२ अमरप्रार्थ्यतां दर्शयन्नाह स्वर्गेति लो
केदेहे अनुषज्जेत आसक्तिं कुर्यात् २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० त्मपंयोमनुष्ययज्ञब्रह्मयज्ञयोर्देवताः देवपितृभूतानीतरेषु ज्ञातयः सगोत्राः बंधवो विवाहादीनासंबद्धाः तानू अन्यां अभागिनः
भागाहीन् आत्मानंच असंविभज्य अन्नादिभिरसंतर्प्य २४ एवं विमृश्यानुतप्यमान आह व्यर्थयार्थेहयाप्रमत्तस्यमम वित्तादि
गतमितिशेषः येन वित्तादिना कुशला विवेकिनः सिध्यंतिमुच्यंते जरंगे रुद्धः २५ अन्यमपिस्वसदृशंशोचति कस्मादेवमर्थं विद्वा न२
नपि संक्लिश्यति कारणं संभावयति कस्यचिदिति २६ ननु नायं मोहितः क्लिश्यति किंतु धनादिभिर्योगादिविधिसयात्रत्रा

देवर्षिपितृभूतानिज्ञातीन् बंधूंश्चभागिनः असंविभज्य चात्मानं यक्षवित्तः पतत्यधः २४ व्यर्थयार्थेहया वित्तं प्रम
ठ:२ त्तस्यवयोबलं कुशलायेनसिध्यंतिजरठः किंनु साधये २५ कस्मात्संक्लिश्यते विद्वान् व्यर्थयार्थेहयाऽसकृत् क
स्यचिन्मायया नूनंलोकोऽयंसुविमोहितः २६ किंधनैर्धनदैर्वा किंकामैर्वाकामदैरुत मृत्युनाग्रस्यमानस्य कर्म
८८ भिर्वोतजन्मदैः २७ नूनंमेभगवांस्तुष्टः सर्वदेवमयोहरिः येननीतोदशामेतां निर्वेदश्चात्मनः प्लवः २८ सो
हंकालावशेषेण शोषयिष्येंगमात्मनः अप्रमत्तोऽखिलस्वार्थे यदिस्यात्सिद्ध आत्मनि २९ तत्रमामनुमोदेर
न्देवास्त्रिभुवनेश्वराः मुहूर्तेनब्रह्मलोकंखट्वांगः समसाधयत् ३० श्रीभगवानुवाच इत्यभिप्रेत्य मनसा
ह्यावंत्योद्विजसत्तमः उन्मुच्यहृदयग्रंथीन्शांतोभिक्षुरभून्मुनिः ३१ श्रीराम श्रीराम श्रीराम श्रीराम

हकिंधनैरिति उतपुनरपि २७ इदानीं संपन्नविवेकः संहृष्यन्नाह नूनमितित्रिभिः येन प्रीतेनात्मनः प्लवरूपोनिर्वेदश्चभवतिस
हरिर्मेनूनं प्रीतइति २८ अंगंशोषयिष्ये तपसा यद्वाविद्यायालयंनेष्यामि यदिस्यात्कालावशेषस्तर्ह्यात्मन्येवसिद्धस्तुष्टः
सन् अखिलेस्वार्थेधर्मादिसाधनेऽप्रमत्तः सन् २९ अनुमोदेरन् अनुगृह्णंतु ननु देवैरनुमोदितोऽपिजरठः स्वल्पेन राम
कालेन किंसाधयिष्यसि तत्राह मुहूर्तेनेति ३० अभिप्रेत्य निश्चित्य आवंत्यः अवंतिदेशभवः हृदयग्रंथीन् अहंकार ८८
ममकारान् ३१

असंगः आसक्तिशून्यः अलक्षितः श्रेष्ठमंधानयन् ३२ प्रवयसं वृद्धं अवधूतं मलिनं पर्यभवन् अवमेनिरे हे क्षुद्र परिभूतिभिः ति-
रस्कारैः ३३ परिभवानेव दर्शयति केचिदिति सप्तभिः ३४ भो भगवन् गृहाण निदर्शितानि संतिप्रदाय पुनः आददुः ३५ अन्ये
मूत्रयंति मूर्द्धनि चष्ठीवंति फूत्कारेण श्लेष्माणं प्रक्षिपंति ३६ ७ क्षिपंति निंदंति निंदामेवाह एष धर्मध्वजः त्रिदंडलिंगोपजी-
वी शठो लोकवंचकः नंदेवाहुः क्षीणवित्त इति ३८ महासारः अतिबली ३९ दुर्वातयंति दुष्पर्यो वायुं मुंचति बबंधुः अरुरव

मचचार महीमेतां संयतात्मेंद्रियानिलः भिक्षार्थं नगरग्रामान् संगोऽलक्षितो विशत् ३२ तं वै प्रवयसं भिक्षुमव-
क्षु धूतमसज्जनाः दृष्ट्वा पर्यभवन् भद्र बह्वीभिः परिभूतिभिः ३३ केचित्त्रिवेणुं जगृहुरेके पात्रं कमंडलुं पीठं चैके
क्षसूत्रं च कंथां चीराणि केचन प्रदाय च पुनस्तानि दर्शितान्याददुः पुनः अन्नं च भैक्षसंपन्नं भुंजानस्य सरित्तटे ३५ ८२
मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च मूर्द्धनि यतवाचं वाचयंति ताडयंति न वक्ति चेत् ३६ तर्जयंत्यपरे वाग्भिः स्तेनो-
यमिति वादिनः बध्नंति रज्ज्वा तं केचिद्बध्यतां बध्यतामिति ३७ क्षिपंत्येकेवजानंत एष धर्मध्वजः शठः क्षीण-
वित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ३८ अहो एष महासारो धृतिमान् गिरिराडिव मौनेन साधयत्यर्थं
बकवद्दृढनिश्चयः ३९ इत्येके विहसंत्येनमेके दुर्वातयंति च तं बबंधुर्निरुरुधुर्यथा क्रीडनकं द्विजं ४० एवं स
भौतिकं दुःखं दैविकं दैहिकं च यत् भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत ४१ परिभूत इमां गाथामा
मगायत नराधमैः पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्त्विकीं ४२ श्रीराम श्रीराम श्रीराम श्री

क्लेः निरुरुधुः कारागृहादिषु द्विजं शुकसारिकादि यथा ४० भौतिकं दुर्जनादिकृतं दैहिकं ज्वरादि निमित्तं दैविकं शीतोष्णा-
दिप्रभवं दिष्टं दैवप्राप्तं ४१ धर्मात्पातयद्भिः परिभूतोपि सात्त्विकीं धृतिमास्थाय स्वधर्म एव स्थितः इमां वक्ष्यमाणां गाथामा-
गायत सात्त्विकीं धृतीश्च धृत्यायया धारयते मनः प्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकीति स्मृ-
तेः ४२

भा०प० नोमवाष्टादशश्लोकीं गाथामाह नायमिति न चात्मा नापि ग्रहादयः मनः परं केवलं सुखदुःखयोः कारणं वदंति मनसा ह्येव प
श्यति मनसा शृणोतीत्यादिश्रुतयः ४३ परिवर्त्तनप्रकारमेवाह मन इत्यादि गुणाननु गुणवृत्तीः सृजति ततस्तेभ्यो गुणेभ्यः शुक्ला
नि सात्विकानि कृष्णानि तामसानि लोहितानि राजसानि सवर्णाः सत्वात्मकमानुरूपाः सृतयः देवतिर्यङ्नरादिगतयः ४४ जा३
नहि मनस एव संसारः स्यान्नात्मन इत्याशंक्याह अनीह इति अयमर्थः अविद्यया मनोध्यासेन यमात्मनः संसृतिर्न तु स्वतः
यतस्त[illegible]हितस्येश्वरस्य सा नास्ति किंतु तद्वतो जीवस्यैवेति तदेतदाह मनसा समीहमानेन सह नियंतृत्वेन वर्त्तमानोपि पर

द्विज उवाच नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः मनः परं कारणमामनंति संसारचक्रं परि
वर्त्तयेद्यत् ४३ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि शुक्लानि कृष्णान्यथ लोहितानि ते
भ्यः सवर्णाः सृतयो भवंति ४४ अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे मनः स्वलिंगं
दर्श परिगृह्य कामान्जुषन्निबद्धो गुणसंगतोऽसौ ४५ दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि
सर्वे मनोनिग्रहलक्षणांताः परो हि योगो मनसः समाधिः ४६

मात्मा अनीहः तत्क्रियासंगरहितः यतो हिरण्मयः विद्याशक्तिप्रधानः कुतः यतो मत्सखः मम जीवस्य सखा नीयंता अतः गम
उद्विचष्टे अतिरोहितज्ञानेन केवलं पश्यतीत्यर्थः असौ पुनरहं जीवः स्वलिंगं स्वस्मिन्नात्मनि लिंगयति द्योतयति
संसारमिति तथा तन्मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः संबद्धः गुणसंगाद्वा कामान् दर्श
जुषन्निबद्ध इति ४५ अतो मनोनिग्रहे कृते सर्वं कृतं स्यात् तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां स्वधर्मः नि
त्यनैमित्तिकः सद्व्रतान्येकादश्युपवासादीनि अन्यानि च यावंति कर्माणि एते सर्वे उपाया मनोनिग्रहलक्षणाः अंतो नि
ष्ठा फलं येषां तेन तथा ननु ज्ञानांगत्वं तेषां प्रसिद्धं तत्राह मनसः समाधिर्निग्रह एव परो योगो ज्ञानं ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतो यस्य मनः समाहितं भवति नास्य किंचित्कृत्यमस्ति वेदेति परं प्रत्युपदिशन्निव स्वयमेवाह असंयतं विक्षिप्तं चेत् यद्वा विनश्यत् आलस्या
दिना लीयमानं चेद्भवेत् न हि एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् न किंचिदित्यर्थः ४७ नन्वितरेन्द्रियजयः प्रयोजनं स्यान्नेत्याह
मनोवशा इति हे वा इन्द्रियाणि तदधिष्ठातारो वा भीष्मः योगिनामपि भयंकरो मनोलक्षणो देवः कुतः सहसः बलादपि बलिनो
पि वा महीयान् बलीयान् अतस्तं यो वशवर्तिनं कुर्यात्स एव देवदेवः सर्वेन्द्रियजेता भवति नान्य इति तथा च श्रुतिः मनसो वशे
सर्वमिदं बभूव नान्यस्य मनो वशमन्वियाय भीष्मो हि देवः सहसः सहीयानिति ४८ अतः असह्या रागादयो विगायस्य

समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यं असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं
किमेभिः ४७ मनोवशेऽन्ये ह्यभवंस्म देवा मनश्च नान्यस्य वशं समेति भीष्मो हि देवः सहसः सहीयान्यु
ञ्ज्याद्वशे तं स हि देवदेवः ४८ तं दुर्जयं शत्रुमसह्यवेगं मनस्तुदं तन्न विजित्य केचित् कुर्वन्त्यसद्विग्रहमत्र
मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४९ देहं मनोमात्रमिमं गृहीत्वा ममाऽहमित्यन्धधियो मनुष्याः ए
षोऽहमन्योऽयमिति भ्रमेण दुरन्तपारे तमसि भ्रमन्ति ५० श्रीराम श्रीराम श्रीराम श्रीराम श्री

तं अत एव अरुंतुदं अत्यर्थं मर्म तनुदति व्यथयतीत्यरुंतुदः तं न तन्नेति च्छेदः तं न विजित्य अजित्वा ततः ये केचिन्मर्त्यैः के
चित् असद्विग्रहं कुर्वन्ति तत्र चानुकूलप्रतिकूलादीन् कुर्वन्ति ते मूढा इत्यर्थः ४९ ततः अतः अनेन प्रकारेण संसारे भ्रम
न्तीत्याह देहमिति मनोमात्रपरिकल्पितमिमं स्वदेहमिति पुत्रादिदेहं च ममेति स्वीकृत्य तमसि संसारे ५० राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुखं।

भा०ए० तदेवं मनस एव दुःखकारणत्वमुपपाद्येदानीं जनादीनां षण्णामकारणत्वं प्रपंचयति जनस्त्विति षड्भिः अत्र च अस्मिन्नपि पक्षे आ
त्मनः किं न किंचित् सुखदुःखकमेतत् न तत्कर्तृत्वं चेत्यर्थः कुत इत्यत आह हि निश्चितं भौमयोर्भूविकारयोर्देहयोस्तत् न चा
त्मनः अमूर्त्तस्याक्रियस्य ताडनादिषु कर्मत्वं कर्तृत्वं वानुपपत्तेः तथापि दुःखमात्मपर्य्यवसाय्येवेति चेत् एवमपि परमा
त्मन उभयत्राप्येकत्वान्न कोपविषयोऽस्तीति स्वदृष्टान्तेन दर्शयति जिह्वामिति ५१ यदि देवतान्यस्तो नाम तत्रापि पक्षे आ
त्मनः किं यतो विकारयोर्विक्रियमाणयोर्देवतयोस्तत् हस्तेन मुखं हि हन्तेन वाहस्तो दृष्टेन्द्रिमानिनोर्वन्ही द्वयोरेव तत्
न त्वविक्रियस्यानहंकारस्य चात्मनः देवतानां च सर्वदेहेष्वभेदान्न कोपविषयोऽस्तीति स्वदेहदृष्टान्तमाह यत् यदा

जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेद
नायां कतमाय कुप्यत् ५१ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् यदंगमंगेन नि
६० हन्यते क्वचित्क्रुध्येत कस्मै पुरुषः स्वदेहे ५२ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्व
भावः न ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखं ५३ राम राम राम श्री

अंगं देवताधिष्ठानं हस्तं मुखादि अत एव पूर्वत्र देवतानधिष्ठानत्वेन भूविकारदंतोदाहरणं ५२ आत्मनः सुखदुःखा ६०
द्याकारः परिणामः अतः स एव हेतुर्यदि स्यात्तत्र तस्मिन्पक्षे अन्यतः किं न किंचिदन्यतो भवति यस्मै कुप्येदित्यर्थः य राम
तो निज एव स्वभावः सः स्वात्मनस्तथा परिणामोऽन्यनिमित्तो भवति अतोऽस्ति कोपविषय इति चेत् तत्राह न हीति आ ६०
त्मव्यतिरिक्तं नास्त्येव यदि स्यात् अस्तीति प्रतीयेत तर्हि तन्मृषैव अतस्तस्मात्कस्माद्धेतोः क्रुध्येत् यतो नास्ति निमित्तं न
च सुखं दुःखं चेत्यर्थः ५३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि यस्मात् कर्मणो जडाऽजडत्वे चैतन्याभासाभासितसूक्ष्मदेहे वृत्तिः स तु देह अचित् जडः यद्वा ४

ग्रहपक्षेप्यजस्यात्मनः किं यतो जन्मतद्गतिजनो देहस्तस्यैव जन्मलग्नापेक्षया द्वादशाष्टमादिराशिस्थास्ते सुखदुःखयो
र्निमित्तं भवंति किंच अंतरिक्षस्थे ग्रहे सात्रस्थस्य ग्रहस्यैव पादाद्यौदिदृष्ट्यादिभेदैः पीडां वदंति ग्रहविदः ननु ग्रहकोणादि
दुःस्थितस्य तद्दृष्टिगोचरस्य पुरुषस्य ग्रहगतो ऽपि तु पीडा न स्थूलं ग्रात्पन्ने देहे तस्याभिमानाद्भवति अतः पुरुषस्ततो ग्रहान् दे
हाच्चान्यः कस्मै क्रुद्ध्येत ५४ कर्म हेतुश्चेत् अस्तित्यभ्युपगमः कर्मैव नास्ति कुतस्तस्य हेतुत्वमिति तत्राह हि यस्मात्तत्क
र्म एकस्य जडाजडत्वे सति स्यात् जडत्वाद्धि कारित्वोपपत्तेः अजडत्वाच्च हितानुसंधानतः प्रवृत्तिसंभवात् अचिज्ज

ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽजस्य जनस्य ते वै ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुद्ध्येत कस्मै पुरुष
स्ततोऽन्यः ५४ कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे देहस्त्वचित्पुरुषोऽयं सुप
र्णः क्रुद्ध्येत कस्मै न हि कर्म मूलं ५५ कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोऽसौ
नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुद्ध्येत कस्मै न परस्य द्वंद्वं ५६ श्रीराम श्रीराम श्रीराम श्री

ड्देहः अतस्तस्य प्रवृत्तिर्न संभवति पुरुषस्तु सुपर्णः शुद्धज्ञानस्वरूपः अतः कस्मै क्रुद्ध्येत् यतः सुखदुःखयोर्मूलं
भूतं कर्मैव नास्तीति ५५ तत्र कालपक्षेपि आत्मनः किं यतोऽसौ कालात्मक एव व्यंशांशत्वात् स्वांशस्य स्वतः पीडा नास्ती
त्यत्र दृष्टांतः नाग्नेर्हि तोस्तद्देशस्य ज्वालादेस्तापो दाहत्वेनाग्नेऽस्ति तत्रोपाधिभूतकाष्ठांशदाहोऽन्नाशः स्यादिति दृष्टांतांत
रमाह हिमस्य तत् शैत्यं तद्देशस्य तुषारकणस्य नाशकं न स्यादित्यर्थः किंच आत्मानं शाश्वं वस्तुतः पर एवायं न च पर
स्य द्वंद्वं सुखदुःखादिकमस्तीति ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री

भा॰ ए॰ तदेवं षड्भिर्हेतवः प्रसिद्धा निरस्ताः यदि कश्चिद्दुःखं तत्र मुद्भावयेत् तदपि वस्तुमहिमावेक्षायां न संभवतीत्याह न केनचिदिति
नन्वपरोक्षः कथमपह्नूयते तत्राह यथेति संसृतिमेव विद्यमानामेव रूपयति प्रकाशयतीति तथा तस्य अहमः अहंकारस्य यथा
स्यात् न तथा परतः प्रकृतेः परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तः सोनवास्तवइत्यर्थः एवं प्रबुद्धायाः सम्यग्ज्ञानवि
भेति ५७ अतोऽहमप्येतयैव परमात्मनिष्ठया तरिष्यामीत्याह एतामिति सोहमित्यन्वयः नन्वियं निष्ठैव कथं भवेत्तत्राह

न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य यथाऽहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभे
ति भूतैः ५७ एतां स मास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः अहं तरिष्यामि दुरंतपारं तमो मु
कुंदांघ्रिनिषेवयैव ५८ श्रीभगवानुवाच निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थं निराकृतो
११ सद्भिरपि स्वधर्मादकंपितो मूं मुनिराह गाथां ५९ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः मित्रोदासी
नरिपवः संसारस्तमसः कृतः ६० तस्मात्सर्वात्मना तात निगृहाण मनो धिया मय्यावेशितया युक्त एतावा
न्योगसंग्रहः ६१ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः धारयञ्छ्रावयंछृण्वन्द्वंद्वैर्नैवाभिभूयते
६२ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे भिक्षुगीता नाम त्रयोविंशोऽध्यायः

मुकुंदेति ५८ प्रस्तावेन सह गाथार्थं संक्षेपतो दर्शयति द्वाभ्यां इत्थं नष्टद्रविणो निर्विद्य गतक्लमः प्रव्रज्य गां पर्यटन् असद्भिर्निराकृतो राम
पि स्वधर्मादकंपितः सन्मुनिरमूं गाथामगायतेत्यन्वयः ५९ मित्रोदासीनरिपवः सर्वोपि च संसारः तमसः अज्ञानेन आ ११
त्मनो मनसो विभ्रममात्रं कृतो न तात्त्विक इत्यर्थः ६० उक्तं द्वंद्वसहनोपायमुपसंहरति तस्मादिति ६१ मनोनिग्रहाशक्तावप्येत
च्छ्रवणादिनिष्ठस्य तत्फलप्राप्तिरित्याह य इति द्वंद्वैः सुखदुःखादिभिः भिक्षुगीतेति मि[illegible]रुचा भक्तिचित्तगतं हरिं मोहं निघ्नन्निहा
भाति परमानंदरूपतः ६२ एकादशे त्रयोविंशः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतुर्विंशतुसांख्येन मनोमोहो निवार्यते आत्मनः सर्वभावानामागमापायचिंतया । स्वपदं हंह भक्तानामदद्द्वायसंयमं । चित्तस्योक्ता
पुनः कृत्स्नः सांख्यमत्राह तत्कृते अद्वितीयात्परमात्मना मायया प्रकृतिपुरुषद्वारा सर्वं हेतुमुदेति पुनस्तत्रैव लीयत इत्यनुसंधानस्य
हृह भ्रमो निवर्त्तत इत्युक्तं सांख्यं प्रस्तौति अथेति पूर्वैः कपिलादिभिर्विनिश्चितं वैकल्पिकं भेदनिमित्तं भ्रमं सुखदुःखादिरूपं ॥१॥
अथाशङ्क्य कालत्वे ज्ञानं दृष्टा तेन हृदयप्रकृतित्वाप्यर्थे अविकल्पितं विकल्पशून्यमेकमेव ब्रह्मण्येव लीनमासीदित्यर्थः । कदेत्यपेक्षाया
टी.१ माह । अयुगयुगाभ्यः पूर्वं प्रलय इत्यर्थः तथा आदौ कृतयुगे तस्मिंश्च अन्यदापि यदा विवेकनिपुणा जना भवन्ति तदापि तेषां भेदाभू

श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितम् यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमम् १ आ
सीत्ज्ञानमथो अर्थ एकमेवाविकल्पितं यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे २ तन्मायाफलरूपेण केव टी.२
लं निर्विकल्पितं वाङ्मनोऽगोचरं सत्यं द्विधा समभवद्बृहत् ३ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ श्लोक २
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ४ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः मया प्रक्षोभ्यमाणायाः पु आ.नो.१
महान्सूत्रेण १ रुषानुमतेन च ५ तेभ्यः समभवत्सूत्रं संयुतः ततो विकुर्वतो जातो योऽहंकारो विमोहनः ६ श्रीराम श्रीराम

टी.१ वः २ तदिदं ब्रह्म वाङ्मनोऽगोचरं यथाभवत्तथा मायादृश्यं फलं तत्त्वकार्यं तद्रूपेण मायाविलासरूपेण वा द्विधाऽभूत् ३ तयो
र्द्विधाभूतयोरनयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी ४ अभवन्नभिव्यक्ता बभूवुः मया परमेश्वरेण जीवादृष्टप्रयुक्तेन त्वात्स
ष्टिः पुरुषानुमतेन यदा स्वस्यैव प्रकृतीक्षणरूपायाः पुरुषावस्थानदनुमतेन तद्द्वारेणेत्यर्थः ५ सूत्रं क्रियाशक्तिमान् प्रथमो विका
रः ततो महान् ज्ञानशक्तिः तत्त्वं महानेव प्रथमो विकारः प्रसिद्धः तत्रेह सूत्रज्ञानस्य क्रियागर्भत्वात् सूत्रेण संयुतः न पृथक् एके
मेव तत्त्वं क्रियाज्ञानशक्तिभ्यां द्विधोच्यत इत्यर्थः विमोहनः जीवस्य भ्रमहेतुः स जातः ६ राम राम राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११ यत्तत्तन्मात्रादीनां कारणं मनः शब्देन देवानामप्युपलक्षणं चिदचिन्मयः चिदाभासव्याप्तत्वादुभयरूपं इति जीवोपाधित्वं दर्शितं यद्यपि
तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेरन्नमयं हि सोम्य मन इत्यादिश्रुतेश्च प्रथमं भूतानि जायन्ते तेभ्यश्चापंचीकृतेभ्यः प्राणादि मन २
क्रमेण समष्ट्यात्मकं लिंगशरीरं पंचीकृतेभ्यश्च ब्रह्माण्डं तस्मिन्वैराजस्तदन्तर्यामी लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणः तन्नाभिपद्मे च
वैराजस्य भोगविग्रहश्चतुराननः ततो यथावसरमन्येषां जीवानामाविर्भाव इति प्रक्रिया तथापि चित्ताभिव्यक्तिपूर्वकोऽहंकारस्ततो भूते
न्द्रियादिव्यवहार इत्येतावता महदादिक्रमेण सृष्टिरुच्यते तथाचोक्तं मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्याचोदितान्यथा उपायः सोऽवतार

वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः ७ अर्थस्तन्मात्रिकाज्ज
८२ ज्ञे तामसादिंद्रियाणि च तैजसाद्देवता आसन्नेकादश च वैकृतात् ८ मया संचोदिता भावाः सर्वे संहत्यका
रिणः अंडमुत्पादयामासुर्ममायतनमुत्तमं ९ तस्मिन्नहं समभवमंडे सलिलसंस्थितौ मम नाभ्या
मभूत्पद्मं विश्वाख्यं तत्र चात्मभूः १०

यतो नास्ति भेदः कथं च्युतेति ७ तस्मात्त्रिविधात्त्रिविधप्रपंचोत्पत्तिं दर्शयति अर्थ इति तन्मात्रिकात् शब्दादितन्मात्रकारणात् तामसा
त् अहंकारात् अर्थो महाभूतरूपो जज्ञे बभूव भूतानामावरणस्वभावत्वात् इंद्रियाणि दश तैजसात् राजसात् तेषां प्रवृत्तिस्वभावत्वात् वैकृता
त् सात्त्विकात् देवताः दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः चन्द्रश्चेत्येकादश च शब्दात्मनश्च तेषां प्रकाशस्वभावत्वात् ८ ममैव राम
राज्ञोऽन्तर्यामिणः ९ सलिले संस्थितिर्यस्य तत्सलिलसंस्थिति तस्मिन्सलिलसंस्थितावण्डे श्रीनारायणरूपो लीलाविग्रहेण सम ८२
भवं स्थित इत्यर्थः विश्वाख्यं लोककारणभूतं तत्र चात्मभूः चतुराननरूपभोगविग्रहेण पुनर्वैराज एव तस्मिन्नाविर्भूत इत्यर्थः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रजसायुक्तोमदनुग्रहात्तपसाऽसृजत् भूः अतलादिसहिता भुवः अंतरिक्षलोकाः स्वः स्वर्गः महर्लोकोद्युपलक्षणं ११ लोक
सृष्टिप्रयोजनमाह देवानामिति सार्द्धेन ओको निवासः पदंस्थानं त्रितयात्परं महर्लोकादि भूमेरधः अतलादि १२ एवंभूतस्या
यां कारणमाह सार्द्धेन त्रिलोक्यां पातालादिसहितां योगादितात्तस्मान्नयथोत्तरं महर्लोकादयः मद्गतिर्वैकुंठलोकः १३
तत्रानुमद्गतिव्यतिरेकेण तत्रागतयश्चंचलाइत्याह वैराग्यार्थं मयाकालशक्तिनाधात्रापरमेश्वरेण कर्मफलप्रदेन हेतुभूते
नगुणप्रवाहसंसारे उन्मज्जति आसत्यलोकमुत्तमागतीः प्राप्नोति पुनर्निमज्जति आस्थावरं नीचागतीः प्राप्नोति १४ सृष्टि

२। सोऽसृजत्तपसायुक्तोरजसामदनुग्रहात् लोकान्सपालान्विश्वात्माभूर्भुवः स्वरितित्रिधा ११ देवानामोकआसीत्स्व
र्भूतानांचभुवः पदं मर्त्यादीनांचभूर्लोकः सिद्धानांत्रितयात्परं अधोऽसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः
१२ त्रिलोक्यांगतयः सर्वाः कर्मणांत्रिगुणात्मनां योगस्यतपसश्चैवन्यासस्यगतयोऽमलाः महर्जनस्त
पः सत्यंभक्तियोगस्यमद्गतिः १३ मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् गुणप्रवाहएतस्मिन्नुन्मज्ज न २
तिनिमज्जति १४ अणुर्बृहत्कृशः स्थूलोयोयोभावः प्रसिध्यति सर्वोप्युभयसंयुक्तः प्रकृत्यापुरुषेणच।
१५ यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन् विकारोव्यवहारार्थोयथातैजसपार्थिवः १६

निरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात्तत्प्रतिपादनाय कारणेन कार्यस्य व्याप्तिमाह अणुरिति उभयेन संयुक्तोव्याप्तः तदे
वाहप्रकृत्येति १५ इदानींकार्यस्यकारणात्मतांदर्शयति यस्यकार्यस्ययआदिः कारणं अंतः लयस्थानं शैलस्य मध्यंम
ध्यावस्थापि सएव वैप्रसिद्धं मृत्सुवर्णादिषु अतएवाव्यभिचारित्वात्सएवसन् नेतरः अलंनहि मिथ्याभूतकार्ये सृष्टा
न्तत्राह विकारइति तैजसाः कटककुंडलादयः पार्थिवाघटशरावादयश्चयथेति १६ राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवं तर्हि स्वकार्यं प्रति महदादीनामप्यवधित्वरूपत्वात्सत्यत्वं स्यात् तत्राह यदिति यद्रूपमुपादाय उपादानकारणत्वेनाश्रित्य पूर्वः कारणरूपो महदादिर्भावः परं अहंकारादिकं भावं विकुरुते सृजति यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत्स एवं सन्निति पूर्वस्यानुषंगः कथं तर्हि मृत्तिकेत्येव सत्यमित्यादिश्रुतिस्तत्राह आदिरिति यद्यदा यस्यादिरंतश्च विवक्ष्यते तदा तत्सत्यमित्यभिधीयते अत्यापरमकारणस्यात्मनः सत्यत्वं विवक्षितमित्यर्थः १७ ननु तथापि प्रकृतिपुरुषकालानामकार्यभूतानां भिन्नत्वात्कथमद्वितीयत्वं तत्राह प्रकृतिरिति अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा यश्च

यदुपादाय पूर्वस्तु भावो विकुरुते परं आदिरंतो यदा यस्य तत्सत्यमभिधीयते १७ प्रकृतिर्ह्यस्यो
पादानमाधारः पुरुषः परः सतोभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं १८ सर्गः प्रवर्त्तते ताव
त्पौर्वापर्येण नित्यशः महान्गुणविसर्गार्थः स्थित्यंतो यावदीक्षणं १९ राम राम रामरा

९३

तस्या आधारः अधिष्ठाता परः पुरुषः यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मरूपोऽहमेव न तु पृथक् प्रकृतेः शक्तित्वात् पुरुषकालयोरवस्थारूपत्वात् १८ एवं तावत्कालत्रयेऽप्यव्यभिचारित्वात् ब्रह्मैव सत्यमितिव क्तं तस्य सृष्टिकारणत्वेनादौ सत्त्वमुक्त्वा मध्येऽपि तस्यैव सत्त्वमुपपादयितुं अवधित्वेन सत्त्वं दर्शयिष्यन् सर्गप्रवाहरूपायाः स्थितेरवधिमाह सर्ग इति महान्बहुलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन किमर्थं प्रवर्त्तते तत्राह गुणेषु देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवः तदर्थः तद्भोगप्रयोजनः किंपर्यंतं प्रवर्त्तते यावत् स्थित्यंतः सापि किमवधिः तत्राह यावदीक्षणं परमेश्वरस्य तावत् १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रलयं निरूपयति विराड्ब्रह्मांडमया कालात्मनाऽऽसाद्यमानः व्याप्यमानः लोकानामहरहः कल्पाः सृष्टिप्रलयाश्च विविधाः क
स्व२ ल्प्यंते यस्मिन् तान्वाऽस्मिन्विकल्पयतीति तथा सत्तथाभूतोपि पंचत्वं रूपाय विशेषाय विभागाय कल्प्यंते योग्यो भवति पंचानां भू
तानामैक्यरूपे स्वेषां पृथक्त्वाय यानश्यतीत्यर्थः २० तत्र तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोर
ग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नं अन्नात्पुरुष इति श्रुत्युक्तसृष्टिक्रमप्रातिलोम्येन प्रलयमा
ह अन्नइ मिति मर्त्यशरीरे येनापचितं तस्मिन्नन्ने शतवर्षायामनावृष्टौ क्षीणे सति तत्रैव लीयते इत्यर्थः अन्नं धानासु बीजमा

विराण्मयासाद्यमानो लोककल्पविकल्पकः पंचत्वाय विशेषाय कल्पते भुवनैः सह २० अन्ने प्रलीयते मर्त्य
मन्नं धानासु लीयते धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते २१ अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे
लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते २२ रूपं वायौ स च स्पर्शे लीयते सोऽपि चांबरे अंबरं शब्दत
न्मात्र इंद्रियाणि स्वयोनिषु २३

मात्रावशेषं भवतीत्यर्थः धाना भूमौ उत्थानप्ररोहंतीत्यर्थः भूमिर्गंधे संवर्त्तकादित्यशोषिता संकर्षणमुखाग्निना दग्धा च सती
भूतसूक्ष्मरूपगंधमात्रावशेषा भवति २१ अप्सु गंधः शतवर्षयावत्स्माप्लाव्यमानोऽप्सु लीयते एवमेवापश्च ज्योतिषा शोष्यमा
णा रसमात्रावशेषा भवति ततो रसोपि तस्मिंल्लीयते ज्योतिश्च वायुनाऽभिभूयमानं रूपमात्रं सत्तस्मिंल्लीयते २२ वायुश्च
कालप्रेरितेनावरणग्रस्तः स्पर्शमात्रः सन् तस्मिन् अंबरं च भूतादिनाहंकारेण ग्रस्यमानं शब्दतन्मात्रं तदेवं तामसाहं
ये२ कारकार्यस्य शब्दपर्यंतं लयमुक्त्वा राजसाहंकारकार्यस्याप्याह इंद्रियाणि स्वयोनिष्विति स्वप्रवर्तकदेवतासु तेषां प्रवृ
त्तिस्वभावत्वात्प्रवृत्तेश्च देवताधीनत्वात्तासु लय इति वाचोयुक्तिः वस्तुतस्तु स्वकारणे राजसाहंकारे लयोऽभिप्रेतः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री २ स्प २

भा०ए० योनिरित्युद्देश्यपगतत्वा देवकालमविवक्षितं योनयो देवतास्ता मनसि कुतः ईश्वरे नियंतरि मनोवशेन्द्रियह्यभवन्देवा इत्युक्तत्वात्
इंद्रियलयोक्त एवांप्यभिप्रायः मनश्च देवताभिः सहैव वैकारिके अहंकार इत्यर्थः तामसाहंकारकार्यविशेषितस्य शब्दस्य लय
माह शब्दो भूतादिं तामसाहंकारं अप्येति तस्मिन् लीयत इत्यर्थः भूतादिरित्युपलक्षणं त्रिविधोऽप्यहंकारो महति जडांश
विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् २४ स च महान् स्वकारणेषु गुणेषु
ज्ञानक्रियाशक्तिमत्त्वाद्गुणवत्तमः स्मात् ह्याशं विहाय गुणमात्ररूपो भवति ते अव्यक्ते प्रकृतौ साम्यावस्थां गच्छंतीत्यर्थः तदव्य

योनिर्वैकारिके सौम्य लीयते मनसीश्वरे शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः २४ स लीयते महान्स्वे
षु गुणेषु गुणवत्तमः ते ऽव्यक्ते संप्रलीयंते तत्कालं लीयते ऽव्यये २५ कालो मायामये जीवे जीव आत्मनि म
ए४ प१ य्यजे आत्मा केवल आत्मस्थो विकल्पापायलक्षणः २६ श्रीराम श्रीराम श्रीराम श्रीराम श्री

क्तं कालो कालाधीनत्वात्तेनैकीभूयावतिष्ठते अप्ययेन परतंत्रत्वात् २५ मायामये मायाप्रवर्तके ज्ञानमये वा अत एव जीवयतीति
जीवस्तस्मिन्महापुरुषे अयं भावः विश्वस्रष्टुर्महापुरुषस्योपकरणरूपः कालो ह्यंशेन सह्य अत्र अतस्तादात्म्येनावतिष्ठते
इति तदुक्तं सप्तमे कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृदिति दशमे च योयं कालस्तस्य तेऽव्यक्तबं राम
श्रेष्ठा माहुः २ धो चेष्टामाहुर्येन विश्वं निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये इति जीव आत्मनि प्रकृतौ लीनत्वेन प्र ए४
तियोग्यभावात् परिपूर्णेन सद्रूपेणावतिष्ठते आत्मा तु आत्मस्य एव नान्यत्र लीयते यतः केवलो निरुपाधिः अत्र हे
तुः विकल्पापायाभ्यां विश्वोत्पत्तिलयाभ्यां लक्ष्यते अधिष्ठानत्वेनावधित्वेन चेति तथा सः २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यकथनस्यप्रसक्तोपयोगमाह एवमिति मनसः कथंभेदनिमित्तोभ्रमःस्यात् जातोवाकथंहृदितिष्ठेदिति २७ उपसंहरति एषइति
प्रत्यक्षमिवयेनदर्शितंतत्त्वमात्मनः सांख्यप्रख्यानकर्त्रेऽस्मैहरयेगुरवेनमः २८ एकादशेचतुर्विंशः पंचविंशस्त्वनेगुण्यप्रति
पत्त्यैनिरूप्यते चित्तप्रभवसत्त्वादिगुणवृत्ति[illegible]रनेकधा प्रकृतिपुरुषविवेकज्ञानवतोऽपियावत्त्रयस्तावद्विशेषणगुणत्रयवृत्ति
श्लो३ जयोनस्यात् तावत्कैवल्यापरमः अतस्तज्जयोपायकथनायगुणवृत्तिनिरूपणार्थमाह गुणानामिति सहमिश्रीभूयवर्त्त
मानाः समिश्राः नसमिश्राअसमिश्रास्तेषांविभक्तानांगुणानांमध्येयेनगुणेनयथायादृशोभवेत् तदिदंकथ्यतेमत्तो
निबोधेत्यर्थः १ तत्रसत्त्ववृत्तीराह शमइतिइक्षाविवेकः तपः स्वधर्मेवर्त्तित्वस्मृतिः पूर्वापरानुसंधानं तुष्टिर्यथालाभ

एवमन्वीक्षमाणस्यकथंवैकल्पिकोभ्रमः मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः २७ एषसांख्यविधिःप्रोक्तःसं
शयग्रंथिभेदनः प्रतिलोमानुलोमाभ्यांपरावरदृशामया २८ इतिश्रीभा०म०ए०भगवदुद्धवसंवादेसांख्यकथ
नंचतुर्विंशतितमोऽध्यायः श्रीभगवानुवाच गुणानामसमिश्राणांपुमान्येनयथाभवेत् तन्मेपुरुषवर्येदमुपधा सोचं
श्लो२ रयशंसतः १ शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः तुष्टिस्त्यागोऽस्पृहाश्रद्धाह्रीर्दयादिःस्वनिर्वृतिः २
कामईहामदस्तृष्णास्तंभआशीर्भिदासुखं मदोत्साहोयशःप्रीतिर्हास्यंवीर्यंबलोद्यमः ३ श्रीराम श्रीरा

संतोषः त्यागोव्ययशीलत्वं अस्पृहावैराग्यं श्रद्धाआस्तिक्यं ह्रीः अनुचितेकर्मणिलज्जा दयाः दानंगतिरक्षणंवित्तिस्मरणा दयादान १
तु आदिशब्देनार्जवविनयादिः स्वनिर्वृतिः आत्मरतिः २ रजसोवृत्तीराह कामोभिलाषः ईहाव्यापारः मदोदर्पः तृष्णा
लोभेसत्यप्यसंतोषः स्तंभोगर्वः आशीः धनाद्यभिलषणंदेवतादिप्रार्थनं भिदासुखंविषयभोगः मदोत्साहः मदेनयु
द्धाद्यभिनिवेशः यशःप्रीतिः स्तुतिप्रियता हास्यमुपहासः वीर्यंप्रभावाविष्कारः बलेनोद्यमः न्यायेनोद्यमः सात्विक
एव ३

अहमन्यइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० तमोऽहत्तीराहक्रोधइति लोभोव्ययपराङ्मुखता क्लमः श्रमः कलिः कलहः शोकमोहौ अनुशोचनं भ्रमश्चविषादार्त्तीदुःखंदैन्यंचानि
द्रातंद्रीआशाइदंमेभविष्यती त्यनयोक्ताभीः भयं अनुद्यमोजाड्यं ४ अनुपूर्वशः क्रमेणएताः श्लोकात्रयोक्ताः वर्णितप्रायाः अन्या
अप्युह्याइतिभावः ५ विभक्तानांगुणानांवृत्तेयावर्णिताः मिश्राणांसाहसन्निपातइतित्रिभिः अहंममेतिचमत्वानुक्तेसर्वत्र
त्रिसोमानाधिकरण्यदर्शनात्संन्निपातत्वं अहंशान्तः कामीक्रोधीत्यादि तथाममशांतिरस्ति कामः क्रोधइत्यादिद्रष्टव्यं
तत्पूर्वकः सर्वोव्यवहारश्चसन्निपातकार्यमित्याहव्यवहारइति अत्रहेतुः मनश्चमात्राणिचइंद्रियाणिचअसवश्चतेः मन

क्रोधोलोभोनृतंहिंसायाञ्चादंभःक्लमःकलिः शोकमोहौविषादार्त्तीनिद्राशाभीरनुद्यमः ४ सत्वस्यरजसश्चै
तास्तमसश्चानुपूर्वशः वृत्तयोवर्णितप्रायाःसन्निपातमथोशृणु ५ सन्निपातस्त्वहमितिममेत्युद्धवयामतिः व्य
५ वहारःसन्निपातोमनोमात्रेंद्रियासुभिः ६ धर्मेचार्थेचकामेचयदासौपरिनिष्ठितः गुणानांसन्निकर्षोयंश्रद्धा
रतिधनावहः ७ प्रवृत्तिलक्षणेनिष्ठापुमान्यर्हिगृहाश्रमे स्वधर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ८

श्वादीनांसात्विकतामसराजसवृत्तीनांव्यवहारः सन्निपातजइतिभावः ६ असौपुरुषोयदाधर्मादिषुपरिनिष्ठितोभवति
तदाश्रयःत्रिषुनिष्ठारूपःसन्निकर्षः सन्निपातकार्यं धर्मादीनांसत्वतमोरजः कार्यत्वात् विषयतःसन्निपातत्वंमुक्ते
फलतश्चतथात्वमाह श्रद्धारतिधनानिसत्वरजस्तमोमयान्यावहतीतितथा ७ धर्मनिष्ठायामेवसन्निपातंदर्शयति प्र राम
वृत्तिलक्षणकाम्यधर्मेयदापुंसोनिष्ठाभवति तथापुमान् यदागृहाश्रमएवासक्तोतिष्ठेत् अनुपश्चात् स्वधर्मेचनित्य ९६
नैमित्तिकेतिष्ठेत् सापिसमितिःसन्निपातः हियस्मात्काम्यधर्मेगृहासक्तिःस्वधर्मोरजस्तमःसत्वमयाइत्यर्थः ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवं मिश्राभिश्च गुणवृत्तीः प्रदर्श्येदानीं पुमान् येन यथा भवेदिति यदुक्तं तद्दर्शयति पुरुषमिति त्रिभिः ९ १० हिंसां शत्रुमरणादि
कं माशास्य यो भजेत्तं तामसं विद्यात् एतैर्गुणैरेवं भूतो भवतीति तात्पर्यार्थः ११ ननु त्वयापि गुणावेशेन कर्तृत्वाविशेषात्केन विशे
षेण त्वं सत्वाजीवश्च ससत्वकइति नियमः येनामां भजंते निवारंवारं मुच्यंते तत्राह सत्वमिति जीवस्यैव न मे कुतः येन चित्तजाः
जीवोपाधौ चित्ते निष्पद्यन्ते अतो यैः स एव बध्यते कीदृशः भूतानां देहरूपाणामन्येषां च ममैषसज्जमानः अहं तु नासज्ज
मानो गुणनियंतृत्वेन सृष्ट्यादिकर्तापि नित्यमुक्तः अतो महान् विशेष इति भावः यद्वा भूतानामपंचीकृतानां यत्कार्यं भू
तं चित्तं अन्नमयं हि सोम्य मन इति श्रुतेः तेन प्रभावा आतो भूतोपहितस्य जीवस्यैवेति अन्यत्समानं १२ तदेवं मिश्रा

पुरुषं सत्वसंयुक्तमनुमीयाच्छमादिभिः कामादिभिरजोयुक्तं क्रोधाद्यैस्तमसायुतं ९ यदा भजति मां भक्त्या
निरपेक्षः स्वकर्मभिः तं सत्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा १० यदा आशिष आशास्य मां भजेत स्वकर्मभिः
तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं ११ सत्वं रजस्तम इति गुणा जीवस्य नैव मे चित्तजा यैस्तु भूतानां
सज्जमानो निबध्यते १२ यदेतरौ जयेत्सत्वं भास्वरं विशदं शिवं तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान्
१३ यदा भजेत्तमः सत्वं रजः संगं भिदा चलं तदा दुःखेन युज्येत कर्मणा यशसा श्रिया १४ राम राम राम

मिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणोद्रेककर्माणि दर्शयति यदेतराविति सप्तदशभिः यदेतरौ गुणौ जयेत् अभिभवेत्
भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शांतं शिवत्वविशदत्वभास्वरत्वानां यथाक्रमं सुखधर्मज्ञानहेतुत्वात्तदेति युज्येत। आ
दि शब्दाच्छमदमादिभिश्च १३ तमः सत्वं च कर्मभूतं रजः कर्तृ संगं संगहेतुः भिदाभेदहेतुः चलं प्रवृत्तिस्वभावं अतः
संगहेतुत्वात् यशसा श्रिया च युज्येत न त्कामः पुमान् भवतीत्यर्थः भिदाहेतुत्वाद्दुःखेन युज्येत द्वितीयाद्भयं भवतीति श्रुतेः
चलत्वात्कर्मणा च युज्येत १४

त्री २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९१ यदारजः सत्त्वं च कर्मभूतं तमः कर्तृ जयेत् मूढं विवेकभ्रंशं कलयं आवरणात्मकं जडं अनुद्यमात्मकं अतो मूढत्वाच्छोकमोहहिंसा
भिः लयत्वान्निद्रया जडत्वादुद्यमाभावेन केवलमाशया युज्येतेति द्रष्टव्यं जनइति पाठे लयात्मकत्वमेव निद्राशयोर्हेतुः १५
किंच यदा चित्तप्रसीदेत स्वस्थं भवत् निर्वृतिरुपरतिः तत्तदा मत्पदमदुपलब्धिस्थानं सत्त्वमुद्रिक्तं विद्धि १६ यदा पुनः क्रिय
९२ या विकुर्वन् विकारं प्राप्नुवत् अधीर्भवति आसमन्ताद्विक्षिप्ता धीर्यस्य सः चेतसां बुद्धीन्द्रियाणां अनिर्वृतिः गात्राणि अनुवर्तते
कर्मेन्द्रियाणि तेषामस्वास्थ्यं विकाराधिक्यं मनो भ्रांतं च चलं रजनुत्कटं निशामय जानीहि १७ यदा सीदत् तिरो भवत्

यदाजयेद्रजः सत्त्वं तमो मूढं लयं जडं युज्येत मोहशोकाभ्यां निद्रया हिंसयाशया १५ यदा चित्तं प्रसीदेत इंद्रि
याणां च निर्वृतिः देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मत्पदं १६ विकुर्वन् क्रियया चाधीरनिर्वृतिश्च चेतसां
गात्रास्वास्थ्यं मनो भ्रांतं रज एतैर्निशामय १७ सीदच्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं मनो नष्टं तमो
ग्लानिस्तमस्तदुपधारय १८ एधमाने गुणे सत्त्वे देवानां बलमेधते असुराणां च रजसि तमस्युद्धव र
क्षसां १९ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जं तोस्तुरीयं त्रिषु संततं २०

चेतसो ग्रहणे चिदाकारपरिणामे अक्षमं सच्चित्तं विलीयेत मनोऽपि संकल्पात्मकं नष्टं लीनं तमोऽज्ञानं ग्लानिर्विषाद
श्च भवति तेन तदा तमउत्कटं उपधारय विद्धि १८ किंच एधमानइति इंद्रियाण्येव निवृत्तिप्रवृत्तिमोहस्वभावानि देवा
सुररक्षांसि यद्वा प्रसंगाद्दाधिदैविकानां गुणानामुत्कर्षकार्याण्युक्तानीति ज्ञेयं १९ गुणोत्कर्षतोऽवस्थाभेदं दर्शयति ९६
सत्त्वादिति प्रसंगान्निर्गुणावस्थामाह तुरीयं च चतुर्थमवस्थांतरं नाम त्रिषु जागरणादिषु संततमेकरूपमात्मनस्त्वमेव
नि
स्वर्थः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणोत्कर्षद्वारेण तत्तत्कर्मफलनिष्ठां दर्शयन्नित्त्उपर्युपरीति ब्राह्मणा वेदार्थानुष्ठाननियुक्ताः आब्रह्मण इति पाठे ब्रह्मलोकमभिव्या
प्येत्यर्थः आमुख्यात् स्थावरानभिव्याप्य अन्तरचारिणः मनुष्या एव भवंति २१ देहादुत्क्रांतिकालीनगुणोत्कर्षफलमाह सत्त्वइदस
ति प्रलीनाः मृताः रजोलयाः रजसि प्रवृद्धे सति लयाय येषां ते एवं तमोलया इत्यपि निर्गुण इत्यत्र तु लयशब्दानुपादानाज्जीव
तोपि निर्गुणा अन्ते मामेव यांतीत्यर्थः २२ इदानीं गुणोत्कर्षकृतमेव तत्तत्फलसाधनकर्मत्रैविध्यमाह मदर्पणं मत्प्रीत्युद्देशेन
कृतं निःफलं केवलं दासभावेन वा कृतं निजकर्म नित्यादि तत्सात्त्विकं फले संकल्पो यस्मिन् तत् हिंसाप्रायं हिंसोद्देशेन थो १

उपर्युपरि गच्छंति सत्त्वेन ब्राह्मणा जनाः तमसाऽधोऽध आमुख्याद्रजसांऽतरचारिणः २१ सत्त्वे प्रलीनाः स्व
र्यांति नरलोकं रजोलयाः तमोलयास्तु निरयं यांति मामेव निर्गुणाः २२ मदर्पणं निःफलं वा सात्त्विकं निज
कर्म तत् राजसं फलसंकल्पं हिंसाप्रायादि तामसं २३ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत् प्राकृतं
तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं २४ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते तामसं द्यूतसदनं मन्निके
तं तु निर्गुणं २५ सात्त्विकः कारकोऽसंगी रागांधो राजसः स्मृतः तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्र
यः २६ सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा [illegible]तु राजसी तामस्यधर्मे या श्रद्धा मत्सेवायां तु नि

कृतं हिंसाबहुलं च आदिशब्दाद्दंभमात्सर्यादिकं २३ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह केवलं
देहादिव्यतिरिक्तात्मविषयं वैकल्पिकं देहादिविषयं यत्तद्रजः राजसं प्राकृतं बालमूकादिज्ञानतुल्यं मन्निष्ठं परमेश्वरविष
यं २४ वनं विविक्तत्वात् सात्त्विको वासः भगवन्निकेतनं तु साक्षात्तदाविर्भावात् त्रिगुणस्थानं २५ कारकः कर्ता असंगी अनास
क्तः रागांधः अत्यभिनिवेशवान् स्मृतिविभ्रष्टः अनुसंधानशून्यः मदपाश्रयः मदेकशरणः स हि निरहंकारत्वान्निर्गुणः २६
अधर्मे धर्म इति या श्रद्धा २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ टी॰ पथ्यं हितं पूतं शुद्धं अनायस्तं अनायासतः प्राप्तं आहार्यं भक्ष्यभोज्यादि इंद्रियाणां प्रेष्ठं कटुम्लत्ववणादि आर्तिदाशुचि दैन्यकरम
शुद्धं च वैराग्यान्निवृत्तिनिर्गुणमित्यभिप्रेतं २८ आत्मोत्थं सुखं मदपाश्रयमित्यपि त्वेनत्पदार्थविषयत्वेन ज्ञानवैदग्ध्यं वा २९
उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सात्त्विकं सुखमित्यादि कालः यदा
भजेत मां भक्त्या यदेतरां जयदित्यादिना योर्थादुक्तो ज्ञानं कैवल्यं सात्त्विकं ज्ञानमित्यादि कर्म मदर्पणमित्यादि कारकः
सात्त्विकः कारकोसंगीत्यादि श्रद्धा सात्त्विक्याध्यात्मिकीत्यादि अवस्था सत्त्वा जागरणमित्यादि आकृतिः उपर्युप

पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं राजसं चेंद्रियप्रेष्ठं तामसं चार्त्तिदाशुचि २८ सात्त्विकं सुखमात्मोत्थं
विषयोत्थं तु राजसं तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं २९ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः श्र
द्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ३० सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः दृष्टं श्रुतमनुध्या
तं बुध्या वा पुरुषर्षभ ३१ एताः संसृतयः पुंसो गुणकर्मनिबंधनाः येनेमे निर्जिताः सौम्य गुणा जीवेन चित्त
जाः ३२ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ३२ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं गुणसंगं विनि
र्धूय मां भजंतु विचक्षणाः ३३

रिगच्छतीत्यादिनोक्ता देवतादिरूपा निष्ठा सत्त्वे प्रलीनाः स्वर्यंतीत्यादिनोक्ता स्वर्गादिः एवं सर्वोपि भावस्त्रैगुण्यात्त्रिगुणा यं
न केवलं भेषर त्मकः ३० एव किंतु यावंतः पुरुषाव्यक्तेयादिष्टिताः अधिष्ठिताः ते सर्वे भावा गुणमया एव तत्प्रपंचः दृष्टमिति ३१ इदानीमु १६७
क्तं त्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तन्निर्जयात्मोक्ष इत्याह एता इति सार्द्धेन येन निर्जिताः स पश्चाद्विक्षिप्तेन भक्तियोगे
न मन्निष्ठः सन् मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ३२ तस्माद्विवेकिनामिदमेव युक्तमित्याह तस्मादिति ज्ञानविज्ञा
नयोः संभवो यस्मिन्नु तमिमं नरदेहम् ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भजनप्रकारमाह निःसंग इति सोऽर्द्धेन सत्वसेवया सात्विकान्येव सेवेत पुमान् सत्वविशुद्धय इति प्रागुक्तयोनेरपेक्ष्येण उपशमात्म
केन सत्वेन च २४ एवं च सति मां प्राप्नोतीत्याह संपद्यत इति जीवं जीवत्वं कारणं लिंगशरीरं मां प्राप्तस्य न पुनः संसार इत्याह ॥
जीव इति नवहिः विषयभोगेन नांतरः तत्स्मरणे गुणाएकेतामुरुसंसारणप्रथमजितपुण्यकथा जिनादिभिः धुनुत भक्तिरसेन
विवेकिनां न हि पुनः सुखभंजनुरीहते एकादशे पंचविंशः षड्विंशे योगनिष्ठाया विघातादुष्टसंगतः साधुसंगेन तन्निष्ठापराका
इति वर्ण्यते योगिनां यांग विंशशः संगतः संभवेदिति सर्वथा तन्निरस्त्यर्थमैलगीतं वितन्यते १ निःसंगो मां भजेत् विद्वानप्रमत्तो

निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः रजः तमश्चाभिजयेत् सत्वसंसेवया मुनिः सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः ३४ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः ३५ मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् २५ इति श्रीभा० म० एकादशस्कंधे पंचविंशोध्यायः श्रीभगवानुवाच मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः आनंदं परमात्मानमात्मस्थं समुपैति मां १ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः वर्त्तमानोपि न पुमान् युज्यतेऽवस्तुभिर्गुणैः २

जितेंद्रिय इत्युक्तं तत्र विपक्षेनर्थकथयिष्यन् जीवन्मुक्तस्यापि तर्हि संगो दुर्वार इत्यनर्थकः स्यादित्याशंक्य [illegible]कानुवादपूर्वकं परि
हरति साद्धाभ्यां मल्लक्षणं मत्स्वरूपं लक्ष्यते येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्षणे आस्थितः सन् आत्मस्थं आ
त्मन्येव नियंतृत्वेन स्थितं परमानंदरूपमात्मानं मां समुपैति सम्यक् प्राप्नोति १ न चैवं भक्तस्य विषयसंगो नामास्तीत्याह गु
णमय्येति गुणमयी या जीवयोनिः जीवोपाधिस्तया विमुक्तः गुणेषु वर्त्तमानोपि तैर्न युज्यते संगं न प्राप्नोति अत्र हेतुः अ
वस्तुभिः नन्ववस्तुभिरप्यन्ये युज्यमाना दृश्यंते तत्राह अवस्तुत्वेन दृश्यमानेषु २ श्रीराम श्रीराम श्रीराम ॥

हं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मानं राजानं स्त्री त्यजंतीं च दृष्ट्वा स राजा आत्मानं स्त्रीं उपेक्ष्य व्रजंतीं अन्वगात् तथा च श्रुतिः ५

भा०ए० तथाऽपि संगं वर्जयेदित्याह संगमिमिति असतां लक्षणमाह शिश्नोदरेतर्पयंतीति शिश्नोदरतृपस्तेषां कश्चित्कदाचिदपि आसक्तो नाव
दहनां संगः किंतु तस्यैकस्याप्यनुगः अनुवर्ती अंधमनुगच्छतियोऽधस्तद्वत् ३ अत्रेतिहासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती ए
ह श्रुत्वा कीर्तिर्यस्य सः उर्वशी विरहात् प्रथमं मुह्यन् पश्चात् कुरुक्षेत्रे तां समागम्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्वशीलोकं
प्राप्य शोकसंयमे शोकापगमे सति ततो निर्विण्णः सन् इमां गाथामगायदिति नवमस्कंधानुसारेण द्रष्टव्यं ४ प्र...नीमोहा वस्थामाह स्क०२
त्यक्त्वेति घोरे तिष्ठति हे जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु नेनौ मंत्रौ अनुदितासएते मयस्करन्परतरे च नाहनि

संगं न कुर्यादसतां शिश्नोदरतृपां क्वचित् तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत् ३ ऐलः सम्राडिमां गा
थामगायत बृहच्छ्रवाः उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ४ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तव
न्नृपः विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ५ कामानतृप्तोऽनुजुषन् क्षुल्लकान् वर्षयामिनीः न वेद
यांतीर्नायांतीर्नारीरुर्वश्याकृष्टचेतनः ६ ऐल उवाच अहो मे मोहविस्तारः कामकश्मलचेतसः देव्या
१८ गृहीतकंठस्य नायुःखंडा इमे स्मृताः ७ नाहं वेदाभिनिर्मुक्तः सूर्यो वाऽभ्युदितोऽमुया मुषितो वर्षपूगाणां
बताहानि गतान्युत ८

त्येवं मंत्रैर्विलपन् ५ वैक्लव्ये कारणमाह कामानिति वर्षाणां यामिनी रात्रीः यंतीः अपयांतीः आयंतीः आगामिनीः ॥
आकृष्टा चेतना यस्य सः ६ तत्स्वर्गं गंधर्वलोकं प्राप्तस्य बहुकालमुर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाहाष्टादशभिः तत्रा ए०८
ष्टभिरनुतापः प्रपंच्यते अहो इति यतो मम याइमे अहोरात्ररूपा आयुःखंडा न स्मृताः तदेवाह नाहमिति अभिनिर्मुक्तं १०२
मयि रममाणम् आस्तंगतः अभ्युदितो वा सूर्य इति अमुया उर्वश्या वंचितः बत खेदे उत अपि वर्षपूगाणामपि गतान्यहानि
न वेदेति ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येन संमोहेन आत्मा देहः क्रीडामृगः अधीनः कृतः ननु प्रणयकुपितायाः अनुनयार्थं अधीनता युक्तैव। सत्यं न त्वत्र तदस्तीत्याह सप रिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यान्तीमपि अन्वगमं अनुगतोऽस्मि १० किंच मम प्रभावाभि मानोऽपि वृथैवेत्याह कुत इति तस्य मे तेजो बलं खरो यथा पादताडितोऽपि खरीमनुगच्छति तद्वत् ११ एवंभूतस्य सर्वसाधनं व्यर्थ मित्याह किमिति त्यागेन संन्यासेन विविक्तेन एकान्तसेवया मौनेन वाङ्नियमेन १२ अनुतापेन सन्नात्मानं निंदति द्वाभ्यां

अहो मे आत्मसंमोहो येनात्मा योषितां कृतः। क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः। सपरिच्छदमा
त्मानं हित्वा तृणमिवेश्वरं। यान्तीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् १० कुतस्तस्यानुभावः स्यात्तेज ईशि
त्वमेव वा। योऽन्वगच्छं स्त्रियं यान्तीं खरवत्पादताडितः ११ किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा किं वि
विक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं १२ स्वार्थस्याकोविदं धिङ् मां मूर्खं पंडितमानिनं। योऽहमीश्वरतां प्रा
प्य स्त्रीभिर्गोखरवज्जितः १३ सेवतो वर्षपूगान्मे उर्वश्या अधरासवं। न तृप्यत्यात्मभूः कामो वह्निराहु
भो२ तिभिर्यथा १४ पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः। आत्मारामेश्वरमृते भगवन्तमधोक्षजं १५ बोधि
तस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः। मनोगतो महामोहो नापयात्यजितात्मनः १६

स्वार्थस्येति अकोविदं मूढं अज्ञातारं गोखरवत् गौरिव खर इव जितः १३ अधरासवं सेवमानस्य आत्मभूः मनसिजः पुनः पुनरुद्भव तु १४ एवमष्टभिर्निर्वेदो निरूपितः इदानीं तस्य विवेकमाह दशभिः पुंश्चल्येति। अयं भावः केनापि हेतुना निष्पन्ना दुःख मेव प्राप्तोऽस्मि अतः परमेश्वरमेव भजेयमिति १५ परमेश्वरप्रसादं विना देवैरुपदिष्टादपि विवेकान्मोहो न निवर्तत इ त्याह बोधितस्यापीति देव्या उर्वश्या सूक्तवाक्येन यथार्थवचनेन पुरूरवो मा मृथा मा प्रभन्नो मा त्वा वृकाः। सा अशिवा सख्य क्षन्न नैव स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता इत्यनेन १६

भ्या२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११०

पूर्वं पुंश्चल्याऽपहृतं चित्तमित्यादिना तस्या अपकारोऽनुस्मृतः इदानीं ममैवायमपराध इत्याह किमेतयेति नः अस्माकं का
मिन्या एतया किमपकृतं न किंचिदपि यथा रज्जुस्वरूपाविदुषो रज्जुद्रष्टुः पुंसस्तस्याः सर्पकल्पनया विद्युतोऽपि रज्ज्वा कि
मपि नापकृतं तद्वत् यद्यस्माद्योऽहमेवंभूतः सोऽजितेंद्रियत्वादपराधीत्यर्थः १७ ननु तथाऽपि सैव सौगंध्यप्रमोदिगु
णैः संमोहमूलमित्याशंक्य तेऽपि परिकल्पिता एवेत्याह चतुर्भिः कायमिति मलीमसः अतिमलिनः सुमनसां कु
सुमानामिव गंधसौकुमार्यादि सौमनस्यं शोभनमनोभावो वा १८ ममत्वमपि तस्मिन् परिकल्पितमेवेत्याह पि

किमेतया नोऽपकृतं रज्ज्वा वा सर्पचेतसः रज्जुस्वरूपाविदुषो योऽहं यदजितेंद्रियः १७ कायं मलीमसः का
यो दौर्गंध्याद्यात्मकोऽशुचिः क्व गुणाः सौमनस्याद्या ह्यध्यासोऽविद्यया कृतः १८ पित्रोः किं स्वं नु भा
९९९ र्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीयते १९ तस्मिन् कलेवरेऽमे
ध्ये तुच्छनिष्ठे विषज्जते अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः २० त्वङ्मांसरुधिरस्नायुमेदोमज्जा
स्थिसंहतौ विण्मूत्रपूये रमतां कृमीणां कियदंतरं २१ अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवि
त् विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यथा २२ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम॥

त्रोः किं स्वं कार्यं जनकत्वात् नु वितर्के भार्याया वा भोगप्रदत्वात् अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वादुक्तं स्वामिनो वा अधी
नत्वात् अग्नेर्वा अंते दह्यमानत्वात् श्वगृध्रयोर्वा भक्ष्यत्वात् किंच आत्मनः तत्कृतशुभाशुभभोगित्वात् सुहृदां वा उ
पकारित्वात् एवं यो न निश्चीयते १९ तुच्छा कृमिविड्भस्मलक्षणा निष्ठा अंतो यस्य तस्मिन् काये कलेवरे प्रियत्वेन गृहीतं वि राम
षं मेवाह अहो इति सुनसं शोभननासिकं २० अतो गुणारोपेण रममाणा मादृशाः कृमिसमा इत्याह त्वगादिसंहतौ त ९९९
त्संघाते देहे विण्मूत्रादिसंहतौ रमतां कृमीणां चा २१ यद्यप्येवं वीभत्सिता एव स्त्रियः अथापि नोपसज्जेत अवलोकनादि
नाऽपि संगं न कुर्यात् अर्थवित् विवेकी अत्र हेतुः विषयेति २२

ज्लते आसक्तिं करोति आसक्ति[illegible]

२

ननु केचिन्निमीलितनयनादेरपि मनःक्षोभो दृश्यते सत्यं सोपि पूर्वदर्शनाद्धि किं विना न भवतीत्याह अदृष्टादिति भावानुपलब्धौ
नु भावी मनःक्षोभः अतः प्राणान् इंद्रियाणि असंप्रयुंजतः निरुंधतः स्तिमितं निश्चलं सत् २२ इंद्रियैः सेवित्वा अविस्रंभः अवि
श्वसनीयः मादृशां अविवेकिनां २४ फलितमाह द्वाभ्यां एवमिति द्वाभ्यां नृपेषु देवेषु दीव्यतीति तथा २४ उक्तिभिः हितोपदेशैः

अदृष्टादश्रुताद्भावान्न भाव उपजायते । असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः । २२ । तस्मात्संगो न कर्तव्यः ।
स्त्रीषु स्त्रैणेषु चेंद्रियैः । विदुषामप्यविस्रब्धः । षड्वर्गः । किमु मादृशां २४ श्रीभगवानुवाच एवं प्रगायन्नृपदेवदेवः
स उर्वशीलोकमथो विहाय आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः । २५ ततो दुःसंगमुत्सृ
ज्य सत्सु सज्जेत बुद्धिमान् संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः । २६ संतोऽनपेक्षा मच्चित्ताः । प्रशांताः स
मदर्शिनः निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः २७ तेषु नित्यं महाभाग महाभागेषु मत्कथाः । संभवंति
हि ता नृणां जुषतां प्रपुनंत्यघं २८ ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः । मत्पराः श्रद्दधानाश्च भ
क्तिं विंदंति ते मयि २९ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि
३० यथोपश्रयमाणस्य भगवंतं विभावसुं शीतं भयं तमोऽप्येति साधून्संसेवतस्तथा ३१ श्रीराम श्रीराम

रितितीर्थदेवादिसंगादपि सत्संगः श्रेयानिति दर्शयति २६ संतां लक्षणमाह संत इति विशेषणानि एकस्य यथेष्टं हेतुहेतुमद्भा
वः २७ न च तेषूपदेशापेक्षा अपि तु केवलं तत्संनिधिरेव तारयतीत्याह तेष्विति सप्तभिः २८ श्रवणादिभिरेव मत्पराः ।
श्रद्धानाः असंतोऽपि भक्तिं विंदंति २९ ३० विभावसुमग्निं सेवमानस्य अप्येति नश्यति तथा कर्मोद्विजाड्यं आगामि सं
सारभयं च तन्मूलमज्ञानं च नश्यतीत्यर्थः । ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०९० निमज्ज्योन्मज्जतां तु वाच्चायो नीर्गच्छतां परमायणं परमाश्रयः ३२ किंच यथान्नमेव प्राणो जीवनं अहमेव यथा शरणं धर्म एव यथा वित्तं परलोके वित्तं तथा संत एव अर्वाक् संसारात् पाहि भ्यतः पुंसः अरणं शरणं ३३ किंच संत अर्क्षः बहिः सगुणनिर्गुण ज्ञानानि अर्कः पुनः समुत्थितोपि बहिः तदप्येकमेव चक्षुरर्थः ३४ अध्यायार्थमुपसंहरति वैतसेन इति सुद्युम्नो भा० २
वेनो मावनं प्रविष्टस्य वीता हि ना स्त्रीभावं प्राप्ताय स्पतस्य स्त्रीभावं प्राप्तस्य पुत्रो वैतसेनः पुरूरवाः एवमुक्तप्रकारेणार्व

निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणं संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ३२ अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं धर्मो वित्तं नृणां प्रेत्य संतोऽर्वाग्बिभ्यतोऽरणं ३३ संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः देवता बांधवाः संतः संत आत्माऽहमेव च ३४ वैतसेनस्ततोप्येवमुर्वश्या लोकनिःस्पृहः मुक्तसंगो महीमेतामात्मारामश्चचार ह ३५ इति श्रीभा० ए० पुरूरवोगीतं नाम षड्विंशोऽध्यायः २६
२७ उद्धव उवाच क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो यस्मात्त्वां ये यथाऽर्चंति सात्वताः सात्वतर्षभ १

१०० श्यां लोकात्तथा नादवल्लोकनाद्धामिः स्पृहः ततोऽपि सत्संगादपि हेतोर्मुक्तसंगः सन्नात्मारामो भूत्वाय थेष्टं चचारे
ति ३५ इत्येकादशे षड्विंशः सप्तविंशे क्रियायोगः सद्यश्चित्तप्रसादकः सर्वकामाप्तिहेतुश्च सांगः प्रोक्तः समासतः गम
रागाद्याकुलचित्तानां कुतः संगात् हि संभवः इति तस्मादर्चनं भद्रमनुस्मृत्यानुपृच्छति क्रियायोगमिति भवदाराधनं १००
यस्मादिति करणाधिष्ठानादि प्रश्नः सर्वकारकाणां निमित्तत्वस्याऽविशिष्टत्वात् यथेति कस्मिन्नधिष्ठाने केन प्र
कारेणेति प्रश्नः येऽधिकारिणः सात्वता भक्ताः १ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स१

अस्यपुनर्विशेषतः प्रश्नकारणमाहचतुर्भिः एतद्वदंतनिःश्रेयसकरंवदंति अंगिरसःसुतोबृहस्पतिः २ निःसृतं त्वयोपदिष्टमित्यर्थः ३
देव्यैपार्वत्यै ३ सर्ववर्णानांत्रैवर्णिकानां ४ विश्वेश्वरायेतेषामीश्वर ५ कर्मकांड[illegible]पूजाविधानस्य नास्त्यंतोयंयतः पारंचानुष्ठानंतो स्प२
यस्यतस्य ६ वैदिकएवमंत्रोवैदिकानि वांगानिचयस्मिन्पुरुषसूक्तादौसवैदिकः एवंतांत्रिकोऽपिमिश्रः अष्टाक्षरादिः मखः पूजा
७ यदात्रैवर्णिकोयजेततदाविशेषमाह यदागर्भाष्टमैकादशद्वादशादिकाले स्वनिगमेनस्वाधिकारप्रवृत्तेनवेदेनोक्तं द्विजत्वंउपनय

एतद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां नारदोभगवान्व्यासः आचार्योंगिरसःसुतः २ निःसृतंतेमुखांभोजाद्यदाहभ
गवानजः पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः ३ एतद्वैसर्ववर्णानामाश्रमाणांचसंमतं श्रेयसामुत्तमंमन्येस्त्री
शूद्राणांचमानद ४ एतत्कमलपत्राक्षकर्मबंधविमोचनं भक्तायचानुरक्तायब्रूहिविश्वेश्वरेश्वर ५ श्रीभगवानु०
नह्यंतोऽनंतपारस्यकर्मकांडस्यचोद्धव संक्षिप्तंवर्णयिष्यामियथावदनुपूर्वशः ६ वैदिकस्तांत्रिकोमिश्रइ
तिमेत्रिविधोमखः त्रयाणामीप्सितेनैवविधिनामांसमर्चयेत् ७ यदास्वनिगमेनोक्तंद्विजत्वंप्राप्यपूरुषः ।।
यथायजेतमांभक्त्याश्रद्धयातन्निबोधमे ८ अर्चायांस्थंडिलेऽग्नौवासूर्येवाऽप्सुहृदिद्विजः द्रव्येणभक्तियुक्तो
र्चेत्स्वगुरुंमाममायया ९ पूर्वंस्नानंप्रकुर्वीतधौतदंतोऽगशुद्धये उभयैरपिचस्नानंमंत्रैर्मृद्ग्रहणादिना
१० संध्योपास्त्यादिकर्माणिवेदेनाचोदितानिमे पूजांतैःकल्पयेत्सम्यक्संकल्पःकर्मपावनीं ११ श्रीराम

नं ८ अर्चायांप्रतिमादौ ९ स्नानविशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्चमंत्रैः १० किंच संध्योपासनादीनिकर्माणि आचोदि
तानियस्ययानितैः सहमेपूजांकुर्यात् नतुतानिपरित्यज्येत्यर्थः सम्यक्परमेश्वरविषयएवसंकल्पोयस्यतथाभूतः सन्
कर्मपावनींकर्मनिर्हारिणीम् ११ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०१० अर्चाभेदानाह सार्द्धेन शैली शिलामयी लौहीसुवर्णादिमयी लेप्या मृच्चंदनादिमयी हृदि पूजायां मनोमयी १२ प्रकर्षेण तिष्ठत्यस्या-
मिति प्रतिष्ठा प्रतिमैव जीवस्य भागवतो मंदिरं यद्वा प्रतिष्ठया कल्पनया आसनं भगवान्मंदिरं भवतीति प्रतिमाभेदेन विशेषमाह सार्द्धे-
न उद्वासो विसर्जनं १३ अस्थिरायाम ...वेन विकल्पः शालग्रामे न कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्यादावाहनमेवेति अविले-
प्यायां मृन्मयलेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां लेख्यायां च परिमार्जनमेव १४ इदानीं सकामनिष्कामभेदेन विशेष-
माह द्रव्यैरिति प्रकर्षेण सिद्धैः सुशोभनैः अमायिनो निः कामस्य भक्तस्य तु यथालब्धैः यत्र चंदनादि सर्वथा न लभ्यते तत्र

प्या ले १ शैली दारुमयी लौही लेख्या च सैकता मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति द्विविधा
प्रतिष्ठा जीवमंदिरं उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने १३ अस्थिरायां विकल्पः स्यात् स्थंडिले तु
भवेद्द्वयं स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं १४ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः भक्तस्य
०१ च यथालब्धैर्हृदि भावेन चैव हि १५ स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव स्थंडिले तत्त्वविन्यासे वन्हा-
वाज्यप्लुतं हविः सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः १६ श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि॥
गंधो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः १७ शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः आसीनः प्रागुद-
ग्वाऽर्चेदर्चायां त्वथ संमुखः १८ श्रीराम

हृदि भावेन भावनया यद्वा हृदि चिन्मात्रो यागः तदा भावेन मनोमय्येव द्रव्यैरित्यर्थः १५ अधिष्ठानभेदेन प्रधानोपचारमाह सार्द्धेन स्नान
स्नानेनेति तत्त्वविन्यासः यथास्थानमंगप्रधानदेवतानां तत्तन्मंत्रैः स्थापनं अभ्यर्हणं उपस्थानार्घादि सलिलादिभिस्तर्पणा-
दिभिर्वा यजनं १६ सर्वत्र साधारणमाह श्रद्धयेति १७ एवमधिकारादिव्यवस्थामुक्त्वेदानीं पूजाप्रकारमाह शुचिरिति॥ १०१
संभृताः संभाराः पूजासाधनानि येन सः प्रागग्रैः दर्भैः यद्वा प्रागेव संभृतसंभारः सन्नासीनः नत्वासीनः सन् आनीतसंभारो
थं वारंवारमुत्तिष्ठेदित्यर्थः प्राङ्मुखश्चोदङ्मुखो वा आसीनः अर्चायां तु स्थिरायां संमुखः अर्चाभिमुखमुपविष्टः सन् १८

भूर्यप्यभक्तोपहृतं न मे तोषाय कल्पते

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंतरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन् कृतन्यासः कृत्वा मूलमंत्रन्यासो यस्थानममार्चोऽस्त्रमंत्रेण निर्मोच्याभ्युपकर्ष
णादिना शोधयेत् कलशं पूर्णकुंभं प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं उपसाधयेत् चंदनपुष्पादिभिः संस्कुर्यात् १९ ततः अद्भिः प्रोक्ष
णीयाद्भिः देवयजनं देवपूजास्थानं २० पाद्यार्घ्यार्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् तत्र पाद्यादि
द्रव्याणि पाद्यं श्यामाकदूर्वाब्जविष्णुक्रांतादिभिः स्यात् गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमु

पं यथा १ कृतन्यासः कृतन्यासामदर्घ्यपाणिनास्त्रेण कलशं प्रोक्षणीं च उपसाधयेत् १९ ततः अद्भिर्देवयजनं द्रव्याणि आत्मा
नमेव च प्रोक्ष्य पात्राणि त्रीणि अद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् २० पाद्यार्घाचमनीयार्थं त्रीणि पात्राणि दिशिक १॥
हृदा शीर्ष्णा अथ शिखया गायत्र्या चाभिमंत्रयेत् २१ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम अण्वीं जीवकलां
ध्यायेन्नादांते सिद्धभाविताम् २२ तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां
प्रपूजयेत् २३ पाद्योपस्पर्शार्हणादीनुपचारान् प्रकल्पयेत् धर्मादिभिश्च नवभिः कल्पयित्वासनं मम २४

हारितं जातीलवंगकंकोलैर्मतमाचमनीयकमिति तानि च त्रीणि पात्राणि यथाक्रमं हृदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत्
तदनंतरं पिंडे देहे वाय्वग्निसंशुद्धे इति कोष्ठगतेन वायुना शोषिते अधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलादमृतप्लावनेना
मृतमये जाते तस्मिन् हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् कथंभूतां नादांते सिद्धभाविताम् प्रणवस्याका
रोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यातां तथा च श्रुतिः यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः तस्य प्रकृतिली
नस्य यः परः स महेश्वर इति २२ तयात्मभूतया स्वेनैव भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति त
स्मिन्नेव देहे मानसैरुपचारैः संपूज्य तन्मयः सन् अर्चादिष्वावाह्य स्थापनमुद्रया स्थापयित्वा २३ कथं प्रपूजयेत् तदाह पाद्य
निर्हाभ्यां धर्मादिभिर्ममासनं २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना०पं० तत्र पद्मं च कल्पयित्वाभ्यां वेदतंत्राभ्यां सुभयसिद्धये मह्यं पाद्यादीनुपचारान् प्रकल्पयेदित्यन्वयः। उपस्पर्शः आचमनं अर्हणम
र्घ्यं उभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये इत्यर्थः। धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्न्यादि चतुःकोणेषु पादाः
अधर्मादीनि पूर्वादिदिक्षु मात्राणि त्रयोगुणाः पट्टिकाः तत्र पूर्वादिक्रमेण मध्ये च विमलोत्कर्षिण्णीज्ञानक्रियायोगप्रह्वी
नव २ सत्येशानाऽनुग्रह इति नवशक्तयः एवं यथोपदेशं धर्मादिभिरशेषशक्तिभिरासनं कल्पयित्वेति कर्णिकायाः केसरे स्तत्रस्थ
सूर्यादिमंडलैश्चोज्वलमित्यर्थः २५ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्र न्यस्तांगमित्यंगावरणपूजासूचि

पद्ममष्टदलं तत्र कर्णिकाकेसरोज्वलं उभाभ्यां वेदतंत्राभ्यां मह्यं तदुभयसिद्धये २५ सुदर्शनं पांचजन्यं गदा
सीषु धनुर्हलान् मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २६ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च ॥
महाबलं बलं चैव कुमुदं कुमुदेक्षणं २७ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान् स्वे स्वे स्थाने त्व
भिमुखान् पूजयेत्प्रोक्षणादिभिः २८ चंदनोशीरकर्पूरकुंकुमागुरुवासितैः सलिलैः स्नापयेन्मंत्रै
१०२ र्नित्यदा विभवे सति २९ स्वर्णधर्मानुवाकेन महापुरुषविद्यया पौरुषेणापि सूक्तेन सामभी राजनादिभिः

ना आसनेन नवशक्त्या वरणमप्युक्तं ततः सुदर्शनादि मुसलांतान्यायुधान्यष्टसु दिक्षु कौस्तुभमालाश्रीवत्सानुरसि २६ नंदा
दीन्पार्षदानष्टदिक्षु गरुडं पुरतः २७ दुर्गादीन्नैकोणेषु गुरून्वामतः सुरानिंद्रादिलोकपालान् पूर्वादिदिक्षु एवमेतान् देव
स्याभिमुखान्प्रोक्षणादिभिः अर्घ्यादिभिः पूजयेदित्यर्थः २८ पाद्यादीनुपचारान् प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्र
पंचयति चंदनेति षड्भिः मंत्रानाह स्वर्णधर्मानुवाकः सुवर्णधर्मं परिवल्वेनमित्यादि महापुरुषविद्या जितं ते पुंडरीका १०२
क्ष नमस्ते विश्वभावन सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वजेति पौरुषं सूक्तं सहस्रशीर्षेत्यादि राजनादीनि सामा
नि इंद्रं नरो नेमधिता हवंत इत्यस्यामृच्यां गीतानि आदिशब्देन रौहिणादीनि ३० श्रीराम श्रीराम श्रीरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्त्राद्यपचारेषु अलंकारलक्षणं गुणं विधत्ते वस्त्रेति पात्रारिण कपोलवक्षःस्थलादिषु लिखिताः पत्रभंगाः मकरके अर्थे तत्सप्रेमयथा
भवति तथा यथोचितमलं कुर्वीतेत्युक्तार्थं सर्वसाधारणं ३१ अर्घ्यलक्षणं विधत्ते पाद्यमिति ३२ नैवेद्यं वै भवलक्षणं गुणं वि
धत्ते गुडपायसेति शाष्कुल्यः तैलपक्वविशेषाः आपूपाः अपूपानामंडकादि नाम समूहाः सूपाः व्यंजनानि सति विभवइति शेषः गुणं २
३३ कालभेदेन गुणं विधत्ते अभ्यंगेति अभिषिचनं पंचामृतादि स्नपनं आम्नायेति अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि पर्वकादेश पादे
अन्वहं प्रत्यहं वा विभवसतीति ३४ फलभूयस्त्वार्थिनाः भावपि पूजाप्रकारमाह विधिनास्वगृह्योक्तप्रकारेण मेखला

वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः अलंकुर्वीत सप्रेममर्क्को मायथोचितं ३१ पाद्यमाचमनीयं च गंधस्ना
मनसोऽक्षतान् धूपदीपोपहार्यीणि दद्यादर्घ्यश्चार्चकः गुडपायससर्पींषि शाष्कुल्यापूपमोदकान् संयाव
दधिसूपांश्च नैवेद्यं सतिकल्पयेत् ३३ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं अन्नाद्यगीतनृत्यानि पर्वणि स्यु
नुतान्वहं ३४ विधिना विहिते कुंडे मेखलागर्तवेदिभिः अग्निमाधाय परितः समूहत्पाणिनोदितं ३५ परिस्ती
र्याथ पर्युक्षेदन्वाधाय यथाविधि प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत मां ३६ तप्तजांबूनदप्रख्यं शंखचक्र
गदांबुजैः लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ३७ स्फुरत्किरीटकटककटिसूत्रवरांगदं श्रीवत्सवक्षसं भ्रा
जत्कौस्तुभं वनमालिनं ३८

मे। चतुरंगुलाः हस्तमात्रा भवेयुः अन्नैः सद्योनिर्वृदिकानि इत्यादि उदितं प्रज्वलितमग्निं परितः समूहत एकत्र मेलयेत् ३५ ॥
हर्भैः परिस्तीर्य परितः प्रोक्षयेत् अन्वाधायेन संज्ञकैर्व्याहृतिभिः समित्प्रक्षेपादिरूपं कर्म कृत्वा अनंतरं तान् द्रव्याणि हो
आधार मोपयोगीन्यासाद्य निधाय प्रोक्षण्या प्रोक्षणीयपात्रादकेन प्रोक्ष्याग्नौ मां ध्यायेत् ३६ शंखादिभिर्लसंतः शोभमा
नाश्चत्वारो भुजा यस्य तं ३७ स्फुरंति किरीटादीनि यस्य तं ३८ राम राम राम राम राम

दीप्तिरूपत्वाद्धिते वितते विनिर्मिते मदुक्तं । विस्तारोद्धायन लिखितो मेखला १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०२।० हविषाष्टेनवश्रभिघृतानिसंसिक्तानि दारूणिशुष्कसमिधः प्रास्यप्रक्षिप्य आधारौ तत्संज्ञकौ यागौ एवमाज्यभागौ च दत्वा नदर्थौ आहुती हुत्वेत्यर्थः तात्रा घारौ प्रजापतये स्वाहा इंद्राय स्वाहेति चोत्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्यादापरिध्यंत घृतक्षारणरूपौ आज्यभागौ अग्नये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ ३९ मूलमंत्रेण अष्टाक्षरेण तथा षोडशाभ्यर्चाय स्मिन् तेन पुरुषसूक्तेनच अवदानतः प्रत्यृचमाहुतिग्रहणेनेत्यर्थः पुरुषसूक्तेनाराधनपक्षे स एव मूलमंत्रः तेनैव प्रत्यृचमवदानतो होमइति मंत्रैः स्वाहांतैर्नाममंत्रैर्यथान्यायं पूजाक्रमेणव अग्नये स्विष्टकृते स्वाहेत्येवं स्विष्टकृतं च हुत्वा ४० ततो वह्निस्थं भगवंतम

ध्यायन्नभ्यर्च्य दारूणि हविषाभिघृतानि च प्रास्याज्यभागावाघारौ दत्वावाज्यप्लुतं हविः ३९ जुहुयान्मूल मंत्रेण षोडशर्चावदानतः धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः ४० अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकम् ४१ दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्पयेत् मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ४२ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम मत्कथाः श्रावयन्शृण्वन्मुहूर्त्तं क्षणिको भवेत् ४३ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ४४
भा० ११ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ४५ श्रीराम श्रीराम श्री

अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो नंदादिभ्यो ऽष्टसु दिक्षु बलिं हरेत् ततः पूजास्थानमागत्य देवस्याग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत् ४१ ततो भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं दत्वोच्छेषं विष्वक्सेनाय कल्पयित्वा तदनुज्ञया प्रसादं स्वयं भुंजीत ततः सुरभिमत् सुगंधवत् तांबूलाद्यं मुखवासं दत्वा अथ पुनरपि अर्हयेत् पुष्पांजलिना पूजयेत् ४२ अभिनयन् स्वचेष्टाविशेषैर्वर्णयन् क्षणिकः उत्सवपरः परित्यक्तान्यत्र आवसरो भवेत् ४३ स्तवस्तोत्राणां भेदं दर्शयति पौराणैः प्राकृतैरिति ४४ १०३
कथं प्रणमेदित्यपेक्षायामाह शिरइति बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृहीत्वा यद्वा ऽष्टत्वेन परस्परं निबद्धाभ्यां कृतापराध इव प्रपन्नमित्यादि विज्ञाप्य च प्रणमेत् ४५ राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततः शेषाग्रहणात्पूर्वं कैश्चित्कल्पितोद्वासनप्रकारमाह इति अनेनैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा शिरस्याधाय धृत्वाथ
उद्वासयेत् न तु हि प्रतिमायां यद्यस्ति ज्योतिस्तत्पुनरपि हृत्पद्मस्थज्योतिष्येवोद्वासनीयं ४६ एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामा
ह अर्चादिष्विति यदा यत्र श्रद्धा तदा तत्रानेनैवधिष्ठाने मुख्यामुख्यत्वं कुतः यतः सर्वभूतेषु स्थित इति ४७ उभयतः इहामुत्र च ४८
समर्थं प्रत्याह मदर्चामिति त्रिभिः पुष्पोद्यानानि च कारयेत् पूजायात्रोत्सवाश्रितानि पूजा प्रत्यहं यात्रा विशिष्टपर्वणि ब
हुजनसमागमः उत्सवः वसन्तादिमहोत्सवः तदाश्रितानि क्षेत्रादीनि दत्वा ४९ पूजायात्रोत्सवाश्रितानित्यस्य विवरणं पू

स्यं१ इति शेषां मया दत्तां शिरस्याधाय सादरं उद्वासयेच्चेदुद्वा ज्योतिर्ज्योतिषि तत्पुनः ४६ अर्चादिषु यदा यत्र श्रद्धा मां
र्यं२ तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माऽहमवस्थितः ४७ एवं क्रियायोगपथैः पुमान्वैदिकतान्त्रिकैः अर्चन्नुभयतः
सिद्धिं मत्तो विन्दत्यभीप्सितां ४८ मदर्चां संप्रतिष्ठाप्य मन्दिरं कारयेद्दृढं पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवा
२४ श्रितान् ४९ पूजादीनां प्रवाहार्थं महापर्वस्वथाऽन्वहं क्षेत्रापणपुरग्रामान्दत्वा मत्सार्ष्टितामियात् ५० प्रतिष्ठया सार्ष्टिता२
सार्वभौमं सद्मना भुवनत्रयं पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ५१ मामेव नैरपेक्ष्येण भक्तियोगेन विन्द
ति भक्तियोगं स लभत एवं यः पूजयेत मां ५२ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विड्भुग्वर्षाणामयु कु१
तायुतं ५३ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५४ इति श्रीभा० म० ए० का० पुरुषा
राधनविधिः सप्तविंशोऽध्यायः

जादीनामिति प्रवाहार्थं संततानुवृत्त्यर्थं मत्सार्ष्टितां मत्समानैश्वर्यं ५० प्रतिष्ठादीनां व्यस्तसमस्ता
नां फलमाह प्रतिष्ठयेति मत्साम्यतां मया साम्यमित्यर्थः ५१ सकामप्रयुक्ते अहैतुकभक्तेः प्रत्याह मामेवेति अहैतुकभक्तियोग एव कथं भवति तत्राह
भक्तियोगमिति ५२ हानुः फलमुक्तं अपहर्त्तारं निंदति य इति विड्भुक् विष्ठाभोजी कृमिः ५३ कर्तुर्यत्फलं तदेवान्येषामप्याह कर्तुरिति सार
थेः सहकारिणः हेतोः प्रयोजकस्य अनुमोदितुश्च प्रत्यनत्फलमित्यन्वयः कुतः यतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह
भूयसि कर्मणि सारथ्यादेश्च भूयः अधिकं फलमिति पयः पत्रादिमात्रेण पूजितो यः परं पदं प्रागवृद्धिशत्रिप्रीतः स कृष्णः शरणं मम ५४
एकादशे सप्तविंशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बाम्ह्रस्कं

१०९० अष्टाविंशे तु यः पूर्वं विस्तरेणापवर्णितः ज्ञानयोगः पुनश्चासौ समाहृत्य निरूप्यते १ इदानीमतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह
परेषां स्वभावान् शांतघोरादीन् कर्माणि च तत्र हेतुः विश्वमिति १ विपक्षे दोषमाह परेति स्वार्थात् ज्ञाननिष्ठालक्षणात् असति
मिथ्याभूते द्वैतेऽभिनिवेशात् २ अंशमेव दृष्टांतेनाह दर्शयति तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रया आपन्ने अभिभूते सति पि
ण्डस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति ततो मनसि लीने सति नष्टचेतनः सन्मृत्युतुल्यां सुषुप्तिं च प्राप्नोति यथा त
द्वदेव नानार्थदृक् द्वैतेऽभिनिवेशी विक्षेपं लयं च प्राप्नोतीति ३ द्वैतासत्यत्वयोक्तिनिंदयो निर्विषयत्वं प्रपंचयति सार्द्धैः षड्भिः ॥

श्रीभगवानुवाच परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च १ परस्वभावक
र्माणि यः प्रशंसति निंदति स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः २ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः
ना१ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ३ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् वाचोदितं तदनृतं मन
सा ध्यातमेव च ४ छायाप्रत्याह्वयाभासा ह्यसंतोऽप्यर्थकारिणः १ एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ५
१०४ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ६ तस्मान्न ह्यात्मनोऽन्य
स्मादन्यो भावो निरूपितः निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि इदं गुणमयं विद्धि त्रिविधं मायया कृतं ७

किं भद्रमिति अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वाऽभद्रं कियत्कियद्भद्रं कियद्वाऽभद्रमित्यर्थः अवस्तुत्वमेवाह वाचेति बाह्येंद्रियोपलक्षणं वा
चोदितं तत् चक्षुरादिभिश्च यद्दृष्टं तदनृतमिति ४ नन्वेवं सति देहादिभावानामप्यसत्वात्कथं भयहेतुत्वं तत्र दृष्टांतमाह छायाप्र राम
तिबिंबं प्रत्याह्वयः प्रतिध्वनिः आभासः शुक्तिरजतादिः एते यथा संतोऽप्यर्थकारिणो भवंति आमृत्युः मृत्युमभिव्याप्य यद्वा मृत्यु १०४
ना२ र्लयः यावन्न वलीयते तावत्पर्यंतमित्यर्थः ५ ननु सृष्ट्यादिक्रियाभिरेव द्वैतं निरूपितं कथमसत्यं स्यात् तत्राह आत्मैवेति द्वाभ्यां त्राय
ते पाल्यते त्राति पालयति ६ अन्यस्मात् सृज्यादिव्यतिरिक्तात् त्रिविधा अध्यात्मादिरूपा भातिः प्रतीतिः ननु कथं निर्मूलं
प्रतीयते तत्राह इदमिति ७

ना२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानविज्ञानयोर्नैपुणं निष्ठां सूर्यवत्समो भूत्वा ८ एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति यदाद्यन्तवत्तू हि तत्तदसदिति ज्ञात्वा निःसंगो वि
चरेत् आद्यन्तवत्त्वे प्रमाणानि प्रत्यक्षेण घटादि अनुमानेन सावयवत्वेन दृश्यं पृथिव्यादि निगमेन अप्रत्यक्षमाकाशादि आत्मसंविदा स्वा
नुभवेन सर्वं दृश्यं माद्यन्तवत् असत्त्वे निज्ञातं वेति ९ ननु यद्यात्मसंविदा संवेद्यं दृश्यमसदित्युच्यते तर्ह्यात्मा स्वप्रकाशो देहादिर्हि तेन च जड
डमित्युक्तं स्यात् तथा च संसारप्रतिभासानघटनेति चोदयति नैवेति अनात्मस्वदृशोर्जडाजडयोः अत्र हेतुः द्रष्टृदृश्ययोः मा भूत्
द्वयोरपि तत्राह उपलभ्यत इति १० एतत्प्रपंचयति आत्मेति अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिपुण्यापुण्याज्ञानप

एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं न निंदति न च स्तौति लोके चरति सूर्यवत् ८ प्रत्यक्षेणानुमानेन निगमे
नात्मसंविदा आद्यन्तवदसज्ज्ञात्वा निःसंगो विचरेदिह ९ उद्धव उवाच नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्य
योः अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते १० आत्माव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः अग्निव
द्दारुवदचिद्देहः कस्येह संसृतिः ११ श्रीभगवानुवाच यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं संसारः
फलवांस्तावदपार्थोऽप्यविवेकिनः १२

रिच्छेदानामसंभवं दर्शयति हेतुहेतुमत्त्वेनुपपत्त्येष्व अचित् जडः अयं भावः यथैवाग्निदारुणोर्भेदेनानुपलंभेपि दारु
प्रकाश्यमेव अग्निश्च प्रकाशकः तथा देहात्मनोरपीति न संसृतिस्तयोरन्यतरस्यापि घटत इति ११ सत्यं तथाऽप्युभ
योरेवमविवेकादेव संसारात्वेवनमित्याह पंचभिः यावदिति सन्निकर्षणं संबंधः नन्वसंगस्य कुतः संबंधस्तत्राह अ
विवेकिनः अज्ञानकृत इत्यर्थः ननु स्वप्रकाशस्य कथमज्ञानतः संसारस्तत्राह अपार्थोपि केवलं फलवान् फ
लस्फूर्तिर्न तु तत्त्वेनास्तीत्यर्थः १२

मिथ्याभूतोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०९० ननु सतो देहादेः कुतः संसारस्फूर्तिहेतुत्वमपि तत्राह अर्थे हीति अस्यात्मनः १३ ननु कथं विज्ञानतो विषयस्फूर्तिर्जीवन्मुक्तस्या
पि दुर्वारेत्यनिर्मोक्षप्रसंगः स्यात् तत्राह यथाहीति प्रस्वापः स्वप्नः बह्वनर्थान्बिभर्ति पुष्णातीति १४ अहंकारलक्षणादेहादिसन्नि
कर्ष एव संसारालंबनमित्यन्वयव्यतिरेकाभ्यां दर्शयति शोकेति सुषुप्तौ तेषामदर्शनात् अहं सुखीति वेद्यन्नन्यः सुखीति प्रती
त्यभावाच्च दृश्यत्वाच्च सुखादीनां रूपवत्वादिवद्द्रष्टृधर्मत्वानुपपत्तेरिति भावः १५ ननु यद्यहंकारस्य संसारस्तर्हि मुक्तिर

अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा १३ यथा ह्यप्रतिबुद्धस्य
प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १४ शोकहर्षभयक्रोधलोभमोहस्पृहादयः ॥
अहंकारस्य दृश्यंते जन्ममृत्युश्च नात्मनः १५ देहेंद्रियप्राणमनोऽभिमानो जीवोऽन्तरात्मा गुणकर्ममूर्तिः ॥
सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः १६ अमूलमेतद्बहुरूपरूपितं मनोवचः प्राण
शरीरकर्म ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां विचरत्यतृष्णः १७ श्रीराम श्रीराम श्रीरा

न। पितरस्येवेति मुक्तावहंकाराविशेषः प्रसज्येत तत्राह देहेति देहादिष्वभिमानो यस्य सः आत्मैव तेषामंतर्हितो जीवः अत एव गु
णकर्ममयी मूर्तिर्यस्य सः एवं च सूक्ष्मोपाधिभिर्बहुधैव सूत्रादिशब्दैर्गीतः संसारपरमेश्वराधीनः सर्वतः आधावति आतोऽ ना
यं दोष इति भावः १६ तदेवमहंकारस्तत्त्वं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह अमूलमिति वस्तुतो मूलशून्यं राम
अज्ञानतस्तु बहुभी रूपैः रूपितं प्रकाशितं ऐंद्रजालिकतुल्यमिति वा किं तत् तदाह मन इति मन आदीनां द्वंद्वः यद्वा १०५
मनआदिषु क्रियत इति कर्म अहंकाररूपं गुरूपासनया निशितेन ज्ञानखड्गेन छित्वा १७ श्रीकृष्णावासुदेव ॥ राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेव ज्ञानं स्वरूपसाधनफलत्वे निरूपयति ज्ञानमिति विवेको ज्ञाने साधनान्याह निगमो वेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभवः ऐतिह्यमुपदेशः
अनुमानं तर्कः फलमाह आद्यंतयोर्यदस्य जगतः मध्येपि तदेव केवलं न तु जगदिति किंतु कालः कालयति प्रकाशयतीति यः तथा हेतुः
कारणं च यत्तु तदेव एतदुक्तं भवति यदस्य विश्वस्य कारणं प्रकाशं च ब्रह्म तदात्मकमेवेदं न तु ततः पृथगित्येवं निश्चयफलो निगमादिसा
धनैर्जायते यो विवेकः तज्ज्ञानमिति १८ तत्र नानाभेदव्यवहारालंबनस्यापि विश्वस्य कारणमात्रात्मकत्वे सदृष्टांतमाह यथेति स्वकृतं
सुष्ठु कुंडलादिरूपेण विरचितं यद्धिरण्यं कीदृशो हिरण्मयस्य कुंडलादेस्तु पुरस्तात्पश्चाच्च यद्वा स्वकृतं कटककुंडलमि
त्यादिनानाव्यपदेशैर्व्यवहारं प्राप्यमाणमपि तदेव यथा तद्वदस्य विश्वस्य कारणभूतोहमेव नानाव्यवहारालंबनं न तु मत्तः पृथग्वि

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये १८
यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥
१९ विज्ञानमेतत्त्रियवस्थमंग गुणत्रयं कारणकार्यकर्तृ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम् २० श्री ॥

श्वमिति १९ तदेवं कार्यस्य कारणमात्रात्मकतामुक्त्वा प्रकाश्यस्य प्रकाशकात्मतामाह विज्ञानमिति त्रियवस्थं त्रयवस्था यस्य पृथ
क्त्वाः छेदानुरोधेन जाग्रदादित्र्यवस्थं यद्विज्ञानं मनः तदवस्थाकारणभूतं च यद्गुणत्रयं यच्च कारणकार्यकर्तृ कारणम
ध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवं एवं गुणत्रयकार्यभूतं त्रिविधं जगत् एतद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वये
न भवति येनानुगतं प्रकाशत इत्यर्थः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तथा चक्षुषश्चक्षुरुत श्रो
त्रस्य श्रोत्रं मनसो ये मनो विदुरित्यादिश्रुतेः ननु विशेषविज्ञानव्यतिरेकेण न तुर्यं नामोपलभामहे तत्राह व्यतिरेकतश्च स
माध्यादौ यदस्ति तदेव सत्यमिति २०

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥०१० एवं कालत्रयेऽप्यव्यभिचारिणः सत्यत्वमुक्त्वा व्यभिचारिणः स्वसत्यतामाह नयदिति मध्ये च ततः पृथङ् नास्ति किंतु व्यपदेशमात्रं कृतः।
यतः यद्यत्परेण अन्येन भूतं जातं प्रसिद्धं प्रकाशितं च यत्तु तदेव कारणप्रकाशकं तावन्मात्रं स्यान्न पृथगिति मम मनीषा बुद्धिः। वाचारंभणं
विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादि श्रुतेः। कारणप्रकाशकव्यतिरेकेण च कार्यस्य प्रकाश्यस्य चानुपलंभा
दिति भावः २१ एवं सामान्यतः कार्यप्रकाश्ययोः कारणप्रकाशकाभ्यामभेदं व्युत्पाद्य प्रकृते तु उभयविवेकपूर्वकं प्रपंचस्य ब्र
ह्माभेदमाह अविद्यमान इति योऽयं वैकारिको विकारसमूहः स एष प्रागविद्यमानो राजससर्गः रजोद्वारेण ब्रह्मकार्यभूत इ

नयत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रं भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा २१ अवि
द्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ब्रह्म स्वयं ज्योतिरतो विभाति ब्रह्मेंद्रियार्थात्मविकारचित्रं
१०६ ब्रह्म। २२ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन छित्वात्मसंदेहमुपारमेत स्वानंदतुष्टोऽखिलकामुकेभ्यः २३

की। त्यर्थः अवभासते पि ब्रह्मसंश्रयत्वेनेत्यर्थः। ब्रह्म तु स्वयं स्वतः सिद्धं न तु कार्यमित्यर्थः। ज्योतिश्च प्रकाशकमित्यर्थः। अतः कारणा
त् [illegible] इंद्रियाणि च अर्थास्तन्मात्राणि च आत्मा मनः [illegible] अ देवानामप्युपलक्षणं विकाराः पंचभूतानि एवं चित्रं राम
प३ ब्रह्मैव भातीति २२ उपसंहरति एवं निगमनं प्रत्यक्षेतिह्यानुमानैः स्फुटं यथा भवति तथा ब्रह्मविवेकहेतुभिः तथापर १०६
स्य देहादेरपवादेन आत्मत्वनिरासेन च कीदृशेन विशारदेन निपुणेन गुरुणा निमित्तभूतेनेति वा आत्मविषयसं
देहं छित्वा स्वानंदतुष्टः सन्न खिलेभ्यः। कामुकेभ्य इंद्रियादिभ्य उपारमेत निःसंगो भवेत् २३ श्रीराम राम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परापवादं प्रपंचयति वपुरात्मा न भवति पार्थिवत्वात् घटवत् तथा इंद्रियाणि तदधिष्ठातारो देवाः असुर्मनः धिषणा बुद्धिः सत्वं चित्तं अहंकृ
तिरि[illegible]त्यनेनात्मा न भवंति कुतः अन्नमात्रं अन्नोप[illegible]त्पत्वात् शरीरवत् वायुर्जलं च हुताशस्तेजः खं क्षितिरिति पंच भूतानि अर्थाः
शब्दादयः साम्यं प्रकृतिः अनात्मा जडत्वात् घटवदिति यद्वा हि शब्देनानुमानांतराणि सूचितानि तद्यथा इंद्रियाण्यात्मा न भवंति करण
त्वात् मनोवत् प्राणश्च वायुत्वात् बाह्यवायुवदित्यादि २४ एवं विवेकज्ञानवतो मुक्तस्येंद्रियादिकृतो गुणदोषसंबंधः स्यादिति समाहि
तैरिति मत्सुविविक्तधाम्नः मम सुष्ठु विविक्तं धाम स्वरूपं येन तस्य प्रकाशकस्य गुणो दोषो न भवंतीति विदृष्टांतेनोक्तं २५ असंगत्व प्रका२५।

नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः मनोऽन्नमात्रं धिषणा च सत्वमहंकृतिः खं क्षितिरर्थ
साम्यं २४ समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतै
विगतै रवेः किं २५ यथा नभो वाय्वनलांबुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते तथाक्षरं सत्वरजस्तमोमलैरहंम
तेः संसृतिहेतुभिः परं २६ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् भक्तियोगेन दृढेन यावद्रजो मद् २
निरस्येत मनःकषायः २७ यथामयोऽसाधुचिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् एवं मनोऽपक्वकषाय
कर्म कुयोगिनं विध्यति सर्वसंगं २८ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

स्वे[illegible]नावस्थितस्य नैकेपि गुणदोषा इत्याकाशदृष्टांतेनाह यथेति वाय्वादीनां शोषणदहनक्लेदनरजोधूसरत्वादिभिर्गतागतैर
गमापायिभिः ऋतुगणैः शीतोष्णादिभिर्वा अहंमतेः अहंकारात्परमक्षरं संसृतिहेतुभिर्न युज्यते यद्वा अहंकारस्य संसृतिभिरिति २६ हेतु२
मुक्तवत्सम्यक् ज्ञानानं यथेष्टमाचरेदित्याह द्वाभ्यां तथाऽपीति गुणेषु विषयेषु रजो रागः मनसः कषाय इति दुर्निरसतामाह २७ एत
देव दृष्टांतेनोपपादयति यथेति नृणामामयो रोगः असाधु असम्यक् यथा भवति तथा अपक्वकषाय कर्म अदग्धाः कषाया रागादय
स्तन्मूलानि कर्माणि च यस्मिन् तत् अत एव सर्वसंगं सर्वेषु पुत्रादिषु सज्जमानं मनः कुयोगिनं असम्यग्ज्ञानिनं विध्यति भ्रंशयति २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

ननु कथं त्रिविषयसंगाद्वियोगभ्रंशः स्यात् अलंतं हि सोपायेन योगमार्गेण तत्राह कुयोगिन इति मनुष्यभूतैर्बंधुशिष्यादिरूपैः त्रिद
शैरुपसृष्टैः प्रेरितैः तथाच श्रुतिः यस्मात्तदेषां न प्रियं यदेतन्मनुष्या विद्युरिति भूयो जन्मांतरे ननु कर्मतंत्र कर्मविस्तारं २९॥
ननु विदुषामपि सर्वथा कर्म दुःपरिहरमिति पुनः संसारः स्यादत आह करोतीति विदुषाम्नोऽसौ जंतुर्देह एव भोजनादिक
ते१ र्म करोति क्रियते विक्रियं च तेन कर्मणा पुनर्भ्याद्यपि प्राप्नोतीत्यर्थः केनापि संस्कारादिना चोदितः सन् विद्वांस्तु प्रकृतौ

कुयोगिनो ये विहतास्त्वंतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्म
तंत्रं २९ करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् न तत्र विद्वान् प्रकृतौ स्थितोऽपि निवृ
१०७ त्ततृष्णः स्वसुखानुभूत्या ३० तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं स्वभावमन्यत्किमपी
हमानमात्मानमात्मस्थमतिर्न वेद ३१ यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत् न म
न्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानं ३२ श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम॥ ८१

देहस्थितोऽपि तत्र कर्माणि न विक्रियते निरहंकारित्वात् हर्षविषादादिभिः संसारं न प्राप्नोति ३० किंच आस्तां तावद्देहिक राम
कर्मभिर्विकारशंका यतो देहमप्यसौ न पश्यतीत्याह तिष्ठंतमिति उक्षंतं मूत्रयंतं स्वभावप्राप्तमन्यदपि दर्शनस्पर्शनादि ईहे १०७
मानं कुर्वंतं आत्मानं देहं ३१ ननु इंद्रियवतः सर्वथा कथमदर्शनं संभवति तत्राह यदि स्मेति यद्यपि असत्तावहिर्मुखानामिं वैदिक
द्रियाणामर्थं पश्यति तथाऽपि नानात्वान्मिथ्या स्वप्नवदित्यनुमानेन विरुद्धं बाधितं सत् अन्यदात्मव्यतिरिक्तं मनीषी वस्तु
तया न मन्यते स्वापादुत्थाय प्रबुद्धः संस्कारमात्रेण स्वाप्नं विषयं स्फुरंतं अत एव स्वयमेव तिरोभवंतं यथा नाद्रियते ३२ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वं सुखी दुःखीकर्त्ताऽहं ज्ञाता इति गुणकर्मसंसृष्ट आत्मा गृहीतः तत्संगेन आत्मनोपि संगो घटते नेति २
स यदि योगिनां च क्षुषां नमो निहन्यात् ५

तदेवमात्मानविक्रियत इत्युक्तं ननु एतदनुपपन्नं बद्धावस्थायां त्याज्यमानत्वात् मुक्तावस्थायां च गृह्यमाणत्वात् यथा न हि व्रीहयोऽवघा
तेन व्रीहिभावत्यागेन तंडुलत्वभावेन गृह्यमाणाः न विक्रियंते तत्राह पूर्वमिति बंधावस्थायां गुणैः कर्मभिश्च चित्रमज्ञानकार्यं देहे
द्रियादि लक्षणं आत्मन्यध्यासेन विविक्तं गृहीतमासीत् तदेव पुनर्ज्ञानेन विनिवर्त्तते आत्मा तु न केनापि रूपेण गृह्यते नापि
त्यज्यते अयं भावः मुक्तेः क्रियाफलत्वेनात्र हात्मनो विकारः तस्याश्चारोपितायाः ज्ञानमात्रनिवृत्तिरूपत्वेनात्मसंस्पर्शित्वं
धर्माक्षयोः अतो न विकार इति २३ एतदेव दृष्टांतेन स्पष्टयति यथेति ननु पूर्वमेव सद्भावादि पुनर्विधत्ते कोरोति मैसमीक्षा आ
त्मविद्या २४ आत्मनो निर्विकारतां प्रपंचयति एष इत्यनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्वयंज्योति

पूर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तं मंग निवर्त्तेत तत्पुनरीक्षयेव न गृह्यते नापि विसृज्य आत्मा २३ यथा
हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते एवं समीक्षा निपुणा सती मे हन्यात् तमिस्रं पुरुषस्य बुद्धेः
२४ एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः एकोऽद्वितीयो वचसां विरामे येनेषिता वागसव
श्चरंति २५

रित्यनेनाज्ञानमलापाकरणलक्षणां विक्रियां निवारयति अज इत्युत्पत्तिं वारयति अप्रमेय इति ज्ञानलक्षणा
तिशयाधानेन संस्कारं महानुभूतिरिति देशकालपरिच्छेदाभावेन आस्तित्वरुद्धिविपरिणामापक्षयनाशान् स्वयंज्योतिष्ट्वा
द्धेतुः सकलानुभूतिरिति एकोऽद्वितीय इति विकारहेतोरन्यस्याभावान्नकोऽपि विकार इति दर्शयति ननु श्रुतिविषयस्य क
थं स्वयंज्योतिष्ट्वं हि तत्राह वचसां विरामे अगोचरत्वेन निवृत्तो सत्यां तथा च श्रुतिः यतो वाचो निवर्त्तंते अप्राप्य मनसा
सहेति तत्र हेतुः येनेषिताः प्रेषिताः तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः [illegible] न प्राणः प्रथमः प्रैति युक्तः केनेषितां ये२
वाचमिमां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं प्राणस्य प्राणं चक्षुषश्चक्षुरिति २५

ति४ रि२ ये२ ये२

वागसवः इंद्रियप्राणाश्चरंति विषयेषु २

सत्यमिति मन्यंते इति ५

भा०ए० अद्वितीयत्वमुपपादयतुं भेदस्याविद्यकत्वमाह एतावानिति केवले अभिन्ने आत्मनि आत्मनि विकल्प इति यत् एतावान् सर्वोऽप्यात्मनो मनसः
संमोह भ्रमः यतः स्वमात्मानमन्तरेण विना परस्य विकल्पस्यावलंबः आश्रयो नास्ति रजतभ्रमस्येव शुक्तिं विना नेह नानास्ति किंचन इं
द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्यादिश्रुतेरित्यर्थः ३६ केचित्तु प्रत्यक्षादिप्रतीतप्रपंचस्य बाधायोगात् वेदा
न्तार्थानां च कृत्वर्थकत्वप्रतिपादनपरत्वेनार्थवादत्वात् हेतो सत्यमिति मन्यन्ते तन्मतमनूद्य दूषयति यदिति नामाकृतिभिः नामरू
पोपलक्षितं पंचभूतात्मकं दृश्यं हेतुं यत् अबाधितमिति पंडितमानिनां अत्र वयमेव पंडिता इत्यभिमानवतां वेदान्तेष्वयमर्थवाद
इति प्रतीतिः न तत्त्वविदां यतः व्यर्थेनापि विनाप्यर्थं न सा प्रतीतिः तथाहि न तावद्विधेकवाक्यत्वं तेषामस्ति यतोऽर्थवादत्वं स्यात्

एतावानात्मसंमोहो यद्विकल्पस्तु केवले । आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ३६ यन्नामाकृतिभिर्ग्राह्यं
१०८ पंचवर्णमबाधितं । व्यर्थेनाप्यर्थवादोऽयं द्वयं पंडितमानिनां ३७ योगिनोऽपक्वयोगस्य युंजतः काय उत्थितैः उ
पसर्गैर्विहन्येत तत्रायं विहितो विधिः ३८ योगधारणया कांश्चिदासनैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चि
उ१ दुपसर्गान्विनिर्दहेत् ३९ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः योगेश्वरानुवृत्त्या वा हन्यादशुभदाञ्छनैः ४०

अध्यायोऽध्यायत ५ नचाकर्तृभोक्तृपरमानंदरूपात्मप्रतिपादनं कर्मविशेषतां भजते न वाबाधितत्वं द्वैतस्य नामरूपात्मकत्वात् ग्राह्यत्वात् पंचवर्णा
ति विधिः श्रील त्मकत्वात् स्वप्नवदित्याद्यनुमानैर्वाचारंभणादिश्रुतिभिश्च बाधितत्वादिति ३७ तदेवं ज्ञानं योगं सपरिकरं निरूप्य तन्नि राम
नहंतव्य इति ष्ठस्य विघ्नप्रतीकारमाह योगिन इति त्रिभिः योगं युंजतः कायायां यतनैर्वा उत्थितैः उपसर्गैरोगादिभिरुपद्रवैः अभिभूयते विधिः प्रती १०८
धः विहितः कारः ३८ योगधारणया सोमसूर्यादिधारणया संतापशीतादीन् आसनैः वायुधारणान्वितैः वातादिरोगान् तपोमंत्रौष तत्रायं २
२ धैः पापग्रहसर्पादिकृतान् ३९ ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन् हन्यात् ४० श्रीराम॥

प्रपंचो मिथ्या दृश्यत्वात् स्वप्नवत् धि ५ अशुभदान् शनैः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्येतु देहसिद्ध्यर्थमेवेतत्सर्वं कुर्वंतिनतुइत्यनिकेचित्तुनरेंतरन्येअपायैर्देहमेवसुकल्पंजरारोगादिरहितं वयसितारुण्येस्थिरे च कृत्वा
अदंदपरकायप्रवेशादिसिद्धयेतत्रधारणारूपंयोगंयुंजंतिनतुज्ञाननिष्ठारूपं ४१ कुशलैः प्राज्ञैरादरणीयंनभवति वनस्पतेरिव
ह्यात्मवस्थापीशरीरंतुफलवन्नश्वरमित्यर्थः ४२ ननु ध्येचित्तसमाध्यंगत्वेनापिप्राणायामादियोगोक्ति यमाणैर्जरारोगाद्यभावाद
इत्येवस्थापीशरीरं तत्राह योगचर्यामिति ननु तदेहसिद्धिं श्रद्दध्यात्‍ नविश्वसेत्‍ ४३ तदेव विघ्न
शपृत सुखानतथाऽपिसमाधिमुत्सृज्यनतत्रसज्जेतत्याह योगचर्यामिति विचरन्‍ आचरन्‍ स्वसुखअनुभूः अनुभूतिर्य
न१ प्रतीकारैर्योगं कुर्यादित्युक्तं मत्स्मरणस्यतु विघ्नशंकापीत्याह योगचर्यामिति विचरन्‍ आचरन्‍ स्वसुखअनुभूः अनुभूतिर्य

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरे विधाय विविधोपायैरथ युंजंति सिद्धये ४१ नहि तत्कुशलादृत्यं तदायासोह्य
पार्थकः अंतवत्वाच्छरीरस्य फलस्येव वनस्पतेः ४२ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात्‍ तच्छ्रद्दध्यान्नम
तिमान्योगमुत्सृज्य मत्परः ४३ योगचर्यामिमां योगी विचरन्मदपाश्रयः नांऽतरायैर्विहन्येत निःस्पृहः स्वसु
खानुभूः ४४ इति श्रीभा० म० ए० परमार्थविनिर्णयोनामाष्टाविंशोऽध्यायः उद्धव उवाच सुदुश्चरामिमाम
न्ये योगचर्यामनात्मनः यथाऽञ्जसा पुमान्सिध्येत्तन्मे ब्रूह्यंजसाऽच्युत १ प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः
विषीदंत्यसमाधानान्मनोनिग्रहकर्षिताः २

स्पृहः स्पृहामूला हि विघ्नाः सा च मदपाश्रयस्य निवर्तते अतोंतरायैर्न विहतः स्वानंदपूर्णो भवतीति ४४ स्वमाहात्म्यस्वयोगेतुसम
स्तोपनिषत्सारस्वमुख्यतमां भक्तिं मुक्तोपुनरुपादिशत्‍ इत्येकादशेऽष्टाविंशः तुनत्रिंशेतुयः पूर्वं विस्तरेण निरूपितः भ
क्तियोगस्तमेवाह स्वभक्तायसमासतः १ अतिन्केशामिवालक्ष्यपयोगःसंगेकसंपदि सुखोपायंपुनःकृष्णमुद्धवः परिपृच्छति २
अनात्मनः अवशीकृतमनसः अंजसाअप्रयासेनायथा सिध्येत्‍ तत्तथा अंजसासुबोधं यथातथामेब्रूहि १ सुदुष्करतांप्रपंचय
ति प्रायशइति मनोयुंजंतो निग्रहंकृतः विषीदंति क्लिश्यंति कुतः असमाधानात्‍ अनिग्रहात्‍ कथंचिन्मनसोनिग्रहेचकर्षिताः श्रांताः
संतः २ विषीदंति

एवं प्रकारांतरेणाविषीदंति अथ तस्मात् त्वामाश्रिता न विषीदंतीत्याह १

भा० ए० यस्माद्विवेकेन न विषीदंति अथातः अत एव ये हंसाः सारासारविवेकचतुराः ते नु आनंददुग्धे समस्तानंदपरिपूरके तव पदांबुजमेव सुखं
५२ यथा भवति तथानु निश्चितं अयि रत्न सेवंते अमी तु त्वन्मायाविहताः केचिद्योगकर्मभिर्मानिनः संतो न आश्रयंति यद्वा अमी त्वदंघ्रिकोः
त्वन्माययानुविहताः अत एव योगकर्मभिः श्लाघामानिनो भवंति अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञाः वयं कर्मे
कुशला इति केवलं गर्विता भवंति न तु मुच्यंत इत्यर्थः ३ त्वदंघ्रिकास्तत्वपरसोदनरूतार्था भवंतीति नातिचित्रमित्याह किं

५२

अथात आनंददुग्धपदांबुजं हंसाः श्रयेरन्नरविंदलोचन सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययाऽमी विहता
१०५ नमानिनः ३ किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं योऽरोचयत्सह मृगैः स्वय
मीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ४ त्वं

५२

त्वं मिति अनन्यशरणेषु दासेषु तव आत्मसात्त्वं तदधीनत्वं यत्तु यथा नंदगोपीवलिप्रभृतिषु एतन्नु किं चित्रं नाश्चर्यमित्यर्थः य
तोऽयं भवान् श्रीरामरूपेण मृगैः वानरैः सह साहित्यं सख्यमिति यावत् अरोचयत् प्रीत्याकृतवान् कथंभूतः ईश्वराणां राम
ब्रह्मादीनां यानि श्रीमंति किरीटानि तेषां तटान्यग्राणि तैः पीडितं विलुठितं पादपीठं यस्य स्वयं तथाभूतोऽपि ४ ॥ १०५

५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्केवलं कस्मैइंद्रियभोगाय अनु अनंतरमेव त्वद्विस्मृतये भवति यद्वा तद्व्यतिरिक्तं किमपि देवतांतरं धर्मज्ञानादिसाधनं वा भजेत् ऐश्वर्याय संसा
रस्य विस्तर

अतस्त्वां परित्यज्य को नाम अन्यं संश्रयेदित्याह त्वांवेति तमेवंभूतं त्वां को नु विसृजेत् कथंभूतः स्वकृतवित् बलिप्रह्लादादिषु त्वया
कृतमनुग्रहं जानन् यद्वा स्वस्मिन्नेवांतर्यामितया [illegible]कृतमुपकारं विद्वान् तदेवाह अखि[illegible]लात्मदयितेश्वरं अखिलस्य
जगतः आत्मानं चेतयितारं आत्मत्वादेव दयितं प्रेष्ठं सुसेव्यं ईश्वरत्वाद्वश्यं भजनीयं किंच आश्रितानां सर्वार्थदं तत् हि।
किं फलोद्देशेनाहं सेव्यः न हि न हि किमपि अनितुक्तं त्वद्व्यतिरिक्तं स्वर्गादि त्वयादत्तमपि किं वा भजेत् सेवेत कथंभूतं तत्
[illegible]केवलं विस्मृतये मोक्षाय वा को वा भजेत् न कोपि ननु तत्साधनं विना भोगमोक्षादिफलं कथं स्यात्तत्राह किंचेति तद्

टि० १ त्वां वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतवि[illegible]सृजेत को नु को वा भजेत्किमपि विस्मृतये ऽनुभूत्यै किं
वा भवेन्न तव पादरजोजुषां नः ५ नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः
योंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ६ श्रीराम श्रीराम श्रीराम

ते यो वै साधनसंपत्तिः पुरुषार्थचतुष्टये तया विना तदाप्नोति नरो नारायणाश्रयः इति ५ आस्तामन्यभजनवार्ता त्वत्कृतोपका
रस्य त्वय्यात्मनिवेदनेनैव निःकृतिर्नान्यथेत्याह नैवेति अपचितिं प्रत्युपकारं आनृण्यमिति यावत् कवयो ब्रह्मविदोपि
नैव प्राप्नुवंति यतः त्वत्कृतमुपकारं स्मरंतः ऋद्धमुदः उपचितपरमानंदाः उपकारमेवाह यो भवान् अंतर्बहिः आचार्य
वपुषा गुरुरूपेण अंतः चैत्यवपुषा अंतर्यामिरूपेण अशुभं विषयवासनां विधुन्वन् निरस्यन् स्वगतिं निजरूपं
प्रकटयति तस्य तव ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए० ईश्वरत्वे हेतुः जगत्क्रीडनकं क्रीडोपकारणं यस्य सः ननु जगत्सृष्ट्यादिना ब्रह्मेशादयः क्रीडंतीत्यत्राह स्वशक्तिभिः गृहीतं मूर्तित्रयं
येन सः संप्रेम प्रेमसहितं मनोहरं स्मितं यस्य सः संप्रेमं यथा तथा जगादेति वा ८ हंतेति सहर्षसंबोधने सुमंगलान् सुखरूपान् मृ
त्युं संसारं दुर्जयमन्यैरुपायैः ९ धर्मानेवाह कुर्यादिति त्रयोदशभिः मां स्मरन् शनैः असंरंभतः कुर्यात् तदाह मयीति अर्पि
ते मनश्चित्ते संकल्पविकल्पानुसंधानात्मके येन अत एव मद्धर्मेष्वेवात्ममनसो रतिर्यस्य सः १० पुण्यदेशान्लक्षण मद्भक्तैरि

शुक उवाच इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः गृहीतमूर्तित्रय ईश्वरेश्वरो
जगाद सप्रेममनोहरस्मितः ८ श्रीभगवानुवाच हंत ते वर्णयिष्यामि मम धर्मान्सुमंगलान् यान्श्रद्धया
चरन्मर्त्यो मृत्युं जयति दुर्जयं ९ कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् मय्यर्पितमनश्चित्तो मद्धर्मा
११० त्ममनोरतिः १० देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥१०
पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ११ मामेव सर्वभूतेषु
बहिरंतरपावृतं ईक्षेतात्मनि चात्मानं यथा खममलाशयः १२ इति सर्वाणि भूतानि मद्भावेन महाद्यु
ने सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः १३

एथर स्वयं। ति देवादिषु ये ये मद्भक्ताः तेषामाचरितानि कर्माणि चाश्रयेत् १० सत्रेण संभूय वा ११ अंतरंगां भक्तिमाह मामिति त्रिभिः सर्वेषु
तेषात्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत कथमेकस्य सर्वेषु स्थितिस्तत्राह बहिरंतः पूर्णमित्यर्थः नन्वेवं तत्रापावृतं आ राम त्रि
नावरणं तदपि कुतः यथा खं असंगत्वादित्यर्थः हे महाद्युते अतिप्राज्ञ १२ इत्यनेन प्रकारेण केवलं ज्ञानं रूपां ह ११०
ष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजन् पंडितो इत्युत्तरेणान्वयः १३ राम राम राम श्री

५१ ५७।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११० किंच योयइति अयमर्थः किंचक्कचिंधर्मस्यनधंसइतियतोलोकिकोऽपियोयोनिरर्थः अर्थआयासः सोपिमय्यपिपरे निष्फलायचेत्कल्प्यते
निष्कामतयाऽर्पितश्चेत् नहिंधर्मएवस्यात् निरर्थायासेदृष्टांतः यथाभयशोकादिहेतोः पलायनाक्रंदनादिर्लोकेनास्तहत् २१ अनृतोम
ऽजनमेवबुद्धेविवेकस्य मनीषायाश्चातुर्यस्यचफलमित्याहएषेति तामेवदर्शयति सत्यममृतंचमामंअनृतेनासत्येनमर्त्ये
नविनाशिनामनुष्यदेहेनइहअस्मिन्नेवजन्मनिप्राप्नोतीतियत् सैवबुद्धिर्मनीषाचेति बुद्धिर्विवेकः मनीषाचातुर्यं २२ महाप्रक

योयोमय्यपिपरेधर्म्मः कल्प्यतेनिःफलायचेत् तदायासोनिरर्थःस्याद्भयादेरिवसत्तम २१ एषाबुद्धिमतांबुद्धिर्मनी
षाचमनीषिणां यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमाऽमृतं २२ एषतेऽभिहितःकृत्स्नोब्रह्मवादस्यसंग्रहः समासव्यासविधि नै२ ता२
नादेवानामपिदुर्गमः २३ अभीक्ष्णशस्तेगदितंज्ञानविस्पष्टयुक्तिमत् एतद्विज्ञायमुच्येतपुरुषोनष्टसंशयः २४ सु
११ विविक्तंतवप्रश्नंमयैतदपिधारयेत् सनातनंब्रह्मगुह्यंपरंब्रह्माऽधिगच्छति २५ यएतन्ममभक्तेषुसंप्रदद्यात्सुपु
ष्कलं तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना २६ यएतत्समधीयीतपवित्रंपरमंशुचि सपूयेताऽहरहर्मां
ज्ञानदीपेनदर्शयन् २७ यएतच्छ्रद्धयानित्यमव्यग्रःशृणुयान्नरः मयिभक्तिंपरांकुर्वन्कर्मभिर्नसबध्यते २८
अप्युद्धवत्वयाब्रह्मसखेसमवधारितं अपितेविगतोमोहःशोकश्चासौमनोभवः २९ नैतत्त्वयादांभिकायनास्ति
कायशठायच अशुश्रूषोरभक्तायदुर्विनीतायदीयतां ३०

रणार्थमुपसंहरतिएषतइतिद्वाभ्यां २३ २४ किंच आख्यानावत्
ज्ञानं एतदनुसंधानकथनपठनश्रवणपराणामप्येतदेवफलंभवतीत्याहचतुर्भिः सुविविक्तमिति मयासुविविक्तंदत्तोत्तरं एतत् राम
आख्यानमपियोधारयेत् अनुसंदधाति सः ब्रह्मगुह्यंवेदरहस्यं २५ सुपुष्कलंयथाभवतितथाब्रह्मदायस्यब्रह्मददातीतितथाते १११
स्यज्ञानापदेष्टुः २६ समधीयीतउच्चैःपठेत् परमंशुचिअन्येषामपिशोधकंपूयेतशोधयेत् २७ २८ समकृज्ज्ञानानुत्पत्तौपुनरु
पदेक्ष्यामीत्याशयेनपृच्छतिअपीति अपिकिं २९ उपधारितमाकल्याहनेतदिति शठायवंचकाय ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुनूत्तमाधमेष्वेकरूपेण सभाजनं पांडित्यमेव स्यात् पूज्यपूजाहिव्यतिक्रमात् दित्याशंक्य तामेवज्ञानदृष्टिं प्रपंचयति ब्राह्मणइति
म२ विषमेष्वपि [illegible]भाजन समदृक्समं मामेव पश्यन् वैषम्यमेव चतुर्द्धा दर्शयति ब्राह्मणे पुक्कस इति तावद्वैषम्यं पुक्कसोऽन्त्यजाति
विशिष्टः स्तेन ब्रह्मस्वहारिणि ब्रह्मण्ये ब्राह्मणेभ्यो दातरीति कर्मणा अर्के विस्फुलिंगके निर्गुणतः अक्रूरे शांते क्रूरे चेति स्वभावतः आमिर२
१४ नरेष्वीश्वरदृष्टिं कुर्वतः सद्यः फलविशेषमाह नरेष्विति समानमहीनेषु स्पर्द्धादयः स्वस्मिन्नहंकारश्च हि निश्चितं वियंति
नश्यंति १५ अतोऽन्तर्यामीश्वरदृष्ट्या सर्वान् प्रणमेदित्याह विसृज्येति स्मयमानान् हसतः स्वान्स्वीयान् तथा देहिकीं दृशं

ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके अक्रूरे क्रूरके चैव समदृक् पंडितो मतः १४ नरेष्वभीक्ष्णं मद्भावं पुंसो भावय
तोऽचिरात् स्पर्द्धासूयातिरस्काराः साहंकारा वियंति हि १५ विसृज्य स्मयमानान्स्वान् दृशं व्रीडां च दैहिकीं प्रणमेद्दं
डवद्भूमावाश्वचांडालगोखरं १६ यावत्सर्वेषु भूतेषु मद्भावो नोपजायते तावदेवमुपासीत वाङ्मनःकायवृ
त्तिभिः १७ सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः १८ अयं हि सर्वक
ल्पानां सध्रीचीनो मतो मम मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः १९ न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्व वी२

अहमुत्तमः सतु नीच इति दृष्टिं तया दृष्ट्या या व्रीडा लज्जा तां च वि ऽपि मयाव्यवसितः सम्यङ्निर्गुणत्वादनाशिषः २० राम ग
श्व१ सृज्य चांडालादीन् पि पश्य प्रणमेत् १६ एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह द्वाभ्यां यावदिति १७ तस्य एवं कुर्वतः पुंसः
सर्वं ब्रह्मात्मकमेव भवति कुतः आत्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया अतः परितो ब्रह्मैव पश्यन् सर्वतः क्रियामात्रादु
परमेत् १८ किमयमेवोपायः अस्ति वान्योपीत्यपेक्षायां सत्स्वपि बहुषु समीचीनत्वमयमेवेत्याह अयं हीति १९ भगवद्धर्मलक्षणो
पायस्य समीचीनत्वमेवोपपादयति द्वाभ्यां नहीति अंग हे उद्धव आनाशिषो निष्कामस्य मद्धर्मस्य उपक्रमे सति अण्वपि ई वे३
षदपि वैगुण्यादिभिर्नाशो नास्त्येव यतो मयैव निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः ननु मन्वादिमुखेन कथं चित् २०

उक्तं च ये विरोधं प्रकुर्वीत भूतेष्वर्चावचेष्वपि ।। न तेषां सुखलेशोऽस्ति इह लोके परत्र चेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰२ त४

अज्ञाणां येषितां च यदि भक्तिः स्यात् तर्हि ब्रूयात् २१ एतत् ज्ञात्वा च पुमान् कृतार्थो भवतीत्याह नैनदिति अनूद्दृष्टान्तमाह पीत्वेति पीयूषं
स्वादु २० ननु संति बहूनि ज्ञेयानि तत्तत्फलसाधनानि सत्यं सत्यं भक्तानां मत्कस्पृतु सर्वं महमेव अन्तोमहं शरणो भवेत्याह ज्ञाने
इति ज्ञानादौ यावत् धर्मादिलक्षणश्चतुर्विधोर्थः तावान्सर्वोपि त्वहमेव तत्र ज्ञाने मोक्षः कर्मणि विहितो धर्मः स्वाभाविकेतु
कामः योगश्चाणिमादि सिद्धयः वार्त्तायां कृष्यादिरर्थः दण्डनीतावैश्वर्यमिति सिद्ध्यैश्वर्ययोरपि कामान्तर्गतत्वाच्चातुर्विध्यं २२ कुते

एतैद्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां २१ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्य
ते पीत्वा पीयूषममृतं पातव्यं नावशिष्यते २२ ज्ञाने कर्मणि योगे च वार्त्तायां दण्डधारणे यावानर्थो नृणां तात तावांस्तेऽहं
चतुर्विधः २३ मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे तदामृतत्वं प्रतिपद्यमानो मयात्मभू
याय च कल्पते वै २४ शुक उवाच स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य बद्धांजलिः प्रीत्युपरु २
द्धकंठो न किंचिदूचेश्रुपरिप्लुताक्षः २५ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः कृतांजलिः प्रा
ह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं २६ उद्धव उवाच विद्रावितो मोहमहांधकारो य आश्रितो मे तव सं
न्निधानात् विभावसोः किं नु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य २७ प्रत्यर्पितो मे भवतानुकंपिना भृ
त्याय विज्ञानमयः प्रदीपः यापति हित्वा कृतज्ञस्तव पादमूलं कोऽन्यत्समीयाच्छरणं त्वदीयं २८

इष्टतत्त्वमाह मर्त्य इति यदा त्यक्तसमस्तकर्मा सन्नेव निवेदितात्मा भवति तदा सोऽमे विचिकीर्षितो विशिष्टः कर्तुमिष्टो भवति तत अमृ
तत्त्वं मोक्षं प्रतिपद्यमानो मयात्मभूयाय मत्सदृशायुः समृद्धमानैश्वर्यायेति यावत् कल्पते योग्यो भवति वै ध्रुवम् २४ आदर्शितो योग
मार्गो यस्मै सः २५ प्रणयेनावघूर्णं स्फुरितं चित्तं धैर्येण विष्टभ्य बहुमन्यमानः आत्मानं कृतार्थं मन्यमानः २६ मया य आश्रित
आसीत् स तव सन्निधानेन विद्रावितः प्रभवति किं तु बाधाय समर्थो भवति अजाद्य ब्रह्मणोऽपि जनक २७ किंच यद्यपि तव सन्नि
धानादेव गतः तथाऽप्यनुकंपिना भवता विज्ञानमयः प्रदीप अप्रत्यर्पितः स्वमायया पहृतः पुनः समर्पितः अतस्तव कृतज्ञः य

यथा विभावसोर्वह्नेः समीपगस्य शीतं तमो भीः २

त्यायविज्ञानमयः प्रदीपः यापति हित्वा कृतज्ञस्तव पादमूलं हितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्या॰२

भा॰ए॰ किंच दाशार्हादिषु तत्र यायः स्वमायया स्नेहपाशः प्रसारितः सत्वैयवात्मन् त्वज्ञानशास्त्रेण त्वया छिन्नः ३९ एवं विधेपि त्वया वहु कृतं तन्
थाऽप्येतावत्प्रार्थयइत्याह नमोस्त्विति अनुशाधि अनुशिक्षय अनुशासनीयमाह यथेति मुक्तावप्यनपायिनी ४० तदुक्तो मो मित्यगी कृ
त्य तथाऽपि मयाऽदिष्टो लोके संग्रहार्थं मत्तावत् कुविरोहं गच्छेति आदिष्टो नियुक्तः ४१ स्नानादेः पूर्वमेव मत्पादतीर्थादिकं भूतायाश्च
त्वकेनेदायागंगायाइक्षयाचसानः परिदधानः ४२ द्वंद्वमात्राणां शीतोष्णादि विषयाणां सुशीलः आर्जवादि स्वभावः ४३ नेत्वया
विविक्तं सुविचारितं तिस्त्रस्त्रिगुणात्मिका गतीर्गतिक्रमेण ४४ हरिमेधसः संसारहर्तिमेधायस्य तेन श्रीकृष्णेन अद्वैते
परोपि सुखदुःखविनिर्मुक्तोऽपि अपक्रमे निर्गमनसमये ४५ किंच सुदुस्त्यजः स्नेहो यस्मिन् तेन वियोगात्कातरो भीतः

ध्या॰१ त्वत्के अमसुहृदः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोध
हेतिना ३९ नमोस्तु ते महायोगिन् प्रपन्नमनुशाधि मां यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी ४० श्रीभ
११२ गवानुवाच गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ४१ ई
क्षयाऽलकनंदाया विधूताशेषकल्मषः वसानो वल्कलान्यंग वन्यभुक् सुखनिःस्पृहः ४२ तितिक्षुर्द्वंद्वमा
त्राणां सुशीलः संयतेंद्रियः शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ४३ मत्तोऽनुशिक्षितं यत्ते विविक्त
मनुभावयन् मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं ४४ शुक
उवाच स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः शिरो निधायाश्रुकलाभिरार्द्रधीर्न्य
षिंचद् द्वंद्वपरोऽप्यपक्रमे ४५ सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः कृच्छ्रं ययौ मूर्द्धनि भर्तृपादुके

अनएवं तं परिहातुमशक्नुवन् आतुरो विक्लवः सन् कृच्छ्रं कष्टं ययौ प्राप ततश्च भर्तृपादुके तेनैव कृपया दत्ते मूर्ध्नि विभ्रत् अ राम
तिनिर्वेधरूपया तदाज्ञया तं पुनः पुनर्नमस्कृत्य ययौ अत्र च दृष्टतोऽन्वगमत् पादविश्लेषणाक्षमइत्यादि तृतीयस्कंधो ११२
पक्रमोक्तानुसारेण बदरिकाश्रमं गच्छन् भगवता प्रभासयात्रामुपक्रम्य गतेः दृष्टतोगतः सन् उपसंहृतनिजं कुलं भ
गवंतमेकांते दृष्ट्वा तत्कालप्राप्तेन मैत्रेयेण सह पुनः कृपया भगवता पदिष्टं तत्त्वमाकलय्य तदाज्ञातोययाविति द्रष्टव्यं ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशालां बदरिकाश्रमं गतः सन् हरेर्गतिमगात् कथं भूतां तेनैवदेकबंधुना यथोपदिष्टां तदा मत्तत्त्वप्रतिपाद्यमानो मया ऽत्यभूया
यच्च कल्पतेनैव अतिप्रज्ञगतिस्तिस्त्रो मामभ्यसितः ततः परमित्यव मुक्तप्रकारः ४७ आनंदसमुद्रो भगवद्भक्तिमार्गस्तस्मिन्संभृतमेको
हतेन एतद्यः सश्रद्धया आसेव्य इषदपि सेवित्वा वक्तेन स विमुच्यत इति किं वक्तव्यं तत्संगेन जनोऽपि विमुच्यत इत्यर्थः ४८ एवं कृतोपदे ग३
शं जगद्गुरुरूपं प्रणमति भवभयमिति भवः संसारः भयं च जरारोगादिनिमित्तं तदु भयनिरसनार्थं च भक्तवर्गाणां यथायोग्यमपहं
तुं योऽमृतं हृदयमुपजह्रे उद्धृतवान् तदेवाह वेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं च भृंगवत् भृंगाय यथा पुष्पमेको

ततस्तमंतर्हृदि संनिवेश्य गतो महाभागवतो विशालां यथोपदिष्टां जगदेकबंधुना ततः समास्थाय हरेरगाद्गतिं ४७
य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं कृष्णेन योगेश्वरसेवितांघ्रिणा सश्रद्धयाऽऽसेव्य जगद्विमुच्य
ते ४८ भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं अमृतमुदधितश्चाऽपाययद्भृत्यवर्गा
न्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि ४९ इति श्रीभा० म० ए० उद्धवस्य बदर्याश्रमप्रवेशो नामैकोनत्रिंशोऽ
ध्यायः राजोवाच ततो महाभागवते उद्धवे निर्गते वनं द्वारवत्यां किमकरोद्भगवान्भूतभावनः ब्रह्मशापोपसं
सृष्टे स्वकुले यादवर्षभः प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् २ श्रीराम श्रीराम श्रीराम श्री० नंदनंदनरूपिणं

पाययन्निवामृतमुपहरति तथा स्वयं कृतवेदानुसारेणैव उदधितश्चैकं तच्चोन्नयं यथा यूथं भक्तवर्गान्पाययन् तं नतोऽस्मीति ४९
येनानुकंपितं विश्वमुद्धवप्रश्ननिर्णयैः तं वंदे परमानंदं नंदनंदनरूपिणं एकादशे एकोनत्रिंशः त्रिंशे तु प्रागुपक्षिप्तं मौ
सलं छलतो हरिः स्वधाम गंतुमन्विच्छन्संजहार निजं कुलं विरामाय पुराघोरमुपाक्षिप्तं हि मौसलं कथावसाने तत्रैव वि
शेषं परिपृच्छति १ ततः इति त्रिभिः १ ब्रह्मशापोपसंसृष्टे कुले सति अयं भावः भगवति न हि शापः प्रभवति यादवत्वानु
करणाच्च सोऽपि कथं चिन्मात्रः अतः किमकरोदिति तदेतदुक्तं कथमत्यजदिति सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ए॰ तन्म्यपंचयति प्रत्याकृष्टमिति यस्मिन्नुपलग्नं नयनं परावर्त्तयितुमबला न शेकुः यच्च कर्णरंध्रेण प्रविष्टं तत्सतामात्मनि लग्नं सल्लिखितमि
वतिष्ठति ततो न सरति न निर्गच्छति यस्य श्रीः शोभा संकीर्त्यमाना कवीनां वाचां रतिं मुख्यां भविशेषं जनयति तेषां मानं जनन्तुड्यतां
जनयतीति किंतु वक्तव्यं यच्च विष्णोरूपं जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा युधि मृतास्तत्साम्यं सारूप्यमीयुः प्राप्ताः तत्केन रूपेणालय
जदित्यन्वयः ३ दिवि सूर्यपरिवेषादीन् भुवि भूकंपादीन् अंतरिक्षे दिग्दाहादीन् महोत्पातान् स्वयमेवोत्पादितवान्देवैः

प्रत्याकृष्टं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं यच्छ्रीर्वाचां जनयति रतिं कीर्त्य
मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ३ ऋषिरुवाच दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थि
तान् दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ४ श्रीभगवानुवाच एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः मुहू
र्तमपि न स्थेयमत्र नो यदुपुंगवाः ५ स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः वयं प्रभासं यास्यामो यत्र प्रत्य
३१३ क्सरस्वती ६ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ७ ब्रा
ह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८ विधिरेष ह्यरिष्ट
ला॰२ घ्नो मंगलायनमुत्तमं देवद्विजगवां पूजा भूतेषु परमो भवः ९ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः तथेति
नौभिरुत्तीर्य प्रभासं प्रययू रथैः १० तस्मिन्भगवतादिष्टं यदुदेवेन यादवाः चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहि
तं ११

दुः प्रतीकारान् ४ यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः नः अस्माभिः ५ प्रत्यक् पश्चिमवाहिनी ६ अभिषिच्य स्ना राम
त्वा ७ ब्राह्मणांश्च तैः कृतशांतिकाः संतो गवादिभिः पूजयिष्यामः ८ विधिः प्रतीकारः मंगलायनं च किंच देवद्विजगवां ३१३
पूजा भवः उद्भवहेतुः देवलोके परम उद्भवो भविष्यतीति भावः ९ मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनंद्य उत्तीर्य समुद्र
म् १० सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः भगवताऽनुक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः ११ श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पीयत इति पानं मैरेयकं मदिराविशेषं मधुसुरसं दिष्टेन दैवेन विभ्रंशितधियः नष्टबुद्धयः तस्मिन् स्थाने न दुश्चितमिति भावः यस्य द्रवे रसे ॥ १२ कृष्णमायाविमूढानामिति सुखावहेतुः संघर्षः कलहः १३ ततो युयुधुश्च १४ पतत्रः इतस्ततश्च ल
त्यः पताकायष्टूनेरथादिभिर्मिथः समेत्येत्यहनन्नित्यन्वयः दह्रिर्दंतैरिव १५ मिथः समेत्य त्वस्य प्रपंचः प्रद्युम्नेत्या
दि चतुर्भिः गदोः श्रीकृष्णस्य भ्राता केऽपुत्रश्चापरः सौ सुमित्रासुरथा विति दैर्घ्येमार्षं असुरथनामा वा कश्चित् १६ मदा

तत्रस्तस्मिन्महापानं पपुर्मैरेयकं मधु दिष्टविभ्रंशितधियो यद्द्रवे वर्तश्यते मृतिः १२ महापानाभिमत्तानां वीरा
णां दृप्तचेतसां कृष्णमायाविमूढानां संघर्षः सुमहान् भूत् १३ युयुधुः क्रोधसंरब्धा वेलायामातताथिनः धनुर्भिः सिभिर्भल्लैर्गदाभिस्तोमरष्टिभिः १४ पतत्पताकैः कुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि
मिथः समेत्याश्वतरैः सुदुर्मदैर्न्यहन्शरैर्दद्भिरिव द्विपा वने १५ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः १६
[illegible] अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं १७ दाशार्हवृष्ण्यंधकभोजसात्वता मद्र्बुदा माथुरशूरसेनाः विसर्जनाः कुकुराः कुंतयश्च मिथस्तु तेस्ते विसृज्य सौहृदं १८ पुत्रा
अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वह

धेन मदेन मत्सावलात्कारिता ॥ १७ दाशार्हादयो नव [illegible]त्तदेश्याः अर्बुदा माथुराः शूरसेनाश्च तत्तद्देशीयाः १८ भ्रातृभिश्चेति भ्राता हि शशानां सप्रतियोगिवाचित्वात्तेरा मातुलाः इत्यादि ज्ञेयं मित्रैश्च मित्राणि च
अहन्नहतवंतः १९

भौरमि १

थ २

भा॰ए॰

धन्वसु धनुःषु जघ्नुः जगृहुः २० परिघाः लोहदंडाः भृताः धृताः १ तं च श्रीकृष्णमपि २१ प्रत्यनीकं प्रतिपक्षं २२ एरका मुष्टिरूपो
परिघा वृष्यन्य २३ स्पर्द्धानिमित्तः क्रोधः कुलसंक्षयं निन्ये २४ ५ पौरुषयोगं परमपुरुषध्यानलक्षणं तमेवाह संयोज्येति मा

शरेषु हीयमानेषु भज्यमानेषु धन्वसु शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः २० तावज्रकल्पा ह्यभवन्परि स्कं॰ ११
११४ घा मुष्टिना भृताः जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते २१ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः हंतुं
कृतधियो राजन्नापन्ना आततायिनः २२ अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन एरकामुष्टिपरिघौ चरंतौ जघ्न
तुर्युधि २३ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोग्निर्यथा वनं २४ ए
वं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः अवतारितो भुवो भार इति मेनेऽवशेषितः २५ रामः समुद्रवेलायां
योगमास्थाय पौरुषं तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्य भग
वान्देवकीसुतः निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं २७ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्र
भया स्वया दिशो वितिमिराः कुर्वन्विधूम इव पावकः २८ श्रीवत्सांकं घनश्यामं तप्तहाटकव ११४
र्चसं कौशेयांबरयुग्मेन परिवीतं सुमंगलं २९ सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं पुंडरीका
भिरामाक्षं स्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः हारनूपुरमुद्राभिः कौ
स्तुभेन विराजितं ३१ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः कृत्वोरौ दक्षिणे पादमासीनं पंकजारु

नुषं लोकं भूर्लोकं मनुष्यान्पतो वा २६ धरोपस्थे भूतले २७ भ्राजिष्णुरूपं २८ तं देवानुवर्णयति श्रीवत्सांकमिति चतु
भिः २९ सुंदरस्मितं वक्त्राब्जं यस्मिन् तत् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिन् तत् ३० १ वनमालया परि
तान्यंगानि यस्मिन् तत् निजायुधैश्च परीतांगं पंकजारुणं वामपादं दक्षिणे ऊरौ कृत्वा आसीनं रूपं बिभ्रत् ३२

आनंद १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जरानामकश्चिल्लुब्धकोमृगायुः मृगस्यास्यमिवाकारोयस्यतंचरणं ३३ ब्रह्मशापकृतमेवतन् नत्वापराधइतिचेद्दतत्स्था
हयस्यतवात्मयोगरचितंस्वाधीनमायारचितंविरिंच्यः अस्यतनयाकृद्रादयश्चास्य गिरांपतयोविदद्रष्टारः तेऽपिनविदुः

मुसलावशेषायःखंडकृतेषुर्लुब्धकोजरा मृगास्याकारंतच्चरणं विव्याधमृगशंकया ३३ चतुर्भुजंतंपुरुषं
दृष्ट्वासकृतकिल्बिषः भीतःपपातशिरसापादयोरसुरद्विषः ३४ अजानताकृतमिदं पापेनमधुसूदन क्ष
न्तुमर्हसिपापस्यउत्तमश्लोकमेऽनघ ३५ यस्यानुस्मरणं नृणामज्ञानध्वांतनाशनं वदंतितस्यतेविष्णो
मयाऽसाधुकृतंप्रभो ३६ तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकं यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं
३७ यस्यात्मयोगरचितंनविदुर्विरिंचोरुद्रादयोस्यतनयाः पतयोगिरांये त्वन्माययापिहितदृष्टयएत
दंजःकिंतस्यतेवयमसद्गतयोगृणीमः ३८ श्रीभगवानुवाच माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे
याहित्वं मदनुज्ञातःस्वर्गंसुकृतिनांपदं ३९ इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा त्रिःप
रिक्रम्यतंनत्वाविमानेनदिवंययौ ४० दारुकःकृष्णपदवीमन्विच्छन्नधिगम्यतां वायुंतुलसि
कामोदमाघ्रायाभिमुखंययौ ४१ तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थमूले कृतकेतनंपतिं स्नेहप्लुता लै॰ २
त्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ४२ अपश्यतस्तेचरणांबुजंप्रभो दृष्टिःप्रणष्टातम
सिप्रविष्टा दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रणष्टे ४३ श्रीराम श्रीराम राम

तस्यतेअचिंत्यमायस्यएतत् ब्रह्मशापादिअंजसा असद्गतयःपापयोनयोवयंकिंगृणीमःकथंवर्णयामः अतस्तदा
त्माश्रायुमांजहीतिभावः ३८ ३९ इच्छाशरीरिणास्वस्यायंभावः शुद्धसत्वमयीनिजाश्रीमूर्तिर्मंतव्यायत्तत्यतिश्चै
वविडंवनमात्रमिति एतदेवस्फुटीकरिष्यति देवाद्यबृह्ममुख्याइत्यादिना ४० ४१ तंपतिंतत्रदृष्ट्वातस्यपादयोर्नि
पपात ४२ ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ए०

उद्वीक्षमाणस्य सुतस्य सतः ४४ ५ निर्याणं योगमार्गेण महद्भूमिति शारीराभिप्रायेण ४६ ७ अवृताः रक्ष्यमाणाः इं
द्रप्रस्थं गमिष्यथेति ब्रूहीति पूर्वेणान्वयः ४८ मन्मायारचनामेतां विज्ञायेति निजश्रीमूर्त्तेरंतर्हितत्वात् तथा शोकं मो
कुवित्यर्थः ४९ कुलस्य विनष्टत्वात् दुर्मनाः इत्येकादशे त्रिंशत्तमः एकत्रिंशे स्वके धामजगाम भगवानिति १७

इति ब्रुवति सूतेवैर थोगरुड लांछनः स्वमुत्पपात राजेंद्रशीघ्र ध्वजउदीसितः ४४ तमन्वगच्छन् दि
व्यानि विष्णुप्रहरणानि च तेनातिविस्मितात्मानं वीक्ष्य तन्माह जनार्दनः ४५ गच्छद्वारवतीं सूत ज्ञाती
नां निधनं मिथः संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ४६ द्वारकायां च न स्थेयं भवद्भिश्च सबं
धुभिः मयात्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ४७ स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः अ
१२ र्जुनेनाविताः सर्वे इंद्रप्रस्थं गमिष्यथ ४८ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः
मन्मायारचनामेतां विज्ञायोपशमं व्रज ४९ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः तत्पादौ
शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ५० इति श्रीभा० म० ए० का० मौशले यकुलक्षयस्त्रिंसत्तमोध्या
यः श्रुक उवाच अथतत्रागमद्ब्रह्मा भवान्या च समं भवः महेंद्रप्रमुखा देवा मुनयः सप्रजेश्व
राः १ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः चारणा यक्षरक्षांसि किंनराप्सरसो द्विजाः द्रष्टु
कामा भगवतो निर्याणं परमोत्सुकाः २ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ववृषुः पु
ष्पवर्षाणि विमानावलिभिर्नभः कुर्वंतः संकुलं राजन् भक्त्या परमया युताः ३ श्रीराम

द्वा १
नेमवानुययुः प्रीत्या वसुदेवादयस्ततः देवान्पश्चाद्विधायादौ भूयो देवान्विधायतान् श्रीकृष्णः स्वेच्छया धामसनयोन्ते राम
वसमाविशत् मुनयः सनकादयः प्रजेश्वरा मरीच्यादयः २ द्विजा गरुडलोकवासिनः पक्षिणः मैत्रेयादयो वा भ ११५
गवतो निर्याणं द्रष्टुकामाः संतः परमोत्सुकास्तत्रागमन् २ तेषामौत्सुक्यकृतं महोत्सवमाह सोर्द्धेन गायंतीत्यादि ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विभूतीः इंद्रादिंश्च पद्मनेत्रे न्यमीलयदित्यत्रायं भावः पूर्वं ब्रह्मादिभिः सलोकां लोकपालान्नः पाहि वैकुंठ किंकरानिति प्रार्थितत्वादिदानीं च स्वलोकं प्रतिनेतुमागतत्वेऽपि हु पुत्रेषु लाक्षिण्यात् तान्वंचयितुं समाधिमिव कुर्वन्नेत्रे न्यमीलदिति। योगिनामिव स्वच्छंदमृत्युत्वमंगीकारयति लोकाभिरामामिति श्लोकेनेयमर्थः योगिनां हि स्वच्छंदमृत्यवः स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकांतरं प्रविशंति भगवांस्तु न तथा किंतु अदग्ध्वैव स्वतनुं सहितमेव स्वकं धाम वैकुंठाख्यमविशत् तत्र हेतुः लोकानामभिरामः अभितो रमणं स्थितिर्यस्यां तां जगदाश्रयत्वेन जगतोऽपि दाहप्रसंगादित्यर्थः किंच धारणाया ध्यानस्य च मंगलं शोभनं विषयं इतरथा तयोर्निर्विषयत्वं स्यात् दृश्यते चाद्यापि उपा

भगवान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ४ लोकाभिरामां स्वतनुं धारणाध्यानमंगलं योगधारणयाऽग्नेय्याऽदग्ध्वा धामाऽविशत्स्वकं ५ दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात् सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ६ देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ७ श्रीराम श्रीराम श्री

सकानां तथैव तद्रूपसाक्षात्कारः फलप्राप्तिश्चेति भावः इच्छाशरीराभिप्रायेण वा यथाश्रुतमेवास्तु तत्रापि तु लोकाभिरामामित्यादिविशेषणानामानर्थक्यप्रसंगात् तदप्यदग्ध्वा तिरोधाय निर्गत इत्येवं संसाधनं प्रत्तदनु स्वं स्वमेव लोकमागमिष्यतीति संभ्रमेण देवादिभिस्ततः सद्य एव दुंदुभिनादपुष्पवृष्ट्यादि महोत्सवोऽभवदित्याह ॥ दिवीति भूमेः सकाशात् श्रीकृष्णमनु ययुः ६ तदा श्रीकृष्णं नहि तं सति कुतो गत इति विनिर्केयतोऽपि ब्रह्ममुख्या देवादयः स्वधामनि विशंतं श्रीकृष्णं न ददृशुः तत्र हेतुः अविज्ञातगतिमिति केचित्केचिद्ददृशुश्च तथापि अतिविस्मिताश्च ऊचुरित्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०११०

अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति सौदामिन्येति गतिर्यथा मर्त्यैर्न लक्ष्यते देवैः कालक्ष्यंते तथा भूमंडले हित्वा गच्छतः श्री
कृष्णस्य देवैरपि न लक्ष्यते किं नु तत्पार्षदैरेवेत्यर्थः ९ ॥ अभिप्रायापरिज्ञानतः प्रथमं संक्षिप्य दृष्टांतेन स्पष्टमुक्तं हे
ष्टांतेन दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहा
आविर्भावतिरोभावचेष्टाः मायया अनुकारणमात्रमेवेहि नटो यथा विकृतनानारूपैर्जन्मादीन्विडंबयति तद्वत्
अस्तां तावद्यादवादिषु जन्मादिशंका यावद्विश्वसर्गनिरोधादिष्वप्यसावविकृत एवास्त इत्याह सृष्ट्वेति आत्मना

सौदामिन्या यथाकाशे यात्या हित्वाभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ९ ॥ ब्रह्मरु
द्रादयस्ते तु दृष्ट्वा योगगतिं हरेः विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्तदा १० ॥ राजन्परस्य त
११६ नुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य सृष्ट्वात्मनेदमनुविश्य विहृत्य चांते
संहृत्य चात्ममहिनोपरतः स आस्ते ११ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छर
णदः परमास्त्रदग्धं जिग्येऽन्तकांतकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेह
मुं १२

२४ रायोहष्ट इत्याह२ स्वयमेवेदं जगत्सृष्ट्वा अंतर्यामित्वेनानुविश्य आत्ममहिना स्वमहिम्ना आस्ते ११ न पुनरन्यथा मंतव्यं
यतोऽस्मिन्नेवावतारे तत्स्वभावो निरतिशय मर्त्यस्वलोके प्रतिनीतं गुरोः सुतं मर्त्येन वशरीरेण यः आनयत् आनीत
वान् शरणदः शरणागतरक्षकः त्वां च ब्रह्मास्त्रदग्धं यो रक्षितवान् यश्च अंतकानामंतकमपीशं श्रीरु
द्रं बाणसंग्रामे जितवान् मृगयुं लुब्धकं सः स्वर्गं अनयत् निन्ये आसौ स्वावने स्वरक्षणे अनीशः असमर्थः
किं १२

राम
११६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यदि समर्थस्तर्हि किं चिरकालं मर्त्येनानेन वपुषा किं न्यासितवान् तत्राह तथापीति यद्यपि उक्तप्रकारेण शेषस्य जगतः स्थित्या
दिषु अनन्यहेतुर्निरपेक्ष एव कारणं स्वयं यद्यस्मादशेषशक्तिधृक् तथापि यादवान् संहृत्य निजं वपुः अत्र शेषितं प्रणेतुं क
स्व॰ २ र्तुं नैच्छत् किंतु [illegible] भवल्लोकमनयत् अत्र हेतुः मर्त्येन देहेन किं न किंचित्कार्यमिति स्वस्थानात्मनिष्ठानां दिव्यां गतिमेव प्रक
टं दर्शयन् अन्यथा तेपि दिव्यां गतिं मनोहृत्य योगवत्येनं देहसिद्धिं विधायात्रैव वर्त्तेरन्नु तन्माभूदित्येतदर्थमिति भावः ११

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्र
प्रयत्नः २ दर्शयन् ११ यः पंचप्राण[illegible]कृष्णस्य पदवीं परां कीर्तयेत्तेषां नामैव प्राप्नोत्यनुत्तमां १३ दारुको द्वारकामेत्य व
सुदेवोग्रसेनयोः पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्युतः १४ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप त
च्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः १५ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः व्यसवः शेरते
न ४ यत्र ज्ञातयो घ्नंत आननं १६ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ कृष्णरामावपश्यंतः शोकार्ता विजहुः स्मृतिं १७
प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः १८ रामपत्न्यश्च तद्देहमु
पगुह्याग्निमाविशन् वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः १९ कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदा
त्मिकाः अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः २०

श्लो॰ १ एतांश्चोक्तप्रकारां पदवीं गतिं १३ तदेवं भगवतांतर्हिते[illegible] गच्छता वसुदेवादीनामपि तत्प्राप्त्ययत्नोपाय स्त्रिंतिति आसीत्तमाह
दारुक इत्यादिना १४ १६ कृष्णरामौ सुतावपश्यंतः १७ १९ सदुक्तिभिः सत्यो अवितथा उक्तयो येषु तैः नाहं प्रकाशः
सर्वस्य योगमायासमावृतः मूढोयं नाभिजानाति लोको मामजमव्ययमित्यादिभिः २० ॥ श्रीराम श्रीराम श्री॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री १ न

भा०१९० नष्टगोत्राणां नष्टसंततीनां सांपरायिकं पिंडोदकादि ॥ श्राद्धमित्यर्थः ॥ आरभ्यैतदित्यच्चरितकीर्तनस्य फलमाह यस्त्विति द्वाभ्यां शंत

बन्धूनां नष्टगोत्राणामर्जुनः सांपरायिकं ॥ हतानां कारयामास यथावदनुपूर्वशः ॥ द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वा महाराज श्रीमद्भगवदालयं २२ नित्यं संनिहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्वाऽशेषाशुभहरं सर्वमंगलमंगलं २३ स्त्रीबालवृद्धानादाय हतशेषान् धनंजयः ॥ इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् २४ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः ॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं २५ यस्त्वेतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥ कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते २६ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बाल्यचरितानि च शंततमानि ॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत २७ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे मौशलं नामैकत्रिंशत्तमोऽध्यायः ३१

परमहंसगतौ श्रीकृष्णे १

मानि परममंगलानि २७ इति श्रीभागवतभावार्थदीपिकायां श्रीधरस्वामिविरचितायां एकादशस्कंधे एकत्रिंशोऽध्यायः ३१ ११८

श्री श्री श्री श्री श्री श्री श्री

स्वाज्ञानध्वांतभीतेन श्रीधरेण प्रकाशिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

[illegible] लक्षणमाह पद्मेति नखैरेवारुणा श्रीः कांतिर्यस्य तेन सुजातेन कोमलेन पदा २३ सुदुःखं अप्रियश्रवणाद्भयं त्यागशंकया शोकः अनुता
पः विनष्टा बुद्धिर्यस्यास्तस्याः श्लथंति पतंति वलयानि यस्मात्तस्माद्धस्तात् देहश्च पपात विक्लवा अवशा धीर्यस्यास्तस्याः २४ हा
स्यप्रौढिमां भीर्ये २५ चतुर्भुज इति उत्थापनाश्लेषणवक्त्रपरिमार्जनाद्यर्थं आविः कृतचतुर्भुज इत्यर्थः समूह्य निबध्य २६ अश्रु

पद्मा सुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः आसिंचती कुंकुमरूषितौ स्तनौ तस्थावधोमुख्यति
दुःखरुद्धवाक् २३ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्तात् श्लथद्वलयतो व्यजनं पपात देहश्च विक्लवधियः
सहसैव मुह्यन् रंभेव वातविहिता प्रविकीर्य केशान् २४ तद्दृष्ट्वा भगवान् कृष्णः प्रियायाः प्रेमबंधनं हास्यप्रौढिम
जानंत्याः करुणः सोऽन्वकंपत २५ पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः केशान् समुह्य तद्वक्त्रं प्रामृज
त्पद्मपाणिना २६ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा आश्लिष्य बाहुना राजन्ननन्यविषयां सतीं २७
पा:२ सांत्वयामास सांत्वज्ञः कृपया कृपणां प्रभुः हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः २८ श्रीभगवानुवाच
मामा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां श्रोतुकामन क्ष्वेल्याचरितमंगने २९ मुखं च प्रेमसंरंभस्फुरि
ताधरमीक्षितुं कटाक्षेपारुणापांगं सुंदरभ्रुकुटीतटं ३० श्रीराम श्रीराम श्रीराम श्रीराम श्रीराम

कलेरश्रुभिः शोभितौ शुचा शोकाश्रुभिः २७ सांत्वयामास अनुनीतवान् २८ मामां बहूचः किं तु वदिष्यसीति श्रोतुकामेन मिच्छता
क्ष्वेल्या नर्मणा एवमाचरितमुक्तं न तत्त्वतः हे अंगने सुंदरि २९ प्रेमसंरंभेण प्रणयकोपेन स्फुरितः कंपितो धरो यस्मिन् तत् कटा श्रोतु
क्षेन कटाक्षाः तैराक्षेपैः अरुणावपांगौ यस्मिन् तत् अतएव सुंदरं कुटिलं भ्रुकुटितटं यस्मिन् तत् ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ए०

११८

इति एकादशं
स्कंध समाप्त

राम
११८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुद्ध्वाश्रयमेवं ध्रुवमिति निश्चयेन मनसा संकल्प्य २६ यत्र मंदिरे पयः फेननिभाः शय्यास्तरणानीत्यादि संपदः तत्र सर्व
संपदां समृद्धीर्विलोकयन् तर्कयामासेति चतुर्थेनान्वयः यत्र च दान्ताः गजदन्तमयाः पर्यंकाः २९ यत्र आसनानि च सद्रूपा
२ स्तरणानि रुक्मानि मयानि युतानि यत्र च मुक्तादामविलंबवन्ति द्युमन्ति च वितानानि ३० निर्व्ययः संस्थिरः स च अहेतु

पतिव्रता पतिं दृष्ट्वा प्रेमोत्कंठाश्रुलोचना मीलिताक्ष्य नमद् ध्यात्मनसा परिषस्वजे २६ पत्नीं वीक्ष्य वि
स्फुरन्तीं देवीं वैमानिकामिव दासीनां निष्ककण्ठीनां मध्ये भान्तीं सविस्मितः २७ प्रीतः स्वयं त
या युक्तः प्रविष्टो निजमंदिरे मणिस्तंभशतोपेतं महेंद्रभवनं यथा २८ पयः फेननिभाः शय्या
दान्ता रुक्मपरिच्छदाः पर्यंका हेमदंडानि चामरव्यजनानि च २९ आसनानि च हैमानि मृदूप
स्तरणानि च मुक्तादामविलंबीनि वितानानि द्युमन्ति च ३० स्वच्छस्फटिककुड्येषु महामारक
ललना तेषु चारत्नदीपा भ्राजमाना रत्नसंयुताः ३१ विलोक्य ब्राह्मणस्तत्र समृद्धीः सर्वसंपदां तर्क
यामास निर्व्यग्रः स्वसमृद्धिमहेतुकीं ३२ नूनं बतैतन्मम दुर्भगस्य शश्वद्दरिद्रस्य समृद्धिहेतुः ॥
महाविभूतेरवलोकतोऽन्यो नैवोपपद्येत यदूत्तमस्य ३३ श्रीराम श्रीराम श्रीराम श्रीराम ॥

कीमाकस्मिकीं स्वस्य समृद्धिं तर्कयामास कुत एषा समृद्धिरागतेति ३१ निश्चिनोति नूनमिति एतन्मे इति एष चासाव
हेतुश्च तस्य एतन्मम महती विभूतिर्यस्य तस्यावलोकादन्यो ३३ श्रीकृष्णाय नमः श्रीरामाय नमः ॥ श्रीराम श्री

२

भा०उ० ननु सेवेदं वलोकनमात्रेणा महदैश्वर्यं दत्तवान् तर्हि तं तुभ्यं दत्तमिति किं नावोचदत आह नन्विति ननु मे सखा समक्षं ब्रुवाण
एव याचिष्णुमेव याचकाय भूरि वह्वपि विधानददाति अत्र हेतुः भूरिभोजः स्वयं गृहयपर्जन्यवद्दीक्षमाणाद् इति अयमर्थः स्वयं
तावद्भूरि भोजः आप्तकामत्वात् लक्ष्मीपतित्वाच्च अतो यथा पारावारपरिपूरकोऽपि वदान्यः पर्जन्यः कदाचिद्दह्वपि वर्षमल्प
७२ मेव मन्यमानो लज्जयैव समक्षमेव वर्षन् रात्रौ निद्राणे कर्षके नतक्षेत्रमाप्लावयति एवं श्रीकृष्णोऽपि स्वभोगापेक्षया त्वद
यमिंद्रादिपदमपि तुच्छं मन्वानः तस्य च भजनं बहु मन्यमानः समक्षमब्रुवाण एव ददातीति ३४ तदेवाह किं चिदिति ॥
उरु वह्वपि स्वदत्तं यं चिकरोति अल्पं मन्यते सुहृत्कृतं फल्गु अतितुच्छमपि भूरिकारी बहु मन्यत इत्यर्थः अत एव

नन्वब्रुवाणो दिशते समक्षं याचिष्णवे भूर्यपि भूरिभोजः । पर्जन्यवत्तत्स्वयमीक्षमाणो दाशार्हकाणामृष
६२ भः सखा मे ॥ ३४ ॥ किंचित्करोत्युर्वपि यत्स्वदत्तं सुहृत्कृतं फल्ग्वपि भूरिकारी । मयोपनीतं पृथुकैकमुष्टिं प्र
त्यग्रहीत्प्रीतियुतो महात्मा ॥ तस्यैव मे सौहृदसख्यमैत्री दास्यं पुनर्जन्मनि जन्मनि स्यात् । महानुभावेन गु
णालयेन विषज्जतस्तत्पुरुषप्रसंगः ॥ ३६ ॥ भक्ताय चित्रा भगवान् हि संपदो राज्यं विभूतीर्न समर्धयत्यजः ।
अदीर्घबोधाय विचक्षणः स्वयं पश्यन्निपातं धनिनां मदोद्भवं ॥ ३७ ॥ श्रीराम श्रीराम श्रीराम श्री

मयोपनीतं समीपं नीतं प्रीतियुतः स्वयमेव प्रतिगृहीतवान् ३५ अतः कृष्णस्य भक्तवत्सलत्वं दृष्ट्वा तत्कृते किं प्रार्थये तत्तस्यैतिसौ
हृदं प्रेम च सख्यं हिताशंसनं च मैत्री उपकारकत्वं च दास्यं सेवकत्वं तत्स मा हार्के वचनं तस्य तत्सम्बन्धिनां मे मम भक्तानां
मम तु विभूतिः किंच महानुभावेन तेनैव विषज्जतां विशेषणसंगं प्राप्नुवतां सत्पुरुषप्रसंगः संगः स्यादिति ३६ ननु भक्ते
फलं संपूर्णं प्राप्य पुनर्भक्तिं किमिति प्रार्थयसे अत आह भक्तायेति संपदः कोशादीन् राज्यमैश्वर्यं विभूतीः कलत्रपुत्रादी
न्न समर्धयति न ददाति अपितु दृढां भक्तिमेव कुतः अदीर्घबोधाय अविवेकिनो समतुल्यभक्त्या भावो देवं ज्ञातं अत

त्वक्षनूशनैः शनैः त्यागमभ्यसनुजायया सह वुभुजे ३८ श्रीशुकस्यैवं ब्रह्मण्यतां नातिचित्रमित्याह तस्येति ३९ अन्यैरजितमपि
स्वभृत्यैः पराजितं दृष्ट्वा तस्य ध्यानं तस्यैव नगरं तेनोद्भुथितमात्मबंधनमहंकारो यस्य सः गतिमितिस्वा विश्लिष्टलिंगं धाम विशेषणं
श्री १ सतां ब्रह्मविदां श्रेष्ठविदां प्राप्यमित्यर्थः ४० एतत्पृथुपाख्यानं श्रुत्वा तत्र ब्रह्मण्यतां विशेषतः श्रुत्वेति ४१ दशमे एकाशीतितमे
को

इत्थं व्यवसितो बुद्ध्या भक्तोतीव जनार्दने विषयान् जायया त्यक्ष्यन् बुभुजे नातिलंपटः ३८ तस्यैवं देवदेवस्य
हरेर्यज्ञपतेः प्रभोः ब्राह्मणाः प्रभवो दैवं न तेभ्यो विद्यते परं ३९ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यै ग२
रजितं पराजितं तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धाम लेभे चिरतः सतां गतिं ४० एतद्ब्रह्मण्यदेवस्य श्रु
त्वा ब्रह्मण्यतां नरः लब्धभावो भगवति कर्मबंधाद्विमुच्यते ४१ इति श्री भागवते महापुराणे दशमस्कंधे
पृथुकोपाख्याने एकाशीतितमोध्यायः श्रीशुक उवाच अथैकदा द्वारकायां वसतो रामकृष्णयोः १ सू
र्योपरागः सुमहानासीत्कल्पक्षये यथा १ तं ज्ञात्वा मनुजा राजन् पुरस्तादेव सर्वतः स्यमंतपंचकं क्षेत्रं
युयुः श्रेयो विधित्सया २ निःक्षत्रियां महीं कुर्वन् रामः शस्त्रभृतां वरः नृपाणां रुधिरौघेण यत्र चक्रे म
हाह्रदान् ३

मः द्व्यशीतितमे आगत्य कुरुक्षेत्रं रविग्रहे दृष्ट्वान्हृष्टा सुहृद्भूपा अक्रूरः कृष्णकथा मिथः श्रीदा
मसुहृदे कृष्णः प्रकल्प्य द्रुपदे भुवि नंदादि सुहृदानंदी कुरुक्षेत्रं जगाम सः कल्पक्षये यथा सर्वग्रास इत्यर्थः १ ज्योतिर्विद्भिः क
थ्यमानमादावेव ज्ञात्वा स्यमंतपंचकं कुरुक्षेत्रं २ अब्रह्मण्यक्षत्रियवधस्यानौचित्येन परशुरामस्यापापनुत्तिस्थानत्वेन च क्षे
त्रस्य पापनिरासकत्वमाह निःक्षत्रियामिति द्वाभ्यां ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० अन्यो विद्वानुयथा ४ आगन् आजग्मुः भारतीः भारत्यः ५ सुचंद्रशुकसारणैः सहानिरुद्धो द्वारकारक्षायामास्ते तथा कृतवर्मा च
यूथपतिः सेनानीः ६ देवधिष्ण्याभैर्विमानसंकाशैः तरलास्तरंगास्तद्वत् प्लवो गतिर्येषां तैः विद्याधरद्युभिर्विद्याधराणामि

ईजेचभगवान्‌रामोयत्राऽस्पृष्टोपिकर्मणा लोकंसंग्राहयन्नीशोयथाऽन्योऽघापनुत्तये ४ महत्यांतीर्थ
यात्रायांतत्रागन्‌भारतीःप्रजाः वृष्णयश्चतथाऽक्रूरवसुदेवाहुकादयः ५ ययुर्भारततत्क्षेत्रंस्वमघंक्ष
पयिष्णवः गदप्रद्युम्नसांबाद्याःसुचंद्रशुकसारणैः आस्तेनिरुद्धोरक्षायांकृतवर्माचयूथपः ६ तेर
न४ थैर्देवधिष्ण्याभैर्हयैश्चतरलप्लवैः गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ७ व्यरोचंतमहातेजाःपथि
८३ कांचनमालिनः दिव्यस्रग्वस्त्रसंनाहाः कलत्रैःखेचराइव ८ तत्रस्नात्वामहाभागाउपोष्यसुसमा
ग्मे हिताः ब्राह्मणेभ्योददुर्धेनूर्वासःस्रक्रुक्ममालिनीः ९ रामह्रदेषुविधिवत्पुनराप्लुत्यवृष्णयः द
दुःस्वन्नंद्विजाग्र्येभ्यःकृष्णेनोभक्तिरस्त्विति १० स्वयंचतदनुज्ञातावृष्णयःकृष्णदेवताः भुक्त्वोपविवि
शुःकामंस्निग्धच्छायांघ्रिपांघ्रिषु ११ तत्रागतांस्तेददृशुःसुहृत्संबंधिनोनृपान् मत्स्योशीनरकौशल्य
नानर्त्त३ विदर्भकुरुसृंजयान् १२ कांबोजकैकयान्मद्रान्कुंतीकेरलान् अन्यांश्चैवात्मपक्षीयान्परांश्चशत
शोनृप नंदादीन्सुहृदोगोपान्गोपीश्चोत्कंठिताश्चिरं १३ अन्योन्यसंदर्शनहर्षरंहसाप्रोत्फुल्लहृद्व
क्त्रसरोरुहश्रियः आश्लिष्यगाढंनयनैःस्रवज्जलाहृष्यत्त्वचोरुद्धगिरोययुर्मुदं १४ श्रीरामश्री

राम
६३

वद्युतिर्येषां ७ महातेजाः महातेजसः दिव्या अत्युत्तमाः स्रग्वस्त्रसन्नाहा येषां ८ ९ पुनरन्येद्युः आप्लुत्याय ह्रदास्मिन्नेवा
हे निर्मुक्तिस्नानं कृत्वा १० स्निग्धा शीतला छाया येषामंघ्रिपानां तेषामंघ्रिषु मूलेषु ११ ३ प्रोत्फुल्लैः सुहृद्वक्त्रसरोरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीतिसोहृहेनयत् स्मितंतेन अमलाअपांगेहृशोहृष्टयोयासांताः मिथः संवीक्ष्यदोर्भिर्भिरे अलिंगनंकृतवंत्यः १५ १६ संकथयामि
थः सप्रमगोप्यः १७ तामेववसुदेवपृथयोः संकथायामाह आर्येत्यादिचतुर्भिः अक्षतांशिषंअपूर्णमनोरथं १८ यस्यैहेवम

स्त्रियंश्चसंवीक्ष्यमिथोऽतिसोहृदस्मितामलापांगदृशोभिरेभिरे स्तनैःस्तनानुकुंकुमपंकरूषितान् निहत्यदोर्भिःप्रण
याश्रुलोचनः १५ ततोभिवाद्यतेज्येष्ठान्यविष्टैरभिवादिताः स्वागतंकुशलंपृष्ट्वाचक्रुःकृष्णकथामिथः १६ पृथाभ्रा
हेनुस्वसृर्वीक्ष्यतत्पुत्रान्पितरावपि भ्रातृपत्नीर्मुकुंदंचजहौसंकथयाशुचः १७ कुंत्युवाच आर्यभ्रातरहंमन्य
आत्मानमकृताशिषं यद्वाआपत्सुमद्वार्त्तांनानुस्मरथसत्तमाः १८ सुहृदोज्ञातयःपुत्राभ्रातरःपितरावपि ना
नुस्मरंतिस्वजनंयस्यदेवमदक्षिणं १९ वसुदेवउवाच अंबमास्मानसूयथादैवक्रीडनकान्नरान् ईशस्यहिव
शेलोकःकुरुतेकार्यतेथवा २० कंसप्रताः पिताःसर्वेवयंयाताःदिशोदिशं एतर्ह्येवपुनःस्थानंदैवेनासादिताः
स्वसः २१ श्रीशुकउवाच वसुदेवोग्रसेनाद्यैर्यदुभिस्तेर्चितान्नृपाः आसन्नच्युतसंदर्शपरमानंदनिर्वृताः
२२ भीष्मद्रोणोंबिकापुत्रोगांधारीससुतातथा सदाराःपांडवाःकुंतीसंजयोविदुरःकृपः २३ कुंतिभोजो
विराटश्चभीष्मकोनग्नजिन्महान् पुरुजित्द्रुपदःशल्योधृष्टकेतुःसकाशिराट् २४ दमघोषोविशालाक्षो
मैथिलोमद्रकेकयौ युधामन्युःसुशर्माचससुताबाह्लिकादयः २५ राजानोन्येचराजेंद्रयुधिष्ठिरमनुव्रताः
श्रीनिकेतंवपुःशौरेःसस्त्रीकंवीक्ष्यविस्मिताः २६ अथतेरामकृष्णाभ्यांसम्यक्प्राप्तसमर्हणाः प्रशसंसुर्मुदा

रक्षिणंअननुकूलेनस्वजनमपिसंतंसुहृदादयोनानुस्मरंतिअतोममदैवप्रतिकूलं युक्तोऽस्मानृकृष्णपरिग्रहान् २
युष्माकंकोऽपराधइत्यर्थः २० ईश्वरवशत्वमेवाहाकंसप्रतापिताइतिहस्वसः एतर्ह्येवसंप्रत्येव २१ युधिष्ठिरंयनुव्रताःसारा

भा०उ० जन्मभाजः नृणां मध्ये सफलजन्मनः २८ किंच नैकवलं तस्य दर्शनमेव अपितु त्वं तदुर्लभं बहु युष्माकं खलु संपन्नमित्याह यद्धिश्च
तिरिति हा भ्यां यदि ति पृथक् पदं परस्परयत्यर्थः विश्रुतिः कीर्तिः श्रुतिभिर्नुतास्त्वतो इदं विश्वमत्तमत्यर्थं पुनाति यस्य पादावनेजन
पयो गंगा च यस्य च वाचा कृकूपशास्त्रे च वदारत्वा विश्वं पुनाति किंच कालेन भञ्जितं दग्धं भगं माहात्म्यं यस्याः सा तथा विधापि
यस्यांघ्रिपद्मस्पर्शेनोत्था आविर्भूता शक्तिर्यस्याः सा नो ३ स्माकं मारखिलानर्थान् भित्वा वर्षति २९ दर्शनं च स्पर्शनं च अनु
पथः अनुगतिश्च प्रजल्पो गोष्टिश्च शय्याशयनं च आसनं च अशनं भोजनं योनबंधः विवाह संबंधः सपिंडबंधः देहिकं

अहो भोजपते यूयं जन्मभाजो नृणामिह यत्पश्यथासकृत्त्वत्प्स्मैदूर्द्दर्शमपियोगिनां २८ यद्विश्रुतिः श्रुतिनुते
दं मलं पुनाति पादावनेजनपयश्च वचश्च शास्त्रं यः कालभंजितभगाः पियदं घ्रिपद्मस्पर्शोत्थशक्तिरभि
८४ वर्षति नोखिलार्थान् २९ तद्दर्शनानुस्पर्शनानुपथप्रजल्पशय्यासनाशनसयोनसपिंडबंधः येषां गृ
हे निरयवर्त्मनिवर्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ३० श्रीशुक उवाच नंदस्तत्र यदून्प्राप्ता
न्ज्ञात्वा कृष्णपुरोगमान् तत्रागमद्वृतो गोपैरनस्थार्थैर्दिदृक्षया ३१ तं दृष्ट्वा वृष्णयो हृष्टा गात्रैः प्राण
मिवोत्थिताः परिषस्वजिरे गाढं चिरदर्शनकातराः ३२ श्रीराम श्रीराम श्रीराम श्रीराम श्री

संबंधः तेन सह वर्त्तमानः श्रीकृष्णेन दर्शना स्पर्शक्षितिः सयोनः सपिंडबंधो येषां वो ३ स्ति किंच येषां वो गृहे विष्णुः स्वयमास राम
आविरभूत् निरयवर्त्मनि प्रवृत्तिमार्गे वर्त्तमानानां स्वर्गापवर्गाभ्यां विरमयति वितृष्णान्करोतीति तथा सः ते यूयं जन्मभाजः ८४
ति यद्वा तद्धितिसामान्यनिर्देशः सइत्यर्थः स विष्णुः स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्त्तमानानामपि बध्य
ते संबध्यत इति बधः दर्शनादिभिः संबंधः सन् स्वर्गापवर्गविरमश्वास परमसुखप्रदो बभूवेत्यर्थः ३० अनस्थार्थैरिति तैरेव वास

वसुदेवनंदपरिषज्य प्रेमविह्वलो वभूवेति शेषः ३३ ४ तौ सुतौ परिरभ्य नंदो यशोदा च चिरहृशोकानू विजहतुः तत्यजतुः यद्वा शुचः अश्रू पि२
णि विजहतुः सुमुचतुरित्यर्थः ३५ व्रजेश्वरी यशोदां ३६ अनिवृत्तां निरंतर निष्कारणां सत्यपि अनुवर्तमानां ऐंद्रं ऐश्वर्यं प्राप्यापि यस्याः
प्रतिक्रियां कर्तुं न शक्यत इत्यर्थः तत्कृतां मैत्रीमाहतुः एतावितिनदृष्टौ पितरौ याभ्यां तौ वसुदेवस्य अजन्मत्वात् वा दृष्ट पितरौ

वसुदेवः परिषज्य संप्रीतः प्रेमविह्वलः स्मरन् कंसकृतान् क्लेशान् पुत्रन्यासं च गोकुले ३३ कृष्णरामौ परि
ष्वज्य पितरावभिवाद्य च न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह ३४ तावात्मासनमारोप्य बाहुभ्यां परि
रभ्य च यशोदा च महाभागा सुतौ विजहतुः शुचः ३५ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीं स्मरंत्यौ
ठ्यो तत्कृतां मैत्रीं वाष्पकं[illegible]समूचतुः ३६ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरी अवाप्याप्यैंद्रमैश्वर्यं य
स्या नेह प्रतिक्रिया ३७ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि प्रा
प्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्रचभयौ न सतां परः स्वः ३८ श्रीशुक उवाच गोप्यश्च कृष्ण
मुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति दृग्भिर्हृदीकृतमलं परिरभ्य सर्वास्तद्भावमा २२
पुरपि नित्ययुजां दुरापं ३९

हे भवति युवयोः पित्रोन्यस्तावेतौ संप्रीणनादीनि प्राप्य अकुत्रच भयौ क्वचिदपि भयरहितौ
मत्वा ऊषतुः वासं चक्रतुः कथंभूतयोः अक्ष्णोः नेत्रयोः रक्षकं पक्ष्म तद्वत् तथा रक्षकयोः युक्तं युवयोरेतत् यतः सतां परः स्व
इति नास्ति वैषम्यं ३८ अभिष्टवे लिंगं यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु व्यवधायकं पक्ष्म कर्तृ विधातारं शपंति दृ
ग्भिर्नेत्रद्वारैः हृदीकृतं हृदये प्रवेशितं परिरभ्य तद्भावं तादात्म्यतां प्रापुः अपि नित्ययुजां आरूढयोगिनामपि ३९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰ उ॰ ४० चिरायितान् विलंबितान् अत्र हेतुः शत्रूणां पक्षस्य क्षपणे चेतो येषां तान् ४१ अपि स्वित् अस्मान् अवध्यायथ अवजानीथ अकृ
तज्ञा एव इत्याविशंकया ईषच्छंकया नूनं कोमात्रं निश्चितमेवैतत्परित्यज्य गतत्वादिति च तत्र अतआह नूनमिति ४२ एतत्स
दृष्टांतमाह वायुरिति आक्षिपते पृथक्करोतीत्यर्थः ४३ अपि च अतिभद्रमिदं यदुत भवतीनां मद्वियोगेन मत्प्रमातिशयो
जात इत्याह मयीति मयि भक्तिमात्रमेव तावदमृतत्वाय कल्प्यते यत्तु भवतीनां मत्स्नेह आसीत् तद्दिष्ट्या अतिभद्रं कुतः
मदापनः मत्प्रापणाइति ४४ कीदृशः त्वं यं च वयं स्नेहेन प्राप्स्याम इत्यपेक्षायामात्मस्वरूपमाहे अहंहीति हे अंगनाः भौ

भगवांस्तास्तथाभूता विविक्तउपसंगताः आश्लिष्याङ्कनामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ४० अपि स्मरथ नः सख्यः
छ्छ्२ स्वानामर्थचिकीर्षया गतांश्चिरायिताञ्छत्रुपक्षक्षपणचेतसः ४१ अप्यवध्यायथास्मान् स्विदकृतज्ञाविशंक
८५ या नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ४२ वायुर्यथा घनानीकं तृणं तूलं रजांसि च संयोज्याक्षिपते भू
यस्तथा भूतानि भूतकृत् ४३ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते दिष्ट्या यदासीन्मत्स्नेहो भवतीनाम
दापनः ४४ अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरंगनाः ४५ एवं ह्येता
नि भूतानि भूतेष्वात्मात्मना ततः उभयं मय्यथ परे पश्यताभातमक्षरे ४६ श्रीराम श्रीराम श्रीराम

तिकानां शरावेमेघवादीनां यथा आकाशादि पंचभूतान्याद्यंतादिरूपाणि एवं सर्वभूतानां जरायुजादीनां अहं अतो व्यापकं मां भ
वत्यः प्राप्स्यथ इति ४५ ननु चतुर्विधभूतग्रामाणां तेऽज्ञातात्मेवाद्यंतादिरूपः तस्मिंश्च सर्वव्यापके सर्वभूतानि वर्त्तंत इति कुत राम
स्त्वत्प्राप्तिरस्माकमित्यत आह एवंहीति अयमर्थः यथा शरावादीनां भौतिकानां महाभूतान्याद्यंतरूपाणि एवमेवैतानि च ८५
तुर्विधानि भूतान्यपि भौतिकत्वाविशेषात् स्वकारणेषु भूतेष्वेव ततो नत्वभौक्तेयात्मनि आत्मा तु तेषु स्वात्मना भोक्तृरू
पेण ततः व्याप्तः नकारणत्वेन अथ तदुभयं भूतानि भौतिकरूपं भोग्यं च भोक्तारं चात्मानं मय्यक्षरे परिपूर्णे आभातं पश्यतेति ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नु१

अध्यात्मशिक्षया कृष्णोपदेशेन शिक्षिताः बोधिताः तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिङ्गं यासां ताः तेमं ना ध्यगमन् प्रापुः ४७ एवं
प्राप्तापि शिष्यैः पुनरपि हृद्यासां तेन मायया विनिर्गत आणिस्मरणं प्रार्थयामासुरित्याह आहुश्चेति हे नलिननाभ पदारविन्दं गेहजुषां मा २
गृहसेविनां नाम अपि नो मनसि सदा उदियात् आविर्भवतु ४८ इति श्रीमद्व्यशीतितमः अशीतितम एवं च स्त्रीणां कृष्णकथादि लं
वै द्रौपद्या कृष्णभार्याभिरुक्ताः स्वस्वकरग्रहाः १ अन्वयकुशलं तत्पादस्पृष्ट्या हतमंहो येषां ते २ महतां मनस्तः सकाशान्मुख
द्वारतो निःसृतं क्वचित् कदाचित् हे भर्त्ता देहधारिणां देहकृत् आसां वैस्मृतिः अविघातो छिन्नत्वात् तथा देहकृदीश्व

श्रीशुक उवाच अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः तदनुस्मरणध्वस्तजीवकोशास्तमध्यगान् ४७ आहुश्च
ते नलिननाभ पदारविन्दं योगेश्वरैर्हृदि विचिन्त्यमगाधबोधैः संसारकूपपतितोत्तरणावलम्बं गेहंजुषामपि मन
स्युदियात्सदा नः ४८ इति श्रीभागवते महापुराणे दशमस्कन्धे तीर्थयात्रायां वृष्णिकुरुसंगमो नाम द्व्यशीतितमो
ध्यायः श्रीशुक उवाच तथानुगृह्य भगवान् गोपीनां स गुरुर्गतिः युधिष्ठिरमथापृच्छत्सर्वांश्च सुहृदोऽव्ययं १ त
एवं लोकनाथेन परिपृष्टाः सुसत्कृताः प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः २ कुतोऽशिवं त्वच्चरणाम्बुजास
वं महन्मनस्तो मुखनिःसृतं क्वचित् पिबन्ति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृतिच्छिदं ३ श्रीराम श्री

रस्मद्विषयाज्ञानच्छिदं वा ३ चित्सुखी हे प्रभो त्वच्चरणाम्बुजासवं कर्णपुटैर्ये अलं पिबन्ति तेषां त्वन्तः दुर्जनशास्त्रः कालरू
पात् कुतोऽशिवं भवतीत्यन्वयः कथंभूतं महात्मानां व्यासादीनां मुखनिःसृतं क्वचित् कदाचित् पिव्यासादिवाक्यरूपमा ६
त्मतत्त्वं जानतां न दुःखं भवतीत्यर्थः नन्वीश्वरस्यात्मतत्त्वमेव कथं तत्राह देहंभृतामिति देहंभृतो जीवाः त्वत्कृते तत्त्वे तुल्ये न तु
क्ष्मस्ति जीवति कोऽह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यादिति श्रुतेः अथवा त्वन्मुखनिःसृतं त्वच्चरणा
म्बुजासवं ये पिबन्ति तेषां महात्मनां कुतोऽशिवमित्यन्वयः त्वत्कृते भगवन्नमस्कारकारणाय ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰३॰ हित्वेतिपरहयंत्वात्वांहिएवत्वामेवनताःस्मेत्यर्थः कथंभूतंआत्मधाम्नास्वरूपप्रकाशेनविधुताः निरस्ताआत्मकृताबुद्धिनिमित्ता
तिस्रोऽवस्थायस्मिंस्तं अतएवआनंदसंप्लवंसर्वानंदकंदरूपं अखंडंअपरिच्छिन्नंयतः नकुंठितोबोधश्चिच्छक्तिर्यस्यतं नन्व
वरूपतांश्रीकृष्णस्यकुतोऽस्मदादिवद्गूढप्रतीतेः अतआह कालोपसृष्टेति कालेनउपसृष्टाविप्लुताश्रुतिनिगमाश्रुतेनि
षामवनरक्षार्थंआत्तःउपात्तोयोगमायया आकृतिर्नराकारोमूर्तिर्येनतं परमहंसानांगतिंत्वां अतस्स्वैवरूपत्वादस्माकं

हित्वात्मधामविधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधं कालोपसृष्टनिगमावनआत्तयोगमा
यारुतिंपरमहंसगतिंनताःस्म ४ श्रीऋषिरुवाच इत्युत्तमश्लोकशिखामणिंजनेष्वभिष्टुवत्स्वंधककौरव
स्त्रियः समेत्यगोविंदकथामिथोगृणांस्त्रिलोकगीताः शृणुवर्णयामि ते ५ द्रौपद्युवाच हेवैदर्भ्यच्यु
८६ तोभद्रेहेजांबवतिकौशले हेसत्यभामेकालिंदिशैब्येरोहिणिलक्ष्मणे ६ हेकृष्णपत्न्यएतन्नोब्रूतवो
भगवान्स्वयं उपयेमेयथालोकमनुकुर्वन्स्वमायया ७ श्रीरुक्मिण्युवाच चैद्यायमार्पयितुमुद्यतकार्मुके वाच २
षुराजस्वजेयभटशेखरितांघ्रिरेणुः निन्येमृगेंद्रइवभागमजाविष्यूथात्तच्छ्रीनिकेतचरणोस्तुममार्चनाय
८

चत्वन्माययाएतत्सर्वंवैपरीत्यात्त्वामेवनताःस्मेति यद्वात्वामिति प्रकरणाज्ज्ञातव्यं त्वांनताःस्म किंकृत्वा किं आत्मधाम राम हिला·
आत्माशरीरंधामगृहं तत्स्वत्तआदेहदेहिकसंगंपरित्यज्येत्यर्थः समानमन्यत् ४ त्रिषुलोकेषुगीताः ५ कौशल्येहेसत्ये ८६
शैब्यमित्रविंदारोहिणीनामकाचित्पट्टमहिषीतुल्या ६ हेअन्याः श्रीकृष्णस्यपत्न्यः ७ मामांअर्पयितुंसंपादयितुं
राजसुजरासंधादिषुउद्यतकार्मुकेषुसत्सुअजेयायेभटास्तेषांशेखरितामुकुटवत्कृतोऽरे अंघ्रिरेणुर्येनतत्तेषां
अजिपंददधदित्यर्थः तस्यश्रीनिकेतस्यचरणोममार्चनायास्तु ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनाम्ने भ्रातुर्वै धनसिंह हृतेनेन तं प्रहृष्यस्तेन मतं तेन लिप्तम् अभिशापं पयदुर्यशः। अपमार्ष्टुं परिहर्तुं ऋक्षराजं जित्वा रत्नं स्यमन्तकमुपा
जहार आनीतवान् अथ अनन्तरं मत्पित्रे रत्नं मह्यं तेन स्वापराधेन भीतः। समर्पितः। पिता भवे श्रीकृष्णाय मामदिशत्। देहो दत्तोऽस्य
क्रूरादिभ्यः प्रतिश्रुतां नामपीत्यर्थः। एवं देहकृन्मे पिता अमुं श्रीकृष्णं निजनाथं स्वामिनं देवमीश्वरं सीतापतिं प्राज्ञाय अवि
ज्ञाय त्रिनवहानि हृत्वं छे हेनुरोधनस सप्तविंशति दिनान्यमुनाऽभ्ययुध्यत् परि। क्षितः संजातापरीक्षा यस्य स परीक्षितः।

सत्यभामोवाच   यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार। जित्वर्क्षराजमथ
रत्नमदात्स तेन भीतः पितादिशत मां प्रभवेऽपि दत्तां ९ जांबवत्युवाच प्राज्ञाय देहकृदमुं निज
नाथदेवं सीतापतिं त्रिनवहान्यमुनाऽभ्ययुध्यत् ज्ञात्वा परीक्षितउपाहरदर्हणं। मां पादयोः प्रगृह्य म
णिनाऽहममुष्य दासी १० कालिन्द्युवाच तपश्चरंतीमाज्ञाय स्वपादस्पर्शनाशया सख्योपेत्याग्रही
त्पाणिं योऽहं तद्गृहमार्जनी ११ मित्रविंदोवाच यो मां स्वयंवर उपेत्य विजित्य भूपान् निन्ये श्ववृथगो
मिवात्मबलि द्विपारिः भ्रातृंश्च मेऽपकुरुतः स्वपुरं श्रियौकस्तस्यास्तु मेऽनुभवमंघ्र्यवनेजनत्वं १२

तं साक्षात् सीतापतिरेवासाविति ज्ञात्वा पादौ प्रगृह्य मणिना सह मामर्हणमुपाहरत् अर्हणतया समर्पितवान्। अहो तर्हि त्व
मतिश्रद्धासिनेत्याह अमुष्याहं दासीति १० सख्याऽर्जुनेन तस्य गृहमार्जनी गृहसंमार्जनकर्त्री ११ भूनां यूथगतं स्वबलि
द्विपारिः सिंह इवेति मे भ्रातॄंश्च अपकुर्वतः अपकारं कुर्वतो विजित्य श्रियौकः लक्ष्मीनिवासः। तस्यांघ्र्यवनेजनत्वं चर
णक्षालनकर्तृत्वं अनुभवं प्रतिजन्म मे अस्तु १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० सप्तउक्षणः वृषभानुबलेच वीर्यं प्रभाव अतीक्ष्णशृंगाणि अनिशयितानि येषां तान् मे पित्रा कृतान् बलीयसे मां दातुं क्षितिपानां बल
स्य वीर्यस्य परीक्षणाय तान् अनिशं सिद्धान् वीराणां दुर्मदघ्नान् इति पितानुतरसा शीघ्रमेव निगृह्य दमयिता क्रीडन्न नायासेन बवंध अजुलो का
नू अजापत्यानि १३ वीर्यमेव शुल्कं देयं यस्यास्तां दासीभिः सह चतुरंगिणी गजाश्वादिसेनायुक्तां पुरं निन्ये १४ लक्ष्मणा द्रौपदि तां स्मिते हे

सत्योवाच सप्तोक्षाणोतिबल वीर्यसुतीक्ष्णशृंगान् पित्राकृतान् क्षितिपवीर्यपरीक्षणाय तान्वीरदुर्मदहनस्त
वीर्य २ सानिगृह्य क्रीडन् ववंध यथा शिशवोऽजतोकान् यइत्थं शुल्कोमां दासीभिश्चतुरंगिणी पथि निर्जित्य राज
न्यान् निन्ये तदास्यमस्तु मे १४ भद्रोवाच पिता मे मातुलेयाय स्वयमाहूय दत्तवान् कृष्णे कृष्णायतच्चि
२७ त्तां मक्षौहिण्या सखीजनैः १५ अस्य मे पादसंस्पर्शो भवेज्जन्मनि जन्मनि कर्मभिर्भ्राम्यमाणाया नत
त्त्वेयश्चात्मनः १६ लक्ष्मणोवाच ममापि राज्यच्युतजन्म कर्म च श्रुत्वा मुहुर्नारदगीतमासह या
चित्तं मुकुंदे किल पद्महस्तया वृत्तः सुसंमृश्य विहाय लोकपान् १७ श्रीराम श्रीराम श्रीराम

व चित्तं यस्यास्तां मामक्षौहिण्या सेनया सह १५ येन पादसंस्पर्शेन आत्मनो मे तत्के वल्याख्यं श्रेयो भवेत् यद्वा येन कारणेन राम
कारणेन आत्मनो जीवस्य तत् श्रेयः सएव पुरुषार्थ इति १६ राज्ञि हे द्रौपदि यथा मित्रविंदायाः तथा ममापि चित्तं मुकुंदे २७
विषयमासीत् सुसंमृश्य सुविचार्य पद्महस्तया श्रिया वृत्तः किलेत अतोपि मम चित्तं श्रीमुकुंदे आसेत्ति १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रश्रीकृष्णभ्रूशासावचीकरत् कारयामास १८ यथाराज्ञितवस्त्वयंवरोपार्थायद्येभयाऽऽशुमिछयाकृतः तथामत्स्यकारितवान्
पाठांतरे पार्थस्येषुणाः पाकृतोः नहीदमपि अर्जुनएवकिनाविध्यत्तत्राह अयंत्विति समत्स्याव हिरवाछन्नानांतः अंतस्तोभ
संलग्नयाद्दृष्ट्यासंलक्ष्यत्त अयंतुनतथाकिंतुस्तंभमुखनिहितकलशजलकवलं दृश्यचअन्ताद्दृष्टिरधस्तादुपरिच

ज्ञात्वाममसुतंसाधिपितादुहितृवत्सलः दृहत्सेनइतिख्यातस्तन्नोपायमचीकरत् १८ यथास्वयंवरोराज्ञि
मत्स्यःपार्थभयाकृतः अयंतुवहिराछन्नाद्दृश्यत्तसजलपरं १९ श्रुत्वेनत्सर्वतोभूपाआययुर्मत्पितुःपुरं
सर्वास्त्रशस्त्रतत्वज्ञाःसोपाध्यायाःसहस्रशः २० पित्रासंपूजिताःसर्वेयथावीर्ययथावयः आदाः सश
रंचापंवेद्धुंपर्षदिमद्धियः २१ आदायव्यसृजत्केचित्सज्यंकर्तुमनीश्वराः आकोटिज्यांसमुत्क्षिप्य
पेतुरेकेऽमुनाहताः २२ सज्यंकृत्वापरेवीरामागधांवष्टचेदिपाः भीमोदुर्योधनःकर्णोनाविदंस्तद
वस्थितं २३ मत्स्याभासंजलेवीक्ष्यज्ञात्वाचतदवस्थितिं पार्थोयत्तोऽसृजद्वाणंनाछिनत्पस्पृशेपरं २४
राजन्येषुनिवृत्तेषुभग्नमानेषुमानिषु भगवान्धनुरादायसज्यंकृत्वाथलीलया २५ तस्मिन्संधाय
मत्स्यं विशिखंवीक्ष्यसकृज्जले छित्वेषुणापातयत्तंसूर्येचाभिजित्स्थिते २६ दिविदुंदुभयोनेदुर्जयश
ब्दयुताभुवि देवाश्चकुसुमासारान्मुमुचुर्हर्षविह्वलाः २७ श्रीराम श्रीराम श्रीराम श्रीरा

लक्ष्यमिति श्रीकृष्णव्यतिरेकेणनकस्यापि भयइतिभावः १९ २० मत्स्यंवेद्धुंपर्षदिसंसदिमद्धियामय्येवधीर्येषामिति
अन्यचित्तानचकुशलाइतिभावः २१ तदेवाह आदायेति अमुनाचापेन २२ नाविदंस्तदवस्थितिमिति मागधाहीनांक्रि
याशक्तिरवनुलक्ष्याभिन्नेत्यर्थः २३ यत्तोयत्नवान्असृजत् मुमोच सवाणोमत्स्यंनाछिनत् परंकेवलंपस्पर्शज्ञात्वा

भा०७० भगवन्वाप्तिहर्षनिर्भरेणात्मानमेवानुवार्यायसाहहाभ्यां तद्रंगात मितिनृत्यदाकेलीकलस्वनेनो नूपुरौ ययोस्ताभ्यां पद्भ्यां रंगं प्राविशं कनकेनोज्वला रत्नमाला निवीयप्राद्दर्शपरिधाय नीविवंधनको शिकाग्रं उत्तमको शयवस्त्रं सव्रीडहासाय स्मितस्य हृदनं यस्याः सा कवर्यां धृताः स्रजो यया सा २८ उरवः कुन्तलाय स्मिन् कुंडलं यावल्लिषायया स्तगंडस्थले यस्मिन् तदेवत्तच्च शिशिरः संतापहरो हासायमुतः कटाक्षमोक्षः अपांगवीक्षणा विलासः अनुरक्तो हृदयं यस्याः साहं २९ ३० हे याज्ञसेनि द्रौपदि

तद्रंगमाविशमहं कलनूपुराभ्यां पद्भ्यां प्रगल्भकनकोज्वलरत्नमालां नृत्येन निवीय परिधाय च कौशिकाग्र सव्रीडहासवदनो कवरीधृतस्रक् २८ उन्नीय वक्रमुरुकुन्तलकुंडलत्विड्गंडस्थलं शिशिरहासकटाक्षमोक्षैः राज्ञां निरीक्ष्य परितः शनकैर्मुरारेरंसे अनुरक्तहृदया निदधे स्वमालां २९ तावन्मृदंगपटहाः

८८ शंखभेर्यानकादयः निनेदुर्नटनर्तक्यो ननृतुर्गायका जगुः ३० एवं वृत्ते भगवति मय्येशेन नृपयूथपाः

नसेहिरे याज्ञसेनि स्पर्द्धन्तो हृच्छयातुराः ३१ मां तावद्रथमारोप्य हयरत्नचतुष्टयं शार्ङ्गमुद्यम्य संनद्ध

७१ स्तस्थावाजौ चतुर्भुजः ३२ दारुकश्चोदयामास कांचनोपस्करं रथं मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव ३३ तेन्वसज्जन्त राजन्या निषेद्धुं पथि केचन संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिं ३४

श्रीकृष्ण ईशमया सह तेन सति स्पर्द्धन्तः स्पर्द्धमानाः नन्वेवं परमैश्वर्यं दृष्ट्वा कृतः स्पर्द्धावसरस्तत्राह हृच्छयातुरा इति हृच्छयेन कामेनातुराः विचशाराः कामविद्धमितास्पर्द्धन्तेति भावः ३१ हयरत्नानां चतुष्टयं यस्मिन् तं रथं द्वाभ्यां मामालिंग्य द्वाभ्यां धनुर्बाणौ गृहीत्वा चतुर्भुजः सन्स्थितः ३२ मृगाणां मिषतां मृगराडिव तदाहरिर्जगाम इति शेषः ज्ञातव्याः दारुकेश्चैवं मृगराजोपमा ३३ तेन्वसज्जन्त पृष्ठतः सक्ता बभूवुः निषेद्धुं प्रतिबंधं कर्तुं केचन पुरतो गत्वा पथि संयत्ताः

अ

हे४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रविंछाद्यंत्तीतिरविछदाः ध्वजेषु पटायस्यां चित्राणितोरणानि यस्यां सेव सा च तां कुशस्थलीं पुरीं यदुपतिः समाविशत् स्व
केतनेन मंडलं अस्ताचलंवा ३६ महार्हवासः प्रभृतिभिः सुहृदः पूजयामास ३७ दास्यादिभिः सह आयुधानि पूर्णाय

ध्रे:॥ तेशार्ङ्गच्युतबाणौघैः कृत्तबाह्वङ्घ्रिकंधराः निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः ३५ ततः पुरीं यदुपतिर समाविश॰ २
त्यलंकृतां रविच्छद ध्वजपट चित्रतोरणां कुशस्थलीं दिवि भुवि चाभिसंस्तुतां तरणिरिव स्वकेतनं ३६
पितामि पूजयामास सुहृत्संबंधिवांधवान् महार्हवासोलंकारैः शय्यासनपरिच्छदैः ३७ दासीभिः
सर्वसंपद्भिर्भटे भरथवाजिभिः आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः ३८ आत्माराम
स्यतस्य मावयंवेगृहदासिकाः सर्वसंगनिरृत्या ह्यातपसा च वभूविम ३९ महिष्य ऊचुः॥
भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिजये जितराजकन्याः निर्मुच्य संसृतिविमो
क्षमनुस्मरंतीः पादांवुजं परिणिनाय य आप्तकामः ४०

पिंदेदो ३८ इमा अशेषवयं सर्वसंगनिरृत्यात्तपसा स्वधर्मेण च आद्धा साक्षात्तस्य गृहदासिका वभूविम ३९ क्षिति
जये दिग्विजये जितानां राज्ञां कन्याः नः अस्मान् तेन रुद्धाः ज्ञात्वा ततो निर्मुच्य संसृतेर्विमोक्षो यस्मात्तत्पदांबुजं
अनुस्मरंतीनः परिणिनाय उदाच वहत् आप्तकामोपि यः ४० श्रीराम श्रीराम श्रीराम श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०द० नवयमितिसाम्राज्यादिनकामयामहेकिंतु एतस्यश्रीमत्पादरजोमूर्ध्नावोढुंकामयामहइति ननुतस्यगृहीणपायूयंसर्वसंप
न्नाःजनः किमेवंकाम्यते अतआहुः हेसाध्विसाम्राज्यंसार्वभौमंपदंस्वाराज्यमैंद्रपदं भौज्यंतदुभयाभामभोक्तृत्वं चि वि धराजत
इतिविराट् तस्यभावोवैराज्यंअणिमादिसिद्धिभाक्त्वमित्यर्थः पारमेष्ठ्यंब्रह्मपदं आनंत्यंमोक्षंहरेः पदंतुसालोक्यादिन
तुकामयामहइति यद्वावद्धंचब्राह्मणानेकमेणप्रोणादिदिक्चतुष्टयाधिपत्यानि साम्राज्यभौज्यस्वाराज्यवैराज्यानि आ
रव्यानि ४१ तर्हिकितत्पादरजएवकाम्यतेअतआहुः श्रियःकुचकुंकुमगंधाढ्यमितिब्रह्मादिसेव्ययाश्रियाउपिसेवितत्वा

नवयंसाध्विसाम्राज्यंस्वाराज्यंभौज्यमप्युत वैराज्यंपारमेष्ठ्यंचआनंत्यंवाहरेःपदं ४१ कामयामहएतस्यश्रीमत्पा
८५ दरजःश्रियः कुचकुंकुमगंधाढ्यंमूर्ध्नावोढुंगदाभृतः ४२ व्रजस्त्रियोयद्वांछंतिपुलिंद्यस्तृणवीरुधः गावश्चा
रयतोगोपाःपादस्पर्शंमहात्मनः ४३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्र्यशीतितमोध्यायः श्रीशु
कउवाच श्रुत्वापृथासुबलपुत्र्यथयाज्ञसेनीमाधव्यथक्षितिपपत्न्यउतस्वगोप्यः कृष्णेऽखिलात्म
निहरौप्रणयानुबंधंसर्वाविसिस्म्युरलमश्रुकलाकुलाक्ष्यः १ इतिसंभाष्यमाणासुस्त्रीभिःस्त्रीषुनृभि
र्नृषु आययुर्मुनयस्तत्रकृष्णरामदिदृक्षया २ द्वैपायनोनारदश्चच्यवनोदेवलोऽसितः विश्वामित्र
शतानंदोभारद्वाजोथगौतमः ३

दितिभावः ४२ ननुतर्हित्रातिदुर्लभत्वात्किंतद्वांछयाअतआहुः व्रजस्त्रियइति यत्तृणधागावोगाः महात्मनोपिगाश्चा राम
रयतः पादस्पर्शंचगोपाययथावांछंतितत्रच्छतत्पराणांसुलभमितिभावः ३ इतिदशमस्त्र्यशीतितमः चतुर्भिरधिका
शीतितमेमुनिसमागमे वसुदेवमखोत्साहेबंधुप्रस्थापनादिकं १ सुबलपुत्रीगांधारीमाधवीसुभद्राक्षितिपा ८५
नांराज्ञांपत्न्यःस्वगोप्यःकृष्णभक्तागोप्यः विसिस्म्युर्विस्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ आनर्चुः अर्चितवंतः ७ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्तनुः यतानि यतावाग्यस्य तस्य सदसः ८ जन्मभृतः सफलजन्मानः तत्फ
लं जन्मफलं किं तत् तद्योगेश्वरदर्शनं ९ किंच युष्माकं दर्शनं मेवत्वाविद्धवानामपि दुःप्रापं अस्माकं तु स्पर्शनादिकमपि कथं
नु घटितमिति विस्मयेनाह किमिति स्वल्पतपसां तीर्थस्नानादिमात्रतपोबुद्धिर्येषां तथा अर्चायां प्रतिमायां देव इति चक्षुर्दे

रामः सशिष्यो भगवान्वसिष्ठो गालवो भृगुः पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ४ द्वितस्त्रित
श्चैकतश्च ब्रह्मपुत्रास्तथांऽगिराः अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे तान् दृष्ट्वा सहसोत्थाय प्रा
गासीना नृपादयः पांडवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ६ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्च
यत् स्वागतासनपाद्यार्घमाल्यधूपानुलेपनैः ७ उवाच सुखमासीनान् भगवान् धर्मगुप्तनुः सद
स्तस्य महतो यतवाचोऽनुशृण्वतः ८ श्रीभगवानुवाच अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं दे
५३ वानामपि दुःप्रापं यद्योगेश्वरदर्शनं ९ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां दर्शनस्पर्शनप्रश्न
प्रह्वपादार्चनादिकं १० न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादे
व साधवः ११ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः उपासिता भेदकृतो हरंत्यघं
विपश्चितो घ्नंति मुहूर्त्तसेवया १२

ष्टिर्येषां तेषां योगेश्वरस्पर्शनादिकमिदं किं असंभावितमित्यर्थः १० एतत्प्रपंचयति नह्यम्मयानीति त्रिभिः ११ वाङ्मनसयो
रप्युपासनाविषयत्वं यो वाचं ब्रह्मेत्युपास्ते यो मनो ब्रह्मेत्युपास्त इति श्रुतेः अघं तन्मूलमज्ञानं न हरंति अत्र हेतुः भेद
कृतः भेदकर्त्तारः यद्वा भेदबुद्धिं कुर्वतः पुंसः विपश्चितो निरस्तभेदाः ते तु मुहूर्त्तमात्रसेवयैवाघं घ्नंतीति १२ श्री

भा०२७ अतः साधून् विहायान्यत्रात्मादिबुद्ध्या सज्जमानो ऽतिमंद इत्याह यस्येति आत्मबुद्धिरहमिति बुद्धिः त्रयो धातवो वातपित्तश्लेष्मा
णः प्रकृतयो यस्य तस्मिन् कुणपे शरीरे स्वधीः स्वीया इति बुद्धिः भौमे भूविकारे इज्यधीः देवताबुद्धिः यत् यस्य तीर्थबुद्धिः तीर्थ र०३
मिति बुद्धिः अभिज्ञेषु तत्त्ववित्सु यस्य ताः बुद्धयो न संति स एव गोषु खरः दारुणः अत्यविवेकी यद्वा गवां तृणादिभारवाहः
खरो गर्दभ इति १३ दुरन्वयं अनेनुरूपं भ्रमती अनवस्थिता धीर्बुद्धिर्येषां ते १४ ईशितव्यता अनीश्वरता कर्माधिकारितां
यंतः हसंतः जनसंग्रहमात्रमेतदित्यूचुः १५ दुरन्वयं विवृण्वंत आहुः द्वाभ्यां यन्मायया इति तत्त्ववित्सु उत्तमा अपि वयं का सो मायायया

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः यत्तीर्थं सलिले न कर्हिचिज्जनेष्वभिज्ञेषु बुद्धिः
स एव गोखरः १३ श्रीशुक उवाच निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः वचो दुरन्वयं विप्रास्तूष्णीमा मुनय ऊचुः
१८० सन् भ्रमद्धियः १४ चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं १५ यन्मा
ययात्तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः यदीशितव्यायति गूढ ईहया अहो विचित्रं भग
न१ वद्विचेष्टितं १६ अनीह एतद्बहुधैक आत्मना सृजत्यवत्त्यत्ति न बध्यते यथा भौमैर्हि भूमिर्बहुनामरूपिणी अहो
विभूम्नश्चरितं विडंबनं १७

विमोहिता इत्यत आह यदिति यं यस्मात् ईहया नरचेष्टितेन गूढः सन् ईशितव्यापतिः अनीश्वरवदाचरति भवान् ननु नन्व गम
हमीश्वरः अतः किमित्येवमाचरेयं तत्राह अहो इति भगवतस्तव विचेष्टितं विचित्रं अतर्क्यं १६ भगवत्त्वमेवाह अनीह इ १८०
ति अनीहः अक्रिय एव आत्मना स्वरूपमात्रेण बहुधा त्यत्र दृष्टांतः यथा भौमैरिति भौमैर्यथा घटादिविकारैरुपलक्षिता घट।३
वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ननु कथमहं जगत्स्रष्टादिकं तत्त्वविशुद्धदेवपुत्रत्वादि तत्र
त्राहुः अहो विभूम्नः परिपूर्णस्य तव इदं जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति १७ आराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनसंग्रहमाहः अथापीति त्रिभिः सत्त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि स्वलीलया आचारेण वेदपथं च बिभर्षि १८ अत एव ब्राह्मणे
षु बहुमानमपि करोषीति सहेतुकमाहः ब्रह्मेति ब्रह्म वेदाख्यं शुक्लं शुद्धं ते हृदयं अंतरंगरूपं कुत इत्यत आह। यत्रेति
यत्र ब्रह्मणि व्यक्तं कार्यं अव्यक्तं कारणं ततः परं सद्वस्तु सन्मात्रं ब्रह्म च तपआदिभिरुपलब्धं तत्तु ब्रह्म १९ तस्मात् हृद हृद
यत्वाद्धृदप्रवर्तके ब्राह्मणकुले शास्त्रयोनिर्वेदप्रमाणकस्त्वं च वसद्धाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि संपूजय—

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पु
रुषः परो भवान् १८ ब्रह्म ते हृदयं शुक्लं तपः स्वाध्यायसंयमैः यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं १९
तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोने त्वमात्मनः सभाजयसि सद्धाम तद्ब्राह्मणाग्रणीर्भवान् २० अद्य नो
जन्मसाफल्यं विद्यायास्तपसो दृशः त्वया संगम्य सद्गत्या यदन्तः श्रेयसां परः २१ नमस्तस्मै भगवते कृ
ष्णायाकुंठमेधसे स्वयोगमायया छन्नमहिम्ने परमात्मने २२ न यं विदंत्यमी भूपा एकारामाश्च वृष्ण ६
यः मायाजवनिकाछन्नमात्मानं कालमीश्वरं २३ यथा शयानः पुरुष आत्मानं गुणतत्त्वदृक् नाम—
मात्रेंद्रियाभातं न वेद रहितं परं २४

सि तत्तस्मादेव कारणात्त्वं ब्राह्मणानामग्रणीर्मुख्यः तत्प्रवर्तकः सन् कर्माचरसीत्यर्थः २० तस्माद्धीश्वरस्य तवेदं जन्म
न संग्रहमात्रं वयं तु तव संगत्या कृतार्था इत्याहः अद्येति षड्भिः सतां गत्या त्वया संगम्य संगं प्राप्य यत्त्वं यस्मात्त्वं श्रेयसां प
रोवधिः २१ २२ एकस्मिन्नवस्थाने आरामो येषां तेऽपि कालं सृष्ट्यादिकारणं ईश्वरं नियंतारं २३ एतत्सदृष्टांतमाहः यथे
ति शयानः स्वप्नान् पश्यन् गुणतत्त्वदृक् दृष्टिः नाममात्रमिंद्रियेण मनसा आभातं सिंहव्याघ्रादिरूपमात्मानं वेद न तद्रहितं
वेदनादिरूपमात्मानं न वेद यथा २४

स्वप्नविषये पुलक॰ सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० उ एवं त्वा त्वां नाम मात्रेषु स्वप्नादितुल्यविषयेषु इन्द्रियैर्या ईहा प्रवृत्तिः सैव माया तया यावि भ्रम चित्तेनानवेद स्मृतेर्विवेकस्योपप्लवान्नाशात् २५
श्रघौघस्य मर्षनाशं करोति यत् गाङ्गं तद्रूपं तीर्थं तस्यास्पदमाश्रयं तं घ्रिं सुपक्वैर्योगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य तं घ्रिं दृशि
मद्दृष्टवन्तो वयं बहुभिः पुण्यैः अतोऽस्मान् भक्ताननुगृहाण भक्तान् कृत्वानुगृहाण कुर्वित्यर्थः ननु किं भक्त्या यथा पूर्वं तत्र एव तप्य
प

एवं त्वा नाम मात्रेषु विषयेष्विन्द्रियेहया । विमायया यावि भ्रम चित्तेनानवेद स्मृत्युपप्लवात् २५ तस्याद्य ते ददृशिमांघ्रिमघौ
घमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः । उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण
भक्तान् २६ श्रीशुक उवाच इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं राजर्षे स्वाश्रमान् गन्तुं मुनयो दधिरे मनः
८५१ २७ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः । प्रणम्य चोपसंगृह्य बभाषेदं सुयन्त्रितः । २८ श्रीवसुदेव उवाच
नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यताम् २९ श्रीनारद उवाच
नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः ३० सन्निकर्षोऽत्र मर्त्या
नामनादरणकारणं गाङ्गं हित्वा यथान्याम्भस्तत्रत्यो याति शुद्धये ३१ श्रीराम श्रीराम श्रीराम श्रीराम

उ०कृ०१ गामिति निराह । उत्सिक्तया भक्त्या उपहत आशयश्च क्षीणो जीवकोशो येषां ते एव पूर्वं भगवद्भक्ति माप्पुर्नान्य इति २६ गाम
८७२ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा बभाषेदमिति संधिः २८ सर्वदेवा यथा ये तेभ्यः यावन्तो वेदे देवतास्ताः सर्वा विदि विप्रा ८५१
स्ते एव सन्तीति श्रुतेः । येन कर्मणा यथा कृतेन वा कर्मणां निर्हारो निरासो भवति तदुच्यताम् २९ श्रीकृष्णं हित्वास्मान् पृ
च्छतीति विस्मितान् प्रत्याह नारदः नातीति बुभुत्सया बोद्धुमिच्छया ३० तत्रत्यः गङ्गातीरवासी ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णः भर्के त्वं मन्यमानोऽविधाविज्ञ भित्तइत्याह यस्येति द्वाभ्यां अनुभूतिर्ज्ञानं कुतश्चिदपि न नरिष्यति न नश्यति नेदं वाहका
लेन केनचित् काफलं वत् अस्य विश्वस्य लयोत्पत्त्यादिनापि स्वतश्चविद्युदादिवत् अन्यस्माच्च मुद्गरादिवत् घटादेः गु
णतोऽपायितरोऽत्यतः पूर्वं नृपादिनादेहादि ३२ तमेवं कुतश्चिदव्याहतानुभवं अतएवेश्वरं किंच अद्वितीयं हे इमं अन्य ३३
प्राकृतः उपरुद्ध माच्छन्नं मनुष्यं मन्यते के लोकशकुमोदिभिः तत्र लोकोरागादयश्च तत्पूर्वकाणि कर्माणि च तत्परिपा
के सुखदुःखे च सत्त्वादिगुणानां पुनः प्रवाहश्चतैः प्राणादिभिश्च स्वविभवैः स्वकार्यैः अत्र दृष्टान्तः मेघहिमोपरागैः
वि

यस्यानुभूतिकालेन लयोत्पत्त्यादिनास्यवै स्वतोऽन्यस्माच्च गुणात्तान कुतश्चन नरिष्यति ३२ तं लोकशक
र्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं प्राणादिभिः स्वविभवैरुपगूढमन्यमन्यन्त सूर्य
मिव मेघहिमोपरागैः ३३ अथोचुर्मुनयो राजन् आभाष्यानकदुन्दुभिं सर्वेषां शृण्वतां राज्ञां तथैवाच्यु
तरामयोः ३४ कर्मणा कर्मनिर्हारः एष साधु निरूपितः यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ३५
चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ३६ अयं
स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषः ३७ श्रीराम॥

अभ्रतुषारराहुभिः स्वविभवैः सूर्यमिवेति ३३ चित्तस्योपशमः उपशमहेतुः योगो मोक्षोपायश्च शनैरात्ममुदमावह
तीति तथा सुगमैः प्रकृत्याश्रयत्वात् धर्मश्च आवश्यकः अन्यथा विहिताकारणेन मालिन्यप्रसंगात् ३६ ननु कर्मणा
न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिना त्यागस्यैव विहितत्वात्कथं कर्म मोक्षोपाय इत्याशंक्य आदा
वेव त्यागस्याशक्यत्वादित्याशयेनाहुः अयमिति सार्धैश्चतुर्भिः स्वस्त्ययनः स्वस्ति क्षेमः ईयतेऽनेनेति तथाश्रद्धयात्तानि

कामतयाभुन्क्तेनभुङ्क्तेनआप्तेनवित्तेनपुरुषई
श्वरइऽप्यतोतियन्नेषपंथाः ३७

भा०द० स्वस्त्ययनत्वमाहुः। वित्तैषणामिति वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां चित्तेच्छां विसृजेत्। गृहैः गृहोचितैर्भोगैर्दारसुतैषणां विसृ
जेत्। तदनुभवे नैव तदौत्सुक्यनिवृत्तेः। देहमृते आत्मनः स्वर्गादिलोकैषणां च कालेन क्षयानुसंधानेन विसृजेत्। देवहे
यज्ञादेव २ वसुदेव कालेन देवानामपि मृत्युना मृत्युहेतुभूतेनेत्यर्थः। अत्राचारं प्रमाणयति ग्राम इति ३८ किंच ऋणैरिति त
थाच श्रुतिः। जायमानो वै ब्राह्मणस्त्रिभिरृणैर्वाजायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यादि

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम्। आत्मलोकैषणां देव कालेन विसृजेद्बुधः। ग्रामे त्यक्तैषणाः सर्वे ययु
र्धीरास्तपोवनं ३८ ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितॄणां प्रभो। यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य यजे
न्पतेत् ३९ त्वं त्वद्य मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते। यज्ञैर्देवर्णमुन्मुच्य निरृणोऽशरणो भव ४०
८४२ वसुदेव भवान्नूनं भक्त्या परमया हरिं। जगतामीश्वरं प्राचः स यद्वां पुत्रतां गतः ४१ श्रीशुक उवाच
न इति तद्वचनं श्रुत्वा वसुदेवो महामनाः। तानृषीनृत्विजो वव्रे मूर्ध्नानम्य प्रसाद्य च ४२ त एनमृषयो
राजन् वृता धर्मेण धार्मिकं। तस्मिन्नयाजयन् क्षेत्रे मखैरुत्तमकल्पकैः ४३ तद्दीक्षायां प्रवृत्तायां
वृष्णयः पुष्करस्रजः। स्नाताः सुवाससो राजन् राजानः सुष्ठ्वलंकृताः ४४ तन्महिष्यश्च मुदिता नि
ष्ककंठ्यः सुवाससः। दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणयः ४५ श्रीराम श्रीराम श्रीराम

न्य १ तान्यनिस्तीर्य तेषामृणानामनपाकृत्य तथाच मनुः। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेव राम
निर्मुक्त ऋणः २ मानो व्रजत्यधः इति ३९ निरृणः अशरणो भव गृहात् प्रव्रज ४० किंच अविशुद्धचित्तानामयं क्रमः त्वं तु कृतार्थ ८४२
इत्याहुः वसुदेवेति प्राचः अर्चितवान् यद्यस्माद्वां युवयोः ४१ ४४ आलिप्ताः कुंकुमादिभिः वस्तुपाणयः गृहीतार्हणहस्ताः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४६ अक्तेनत्रेयांरंजनेन अभ्यक्तःसर्वांगेषुनवनीतेन ४७ ताभिः पत्नीभिः सहितोहोसितोविरेजे ४८ एषजीवेशोसर्वजीवानामी
शो ५० अनुयज्ञंप्रतियज्ञंआम्नातसर्वांगाः प्राकृताः ज्योतिष्टोमदर्शपूर्णमासादयः तेभ्यश्चोदनालिंगादिभिरतिदेशप्राप्ता

नेदुर्मृदंगपटहशंखभेर्यानकादयः ननृतुर्नटनर्त्तक्यस्तुष्टुवुः सूतमागधाः जगुःस्तकंठ्योगंधर्व्यः संगीतं
सहभर्तृकाः ४६ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः पत्नीभिरष्टादशभिः सोमराजमिवोडुभिः ४७ ताभि
र्दुकूलवलयैर्हारनूपुरकुंडलैः स्वलंकृताभिर्विभैवर्क्षितोऽजिनसंवृतः ४८ तस्यर्त्विग्भोमहाराजरत्नकौशेयवाससः
ससदस्याविरेजुस्तेयथावृत्रहणोध्वरे ४९ तदारामश्चकृष्णश्चस्वैःस्वैर्बंधुभिरन्वितौ रेजतुःस्वसुतैर्दारैर्जीवेशोस्वविभू
तिभिः ५० ईजेऽनुयज्ञंविधिनाऽग्निहोत्रादिलक्षणैः प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं ५१ अथर्त्विग्भ्यो
ददात्कालेयथाम्नातंसदक्षिणाः स्वलंकृतेभ्योलंकृत्यगोभूकन्यामहाधनाः ५२ पत्नीसंयाजावभृथ्यैश्चरित्वाते
महर्षयः सस्नूरामह्रदेविप्रायजमानपुरःसराः ५३ स्नातालंकारवासांसिवंदिभ्योदात्तथास्त्रियः ततःस्वलंकृ
तोवर्णानाश्वभ्योन्नेनपूजयन् ५४ बंधून्सदारान्ससुतान्पारिबर्हेणभूयसा विदर्भकोशलकुरून्
काशिकेकयसृंजयान् ५५ सदस्यर्त्विक्सुरगणान्नृभूतपितृचारणान् श्रीनिकेतमनुज्ञाप्यशंसंतःप्रययु
र्मुदा ५६

गाः वैकृताः सौर्यसत्रादयः तैः सर्वैः द्रव्यंपुरोडाशादिज्ञानंमंत्रः क्रियाकर्मतेषामीश्वरं ५१ २ सस्नुः स्नानंचक्रुः ५१ २
आश्वभ्यः शुनोऽभिव्याप्यअन्नेनपूजयन् ५४ बंधादीनारणांतान्पारिबर्हेण प्रीतिदानेनचापूजयन् तेचसर्वेप्रययुः ५६

अपूजयन् २

भा॰उ॰ प्रयाणेकेषां विद्विशेषमाह धृतराष्ट्र इति द्वाभ्यां अनुजो विदुरः पार्था युधिष्ठिर भीमार्जुनाः यमौ नकुलसहदेवौ ५७ सौहृदेनान्वि
ता निश्चितां सिंयषांत ५८ मनोरथाय ज्ञविषयः तमेव महार्णवं ६० भ्रूराणां वल्लनयोगिनां ज्ञानेनापित्यर्थः ६१ नत्र कुत्र सात्रा
हे अस्माखिति कृताज्ञेषु कृतमुपकारमजानत्सु सत्तमे भेवञ्जिर प्रतिकल्पा अनुपमामेत्रीय मार्पितां अफलापि प्रत्युप

धृतराष्ट्रानुजः पार्थाभीष्मोद्रोणः पृथायमौ नारदो भगवान्व्यासः सुहृत्संबंधिबांधवाः ५७ बंधूनुपरिष्वज्य यदून्
सौहृदाक्लिन्नचेतसः ययुर्विरहकृष्णास्वदेशांश्चापरेजनाः ५८ नंदस्तु सहगोपालैः हत्या पूजयाचितः
कृष्णरामौयसेनाद्यैर्न्यवात्सीद्ध्रुववत्सलः ५९ वसुदेवांजसोत्तीर्यमनोरथ महार्णवं सुहृद्वृतः प्रीतम
१५३ नानंदमाह करस्पृशन् ६० वसुदेव उवाच भ्रातरीशकृतः पाशोनृणांयः स्नेहयंत्रितः तं दुस्त्यजम
हं मन्ये शूराणामपि योगिनां ६१ अस्मास्वप्रतिकल्पेयं यत्कृताज्ञेषु सत्तमैः मैत्र्यर्पिता फलाचापि
न निवर्त्तेत कर्हिचित् ६२ प्रागकल्पाच्च कुशलं भ्रातर्वो नाचरामहि अधुना श्रीमदांधाक्षान पश्या
मः पुरः सतः ६३ मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद स्वजनानुत बंधून्वान पश्यति ययांध
दृक् ६४ एवं सौहृदशैथिल्य चित्तआनकदुंदुभिः रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ६५॥ राम

कार शून्यापि कर्हिचिदस्मान्न निवर्त्तेत तस्मादीश्वरकृतः पाशोयं भवतामिति गम्यत इत्यर्थः ६२ अफलत्वमेवाहाप्रा ५३
गिति हे भ्रातः अकल्पात् असमर्थत्वात् वः कुशलं प्रियं नहि आचरामन कृतवंतो वयं श्रीमदेनांधान्यक्षीणियेषां
ते ६३ राज्यश्रीमाभूत् छांदसोडागमः ६४ ५

अथश्वइति प्रातर्निर्गमे द्वैवापराह्णे गम्यतामिति अपराह्णे निर्गमे श्वो गम्यतामिति पुनः पुनरेवं मानितः ६६ ७ यापितः मह
तां सैन्येन प्रस्थापितः ६८ ७० यदुदेवस्य वसुदेवस्य महोत्सवे यज्ञादिलक्षणे सुहृत्संदर्शनादिके चेति ७२ इति दशमचतु

नंदस्तु सखुः प्रियकृत्प्रेम्णा गोविंदरामयोः अद्यश्व इति मासांस्त्रीन् यदुभिर्मानितोऽवसत् ६६ ततः
कामैः पूर्यमाणः सव्रजः सहबांधवः परार्घ्याभरणक्षौमनानानर्घ्यपरिच्छदैः ६७ वसुदेवोग्रसेना
भ्यां कृष्णोद्धवबलादिभिः दत्तमादाय पारिबर्हं यापितो यदुभिर्ययौ ६८ नंदो गोपाश्च गोविंदचरणा श्चगोप्य ३
बुंजे मनः क्षिप्तं पुनर्हर्तुमनीशा मथुरां ययुः ६९ बंधुषु प्रतियातेषु वृष्णयः कृष्णदेवताः वीक्ष्य
प्रावृषमासन्नां याययुर्द्वारवतीं पुनः ७० जनेभ्यः कथयांचक्रुर्यदुदेवमहोत्सवं यदासीत्तीर्थयात्रा
यां सुहृत्संदर्शनादिकं ७१ इति श्रीभागवते महापुराणे दशमस्कंधे तीर्थयात्रानुवर्णनं चतुराशीति
तमोऽध्यायः श्रीशुक उवाच अथैकदात्मजौ प्राप्तौ कृतपादाभिवंदनौ वसुदेवोऽभिनंद्याह प्रीत्या सं
कर्षणाच्युतौ १ मुनीनां स वचः श्रुत्वा पुत्रयोर्धामसूचकं तद्वीर्यैर्जातविस्रंभः परिभाष्याभ्यभाषत २

राशीतितमः पंचाशीतितमे रामकृष्णौ संप्रार्थितौ सुतौ पित्रा ज्ञानमथो मात्रा मृतान् पुत्रानयच्छतां १ नंदयित्वा कुरुक्षे
त्रयात्रायां सुहृदो वहून् तत्वज्ञानं ततः पित्रा राहितः शान्स्कृत सूनुभिः १ धामप्रभावं तत्सूचकं जातविस्रंभः उत्पन्नवि
श्वासः परिभाष्य संबोध्य २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० अस्य विश्वस्य साक्षात्स्वरूपभूतं कारणं प्रधानपुरुषौ नाम तयोरपि कारणत्वेनेश्वरौ च साक्षात् द्वां युवामिति जाने ३ नन्विदं विश्वम
नेकैः कारकैर्जायमानं कुतः प्रधानपुरुषात्मकं कुतस्तरामावयोस्तत्कारणत्वेनेश्वरत्वं तत्राह यत्रेति यत्राधिकरणे य
न करणेन च यतोपादानात् यस्य संबंधेन षष्ठ्यर्थस्याकारकत्वेपि निमित्तता ज्ञाया यस्मै संप्रदानाय यद्यदिति प्रयोज्य
कर्तृकर्मकारक दर्शितं न तु नयोर्नास्ति भेदः यथोक्तं करोतिक्रियमाणेन कर्त्रा कर्मणा विना भवत्यर्थस्य कर्त्ता च करोतेः
न
कर्म जायते तथा करो

कृष्ण कृष्ण महायोगिन् संकर्षण सनातन जाने वामस्य यत्साक्षात् प्रधानपुरुषौ परौ ३
घर यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा स्यादिदं भगवान् साक्षात्प्रधानपुरुषेश्वरः ४
८५४ एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज आत्मनानुप्रविश्यात्मन् प्राणो जीवो बिभर्ष्यज ५

त्यर्थस्य यः कर्त्ता भवितुः स प्रयोजकः भवितात मे पृक्षार्थं प्रयोज्यत्वं प्रपद्यत इति च सत्यं तथाप्यवस्थाभेदेन भे राम
दो विवक्षितः दृश्यते चावस्थाभेदः तंडुलानोदनं च पेति मृदं घटं करोति तदेवं सप्तविभक्त्यर्था दर्शिताः यथा ८५४
तिर्यदेति च क्रियाविशेषणाभूतानामन्येषां चाव्ययानामर्थः स्यादिति क्रियापदार्थोपलक्षणं एवं सर्वप्रपंचम
नूद्य तत्कारणं भगवद्रूपता विधत्ते इदं साक्षादिति प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भगवांस्त्वमेव सा
क्षादिति तयोरैक्यमित्येभिः प्रत्येकं च वचनं ४ किंच धारणपोषणकर्तापि त्वमेवेत्याह एतदिति हे आत्मन् प्रा
णः क्रियाशक्तिः जीवो ज्ञानशक्तिः असन् त्वमेव बिभर्षि ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुप्राणादीनांविचित्रशक्तीनांकारणत्वावगमात्कथंपरमेश्वरस्यैवकारणत्वेनसर्वात्मकत्वमुच्यतइत्याशंक्यप्राणादिशक्तयोऽपि
तस्यैवेत्याह प्राणादीनामिति प्राणाः सूत्रंतदादीनांविश्वसृजांविश्वकारणानांयाः शक्तयस्ताः परस्परंसकारणस्येश्वरस्यैवानु
तः पारतंत्र्यात् यथावधशक्तिनेबाणस्येऽपितुपुरुषस्यतद्वदित्यर्थः ननुभगवतः प्राणादिवर्गस्यचस्वातंत्र्यमेवकिंनस्यात्
अतआह वैसादृश्यात् द्वयोरिति चिन्ननाचेतनत्वेनविसदृशत्वात् द्वयोश्चेतनप्राणादिवर्गस्यचेतनपारतंत्र्यमेवयु
क्तमित्यर्थः यद्वा प्राणादिषुद्वयोर्द्वयोरेवतत्रचहिसदृशत्वेविरुद्धक्रियाकारित्वात् किंपुनर्बहूनांतस्मादेकेन

याः

॥ ० ॥ प्राणादीनांविश्वसृजांशक्तयोयाःपरस्यताः पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैवचेष्टतां ६
कांतिस्तेजःप्रभासत्ताचंद्राग्न्यर्कर्क्षविद्युतां यत्स्थैर्यंभूभृतांभूमेर्वृत्तिर्गंधोऽर्थतोभवान् , श्रीराम

ना सर्वज्ञेनसर्वेशक्त्यधिष्ठितानामेवविशिष्टकार्यारंभकत्वंयुक्तंनस्वतंत्राणामिति तथाचोक्तंयदेतेः संहत्यभावाभ
तेंद्रियमनोगुणाः यदायतननिर्माणेनशेकुर्ब्रह्मवित्तम तदैतेसंहत्यचान्योन्यंभगवच्छक्तिचोदिताः सदसत्त्वमुपादाय
चोभयंससृजुर्ह्यदइति तथा नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयोविभुमित्यादि ननुप्राणादीनांक्रियाका
रित्वशक्त्यभावेकुतः स्यादतआह चेष्टवच्चेष्टतामिति चेष्टमानानामेषांचेष्टैवनशक्तिः यथावायोःशक्त्यातृणादी
नांचलनंयथाचपुरुषस्यशक्त्याशराणांवृत्तिरिति ६ पारतंत्र्यमेवप्रपंचयति कांतिरितिपंचभिः चंद्रस्यकांतिः अग्नेस्तेजः
अर्कस्यप्रभाऋक्षविद्युतांसत्तास्फुरणमात्रंपासः त्वंअर्थंतावस्कतोभवान् तथाचश्रुतिः नतत्रसूर्योभातिनचंद्रतार
कंनेमाविद्युतोभांतिकुतोऽयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति स्मृतिश्चयदादित्यगतंतेजोजगद्भासय

तेऽखिलं यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामकमिति भूमेर्
न्तिः प्राणिनामाधारत्वेनवर्ततेगंधश्च भवान् तवैवशक्तिरित्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०३० किंचेहेदं वत्रअपांतर्प्पणांतत्स्निजनकत्वंप्राणानंजीवनहेतुत्वं ताश्चापश्च तासारसश्च त्वमेव किंच वायोरोजः सहादित्वेवशक्तिः ८
दिशामुपाधिकृताकाशप्रदेशानामवकाशः दिशश्च त्वं खंच सामान्याकाशात्तदाश्रयः स्फोटः श्रशब्दतन्मात्रं परावस्था वागित्य
र्थः नादः पश्यंती ॐकारः मध्यमावर्णश्च आकृतीनां पदार्थानां पृक्कृतिः पृथक्करणमभिधानं यस्मात्तत्पदं वृणपदाद्या
त्मिकोवैखरीच त्वमित्यर्थः ९ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः देवाश्चेंद्रियाधिष्ठातारः तदनुग्रहणं षामधि सो २

तर्प्पणंप्राणनमपांदेव त्वंताश्चतद्रसः ओजः सहोबलं चेष्टागतिर्वायोस्तवेश्वर ८ शि दिशांत्वमव
काशोसि दिशः खंस्फोट आश्रयः नादोवर्णस्त्वमोंकार आकृतीनांपृथक्कृतिः ९ इंद्रियंत्वि
ऍ५ द्रियाणांत्वंदेवाश्चतदनुग्रहः अवबोधो भवान् बुद्धेर्जीवस्यानुस्मृतिः सती १० भूतानामसिभू
तादिरिंद्रियाणांचतैजसः वैकारिकोविकल्पानां प्रधानमनुशायिनां ११ नश्वरेष्विह भावेषु त
दसित्वमनश्वरं यथाद्रव्यविकारेषु द्रव्यमात्रं निरूपितं १२ सत्वंरजस्तमइतिगुणास्तद्वृत्तय
श्चयाः त्वय्यद्धाब्रह्मणिपरे कल्पितायोगमायया १३

ध्५१ ष्ठानशक्तिश्च त्वं अवबोधोध्यवसायशक्तिः अनुस्मृतिः प्रतिसंधानशक्तिः १० भूतानांतानांकारणं भूतादिस्तामसोऽहंका रा
रस्त्वं विविधसंकल्पा धिदेवाध्यात्मभेदेन कल्प्यंतइति विकल्पा देवाश्चेषांकारणं वैकारिकः सात्विकोहंकारश्च त्वं अनुशायि ऍ५
नांजीवानां संसारकारणं प्रधानं त्वं ११ अपिच नश्वरेषु नाशशीलेषु भावेषु यदनश्वरमवशिष्यमाणरूपं तत्तु त्वमसि द्र
व्यविकारेषु मृत्सुवर्णादि कार्येषु घटकुंडलादिषु नश्वरेषु द्रव्यमात्रं मृत्सुवर्णादि मात्रंनश्वरं यथा तद्वत् १२ ननु
त्रिगुणात्मकं कार्यरूपापि त्वमित्युक्त्वा त्वं कथमनश्वरस्त्वं तत्राह त्वमिति यद्वृत्तयस्तत्परिणामाश्च महदादयः अद्धासा
मसिइंद्रियाणांकारणंतैजसोहंकारस्त्वं २

सो ८ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्मान्नसंति नन्वसतांकथंप्रतीतिरितअतआह यर्हीति यदाविकल्पितास्त्वय्येवप्रतीतिमात्रेणात्वयिसंति त्वंचामीषुतेष्वेवकारणतया
अनुगतः अन्यदातु अव्यावहारिकः विकल्पशून्यस्त्वमेवावशिष्यसइत्यर्थः १४ एवंरूपत्वाज्ञानेननिबंधनअयंसंसारइत्याह गुण
प्रवाह इतिसूक्ष्मांनिःप्रपंचांगतिमबुधाः अविद्वांसः अबुद्धेतिवापाठः अतः अबोधनदेहाभिमानेनकृतैः कर्मभिःसं
सरंतीति १५ एवंतयोस्तत्वंनिरूप्यतदप्राप्त्याशोचति यदृच्छयेति नृतांमनुष्यतांसुकल्पांपटुतरेंद्रियां १६ अहोकिमिति
प्रमत्तोसित्वयाबहुभिः पाशैर्निबद्धत्वादित्याह असावहमितिदेहस्यान्वयादिषुचममैवैतइति १७ अहोबतसुन्वाया

तस्मान्नसंत्यमीभावायर्हित्वय्येवकल्पिताः त्वंचामीषुविकारेषुह्यन्यदाऽव्यावहारिकः १४ गुणप्रवाहएतस्मिन्
अबुधास्त्वखिलात्मनः गतिंसूक्ष्मामबोधेनसंसरंतीहकर्मभिः १५ यदृच्छयानृतांप्राप्यसुकल्पामिहदुर्लभां
स्वार्थेप्रमत्तस्यवयोगतंत्वन्माययेश्वर १६ असावहंममैवैतेदेहेचास्यान्वयादिषु स्नेहपाशैर्निबध्नातिभ
वान्सर्वमिदंजगत् १७ युवांननःसुतौसाक्षात्प्रधानपुरुषेश्वरौ भूभारक्षत्रक्षपणअवतीर्णौतथात्थह
१८ तत्तेगतोस्म्यरणमद्यपदारविंदमापन्नसंसृतिभयापहमार्तबंधो एतावतालमलमिंद्रियलाल
सेनमर्त्यात्मदृक्त्वयिपरेयदपत्यबुद्धिः १९

गावयोः किमिदमारोपितम्अतआह युवामिति भूभारक्षत्रक्षपणार्थंअवतीर्णौतथाह निश्चितंप्राहकथयसि १८ तत्त
स्मादरणंशरणमापन्नानांसंसृतिभयमपहंतीतितथातत् ननुत्वमतिसुखात्कथांकिंनिर्विद्यसेअतआह एतावतेति इं
द्रियलालसेनइंद्रियार्थतृष्णया यत् येनेंद्रियलालसेनमर्त्यशरीरेआत्मदृक्आत्मबुद्धिरहं त्वयिचपरेपरमेश्व
रेअपत्यबुद्धिरस्मितेनालंपर्याप्तमिति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतियुगं १   जगाद । नन्च २

नन्च० ननु कुतएतत् अहं परमेश्वर इति तत्राह सूतीगृहे इति अनुयुगं यदा सुतपाः पृश्निरिति युगं नौ आवयोः यदा त्वं कश्यपो ऽदिति अदिति
युग्मं अधुना च वसुदेवो देवकी च युग्मं एवं हि प्रतियुग्मं अजएवाहं संजज्ञ अवतीर्ण इति भवाम् ननु गौ च चतुर्भुजो देव इति तत्राह ना
१९२ नातनू रिति गगनवद्गगणवत्वं भूम्नः सर्वगतस्य विभूतिरूपा माया २० । उपमन्महे उपमन्यामहे समुद्दिश्य विषयी कृत्य तत्व
ग्रामस्तत्व समूहः उदाहृतः सम्यक् निरूपितः २२ इमामेव दृष्टि सर्वत्र विधत्स्वेत्याह अहमिति एवं हि विमृश्याः ब्रह्मत्वेनेवा

सूतीगृहे ननु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निज धर्मगुप्त्यै नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उ
रुगाय विभूतिमायां २० श्रीशुक उवाच आकर्ण्येत्थं पितुर्वाक्यं भगवान् सात्वतर्षभः प्रत्याह प्रश्रयानम्रः प्रहस
न् श्लक्ष्णया गिरा २१ श्रीभगवानुवाच वचो वः समवेतार्थं तातैतदुपमन्महे यन्नः पुत्रान् समुद्दिश्य तत्वग्राम १८
उदाहृतः २२ अहं यूयमसावार्य इमे च द्वारकौकसः सर्वेप्येवं यदुश्रेष्ठ विमृश्याः सचराचरं २३ आत्मा ह्येकः स्व
यंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते २४ खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथा १३
शयं आविस्तिरोल्पभूर्येको नानात्वं यात्यसावपि २५ श्रीशुक उवाच एवं भगवता राजन् वसुदेव उदाहृतः व
श्रुत्वा विनिष्टनानाधीस्तूष्णीं प्रीतमना अभूत् २६ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता श्रुत्वानीतं गुरोः पुत्रमात्म
जाभ्यां सुविस्मिता २७

न्वेषणीयाः किंच सचराचरं जगदपि २३ ननु नानाविकारवतां कुतो ब्रह्मत्वं नाब्रह्मण एवोपाधि
धर्मैर्बहुधा प्रतीतिरिति सदृष्टान्तमाह द्वाभ्यां आत्मा हीति यथा खादि भूतानि तत्कृतेषु घटादिषु आविस्तिरोभावादियाति एवम् राम
सावात्मापि आत्मसृष्टैर्गुणैः कृत्वा तत्कृतेषु देहेषु बहुधा ईयते पुनश्च यथाशयं यथोपाधि आविर्भाव तिरोभावादि रूपेण प्रती ६६
यते नवकृतः कुतः एको बहुधा स्वयंज्योतिः दृश्यत्वेन नित्यो ऽनित्यत्वेन अन्यो ऽनन्यत्वेन निर्गुणः सगुणत्वेनेत्यादि बहुधात्वप्रपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समाश्राव्य संबोध्य २८ २९ भूमेर्भारायमाणानां राज्ञां मेर्थे तेषां निधनार्थं मयि किल वतीर्णौ हि अद्य ३० यस्यांशः पुरुषस्तस्यांशो मायातस्या
अंशांशा गुणास्तेषां भागेन परमाणुलेशेन विश्वोत्पत्त्यादयो भवंति तं त्वा त्वां गतिं शरणं गताऽस्मि ३१ आनिन्यथुः आनीतवंतौ पितृस्थानात्
यमसमसदनात् ३२ ३३ ३४ दैत्यराड्बलिः कथंभूतो विश्वस्यात्मभूतं देवं सान्वयः सपरिवारः ३५ सवृंदः सपरिजनः कथंभूतो

हृष्टरोमा स समाश्राव्य पुत्रान् कंसविहिंसितान् स्मरंती कृपणा प्राह वैक्लव्यादश्रुलोचना २८ देवक्युवाच रामरामाप्र
मेयात्मन्कृष्ण योगेश्वरेश्वर वेदाऽहं वां विश्वसृजामीश्वरावादिपूरुषौ २९ कालविध्वस्तसत्त्वानां राज्ञामुच्छा
स्त्रवर्त्तिनां भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे ३० यस्यांऽशांऽशांशभागेन विश्वोत्पत्तिलयोदयाः भवंति कि
ल विश्वात्मंस्तं त्वाद्याहं गतिं गता ३१ चिरान्मृतसुतादाने गुरुणा किल चोदितौ आनिन्यथुः पितृस्थानाद्गुरवे गुरु
दक्षिणां ३२ तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृतान् ३३ ऋषिरुवाच
एवं संचोदितौ मात्रा रामः कृष्णश्च भारत सुतलं संविविशतुर्योगमायामुपाश्रितौ ३४ तस्मिन्प्रविष्टावुपलभ्य दैत्य
राड्विश्वात्मदैवं सुतरां तथात्मनः तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्वयः ३५ तयोः स
मानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः दधार पादाववनिज्य तज्जलं सवृंद आब्रह्म पुनद्यदंबु ह
३६ समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्ता
त्मसमर्पणेन च ३७ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया उवाच हानंदजलाकुलेक्षणः
प्रहृष्टरोमा नृपगद्गदाक्षरः ३८

ब १ पादाववनिज्य यदंबु ययोरवनेजनोदकं आब्रह्म ब्रह्माणमभिव्याप्य जगत्पुनत्पवि
त्रयद्वेत्तितौ ३६ ३७ इंद्रसेनो बलिः प्रेमविभिन्नया प्रमार्द्रया बिभ्रत् धारयन् ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

य

भा॰ ७॰ अनंताशेषायस्वहेतफले कर्तृत्वे विश्वधारणात् इहत्तु तस्मै कृष्णाय सदानंदरूपाय वेदे संजगादि धात्रे सांख्ययोगवितानायेत्यादिप
दत्रयं सैक्यविवक्षया ३९ योगेश्वराणामपि दुर्दर्शो युवामस्माभिर्दृष्टो विस्ययत्तन्नातिचित्रमित्याह दर्शनमिति दुःप्रापमपि युष्मत्कृ
पयाकदाचिदतिदुर्लभं सुलभमपि भवतित्तदाह रजस्तमःस्वभावानामिति नोदर्शनंप्राप्तो ४० अहो विधि पोवयं सात्विकेभ
केभ्योपिसभाग्याइत्याह दैत्यत्यादित्रिभिः ४१ २ उद्धद्धवैरेणायाभक्तिस्तयाकेचनेतिचिद्यादयः सनिकृष्टाः कामतो भक्त्या
गोप्यादयोयथासन्निकृष्टाः त्वदात्मतांप्राप्ताः नतथासत्वसंरब्धाः सत्वाविष्टा अपिसुरादयोनसन्निकृष्टाइति ४२ ननु

बलिरुवाच नमोनंतायस्वहेतेनमःकृष्णायवेधसे सांख्ययोगवितानायब्रह्मणेपरमात्मने ३९ दर्शनंवां हिभू
तानांदुःप्रपंचातिदुर्लभं रजस्तमःस्वभावानांयन्नःप्राप्तोयदृच्छया ४० दैत्यदानवगंधर्वाः सिद्धविद्याध्रचा
रणाः यक्षरक्षः पिशाचाश्चभूतप्रमथनायकाः ४१ विशुद्धसत्वधाम्न्यद्धात्वयिशास्त्रशरीरिणि नित्यंनि
वद्धवैरास्तेवयंचान्येचतादृशाः ४२ केचनोद्बद्धवैरेणभक्त्याकेचनकामतः नतथासत्वसंरब्धाः सन्निकृष्टाःसु
रादयः ४३ इदमित्थमितिप्रायस्तवयोगेश्वरेश्वर। नविदंत्यपियोगेशायोगमायांकुतोवयं ४४ तन्नःप्र
सीदनिरपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात् निःक्रम्यविश्वशरणांघ्र्युपलब्धवृत्तिः
शांतोयथैकउतसर्वसखैश्चरामि ४५ शाध्यस्मानीशितव्येशनिःपापान्कुरुनःप्रभो पुमान्यच्छ्रद्धयातिष्ठ
ंश्चोदनायाविमुच्यते ४६

सात्विकेभ्योऽपिराजसादयःसन्निकृष्टाइतिचित्रंतत्राह इदमित्थमिति इदमितिस्वरूपतः
इत्थमितिविशेषतश्च ४४ तदेवंयद्यपिवैरभावनापित्वत्प्राप्तिर्भवेत्तथापिमांसात्विकंकुर्विति प्रार्थयते तन्नइतितत्तथानःप्रसीद
यथानिरपेक्षैरात्मारामैरपिमृग्ययुष्मत्पादारविंदेदेवधिषणामाश्रयः तस्मादन्यद्यद्गृहतदेवांधकूपः तस्मान्निःक्रम्यनि
गंत्यविश्वस्यशरणंरक्षिताराइक्षाः तेषामंघ्रिषुमूलेषु स्वत्तएवाल्लितोः फलादिभिरुपलब्धाप्राप्ताशेतौजीविकायेनसोहंशा
तःसन्नेकएवचरामि उतअथवासर्वेषांसखायायैर्महांतस्तैःसह यथाचरामीति ४५ कथंपुण्यानामिवभावःसंभावितइतिचेत्त
हियथातद्भवेत्तथास्मानतुशिक्षयत्याह शाधीति हेप्रभोईशितव्याः सर्वेषामीशायत्तवानुशासनेअतिष्ठन् आश्रयन् अचोदना

नाविविविधं चलब्रह्माणां सकामाणां सुरपक्ष
किविविकिकैः स्मादिति भावः ४६

राम
५८७

जीवाली मल्पर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संतः २

तदुक्तं सर्वमनुमोदयन्स्वागमनकारणं सप्रपंचं कथयति आसन्निति पंचभिः ऊर्णायां भार्यायां प्रथमे ऽन्तरे स्वायंभुवमन्वंतरे ते देवाः सुतां
५२ वान्वयभितुं जंघुं मैथुनं नरमितुं उद्यतं तं दृष्ट्वा प्रजापतिं जहसुः उपहसितवंतः ४७ तेनावद्यकर्मणा पापेन आसुरीं योनिमगन् अधु
ना तु क्षणमेव हिरण्यकशिपोर्जाता इत्यर्थः ते च योगमायया नीता नीताः ४८ देवक्याः उदरे जाताः हे राजन् वले ते च कंसेन आगमवः २

श्रीभगवानुवाच आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेऽन्तरे देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतं ४७ तेनासुरी
मगन्योनिमधुनावद्यकर्मणा हिरण्यकशिपोर्जाता नीतास्ते योगमायया ४८ देवक्या उदरे जाता राजन्कंसवि
न्स्त्र ३ हिंसिताः सा तान् शोचत्यात्मजान्स्वांस्त इमे ध्यासतेंतिके ४९ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये ततः शापाद्वि
निर्मुक्ता लोकं यास्यंति विज्वराः ५० स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी षडिमे मत्प्रसादेन पुनर्या
स्यंति सद्गतिं ५१ इत्युक्त्वा तान्समादाय इंद्रसेनेन पूजितौ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां ५२ तान्दृ
ष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ५३ अपाययत्स्तनं प्री
तासुतस्पर्शपरिस्नुतं मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ५४ पीत्वामृतं पयस्तस्याः पीतशेषं गदाभृ
तः नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ते नमस्कृत्य गोविंदं देवकीं पितरं बलं मिषतां सर्वभूतानां ययु
धाम दिवौकसां ५६

विहिंसिताः सा च तानात्मजान्मत्वा शोचति ते च इमे तवांतिके ऽध्यासते ४९ लोकं देवलोकं ५०
स्मरोद्गीथः स्मरसहितः उद्गीथः सद्गतिं मोक्षं स्मरस्य च पूर्वं कोकोत्निमानि तिनाम अत्रतः कोत्निमंतं प्रथमजं के सायानके
दुंदुभिरपयामास इत्युक्तं ५१ अयच्छतां अर्पयामासतुः ५२ ४ अमृतत्वहेतुः गदाभृतः पीतशेषमिति नारायणांगसंस्प
र्शेन प्रतिलब्धं देवत्वं यैस्ते आत्मदर्शनं यैस्ते ५५ धाम देवलोकं ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृतानामागमनं निर्गमं च श्रीकृष्णस्य मायां मेने तेनैवापत्यादिरूपेणारचितौ ५७ ८ अमृतं कीर्तिर्यस्य तस्य व्यासपुत्रैरिति बहु
वचनं पूजार्थं जगतघं भिनत्तीति तथा तत्कर्णे निःशेषं यथा भवति तथा नह्येक्षुद्रादिवदिति तद्वं मोक्षहेतुत्वं पापक्षयहेतुत्वं
चोक्तं तेषुक्तानां तु सत्कर्णपूरं परमसुखावहं कर्णभरणमिति स्वयं सुखरूपत्वमाह। किंच भगवति कृष्णे भावशितं चित्तं ये
न सन्तथाभूतात्तस्य क्षेमधाम कालादिभयरहितं लोकं यान्तीति ५९ इति दशमपंचाशीतितमोध्यायः षडशीतितमे दं भी

तं दृष्ट्वा देवकी देवी मृतागमननिर्गमौ । मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ५७ एवं विधान्यद्भुतानि
कृष्णस्य परमात्मनः । वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत ५८ सूत उवाच य इदमनुशृणोति श्राव
येद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः । जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचि
९८ त्तो याति तत्क्षेमधाम ५९ इति श्रीभागवते महापुराणे दशमस्कंधे मृताग्रजायनं नाम पंचाशीतितमो
ध्यायः राजोवाच ब्रह्मन्वेदितुमिच्छामि स्वसारं रामकृष्णयोः । यथोपयेमे विजयो या ममासीत्पिता
मही १ श्रीशुक उवाच अर्जुनस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः । गतः प्रभासमशृणोत् मातुलेयीं
स आत्मनः २ दुर्योधनाय रामस्तां दास्यतीति न चापरे । तल्लिप्सुः स यतिर्भूत्वा त्रिदंडी द्वारकामगात् ३

सुभद्रामर्जुनोहरत् गत्वा च मिथिलां कृष्णो नृपविप्रावनंदयत् पित्रोः स्वज्ञानमादिश्य सुभद्रां फाल्गुनाय च जगाम राम
मिथिलां कृष्णः स्वभक्तिप्रियकृत्तमः १ मत्पुत्रात्का भवत्वर्जुनस्य सुभद्रालाभोपि रामप्रीति कृत्वात् दुर्घट इति मानः ९८
प्रसंगात्पृच्छति ब्रह्मन्निति १ कथमशृणोत् दुर्योधनायेति अपरे वसुदेवादयो न दास्यंतीति तल्लिप्सुः तस्यां मातुलेय्यां
लिप्सुः रामं वंच पितुं पूज्यतमं त्रिदंडिवेषं विधाय अगात् इत्याह सयतिरिति ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वार्थसाधकः कन्यांप्रेप्सुः तेनातिथ्येनाभिमंत्र्य गृहमानीय बलेन यच्छ्रद्धयापहृतेपरिविष्टेन भैक्ष्यं किलार्जुनो बुभु उ
इत्यन्वयः भावेन रत्यभिप्रायेण क्षुभितं मनो दधे ६ व्रीडितापांगी सव्रीडकटाक्षी तस्मिन्न्यस्तं हृदयमीक्षणं च ययासा ७

तत्रैव वार्षिकान्मासान्न्यवात्सीत्स्वार्थसाधकः । पौरैः सभाजितोभीक्ष्णं रामेणाजानता च सः । ४ एकदा गृह
मानीय आतिथ्येन निमंत्र्य तं श्रद्धयोपहृतं भैक्ष्यं बलेन बुभुजे किल ५ सोपश्यत्तत्र महतीं कन्यां वीरमनो
हरां प्रीत्युत्फुल्लेक्षणस्तस्यां भावक्षुब्धं मनो दधे ६ सापि तं चकमे वीक्ष्य नारीणां हृदयंगमं हसंती व्री
डितापांगी तन्न्यस्तहृदयेक्षणा ७ तां परं समनुध्यायन्नंतरं प्रेप्सुरर्जुनः न लेभे शं भ्रमच्चित्तः कामेना २
तिबलीयसा ८ महत्यां देवयात्रायां रथस्थां दुर्गनिर्गतां जहारानुमतः पित्रोः कृष्णस्य च महारथः ९
रथस्थो धनुरादाय शूरांश्चारुंधतो भटान् विद्राव्य क्रोशतां स्वानां स्वभागं मृगराडिव १० तच्छ्रुत्वा भ त्ति
तो रामः पर्वणीव महार्णवः गृहीतपादः कृष्णेन सुहृद्भिश्चान्वशाम्यत ११ प्राहिणोत्पारिवर्हाणि वरवध्वो
मुदा बलः महाधनोपस्करेभरथाश्वनरयोषितः १२ श्रीशुक उवाच कृष्णस्यासीद्द्विजश्रेष्ठः श्रुतदेव
इति श्रुतः । कृष्णैकभक्त्या पूर्णार्थः शांतः कविरलंपटः १३ स उवास विदेहेषु मिथिलायां गृहाश्रमी
अनीहयागताहार्यनिवर्तितनिजक्रियः । १४ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत नाधिकं तावता तुष्टः क्रि
याश्चक्रे यथोचिताः । १५
अंतरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः कामेन भ्रमच्चित्तं यस्य सः शं रामादिसन्मानानिमित्तं
सुखं ८ ९ आ समंतात् रुंधतः आवरणं कुर्वतः १० ११ पारिवर्हाणि च वरवध्वोः प्रीतिदेयानि १२ १३ अनीहया अनुद्यमे
नैवागतं यदाहार्यं भोज्यं तेन निवर्तिता निजाः क्रिया येन सः । १४ यात्रामात्रं ... निर्वाहमात्रं भोज्यं उपनमति प्रत्या
गच्छति १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०८.३ मिथिलस्य जनकस्य वंशे यो मैथिलः १६ प्रभुरेव स्वयं विदेहान् देशान्प्रययौ १७ ... रामो भार्गवः अहं शुकः एवमादिभिः
सह १८ १९ आनर्त्ता धन्वनास्ते देशवर्त्तिनोऽन्नभायः ३ हारहासस्निग्धमीक्षणयस्मिन् तन्मुद्दशिभिर्नेत्रैः २० स्ववीक्षणेनैव

तथानद्राकुपाल्लोंगबहुल्ला श्वइतिश्रुतः मैथिलो निरहंमानउ भावमच्युत प्रियो १६ तयोः प्रसन्नो भगवा
नूदारकेण हृत्तरथ आरुह्य साकं मुनिभिर्विदेहान् प्रययौ प्रभुः १७ नारदो वामदेवोऽत्रिः कृष्णो रामो
सितारुणिः अहं वृहस्पतिः कण्वो मैत्रेयश्च्यवनादयः १८ तत्र तत्र तमायान्तं पौरा जानपदा नृपः ३
प्रतस्थुः सार्घहस्ताः ग्रहैः सूर्यमिवोदितं १९ आनर्त्तधन्वकुरुजांगलमत्स्यपांचालकुंतीमधु कं.अ.
केकयकोशलार्णाः अन्ये च तन्मुखसरोजमुदारहासस्निग्धेक्षणं नृप पपुर्दृशिभिर्नृनार्यः २०
२९ तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् शृण्वन् दिगंत धवलं स्व
यशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् २१ तेऽच्युतं प्राप्तमाकर्ण्य पौरा जानपदा नृप अ
भीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः २२ दृष्ट्वा तउत्तमश्लोकं प्रीत्युत्फुल्लाननाशयः कैर्धृ
तांजलिभिर्नेमुः श्रुतपूर्वास्तथा मुनीन् २३ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुं मैथिलः
अ.१ श्रुतदेवश्च पादयोः पेततुः प्रभोः २४ निमंत्र्य तां दाशार्हमातिथ्येन सह द्विजैः मैथिलः श्रुतदेवश्च युगप
त्संहताञ्जली २५ राम २९

विनष्टतमिस्राहृशो येषां तेभ्यः क्षेमं अभयं अर्थदृशं तत्त्वज्ञानं च २१ अभीयुः प्र
त्युज्जग्मुः २२ प्रीत्या उत्फुल्लानि आननानि आशयाः अंतःकरणानि च येषां तैः शिरोभिः २३ २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection.

तदभिप्रेत्य अंगीकृत्य ननु दानभाभ्यामपिताभ्यां मद्गृहागमनस्य योगं हे यतीत्यलक्षितः अविदितः यद्वा उभाभ्यां तदलक्षितः
ताभ्यां अलक्षित इति २६ । २७ उद्धर्षं उद्गतहर्षं हृदयं यस्य अश्रुभिः आविले क्लिन्ने ईक्षणे यस्य स एव सच २८ ईश्वरान् इश्व
श्रर

भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया उभयोराविशद्गेहमुभाभ्यां तदलक्षितः २६ श्रोतुमप्यसतां दू
रान् जनकः स्वगृहागतान् आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः २७ प्रवृद्धभक्त्या उद्धर्षहृद
यास्राविलेक्षणः नत्वा तदंघ्रीन् प्रक्षाल्य तदपो लोकपावनीः २८ सकुटुंबो वहन्मूर्ध्ना पूजयांचक्र ई
श्वरान् गंधमाल्यांबराकल्पधूपदीपार्घगोवृषैः २९ वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान्
पादावंकगतौ विष्णोः संस्पृशन् शनकैर्मुदा ३० राजोवाच भवान् हि सर्वभूतानामात्मा साक्षी स्वदृ
ग्विभो अथ नस्त्वत्पदांभोजं स्मरतां दर्शनं गतः ३१ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् यदात्थै
कांतभक्तान्मे नानंतः श्रीरजः प्रियः ३२ को नु त्वच्चरणांभोजमेवंविद्विसृजेत्पुमान् निःकिंचनानां
शांतानां मुनीनां यस्त्वमात्मदः ३३ योवतीर्य यदोर्वंशे नृणां संसरतामिह यशो वितेने तच्छांत्यै त्रैलोक्य
वृजिनापहं ३४ नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे नारायणाय ऋषये सुशांतं तप ईयुषे ३५ दिना
नि कतिचिद्भूमन् गृहान्नो निवस द्विजैः समेतः पादरजसा पुनीहीदं निमेः कुलं ३६ इत्युपामंत्रितो
राज्ञा भगवान् लोकभावनः उवास कुर्वन् कल्याणं मिथिलानरयोषितां ३७ श्री श्रीरा श्री

रंतनुत्स्वा श्रेत्यर्थः प्रीणन् प्रीणयन् संस्पृशन् समर्दयन् ३० आत्मा चेतयिता साक्षी प्रकाशकः स्वदृक् स्वप्रकाशः ३१
अथ अतः कारणात् ३१ अनंतो बंधुरपि श्री भार्यापि अजः पुत्रोपि ३२ ३३ तच्छांत्यै संसारोपशमाय ३४ ५ गृहान् गृ
हेषु इत्यर्थः ३६ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० उ धुन्वन्नुपरि भ्रामयन् ३८ अवनिज्य अवनिनिज्य प्रक्षालितवान् ३९ ४० फलैरामलकादिभिरर्हणेन उशीरैर्लक्षणविशेषमूलैः
सुवासितैः शिशिरस्पर्शत्वात्स्वादुभिरंबुभिः सुरभ्या मृदा कस्तूरीप्रमुखया सपर्यया पूजया यथोपपन्नया अनायासेन संपन्ने
यो भूतानुपूर्वं बलत्वं अवात्सल्वविवर्धनेन यदि धा आन्नात्तन च ४१ अस्पृक्ष्य स्पृश्यस्याभामभू त्रिलस्या निकेतभूसुरे अस सर्वतीर्था
स्पदपादरेणुभिः श्लेष्मादिभिर्युः संगमः सममकुलाद्यभूदिति अविविति विस्मयेयद्वा आइति वितर्के नुइति विस्म

कृतदेवाच्युतं प्राप्य स्वगृहान् जनकोयथा। नत्वा मुनीन् सुसंहृष्टो धुन्वन्नु वासो ननर्त्त ह ३८ तृणपीठ
वृषिष्ठतानानीतेषूपवेश्य सः स्वागतेनाभिनंद्याङ्घ्रीन् समभ्यर्च्यावनिज्य मुदा ३९ तदंभसा महाभागा आ
त्मानं स्वगृहान्वयं स्नापयांचक्र उद्धेषाल्लघुः सर्वमनोरथः ४० फलार्हणोशीरशिवामृतांबुभि
१०० र्मृदा सुरभ्या तुलसीकुशांबुजैः आराधयामास यथोपपन्नया सपर्यया सत्वविवर्धनान्धसा ४१
सतर्कयामास कुतो मम न्वभूत् गृहान्धकूपे पतितस्य संगमः यः सर्वतीर्थास्पदपादरेणुभिः
श्लेष्मन चास्यात्म निकेत भूसुरे ४२ सूपविष्टान् कृतातिथ्यान् श्रुतदेव उपस्थितः सभार्यस्व
जनापत्य उवाचाङ्घ्र्यभिमर्शनः ४३ श्रुतदेव उवाच नाद्य नो दर्शनं प्राप्तः परं परम पूरुषः॥
यर्हीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्मसत्तया ४४ श्रीराम श्रीराम श्रीराम श्रीराम

येयद्वा आइति वितर्के नुइति विस्मये ४२ उपस्थितः समीप उपविष्टः भार्याभर्त्तयाः स्वजनाः अपत्यानि चैतैः स
हितः श्री श्लेष्मस्यां घ्रिमभिमृशंतिसं मर्दयंतीति तं यघ्र अभिमर्शनः ४३ यर्हीदं प्रविष्टस्त्वं देवदर्शनं प्राप्त इति स एव सन्मा
त्रोद्यघनीभूतस्त्वमित्यर्थः यद्वा अस्मानुद्य एव प्राप्त इति न किंतु तदेव प्राप्तः यर्हीदं विश्वं स्वशक्तिभिः सत्वादिभिः

राम
१००

या

मामास्सृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौ दृष्टान्ततयाह यथेति आत्ममायया स्वाविद्ययेत्यर्थः यद्वा आत्मनस्तव माययेति ४५ किंच
आवृतामिति नित्यश्रवणकीर्तनादिपराणाममलात्मनामपि हृदयेषु त्वं भासि मम नु लोचनगोचरस्त्वं अहो भाग्यमिति भावः ४६
ननु सर्वेषां हृदि स्थितः कथं केषांचिदेव हृदि भाति मेघैः सूर्यवत् जीवोपाधिभिरन्तरितत्वादिति यद्युच्यते तर्हि न कस्यापि भाया
दित्यत आह हृदिस्थोपीति कर्मभिर्विक्षिप्तं चेतो येषां तेषामात्मशक्तिभिरहंकारादिभिरग्राह्यः अव्यवहितोपि उपात्तगुणः प्रा
प्तश्रवणकीर्तनादिसंस्कार आत्मा अन्तःकरणं येषां तेषां मतिसमीपे अव्यवहितस्त्वमित्यर्थः ४७ एतदेव प्रपंचयन्नमस्यति

यथाशयानः पुरुषो मनसैवात्ममायया सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासते ४५ आवृतां गदंतो शश्वद्
चेतोवाभिवदंतो नृणां संवदतामंतर्हृदि भास्यमलात्मनां ४६ हृदिस्थोप्यतिदूरस्थः कर्मविक्षिप्तचेत
सां आत्मशक्तिभिरग्राह्योप्युपेतगुणात्मनां ४७ नमोस्त्वध्यात्मविदां परात्मने अनात्मने स्वात्मवि
भक्तमृत्यवे सकारणाकारणलिंगमीयुषे स्वमायया असंवृतरुद्धदृष्टये ४८ श्रीराम श्रीराम श्रीराम

नमोस्त्विति ते तुभ्यं नमोस्तु अध्यात्मविदां निरस्तदेहाद्यहंकाराणां परमात्मने परमात्मत्वेन प्रकाशमानाय मोक्षप्रदायेत्यर्थः
ना२ अनात्मने देहाद्यभिमानिने जीवाय परत्वेनाप्रकाशमानत्वात् स्वात्मनः स्वप्रकाशात् विभक्तः समर्पितो मृत्युः संसारो येन
नाएवं३ तस्मै कुत इत्यत आह सकारणां महदादिकार्यं कारणं प्रकृतिः तदुभयलिंगमुपाधिं नियम्यतया ईयुषे प्राप्तवते अतः उभयनियं
तुः स्वस्मात्सकाशात्तदुभयवश्याय जीवाय विभक्तो मृत्युर्येनेत्यर्थः नियंतृ नियम्यत्वे कारणं वदन्नाह हे स्वमायया असं
वृतेति अतः खलु ऐश्वर्येणानियंत्रे तुभ्यं नमः किंच रुद्धदृष्टये मायावित्वादेव अन्येषां रुद्धा आवृता दृष्टिर्येन तस्मै
यद्वा स्वमायया स्वस्यासंवृता अन्येषां च रुद्धा दृष्टिर्येन तस्मै इत्येकं पदं ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०ऊ० सएवंभूतः परमेश्वरस्त्वंनोस्मान् स्वभृत्याननुशाधिअनुशिक्षय ४९ ५० स्वस्मिन्नादरमत्यधिकंब्राह्मणेषुमंदमिवालक्ष्यलोकसंग्रह
परोभगवान्मत्तोपिब्राह्मणाःश्रेष्ठाइतिरंकंकुर्वन्निवतमनुशास्तिब्रह्मन्निति सप्तभिः मयाहूतेतिहिस्यन ५१ देवादिभ्योपिब्राह्मणाः श्रे
ष्ठाइत्याह देवाइति तेशनैः पुनंतिएतत्तुसद्यः किंच देवादीनितृतीपुनंतितदप्यर्हत्तमानामीक्षया ५२ ममकलापरिकल्पनमुपास्ति

सर्वेशाधिस्वभृत्यान्नः किंदेवकरवामते एतदंतोनृणांक्लेशोयद्भवानक्षिगोचरः ४९ श्रीशुकउवाच तदुक्तमित्यु
पाकर्ण्यभगवान्प्रणतार्तिहा गृहीत्वापाणिनापाणिंप्रहसंस्तमुवाचह ५० श्रीभगवानुवाच ब्रह्मंस्तेनुग्रहार्था
यसंप्राप्तान्विद्ध्यमून्मुनीन् संचरंतिमयालोकान्पुनंतःपादरेणुभिः ५१ देवाःक्षेत्राणितीर्थानिदर्शनस्पर्शा
नार्चनैः शनैःपुनंतिकालेनतदप्यर्हत्तमेक्षया ५२ ब्राह्मणोजन्मनाश्रेयान्सर्वेषांप्राणिनामिह तपसाविद्य
१०१ यातुष्ट्याकिमुमत्कलयायुतः ५३ नब्राह्मणान्मेदयितंरूपमेतच्चतुर्भुजं सर्ववेदमयोविप्रःसर्वदेवमयोह्य
हं दुःप्रज्ञाअविदित्वैवमवजानंत्यसूयवः गुरुंमांविप्रमात्मानमर्चादाविज्यदृष्टयः ५४ चराचरमिदंविश्वं
भावायेचास्यहेतवः मद्रूपाणीतिचेतस्याधत्तेविप्रोमदीक्षया ५६ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय एवं ब्रह्मन्
चेदर्चितोस्म्यद्धानान्यथाभूरिभूतिभिः ५७ श्रीशुकउवाच सइत्थंप्रभुणादिष्टःसहकृष्णान्द्विजोत्तमान् आ
राध्यैकात्मभावेनमैथिलश्चापसद्गतिं ५८ एवंस्वभक्तयोराजन्भगवान्भक्तभक्तिमान् उषित्वादिश्यसन्मा
र्गंपुनर्द्वारवतीमगात् ५९ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषडशीतितमोध्यायः श्रीराम श्रीराम

त्यायायुतः ५३ किंच ब्राह्मणाराधनंमेवममप्रेष्ठमित्याहनेति हेतुमाह सर्ववेदमयोविप्रोप्रमाणाधीनत्वात्प्रमेयस्य वेदमयोविप्रो राम
देवमयादस्माद्रूपाद्विष्ठइत्यर्थः ५४ असूयवादोषदृष्टयः इज्यदृष्टयः पूज्यबुद्धयः अस्यविश्वस्येहतेवाभावाः महदादयः १०१
मदीक्षयामभेवसर्वत्रेक्षया ५६ ५८ सन्मार्गंसत्तांवेदानांत्रिकारमादिश्य ५९ इतिदशमेषडशीतितमः ॥ राम राम

कांडविषयाणांप्रवृत्तिप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संकेतेना...
अभिहितार्थे

सप्ताशीतितमेनारायणनारदवादतः वेदस्तुतिर्निर्गुणालंबानिर्गुणावधिवर्ण्यते १ ॐ नमोभगवतेवासुदेवाय वागीशायस्यवदनेलक्ष्मी
र्यस्यचवक्षसि यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे संप्रदायविशुद्ध्यर्थंस्वीयंनिर्वंधयंत्रितः १ श्रुतिगीतिंमितांव्याख्यांकरिष्यामि
यथामति श्रीमद्भागवतेपूर्वैःसारतःसंनिवेशितं मयानुतदुपस्पृष्टमुच्छिष्टमुपचीयते पूर्वाध्यायांतएवंस्वभक्तयाराजन्भगवान्
भक्तभक्तिमान् उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगात् इत्यत्रसन्मार्गःसतांस्वतः प्रमाणभूतानांप्रामाण्यकारणरहिता
पर ३ नांवेदानांमार्गंब्रह्मत्वमुपदिश्यभगवानगादित्युक्तं तत्रवेदानांब्रह्मपरत्वमघटमानंमन्वानःपृच्छतिब्रह्मन्निति तत्रशब्दस्य
स्वलक्षणगुणभेदेनत्रिधाशब्दप्रवृत्तिः मुख्यापिरूढ्यायाभेदेनद्विधारूढिःस्वरूपाज्जात्यागुणेनवानिर्दिश्याद्वर्ण्यो
संज्ञा १ निसंज्ञिसंकेतेनप्रवर्ततेयथाडित्थः गौः शुक्लइतिलक्षणाचतेनवसंबंधिनि यथागंगायांघोषइति गौणीचाभिहि

परीक्षिदुवाच ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः कथंचरंतिश्रुतयःसाक्षात्सदसतःपरे १

तार्थलक्षितगुणयुक्तेतत्सदृशेयथासिंहोदेवदत्तइतियथाहुः अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते लक्ष्यमाणगुणैर्यो
गाद्वृत्तेरिष्टातुगौणतेतियोगवृत्तिस्तुएतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वायोगेन यथापंकजंऔपग
वः पाचकइत्यादि तत्रतावद्ब्रह्मणिरूढिवृत्तिर्नसंभवतीत्याह साक्षात्कथंचरंतीतितत्रहेतुः अनिर्देश्यइति अनिर्देश्यत्वेपि
हेतुंवदन्गुणवृत्तिंनिराकरोतिनिर्गुणेगुणवृत्तयइति गुणेवर्तमानाअपिनिर्गुणेकथंचरंतीत्यर्थः निर्गुणत्वेचहेतुंव
दन्लक्षणांयोगंचनिराकरोति सदसतःपरइति कार्यकारणाभ्यांपरस्मिन्नसंगेकेनचिदपिसंबंधाभावान्नलक्ष
णायोगवृत्तीसंभवतइत्यर्थः एवंपदार्थत्वायोगाद्वपदार्थस्यचवाक्यार्थत्वायोगान्नश्रुतिगोचरत्वंब्रह्मणइत्यभिप्रायः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰१०उ॰ उत्तरमाह बुद्धींद्रियेति बुद्ध्यादीनुपाधीन् जनानामनुशायिनां जीवानां मात्रार्थं प्रभुरीश्वरोऽसृजत् मीयंत इति मात्रा विषयाः तदर्थं भवार्थं भवो
जन्मलक्षणाकर्म तत्प्रवृत्तिकर्मकरणार्थमित्यर्थः आत्मने लोकांतरगामिने आत्मनस्तत्र लोकभोगायेत्यर्थः अकल्पनाय कल्पनानिवृत्तये मु
क्तय इत्यर्थः अर्थधर्मकाममोक्षार्थमिति क्रमेण पदचतुष्टयस्यार्थः जनानामिति बहुजीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति निर्दिश्य
ति प्रभुरीश्वरस्य तूपाधिवश्यताभावेन नित्यमुक्तत्वादर्शयति अयमभिप्रायः सगुणाभिर्वगुणैरनभिभूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्वनि
यंतारं सर्वोपास्यं सर्वकर्मफलप्रदातारं समस्तकल्याणगुणनिलयं सच्चिदानंदं भगवंतं श्रुतयः प्रतिपादयंति यः सर्वज्ञः सर्ववि
द्यस्य ज्ञानमयं तपः सर्वस्य वशी सर्वस्येशानः यः पृथिव्यां तिष्ठन् पृथिव्या अंतरः सोऽकामयत बहुस्यां स ऐक्षत तत्तेजोऽसृजत
सत्यं ज्ञानमनंतं ब्रह्मेत्याद्याः तथाभूतेश्वरत्वात् तावत्संसारिणो जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्यानि बोधयंति तत्र च तत्त्वंप
दयोः सामानाधिकरण्यं प्रतीयते तच्च प्रकारांतरेणाघटमानं ब्रह्मणि पर्यवसानं गमयति तथा हि न तावद्वैश्वदेव्यामिक्षेति

१०२ श्रीशुक उवाच बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च २ राम राम

वदुभयोरेकार्थाभिधानेन सामानाधिकरण्यं यथोक्तं आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः आमिक्षापदसान्निध्यात्तस्यैव विष
यार्पणमिति कुतः भिन्नार्थत्वात् न चाजहत्स्वार्थया निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलवत् यथोक्तं स्वबुद्ध्या
रज्यते येन विशेष्यं तद्धि विशेषणमित्यादि कुतः विरुद्धार्थत्वेन तदयोगात् न च जहत्स्वार्थत्वेन भिन्नार्थत्वात् न चाजहत्स्वार्थयो
निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलवत् यथोक्तं स्वबुद्ध्यारज्यते येन विशेष्यं तद्धि विशेषणमित्यादि कुतः विरुद्धा
र्थत्वेन संबंधलक्षणया कुसुमितद्रुमा गंगातीरवत् कुतः एकार्थस्य विवक्षितत्वात् अतो जहदजहत्स्वार्थलक्षणया सोयं देवद राम
त्त इतिवद्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थेन सामानाधिकरण्येन निर्गुणे पर्यवसानं अस्थूलादिवाक्यानां तु साक्षादुपा १०२
धिनिषेधेन तत्पदार्थशोधनेनोपयोगान्निर्गुण एव पर्यवसानं तथा चात्रैवोपक्रमे स्वसृष्टमिदमापीयेत्यादिना विशिष्टमौक्तं
त्वेन वक्ष्यति अंते च श्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधना इत्युपसंहरिष्यति उपासनादिवाक्यानां तु तन्मात्रार्थप्र
वृत्तत्वस्पष्टापाद्यत्वेन ज्ञानसाधनविधानेन तत्परत्वमित्येषा दिक् २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्र चानादिशिष्टपरंपरागतत्वान्नसंदेहो युक्त इत्याह सैषेति सैषेति सैषा यथोक्तालंबना ब्राह्मी ब्रह्मपरा श्रद्धया आदरेणैवेंगितज्ञ कोन भि
निवेशनया श्रवणादिना धारयेत् स अकिंचनः निरस्तदेहाद्युपाधिः सन् परंपदं प्राप्नुयादिति ३ एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपंच
यितुमितिहासमवतारयति अत्र ते इति नारायणान्वितां नारायणः प्रवक्तृत्वेनान्वितो यस्यां तां गाथामितिहासं ४-८ ब्रह्मसत्रमि
यथा ति पूज्यमानाएव समानाञ्च लिंगादि रूपेण यत्र कर्म कुर्वंति तत्कर्म सत्रं प्रसिद्धं तथा यत्र समाना एव वक्तारः श्रोतारः भावन ब्रह्म मी
मांसंते तद्ब्रह्मसत्रं ९ अहो तर्हि मया कथं तन्न ज्ञातमित्यत आह श्वेतद्वीपमिति तदीश्वरं तत्रस्थं मामेवानिरुद्धमूर्तिं १० ननु

सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता । श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ३ अत्र ते वर्णयिष्यामि गाथां नाराय
णान्वितां नारदस्य च संवादमृषेर्नारायणस्य च ४ एकदा नारदो लोकान् पर्यटन् भगवत्प्रियः सनातनमृषिं द्रष्टुं
२३ ययौ नारायणाश्रमं ५ यो वै भारतवर्षेस्मिन् क्षेमाय स्वस्तये नृणां धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ६ तत्रो
पविष्टमृषिभिः कलापग्रामवासिभिः परीतं प्रणतोपृच्छदिदमेव कुरूद्वह ७ तस्मै ह्यवोचद्भगवानृषीणां शृण्व
तामिदं यो ब्रह्मवादः पूर्वेषां जनलोकनिवासिनां ८ श्रीभगवानुवाच स्वायंभुव ब्रह्मसत्रं जनलोकेभवत्पुरा तत्रस्था
नां मानसानां मुनीनामूर्ध्वरेतसां ९ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते
तत्र हायमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि १० तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः अपि चक्रुः प्रवचनमे
के शुश्रूषवोपरे ११ सनंदन उवाच स्वसृष्टमिदमापीय शयानं सह शक्तिभिः तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं
१२ यथा शयानं संम्राजं वंदिनस्तत्पराक्रमैः प्रत्यूषेभ्येत्य सुश्लोकैर्बोधयंत्यनुजीविनः १३ श्रीराम श्रीराम

सर्वज्ञास्तु के स्तोत्रवक्ताः प्रष्टवान् तत्राह तुल्यश्रुतेति श्रुतादिभिरविशेषाः अरिमित्रोदासीनहीनत्वेन निरूपकरुणाः अतः सर्वे प्र
वचनयोग्याः अपि केनापि कौतुकेन केचन प्रवक्तारः केचन श्रोतारः अन्ये पप्रच्छुरित्यर्थः ११ स्वसृष्टमिति स्वयं निर्मितमिदं विश्वं प्रलयसमये आपी ८१
य स्व हृत्वा शयानं योगनिद्रां विवर्तमानं तदंते प्रलयांते तल्लिंगैः सूचितपादकैर्वाक्यैः परं ईश्वरं सृष्टिसमयप्रथमनिश्वासप्र
सूताः श्रुतयः प्रबोधयामासुः १२ सुश्लोकैः शोभनाः श्लोकाः कीर्तयो येषु तैः पराक्रमैः १३ राम राम राम राम ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुग

भा०३० जयजयेति भोऽअजित जय उत्कर्षमाविः आदेरवीशो कनव्यापारेण अगजगदोकसां अगानि स्थावराणि जगंति जंगमानि च ओकांसि
शरीराणि येषां जीवानां तेषां अजामविद्यां जहि नाशय। किमिति गुणावृतानहं तन्मोचयेत्यत्र आह दोषगृभीतगुणां दोषाय आनंदाद्यावरणाय
गृहीता गुणा यया तां। हृग्रहोर्भः छंदसीति भकारः इयं स्वैरिणीव मम परप्रतारणाय गुणानू गृह्णातीति अतोऽहं त्वं मनितर्हि मय्यपि दोष
मावहेदिति ममापि तत्र का शक्तिः स्यात् अत आह त्वमिति यत् यस्मात्वं आत्मना स्वरूपेणैव समवरुद्धसमस्तभगः संप्राप्तस
मस्तैश्वर्योऽसि वशीकृतमायत्वादिति भावः। ननु स्वयमेवं ते ज्ञानवैराग्यादिना किं न हन्युरित्यत्र आह अखिलशक्त्यवबोधके भा १
ति तेषां त्वमवांतर्यामी सर्वशक्त्युद्बोधकः अतो नतेज्ञा नाटोस्वतंत्रा इति भावः अहमकुंठज्ञानैश्वर्यादि गुणा जीवानां कर्म

श्रुतय ऊचुः जयजयजह्यजामजितदोषगृभीतगुणां त्वमसि यदात्मना समवरुद्धसमस्तभगः अजंगे
गदोकसामखिलशक्त्यवबोधक ते क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः १४ श्रीरामाय नमः

१०३

ज्ञानादिशक्त्यवबोधनेनाविद्यां हंतेत्यत्र किं प्रमाणमिति चेत् अहमेव प्रमाणमित्याह निगमः वेदः ननु एवंभूते
मयि कथं श्रुतीनां प्रवृत्तिस्तत्राह क्वचिदिति कदाचित्सृष्ट्यादिसमये अजया मायया चरतः क्रीडतः नित्यं चाखुत
भगतया सत्यज्ञानानंतानंदैकरसेनात्मना च चरतावत्ते मानस्य निगमानुचरेत् प्रतिपादयेत् कर्मणि षष्ठी यतो वा इ
मानि भूतानि जायंते यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं १०३
प्रपद्ये य आत्मनि तिष्ठन् सत्यं ज्ञानमनंतं ब्रह्म यः सर्वज्ञः सर्ववित् इत्याद्यागमको हैव स्वामेवंभूतं प्रतिपादयतीत्यर्थः जय
जयाजितजह्यगजंगमावृतिमजामुपनीतमृषागुणां न हि भवंतमृते प्रभवंत्यमी निगमगीतगुणार्णवतानव १४ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु कथं मामेव प्रतिपादयंति यतइंद्रोयातोऽवसितस्य राजेत्यादिभिरिंद्रः मित्रः यतोजंगमस्य अवसितस्य स्थावरस्य राजेति प्रतिपा
द्यते तथा अग्निर्मूर्द्धादिवइत्यादिभिश्चैवंभूतत्वेनाग्न्यादयः प्रतिपाद्यंते तत्राह बृहदुपलब्धमेतदिति अयमर्थः एतदुपलब्धं दृष्टं मित्रा
दिसर्वं बृहत ब्रह्मत्वमित्येवावयं प्रतिजानंति कथं बृहत्त्वं एवं विशेषतया अवशिष्यमाणात्वेनकुतः यतोबृहत्तः सर्वस्यादियात्तमयो उत्प
त्तिलयोः सर्वोपादानत्वात् तर्हि किं विकारित्वेंबृहतः अविकृतात्वात् विवृत्तो धिष्ठानत्वेनाविकारादित्यर्थः वाशब्द उपमार्थः य
थाघटादिविकृतेर्मृदिः उदयास्तमयोनहि वाचारंभणं विकारोनामधेयं मृत्तिकेत्येवसत्यं सर्वं खल्विदं ब्रह्मेत्यादिभिस्तथा

बृहदुपलब्धमेतदवैमि त्वविशेषतया यत उदयास्तमयो विकृतेर्मृदिवाऽविकृतात् अतस्त्वामेषयाद
धुस्तयिमनोवचनाचरितं कथमयथा भवंतिभुविदत्तपदानिनृणां १५ श्रीराम श्रीराम श्री

प्रतिदिनादित्यर्थः अतः कारणात् ऋषयोमंत्रास्तद्रष्टारोवावाल्येवमनोवचनाचरितं दधुः मनसः आचरितं तात्पर्यंव
चनाचरितमभिधानं च धृतवंतः नपृथगविकाराच्छित्यर्थः अथ निदर्शनं कथमयथयेति नृणां भूचराणां यत्र कु
त्रापि दत्तानि निक्षिप्तानि पदानि भुवि कथमयथा भवंति अदत्तानि भवंति अंततायथा मृत्पाषाणेष्टकादिषु दत्तानि
पदानि भुवं नव्यभिचरंति यथायत्किमपि विकारजातं वदंतो वेदास्त्वामेव सर्वकारणं परमार्थभूतं प्रतिपादयंतीत्यर्थः
दुहिणाविक्रिरवींद्रमुखामराजगादिदेनभवत्पृथगुस्थितं बहुमुखैरपि मंत्रगणैरजस्त्वमुरुमूर्त्तिरतो विनिगद्यसे १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० त्वमेव सर्वनिगमगोचर इति सतां प्रवृत्त्याद्दर्शयति इतितवेति त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा भोस्त्र्यधिपते त्रिगुणमयात्मशक्तिन श्री १
त्वैकसूरयो विवेकिनः सर्वाखिललोकमलक्षपणकथामृताब्धिं सकलजनदृष्टजिन निरसनहेतु फीन्निसुधासिंधुमवगाह्य नि
षेव्य तपंतीति तपांसि पापानि दुःखानि वा जहुः त्यक्तवन्तः त्वदीयकथामात्रेणायदा पापत्यागः तदा किं भुवक्तव्यं ये पुनः स्व
धामविधुताशयकालगुणाः अंतःकरणधर्मारागादयः कालगुणाजरादयश्च ये तत्तथा हि परमीतवाजस्त्रसुखा
स्वधाम्ना स्वरूपस्फुरणेन विधुताः त्यक्ताः आशयगुणाः ।

इति तव सूरयस्त्र्यधिपतेऽखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः । किमु
१०४ त पुनः स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवं ॥ १६ ॥ श्रीराम

नुभवं अखंडानंदानुभवं पदं स्वरूपं भजंति सेवंते तथाभूताः दुःखानि त्यजंतीति तद्यथा पुष्करपलाश आपो न श्लि राम
ष्यंते एवमेवंविदि त्वा पापं कर्म न श्लिष्यते न कर्मणा लिप्यते पापकेन तत्सुकृतदुःकृते विधुनुत एतदु ह वाव न तपति १०४
किमहं साधु नाकरवं किमहं पापमकरवमित्यादिश्रुतेरित्यर्थः सकलवेदगुणेरितसद्गुणस्त्वमिति सर्वमनीषिज
नारताः त्वयि सुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमाः ॥ १६ ॥ श्रीराम श्रीराम श्रीराम श्रीराम श्री

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection.

असुर्यानामतेलोकात्र्यंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंति येकेचात्महनोजनाः नथानचदेवदीनामहतीविनष्टिरित्याद्याः श्रुतयः पूर्वश्लोको
क्तोभयविधभजनहीनान्निंदंति दृतयइवेति असुभृतःप्राणराः यदिते ऽनुविधाः अनुविदधतीत्यनुविधाः अनुवर्तिनोभक्ताइतियावत् तर्हिश्वसं न२
तिजीवंतिसफलजीवनाभवंति इतरथादृतयइवभस्त्राइवपृथाश्वासाइत्यर्थः नन्वभक्तानामपिकामादिफलमस्त्येवाकार्योकारणा
नुग्राहकत्वेनजीवनंहेतोस्तवाभजनेकृतघ्नानांतदपिनसिध्यतीत्याशयेनाह महदहमादयइतिमहानहंकारश्च आदिर्येषांतेयद
नुग्रहतः यस्यानुप्रवेशनलब्धसामर्थ्याः संतः अंडंदेहंसमष्टिव्यष्टिरूपमसृजन् तत्रचपंचापिकोशानन्नमयादीनाविश्यतत्त
दाकारः सन्नयः चेतयतेसत्वंतदाहपुरुषविधइतिपुरुषस्यान्नमयादेर्विधेवविधाआकारोयस्यसतथा ननुविदेकरसस्यकथंतत्त
दाकारता अतआह अन्वयान्निति अन्वयत्नन्नमयादिष्वन्वेतीत्यन्वयः अतस्तत्तदाकारजेति एवंतर्हिसत्यत्वमसंगात्वंचकथंतत्राह

दृतयइवश्वसंत्यसुभृतोयदितेनुविधामहदहमादयोऽडमसृजन्यदनुग्रहतः पुरुषविधोन्वयोत्र
चरमोन्नमयादिषुयः सदसतः परंत्वमथयदेष्ववशेषमृतं १७

१९ चरमोन्नमयादिषुयइति अन्नमयादिषुमध्येनुपुयश्चरमोन्नमयादिब्रह्मपुच्छंप्रतिष्ठेतिपुच्छत्वेनोक्तः सत्वमितिसंबंधः ननुतथाप्य
न्नमयादिष्वन्नमयादिष्वन्वितत्वेऽसंगत्वंव्याहतमित्यतआह सदसतः परंत्वमथयदेष्ववशेषमृतमिति सदसतः स्थूलसूक्ष्मादन्नमया
श्रि२ देः परंव्यतिरिक्तंतत्सोभूत् अवशेषअवशिष्यतइत्यवशेषमवध्यर्थं अथअतएवंऋतंसत्यं नहिकिमर्थंतेष्वन्वयउक्तः शाखाच
द्रवत्तुद्रष्टुस्वरूपलक्षणार्थंतथाहि सवाएषपुरुषोन्नरसमयस्तस्यंदमेवशिरइत्यादिनास्थूलसूक्ष्मक्रमेणपंचकोशानुपादि श्रुति
च श्यतस्यपुरुषविधतामन्वयंपुरुषविधइतिपुनः पुनस्तदन्वितत्वेनालक्ष्यब्रह्मपुच्छंप्रतिसर्वसाक्षिशुद्धस्वरूपनिरूपण
मित्यनवद्यं नरवपुः प्रतिपद्ययदित्वयिश्रवणवर्णनसंस्मरणादिभिः नरहरेनभजंतिनृणामिदंदृतिवदुच्छ्वसितंविफ
लंततः १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० ३ एवं तावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सङ्गमनीयत्वमुक्तम् अभक्तनिंदया च तदेव दृढीकृतम् इदानीमनवगाह्य महिमानि प्रथमं तत्र
वदुपाध्यालंबनमुपासनमुदरं ब्रह्मेति शार्कराक्षा उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्माहिवतादिके हृत्वेवादं सर्पं तच्छिरो श्रयंतु त्याथा
श्रुत्यावित धत्तात्याह उदरमुपासत इति ऋषिवर्त्मसु ऋषीणां संप्रदाय मार्गेषु ये कूर्पदृशस्ते उदरालंबनं मणिपूरकस्थं ब्रह्मो
पासते ध्यायंति शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं कूर्पदृश इति कूर्पः शर्करा रजो विद्यते दृक्षु अक्षिषु येषां ते तथा रजः पि हि
तदृष्टयः स्थूलदृष्टय इति यावत् उदरस्य हृदयापेक्षया स्थूलत्वात् यद्वा कूर्पं सूक्ष्मं सूक्ष्मदृश इत्यर्थः तदा हृदयस्थं सूक्ष्मम
वालक्ष्यत्वे प्रवेशाय प्रथममुदरस्थमुपासत इति भावः आरुणयस्तु साक्षात् हृदयस्थं दहरं सूक्ष्ममेवोपासते हृदयविशे

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरं ततउदगादनंत त
१०५ वधाम शिरः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे १८ ५ राम राम राम राम राम

टी० १ षणं परिसरपद्धतिमिति परितः सरंति प्रसर्पंतीति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानमित्यर्थः विशेषणस्य राम
फलमाह तत इति ततो हृदयात् भो अनंत तव धाम उपलब्धिस्थानं सुषुम्नाख्यं परमं श्रेष्ठं ज्योतिर्मयं शिरः मूर्द्धानं प्रति
उदगात् उत्सर्प्पत् मूलाधारादारभ्य हृदयमध्यात् ब्रह्मरंध्रं प्रत्युद्गत इत्यर्थः कथंभूतं धाम यत्समेत्य प्राप्य पुनरिह कृ १०५
सूत्रमुक्ते १ तांतमुखे संसारे न पतंति तथा च श्रुतिः शतं चैका हृदयस्य नाड्यः तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नमृत
त्वमेति विष्वङ् अन्या उत्क्रमणे भवंतीति उदारादिषु यः पुंसां चिंतितो मुनिवर्त्मभिः हंति मृत्युभयं देवो हृद्गतं तमुपास्महे १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु ईश्वरस्यापि तर्हि जीववत् हृदुदरादिसंबंधे तदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमिति तामाशंकां परिहरन्त्यः ए
को देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत्याद्याः श्रुत
सु२ यः स्तुवंतीत्याह स्वकृतेन विचित्रयोनिष्विति स्वयंकृतासूच्चनीचमध्यमासु योनिषु अभिव्यक्तिस्थानेषु कार्येषु देहादिषु हेतुतया
उपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासंभवात् विशन्निव वर्त्तमानस्तारतम्यतो न्यूनाधिकभावेन च काशसि अवभास
से स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिः अनलवत् अग्निर्यथा स्वतस्तारतम्यहीनोपि काष्ठानुसारेण तथा त

त्र स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्यनलवत्स्वकृतानुकृतिः अथ वितथा
स्वमूष्ववितथं तव धाम समं विरजधियोन्वयंत्यभिविपण्यव एकरसं १९ श्रीराम श्रीराम

थाप्रकाशते तद्वत् अथ अतो वितथासु मिथ्याभूतास्वमूषु योनिषु अवितथं सत्यं यत् समम् अविशेषं अतः सत्यं तव धाम
स्वरूपं विरजधियो निर्मलमतयः अन्वयंति जानंति नु इति पृथक्पदं वा अत्र हेतुः अभिविपण्यव इति अभितो विगतव्य
वहारा इत्यस्य स्वरूपमनुरीतिः ऐहिकामुष्मिकफलकर्मरहिता इत्यर्थः अविशेषत्वादेव एकरसं सन्मात्रं अतस्तत्त्वोपाधिकृ
ततारतम्याभावात् प्रच्युतेः ऐश्वर्यस्योपास्यत्वमिति भावः स्वनिमित्तेषु कार्येषु तारतम्यविवर्जितं सर्वानुस्यूतसन्मात्रं
भगवंतं भजामहे १९

पणव्यवहार २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रियते २
नतु

भा०उ० अपि च कुतो न्नियमाशंकास्यात् भगवतो देहाद्युपाधिकृतदोषप्रसंगइति यतोऽविद्याकामकर्मभिः संसरतो जीवस्यापि भगवद्भाव
लक्षणाया बोधयंत्यस्तद्दोषं निषेधयंति सयश्चायंपुरुषे यश्चासावादित्ये स एकः तत्त्वमसीत्याद्याः श्रुतयः। ननु कथं स्वात्म
नः कृतिरियमीश्वरत्वेन तं तस्येश्वरत्वं बोध्यते नैतद्युज्यते यतस्तत्र यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्य
र्थाः प्रकाशंते महात्मन इत्याद्याः श्रुतयः। केनावतारस्य भगवतः श्रवण भजनमुपायं वदंतीत्याहुः स्वकृतपुरेष्विति स्व
कं२ धर्मोपार्जितेषु पुरेषु देहेषु अमीषु नरादिषु भोक्तृत्वेन वर्त्तमानं पुरुषं अखिलशक्तिधृतः सर्वशक्त्याश्रयस्य पूर्णस्य त
वांशकृतं वदंति अंशावइव अंशः। कृत इव कृतः त्वद्रूपं वदंतीत्यर्थः। ननु कार्यकारणसंहतस्य कुत एवंभूतत्वं तत्राह—

१०६ स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंशकृतं इति नृगतिं वि
विच्य कवयो निगमावपनं भवत उपासतेंघ्रिमभवं भुवि विश्वसिताः। २० ७ राम राम।।

त२ अबहिरंतरसंवरणमिति बहिः कार्यमंतरं कारणं वस्तोर्यत्तदावरणशून्यं तयोरसत्वादित्यर्थः। इति एवं नृगतिं नुर्जीवस्य गतिं त
त्त्वं विविच्य विशोध्य कवयः अन्यथेदं न प्राप्यत इति निर्ज्ञानंतः निगमावपनं निगमाः कर्मणा मावपनं आसमंतात् व्युप्यंतेऽ राम
स्मिन् इत्यावास्मिपनं क्षेत्रं सर्वकर्मार्पणविषयमित्यर्थः। यत्रार्पितानि कर्माणि मुक्तिफलं फलंति तं भवतोंघ्रिमभवं भव १०६
निवर्त्तकं विश्वसिताः कृतविश्वासाः उपासतेर्चनवंदनादिभिः सेवंते भुवीति मर्त्यलोके इदमेवोचितमिति दर्श
यति त्वदंशस्य मम ईशानत्वन्मायाकृतबंधनं त्वदंघ्रिसेवामादिश्य परानंदं निवर्त्तय २० ७ राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तिरन्यसाधनमितिवचनमनुचितमिवमन्वानो भक्तिगुरुत्वं करोति दुरवगमेति भोईश्वर दुर्बोधं यदात्मतत्त्वं तस्य निगमाय ज्ञापना
य तवात्ततनोराविः कृतमूर्तेः चरितमहामृताब्धिपरिवर्तपरिश्रमणाः चरितमेवमहानमृताब्धिस्तस्मिनु परिवर्तो विगाहस्ते
न परिश्रमणाः परिवर्जनेनार्थः श्रमणाः श्रमः गतश्रमा इत्यर्थः अपवर्गमपि न परिलषंति नेच्छंति कुतोन्यत् केचिदिति एवं
भूता भक्तिरसिका विरला इति दर्शयति न केवलमन्यन्नेच्छंति किंतु तेनैव सुखेन पूर्णाः संतः पूर्वसिद्धं गृहादिसुखमप्युप

दुरवगमात्मतत्त्वनिगमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः नपरिलषंति के
चिदपवर्गमपीश्वरतेचरणसरोजहंसकुलसंगविसृष्टगृहाः २१ रामराम राम रामश्री

क्षं तइत्याह तवचरणसरोजहंसकुलसंगविसृष्टगृहा इति तवचरणसरोजे हंसाः ईश्वरमंमाणो ये भक्तास्तेषां कुलं तेन संग
स्तेन विसृष्टा गृहा यैस्ते तथा अनेन श्रवणकीर्तनेन दर्शितं आत्मश्रमुक्तेरप्याधिक्यं भक्तेर्दर्शयति यथाह यं सर्वदेवानमं
ति मुमुक्षवो ब्रह्मवादिनश्च इति व्याख्यातं च सर्वज्ञैः भीष्मरुद्रैः मुक्ता अपि लीलया विग्रहं कृत्वा भजंते इति त्वत्कथामृ
तपाथोधौ विहरंतो महामुदः कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमं ८ २१ राम राम राम राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२
न ४ कर्मफले ५
शरीरं प्रसंसा

भा०३० अरामसस्य पश्यंतिनतंपश्यतिकश्चन नंतविशाययद्माजजानान्यधुष्माकमंतरंबभूवानीहारेणाप्रावृताजल्पाचसुतृपउक्थशासश्चरं
तीत्याद्याः श्रुतयः अनुक्रोशीत्येजगदात्मनोस्वेररतिमुपदिशंतीत्याह त्वदनुपथमिति त्वदनुवर्तित्वात्तत्त्वसेवापयिकमिदं कुला
यंकौलीयतइतिकुलायंशरीरं आत्मसुहृत्प्रियवत् आत्माचसुहृच्चप्रियश्चतद्वत् चरति स्वाधीनतयावर्त्तेनइत्यर्थः तथापि
त्वयिउन्मुखेहितेप्रियआत्मनिचअप्यर्थेचकारः एवंभूतेसु सेव्येपित्वयिबत अहोकष्टंन रमंतिसख्यादिना भजंति
आदिना २ सद्रुपासनयादेहाद्युपलालनेनआत्महनः कुतः यदनुशया यस्यामसदुपासनायां अनुशयावासनायेषांकुशरीरभृतः
संतः उरुभयसंसारे भ्रमंतिपरिवर्तंते अत आत्महनइतिभावः त्वयात्म निजगन्नाथमन्मनोरमत्तामिह कदामेमदृशोः

त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रियआत्मनिच। नबतरमंत्यहोअसदुपासन
यात्महनोयदनुशयाभ्रमंत्युरुभयेकुशरीरभृतः २२ निभृतमरुन्मनोक्षदृढयोगयुजोहृदियन्मुनयउपासतेत
१०७ दरयोपिययुः स्मरणात् स्त्रियउरगेंद्रभोगभुजदंडविषक्तधियोवयमपितेसमाःसमदृशोंघ्रिसरोजसुधाः
२३ १०

संयमि १ ता न्ममानुर्भंसंभविष्यति २२ इदानीमात्मावाअरेद्रष्टव्यः श्रोतव्योमंतव्योनिदिध्यासितव्यइत्याद्याः श्रुतयोध्यान
मंगलेनापदिशंतीत्याह निभृतमरुन्मनोक्षदृढयोगयुजइति मरुत्प्राणः मनश्च अक्षअक्षाणिइंद्रियाणिचनिभृतानियैस्तेच
तेदृढयोगंयुंजंतीतिदृढयोगयुंजस्तेतथाभूतामुनयोहृदियत्त्वमुपासततदेवारयोपित्वस्मरणात् ययुः प्रापुः स्त्रियो
पिकामतः उरगेंद्रभोगभुजदंडविषक्तधियः अहींद्रदेहसदृशयाभुजदंडयाविषक्ताधीयासांताः परिच्छिन्नदृष्टयः
समदृशः सममपरिच्छिन्नत्वांपश्यंत्योवयंश्रुत्यभिमानिन्योदेवता अपितेसमाएवरूपाविषक्तधियः अहींद्रदेहसदृशया
भुजदंडयाविषक्ताधीयासांताः परिच्छिन्नदृष्टयः समदृशः सममपरिच्छिन्नत्वांपश्यंत्योवयंश्रुत्यभिमानिन्योदेवता अपिते
समाएवरूपाविषयनया अंघ्रिसरोजसुधाः अंघ्रिसरोजसुधारयंत्यः अयंभावः इत्थंभक्तस्तवस्मरणानुभावः ययोगिनस्त्वां
हृद्यालंबनंउपासते याश्चवयंत्वांसमंपश्यामः याश्चस्त्रियः कामतः परिच्छिन्नंध्यायंती येचद्वेषिणः सर्वानपित्वांस्त्वामेव

१०७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जी न्या२ तृतीया

उ१ कूपग यतोवाचोनिवर्त्तंते अप्राप्यमनसासह। कोऽस्माद्वेद कइह प्रवोचत् कुत आयाता कुत इयं सृष्टिः अर्वाग्देवा अस्य विसर्जनेनाऽथाकोवे
द यत आवभूव अनेजदेकं मनसोजवीयो नैनद्देवा आप्नुवन् पूर्वमर्शत् तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति त्यादिः
श्रुतयः भगवन्नत्वद्दुर्ज्ञेयं वृत्त्यो भक्तिमेवारराकुर्वन्तीत्याह कइह नुवेदेति बत अहो भगवन् इह जगति अग्रसरं पूर्वसिद्धं त्वां
अवरजन्मलयः अर्वाचीनोत्पत्तिनाशवान् को नु पुमान् वेद जानाति ईश्वरस्य पूर्वसिद्धावन्यस्य चार्वाचीनत्वे प्रमाणं वदन्
ज्ञानकारणाभावमाह यत उदगादिति यतः त्वत्तः ऋषिर्ब्रह्मा उत्पन्नः यं ब्रह्माणमनु उभये आध्यात्मिकाधिदैविकादेवगणा
उत्पन्नाः ततोप्यर्वाचीनाः सर्वे यदा तु भवान् सर्वमपकृष्य उपसंहृत्य शयीत तर्हि तदा अनुशायिनां जीवानां ज्ञानसाधनं

मू। कइह नुवेद बतावरजन्मलयोऽग्रसरं यत उदगादृषिर्यमनु देवगणा उभये तर्हि न सन्न चासदुभयं न च
कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा २४ श्रीकृष्णायनमः श्रीराम श्रीरा०

नास्ति यतस्तदा न सत् स्थूलं आकाशादि न चाऽसत् सूक्ष्मं महदादि न च उभयं सदसदात्मारब्धं शरीरं न च कालज
वः तन्निमित्तभूतं कालवैषम्यं एवं सति तत्र तदा न किमपि इंद्रियप्राणाद्यपि न च ज्ञापकं शास्त्रमपि अयमभिप्रायः अर्वा
गी२ क् सृष्टिगतानां देहाद्युपाधिकृतांतरायाणां कालवशेन च मलिनसत्वानां न तावत् भगवज्ज्ञानसामर्थ्यं तथा च श्रुतिः
टीट नतं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूवेत्याद्याः यदा तु प्रलयसमये न वक्षोतरमस्ति तदापि साधनाभावान्न भग
१ वत् ज्ञानं अतस्त्वदेकशरणतया श्रवणकीर्त्तनादिका भक्तिरेव सुकरेति क्वाहं बुद्ध्यादिसंरुद्धः क्वच भूमन्महस्तावा
दीनबंधो दयासिंधो भक्तिमेन्द्र हरे दिश २४ ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰३

भा॰भा॰उ॰ इतोऽपि न ज्ञानैमुशकं तत्त्वपदिशतामपि पत्रमबाहुल्यादित्याह अजनिमसन्तोजगतोजनिमुत्पत्तिं येवैशेषिकादयोवदन्ति असत एव ब्रह्मत्वेनमा
त्मनित्यंच पातंजलोदय सत एवैकविंशतिप्रकारं स्यदुःखस्यनाशं मोक्षंवदंतियेनैयायिकाः तत्तु पियच्च सांख्यादय आत्मनि मिदं भे
दंयेच मीमांसकाः विपाकं कर्मफलव्यवहारमंतं सत्यंस्मरंति वदंतितेसर्वे आरोपितेः आरोपिते धर्मेरेवापदिशंति नतत्वदृष्ट्या सदेवा
सोम्यइदमग्रआसीत् ब्रह्मैवसन् ब्रह्माप्येति अनीशयाशोचतिमुह्यमानः अविद्यायामंतरेवर्त्तमानाः स्वयंधीराः पंडितंमन्यमा
भा॰ नाः जंघन्यमानाः अपियंतिमूढाः अंधेनैवनीयमानायथांधाः एकमेवाद्वितीयंब्रह्म एकएवहिभूतात्माभूतेभूतेव्यवस्थितः॥
एकधाबहुधाचैवदृश्यतइत्यादिश्रुतिविरोधात् किंच वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं संगच्छते नतुतदस्तीत्याह
त्रिगुण मयः पुमानितिभिदायद्बोधकृतावयीति त्रिगुणामयः पुमानित्यनेनहेतुनायाभिदा उपलक्षणमेतत् क्रिदो

१०८ जनिमसतः संतामृतिमुतात्मनियंच भिदांविपणामृतंस्मरंत्युपदिशंतितआरूपितैः त्रिगुणमयः
पुमानितिभिदायद्बोधकृतावयिनततः परत्रसंभवद्ववोधरसे २५ १२ राम राम राम॥

दि सायस्मात्त्वयि विषयअबोधकृतात्वद्विषयाज्ञानकिं जृंभिता तर्हि किमज्ञानमस्तिवस्तुतः पुंसि नैवेत्याह ततः अवो राम
धानुपरत्रपेरअसंगोऽवच्छोधरसेज्ञानघनेसः अवोधोन भवेत् नूनंसंभवतीत्यर्थः मिथ्यातर्कसुकर्कशेरितमहावादांधका १०८
रांतरभ्राम्यन्मंदमतेरगाधमहिमंस्त्वत्तूज्ञानवर्त्मास्फुटं श्रीमन्माधववामनत्रिनयनश्रीशंकरश्रीपतेगोविंदेतिमु
दावहन्मधुपतेमुक्ताः कदास्यामहे २५ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यद्यसन्नोत्पद्येत यदि च त्रिगुणामय्यः पुरुषान भवन्ति तर्हीदं प्रपंचजातं पुरुषश्च पृथग्भास्तीत्युक्तं स्यात् कथं तर्हि तयोः सत्वेनाप्रती
तिरत आह स दिव मन इति मनः मनोमात्रविलसितमिदं त्रिवृत् त्रिगुणात्मकं प्रपंचजातं असदेव सदिव विभाति कथमिति
चेत्तत्राह त्वयीति त्वय्यधिष्ठानेऽधिष्ठानसत्तया सद्रूपतया तदित्यर्थः नकेवलमिदं कारास्पदं किंतु आमनुजात् मनुजः
पुरुषः आ अभिविधावाकारः पुरुषमभिव्याप्येति पुरुषस्यापि पृथक् सत्वप्रतीतिर्मनोमात्रविलसितेत्यर्थः तथा च श्रुतिः मा॰ प्र॰
असतोऽधि मनोऽसृज्यत मनः प्रजापतिमसृजत् प्रजापतिः प्रजा असृजत् तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति

स दिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः नहि विकृतिं
त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं २६ १३ राम राम राम

नन्वात्मविदामपि विश्वं सदेव स्फुरति अतः कथमसत्यादत आह सदभिमृशंतीति आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकं
टी॰ २ विश्वमात्मतयैव सदभिमृशंति सदिति जानंति आत्मकार्यत्वान्न पृथगित्यर्थः तथा हि यदुपादानकं यत्कार्यं भवति तत्तेनैव रूपेण प्र
दीप्ते तीयते चेति लोकाचारेण दर्शयति नहि विकृतिमिति कनकस्य विकृतिं कुंडलादिकं नकाथिनो नहि त्यजंति अत्र हेतुः त
क दात्मतया कनकरूपत्वेनेत्यर्थः अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवावसितं निश्चितं यत्सत्वतः सदा
भाति जगदेतदसत्त्वतः सदाभाससमसत्यस्मिन् भगवंतं भजामहे २६ १३ श्रीराम श्रीराम श्रीराम श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० ननु सत्यं ज्ञानमनंतं ब्रह्म नेह नानास्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादि श्रुतिभिरेवं भूतस्य भगवतः प्रतिपादनात्
तत्तज्ज्ञानं सुकरमेव तत्किं भक्त्या अत आह तवपरिचर्यंतीति नेवतिकर्माणि षष्ठी वीर्यं परिचरंति छंदसि व्यवहिताश्चेति यच्छ
न१२ ब्देन्यैव व धानमहेदाषः केन रूपेण अखिलसत्वनिकेतनतया अखिलानि सत्वानि निकेतो यस्य सः तथा तस्य भावस्तत्तया यास
वेभूतावासतयेत्यर्थः उत एव अविगणय्य तिरस्कृत्य नत एव निक्रमंते मृत्योः शिरः मूर्ध्नि पदा पादेन आक्रमंति मृत्यो मूर्ध्नि प
दं दधतीति तरंति मुच्यंत इत्यर्थः ये पुनर्विमुखाः अभक्ताः तान् गिरा वाचा पशूनिव विबुधान्विदुषोपि परिवयसे बध्नासि कु
तः त्वयि कृतसौहृदे प्रमेये तत्र खलु निश्चितं पुनंति पवित्रयंति आत्मानं अन्यानपीति शेषः नेतरे तथा च श्रुतिः तस्य वाच्च

१०२५ तवपरिचर्यंत्यखिलसत्वनिकेततया त उत पदाक्रमंत्यविगणय्य शिरो निर्ऋतेः। परिवयसे पशूनिव
गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः। २७ १४ राम राम राम श्री

निर्नामानि हा मानि तदस्य देवाचा तत्त्वानामभिदामभिः सर्वं सितमिति अयमभिप्रायः सत्यमेवं भूतमात्मानं श्रुतयः प्रतिपा राम
दयंति तत्र च यद्यपि वस्केनोऽपरोक्षत्वादपरोक्षमेव ज्ञानमुत्पद्यते तथाप्यसंभावना विपरीत भावनातिरस्कृतत्वान्मलिन २ १०२५
चित्तेषु परोक्षमिव भवतीति नापरोक्षसंसारभ्रमनिवृत्तिसमर्थं भगवत्परिचर्ययातु सम्यग्मलचित्तानां तत्प्रसादेन ध्यापर
रोक्षज्ञानानामयत्नतएव करकलितामलकवदिति तथा च श्रुतयः देहांतदेवः परं ब्रह्म तारकं व्याचष्टे येमेवैष वृणुते तेन लभ्यः
यस्य देवे परा भक्तिरित्यादयः न पंगुतापि प्रपतंतु पर्वतादटंतु तीर्थानि पिबंतु चागमान् यजंतु योगैर्विवदंतु योगैर्हरिं विनानेव मृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साहतं

ननु यथा खिलसत्वनिकेतनत्वं भगवतः सेव्यत्वमुच्यते तर्हि तत्तत्कारणसंबंधात्तत्कर्तृत्वभोक्तृत्वे प्रसज्येयातां नवस्कानरत्तथात्वमितिचेन्नतर्हि ज्ञो
वानामपि तत्तुल्यमिति किंनु विशेषणं पुनः सेव्यमेव चकत्वमिति मामाशंकापरिहरंत्यः अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्य
कर्णः स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं पुराणमित्याद्याः श्रुतयः स्वावतीत्याहुः त्वमकरणइति करणसंबंधरहितोपि अखिलका
रकशक्तिधरः अखिलानां प्राणिनां यानि कारकाणि इंद्रियाणि तेषां शक्तिधरस्तान्प्रवर्त्तयतीति तथा कुतः स्वराट् यतः स्वेनैव राजसे दीप्यसे प्रवर्त्तयतीति ३
नहि स्वतः सिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः अतएव बलिमुद्वहंति पूजां कुर्वंति अजया अविद्यया सहितास्त्वयार्ध्यंताइत्यर्थः
अनिमिषा देवा इंद्रादयः तत्सृज्याविश्वसृजो ब्रह्मादयोपि यथा सन्ति कापि च किंकराः स्वामिनं सेवंते तथा विद्यायुक्ता देवा

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहंति समदंत्यजयाऽनिमिषाः। वर्षभुजोऽ
खिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः। २८ १५ राम राम

ह्यस्त्वामितिलोकोक्तिः समदंति च मनुष्यैर्दत्तं हव्यकव्यादिलक्षणं बलिं भक्षयंति अत्र दृष्टांतः वर्षभुजोऽखिलक्षितिपतेरि
वेति यथा वर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडलेश्वरस्य स्वप्रजादत्तं बलिं भुंजाना बलिमुद्वहंति तद्वदिति कि
च बलिं वहंतीत्याह विदधति यत्र ये त्वधिकृता भवतश्चकिता इति ब्रह्मा भीताः संतो यस्मिन्कर्मणि ये नियुक्तास्तेन तत्कुर्वंती
ति त्वदाज्ञापालनमेव बलिवहनमित्यर्थः तथा च श्रुतिः भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृ
त्युर्धावति पंचम इति अनिंद्रियोपि यो देवः सर्वकारकशक्तिधृक् सर्वज्ञः सर्वकर्त्ता च सर्वसेव्यं नमामि तं २८ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ उ॰ तदेवं कारणप्रवर्त्तकमीश्वरीकारणापरतंत्रानराभजंतीत्युक्ते नकेवलमियदेवकारणैर्ततत्त्वन्नेत्वनापितत्परतंत्रत्वादित्तिवदंत्ति यथाग्नेः
क्षुद्राविस्फुलिंगाव्युच्चरंति एवमेवास्मादात्मनः सर्वेप्राणाः सर्वेलोकाः सर्वेदेवाः सर्वाणिभूतानि सर्वएतआत्मनोव्युच्चरंतीत्यादिश्रुत
यइत्याह स्थिरचरजातयइति हेविमुक्त नित्यमुक्तपदित्तवअजयामायया विहरः विहारः क्रीडा भवतितदा स्थिरचरजातयः स्थिरा
श्चराश्चजातयः जात्यालिंगितादेहायेषांतेजीवाः स्युः भवेयुः कथंभूतस्यतत अजातः परस्यदूरवर्त्तमानस्यासंगस्येत्यर्थः कथंवि
हारः तदीक्षयाईक्षणलेशेन ननुमुपिलीनानांजीवानांकथंजन्मस्यात्तत्राह उत्थनिमित्तयुजइत्ति ईक्षयैवउत्थानित्त्थि
तानिआविर्भूतानिनिमित्तानिकर्माणितद्युक्तानि लिंगशरीराणिचतैर्युज्यंतइतितत्तथा ननुकिंनिमित्तोत्थाननमादिच्छेये

११० स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजाविहरउदीक्षयायदिपरस्यविमुक्ततत नहिपरस्यक
श्चिदपरोनपरश्चभवेद्वियदइवापदस्यतवशून्यतुलांदधतः २७ १६ राम राम राम राम

वभवतु ना त्वयिवैषम्याभावात्विषमसृष्टेश्चयोगादित्याह परमस्येत्तित्तवचंमस्यउत्तमस्यपरमकाशिणांकस्यविपत्तइव— राम
आकाशसदृशस्यसमस्येत्यर्थः कश्चिदपरः स्वीयः परोस्वीयश्चनभवेत् नसंभवतीत्यर्थः असद्वाइदमग्रआसीत्ततोवैस ११०
दजायतेत्यादिश्रुत्याशून्यपूर्वकत्वमिवप्रतीयते तदर्थंपुनर्विशिनष्टि शून्यतुलांदधतः शून्यस्यासाम्यंभजतः तदेवदर्शयितुं
पुनर्विशिनष्टि अपदस्येति नपद्यतइत्यपदस्तस्यवाङ्मनसयोरगोचरस्येत्यर्थः त्वदीक्षणवशक्षोभमायावोधितकर्मभिः
जातानुसंसरतः खिन्नान्नहेरपाहिनःपितः २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईश्वरस्य

एवंतावत्परमात्मनः सकाशादविद्याकृतकार्योपाधयस्तदंशा एव जीवा जाताः संसरंतो भंजतीत्युक्तं तत्र यद्यधिकाः विधातदा जीवस्याप्येकत्वादेकमुक्तौ
सर्वमुक्तिप्रसंगः अथ नाना विधास्तर्हि तेष्वेवांशांतराणां संसारानपगमादनिर्मोक्ष इत्यादि तर्केवत्वेन वक्तव्य एव नानात्मानः तत्र च तेषामणु
त्वे देहव्यापि चैतन्यं न स्यात् देहपरिमाणत्वे च मध्यमपरिमाणानां सावयवत्वेनानित्यत्वं स्यात् अतः सर्वगता नित्याश्चेति केचन मन्यंते तत्र
नतावदुक्तदोषप्रसंगः अविद्याभेदेन तद्भक्तिभेदेन वा बद्धमुक्तव्यवस्थासंभवात् ईश्वरस्य तु न केनाप्यंशेन संसारशंकेत्युक्तमेव प्रसि
द्धं चात्मैक्यं सर्वश्रुतिषु किं चैवं पक्षमंतर्यामिब्राह्मणमपि न सहत इत्याह अपरिमिता इति वक्तता एवानंता ध्रुवास्तेनैव रूपेण नि
त्याः सर्वगता अतनुभृतो जीवा यदि स्युः तर्हि तेषां समत्वात् शास्यता न घटत इति हेत्वाह ध्रुवनियमो नियमनं तत्त्वया न स्यादित्यर्थः तथा तु घ

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा अजनि च यन्म
यं तदविमुच्य नियंतृ भवेत्सममनुजानतां यदमतं मतदुष्टतया ३० १७ राम राम राम राम

७१ हेतु कथं यन्मयं तदुपाधितायहि कारणं प्रायं यज्जीवाख्यं अजनि जातं तत्तस्य स्वविकारस्य नियंतृ नियामकं भवेत् अविमुच्य कारणतया
अपरित्यज्य किं तत् सममनुस्यूतं ननु किं यत्तदच्छेदः जायेत तच्च दुच्यतां इदं तदिति अत आह अनुजानतां यदमतमिति जानीम इ
ति वदतां यदमतमविज्ञातप्रायं अविषयत्वात् तथा च श्रुतिः यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमवि म.१
जानतां अवचनेनैव प्रोवाच सह तूष्णीं बभूवेत्यादि किं च मतस्य ज्ञानस्य दुष्टतया दोषश्रवणात् तथा च श्रुतिः यदि मन्य
से सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य वेदेषु इत्यादि तस्माद्घटच्छेदाद्वधार्यमतं कर्यं किमपि सर्वानुस्यू
तत्वेन समं नियंतृ भवेदित्यर्थः अंतर्यंता सर्वलोकस्य गीतः श्रुत्या युक्त्या चैवमेवावसेयः यः सर्वज्ञः सर्वशक्तिर्नृसिंहः
श्रीमंतं तं चेतसैवावलंबे ३० १७ जोषीजे

पदस्यतं २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॰उ॰ ननु यदि परमात्मनो जीवा जायन्त इति नियन्तृनियम्यभावश्च स्यात् तथा सति जीवानामनित्यत्वप्रसंगेन प्रतिदिनं कृतनाशाकृताभ्याग-
मप्रसंगः स्यात् किं च तदा मोक्षिणामजीवस्य स्वरूपहानिरेव स्यात् नैतद्युक्तं स्वप्रकाशानन्दात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्य
मोक्षत्वाभ्युपगमादित्याशंक्यौपाधिजन्मनैव जन्म जीवानामुच्यते न स्वतो घटनादित्याह नघटत इति तत्र किं प्रकृतेः जीवरूपेण
भवः स्यात् पुरुषस्य वा उभयथा वाद्ये जीवानां जडत्वापत्तिः द्वितीये पुरुषस्य विकारित्वप्रसंगः अतएव न तत्तौ युज्येत इत्याशयेना
हैः प्रकृतिपुरुषयोरुभयोर्वा न घटत इति आत्मा जलप्रतिपादनादपीत्याह अजयोरिति तथा च श्रुतिः अजामेकां लोहितशुक्ल-
कृष्णां बह्वीः प्रजाः सृजमानां सरूपां अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति उभययुजादुभवेति उभ-

न घटत उद्भवः प्रकृतिपुरुषयोरजयोरुभययुजा भवन्त्यसुभृतो जलबुद्बुदवत् राम राम राम

॥३१॥

यं च तद्युज्यत इति शुक्रसम्बन्धं परस्पराध्यस्तमिति यावत् तेन असुभृतः प्राणाद्युपाधयो जीवा जायन्त इत्यर्थः जलबुद्बुदवदि-
नवा॰ ति यथा किं च केवलेन वा तेजसा जलेन वा बुद्बुदा न भवन्ति किन्तु मिलिताभ्यां तद्वत् तत्र च यथाऽनिलो निमित्तं जलमुपादानमेवमत्रापि प्र- राम
१२ कृतिर्निमित्तं पुरुष उपादानं तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोऽकामयत बहु स्यां प्रजायेयेति यथाग्नेः क्षुद्रा वि- १११
स्फुलिंगा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरन्ती-
त्यादिश्रुतिषु चेतनाचेतनप्रपंचस्य परमात्मोपादानत्वश्रवणात् न च विकारित्वं परिणामानंगीकारात् केचित्तु
नः परिणाममंगीकृत्यात्मनो विकारभिया विपरीतं निमित्तोपादानभावमिच्छन्ति सर्वथा तावत्प्रकृतिपुरुषयोरुद्भवन्ती-
ति सिद्धं

प्र१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवमेकमेवाद्वितीयंब्रह्मअजमेकंअविनाशीवाअरेयमात्मेत्यादिश्रुतिबलात् उत्पत्तिश्रवणाच्चजीवानामौपाधिकमेवजन्मन
वस्तुतइत्युक्तेउपाधिलयेनपरमात्मनिपुनर्लयश्रवणादपिनवास्तवंजन्मेत्याह त्वयितइति त्वयिकारणात्मनितइमेजीवाः
ततइति येतेनवास्तवंजन्मतस्माद्विविधानामगुणैरनेकप्रकारकार्योपाधिभिःसहलिल्युःलीनाबभूवुः तत्रसुषुप्तिप्रल
ययोर्मधुन्यशेषरसाइवलीयंते यथामधुनिसकलकुसुमरसाविशेषताअनुपलक्ष्यमाणाअपिसामान्येनोपलक्ष्यंते
एवंस्वापादौविशेषमात्रेत्रेयात् कारणस्यविद्यमानत्वात् सामान्यतावर्त्तंते मुक्तौतुकारणस्यापिलयात् त्वयिपरमेनिरुपा

त्वयितइमेततोविविधानामगुणैः परमसरितइवार्णवेमधुनिलिल्युरशेषरसाः ३१ १८

धौसरितइवार्णवेलीयंतइतिविवेकः तथाच श्रुतयः यथासोम्यमधुकृतोनिस्तिष्ठंतिनानात्ययानांवृक्षाणांरसंसम
वहारमेकतांगमयंति तेयथातत्रनविवेकंलभंतेअमुष्याहंवृक्षस्यरसोऽस्मीत्येवमेवखलुसौम्येमाःसंतिसंपद्यामहे
इतिनविदुःसतिसंपद्यामहइति यथानद्यःस्यंदमानाःसमुद्रेऽस्तंगच्छंति नामरूपेविहायतथाविद्वान्नामरूपाद्विमु
क्तःपरात्परंपुरुषमुपैतिदिव्यमित्याद्याः यस्मिन्नुद्यद्विलयमपिंद्धातिविश्वंलयादौजीवापन्नगुरुकरुणयाकेवलात्मा
वबोधे अत्यंतांतंव्रजतिसहसासिंधुवत्सिंधुमध्येमध्येचित्तेत्रिभुवनगुरुंभावयेत्तंनृसिंहे ३१ १८ ८९ ८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वपक्षे लोकान् परितः प्रपदिश्य   वाचंयमा मुक्तमायाः २ अभ्रमं कृत्वा

भा०३० एवं तावत परमेश्वरात् जीवा जायंते न तु क्लेशेन चक्रमोणि कुर्वंति पुन स्तत्र लीयंत इति संसारचक्रे भ्रमणमुक्तं इदानीं तन्निस्तरणे य परि
त्यलोकान् परीत्य भूतानि परीत्य सर्वाः प्रदिशादिशश्च उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेशेत्याद्या भगवद
नुवृत्तिं विदधतीत्याह नृषु तव तिनृषु जीवेषु अमीषु तव मायया भ्रमममुकलक्षणमवगत्य ज्ञात्वा सुधियः भृशं त्वयि अभ
वे भवनानिवर्त्तके भावं स्वभावमनुवृत्तिं दधति कुर्वंति अनुप्रभवं अन्वनुप्रभवाय स्मिनु तं भ्रमं तेतः किमत आह कथ
मिति अनुवर्त्तनां अनुवर्त्तमानानां त्वामेव शरणं भजतां भवभयं संसारभयं कथं भवतु न कथंचिदपीत्यर्थः कुतः

११२ नृषु तव मायया भ्रमममीष्ववगत्य भृशं त्वयि सुधियोऽभवे दधति भावमनुप्रभवं कथमनुवर्त्ततां भवभयं तव यद्भ्रुकुटिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भयं ३२ १९

कालस्य
यद्यस्मात्तव भ्रुकुटिः भ्रूभंगरूपस्त्रिणेमिस्त्रिनेमिर्नमयइवावच्छेदकः शीतोष्णवर्षकालायस्य संवत्सरात्मकस्य सः अभ
भवच्छरणेषु न भवच्छरणं रक्षितारं येषां तेष्वेव भयं जन्ममरणादिलक्षणं सृजति करोति अत एवं भूतं संसारमाकल ११२
य्य तन्निस्तरणे सुधियस्त्वयि भावं दधतीति संसारचक्रके विदीर्णनानाभवतापतप्तं कथंचिदापन्नमिह प्रपन्नं
त्वामुद्धरेः श्रीनृहरे नृलोकं ३१ १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतितोपि ८   सेतु योपि

११   गुरुगृहे

सच भगवति भावो मनो नियमे सति भवति सोपि गुरूपसदनादिति गुरूपसदने विदधाति तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्स
विजितहृषी मित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं आचार्यवान् पुरुषो वेद नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्याद्याः श्रुत
यं २ यइत्याह। विजिता निगृहीता हृषीकाणींद्रियाणि वायुश्च प्राणो यैः तैरपि अदान्तमनस्तुरगं अदान्तमेव मिति मन एव तुरगः तं इह
यं २ हे मत्वसो म्याततेयंतु नियंतुं यतंते अतिलोलमतिचंचलं गुरोश्चरणं समवहाय त्यक्त्वा अन्यैस्त्वुपायेषु खिद्यंते क्लि नेर
श्यंती त्युपायखिदः संतः व्यसनशतान्विताः बहुव्यसनाकुला इह संसार समुद्रे संति तिष्ठंति दुःखमेवाप्नुवंती

विजितहृषीकवायुभिरदांतमनस्तुरगं यइह यतंति यंतुमतिलोलमुपायखिदः। व्यस
नशतान्विताः समवहाय गुरोश्चरणं वणिजइवाज संत्यकृतकर्णधरा जलधौ ३३ ३०

त्वर्थः हे अज अकृतकर्णधराः अस्वीकृतनाविकाः वणिकाः वणिजो यथा नहन्तु उक्तं चान्यत्र देह माद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा प्राकृतैः संस्कृतैश्चैव गेधप
द्याक्षरैस्तथा देशभाषादिभिः शिष्यं बोधयेत्स गुरुः स्मृतः गुरुणापदर्शित भगवद्भजन सुखानुभूतो गुरुवचन एव
मनानिश्चलं भवति नान्यथेति भावः यदापरानंदगुरो भवत्पदे पदं मनो मे भगवंल्लभेत तदा निरस्ताखिलसाध
नश्रमः श्रयेय सौख्यं भवतः कृपातः ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन तथा यदा सर्वे प्रमुच्यन्ते कामा येस्य हृदि श्रिताः अथम
र्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इत्यादौ वैराग्यमंगं विदधतीत्याह स्वजन सुतेति आत्मा देहः धाम गृहं असुः प्राणाः स्वज
नादिभिः किं सर्वरसे सर्वरसाः सुखानि विधत्ते यस्मिन् त्वयि परमानंदे एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजी
गी वंतीति श्रुतेः आत्मनि सतीन्नृणां तुच्छै रतेः किं कदुपयोगः इति सत्यस्य परमार्थसुखमजा
नतो अत एव मिथुनतः स्त्रिया मिथुनी भूताय रतये मायासुखाय चरतां प्रवर्त्तमानानां कर्मणि षष्ठ्यो अज्ञान

११२ स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे इति
सदसज्जानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते स्वनिरस्तभगः ३४ २१

तश्च रतः पुरुषान् कान् अर्थः सुखयति आनंदयति न कोपीत्यर्थः इह संसारे कथंभूते स्वविहते स्वत एव नश्वरे स्व राम
निरस्तभगः स्वत एवगतसारे पाठांतरे को न्विह स्पे न हि शोषणाहयं अतस्त्वक्रजनमेवाचितमित्यर्थः भजतो हि ११३
भवान् साक्षात् परमानंदचिद्घनः आत्मैव किमतः कल्पतुच्छ दारसुतादिभिः ३४ २१ राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंगुरूपदेशेनतत्वमवगम्यसारासारविवेकेनचसर्वतोनिर्विधतेदेवमहत्संगेनापपत्तिभिः सम्यगवधारयितुंतीर्थसद्मानिमु
नयः पर्यटंतीतिमतव्युदस्यादिशन्नर्थमाह भुविपुरुपुण्यतीर्थसद्मनानीति तेउक्तलक्षणाऋषयोविमदानिरहंकाराः।।
यतोभवत्पदांबुजहृदियेषांते अतः स्वयमेवअघभिदंघ्रिजलंयेषांते उतअपितथाविधाअपिपुरूणिवहूनितीर्थानि नि२
सद्मानिक्षेत्राणितान्येवापासतेसर्वतो प्रायस्तेनैवमहत्संगोभवतीति अथवापुरुअधिकेभगवद्भक्तजनलक्षण
पुण्यंयेषांतानित्वितानितीर्थानिचगुरवः महांतइत्यर्थः तेषांसद्मानिआश्रमान् यथाहामरसिंहः निपानागम

भुविपुरुपुण्यतीर्थसदनान्यृषयोविमदास्तउतभवत्पदांबुजहृदोऽघभिदंघ्रिजलाः द
धतिसकृन्मनस्त्वयियआत्मनिनित्यसुखेनपुनरुपासतेपुरुषसारहरावसथान् ३५ २२

योः तीर्थमृषिजुष्टजलेगुराविति नपुनः पुरुषसारहारावसथानुपासते पुरुषाणांसारंविवेकस्थैर्यधैर्यक्ष
माशांति प्रमुखंहरंतीतितथातेचतेआवसथागृहाः तान् नचतेषांगृहादिभवकुत्सितसुखापेक्षेत्याह दधति
सकृन्मनस्त्वयियआत्मनिनित्यसुखइतिसकृदपित्वयिमनोदधतितेपिगृहाद्यासक्तानभवंति किंपुनरेवंभूताइ ये२
त्यर्थः मुंचन्नंगतदंगसंगमनिशंत्वामेवसंचिंतयन् संतः संतियत्रायतागतमदास्तानाश्रमानावसन् नित्यं
तन्मुखपंकजाहृतगलितत्वत्पुण्यगाथामृतस्रोतः संप्लवसंप्लुतानरहरेनस्यामहंदेहभृत् ३५ २२ श्रीराम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्र

भा॰उ॰ नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तदुक्तानां क्रियार्थेन समन्वय इति तन्त्रजैमिनिनावेदस्य क्रियापरत्वाभिधानादुपनि
षदामपि तदेव युक्तं यथोक्तं तन्त्रवार्त्तिके ऽदृष्टाएतेन क्रत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकांक्ष्यं व्याख्यातमिति ना। एकमे
वाद्वितीयं ब्रह्म विज्ञानमानंदं ब्रह्म श्रोत्रस्य श्रोत्रमित्येवं तद्विपरीतात्मप्रतिपादनात् नह्यद्वितीयपरमानंदरूपस्य कर्मा
गत्वं युज्यते अननुमतं चैतद्वार्त्तिककृतः कथं सर्वत्रैव हि विज्ञानसंस्कारत्वेन गम्यते प्रागेवात्मविज्ञानादन्यत्रेत्यवधा
र्यतामितिर्तितैनेवोक्तत्वात् तदर्थमेव मननाय मुनयः पर्यटनोत्युक्तेः तत्र नावगतिहेतुरस्य सत्यत्वं भवेदप्येवं तदेव नन्वसंभवती
तिप्रश्नान्तराभ्यां मननेन नत्वावधारणप्रकारमाह सत्त्वादिदमुत्थितेः स्यादिति इदं विश्वं धर्मि सदिति साध्यो धर्मः सदु
त्पन्नत्वात् हेतुः यद्यदुत्पन्नं तत्तदात्मकमेव दृष्टं यथा कनकादुत्पन्नं कुंडलादि तदात्मकं तद्वदिति तत्र यदि सदभेदः

११४ सत्त्वादिदमुत्थितेः स्यादिति चेन्न नु तर्केऽहंत्वं व्यभिचरति क्वचित् क्वचन मृषा न तथोभयं युक्तम् राम राम

साध्यते तदा अपादानत्वनिर्देशेन व भेद प्रतीतेर्विरुद्धो हेतुरित्याह ननु तर्केहत्तमितिन नुनाभेदं साधयामः किंतु तदु
त्पन्नत्वनकुंडलादिवद्भेदं प्रतिषेधयामः तत्र अभेदावस्था दितिचेदित्याशंक्यानैकांतिकत्वेन दूषयति व्यभिचरति
क्वचेति पितृपुत्रादिषु मुद्गरघटध्वंसादिषु च तथादर्शनादिति भावः ननु तदुत्पन्नत्वं नाम तदुपादानत्वं न तु तन्निमित्त
त्वं अतो नानैकांतिकत्वमित्याशंक्य दूषयति क्वचन मृषेति गुणोपादानस्यापि फणिनो न गुणत्वं किंतु मिथ्यात्वं अन्यथा कुं ११४
डलादिवद्वाधप्रसंगात् अतः पुनरप्यनैकांतिकत्वमेव तिभावः ननु तत्र न केवलं गुणमात्रं फणिन उपादानं किंतु
अविद्यायुक्तं तथाभूतस्यावस्तुत्वात् युक्तं फणिनो मिथ्यात्वमित्याशंक्य तत्तुल्यमत्रापीति दूषयति न तथोभययुगिति
प्र२ अयमर्थः अत्राप्यविद्यायुक्तस्यैव सत उपादानत्वं एवंभूतस्य च न वस्तुसत्यत्वं अतः सदुपादानत्वमसिद्धमिति न वस्तु

ननु माभूदेतेन हेतुनाप्रपंचस्य सत्त्वं हेत्वन्तरेणानुमास्यामः तथाहि सदिदं अर्थक्रियाकारित्वात् नयदेवं तदेवं यथा शुक्तिरजतमिति
तत्राह व्यवहृतये विकल्पइतितइति व्यवहाराय अर्थक्रियार्थं विकल्पो भ्रमः दूषितः दृष्टान्तो कूटकार्षापणादिनापि क्रयविक्रयव
हारदर्शनात् ननु कथं तत्सतोऽन्यत्रारोपो भ्रमः प्रसिद्धः अत्यंतासत्त्वे कथं प्रपंचभ्रमः स्यात्सत्त्वे वानाहेतुसिद्धिः उन्नैच भेदः
अध्यस्येतरत्वपुष्पत्वमसत्कथमवरूकोनि प्रज्ञानंतगुणासत्ताकमध्यारोप्यत वानवेतिनित्याह अंधपरंपरयायेया विकल्पइत्यन्वयः अंधपरंपरेति
अयंभावः संस्कारजन्यो भ्रमः संस्कारसिद्धये पूर्वं प्रतीतिमात्रमपेक्षते न वस्तुसत्त्वं प्रतीतेसत्यावस्तुसत्यत्वाभावेन भ्रमव्य
तिरेकादर्शनात् अतीतानादित्वात्पूर्वपूर्वभ्रमदृष्टस्यात्तरोत्तर आरोपो भविष्यति अंधपरंपरान्यायेन तेन व्यवहारः सत्यप्रतीत्य
प्रयोजकोहेतुरिति ननु क्षय्यमहंवैचातुर्मास्ययाजिनः सुकृतं भवति अपामसोममममृता अभूमेत्यादिभिः कर्मफलस्य

व्यवहृतये विकल्पइषितोऽधपरंपरया भ्रमयति भारतीत्वं त्वदृत्तिभिरुरुकुथजडान् ३६ श्रीराम श्री

नित्यत्वप्रतिपादनादसत्त्वेन घटते नहि नित्यवस्तु असद्भवति अस्माद्दृढप्रतिपादितत्वात् हेतुं संदेहेत्याशंक्याह भ्रमयतीतिहे
भगवन् तेन व भारती वेदलक्षणा उरुरुत्तिभिः वक्रोभिर्गौणलक्षणादिरुत्तिभिः उरुकथजडान् कर्मश्रद्धाभरात्कान्तमंदम
तीन् भ्रमयति अयंभावः नहिवेदः कर्मफलस्य नित्यत्वमभिप्रैति किंतु चिरकालक्षणयात्राशस्य मात्रं विधेयकर्माकर्मत्वात् ।।
अन्यथावाक्यभेदप्रसंगात् तद्यथेहकर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इतिन्यायोपवृंहितः
आत्यंतरविरोधाच्च अतः कर्मजडानामिदं भ्रममात्रमिति एतेनैव तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादीनामप्य
नन्यपरत्वं दर्शितं भवति उक्तं भवतः सतोपि भुवनं संनैव सर्पस्रजः कुधेन कार्यमपीहकूट केनकेवलोपिनैवं परः —
अहे तेनैवसत्त्वरं तु परमानंदे पदेत मुदावदं सुंदरमिदिरानुनहरे मां मुंच मामानतं ३६ २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवंप्रपंचस्यसत्वसाधकंनास्तीत्युक्तं इदानीं असत्वस्य सृष्टिप्रलयश्रुतेर्यायतोवाइमानिभूतानिजायंतइत्याद्यास्तन्मूलत्वानुमानंप्रमा
णमित्याह नयदिदमिति यत् यस्मात् इदंविश्वं अग्रेसृष्टेः पूर्वं नआस आसीत् सदेवसोम्येदमग्रआसीत् आत्मावाइदमेकएवा
ग्रआसीदित्यादिश्रुतेः नचनिधनात् प्रलयात् अनु अनंतरं भविष्यत् भविष्यति नासदासीत् नोसदासीत्तदानीमित्यादि
२४ श्रुतेः अतः कारणात् अंतरा मध्ये पिएकैसंकेवलंत्वयि मृषामिथ्यारूपमेवविभातीतिमितंनिश्चितं यतएवं अतः श्रुत्याइ
विणाजातिविकल्पपथैः द्रविणजातीनांद्रव्यमात्राणां मृत्लोहकार्ष्णायसरूपाणां विकल्पाभेदाघटकुंडलादयः तेषांपंथा
नोमार्गाः प्रकाराः तैरुपमीयतेसदृशतयानिरूप्यते यथातत्रकार्यंकारणनामधेयमात्रतांकारणंमृदादिवत् सत्वं त
थात्राप्याकाशादीनांनाममात्रत्वाद्ब्रह्मैवसत्वंतथाचश्रुतिः वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं यथासो

१३५ नयदिदमग्रआसनभविष्यदतोनिधनादनुमितमंतरात्वयिविभातिमृषैकरसे अतउपमीयतेद्रवि
णजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः ३७ ३४ श्रीराम श्रीराम ॥

म्येकेनमृत्पिंडेनविज्ञातेनसर्वंमृन्मयंविज्ञातंभवतियथाएकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्यात् यथाएकेन राम
नखनिकृंतनेनसर्वंकार्ष्णायसमित्यादि तस्मादस्यसत्वप्रमाणाभावात् असत्वप्रमाणस्यविद्यमानत्वात् वितथमनो ११५
विलासंऋतंसत्यमितियेअवयंतिजानंतितेअबुधाः अज्ञाइत्यर्थः अत्रैवंप्रयोगः विवादाध्यासितं नसत् आद्यंतयो
रविद्यमानत्वात् विकारित्वात् दृश्यत्वाद्वा शुक्तिरजतादिवत् इत्यन्वये आत्मवच्चेतिव्यतिरेकेदृष्टांतः मुकुटकुंडला
कंकणकिंकिणीपरिणतंकनकंपरमार्थतः महदहंकृतिखप्रमुखंतथानरहरेर्नपरंपरमार्थतः ३७ ३४

६१३

ननु यदि प्रपंचो नाम नास्त्येव न चासतानेन चैतन्यस्य संबंधगंधोपि तर्हि किमपराद्धं जीवेन यतः अयं संसरति किं वा वहु पुण्यमीश्व
रस्य यतो नित्यमुक्तः किं विषयं च तदा कर्मकांडमित्यपेक्षायां जीवेश्वरविशेषं द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजा
ते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति अजामेकां लोहितशुक्लकृष्णामित्याद्याथर्वणदर्शितेत्याह सयदजये
ति स तु जीवः यद्यस्मादजया मायया अजामविद्यां अनुशयीत आलिंगेत्ततः गुणांश्च देहेंद्रियादीन् सेवमान आत्मत
तो २ याऽध्यस्य नु तदनु तदनंतरं सरूपतां तद्धर्मयोगं च जुषन् अपेतभगः पिहितानंदादिगुणः सन् मृत्युं संसारं भजति प्रा
प्नोति तद्विषयमेव च कर्मकांडमिति भावः त्वमुत त्वं तु जहासि तामजां मायां ननु सामर्थ्ये वा तत्किं कथं त्यागस्तत्रा
ह अहिरिव त्वचमिति अयं भावः यथा भुजंगः स्वगतमपि कंचुकं गुणावुद्ध्या नाभिमन्यते तथा त्वमजां न हि निरंतरा

स यदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः त्वमुत जहासि ता
महिरिव त्वचमात्तभगो महसि महीयसेऽष्टगुणितेऽपरिमेयभगः ३८ २५ राम राम राम ॥

ल्हादिसंवित्कामधेनुरुंदपते रजयाकृष्टामितितामुपेक्षस इति कुत एतत्तदाह आत्तभगः नित्यप्राप्तैश्वर्यः महसि परमै
श्वर्ये अष्टगुणिते अणिमाद्यष्टविभूतिमति महीयसे पूज्यसे विराजसे कथंभूतः अपरिमेयभगः अपरिमितैश्वर्यः
पं २ नेदृशामिव देशकालादिपरिच्छिन्नत्वाष्टगुणिते मैश्वर्ये अपि तु परिपूर्णस्य स्वरूपानुवधित्वादपरिमितमित्य
र्थः नृत्यतीति व वीक्षणां गणगता कालस्वभावादिभिर्भावान् सत्वरजस्तमोगुणमयानुन्मीलयंतीव हन्तु मा
माक्रम्य पदा शिरस्यतिभरं संमर्दयत्यातुरं मायां तच्छरणं गतोऽस्मि नृहरे त्वामेव तां वारय ३८ २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ एवंतावदुक्तसाधनकर्तृत्वेनैव भगवंतं भजंतीति मृत्युंतरंतीइतरे संसरंतीत्युक्तं इदानींयेवहिः संगापरित्यज्य भगवन्मार्गंप्रपन्ना
अपिकथंचिदंतर्विनाशिनः कामान्नमुंचंतीति न भगवंतंप्राप्नुवंति नचेह सुखंलभंते केवलं कुयोनीरेवप्राप्नुवंतीतितान् शोच
१२ न्कामान्यः कामयते मन्यमानः सकामभिर्जायते तत्रतत्रेत्यादिश्रुत्यर्थमाह। यदनुसमुद्धरंतीति हे भगवन् यतयः हृदि
स्थिताः कामजटाः कामस्यजटाः मूलानिवासनाः यदनुसमुद्धरंति नोत्पाटयंति तेषामसतां भवान् हृदिगतोपिदुरधि
६।१ गमः प्राप्यः कथं अस्मृतकंठमणिर्विस्मृतकंठमणिस्तत्तुल्यः सयथाकंठे वर्त्तमानोप्यस्मृतः अप्राप्तइव भवति तद्वद्धृदि
स्थितेन केवलमेतावत् किंतु असुतृपयोगिनामिंद्रियतर्प्पणपराणां योगच्छद्मनामुभयतोप्यसुखंइहामुत्रचदुःख

यदनुसमुद्धरंतियतयोहृदि कामजटादुरधिगमोऽसतांहृदिगतोऽस्मृतकंठमणिः असु
२६ तृपयोगिनामुभयतोप्यसुखं भगवन्ननपगतांतकादनधिरूढपदाद्भवतः ३९ २६

मेवत्याह अनपगतांतकात् अनिरस्तान्मृत्योः लोकाराधनधनार्ज्जनादिक्लेशात् भोगेवैभवप्राकट्यभयाच्चेहता राम
वत् दुःखं भवतईश्वरादपिदुःखं कथंभूतात् अनधिरूढपदात् अनधिरूढंपदंस्वरूपंयस्यतस्मात् त्वत्स्वरूप ११६
प्राप्त्यभावाद्विद्यावद्विषयत्वेनप्राप्तनिजधर्मातिक्रमनिबंधनंत्वद्दंडरूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः दं
भन्यासमिषेणवंचितजनंभोगिकचिंतातुरंसम्मुखंतमहर्निशंविरचितोद्योगच्छेमेकाकुलं आज्ञोल्लंघिनमज्ञ
मज्ञजनतासन्माननासन्मदं दीनानाथदयानिधानपरमानंदप्रभोपाहिमां ३९ ३६ राम राम राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु यतेर्न किमपि कृत्यमस्ति प्रारब्धमेव सुखोपभोगेनापक्षिप्यते अतः किमिति र २३ थाशप्यते उभयतोप्यसुखमिति श्रूयते
चरणेषु नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयान् इत्यादि तत्राह त्वदवगमेति हे सगुण षड्गुणैश्वर्ययुक्त त्वदव
गमात् तत्त्वज्ञानवान् भवदुत्थशुभाशुभयोः भवतः कर्मफलदातुरीश्वराद्धेतोः उत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीन
पुण्यापुण्यकर्मणोः फलभूतान् गुणान् विगुणान्वयान् सुखदुःखसंबंधान् न वेत्ति नानुसंधत्ते न हि तदानीं च देहभृतां दे
हाभिमानिनां प्रवृत्तिनिवृत्तिकरी गिरः विधिनिषेधलक्षणा न वेत्ति विगतदेहाभिमानतया कार्यबोधाभावान्न नियुज्यते

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः । अनु
युगमन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ ४० ॥ २८

म

इत्यर्थः । युक्तं चैतत् यतः कारणान्मनुजैः अन्वहं श्रवणभृतः अनुदिनं श्रवणेन चेतसि धृतः त्वं तेषामपवर्गगतिः अप
वर्गरूपा गतिर्भवसि कथं श्रवणभृतः अनुयुगं प्रतियुगं या गीतपरंपरा उपदेशसंततिः तया सत्संप्रदायानुसारेणेत्यर्थः
एतदुक्तं भवति ये तावत्तत्त्वज्ञानिनः नैतेषां कर्माधिकारशंकापि ये चानवरतं त्वत्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभ
वत्पदानां न विधिनिषेधबोधः इतरेषां तु योगच्छन्ति यत्नेन्द्रियत्वाखनलालसानामुभयतोप्यसुखमिति अवग
मं तच्च मे दिश माधव स्फुरति यन्न सुखासुखसंगमः श्रवणवर्णनभावमथापि वा न हि भवामि यथाविधिकिंकरः ॥ ४० ॥ २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ त्वदवगमीनेवनिसुखदुःखेन च विधिनिषेधाविलुप्तो यत्तु न तु कथमवगंतुं शक्यं दुरवगमत्वस्योक्तत्वादित्येवमाशंक्य सत्यमेवमव[illegible]स्य महिम्नो ग्र१
वाङ्मनसोगोचरत्वादविषयत्वेनैवज्ञानमितिदर्शयन् यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्चे
त्यादिश्रुतिप्रतिपादितापरिमितमहिमानमाह द्युपतय एवेति भगवन्नुत्ते अत द्युपतयः स्वर्गादिलोकपतयो ब्रह्मादयोपि न ययुः न प्रापुः
तत्कुतः यदंतवत्वस्मात्किमपि त्वं न भवसि अत्रास्तां द्युपतयो न ययुरिति यतु यस्मात्त्वमपि आत्मनोंतं न यासि कुतस्तर्हि सर्वज्ञता सर्वेश
क्तिता वा अत आह अनंततया अंताभावेन नहि शशविषाणज्ञानं सर्वज्ञत्वदप्राप्तिर्वा शक्तिं वा भवं विहंति अनंतत्वमेवाह यदंतरे
ति यस्य तव अंतरा मध्येन न तु अहो सावरणाः उत्तरोत्तरं दशगुणसप्तावरणयुक्ता अंडनिश्चया ब्रह्मांडसमूहाः वांति परिभ्रमंति वयसा
कालचक्रेण खरजांसीवा सहरुपकेदेवनतु पर्यायेणाहि यस्मादेव अतः अनंततयास्त्वयि फलंतीति तात्पर्यवस्यतितनंतु साक्षाहृदंतिश्र

१४१ द्युपतय एवेनेन ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः खमिव रजांसि वांति वयसा सह
यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः ४१ २८ राम राम राम राम राम राम

प्रमेतावानिति सगुणस्य गुणानंत्यात् निर्गुणस्य चागोचरत्वात् कथं तर्हि पदार्थे तात्पर्यमिति तत्र विधिमुखवाक्यं भवेदयं नियमः परा राम
र्थस्य वाक्यार्थत्वमिति निषेधमुखेन तु नायं नियम इत्याह अतन्निरसनेनेति अन्यदेव तद्विदितादथो अविदितात् अन्यत्र धर्मादन्य
स्तना२ त्राधर्मादन्यत्रास्मात्कृताकृतात् अस्थूलमनणु इत्यादिप्रकारेण लक्षणया च तत्त्वमसीत्यादयः पर्यवस्यंति न च वाच्यं निषेधः शून्य ११७
मेव ज्ञाप्यत इति यतो भवन्निधनाः भवति त्वयि निधनं समाप्तिर्यासां तास्तथा न हि निरवधि निषेधः संभवति अतोऽवधिभूते
त्वयि फलंतीत्यर्थः द्युपतयो विदुरंतमनंत नंत न च भवान्न गिरः श्रुतिमौलयः त्वयि फलंति कुतो नम इत्यतो जयजयेति भज तवतत्पदे ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ इत्यशेषसमाम्नायपुराणोपनिषद्रसइति सर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः ४३ ब्रह्मदायादेतिब्रह्मेवदायादेतिब्रह्मेवदायमिव अपयत्नप्राप्यत्रतिसंवनइतिवाथा ब्रह्मपुत्रेतिवा ४४ पूर्णः केवलत्वः श्रुतधरः श्रुतमर्थंमनसिधारयन् वीरव्रतः नैष्ठिकः

श्रीभगवानुवाच इत्येतद्ब्रह्मणः पुत्रा आश्राव्यात्मानुशासनं सनंदनमथानर्चुः सिद्धाज्ञात्वात्मनोगतिं ४१
इत्यशेषसम्नामायपुराणोपनिषद्रसः समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ४३ त्वंचैतद्ब्रह्मदाया
दश्रद्धयात्मानुशासनं धारयंश्चरगांकामंकामानांभर्ज्जनंनृणां ४४ श्रीशुकउवाच एवंसऋषिणा
दिष्टंगृहीत्वाश्रद्धयात्मवान् पूर्णःश्रुतधरोराजन्नाहवीरव्रतोमुनिः ४५ नारदउवाच नमस्तस्मै
भगवतेकृष्णायामलकीर्तये योधत्तेसर्वभूतानामभवायोशतीःकलाः ४६ इत्याद्यमृषिमानम्यतच्छि
ष्यांश्चमहात्मनः ततोगादाश्रमंसाक्षात्पितुर्द्वैपायनस्यमे ४७ सभाजितोभगवताकृतासनपरिग्रहः
तस्मैतद्वर्णयामासनारायणमुखाच्छ्रुतं ४८ इत्येतद्वर्णितंराजन्यन्नःप्रश्नःकृतस्त्वया यथाब्रह्मण्यनि

४५ नमइतिकृष्णावतारायनारायणनमस्येति उक्तंहि एतेचांशकलाःपुंसःकृष्णस्तुभगवान्स्वयमिति ४६ साक्षात्पितुरि
तियानिवधानंविनाजनकस्य अग्निमथनावसरेकथंचिदरणौरेतःपतितंममंथव्यासस्ततोदेवततउत्पन्नःशुकइतिहिवदंति ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० समस्तवेदस्कात्यर्थसंगृह्यानुस्मारयति योस्योत्प्रेक्षक इति यः अस्यविश्वस्योत्प्रेक्षकः एवमिदमनुशायिनां समस्तपुरुषार्थसिद्धयेसृ
ष्टिस्थितिप्रलयादि प्रापणीयमित्यालोचक इत्यर्थः अनेन निमित्तत्वमुक्तं एवमालोच्यास्यादिमध्यनिधने आदिर्जन्म मध्यंपाल
नं निधनं अंतः एतेषु कर्मसु यावर्त्तते अनेनोपादानत्वमुक्तं ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वप्रसिद्धं सत्यं तत्तयोरप्येतदेवा ८२
कृतत्वान्मूलकारणं सत्वमेवेत्याह योव्यक्तजीवेश्वर इति प्रवेशनियमेन दर्शयति पूर्वोक्तप्रकारेण इदं सृष्ट्वा यदर्थमेतत्सृष्टं तेन ऋ
षिणा सृष्टं कार्यं अहमिति दर्शनात् ऋषिर्जीवः तेन सहानुप्रविष्टः पुरः शरीराणि तस्य भोगायतनानि चक्रे ताः पुरः शास्ति तस्य
भोगं ददत्परिपालयति उपासकस्य चेत्कैवल्यरूपो भवतीत्याह यं संपद्येति यं संपद्य प्राप्यानुशयी जन्तुर्देहं त्यजाण॥

योस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति
११८ ताः यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिं ५०
इति श्रीभागवते महापुराणे दशमस्कंधे सप्ताशीतितमोध्यायः राम राम राम राम राम राम

मेश्वरण मूलेशत इति तथा सजीवः अजां कार्यकारणलक्षणामविद्यां त्यजति ननु ब्रह्मसंपन्नस्यापि जीवतः संबंधो दृश्यते अ राम
त आह सुप्तः कुलायं यथेति अयं भावः यथा सुप्तः शरीरं वर्त्तमानमप्यपश्यंस्तत्तु नात्मानं तथा पश्यति एवं जीवन्मुक्तोप्यन्यदेह ११८
वृत्तं पश्यतीति स तु न किंचित्पश्यतीति तं हरिं अजस्रं अनवरतं ध्यायेत् किमित्यत आह अभयं न भयं यस्माद्भयनिवर्त्तकमित्य
र्थः कुत एतत् कैवल्यनिरस्तयोनिं कैवल्येन अप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिः मूलकारणं माया येन
तं सर्वश्रुतिशिरोरत्ननीराजितपदांबुजं भोगयोगप्रदं वंदे माधवं कर्मिनम्रयोः १ इति दशमे सप्ताशीतितमः ॥८७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अशीतितमे विष्णुभक्ताः कैवल्यमश्नुते ततो वाकुदेवभक्तस्य विभूतिमिति वर्ण्यते १ हरिभजितां मुक्तिदइत्युक्ते अभयं ध्यायेदजस्तं हरिमिति
तत्र शंकते देवासुरेति अशिवं अवधीरितभोगं भोजा भोगिनः लक्ष्म्याः पतिं सर्वभोगयुक्तं १ २ अन्यान्योपमर्देन तमसत्त्वं विधा त्रि
अहं २ लिंगः त्रिलिंगत्वमाह वैकारिक इति अहंकारः ३ विकारा मन इंद्रियभूतरूपाः षोडश तेषु इंद्रियदेवानां भेदविवक्षया कंचनेति
यत्किंचिद्विकारोपाधिकं भजन् उपाध्यनुरूपाणां विभूतीनां स्वरूपप्राप्तिमिति ४ उपद्रष्टा साक्षी सन् नियंता सर्वदृक् सर्वं पश्यति
अतः प्रकृतेः परः इति अंत्यदं तत्त्वतस्तेनागुणसंबंधरूपहृत्य मिहेष्यते तद्धर्मा योगायोगाभ्यां विवृतत्वप्रतिबिंबतः गुणाः सत्त्वादयः
शांतघोरमूढाः स्वभावतः ब्रह्मविष्णुशिवानां च गुणयंतृस्वरूपिणां नाति भेदो भवत् भेदो गुणधर्मेरिहाशतः सत्त्वस्य शांत्यानां

राजोवाच देवासुरमनुष्येषु ये भजंत्यशिवं शिवं प्रायस्ते धनिनो भोजा न तु लक्ष्म्याः पतिं हरिं १ एतद्वेदितुमिच्छामः
संदेहोऽत्र महान् हि नः विरुद्धशीलयोः प्रभ्वोर्विरुद्धा भजतां गतिः २ श्रीशुक उवाच शिवः शक्तियुतः शश्वत् त्रि
लिंगो गुणसंवृतः वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ३ ततो विकारा अभवन् षोडशामीषु कंचन उप
धावन् विभूतीनां सर्वासामश्नुते गतिं ४ हरिर्हि निर्गुणः साक्षात् पुरुषः प्रकृतेः परः स सर्वदृगुपद्रष्टा तं भजन् नि
र्गुणो भवेत् ५

जातु विष्णोर्विक्षेपमूढता रजस्तमोगुणाभ्यां तु भवतां ब्रह्मरुद्रयोः गुणोपमर्देनाभूयस्त्वदंशानां च भि
न्नतो अतः सुमयसत्त्वस्य विष्णोर्मोक्षकरो मतिः अंशतो भूतिहेतु अतः तथानंदमयोऽस्य वतः अंशतः स्मारतम्येन ब्रह्मरुद्रादिसविनां
विभूतयो भवंत्यवशेने मोक्षोऽप्यनंशतः इदमेवाभिप्रेत्य तत्र तत्रोच्यते श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युरिति तथा सत्त्वं तत्तीर्थ
साधनमिति तथा त्रयाणामेकभावानां यो न पश्यति वै भिदामिति तथा नेतमयः च्युते ऽजे च भिदामणवपि चक्षते इष्टत्यादि ५
वंचसति न किंचिदसमंजसं तत्त्वकृक्तानां गुकत्व हो मोहमात्रमिति ५ राम राम राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा॰उ॰ ७ यस्याहमनुगृह्णामीति अयमर्थः यो विषयानुपरि जिहीर्षुरपि कथं चिद्विद्यमानेषु सज्जते क्लिश्यति च तस्य विषयापहार एवानु
ग्रह इति यथाश्रुतं च वृत्रादीनामैश्वर्ये विरोधात् अथवा प्रथमविभूतिः काम नानुरूपा दत्त्वा शनैः विषयभोगावसाने च ५२
स्य निर्वेदमुत्पाद्य हरिष्यामि परमानुग्रहं कर्तुमिति तेदुक्तं भगवतेव नमत्यो विशिनधियां कामः कामाय कल्पत इति दुःख
पु दुःखितमिति दुःखितमिति दुःखादनु दुःखितमिव प्रतीयमानमित्यर्थः ८ सः पुनर्वधूनामाग्रहेण धनेहया प्रवृत्तो

निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः शृण्वन् भगवतो धर्मान् अपृच्छदिदमच्युतं ६ स आह भगवांस्तस्मै प्री
तः शुश्रूषवे प्रभुः नृणां निःश्रेयसार्थाय योऽवतीर्णो यदोः कुले ७ श्रीभगवानुवाच यस्याहमनुगृह्णामि ह
रिष्ये तद्धनं शनैः ततोऽधनं त्यजंत्यस्य स्वजना दुःखदुःखितं ८ स यदा वितथोद्योगो निर्विण्णः स्याद्धनेहया ९
११८ मत्परैः कृतमैत्रस्य करिष्ये मदनुग्रहं ए तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं सदनंतकं विज्ञायात्मतया धीरः संसारा
त्परिमुच्यते अतो मां सुदुराराध्यं हित्वान्यान् भजते जनः १० ततस्त आशुतोषेभ्यो लब्धराज्यश्रियोद्धताः म
त्ताः प्रमत्ता वरदान् विस्मरंत्यवजानते ११ ऋषिरुवाच शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः सद्यः शाप
प्रसादोंग शिवो ब्रह्मा न चाच्युतः १२ अत्र चोदाहरंतीममितिहासं पुरातनं वृकासुराय गिरिशो वरं दत्वाप संक
टं १३

पि मदनुग्रहेणायदानिः फलो धर्मो निर्विण्णः स्यात् तदा मदनुग्रहमिति ममासाधारणमनुग्रहं ए तं मे वाह तत्त्व ब्रह्मेति ९ गम
अतः पश्चादपि मोक्षमेरोचयन् अत्यासक्तो जन इत्यर्थः १० ११ एतदेवेतिहासेन स्पष्टयितुमाह शापप्रसादयोरिति १११
ब्रह्मा चेत्यन्वयः १२ १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ ११ म२

शकुनेः पुत्रः १४ ५ सुसंकटमापेकेल्ला सोत्पाटनंपुर पालनंच १६ स्वगात्रंउपाधावत् कथंआत्मकव्यणा स्वभासेनजुको
नइति १७ वृश्रतुच्छेत्तुमुद्यतः १८ मूर्तिमान ग्निरिवदीप्यमानः वयंअधुनानूनायथाकि चितुदुःखनकर्तुं कामचारयामः ॥
तद्दिति सचउपस्थितास्तुतिः परिपूर्णदेहो भवतान्पारयत् १९ एवमाहचाचोयिनापिभज तां प्रीतः स्यां सत्वयातु ८

वृकोनामासुरः पुत्रः शकुनेः पथिनारदं दृष्ट्वाः श्रुतोपप्रच्छदेवेषुत्रिषुदुर्मतिः १४ सआहदेवगिरिशमुपा
धावाशुसिध्यसि योल्पाभ्यांगुणदोषाभ्यामाशुतुष्यतिकुप्यति १५ दशास्यबाणयोस्तुष्टः स्तावतोर्बंदिनोरिवऐ
श्वर्यमतुलंदत्वाततआपसुसंकटं १६ इत्यादिष्टस्तमसुरउपाधावत्स्वगात्रतः केदारआत्मक्रव्येणजुह्वानोग्नि
मुखंहरं १७ देवोपलब्धिमप्राप्यनिर्वेदात्सप्तमेहनि शिरोवृश्चत्स्वधितिनातत्तीर्थक्लिन्नमूर्धजं १८ ॥
कल्हासत्यात्मक [illegible] सधजटिल्यथा १७ वयंचाग्निरिवोत्थितानलात् निगृह्यदोर्भ्यांभुजयोन्यवारयत्तत्
स्पर्शनाद्भूयउपस्कृताकृतिः १९ तमाहचांगालमलंवृणीष्वमेयथाभिकामंवितरामिवेतिवरं प्रीयेयत्तो
म४ यनन्णांप्रपद्यतामहत्वयात्माभृशंअर्दितेथा २० देवंसवव्रेपापीयान्वरंभूतभयावहं यस्ययस्यकरंशी
र्ष्णि धास्येसम्रियतामिति २१ तच्छ्रुत्वाभगवान्रुद्रोदुर्मनाइवभारत आमितिप्रहसंस्तस्मैददेहेःहरस्मयथा
२२ इत्युक्तःसोसुरान्ननंगौरीहरणलालसः सतद्वरपरीक्षार्थंशंभोर्मूर्ध्निकिलासुरः स्वहस्तंधातुमारभसो २२
विभ्यत्स्वेशात्तुछिवः २३ तेनोपसृष्टः संत्रस्तः पराधावत्सवेपथुः यावदंतंदिवोभूमेः काष्ठानामुदगादुदक् २४

होरथपाअत्तइति २० १ दातुमनर्हमपिदत्तवान्सर्पायक्षीरमिव २२ ३ उपसृष्टः ३ अनुगतः सनुउदगात्अन्वधावत् उ
दकुउत्तरतः २४

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० वैकुंठे स्वेन दीप्तं २५ ६ तं तत्कासुरं तथा व्यसनं तावद्दृक्व्यसनं यस्य तं वृजिनार्द्दनः दुःखहंता हरिः तथैव दृष्ट्वा २७ मेखलादिभिरुपलक्षितः
प्रत्युदियात् सन्मुखमागतः २८ व्यक्तं निश्चितं किमर्थं आत्मा देहः सर्वपुरुषार्थहेतुः अतो नापीडयेति २९ प्रायशः पुंभिर्धृतैर्वै

अजानन्प्रतिविहितं लेभे मासनु सुरेश्वरः तेतो वैकुंठमगमद्भास्वरं तमसः परं २५ यत्र नारायणः साक्षान्न्यासि-
नां परमा गतिः शांतानां न्यस्तदंडानां यतो नावर्त्तते गतः २६ तं तथा व्यसनं दृष्ट्वा भगवान्वृजिनार्द्दनः दूरात्प्रत्युदि-
यात्भूत्वा बटुको योगमायया २७ मेखलाजिनदंडाक्षैस्तेजसाग्निरिव ज्वलन् अभिवादयामास च तं कुशपा-
११२० णिर्विनीतवत् २८ श्रीभगवानुवाच शाकुनेय भवान्व्यक्तं श्रांतः किं दूरमागतः क्षणं विश्रम्यतां पुंस आत्मा-
यं सर्वकामधुक् २९ यदि नः श्रवणायालं युष्मद्व्यवसितं विभो भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीह-
ते ३० श्रीशुक उवाच एवं भगवता पृष्टो वचसामृतवर्षिणा गतक्लमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठितं ३१ श्रीभगवा-
नुवाच एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ३२ यदि वस्त-
त्र विश्रंभो दानवेंद्र जगद्गुरौ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां ३३ यद्यसत्यं वचः शंभोः कथंचिद्दान-
वर्षभ तदेनं जह्यसद्वाचं न यद्वक्तानृतं पुनः ३४ इत्थं भगवतश्चित्रैर्वचोभिः स सुपेशलैः भिन्नधीर्विस्मृतः शीर्ष्णि

न समीहते साधयितुमिच्छति अथवा जनः पुंभिः सहायैः स्वकार्याणि साधयति अतो नः कथ्यतामिति ३० १ पैशाच्यं पिशाचा- राम १२०
नामिव वर्त्ति ३२ ३ यत् यथा वक्ता वदिष्यति ३४ चित्रैः भ्रामकैः सुपेशलैः अभिरम्यैः भिन्नधीः भ्रंशितमतिः ३५ राम

३८ किमुवक्तव्यं विश्वेशेत्वयिकृतागाः कृतापराधइति ३९ अव्याकृतशक्त्युदन्वतः वाङ्मनसागोचरशक्तिसमुद्रस्यगिरित्रमोक्षः शिवमो
चनरूपंचरित्रंसंसृतिभिन्नानारूपसंचारैः ४० इतिदशमेऽष्टाशीतितमः नवाशीतितमेदेवः कोमहानितिसंशये परीक्ष्यविष्णुः

अथापतत्छिन्नशिरावज्राहतइवक्षणात् जयशब्दोनमःशब्दः साधुशब्दोभवद्दिवि २६ मुमुचुःपुष्पवर्षाणिहतेपा
पेवृकासुरे देवर्षिपितृगंधर्वामोचितःसंकटाच्छिवः २७ मुक्तंगिरिशमभ्याहभगवान्पुरुषोत्तमः अहोदेवमहादेवपा महादेव २
पोयंस्वेनपाप्मना २८ हतः कोनुमहत्स्वीशजंतुर्वैकृतकिल्बिषः क्षेमीस्यात्किमुविश्वेशेकृतागस्कोजगद्गुरो
३९ यएवमव्याकृतशक्त्युदन्वतः परस्यसाक्षात्परमात्मनोहरेः गिरित्रमोक्षंकथयेत्शृणोतिवाविमुच्यते
संसृतिभिस्तथारिभिः ४० इतिश्रीभागवतेभागवतेमहापुराणेदशमस्कंधेवृकवधमोक्षणंनामाष्टाशीतितमो
ध्यायः श्रीशुकउवाच सरस्वत्यास्तटेराजन्नृषयःसत्रमासत वितर्कःसमभूत्तेषांत्रिष्वधीशेषुकोमहान् १ तस्यजिज्ञासयातेवैभृगुंब्रह्मसुतंनृप तज्ज्ञप्त्यैप्रेषयामासुःसोभ्यगाद्ब्रह्मणःसभां २ नतस्मैप्रह्व
महान् १ तस्यजिज्ञासयातेवैभृगुंब्रह्मसुतंनृप तज्ज्ञप्त्यैप्रेषयामासुःसोभ्यगाद्ब्रह्मणःसभां २ नतस्मैप्रह्व ब्रह्म ३
णंस्तोत्रंचक्रेसत्वपरीक्षया तस्मैचुक्रोधभगवान्प्रज्वलन्स्वेनतेजसा ३ सआत्मन्युत्थितंमन्युमात्म
जायात्मनाप्रभुः अशीशमद्यथावह्निंस्वयोन्यावारिणाप्रभुः ४ राम राम राम राम राम राम

त्कर्षंमुनिभ्योवर्णयन्गुरुः १ इतिहासांतरमाह सरस्वत्याइति १ ३ स्वयोन्यास्वस्येवरूपांतरेणाभिव्यक्तिस्थानेनस्वकार्ये
णेत्यर्थः तेनयथाकश्चिद्वह्निंशमयतितथास्वकार्येणपुत्रेणनिमित्तेनक्रोधंशमयामासेत्यर्थः ४ राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ १८ तीर्थकारिणा तीर्थत्वनिमित्तेन ११ २ तस्य मंद्रगंभीरया गिरा निर्वृतस्तूष्णीं वभूवेति शेषः १३ ४ विस्मिता अपराधातिरेकेपि निर्विकारि
त्वेन भूयांसं श्रद्दधुः महत्त्वमनिश्चितवंतः यतः यस्मिन् १५ वैराग्यं च चतुर्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यं विषयास्त्य कुत्मशंकुवतो

२१ ततः कैलाससमागमत्सत्तं देवो महेश्वरः परिरब्धुं समारेभे उत्थाय भ्रातरं मुदा नैच्छत्त्वमस्युत्पथगा इति देवश्चुकोपह ५
शूलमुद्यम्य तं हंतुमारेभे तिग्मलोचनः पतित्वा पादयोर्देवी सांत्वयामास तं गिरा ६ अथाजगाम वैकुंठं यत्र देवो जनार्द
नः शयानं श्रिय उत्संगे पदा वक्षस्यताडयत् ७ तत उत्थाय भगवान् सह लक्ष्म्या सतां गतिः स्वतल्पादवरुह्या
शुननाम शिरसा मुनि ८ आह ते स्वागतं ब्रह्मन् निषीदात्रासने क्षणं अजानतामागतान्वः क्षंतुमर्हसि नः प्रभो ९
अतीव कोमलौ तात चरणौ ते महामुने इत्युक्त्वा विप्रचरणौ मर्दयन् स्वेन पाणिना १० पुनीहि सहलोकं मां लोक
पालांश्च मद्गतान् पादोदकेन भवतस्तीर्थानां तीर्थकारिणा ११ अद्याहं भगवल्लक्ष्म्या आसमेकांतभाजनं वत्स्यत्युर
सि मे भूतिर्भवत्पादहतांहसः १२ श्रीशुक उवाच एवं ब्रुवति वैकुंठे भृगुस्तन्मंद्रया गिरा निर्वृतस्तर्पितस्तूष्णीं भ
क्त्युत्कंठोऽश्रुलोचनः १३ पुनश्च सत्रमाव्रज्य मुनीनां ब्रह्मवादिनां स्वानुभूतमशेषेण राजन् भृगुरवर्णयत् १४ त
न्निशम्याथ मुनयो विस्मिता मुक्तसंशयाः भूयांसं श्रद्दधुर्विष्णुं यतः शांतिर्यतोऽभयं १५ धर्मः साक्षाद्यतो ज्ञा
नं वैराग्यं च तदन्वितं ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहं १६ राम राम राम राम राम रा॰

पि समानस्थानत्यागेनामाद्यं वैराग्यं ततो विषयाणां मध्ये त्वयातिरेकेणापि दृष्टानि हितानि यन्तथा तत्त्वावयमनसि रागोशैथिल्ये
न चाद्ये इंद्रियैरव विषयसेवनं तृतीयं तत्रापि औदासीन्यं चतुर्थं तथाहुः वैराग्यमाद्यं यतमानसंज्ञं व्यतिरेकसंज्ञः

[illegible] १२

१७ यस्यभगवतएव १८ यद्यपित्रिविधाआकृतयःनतुतासुसत्त्वमेवतीर्थसाधनंपुरुषार्थहेतुः १९ इत्थंनिःक्षिप्यनित्यंसंसारस्वतीतिरवासिनोविप्रा
हरिसेवयाभुक्तिंप्रापुरिति २० व्यासनंदनस्यमुखपंकजादुद्गतंगाधयुक्तेपीयूषतुल्यंहरेःप्रशस्तंयशोयःसंसारीसेवतेसमुक्तोभवतीति २१
सचोक्तेक्षणेभगवान्कृष्णएवेतिदर्शयितुमाख्यानांतरमाह एकदेति २२ ५ ब्रह्मद्विषइत्यादिकांतांगाथांवाक्यंमायिनेकेश्विद्धाषःश्रेतो

मुनीनांन्यस्तदंडानांशांतानांसमचेतसां अकिंचनानांसाधूनांयमाहुःपरमांगतिं १७ सत्त्वंयस्यप्रियामूर्तिर्ब्राह्मणास्त्वि
ष्टदेवताः भजंत्यनाशिषःशांतायंवानिपुणबुद्धयः १८ त्रिविधाकृतयस्तस्यराक्षसाअसुराःसुराः गुणिन्यामाय
यासृष्टाःसत्त्वंतत्तीर्थसाधनं १९ श्रीशुकउवाच एवंसारस्वताविप्रानृणांसंशयनुत्तमे पुरुषस्यपदांभोजसेवयातद्ग
तिंगताः २० सूतउवाच इत्येतन्मुनितनयास्यपद्मगंधपीयूषंभवभयभित्परस्यपुंसः सुश्लोक्यंश्रवणपुटैःपिबत्य
भीक्ष्णंपांथोध्वभ्रमणपरिश्रमंजहाति २१ बादरायणिरुवाच एकदाद्वारवत्यांतुविप्रपत्न्याःकुमारकः जातमात्रो
भुवंस्पृष्ट्वाममारकिलभारत २२ विप्रोगृहीत्वामृतकंराजद्वार्युपधायसः इदंप्रोवाचविलपन्नातुरोदीनमानसः २३
ब्रह्मद्विषःशठधियोलुब्धस्यविषयात्मनः क्षत्रबंधोःकर्मदोषात्पंचत्वंमेगतोर्भकः २४ हिंसाविहारंनृपतिंदुःशील
मजितेंद्रियं प्रजाभजंत्यःसीदंतिदरिद्रानित्यदुःखिताः २५ एवंद्वितीयंविप्रर्षिस्तृतीयंत्वेवमेवच विसृज्यसनृपद्वा
रितांगाथांसमगायत २६ तामर्जुनउपश्रुत्यकर्हिचित्केशवांतिके परेतेनवमेबाले ब्राह्मणंसमभाषत २७ किं
स्विद्ब्रह्मंस्त्वन्निवासेइहनास्तिधनुर्धरः राजन्यबंधुरेतेवैब्राह्मणाःसत्रमासते २८ राम राम राम राम

राजदोषेणैवमत्पुत्रान्म्रियंतइतिवारंवारंचुक्रोशेत्यर्थः २६ २७ ब्रह्मन्किंस्विदिति किमर्थंद्वारोदिषि यत्तस्त्वन्निवासेधनु
र्द्धमात्रोराजन्यबंधुरपिनास्तिब्रह्मण्यंतुकावार्त्ता एतेतुसत्रयागइवब्राह्मणामिलिताभवितुमर्हंतीत्यर्थः २८ राम राम

२

स्य ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं देवाह धनदारात्मजापृक्ता इति धनादिभिर्वियुक्ता यत्र येषु जीवत्सु शोचंति ते जीवंतिकं वलं जीविकां संपादयंति २९ हन्त कल्मष इति अग्नि
प्रवेशेन ब्राह्मणविलापश्रवणपातकात् पूतो भवेयमित्यर्थः अहं तं कल्मषश्चेदितिवा ३० १न श्रद्दध्महे न संप्रतीमः ३३ ४ एवं प्रोदितवादेवि

धनदारात्मजापृक्ता यत्र शोचंति ब्राह्मणाः तैवै राजन्यवेषेण नटा जीवंत्यसुंभराः २९ अहं प्रजां वां भगवन् रक्षिष्ये दीनयो
रिह अनिस्तीर्णप्रतिज्ञाग्निं प्रवेक्ष्ये हतकल्मषः ३० ब्राह्मण उवाच संकर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः अनि
रुद्धोऽप्रतिरथो न त्रातुं शक्नुवंति यत् ३१ तत्कथं नु भवान् कर्म दुःकरं जगदीश्वरैः चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्म
हे वयं ३२ अर्जुन उवाच नाहं संकर्षणो ब्रह्मन् न कृष्णः कार्ष्णिरेव च अहं वा अर्जुनो नाम गांडीवं यस्य वै धनुः ३३
२ मावमंस्था मम ब्रह्मन् वीर्यं त्र्यंबकतोषणं मृत्युं विजित्य प्रधने आनेष्ये ते प्रजां प्रभो ३४ एवं विश्रंभितो विप्रः फाल्गु
नेन परंतप जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन् ३५ प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः पाहि
पाहि प्रजां मृत्योरित्याहार्जुनमातुरः ३६ स उपस्पृश्य शुच्यंभो नमस्कृत्य महेश्वरं दिव्यास्त्राणि च संस्मृत्य स
ज्यं गांडीवमाददे ३७ न्यरुणत् सूतिकागारं शरैर्नानास्त्रयोजितैः तिर्यगूर्ध्वमधः पार्थश्चकार शरपंजरं ३८
ततः कुमारः संजातो विप्रपत्न्या रुदन् मुहुः सद्योऽदर्शनमापेदे सशरीरो विहायसा ३९ श्रीराम श्रीराम

विश्रंभितः विश्वासं प्रापितः निशामयन् शृण्वन् ३५ ३६ ब्राह्मणोपि केवलं नरुंधानवज्ञया महेश्वरं नमस्कृत्य ३७ न्यरुणात् राम
आवृतवान् तदेवाह तदेवाह तिर्यगूर्ध्वमिति ३८ आदर्शनमापेदे देहोपि नावशिष्ट इत्यर्थः ३९ १३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४० यस्यप्रजा॥४१॥ ४ प्रत्युक्तः वारितः उपपत्तिभिः प्रतिषेधंकुर्वन्॥४५ मावज्ञमात्मजानीहियेनिद्रंहतिततएवमनुष्याः नःकीर्त्तिस्थापयि
ष्यंतिनिश्चलोकारिष्यंतिपाठांतरंतुछेदोभंगोभयादागंतुकमिति ४६ ७ सप्तसप्तसंख्यागिरयायेषुद्वीपेषुतान् ४८ ५० कृतमि

नदाहविप्राविजयंविनिंदन्कृष्णसंनिधौ मोघंपरपनमेयाहंश्रद्धेयंवकत्थनं ४० नप्रद्युम्नोनानिरुद्धोनरामोनचकेशवः॥ क्री १
केशवः॥ यस्यशेकुःपरित्रातुंकोन्यस्तदवितेश्वरः ४१ धिगर्जुनंमृषावादंधिगात्मश्लाघिनोधनुः दैवोपसृष्टंयमो
ह्याददानिनीषतिदुर्मतिः ४२ एवंशपतिविप्रर्षौविद्यामास्थायफाल्गुनः ययौसंयमिनीमाशुयत्रास्तेभगवान्यमः
४३ विप्रापत्यमचक्षाणस्ततऐंद्रीमगात्पुरीं आग्नेयीनैऋतींसौम्यांवायव्यांवारुणीमथ रसातलंनाकपृष्ठंधि
ष्ण्यान्यन्यान्युदायुधः ४४ ततोलब्धद्विजसुतोह्यनिस्तीर्णप्रतिश्रुतः अग्निंविविक्षुः कृष्णेनप्रत्युक्तःप्रतिषेध कृ
ता ४५ दर्शयेद्विजसूनुंस्तेमावज्ञात्मानमात्मना येनेहिकीर्तिविमलामनुष्याःस्थापयंतिनः ४६ इतिसंभाष्यभ
गवानर्जुनेनसहेश्वरः दिव्यंस्वरथमास्थायप्रतीचीदिशमाविशत् ४७ सप्तद्वीपान्सप्तसिंधून्सप्तसप्तगिरीनथ
लोकालोकंतथातीत्यविवेशसुमहत्तमः ४८ तत्राश्वाःशैब्यसुग्रीवमेघपुष्पवलाहकाः तमसिभ्रष्टगतयोबभू -
वुर्भरतर्षभ ४९ तान्दृष्ट्वाभगवान्कृष्णोमहायोगेश्वरेश्वरः सहस्रादित्यसंकाशंस्वचक्रंप्राहिणोत्पुरः ५०
तमःसुघोरंगहनंकृतंमहद्विदारयद्भूरितरेणरोचिषा मनोजवंनिर्विविशेसुदर्शनंगुणच्युतोरामशरोयथाचमूः ५१
द्वारेणचक्रानुपथेनतत्तमःपरंपरंज्योतिरनंतपारं समश्नुवानंप्रसमीक्ष्यफाल्गुनःप्रताडिताक्षोपिदधेक्षिणी
उभे ५२
तिप्रकृतिपरिणामरूपेणालोकाभावमात्रं ५१ चक्रानुपथेनचक्रमनुगतेनद्वारेणतत्तमःपरंतस्मात्तमसःपरंदूरेवर्त्तमानं
परंश्रेष्ठंभागवतंज्योतिः समश्नुवानंव्याप्नुवत् प्रसमीक्ष्यप्रताडिताक्षोनेत्रेन्यमीलयदिति ५२ राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एजंतः उच्चलंतः वृहंतः महांतः ऊर्मयो भूषणं यस्य तत् तत्र सलिले भवनं महाकालपुरे द्युमत्तमं द्युमत्सु श्रेष्ठं ५३ सहस्रमूर्द्धि
भवाः फणाः तासु मणयः तेषां द्युतिभिः द्विसहस्रनेत्रैरूर्जितं स्फटिकगिरिसंकाशं शितिकंठजिह्वं कंठः अजिह्वाश्च शितयः

ततः प्रविष्टः सलिलं नभस्वता बलीयसैजद्बृहदूर्मिभीषणं तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्र
शोभितं ५३ तस्मिन्महाभीममनंतमद्भुतं सहस्रमूर्द्धन्यफणामणिद्युभिः विभ्राजमानं द्विगुणोल्बणेक्षणं
सिताचलाभं शितिकंठजिह्वं ५४ ददर्श तद्भोगसुखासनं विभुं महानुभावं पुरुषोत्तमोत्तमं सांद्रांबुदाभं
सुपिशंगवाससं प्रसन्नवक्त्रं रुचिरायतेक्षणं ५५ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसह
१२३ स्रकुंतलं प्रलंबचार्वष्टभुजं सकौस्तुभं श्रीवत्सलक्ष्म्या वनमालयावृतं ५६ सुनंदनंदप्रमुखैः स्व
पार्षदैः चक्रादिभिर्मूर्त्तिधरैर्निजायुधैः पुष्ट्या श्रिया कीर्त्यजया खिलर्द्धिभिर्निषेव्यमानं परमेष्ठि
नां पतिं ५७ ववंद आत्मानमनंतमच्युतो जिष्णुश्च तद्दर्शनजातसाध्वसः तावाह भूमा परमेष्ठि
नां प्रभुर्बद्धांजली सस्मितमूर्जया गिरा ५८

नीलाः कंठजिह्वा यस्य तत् ५४ तद्भोगसुखासनं तस्य अनंतस्य भोगो देहः सुखकरमासनं यस्य तं ५५ महांतो मणिव्राता येषु राम
तेषां किरीटकुंडलानां प्रभातया परिक्षिप्ताः सर्वे स्फुरंतः सहस्रमपरिमिताः कुंतला यस्य तं ५६ कीर्त्यजया कीर्ति १२३
सहितया अजया अखिलर्द्धिभिः अणिमादिविभूतिभिः मूर्त्तिधराभिः ५७ ऊर्जितयापि गिरा ५८ राम राम राम

त:२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तासां स्तनेभ्यो विषज्जितं कुंकुमस्त्रां यस्य सः क्रीडायाः अभिषंगेण अभिनिवेशेन धुतः कंपितः कुंतलवृंदबंधो यस्य सः ११ मुकुंदे कधियः
समाहितात् इव क्षणमागाः सत्सः पुनः स्तमेव शंतिं तं यत्या जडं यथा भवति तथा यानि वाक्यानि ऊचुः तानि मे मत्तो गदतः १ शृ ... त्यर्थः १
१४ ईश्वर १ श्रीकृष्णः स्वपिति त्वं तु निद्राभंगं कुर्वती विलपसि न शेषं न स्वपिषि तदनुचिंतमित्यर्थः १ अथवा नापराधस्तवापीत्य

कृष्ण स्तनलग्न विषज्जित कुंकुमस्रक् क्रीडाभिषंग धुत कुंतलवृंदबंधः सिंचन् मुहुर्युवतिभिः प्रतिसिच्यमानो रेमे करेणुभिरिवेभपतिः परीतः ११ नटानां नर्तकीनां च गीतवाद्योपजीविनां क्रीडालंकारवासांसि कृष्णोऽदात्तस्य च स्त्रियः १२ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः नर्मक्ष्वेलिपरिष्वंगैः स्त्रीणां किल हृता धियः १३ ऊचुर्मुकुंदैकधियो गिर उन्मत्तवज्जडं चिंतयंत्योऽरविंदाक्षं तानि मे गदतः शृणु १४ श्रीमहिष्य ऊचुः कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः वयमिव सखि कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन १५ नेत्रे निमीलयसि नक्तमदृष्टबंधुस्त्वं रोरवीषि करुणं बत चक्रवाकि दास्यं गता वयमिवाच्युतपादजुष्टां किं वा स्रजं स्पृहयसे कबरेण वोढुं १६ भो भोः सदा निष्टनसे उदन्वन्नलब्धनिद्रोऽधिगतप्रजागरः किं वा मुकुंदापहृतात्मलांछनः प्राप्तां दशां त्वं च गतो दुरत्ययां १७ राम राम राम राम राम रा

शयनाहः नलिननयनस्य हासेन सहितं उदारं यल्लीलेक्षितं तेन कच्चिद्गाढं निर्भिन्नचेतास्त्वमिति १५ नक्तं रात्रावदृष्टबंधुः स
तीरारवीषि किं किं वा नेत्रावदपि नु वय ... मिव स्पृहायसे १६ अलब्धनिद्रः सदा निष्टनसे क्रोशसि किं वा अस्मा ... भिः
प्राप्तां दशां त्वमपि गतोऽसि अहो कष्टं यथा वयं संभोगेन मुकुंदाहृत कुंकुमादिलांछनाः तथा त्वमपि यतोऽपहृतश्रीकौस्तुभादि

प

गतनिद्रः २

१०३० मुकुंदगदितानि रहस्यानि विस्मृत्य तदेकचिंतयाकथिलं क्षिणोसि वयमिव स्थगितगीतस्तु घवाकुहेइ दोनस्तेथं वापल क्षपम
१८ अप्रियाचरणं विनास्मेरादारेण नव्यथाजननं मलयानिलं वानुचिंतमित्यर्थ १९ मेघ तिश्रांतपान्तिहरणादिस मान्या
नूं त्वयादेवंद्रस्य नूनं दयितः सस्वासि अतो भवांस्त ध्यायति ध्यानलिंगान्याहु उत्सुलुकं ठ इत्यादि अहो किमिति त्वं याचनसं ३१

त्वं यक्षमणावलवत्तासि गृहीतइंद्रो क्षीणस्तमान निजदीधिति भिक्षीणोषि कोश्रिन्मुकुंदगदितानि यथा वयं त्वं
विस्मृत्य भास्थगितगीरूपलक्ष्यसेन १८ किंवाचरितमस्माभिर्मलयानिल ते उप्रियं गोविंदापांगनिभिंन्ने
हृदीरयसि नः स्मरं १९ मेघश्रीमंस्त्वमसि दयितो यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवान् ध्यायति
प्रेमबद्धः अत्युत्कंठः शबलहृदयोस्मद्विधो वाष्पधारास्मृत्वास्मृत्वा विसृजसि मुहुर्दुःखदस्तत्प्रसं
.२५ गः २० प्रियरावपदानि भाषसे मृतसंजीविकयानया गिरा करवाणि किमद्य ते प्रियं वद मे वल्गितकं
ठकोकिल २१ न चलसि नवदस्युदारबुद्धे क्षितिधर चिंतयसे महांतमर्थं अपि वत वसुदेवनंदनां
घ्रिं वयमिव कामयसे स्तनैर्विधर्तुं २२ राम राम राम राम राम राम राम राम राम

खकृतं यतो दुःखदस्तत्प्रसंगः इति २० हे कोकिल प्रियरावस्य प्रियंवदस्य श्रीकृष्णस्य पदानि शब्दांस्त्वं भाषसे मृतान् राम
संजीवयतीति तथा तयानया कोमलया गिरा वल्गितकंठ रमणीय कंठ मे कथय किं तव प्रियं करवाणीति २१ हे क्षितिध १२५
र त्वं न वदसि न चलसि अतो नूनं महांतमर्थं चिंतयसे वत ते हि अपि किं वयं यथा स्तनैर्विधर्तुं कामयामहे तथा
त्वं स्तनतुल्यैः शृंगैर्वोढुं कामयसे ओं मिति चेत् हि तवाप्यस्मदवस्था भविष्यतीति भावः २२ राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेकलावतीर्णाविति संबोधनं शीघ्रमेवांतिसकाशं इतं आगच्छतं ५९ आचरतां आचरतं इदं तु भारतयुद्धात् पूर्वमेव कृतमपि
श्रैष्ठ्यकथनप्रस्तावनान्तेवोक्तं ६० ६६ इति दशमे एकोननवतितमोध्यायः चरमे तु पुनः प्रोक्ता कृष्णलीला समासतः ॥

द्विजात्मजा मे युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये कलावतीर्णाववनेर्भरासुरान् हत्वेह भूयस्त्व
रयेतमंतिमे ५९ पूर्णकामावपि युवां नरनारायणावृषी धर्ममाचरतां स्थित्यै ऋषभौ लोकसंग्रहं ६० इत्या
दिष्टौ भगवता तौ कृष्णौ परमेष्ठिना ॐ मित्यानम्य भूमानमादाय द्विजदारकान् ६१ न्यवर्त्ततां स्वकं धाम सं
८४ प्रहृष्टौ यथागतं विप्राय ददतुः पुत्रान् यथारूपं यथावयः ६२ निशम्य वैष्णवं धाम पार्थः परमविस्मितः यत्कि
ञ्चित्पौरुषं पुंसां मेने कृष्णानुकंपितं ६३ इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन् बुभुजे विषयान् ग्राम्यान्
ईजे चात्यूर्जितैर्मखैः ६४ प्रववर्षाखिलान् कामान् प्रजासु ब्राह्मणादिषु यथाकालं यथैवेंद्रो भगवान् श्रैष्ठ्य
मास्थितः ६५ हत्वा नृपानधर्मिष्ठान् घातयित्वार्जुनादिभिः अंजसा वर्त्तयामास धर्मं धर्मसुतादिभिः ६६
इति श्रीभागवते महापुराणे दशमस्कंधे द्विजकुमारहरणं नामैकोननवतितमोध्यायः श्रीशुक उवाच
सुखं स्वपुर्यां निवसन् द्वारकायां श्रियः पतिः सर्वसंपत्समृद्धायां जुष्टायां वृष्णिपुंगवैः १ श्रीराम

यदुवंशप्रसूतानामानंत्यं च सकारणं श्रीकृष्णविभूतिं समासेन दर्शयति सुखं स्वपुर्यामिति सर्वसंपदादिविशिष्टायां १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा०उ० श्रियःपतिः षोडशसहस्रपत्नीनामेकवल्लभः सनुतासांगेहेषुरेमइत्यन्वयः ५ गेहविशेषणंप्रोत्फुल्लेत्यादिश्लोकेन ६ तथाह
दिनीषुचञ्चभोविगाह्यविजहार महानुदयोवैभवंयस्यसः योषितांकुचकुंकुमैर्लिप्तांगः यस्तेनताभिःपरिरब्धः ७ स्रग

स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः कंदुकादिभिर्हर्म्येषुक्रीडंतीभिस्तडिद्युभिः २ नित्यंसंकुलमार्गायांम
२श्लो२ दच्युद्भिर्मतंगजैः स्वलंकृतैर्भटैरैरथैश्चकनकोज्ज्वलैः ३ उद्यानोपवनाढ्यायांपुष्पितद्रुमराजिषु निर्विशद्भृंगवि
हंगैर्नादितायांसमंततः ४ रेमेषोडशसाहस्रपत्नीनामेकवल्लभः तावंतिविचित्ररूपाणितद्गृहेषुमहर्द्धिषु ५ विचित्र
१२४ प्रोत्फुल्लोत्पलकल्हारकुमुदांभोजरेणुभिः वासितामलतोयेषुकूजद्द्विजकुलेषुच ६ विजहारविगाह्यां
भोह्रदिनीषुमहोदयः कुचकुंकुमलिप्तांगःपरिरब्धश्चयोषितां उपगीयमानोगंधर्वैर्मृदंगपणवानकान् ८
वादयद्भिर्मुदावीणांसूतमागधवंदिभिः ७ सिच्यमानोच्युतस्ताभिर्हसंतीभिःस्मरेचकैः प्रतिसिंचन्
विचिक्रीडयक्षीभिर्यक्षराडिव ८ ताःक्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचित्यउद्धृतरहत्कवरप्रसूनाः को
तंस्मरेचकजिहीर्षुतयोपगूह्यजातस्मरोत्सवलसद्वदनाविरेजुः १० राम राम राम राम राम

मागधवंदिभिश्चोपगीयमानः ७ ताःक्लिन्नवस्त्राःअतएवविवृतोरुकुचप्रदेशाः उद्धृतानिविस्रस्तानिकहत्कवरेभ्यःप राम
सूनानियासांताः जातेनस्मरेणउत्सवः तेनलसंतिवदनानियासांताः १० राम राम राम राम राम राम १२४
यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भो सिंधुपत्न्यः नद्यः संप्रति ग्रीष्मे सिंधुर्मेघधारा अमृतवृष्ट्या युष्मान्नानंदयति विवत अहो कष्टं अतः शृण्वंतीनां हंसाया सांता अ
पगताः कमलश्रीभाः कृशाः अवयं यथाप्रियनमस्य भर्तुर्मधुपतेः समप्रसिद्ध २३ तदेवं देवाद्दागतं हंसं दृष्ट्वा कोऽलापयित्वाह हंसे
ति नः अस्मान् प्रति पुरा रहसि उक्तं किं वा चलसो हृदः स्मरति स्मर्तव्यमेवं मां प्रस्थापितवानिति चित्तं अतः आह हे क्षौद्र क्षौद्रस्य
दूत कस्मात् त्वं वयं भजामः कामार्थमाकयति युष्मदाज्ञेति चित्तं आह अहो न हि तं इहालापय अकारयतु मिति गच्छत
मिवंतपुनराहुः यास्मान्वंचयित्वा एकाकिनी रमंतं तां श्रियमेतेन तं मे कमेवालापयामास तदेकनिष्ठाकथं परिहृत्य शृ

शृण्वद्व्रताः कर्शिता वत सिंधुपत्न्यः संप्रत्यपास्तकमलश्रिय इष्टभर्तुः यद्वद्वयं यदुपतेः प्रणायावलोक
मप्राप्य मुष्टहृदयाः पुरुकर्शिताः स्म २३ हंस स्वागतमास्यतां पिब पयो ब्रूह्यंग शौरेः कथां दूतं त्वां नु विदाम
कच्चिद्जितः स्वस्त्यास्त उक्तं पुरा किं वा नश्चलसौहृदः स्मरति तं कस्माद्भजामो वयं क्षौद्रालापय कामदं
श्रियमृते सैवैकनिष्ठा स्त्रियां २४ इतीदृशेन भावेन कृष्णे योगेश्वरेश्वरे क्रियमाणेन माधव्यो लेभिरे प
रमां गतिं २५ श्रुतमात्रोऽपि यः स्त्रीणां प्रसह्याकर्षते मनः उरुगायोरुगीतो वा पश्यंतीनां कुतः पुनः २६

कथतइतिचेत् अतः आहुः स्त्रियां जातावेकवचनं अस्मासु स्त्रीमध्ये किं सैवैकनिष्ठानतु वयमित्यर्थः पाठांतरे क्षौद्रमधुत
इत्यं मधुरालापमात्रं यस्य तं आकामदं अरतिप्रदं श्रियमृते वयं कस्माद्भजामः किंतु अनादृतापि सत्ती पुनः पुनः से
वे भजतु यतोऽस्माद्दृश्यो मानिन्यः स्त्रियः एकनिष्ठाः एकत्रैव वर्त्तमाना सिद्धा निष्ठायासामिति २४ तासां कृष्णे एवं भू
तो भावो नाति विचित्र मित्याह श्रुतमात्रोऽपीति गुरुभिर्गायते गीतेः उरुधा गीतो वा यो कश्चिदपि गीतैर्यथा कथंचि
दपि गीतो वेत्यर्थः २६

सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२७ पदं स्थानं २८ याः रुक्मिणीप्रमुखा अष्टौ ता उदाहृताः ॥ प्रागेव ३० एवमष्टोत्तरशताधिकषोडशसहस्रमहिषीणां पुत्राः ॥ लक्ष
मेकमशीत्युत्तरैकषष्टिसहस्राणि च भवंति अनिरुद्धश्चेति अतः पुत्राणां मध्ये सप्तदश एव ज्ञेयाः अथवा अनिरुद्धेनोमापि क

याः संपर्यचरन्प्रेमाणा पादसंवाहनादिभिः ॥ जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः ॥ २७ एवं वेदोदितं धर्ममनु
तिष्ठन्सतां गतिः ॥ गृहं धर्मार्थकामानां मुहुश्चादर्शयत्पदं ॥ आस्थितस्य परं धर्मं कृष्णस्य गृहमेधिनां २८ आ
सन्षोडशसाहस्रं महिष्यश्च शताधिकं तासां स्त्रीरत्नभूतानामष्टौ याः प्रागुदाहृताः ॥ २९ रुक्मिणीप्रमुखा रा
जन्तत्पुत्राश्चानुपूर्वशः ॥ एकैकस्यां दश दश कृष्णोऽजीजनदात्मजान् ३० यावंत्य आत्मनो भार्या ह्यमोघगतिरी
श्वरः ॥ तेषामुद्दामवीर्याणामष्टादश महारथाः ॥ ३१ आसन्नुदारयशसस्तेषां नामानि मे शृणु प्रद्युम्नश्चा
निरुद्धश्च दीप्तिमान्भानुरेव च शांबो मधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ॥ ३२ पुष्करो वेदबाहुश्च श्रुतदेवः ॥
सुनंदनः चित्रभानुर्विरूपश्च कविर्न्यग्रोध एव च एतेषामपि राजेंद्र तनूजानां मधुद्विषः ॥ ३३ प्रद्युम्न आ
सीत्प्रथमः पितृवद्रुक्मिणीसुतः ३४ स रुक्मिणो दुहितरमुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्ना
गायुतबलान्वितः ॥ ३५ स चापि रौक्मिणः पौत्रीं दौहित्रो जगृहे ततः वज्रस्तस्याभवद्यस्तु मौशलादव
शेषितः ३६ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्य चात्मजः ॥ सुबाहोः शांतसेनोऽभूच्छतसेनस्तु तत्सुतः ॥ ३७ न
ह्येतस्मिन्कुले जाता अधना अबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ३८ यदुवंशप्रसू
तानां पुंसां विख्यातकर्मणां संख्या न शक्यते कर्तुमपि वर्षायुतैर्नृप ३९ तिस्रः कोट्यः सहस्राणामष्टाशीतिश राम
तानि च आसन्यदुकुलाचार्याः कुमाराणामिति श्रुतं ४० १२६

त्रिपुत्र एवेति ३१ ३९ सहस्राणामपरिमितानां कुमाराणामित्य
न्वयः ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदाप्रत्येकंबहूनध्यापयतामाचार्याणामियंसंख्यातदपिश्रुतमात्रंनतुसम्यग्ज्ञायते तदाकुमाराणामेवसंख्यानंकर्त्तुंनशक्यतेकु
तःपुनःसर्वेषांयादवानामिति ४२ तेचोत्पन्नाइतिप्रत्येकंबहुभीरूपैरितिशेषः ४३ एवमेवयदुकुलेपिदेवाइतितथाचोक्तंसहस्र
शःसंभूतादेवायदुकुलेपृथगिति ४४ तस्मात्कृष्णकीर्तिःसर्वतीर्थोत्तमत्वंकृष्णस्यचसैवेदंवोत्तममत्त्वनचित्रमित्याह
तीर्थंचक्रेइति इतःपूर्वंस्वःसरिदेवसर्वतोधिकंतीर्थमित्यासीत् इदानींतुयदुषुयदजनिजातंतीर्थंश्रीकृष्णकीर्तिरूपपवि
मा २ त्रंस्वःसरिद्रूपंपादशौचंतीर्थंकृतवत्यत्रचक्रेस्वयमेवसर्वतीर्थोपरिविराजतइत्यर्थः श्रीकृष्णस्यविद्विषः स्निग्धाश्चतत्सा
रूप्यंययु रित्यपिनातिचित्रंतस्यपरमकारुणिकत्वात् तथाइदंचनचित्रंकिंतत् अजितपराअजितोकेश्रीरप्यप्राप्ता

संख्यानंयादवानांकःकरिष्यतिमहात्मनां यत्रायुतानामयुतलक्षेणास्तेसआहुकः ४१ देवासुराहवहतादैतेयाः
सुदारुणाः तेचोत्पन्नामनुष्येषुप्रजादृप्ताबबाधिरे ४२ तन्निग्रहायहरिणाप्रोक्तादेवायदोःकुले अवतीर्णाःकुल
शतंतेषामेकाधिकंनृप ४४ तेषांप्रमाणंभगवान्प्रभुत्वेनाभवद्धरिः येचानुवर्तिनस्तस्यववृधुःसर्वयादवाः ४५
शय्यासनाटनालापक्रीडास्नानाशनादिषु नविदुःसंतमात्मानंवृष्णयःकृष्णचेतसः ४६ तीर्थंचक्रेनृपोनंयदज
नियदुषुस्वःसरित्पादशौचंविद्विट्स्निग्धाःस्वरूपंययुरजितपराश्रीर्यदर्थेन्ययत्नः यन्नामामंगलघ्नंश्रुतमथगदि
तंयत्कृतोगोत्रधर्मःकृष्णस्यैतन्नचित्रंक्षितिभरहरणंकालचक्रायुधस्य ४७ राम राम राम राम

परासर्वतःपरिपूर्णाश्रीःकृष्णस्यैवनान्यस्येति तदेवाह यदर्थेअन्येषांब्रह्मादीनांयत्नइति ननुरूपक्षंतमेवलक्ष्मीःश्रीयतइतिचित्रमिवे नि १
तिचेत् नहिपरममंगलनामधेयत्वात्तस्येत्याह यन्नामेति तदपिनार्थस्मरणापेक्षमित्याह श्रुतमथगदितमिति सर्वधर्मा
श्रयत्वादप्याह यत्कृतोगोत्रधर्मइति गोत्रेषुतत्तद्विवशेषुधर्मायत्कृतःयेनप्रवर्तिताः तस्यक्षितिभरहरणंनैवचित्र
मित्याह कृष्णस्येतदिति कालचक्रायुधस्येतिसर्वसंहारककालमूर्तेःविशेषतोदुरंतप्रभावचक्रायुधस्यकियदेतदित्यर्थः ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतएवंभूतः श्रीकृष्णः ततः सएवसर्वोत्तमइत्याह जयतीति जनानां निवासः आश्रयः तेषुवानिवसति अंतर्यामितयातथासकृ
त्‌भाजयति देवक्यांजन्मेतिसंवादमात्रंयस्यसः पर्षत्सभा सेवककृपायस्यइच्छामात्रेण निरसनसमर्थोपिक्रीडा
र्थंदोर्भिरधर्ममस्यन्‌क्षिपन्‌ स्थिरचरवृजिनघ्नः अधिकारिविशेषानपेक्षमेववृंदावनगतत्तरुलतादीनांसंसार

जयतिजननिवासोदेवकीजन्मवादोयदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं स्थिरचरवृजिनघ्नः सुस्मितश्री
मुखेनव्रजपुरवनितानांवर्द्धयन्‌कामदेवं ४८ इत्थंपरस्यनिजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरू
पविडंबनानि कर्माणिकर्मकषणानियदूत्तमस्यश्रूयादमुष्यपदयोरनुवृत्तिमिच्छन्‌ ४९

दुःखंहंता तथाविलासेवेदप्रधानपेक्षंव्रजवनितानांपुरवनितानांचसुस्मितेन श्रीमत्तासुखेनेवकामदेवंवर्द्धयन्‌काम
श्रासोदीव्यतिविजिगीषतिसंसारमितिदेवस्तंभागद्वारामोक्षपदमित्यर्थः ४८ राम राम राम राम राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भा० द० ३०

...तत्कार्यविशेषैः स्वीकृतमर्त्यकर्मोदिनानामूर्त्तेर्विशेषतो यदुत्तमस्य सतः परस्य तदनुरूपानुकारीणि कर्मकर्षणानि
कर्माणि चरितानि शृण्वन् शृणुयादित्यर्थः ४९ अनुवृत्तेः फलमाह मर्त्य इति श्रीमत्याः कथायाः श्रवणकीर्तनयुक्ता
या चिंतया संवर्द्धितयानुवृत्त्यानेयात्त्रिःस्वत्वेन तस्य धाम लोकमेति लोकत्वेपि कालेनाकलितमित्याह दुरंतेति १२८

मर्त्यस्तयानुसवमेधितया मुकुंद श्रीमत्कथाश्रवणकीर्तनचिंतयैति तद्धाम दुस्तरकृतांतजवापवर्गं ग्रा
माद्वनं क्षितिभुजोपि ययुर्यदर्थाः ५० चित्रं न चैतदनुगायपवित्रलीलाविध्वस्तकल्मषकदंबकमु
क्तिरूपं श्रीणां सुदुस्त्यजकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोपि ययुर्यदर्थाः ५१ इति श्रीभा
१२८ गवते महापुराणे दशमस्कंधे श्रीकृष्णलीलाचरितानुवर्णने नवतितमोध्यायः श्रीकृष्णाय नमः

...नपुरुषार्थमाहात्म्यमादिति ५० १ इति श्रीश्रीधरस्वामिविरचितायां दशमस्कंधटीकायां श्रीभागवतभावार्थदीपिका
यां नवतितमोध्यायः शके १७१० कीलकनाम संवत्सरे आषाढमासे कृष्णपक्ष दशम्यां दिनि समाप्तं हस्ताक्षर मुकुंद भट राविके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दादशस्कंध
पारे [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection